

Almira 2
shelf 1
13

2



बृहन्नारदीयम्
उपपुराणम्
व्यास:
क्र.सं.-८

श्री बृहन्नारदीयमुपपुराणम् प्रारभ्यते।

२११८

॥ * अथ बृहन्नारदीयमुपपुराणं प्रारभ्यते * ॥

अस्य ग्रन्थस्य पुनर्मुद्रणाधिकारः आंग्लराजकीयेन तदीय १८६७ तमसांवत्सरिक २५ तमनियमानुसारेण प्रकाशकाधीनः ।

रु. १५०/-

यह ग्रन्थ खेमराज श्रीकृष्णदासने बंबई खेतवाडी ७ वीं गली खम्बाटा लेन, स्वकीय "श्रीवेङ्कटेश्वर" स्टीम् प्रेसमें अपने लिये छापकर यहीं प्रकाशित किया ।


शौनकादि ऋषी:
सूत
शेषशायी
नारद
सनक-सनंदन सनातन
सनत्कुमार.

धन्यवादाः

अस्माभिरेतच्छ्रीनारदीयपुराणमुद्रणावसरे येभ्यः श्रीमहोदयेभ्यः पुस्तकान्युपलब्धानि तेभ्यो नामानिर्देशपूर्वकं धन्यवादाः प्रदीयन्ते ॥ १ शिवहरसंस्थानश्रीमहाराजाः सूर्यनंदनसिंहबहादुराह्वाः, २ भिवानीनगरनिवासिनो वैद्यराजमुरलीधरमिश्रपंडिताः, ३ अमृतसरनगरनिवासिनः श्रीमट्ठाकूर महान्चंद्रजीमहाशयाः। पूर्वोक्तैः सकलविद्वन्मंडलसभाजितविद्वत्त्वचातुर्यसमलंकृतैरनन्तौदार्यादिगुणभूषितैरेतैर्महाशयैरनन्तपरिश्रमेण संपादितानि पुराणपुस्तकानि मुद्रिणमन्तरा कथं प्रसिद्धिमाप्नुयुरिति मन्यमानैः परोपकारबुद्ध्याऽस्मदभ्यर्थनया च प्रेषितानि । यत्साहाय्येनेदं पुराणं मुद्रितं सर्वेषां सुलभमभूत । सर्वेषामेतद्ग्रंथसंग्रहीतॄणां सम्यक्श्रवणपठनलब्धसद्बुद्ध्युद्रेकाचरितनिजधर्मसमृद्धैरैहलौकिकपारलौकिकसुखलब्धिरेतन्महाशयमूलिकैवेति सहर्षं धन्यवादाः प्रदीयन्ते । उपरिनिर्दिष्टश्रीमट्ठाकूरमहान्चंद्रजीनामभिः अद्यावधि बहुवारं प्राचीनलिखितानि पुस्तकानि प्रेषितानि अत एभ्यो भूयोऽपि शतशो धन्यवादाः--

दृष्ट्वा वः परकार्यसाधनरुचिं मन्यामहे भूयशो भूयाद्वः सततं महोदयकरः सर्वोऽनुकूलः क्षणः ॥
ग्रंथप्रेषणया ममोपरि दया संवर्धतां भूयसी तस्मात्कीर्तिरहर्निशं विहरतु प्रत्येककर्णान्तिके ॥ १ ॥

वारंवारमीदृक्प्राचीनग्रंथमुद्रणावसरे स्वसंगृहीतग्रंथप्रेषणेन वयमनुग्राह्या महद्भिरित्यलं विशेषोल्लिखितेनेति शम् ॥

श्रीमतां निरंतरप्रेमाभिलाषी–

खेमराज श्रीकृष्णदास, अध्यक्ष "श्रीवेङ्कटेश्वर" स्टीम्–यन्त्रालय–मुंबई.

प्रस्तावना ।

अद्य खलु महान् संतोषः प्रभवति सर्वेषां श्रीमज्जनानामग्रे कथयितुम्। यद्भगवान् परमेशो निजवाञ्छयाखिलं भुवनमुत्पाद्य तच्छिक्षणार्थं वेदान् शास्त्राणि च प्रवर्तयामास। यदाज्ञया सर्वेऽपि जनाः स्वस्वकर्माणि यथावत्संपाद्य तनुग्रहणसार्थकतां प्रापुः। ततो गते च बहुतिथे काले विनष्टे च वैदिकधर्मे महता कलिदोषेण जना निश्चयेन मंदबुद्धयो भविष्यन्तीत्येवं विचार्य परमकारुणिको भगवान् व्यासरूपेणोदियाय। स च श्रीमन्महाभारतमष्टादशपुराणानि तथोपपुराणानि च वेदार्थोपबृंहणाय निरमात्। तानि सुप्रसिद्धान्येव सन्ति। यत्र च दृष्टान्तदार्ष्टान्तिककथाप्रकाशनेन वेदार्थ एव मुख्यतयोपबृंहितः। तेषां पुराणानां मुख्यविषयाश्च सर्गप्रतिसर्गमन्वन्तरवंशानुकथनात्मकाः। तत्संबंधेन बहुविधक्षेत्रगिरिनदीवनादीनां देवर्षिगंधर्वादीनां च सविस्तरं कथाः समुपवर्णिताः। यच्छ्रवणेन सर्वेषां निरतिशयसुखप्राप्तिपूर्वकं मोक्षसुखं जन्मसाफल्यकरं निश्चयेन भविष्यति। भगवतेदृशी भूतले महापुराणोपपुराणभारतरूपा मुक्तिसोपानश्रेणिरिव सन्निबद्धेति प्रतीयते। यदाश्रयेण स्वधर्मावलंबिनो जना मोक्षपदमधिरुरुहुः। सोऽयं श्रीमद्वेदव्यासस्य सांसारिकेषु महाननुग्रह इति सर्वेऽपि शिरसा स्वीकरिष्यन्ति एतच्च सर्वत्र सुविदितमेवेत्यलं तद्विषयकविशिष्टोल्लिखितेनेति प्रकृतमेव प्रस्तूयते किञ्चित्।

तानि च वेदव्यासप्रणीतानि महापुराणोपपुराणानि क्वचित्क्वचिदुपलभ्यन्ते।तत्र कानिचित्पूर्णानि कानिचिदपूर्णानि लेखकप्रमादादशुद्धपाठबहुलानि च दृश्यन्ते। तानस्माभिर्बहुद्रव्यव्ययेन महता परिश्रमेण च संपाद्य विद्वज्जनद्वारा प्रत्येकं द्विचतुःपुस्तकसाहाय्येन शोधयित्वा सीसकाक्षरैर्मुद्रयित्वा च प्रकाशयितुमुपक्रान्तानि तन्मध्ये श्रीमद्भागवत–ब्रह्मवैवर्त--मार्कण्डेय-पाद्म-देवीभागवतादीनि कतिचित्पुराणानि मुद्रयित्वा प्रकाशमुपगतानि। अधुना चैतच्छ्रीनारदीयपुराणं बहुद्रव्यव्ययेन भूयसश्रमेण च मुद्रयित्वा प्रकाशितम्। अत्र च मन्त्रनिरूपणं ज्योतिर्निरूपण व्याकरणनिरूपणं सोपस्करं सम्यग् दृश्यते। इतरेऽपि बहवो विषयास्तादृशा अन्यत्रानुपलभ्यमाना निरूपिताः अतोऽस्येतरमहापुराणेभ्यो विशेषो दरीदृश्यते। अस्माभिरस्य श्रीनारदीयपुराणस्य पुस्तकानि बहुस्थलेभ्यः संपाद्य विदुषां सविधे निक्षितानि। तैश्चान्यपुस्तकसाहाय्येनेदमीदृग्व्यवस्थया पूर्वार्धोत्तरार्धसहितं श्रीनारदीयमहापुराणं यथामातृकं संशोध्य पाठभेदैर्विषयसूच्या च समलंकृत्य स्वीये "श्रीवेंकटेश्वर" स्टीम् मुद्रणालये मुद्रायित्वा प्रकाशितम्। प्रार्थये च विद्वद्वरान्--एतच्छ्रीनारदीयमहापुराणं संगृह्य पठनश्रवणादिभिः संशील्य तदुक्तनिजधर्माचरणेन कृतार्थयन्त्वात्मानं मामपीत्यतः परं बृहन्नारदीयमुपपुराणमपि मुद्रायिष्याम इत्यलं पल्लवितेन।

एतत्पुस्तकं १८६७ तम वार्षिकपंचविंशति (२५) तमनियमानुसारेण राजपट्टमधिरूढम्।

विद्वज्जनकृपाकांक्षी–खेमराज श्रीकृष्णदास, अध्यक्ष "श्रीवेङ्कटेश्वर" स्टीम्–यन्त्रालय–मुंबई.

॥ श्रीः ॥

अथ श्रीनारदीयपुराणस्थितविषयानुक्रमणिका प्रारभ्यते ।

अध्यायाः ।	विषयाः ।
१	धर्मकामार्थमोक्षोपायान्वेदितुं शौनकादिभिः कृते प्रश्ने सूतस्य नारदाय सनकादिभिर्निरूपितपुराणस्य नारदीयस्य कथनोपन्यासे पुराणमाहात्म्यकथनम् ॥ श्लो० ७९ ॥
२	ब्रह्मसभाप्रस्थितसनकादीनां गंगातीरे विष्णुप्रसादनोपायबोधनाय नारदप्रश्ने पुराणोपन्यासे विष्णुस्तुतिः ॥ श्लो० ५७ ॥
३	भगवद्विरचितसृष्टिनिरूपणप्रसंगेन भूगोलवर्णनभरतखंडोत्पत्तिप्राशस्त्यवर्णनम्॥ श्लो० ८३ ॥
४	हरिभक्तिनिरूपणे मृकंडुमुनेस्तपसा तोषितस्य भगवतोऽहं तव पुत्रतां यास्यामीतिमनोभीष्टवरप्रदानम् ॥ श्लो० ९९ ॥
५	मार्कंडेयस्य प्रलयदर्शनान्ते पुराणसंहितां विरच्य परंपदमेष्यसीति हरेर्वरवितरणम् ॥ श्लो० ८३ ॥
६	गंगायमुनयोः समागमात्प्रयागक्षेत्रप्रशंसापूर्वकं गंगामाहात्म्यकथनम् ॥ श्लो० ७० ॥
७	गंगामाहात्म्यप्रसंगेन रिपुजितस्य बाहुभूमिपतेरौर्वमुनेराश्रमसविधे मृतस्य गर्भवत्याः सहगमनोद्यतायाः प्रियपत्न्या मुनिकृतः सहगमननिषेधः ॥ श्लो० ७६ ॥
८	बाहुसुतसगरान्वयजातभगीरथनृपानीतगंगासंगमाद् कपिलमहामुनिकोपानलदग्धतत्पूर्वजानां परमपदावलंबनम् ॥ श्लो० १३८ ॥
९	क्रुद्धगुरुवसिष्ठमहर्षिशापलब्धराक्षसदेहस्य सौदासनृपतेर्गंगोदकसंबन्धाच्छापमोचनम् ॥ श्लो० १४८ ॥
१०	गंगोत्पत्तिप्रसंगेन देवासुरयुद्धे देवपराजयदुःखिताया हिमाद्रौ भगवदाराधनोद्यताया अदितेर्विनाशायोत्पादितेऽग्नौ दैतेयविनाशः ॥ श्लो० ५२ ॥
११	त्रैलोक्यराज्यमिंद्राय पुनः प्रदातुं गृहीतवामनावतारस्य बलियज्ञमास्थितस्य भगवतस्त्रिविक्रमस्य चरणतलाद्गंगोत्पत्तिः ॥ श्लो० ९७ ॥
१२	धर्माख्याने सत्पात्रब्राह्मणलक्षणं, महावने तडागबंधनात् वीरभद्रनृपतेरुत्तमलोकावाप्तिरिति भगीरथाय धर्मराजद्विजनिवेदनञ्च ॥ श्लो० ९७ ॥
१३	देवतायतनवापीकूपतडागादिनिर्म्माणं, नानादानादिनिरूपणञ्च ॥ श्लो० १५३ ॥
१४	श्रुतिस्मृतिप्रतिपादितवर्णत्रयधर्मनिरूपणे पातकप्रायश्चित्तनिवेदनं, श्राद्धपञ्चककथनञ्च ॥ श्लो० ९४ ॥
१५	पातकिनां पृथक्पृथङ्निरययातनावर्णनपूर्वकं नृपपूर्वजानां नरकोद्धाराय धर्मराजद्विजस्य भूतले गंगानयनार्थं भगीरथायोद्योतनम् ॥ श्लो० १६९ ॥
१६	द्विजरूपिणो धर्मस्य वचनात्पित्रुद्धरणाय भूतले भगीरथस्य गङ्गानयनम्, निजकुलोद्धारश्च ॥ श्लो० ११६ ॥
१७	व्रताख्याने मार्गशीर्षादारभ्य कार्त्तिकमासपर्यंतं सोद्यापनं शुक्लद्वादशीव्रतकथनम्॥ ॥ श्लो० ११३ ॥
१८	प्रतिमासं पौर्णमास्यां सोद्यापनविधिलक्ष्मीनारायणव्रतम् ॥ श्लो० ३२ ॥
१९	कार्त्तिकस्य शुक्लपक्षे दशम्यां हरिमंदिरे ध्वजारोपणव्रतम् ॥ श्लो० ४७ ॥

अध्यायाः । विषयाः ।

२० ध्वजारोपणप्रसंगात्सोमवंशोद्भवनरपतेः सुमतेर्विभांडकमुनये स्वपूर्वजन्मेतिहासकथनम् । ॥ श्लो० ८६ ॥
२१ मार्गशीर्षशुक्लपक्षे दशमीमारभ्य पौर्णमासीपर्यंतं हरिपंचरात्रव्रतम् ॥ श्लो० २८ ॥
२२ आषाढश्रावणभाद्रपदाश्विनेष्वेकस्मिन्मासे मासोपवासव्रतम् ॥ श्लो० २८ ॥
२३ एकादशीव्रतप्रसंगेन भद्रशीलद्विजोपाख्यानम् ॥ श्लो० ९९ ॥
२४ ब्राह्मणक्षत्रियविशां स्त्रीशूद्राणाञ्च सदाचारवर्णनम् ॥ श्लो० ३५ ॥
२५ वर्णाश्रमधार्मिणां स्मार्ताचारेषु अध्ययनान्नधर्मनिरूपणम् ॥ श्लो० ६५ ॥
२६ द्विजातीनां स्मृतिनिरूपितवेदाध्ययनादिधर्मनिरूपणम् ॥ श्लो० ४६ ॥
२७ सदाचारेषु गृहस्थवानप्रस्थसंन्यासिनां धर्मनिरूपणम् ॥ श्लो० १०६ ॥
२८ श्राद्धकृत्यविवरणम् ॥ श्लो० ९० ॥
२९ प्रायश्चित्तपूर्वकं तिथ्यादिनिर्णयः ॥ श्लो० ६३ ॥
३० पञ्चमहापातकिनामुपपातकिनाञ्च प्रायश्चित्तकथनपूर्वकं पातकनिवृत्तये भगवदुपासनाकथनम् ॥ श्लो० ११४ ॥
३१ पुण्यपापवतां नृणां सुखदुःखप्रदस्य यममार्गस्य सम्यक्तया निरूपणम् ॥ श्लो० ७१ ॥
३२ संसारनानाविधयातनाकथनपूर्वकं तन्निवृत्तये हरेराराधनकथनम् ॥ श्लो० ५० ॥
३३ भगवद्भक्तिमतां पापक्षये बोधैकलभ्यमोक्षोपायभूतयमाद्यष्टांगयोगनिरूपणम् । ॥ श्लो० १६२ ॥
३४ ऐहलौकिकपारलौकिकसुखावाप्तिसाधनहरिभक्तिलक्षणनिरूपणम् ॥ श्लो० ७७ ॥
३५ कर्मपाशविच्छेदकभगवद्भक्तिमाहात्म्यनिरूपणे वेदमालिद्विजेतिहासकथनम् ॥ श्लो० ७७३ ॥
३६ विष्णुसेवाप्रभावेण यज्ञमालिसुमालिद्विजयोरुत्तमलोकावाप्तिकथनम् ॥ श्लो० ६१ ॥
३७ विष्णुमाहात्म्ये गुलिकाभिधलुब्धकोत्तंकेतिहासकथनम् ॥ श्लो० ५९ ॥
३८ भगवत्स्तवनादुत्तंकमुनेर्विष्णुपदावाप्तिकथनम् ॥ श्लो० ५९ ॥
३९ हरिमंदिरसंमाजनदीपदानकर्तुर्जयध्वजनरपतेरितिहासकथनम् ॥ श्लो० ७१ ॥
४० सुधर्मोदितब्रह्मकल्पमध्ये मनुमन्वंतरेन्द्रदेवतानिरूपणम् ॥ श्लो० ५९ ॥
४१ युगचतुष्टयस्थितिकथनपूर्वकं कलौ भगवन्नामस्मरणत एव मुक्तिरिति नाममाहात्म्यकथनम् ॥ श्लो० १२३ ॥
४२ भरद्वाजभृगुसंवादे जगत्सृष्टिनिरूपणम् ॥ श्लो० ११३ ॥
४३ सृष्टिनिरूपणे वर्णाश्रमधर्मकथनम् ॥ श्लो० १२७ ॥
४४ भरतसृष्टिप्रसंगेन ध्यानयोगकथनम् ॥ श्लो १०७ ॥
४५ जनकपंचशिखसंवादेन मोक्षधर्मनिरूपणम् ॥ श्लो० ८७ ॥
४६ आधिदैविकादितापत्रयनिरासाय भवोपरमाय चाध्मात्मकथनम् ॥ श्लो० १०१ ॥
४७ चित्तवृत्तिनिरोधतो भगवद्ध्यानेनात्मपदावाप्तिनिरूपणम् ॥ श्लो० ८२ ॥
४८ भरतस्य राजर्षेरेणशावकसंगेन जन्मत्रयग्रहणेतिहासः ॥ श्लो० ९५ ॥
४९ भरतमुनिरहूगणयोः संवादे मोक्षधर्माविष्करणम् ॥ श्लो० ९४ ॥
५० शुकमुनिचरित्रे वेदचतुष्टयस्य स्वरवर्णव्यवस्थावर्णनम् ॥ श्लो० २३७ ॥
५१ नक्षत्रवेदसंहितादिकल्पनिरूपणम् ॥ श्लो० १५८ ॥
५२ व्याकरणनिरूपणम् ॥ श्लो० ९६ ॥
५३ निरुक्तनिरूपणम् ॥ श्लो० ८८ ॥

अध्यायाः । विषयाः । अध्यायाः । विषयाः ।

५४ ज्योतिषे गणितभागविचारणम् ॥ श्लो० १८७ ॥
५५ ज्योतिर्निरूपणे जातकभागाविष्करणम् ॥ श्लो० ३६६ ॥
५६ ग्रहविचारणपूर्वकं नानाविधमहोत्पातादिनिरूपणम् ॥ श्लो० ७५८ ॥
५७ संक्षेपतश्च्छन्दोवर्णनम् ॥ श्लो० २१ ॥
५८ जनकराजगृहगमनपर्यन्तं शुकेतिहासनिरूपणम् ॥ श्लो० ७२ ॥
५९ जनकशुकसंवादेनाध्यात्मतत्त्वनिरूपणम् ॥ श्लो० ५५ ॥
६० व्यासाश्रमे शुकजनकसंवादग्रथितमोक्षार्थसाधकज्ञानविवरणम् ॥ श्लो० ९४ ॥
६१ देहधारिणामनेकापायदर्शनपूर्वकं निवृत्तिधर्ममहत्त्ववर्णनम् ॥ श्लो० ७८ ॥
६२ शुकेतिहासमुखेन मोक्षधर्म्मनिर्वेदनम् ॥ श्लो० ८० ॥
६३ संसारबंधविच्छेदाय पाशुपतदर्शनतत्त्वनिरूपणम् ॥ श्लो० १२४ ॥
६४ मन्त्रसिद्धिददीक्षाविधिनिरूपणम् ॥ श्लो० ७० ॥
६५ श्रीपादुकामन्त्रकथनपूर्वकं मन्त्रजपविधिकथनम् ॥ श्लो० ९७ ॥
६६ गायत्रीमन्त्रजपविधिकथनपूर्वकं संध्यादिनिरूपणम् ॥ श्लोक० १५१ ॥
६७ अर्घपाद्यादिविधानसहितषोडशोपचारयुक्तदेवतापूजानिरूपणम् ॥ श्लो० १४० ॥
६८ गणेशमन्त्रतद्विधिनिरूपणम् ॥ श्लो० ९४ ॥
६९ रविसोममंगलबुधगुरुशुक्राणां यन्त्रविधिपूजाविधिपूर्वकं मन्त्रजपविधिकथनम् ॥ श्लो० १४१ ॥
७० पूजाविधिपूर्वकं महाविष्णुमंत्रजपविधानम् ॥ श्लो० २०२ ॥
७१ श्रीनृसिंहस्य यन्त्रकथनपूर्वकम् मंत्रोपासनागायत्र्यादिनिरूपणम् ॥ श्लो० २२८ ॥
७२ पीठदेवतासहितपूजाविधिपुरःसरं हयग्रीवमंत्रोपासनानिरूपणम् ॥ श्लो० ५४ ॥
७३ श्रीलक्ष्मणमंत्रसहितश्रीराममंत्रजपविधिकथनम् ॥ श्लो० १७७ ॥
७४ हनुमन्मन्त्रनिरूपणम् ॥ श्लो० २०२ ॥
७५ मंत्रान्तरकथनपूर्वकं हनुमद्दीपदानकथनम् ॥ श्लो० १०६ ॥
७६ श्रीदत्तात्रेयप्रसादलब्धमाहात्म्यकार्तवीर्यनृपमंत्रदीपकथनम् ॥ श्लो० ११६ ॥
७७ श्रीकार्त्तवीर्यकवचनिरूपणम् ॥ श्लो० १३७ ॥
७८ हनुमत्कवचकथनम् ॥ श्लो० ५२ ॥
७९ हनूमच्चरितवर्णनम् ॥ श्लो० ३५८ ॥
८० सकलाभीष्टप्रदपूजाविधानपूर्वकं कृष्णमन्त्राराधनकथनम् ॥ श्लो० २९७ ॥
८१ पीठे देवताराधनपूर्वकं कामनाभेदेन कृष्णमन्त्रभेदनिरूपणम् ॥ श्लो० १५२ ॥
८२ कैलासे नारदाय श्रीशिवनिरूपितमनेककामनापूरकं श्रीराधाकृष्णसहस्रनामस्तोत्रम् ॥ श्लो० २१५ ॥
८३ मंत्राराधनपूर्वकं राधांशभूतपंचप्रकृतिलक्षणनिरूपणम् ॥ श्लो० १३८ ॥
८४ जपहोमविधिसहितदेवीमन्त्रनिरूपणम् ॥ श्लोक० ११० ॥
८५ वाग्देवतावतारभूतकालयादियक्षिणीमंत्रभेदनिरूपणम् ॥ श्लो० १४४ ॥
८६ महालक्ष्म्यवतारभूतबगलादियक्षिणीमन्त्रसाधननिरूपणम् ॥ श्लो० ११५ ॥
८७ विधानसहितदुर्गामन्त्रचतुष्टयनिरूपणम् ॥ श्लो० १६९ ॥
८८ श्रीराधावतारभूतषोडशदेवतानां मन्त्रयन्त्रपूजाविधिनिरूपणम् ॥ श्लो० २५८ ॥
८९ विजयादिसकलकामनासिद्धये कवचसहितललितासहस्रनामस्तोत्रनिरूपणम् ॥ श्लो० १७८ ॥
९० अर्चनविधिसहितं नित्यापटलकथनम् ॥ श्लो० २३८ ॥
९१ स्तोत्रसहितश्रीमहेश्वरमन्त्रविधिनिरूपणम् ॥ श्लो० २३५ ॥
९२ संक्षेपतो ब्रह्मपुराणेतिहासनिरूपणम् ॥ श्लो० ४८ ॥

अध्यायाः । विषयाः ।

९३ पञ्चखण्डसहितपद्मपुराणस्थितविषयानुक्रमकथनम् ॥ श्लो० ४० ॥
९४ पुराणश्रवणफलकथनसहितं विष्णुपुराणानुक्रमकथनम् ॥ श्लो० २४ ॥
९५ वायुपुराणानुक्रमनिरूपणम् ॥ श्लो० २० ॥
९६ श्रीमद्भागवतद्वादशस्कंधनिरूपितविषयानुक्रमकथनम् ॥ श्लो० २४ ॥
९७ श्रीनारदीयपुराणानुक्रमकथनम् ॥ श्लो० २१ ॥
९८ मार्कण्डेयपुराणानुक्रमनिरूपणम् ॥ श्लो० १९ ॥
९९ अग्निपुराणस्थितविषयानुक्रमनिरूपणम् ॥ श्लो० २५ ॥
१०० भविष्यपुराणस्थितविषयानुक्रमनिरूपणम् ॥ श्लो० १९ ॥
१०१ ब्रह्मवैवर्तपुराणस्थितविषयानुक्रमवर्णनम् ॥ श्लो २४ ॥
१०२ लिंगपुराणस्थितविषयानुक्रमनिरूपणम् ॥ श्लो० २१ ॥
१०३ वाराहपुराणस्थितविषयानुक्रमकथनम् ॥ श्लो० १७ ॥
१०४ स्कन्दपुराणोक्तविषयानुक्रमनिरूपणम् ॥ श्लो० २१३ ॥
१०५ वामनपुराणस्थितविषयानुक्रमनिरूपणम् ॥ श्लो० २२ ॥
१०६ कूर्मपुराणस्थितविषयानुक्रमनिरूपणम् ॥ श्लो० २४ ॥
१०७ मत्स्यपुराणस्थितविषयानुक्रमणीकथनम् ॥ श्लो० ३१ ॥
१०८ गरुडपुराणस्थितविषयानुक्रमकथनम् ॥ श्लो० ३४ ॥
१०९ ब्रह्माण्डपुराणस्थितविषयानुक्रमणीनिरूपणम् ॥ श्लो० ४२ ॥
११० चैत्रादिद्वादशमासगतप्रतिपद्व्रतनिरूपणम् ॥ श्लो० ॥ ४८ ॥
१११ द्वादशमासगतद्वितीयाव्रतकथनम् ॥ श्लो० ॥ ३४ ॥
११२ द्वादशमासगततृतीयाव्रतनिरूपणम् ॥ श्लो० ६३ ॥

अध्यायाः । विषयाः ।

११३ द्वादशमासस्थितचतुर्थीव्रतनिरूपणम् ॥ श्लो० ९१ ॥
११४ द्वादशमासस्थितपञ्चमीव्रतनिरूपणम् ॥ श्लो० ६१ ॥
११५ द्वादशमासगतषष्ठीव्रतनिरूपणम् ॥ श्लो० ५५ ॥
११६ द्वादशमासगतसप्तमीव्रतनिरूपणम् ॥ श्लो० ७२ ॥
११७ द्वादशमासस्थिताष्टमीव्रतनिरूपणम् ॥ श्लो० ९९ ॥
११८ द्वादशमासगतश्रीरामनवम्यादिनवमीव्रतनिरूपणम् ॥ श्लो० ३३ ॥
११९ द्वादशमासगतदशमीव्रतनिरूपणम् ॥ श्लो० ६६ ॥
१२० द्वादशमासस्थितैकादशीनामनिर्देशपूर्वकं दिनत्रयसाध्यव्रतकथनम् ॥ श्लो० ९२ ॥
१२१ द्वादशमासगतद्वादशीव्रतनिरूपणम् ॥ श्लो० ११७ ॥
१२२ द्वादशमासगतत्रयोदशीव्रतकथनम् ॥ श्लो० ८४ ॥
१२३ द्वादशमासगतचतुर्दशीव्रतनिरूपणम् ॥ श्लो० ७९ ॥
१२४ द्वादशमासस्थितपौर्णिमाव्रतनिरूपणम् ॥ श्लो० ९६ ॥
१२५ एवं पुराणं संश्राव्य सनकादिमहर्षिषु गतेषु नारदस्य कैलासगमनं,तत्र शंकरात्पाशुपतज्ञानमवाप्य नारायणाश्रमगमनं, सूतेन शौनकादिभ्यः पुराणमाहात्म्यकथनञ्च ॥ श्लो० ॥५० ॥

॥ इति श्रीबृहन्नारदीयपूर्वार्धस्थितविषयानुक्रमणिका ॥

॥ अथोत्तरार्धस्थितविषयानुक्रमणिका प्रारभ्यते ॥

१ वसिष्ठं प्रति पापेंधनस्य दाहकः को वह्निरिति मांधातुः प्रश्ने एकादशीव्रतरूपोऽग्निरशेषपापेंधनदाहक इति तद्व्रतस्य माहात्म्यनिरूपणम् ॥ श्लो० २६ ॥
२ देवपितृकार्येषु तिथीनां पूर्वापरविधिविद्धानां कीदृशी ग्रहणव्यवस्थेति शौनकादीनां

अध्यायाः । विषयाः ।

प्रश्नः केषु केषु कार्येषु तिथीनां पूर्वापरवेधग्रहणमिति सूतस्य कथनोपक्रमस्तत्रैवैकादशी पूर्वविद्धा न कर्तव्येति विशेषतो निरूपणम् ॥ श्लो० ४६ ॥

२ दुरितौघनिवारणाय भगवद्भक्तेः प्राधान्यमुक्त्वा तत्प्रसंगेन रुक्मांगदस्य नरपतेः प्रजाभिः सहैकादशीव्रतं कुर्वाणस्य राष्ट्रे मृतानां सह पितृभिः स्वर्वासेन शून्यनिजलोकावलोकनेन परितप्तस्य यमस्य ब्रह्मलोकगमनम् ॥ श्लो० ६७ ॥

४ कार्यमकृत्वा प्रभोर्वेतनग्रहणमतिपापकरं यत एकादशीव्रतकरणान्निरयाधिष्ठितपूर्वजैः सहाधुना रुक्मांगदराष्ट्रवासिनां स्वर्लोकावस्थानाच्छून्यलोकपरिपालनमश्रेयस्करमिति यमवाक्यनिरूपणम्॥श्लो०॥ २८॥

५ दंडं पटस्याग्रे संस्थाप्य यमस्य विलापकरणम् ॥ श्लो० १६ ॥

६ एकादशीव्रतकर्तॄणां पापिनामपि स्वर्वासो नियतं भविष्यति सह तैर्विरोधं कर्तुं नाहं पारयिष्ये इति ब्रह्मवाक्यनिरूपणम् ॥ श्लो० १८ ॥

७ यमाग्रहात् मोहिनीनाम्नीं योषिद्वरामुत्पाद्य रुक्मांगदस्य नृपतेरेकादशीव्रतभंगाय ब्रह्मणो निर्देशकरणम् ॥। श्लो० ७३ ॥

८ ब्रह्मणो निर्देशमंगीकृत्य मोहिन्या मंदराचलगमनम् ॥ श्लो० २४ ॥

९ राज्यधुरं वोढुं क्षमे धर्मांगदपुत्रे राज्यं न्यस्य सह प्रजाभिरेकादशीव्रतं पालनीयमिति संदिश्य मृगयार्थं गन्तुमिच्छामीति राज्ञो भार्यायै कथनम् ॥ श्लो० ४९ ॥

१० वनविहरणोद्यतस्य नरपतेर्वामदेवाश्रमगमनम् तत्र वामदेवाय सवसपत्प्राप्तिर्ममैतज्जन्मसंपादिता वा पूर्वसंपादितेति प्रश्नकरणञ्च ॥ श्लो० ६८ ॥

अध्यायाः । विषयाः ।

११ वामदेवकृतं नरपतेः प्राग्जन्मवृत्तवर्णनम्, राज्ञो मंदराचलगमनम्, गिरिशोभावलोकनप्रसंगेन मोहिनीदर्शनञ्च ॥ श्लो० ४७ ॥

१२ मोहिनीरूपमोहितस्य नरपतेस्तया सह याचितदाने समयकरणम्, स्ववृत्तकथनं तद्वृत्तश्रवणञ्च ॥ श्लो० ३३ ॥

१३ रुक्मांगदस्य नरपतेरात्मविनाशाय मोहिन्या सह विवाहो गिरेरवतरणञ्च ॥ श्लो० २५ ॥

१४ मोहिन्या सह प्रस्थितस्य नरपतेरश्वखुराग्रप्रहतताया गृहगोधायाः प्राग्जन्मवृत्तकथनम्, विजयैकादशीपुण्यदानेन तस्या उद्धारश्च ॥ श्लो० ७४ ॥

१५ गृहगोधामुद्धृत्य सह भार्यया नरपतेर्निजनगरागमनं, सम्मुखागतेन धर्मांगदपुत्रेण सह वार्तालापकरणञ्च ॥ श्लो० ४७ ॥

१६ धर्मध्वजेन वस्त्रालंकारादिभिः पूजितायाः मोहिन्याः सेवार्थं संध्यावल्या नियोजनं तत्प्रसंगे पतिव्रतोपाख्यानम् ॥ श्लो ८९ ॥

१७ संध्यावल्योपास्यमानाया मोहिन्याः संनिधौ नरपतेरागमनं तस्यास्तेन सह संवादः॥ श्लो०७५ ॥

१८ धर्मांगदस्य सुतस्याग्रहात्सन्ध्यावलीप्रभृतिभिर्वस्त्रालंकारपूजिताभिर्नृपस्त्रीभिः सह हिन्मोयविलासोपभोगार्थं नृपस्याभ्यनुज्ञानम् ॥ श्लो० ५५ ॥

१९ मोहिन्या सह नृपस्य विलासवर्णनम् ॥ श्लो० ३६ ॥

२० धर्मांगदस्य मलये विद्याधरान् विजित्य पञ्चमणीनामाहरणं, नागलोके नागान् विजित्यायुतानागकन्याहरणं, दिग्विजयं कृत्वा नानाविधद्रव्याहरण,पित्रे सर्ववृत्तनिवेदनञ्च ॥श्लो० ३१ ॥

२ धर्मांगदस्य नागकन्याभिर्महोत्सवेन विवाहकरणम्, राष्ट्रे प्रजानां शिक्षानिरूपणञ्च ॥श्लो०३८ ॥

अध्यायाः ।	विषयाः ।
२२	विषयाभिसेवनरतस्य नरपते रुक्मांगदस्यागामिकार्तिकमासस्मरणम्. मोहिन्यै कार्तिकमासमाहात्म्यकथनञ्च ॥ श्लो० ८६ ॥
२३	मोहिन्यनुरोधान्नृपस्य संध्यावल्यै कार्तिकमासोपवासकरणानुज्ञानम्.मोहिन्या रुक्मांगदसमीपसमयानुसारेणैकादश्यां भोजनसंबंधेन याचनाकरणञ्च ॥श्लो० ९० ॥
२४	एकादश्यां नाहं भोक्ष्ये इति राज्ञो निश्चयं ज्ञात्वा मोहिन्या गौतमादिब्राह्मणेभ्यो राज्ञोपवासकरणं युक्तमयुक्तमिति प्रश्नकरणम् ॥ श्लो० ५२ ॥
२५	एकादश्यां भोजने न ते दोषः इति द्विजवाक्यश्रवणात् परमक्रुद्धस्य व्रतभंगमसहमानस्य नरपतेर्वचनात्प्रस्थिताया मोहिन्या धर्मध्वजस्य विनयात्पुनः परावर्तनम् ॥ श्लो० ८२ ॥
२६	धर्मांगदसमीपे मोहिन्यै अन्यत्सर्वमपि प्रयच्छामि न त्वेकादश्यां भोक्ष्य इति राज्ञो निश्चयपूर्वकवचनम् ॥ श्लो० १७ ॥
२७	सुतवचनान्मोहिनीमनुनेतुमुद्यतायाः सन्ध्यावल्याः काष्ठीलादेहमापन्नायाः कौंडिन्यभार्यायाः पूर्ववृत्तकथनम् ॥ श्लो० १५४ ॥
२८	धनाशया स्वभार्यां परित्यज्य समुद्रमध्यगतस्य कौंडिन्यस्य राक्षसावसथगमनं, राक्षसं हत्वा राक्षस्या सह धनं गृहीत्वा राक्षसाहृतां रत्नावलीं स्वावसथं प्रेषयितुं काश्यामागमनम्॥श्लो०८९॥
२९	ब्रह्मणः शिरःकर्तने हस्ते लग्नं शिरः पातयितुमशक्तस्य शिवस्य ब्रह्महत्यापीडितस्य काश्यामुभयनिवृत्तौ तत्रैव हरेराज्ञया निवास इति काश्या राक्षसीकृतमाहात्मवर्णनम् ॥ श्लो० ७२ ॥
३०	राक्षसीसंमत्या रत्नावल्याः पाणिग्रहणं कृत्वा स्वनगरमागतस्य प्रथमभार्यां सत्कृत्य भार्याभिस्तिसृभिः कौंडिन्यस्य संसारकरणम्. भर्तृवंचनापापात् प्रथमभार्यायाः काष्ठीलादेहावाप्तिकथनञ्च॥ श्लो० ८७ ॥
३१	माघमासपुण्यप्रदानेन काष्ठीलाया उत्तमलोकावाप्तिकथनं पत्युरर्थे जीवितमपि दास्यामीति मोहिन्यग्रे सन्ध्यावल्याः कथनम् ॥ श्लो० ५९ ॥
३२	एकांदशीव्रतभंगमनिष्टं मन्यसे चेत्स्वपुत्रस्य शिरः पत्या सह निकृत्य दीयतामिति मोहिन्या वचनं श्रुत्वा सभार्यस्य विरोचनस्याख्यायिकामुक्त्वा संध्यावल्यास्तद्वचोंऽङ्गीकरणम्॥श्लो०६८॥
३३	मोहिन्याः प्रियचिकीर्षया स्वपुत्रं हन्तुं भर्तुरग्रे सन्ध्यावल्या अभ्यर्थना, राज्ञोऽन्यवरार्थं मोहिन्या प्रार्थना, धर्मांगदस्य पितरं प्रति स्वशिरःकृन्तनेऽनुनयकरणञ्च ॥ श्लो० ६९ ॥
३४	सन्ध्यावल्या सहाविषण्णेन राज्ञा सुतस्य शिरःकृन्तनात् भगवत्प्रादुर्भावः, सभार्यस्य राज्ञः सुतेन सह भगवत्सायुज्यलाभः, तत्प्रसंगेन मोहिन्या अनुतापकरणञ्च ॥ श्लो० २६ ॥
३५	मोहिनीं प्रतिबोधयितुं देवतानां तत्सन्निधावागमनम्, सान्त्वनपूर्वकं वरप्रदानायोद्यतानां देवतानामग्रे राज्ञः पुरोहितेनास्य धिक्कारपूर्वकं मोहिन्यै शापप्रदानम् ॥ श्लो० ८६ ॥
३६	ब्रह्मशापदग्धायास्त्रिलोक्येऽपि स्थानमलभमानाया मोहिन्या गतिप्रदानाय सह देवैर्ब्रह्मणो राजपुरोहिताश्रमगमनम् तत्प्रसादनञ्च ॥ श्लो० ६० ॥
३७	ब्रह्मणः प्रार्थनया दशमीविद्धैकादश्यां मोहिन्यै स्थानप्रदानम्, ब्रह्मशापदग्धाया

अध्यायाः ।	विषयाः ।
	मोहिन्याः पुरोहितानुमत्या पुनः स्वशरीरलाभः सह देवैर्ब्रह्मगो निजलोकगमनश्च- ॥ श्लो० ४६ ॥
३८	मोहिन्या स्वपापक्षालनाय प्रार्थितेन वसुपुरोहितेन तीर्थयात्राप्रसंगात्कृतं गंगामाहात्म्यवर्णनम् ॥ श्लो० ६३ ॥
३९	गंगास्नानमाहात्म्यवर्णनम् ॥ श्लो० ४८ ॥
४०	गंगायां स्थलविशेषेण स्नानफलकथनम् ॥श्लो० ५४ ॥
४१	गंगातीरे आरामादिकरणनानाविधदानफलकथनम् ॥ श्लो० ७२ ॥
४२	गंगातीरेगुडधेन्वादिदशधेनुदानविधानम् आसंवत्सरं गंगार्चनविधिकथनश्च ॥ श्लो० ४४ ॥
४३	माघशुक्लदशम्यां दशहरायां गंगायाः पूजनविधानं, तन्माहात्म्यकथनश्च ॥ श्लो० १२९ ॥
४४	विशालनृपेतिहासकथनपूर्वकं गयायां पिंडदानात्पितॄणां नरकपतितानामप्युत्तमलोकावाप्तिरिति गयामाहात्म्यकथनम् ॥ श्लो० ९१ ॥
४५	गयायां प्रथमद्वितीयदिनयोः श्राद्धपिण्डदानविधिनिरूपणम् ॥ श्लो० १०४ ॥
४६	गयायां तृतीयचतुर्थदिनयोर्विष्ण्वादिपदे पिंडदानविधिनिरूपणम् ॥श्लो०५७ ॥
४७	गयायां पञ्चमेऽह्नि गयाकूपान्तं स्नानश्राद्धपिंडदानादिविधिमाहात्म्यनिरूपणम् ॥ श्लो० ९४ ॥
४८	काशीक्षेत्रस्थितनानाविधशिवलिंगनिरूपणपूर्वकं काशीमाहात्म्यकथनम् ॥ श्लो० ८८ ॥
४९	कूपह्रदवापीकुंडादिषु स्नानशिवपूजापूर्वकं काश्यास्तीर्थयात्रावर्णनम् ॥ श्लो० ७४ ॥
५०	यात्राकालकथनपूर्वकं नानाविधशिवलिंगस्थापनेतिहासकथनम् तल्लिंगदर्शनपूजनफलकथनश्च ॥ श्लो० ६९ ॥
५१	काश्यां गोदायामुत्तरवाहिन्यां पञ्चनदे च स्नातॄणां महापातकनिरसनपूर्वकं शिवलोकावाप्तिकथनम् ॥ श्लो० ४८ ॥
५१	दक्षिगोदधितीरे उत्कलदेशे पुरुषोत्तमक्षेत्रे सुभद्राकृष्ण सङ्कर्षणाराधनेनेन्द्रद्युम्ननृपतेर्भगवत्पदावाप्तिरित्याख्यायिकाकथनपूर्वक पुरुषोत्तम (जगन्नाथ)क्षेत्रमाहात्म्यवर्णनम् ॥ श्लो० ९७ ॥
५३	उत्कलदेशे पुरुषोत्तमक्षेत्रे अश्वमेधयाजिना भगवन्मूर्तिलब्धुकामेनेन्द्रद्युम्ननृपेण कृता भगवत्स्तुतिः ॥ श्लो० ६८ ॥
५४	नृपतिस्तवेन सन्तुष्टो भगवान्रात्रौ स्वप्ने तं प्रबोध्य सिंधोः कूलाश्रितं वृक्षमुत्पाट्य तस्य मूर्तीर्विधाय स्थापनीया इत्यशिक्षयत्. नरपतिः प्रभाते सिंधुकूलं गत्वा वृक्षमुत्पाट्य तत्र विष्णुविश्वकर्माणावपश्यत् भगवन्निर्देशात कृष्णरामसुभद्रामूर्तीर्विधाय सुमुहूर्तेऽस्थापयत्, ततो भगवदर्चनतो राज्ञो मोक्षावाप्तिः, पुरुषोत्तमक्षेत्रमाहात्म्यश्च ॥ श्लो० १२५ ॥
५५	ज्येष्ठशुक्लद्वादश्यां पुरुषोत्तमक्षेत्रमभिगम्य यात्रा विधेया, तत्र मार्कंडेयह्रदे शिवं प्रणम्य कल्पवृक्षं दृष्ट्वा पुरुषोतमदर्शनम् , तत्रैव नृसिंहाराधनविधानम् ॥ श्लो० १३३ ॥
५६	अनंतमत्स्यमाधवश्वेतमाधवदर्शनफलनिरूपणम्, ज्येष्ठमासे पौर्णमायां ज्येष्ठानक्षत्रे तत्र समुद्रस्नानविधिनिरूपणश्च ॥ श्लो० ६८ ॥
५७	समुद्रतीरे मंगलकरणपूर्वकं मंडले भगवदर्चनविधिफलकथनम् ॥ श्लो० ५८ ॥
५८	पुरुषोत्तमक्षेत्र स्नानदानपितृश्राद्धादिफलनिरूणम्, राधिकाशापेन सिंधुजलस्य क्षारत्वकथनम्; गोलोकनिवासिराधाकृष्णतत्वनिरूपणप्रसंगेन राधाकृष्णत एवाखिलब्रह्मांडोत्पत्तिकथनश्च ॥ श्लो० ६७ ॥
५९	गोलोकस्थितराधाकृष्णयोः पञ्चधा रूपग्रहणनिरूपणम् ॥ श्लो० ४८ ॥
६०	ज्येष्ठशुक्लदशमीमारभ्य पौर्णमासीपर्यन्तं रामकृष्णसुभद्रादर्शेन महायात्राफलावाप्तिकथनम्. पौर्णिमायां भगवत्स्नानविधिनिरूपणश्च ॥ श्लो० ७६ ॥
६१	पुरुषोत्तममाहात्म्यसहितं तत्क्षेत्रयात्राविधिफलकथनम् ॥ श्लो० १०३ ॥
६२	तीर्थराजप्रयागे तीर्थविधिप्रसंगेन स्नानदानश्राद्धमुंडनादिविधिनिरूपणम् ॥ श्लो० ५५ ॥
६३	मकरसंक्रमणगते रवौ पञ्चयोजनपरिमाणप्रयागराजस्थितानेकविधतीर्थस्थानमाहात्म्यवर्णनम् ॥ श्लो० १७४ ॥
६४	कुरुक्षेत्रमाहात्म्ये क्षेत्रप्रमाणादिनिरूपणम् ॥ श्लो० ३२ ॥
६५	कुरुक्षेत्रगतकाम्यकादिवनेषु सरस्वत्यादितीर्थेषु च दक्षेश्वरादिशिवलिंगपूजाविधिसहितं तीर्थयात्राविधिवर्णनम् ॥श्लो०१३५॥
६६	स्वपितुर्गृहे महान्यज्ञोत्सव इति श्रुत्वैकाकिनी दाक्षायणी शिवमनादृत्य प्राप्ता शिवापमानं यत्र दृष्ट्वा प्राणान् जहौ तदेव हरिद्वारसञ्ज्ञकं क्षेत्रं, तत्रत्यतीर्थयात्रावर्णनम् ॥ श्लो० ५६ ॥

अध्यायाः । विषयाः ।

६७ बदरीक्षेत्रप्रतिष्ठितनरनारायणमाहात्म्यपूर्वकं तत्क्षेत्रयात्राविधिवर्णनम् ॥ श्लो० ८२ ॥
६८ गंगातीराधिष्ठितकामोदाख्यदेवीक्षेत्रयात्राविधिनिरूपणम् ॥ श्लो० २५ ॥
६९ श्रीविद्धनाथचरित्रसहितं कामाक्षीमाहात्म्यवर्णनम् ॥ श्लो० २७ ॥
७० नानाविधतीर्थशिवलिंगविराजितप्रभासक्षेत्रयात्राविधिमाहात्म्यवर्णनम् ॥ श्लो० ९५ ॥
७१ यात्राविधानपूर्वकं पुष्करक्षेत्रमाहात्म्यवर्णनम् ॥ श्लो० ५० ॥
७२ तपःप्रभावेतिहासकथनपूर्वकं गौतमाश्रममाहात्म्यवर्णनम् ॥ श्लो० ३१ ॥
७३ पुंडरीकपुरे जैमिनिमुनेः शिवसाक्षात्कारसंतुष्टस्य गणैः सह शिवस्य तांडवनृत्यात्परां मुदमुपगतस्य वेदपादेन स्तुतिंकुर्वाणस्याभ्यर्थनया शिवस्य निवासात् तत्पुरस्य क्षेत्रत्वनिरूपणम्, त्र्यंबकेश्वरक्षेत्रयात्रानिरूपणञ्च ॥ श्लो० १५२ ॥
७४ सार्धयोजनप्रमाणपश्चिमसमुद्रतीरस्थितगोकर्णक्षेत्रमाहात्म्यवर्णनम् ॥ श्लो० ४१ ॥
७५ संक्षेपेण रामलक्ष्मणचरितमुक्त्वाऽन्ते रामवचनान्निष्क्रान्तो लक्ष्मणो यस्मिन्नचले योगधारणया तनुमजहात् तस्य लक्ष्मणाचलस्य माहात्म्यनिरूपणम् ॥ श्लो० ७९॥

अध्यायाः । विषयाः ।

७६ दक्षिणोदधितीरे रामस्थापितरामेश्वरलिंगमाहात्म्यसहितसेतुमाहात्म्यवर्णनम् ॥ श्लो० २० ॥
७७ नर्मदातीर्थसंग्रहमाहात्म्यनिरूपणम् ॥ श्लो० ३५ ॥
७८ श्रीमहाकालेश्वराधिष्ठितावन्तिकाक्षेत्रयात्रामाहात्म्यवर्णनम् ॥ श्लो० ४७ ॥
७९ पद्मभुवार्थितस्य भगवतोऽवतारग्रहणान्मथुरामाहात्म्यवर्णनम् ॥ श्लो० ५६ ॥
८० नारदाख्यायिकाकथनपूर्वकं वृन्दावनमाहात्म्यवर्णनम् ॥ श्लो० ११६ ॥
८१ वसुर्नरपत्युपाध्यायो मोहिन्यै तीर्थयात्राविधिमुक्त्वा तां यात्राकरणाय नियोज्य ब्रह्मणे मोहिनीवृत्तं निवेद्य ततो वृन्दावने तपस्तप्तुं गतवान्, तत्र तस्य नारदमुनिनिरूपितभाविकृष्णावतारचरित्रविलोकनौत्सुक्यान्निवासवर्णनम् ॥ श्लो० ५१ ॥
८२ मोहिन्यास्तीर्थयात्राकरणेनोत्तमलोकत्वाप्तिवर्णनम्, दशमीवेधे मोहिन्यवस्थानात् द्वादशीविद्धैकादशीव्रतस्यवोक्तफलदातृनिरूपणम् श्रीनारदीयपुराणोत्तरखण्डपठनश्रवणफलवर्णनञ्च श्लो०६२॥

इति श्रीक्षेत्रनासिकनिवासिवैद्योपाभिधसदाशिवतनयरंगनाथशास्त्रिविरचिता श्रीनारदीयपुराणस्थितविषयानुक्रमणिका सम्पूर्णा ॥

इदं श्रीबृहन्नारदीय महापुराणं मुम्बय्यां क्षेमराज श्रीकृष्णदासश्रेष्ठिना स्वकीये “श्रीवेङ्कटेश्वर” स्टीम्-यन्त्रागारे मुद्रयित्वा प्रकाशितम् ।

संवत् १९८०, शके १८४५.

ॐ श्रीगुरुभ्यो नमः ॥ ॐ श्रीगणेशाय नमः ॥ ॐ नमो भगवते वासुदेवाय ॥ ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं चैव ततो
जयमुदीरयेत् ॥ १ ॥ ॐ वेदव्यासाय नमः ॥ वृन्दे वृन्दावनासीनमिन्दिरानन्दमन्दिरम् ॥ उपेन्द्रं सांद्रकारुण्यं परानन्दं परात्परम् ॥ १ ॥ ब्रह्मविष्णुमहेशाख्यं
यस्यांशा लोकसाधकाः ॥ तमादिदेवं चिद्रूपं विशुद्धं परमं भजे ॥ २ ॥ शौनकाद्या महात्मान ऋषयो ब्रह्मवादिनः ॥ नैमिषाख्ये महारण्ये तपस्ते
पुर्मुमुक्षवः ॥ ३ ॥ जितेन्द्रिया जिताहाराः सन्तः सत्यपराक्रमाः ॥ यजन्तः परया भक्त्या विष्णुमाद्यं सनातनम् ॥ ४ ॥ अनीर्ष्याः सर्वधर्म्मज्ञा लोकानुग्रह
तत्पराः ॥ निर्म्ममा निरहंकाराः परस्मिन्नतमानसाः ॥ ५ ॥ न्यस्तकामा विवृजिनाः शमादिगुणसंयुताः ॥ कृष्णाजिनोत्तरीयास्ते जटिला ब्रह्मचारिणः
॥ ६ ॥ गृणन्तः परमं ब्रह्म जगच्चक्षुः समौजसः ॥ धर्म्मशास्त्रार्थतत्त्वज्ञास्तेपुर्नैमिषकानने ॥ ७ ॥ यज्ञैर्यज्ञपतिं केचिज्ज्ञानैर्ज्ञानात्मकं परे ॥ केचिच्च
परया भक्त्या नारायणमपूजयन् ॥ ८ ॥ एकदा ते महात्मानः समाजं चक्रुरुत्तमाः ॥ धर्मार्थकाममोक्षाणामुपायाञ्ज्ञातुमिच्छवः ॥ ९ ॥
षड्विंशतिसहस्राणि मुनीनामूर्द्ध्वरेतसाम् ॥ तेषां शिष्यप्रशिष्याणां संख्या वक्तुं न शक्यते ॥ १० ॥ मुनयो भावितात्मानो मिलितास्ते महौजसः ॥
लोकानुग्रहकर्त्तारो वीतरागा विमत्सराः ॥ ११ ॥ कानि क्षेत्राणि पुण्यानि कानि तीर्थानि भूतले ॥ कथं वा प्राप्यते मुक्तिर्नृणां तापार्तचेतसाम् ॥ १२ ॥ कथं हरौ
मनुष्याणां भक्तिरव्यभिचारिणी ॥ केन सिध्येत च फलं कर्मणस्त्रिविधात्मनः ॥ १३ ॥ इत्येवं प्रष्टुमात्मानमुद्यतान्प्रेक्ष्य शौनकः ॥ प्राञ्जलिर्वाक्यमाहेदं
विनयावनतः सुधीः ॥ १४ ॥ शौनक उवाच ॥ आस्ते सिद्धाश्रमे पुण्ये सूतः पौराणिकोत्तमः ॥ यजन्मखैर्बहुविधैर्विश्वरूपं जनार्दनम् ॥ १५ ॥
स एतदखिलं वेत्ति व्यासशिष्यो महामुनिः ॥ पुराणसंहितावक्ता शान्तो वै रोमहर्षणिः ॥ १६ ॥ युगे युगेऽल्पकान्धर्मान्निरीक्ष्य मधुसूदनः ॥ वेदव्यास
स्वरूपेण वेदभागं करोति वै ॥ १७ ॥ वेदव्यासमुनिः साक्षान्नारायण इति द्विजाः ॥ शुश्रमः सर्वशास्त्रेषु सूतस्तु व्यासशासितः ॥ १८ ॥ तेन
संशासितः सूतो वेदव्यासेन धीमता ॥ पुराणानि स वेत्त्येव नान्यो लोके ततः परः ॥ १९ ॥ स पुराणार्थविल्लोके स सर्वज्ञः स बुद्धिमान् ॥ स
शान्तो मोक्षधर्मज्ञः कर्मभक्तिकलापवित् ॥ २० ॥ वेदवेदाङ्गशास्त्राणां सारभूतं मुनीश्वराः ॥ जगद्धितार्थं तत्सर्वं पुराणेषूक्तवान्मुनिः ॥ २१ ॥
ज्ञानार्णवो वै सूतस्तत्सर्वतत्त्वार्थकोविदः ॥ तस्मात्तमेव पृच्छाम इत्यूचे शौनको मुनीन् ॥ २२ ॥ ततस्ते मुनयः सर्वे शौनकं वाग्विदां वरम् ॥ समाश्लिष्य
सुसंप्रीताः साधु साध्विति चाब्रुवन् ॥ २३ ॥ अथ ते मुनयो जग्मुः पुण्यं सिद्धाश्रमं वने ॥ मृगव्रजसमाकीर्णं मुनिभिः परिशोभितम् ॥ २४ ॥
मनोज्ञभूरुहलताफलपुष्पविभूषितम् ॥ युक्तं सरोभिरच्छोदैरतिथ्यातिथ्यसंकुलम् ॥ २५ ॥ ते तु नारायणं देवमनन्तमपराजितम् ॥ यजन्तमग्निष्टोमेन ददृशू रोमहर्षणिम् ॥

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

॥२६॥यथार्हमर्चितास्तेन सूतेन प्रथितौजसः ॥ तस्यावभृथमीक्षन्तस्तत्र तस्थुर्मखालये॥ २७ ॥अथरावभृथस्नातं सूतं पौराणिकोत्तमम्॥ पप्रच्छुस्ते
सुखासीनं नैमिषारण्यवासिनः ॥ २८ ॥ ऋषय ऊचुः ॥ वयं त्वतिथयः प्राप्ता आतिथेयास्तु सुव्रत ॥ ज्ञानदानोपचारेण पूजयास्मान्यथावि
धि ॥ २९ ॥ दिवौकसो हि जीवन्ति पीत्वा चन्द्रकलामृतम् ॥ ज्ञानामृतं भूसुरास्तु मुने त्वन्मुखनिःसृतम् ॥ ३० ॥ येनेदमखिलं जातं यदा
धारं यदात्मकम् ॥ यस्मिन्प्रतिष्ठितं तात यस्मिन्वा लयमेष्यति ॥ ३१ ॥ केन विष्णुः प्रसन्नः स्यात्स कथं पूज्यते नरैः ॥ कथं वर्णाश्रमाचार
श्चातिथेः पूजनं कथम् ॥ ३२ ॥ सफलं स्याद्यथा कर्म मोक्षोपायः कथं नृणाम् ॥ भक्त्या किं प्राप्यते पुंभिस्तथा भक्तिश्च कीदृशी॥ ३३॥ वद
सूत मुनिश्रेष्ठ सर्वमेतदसंशयम् ॥ कस्य नो जायते श्रद्धा श्रोतुं त्वद्वचनामृतम् ॥ ३४ ॥ ॥ सूत उवाच ॥ ॥ शृणुध्वमृषयः सर्वे यदिष्टं वो
वदामि तत् ॥ गीतं सनकमुख्यैस्तु नारदाय महात्मने ॥ ३५॥ पुराणं नारदोपाख्यमेतद्वेदार्थसंमितम् ॥ सर्वपापप्रशमनं दुष्टग्रहनिवारणम्॥३६॥
दुःस्वप्ननाशनं धर्म्यं भुक्तिमुक्तिफलप्रदम् ॥ नारायणकथोपेतं सर्वकल्याणकारणम् ॥ ३७ ॥ धर्मार्थकाममोक्षाणां हेतुभूतं महाफलम् ॥ अपूर्वं
पुण्यफलदं शृणुध्वं सुसमाहिताः ॥ ३८ ॥ महापातकयुक्तो वा युक्तो वाप्युपपातकैः ॥ श्रुत्वैतदार्षं दिव्यं च पुराणं शुद्धिमाप्नुयात्॥३९ ॥यस्यै
काध्यायपठनाद्वाजिमेधफलं लभेत् ॥ अध्यायद्वयपाठेन राजसूयफलं तथा॥ ४० ॥ ज्येष्ठमासे पूर्णिमायां मूलर्क्षे प्रयतो नरः ॥ स्नात्वा च यमुना
तोये मथुरायामुपोषितः ॥ ४१ ॥ अभ्यर्च्य विधिवत्कृष्णं यत्फलं लभते द्विजाः ॥ तत्फलं समवाप्नोति अध्यायत्रयपाठतः॥ ४२॥तत्प्रवक्ष्यामि
वः सम्यक् शृणुध्वं गदतो मम ॥ जन्मायुतार्जितैः पापैर्मुक्तः कोटिकुलान्वितः ॥ ४३॥ ब्रह्मणः पदमासाद्य तत्रैव प्रतितिष्ठति ॥ श्रुत्वास्य तु दशा
ध्यायान्भक्तिभावेन मानवः ॥ ४४ ॥ निर्वाणमुक्तिं लभते नात्र कार्या विचारणा ॥ श्रेयसां परमं श्रेयः पवित्राणामनुत्तमम् ॥ ४५ ॥ दुःस्वप्नना
शनं पुण्यं श्रोतव्यं यत्नतो द्विजाः ॥ श्रद्धया सहितो मर्त्यः श्लोकं श्लोकार्द्धमेव वा॥४६॥ पठित्वा मुच्यते सद्यो महापातकराशिभिः॥ सतामेव प्रव
क्तव्यं गुह्याद्गुह्यतरं यतः ॥ ४७ ॥ वाचयेत्पुरतो विष्णोः पुण्यक्षेत्रे द्विजान्तिके ॥ ब्रह्मद्रोहपराणां च दंभाचारयुतात्मनाम् ॥ ४८ ॥ जनानां बकवृ
तीनां न ब्रूयादिदमुत्तमम् ॥ त्यक्तकामादिदोषाणां विष्णुभक्तिरतात्मनाम् ॥४९ ॥ सदाचारपराणां च वक्तव्यं मोक्षसाधनम् ॥ सर्वदेवमयो विष्णुः
स्मरतामार्तिनाशनः ॥५०॥ सद्भक्तिवत्सलो विप्रा भक्त्या तुष्यति नान्यथा॥ अश्रद्धयापि यन्नाम्नि कीर्तितेऽथ स्मृतेऽपि वा ॥५१॥ विमुक्तः पात
कैर्मर्त्यो लभते पदमव्ययम् ॥ संसारघोरकान्तारदावाग्निर्मधुसूदनः ॥ ५२ ॥ स्मरतां सर्वपापानि नाशयत्याशु सत्तमाः ॥ तदर्थद्योतकमिदं पुराणं

श्राव्यमुत्तमम् ॥ ५३ ॥ श्रवणात्पठनाद्वापि सर्वपापविनाशकृत् ॥ यस्यास्य श्रवणे बुद्धिर्जायते भक्तिसंयुता ॥ ५४ ॥ स एव कृतकृत्यस्तु सर्वशास्त्रार्थकोविदः ॥ यदर्जितं तपः पुण्यं तन्मन्ये सफलं द्विजाः ॥ ५५ ॥ यदस्य श्रवणे भाक्तिरन्यथा नहि जायते ॥ सत्कथासु प्रवर्तन्ते सज्जना ये जगद्धिताः ॥ ५६ ॥ निन्दायां कलहे वापि ह्यसन्तः पापतत्पराः ॥ पुराणेष्वर्थवादत्वं ये वदन्ति नराधमाः ॥ ५७ ॥ तैरर्जितानि पुण्यानि क्षयं यान्ति द्विजोत्तमाः समस्तकर्मनिर्मूलसाधनानि नराधमः ॥ ५८ ॥ पुराणान्यर्थवादेन ब्रुवन्नरकमश्नुते ॥ अन्यानि साधयन्त्येव कार्याणि विधिना नराः ॥ ५९ ॥ पुराणानि द्विजश्रेष्ठाः साधयन्ति न मोहिताः ॥ अनायासेन यः पुण्यानीच्छतीह द्विजोत्तमाः ॥ ६० ॥ श्रोतव्यानि पुराणानि तेन वै भक्तिभावतः ॥ पुराणश्रवणे बुद्धिर्यस्य पुंसः प्रवर्तते ॥ ६१ ॥ पुरार्जितानि पापानि तस्य नश्यन्त्यसंशयम् ॥ पुराणे वर्तमानेऽपि पापपाशेन यन्त्रितः ॥ आदरेणान्यगाथासु सक्तबुद्धिः पतत्यधः ॥ ६२ ॥ सत्सङ्गदेवार्चनसत्कथासु हितोपदेशे निरतो मनुष्यः ॥ प्रयाति विष्णोः परमं पदं यद्देहावसानेऽच्युततुल्यतेजाः ॥ ६३ ॥ तस्मादिदं नारदनामधेयं पुण्यं पुराणं शृणुत द्विजेन्द्राः ॥ यस्मिञ्छ्रुते जन्मजरादिहीनो नरो भवेदच्युतनिष्ठचेताः ॥ ६४ ॥ वरं वरेण्य वरदं पुराणं निजप्रभाभावितसर्वलोकम् ॥ संकल्पितार्थप्रदमादिदेवं स्मृत्वा व्रजेन्मुक्तिपदं मनुष्यः ॥ ६५ ॥ ब्रह्मेशविष्ण्वादिशरीरभेदैर्विश्वं सृजत्यत्ति च पाति विप्राः ॥ तमादिदेवं परमं परेशमाधाय चेतस्युपयाति मुक्तिम् ॥ ६६॥ यो नाम जात्यादिविकल्पहीनः परः पराणां परमः परस्मात् ॥ वेदान्तवेद्यः स्वजनप्रकाशः समीड्यते सर्वपुराणवेदैः ॥ ६७ ॥ तस्मात्तमीशं जगतां विमुक्तिमुपासनायालमजं मुरारिम् ॥ परं रहस्यं पुरुषार्थहेतुं स्मृत्वा नरो याति भवाब्धिपारम् ॥ ६८ ॥ वक्तव्यं धार्मिकेभ्यस्तु श्रद्दधानेभ्य एव च ॥ मुमुक्षुभ्यो यतिभ्यश्च वीतरागेभ्य एव च ॥ ६९ ॥ वक्तव्यं पुण्यदेशे च सभायां देवतागृहे ॥ पुण्यक्षेत्रे पुण्यतीर्थे देवब्राह्मणसन्निधौ॥७०॥उच्छिष्टदेशे वक्तार आख्यानमिदमुत्तमम् ॥ पच्यन्ते नरके घोरे यावदाभूतसंप्लवम्॥७१॥मृषा शृणोति यो मूढो दम्भी भक्तिविवर्जितः ॥ सोऽपि तद्वन्महाघोरे नरके पच्यतेऽक्षये ॥ ७२ ॥ नरो यः सत्कथामध्ये संभाषां कुरुतेऽन्यतः ॥ स याति नरकं घोरं तदेकाग्रमना भवेत्॥७३॥श्रोता वक्ता च विप्रेन्द्रा एष धर्मः सनातनः॥ असमाहितचित्तस्तु न जानाति हि किंचन॥ ७४॥ तत एकमना भूत्वा पिबेद्धरिकथामृतम्॥ कथं संभ्रान्तचित्तस्य कथास्वादः प्रजायते ॥ ७५ ॥ किं सुखं प्राप्यते लोके पुंसा संभ्रान्तचेतसा ॥ तस्मात्सर्वं परित्यज्य कामं दुःखस्य साधनम्॥७६॥समाहितमना भूत्वा कुर्यादच्युतचिन्तनम् ॥ येन केनाप्युपायेन स्मृतो नारायणोऽव्ययः॥७७॥अपि पातकयुक्तस्य प्रसन्नः स्यान्न संशयः॥

यस्य नारायणे भक्तिर्विभौ विश्वेश्वरेऽव्यये ॥ तस्य स्यात्सफलं जन्म मुक्तिश्चैव करे स्थिता ॥ ७८ ॥ धर्मार्थकाममोक्षाख्यपुरुषार्था द्विजोत्तमाः ॥ हरिभक्तिपराणां वै संपद्यन्ते न संशयः ॥ ७९ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे सूतर्षिसंवादो नाम प्रथमोऽध्यायः॥ १ ॥

ऋषय ऊचुः ॥ कथं सनत्कुमारस्तु नारदाय महात्मने ॥ प्रोक्तवान्सकलान्धर्मान्कथं तौ मिलिताबुभौ ॥ १ ॥ कस्मिन्स्थाने स्थितौ सूत तावुभौ ब्रह्मवादिनौ ॥ हरिगीतसमुद्गाने चक्रतुस्तद्वदस्व नः॥२॥ सूत उवाच ॥ सनकाद्या महात्मानो ब्रह्मणो मानसाः सुताः॥ निर्ममा निरहंकाराः सर्वे ते ह्यूर्ध्वरेतसः ॥३॥ तेषां नामानि वक्ष्यामि सनकश्च सनन्दनः ॥ सनत्कुमारश्च विभुः सनातन इति स्मृतः ॥ ४ ॥ विष्णुभक्ता महात्मानो ब्रह्मध्यानपरायणाः ॥ सहस्रसूर्यसंकाशाः सत्यसन्धा मुमुक्षवः ॥५॥ एकदा मेरुशृङ्गं ते प्रस्थिता ब्रह्मणः सभाम्॥ इष्टं मार्गेऽथ ददृशुः गङ्गां विष्णुपदीं द्विजाः ॥ ६॥ तां निरीक्ष्य समुद्युक्ताः स्नातुं सीताजलेऽभवन् ॥ एतस्मिन्नंतरे तत्र देवर्षिर्नारदो मुनिः ॥७॥ आजगाम द्विजश्रेष्ठा दृष्ट्वा भ्रान्तॄन्स्वकाग्रजान् ॥ तान्दृष्ट्वा स्नातुमुद्युक्तान्नमस्कृत्य कृताञ्जलिः ॥ ८ ॥ गृणन्नामानि सप्रेमभक्तियुक्तो मधुद्विषः ॥ नारायणाच्युतानन्त वासुदेव जनार्दन ॥ ९ ॥ यज्ञेश यज्ञपुरुष कृष्ण विष्णो नमोऽस्तु ते ॥ पद्माक्ष कमलाकान्त गङ्गाजनक केशव ॥ क्षीरोदशायिन्देवेश दामोदर नमोऽस्तु ते॥ १०॥ श्रीराम विष्णो नरसिंह वामन प्रद्युम्न संकर्षण वासुदेव॥ अजानिरुद्धामलरुङ् मुरारे त्वं पाहि नः सर्वभयादजस्रम्॥ ११॥ इत्युच्चरन्हरेर्नाम नत्वा तान्स्वाग्रजान्मुनीन् ॥ उपासीनश्च तैः सार्द्धं सस्नौ प्रीतिसमन्वितः ॥ १२ ॥ ते षां चापि तु सीताया जले लोकमलापहे ॥ स्नात्वा संतर्प्य देवर्षिपितॄन्विगतकल्मषाः ॥ १३ ॥ उत्तीर्य्य संध्योपास्त्यादि कृत्वाचारं स्वकं द्विजाः ॥ कथां प्रचक्रुर्विविधाः नारायणगुणाश्रिताः ॥ १४ ॥ कृतक्रियेषु मुनिषु गङ्गातीरे मनोरमे ॥ चकार नारदः प्रश्नं नानाख्यानकथान्तरे ॥१५॥ ॥ नारद उवाच ॥ ॥ सर्वज्ञाः स्थ मुनिश्रेष्ठाः भगवद्भक्तितत्पराः ॥ यूयं सर्वे जगन्नाथा भगवन्तः सनातनाः ॥ १६ ॥ लोकोद्धारपरान्युष्मान्दीनेषु कृतसौहृदान् ॥ पृच्छे ततो वदत मे भगवल्लक्षणं बुधाः ॥ १७ ॥ येनेदमखिलं जातं जगत्स्थावरजङ्गमम् ॥ गङ्गापादोदकं यस्य स कथं ज्ञायते हरिः॥ १८॥ कथं च त्रिविधं कर्म सफलं जायते नृणाम् ॥ ज्ञानस्य लक्षण ब्रूत तपसश्चापि मानदाः ॥ १९ ॥ अतिथेः पूजनं वापि येन विष्णुः प्रसीदति ॥ एवमादीनि गुह्यानि हरितुष्टिकराणि च ॥ अनुगृह्य च मां नाथास्तत्त्वतो वक्तुमर्हथ ॥ २० ॥ ॥ शौनक उवाच ॥ ॥ नमः पराय देवाय परस्मात्परमाय च ॥ परावरनिवासाय सगुणायागुणाय च ॥ २१ ॥ अमायायात्मसंज्ञाय मायिने विश्वरूपिणे ॥ योगीश्वराय योगाय योगगम्याय विष्णवे ॥ २२ ॥ ज्ञानाय

ज्ञानगम्याय सर्वज्ञानैकहेतवे ॥ ज्ञानेश्वराय ज्ञेयाय ज्ञात्रे विज्ञानसंपदे ॥ २३ ॥ ध्यानाय ध्यानगम्याय ध्यातृपापहराय च ॥ ध्यानेश्वराय सुधिये
ध्येयध्यातृस्वरूपिणे ॥ २४ ॥ आदित्यचन्द्राग्निविधातृदेवाः सिद्धाश्च यक्षासुरनागसङ्घाः ॥ यच्छक्तियुक्तास्तमजं पुराणं सत्यं स्तुतीशं सततं
नतोऽस्मि ॥२५॥ यो ब्रह्मरूपी जगतां विधाता स एव पाता द्विजविष्णुरूपी॥कल्पान्तरुद्राख्यतनुः स देवः शेतेंऽग्रिपानस्तमजं भजामि॥२६॥
यन्नामसंकीर्त्तनतो गजेन्द्रो ग्राहोग्रबन्धान्मुमुचे स देवः ॥ विराजमानः स्वपदे पराख्ये तं विष्णुमाद्यं शरणं प्रपद्ये।।२७ ॥ शिवस्वरूपी शिवभक्ति
भाजां यो विष्णुरूपी हरिभावितानाम् ॥ संकल्पपूर्वात्मकदेहहेतुस्तमेव नित्यं शरणं प्रपद्ये ॥२८॥ यः केशिहन्ता नरकान्तकश्च बालो भुजाग्रेण
दधार गोत्रम् ॥ देवं च भूभारविनोदशीलं तं वासुदेवं सततं नतोऽस्मि ॥ २९ ॥ लेभेऽवतीर्योग्रनृसिंहरूपी यो दैत्यवक्षः कठिनं शिलावत् ॥ विदार्य
संरक्षितवान्स्वभक्तं प्रह्लादमीशं तमजं नमामि ॥ ३० ॥ व्योमादिभिर्भूषितमात्मसंज्ञं निरञ्जनं नित्यममेयतत्त्वम् ॥ जगद्विधातारमकर्मकं च
परं पुराणं पुरुषं नतोऽस्मि ॥ ३१ ॥ ब्रह्मेन्द्ररुद्रानिलवायुमर्त्यगन्धर्वयक्षासुरदेवसंघैः ॥ स्वमूर्तिभेदैः स्थित एक ईशस्तमादिमात्मा
नमहं भजामि ॥ ३२ ॥ यतो भिन्नमिदं सव समुद्भूतं स्थितं च वै ॥ यस्मिन्नेष्यति पश्चाच्च तमस्मि शरणं गतः ॥३३ ॥ यः स्थितो विश्वरूपेण
सङ्गीवात्र प्रतीयते ॥ असङ्गी परिपूर्णश्च तमस्मि शरणं गतः॥३४॥ हृदि स्थितोऽपि यो देवो मायया मोहितात्मनाम्॥ न ज्ञायेत परः शुद्धस्तमस्मि
शरणं गतः॥ ३५ ॥सर्वसंगनिवृत्तानां ध्यानयोगरतात्मनाम्॥सर्वत्र भाति ज्ञानात्मा तमस्मि शरणं गतः॥३६॥दधार मंदरं पृष्ठे निरोदेऽमृतमन्थने॥
देवतानां हितार्थाय तं कूर्मं शरणं गतः ॥३७ ॥ दंष्ट्राङ्कुरेण योऽनन्तः समुद्धृत्यार्णवाद्धराम् ॥ तस्थाविदं जगत्कृत्स्नं वाराहं तं नतोऽस्म्यहम् ॥३८॥
प्रह्लादं गोपयन्दैत्यं शिलातिकठिनोरसम् ॥ विदार्य हतवान्यो हि तं नृसिंहं नतोऽस्म्यहम् ॥३९॥ लब्ध्वा वैरोचनेर्भूमिं द्वाभ्यां पद्भ्यामतीत्य यः॥
आब्रह्मभुवनं प्रादात्सुरेभ्यस्तं नतोऽजितम् ॥ ४० ॥हैहयस्यापराधेन ह्येकविंशतिसंख्यया ॥ क्षत्रियान्वयभेत्ता यो जामदग्न्यं नतोऽस्मि तम्॥ ४१ ॥
आविर्भूतश्चतुर्द्धा यः कपिभिः परिवारितः ॥ ॥ हतवान्राक्षसानीकं रामचन्द्रं नतोऽस्म्यहम् ॥ ४२ ॥ मूर्तिद्वयं समाश्रित्य भूभारमपहृत्य च ॥
संजहार कुलं स्वं यस्तं श्रीकृष्णमहं भजे ॥४३॥ भूम्यादिलोकत्रितयं संतृप्तात्मानमात्मनि ॥ पश्यन्ति निर्मलं शुद्धं तमीशानं भजाम्यहम् ॥ ४४ ॥
युगान्ते पापिनो शुद्धान्भित्त्वा तीक्ष्णसुधारया॥ स्थापयामास यो धर्मं कृतादौ तन्नमाम्यहम् ॥ ४५ ॥ एवमादीन्यनेकानि यस्य रूपाणि पाण्डवाः॥
न शक्यं तेन संख्यातुं कोट्यब्दैरपि तं भजे ॥ ४६ ॥ महिमानं तु यन्नाम्नः परं गंतुं मुनीश्वराः ॥ देवासुराश्च मनवः कथं तं क्षुल्लको भजे ॥ ४७ ॥

यन्नामश्रवणेनापि महापातकिनो नराः ॥ पवित्रतां प्रपद्यन्ते त कथं स्तौमि चाल्पधीः ॥ ४८ ॥ यथाकथंचिद्यन्नाम्नि कीर्तिते वा श्रुतेऽपि वा ॥ पापिनस्तु विशुद्धाः स्युः शुद्धा मोक्षमवाप्नुयुः ॥ ४९ ॥ आत्मन्यात्मानमाधाय योगिनो गतकल्मषाः॥पश्यन्ति यं ज्ञानरूपं तमस्मि शरणं गतः ॥ ५० ॥ साङ्ख्याः सर्वेषु पश्यन्ति परिपूर्णात्मकं हरिम् ॥ तमादिदेवमजरं ज्ञानरूपं भजाम्यहम् ॥ ५१ ॥ सर्वसत्त्वमयं शान्तं सर्वद्रष्टारमीश्वरम् ॥ सहस्रशीर्षकं देवं वन्दे भावात्मकं हरिम् ॥ ५२ ॥ यद्भूतं यच्च वै भाव्यं स्थावरं जङ्गमं जगत् ॥ दशाङ्गुलं योऽत्यतिष्ठत्तमीशमजरं भजे ॥ ५३ ॥ अणोरणीयांसमजं महतश्च महत्तरम् ॥ गुह्याद्गुह्यतमं देवं प्रणमामि पुनःपुनः ॥ ५४ ॥ ध्यातः स्मृतः पूजितो वा श्रुतः प्रणमितोऽपि वा ॥ स्वपदं यो ददातीशस्तं वन्दे पुरुषोत्तमम् ॥ ५५ ॥ इति स्तुवन्तं परमं परेशं हर्षाम्बुसंरुद्धविलोचनास्ते॥मुनीश्वरा नारदसंयुतास्तु सनन्दनाद्याः प्रमुदं प्रजग्मुः ॥५६॥य इदं प्रातरुत्थाय पठेद्वै पौरुषं स्तवम् ॥ सर्वपापविशुद्धात्मा विष्णुलोकं स गच्छति॥५७॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे सनत्कुमारनारदसंवादे नारदकृतविष्णुस्तुतिर्नाम द्वितीयोध्यायः ॥ २ ॥

नारद उवाच ॥ कथं ससर्ज ब्रह्मादीनादिदेवः पुरा विभुः ॥ तन्ममाख्याहि सनक सर्वज्ञोऽस्ति यतो भवान्॥१॥श्रीसनक उवाच॥नारायणोऽक्षरोऽनन्तः सर्वव्यापी निरञ्जनः॥तेनेदमखिलं व्याप्तं जगत्स्थावरजङ्गमम् ॥२॥ आदिसर्गे महाविष्णुः स्वप्रकाशो जगन्मयः॥ गुणभेदमधिष्ठाय मूर्त्तित्रिकमवासृजत् ॥३॥ सृष्ट्यर्थं तु पुरा देवो दक्षिणाङ्गात्प्रजापतिम्॥मध्ये रुद्राख्यमीशानं जगदन्तकरं मुने ॥ ४ ॥ पालनायास्य जगतो वामाङ्गाद्विष्णुमव्ययम् ॥ तमादिदेवमजरं केचिदाहुः शिवाभिधम् ॥ केचिद्विष्णुं सदा सत्यं ब्रह्माणं केचिदूचिरे॥५॥तस्य शक्तिः परा विष्णोर्जगत्कार्यप्रवर्तिनी ॥ भावाभावस्वरूपा सा विद्याविद्येति गीयते॥६॥यदा विश्वं महाविष्णोर्भिन्नत्वेन प्रतीयते ॥ तदा ह्यविद्या संसिद्धा भवेद्दुःखस्य साधनम् ॥ ७ ॥ ज्ञातृज्ञेयाद्युपाधिस्ते यदा नश्यति नारद ॥ सर्वैकभावनाबुद्धिः सा विद्येत्यभिधीयते॥८॥एवं माया महाविष्णोर्भिन्ना संसारदायिनी ॥ अभेदबुद्ध्या दृष्टा चेत्संसारक्षयकारिणी ॥९॥ विष्णुशक्तिसमुद्भूतमेतत्सर्वं चराचरम् ॥ यस्माद्भिन्नमिदं सर्वं यच्चेङ्गद्यच्चने ङ्गति ॥ १०॥ उपाधिभिर्यथाकाशो भिन्नत्वेन प्रतीयते ॥ अविद्योपाधियोगेन तथेदमखिलं जगत् ॥ ११॥ यथा हरिर्जगद्व्यापी तस्य शक्तिस्तथा मुने ॥ दाहशक्तिर्यथांगारे स्वाश्रयं व्याप्य तिष्ठति ॥ १२॥उमेति केचिदाहुस्तां शक्तिं लक्ष्मीं तथा परे ॥ भारतीत्यपरे चैनां गिरिजेत्यम्बिकेति च ॥ १३ ॥ दुर्गेति भद्रकालीति चण्डी माहेश्वरीत्यपि ॥ कौमारी वैष्णवी चेति वाराह्यैन्द्री च शाम्भवी॥१४॥ब्राह्मीति विद्याविद्येति मायेति च तथा परे ॥ प्रकृतिश्च परा चेति वदन्ति परमर्षयः॥१५॥शेषशक्तिः परा विष्णोर्जगत्सर्गादिका

रिणी ॥ व्यक्ताऽव्यक्तस्वरूपेण जगद्व्याप्य व्यवस्थिता ॥ १६ ॥ प्रकृतिश्च पुमांश्चैव कालश्चेति विधिस्थितिः ॥ सृष्टिस्थितिविनाशानामेकः कारणतां
गतः ॥ १७ ॥ येनेदमखिलं जातं ब्रह्मरूपधरेण वै ॥ तस्मात्परतरो देवो नित्य इत्यभिधीयते ॥ १८ ॥ रक्षां करोति यो देवो नित्य इत्यभिधीयते ॥ १९ ॥
रक्षां करोति यो देवो जगतां परतः पुमान् ॥ तस्मात्परतरं यत्तदव्ययं परमं पदम् ॥ २० ॥ अक्षरो निर्गुणः शुद्धः परिपूर्णः सनातनः ॥ यः परः
कालरूपाख्यो योगिध्येयः परात्परः ॥ २१ ॥ परमात्मा परानन्दः सर्वोपाधिविवर्जितः ॥ ज्ञानैकवेद्यः परमः सच्चिदानन्दविग्रहः ॥ २२ ॥ योऽसौ
शुद्धोऽपि परमो ह्यहंकारेण संयुतः ॥ देहीति प्रोच्यते मूढैरहोऽज्ञानविडम्बनम् ॥ २३ ॥ स देवः परमः शुद्धः सत्त्वादिगुणभेदतः ॥ मूर्तित्रयं समापन्नः
सृष्टिस्थित्यन्तकारणम् ॥ २४ ॥ योऽसौ ब्रह्मा जगत्कर्ता यन्नाभिकमलोद्भवः ॥ स एवानन्दरूपात्मा तस्मान्नास्त्यपरो मुने ॥ २५ ॥ अन्तर्यामी जगद्व्यापी सर्वसाक्षी
निरञ्जनः ॥ भिन्नाभिन्नस्वरूपेण स्थितो वै परमेश्वरः ॥ २६ ॥ यस्य शक्तिर्महामाया जगद्विस्रम्भधारिणी ॥ विश्वोत्पत्तेर्निदानत्वात्प्रकृतिः
प्रोच्यते बुधैः ॥ २७ ॥ आदिसर्गे महाविष्णोर्लोकान्कर्तुं समुद्यतः ॥ प्रकृतिः पुरुषश्चेति कालश्चेति त्रिधा भवेत् ॥ २८ ॥ पश्यन्ति भावितात्मानो यं ब्रह्मेत्यभिसंज्ञितम् ॥
शुद्धं यत्परमं धाम तद्विष्णोः परमं पदम् ॥ २९ ॥ एवं शुद्धोऽक्षरोऽनन्तः कालरूपी महेश्वरः ॥ गुणरूपी गुणाधारो जगतामादिकृद्विभुः ॥ ३० ॥
प्रकृतिः क्षोभमापन्ना पुरुषाख्ये जगद्गुरौ ॥ महान्प्रादुरभूद्बुद्धिस्ततोऽहं समवर्त्तत ॥ ३१ ॥ अहंकाराच्च सूक्ष्माणि तन्मात्राणीन्द्रियाणि च ॥ तन्मात्रेभ्यो
हि जातानि भूतानि जगतः कृते ॥ ३२ ॥ आकाशवाय्वग्निजलभूमयोऽब्जभवात्मज ॥ यथाक्रमं कारणतामेकैकस्योपयान्ति च ॥ ३३ ॥ ततो
ब्रह्मा जगद्धाता तामसानसृजत्प्रभुः ॥ तिर्यग्योनिगताञ्जन्तून्पशुपक्षिमृगादिकान् ॥ ३४ ॥ तमप्यसाधकं मत्वा देवसर्गं सनातनात् ॥ ततो वै
मानुषं सर्गं कल्पयामास पद्मजः ॥ ३५ ॥ ततो दक्षादिकान्पुत्रान्सृष्टिसाधनतत्परान् ॥ एभिः पुत्रैरिदं व्याप्तं सदेवासुरमानुषम् ॥ ३६ ॥ भूर्भुवश्च
तथा स्वश्च महश्चैव जनस्तथा ॥ तपश्च सत्यमित्येवं लोकाः सत्योपरि स्थिताः ॥ ३७ ॥ अतलं वितलं चैव सुतलं च तलातलम् ॥ महातलं च
विप्रेन्द्र ततोऽधश्च रसातलम् ॥ ३८ ॥ पातालं चेति सप्तैव पातालानि क्रमादधः ॥ एष सर्वेषु लोकेषु लोकनाथांश्च सृष्टवान् ॥ ३९ ॥ कुलाचलान्नदीश्चासौ
तत्तल्लोकनिवासिनाम् ॥ वर्त्तनादीनि सर्वाणि यथायोग्यमकल्पयत् ॥ ४० ॥ भूतले मध्यगो मेरुः सर्वदेवसमाश्रयः ॥ लोकालोकश्च
भूम्यन्ते तन्मध्ये सप्त सागराः ॥ ४१ ॥ द्वीपाश्च सप्त विप्रेन्द्र द्वीपे द्वीपे कुलाचलाः ॥ बाह्या नद्यश्च विख्याता जनाश्चामरसन्निभाः ॥ ४२ ॥ जम्बूप्लक्षाभिधानौ
च शाल्मलश्च कुशस्तथा ॥ क्रौञ्चशाकौ पुष्करश्च ते सर्वे देवभूमयः ॥ ४३ ॥ एते द्वीपाः समुद्रैस्तु सप्तसप्तभिरावृताः ॥ लवणेक्षुसु

Nepal Sanskrit University ... Kathmandu

रासर्पिर्दधिक्षीरजलैः समम्॥ ४४॥एते द्वीपाः समुद्राश्च पूर्वस्मादुत्तरोत्तराः ॥ ज्ञेया द्विगुणविस्तारा लोकालोकाच्च पर्वतात्॥४५॥ क्षारोदधेरुत्तरं यद्धि
माद्रेश्चैव दक्षिणाम् ॥ ज्ञेयं तद्भारतं वर्षं सर्वकर्मफलप्रदम् ॥४६॥ अत्र कर्माणि कुर्वन्ति त्रिविधानि तु नारद ॥ तत्फलं भुज्यते चैव भोगभूमिधन
क्रमात्॥४७॥भारते तु कृतं कर्म शुभं वाशुभमेव च ॥ तत्फलं क्षयि विप्रेन्द्र भुज्यतेऽन्यत्र जन्तुभिः ॥४८॥ अद्यापि देवा इच्छन्ति जन्म भारतभूतले॥
संचितं सुमहत्पुण्यमक्षय्यममलं शुभम् ॥ ४९ ॥ कदा लभामहे जन्म वर्षभारतभूमिषु॥ कदा पुण्येन महता यास्याम परमं पदम् ॥ ५० ॥ दानैर्वा
विविधैर्यज्ञैस्तपोभिर्वाथवा हरिम्॥ जगदीशं समेष्यामो नित्यानन्दमनामयम्॥५१॥यो भारतभुवं प्राप्य विष्णुपूजापरो भवेत्॥न तस्य सदृशोऽन्यो
ऽस्ति त्रिषु लोकेषु नारद॥५२॥हरिकीर्तनशीलो वा तद्भक्तानां प्रियोऽपि वा॥शुश्रूषुर्वापि महतः स वेद्यो दिविजैरपि॥५३॥हरिपूजारतो नित्यं भक्तः
पूजारतोऽपि वा॥भक्तोच्छिष्टान्नसेवी च याति विष्णोः परं पदम्॥५४॥नारायणेति कृष्णेति वासुदेवेति यो वदेत्।अहिंसादिपरः शान्तः सोऽपि वन्द्यः
सुरोत्तमैः॥५५॥शिवेति नीलकण्ठेति शङ्करेतिच यः स्मरेत्॥सर्वभूतहितो नित्यं सोऽभ्यर्च्यो दिविजैः स्मृतः॥५६॥गुरुभक्तः शिवध्यानी स्वाश्रमा
चारतत्परः॥अनसूयुःशुचिर्दक्षो यःसोऽप्यर्च्यःसुरेश्वरैः॥५७॥ब्राह्मणानां हितकरः श्रद्धावान्वर्णधर्मयोः॥वेदवादरतो नित्यं स ज्ञेयः पङ्क्तिपावनः॥५८॥
अभेददर्शी देवेशे नारायणशिवात्मके ॥ सर्व यो ब्रह्मणा नित्यमस्मदादिषु का कथा॥५९॥ गोषु क्षान्तो ब्रह्मचारी परनिंदाविवर्जितः॥अपरिग्रहशी
लश्च देवपूज्यः स नारद ॥ ६० ॥ स्तेयादिदोषविमुखः कृतज्ञः सत्यवाक् शुचिः ॥ परोपकारनिरतः पूजनीयः सुरासुरैः ॥६१॥ वेदार्थश्रवणे बुद्धिः
पुराणश्रवणे तथा ॥ सत्संगेऽपि च यस्यास्ति सोऽपि वन्द्यः सुरोत्तमैः॥६२॥एवमादीन्यनेकानि कर्माणि श्रद्धयान्वितः॥ करोति भारते वर्षे संबन्धो
ऽस्माभिरेव च॥ ६३ ॥ एतेष्वन्यतमो विप्रमात्मानं नारभेत्तु यः ॥स एव दुष्कृतिर्मूढो नास्त्यन्योऽस्मादचेतनः ॥ ६४॥ संप्राप्य भारते जन्म सत्कर्म
सु पराङ्मुखः ॥ पीयूषकलशं मुक्त्वा विषभाण्डमुपाश्रितः ॥ ६५॥श्रुतिस्मृत्युदितैर्द्धर्मैर्नात्मानं पावयेत्तु यः॥ स एवात्मविघाती स्यात्पापिनामग्रणीर्मुने॥
॥६६ ॥ कर्मभूमिं समासाद्य यो न धर्मं समाचरेत् ॥ स च सर्वाधमः प्रोक्तो वेदविद्भिर्मुनीश्वर॥६७॥शुभं कर्म समुत्सृज्य दुष्कर्माणि करोति यः॥
कामधेनुं परित्यज्य अर्कक्षीरं स मार्गति ॥ ६८ ॥ एवं भारतभूभागं प्रशंसन्ति दिवौकसः ॥ ब्रह्माद्या अपि विप्रेन्द्र स्वभोगक्षयभीरवः ॥ ६९ ॥ तस्मा
त्पुण्यतमं ज्ञेय भारतं वर्षमुत्तमम् ॥ देवानां दुर्लभं वापि सर्वकर्मफलप्रदम् ॥ ७० ॥ अस्मिन्पुण्ये च भूभागे यस्तु सत्कर्मसूद्यतः ॥ न तस्य सदृशं
कश्चित्त्रिषु लोकेषु विद्यते ॥ ७१ ॥ अस्मिज्ञातो नरो यस्तु स्वकर्मक्षपणोद्यतः ॥नररूपपरिच्छन्नः स हरिर्नात्र संशयः ॥ ७२ ॥ परं लोकफलं प्रेप्सुः

कुर्यात्कर्माण्यतन्द्रितः॥ निवेद्य हरये भक्त्या तत्फलं ह्यक्षयं स्मृतम् ॥७३॥विरागी चेत्कर्मफलेष्वपि किंचिन्न कारयेत् ॥ अर्पयेत्सुकृतं कर्म प्रीयता
मिति मे हरिः ॥७४॥ आब्रह्मभुवनाल्लोकाः पुनरुत्पत्तिदायकाः ॥ फलागृध्नुः कर्मणां तत्प्राप्नोति परमं पदम् ॥ ७५ ॥ वेदोदितानि कर्माणि कुर्या
दीश्वरतुष्टये ॥ यथाश्रमं त्यक्तुकामः प्राप्नोति पदमव्ययम् ॥ ७६ ॥ निष्कामो वा सकामो वा कुर्यात्कर्म यथाविधि ॥ स्वाश्रमाचारशून्यश्च पतितः
प्रोच्यते बुधैः ॥ ७७ ॥ सदाचारपरो विप्रो वर्द्धते ब्रह्मतेजसा ॥ तस्य विष्णुश्च तुष्टः स्याद्भक्तियुक्तस्य नारद ॥७८॥ भारते जन्म संप्राप्य नात्मा
नं तारयेत्तु यः॥पच्यते निरये घोरे स त्वाचन्द्रार्कतारकम्॥७९॥ वासुदेवपरो धर्मो वासुदेवपरं तपः ॥ वासुदेवपरं ज्ञानं वासुदेवपरा गतिः ॥८०॥
वासुदेवात्मकं सर्वं जगत्स्थावरजङ्गमम्॥आब्रह्मस्तम्बपर्यन्तं तस्मादन्यन्न विद्यते ॥८१॥स एव धाता त्रिपुरान्तकश्च स एव देवासुरयज्ञरूपः॥स एव
ब्रह्माण्डमिदं ततोऽन्यन्न किंचिदस्ति व्यतिरिक्तरूपम्॥८२॥यस्मात्परं नापरमास्ति किंचिद्यस्मादणीयान्न तथा महीयान्॥व्याप्तं हि तेनेदमिदं विचित्रं
तं देवदेवं प्रणमेत्समीड्यम्॥८३॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे सृष्टिभरतखण्डप्राशस्त्यभूगोलानां वर्णनं नाम तृतीयोऽध्यायः॥३॥सनक
उवाच॥श्रद्धापूर्वाः सर्वधर्मा मनोरथफलप्रदाः॥श्रद्धया साध्यते सर्वं श्रद्धया तुष्यते हरिः॥१॥भक्तिर्भक्त्यैव कर्त्तव्या तथा कर्माणि भक्तितः॥कर्मश्रद्धावि
हीनानि न सिध्यन्ति द्विजोत्तमाः ॥२॥ यथाऽऽलोको हि जन्तूनां चेष्टाकारणतां गतः॥तथैव सर्वसिद्धीनां भक्तिः परमकारणम् ॥३॥ यथा समस्त
लोकानां जीवनं सलिलं स्मृतम् ॥ तथा समस्तसिद्धीनां जीवनं भक्तिरिष्यते ॥४॥ यथा भूमिं समाश्रित्य सर्वे जीवन्ति जन्तवः॥तथा भक्तिं समा
श्रित्य सर्वकार्य्याणि साधयेत् ॥५॥ श्रद्धावाँल्लभते धर्म्मं श्रद्धावानर्थमाप्नुयात् ॥ श्रद्धया साध्यते कामः श्रद्धावान्मोक्षमाप्नुयात् ॥ ६ ॥ न दानैर्न
तपोभिर्वा यज्ञैर्वा बहुदक्षिणैः ॥ भक्तिहीनैर्मुनिश्रेष्ठ तुष्यते भगवान्हरिः ॥ ७ ॥ मेरुमात्रसुवर्णानां कोटिकोटिसहस्रशः॥दत्ता चाप्यर्थनाशाय यतो
भक्तिविवर्जिता ॥ ८ ॥ अभक्त्या यत्तपस्तप्तं केवलं कायशोषणम् ॥ अभक्त्या यद्धुतं हव्यं भस्मनि न्यस्तहव्यवत् ॥ ९ ॥ यत्किञ्चित्कुरुते कर्म्म
श्रद्धयाऽप्यणुमात्रकम् ॥ तन्नाम जायते पुंसां शाश्वतं प्रीतिदायकम्॥ १० ॥अश्वमेधसहस्रं वा कर्म्म वेदोदितं कृतम् ॥ तत्सर्वं निष्फलं ब्रह्मन्यदि
भक्तिविवर्जितम् ॥ ११ ॥ हरिभक्तिः परा नृणां कामधेनूपमा स्मृता ॥ तस्यां सत्यां पिबन्त्यज्ञाः संसारगरलं ह्यहो ॥ १२ ॥ असारभूते संसारे सार
मेतदजात्मज ॥ भगवद्भक्तसङ्गश्च हरिभक्तिस्तितिक्षुता ॥१३॥ असूयोपेतमनसां भक्तिदानादिकर्म्म यत् ॥ अवेहि निष्फलं ब्रह्मंस्तेषां दूरतरो हरिः ॥
॥ १४ ॥ परश्रियाभितप्तानां दम्भाचाररतात्मनाम् ॥ मृषा तु कुर्वतां कर्म तेषां दूरतरो हरिः॥१५॥पृच्छतां च महाधर्म्मान्वदतां वै मृषा च तान् ॥

धर्मेष्वभक्तिमनसां तेषां दूरतरो हरिः ॥ १६ ॥ वेदप्रणिहितो धर्म्मो वेदो नारायणः परः॥तत्राश्रद्धापरा ये तु तेषां दूरतरो हरिः॥ १७ ॥ यस्य
धर्म्मविहीनानि दिनान्यायान्ति यान्ति च ॥ स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥ १८ ॥ धर्मार्थकाममोक्षाख्याः पुरुषार्थाः सनातनाः ॥
श्रद्धावतां हि सिध्यन्ति नान्यथा ब्रह्मनन्दन॥ १९॥स्वाचारमनतिक्रम्य हरिभक्तिपरो हि यः ॥ स याति विष्णुभवनं यद्वै पश्यन्ति सूरयः ॥२०॥
कुर्वन्वेदोदितान्धर्म्मान्मुनीन्द्र स्वाश्रमोचितान्॥हरिध्यानपरो यस्तु स याति परमं पदम्॥२१॥आचारप्रभवो धर्मः धर्म्मस्य प्रभुरच्युतः॥आश्रमाचा
रयुक्तेन पूजितः सर्वदा हरिः ॥२२ ॥ यः स्वाचारपरिभ्रष्टः साङ्गवेदान्तगोऽपि वा ॥ स एव पतितो ज्ञेयो यतः कर्मबहिष्कृतः ॥ २३ ॥ हरिभक्ति
परो वाऽपि हरिध्यानपरोऽपि वा॥भ्रष्टो यः स्वाश्रमाचारात्पतितः सोऽभिधीयते॥२४ ॥वेदो वा हरिभक्तिर्वा भक्तिर्वापि महेश्वरे ॥ आचारात्पतितं
मूढं न पुनाति द्विजोत्तम ॥ २५ ॥ पुण्यक्षेत्राभिगमनं पुण्यतीर्थनिषेवणम् ॥ यज्ञो वा विविधो ब्रह्मंस्त्यक्ताचारं न रक्षति ॥ २६ ॥ आचारात्प्राप्यते
स्वर्ग आचारात्प्राप्यते सुखम् ॥ आचारात्प्राप्यते मोक्ष आचारात्किं न लभ्यते ॥ २७ ॥ आचाराणांतु सर्वेषां योगानां चैव सत्तम ॥ हरिभक्तेरपि
तथा निदानं भक्तिरिष्यते ॥२८॥ भक्त्यैव पूज्यते विष्णुर्वाञ्छितार्थफलप्रदः॥तस्मात्समस्तलोकानां भक्तिर्मातेति गीयते ॥२९॥ जीवन्ति जन्तवः
सर्वे यथा मातरमाश्रिताः ॥ तथा भक्तिं समाश्रित्य सर्वे जीवन्ति धार्म्मिकाः ॥ ३० ॥ स्वाश्रमाचारयुक्तस्य हरिभक्तिर्यदा भवेत् ॥ न तस्य त्रिषु
लोकेषु सदृशोऽस्त्यजनन्दन ॥ ३१ ॥ भक्त्या सिध्यन्ति कर्म्माणि कर्म्माभिस्तुष्यते हरिः ॥ तस्मिंस्तुष्टे भवेज्ज्ञानं ज्ञानान्मोक्षमवाप्यते ॥ ३२ ॥
भक्तिस्तु भगवद्भक्तसङ्गेन खलु जायते ॥ तत्सङ्गं प्राप्यते पुम्भिः सुकृतैः पूर्वसञ्चितैः ॥३३॥ वर्णाश्रमाचाररता भगवद्भक्तिलालसाः ॥ कामादिदोष
निर्मुक्तास्ते सन्तो लोकशिक्षकाः ॥ ३४ ॥ सत्सङ्गः परमो ब्रह्मन्न लभ्येताकृतात्मनाम् ॥ यदि लभ्येत विज्ञेयं पुण्यं जन्मान्तरार्जितम् ॥ ३५ ॥
पूर्वार्जितानि पापानि नाशमायान्ति यस्य वै ॥ सत्सङ्गतिर्भवेत्तस्य नान्यथा घटते हि सा ॥ ३६ ॥ रविर्हि रश्मिजालेन दिवा हन्ति बहिस्तमः ॥
सन्तः सूक्तिमरीच्योघैश्चान्तर्ध्वान्तं हि सर्वदा ॥ ३७ ॥ दुर्लभाः पुरुषा लोके भगवद्भक्तिलालसाः ॥ तेषां सङ्गो भवेद्यस्य तस्य
शान्तिर्हि शाश्वती ॥ ३८ ॥ नारद उवाच ॥ किंलक्षणा भागवतास्ते च किं कर्म्म कुर्वते॥ तेषां लोको भवेत्कीदृक्तत्सर्वं ब्रूहि तत्त्वतः ॥ ३९ ॥
त्वं हि भक्तो रमेशस्य देवदेवस्य चक्रिणः ॥ एतान्निगदितुं शक्तस्त्वत्तो नास्त्यधिकोऽपरः ॥ ४० ॥ ॥ सनक उवाच ॥ ॥ शृणु ब्रह्मन्परं गुह्यं मार्क
ण्डेयस्य धीमतः ॥यमुवाच जगन्नाथो योगनिद्राविमोचितः ॥ ४१ ॥ योऽसौ विष्णुः परं ज्योतिर्देवदेवः सनातनः॥ जगद्रूपी जगत्कर्त्ता शिवब्रह्म

स्वरूपवान् ॥ ४२ ॥ युगान्ते रौद्ररूपेण ब्रह्माण्डग्रासबृंहितः ॥ जगत्येकार्णवीभूते नष्टे स्थावरजङ्गमे ॥ ४३ ॥ भगवानेव शेषात्मा शेते वटदले
हरिः ॥ असंख्याताब्जजन्माद्यैराभूषिततनूरुहः ॥४४ ॥ पादाङ्गुष्ठाग्रनिर्यातगङ्गाशीताम्बुपावनः ॥ सूक्ष्मात्सूक्ष्मतरो देवो ब्रह्माण्डग्रासबृंहितः ॥
॥ ४५ ॥ वटच्छदे शयानोऽभूत्सर्वशक्तिसमन्वितः ॥ तस्मिन्स्थाने महाभागो नारायणपरायणः ॥ मार्कंडेयः स्थितस्तस्य लीलाः पश्यन्महे
शितुः ॥४६॥ ऋषय ऊचुः ॥ तस्मिन्काले महाघोरे नष्टे स्थावरजङ्गमे ॥ हरिरेकः स्थित इति मुने पूर्वं हि शुश्रुम ॥ ४७ ॥ जगत्येकार्णवीभूते
नष्टे स्थावरंजगमे ॥ सर्वग्रस्तेन हरिणा किमर्थं सोऽवशेषितः ॥४८॥ परं कौतूहलं ह्यत्र वर्त्ततेऽतीव सूत नः ॥ हरिकीर्तिसुधापाने कस्यालस्यं प्रजा
यते ॥ ४९ ॥ ॥ सूत उवाच ॥ ॥ आसीन्मुनिर्महाभागो मृकण्डुरिति विश्रुतः ॥ शालग्रामे महातीर्थे सोऽतप्यत महातपाः॥ ५० ॥ युगानाम
युतं ब्रह्मन्गृणन्ब्रह्म सनातनम् ॥ निराहारः क्षमायुक्तः सत्यसन्धो जितेंद्रियः ॥५१॥ आत्मवत्सर्वभूतानि पश्यन्विषयनिःस्पृहः ॥ सर्वभूतहितो दान्त
स्तताप सुमहत्तपः ॥ ५२ ॥ तत्तपःशङ्किताः सर्वे देवा इन्द्रादयस्तदा ॥परेशं शरणं जग्मुर्नारायणमनामयम् ॥ ५३ ॥ क्षीराब्धेरुत्तरं तीरं संप्राप्य
त्रिदिवौकसः ॥ तुष्टुवुर्देवदेवेशं पद्मनाभं जगद्गुरुम् ॥ ५४ ॥ ॥ देवा ऊचुः ॥ ॥ नारायणाक्षरानन्त शरणागतपालक ॥ मृकण्डुतपसा त्रस्तान्पाहि
नः शरणागतान् ॥ ५५ ॥ जय देवाधिदेवेश जय शङ्खगदाधर ॥ जयो लोकस्वरूपाय जयो ब्रह्माण्डहेतवे ॥ ५६ ॥ नमस्ते देवदेवेश नमस्ते
लोकपावन ॥ नमस्ते लोकनाथाय नमस्ते लोकसाक्षिणे ॥ ५७ ॥ नमस्ते ध्यानगम्याय नमस्ते ध्यानहेतवे ॥नमस्ते ध्यानरूपाय नमस्ते ध्या
न पाक्षिणे ॥ ५८ ॥ केशिहन्त्रे नमस्तुभ्यं मधुहन्त्रे परात्मने ॥ नमो भूम्यादिरूपाय नमश्चैतन्यरूपिणे ॥ ५९ ॥ नमो ज्येष्ठाय शुद्धाय निर्गुणाय
गुणात्मने ॥ अरूपाय स्वरूपाय बहुरूपाय ते नमः ॥ ६० ॥ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ॥ जगद्धिताय कृष्णाय गोविन्दाय नमो
नमः ॥ ६१ ॥ नमो हिरण्यगर्भाय नमो ब्रह्मादिरूपिणे ॥ नमः सूर्य्यादिरूपाय हव्यकव्यभुजे नमः ॥ ६२ ॥ नमो नित्याय वन्द्याय सदानन्दै
करूपिणे ॥ नमः स्मृतार्तिनाशाय भूयो भूयो नमो नमः ॥ ६३ ॥ एवं देवस्तुतिं श्रुत्वा भगवान्कमलापतिः ॥ प्रत्यक्षतामगात्तेषां शङ्खचक्रगदा
धरः॥६४॥विकचाम्बुजपत्राक्षं सूर्य्यकोटिसमप्रभम्॥सर्वालङ्कारसंयुक्तं श्रीवत्साङ्कितवक्षसम् ॥६५॥ पीताम्बरधरं सौम्यं स्वर्णयज्ञोपवीतिनम् ॥ स्तू
यमानं मुनिवरैः पार्षदप्रवरावृतम् ॥ ६६ ॥ तं दृष्ट्वा देवसंघास्ते तत्तेजोहततेजसः ॥ नमश्चक्रुर्मुदा युक्ता अष्टांगैरवनिं गताः ॥ ६७ ॥ ततः प्रसन्नो
भगवान्मेघगंभीरनिस्वनः ॥ उवाच प्रीणयन्देवान्नतानिन्द्रपुरोगमान् ॥६८॥ श्रीभगवानुवाच ॥ जाने वो मानसं दुःखं मृकण्डुतपसोद्गतम् ॥ युष्मा

न्न वाधते देवाः स ऋषिः सज्जनाग्रणीः ॥६९॥ संपद्भिः संयुता वापि विपद्भिश्चापि सज्जनाः ॥ सर्वथान्यं न बाधन्ते स्वप्नेऽपि सुरसत्तमाः॥ ७० ॥ सततं वाध्यमानोऽपि विषयाख्यैररातिभिः॥अविधायात्मनो रक्षामन्यान्द्वेष्टि कथं सुधीः ॥७१॥ तापत्रयाभिधानेन वाध्यमानो हि मानवः॥ अन्यं क्रीडयितु शक्तः कथं भवति सत्तमः ॥७२॥ कर्मणा मनसा वाचा बाधते यः सदा परान् ॥ नित्यं कामादिभिर्युक्तो मूढधीः प्रोच्यते तु सः ॥७३॥ यो लोकंहितकृन्मर्त्यो गतासुर्यो विमत्सरः॥निःशङ्कः प्रोच्यते सद्भिरिहामुत्र च सत्तमाः॥७४॥सशङ्कः सर्वदा दुःखी निःशङ्कः सुखमाप्नुयात्॥गच्छध्वं स्वालयं स्वस्थाः क्रीडयिष्यति वो न सः ॥ ७५ ॥ भवतां रक्षकश्चाहं विहरध्वं यथासुखम् ॥ इति दत्वा वरं तेषामतसीकुसुमप्रभः ॥ ७६ ॥ पश्यतामेव देवानां तत्रैवान्तरधीयत ॥ तुष्टात्मानः सुरगणा ययुर्नाकं यथागतम् ॥ ७७ ॥ मृकण्डोरपि तुष्टात्मा हरिः प्रत्यक्षतामगात् ॥ अरूपं परमं ब्रह्म स्वप्रकाशं निरञ्जनम् ॥७८॥ अतसीपुष्पसंकाशं पीतवाससमच्युतम् ॥ दिव्यायुधधरं दृष्ट्वा मृकण्डुर्विस्मितोऽभवत् ॥ ७९ ॥ ध्यानादुन्मील्य नयनं अपश्यद्धरिमग्रतः॥प्रसन्नवदनं शान्तं धातारं विश्वतेजसम् ॥८०॥ रोमाञ्चितशरीरोऽसावानन्दाश्रुविलोचनः॥ननाम दण्डवद्भूमौ देवदेवं सनातनम् ॥ ॥ ८१ ॥ अश्रुभिः क्षालयंस्तस्य चरणौ हर्षसंभवैः ॥ शिरस्यञ्जलिमाधाय स्तोतुं समुपचक्रमे ॥ ८२ ॥ मृकण्डुरुवाच ॥ नमः परेशाय परात्मरूपिणे परात्परस्मात्परतः पराय ॥ अपारपाराय परानुकर्त्रे नमः परेभ्यः परपारणाय ॥ ८३ ॥ यो नामजात्यादिविकल्पहीनः शब्दादिदोषव्यतिरेकरूपः ॥ बहुस्वरूपोऽपि निरञ्जनो यस्तमीशमीड्यं परमं भजामि॥८४ ॥ वेदान्तवेद्यं पुरुषं पुराणं हिरण्यगर्भादिजगत्स्वरूपम् ॥ अनूपमं भक्तिजनानुकम्पिनं भजामि सर्वेश्वरमादिमीड्यम् ॥ ८५ ॥ पश्यन्ति यं वीतसमस्तदोषा ध्यानैकनिष्ठा विगतस्पृहाश्च ॥ निवृत्तमोहाः परमं पवित्रं नतोऽस्मि संसारनिवर्त्तकं तम् ॥ ८६ ॥ स्मृतार्तिनाशनं विष्णुं शरणागतपालकम् ॥ जगत्सेव्यं जगद्धाम परेशं करुणाकरम् ॥ ८७ ॥ एवं स्तुतः स भगवान्विष्णुस्तेन महर्षिणा ॥ अवाप परमां तुष्टिं शङ्खचक्रगदाधरः ॥ ८८ ॥ अथालिङ्ग्य मुनिं देवश्चतुर्भिर्दीर्घबाहुभिः ॥ उवाच परमं प्रीत्या वरं वरय सुव्रत ॥ ८९ ॥ प्रीतोऽस्मि तपसा तेन स्तोत्रेण च तवानघ ॥ मनसा यदभिप्रेतं वरं वरय सुव्रत ॥ ९० ॥ मृकण्डुरुवाच ॥ देवदेव जगन्नाथ कृतार्थोऽस्मि न संशयः ॥ त्वद्दर्शनमपुण्यानां दुर्लभं च यतः स्मृतम् ॥ ९१ ॥ ब्रह्माद्या यं न पश्यन्ति योगिनः संशितव्रताः ॥ धर्मिष्ठा दीक्षिताश्चापि वीतरागा विमत्सराः ॥ ९२ ॥ तं पश्यामि परं धाम किमतोऽन्यं वरं वृणे ॥ ॥ एतेनैव कृतार्थोऽस्मि जनार्दन जगद्गुरो ॥ ९३ ॥ यन्नामस्मृतिमात्रेण महापातकिनोऽपि ये ॥ तत्पदं परमं यान्ति ते दृष्ट्वा किमुताच्युत ॥ ९४ ॥ श्रीभगवानुवाच ॥

सत्यमुक्तं त्वया ब्रह्मन्प्रीतोऽस्मि तव पण्डित ॥ मद्दर्शनं हि विफलं न कदाचिद्भविष्यति ॥ ९५ ॥ विष्णुर्भक्तकुटुम्बीति वदन्ति विबुधाः
सदा॥तदेव पालयिष्यामि मज्जनो नानृतं वदेत् ॥ ९६ ॥ तस्मात्त्वत्तपसा तुष्टो यास्यामि तव पुत्रताम्॥ समस्तगुणसंयुक्तो दीर्घजीवी स्वरूपवान्॥
॥ ९७ ॥ मम जन्म कुले यस्य तत्कुलं मोक्षगामि वै ॥ मयि तुष्टे मुनिश्रेष्ठ किमसाध्यं जगत्त्रये ॥ ९८ ॥ इत्युक्त्वा देवदेवेशो मुनेस्तस्य समी
क्षतः ॥अंतर्दधे मृकण्डुश्च तपसः समवर्तत ॥९९॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे भक्तिवर्णनप्रसङ्गेन मार्कण्डेयचरितारम्भो नाम चतु
र्थोऽध्यायः॥४॥नारद उवाच॥ब्रह्मन्कथं स भगवान्मृकण्डोः पुत्रतां गतः॥किं चकार च तद्ब्रूहि हरिर्भार्गववंशजः॥१॥श्रूयते चपुराणेषु मार्कण्डेयो
महामुनिः ॥अपश्यद्वैष्णवीं मायां चिरंजीव्यस्य संप्लवे ॥ २ ॥ सनक उवाच॥शृणु नारद वक्ष्यामि कथामेतां सनातनीम् ॥ विष्णुभक्तिसमायुक्तां
मार्कण्डेयमुनिं प्रति ॥ ३ ॥तपसोऽन्ते मृकण्डुस्तु भार्यामुद्वाह्य सत्तमः ॥ गार्हस्थ्यमकरोद्धृष्टः शान्तो दान्तः कृतार्थकः ॥ ४ ॥ तस्य भार्या शुचिर्द
क्षा नित्यं पतिपरायणा ॥ मनसा वचसा चापि देहेन च पतिव्रता ॥ ५ ॥ काले दधार सा गर्भं हरितेजोंशसंभवम् ॥ सुषुवे दशमासान्ते पुत्रं
तेजस्विनं परम् ॥ ६ ॥ स ऋषिः परमप्रीतो दृष्ट्वा पुत्रं सुलक्षणम् ॥ जातकं कारयामास मङ्गलं विधिपूर्वकम् ॥ ७ ॥ स बालो ववृधे तत्र शुक्ल
पक्ष इवोडुपः ॥ ततस्तु पञ्चमे वर्षे उपनीय मुदान्वितः ॥ ८ ॥ शिक्षां चकार विप्रेन्द्र वैदिकीं धर्मसंहिताम् ॥ नमस्कार्या द्विजाः पुत्र सदा
दृष्ट्वा विधानतः ॥ ९ ॥ त्रिकालं सूर्यमभ्यर्च्य सलिलाञ्जलिदानतः ॥ वैदिकं कर्म कर्तव्यं वेदाध्ययनपूर्वकम् ॥ १० ॥ ब्रह्मचर्येण तपसा पूजनीयो
हरिः सदा ॥ निषिद्धं वर्जनीयं स्याद्दुष्टसंभाषणादिकम् ॥ ११॥ साधुभिः सह वस्तव्यं विष्णुभक्तिपरैः सदा॥न द्वेषः कस्यचित्कार्यः सर्वेषां हितमा
चरेत्॥१२॥इज्याध्ययनदानानि सदा कार्याणि ते सुत॥एवं पित्रा समादिष्टो मार्कण्डेयो मुनीश्वरः॥१३॥चचार धर्मं सततं सदा संचिन्तयन्हरिम्॥
मार्कण्डेयो महाभागो दयावान्धर्मवत्सलः ॥१४॥ आत्मवान्सत्यसन्धश्च मार्तण्डसदृशप्रभः॥वशी शान्तो महाज्ञानी सर्वतत्त्वार्थकोविदः ॥ १५ ॥
तपश्चचार परममच्युतप्रीतिकारणम् ॥ आराधितो जगन्नाथो मार्कण्डेयेन धीमता ॥ १६॥ पुराणसंहितां कर्तुं दत्तवान्वरमच्युतः ॥ मार्कण्डेयो मुनि
स्तस्मान्नारायण इति स्मृतः ॥ १७ ॥ ॥ चिरजीवी महाभक्तो देवदेवस्य चक्रिणः ॥जगत्येकार्णवीभूते स्वप्रभावं जनार्दनः ॥ १८ ॥ तस्य दर्श
यितुं विप्रास्तं न संहृतवान्हरिः ॥ मृकण्डुतनयो धीमान्विष्णुभक्तिसमन्वितः ॥ १९ ॥ तस्मिञ्जले महाघोरे स्थितवाञ्छीर्णपत्रवत् ॥ मार्कण्डेयः
स्यतस्तावद्यावच्छेते हरिः स्वयम्॥ २०॥ तस्य प्रमाणं वक्ष्यामि कालस्य वदतः शृणु ॥ दशभिः पञ्चभिश्चैव निमेषैः परिकीर्तिता ॥२१॥ काष्ठा

तत्रिंशतो ज्ञेया कला पद्मजनन्दन॥तत्रिंशतो क्षणो ज्ञेयस्तैः षड्भिर्घटिका स्मृता ॥२२॥ तद्वयेन मुहूर्त्तं स्याद्दिनं तत्रिंशता भवेत् ॥ त्रिंशद्दिनैर्भवे
न्मासः पक्षद्वितयसंयुतः ॥ २३ ॥ ऋतुर्मासद्वयेन स्यात्तत्रयेणायनं स्मृतम् ॥ तद्वयेन भवेदब्दः स देवानां दिनं भवेत् ॥ २४॥ उत्तरं दिवसं
प्राहू रात्रिर्वै दक्षिणायनम् ॥ मानुषेणैव मासेन पितॄणां दिनमुच्यते ॥२५॥ तस्मात्सूर्येन्दुसंयोगे ज्ञातव्यं कल्पमुत्तमम् ॥ दिव्यैर्वर्षसहस्रैर्द्वादशभिर्दे
वतं युगम् ॥२६॥ दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणाम् ॥ एकसप्ततिसंख्यातैर्दिव्यैर्मन्वन्तरं युगैः ॥ २७॥ चतुर्दशभिरेतैश्च ब्रह्मणो दिवसं
मुने ॥ यावत्प्रमाणं दिवसं तावद्रात्रिः प्रकीर्तिता ॥ २८ ॥ नाशमायाति विप्रेन्द्र तस्मिन्काले जगत्रयम् ॥मानुषेण सहस्रेण यत्प्रमाणं भवेच्छृणु॥
॥ २९ ॥ चतुर्युगसहस्राणि ब्रह्मणो दिवसं मुने ॥ तद्वन्मासो वत्सरश्च ज्ञेयस्तस्यापि वेधसः ॥ ३०॥ परार्द्धद्वयकालस्तु तन्मतेन भवेद्द्विजाः॥
विष्णोरहस्तु विज्ञेयं तावद्रात्रिः प्रकीर्त्तिता ॥ ३१ ॥ मृकण्डुतनयस्तावत्स्थितः संजीर्णपर्णवत् ॥ तस्मिन्घोरे जलमये विष्णुशक्त्युपबृंहितः ॥
आत्मानं परमं ध्यायन्स्थितवान्हरिसान्निधौ ॥३२॥अथ काले समायाते योगनिद्राविमोचितः॥ सृष्टवान्ब्रह्मरूपेण जगदेतच्चराचरम् ॥ ३३॥ संहृतं
तु जलं वीक्ष्य सृष्टं विश्वं मृकण्डुजः ॥ विस्मितः परमप्रीतो ववन्दे चरणौ हरेः ॥ ३४ ॥ शिरस्यञ्जलिमाधाय मार्कण्डेयो महामुनिः ॥
तुष्टाव वाग्भिरिष्टाभिः सदानन्दैकविग्रहम् ॥ ३५ ॥ मार्कण्डेय उवाच ॥ सहस्रशिरसं देवं नारायणमनामयम् ॥ वासुदेवमनाधारं प्रणतोऽस्मि
जनार्दनम् ॥३६॥अमेयमजरं नित्यं सदानन्दैकविग्रहम्॥ अप्रतर्क्यमनिर्देश्यं प्रणतोऽस्मि जनार्द्दनम् ॥३७॥अक्षरं परमं नित्यं विश्वाक्षं विश्वसम्भ
वम् ॥सर्वतत्त्वमयं शान्तं प्रणतोऽस्मि जनार्द्दनम्॥३८॥पुराणं पुरुषं सिद्धं सर्वज्ञानैकभाजनम् ॥ परात्परतरं रूपं प्रणतोऽस्मि जनार्द्दनम्॥३९॥ परं
ज्योतिः परं धाम पवित्रं परमं पदम् ॥ सर्वैकरूपं परमं प्रणतोऽस्मि जनार्द्दनम् ॥ ४० ॥ तं सदानन्दचिन्मात्रं पराणां परमं पदम् ॥ सर्वं सनातनं
श्रेष्ठं प्रणतोऽस्मि जनार्द्दनम्॥४१॥सगुणं निर्गुणं शान्तं मायाऽतीतं सुमायिनम्॥अरूपं बहुरूपं तं प्रणतोऽस्मि जनार्द्दनम् ॥४२॥यत्र तद्भगवान्विश्वं
सृजत्यवति हन्ति च ॥ तमादिदेवमीशानं प्रणतोऽस्मि जनार्द्दनम् ॥ ४३ ॥ परेश परमानन्द शरणागतवत्सल ॥ त्राहि मां करुणासिन्धो मनो
तीत नमोऽस्तुते॥४४॥ एवं स्तुवन्तं विप्रेन्द्रं मार्कण्डेयं जगद्गुरुम्॥ उवाच परया प्रीत्या शङ्खचक्रगदाधरः॥४५॥श्रीभगवानुवाच ॥ लोके भागवता
ये च भगवद्भक्तमानसाः ॥ तेषां तुष्टो न सन्देहो रक्षाम्येतांश्च सर्वदा ॥ ४६ ॥ अहमेव द्विजश्रेष्ठ नित्यं प्रच्छन्नविग्रहः ॥ भगवद्भक्तरूपेण
लोकान्रक्षामि सर्वदा ॥४७॥ मार्कण्डेय उवाच ॥ किंलक्षणा भागवता जायन्ते केन कर्म्मणा ॥ एतदिच्छाम्यहं श्रोतुं कौतूहलपरो यतः ॥ ४८ ॥

श्रीभगवानुवाच॥लक्षणं भागवतानां शृणुष्व मुनिसत्तम॥वक्तुं तेषां प्रभावं हि शक्यते नाब्दकोटिभिः॥४९॥ये हिताः सर्वजन्तूनां गतासूया अमत्सराः॥
वशिनो निस्पृहाः शान्तास्ते वै भागवतोत्तमाः॥५०॥ कर्म्मणा मनसा वाचा परपीडां न कुर्वते ॥ अपरिग्रहशीलाश्च ते वै भागवताः स्मृताः ॥५१॥
सत्कथाश्रवणे येषां वर्तते सात्त्विकी मतिः ॥ तद्भक्तविष्णुभक्ताश्च ते वै भागवतोत्तमाः ॥ ५२ ॥ मातापित्रोश्च शुश्रूषां कुर्वन्ति ये नरोत्तमाः ॥
गङ्गाविश्वेश्वरधिया ते वै भागवतोत्तमाः ॥५३ ॥ ये तु देवार्च्चनरता ये तु तत्साधकाः स्मृताः॥ पूजां दृष्ट्वानुमोदन्ते ते वै भागवतोत्तमाः ॥ ५४ ॥
व्रतिनां च यतीनां च परिचर्यापराश्च ये ॥ विमुक्तपरनिन्दाश्च ते वै भागवतोत्तमाः ॥ ५५ ॥ सर्वेषां हितवाक्यानि ये वदन्ति नरोत्तमाः ॥ ये
गुणग्राहिणो लोके ते वै भागवताः स्मृताः ॥५६॥ आत्मवत्सर्वभूतानि ये पश्यंति नरोत्तमाः ॥ तुल्याः शत्रुषु मित्रेषु ते वै भागवतोत्तमाः ॥ ५७ ॥
धर्म्मशास्त्रप्रवक्तारः सत्यवाक्यरताश्च ये ॥ सतां शुश्रूषवो ये च ते वै भागवतोत्तमाः ॥ ५८ ॥ व्याकुर्वते पुराणानि तानि शृण्वन्ति ये तथा ॥
तद्वक्तरि च भक्ता ये ते वै भागवतोत्तमाः ॥५९॥ ये गोब्राह्मणशुश्रूषां कुर्वते सततं नराः॥तीर्थयात्रापरा ये च ते वै भागवतोत्तमाः ॥ ६०॥ अन्येषामु
दयं दृष्ट्वा येऽभिनन्दन्ति मानवाः ॥ हरिनामपरा ये च ते वै भागवतोत्तमाः ॥ ६१ ॥ आरामारोपणरतास्तडागपरिरक्षकाः ॥ कासारकूपकर्त्तारस्ते
वै भागवतोत्तमाः ॥ ६२ ॥ ये वै तडागकर्त्तारो देवसद्मानि कुर्वते ॥ गायत्रीनिरता ये च ते वै भागवतोत्तमाः ॥ ६३ ॥ येऽभिनन्दन्ति नामानि
हरेः श्रुत्वाऽतिहर्षिताः ॥ रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः ॥ ६४ ॥ तुलसीकाननं दृष्ट्वा ये नमस्कुर्वते नराः ॥ तत्काष्ठाङ्कितकर्णा ये ते वै
भागवतोत्तमाः ॥ ६५ ॥ तुलसीगन्धमाघ्राय सन्तोषं कुर्वते तु ये ॥ तन्मूलमृत्तिकां ये च ते वै भागवतोत्तमाः ॥ ६६ ॥ आश्रमाचारनिरतास्तथै
वातिथिपूजकाः ॥ ये च वेदार्थवक्तारस्ते वै भागवतोत्तमाः ॥ ६७ ॥ शिवप्रियाः शिवासक्ताः शिवपादार्च्चने रताः ॥ त्रिपुण्ड्रधारिणो ये च ते वै
भागवतोत्तमाः ॥ ६८ ॥ व्याहरन्ति च नामानि हरेः शम्भोर्महात्मनः ॥ रुद्राक्षालङ्कृता ये च ते वै भागवतोत्तमाः ॥ ६९ ॥ ये
यजन्ति महादेवं क्रतुभिर्बहुदक्षिणैः ॥ हरिं वा परया भक्त्या ते वै भागवतोत्तमाः ॥ ७० ॥ विदितानि च शास्त्राणि परार्थं प्रवदन्ति ये ॥ सर्वत्र
णभाजो ये ते वै भागवताः स्मृताः ॥ ७१ ॥ शिवे च परमेशे च विष्णौ च परमात्मनि ॥ समबुद्ध्या प्रवर्त्तन्ते ते वै भागवताः स्मृताः ॥ ७२ ॥
शिवाग्निकार्यनिरताः पञ्चाक्षरजपे रताः ॥ शिवध्यानरता ये च ते वै भागवतोत्तमाः ॥ ७३ ॥ पानीयदाननिरता येऽन्नदानरतास्तथा ॥ एकादशी
व्रतरता ते वै भागवतोत्तमाः ॥ ७४ ॥ गोदाननिरता ये च कन्यादानरताश्च ये ॥ मदर्थं कर्म्मकर्त्तारस्ते वै भागवतोत्तमाः ॥ ७५ ॥

एते भागवता विप्र केचिदत्र प्रकीर्त्तिताः ॥ मयाऽपि गदितुं शक्या नाब्दकोटिशतैरपि ॥ ७६ ॥ तस्मात्त्वमपि विप्रेन्द्र सुशीलो भव सर्वदा ॥ सर्वभूताश्रयो दान्तो मैत्रो धर्म्मपरायणः ॥ ७७ ॥ पुनर्युगान्तपर्य्यन्तं धर्म्मं सर्वं समाचरन् ॥ मन्मूर्त्तिध्याननिरतः परं निर्वाणमाप्स्यसि ॥ ७८ ॥ एवं मृकंडुपुत्रस्य स्वभक्तस्य कृपानिधिः ॥ दत्त्वा वरं स देवेशस्तत्रैवांतरधीयत ॥ ७९ ॥ मार्कण्डेयो महाभागो हरिभक्तिरतः सदा ॥ चचार परमं धर्म्मबीजे च विधिवन्मखैः ॥ ८० ॥ शालग्रामे महाक्षेत्रे तताप परमं तपः ॥ ध्यानक्षपितकर्मा तु परं निर्वाणमाप्तवान् ॥ ८१ ॥ तस्माज्जन्तुषु सर्वेषु हितकृद्धरिपूजकः ॥ ईप्सितं मनसा यद्यत्तत्तदाप्नोत्यसंशयम् ॥ ८२॥ सनक उवाच॥ एतत्सर्वं निगदितं त्वया पृष्टं द्विजोत्तम ॥ भगवद्भक्तिमाहात्म्यं किमन्यच्छ्रोतुमिच्छसि ॥ ८३ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे मार्कण्डेयवर्णनं नाम पञ्चमोऽध्यायः ॥५॥

सूत उवाच ॥ भगवद्भक्तिमाहात्म्यं श्रुत्वा प्रीतस्तु नारदः ॥ पुनः पप्रच्छ सनकं ज्ञानविज्ञानपारगम् ॥ १ ॥ नारद उवाच ॥ क्षेत्राणामुत्तमं क्षेत्रं तीर्थानां च तथोत्तमम् ॥ परया दयया तथ्यं ब्रूहि शास्त्रार्थपारग॥२॥सनक उवाच॥ शृणु ब्रह्मन्परं गुह्यं सर्वसंपत्करं परम्॥दुःस्वप्ननाशनं पुण्यं धर्म्यं पापहरं शुभम्॥३॥ श्रोतव्यं मुनिभिर्नित्यं दुष्टग्रहनिवारणम् ॥ सर्वरोगप्रशमनमायुर्वर्द्धनकारणम् ॥ ४ ॥ क्षेत्राणामुत्तमं क्षेत्रं तीर्थानां च तथोत्तमम् ॥ गङ्गायमुनयोर्योगं वदन्ति परमर्षयः ॥ ५ ॥ सितासितोदकं तीर्थं ब्रह्माद्याः सर्वदेवताः ॥ मुनयो मनवश्चैव सेवन्ते पुण्यकाङ्क्षिणः॥६॥गङ्गा पुण्यनदी ज्ञेया यतो विष्णुपदोद्भवा ॥ रविजा यमुना ब्रह्मंस्तयोर्योगः शुभावहः ॥ ७ ॥ स्मृतार्त्तिनाशिनी गङ्गा नदीनां प्रवरा मुने ॥ सर्वपापक्षयकरी सर्वोपद्रवनाशिनी ॥ ८ ॥ यानि क्षेत्राणि पुण्यानि समुद्रान्ते महीतले ॥ तेषां पुण्यतमं ज्ञेयं प्रयागाख्यं महामुने ॥ ९ ॥ इयाज वेधा यज्ञेन यत्र देवं रमापतिम्॥ तथैव मुनयः सर्वे चक्रुश्च विविधान्मखान्॥१०॥ सर्वतीर्थाभिषेकाणि यानि पुण्यानि तानि वै ॥ गङ्गाबिन्द्वभिषेकस्य कलां नार्हन्ति षोडशीम्॥११॥गङ्गा गङ्गेति यो ब्रूयाद्योजनानां शते स्थितः॥सोऽपि मुच्येत पापेभ्यः किमु गङ्गाभिषेकवान्॥१२॥विष्णुपादोद्भवा देवी विश्वेश्वरशिरःस्थिता ॥ संसेव्या मुनिभिर्देवैः किं पुनः पामरैर्जनैः ॥ १३ ॥ यत्सैकतं ललाटे तु ध्रियते मनुजोत्तमैः॥ तत्रैव नेत्रं विज्ञेयं विध्वद्धांधः समुज्ज्वलत् ॥ १४ ॥ यन्मज्जनं महापुण्यं दुर्लभं त्रिदिवौकसाम् ॥ सारूप्यदायकं विष्णोः किमस्मात्कथ्यते परम् ॥१५॥ यत्र स्नाताः पापिनोऽपि सर्वपापविवार्जिताः ॥ महद्विमानमारूढाः प्रयान्ति परमं पदम् ॥१६ ॥ यत्र स्नाता महात्मानः पितृमातृकुलानि वै॥सहस्राणि समुद्धृत्य विष्णुलोके व्रजन्ति वै ॥१७॥स स्नातः सर्वतीर्थेषु यो गङ्गां स्मरति द्विज ॥ पुण्यक्षेत्रेषु सर्वेषु स्थितवान्नात्र संशयः ॥ १८ ॥ यत्र स्नातं नरं दृष्ट्वा पापोऽपि

स्वर्गभूमिभाक् ॥ मदङ्गस्पर्शमात्रेण देवानामधिपो भवेत् ॥ १९ ॥ तुलसीमूलसंभूता द्विजपादोद्भवा तथा ॥ गङ्गोद्भवा तु मृल्लोकान्नयत्यच्यु
तरूपताम् ॥ २० ॥ गङ्गा च तुलसी चैव हरिभक्तिरचञ्चला ॥ अत्यन्तदुर्लभा नृणां भक्तिर्धर्मप्रवक्तरि ॥ २१ ॥ सद्धर्मवक्तुः पदसंभवां मृदं
गङ्गोद्भवां चैव तथा तुलस्याः ॥ मूलोद्भवां भक्तियुतो मनुष्यो धृत्वा शिरस्येति पदं च विष्णोः ॥ २२ ॥ कदा यास्याम्यहं गङ्गां कदा पश्यामि
तामहम् ॥ वाञ्च्छत्यपि च यो ह्येवं सोऽपि विष्णुपदं व्रजेत् ॥ २३ ॥ गङ्गाया महिमा ब्रह्मन्वक्तुं वर्षशतैरपि ॥ न शक्यते विष्णुनापि
किमन्यैर्बहुभाषितैः ॥ २४ ॥ अहो माया जगत्सर्वं मोहयत्येतदद्भुतम् ॥ यतो वै नरकं यान्ति गङ्गानाम्नि स्थितेऽपि हि ॥ २५ ॥ संसारदुःख
विच्छेदि गङ्गानाम प्रकीर्तितम् ॥ तथा तुलस्या भक्तिश्च हरिकीर्तिप्रवक्तरि ॥ २६ ॥ सकृदप्युच्चरेद्यस्तु गङ्गेत्येवाक्षरद्वयम् ॥ सर्वपापविनिर्मुक्तो
विष्णुलोकं स गच्छति ॥ २७ ॥योजनत्रितयं यस्तु गङ्गायामधिगच्छति॥ सर्वपापविनिर्मुक्तः सूर्यलोकं समेति हि ॥ २८ ॥ सेयं गङ्गा महापुण्या
नदी भक्त्या निषेविता ॥ मेषतौलिमृगार्केषु पावयत्यखिलं जगत् ॥ २९ ॥ गोदावरी भीमरथी कृष्णा रेवा सरस्वती ॥ तुङ्गभद्रा च कावेरी कालि
न्दी बाहुदा तथा ॥ ३० ॥ वेत्रवती ताम्रपर्णी सरयूश्च द्विजोत्तम ॥ एवमादिषु तीर्थेषु गङ्गा मुख्यतमा स्मृता ॥ ३१ ॥ यथा सर्वगतो विष्णुर्जग
द्व्याप्य प्रतिष्ठितः॥तथेयं व्यापिनी गङ्गा सर्वपापप्रणाशिनी ॥३२॥ अहो गङ्गा जगद्धात्री स्नानपानादिभिर्जगत् ॥ पुनाति पावनीत्येषा न कथं सेव्यते
नृभिः ॥३३॥ तीर्थानामुत्तमं तीर्थं क्षेत्राणां क्षेत्रमुत्तमम् ॥ वाराणसीति विख्यातं सर्वदेवनिषेवितम् ॥३४॥ ते एव श्रवणे धन्ये संविदाते बहुश्रुतम् ॥
इह श्रुतिमतां पुंसां काशी याभ्यां श्रुताऽसकृत् ॥ ३५ ॥ ये यं स्मरन्ति संस्थानमविमुक्तं द्विजोत्तमम् ॥ निर्धूतसर्वपापास्ते शिवलोकं व्रजन्ति वै
॥ ३६ ॥ योजनानां शतस्थोऽपि अविमुक्तं स्मरेद्यदि ॥बहुपातकपूर्णोऽपि पदं गच्छत्यनामयम् ॥ ३७ ॥ प्राणप्रयाणसमये योऽविमुक्तं स्मरेद्द्विज ॥
सोऽपि पापविनिर्मुक्तः शैवं पदमवाप्नुयात् ॥ ३८ ॥ काशीस्मरणजं पुण्यं भुक्त्वा स्वर्गे तदन्ततः ॥ पृथिव्यामेकराड् भूत्वा काशीं प्राप्य च मुक्तिभाक्
॥ ३९ ॥ बहुनात्र किमुक्तेन वाराणस्या गुणान्प्रति ॥ नामापि गृह्णतां काश्याश्चतुर्वर्गो न दूरतः ॥ ४० ॥ गङ्गायमुनयोर्योगोऽधिकः काश्या अपि
द्विज ॥ यस्य दर्शनमात्रेण नरा यान्ति परां गतिम् ॥४१॥ मकरस्थे रवौ गङ्गा यत्र कुत्रावगाहिता ॥ पुनाति स्नानपानाद्यैर्नयन्तीन्द्रपुरं जगत्॥४२॥
यो गङ्गां भजते नित्यं शंकरो लोकशंकरः ॥ लिङ्गरूपी कथं तस्या महिमा परिकीर्त्यते ॥४३॥ हरिरूपधरं लिङ्गं लिङ्गरूपधरो हरिः ॥ ईषदप्यन्तरं
नास्ति भेदकृच्चानयोः कुधीः ॥ ४४ ॥ अनादिनिधने देवे हरिशंकरसंज्ञिते॥ अज्ञानसागरे मग्ना भेदं कुर्वन्ति पापिनः॥ ॥ ४५ ॥ यो देवो जगतामी

Nepal Sanskrit University, Balmiki Campus, Kathmandu

शः कारणानां च कारणम्॥युगान्ते निगदन्त्येतद्रुद्ररूपधरो हरिः॥४६॥रुद्रो वै विष्णुरूपेण पालयत्यखिलंजगत्॥ब्रह्मरूपेण सृजति प्रान्तेऽ येतत्त्रयं
हरः॥४७॥हरिशंकरयोर्मध्ये ब्रह्मणश्चापि यो नरः॥भेदं करोति सोऽभ्येति नरकं भृशदारुणम्॥४८॥हरं हरिं विधातारं यः पश्यत्येकरूपिणम्॥स याति
परमानन्दं शास्त्राणामेष निश्चयः॥४९॥योऽसावनादिः सर्वज्ञो जगतामादिकृद्विभुः॥नित्यं संनिहितस्तत्र लिङ्गरूपी जनार्दनः॥५०॥काशीविश्वेश्वरं
लिङ्गंज्योतिर्लिङ्गं तदुच्यते॥तं दृष्ट्वा परमं ज्योतिराप्नोति मनुजोत्तमः॥५१॥काशीप्रदक्षिणा येन कृता त्रैलोक्यपावनी॥सप्तद्वीपा साब्धिशैला भूः परि
क्रमितामुना ॥५२॥ धातुमृद्दारुपाषाणलेख्याद्या मूर्तयोऽमलाः॥शिवस्य वाच्युतस्यापि तासु संनिहितो हरिः ॥५३॥तुलसीकाननं यत्र यत्र पद्मवनं
द्विज॥ पुराणपठनं यत्र तत्र सांनिहितो हरिः॥५४॥पुराणसंहितावक्ता हरिरित्यभिधीयते ॥तद्भक्तिं कुर्वतां नृणां गङ्गास्नानं दिने दिने ॥५५॥ पुराण
श्रवणे भक्तिर्गङ्गास्नानसमा द्विज ॥ तद्वक्तरि च या भक्तिः सा प्रयागोपमा स्मृता ॥ ५६ ॥ पुराणधर्मकथनैर्यः समुद्धरते जगत् ॥ संसारसागरे
मग्नं स हरिः परिकीर्तितः॥ ५७ ॥ नास्ति गङ्गासमं तीर्थं नास्ति मानसमो गुरुः ॥ नास्ति विष्णुसमं देवं नास्ति तत्त्वं हरेः परम् ॥ ५८ ॥
वर्णानां ब्राह्मणः श्रेष्ठस्तारकाणां यथा शशी ॥ यथा पयोधिः सिन्धूनां तथा गङ्गा परा स्मृता ॥५९॥नास्ति शान्तिसमो बन्धुर्नास्ति सत्यात्परं
तपः ॥ नास्ति मोक्षात्परो लाभो नास्ति गङ्गासमा नदी ॥ ६० ॥ गङ्गायाः परमं नाम पापारण्यदवानलः ॥ भवव्याधिहरा गङ्गा तस्मात्सेव्या
प्रयत्नतः ॥ ६१ ॥ गायत्री जाह्नवी चोभे सर्वपापहरे स्मृते ॥ एतयोर्भक्तिहीनो यस्तं विद्यात्पतितं द्विज ॥ ६२ ॥ गायत्री छन्दसां माता माता
लोकस्य जाह्नवी॥उभे ते सर्वपापानां नाशकारणतां गते॥६३॥यस्य प्रसन्ना गायत्री तस्य गङ्गा प्रसीदति॥विष्णुशक्तियुते ते द्वे समकामप्रसिद्धिदे॥
॥ ६४ ॥ धर्मार्थकामरूपाणां फलरूपे निरञ्जने ॥ सर्वलोकानुग्रहार्थं प्रवर्तेते महोत्तमे ॥ ६५ ॥ अतीव दुर्लभा नृणां गायत्री जाह्नवी तथा ॥
तथैव तुलसीभक्तिर्हरिभक्तिश्च सात्त्विकी ॥ ६६ ॥ अहो गङ्गा महाभागा स्मृता पापप्रणाशिनी ॥ हरिलोकप्रदा दृष्टा पीता सारूप्यदायिनी ॥
॥ यत्र स्नाता नरा यान्ति विष्णोः पदमनुत्तमम् ॥६७॥ नारायणो जगद्धाता वासुदेवः सनातनः ॥गङ्गास्नानपराणां तु वाञ्छितार्थफलप्रदः॥६८॥
गङ्गाजलकणेनापि यः सिक्तो मनुजोत्तमः ॥ सर्वपापविनिर्मुक्तः प्रयाति परमं पदम् ॥ ६९ ॥ यद्बिन्दुसेवनादेव सगरान्वयसम्भवः ॥ विसृज्य
राक्षसं भावं संप्राप्तः परमं पदम्॥७०॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे गङ्गामाहात्म्यं नाम षष्ठोऽध्यायः॥६॥नारद उवाच॥कोऽसौ राक्षस
भावाद्धि मोचितः सगरावन्वये ॥सगरः को मुनिश्रेष्ठ तन्ममाख्यातुमर्हसि ॥ १ ॥ सनक उवाच ॥ शृणुष्व मुनिशार्दूल गङ्गामाहात्म्यमुत्तमम् ॥

यन्नलस्पर्शमात्रेण पावितं सागरं कुलम् ॥ गतं विष्णुपदं विप्र सर्वलोकोत्तमोत्तमम् ॥ २ ॥ आसीद्रविकुले जातो बाहुर्नाम वृकात्मजः ॥ बुभुजे
पृथिवीं सर्वां धर्मतो धर्मतत्परः ॥ ३ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्ये च जन्तवः ॥ स्थापिताः स्वस्वधर्मेषु तेन बाहुर्विशांपतिः ॥ ४ ॥
अश्वमेधैरियाजासौ सप्तद्वीपेषु सप्तभिः ॥ अतर्पयद्भूमिदेवान् गोभूस्वर्णांशुकादिभिः ॥ ५ ॥ अशासन्नीतिशास्त्रेण यथेष्टं परिपन्थिनः ॥
मेने कृतार्थमात्मानमन्यातपनिवारणम् ॥ ६ ॥ चन्दनानि मनोज्ञानि बलिं यत्सर्वदा जनाः भूषिता भूषणैर्दिव्यैस्तद्राष्ट्रे सुखिनो मुने
॥ ७ ॥ अकृष्टपच्या पृथिवी फलपुष्पसमन्विता ॥ ८ ॥ ववर्ष भूमौ देवेन्द्रः काले काले मुनीश्वर ॥ अधर्मनिरतापाये प्रजा धर्मेण
रक्षिताः ॥ ९ ॥ एकदा तस्य भूपस्य सर्वसंपद्विनाशकृत् ॥ अहंकारो महाञ्जज्ञे सासूयो लोपहेतुकः ॥ १० ॥ अहं राजा समस्तानां लोकानां
पालको बली ॥कर्ता महाक्रतूनां च मत्तः पूज्योऽस्ति कोऽपरः ॥११ ॥ अहं विचक्षणः श्रीमाञ्जिताः सर्वे मयारयः ॥वेदवेदाङ्गतत्त्वज्ञो नीतिशास्त्र
विशारदः ॥१२॥ अजेयोऽव्याहतैश्वर्यो मत्तः कोऽन्योऽधिको भुवि॥अहंकारपरस्यैवं जातासूया परेष्वपि॥१३॥ असूयातोऽभवत्कामस्तस्य राज्ञो
मुनीश्वर ॥ एषु स्थितेषु तु नरो विनाशं यात्यसंशयम्॥१४॥यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता॥एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥१५॥
तस्यासूया तु महती जाता लोकविरोधिनी॥ स्वदेहनाशिनी विप्र सर्वसंपद्विनाशिनी ॥ १६ ॥ असूयाविष्टमनसि यदि संपत्प्रवर्त्तते ॥ तुषाग्निं
वायुसंयोगमिव जानीहि सुव्रत ॥ १७ ॥ असूयोपेतमनसां दम्भाचारवतां तथा ॥ परुषोक्तिरतानां च सुखं नेह परत्र च ॥ १८॥असूयाविष्टचित्ता
नां सदा निष्ठुरभाषिणाम्॥ प्रिया वा तनया वापि बान्धवा अप्यरातयः॥ १९॥ मनोभिलाषं कुरुते यः समीक्ष्य परश्रियम् ॥ स स्वसंपद्विनाशाय
कुठारो नात्र संशयः ॥२० ॥ यः स्वश्रेयोविनाशाय कुर्याद्यत्नं नरो मुने ॥ सर्वेषां श्रेयसं दृष्ट्वा स कुर्यान्मत्सरं कुधीः ॥ २१ ॥ मित्रापत्यगृहक्षेत्र
धनधान्यपशुष्वपि ॥ हानिमिच्छन्नरः कुर्यादसूयां सततं द्विज॥२२॥अथ तस्याविनीतस्य ह्यसूयाविष्टचेतसः॥ हैहयास्तालजंघाश्च बलिनोऽरातयो
ऽभवन् ॥ २३ ॥ यस्यानुकूलो लक्ष्मीशः सौभाग्यं तस्य वर्द्धते ॥स एव विमुखो यस्य सौभाग्यं तस्य हीयते ॥२४ ॥ तावत्पुत्राश्च पौत्राश्च धन
धान्यगृहादयः ॥ यावदीक्षेत लक्ष्मीशः कृपापाङ्गेन नारद ॥ २५॥ अपि मूर्खान्धबधिरजडाः शूरा विवेकिनः ॥ श्लाघ्या भवन्ति विप्रेन्द्र प्रेक्षिता
माधवेन ये ॥ २६ ॥ सौभाग्यं तस्य हीयेत यस्यासूयादिलाञ्छनम् ॥ जायते नात्र संदेहो जन्तुद्वेषो विशेषतः ॥ २७ ॥ संततं यस्य कस्यापि
यो द्वेषं कुरुते नरः ॥ तस्य सर्वाणि नश्यन्ति श्रेयांसि मुनिसत्तम ॥ २८ ॥ असूया वर्द्धते यस्य तस्य विष्णुः पराङ्मुखः ॥ धनं धान्यं

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

सही संपनद्रिश्यति ततो ध्रुवम् ॥ २९ ॥ विवेकं हन्त्यहंकारस्त्वविवेकात्तु जीविनाम् ॥ आपदः संभवन्त्येवेत्यहंकारं त्यजेत्ततः ॥ ३० ॥
अहंकारो भवेद्यस्य तस्य नाशोऽतिवेगतः ॥ असूयाविष्टमनसस्तस्य राज्ञः परैः सह ॥ ३१ ॥ आयोधनमभूद्घोरं मासमेकं निरन्तरम् ॥
हैहयैस्तालजङ्घैश्च रिपुभिः स पराजितः ॥ ३२॥ स तु बाहुस्ततो दुःखी अन्तर्वत्न्या स्वभार्यया ॥ अवाप परमां तुष्टिं तत्र दृष्ट्वा महत्सरः ॥ ३३ ॥
असूयोपेतमनसस्तस्य भावं निरीक्ष्य च॥ सरोगतविहङ्गास्ते लीनाश्चित्रमिदं महत्॥ ३४॥ अहो कष्टमहो रूपं घोरमत्र समागतम् ॥ विशन्तस्त्वरया
वासमित्यूचुस्ते विहङ्गमाः ॥३५॥ सोऽवगाह्य सरो भूपः पत्नीभ्यां सहितो मुदा॥ पीत्वा जलं च सुखदं वृक्षमूलमुपाश्रितः॥३६॥तस्मिन्बाहौ वनं याते तेनैव
परिरक्षिताः ॥ दुर्गुणान्विगणय्यास्य धिग्धिगित्यब्रुवन्प्रजाः ॥३७॥ यो वा को वा गुणी मर्त्यः सर्वश्लाघ्यतरो द्विजः ॥ सर्वसंपत्समायुक्तोऽप्यगुणी निंदितो जनैः
॥३८॥ अपकीर्तिसमो मृत्युर्लोकेष्वन्यो न विद्यते॥यदा बाहुर्वनं यातस्तदा तद्रागगा जनाः॥ संतुष्टिं परमां याता दवथौ विगते यथा ॥३९॥ निन्दितो
बहुशो बाहुर्मृतवत्कानने स्थितः ॥ निहत्य कर्म च यशो लोके द्विजवरोत्तम॥४०॥नास्त्यकीर्तिसमो मृत्युर्नास्ति क्रोधसमो रिपुः॥ नास्ति निंदासमं
पापं नास्ति मोहसमासवः॥ ४१॥नास्त्यसूयासमा कीर्तिर्नास्ति कामसमोऽनलः॥ नास्ति रागसमः पाशो नास्ति सङ्गसमं विषम्॥४२॥एवं विलप्य बहुधा
बाहुरत्यन्तदुःखितः॥जीर्णाङ्गोमनसस्तापाद् वृद्धभावादभूदसौ॥४३ ॥ गते बहुतिथे काले और्वाश्रमसमीपतः ॥ स बाहुर्व्याधिना ग्रस्तो ममार
मुनिसत्तम॥४४॥तस्य भार्या च दुःखार्ता कनिष्ठा गर्भिणी तदा॥चिरं विलप्य बहुधा सह गन्तुं मनो दधे॥४५॥समानीय च सैधांसि चितां कृत्वाति दुःखिता॥
समारोप्य तमारूढं स्वयं समुपचक्रमे॥४६॥एतस्मिन्नन्तरे धीमानौर्वस्तेजोनिधिर्मुनिः॥ एतद्विज्ञातवान्सर्वं परमेण समाधिना॥४७॥भूतं भव्यं वर्त्तमानं
त्रिकालज्ञा मुनीश्वराः ॥ गतासूया महात्मानः पश्यन्तिज्ञान चक्षुषा ॥ ४८॥ तपोभिस्तेजसां राशिरौर्वपुण्यसमो मुनिः ॥ संप्रातस्तत्र साध्वी च यत्र
बाहुप्रिया स्थिता॥४९॥चितामारोढुमुद्युक्तां तां दृष्ट्वा मुनिसत्तमः॥प्रोवाच धर्ममूलानि वाक्यानिमुनिसत्तमः॥५०॥और्व उवाच॥राजवर्यप्रिये साध्वि मा
कुरुष्वातिसाहसम् ॥ तवोदरे चक्रवर्ती शत्रुहन्ता हि तिष्ठति ॥५१॥ बालापत्याश्च गर्भिण्यो ह्यदृष्टऋतवस्तथा ॥ रजस्वला राजसुतेनारोहति चिंता
शुभे॥५२॥ब्रह्महत्यादिपापानां प्रोक्ता निष्कृतिरुत्तमैः॥दम्भिनो निंदकस्यापि भ्रूणघ्नस्य न निष्कृतिः॥५३ ॥नास्तिकस्य कृतघ्नस्य धर्मोपेक्षाकरस्य च॥
विश्वासघातकस्यापि निष्कृतिर्नास्ति सुव्रते ॥५४॥ तस्मादेतन्महत्पापं कर्त्तुं नार्हसि शोभने ॥ यदेतद्दुःखमुत्पन्नं तत्सर्वं शांतिमेष्यति ॥ ५५ ॥
इत्युक्ता मुनिना साध्वी विश्वस्य तदनुग्रहम्॥ विललापातिदुःखार्ता समुह्यधवपत्कजौ ॥५६॥ और्वोऽपि तां पुनः प्राह सर्वशास्त्रार्थकोविदः॥ मारोदीराज

तनये श्रियमग्र्ये गमिष्यसि ॥५७॥ मा मुंचास्रं महाभागेग्रेतो दाह्योऽद्य सज्जनैः ॥ तस्माच्छोकं परित्यज्य कुरु कालोचितां क्रियाम् ॥५८॥ पंडिते वापि मूर्खे वा
दरिद्रे वा श्रियान्विते ॥ दुर्वृत्ते वा सुवृत्ते वा मृत्योः सर्वत्र तुल्यता ॥५९॥ नगरे वा तथामन्ये दैन्यमत्रातिरिच्यते ॥६०॥ यद्यत्पुरातनं कर्म तत्तदेवह युज्यते ॥ कारणं
दैवमेवात्र मन्ये सोपाधिका जनाः ॥ ६१ ॥ गर्भे वा बाल्यभावे वा यौवने वापि वार्द्धके ॥ मृत्योर्वशं प्रयातव्यं जन्तुभिः कमलानने ॥६२॥ हन्ति पाति
च गोविन्दो जन्तून्कर्मवशे स्थितान् ॥ प्रवादं रोपयन्त्यज्ञा हेतुमात्रेषु जन्तुषु ॥६३॥ तस्माद्दुःखं परित्यज्य सुखिनी भव सुव्रते ॥ कुरु पत्युश्च कर्माणि
विवेकेन स्थिरा भव ॥ ६४ ॥ एतच्छरीरं दुःखानां व्याधीनामयुतैर्वृतम् ॥ सुखाभासं बहुक्लेशं कर्मपाशेन यन्त्रितम् ॥ ६५ ॥ इत्याश्वास्य महाबु
द्धिस्तया कार्याण्यकारयत् ॥ त्यक्तशोका च सा तन्वी नता प्राह मुनीश्वरम् ॥ ६६ ॥ किमत्र चित्रं यत्सन्तः परार्थफलकाङ्क्षिणः ॥ नहि द्रुमाश्च
भोगार्थं फलन्ति जगतीतले ॥ ६७ ॥ योऽन्यदुःखानि विज्ञाय साधुवाक्यैः प्रबोधयेत् ॥ स एव विष्णुस्सत्त्वस्थो यतः परहिते स्थितः ॥६८॥ अन्य
दुःखेन यो दुःखी योऽन्यहर्षेण हर्षितः ॥ स एव जगतामीशो नररूपधरो हरिः ॥ ६९ ॥ सद्भिः श्रुतानि शास्त्राणि परदुःखविमुक्तये ॥ सर्वेषां
दुःखनाशाय इति सन्तो वदन्ति हि ॥ ७० ॥ यत्र सन्तः प्रवर्त्तते तत्र दुःखं न बाधते ॥ वर्तते यत्र मार्तण्डः कथं तत्र तमो भवेत् ॥ ७१ ॥ इत्येवं
वादिनी सा तु स्वपत्युश्चापराः क्रियाः ॥ चकार तत्सरस्तीरे मुनिप्रोक्तविधानतः ॥ ७२ ॥ स्थिते तत्र मुनौ राजा देवराडिव संज्वलन् ॥ चिताम
ध्याद्विनिष्क्रम्य विमानवरमास्थितः ॥ प्रपेदे परमं धाम नत्वा चौर्वं मुनीश्वरम् ॥ ७३ ॥ महापातकयुक्ता वा युक्ता वा चोपपातकैः ॥ परं
पदं प्रयान्त्येव महद्भिरवलोकिताः ॥७४॥ कलेवरं वा तद्भस्म तद्धूमं वापि सत्तम ॥ यदि पश्यति पुण्यात्मा स प्रयाति परां गतिम् ॥ ७५ ॥ पत्युः
कृतक्रिया सा तु गत्वाश्रमपदं मुनेः ॥ चकार तस्य शुश्रूषां सपत्न्या सह नारद ॥ ७६ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे गङ्गामाहा
त्म्यं नाम सप्तमोऽध्यायः ॥७॥ सनक उवाच ॥ एवमौर्वाश्रमे ते द्वे बाहुभार्ये मुनीश्वर ॥ चक्राते भक्तिभावेन शुश्रूषां प्रतिवासरम् ॥१॥ गते वर्षा
र्द्धके काले ज्येष्ठा राज्ञी तु या द्विज ॥ तस्याः पापमतिर्जाता सपत्न्याः संपदं प्रति ॥ २ ॥ ततस्तया गरो दत्तः कनिष्ठायै तु पापया ॥ न स्व
प्रभावं चक्रे वै गरो मुनिनिषेवया ॥ ३ ॥ भूलेपनादिभिः सम्यग्यतः सानुदिनं मुनेः ॥ चकार सेवां तेनासौ जीर्णपुण्येन कर्मणा ॥ ४ ॥ ततो मास
त्रयेऽतीते गरेण सहितं सुतम् ॥ सुषाव सुशुभे काले शुश्रूषानष्टकिल्बिषा ॥ ५ ॥ अहो सत्संगतिर्लोके किं पापं न विनाशयेत् ॥ न तदातिसुखं किं
वा नराणां पुण्यकर्मणाम् ॥ ६ ॥ ज्ञानाज्ञानकृतं पापं यच्चान्यत्कारितं परैः ॥ तत्सर्वं नाशयत्याशु परिचर्या महात्मनाम् ॥ ७ ॥ जडोऽपि याति

पूज्यत्वं सत्संगाज्जगतीतले ॥ कलामात्रोऽपि शीतांशुः शंभुना स्वीकृतो यथा॥ ८ ॥सत्संगतिः परामृद्धिं ददाति हि नृणां सदा ॥इहामुत्र च विप्रेन्द्र
सन्तः पूज्यतमास्ततः ॥ ९ ॥ अहो महद्गुणान्वक्तुं कः समर्थो मुनीश्वर ॥ गर्भं प्राप्तो गरो जीर्णो मासत्रयमहोऽद्भुतम्॥ १०॥ गरेण सहितं पुत्रं दृष्ट्वा
तेजोनिधिर्मुनिः ॥ जातकर्म चकारासौ तन्नाम सगरेति च ॥ ११ ॥ पुपोष सगरं बालं तन्माता प्रीतिपूर्वकम् ॥ चौलोपवीतकर्माणि तथा
चक्रे मुनीश्वरः ॥ १२ ॥ शास्त्राण्यध्यापयामास राजयोग्यानि मंत्रवित् ॥ समर्थं सगरं दृष्ट्वा किंचिदुद्भिन्नशैशवम् ॥ १३ ॥ मन्त्रवत्सर्वशस्त्रास्त्रं दत्त
वान्स मुनीश्वरः ॥ सगरः शिक्षितस्तेन सम्यगौर्वर्षिणा मुने ॥१४॥बभूव बलवान्धर्मी कृतज्ञो गुणवान्सुधीः॥धर्मज्ञः सोऽपि सगरो मुनेरमिततेजसः॥
समित्कुशांबुपुष्पादि प्रत्यहं समुपानयत् ॥१५॥ स कदाचिद्गुणनिधिः प्रणिपत्य स्वमातरम् ॥ उवाच प्रांजलिर्भूत्वा सगरो विनयान्वितः ॥ १६ ॥
सगर उवाच ॥ मातर्गतः पिता कुत्र किंनामा कस्य वंशजः ॥ तत्सर्वं मे समाचक्ष्व श्रोतुं कौतूहलं मम ॥ १७ ॥ पित्रा विहीना ये लोके जीवंतोऽपि
मृतोपमाः ॥ १८॥दारिद्रोऽपि पिता यस्य ह्यास्ते स धनदोपमः ॥ यस्य माता पिता नास्ति सुखं तस्य न विद्यते ॥ १९ ॥ धर्महीनो यथा मूर्खः
परत्रेह च निन्दितः ॥ मातापितृविहीनस्य अज्ञस्याप्यविवेकिनः ॥ अपुत्रस्य वृथा जन्म ऋणग्रस्तस्य चैव हि ॥ २० ॥ चन्द्रहीना यथा
रात्रिः पद्महीनं यथा सरः ॥ पतिहीना यथा नारी पितृहीनस्तथा शिशुः॥ २१ ॥धर्महीनो यथा जंतुः कर्महीनो यथा गृही ॥ पशुहीनो यथा वैश्य
स्तथा पित्रा विनार्भकः॥२२॥सत्यहीनं यथा वाक्यं साधुहीना यथा सभा॥तपो यथा दयाहीनं तथा पित्रा विनार्भकः॥२३॥वृक्षहीनं यथारण्यं जलहीना
यथा नदी ॥ वेगहीनो यथा वाजी तथा पित्रा विनार्भकः ॥ २४ ॥ यथा लघुतरो लोके मातर्याच्ञापरो नरः ॥ तथा पित्रा विहीनस्तु बहुदुःखान्वि
तः सुतः ॥ २५ ॥ इतीरितं सुतेनैषा श्रुत्वा निःश्वस्य दुःखिता ॥ संपृष्टं तद्यथावृत्तं सर्वं तस्मै न्यवेदयत् ॥ २६ ॥ तच्छ्रुत्वा सगरः क्रुद्धः कोपसंरक्त
लोचनः ॥ हनिष्यामीत्यरातीन्स प्रतिज्ञामकरोत्तदा ॥ २७ ॥ प्रदक्षिणीकृत्य मुनिं जननीं च प्रणम्य सः ॥ प्रस्थापितः प्रतस्थे च तेनैव मुनिना
तदा ॥ २८ ॥और्वाश्रमाद्विनिष्क्रान्तः सगरः सत्यवाक् शुचिः ॥ वशिष्ठं स्वकुलाचार्यं प्राप्तः प्रीतिसमन्वितः ॥ २९ ॥ प्रणम्य गुरवे तस्मै वशिष्ठाय
महात्मने ॥ सर्वं विज्ञापयामास ज्ञानदृष्ट्या विजानते ॥ ३० ॥ ऐन्द्रास्त्रं वारुणं ब्राह्ममाग्नेयं सगरो नृपः ॥ तेनैव मुनिनाऽवाप खड्गं वज्रोपमं धनुः
॥३१॥ ततस्तेनाभ्यनुज्ञातः सगरः सौमनस्यवान् ॥ आशीर्भिरर्चितः सद्यः प्रतस्थे प्रणिपत्य तम् ॥ ३२ ॥ एकेनैव तु चापेन स शूरः परिपन्थिनः ॥
सपुत्रपौत्रान्सगणानकरोत्स्वर्गवासिनः ॥३३ ॥तच्चापमुक्तबाणाग्निसंतप्तास्तदरातयः ॥ केचिद्विनष्टा संत्रस्तास्तथा चान्ये प्रदुद्रुवुः॥३४॥ केचिद्विशीर्ण

केशाश्च वल्मीकोपरि संस्थिताः॥तृणान्यभक्षयन्केचिन्नग्नाश्च विविशुर्जलम्॥३५॥ शकाश्च यवनाश्चैव तथा चान्ये महीभृतः॥सत्वरं शरणं जग्मुर्वशिष्ठं प्राणलोलुपाः ॥३६॥ जितक्षितिर्बाहुपुत्रो रिपून्गुरुसमीपगान् ॥चारैर्विज्ञातवान्सद्यः प्राप्तश्चाचार्यसन्निधिम्॥ ३७॥ तमागतं बाहुसुतं निशम्य मुनिर्वशिष्ठः शरणागतांस्तान् ॥ त्रातुं च शिष्याभिहितं च कर्तुं विचारयामास तदा क्षणेन ॥ ३८ ॥ चकार मुण्डाञ्शबरान्यवनाँल्लम्बमूर्द्धजान्॥ अन्यांश्च श्मश्रुलान्सर्वान्मुण्डान्वेदबहिष्कृतान्॥ ३९ ॥ वसिष्ठमुनिना तेन हतप्रायान्निरीक्ष्य सः ॥ प्रहसन्प्राह सगरः स्वगुरुं तपसो निधिम् ॥४०॥ ॥ सगर उवाच ॥ भो भो गुरो दुराचारानेतान्रक्षसि तान्वृथा ॥ सर्वथाहं हनिष्यामि मत्पितुर्देशहारकान् ॥ ४१ ॥ उपेक्षेत समर्थः सन्धर्मस्य परिपन्थिनः॥स एव सर्वनाशाय हेतुभूतो न संशयः ॥४२॥ बान्धवं प्रथमं मत्वा दुर्जनाः सकलं जगत् ॥ त एव बलहीनाश्चेद्व्रजन्तेऽत्यन्तसाधुताम् ॥ ४३ ॥ अहो मायाकृतं कर्म खलाः कश्मलचेतसः ॥ तावत्कुर्वन्ति कार्याणि यावत्स्यात्प्रबलं बलम् ॥ ४४ ॥ दासभावं च शत्रूणां वारस्त्रीणां च सौहृदम् ॥ साधुभावं च सर्पाणां श्रेयस्कामो न विश्वसेत् ॥ ४५ ॥ प्रहासं कुर्वते नित्यं यान्दन्तान्दर्शयन्खलाः ॥ तानेव दर्शयन्त्याशु स्वसामर्थ्यं विपर्यय ॥ ४६ ॥ पिशुना जिह्वया पूर्वं परुषं प्रवदन्ति च ॥ अतीव करुणं वाक्यं वदन्त्येव तथाबलाः ॥ ४७ ॥ श्रेयस्कामो भवेद्यस्तु नीतिशास्त्रार्थकोविदः ॥ साधुत्वं समभावं च खलानां नैव विश्वसेत् ॥ ४८ ॥ दुर्जनं प्रणतिं यान्तं मित्रं कैतवशीलिनम् ॥ दुष्टां भार्यां च विश्वस्तो मृत एव न संशयः ॥ ४९ ॥ मा रक्ष तस्मादेतान्वै गोरूपव्याघ्रकर्मिणः ॥ हत्वैतानखिलान् दुष्टांस्त्वत्प्रसादान्महीं भजे ॥ ५० ॥ वशिष्ठस्तद्वचः श्रुत्वा सुप्रीतो मुनिसत्तमः ॥ कराभ्यां सगरस्याङ्गं स्पृशन्निदमुवाच ह ॥ ५१ ॥ वसिष्ठ उवाच ॥ साधु साधु महाभाग सत्यं वदसि सुव्रत ॥ तथापि मद्वचः श्रुत्वा परां शान्तिं लभिष्यसि ॥५२॥ मयैते निहताः पूर्वं त्वत्प्रतिज्ञाविरोधिनः ॥ हतानां हनने कीर्तिः का समुत्पद्यते वद ॥ ५३ ॥ भूमीश जन्तवः सर्वे कर्मपाशेन यन्त्रिताः ॥ तथापि पापैर्निहताः किमर्थं हंसि तान्पुनः ॥५४॥देहस्तु पापजनितः पूर्वमेवैनसा हतः ॥ आत्मा ह्यभेद्यः पूर्णत्वाच्छास्त्राणामेष निश्चयः॥ ५५॥स्वकर्मफलभोगानां हेतुमात्रा हि जन्तवः॥कर्माणि दैवमूलानि देवाधीनमिदं जगत् ॥५६॥यस्माद्दैवं हि साधूनां रक्षिता दुष्टशिक्षिता ॥ ततो नरैरस्वतन्त्रैः किं कार्यं साध्यते वद ॥ ५७ ॥ शरीरं पापसंभूतं पापेनैव प्रवर्तते ॥ पापमूलमिदं ज्ञात्वा कथं हन्तुं समुद्यतः ॥ ५८ ॥आत्मा शुद्धोऽपि देहस्थो देहीति प्रोच्यते बुधैः॥तस्मादिदं वपुर्भूप पापमूलं न संशयः॥५९॥पापमूलवपुर्हन्तुः का कीर्तिस्तव बाहुज॥ भविष्यतीति निश्चित्य नैतान्हिंसीस्ततः सुत ॥ ६० ॥ इति श्रुत्वा गुरोर्वाक्यं विरराम स कोपतः ॥ स्पृशन्करेण सगरं नन्दनं मुनयस्तदा ॥ ६१ ॥

अथाथर्वनिधिस्तस्य सगरस्य महात्मनः ॥ राज्याभिषेकं कृतवान्मुनिभिः सह सुव्रतैः ॥ ६२ ॥भार्याद्वयं च तस्यासीत्केशिनी सुमति
स्तथा ॥ काश्यपस्य विदर्भस्य तनये मुनिसत्तम ॥ ६३ ॥ राज्ये प्रतिष्ठिते दृष्ट्वा मुनिरौर्वस्तपोनिधिः ॥ वनादागत्य राजानं संभाष्य स्वाश्रमं ययौ
॥६४॥कदाचित्तस्य भूपस्य भार्याभ्यां प्रार्थितो मुनिः॥वरं ददावपत्यार्थमौर्वो भार्गवमन्त्रवित् ॥६५ ॥क्षणं ध्यानस्थितो भूत्वा त्रिकालज्ञो मुनीश्वरः ॥
केशिनीं सुमतिं चैव इदमाह प्रहर्षयन् ॥६६॥और्व उवाच॥एका वंशधरं चैकमन्या षडयुतानि च॥अपत्यार्थं महाभागे वृणुतां च यथेप्सितम्॥६७॥
अथ श्रुत्वा वचस्तस्य मुनेरौर्वस्य नारद ॥ केशिन्येकं सुतं वव्रे वंशसन्तानकारणम् ॥६८॥तथा षष्टिसहस्राणि सुमत्या ह्यभवन्सुताः॥नाम्नासमंजाः
केशिन्यास्तनयो मुनिसत्तम ॥६९॥ असमंजास्तु कर्माणि चकारोन्मत्तचेष्टितः॥ तं दृष्ट्वा सागराः सर्वे ह्यासन्दुर्वृत्तचेतसः ॥७०॥ तद्बालभावं संदुष्टं
ज्ञात्वा बाहुसुतो नृपः॥चिन्तयामास विधिवत्पुत्रकर्म विगर्हितम्॥ ७१॥ अहो कष्टतरा लोके दुर्जनानां हि संगतिः ॥काष्ठैस्ताड्यते वह्निरयःसंयो
गमात्रतः ॥ ७२ ॥ अंशुमान्नाम तनयो बभूव ह्यसमंजसः ॥ शास्त्रज्ञो गुणवान्धर्मी पितामहहिते रतः ॥ ७३ ॥ दुर्वृत्ताः सागराः सर्वे लोकोपद्रव
कारिणः॥ अनुष्ठानवतां नित्यमन्तराया भवन्ति ते ॥७४॥ हुतानि यानि यज्ञेषु हवींषि विधिवद्द्विजैः॥ बुभुजे तानि सर्वाणि निराकृत्य दिवौकसः॥
॥७५॥ स्वर्गादाहृत्य सततं रम्भाद्या देवयोषितः॥ भजन्ति सागरास्ता वै कचग्रहबलात्कृताः॥७६॥ पारिजातादिवृक्षाणां पुष्पाण्याहृत्य ते खलाः॥
भूषयंति स्वदेहानि मद्यपानपरायणाः ॥ ७७ ॥ साधुवृत्तीः समाजह्रुः सदाचाराननाशयन् ॥ मित्रैश्च योद्धुमारब्धा बलिनोऽत्यन्तपापिनः॥७८॥
एतद्दृष्ट्वातिदुःखार्ता देवा इंद्रपुरोगमाः ॥ विचारं परमं चक्रुरेतेषां नाशहेतवे ॥ ७९ ॥ निश्चित्य विबुधाः सर्वे पातालान्तरगोचरम् ॥ कपिलं
देवदेवेशं ययुः प्रच्छन्नरूपिणः ॥ ८० ॥ ध्यायन्तमात्मनात्मानं परानंदैकविग्रहम् ॥ प्रणम्य दण्डवद्भूमौ तुष्टुवुस्त्रिदशास्ततः ॥८१॥ देवा ऊचुः ॥
नमस्ते योगिने तुभ्यं साङ्ख्ययोगरताय च ॥ नररूपप्रतिच्छन्नविष्णवे जिष्णवे नमः ॥८२॥ नमः परेशभक्ताय लोकानुग्रहहेतवे ॥ संसारारण्यदावाग्ने
धर्मपालनसेतवे ॥८३॥ महते वीतरागाय तुभ्यं भूयो नमो नमः ॥ सागरैः पीडितानस्मांस्त्रायस्व शरणागतान्॥८४॥ कपिल उवाच॥ये तु नाशमि
हेच्छंति यशोबलधनायुषाम् ॥ त एव लोकान्बाधन्ते नात्राश्चर्यं सुरोत्तमाः ॥ ८५॥ यस्तु बाधितुमिच्छेत जनान्निरपराधिनः ॥ तं विद्यात्सर्वलोकेषु
पापभोगरतं सुराः ॥ ८६ ॥ कर्मणा मनसा वाचा यस्त्वन्यान्बाधते सदा ॥ तं हन्ति दैवमेवाशु नात्र कार्या विचारणा ॥ ८७ ॥ अल्पैरहोभिर
वैते नाशमेष्यन्ति सागराः ॥ इत्युक्ते मुनिना तेन कपिलेन महात्मना ॥ प्रणम्य तं यथान्यायं गता नाकं दिवौकसः ॥ ८८ ॥ अत्रान्तरे तु सगरो

वसिष्ठाद्यैर्महार्षिभिः ॥ आरेभे हयमेधाख्यं यज्ञं कर्त्तुमनुत्तमम् ॥ ८९ ॥ तद्यज्ञे योजित सप्तिमपहृत्य सुरेश्वरः ॥ पाताले स्थापयामास कपिलो यत्र तिष्ठति॥९०॥गूढविग्रहशक्रेण हतमश्वं तु सागराः॥अन्वेष्टुं बभ्रमुर्लोकान् भूरादींश्च सुविस्मिताः॥९१॥ अदृष्टसप्तयस्ते च पातालं गन्तुमुद्यताः ॥ चख्नुर्महीतलं सर्वमेकैको योजनं पृथक् ॥ ९२ ॥ मृत्तिकां खनितां ते चौदधितीरे समाकिरन् ॥ तद्द्वारेण गताः सर्वे पातालं सगरात्मजाः ॥ ९३ ॥ विचिन्वन्ति हयं तत्र मदोन्मत्ता विचेतसः ॥९४॥तत्रापश्यन्महात्मानं कोटिसूर्यसमप्रभम् ॥ कपिलं ध्याननिरतं वाजिनं च तदन्तिके ॥ ९५ ॥ ततः सर्वँ तु संरब्धा मुनिं दृष्ट्वाऽतिवेगतः ॥ हन्तुमुद्युक्तमनसो विद्रवन्तः समासदन् ॥ ९६ ॥ हन्यतां हन्यतामेष वध्यतां वध्यतामयम् ॥ गृह्यतां गृह्यतामाशु इत्यूचुस्ते परस्परम् ॥ ९७ ॥ हताश्वं साधुभावेन बकवद्ध्यानतत्परम् ॥ सन्ति चाहो खला लोके कुर्वन्त्याडम्बरं महत् ॥ ९८ ॥ इत्युच्चरन्तो जहसुः कपिलं ते मुनीश्वरम् ॥ समस्तेंद्रियसंदोहं नियम्यात्मानमात्मनि ॥ ९९ ॥ आस्थितः कपिलस्तेषां तत्कर्म ज्ञातवान्नहि॥१००॥आसन्नमृत्यवस्ते तु विनष्टमतयो मुनिम् ॥पद्भिः संताडयामासुर्बाहू च जगृहुः परे॥१०१॥ ततस्त्यक्तसमाधिस्तु स मुनिर्विस्मितस्तदा ॥ उवाच भावगम्भीरं लोकोपद्रवकारिणः ॥ २ ॥ ऐश्वर्यमदमत्तानां क्षुधितानां च कामिनाम् ॥ अहंकारविमूढानां विवेको नैव जायते ॥ ३ ॥ निधेराधारमात्रेण मही ज्वलति सर्वदा ॥ तदेव मानवा भुक्त्वा ज्वलंतीति किमद्भुतम् ॥ ४ ॥ किमत्र चित्रं सुजनं बाधन्ते यदि दुर्जनाः ॥ महीरुहांश्चानुतटे पातयन्ति नदीरयाः ॥५॥ यत्र श्रीर्यौवनं वापि शारदा वापि तिष्ठति ॥ तत्राश्रीर्वृद्धता नित्यं मूर्खत्वं चापि जायते ॥ ६ ॥ अहो कनकमाहात्म्यमाख्यातुं केन शक्यते ॥ नामसाम्यादहो चित्रं धत्तूरोऽपिमदप्रदः ॥ ७ ॥ भवेद्यदि खलस्य श्रीः सैव लोकविनाशिनी ॥ यथा सखाग्नेः पवनः पन्नगस्य यथा विषम्॥८॥अहो धनमदान्धस्तु पश्यन्नपि न पश्यति ॥ यदि पश्यत्यात्महितं स पश्यति न संशयः॥९॥इत्युक्त्वा कपिलः क्रुद्धो नेत्राभ्यां ससृजेऽनलम् ॥ स वह्निः सागरान्सर्वान्भस्मसादकरोत्क्षणात् ॥ १० ॥ यन्नेत्रजानलं दृष्ट्वा पातालतलवासिनः॥ अकालप्रलयं मत्वा चुक्रुशुः शोकलालसाः ॥११॥ तदग्नितापिताः सर्वे दन्दशूकाश्च राक्षसाः ॥ सागरं विविशुः शीघ्रं सतां कोपो हि दुःसहः ॥ १२ ॥ अथ तस्य महीपस्य समागम्याध्वरं तदा ॥ देवदूत उवाचेदं सर्वं वृत्तं हि यक्षते ॥ १३ ॥ एतत्समाकर्ण्य वचः सगरः सर्ववित्प्रभुः॥ दैवेन शिक्षिता दुष्टा इत्युवाचातिहर्षितः ॥ १४ ॥ माता वा जनको वापि भ्राता वा तनयोऽपि वा ॥ अधर्मं कुरुते यस्तु स एव रिपुरिष्यते ॥ १५ ॥ यस्त्वधर्मेषु निरतः सर्वलोकविरोधकृत् ॥ तं रिपुं परमं विद्याच्छास्त्राणामेष निर्णयः ॥ १६ ॥ सगरः पुत्रनाशेऽपि न शुशोच मुनीश्वरः ॥ दुर्वृत्तनिधनं यस्मात्सतामुत्साह

कारणम्॥ १७॥यज्ञेष्वनधिकारत्वादपुत्राणामिति स्मृतेः॥पौत्रं तमंशुमन्तं हि पुत्रत्वे कृतवान्प्रभुः॥ १८॥असमञ्जस्सुतं तं तु सुधियं वाग्विदांवरम्॥युयोज
सारविद्भूयो ह्यश्वानयनकर्मणि॥ १९॥स गतस्तद्बिलद्वारे दृष्ट्वा तं मुनिपुङ्गवम्॥कपिलं तेजसां राशिं साष्टाङ्गंप्रणनामह॥२०॥कृताञ्जलिपुटो भूत्वा विनये
नाग्रतः स्थितः॥उवाच शान्तमनसं देवदेवं सनातनम्॥२१॥अंशुमानुवाच॥दौःशील्यं यत्कृतं ब्रह्मन्मत्पितृव्यैः क्षमस्वतत्॥परोपकारनिरताः क्षमासारा हि
साधवः॥२२॥दुर्जनेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः॥नहि संहरते ज्योत्स्नां चंद्रश्चाण्डालवेश्मनः॥२३॥बाध्यमानोऽपि सुजनः सर्वेषां सुखकृद्भवेत् ॥
ददाति परमां तुष्टिं भक्ष्यमाणोऽमरैः शशी॥२४॥दारितश्छिन्न एवापि ह्यामोदेनैव चन्दनः॥सौरभं कुरुते सर्वं तथैव सुजनो जनः॥२५॥क्षान्त्या च तपसा
चारैस्तद्गुणज्ञा मुनीश्वराः॥संजातं शासितुं लोकांस्त्वां विदुः पुरुषोत्तम ॥२६ ॥नमो ब्रह्मन्मुने तुभ्यं नमस्ते ब्रह्ममूर्त्तये॥ नमो ब्रह्मण्यशीलाय ब्रह्म
ध्यानपराय च ॥२७॥ इति स्तुतो मुनिस्तेन प्रसन्नवदनस्तदा॥वरं वरय चेत्याह प्रसन्नोऽस्मि तवानघ॥२८॥एवमुक्ते तु मुनिना ह्यंशुमान्प्रणिपत्य
तम् ॥ प्रापयास्मत्पितॄन्ब्राह्मं लोकमित्यभ्यभाषत ॥२९॥ ततस्तस्यातिसंतुष्टो मुनिः प्रोवाच सादरम् ॥ गङ्गामानीय पौत्रस्ते नयिष्यति पितॄ
न्दिवम्॥३०॥त्वत्पौत्रेण समानीता गङ्गा पुण्यजला नदी॥कृत्वैतान्धूतपापान्वै नयिष्यति परं पदम्॥३१॥प्रापयैनं हयं वत्स यतः स्यात्पूर्णमध्वरम्॥
पितामहान्तिकं प्राप्य साश्वं वृत्तं न्यवेदयत्॥३२॥सगरस्तेन पशुना तं यज्ञं ब्राह्मणैः सह॥विधाय तपसा विष्णुमाराध्यापपदं हरेः॥३३॥जज्ञे ह्यंशुमतः
पुत्रो दिलीप इतिविश्रुतः॥तस्माद्भगीरथो जातो यो गङ्गामानयद्दिवः॥३४॥भगीरथस्य तपसा तुष्टो ब्रह्मा ददौ मुने ॥ गङ्गां भगीरथायाः चिंतयामा
स धारणे ॥३५॥ ततश्च शिवमाराध्य तद्द्वारा स्वर्णदीं भुवम् ॥ आनीय तज्जलैः स्पृष्ट्वा पूतान्निन्ये दिवं पितॄन् ॥ ३६ ॥ भगीरथान्वये जातः सुद
सो नाम भूपतिः ॥ तस्य पुत्रो मित्रसहः सर्वलोकेषु विश्रुतः ॥३७॥ वसिष्ठशापात्प्राप्तः स सौदासो राक्षसीं तनुम्॥गङ्गाबिन्दुनिषेवेणपुनर्मुक्तो नृपो
ऽभवत् ॥ ३८ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे गङ्गामाहात्म्यं नाम अष्टमोऽध्यायः ॥ ८ ॥ नारद उवाच ॥ शप्तः कथं वसिष्ठेन
सौदासो नृपसत्तमः ॥ गङ्गाबिन्द्वभिषेकेण पुनः शुद्धोऽभवत्कथम् ॥ १ ॥ सर्वमेतदशेषेण भ्रातर्मे वक्तुमर्हसि ॥ शृण्वतां वदतां चैव गङ्गाख्यानं
शुभावहम् ॥ २ ॥ सनक उवाच॥ सौदासः सर्वधर्मज्ञः सर्वज्ञो गुणवाञ्छुचिः ॥बुभुजे पृथिवीं सर्वां पितृवद्रञ्जयन्प्रजाः ॥ ३॥ सगरेण यथा पूर्वं
महीयं सप्तसागरा ॥ रक्षिता तद्वदमुना सर्वधर्माविरोधिना ॥ ४ ॥ पुत्रपौत्रसमायुक्तः सर्वैश्वर्यसमन्वितः ॥ त्रिंशदष्टसहस्राणि बुभुजे पृथिवीं युवा
॥५॥सौदासस्त्वेकदा राजा मृगयाभिरतिर्वनम् ॥ विवेश सबलः सम्यक् शोधितं ह्याप्तमन्त्रिभिः ॥६ ॥ निषादैः सहितस्तत्र विनिघ्नन्मृगसंचयम्॥

आससाद नदीं रेवां धर्मज्ञः स पिपासितः ॥ ७ ॥ सुदासतनयस्तत्र स्नात्वा कृत्वाह्निकं मुने ॥भुक्त्वा च मन्त्रिभिः सार्द्धं तां निशां तत्र चावसत्॥
॥८॥ ततः प्रातः समुत्थाय कृत्वा पौर्वाह्णिकीं क्रियाम्॥ बभ्राम मन्त्रिसहितो नर्मदातीरजे वने ॥ ९ ॥वनाद्वनान्तरं गच्छन्नेक एव महीपतिः ॥ आक
र्णकृष्टबाणः सद् कृष्णसारं समन्वगात् ॥ १० ॥ दूरसैन्योऽश्वमारूढः स राजानुव्रजन्मृगम् ॥ व्याघ्रद्वय गुहासंस्थमपश्यत्सुरते रतम्॥ ११॥ मृगपृष्ठं
परित्यज्य व्याघ्रयोः संमुखं ययौ ॥ धनुःसंहितबाणेन तेनासौ शरशास्त्रवित् ॥१२॥ तां व्याघ्रीं पातयामास तीक्ष्णाग्रनतपर्वणा ॥ पतमाना तु सा
व्याघ्री षट्त्रिंशद्योजनायता ॥ १३ ॥ तडित्वद्घोरनिर्घोषा राक्षसी विकृताभवत् ॥पतितां स्वप्रियां वीक्ष्य द्विषन्स व्याघ्रराक्षसः ॥१४ ॥प्रतिक्रियां
करिष्यामीत्युक्त्वा चांतर्दधे तदा॥राजा तु भयसंविग्नो वनेसैन्यं समेत्य च ॥१५॥ तद्वृत्तं कथयन्सर्वान्स्वां पुरीं स न्यवर्त्तत॥शङ्कमानस्तु तद्रक्षःकृत्या
द्राजा सुदासजः ॥१६॥ परितत्याज मृगयां ततः प्रभृति नारद॥ गते बहुतिथे काले हयमेधमखं नृपः ॥ १७ ॥ समारेभे प्रसन्नात्मा वशिष्ठाद्यमुनी
श्वरैः ॥ तत्र ब्रह्मादिदेवेभ्यो हविर्दत्त्वा यथाविधि॥१८॥समाप्य यज्ञनिष्क्रांतो वशिष्ठः स्नातकोऽपि च॥ अत्रान्तरे राक्षसोऽसौ नृपहिंसितभार्यकः॥
कर्तुं प्रतिक्रियां राज्ञे समायातोरुषान्वितः ॥ १९ ॥ स राक्षसस्तस्य गुरौ प्रयाते वशिष्ठवेषं तु तदैव धृत्वा ॥ राजानमभ्येत्य जगाद भोक्ष्ये मांसं
समिच्छाम्यहमित्युवाच ॥२० ॥भूयः समास्थाय स सूदवेषं पक्वामिषं मानुषमस्य वादात्॥ स्थितश्च राजापि हिर यपात्रे धृत्वा गुरोरागमन प्रती
क्षन् ॥२१ ॥ तन्मांसं हेमपात्रस्थं सौदासो विनयान्वितः ॥ समागताय गुरवे ददौ तस्मै ससादरम् ॥२२॥ तं दृष्ट्वा चिन्तयामास गुरुः किमिति
विस्मितः॥२३॥अपश्यन्मानुषं मांसं परमेण समाधिना ॥ अहोऽस्य राज्ञो दौःशील्यमभक्ष्यं दत्तवान्मम ॥२४॥ इति विस्मयमापन्नः प्रमन्युरभव
न्मुनिः॥अभोज्यं मद्विघाताय दत्त हि पृथिवीपते ॥२५ ॥ तस्मात्तवापि भवतु ह्येतदेव हि भोजनम् ॥ नृमांसं रक्षसामेव भोज्य दत्तं मम त्वया
॥२६ ॥तद्याहि रक्षसत्वं त्वं तदाहारोचितं नृप॥इति शापं ददत्यस्मिन्सौदासो भयविह्वलः॥२७॥ आज्ञप्तो भवतैवेति सकंपोऽस्म व्यजिज्ञपत् ॥
भूयश्च चिन्तयामास वशिष्ठस्तेन नोदितः ॥२८ ॥रक्षसा वंचितं भूपं ज्ञातवान् दिव्यचक्षुषा॥ राजापि जलमादाय वशिष्ठ शप्तुमुद्यतः॥२९॥समु
द्यतं गुरु शप्तं दृष्ट्वा भूयो रुषान्वितम्॥मदयंती प्रियातस्य प्रत्युवाचाथ सुव्रता॥३०॥ मदयंत्युवाच॥भो भो क्षत्रियदायाद कोपसंहर्तुमर्हसि॥त्वया
यत्कर्म भोक्तव्यं तत्प्राप्तं नात्र संशयः॥ ३१ ॥गुरु तुंकृत्य हुंकृत्य यो वदेन्मूढधीर्नरः ॥ अरण्ये निर्जले देश स भवेद्ब्रह्मराक्षसः॥३२॥ जितेन्द्रिया
जितक्रोधा गुरु शुश्रूषणे रताः॥प्रयान्ति ब्रह्मसदनमिति शास्त्रेषु निश्चयः॥३३॥तयोक्तो भूपतिः कोपं त्यक्त्वा भार्यां ननन्द च॥जलं कुत्र क्षिपामीति

चिन्तयामास चात्मना ॥ ३४ ॥तज्जलं यत्र संसिक्तं तद्भवेद्भस्म निश्चितम् ॥ इति मत्वा जलं तत्तु पादयोर्न्यक्षिपत्स्वयम् ॥ ३५ ॥ तज्जलस्पर्शमात्रेण
पादौ कल्माषतां गतौ ॥कल्माषपाद इत्येवं ततः प्रभृति विश्रुतः ॥३६॥ कल्माषपादो मतिमान् प्रिययाश्वासितस्तदा ॥ मनसा सोऽतिभीतस्तु ववन्दे
चरणं गुरोः॥३७॥उवाच च प्रपन्नस्तं प्राञ्जलिर्नयकोविदः॥ क्षमस्व भगवन्सर्वं नापराधः कृतो मया ॥ ३८ ॥ तच्छ्रुत्वोवाच भूपालं मुनिर्निःश्वस्य
दुःखितः॥आत्मानं गर्हयामास ह्यविवेकपरायणम्॥३९॥अविवेको हि सर्वेषामापदां परमं पदम् ॥ विवेकरहितो लोके पशुरेव न संशयः ॥४० ॥ राज्ञा
त्वजानता नूनमेतत्कर्मोचितं कृतम्॥विवेकरहितोऽज्ञोऽहं यतः पापं समाचरेत्॥४१॥विवेकनियतो याति यो वा को वापि निर्वृतिम्॥विवेकहीनमाप्नोति
को वा यो वाप्यनिर्वृतिम् ॥ ४२ ॥ इत्युक्त्वा चात्मनात्मानं प्रत्युवाच मुनिर्नृपम् ॥ नात्यन्तिकं भवेदेतद्द्वादशाब्दं भविष्यति॥ ४३ ॥ गङ्गाबिन्द्वभि
षिक्तस्तु त्यक्त्वा वै राक्षसीं तनुम् ॥ पूर्वरूपं त्वमापन्नो भोक्ष्यसे मेदिनीमिमाम् ॥ ४४ ॥ तद्बिंदुसेकसंभूतज्ञानेन गतकल्मषः ॥ हरिसेवापरो भूत्वा
परां शान्तिं गमिष्यसि ॥ ४५ ॥इत्युक्त्वाथर्वविद्भूपं वशिष्ठः स्वाश्रमं ययौ ॥ राजापि दुःखसंपन्नो राक्षसीं तनुमाश्रितः ॥ ४६ ॥ क्षुत्पिपासाविशे
षार्तो नित्यं क्रोधपरायणः ॥ कृष्णक्षपाद्युतिर्भीमो बभ्राम विजने वने ॥ ४७ ॥मृगांश्च विविधांस्तत्र मानुषांश्च सरीसृपान् ॥ विहङ्गमान्प्लवङ्गांश्च
प्रशस्तांस्तानभक्षयत् ॥ ४८ ॥ अस्थिभिर्बहुभिर्भूयः पीतरक्तकलेवरैः ॥ रक्तान्तप्रेतकेशैश्च चित्रासीद्भूर्भयंकरी ॥ ४९॥ ऋतुत्रये स पृथिवीं शतयो
जनविस्तृताम् ॥ कृत्वातिदुःखितां पश्चाद्वनान्तरमुपागमत् ॥ ५० ॥ तत्रापि कृतवान्नित्यं नरमांसाशनं सदा ॥ जगाम नर्मदातीरं मुनिसिद्धनिषेवि
तम् ॥ ५१ ॥ विचरन्नर्मदातीरे सर्वलोकभयंकरः ॥अपश्यत्कंचन मुनिं रमन्तं प्रियया सह ॥ ५२ ॥ क्षुधानलेन संतप्तस्तं मुनिं समुपाद्रवत् ॥जग्राह
चातिवेगेन व्याधो मृगशिशुं यथा ॥ ५३ ॥ ब्राह्मणी स्वपतिं वीक्ष्य निशाचरकरस्थितम् ॥ शिरस्यञ्जलिमाधाय प्रोवाच भयविह्वला ॥ ५४ ॥
ब्राह्मण्युवाच ॥ भो भो नृपतिशार्दूल त्राहि मां भयविह्वलाम् ॥ प्राणप्रियाप्रदानेन कुरु पूर्णं मनोरथम् ॥५५॥ नाम्ना मित्रसहस्त्वं हि सूर्यवंशस
मुद्भवः ॥ न राक्षसस्ततोऽनाथां पाहि मां विजने वने ॥ ५६ ॥ या नारी भर्तृरहिता जीवत्यपि मृतोपमा ॥ तथापि बालवैधव्यं किं वक्ष्याम्यरिम
र्दन ॥ ५७ ॥ न मातापितरौ जाने नापि बंधुं च कंचन ॥ पतिरेव परो बंधुः परमं जीवनं मम ॥ ५८ ॥ भवान्वेत्त्यखिलान्धर्मान्योषितां वर्त्तनं
यथा ॥ त्रायस्व बन्धुरहितां बालापत्यां जनेश्वर ॥५९॥ कथं जीवामि पत्यास्मिन्हीना हि विजने वने ॥ दुहिताहं भगवतस्त्राहि मां पतिदानतः
॥६० ॥ प्रणदानात्परं दानं न भूतं न भविष्यति ॥ वदन्तीति महाप्राज्ञाः प्राणदानं कुरुष्व मे ॥ ६१ ॥ इत्युक्त्वा सा पपातास्य राक्षसस्य पदा

ग्रतः ॥ एवं संप्रार्थ्यमानोऽपि ब्राह्मण्या राक्षसो द्विजम् ॥ अभक्षयत्कृष्णसारशिशुं व्याघ्रो यथा बलात्॥६२॥ ततो विलप्य बहुधा तस्य पत्नी पति
व्रता ॥ पूर्वशापहतं भूपमशपत्क्रोधिता पुनः॥६३॥पतिं मे सुरतासक्तं यस्माद्धिंसितवान्बलात्॥तस्मात्स्त्रीसङ्गमं प्राप्तस्त्वमपि प्राप्स्यसे मृतिम्॥६४॥
शप्त्वैवं ब्राह्मणी क्रुद्धा पुनः शापान्तरं ददौ॥ राक्षसत्वं ध्रुवं तेऽस्तु मत्पतिर्भक्षितो यतः ॥६५॥ सोऽपि शापद्वयं श्रुत्वा तया दत्तं निशाचरः॥प्रमन्युः
प्राह विसृजन्कोपादङ्गारसंचयम्॥६६॥दुष्टे कस्मात्प्रदत्तं मे वृथा शापद्वयं त्वया॥एकस्यैवापराधस्य शापस्त्वेको ममोचितः॥६७॥यस्मात्क्षिपसि दुष्टाऽन्ये
मयि शापान्तरं ततः ॥ पिशाचयोनिमद्यैव याहि पुत्रसमन्विता॥६८॥तेनैवं ब्राह्मणी शप्ता पिशाचत्वं तदा गता॥क्षुधार्ता सुस्वरं भीमा रुरोदापत्य
संयुता॥ ६९॥ राक्षसश्च पिशाची च क्रोशन्तौ निर्जने वने॥जग्मतुर्नर्मदातीरे वनं राक्षससेवितम् ॥ ७० ॥ औदासीन्यं गुरौ कृत्वा राक्षसीं तनुमा
श्रितः ॥ तत्रास्ते दुःखसंतप्तः कश्चिल्लोकविरोधकृत् ॥ ७१ ॥ राक्षसं च पिशाचीं च दृष्ट्वा स्ववटमागतौ ॥ उवाच क्रोधबहुलो वटस्थो ब्रह्म
राक्षसः ॥७२॥ किमर्थमागतौ भीमौ युवां मत्स्थानमीप्सितम् ॥ ईदृशौ केन पापेन जातौ मे ब्रुवतां ध्रुवम्॥७३॥सौदासस्तद्वचः श्रुत्वा तया यच्चा
त्मना कृतम् ॥ सर्वं निवेदयित्वास्मै पश्चादेतदुवाच ह ॥ ७४ ॥ सौदास उवाच ॥ कस्त्वं वद महाभाग त्वया वै किं कृतं पुरा ॥ सख्युर्ममाति
स्नेहेन तत्सर्वं वक्तुमर्हसि॥७५॥करोति वञ्चनं मित्रे यो वा को वापि दुष्टधीः ॥ स हि पापफलं भुंक्ते यातनास्तु युगायुतम् ॥७६॥जन्तूनां सर्वदुः
खानि क्षीयन्ते मित्रदर्शनात् ॥ तस्मान्मित्रेषु मतिमान्न कुर्याद्वंचनं कदा ॥ ७७ ॥ कल्माषपादेनेत्युक्तो वटस्थो ब्रह्मराक्षसः ॥ उवाच प्रीति
मापन्नो धर्मवाक्यानि नारद ॥ ७८ ॥ ब्रह्मराक्षस उवाच ॥ ॥ अहमासं पुरा विप्रो मागधो वेदपारगः ॥ सोमदत्त इति ख्यातो नाम्ना धर्मपरा
यणः॥७९॥प्रमत्तोऽहं महाभाग विद्यया वयसा धनैः॥औदासीन्यं गुरोः कृत्वा प्राप्तवानीदृशीं गतिम्॥८०॥न लभेऽहं सुखं किंचिज्जिताहारोऽतिदुः
खितः ॥ मया तु भक्षिता विप्राः शतशोऽथ सहस्रशः॥८१॥क्षुत्पिपासापरो नित्यमन्तस्तापेन पीडितः॥जगत्त्रासकरो नित्यं मांसाशनपरायणः॥८२॥
गुर्ववज्ञा मनुष्याणां राक्षसत्वप्रदायिनी॥मयानुभूतमेतद्धि ततः श्रीमान्न चाचरेत् ॥८३॥ कल्माषपाद उवाच ॥ ॥ गुरुस्तु कीदृशः प्रोक्तः कस्त्वया
श्लाघितः पुरा ॥ तद्वदस्व सखे सर्वं परं कौतूहलं हि मे ॥ ८४ ॥ ब्रह्मराक्षस उवाच ॥ ॥ गुरवः सन्ति बहवः पूज्या वन्द्याश्च सादरम् ॥ या
तानहं कथयिष्यामि शृणुष्वैकमनाः सखे ॥ ८५ ॥ अध्यापकश्च वेदानां वेदार्थयुतिबोधकः ॥ शास्त्रवक्ता धर्मवक्ता नीतिशास्त्रोपदे
शकः ॥ ८६ ॥ मन्त्रोपदेशव्याख्याकृद्वेदसंदेहहृत्तथा ॥ व्रतोपदेशकश्चैव भयत्रातान्नदो हि च ॥ ८७ ॥ श्वशुरो मातुलश्चैव ज्येष्ठभ्राता पिता तथा॥

उपनेता निषेक्ता च संस्कर्त्ता मित्रसत्तम ॥ ८८ ॥ एते हि गुरवः प्रोक्ताः पूज्या वन्द्याश्च सादरम् ॥ ८९ ॥ ॥ कल्माषपाद उवाच ॥
गुरवो बहवः प्रोक्ता एतेषां कतमो वरः ॥ तुल्याः सर्वेऽप्युत सखे तद्यथावद्धि ब्रूहि मे ॥ ९० ॥ ब्रह्मराक्षस उवाच ॥ ॥ साधु साधु
महाप्राज्ञ यत्पृष्टं तद्वदामि ते ॥ गुरुमाहात्म्यकथनं श्रवणं चानुमोदनम् ॥ ९१ ॥ सर्वेषां श्रेय आधत्ते तस्माद्वक्ष्यामि सांप्रतम् ॥
एते समानपूजार्हाः सर्वदा नात्र संशयः ॥९२॥तथापि शृणु वक्ष्यामि शास्त्राणां सारनिश्चयम्॥अध्यापकाश्च वेदानां मन्त्रव्याख्याकृतस्तथा॥९३॥
पिता च धर्मवक्ता च विशेषगुरवः स्मृताः एतेषामपि भूपाल शृणुष्व प्रवरं गुरुम् ॥ ९४ ॥ सर्वशास्त्रार्थतत्वज्ञैर्भाषितं प्रवदामि ते ॥
यः पुराणानि वदति धर्मयुक्तानि पण्डितः ॥९५॥ संसारपाशविच्छेदकरणानि स उत्तमः ॥ देवपूजार्हकर्माणि देवतापूजने फलम् ॥९६॥ जायते
च पुराणेभ्यस्तस्मात्तानीह देवताः ॥ सर्ववेदार्थसाराणि पुराणानीति भूपते ॥ ९७ ॥ वदन्ति मुनयश्चैव तद्वक्ता परमो गुरुः॥ यः संसारार्णवं तर्त्तु
मुद्योगं कुरुते नरः ॥ ९८ ॥ शृणुयात्स पुराणानि इति शास्त्रविभागकृत् ॥ प्रोक्तवान्सर्वधर्मांश्च पुराणेषु महीपते ॥९९॥ तर्कस्तु वादहेतुः स्यान्नी
तिस्त्वैहिकसाधनम् ॥ पुराणानि महाबुद्धे इहामुत्र सुखाय हि ॥ १०० ॥ यः शृणोति पुराणानि सततं भक्तिसंयुतः ॥ तस्य स्यान्निर्मला बुद्धिर्भूयो
धर्मपरायणः ॥ १ ॥ पुराणश्रवणाद्भक्तिर्जायते श्रीपतौ शुभा ॥ विष्णुभक्तनृणां भूप धर्मे बुद्धिः प्रवर्त्तते॥२॥ धर्मात्पापानि नश्यन्ति ज्ञानं शुद्धं च
जायते॥ धर्मार्थकाममोक्षाणां ये फलान्यभिलिप्सवः ॥३॥शृणुयुस्ते पुराणानि प्राहुरित्थं पुराविदः ॥ अहं तु गौतममुनेः सर्वज्ञाद्ब्रह्मवादिनः ॥४ ॥
श्रुतवान्सर्वधर्मार्थं गङ्गातीरे मनोरमे ॥ कदाचित्परमेशस्य पूजां कर्त्तुमहं गतः ॥५॥ उपस्थितायापि तस्मै प्रणामं न ह्यकारिषम् ॥ स तु शान्तो महा
बुद्धिर्गौतमस्तेजसां निधिः ॥ ६ ॥ मन्त्रोदितानि कर्माणि करोतीति मुदं ययौ ॥ यस्त्वर्च्चितो मया देवः शिवः सर्वजगद्गुरुः ॥७॥ गुर्ववज्ञा कृता
येन राक्षसत्वे नियुक्तवान् ॥ ज्ञानतोऽज्ञानतो वापि योऽवज्ञां कुरुते गुरोः ॥ ८ ॥ तस्यैवाशु प्रणश्यन्ति धीविद्यार्थात्मजक्रियाः॥शुश्रूषां कुरुते यस्तु
गुरूणां सादरं नरः ॥ ९ ॥तस्य संपद्भवेद्भूप इति प्राहुर्विपश्चितः ॥ तेन शापेन दग्धोऽहमन्तश्चैव क्षुधाग्निना ॥१०॥ मोक्षं कदा प्रयास्यामि न जाने
नृपसत्तम ॥ एवं वदति विप्रेन्द्र वटस्थेऽस्मिन्निशाचरे॥ ११ ॥ धर्मशास्त्रप्रसंगेन तयोः पापं क्षयं गतम्॥एतस्मिन्नन्तरे प्राप्तः कश्चिद्विप्रोऽतिधार्मिकः
॥ १२ ॥ कालिङ्गदेशसंभूतो नाम्ना गर्ग इति स्मृतः ॥ वहन्गङ्गाजलं स्कंधे स्तुवन् विश्वेश्वरं प्रभुम् ॥१३ ॥ गायन्नामानि तस्यैव मुदा हृष्टतनू
रुहः ॥ तमागतं मुनिं दृष्ट्वा पिशाचीराक्षसौ च तौ ॥ १४ ॥ प्राप्ता नः पारणेत्युक्त्वा प्राद्रवन्नूर्ध्वबाहवः ॥ तेन कीर्तितनामानि श्रुत्वा दूरे व्यव

स्थिताः ॥ अशक्तास्तं धर्षयितुमिदमूचुश्च राक्षसाः ॥ १५ ॥ अहो विप्र महाभाग नमस्तुभ्य महात्मने ॥ नामकीर्तनमाहात्म्याद्राक्षसा दूरगा
वयम्॥१६॥अस्माभिर्भक्षिताः पूर्वं विप्राः कोटिसहस्रशः॥नामप्रावरणं विप्र रक्षति त्वां महाभयात्॥१७॥नामश्रवणमात्रेण राक्षसा अपि भो वयम्॥
परां शान्ति समापन्ना महिम्ना ह्यच्युतस्य वै॥१८॥सर्वथा त्वं महाभाग रागादिरहितो ह्यसि॥गंगाजलाभिषेकेण पाह्यस्मात्पातकोच्चयात्॥१९॥हरिसे
वापरो भूत्वा यश्चात्मानं तु तारयेत्॥ स तारयेज्जगत्सर्वमिति शंसन्ति सूरयः ॥ २० ॥ अपहाय हरेर्नाम घोरसंसारभेषजम् ॥ केनोपायेन लभ्येत
मुक्तिः सर्वत्र दुर्लभा॥२१॥ लोहोडुपेन प्रतरन्निमज्जत्युदके यथा॥तथैवाकृतपुण्यास्तु तारयन्ति कथं परान्॥२२॥ अहो चरित्रं महतां सर्वलोकसुखा
वहम् ॥ यथा हि सर्वलोकानामानन्दाय कलानिधिः ॥ २३ ॥ पृथिव्यां यानि तीर्थानि पवित्राणि द्विजोत्तम ॥ तानि सर्वाणि गङ्गायाः कण
स्यापि समानि न ॥ २४ ॥ तुलसीदलसंमिश्रमपि सर्षपमात्रकम् ॥ गङ्गाजलं पुनात्येव कुलानामेकविंशतिम् ॥ २५॥ तस्माद्विप्र महाभाग सर्वशा
स्त्रार्थकोविद ॥ गङ्गाजलप्रदानेन पाह्यस्मान्पापकर्मिणः ॥ २६ ॥ इत्याख्यातं राक्षसैस्तैर्गङ्गामाहात्म्यमुत्तमम् ॥ निशम्य विस्मया
विष्टो बभूव द्विजसत्तमः ॥ २७ ॥ एषामपीदृशी भक्तिर्गङ्गायां लोकमातरि ॥ किमु ज्ञानप्रभावाणां महतां पुण्यशालिनाम्॥२८॥अथासौ मनसा
धर्मं विनिश्चित्य द्विजोत्तमः॥ सर्वभूतहितो भक्तः प्राप्नोतीति परं पदम् ॥ २९ ॥ ततो विप्रः कृपाविष्टो गङ्गाजलमनुत्तमम्॥ तुलसीदलसंमिश्रं
तेषु रक्षःस्वसेचयत् ॥ ३०॥ राक्षसास्तेन सिक्तास्तु सर्षपोपमबिंदुना ॥ विसृज्य राक्षसं भावमभवन्देवतोपमाः ॥ ३१॥ ब्राह्मणी पुत्रसंयुक्ता सोमदत्त
स्तथैव च ॥ कोटिसूर्यप्रतीकाशा बभूवुर्विबुधर्षभाः ॥ ३२ ॥ शंखचक्रगदाचिह्ना हरिसारूप्यमागताः ॥ स्तुवंतो ब्राह्मणं सम्यक्ते जग्मुर्ह
रिमन्दिरम् ॥३३॥राजा कल्माषपादस्तु निजरूपं समास्थितः॥ जगाम महतीं चिन्तां दृष्ट्वा तान्मुक्तिगानघान् ॥ ३४ ॥ तस्मिन् राज्ञि सुदुःखा
र्ते गूढरूपा सरस्वती ॥ धर्ममूलं महावाक्यं बभाषेऽगाधया गिरा ॥ ३५ ॥ भो भो राजन्महाभाग न दुःखं गन्तुमर्हसि ॥ राजस्तवापि भोगान्ते
महच्छ्रेयो भविष्यति ॥ ३६ ॥ सत्कर्मधूतपापा ये हरिभक्तिपरायणाः ॥ प्रयान्ति नात्र संदेहस्तद्विष्णोः परमं पदम् ॥ ३७ ॥ सर्वभूतदयायुक्ता धर्म
मार्गप्रवर्तिनः ॥ प्रयान्ति परमं स्थानं गुरुपूजापरायणाः॥ ३८ ॥ इतीरितं समाकर्ण्य भारत्या नृपसत्तमः ॥ मनसा निर्वृतिं प्राप्य
सस्मार च गुरोर्वचः ॥ ३९ ॥ स्तुवन्गुरुं च तं विप्रं हरिं चैवातिहर्षितः ॥पूर्ववृत्तं च विप्राय सर्वं तस्मै न्यवेदयत् ॥४०॥ततो नृपस्तु कालिंगं प्रणम्य
विधिन्मुने ॥ नामानि व्याहरन्विष्णोः सद्यो वाराणसीं ययौ ॥ ४१ ॥ षण्मासं तत्र गङ्गायां स्नात्वा दृष्ट्वा सदाशिवम् ॥ ब्राह्मणीदत्तश

पात्तु मुक्तो मित्रसहोऽभवत् ॥ ४२ ॥ ततस्तु स्वपुरीं प्राप्तो वसिष्ठेन महात्मना ॥ अभिषिक्तो मुनिश्रेष्ठ स्वकं राज्यमपालयत् ॥ ४३॥ पालयित्वा
महीं कृत्स्नां भुक्त्वा भोगान्स्त्रियं विना ॥ वसिष्ठात्प्राप्य सन्तानं गतो मोक्षं नृपोत्तमः ॥ ४४ ॥ नैतच्चित्रं द्विजश्रेष्ठ विष्णोर्वाराणसीगुणान्
॥ गृणञ्छृण्वन्स्मरन्गङ्गां पीत्वा मुक्तो भवेन्नरः ॥ ४५ ॥ तस्मान्माहिम्नो विप्रेन्द्र गङ्गायाः शक्यते नहि ॥ पारं गन्तुं सुराधी
शैर्ब्रह्मविष्णुशिवरपि ॥ ४६ ॥ यन्नामस्मरणादेव महापातककोटिभिः ॥ विमुक्तो ब्रह्मसदनं नरो याति न संशयः ॥ ४७ ॥ गङ्गा गङ्गेति
यन्नाम सकृदप्युच्यते यदा ॥ तदैव पापनिर्मुक्तो ब्रह्मलोके महीयते ॥ ४८ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे गङ्गा
माहात्म्ये नवमोऽध्यायः ॥ ९ ॥ नारद उवाच ॥ विष्णुपादाग्रसंभूता या गङ्गेत्यभिधीयते॥ तदुत्पत्तिं वद भ्रातरनुग्राह्योऽस्मि ते यदि ॥ १ ॥ सनक
उवाच ॥ शृणु नारद वक्ष्यामि गङ्गोत्पत्तिं तवानघ ॥ वदतां शृण्वतां चैव पुण्यदां पापनाशिनीम् ॥२॥ आसीदिन्द्रादिदेवानां जनकः कश्यपो मुनिः॥
दक्षात्मजे तस्य भार्ये दितिश्चादितिरेव च ॥ ३ ॥ अदितिर्देवमातास्ति दैत्यानां जननी दितिः ॥ ते तयोरात्मजा विप्र परस्परजयैषिणः ॥ ४ ॥
सदा सपूर्वदेवास्तु यतो दैत्याः प्रकीर्तिताः ॥ आदिदैत्यो दितेः पुत्रो हिरण्यकशिपुर्बली ॥५ ॥ प्रह्लादस्तस्य पुत्रोऽभूत्सुमहान्दैत्यसत्तमः ॥ विरोचन
स्तस्य सुतो बभूव द्विजभक्तिमान् ॥ ६ ॥ तस्य पुत्रोऽतितेजस्वी बलिरासीत्प्रतापवान् ॥ स एव वाहिनीपालो दैत्यानामभवन्मुनेः ॥ ७॥बलेन
महता युक्तो बुभुजे मेदिनीमिमाम् ॥ विजित्य वसुधां सर्वां स्वग जेतुं मनो दधे ॥ ८॥ गजाश्च यस्यायुतकोटिलक्षास्तावन्त एवाश्वरथा मुनींद्र ॥गजे
गजे पंचशती पदातेः किं वर्ण्यते तस्य चमूर्वरिष्ठा ॥ ९ ॥ अमात्यकोट्यग्रसरावमात्यौ कुम्भाण्डनामाप्यथ कूपकर्णः ॥ पित्रा समं शौर्यपराक्रमाभ्यां
बाणो बलेः पुत्रशताग्रजोऽभूत् ॥ १० ॥ बलिः सुराञ्जेतुमनाः प्रवृत्तः सैन्येन युक्तो महता प्रतस्थे ॥ ध्वजातपत्रैर्गगनाम्बुराशेस्तरङ्गविद्युत्स्मरणं प्रकुर्वन्
॥ ११ ॥ अवाप्य वृत्रारिपुरं सुरारी रुरोध दैत्यैर्मृगराजगाढैः ॥ सुराश्च युद्धाय पुरात्तथैव विनिर्ययुर्वज्रकरादयश्च ॥ १२ ॥ ततः प्रववृते युद्धं घोरं
गीर्वाणदैत्ययो कल्पांतमेघानिर्घोषं डिंडिमध्वानसंभ्रमम् ॥ १३ ॥ मुमुचुः शरजालानि दैत्याः सुमनसां बले ॥ देवाश्च दैत्यसेनासु संग्रामेऽत्यन्तदा
रुणे ॥ १४ ॥ जहि दारय भिंधीति छिंधि मारय ताडय ॥ इत्येवं सुमहान्घोषो वदतां सेनयोरभूत्॥१५॥ शरदुन्दुभिनिध्वानैः सिंहनादैःसुरद्विषाम्॥
भाङ्कारैः स्यन्दनानां च बाणकेङ्कारनिःस्वनैः ॥१६॥ अश्वानां हेषितैश्चैव गजानां बृंहितैस्तथा ॥ टङ्कारैर्धनुषां चैव लोकः शब्दमयोऽभवत् ॥१७॥
सुरासुरैर्निर्मुक्तबाणनिष्पेषजानले ॥ अकालप्रलयं मेने निरीक्ष्य सकलं जगत् ॥ १८ ॥ बभौ देवद्विषां सेना स्फुरच्छस्त्रौघधारिणी ॥ चलद्विद्यु

त्रिभा रात्रिश्छादिता जलदैरिव ॥ १९ ॥ तस्मिन्युद्धे महाघोरैर्गिरीन् क्षिप्तान् सुरारिभिः ॥ नाराचैश्चूर्णयामासुर्देवास्ते लघुविक्रमाः ॥ २० ॥
केचित्संताडयामासुर्नागैर्नागात्रथात्रथैः ॥ अश्वैरश्वांश्च केचित्तु गदादण्डैरथार्दयन् ॥ २१ ॥ परिघैस्ताडिताः केचित्पेतुः शोणितकर्दमे ॥ समुत्क्रां
तासवः केचिद्विमानानि समाश्रिताः ॥ २२ ॥ये दैत्या निहता देवैः प्रसह्य सङ्गरे तदा ॥ ते देवभावमापन्ना दैतेयान्समुपाद्रवन् ॥ २३ ॥ अथ
दैत्यगणाः क्रुद्धास्ताड्यमानाः सुरैर्भृशम् ॥ शस्त्रैर्बहुविधैर्देवान्निजघ्नुरतिदारुणाः ॥ २४ ॥ दृषद्भिर्भिंदिपालैश्च खड्गैः परशुतोमरैः ॥ परिघैश्छुरिका
भिश्च कुन्तैश्चक्रैश्च शङ्कुभिः ॥ २५ ॥मुसलैरङ्कुशैश्चैव लाङ्गलैः पट्टिशैस्तथा ॥शक्त्योपलैः शतघ्नीभिः पाशैश्च तलमुष्टिभिः ॥ २६ ॥शूलैर्ना
लीकनाराचैः क्षेपणीयैस्समुद्गरैः ॥ रथाश्वनागपदगैः सङ्कुलो ववृधे रणः ॥ २७ ॥ देवाश्च विविधास्त्राणि दैतेयेभ्यः समाक्षिपन् ॥ एवमष्टसहस्राणि
युद्धमासीत्सुदारुणम् ॥ २८ ॥ अथ दैत्यबले वृद्धे पराभूता दिवौकसः ॥ सुरलोकं परित्यज्य सर्वे भीताः प्रदुद्रुवुः ॥२९ ॥ नररूपपरिच्छन्ना विचेरु
रवनीतले ॥ वैरोचनिस्त्रिभुवनं नारायणपरायणः ॥३०॥ बुभुजेऽव्याहतैश्वर्यप्रवृद्धश्रीर्महाबलः ॥ इयाज चाश्वमेधैः स विष्णुप्रीणनतत्परः ॥ ३१ ॥
इन्द्रत्वं चाकरोत्स्वर्गे दिक्पालत्वं तथैव च ॥ देवानां प्रीणनार्थाय यैः क्रियन्ते द्विजैर्मखाः॥३२ ॥तेषु यज्ञेषु सर्वेषु हविर्भुङ्क्ते स दैत्यराट् ॥ अदि
तिः स्वात्मजान्वीक्ष्य देवमातातिदुःखिता ॥३३॥ वृथात्र निवसामीति मत्वागाद्धिमवद्गिरिम् ॥ शक्रस्यैश्वर्यमिच्छंती दैत्यानां च पराजयम् ॥
॥ ३४ ॥ हरिध्यानपरा भूत्वा तपस्तेपेऽतिदुष्करम् ॥ किंचित्कालं समासीना तिष्ठती च ततः परम् ॥ ३५ ॥ पादेनैकेन सुचिरं
ततः पादाग्रमात्रतः ॥ कंचित्कालं फलाहारा ततः शीर्णदलाशना ॥ ३६ ॥ ततो जलाशना वायुभोजनाहारवर्जिता ॥ सच्चिदानन्दसन्दोहं
ध्यायत्यात्मानमत्मना ॥ ३७ ॥ दिव्याब्दानां सहस्रं सा तपोऽतप्यत नारद ॥ दुरन्तं तत्तपः श्रुत्वा दैतेया मायिनोऽदितिम् ॥ ३८ ॥
देवतारूपमास्थाय संप्रोचुर्बलिनोदिताः ॥ किमर्थं तप्यते मातः शरीरपरिशोषणम् ॥ ३९ ॥ यदि जानन्ति दैतेया महद्दुखं ततो भवेत् ॥ त्यजेदं
दुःखबहुलं कायशोषणकारणम् ॥ ४० ॥प्रयाससाध्यं सुकृतं न प्रशंसन्ति पण्डिताः ॥ शरीरं यत्नतो रक्ष्यं धर्मसाधनतत्परैः॥ ४१ ॥ ये शरीर
मुपेक्षन्ते ते स्युरात्मविघातिनः ॥ सुखं त्वं तिष्ठ सुभगे पुत्रानस्मान्न खेदय॥४२॥मात्रा हीना जना मातर्मृतप्राया न संशयः ॥ गावो वा पशवो वापि
यत्र गावो महीरुहाः ४३ ॥ न लभन्ते सुखं किंचिन्मात्रा हीना मृतोपमाः ॥ दरिद्रो वापि रोगी वा देशान्तरगतोऽपि वा ॥४४॥ मातुर्दर्शनमात्रेण
लभत परमां मुदम् ॥ अन्ने वा सलिले वापि धनादौ वा प्रियासु च ॥ ४५ ॥ कदाचिद्विमुखो याति जनो मातरि कोऽपि न ॥ यस्य माता गृहे
नास्ति यत्र धर्मपरायणा ॥ साध्वी च स्त्री पतिप्राणा गन्तव्यं तेन वै वनम् ॥ ४६ ॥धर्मश्च नारायणभक्तिहीनो धनं च सद्भोगविवर्जितं हि ॥ गृहं च

भार्यातनयैर्विहीनं यथा तथा मातृविहीनमर्त्यः ॥४७॥तस्मादेवि परित्राहि दुःखार्तानात्मजांस्तव॥ इत्युक्ताप्यदितिर्दैत्यैर्न चचाल समाधितः॥ ४८॥
एवमुक्तासुराः सर्वे हरिध्यानपरायणाम् ॥ निरीक्ष्य क्रोधसंयुक्ता हन्तुं चक्रुर्मनोरथम् ॥ ४९ ॥ कल्पान्तमेघनिर्घोषाः क्रोधसंरक्तलोचनाः ॥ दंष्ट्रैरे
सृजन्वह्निं सोऽदहत्काननं क्षणात् ॥५०॥ शतयोजनविस्तीण नानाजीवसमाकुलम् ॥ तेनैव दग्धा दैतेया ये प्रधर्षयितुं गताः॥५१॥ सैवावशिष्टा
जननी सुराणामब्दाच्छतादच्युतसक्तचित्ता ॥ संरक्षिता विष्णुसुदर्शनेन दैत्यान्तकेन स्वजनानुकम्पिना ॥ ५२ ॥ इति श्रीबृहन्नारदीयपुराणे
पूर्वभागे प्रथमपादे गङ्गोत्पत्तौ बलिकृतदेवपराजयवर्णनन्नाम दशमोऽध्यायः ॥ १० ॥ ॥ नारद उवाच ॥अहो ह्यत्यद्भुतं प्रोक्तं त्वया भ्रातरिदं मम ॥
स वह्निरदितिं मुक्त्वा कथं तानदहत्क्षणात् ॥ १ ॥ वदादितेर्महासत्त्वं विशेषाश्चर्यकारणम् ॥ परोपदेशनिरताः सज्जना हि मुनीश्वराः ॥ २ ॥ सनक
उवाच॥शृणु नारद माहात्म्यं हरिभक्तिरतात्मनाम् ॥ हरिध्यानपरान्साधून्कः समर्थः प्रबाधितुम् ॥ ३ ॥ हरिभक्तिपरो यत्र तत्र ब्रह्मा हरिः शिवः ॥
देवाः सिद्धा मुनीशाश्च नित्यं तिष्ठंति सत्तमाः ॥ ४ ॥ हरिरास्ते महाभाग हृदये शान्तचेतसाम् ॥ हरिनामपराणां च किमु ध्यानरतात्मनाम् ॥५॥
शिवपूजारतो वाऽपि विष्णुपूजापरोऽपि वा ॥ यत्र तिष्ठति तत्रैव लक्ष्मीः सर्वाश्च देवताः ॥ ६ ॥ यत्र पूजापरो विष्णोर्वह्निस्तत्र न बाधते ॥ राजा वा
तस्करो वापि व्याधयश्च न सन्ति हि ॥७॥ प्रेताः पिशाचाः कूष्माण्डग्रहा बालग्रहास्तथा ॥डाकिन्यो राक्षसाश्चैव न बाधन्तेऽच्युतार्चकम् ॥८॥ परपी
डारता ये तु भूतवेतालकादयः ॥नश्यन्ति यत्र सद्भक्तो हरिलक्ष्म्यर्चने रतः॥९॥जितेन्द्रियः सर्वहितो धर्मकर्मपरायणः॥यत्र तिष्ठति तत्रैव सर्वतीर्थानि
देवताः ॥ १० ॥ निमिषं निमिषार्द्धं वा यत्र तिष्ठन्ति योगिनः ॥ तत्रैव सर्वश्रेयांसि तत्तीर्थं तत्तपोवनम् ॥ ११ ॥ यन्नामोच्चारणादेव सर्वे नश्यन्त्युप
द्रवाः ॥ स्तोत्रैर्वाप्यर्हणाभिर्वा किमु ध्यानेन कथ्यते ॥ १२ ॥ एवं तेनाग्निना विप्र दग्धं सासुरकाननम् ॥ सादितिर्नैव दग्धाभूद्विष्णुचक्राभिर
क्षिता ॥ १३ ॥ ततः प्रसन्नवदनः पद्मपत्रायतेक्षणः ॥ प्रादुरासीत्समीपेऽस्याः शङ्खचक्रगदाधरः ॥ १४ ॥ ईषद्धास्यस्फुरद्दन्तप्रभाभाषितदिङ्मु
खः ॥ स्पृशन्करेण पुण्येन प्राह कश्यपवल्लभाम् ॥ १५ ॥ श्रीभगवानुवाच ॥ देवमातः प्रसन्नोऽस्मि तपसाराधितस्त्वया ॥ चिरं श्रान्तासि भद्रं
ते भविष्यति न संशयः ॥ १६ ॥ वरं वरय दास्यामि यत्ते मनसि रोचते ॥ मा भैर्भद्रे महाभागे ध्रुवं श्रेयो भविष्यति ॥ १७ ॥ इत्युक्ता
देवमाता सा देवदेवेन चक्रिणा ॥ तुष्टाव प्रणिपत्यैनं सर्वलोकसुखावहम् ॥ १८ ॥ अदितिरुवाच ॥ नमस्ते देवदेवेश सर्वव्यापिञ्जनार्दन ॥
सत्त्वादिगुणभेदेन लोकव्यापारकारण ॥ १९ ॥ नमस्ते बहुरूपायारूपाय च महात्मने ॥ सर्वैकरूपरूपाय निर्गुणाय गुणात्मने ॥ २० ॥ नमस्ते

लोकनाथाय परमज्ञानरूपिणे ॥ सद्भक्तजनवात्सल्यशालिने मङ्गलात्मने ॥ २१ ॥ यस्यावताररूपाणि ह्यर्चयन्ति मुनीश्वराः ॥ तमादिपुरुषं
देवं नमामि ह्यर्थसिद्धये ॥ २२ ॥ श्रुतयो यं न जानन्ति न जानान्ति च सूरयः ॥ तं नमामि जगद्धेतुं समायं चाप्यमायिनम् ॥ २३ ॥
यस्यावलोकनं चित्रं मायोपद्रवकारणम् ॥ जगद्रूपं जगद्धेतु तं वन्दें सर्ववन्दितम् ॥ २४ ॥ यत्पादाम्बुजकिञ्जल्कसेवारक्षितमस्तकाः ॥
अवापुः परमां सिद्धिं तं वन्दे कमलाधवम् ॥२५॥यस्य ब्रह्मादयो देवा महिमानं न वै विदुः॥अत्यासन्नं च भक्तानां तं वन्दे भक्तसंगिनम् ॥ २६ ॥
यो देवस्त्यक्तसङ्गानां शान्तानं करुणार्णवः॥करोति ह्यात्मनः सङ्गं तं देवं सङ्गवर्जितम्॥२७॥यज्ञैश्वरं यज्ञकर्म यज्ञकर्मसु निष्ठितम् ॥ नमामि यज्ञफ
लदं यज्ञकर्मप्रबोधकम् ॥२८॥ अजामिलोऽपि पापात्मा यन्नामोच्चारणादनु ॥ प्राप्तवान्परमं धाम तं वन्दे लोकसाक्षिणम् ॥ २९ ॥ हरिरूपी महादेवः
शिवरूपी जनार्दनः ॥ इति लोकस्य नेता यस्तं नमामि जगद्गुरुम् ॥ ३० ॥ ब्रह्माद्या अपि देवेशा यन्मायापाशयन्त्रिताः ॥ न जनन्ति परं भावं
तं वन्दे सर्वनायकम् ॥ ३१ ॥ हृत्पद्मस्थोऽपि योग्यानां दूरस्थ इव भासते ॥ प्रमाणातीतसद्भावस्तं वन्दें ज्ञानसाक्षिणम् ॥ ३२ ॥ यन्मुख
द्ब्राह्मणो जातो बाहुभ्यां क्षात्रियोऽजनि॥ऊर्वोर्वैश्यः समुत्पन्नः पद्यां शूद्रोऽभ्यजायत ॥३३ ॥ मनसश्चन्द्रमा जातो जातः सूर्यश्च चक्षुषः॥ मुखादग्निस्त
थेन्द्रश्च प्राणाद्वायुरजायत ॥ ३४ ॥ ऋग्यजुःसामरूपाय सत्यस्वरगतात्मने ॥ षडङ्गरूपिणे तुभ्यं भूयोभूयो नमो नमः ॥ ३५ ॥ त्वमिन्द्रः पवनः
सोमस्त्वमीशानस्त्वमन्तकः ॥ त्वमग्निर्नैर्ऋतिश्चैव वरुणस्त्वं दिवाकरः ॥ ३६ ॥ देवाश्च स्थावराश्चैव पिशाचाश्चैव राक्षसाः ॥ गिरयः सिद्धगंधर्वा
नद्यो भूमिश्च सागराः॥३७॥त्वमेव जगतामीशो यत्रासि त्वं परात्परः॥त्वद्रूपमखिलं देव तस्मान्नित्यं नमोऽस्तु ते॥ ३८॥अनाथनाथ सर्वज्ञ भूतदेवेन्द्र
विग्रह ॥ दैतेयैर्बाधितान्पुत्रान्मम पाहि जनार्दन ॥ ३९ ॥ इति स्तुत्वा देवमाता देवं नत्वा पुनः पुनः ॥ उवाच प्राञ्जलिर्भूत्वा हर्षाश्रुक्षालित
स्तनी ॥ ४० ॥ अनुग्राह्यास्मि देवेश त्वया सर्वादिकारण ॥ अकण्टकां श्रियं देहि मत्सुतानां दिवौकसाम् ॥ ४१॥ अन्तर्य्यामिञ्जगद्रूप सर्वज्ञ परमे
श्वर ॥ अज्ञातं किं तव श्रीश किं मामीहयसि प्रभो ॥ ४२ ॥ तथापि तव वक्ष्यामि यन्मे मनसि रोचते ॥ वृथापुत्रास्मि देवेश दैतेयैः परिपी
डिता ॥ ४३ ॥ तान्न हिंसितुमिच्छामि यतस्तेऽपि सुता मम ॥ तानहत्वा श्रियं देहि मत्सुतेभ्यः सुरेश्वर ॥ ४४ ॥ इत्युक्तो देवदेवेशः पुनः
प्रीतिमुपागतः ॥ उवाच हर्षयन्विप्र देवमातरमादरात् ॥ ४५ ॥ श्रीभगवानुवाच ॥ प्रीतोऽस्मि देवि भद्रं ते भविष्यामि सुतो ह्यहम् ॥ यतः सप
त्निपुत्रेषु वात्सल्यं देवि दुर्लभम् ॥ ४६ ॥ त्वया तु यत्कृतं स्तोत्रं तत्पठान्ति नरास्तु ये ॥ तेषां संपद्वरा पुत्रा न हीयन्ते कदाचन ॥ ४७ ॥

स्वात्मजे वान्यपुत्रे वा यः समत्वेन वर्तते ॥ न तस्य पुत्रशोकः स्यादेष धर्मः सनातनः ॥ ४८ ॥ अदितिरुवाच ॥ नाहं वोढुं क्षमा देव त्वामाद्य
पुरुषं परम् ॥ असंख्याताण्डरोमाणं सर्वेशं सर्वकारणम् ॥४९॥ यत्प्रभावं न जानन्ति श्रुतयः सर्वदेवताः ॥ तमहं देवदेवेशं धारयामि कथं प्रभो
॥५०॥ अणोरणीयांसमजं परात्परतरं प्रभुम् ॥ धारयामि कथं देव त्वामहं पुरुषोत्तमम्॥ ५१॥ महापातकयुक्तोऽपि यन्नामस्मृतिमात्रतः ॥ मुच्यते स
कथं देवो ग्राम्येषु जनिमर्हति ॥५२॥ यथा शूकरमत्स्याद्या अवतारास्तव प्रभो॥ तथायमपि को वेद तव विश्वेश चेष्टितम् ॥५३॥त्वत्पादपद्मप्रणता
त्वन्नामस्मृतितत्परा॥ त्वामेव चिंतये देव यथेच्छसि तथा कुरु ॥५४॥ सनक उवाच॥तयोक्तं वचनं श्रुत्वा देवदेवो जनार्दनः॥ दत्त्वाभयं देवमातुरिदं
वचनमब्रवीत् ॥५५॥श्रीभगवानुवाच॥सत्यमुक्तं महाभागे त्वया नास्त्यत्र संशयः॥तथापि शृणु वक्ष्यामि गुह्याद्गुह्यतरं शुभे ॥५६ ॥ रागद्वेषविहीना
ये मद्भक्ता मत्परायणाः॥वहति सततं ते मां गतासूया अदाम्भिकाः॥५७॥परोपतापविमुखाः शिवभक्तिपरायणाः॥मत्कथाश्रवणासक्ता वहन्ति सततं
हि माम् ॥५८॥ पतिव्रताः पतिप्राणाः पतिभक्तिपरायणाः वहन्ति सततं देवि स्त्रियोऽपि त्यक्तमत्सराः ॥ ५९ ॥ मातापित्रोश्च शुश्रूषुर्गुरुभक्तोऽति
थिप्रियः ॥ हितकृद्ब्राह्मणानां यः स मां वहति सर्वदा ॥६०॥ पुण्यतीर्थरता नित्यं सत्सङ्गनिरतास्तथा ॥ लोकानुग्रहशीलाश्च सततं ते वहन्ति
माम् ॥ ६१ ॥ परोपकारनिरताः परद्रव्यपराङ्मुखाः ॥ नपुंसकाः परस्त्रीषु ते वहन्ति च मां सदा ॥ ६२ ॥ तुलस्युपासनरताः सदा नामपरा
यणाः ॥ गोरक्षणपरा ये च सततं मां वहन्ति ते ॥ ६३ ॥ प्रतिग्रहनिवृत्ता ये परान्नविमुखास्तथा ॥ अन्नोदकप्रदातारो वहंति सततं हि माम् ॥६४॥
त्वं तु देवि पतिप्राणा साध्वी भूतहिते रता ॥ संप्राप्य पुत्रभावं ते साधयिष्ये मनोरथम् ॥ ६५ ॥ इत्युक्त्वा देवदेवशो ह्यदितिं देवमातरम्॥दत्त्वा
कण्ठगतां मालामभयं च तिरोदधे ॥ ६६ ॥सा तु संहृष्टमनसा देवसूर्दक्षनन्दिनी ॥ प्रणम्य कमलाकान्तं पुनः स्वस्थानमाव्रजत् ॥६७॥ततोऽदितिर्म
हाभागा सुप्रीता लोकवन्दिता ॥ असूत समये पुत्रं सर्वलोकनमस्कृतम् ॥६८॥ शङ्खचक्रधरं शान्तं चन्द्रमण्डलमध्यगम् ॥ सुधाकलशदध्यन्नकरं
वामनसंज्ञितम् ॥ ६९ ॥ सहस्रादित्यसंकाशं व्याकोशकमलेक्षणम् ॥ सर्वाभरणसंयुक्तं पीताम्बरधरं हरिम् ॥ ७० ॥ स्तुत्यं मुनिगणैर्युक्तं सर्वलो
कैकनायकम् ॥ आविर्भूतं हरिं ज्ञात्वा कश्यपो हर्षविह्वलः ॥ प्रणम्य प्राञ्जलिर्भूत्वा स्तोतुं समुपचक्रमे ॥ ७१ ॥ कश्यप उवाच ॥ नमोन
मस्तेऽखिलकारणाय नमोनमस्तेऽखिलपालकाय ॥ नमोनमस्तेऽमरनायकाय नमोनमो दैत्यविनाशनाय ॥ ७२ ॥ नमोनमो भक्तजनप्रियाय
नमोनमः सज्जनरंजिताय ॥ नमोनमो दुर्जननाशनाय नमोऽस्तु तस्मै जगदीश्वराय ॥ ७३ ॥ नमोनमः कारणवामनाय नारायणायामितविक्रमाय ॥

सशार्ङ्गचक्रासिगदाधराय नमोऽस्तु तस्मै पुरुषोत्तमाय ॥ ७४ ॥ नमः पयोराशिनिवासनाय नमोऽस्तु सद्धृत्कमलस्थिताय ॥ नमोऽस्तु
सूर्याद्यमितप्रभाय नमोनमः पुण्यकथागताय ॥ ७५ ॥ नमोनमोऽर्केन्दुविलोचनाय नमोऽस्तु ते यज्ञफलप्रदाय॥ नमोऽस्तु यज्ञाङ्गविराजिताय
नमोऽस्तु ते सज्जनवल्लभाय ॥ ७६ ॥ नमो जगत्कारणकारणाय नमोऽस्तु शब्दादिविवर्जिताय ॥ नमोऽस्तु ते दिव्यसुखप्रदाय नमो
नमो भक्तमनोगताय ॥ ७७ ॥ नमोऽस्तु ते ध्वान्तविनाशकाय नमोऽस्तु ते मन्दरधारकाय ॥ नमोऽस्तु ते यज्ञवराहनाम्ने नमो हिरण्याक्षवि
दारकाय ॥ ७८॥ नमोऽस्तु ते वामनरूपभाजे नमोऽस्तु ते क्षत्रकुलान्तकाय ॥ नमोऽस्तु ते रावणमर्दनाय नमोऽस्तु ते नन्दसुताग्रजाय ॥ ७९॥ नमस्ते
कमलाकान्त नमस्ते सुखदायिने ॥ स्मृतार्त्तिनाशिने तुभ्यं भूयो भूयो नमोनमः ॥ ८० ॥ यज्ञेश यज्ञविन्यास यज्ञविघ्नविनाशन ॥ यज्ञरूप
यजद्रूप यज्ञाङ्गं त्वां यजाम्यहम् ॥ ८१॥ इति स्तुतः स देवेशो वामनो लोकपावनः ॥ उवाच प्रहसन्हर्षं वर्द्धयन्कश्यपस्य सः ॥ ८२ ॥ श्रीभगवानु
वाच ॥ तात तुष्टोऽस्मि भद्रं ते भविष्यति सुरार्चित॥अचिरात्साधयिष्यामि निखिलं त्वन्मनोरथम् ॥ ८३॥अहं जन्मद्वये त्वेवं युवयोः पुत्रतां गतः
॥ अस्मिञ्जन्मन्यपि तथा साधयाम्युत्तमं सुखम् ॥ ८४ ॥ अत्रान्तरे बलिर्दैत्यो दीर्घसत्रं महामखम् ॥ आरेभे गुरुणा युक्तः काव्येन च मुनी
श्वरैः ॥ ८५॥तस्मिन्मखे समाहूतो विष्णुर्लक्ष्मीसमन्वितः ॥ हविःस्वीकरणार्थाय ऋषिभिर्ब्रह्मवादिभिः॥८६॥प्रवृद्धैश्वर्यदैत्यस्य वर्त्तमाने महाक्रतौ ॥
आमंत्र्य मातापितरौ स बटुर्वामनो ययौ॥८७॥स्मितेन मोहयँल्लोकं वामनो भक्तवत्सलः॥हविर्भोक्तुमिवायातो बलेः प्रत्यक्षतो हरिः ॥८८ ॥ दुर्वृत्तो
वा सुवृत्तो वा जडो वायं हितोऽपि वा ॥ यो भक्तियुक्तस्तस्यान्तः सदा संनिहितो हरिः ॥ ८९ ॥ आयान्तं वामनं दृष्ट्वा ऋषयो ज्ञानचक्षुषः ॥
ज्ञात्वा नारायणं देवमुद्ययुः सभ्यसंयुताः॥९०॥एतज्ज्ञात्वा दैत्यगुरुरेकांते बलिमब्रवीत्॥स्वसारमविचार्यैव खलाः कार्याणि कुर्वते॥९१॥शुक्र उवाच॥
भो भो दैत्यपते सौम्य ह्यपहर्ता तव श्रियम् ॥ विष्णुर्वामनरूपेण ह्यदितेः पुत्रतां गतः ॥९२॥तवाध्वरं स आयाति त्वया तस्यासुरेश्वर ॥ न किंचि
दपि दातव्यं मन्मतं शृणु पण्डित॥९३॥आत्मबुद्धिः सुखकरी गुरुबुद्धिर्विशेषतः॥परबुद्धिर्विनाशाय स्त्रीबुद्धिः प्रलयंकरी ॥९४॥ शत्रूणां हितकृद्यस्तु
स हन्तव्यो विशेषतः ॥ ९५ ॥ बलिरुवाच ॥ एवं गुरो न वक्तव्यं धर्ममार्गविरोधतः ॥ यदादत्ते स्वयं विष्णुः किमस्मादधिक वरम्॥ ९६॥कुर्वन्ति
विदुषो यज्ञान्विष्णुप्रीणनकारणात् ॥ स चेत्साक्षाद्धविर्भोगी मत्तः कोऽभ्यधिको भुवि ॥ ९७ ॥ दरिद्रेणापि यत्किंचिद्दीयते विष्णवे गुरो॥तदेव परमं
दानं दत्तं भवति चाक्षयम् ॥ ९८ ॥ स्मृतोऽपि परया भक्त्या पुनाति पुरुषोत्तमः ॥येन केनाप्यर्चितश्चेद्ददाति परमां गतिम् ॥९९॥ हरिर्हरति पापानि

दुष्टचित्तैरपि स्मृतः ॥ अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः ॥ १०० ॥ जिह्वाग्रे वसते यस्य हरि रित्यक्षरद्वयम् ॥ स विष्णुलोकमाप्नोति पुनरावृत्तिदुर्लभम् ॥ १ ॥ गोविंदेति सदा ध्यायेद्यस्तु रागादिवार्जितः ॥ स याति विष्णुभवनमिति प्राहुर्मनीषिणः ॥ २॥ अग्नौ वा ब्राह्मणे वापि हूयते यद्धविगुरो ॥ हरिभक्त्या महाभाग तेन विष्णुः प्रसीदति ॥ ३ ॥ अहं तु हरितुष्ट्यर्थं करोम्यध्वरमुत्तमम् ॥ स्वयमायाति चद्विष्णुः कृतार्थोऽस्मि न संशयः ॥४॥ एवं वदति दैत्येन्द्रे विष्णुर्वामनरूपधृक् ॥ प्रविवशाध्वरस्थानं हुतवह्निमनोरमम् ॥ ५ ॥ तं दृष्ट्वा कोटिसूर्याभं योग्यावयवसुन्दरम् ॥ वामनं सहसोत्थाय प्रत्यगृह्णात्कृताञ्जलिः ॥ ६ ॥ दत्त्वासनं च प्रक्षाल्य पादौ वामनरूपिणम् ॥ सकुटुंबो वहन्मूर्ध्ना परमां मुदमात्तवान् ॥ ७ ॥ विष्णवेऽस्मै जगद्धाम्ने दत्त्वार्घ्यं विधिवद्बलिः ॥ रोमाञ्चिततनुर्भूत्वा हर्षाश्रुनयनोऽब्रवीत् ॥ बलिरुवाच ॥ ८ ॥ अद्य मे सफलं जन्म अद्य मे सफलो मखः ॥ जीवितं सफलं मेऽद्य कृतार्थोऽस्मि न संशयः ॥ ९॥ अमोघामृतवृष्टिर्मे समायातातिदुर्लभा ॥ त्वदागमनमात्रेण ह्यनायासो महोत्सवः ॥१०॥एते च ऋषयः सर्वे कृतार्था नात्र संशयः ॥ यैः पूर्वं हि तपस्तप्तं तदद्य सफलंप्रभो॥११॥कृतार्थोऽस्मि कृतार्थोऽस्मि कृतार्थोऽस्मि न संशयः ॥ तस्मात्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमोनमः ॥ १२ ॥ त्वदाज्ञया त्वन्नियोगं साधयामीति मन्मनः ॥ अत्युत्साहसमायुक्तं समाज्ञापय मां प्रभो॥१३॥ एवमुक्तो दीक्षितेन प्रहसन्वामनोऽब्रवीत्॥देहि मे तपसि स्थातुं भूमिं त्रिपदसंमिताम् ॥१४॥ एतच्छ्रुत्वा बलिः प्राह राज्यं याचितवान्नहि॥ग्रामं वा नगरं चापि धनं वा किं कृतं त्वया॥१५॥तन्निशम्य बलिं प्राह विष्णुः सर्वशरीरभृत् ॥ आसन्नभ्रष्टराज्यस्य वैराग्यं जन न्निव॥१६॥श्रीभगवानुवाच॥शृणु दैत्येन्द्र वक्ष्यामि गुह्याद्गुह्यतमं परम्॥सर्वसंगविहीनानां किमर्थैः साध्यतेवद॥१७॥अहं तु सर्वभूतानामन्तर्यामीति भावय॥मयि सर्वमिदं दैत्य किमन्यैः साध्यते वद ॥ १८ ॥ रागद्वेषविहीनानां शान्तानां त्यक्तमायिनाम् ॥ नित्यानंदस्वरूपाणां किमन्यैः साध्यते धनैः ॥ १९॥ आत्मवत्सर्वभूतानि पश्यतां शान्तचेतसाम् ॥ अभिन्नमात्मनः सर्वं को दाता दीयते च किम् ॥ २० ॥ पृथ्वीयं क्षत्रियवशा इति शास्त्रेषु निश्चितम् ॥ तदाज्ञायां स्थिताः सर्वे लभन्ते परमं सुखम् ॥ २१ ॥ दातव्यो मुनिभिश्चापि षष्ठांशो भूभुजे बले ॥ महीयं ब्राह्मणानां तु दातव्या सर्वयत्नतः ॥ २२ ॥ भूमिदानस्य माहात्म्यं न भूतं न भविष्यति ॥ परं निर्वाणमाप्नोति भूमिदो नात्र संशयः ॥ २३ ॥ स्वल्पामपि महीं दत्त्वा श्रोत्रियायाहिताग्नये ॥ ब्रह्मलोकमवाप्नोति पुनरावृत्तिदुर्लभम् ॥ २४ ॥ भूमिदः सर्वदः प्रोक्तो भूमिदो मोक्षभाग्भवेत् ॥ अतिदानं तु तज्ज्ञेयं सर्वपापप्रणाशनम् ॥ २५ ॥ महापातकयुक्तो वा युक्तो वा सर्वपातकैः ॥ दशहस्तां महीं दत्त्वा सर्वपापैः प्रमुच्यते ॥ २६ ॥ सत्पात्रे भूमि

दाता यः सर्वदानफलं लभेत् ॥ भूमिदानसमं नान्यत्रिषु लोकेषु विद्यते ॥ २७ ॥ द्विजाय वृत्तिहीनाय यः प्रदद्यान्महीं बले ॥ तस्य पुण्य
फलं वक्तुं न क्षमोऽब्दशतैरहम् ॥ २८ ॥ सक्ताय देवपूजासु वृत्तिहीनाय दैत्यप ॥ स्वल्पामपि महीं दद्याद्यः स विष्णुर्न संशयः ॥ २९ ॥ इक्षुगोधूम
तुवरीपूगवृक्षादिसंयुता ॥ पृथ्वी प्रदीयते येन स विष्णुर्नात्र संशयः ॥ ३० ॥ वृत्तिहीनाय विप्राय दरिद्राय कुटुम्बिने ॥ स्वल्पामपि महीं
दत्त्वा विष्णुसायुज्यमाप्नुयात् ॥ ३१ ॥ सक्ताय देवपूजासु विप्रायाढकिकां महीम् ॥ दत्त्वा लभेत गङ्गायां त्रिरात्रस्नानजं फलम् ॥ ३२ ॥विप्राय
वृत्तिहीनाय सदाचाररताय च ॥ द्रोणिकां पृथिवीं दत्त्वा यत्फलं लभते शृणु ॥ ३३ ॥ गङ्गातीर्थाश्वमेधानां शतानि विधिवन्नरः ॥
कृत्वा यत्फलमाप्नोति तदाप्नोति स पुष्कलम् ॥ ३४ ॥ ददाति खारिकां भूमिं दरिद्राय द्विजाय यः ॥ तस्य पुण्यं प्रवक्ष्यामि वदतो मे निशामय
॥ ३५ ॥ अश्वमेधसहस्राणि वाजपेयशतानि च ॥ विधाय जाह्नवीतीरे यत्फलं तल्लभेद्ध्रुवम् ॥ ३६ ॥ भूमिदानं महादानमतिदानं प्रकीर्त्तितम् ॥
सर्वपापप्रशमनमपवर्गफलप्रदम् ॥ ३७ ॥ अत्रेतिहासं वक्ष्यामि शृणु दैत्यकुलेश्वर ॥ यच्छ्रुत्वा श्रद्धया युक्तो भूमिदानफलं लभेत् ॥ ३८ ॥
आसीत्पुरा द्विजवरो ब्राह्मकल्पे महामतिः ॥ दरिद्रो वृत्तिहीनश्च नाम्ना भद्रमतिर्बले ॥ ३९ ॥ श्रुतानि सर्वशास्त्राणि तेन वेदविदानिशम् ॥ श्रुतानि
च पुराणानि धर्मशास्त्राणि सर्वशः ॥४०॥ अभवंस्तस्य षट्पत्न्यः श्रुतिः सिन्धुर्यशोवती ॥ कामिनी मालिनी चैव शोभा चेति प्रकीर्तिताः ॥ ४१॥
आसु पत्नीषु तस्यासञ्चत्वरिंशच्छतद्वयम् ॥ पुत्राणामसुरश्रेष्ठ सर्वे नित्यं बुभुक्षिताः ॥ ४२ ॥ अकिञ्चनो भद्रमतिः क्षुधार्त्तानात्मजान्प्रियाः ॥
पश्यन्स्वयं क्षुधार्त्तश्च विललापाकुलेन्द्रियः ॥ ४३॥ धिग्जन्म भाग्यरहितं धिग्जन्म धनवर्जितम् ॥ धिग्जन्म धर्मरहितं धिग्जन्म ख्यातिवर्जितम्
॥ ४४ ॥ नरस्य बह्वपत्यस्य धिग्जन्मैश्वर्यवर्जितम् ॥ अहो गुणाः सौम्यता च विद्वत्ता जन्म सत्कुले॥ ४५॥दारिद्र्याम्बुधिमग्नस्य सर्वमेतन्न शोभते॥
प्रियाः पुत्राश्च पौत्राश्च बान्धवा भ्रातरस्तथा॥४६॥शिष्याश्च सर्वमनुजास्त्यजन्त्यैश्वर्यवर्जितम् ॥चाण्डालो वा द्विजो वापि भाग्यवानेव पूज्यते॥४७॥
दरिद्रः पुरुषो लोके शववल्लोकनिन्दितः॥अहो संपत्समायुक्तो निष्ठुरो वाप्यनिष्ठुरः॥ ४८॥ गुणहीनोऽपि गुणवान्मूर्खो वाप्यथ पण्डितः॥ ऐश्वर्य
गुणयुक्तश्चेत्पूज्य एव न संशयः ॥ ४९ ॥ अहो दरिद्रता दुःखं तत्राप्याशातिदुःखदा ॥ आशाभिभूताः पुरुषा दुःखमश्नुवतेऽक्षयम् ॥ ५० ॥ आशाया
दासा ये दासास्ते सर्वलोकस्य ॥ आशा दासी येषां तेषां दासायते लोकः ॥५१॥ मानो हि महतां लोके धनमक्षयमुच्यते॥तस्मिन्नाशाख्यरिपुणा
माने नष्टे दरिद्रता॥ ५२ ॥सर्वशास्त्रार्थवेत्तापि दरिद्रो भाति मूर्खवत् ॥नैष्किञ्चन्यमहाग्राहग्रस्तानां को विमोच ॥५३॥ अहो दुःखमहो दुःखमहो

दुःखं दरिद्रता ॥ तत्रापि पुत्रभार्याणां बाहुल्यमतिदुःखदम् ॥ ५४ ॥ एवमुक्त्वा भद्रमतिः सर्वशास्त्रार्थपारगः॥अन्यमैश्वर्यदं धम मनसाऽचिन्तयत्तदा
॥ ५५ ॥ भूमिदानं विनिश्चित्य सर्वदानोत्तमोत्तमम् ॥ दानेन योऽनुमंताति स एव कृतवान्पुरा॥५६॥प्रापकं परमं धर्मं सर्वकामफलप्रदम्॥दानानामु
त्तमं दानं भूदानं परिकीर्तितम्॥५७॥यद्दत्त्वा समवाप्नोति यद्यदिष्टतमं नरः॥इति निश्चत्य मतिमान्धीरो भद्रमतिर्बले॥५८॥कौशाम्बींनाम नगरीं कल
त्रापत्ययुग्ययौ ॥सुघोषनामविप्रेन्द्रं सर्वैश्वर्यसमन्वितम्॥ ५९॥गत्वा याचितवान्भूमिं पञ्चहस्तायतां बले॥ सुघोषो धर्मनिरतस्तं निरीक्ष्य कुटुम्बिम्
॥६०॥ मनसा प्रीयमाणेन समभ्यर्च्येदमब्रवीत् ॥ कृतार्थोऽहं भद्रमते सफलं मम जन्म च॥ ६१ ॥ मत्कुलं पावनं जातं त्वदनुग्रहतो द्विज ॥
इत्युक्त्वा तं समभ्यर्च्य सुघोषो धर्मतत्परः ॥ ६२ ॥ पञ्चहस्तमितां भूमिं ददौ तस्मै महामतिः ॥ पृथिवी वैष्णवी पुण्या पृथिवी विष्णुपालिता
॥६३॥ पृथिव्यास्तु प्रदानेन प्रीयतां मे जनार्दनः ॥ मन्त्रेणानेन दैत्येन्द्र सुघोषस्तं द्विजोत्तमम्॥६४॥विष्णुबुद्ध्या समभ्यर्च्य तावतीं पृथिवीं ददौ ॥
सोऽपि भद्रमतिर्विप्रो धीमता याचितां भुवम् ॥६५॥ दत्तवान्हरिभक्ताय श्रोत्रियाय कुटुम्बिने ॥ सुघोषो भूमिदानेन कोटिवंशसमन्वितः ॥ ६६ ॥
प्रपेदे विष्णुभवनं यत्र गत्वा न शोचति ॥ बले भद्रमतिश्चापि यतः प्रार्थितवाञ्छ्रियम् ॥६७॥ स्थितवान्विष्णुभवने सकुटुम्बो युगायुतम् ॥ तथैव
ब्रह्मसदने स्थित्वा कोटियुगायुतम् ॥ ६८ ॥ ऐन्द्रं पदं समासाद्य स्थितवान्कल्पपञ्चकम् ॥ततो भुव समासाद्य सर्वैश्वर्यसमन्वितः ॥६९॥ जाति
स्मरो महाभागो बुभुजे भोगमुत्तमम् ॥ ततो भद्रमतिर्दैत्य निष्कामो विष्णुतत्परः ॥ ७० पृथिवीं वृत्तिहीनेभ्यो ब्राह्मणेभ्यः प्रदत्तवान् ॥ तस्य
विष्णुः प्रसन्नात्मा तत्त्वैश्वर्यमनुत्तमम् ॥ ७१ ॥ कोटिवंशसमेतस्य ददौ मोक्षमनुत्तमम् ॥तस्माद्दैत्यपते मह्यं सर्वधर्मपरायण ॥ ७२ ॥ तपश्चरिष्ये
मोक्षाय देहि मे त्रिपदं महीम् ॥ वैरोचनिस्ततो हृष्टः कलशं जलपूरितम् ॥ ७३ ॥ आददे पृथिवीं दातुं वर्णिने वामनाय ॥ विष्णुः सर्वगतो
ज्ञात्वा जलधारावराधिनम्॥७४॥काव्यं हस्तस्थदर्भाग्रं तच्छरे संन्यवेशयत् ॥ दर्भाग्रेऽभून्महाशस्त्रं कोटिसूर्यसमप्रभम् ॥७५॥ अमोघं ब्राह्मत्युग्रं
काव्याक्षिग्रासलोलुपम् ॥ आयाय भार्गवसुरानसुरानेकचक्षुषा॥७६॥ पश्येति वांदिदेशे च दर्भाग्रं शस्त्रसन्निभम् ॥ बलिर्ददौ महाविष्णोर्महीं त्रिपदसं
मिताम् ॥७७॥ ववृधे सोऽपि विश्वात्मा आब्रह्मभुवनं तदा ॥ अमिमीत महीं द्वाभ्यां पद्भ्यां विश्वतनुर्हरिः ॥७८॥ स आब्रह्मकटाहांतपदान्येतानि
सप्रभः ॥ पादाङ्गुष्ठाग्रनिर्भिन्नं ब्रह्माण्डं विभिदे द्विधा॥७९ ॥तद्वारा बाह्यसलिलं बहुधारं समागतम् ॥ धौतविष्णुपदं तोयं निर्मलं लोकपावनम् ॥
॥ ८०॥अजाण्डबाह्यनिलयं धारारूपमवर्त्तत॥ तज्जलं पावनं श्रेष्ठं ब्रह्मादीन्पावयत्सुरान् ॥८१॥सप्तर्षिसेवितं चैव न्यपतन्मेरुमूर्द्धनि॥८२॥ एतद्दृष्ट्वाद्भुतं

कर्म ब्रह्माद्या देवतागणाः ॥ ऋषयो मनवश्चैव ह्यस्तुवन्हर्षविह्वलाः ॥ ८३ ॥ देवा ऊचुः ॥ नमः परेशाय परात्मरूपिणे परात्परायापररूपधारिणे ॥
ब्रह्मात्मने ब्रह्मरतात्मबुद्धये नमोऽस्तु तेऽव्याहतकर्मशीलिने ॥ ८४ ॥ परेश परमानन्द परमात्मन्परात्पर ॥ सर्वात्मने जगन्मूर्त्ते प्रमाणातीत
ते नमः ॥ ८५ ॥ विश्वतश्चक्षुषे तुभ्यं विश्वतो बाहवे नमः ॥ विश्वतः शिरसे चैव विश्वतो गतये नमः ॥ ८६ ॥एवं स्तुतो महाविष्णुर्ब्रह्माद्यैः स्वर्द्दि
वौकसाम् ॥ दत्त्वाभयं च मुमुदे देवदेवः सनातनः ॥ ८७ ॥ विरोचनात्मजं दैत्यं पदैकार्थं बबन्ध ह ॥ ततः प्रपन्नं तु बलिं ज्ञात्वा चास्मै
रसातलम् ॥ ददौ तद्द्वारपालश्च भक्तवश्यो बभूव ह ॥ ८८ ॥ नारद उवाच ॥ रसातले महाविष्णुर्विरोचनसुतस्य वै ॥ किं भोज्यं कल्पयामास
घोरे सर्पभयाकुले ॥ ८९ ॥ सनक उवाच ॥ ॥ अमन्त्रितं हविर्यत्तु हूयते जातवेदसि ॥ अपात्रे दीयते यच्च तद्घोरं भोगसाधनम् ॥ ९० ॥
हुतं हविरशुचिना दत्तं सत्कर्म यत्कृतम् ॥ तत्सर्वं तत्र भोगार्हमधःपातफलप्रदम् ॥ ९१ ॥ एवं रसातलं विष्णुर्बलये सासुराय तु ॥ दत्त्वाभयं च
सर्वेषां सुराणां त्रिदिवं ददौ ॥ ९२ ॥ पूज्यमानोऽमरगणैः स्तूयमानो महर्षिभिः ॥ गंधर्वैर्गीयमानश्च पुनर्वामनतां गतः ॥ ९३॥ एतद्दृष्ट्वा महत्कर्म
मुनयो ब्रह्मवादिनः ॥ परस्परं स्मितमुखाः प्रणेमुः पुरुषोत्तमम् ॥ ९४ ॥ सर्वभूतात्मको विष्णुर्वामनत्वमुपागतः ॥ मोहयन्निखिलं लोकं प्रपेदे
तपसे वनम् ॥ ९५ ॥ एवं प्रभावा सा देवी गङ्गा विष्णुपदोद्भवा ॥ यस्याः स्मरणमात्रेण मुच्यते सर्वपातकैः ॥ ९६ ॥ इदं तु गङ्गामाहात्म्यं यः पठे
च्छृणुयादपि ॥ देवालये नदीतीरे सोऽश्वमेधफलं लभेत् ॥ ९७ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे गङ्गोत्पत्तिर्गङ्गामाहात्म्यं नामैका
दशोऽध्यायः ॥ ११ ॥ ॥ नारद उवाच ॥ ॥ श्रुतं तु गङ्गामाहात्म्यं वाञ्छितं पापनाशनम् ॥ अधुना लक्षणं ब्रूहि भ्रातर्मे दानपात्रयोः॥ १॥ सनक
उवाच ॥ ॥ सर्वेषामेव वर्णानां ब्राह्मणः परमो गुरुः ॥ तस्मै दानानि देयानि दत्तस्यानन्त्यमिच्छता ॥ २ ॥ ब्राह्मणः प्रतिगृह्णीयात्सर्वतो भय
वार्जितः ॥ न कदापि क्षत्रविशौ गृह्णीयातां प्रतिग्रहम् ॥३॥ चण्डस्य पुत्रहीनस्य दम्भाचाररतस्य च ॥ स्वकर्मत्यागिनश्चापि दत्त भवति निष्फलम्
॥ ४ ॥ परदाररतस्यापि परद्रव्याभिलाषिणः ॥ नक्षत्रसूचकस्यापि दत्तं भवति निष्फलम् ॥ ५ ॥ असूयाविष्टमनसः कृतघ्नस्य च मायिनः ॥
अयाज्ययाजकस्यापि दत्तं० ॥ ६॥ नित्यं याच्ञापरस्यापि हिंसकस्य खलस्य च ॥ रसविक्रयिणश्चैव दत्तं०॥ ७ ॥वेदविक्रयिणश्चापि स्मृतिविक्र
यिणस्तथा ॥ धर्मविक्रयिणो विप्र दत्तं०॥ ८ ॥ गानेन जीविका यस्य यस्य भार्या च पुश्चली ॥ परोपतापिनश्चापि दत्तं भवति निष्फलम् ॥ ९ ॥
असिजीवी मषीजीवी देवलो ग्रामयाजकः ॥ धावको वा भवेत्तेषां दत्तं भवति निष्फलम् ॥ १० ॥ पाककर्तुः परस्यार्थे कवये गदहारिणे॥ अभक्ष्य

भक्षकस्यापि दत्तं० ॥ ११ ॥ शूद्रान्नभोजिनश्चैव शूद्राणां शवदाहिनः ॥ पौंश्चलान्नभुजश्चापि दत्त भवति नि० ॥ १२ ॥ नामविक्रयिणो विष्णोः
संध्याकर्म्मोज्झितस्य च ॥ दुष्प्रतिग्रहदग्धस्य दत्तं० ॥१३॥ दिवाशयनशीलस्य तथा मैथुनकारिणः॥ संध्याभोजिन एवापि दत्तं भवति०॥१४॥
महापातकयुक्तस्य त्यक्तस्य ज्ञातिबान्धवैः॥ कुण्डस्य चापि गोलस्य दत्तं भवति० ॥१५ ॥परिवित्तेः शठस्यापि परिवेत्तुः प्रमादिनः॥ स्त्रीजितस्या
तिदुष्टस्य दत्तं भवति० ॥ १६ ॥ मद्यमांसाशिनश्चापि स्त्रीविटस्यातिलोभिनः ॥ चौरस्य पिशुनस्यापि दत्तं० ॥ १७ ॥ ये केचित्पापनिरता
निन्दिताः सुजनैः सदा ॥ न तेभ्यः प्रतिगृह्णीयान्न च दद्याद्द्विजोत्तम ॥ सत्कर्मनिरतायापि देयं यत्नेन नारद ॥ १८ ॥ यद्दानं श्रद्धया दत्तं तथा
विष्णुसमर्पणम् ॥ याचितं वापि पात्रेण भवेत्तद्दानमुत्तमम् ॥ १९ ॥ परलोकं समुद्दिश्य ह्यैहिकं वापि नारद ॥ यद्दान दीयते पात्रे तत्काम्यं
मध्यमं स्मृतम् ॥ २० ॥ दम्भेन चापि हिंसार्थं परस्याविधिनापि च ॥ क्रुद्धेनाश्रद्धयापात्रे तद्दानं मध्यमं स्मृतम् ॥ २१ ॥ अधमं बलितोषाय
मध्यमं स्वार्थसिद्धये ॥ उत्तमं हरिप्रीत्यर्थं प्राहुर्वेदविदां वराः ॥ २२ ॥ दानभोगविनाशाश्च रायः स्युर्गतयस्त्रिधा ॥ २३ ॥ यो ददाति च नो
भुंक्ते तद्धनं नाशकारणम् ॥ धनं धर्मफलं विप्र धर्मो माधवतुष्टिकृत् ॥ २४ ॥ तरवः किं न जीवन्ति तेऽपि लोके परार्थकाः॥यत्र मूलफलैर्वृक्षाः
परकार्यं प्रकुर्वते ॥२५ ॥ मनुष्या यदि विप्राग्र्य न परार्थास्तदा मृताः ॥ परकार्यं न ये मर्त्याः कायेनापि धनेन वा ॥ २६ ॥ मनसा वचसा
वापि ते ज्ञेयाः पापकृत्तमाः ॥ अत्रेतिहासं वक्ष्यामि शृणु नारद तत्त्वतः ॥ २७ ॥ अत्र दानादिकानां तु लक्षणं परिकीर्तितम् ॥ गङ्गामाहा
त्म्यसहितं सर्वपापप्रणाशनम् ॥२८॥ भगीरथस्य धर्मस्य संवादं पुण्यकारणम्॥आसीद्भगीरथो राजा सगरान्वयसंभवः ॥ २९ ॥ शशास पृथिवी
मेतां सप्तद्वीपां ससागराम् ॥ सर्वधर्मरतो नित्यं सत्यसंधः प्रतापवान् ॥ ३० ॥ कन्दर्पसदृशो रूपे यायजूको विचक्षणः ॥ प्रालेयाद्रिसमो धैर्ये धर्मे
धर्मसमो नृपः ॥ ३१ ॥ सर्वलक्षणसंपन्नः सर्वशास्त्रार्थपारगः ॥ सर्वसंपत्समायुक्तः सर्वानन्दकरो मुने ॥ ३२ ॥ आतिथ्यप्रयतो नित्यं वासुदेवार्चने
रतः ॥ पराक्रमी गुणनिधिर्मैत्रः कारुणिकः सुधीः ॥३३ ॥ एतादृशं तं राजानं ज्ञात्वा हृष्टो भगीरथम् ॥ धर्मराजो द्विजश्रेष्ठ कदाचिद्द्रष्टुमागतः ॥
॥ ३४ ॥ समागतं धर्मराजमर्हयामास भूपतिः ॥ शास्त्रदृष्टेन विधिना धर्मः प्रीत उवाच तम् ॥ ३५ ॥ धर्मराज उवाच ॥ राजन्धर्मविदां श्रेष्ठ
प्रसिद्धोऽसि जगत्रये ॥ धर्मराजोऽथ कीर्तिं ते श्रुत्वा त्वां द्रष्टुमागतः ॥ ३६ ॥ सन्मार्गनिरतं सत्यं सर्वभूतहिते रतम् ॥ द्रष्टुमिच्छन्ति विबुधास्तवो
त्कृष्टगुणप्रियाः ॥ ३७ ॥ कीर्तिर्नीतिश्च संपत्तिर्वर्तते यत्र भूपते ॥ वसन्ति तत्र नियतं गुणास्सन्तश्च देवताः ॥ ३८ ॥ अहो राजन्महाभाग शोभनं

चारितं तव ॥ सर्वभूतहितत्वादि मादृशामपि दुर्लभम् ॥३९॥ इत्युक्तवन्तं तं धर्मं प्रणिपत्य भगीरथः॥प्रोवाच विनयाविष्टः संहृष्टः श्लक्ष्णया गिरा॥ ॥ ४०॥ भगीरथ उवाच ॥भगवन्सर्वधर्मज्ञ समदर्शिन् सुरेश्वर ॥ कृपया परयाविष्टो यत्पृच्छामि वदस्व तत् ॥ ४१ ॥ धर्मा कीदृग्विधाः प्रोक्ताः के लोका धर्मशालिनाम्॥कियत्यो यातनाः प्रोक्ताः केषां ताः परिकीर्तिताः॥४२॥त्वया संमाननीया ये शासनीयाश्च ये यथा ॥तत्सर्वं मे महाभाग विस्तराद्वक्तुमर्हसि ॥४३॥धर्मराज उवाच॥ साधु साधु महाबुद्धे मतिस्ते विमलोर्जिता॥ धर्माधर्मान्प्रवक्ष्यामि तत्त्वतः शृणु भक्तितः॥ ४४ ॥धर्मा बहुविधाः प्रोक्ताः पुण्यलोकप्रदायकाः॥ तथैव यातनाः प्रोक्ता असंख्या घोरदर्शनाः॥ ४५॥ विस्तराद्वदितुं नालमपि वर्षशतायुतैः॥तस्मात्संमासतो वक्ष्ये धर्माधर्मनिदर्शनम् ॥४६॥ वृत्तिदानं द्विजानां वै महापुण्यं प्रकीर्त्तितम् ॥ तथैवाध्यात्मविदुषो दत्तं भवति चाक्षयम् ॥ ४७ ॥ कुटुम्बिनं वा शास्त्रज्ञं श्रोत्रियं वा गुणान्वितम् ॥ यो दत्त्वा स्थापयेद्वृत्तिं तस्य पुण्यफलं शृणु ॥ ४८ ॥ मातृतः पितृतश्चैव द्विजः कोटिकुलान्वितः ॥ निर्विश्य विष्णुभवनं कल्पं तत्रैव मोदते ॥ ४९ ॥ गण्यन्ते पांसवो भूमेर्गण्यन्ते वृष्टिबिन्दवः ॥ न गण्यन्ते विधात्रापि ब्रह्मवृत्तिफलानि वै ॥५० ॥ समस्तदेवतारूपो ब्राह्मणः परिकीर्तितः ॥ जीवनं ददतस्तस्य कः पुण्यं गदितुं क्षमः ॥ ५१ ॥ यो विप्रहितकृन्नित्यं स सर्वान्कृतवान्मखान् ॥ स स्नातः सर्वतीर्थेषु तप्तं तेनाखिलं तपः ॥ ५२ ॥ यो ददस्वेति विप्राणां जीवनं प्रेरयेत्परम् ॥ सोऽपि तत्फलमाप्नोति किमन्यैर्बहुभाषितैः ॥५३ ॥ तडागं कारयेद्यस्तु स्वयमेवापरेण वा ॥ वक्तुं तत्पुण्यसंख्यानं नालं वर्षशतायुषा ॥५४॥ एकश्चेदध्वगो राजंस्तडागस्य जलं पिबेत् ॥ तत्कर्तुः सर्वपापानि नश्यन्त्येव न संशयः ॥ ५५ ॥ एकाहमपि यत्कुर्याद्भूमिस्थमुदकं नरः ॥ स मुक्तः सर्वपापेभ्यः शतवर्षं वसेद्दिवि ॥ ५६ ॥ कर्तुं तडागं यो मर्त्यः साह्यकः शक्तितो भवेत्॥ सोऽपि तत्फलमाप्नोति तुष्टः प्रेरक एव च ॥ ५७॥ मृदं सिद्धार्थमात्रां वा तडागाद्यो बहिः क्षिपेत् ॥ तिष्ठत्यब्दशतं स्वर्गे विमुक्तः पापकोटिभिः ॥ ५८ ॥ देवता यस्य तुष्यन्ति गुरवो वा नृपोत्तम ॥ तडागपुण्यभाक्स स्यादित्येषा शाश्वती श्रुतिः॥ ५९ ॥ इतिहासं प्रवक्ष्यामि तवात्र नृपसत्तम ॥ यं श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ ६० ॥ गौडदेशेऽतिविख्यातो राजासीद्वीरभद्रकः ॥ महाप्रतापी विद्यावान्सदा विप्रप्रपूजकः ॥ ६१ ॥ वेदशास्त्रकुलाचारयुक्तो मित्रविवर्धनः ॥तस्य राज्ञी महाभागा नाम्ना चम्पकमञ्जरी ॥ ६२ ॥ तस्य राज्ञो महामात्याः कृत्याकृत्यविचारणाः ॥ धर्माणां धमशास्त्रैस्तु सदा कुर्वन्ति निश्चयम् ॥ ६३ ॥ प्रायश्चित्तं चिकित्सां च ज्योतिषे धर्मनिर्णयम्॥विना शास्त्रेण यो ब्रूयात्तमाहुर्ब्रह्मघातकम् ॥ ६४ ॥ इति निश्चित्य मनसा मन्वादीरितधर्मकान् ॥ आचार्येभ्यः सदा भूपः शृणोति विधिपूर्वकम् ॥ ६५॥

न कोऽप्यन्यायवर्ती च तस्य राज्येऽक्रोऽपि च ॥ धर्मेण पाल्यमानस्य तस्य देशस्य भूपतेः॥ ६६ ॥ जातं समत्वं स्वर्गस्य सौराज्यस्य शुभावहम्॥
स चैकदा तु नृपतिर्मृगयायां महावने ॥ ६७ ॥ मन्त्र्यादिभिः परिवृतो बभ्राम मध्यभास्करम् ॥ दैवादाखेटशून्यस्य ह्यतिश्रान्तस्य तत्र वै ॥६८॥
नृपरीतस्य संजातं सरसो दर्शनं नृप ॥ ततः शुष्कां तु सरसीं दृष्ट्वा तत्र व्यचिन्तयत् ॥ ६९ ॥ किमयं सरसीशृङ्गे भुवः केन विनिर्मिता ॥ कथं
जलं भवेदत्र येन जीवेदयं नृपः ॥ ७० ॥ ततो बुद्धिः समभवत्खाते तस्या नृपोत्तम ॥ हस्तमात्रं ततो गर्त्तं खात्वा तोयमवाप्तवान् ॥ ७१ ॥
तेन तोयेन पीतेन राज्ञस्तृप्तिरजायत ॥ मन्त्रिणश्चापि भूमीश बुद्धिसागरसंज्ञिनः ॥ ७२ ॥ स बुद्धिसागरो भूपं प्राह धर्मार्थकोविदः ॥
राजन्नियं पुष्करिणी वर्षाजलवती पुरा ॥ ७३ ॥ अथैनां बद्धवप्रां च कर्तुं जाता मतिर्मम ॥ तद्भवान्मोदतां देव दत्तादाज्ञां च मेऽनघ ॥ ७४ ॥
इति श्रुत्वा वचस्तस्य मन्त्रिणो नृपसत्तमः ॥ मुमुदेऽतितरां भूपः स्वयं कर्तुं समुद्यतः॥ ७५॥तमेव मन्त्रिणं तत्र युयोज शुभकर्मणि॥ततो राजाज्ञया
सोऽपि बुद्धिसागरको मुदा ॥ ७६ ॥ सरसीं सागरं कर्त्तुमुद्यतः पुण्यकृत्तमः ॥ धनुषां चैव पञ्चाशत्सर्वतो विस्तृतायताम् ॥ ७७ ॥ सरसीं बद्धसु
शिलां चकारागाधशम्बराम् ॥ तां विनिर्माय सरसीं राज्ञे सर्वं न्यवेदयत् ॥ ७८ ॥ तस्यां ततः प्रभृति वै सर्वेऽपि वनचारिणः ॥ पान्थाः पिपासिता
भूप लभन्ते स्म जलं शुभम् ॥ ७९ ॥ कदाचित्स्वायुषश्चान्ते स मन्त्री बुद्धिसागरः ॥ प्रमृतो गतवाँल्लोकं लोकशास्तुर्मम प्रभो ॥ ८० ॥ तदर्थं तु
मया पृष्टो धर्मो धर्मलिपिंकरः ॥ चित्रगुप्तस्तु तत्कर्म मह्यं सर्वं न्यवेदयत् ॥८१॥ उपदेष्टा स्वयं चासौ धर्मकार्यस्य भूपतेः ॥ तस्माद्धर्मविमानं
तु समारोढुमिहार्हति ॥ ८२ ॥ इत्युक्ते चित्रगुप्तेन समाज्ञप्तो मया नृप ॥ विमानं धर्मसंज्ञं तु आरोढुं बुद्धिसागरः ॥८३॥ अथ कालान्तरे राजन्स
राजा वीरभद्रकः ॥ मृतो गतो मम स्थानं नमश्चक्रे मुदान्वितः ॥ ८४ ॥ मया तु तत्र तस्यापि पृष्टं कर्माखिलं नृप ॥ कथितं चित्रगुप्तेन धर्मं
सरसिसंभवम् ॥ ८५ ॥ तदा सम्यङ्मया राजा बोधितोऽभूद्यथा शृणु ॥ अधित्यकायां भूपाल सैकतस्य गिरेः पुरा ॥ ८६ ॥ लावकेनामुना
चञ्च्वा खातं द्व्यङ्गुलमम्बुनि ॥ ततः कालान्तरे तेन वाराहेण नृपोत्तम॥८७॥खनितं हस्तमात्रं तु जलं तुण्डेन चात्मनः॥ततोऽन्यदाऽमुया काल्या
हस्तयुग्ममितः कृतः ॥ ८८ ॥ खातो जले महाराज तोयं मासद्वयं स्थितम् ॥ पीतं क्षुद्रैर्वनचरैः सत्त्वैस्तृष्णासमाकुलैः॥८९॥ततो वर्षत्रयान्ते तु
गजनानेन सुव्रत ॥ हस्तत्रयमितः खातः कृतस्तत्राधिकं जलम्॥९०॥मासत्रये स्थितं तच्च पयो जीवैर्वनेचरैः ॥ भवांस्तत्र समायातो जलशोषाद
नन्तरम् ॥ ९१ ॥ मासे तत्र तु संप्राप्तं हस्तं खात्वा जलं नृप ॥ ततस्तस्योपदेशेन मन्त्रिणो नृपते त्वया ॥ ९२ ॥ पञ्चाशद्धनुरुत्खातं जातं तत्र

महाजलम् ॥ पुनः शिलाभिः सुदृढं बद्धं जातं महत्सरः ॥ वृक्षाश्च रोपितास्तत्र सर्वलोकोपकारिणः ॥ ९३ ॥ तेन स्वस्वेन पुण्येन पञ्चैते जगतीपते ॥विमानं धर्म्यमारूढास्त्वमप्येनं समारुह ॥ ९४॥इति वाक्यं समाकर्ण्य मम राजा स भूमिप ॥आरुरोह विमानं तत्षष्ठो राजा समांशभाक् ॥ ९५॥ इति ते सर्वमाख्यातं तडागजनितं फलम् । श्रुत्वैतन्मुच्यते पापादाजन्ममरणान्तिकात् ॥ ९६ ॥ यो नरः श्रद्धया युक्तो व्याख्यातं शृणुयात्पठेत् ॥ सोऽप्याप्नोत्यखिलं पुण्य सरोनिर्माणसंभवम्॥९७॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे धर्माख्याने द्वादशोऽध्यायः॥ १२॥धर्मराज उवाच॥ देवतायतनं यस्तु कुरुते कारयत्यपि ॥शिवस्यापि हरेर्वापि तस्य पुण्यफलं शृणु ॥१॥मातृतः पितृतश्चैव लक्षकोटिकुलान्वितः॥कल्पत्रयं विष्णुपदे तिष्ठत्येव न संशयः॥२॥मृदैव कुरुते यस्तु देवतायतनं नरः॥यावत्पुण्यं भवेत्तस्य तन्मे निगदतः शृणु॥३॥दिव्यदेहधरो भूत्वा विमानवरमास्थितः॥ कल्पत्रयं विष्णुपदे तिष्ठत्येव न संशयः ॥ ४ ॥ मृदैव कुरुते यस्तु देवतायतनं नरः ॥ यावत्पुण्यं भवेत्तस्य तन्मे निगदतः शृणु ॥ ५ ॥ दिव्यदेहधरो भूत्वा विमानवरमास्थितः ॥ कल्पत्रयं विष्णुपदे स्थित्वा ब्रह्मपुरं व्रजेत् ॥ ६ ॥ कल्पद्वयं स्थितस्तत्र पुनः कल्पं वसेद्दिवि ॥ ततस्तु योगिनामेव कुले जातो दयान्वितः॥७॥ वैष्णवं योगमास्थाय मुक्तिं व्रजाति शाश्वतीम् ॥दारुभिः कुरुते यस्तु तस्य स्याद्द्विगुणं फलम्॥ ८॥ त्रिगुणं चेष्टकाभिस्तु शिलाभिस्तच्चतुर्गुणम् ॥ स्फाटिकाभिः शिलाभिस्तु ज्ञेयं दशगुणोत्तरम् ॥ ९ ॥ ताम्रीभिस्तच्छतगुणं हेम्ना कोटिगुणं भवेत् ॥ देवालयं तडागं वा ग्रामं वा पालयेत्तु यः ॥ १० ॥ कर्तुः शतगुणं तस्य पुण्यं भवति भूपते ॥ देवालयस्य शुश्रूषां लेपसेचनमंडनैः ॥ ११ ॥ कुर्याद्यस्सततं भक्त्या तस्य पुण्यमनन्तकम् ॥ वेतनाद्विष्टितो वापि पुण्यकर्मप्रवर्त्तिताः ॥ १२ ॥ ते गच्छंति धराधाराः शाश्वतं वैष्णवं पदम् ॥ तडागार्द्धफलं राजन्कासारे परिकीर्तितम् ॥ १३ ॥ कूपे पादफलं ज्ञेयं वाप्यां पद्माकरोन्मितम् ॥ वापीशतगुणं प्रोक्तं कुल्यायां भूपतेः फलम् ॥१४॥ दृषद्भिस्तु धनी कुर्यान्मृदा निष्किञ्चनो जनः ॥ तयोः फलं समानं स्यादित्याह कमलोद्भवः ॥१५॥ दद्यादाढ्यस्तु नगरं हस्तमात्रमकिंचनः ॥ भुवं तयोः समफलं प्राहुर्वेदविदो जनाः ॥ १६॥ धनाढ्यः कुरुते यस्तु तडागं फलसाधनम् ॥ दरिद्रः कुरुते कूपं समं पुण्यं प्रकीर्तितम् ॥ १७॥आश्रमं कारयेद्यस्तु बहुजन्तूपकारकम् ॥ स याति ब्रह्मभुवनं कुलत्रयसमन्वितः ॥ १८ ॥ धेनुर्वा ब्राह्मणो वापि यो वा को वापि भूपते ॥ क्षणार्द्धं तस्य छायायां तिष्ठन्स्वर्गं नयत्यमुम् ॥ १९ ॥ आरामकारका राजन्देवतागृहकारिणः॥ तडागग्रामकर्त्तारः पूज्यन्ते हरिणा सह ॥ २० ॥सर्वलोकोपकारार्थं पुष्पारामं जनेश्वर॥ कुर्वते देवतार्थं वा तेषां पुण्यफलं शृणु ॥२१ ॥ तत्र यावन्ति पर्णानि कुसुमानि भवन्ति च ॥ तावद्वर्षाणि नाकस्थो मोदते कुल

कोटिभिः ॥ २२ ॥ प्राकारकारिणस्तस्य कंटकावरणप्रदाः ॥ प्रयान्ति ब्रह्मणः स्थानं युगानामेकसप्ततिम् ॥ २३ ॥ तुलसीरोपणं ये तु कुर्वते मनुजे
श्वर ॥ तेषां पुण्यफलं राजन्वदतो मे निशामय ॥ २४॥ सप्तकोटिकुलैर्युक्तो मातृतः पितृतस्तथा ॥ वसेत्कल्पशतं साग्रं नारायणपदे नृप ॥ २५ ॥
ऊर्द्धपुण्ड्रधरो यस्तु तुलसीमूलमृत्स्नया ॥ गोपिकाचन्दनेनापि चित्रकूटमृदापि वा॥गङ्गामृत्तिकया चैव तस्य पुण्यफलं शृणु॥२६॥ विमानवरमा
रूढो गन्धर्वाप्सरसां गणैः ॥ संगीयमानचरितो मोदते विष्णुमंदिरे ॥ २७ ॥ पत्राणि तुलसीमूलाद्यावन्ति पतितानि वै ॥ तावन्ति ब्रह्म
हत्यादिपातकानि हतानि च ॥२८॥ तुलस्यां सेचयेद्यस्तु जलं चुलुकमात्रकम् ॥ क्षीरोदवासिना सार्द्धं वसेदाचंद्रतारकम्॥२९॥ ददाति ब्राह्मणानां
यः कोमलं तुलसीदलम् ॥ स याति ब्रह्मसदने कुलत्रितयसंयुतः ॥ ३० ॥ शालग्रामेऽर्पयेद्यस्तु तुलस्यास्तु दलानि च ॥ स वसेद्विष्णुभवने
यावदाभूतसंप्लवम् ॥ ३१ ॥ कण्टकावरणं यस्तु प्राकारं वापि कारयेत् ॥ सोऽप्येकविंशतिकुलैर्मोदते विष्णुमंदिरे ॥ ३२ ॥ योऽर्च्चयेद्धरिपादा
ब्जं तुलस्याः कोमलैर्दलैः ॥ न तस्य पुनरावृत्तिर्विष्णुलोकान्नरेश्वर ॥ ३३ ॥ द्वादश्यां पौर्णमास्यां यः क्षीरेण स्नापयेद्धरिम् ॥ कुलायुतयुतः
सोऽपि मोदते वैष्णवे पदे ३४ ॥ प्रस्थमात्रेण पयसा यः स्नापयति केशवम् ॥ कुलायुतायुतयुतः सोऽपि विष्णुपुरे वसेत् ॥ ३५ ॥घृतप्रस्थेन यो
विष्णुं द्वादश्यां स्नापयेन्नरः ॥ कुलकोटियुतो राजन्सायुज्यं लभते हरेः ॥ ३६ ॥ पञ्चामृतेन यः स्नानमेकादश्यां तु कारयेत् ॥ विष्णोः सायु
ज्यकं तस्य भवेत्कुलशतायुतैः ॥ ३७॥ एकादश्यां पौर्णमास्यां द्वादश्यां वा नृपोत्तम ॥नालिकेरोदकैर्विष्णुं स्नापयेत्तत्फलं शृणु ॥ ३८॥ दशज
न्मार्जितैः पापैर्विमुक्तो नृपसत्तम ॥ शतद्वयकुलैर्युक्तो मोदते विष्णुना सह ॥ ३९ ॥ इक्षुतोयेन देवेशं यः स्नापयति भूपते ॥ केशवं लक्षपितृभिः
सार्द्धं विष्णुपदं व्रजेत् ॥ ४० ॥ पुष्पोदकेन गोविन्दं तथा गन्धोदकेन च ॥ स्नापयित्वा हरिं भक्त्या वैष्णवं पदमाप्नुयात् ॥ ४१॥ जलेन वस्त्र
पूतेन यः स्नापयति माधवम् ॥ सर्वपापविनिर्मुक्तो विष्णुना सह मोदते ॥ ४२ ॥ क्षीराद्यैः स्नापयेद्यस्तु रविसंक्रमणे हरिम्॥ स वसेद्विष्णुसदने
त्रिसप्तपुरुषैः सह॥४३॥शुक्लपक्षे चतुर्दश्यामष्टम्यां पूर्णिमादिने॥४४॥एकादश्यां भानुवारे द्वादश्यां पञ्चमीतिथौ॥सोमसूर्योपरागे च मन्वादिषुयुगा
दिषु॥४५॥अर्द्धोदये च सूर्यस्य पुष्यार्के रोहिणीबुधे॥तथैव शनिरोहिण्यां भौमाश्विन्यां तथैव च ॥४६॥ शन्यां भृगुमृगे चैव भृगुरेवतिसङ्गमे॥तथा
बुधानुराधायां श्रवणार्के तथैव च ॥४७॥ तथा च सोमश्रवणे हस्तयुक्ते बृहस्पतौ॥ बुधाष्टम्यां बुधाषाढे पुण्ये चान्ये दिने तथा ॥ ४८ ॥ स्नापये
त्पयसा विष्णुं शान्तिमान् वाग्यतः शुचिः॥घृतेन मधुना वापि दध्ना वा तत्फलं शृणु॥ ४९॥सर्वयज्ञफलं प्राप्य सर्वपापविवर्जितः॥ वसेद्विष्णुपुरे सार्द्धं

त्रिसप्तपुरुषैर्नृप ॥५०॥ तत्रैव ज्ञानमासाद्य योगिनामपि दुर्लभम् ॥ मोक्षमाप्नोति नृपते पुनरावृत्तिदुर्लभम् ॥५१॥ कृष्णपक्षे चतुर्दश्यां सोमवारे
च भूपते ॥ शिवं संस्नाप्य दुग्धेन शिवसायुज्यमाप्नुयात् ॥ ५२ ॥ नालिकेरोदकेनापि शिवं संस्नाप्य भक्तितः ॥ अष्टम्यामिन्दुवारे वा शिवसायुज्य
मश्नुते ॥ ५३ ॥ शुक्लपक्षे चतुर्दश्यामष्टम्यां वापि भूपते ॥ घृतेन मधुना स्नाप्य शिवं तत्साम्यतां व्रजेत् ॥ ५४॥तिलतैलेन संस्नाप्य विष्णुं वा शिव
मेव च ॥ स याति तत्तत्सारूप्यं पितृभिः सह सप्तभिः ॥ ५५ ॥शिवमिक्षुरसेनापि यः स्नापयति भक्तितः ॥ शिवलोके वसेत्कल्पं स सप्तपुरुषैः सह
॥ ५६ ॥ घृतेन स्नापयेल्लिङ्गमुत्थाने द्वादशीदिने ।।क्षीरेण वा महाभाग तत्फलं शृणु मद्गिरा॥५७॥जन्मायुतकृतैः पापैर्विमुक्तो मनुजो नृप॥ कोटि
संख्यं समुद्धृत्य स्वकुलं शिवतां व्रजेत् ॥ ५८ ॥ सम्पूज्य गन्धकुसुमैर्विष्णुं विष्णुतिथौ नृप ॥ जन्मायुतार्जितैः पापैर्मुक्तो व्रजति तत्पदम् ॥५९ ॥
पद्मपुष्पेण यो विष्णुं शिवं वा पूजयेन्नरः ॥ स याति विष्णुभवनं कुलकोटिसमन्वितः ॥ ६०॥ हरिं च केतकीपुष्पैः शिवं धत्तूरजैर्निशि॥ संपूज्य
पापनिर्मुक्तो वसेद्विष्णुपुरे युगम् ॥ ६१ ॥ हरिं तु चाम्पकैः पुष्पैरर्कपुष्पैश्च शंकरम् ॥ समभ्यर्च्य महाराज तत्तत्सालोक्यमाप्नुयात् ॥ ६२ ॥ शंकर
स्याथवा विष्णोर्घृतयुक्तं च गुग्गुलुम् ॥ दत्त्वा धूपे नरो भक्त्या सर्वपापैः प्रमुच्यते ॥ ६३ ॥ तिलतैलान्वितं दीपं विष्णोवा शंकरस्य वा ॥ दत्त्वा
नरः सर्वकामान्संप्राप्नोति नृपोत्तम ॥ ६४ ॥ घृतेन दीपं यो दद्याच्छंकरायाथ विष्णवे ॥ स मुक्तः सर्वपापेभ्यो गङ्गास्नानफलं लभेत् ॥ ६५ ॥
ग्राम्येन वापि तैलेन राजन्नन्येन वा पुनः ॥ दीपं दत्त्वा महाविष्णोः शिवस्यापि फलं शृणु ॥ ६६ ॥ सर्वपापविनिर्मुक्तः सर्वैश्वर्यसमन्वितः ॥
तत्तत्सालोक्यमाप्नोति त्रिःसप्तपुरुषान्वितः ॥ ६७॥ यद्यदिष्टतमं भोज्यं तत्तदीशाय विष्णवे ॥ दत्त्वा तत्तत्पदं याति चत्वारिंशत्कुलान्वितः॥६८॥
यद्यादिष्टतमं वस्तु तत्तद्विप्राय दापयेत् ॥ स याति विष्णुभवनं पुनरावृत्तिदुर्लभम् ॥६९॥भ्रूणहा स्वर्णदानेन शुद्धो भवति भूपते ॥ अन्नतोयसमं दानं
न भूतं न भविष्यति ॥७० ॥ अन्नदः प्राणदः प्रोक्तः प्राणदश्चापि सर्वदः ॥ सर्वदानफलं यस्मादन्नदस्य नृपोत्तम ॥ ७१ ॥ अन्नदो ब्रह्मसदनं याति
वंशायुतान्वितः ॥ न तस्य पुनरावृत्तिरिति शास्त्रेषु निश्चितम् ॥ ७२ ॥ सद्यस्तुष्टिकरं ज्ञेयं जलदानं यतोऽधिकम् ॥ अन्नदानान्नृपश्रेष्ठ निर्दिष्टं
ब्रह्मवादिभिः ॥ ७३ ॥ महापातकयुक्तो वा युक्तो वाप्युपपातकैः ॥ जलदो मुच्यते तेभ्य इत्याह कमलोद्भवः ॥ ७४ ॥ शरीरमन्नजं प्राहुः प्राणा
नप्यन्नजान्विदुः ॥ तस्मादन्नप्रदो ज्ञेयः प्राणदः पृथिवीपते ॥७५॥ यद्यत्तुष्टिकरं दानं सर्वकामफलप्रदम् ॥ तस्मादन्नसमं दानं नास्ति भूपाल भूतले
॥७६॥अन्नदस्य कुले जाता आसहस्रं नृपोत्तम ॥नरकं ते न पश्यन्ति तस्मादन्नप्रदो वरः॥७७॥पादाभ्यङ्गं भक्तियुक्तो योऽतिथेः कुरुते नरः॥सुस्नातः

सर्वतीर्थेषु गङ्गास्नानपुरःसरम् ॥ ७८ ॥ तैलाभ्यङ्गं महाराज ब्राह्मणानां करोति यः ॥ स स्नातोऽष्टशतं साग्र गङ्गायां नात्र संशयः ॥ ७९ ॥ रोगि
तान्ब्राह्मणान्यस्तु प्रेम्णा रक्षति रक्षकः ॥ स कोटिकुलसंयुक्तो वसेद्ब्रह्मपुरे युगम् ॥८०॥ यो रक्षेत्पृथिवीपाल रङ्कं वा रोगिणं नरम् ॥ तस्य विष्णुः
प्रसन्नात्मा सर्वान्कामान्प्रयच्छति ॥ ८१ ॥ मनसा कर्मणा वाचा यो रक्षेदामयान्वितम् ॥ सर्वान्कामानवाप्नोति सर्वपापविवर्जितः॥ ८२ ॥ यो
ददाति महीपाल निवासं ब्राह्मणाय वै॥ तस्य प्रसन्नो देवेशः स्वलोक संप्रयच्छति ॥८३ ॥ ब्राह्मणाय ब्रह्मविदे यो दद्याद्गां पयस्विनीम्। स याति
ब्रह्मसदनमन्येषामतिदुर्लभम् ॥८४॥अन्येभ्यःप्रतिगृह्यापि यो दद्याद्गां पयस्विनीम् ॥ तस्य पुण्यफलं वक्तुं नाहं शक्तोऽस्मि पण्डित॥८५॥कपिलां वेदवि
दुषे यो ददाति पयस्विनीम्॥ स एव रुद्रो भूपाल सर्वपापविवर्जितः॥८६॥विप्राय वेदविदुषे दद्यादुभयतोमुखीम्॥यस्तस्य पुण्यं संख्यातुं न शक्तोऽब्द
शतैरपि॥८७॥ तस्य पुण्यफलं राजञ्शृणु वक्ष्यामि तत्त्वतः॥ एकतः क्रतवः सर्वे समग्रवरदक्षिणाः॥८८॥ एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ॥
संरक्षति महीपाल यो विप्रं भयविह्वलम् ॥ ८९ ॥ स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः॥वस्त्रदो रुद्रभवनं कन्यादो ब्रह्मणः पदम्॥९०॥हेमदो विष्णु
भवनं प्रयाति स्वकुलान्वितः ॥ यस्तु कन्यामलंकृत्य ददात्यध्यात्मवेदिने॥९१ ॥शतवंशसमायुक्तः स व्रजेद्ब्रह्मणः पदम् ॥ कार्तिक्यां पौर्णमास्यां
वा आषाढ्यां वापि भूपते ॥९२॥वृषभं शिवतुष्ट्यथमुत्सृजेत्तत्फलं शृणु ॥ सप्तजन्मार्जितैः पापैर्विमुक्तो रुद्ररूपभाक् ॥ ९३ ॥ कुलसप्ततिसंयुक्तो
रुद्रेण सह मोदते ॥ शिवलिङ्गांकित कृत्वा महिषं यः समुत्सृजेत् ॥ ९४ ॥ न तस्य यातनालोको भवेन्नृपतिसत्तम॥ ताम्बूलदानं यः कुर्याच्छ
क्तितो नृपसत्तम ॥ ९५ ॥तस्य विष्णुः प्रसन्नात्मा ददात्यायुर्यशः श्रियम् ॥ क्षीरोदो घृतदश्चैव मधुदो दधिदस्तथा ॥ ९६ ॥ दिव्याब्दायुतपर्यंतं
स्वर्गलोके महीयते ॥ प्रयाति ब्रह्मसदनमिक्षुदाता नृपोत्तम ॥ ९७ ॥ गन्धदः पुण्यफलदः प्रयाति ब्रह्मणः पदम् ॥ गुडेक्षुरसदश्चैव प्रयाति क्षीरसाग
रम् ॥ ९८ ॥ भटानां जलदो याति सूर्यलोकमनुत्तमम् ॥ विद्यादानेन सायुज्यं माधवस्य व्रजेन्नरः ॥ ९९ ॥ विद्यादानं महीदानं गोदानं चोत्तमो
त्तमम् ॥नरकादुद्धरन्त्येव जपवाहनदोहनात्॥ १०० ॥सर्वेषामपि दनानां विद्यादानं विशिष्यते ॥ विद्यादानेन सायुज्यं विष्णोर्याति नृपोत्तम॥१॥
नरास्त्विन्धनदानेन मुच्यते ह्युपपातकैः ॥ शालग्रामशिलादानं महादानं प्रकीर्तितम् ॥ २ ॥यद्दत्त्वा मोक्षमाप्नोति लिङ्गदानं तथा स्मृतम् ॥ ब्रह्माण्ड
कोटिदानेन यत्फलं लभते नरः ॥ ३ ॥ तत्फलं समवाप्नोति लिङ्गदानान्न संशयः ॥ शालग्रामशिलादाने ततोऽपि द्विगुणं फलम् ॥ ४ ॥ शाल
ग्रामशिलारूपी विष्णुरेवेति विश्रुतः ॥यो ददाति नरो दानं गृहेषु महतां प्रभो ॥ ५ ॥ गङ्गास्नानफलं तस्य निश्चितं नृप जायते ॥ रत्नान्वितसुव

र्णस्य प्रदानेन नृपोत्तम ॥ ६ ॥ भुक्तिमुक्तिमवाप्नोति महादानं यतः स्मृतम् ॥ नरो माणिक्यदानेन परं मोक्षमवाप्नुयात् ॥ ७ ॥ ध्रुवलोकमवाप्नोति
वज्रदानेन मानवः ॥ स्वर्गं विद्रुमदानेन रुद्रलोकमवाप्नुयात् ॥ ८ ॥ प्रयाति यानदानेन मुक्तादानेन चैन्दवम् ॥ वैडूर्यदो रुद्रलोकं पुष्परागप्रदस्तथा
॥ ९ ॥ पुष्परागप्रदानेन सर्वत्र सुखमश्नुते ॥ अश्वदो ह्यश्वसांनिध्यं चिरं व्रजति भूमिप ॥ १० ॥ गजदानेन महता सर्वान्कामानवाप्नुयात् ॥ प्रयाति
यानदानेन स्वर्गं स्वर्यानमास्थितः ॥ ११ ॥ महिषीदो जयत्येव ह्यपमृत्युं न संशयः ॥ गवां तृणप्रदानेन रुद्रलोकमवाप्नुयात् ॥ १२ ॥ वारुणं
लोकमाप्नोति महीश लवणप्रदः ॥ स्वाश्रमाचारनिरताः सर्वभूतहितेरताः ॥ १३ ॥ अदाम्भिका गतासूयाः प्रयान्ति ब्रह्मणः पदम् ॥ परोपदेश
निरता वीतरागा विमत्सराः ॥ १४ ॥ हरिपादार्चनरताः प्रयान्ति सदनं हरेः ॥ सत्सङ्गाह्लादनिरताः सत्कर्मसु सदोद्यताः ॥ १५ ॥ परापवादविमुखाः
प्रयान्ति हरिमन्दिरम् ॥ नित्यं हितकरा ये तु ब्राह्मणेषु च गोषु च ॥ १६ ॥ परस्त्रीसङ्गविमुखा न पश्यन्ति यमालयम् ॥ जितेन्द्रिया जिताहारा गोषु
क्षान्ताः सुशीलिनः ॥ १७ ॥ ब्राह्मणेषु क्षमाशीलाः प्रयांति भवनं हरेः ॥ अग्निशुश्रूषकश्चैव गुरुशुश्रूषकास्तथा ॥ १८ ॥ पतिशुश्रूषणरता न वै संस
तिभागिनः ॥ सदा देवार्चनरता हरिनामपरायणाः ॥ १९ ॥ प्रतिग्रहनिवृत्ताश्च प्रयान्ति परमं पदम् ॥ अनाथं विप्रकुणपं ये दहेयुर्नृपोत्तम ॥ २० ॥
अश्वमेधसहस्राणां फलमश्नुवते सदा ॥ पत्रैः पुष्पैः फलैर्वापि जलैर्वा मनुजेश्वर ॥ २१ ॥ पूजया रहितं लिङ्गमचर्येत्तत्फलं शृणु ॥ अप्सरोगणगन्धर्वैः
स्तूयमानो विमानगः ॥ २२ ॥ प्रयाति शिवसान्निध्यमित्याह कमलोद्भवः ॥ चुलुकोदकमात्रेण लिङ्गं संस्नाप्य भूमिप ॥ २३ ॥ लक्षाश्वमेधजं पुण्यं
संप्राप्नोति न संशयः ॥ पूजया रहितं लिङ्गं कुसुमैर्योऽर्चयेत्सुधीः ॥ २४ ॥ अश्वमेधायुतफलं भवेत्तस्य जनेश्वर ॥ भक्ष्यैर्भोज्यैः फलैर्वापि शून्यं
लिङ्गं प्रपूज्य च ॥ २५ ॥ शिवसायुज्यमाप्नोति पुनरावृत्तिवर्जितम् ॥ पूजया रहितं विष्णुं योऽर्चयेदर्कवंशज ॥ २६ ॥ जलेनापि स सालोक्यं विष्णो
र्याति नरोत्तम ॥ देवतायतने यस्तु कुर्यात्संमार्जनं सुधीः ॥ २७ ॥ यावत्पांसु युगावासं वैष्णवे मन्दिरे लभेत् ॥ शीर्णं स्फटिकलिङ्गं तु यः संदध्या
न्नृपोत्तम ॥ २८ ॥ शतजन्मार्जितैः पापैर्मुच्यते स तु मानवः ॥ यस्तु देवालये राजन्नपि गोचर्ममात्रकम् ॥ २९ ॥ जलेन सिञ्चेद्भूभागं सोऽपि स्वर्गं
लभेन्नरः ॥ गन्धोदकेन यः सिञ्चेद्देवतायतने भुवम् ॥ ३० ॥ यावत्कणानुकल्पं तु तिष्ठेत देवसन्निधौ ॥ मृदा धातुविकारैर्वा यो लिम्पेद्देवतागृहम्
॥ ३१ ॥ स कोटिकुलमुद्धृत्य याति साम्यं मधुद्विषः ॥ शिलाचूर्णेन यो मर्त्यो देवागारं तु लेपयेत् ॥ ३२ ॥ स्वस्तिकादीनि वा कुर्यात्तस्य पुण्यम
नन्तकम् ॥ यः कुर्यादीपरचनां देवतायतने नृप ॥ ३३ ॥ तस्य पुण्यं प्रसंख्यातुं नोत्सहेऽब्दशतैरपि ॥ अखण्डदीपं यः कुर्याद्विष्णोर्वा शंकरस्य च ॥ ३४ ॥

क्षणे क्षणेऽश्वमेधस्य फलं तस्य न दुर्लभम् ॥ अर्चितं शंकरं दृष्ट्वा विष्णुं वापि नमेत्तु यः ॥ ३५ ॥ स विष्णुभवनं प्राप्य मोदते च युगायुतम् ॥
देव्याः प्रदक्षिणामेकां सप्त सूर्यस्य भूमिप ॥ ३६ ॥ तिस्रो विनायकस्यापि चतस्रो विष्णुमन्दिरे ॥कृत्वा तत्तद्गृहं प्राप्य मोदते युगलक्षकम् ॥ ३७ ॥
यो विष्णोर्भक्तिभावेन तथैव गोद्विजस्य च ॥प्रदक्षिणां चरेत्तस्य ह्यश्वमेधः पदे पदे ॥३८॥ काश्यां माहेश्वरं लिङ्गं सपूज्य प्रणमेत्तु यः॥ न तस्य विद्यते
कृत्य संसृतिर्नैव जायते ॥ ३९ ॥ शिवं प्रदक्षिणं कृत्वा सव्येनैव विधानतः॥ नरो न च्यवते स्वर्गाच्छंकरस्य प्रसादतः ॥ ४० ॥स्तुत्वा स्तोत्रैर्जगन्नाथं
नारायणमनामयम् ॥ सर्वान्कामानवाप्नोति मनसा यद्यदिच्छति॥४१॥ देवतायतने यस्तु भक्तियुक्तः प्रनृत्यति ॥ गायते वा स भूपाल रुद्रलोके च
मुक्तिभाक् ॥ ४२ ॥ये तु वाद्यं प्रकुर्वन्ति देवतायतने नराः ॥ ते हंसयानमारूढा व्रजन्ति ब्रह्मणः पदम् ॥४३॥ करतालं प्रकुर्वन्ति देवतायतने तु ये।
तं सर्वपापनिर्मुक्ता विमानस्था युगायुतम् ॥४४॥ देवतायतने ये तु घण्टानादं प्रकुर्वते ॥ तेषां पुण्यं निगदितुं न समर्थः शिवः स्वयम् ॥४५ ॥ भेरी
मृदङ्गपटहमुरजैश्च सडिण्डिमैः॥ संप्रीणयन्ति देवेशं तेषां पुण्यफलं शृणु॥४६॥ देवस्त्रीगणसंयुक्ताः सर्वकामैः समर्चिताः ॥स्वर्गलोकमनुप्राप्य मोदन्ते
कल्पपञ्चकम् ॥ ४७ ॥ देवतामन्दिरे कुर्वन्नरः शङ्खरवं नृप ॥ सर्वपापविनिर्मुक्तो विष्णुना सह मोदते ॥ ४८ ॥ तालकांस्यादिनिनदं कुर्वन् विष्णु
गृहे नरः ॥ सर्वपापविनिर्मुक्तो विष्णुलोकमवाप्नुयात् ॥ ४९ ॥ यो देवः सर्वदृग्विष्णुर्ज्ञानरूपी निरञ्जनः॥ सर्वधर्मफलं पूर्णं संतुष्टः प्रददाति च॥ ५० ॥
यस्य स्मरणमात्रेण देवदेवस्य चक्रिणः ॥ सफलानि भवन्त्येव सर्वकर्माणि भूपते ॥ ५१ ॥ परमात्मा जगन्नाथः सर्वकर्मफलप्रदः ॥ सत्कर्मकर्तृभि
र्नित्यं स्मृतः सर्वार्तिनाशनः ॥ तमुद्दिश्य कृतं यच्च तदानन्त्याय कल्पते ॥५२॥ धर्माणि विष्णुश्च फलानि विष्णुः कर्माणि विष्णुश्च फलानि भोक्ता ॥
कार्यं च विष्णुः करणानि विष्णुरस्मान्न किंचिद्व्यतिरिक्तमस्ति ॥ ५३ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे धर्मानुकथनं नाम त्रयोदशो
ऽध्यायः ॥ १३ ॥ धर्मराज उवाच ॥ श्रुतिस्मृत्युदितं धर्मं वर्णानामनुपूर्वशः ॥ प्रब्रवीमि नृपश्रेष्ठ तं शृणुष्व समाहितः॥ १॥ यो भुञ्जानोऽशुचिं वापि
चाण्डालं पतितं स्पृशेत् ॥ क्रोधादज्ञानतो वापि तस्य वक्ष्यामि निष्कृतिम् ॥ २ ॥ त्रिरात्रं वाथ षड्रात्रं यथासंख्यं समाचरेत् ॥ स्नानं त्रिषवणं विप्र
पञ्चगव्येन शुध्यति ॥ ३ ॥ भुञ्जानस्य तु विप्रस्य कदाचित्स्रवते गुदम् ॥उच्छिष्टत्वेऽशुचित्वे च तस्य शुद्धिं वदामि ते ॥४॥पूर्वं कृत्वा द्विजः शौचं
पश्चादप उपस्पृशेत् ॥ अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति॥५॥ निगिरन्यदि मेहेत भुक्त्वा वा मेहने कृते॥अहोरात्रोषितो भूत्वा जुहुयात्सर्पिषाऽ
नलम् ॥ ६ ॥ यदा भोजनकाले स्यादशुचिर्ब्राह्मणः क्वचित्॥भूमौ निधाय तं ग्रासं स्नात्वा शुद्धिमवाप्नुयात् ॥ ७॥ भक्षयित्वा तु तद् ग्रासमुपवासेन

शुद्धयति ॥ अशित्वा चैव तत्सर्वं त्रिरात्रमशुचिर्भवेत् ॥८॥ अश्नतश्चेद्वमिः स्याद्वै ह्यस्वस्थस्त्रिशतं जपेत् ॥ स्वस्थस्त्रीणि सहस्राणि गायत्र्याः
शोधनं परम् ॥ ९ ॥ चाण्डालैः श्वपचैः स्पृष्टो विण्मूत्रे च कृते द्विजः ॥ १० ॥ त्रिरात्रं तु प्रकुर्वीत भुक्तोच्छिष्टः षडाचरेत् ॥ उदक्यां सूतिकां
वापि संस्पृशेदन्त्यजो यदि॥ ११ ॥ त्रिरात्रेण विशुद्धिः स्यादिति शातातपोऽब्रवीत् ॥ रजस्वला तु संस्पृष्टा श्वभिर्मातङ्गवायसैः ॥ १२ ॥
निराहारा शुचिस्तिष्ठेत्काले स्नानेन शुद्धयति ॥ रजस्वले यदा नार्यावन्योन्यं स्पृशतः क्वचित् ॥ १३ ॥ शुध्यंते ब्रह्मकूर्चेन ब्रह्मकूर्चेन चोपरि ॥
उच्छिष्टेन च संस्पृष्टो यो न स्नानं समाचरेत् ॥ १४ ॥ ऋतौ तु गर्भं शङ्कित्वा स्नानं मैथुनिनः स्मृतम् ॥ अनृतौ तु स्त्रियं गत्वा शौचं
मूत्रपुरीषवत् ॥ १५ ॥ उभावप्यशुची स्यातां दम्पती याभसंगतौ ॥ शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान् ॥ १६ ॥ भर्त्तुः शरी
रशुश्रूषां दौरात्म्यादप्रकुर्वती ॥ दण्ड्या द्वादशकं नारी वर्षं त्याज्या धनं विना॥ १७ ॥त्यजन्तो पतितान्बन्धून्दण्ड्यानुत्तमसाहसम् ॥ पिता हि
पतितः कामं न तु माता कदाचन ॥ १८ ॥ आत्मानं घातयेद्यस्तु रज्ज्वादिभिरुपक्रमैः ॥ मृते मेध्येन लेप्तव्यो जीवतो द्विशतं दमः ॥ १९ ॥
दण्ड्यास्तत्पुत्रमित्राणि प्रत्येकं पाणिकं दमम् ॥ प्रायश्चित्तं ततः कुर्युर्यथाशास्त्रप्रचोदितम् ॥ २० ॥ जलाग्न्युद्बन्धनभ्रष्टाः प्रव्रज्यानाशकच्युताः
॥ विषप्रपतनध्वस्ताः शस्त्रघातहताश्च ये ॥ २१ ॥ न चैतें प्रवत्यवसिताः सर्वलोकबहिष्कृताः ॥ चान्द्रायणेन शुद्धयन्ति तप्तकृच्छ्रद्वयेन वा
॥ २२ ॥ उभयावसितः पापश्यामच्छबलकाच्युतः ॥ चान्द्रायणाभ्यां शुद्धयेत दत्त्वा धेनुं तथा वृषम् ॥ २३ ॥ श्वशृगालप्लवङ्गाद्यैर्मानुषैश्च रतिं
विना॥ स्पृष्टः स्नात्वा शुचिः सद्यो दिवा संध्यासु रात्रिषु॥२४॥ अज्ञानाद्वा तु यो भुक्त्वा चाण्डालान्नं कथंचन॥ गोमूत्रयावकाहारो मासार्द्धेन विशु
द्धयति ॥ २५ ॥गोब्राह्मणगृहं दग्ध्वा मृतं चोद्बन्धनादिना ॥ पाशं छित्वा तथा तस्य कृच्छ्रमेकं चरेद्द्विजः ॥ २६॥ चाण्डालपुल्कसानां च भुक्त्वा
हत्वा च योषितम् ॥ कृच्छ्रार्द्धमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम्॥ २७ ॥कोपालिकान्नभोक्तॄणां तन्नारीगामिनां तथा ॥ अगम्यागमने विप्रो मद्यगो
मांसभक्षणे ॥ २८ ॥ तप्तकृच्छ्रपरिक्षिप्तो मौर्वीहोमेन शुद्धयति ॥ महापातककर्त्तारश्चत्वारोऽथ विशेषतः ॥२९॥ अग्निं प्रविश्य शुद्धयन्ति स्थित्वा वा
महति क्रतौ ॥रहस्यकरणोऽप्येवं मासमभ्यस्य पूरुषः ॥३०॥ अघमर्षणसूक्तं वा शुद्धयेदन्तर्जले जपन् ॥रजकश्चर्मकारश्च नटो बुरुड एव च ॥३१॥
कैवर्त्तमेदभिल्लाश्च सप्तैते ह्यन्त्यजाः स्मृताः॥भुक्त्वा चैषां स्त्रियो गत्वा पीत्वा यःप्रतिगृह्णते ॥३२॥ कृच्छ्रार्द्धमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम् ॥ मातरं
गुरुपत्नीं च दुहितृभगिनीस्नुषाः॥३३॥संगम्य प्रविशेदग्निं नान्या शुद्धिर्विधीयते ॥राज्ञीं प्रव्रजितां धात्रीं तथा वर्णोत्तमामपि॥ ३४ ॥ गत्वा कृच्छ्रद्वयं

कुर्यात्सगोत्रामभिगम्य च॥ अमूषु पितृगोत्रासु मातृगोत्रगतासु च॥३५॥परदारेषु सर्वेषु कृच्छ्रार्द्धं तपनं चरेत्॥वेश्याभिगमने पापं व्यपोहन्ति द्विजा
स्तथा॥३६॥पीत्वा सक्तुसुतप्तं च पञ्चरात्रं कुशोदकम्॥गुरुतल्पगता कुर्याद्ब्राह्मणो विधिवद्व्रतम्॥३७॥गोघ्नस्य केचिदिच्छन्ति केचिच्चैवावकीर्णिनः॥
दण्डादूर्ध्वं प्रहारेण यस्तु गां विनिपातयेत् ॥ ३८ ॥ द्विगुणं गोव्रतं तस्य प्रायश्चितं विशोधयेत् ॥ अङ्गुष्ठमात्रस्थूलस्तु बाहुमात्रप्रमाणकः ॥ ३९ ॥
सार्द्रकस्सपलाशश्च गोदण्डः परिकीर्त्तितः॥ गवां निपातने चैव गर्भोऽपि संभवेद्यदि॥४०॥एकैकशश्चरेत्कृच्छ्रं एषा गोघ्नस्य निष्कृतिः॥बन्धने रोधने
चैव पोषणे वा गवां रुजाम्॥४१॥ संपद्यते चेन्मरणं निमित्तेनैव लिप्यते ॥मूर्च्छितः पतितो वापि दण्डेनाभिहतस्ततः ॥ ४२ ॥उत्थाय षट्पदं गच्छे
त्सप्त पञ्च दशापि वा॥ग्रासं वा यदि गृह्णीयात्तोयं वापि पिबेद्यदि॥४३॥सर्वव्याधिप्रनष्टानां प्रायश्चित्तं न विद्यते॥काष्ठलोष्टाश्मभिर्गावः शस्त्रैर्वा निहता
यदि॥४४॥प्रायश्चित्तं स्मृतं तत्र शस्त्रे शस्त्रे निगद्यते॥काष्ठे सान्तपनं प्रोक्तं प्राजापत्यं तु लोष्टके॥४५॥तप्तकृच्छ्रं तु पाषाणे शस्त्रे चाप्यतिकृच्छ्रकम्॥
औषधं स्नेहमाहारं दद्याद्गोब्राह्मणेषु च ॥ ४६ ॥ दीयमाने विपत्तिः स्यात्प्रायश्चित्तं तदा नहि ॥ तैलभेषजपाने च भेषजानां च भक्षणे ॥ ४७ ॥
निशल्यकरणे चैव प्रायश्चित्तं न विद्यते॥ वत्सानां कण्ठबन्धेन क्रियया भेषजेन तु॥४८॥ सायं संगोपनार्थं च त्वदोषो रोषबन्धयोः॥पादे चैवास्य
रोमाणि द्विपादे श्मश्रु केवलम् ॥ ४९ ॥ त्रिपादे तु शिखावर्तं मूले सर्वं समाचरेत् ॥ सर्वान्केशान्समुद्धृत्य छेदयेदङ्गुलद्वयम् ॥ ५० ॥ एवमेव तु
नारीणां मुण्डनं शिरसः स्मृतम् ॥ न स्त्रिया वपनं कार्यं न च वीरासनं स्मृतम् ॥ ५१ ॥ न च गोष्ठे निवासोऽस्ति न गच्छन्तीमनुव्रजेत् ॥राजा वा
राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः ॥ ५२ ॥ अकृत्वा वपनं तेषां प्रायश्चित्तं विनिर्दिशेत् ॥ केशानां रक्षणार्थं च द्विगुणं व्रतमादिशेत् ॥५३ ॥
द्विगुणे तु व्रते चीर्णे द्विगुणा व्रतदक्षिणा ॥ ५४ ॥ पापं न क्षीयते हन्तुर्दाता च नरकं व्रजेत् ॥ अश्रौतस्मार्तविहितं प्रायश्चित्तं
वदन्ति ये ॥ ५५ ॥ तान्धर्मविघ्नकर्तॄंश्च राजा दण्डेन पीडयेत् ॥ न चैतान्पीडयेद्राजा कथंचित्काममोहितः ॥ ५६ ॥ तत्पापं शतधा
भूत्वा तमेव परिसर्पति ॥ प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ॥ ५७ ॥ विंशतिर्गा वृषं चैकं दद्यात्तेषां च दक्षिणाम् ॥ क्रिमिभिस्तृण
संभूतैर्मक्षिकादिनिपातितैः ॥ ५८ ॥ कृच्छ्रार्द्धं स प्रकुर्वीत शक्त्या दद्याच्च दक्षिणाम् ॥ प्रायश्चित्तं च कृत्वा वै भोजयित्वा द्विजोत्तमान् ॥ ५९ ॥
सुवर्णमानिकं दद्यात्ततः शुद्धिर्विधीयते ॥ चाण्डालश्वपचैः स्पृष्टे निशि स्नानं विधीयते ॥ ६०॥ न वसेत्तत्र रात्रौ तु सद्यः स्नानेन शुद्ध्यति ॥वसेदथ
यदा रात्रावज्ञानादविचक्षणः ॥ ६१ ॥ तदा तस्य तु तत्पापं शतधा परिवर्त्तते ॥ उद्गच्छन्ति च नक्षत्राण्युपरिष्टाच्च ये ग्रहाः॥६२॥संस्पृष्टे रश्मिभि

स्तेषामुदकस्नानमाचरेत् ॥ याश्चान्तर्जलवल्मीकमूषिकोपरवर्त्मसु ॥६३ ॥ श्मशाने शौचशेषे च न ग्राह्याः सप्त मृत्तिकाः ॥ इष्टापूर्तं तु कर्त्तव्यं ब्राह्मणेन
प्रयत्नतः ॥ ६४ ॥ इष्टेन लभते स्वर्गं मोक्षं पूर्त्तेन चाप्नुयात् ॥ वित्तक्षेपो भवेदिष्टं तडागं पूर्त्तमुच्यते ॥ ६५ ॥ आरामश्च विशेषेण देवद्रोण्यस्तथैव च ॥
वापीकूपतडागानि देवतायतनानि च ॥ ६६ ॥ पतितान्युद्धरेद्यस्तु स पूर्वफलमश्नुते ॥ शुक्लाया आहरेन्मूत्रं कृष्णाया गोः शकृत्तथा ॥ ६७ ॥
ताम्रायाश्च पयो ग्राह्यं श्वेतायाश्च दधि स्मृतम् ॥ कपिलाया घृतं ग्राह्यं महापातकनाशनम् ॥ ६८ ॥ कुशैस्तीर्थनदीतोयैः सर्वद्रव्यं पृथक् पृथक् ॥
आहृत्य प्रणवेनैव उत्थाप्य प्रणवेन च ॥ ६९ ॥ प्रणवेन समालोड्य प्रणवेनैव संपिबेत् ॥ पालाशे मध्यमे पण भाण्डे ताम्रमये शुभे
॥ ७० ॥ पिबेत्पुष्करपर्णे वा मृन्मये वा कुशोदकम् ॥ सूतके तु समुत्पन्ने द्वितीये समुपस्थिते ॥ ७१ ॥ द्वितीये नास्ति दोषस्तु प्रथमेनैव
शुध्यति ॥ जातेन शुध्यते जातं मृतेन मृतकं तथा ॥ ७२ ॥ गर्भसंस्रवणे मासे त्रीण्यहानि विनिर्दिशेत् ॥ ७३ ॥ रात्रिभिर्मासतुल्याभिर्गर्भस्रावे
विशुद्ध्यति ॥ रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला ॥ ७४ ॥ स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे ॥ स्वामिगोत्रेण कर्त्तव्यास्तस्याः पिण्डोदक
क्रियाः ॥ ७५ ॥ उद्देश्यं पिण्डदाने स्यात्पिण्डे पिण्डे द्विनामतः ॥ षण्णां देयास्त्रयः पिण्डा एवं दाता न मुह्यति ॥ ७६ ॥ स्वेन भर्त्रा सहस्राव्दं माता भुक्ता
सुदैवतम् ॥ पितामह्यपि स्वेनैव स्वेनैव प्रपितामही ॥ ७७ ॥ वर्षे वर्षे तु कुर्वीत मातापित्रोस्तु सत्कृतिम् ॥ अदैवं भोजयेच्छ्राद्धं पिण्डमेकं तु
निर्वपेत् ॥ ७८ ॥ नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धमथापरम् ॥ पार्वणं चेति विज्ञेयं श्राद्धं पञ्चविधं बुधैः ॥ ७९ ॥ ग्रहोपरागे संक्रान्तौ पर्वोत्स
वमहालये ॥ निर्वपेत्त्रीन्नरः पिण्डानेकमेव मृतेऽहनि ॥ ८० ॥ अनूढा न पृथक्कन्या पिण्डे गोत्रे च सूतके ॥ पाणिग्रहणमन्त्राभ्यां स्वगोत्राद्भ्रश्यते ततः
॥ ८१ ॥ येन येन तु वर्णेन या कन्या परिणीयते ॥ तत्समं सूतकं याति तथा पिण्डोदकेऽपि च ॥ ८२ ॥ विवाहे चैव संवृत्ते चतुर्थेऽहनि रात्रिषु ॥ एकत्वं
सा व्रजेद्भर्तुः पिण्डे गोत्रे च सूतके ॥ ८३ ॥ प्रथमेऽह्नि द्वितीये वा तृतीये वा चतुर्थके ॥ अस्थिसंचयनं कार्यं बन्धुभिर्हितबुद्धिभिः ॥ ८४ ॥
चतुर्थे पञ्चमे चैव सप्तमे नवमे तथा ॥ अस्थिसंचयनं प्रोक्तं वर्णानामनुपूर्वशः ॥ ८५ ॥ एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः ॥ मुच्यते प्रेत
लोकात्स स्वर्गलोके महीयते ॥ ८६ ॥ नाभिमात्रे जले स्थित्वा हृदयेन तु चिन्तयेत् ॥ आगच्छन्तु मे पितरो गृह्णन्त्वेताञ्जलाञ्जलीन् ॥ ८७ ॥ हस्तौ
कृत्वा तु संयुक्तौ पूरयित्वा जलेन च ॥ गोशृङ्गमात्रमुद्धृत्य जलमध्ये विनिःक्षिपेत् ॥ ८८ ॥ आकाशे च क्षिपेद्वारि वारिस्थो दक्षिणामुखः ॥ पितॄणां
स्थानमाकाशं दक्षिणादिक् तथैव च ॥ ८९ ॥ आपो देवगणाः प्रोक्ता आपः पितृगणास्तथा ॥ तस्मादस्य जलं देयं पितॄणां हितमिच्छता ॥ ९० ॥

दिवासूर्यांशुसंतप्तं रात्रौ नक्षत्रमारुतैः॥मध्ययोरप्युभाभ्यां च पवित्रं सर्वदा जलम्॥९१॥स्वभावयुक्तमव्यक्तममेध्येन सदा शुचिः ॥ भाण्डस्थं धरणी
स्थं वा पवित्रं सर्वदा जलम् ॥९२॥देवतानां पितॄणां च जलं दद्याज्जलाञ्जलीन् ॥ असंस्कृतप्रमीतानां स्थले दद्याद्विचक्षणः॥९३॥ श्राद्धे हवनकाले
च दद्यादेकेन पाणिना॥उभाभ्यां तर्पणे दद्यादेष धर्मो व्यवस्थितः॥९४॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे धर्मशान्तिनिर्देशो नाम चतुर्दशो
ऽध्यायः॥१४॥धर्मराज उवाच ॥पापभेदान्प्रवक्ष्यामि यथा स्थूलाश्च यातनाः॥ शृणुष्व धैर्यमास्थाय रौद्रा ये नरका यतः॥१॥पापिनो ये दुरात्मानो
नरकाग्निषु सन्ततम्॥पच्यन्ते येषु तान्वक्ष्ये भयंकरफलप्रदान्॥२॥तपनोवालुकाकुम्भौमहारौरवरौरवौ॥कुम्भीपाको निरुच्छ्वासःकालसूत्रःप्रमर्दनः ॥३॥
असिपत्रवनं घोरं लालाभक्षो हिमोत्कटः॥मूषावस्था वसाकूपस्तथा वैतरणी नदी॥४॥भक्ष्यन्ते मूत्रपानं च पुरीषह्रद एव च॥तप्तशूलं तप्तशिला शाल्म
लीद्रुम एव च ॥५॥ तथा शोणितकूपश्च घोरः शोणितभोजनः ॥ स्वमांसभोजनं चैव वह्निज्वालानिवेशनम्॥६॥ शिलावृष्टिः शस्त्रवृष्टिर्वह्निवृष्टिस्त
थैव च ॥क्षारोदकं चोष्णतोयं तप्तायःपिण्डभक्षणम्॥७॥अथ शिरःशोषणं च मरुत्प्रपतनं तथा॥तथा पाषाणवर्षं च कृमिभोजनमेव च ॥८॥ क्षारो
दपानं भ्रमणं तथा क्रकचदारणम् ॥पुरीषलेपनं चैव पुरीषस्य च भोजनम्॥९॥ रेतःपानं महाघोरं सर्वसन्धिषु दाहनम्॥ धूमपानं पाशबन्धं नाना
शूलानुलेपनम्॥१०॥अङ्गारशयनं चैव तथा मुसलमर्दनम्॥बहूनि काष्ठयन्त्राणि कषणं छेदनं तथा ॥११॥पतनोत्पतनं चैव गदादण्डादिपीडनम्॥
गजदन्तप्रहरणं नानासर्पैश्च दंशनम्॥१२॥शीताम्बुसेचनं चैव नासायां च मुखे तथा॥घोरक्षाराम्बुपानं च तथा लवणभक्षणम्॥१३॥ स्नायुच्छेदं स्नायु
बन्धमस्थिच्छेदं तथैव च ॥क्षाराम्बुपूर्णरन्ध्राणां प्रवेशं मांसभोजनम्॥१४॥पित्तपानं महाघोरं तथैवःश्लेष्मभोजनम्॥वृक्षाग्रात्पातनं चैव जलान्तर्मज्जनं
तथा ॥ १५ ॥ पाषाणधारणं चैव शयनं कण्टकोपरि ॥ पिपीलिकादंशनं च वृश्चिकैश्चापि पीडनम् ॥ १६ ॥ व्याघ्रपीडा शिवापीडा तथा
महिषपीडनम् ॥ कर्दमे शयनं जैव दुर्गन्धपरिपूरणम् ॥१७॥बहुशश्चार्धशयनं महातिक्तनिषेवणम्॥ अत्युष्णतैलपानं च महाकटुनिषेवणम्॥१८॥
कषायोदकपानं च तप्तपाषाणतक्षणम् ॥ अत्युष्णशीतस्नानं च तथा दशनशीर्णनम् ॥१९॥ तप्तायःशयनं चैव ह्ययोभारस्य बन्धनम् ॥ एवमाद्या
महाभाग यातनाः कोटिकोटिशः ॥ २० ॥ अपि वर्षसहस्रेण नाहं निगदितुं क्षमः ॥ एतेषु यस्य यत्प्राप्तं पापिनः क्षितिरक्षक ॥ २१ ॥ तत्सर्वं
संप्रवक्ष्यामि तन्मे निगदतः शृणु ॥ ब्रह्महा च सुरापी च स्तेयी च गुरुतल्पगः ॥ २२ ॥ महापातकिनस्त्वेते तत्संसर्गी च पञ्चमः ॥ पंक्तिभेदी
वृथापाकी नित्यं ब्राह्मणदूषकः ॥ २३ ॥ आदेशी वेदविक्रेता पञ्चैते ब्रह्मघातकाः ॥ ब्राह्मणं यः समाहूय दास्यामीति धनादिकम् ॥ पश्चान्ना

स्तौति यो ब्रूयात्तमाहुर्ब्रह्मघातिनम्॥२४ ॥स्नानार्थं पूजनार्थं वा गच्छतो ब्राह्मणस्य यः ॥ समायात्यंतरायत्वं तमाहुर्ब्रह्मघातिनम्॥२५॥ परनिन्दासु
निरतश्चात्मोत्कर्षरतश्च यः॥ असत्यनिरतश्चैव ब्रह्महा परिकीर्तितः ॥२६ ॥ अधर्मस्यानुमन्ता च ब्रह्महा परिकीर्तितः ॥ अन्योद्वेगरतश्चैव अन्येषां
दोषसूचकः॥२७॥दम्भाचाररतश्चैव ब्रह्महेत्यभिधीयते॥नित्यं प्रतिग्रहरतस्तथा प्राणिवधे रतः॥२८ ॥अधर्मस्यानुमन्ता च ब्रह्महा परिकीर्तितः॥ब्रह्महत्या
समं पापमेवं बहुविधं नृप ॥२९॥ सुरापानसमं पापं प्रवक्ष्यामि समासतः ॥ गणान्नभोजनं चैव गणिकानां निषेवणम् ॥३० ॥ पतितान्नादनं चैव सुरा
पानसमं स्मृतम् ॥ उपासनापरित्यागो देवलानां च भोजनम् ॥३१॥ सुरापयोषित्संयोगः सुरापानसमः स्मृतः ॥ यः शूद्रेण समाहूतो भोजनं कुरुते
द्विजः ॥ ३२ ॥ सुरापी स हि विज्ञेयः सर्वधर्मबहिष्कृतः ॥ यः शूद्रेणाभ्यनुज्ञातः प्रेष्यकर्म करोति च ॥ ३४ ॥ सुरापान
समं पापं लभते स नराधमः ॥ एवं बहुविधं पापं सुरापानसमं स्मृतम् ॥३४॥ हेमस्तेयसमं पापं प्रवक्ष्यामि निशामय ॥ कन्दमूलफलानां च कस्तूरी
पटवाससाम् ॥३५॥ सदा स्तेयं च रत्नानां स्वर्णस्तेयसमं स्मृतम्॥ ताम्रायस्त्रपुकांस्यानामाज्यस्य मधुनस्तथा ॥३६॥ स्तेयं सुगन्धद्रव्याणां स्वर्ण
स्तेयसमं स्मृतम्॥ क्रमुकस्यापि हरणमम्भसां चन्दनस्य च ॥३७॥ पर्णरसापहरणं स्वर्णस्तेयसमं स्मृतम् ॥ पितृयज्ञपरित्यागो धर्मकार्यविलोपनम्
॥३८॥ यतीनां निन्दनं चैव स्वर्णस्तेयसमं स्मृतम् ॥ भक्ष्याणां चापहरणं धान्यानां हरणं तथा ॥३९॥ रुद्राक्षहरणं चैव स्वर्णस्तेयसमं स्मृतम्॥
भागिनीगमनं चैव पुत्रस्त्रीगमनं तथा ॥४०॥रजस्वलादिगमनं गुरुतल्पसमं स्मृतम् ॥ हीनजात्याभिगमनं मद्यपस्त्रीनिषेवणम् ॥॥४१॥ परस्त्रीगमनं
चैव गुरुतल्पसमं स्मृतम् ॥ भ्रातृस्त्रीगमनं चैव वयस्यस्त्रीनिषेवणम् ॥४२॥ विश्वस्तागमनं चैव गुरुतल्पसमं स्मृतम्॥अकाले कर्मकरणं पुत्रीगमन
मेव च ॥४३॥ धर्मलोपः शास्त्रनिन्दा गुरुतल्पसमं स्मृतम्॥ इत्येवमादयो राजन्महापातकसंज्ञिताः॥४४॥एतेष्वेकतमेनापि सङ्गकृत्तत्समो भवेत्॥
यथाकथंचित्पापानामेतेषां परमर्षिभिः॥४५ ॥ शान्तैस्तु निष्कृतिर्दृष्टा प्रायश्चित्तादिकल्पनैः ॥ प्रायश्चित्तविहीनानि पापानि शृणु भूपते ॥४६॥
समस्तपापतुल्यानि महानरकदानि च ॥ ब्रह्महत्यादिपापानां कथंचिन्निष्कृतिर्भवेत् ॥ ४७ ॥ ब्राह्मणं द्वेष्टि यस्तस्य निष्कृतिर्नास्ति कुत्रचित् ॥
विश्वस्तघातिनं चैव कृतघ्नानां नरेश्वर ॥४८॥ शूद्रस्त्रीसङ्गिनां चैव निष्कृतिर्नास्ति कुत्रचित् ॥ शूद्रान्नपुष्टदेहानां वेदनिन्दारतात्मनाम् ॥४९ ॥
सत्कथानिन्दकानांच नेहामुत्रचनिष्कृतिः।५०।बौद्धालयं विशेद्यस्तु महापद्यपि वै द्विजः।न तस्य निष्कृतिर्दृष्टा प्रायश्चित्तशतैरपि॥५१॥ बौद्धाःपाषण्डिनः

प्रोक्ता यतो वेदविनिन्दकाः॥तस्माद्द्विजस्तान्नेक्षेत यतो धर्मबहिष्कृताः॥५२॥ ज्ञानतोऽज्ञानतो वापि द्विजो बौद्धालयं विशेत्॥ज्ञात्वा चेन्निष्कृतिर्नास्ति
शास्त्राणामिति निश्चयः ॥ ५३ ॥ एतेषां पापबाहुल्यान्नरकं कोटिकल्पकम् ॥ प्रायश्चित्तविहीनानि प्रोक्तान्यन्यानि च प्रभो ॥५४॥ पापानि तेषां
नरकान्गदतो मे निशामय ॥५५॥महापातकिनस्तेषु प्रत्येकं युगवासिनः ॥तदन्ते पृथिवीमेत्य सप्तजन्मसु गर्दभाः ॥ ५६ ॥ ततः श्वानो विद्धदेहा
भवेयुर्दशजन्मसु ॥ आशताब्दं विट्कृमयः सर्पा द्वादशजन्मसु ॥ ५७ ॥ ततः सहस्रजन्मानि मृगाद्याः पशवो नृप ॥शताब्दं स्थावराश्चैव ततो
गोधाशरीरिणः ॥५८ ॥ ततस्तु सप्तजन्मानि चण्डालाः पापकारिणः॥ततः षोडश जन्मानि शूद्राद्या हीनजातयः ॥५९॥ततस्तु जन्मद्वितये दरिद्रा
व्याधिपीडिताः ॥ प्रतिग्रहपरा नित्यं ततो निरयगाः पुनः॥६०॥ असूयाविष्टमनसो रौरवे नरके स्मृतम्॥तत्र कल्पद्वयं स्थित्वा चाण्डालाः शतजन्मसु
॥ ६१॥ मा ददस्वेति यो ब्रूयाद्गवाग्निब्राह्मणेषु च ॥शुनां योनिशतं गत्वा चाण्डालेषूपजायते ॥६२॥ ततो विष्ठाकृमिश्चैव ततो व्याघ्रस्त्रिजन्मसु ॥
तदंते नरकं याति युगानामेकविंशतिम्॥६३॥परनिन्दापरा ये च ये च निष्ठुरभाषिणः॥ दानानां विघ्नकर्त्तारस्तेषां पापफलं शृणु ॥६४॥ मुशलोलू
खलाभ्यां तु चूर्ण्यन्ते तस्करा भृशम् ॥ तदन्ते तप्तपाषाणग्रहणं वत्सरत्रयम् ॥ ६५ ॥ ततश्च कालसूत्रेण भिद्यन्ते सप्त वत्सरान् ॥ शोचन्तः स्वानि
कर्माणि परद्रव्यापहारकाः ॥ ६६॥ कर्मणा तत्र पच्यन्ते नरकाग्निषु सन्ततम्॥६७॥ परस्वसूचकानां च नरकं शृणु दारुणम्॥यावद्युगसहस्रं तु तप्तायः
पिण्डभक्षणम् ॥६८॥ संपीड्यते च रसना संदंशैर्भृशदारुणैः ॥ निरुच्छ्वासं महाघोरे कल्पार्द्धं निवसन्ति ते ॥६९॥ परस्त्रीलोलुपानां च नरकं कथयामि
ते ॥ तप्तताम्रस्त्रियस्तेन सुरूपाभरणैर्युताः ॥७०॥ यादृशीस्तादृशीस्ताश्च रमन्ते प्रसभं बहु ॥ विद्रवन्तं भयेनासां गृह्णन्ति प्रसभं च तम् ॥७१॥ कथ
यन्तश्च तत्कर्म नयन्ते नरकान्क्रमात् ॥ अन्यं भजन्ते भूपाल पतिं त्यक्त्वा च याः स्त्रियः ॥ ७२ ॥ तप्तायःपुरुषास्तास्तु तप्तायःशयने बलात् ॥ पात
यित्वा रमन्ते च बहुकालं बलान्विताः ॥७३॥ ततस्तैर्योषितो मुक्ता हुताशनसमोज्ज्वलम् ॥अ यःस्तम्भं समाश्लिष्य तिष्ठन्त्यब्दसहस्रकम् ॥ ७४ ॥
ततः क्षारोदकस्नानं क्षारोदकनिषेवणम् ॥ तदन्ते नरकान् सर्वान् भुञ्जतेऽब्दशतं शतम् ॥ ७५ ॥ यो हन्ति ब्राह्मणं गां च क्षत्रियं च नृपोत्तमम् ॥ स
चापि यातनाः सर्वा भुंक्ते कल्पेषु पञ्चसु ॥ ७६ ॥ यः शृणोति महन्निन्दां सादरं तत्फलं शृणु ॥ तेषां कर्णेषु दाप्यन्ते तप्तायःकीलसंचयाः ॥ ७७ ॥
ततश्च तेषु छिद्रेषु तैलमत्युष्णमुल्बणम् ॥ पूर्यते च ततश्चापि कुम्भीपाकं प्रपद्यते ॥ ७८ ॥ नास्तिकानां प्रवक्ष्यामि विमुखानां हरे हरौ ॥ अब्दानां
कोटिपर्यन्तं लवणं भुञ्जते हि ते ॥ ७९ ॥ ततश्च कल्पपर्यन्तं रौरवे तप्तसैकते ॥ भज्यंते पापकर्माणोऽन्येष्वप्येवं नराधिप ॥ ८० ॥ ब्राह्मणान्ये निरी

क्षन्ते कोपदृष्ट्या नराधमाः ॥ तप्तसूचीसहस्रेण चक्षुस्तेषां प्रसूर्यते ॥ ८१॥ ततः क्षाराम्बुधाराभिः सेच्यन्ते नृपसत्तम ॥ ततश्च क्रकचैर्घोरैर्भिद्यन्ते
पापकर्म्मणः ॥ ८२ ॥ विश्वासघातिनां चैव मर्यादाभेदिनां तथा ॥ परान्नलोलुपानां च नरकं शृणु दारुणम् ॥ ८३ ॥ स्वमांसभोजिनो नित्यं
भक्षमाणाः श्वभिस्तु ते ॥ नरकेषु समस्तेषु प्रत्येकं ह्यब्दवासिनः ॥८४॥ प्रतिग्रहरता ये च ये वै नक्षत्रपाठकाः ॥ ये च देवलकान्नानां भोजिनस्ता
ञ्शृणुष्व मे ॥८५॥ राजन्नाकल्पपर्यन्तं यातनास्वासु दुःखिताः ॥ पच्यन्ते सततं पापाविष्टा भोगरताः सदा॥८६॥ततस्तैलेन पूर्यन्ते कालसूत्रप्रपी
डिताः॥ततः क्षारोदकस्नानं मूत्रविष्ठानिषेवणम् ॥८७॥ तदन्ते भुवमासाद्य भवन्ति म्लेच्छजातयः॥अन्योद्वेगरता ये तु यान्ति वैतरणीं नदीम्॥८८॥
त्यक्तपञ्चमहायज्ञा लालाभक्षं व्रजन्ति हि ॥ उपासनापरित्यागी रौरवं नरकं व्रजेत् ॥ ८९ ॥ विप्रग्रामकरादानं कुर्वतां शृणु भूपते ॥ यातनास्वासु
पच्यन्ते यावदाचन्द्रतारकम्॥९०॥ग्रामेषु भूपालवरो यः कुर्यादधिकं करम्॥स सहस्रकुलो भुङ्क्ते नरकं कल्पपञ्चसु॥९१॥विप्रग्रामकरादाने योऽनुमन्ता तु
पापकृत् ॥ स एव कृतवान् राजन्ब्रह्महत्यासहस्रकम् ॥९२॥ कालसूत्रे महाघोरे स वसेद्द्विचतुर्युगम्॥अयोनौ च वियोनौ च पशुयोनौ च यो नरः
॥९३॥त्यजेद्रेतो महापापी स रेतोभोजनं लभेत्॥वसाकूपं ततः प्राप्य स्थित्वा दिव्याब्दसप्तकम्॥९४॥रेतोभोजी भवेन्मर्त्यः सर्वलोकेषु निन्दितः॥
उपवासदिने राजन्दन्तधावनकृन्नरः॥९५॥स घोरं नरकं याति व्याघ्रपक्षं चतुर्युगम् ॥यः स्वकर्मपरित्यागी पाषण्डीत्युच्चते बुधैः॥९६॥तत्संगकृतमोघः
स्यात्तावुभावतिपापिनौ ॥ कल्पकोटिसहस्रेषु प्राप्नुतो नरकान्क्रमात् ॥ ९७॥ देवद्रव्यापहर्त्तारो गुरुद्रव्यापहारकाः ॥ ब्रह्महत्याव्रतसमं दुष्कृतं भुञ्जते
नृप ॥ ९८ ॥ अनाथधनहर्त्तारो ह्यनाथं ये द्विषन्ति च ॥ कल्पकोटिसहस्राणि नरके ते वसन्ति च ॥ ९९ ॥ स्त्रीशूद्राणां समीपे तु ये वेदाध्ययने
रताः ॥ तेषां पापफलं वक्ष्ये शृणुष्व सुसमाहितः ॥ १०० ॥ अधःशीर्षोर्ध्वपादाश्च कीलिताः स्तम्भकद्वये ॥ धूम्रपानरता नित्यं तिष्ठन्त्याब्रह्मवत्स
रम्॥ १ ॥जले देवालये वापि यस्त्यजेद्देहजं मलम्॥भ्रूणहत्यासमं पापं संप्राप्नोत्यतिदारुणम् ॥ २ ॥ दन्तास्थिकेशनखरान्ये त्यज्यन्त्यमरालये ॥
जले वा भुक्तशेषं च तेषां पापफलं शृणु ॥ ३ ॥ प्रासप्रोता हलैर्भिन्ना आर्त्तरावविराविणः ॥ अत्युष्णतैलपाकेऽतितप्यन्ते भृशदारुणे॥ ४ ॥ कुर्वन्ति
दुःखसंततास्ततोऽन्येषु व्रजन्ति च ॥ ब्रह्म संहरते यस्तु गन्धकाष्ठं तथैव च॥५॥स याति नरकं घोरं यावदाचन्द्रतारकम्॥ब्रह्मस्वहरणं राजन्निहामुत्र च
दुःखदम्॥६॥इहसंपद्विनाशायपरत्र नरकाय च॥कूटसाक्ष्यंवदेद्यस्तु तस्य पापफलंशृणु॥७॥स याति यातनाःसर्वा यावदिन्द्राश्चतुर्दश॥इहपुत्राश्च पौत्राश्च
विनश्यन्ति परत्र च ॥८॥ रौरवं नरकं भुङ्क्ते ततोऽन्यानपि च क्रमात् ॥ ये चातिकामिनो मर्त्या ये च मिथ्याप्रवादिनः ॥९॥ तेषां मुखे जलौका

स्तु पूर्य्यन्ते पन्नगोपमाः॥ एवं षष्टिसहस्राब्दे ततः क्षाराम्बुसेचनम् ॥ १० ॥ ये वृथामांसनिरतास्ते यान्ति क्षारकर्दमम् ॥ ततो गजैर्निपात्यन्ते मरुत्प्रप
तनं यथा॥ ११ ॥ तदन्ते भवमासाद्य हीनाङ्गाः प्रभवन्ति च ॥ यस्त्वृतौ नाभिगच्छेत स्वस्त्रियं मनुजेश्वर ॥ १२ ॥ स याति रौरवं घोरं ब्रह्महत्यां च
विन्दति ॥ अन्याचाररतं दृष्ट्वा यः शक्तो न निवारयेत् ॥ १३ ॥ तत्पापं समवाप्नोति नरकं तावुभावपि ॥ पापिनां पापगणनां कृत्वान्येभ्यो दिशन्ति
च ॥ १४ ॥ अस्तित्वे तुल्यपापास्ते मिथ्यात्वे द्विगुणा नृप ॥ अपापे पातकं यस्तु समारोप्य विनिन्दति ॥१५॥स याति नरकं घोरं यावच्चंद्रार्क
तारकम् ॥ पापिनां निन्द्यमानानां पापार्द्धं क्षयमेति च॥ १६ ॥ यस्तु व्रतानि संगृह्य असमाप्य परित्यज्येत् ॥ सोऽसिपत्रेऽनुभूयार्तिं हीनाङ्गो जायते
भुवि ॥१७ ॥ अन्यैः संगृह्यमाणानांव्रतानां विघ्नकृन्नरः॥अतीव दुःखदं रौद्रं स याति श्लेष्मभोजनम्॥ १८॥न्याये च धर्मशिक्षायां पक्षपातं करोति यः॥
न तस्य निष्कृतिर्भूयः प्रायश्चित्तायुतैरपि ॥१९॥अभोज्यभोजी संप्राप्य विड्भोज्यं तु समायुतम्॥ ततश्चण्डालयोनौ तु गोमांसाशी सदा भवेत्॥२०॥
अवमान्य द्विजान्वाग्भिर्ब्रह्महत्यां च विन्दति॥सर्वाश्च यातना भुक्त्वा चाण्डालो दशजन्मसु ॥ २१ ॥ विप्राय दीयमाने तु यस्तु विघ्नं समाचरेत् ॥
ब्रह्महत्यासमं तेन कर्त्तव्यं व्रतमेव च ॥ २२ ॥अपहृत्य परस्यार्थं यः परेभ्यः प्रयच्छति ॥ अपहर्त्ता तु निरयी यस्यार्थस्तस्य तत्फलम्॥ २३ ॥
प्रतिश्रुत्याप्रदानेन लालाभक्षं व्रजेन्नरः॥ यतिनिन्दापरो राजन् शिलामात्रे प्रयाति हि॥२४॥आरामच्छेदिनो यान्ति युगानामेकविंशतिम्॥ श्वभोजनं
ततः सर्वा भुञ्जते यातनाः क्रमात् ॥२५॥ देवतागृहभेत्तारस्तडागानां च भूपते ॥ पुष्पारामभिदश्चैव यां गतिं यान्ति तच्छृणु ॥ २६ ॥ यातनास्वासु
सर्वासु पच्यन्ते वै पृथक् पृथक् ॥ ततश्च विष्ठाकृमयः कल्पानामेकविंशतिम् ॥ २७ ॥ ततश्चाण्डालयोनौ तु शतजन्मानि भूपते ॥ ग्रामविध्वं
सकानां तु दाहकानां च लुम्पताम् ॥ २८ ॥ महत्पापं तदादेष्टुं न क्षमोऽहं निजायुषा ॥ उच्छिष्टभोजिनो ये च मित्रद्रोहपराश्च ये ॥ २९ ॥
एतेषां यातनास्तीव्रा भवन्त्याचन्द्रतारकम् ॥ उच्छिन्नपितृदेवेज्या वेदमार्गबहिःस्थिताः ॥ ३० ॥ पाषण्डा इति विख्यातास्तेषां वै सर्वयातनाः ॥
एवं बहुविधा भूप यातनाः पापकारिणाम् ॥ ३१ ॥ तेषां तासां च सख्यानं कर्त्तुं नालमहं प्रभो ॥ पापानां यातनानां च धर्माणां चापि भूपते ॥
॥३२॥ संख्यां निगदितुं लोके कः क्षमो विष्णुना विना ॥ एतेषां सर्वपापानां धर्मशास्त्रविधानतः ॥ ३३ ॥ प्रायश्चित्तेषु चीर्णेषु पापराशिः
प्रणश्यति ॥ प्रायश्चित्तानि कार्याणि समीपे कमलापतेः॥३४॥न्यूनातिरिक्तकृत्यानां संपूर्तिकरणाय च ॥ गङ्गा च तुलसी चैव सत्सङ्गो हरिकीर्त्तनम्
॥ ३५ ॥ अनसूया ह्यहिंसा च सर्वेप्येते हि पापहाः ॥ विष्णवर्पितानि कर्माणि सफलानि भवन्ति हि॥ ३६ ॥ अनर्प्पितानि कर्माणि भस्मवि
न्यस्तहव्यवत् ॥ नित्यं नैमित्तिकं काम्यं यच्चान्यन्मोक्षसाधनम् ॥ ३७ ॥ विष्णौ समर्पितं सर्वं सात्त्विकं सफलं भवेत् ॥ हरिभक्तिः परा नृणां सर्वं

पापप्रणाशिनी ॥ ३८ ॥ सा भक्तिर्दशधा ज्ञेया पापारण्यदवोपमा ॥ तामसै राजसैश्चैव सात्त्विकैश्च नृपोत्तम ॥ ३९ ॥ यच्चान्यस्य विनाशार्थं
भजनं श्रीपतेर्नृप ॥ सा तामस्यधमा भक्तिः खलभावधरा यतः ॥ ४० ॥ योऽर्चयेत्कैतवधिया स्वैरिणी स्वपतिं यथा ॥ नारायणं जगन्नाथं
तामसी मध्यमा तु सा ॥ ४१ ॥ देवपूजापरान्दृष्ट्वा मात्सर्याद्योऽर्चयेद्धरिम् ॥ सा भक्तिः पृथिवीपाल तामसी चोत्तमा स्मृता ॥ ४२ ॥ धनधान्या
दिकं यस्तु प्रार्थयन्नर्चयेद्धरिम् ॥ श्रद्धया परया युक्तः सा राजस्यधमा स्मृता ॥ ४३ ॥ यः सर्वलोकविख्यातकीर्तिमुद्दिश्य माधवम् ॥
अर्चयेत्परया भक्त्या सा मध्या राजसी मता ॥ ४४ ॥ सालोक्यादि पदं यस्तु समुद्दिश्यार्चयेद्धरिम् ॥ सा राजस्युत्तमा भक्तिः कीर्तिता पृथिवी
पते ॥ ४५ ॥ यस्तु स्वकृतपापानां क्षयार्थं प्रार्चयेद्धरिम् ॥ श्रद्धया परयोपेतः सा सात्त्विक्यधमा स्मृता ॥ ४६॥ हरेरिदं प्रियमिति शुश्रूषां
कुरुते तु यः ॥ श्रद्धया संयुतो भूयः सात्त्विकी मध्यमा तु सा ॥ ४७ ॥ विधिबुद्ध्यार्चयेद्यस्तु दासवच्छ्रीपतिं नृप ॥ भक्तीनां प्रवरा सा तु उत्तमा
सात्त्विकी स्मृता ॥ ४८ ॥ महिमानं हरेर्यस्तु किंचित्कृत्वा प्रियो नरः ॥ तन्मयत्वेन संतुष्टः सा भक्तिरुत्तमोत्तमा ॥ ४९ ॥ अहमेव परो विष्णुर्मयि
सर्वमिदं जगत् ॥ इति यः सततं पश्येत्तं विद्यादुत्तमोत्तमम्॥५०॥एवं दशविधा भक्तिः संसारच्छेदकारिणी॥ तत्रापि सात्त्विकी भक्तिः सर्वकामफल
प्रदा ॥ ५१ ॥ तस्माच्छृणुष्व भूपाल संसारविजिगीषुणा ॥ स्वकर्मणो विरोधेन भक्तिः कार्या जनार्दने ॥ ५२ ॥ यः स्वधर्मं परित्यज्य भक्तिमात्रेण
जीवति ॥ न तस्य तुष्यते विष्णुराचारेणैव तुष्यते ॥ ५३ ॥ सर्वागमानामाचारः प्रथमं परिकल्पते॥आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥५४ ॥
तस्मात्कार्या हरेर्भक्तिः स्वधर्मस्याविरोधिनी ॥ सदाचारविहीनानां धर्मा अप्यसुखप्रदाः ॥ ५५ ॥ स्वधर्महीना भक्तिश्चाप्यकृतैव प्रकीर्तिता ॥
यत्तु पृष्टं त्वया भूयस्तत्सर्वं गदितं मया ॥ ५६ ॥ तस्माद्धर्मपरो भूत्वा पूजयस्व जनार्दनम् ॥ नारायणमणीयांसं सुखमेष्यासि शाश्वतम् ॥ ५७ ॥
शिव एव हरिः साक्षाद्धरिरेव शिवः स्वयम् ॥ द्वयोरन्तरदृग्याति नरकान्कोटिशः खलः॥५८॥तस्माद्विष्णुं शिवं वापि समं बुद्ध्वा समर्चय॥भेदकृद्दुःख
माप्नोति इह लोके परत्र च ॥ ५९ ॥ यदर्थमहमायातस्त्वत्समीपं जनाधिप॥ तत्ते वक्ष्यामि सुमते सावधानं निशामय॥६०॥आत्मघातकपाप्मानो
दग्धाः कपिलकोपतः ॥ वसन्ति नरके ते तु राजंस्तव पितामहाः ॥ ६१ ॥ तानुद्धर महाभाग गङ्गानयनकर्मणा ॥ गङ्गा सर्वाणि पापानि नाशयत्येव
भूपते ॥ ६२ ॥ केशास्थिनखदन्ताश्च भस्मापि नृपसत्तम ॥ नयति विष्णुसदनं स्पृष्टा गाङ्गेन वारिणा॥ ६३ ॥ यस्यास्थि भस्म वा राजन् गङ्गायां
क्षिप्यते नरैः॥स सर्वपापनिर्मुक्तः प्रयाति भवनं हरेः ॥६४ ॥ यानि कानि च पापानि प्रोक्तानि तव भूपते॥तानि सर्वाणि नश्यन्ति गङ्गाबिन्द्वभिषेच

नात् ॥ ६५ ॥ सनक उवाच ॥ इत्युक्त्वा मुनिशार्दूल महाराजं भगीरथम् ॥ धर्मात्मानं धर्मराजः सद्यश्चान्तर्दधे तदा ॥६६ ॥ स तु राजा महाप्राज्ञः सर्वशास्त्रार्थपारगः ॥ निक्षिप्य पृथिवीं सर्वां सचिवेषु ययौ वनम् ॥ ६७ ॥ तुहिनाद्रौ ततो गत्वा नरनारायणाश्रमात् ॥ पश्चिमे तुहिनाक्रान्ते शृङ्गे षोडशयोजने ॥ ६८ ॥ तपस्तप्त्वानयामास गङ्गां त्रैलोक्यपावनीम् ॥ ६९ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे धर्माख्याने धर्मराजोपदेशेन भगीरथस्य गङ्गानयनोद्यमवर्णनं नाम पञ्चदशोऽध्यायः ॥ १५ ॥ नारद उवाच ॥ हिमवद्गिरिमासाद्य किं चकार महीपतिः ॥ कथमानीतवान्गङ्गामेतन्मे वक्तुमर्हसि ॥ १ ॥ सनक उवाच ॥ भगीरथो महाराजो जटाचीरधरो मुने ॥ गच्छन्हिमाद्रिं तपसे प्राप्तो गोदावरीतटम् ॥ २ ॥ तत्रापश्यन्महारण्ये भृगोराश्रममुत्तमम् ॥ कृष्णसारसमाकीर्णं मातङ्गगणसेवितम् ॥ ३ ॥ भ्रमद्भ्रमरसंघुष्टं कूजद्विहगसंकुलम् ॥ व्रजद्वराहनिकरं चमरीपुच्छवीजितम् ॥ ४ ॥ नृत्यन्मयूरनिकरं सारङ्गादिनिषेवितम् ॥ प्रवार्द्धितमहावृक्षं मुनिकन्याभिरादरात् ॥ ५ ॥ शालतालतमालाढ्यं नूनहिन्तालमण्डितम् ॥ मालतीयूथिकाकुन्दचम्पकाश्वत्थभूषितम् ॥ ६॥ उत्फुल्लकुसुमोपेत मृषिसङ्घनिषेवितम् ॥ वेदशास्त्रमहाघोषमाश्रमं प्राविशद्भृगोः ॥ ७ ॥ गृणन्तं परम ब्रह्म वृतं शिष्यगणैर्मुनिम् ॥ तेजसा सूर्यसदृशं भृगुं तत्र ददर्श सः ॥ ८ ॥ प्रणनामाथ विप्रेन्द्रं पादसंग्रहणादिना ॥ आतिथ्यं भृगुरप्यस्य चक्रे सन्मानपूर्वकम् ॥ ९ ॥ कृतातिथ्यक्रियो राजा भृगुणा परमर्षिणा ॥ उवाच प्राञ्जलिर्भूत्वा विनयान्मुनिपुङ्गवम् ॥१० ॥ भगीरथ उवाच ॥ भगवन्सर्वधर्मज्ञ सर्वशास्त्रविशारद ॥ पृच्छामि भवभीतोऽहं नृणामुद्धारकारणम् ॥ ११ ॥ भगवांस्तुष्यते येन कर्मणा मुनिसत्तम ॥ तन्ममाख्याहि सर्वज्ञ अनुग्राह्योऽस्मि ते यदि॥१२॥भृगुरुवाच॥ राजंस्तवेप्सितं ज्ञातं त्वं हि पुण्यवतां वरः ॥अन्यथा स्वकुलं सर्वं कथमुद्धर्त्तुमर्हसि ॥ १३ ॥ यो वा को वापि भूपाल स्वकुलं शुभकर्मणा ॥ उद्धर्त्तुकामस्तं विद्यान्नररूपधरं हरिम् ॥ १४ ॥ कर्मणा येन देवेशो नृणामिष्टफलप्रदः ॥ तत्प्रवक्ष्यामि राजेन्द्र शृणुष्व सुसमाहितः ॥ १५ ॥ भव सत्यपरो राजन्न हिंसानिरतस्तथा ॥ सर्वभूतहितो नित्यं मानृतं वद वै क्वचित् ॥ १६ ॥ त्यज दुर्जनसंसर्गं भज साधुसमागमम् ॥ कुरु पुण्यमहोरात्रं स्मर विष्णुं सनातनम् ॥ १७ ॥ कुरु पूजां महाविष्णोर्याहि शान्तिमनुत्तमाम्॥द्वादशाष्टाक्षरं मन्त्रं जप श्रेयो भविष्यति॥१८॥भगीरथ उवाच॥ सत्यं तु कीदृशं प्रोक्तं सर्वभूतहितं मुने॥अनृतं कीदृशं प्रोक्तं दुर्जनाश्चापि कीदृशाः॥१९॥साधवः कीदृशाः प्रोक्तास्तथा पुण्यं च कीदृशम्॥स्मर्तव्यश्च कथं विष्णुस्तस्य पूजा च कीदृशी ॥ २०॥ शान्तिश्च कीदृशी प्रोक्ता को मंत्रोऽष्टाक्षरो मुने ॥ को वा द्वादशवर्णश्च मुने तत्त्वार्थकोविद॥२१॥कृपां कृत्वा मयि परां सर्वं व्याख्यातुमर्हसि॥ भृगुरुवाच॥साधु साधुमहाप्राज्ञ तव

बुद्धिरनुत्तमा॥२२॥यत्पृष्टोऽहं त्वया भूप तत्सर्वं प्रवदामि ते ॥यथार्थकथनं यत्तत्सत्यमाहुर्विपश्चितः॥२३॥धर्माविरोधतो वाच्यं तद्धि धर्मपरायणैः॥
देशकालादि विज्ञाय स्वयमस्याविरोधतः ॥ २४ ॥ यद्वचः प्रोच्यते साद्भिस्तत्सत्यमभिधीयते ॥ सर्वेषामेव जंतूनामक्लेशजननं हि तत ॥ २५ ॥
अहिंसा सा नृप प्रोक्ता सर्वकामप्रदायिनी ॥ कर्मकार्यसहायत्वमकार्यपरिपन्थिता ॥ २६ ॥ सर्वलोकहितत्वं वै प्रोच्यते धर्मकोविदैः ॥ इच्छानु
वृत्तकथनं धर्माधर्मविवेकिनः ॥२७॥ अनृतं तद्धि विज्ञेय सर्वश्रेयोविरोधि तत् ॥ ये लोके द्वेषिणो मूर्खाः कुमार्गरतबुद्धयः ॥२८॥ ते राजन्दुर्ज्जना
ज्ञेयाः सर्वधर्मबहिष्कृताः॥ धर्माधर्मविवेकेन वेदमार्गानुसारिणः॥२९॥सर्वलोकहितासक्ताः साधवः परिकीर्त्तिताः॥हरिभक्तिकरं यत्तत्सद्भिश्च परिरञ्जि
तम् ॥ ३०॥ आत्मनः प्रीतिजनकं तत्पुण्यं परिकीर्त्तितम् ॥ सर्वं जगदिदं विष्णुर्विष्णुः सर्वस्य कारणम् ॥ ३१ ॥ अहं च विष्णुर्यज्ज्ञानं तद्विष्णुस्म
रणं विदुः॥सर्वदेवमयो विष्णुर्विधिना पूजयामि तम्॥३२॥इति या भवति श्रद्धा सा तद्भक्तिः प्रकीर्त्तिता॥सर्वभूतमयो विष्णुः परिपूर्णः सनातनः॥३३॥
इत्यभेदेन या बुद्धिः समता सा प्रकीर्त्तिता ॥समता शत्रुमित्रेषु वशित्वं च तथा नृप ॥ ३४ ॥ यदृच्छालाभसंतुष्टिः सा शान्तिः परिकीर्त्तिता ॥ एते
सर्वे समाख्यातास्तपःसिद्धिप्रदा नृणाम् ॥ ३५ ॥ समस्तपापराशीनां तरसा नाशहेतवः ॥ अष्टाक्षरं महामन्त्रं सर्वपापप्रणाशनम् ॥३६॥ वक्ष्यामि
तव राजेन्द्र पुरुषार्थैकसाधनम्॥ विष्णोः प्रियकरं चैव सर्वसिद्धिप्रदायकम् ॥ ३७ ॥ नमो नारायणायेति जपेत्प्रणवपूर्वकम्॥ नमो भगवते प्रोच्य
वासुदेवाय तत्परम्॥ ३८ ॥ प्रणवाद्यं महाराज द्वादशार्णमुदाहृतम् ॥ द्वयोः समं फलं राजन्नष्टद्वादशवर्णयोः ॥ ३९॥ प्रवृत्तौ च निवृत्तौ च साम्यमु
द्दिष्टमेतयोः ॥ शङ्खचक्रधरं शान्तं नारायणमनामयम् ॥ ४० ॥ लक्ष्मीसंश्रितवामाङ्कं तथाभयकरं प्रभुम् ॥ किरीटकुण्डलधरं नानामण्डनशोभितम्
॥ ४१ ॥ भ्राजत्कौस्तुभमालाढ्यं श्रीवत्साङ्कितवक्षसम् ॥ पीताम्बरधरं देवं सुरासुरनमस्कृतम् ॥ ४२ ॥ध्यायेदनादिनिधनं सर्वकामफलप्रदम् ॥
अन्तर्यामी ज्ञानरूपी परिपूर्णः सनातनः ॥ ४३ ॥ एतत्सर्वं समाख्यातं यत्तु पृष्टं त्वया नृप ॥ स्वस्ति तेऽस्तु तपःसिद्धिं गच्छ लब्धुं यथासुखम्
॥४४॥ एवमुक्तो महीपालो भृगुणा परमर्षिणा ॥ परमां प्रीतिमापन्नः प्रपेदे तपसे वनम् ॥ ४५ ॥ हिमवद्गिरिमासाद्य पुण्यदेशे मनोहरे ॥ नादेश्वरे
महाक्षेत्रे तपस्तेपेऽतिदुश्चरम् ॥ ४६ ॥ राजा त्रिषवणस्नायी कन्दमूलफलाशनः ॥ कृतातिथ्यर्हणश्चापि नित्यं होमपरायणः ॥ ४७ ॥ सर्वभूतहितः
शान्तो नारायणपरायणः ॥पत्रैः पुष्पैः फलैस्तोयैस्त्रिकालं हरिपूजकः ॥ ४८ ॥ एवं बहुतिथं कालं नीत्वा चात्यन्तधैर्यवान् ॥ ध्यायन्नारायणं देवं
शीर्णपर्णाशनोऽभवत् ॥४९॥ प्राणायामपरो भूत्वा राजा परमधार्मिकः ॥ निरुच्छ्वासं तपस्तप्तुं ततः समुपचक्रमे ॥ ५० ॥ ध्यायन्नारायणं देवमनं

तमपराजितम् ॥ षष्टिवर्षसहस्राणि निरुच्छ्वासपरोऽभवत् ॥ ५१ ॥तस्य नासापुटाद्राज्ञो वह्निर्जज्ञ भयंकरः ॥ तं दृष्ट्वा देवताः सर्वे वित्रस्ता वह्निता
पिताः॥५२॥ अभिजग्मुर्महाविष्णुं यत्रास्ते जगतां पतिः॥क्षीरोदस्योत्तरं तीरं संप्राप्य त्रिदशेश्वराः ॥ अस्तुवन्देवदेवेशं शरणागतपालकम् ॥५३॥
देवा ऊचुः॥ नताः स्म विष्णुं जगदेकनाथं स्मरत्समस्तार्तिहरं परेशम्॥स्वभावशुद्धं परिपूर्णभावं वदन्ति यज्ज्ञानतनुं च तज्ज्ञाः ॥५४॥ध्येयः सदा
योगिवरैर्महात्मा स्वेच्छाशरीरैः कृतदेवकार्यः ॥ जगत्स्वरूपो जगदादिनाथस्तस्मै नताः स्मः पुरुषोत्तमाय ॥ ५५ ॥ यन्नामसंकीर्त्तनतो खलानां
समस्त पापानि लयं प्रयान्ति ॥ तमीशमीड्यं पुरुषं पुराणं नताः स्म विष्णुं पुरुषार्थसिद्ध्यै ॥ ५६ ॥ यत्तेजसा भान्ति दिवाकराद्या नातिक्रमं
त्यस्य कदापि शिक्षाः ॥ कालात्मकं तं त्रिदशाधिनाथं नमामहे वै पुरुषार्थरूपम् ॥ ५७ ॥ जगत्करोऽत्यब्जभवोऽत्ति रुद्रः पुनाति लोकान्
श्रुतिभिश्च विप्राः ॥ तमादिदेवं गुणसन्निधानं सर्वोपदेष्टारमिताः शरण्यम् ॥ ५८ ॥ वरं वरेण्यं मधुकैटभारिं सुरासुराभ्यर्चितपादपीठम् ॥
॥ सद्भक्तसंकल्पितासीद्धिहेतुं ज्ञानैकवेद्यं प्रणताःस्म देवम्॥ ५९॥अनादिमध्यान्तमजं परेशमनाद्यविद्याख्यतमोविनाशम्॥सच्चित्परानन्दघनस्वरूपं
रूपादिहीनं प्रणताः स्म देवम् ॥ ६० ॥ नारायणं विष्णुमनन्तमीशं पीताम्बरं पद्मभवादिसेव्यम् ॥ यज्ञप्रियं यज्ञकरं विशुद्धं
नताः स्म सर्वोत्तममव्ययं तम् ॥ ६१ ॥ इति स्तुतो महाविष्णुर्देवैरिन्द्रादिभिस्तदा ॥ चरितं तस्य राजर्षेर्देवानां संन्यवेदयत्
॥ ६२ ॥ ततो देवान्समाश्वास्य दत्त्वाभयमनञ्जनः ॥ जगाम यत्र राजर्षिस्तपस्तपति नारद ॥ ६३ ॥ शङ्खचक्रधरो देवः सच्चिदानन्दविग्रहः ॥
प्रत्यक्षतामगात्तस्य राज्ञः सर्वजगद्गुरुः ॥ ६४ ॥ तं दृष्ट्वा पुण्डरीकाक्षं भाभासितदिगन्तरम् ॥अतसीपुष्पसंकाशं स्फुरत्कुण्डलमण्डितम् ॥६५॥स्निग्ध
कुन्तलवक्त्राब्जं विभ्राजन्मुकुटोज्ज्वलम् ॥ श्रीवत्सकौस्तुभधरं वनमालाविभूषितम् ॥ ६६ ॥ दीर्घबाहुमुदाराङ्गं लोकेशार्चितपत्कजम् ॥ ननाम
दण्डवद्भूमौ भूपतिर्नम्रकंधरः ॥ ६७ ॥ अत्यन्तहर्षसंपूर्णः सरोमाञ्चः सगद्गदः ॥ कृष्ण कृष्णेति कृष्णेति श्रीकृष्णेति समुच्चरन् ॥६८॥तस्य विष्णुः
प्रसन्नात्मा ह्यन्तर्यामी जगद्गुरुः ॥ उवाच कृपयाविष्टो भगवान्भूतभावनः ॥ ६९ ॥ श्रीभगवानुवाच ॥ भगीरथ महाभाग तवाभीष्टं भविष्यति ॥
आगमिष्यन्ति मल्लोकं तव पूर्वपितामहाः ॥ ७० ॥ मम मूर्त्यन्तरं शम्भुं राजन्स्तोत्रैः स्वशक्तितः ॥ स्तुहि ते सकलं कामं सवै
सद्यः क ष्यति ॥७१॥यस्तु जग्राह शशिनं शरणं समुपागतम्॥ तस्मादाराधयेशानं स्तोत्रैः स्तुत्यं सुखप्रदम् ॥७२ ॥अनादिनिधनो देवः सर्वकाम
फलप्रदः ॥ त्वया संपूजितो राजन्सद्यः श्रेयो विधास्यति ॥ ७३ ॥ इत्युक्त्वा देवदेवेशो जगतां पतिरच्युतः ॥ अन्तर्दधे मुनिश्रेष्ठ उत्तस्थौ

सोऽपि भूपतिः ॥ ७४ ॥ किमिदं स्वप्न आहोस्वित्सत्यं साक्षाद्द्विजोत्तम ॥ भूपतिर्विस्मयं प्राप्तः किं करोमीति विस्मितः ॥ ७५ ॥ अथान्तरिक्षे
वागुच्चैः प्राह तं भ्रान्तचेतसम् ॥ सत्यमेतदिति व्यक्त न चिन्तां कर्तुमर्हसि ॥ ७६ ॥ तन्निशम्यावनीपाल ईशानं सर्वकारणम् ॥ समस्तदेवताराजम
स्तौषीद्भक्तितत्परः ॥ ७७ ॥ भगीरथ उवाच ॥ प्रणमामि जगन्नाथं प्रणतार्तिप्रणाशनम् ॥ प्रमाणागोचरं देवमीशानं प्रणवात्मकम् ॥ ७८ ॥ जगद्रूप
मजं नित्यं सर्गस्थित्यंतकारणम् ॥विश्वरूपं विरूपाक्षं प्रणतोऽस्म्युग्ररेतसम् ॥७८॥ आदिमध्यान्तरहितमनन्तमजमव्ययम् ॥ समामनन्ति योगीन्द्रा
स्तं वन्दे पुष्टिवर्धनम् ॥ ८०॥ नमो लोकाधिनाथाय वञ्चते परिवञ्चते ॥ नमोऽस्तु नीलग्रीवाय पशूनां पतये नमः ॥८१ ॥नमश्चैतन्यरूपाय पुष्टानां
पतये नमः ॥ नमोऽकल्पप्रकल्पाय भूतानां पतये नमः ॥ ८२ ॥ नमः पिनाकहस्ताय शूलहस्ताय ते नमः ॥ नमः कपालहस्ताय पाश
मुद्गरधारिणे ॥८२॥नमस्ते सर्वभूताय घण्टाहस्ताय ते नमः ॥ नमः पञ्चास्यदेवाय क्षेत्राणां पतये नमः॥८४॥नमः समस्तभूतानामादिभूताय भूभृते ॥
अनेकरूपरूपाय निर्गुणाय परात्मने॥८५॥नमो गणाधिदेवाय गणानां पतये नमः॥नमो हिरण्यगर्भाय हिरण्यपतये नमः ॥८६॥ हिरण्यरेतसे तुभ्यं नमो
हिरण्यवाहवे ॥ नमो ध्यानस्वरूपाय नमस्ते ध्यानसाक्षिणे ॥ ८७ ॥ नमस्ते ध्यानसंस्थाय ध्यानगम्याय ते नमः ॥ येनेदं विश्वमखिलं
चराचरविराजितम्॥८८॥वर्षेवाभ्रेण जनितं प्रधानपुरुषात्मना॥८९॥स्वप्रकाशं महात्मानं परं ज्योतिःसनातनम्॥यमामनन्ति तत्त्वज्ञाः सवितारं नृच
क्षुषाम् ॥९० ॥ उमाकान्त नन्दिकेशंतं नीलकण्ठं सदाशिवम् ॥ मृत्युंजयं महादेवं परात्परतरं विभुम् ॥९१॥ परं शब्दब्रह्मरूपं तं वन्देऽखिलकारणम्॥
कपर्दिने नमस्तुभ्यं सद्योजाताय वै नमः ॥ ९२ ॥ भवोद्भवाय शुद्धाय ज्येष्ठाय च कनीयसे ॥ मन्यवे त इषे त्रय्याः पतये यज्ञतन्तवे ॥ ९३॥ ऊर्जें
दिशां च पतये कालायाघोररूपिणे ॥ कृशानुरेतसे तुभ्यं नमोऽस्तु सुमहात्मने ॥९४॥ यतः समुद्राः सरितोऽद्रयश्च गन्धर्वयक्षासुरसिद्धसङ्घाः॥स्थाणु
श्चरिष्णुर्महदल्पकं च असच्च सज्जीवमजीवमास ॥ ९५ ॥ नतोऽस्मि तं योगिनतांघ्रिपद्मं सर्वान्तरात्मानमरूपमीशम् ॥ स्वतन्त्रमेकं गुणिनां गुणं च
नमामि भूयः प्रणमामि भूयः ॥ ९६ ॥ इत्थं स्तुतो महादेवः शंकरो लोकशंकरः ॥ आविर्बभूव भूपस्य संतप्ततपसोग्रतः ॥ ९७ ॥ पञ्चवक्त्रं दशभुजं
चन्द्रार्द्धकृतशेखरम् ॥ त्रिलोचनमुदाराङ्गं नागयज्ञोपवीतिनम् ॥ ९८ ॥विशालवक्षसं देवं तुहिनाद्रिसमप्रभम्॥गजचर्माम्बरधरं सुरार्चितपदाम्बुजम्॥
॥ ९९ ॥ दृष्ट्वा पपात पादाग्रे दण्डवद्भुवि नारद ॥ तत उत्थाय सहसा शिवाग्रे विहिताञ्जलिः ॥ १०० ॥ प्रणनाम महादेवं कीर्तयन्शंकराह्वयम् ॥
विज्ञाय भक्तिं भूपस्य शंकरः शशिशेखरः ॥१॥ उवाच राज्ञे तुष्टोऽस्मि वरं वरय वाञ्छितम् ॥ तोषितोऽस्मि त्वया सम्यक् स्तोत्रेण तपसा तथा॥२॥

एवमुक्तः स देवेन राजा संतुष्टमानसः ॥ उवाच प्राञ्जलिर्भूत्वा जगतामीश्वरेश्वरम् ॥ ३ ॥ भगीरथ उवाच॥अनुग्राह्योऽस्मि यदि ते वरदानान्महेश्वर॥
तदा गङ्गां प्रयच्छास्मत्पितॄणां मुक्तिहेतवे ॥ ४ ॥ श्रीशिव उवाच ॥ दत्ता गङ्गा मया तुभ्यं पितॄणां ते गतिः परा ॥ तुभ्यं मोक्षः परश्चेति
तमुक्त्वान्तर्दधे शिवः ॥ ५ ॥ कपर्दिनो जटास्रस्ता गङ्गा लोकैकपाविनी ॥ पावयन्ती जगत्सर्वमन्वगच्छद्भगीरथम् ॥ ६ ॥ ततः प्रभृति सा
देवी निर्मला मलहारिणी ॥ भागीरथीति विख्याता त्रिषु लोकेष्वभून्मुने ॥ ७ ॥ सगरस्यात्मजाः पूर्वं यत्र दग्धाः स्वपाप्मना ॥ तं देशं
प्लावयामास गङ्गा सर्वसरिद्वरा ॥ ८ ॥ यदा संप्लावितं भस्म सागराणां तु गङ्गया ॥ तदैव नरके मग्ना उद्धृताश्च गतैनसः ॥ ९ ॥ पुरा
संक्रुश्यमानेन ये यमेनातिपीडिताः ॥ त एव पूजितास्तेन गङ्गाजलपरिप्लुताः ॥ १० ॥ गतपापान्स विज्ञाय यमः सगरसंभवान् ॥ प्रणम्या
भ्यर्च्य विधिवत्प्राह तान्प्रीतमानसः ॥११॥ भो भो राजसुता यूयं नरकाद् भृशदारुणात् ॥ मुक्ता विमानमारुह्य गच्छध्वं विष्णुमन्दिरम् ॥१२॥
इत्युक्तास्ते महात्मानो यमेन गतकल्मषाः ॥ दिव्यदेहधरा भूत्वा विष्णुलोकं प्रपेदिरे ॥ १३ ॥ एवंप्रभावा सा गङ्गा विष्णुपादाग्रसंभवा ॥ सर्वलो
केषु विख्याता महापातकनाशिनी ॥ १४ ॥ य इदं पुण्यमाख्यानं महापातकनाशनम् ॥ पठेच्च शृणुयाद्वापि गङ्गास्नानफलं लभेत् ॥ १५ ॥ यस्त्वे
तत्पुण्यमाख्यानं कथयेद्ब्राह्मणाग्रतः ॥ स याति विष्णुभवनं पुनरावृत्तिवर्जितम् ॥ १६ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे गङ्गामाहात्म्ये
भगीरथगङ्गानयनं नाम षोडशोऽध्यायः ॥ १६ ॥ ऋषय ऊचुः ॥ साधु सूत महाभाग त्वयातिकरुणात्मना ॥ श्रावितं सर्वपापघ्नं गङ्गामाहात्म्य
मुत्तमम् ॥ १ ॥ श्रुत्वा तु गङ्गामाहात्म्यं नारदो देवदर्शनः ॥ किं पप्रच्छ पुनः सूत सनकं मुनिसत्तमम् ॥ २ ॥ सूत उवाच ॥ शृणुध्वमृ
षयः सर्वे नारदेन सुरर्षिणा ॥ पृष्टं पुनर्यथा प्राह प्रवक्ष्यामि तथैव तत् ॥ ३ ॥ नानाख्यानेतिहासाढ्यं गङ्गामाहात्म्यमुत्तमम् ॥ श्रुत्वा ब्रह्मसुतो
भूयः पृष्टवानिदमादरात् ॥ ४ ॥ नारद उवाच ॥ अहोऽतिधन्यं सुकृतैकसारं श्रुतं मया पुण्यमसंवृतार्थम् ॥ गाङ्गेयमाहात्म्यमघप्रणाशि त्वत्तो मुने
कारुणिकादभीष्टम् ॥ ५॥ये साधवः साधु भजन्ति विष्णुं स्वार्थं परार्थं च यतन्त एव॥नानोपदेशैः सुविमुग्धचित्तं प्रबोधयन्ति प्रसभं प्रसन्नम्॥६॥
ततः समाख्याहि हरेर्व्रतानि कृतैश्च यैः प्रीतिमुपैति विष्णुः ॥ ददाति भक्तिं भजतां दयालुर्मुक्तिस्तु तस्या विदिता हि दासी ॥ ७ ॥ ददाति मुक्तिं
भजतां मुकुन्दो व्रतार्चनध्यानपरायणानाम्॥भक्तानुसेवासु महाप्रयासं विमृश्य कस्यापि न भक्तियोगम्॥८॥प्रवृत्त च निवृत्तं च यत्कर्म हरितोषणम्॥तदा
ख्याहि मुनिश्रेष्ठ विष्णुभक्तोऽसि मानद ॥ ९ ॥ सनक उवाच ॥ साधु साधु मुनिश्रेष्ठ भक्तस्त्वं पुरुषोत्तमे॥ भूयो भूयो यतः पृच्छेश्चरित्रं शार्ङ्गधन्व

नः॥१०॥ व्रतानि ते प्रवक्ष्यामि लोकोपकृतिमन्ति च ॥ प्रसीदति हरिर्यैस्तु प्रयच्छत्यभयं तथा॥११॥यस्य प्रसन्नो भगवान्यज्ञलिङ्गो जनार्दनः॥
इहामुत्र सुखं तस्य तपोवृद्धिश्च जायते ॥ १२ ॥ येन केनाप्युपायेन हरिपूजापरायणाः ॥ प्रयान्ति परमं स्थानमिति प्राहुर्महर्षयः ॥ १३॥ मार्ग
शीर्षे सिते पक्षे द्वादश्यां जलशायिनम् ॥ उपोषितोऽर्चयेत्सम्यङ् नरः श्रद्धासमन्वितः॥१४॥ स्नात्वा शुक्लाम्बरधरो दन्तधावनपूर्वकम्॥ गन्धपुष्पा
क्षतैर्धूपैर्दीपैर्नैवेद्यपूर्वकैः॥१५॥ वाग्यतो भक्तिभावेन मुनिश्रेष्ठार्चयेद्धरिम् ॥ केशवाय नमस्तुभ्यमिति विष्णुं च पूजयेत् ॥१६॥ अष्टोत्तरशतं हुत्वा
वह्नौ घृततिलाहुतीः ॥ रात्रौ जागरणं कुर्याच्छालग्रामसमीपतः ॥१७॥स्नापयेत्प्रस्थपयसा नारायणमनामयम्॥गीतैर्वाद्यैश्च नैवेद्यैर्भक्ष्यैर्भोज्यैश्च केश
वम् ॥ १८ ॥ त्रिकालं पूजयेद्भक्त्या महालक्ष्म्या समन्वितम्॥पुनः कल्ये समुत्थाय कृत्वा कर्म यथोचितम् ॥१९॥ पूर्ववत्पूजयेद्देवं वाग्यतो नियतः
शुचिः ॥ पायसं घृतसंमिश्रं नालिकेरफलान्वितम्॥२०॥मन्त्रेणानेन विप्राय दद्याद्भक्त्या सदक्षिणम्॥केशवः केशिहा देवः सर्वसंपत्प्रदायकः ॥२१॥
परमान्नप्रदानेन मम स्यादिष्टदायकः ॥ ब्राह्मणान्भोजयेत्पश्चाच्छक्तितो बन्धुभिः सह ॥ २२॥ नारायणपरो भूत्वा स्वयं भुञ्जीत वाग्यतः ॥ इति यः
कुरुते भक्त्या केशवार्चनमुत्तमम् ॥ २३ ॥ स पौंडरीकयज्ञस्य फलमष्टगुणं लभेत् ॥ पौषमासे सिते पक्षे द्वादश्यां समुपोषितः ॥ २४ ॥ नमो नारा
यणायेति पूजयेत्प्रयतो हरिम् ॥ पयसा स्नाप्य नैवेद्यं पायसं च समर्पयेत् ॥ २५ ॥ रात्रौ जागरणं कुर्यात्रिकालार्चनतत्परः॥ धूपैर्दीपैश्च नैवेद्यैर्गन्धैः
पुष्पैर्मनोरमैः ॥ २६ ॥ तृणैश्च गीतवाद्याद्यैः स्तोत्रैश्चाप्यर्चयेद्धरिम् ॥ कृशरान्नं च विप्राय दद्यात्सघृतदक्षिणम् ॥ २७ ॥ सर्वात्मा सर्वलोकेशः सर्व
व्यापी सनातनः ॥ नारायणः प्रसन्नः स्यात्कृशरान्नप्रदानतः ॥२८॥ मंत्रेणानेन विप्राय दत्त्वा वै दानमुत्तमम् ॥द्विजांश्च भोजयेच्छक्त्या स्वयमद्यात्स
बान्धवः ॥ २९ ॥ एवं संपूजयेद्भक्त्या देवं नारायणं प्रभुम् ॥ अग्निष्टोमाष्टकफलं स संपूर्णमवाप्नुयात् ॥ ३० ॥ माघस्य शुक्लद्वादश्यां पूर्ववत्समुपो
षितः ॥ नमस्ते माधवायेति हुत्वाष्टौ च घृताहुतीः ॥ ३१ ॥ पूर्वमानेन पयसा स्नापयेन्माधवं तदा ॥ पुष्पगन्धाक्षतैरर्चेत्सावधानेन चेतसा ॥ ३२ ॥
रात्रौ जागरणं कुर्यात्पूर्ववद्भक्तिसंयुतः ॥ कल्यकर्म च निर्वर्त्य माधवं पुनरर्चयेत् ॥ ३३ ॥ प्रस्थं तिलानां विप्राय दद्याद्वै मन्त्रपूर्वकम् ॥ सदक्षिणं
सवस्त्रं च सर्वपापविमुक्तये ॥ ३४ ॥ माधवः सर्वभूतात्मा सर्वकर्मफलप्रदः ॥ तिलदानेन महता सर्वान्कामान्प्रयच्छतु ॥ ३५ ॥ मन्त्रेणानेन
विप्राय दत्त्वा भक्तिसमन्वितः ॥ ब्राह्मणान्भोजयेच्छक्त्या संस्मरन्माधवं प्रभुम् ॥ ३६ ॥ एवं यः कुरुते भक्त्या तिलदाने व्रतं मुने ॥ वाजपेय
शतस्यासौ संपूर्णं फलमाप्नुयात् ॥ ३७ ॥ फाल्गुनस्य सिते पक्षे द्वादश्यां समुपोषितः ॥ गोविन्दाय नमस्तुभ्यमिति संपूजयेद्व्रती ॥ ३८ ॥ अष्टो

त्तरशतं हुत्वा घृतमिश्रतिलाहुतीः ॥ पूर्वमानेन पयसा गोविन्दं स्नापयेच्छुचिः ॥ ३९ ॥ रात्रौ जागरणं कुर्यात्रिकालं पूजयेत्तथा ॥ प्रातःकृत्यं समाप्याथ गोविन्दं पूजयेत्पुनः ॥ ४० ॥ व्रीह्याढकं च विप्राय दद्याद्वस्त्रं सदक्षिणम् ॥ नमो गोविन्द सर्वेश गोपिकाजनवल्लभ ॥४२॥ अनेन धान्यदानेन प्रीतो भव जगद्गुरो॥एवं कृत्वा व्रतं सम्यक् सर्वपापविवर्जितः ॥ ४२ ॥ गोमेधमखजं पुण्यं सम्पूर्णं लभते नरः ॥ चैत्रमासे सिते पक्षे द्वादश्यां समुपोषितः ॥ ४३ ॥ नमोऽस्तु विष्णवे तुभ्यमिति पूर्ववदर्चयेत् ॥ क्षीरेण स्नापयेद्विष्णुं पूर्वमानेन शक्तितः ॥ ४४ ॥ तथैव स्नापयेद्विप्र घृतप्रस्थेन सादरम् ॥ कृत्वा जागरणं रात्रौ पूजयेत्पूर्ववद्व्रती ॥ ४५ ॥ ततः कल्ये समुत्थाय प्रातःकृत्यं समाप्य च ॥ अष्टोत्तरशतं हुत्वा मध्वाज्यतिलमिश्रितम् ॥ ४६ ॥ सदक्षिणं च विप्राय दद्याद्वै तण्डुलाढकम् ॥ प्राणरूपी महाविष्णुः प्राणदः सर्ववल्लभः ॥४७॥ तण्डुलाढकदानेन प्रीयतां मे जनार्दनः॥ एवं कृत्वा नरो भक्त्या सर्वपापविवार्जितः ॥ ४८ ॥ अत्याग्निष्टोमयज्ञस्य फलमष्टगुणं लभेत् ॥ वैशाखशुक्लद्वादश्यामुपोष्य मधुसूदनम् ॥ ४९ ॥ द्रोणक्षीरेण देवेशं स्नापयेद्भक्तिसंयुतः ॥ जागरं तत्र कर्त्तव्यं त्रिकालार्चनसंयुतम् ॥ ५० ॥ नमस्ते मधुहन्त्रे च जुहुयाच्छक्तितो घृतम्॥अष्टोत्तरशतं प्रार्च्य विधिवन्मधुसूदनम् ॥५१॥ विपापो ह्यश्वमेधानामष्टानां फलमाप्नुयात् ॥ ज्येष्ठमासे सिते पक्षे द्वादश्यामुपवासकृत् ॥ ४२ ॥ क्षीरेणाढकमानेन स्नापयेद्यस्त्रिविक्रमम् ॥ नमस्त्रिविक्रमायेति पूजयेद्भक्तिसंयुतः ॥ ५३ ॥ जुंहुयात्पायसेनैव ह्यष्टोत्तरशताहुतीः॥कृत्वा जागरणं रात्रौ पुनः पूजां प्रकल्पयेत् ॥ ५४ ॥ अपूपविंशतिं दत्त्वा ब्राह्मणाय सदक्षिणम् ॥ देवदेव जगन्नाथ प्रसीद परमेश्वर ॥ ५६ ॥ उपायनं च संगृह्य ममाभीष्टप्रदो भव ॥ ब्राह्मणान्भोजयेच्छक्त्या स्वयं भुञ्जीत वाग्यतः॥५६॥ एवं यः कुरुते विप्र व्रतं त्रैविक्रमं परम् ॥ सोऽष्टानां नरमेधानां विपापः फलमाप्नुयात्॥५७॥ आषाढशुक्लद्वादश्यामुपवासी जितेन्द्रियः ॥ वामनं पूर्वमानेन स्नापयेत्पयसा व्रती ॥ ५८ ॥ नमस्ते वामनायेति दूर्वाज्याष्टोत्तरं शतम् ॥ हुत्वा च जागरं कुर्याद्वामनं चार्चयेत्पुनः ॥ ५९ ॥ सदक्षिणं च दध्यन्नं नालिकेरफलान्वितम् ॥ भक्त्या प्रदद्याद्विप्राय वामनार्चनशीलिने ॥ ६० ॥ वामनो बुद्धिदो होता द्रव्यस्थो वामनः सदा ॥ वामनस्तारकोऽस्माच्च वामनाय नमो नमः ॥ ६१ ॥ अनेन दत्त्वा दध्यन्नं शक्तितो भोजयेद्द्विजान् ॥ कृत्वैवमग्निष्टोमानां शतस्य फलमाप्नुयात् ॥ ६२ ॥ श्रावणस्य सिते पक्षे द्वादश्यामुपवासकृत् ॥ क्षीरेण मधुमिश्रेण स्नापयेच्छ्रीधरं व्रती ॥ ६३ ॥ नमोऽस्तु श्रीधरायेति गन्धाद्यैः पूजयेत्क्रमात् ॥ जुहुयात्पृषदाज्येन शतमष्टोत्तरं मुने ॥ ६४ ॥ कृत्वा च जागरं रात्रौ पुनः पूजां प्रकल्पयेत् ॥ दातव्यं चैव विप्राय क्षीराढकमनुत्तमम् ॥ ६५ ॥ दक्षिणां च सवस्त्रां वै प्रदद्याद्धेमकुण्डले ॥ मन्त्रेणानेन विप्रेन्द्र सर्वकामार्थसिद्धये ॥ ६६ ॥

क्षीराब्धिशायिन्देवेश रमाकान्त जगत्पते ॥ क्षीरदानेन सुप्रीतो भव सर्वसुखप्रदः ॥६७॥ सुखप्रदत्वाद्विप्रांश्च भोजयेच्छक्तितो व्रती ॥ एवं कृत्वा
श्वमेधानां सहस्रस्य फलं लभेत् ॥ ६८ ॥ मासि भाद्रपदे शुक्ले द्वादश्यां समुपोषितः ॥ स्नापयेद्द्रोणपयसा हृषीकेशं जगद्गुरुम् ॥६९॥ हृषीकेश
नमस्तुभ्यमिति संपूजयेन्नरः ॥ चरुणा मधुयुक्तेन शतमष्टोत्तरं हुनेत् ॥ ७० ॥ जागरादीनि निर्वर्त्य दद्यादात्मविदे ततः ॥ सार्धाढकं च गोधूमान्द
क्षिणां हेम शक्तितः ॥ ७१ ॥ हृषीकेश नमस्तुभ्यं सर्वलोकैकहेतवे ॥ मह्यं सर्वसुखं देहि गोधूमस्य प्रदानतः ॥ ७२ ॥ भोजयेद्ब्राह्मणाञ्शक्त्या
स्वयं चाश्नीत वाग्यतः ॥ सर्वपापविनिर्मुक्तो ब्रह्ममेधफलं लभेत्॥७३॥आश्विने मासि शुक्लायां द्वादश्यां समुपोषितः॥पद्मनाभं च पयसा स्नापयेद्भक्तितः
शुचिः ॥ ७४ ॥ नमस्ते पद्मनाभाय होमं कुर्यात्स्वशक्तितः ॥ तिलव्रीहियवाज्यैश्च पूजयेच्च विधानतः॥७५॥ जागरं निशि निर्वर्त्य पुनः पूजां
समाचरेत् ॥ दद्याद्विप्राय कुडवं मधुनस्तु सदक्षिणम् ॥ ७६ ॥ पद्मनाभ नमस्तुभ्यं सर्वलोकपितामह ॥ मधुदानेन सुप्रीतो भव
सर्वसुखप्रदः ॥ ७७ ॥ एवं यः कुरुते भक्त्या पद्मनाभव्रतं सुधीः ॥ ब्रह्ममेधसहस्रस्य फलमाप्नोति निश्चितम् ॥ ७८ ॥ द्वादश्यां कार्तिके शुक्ले
उपवासी जितेन्द्रियः ॥ क्षीरेणाकढकमानेन दध्ना वाज्येन तावता ॥७९॥ नमो दामोदरायेति स्नापयेद्भक्तिभावतः ॥ अष्टोत्तरशतं हुत्वा मध्वाज्या
क्ततिलाहुतीः ॥ ८० ॥ जागरं नियतः कुर्यात्त्रिकालार्चनतत्परः ॥ प्रातः संपूजयेद्देवं पद्मपुष्पैर्मनोरमैः ॥ ८१ ॥ पुनरष्टोत्तरशतं जुहुयात्सघृतै
स्तिलैः ॥ पञ्चभक्ष्ययुतं चान्नं दद्याद्विप्राय भक्तितः ॥ ८२ ॥ दामोदर जगन्नाथ सर्वकारणकारण ॥ त्राहि मां कृपया देव शारणागतपालक ॥८३॥
अनेन दत्त्वा दानं च श्रोत्रियाय कुटुम्बिने॥ दक्षिणां च यथाशक्त्या ब्राह्मणांश्चापि भोजयेत्॥८४॥एवं कृत्वा व्रतं सम्यगश्नीयाद्बन्धुभिः सह॥अश्वमेध
सहस्राणां द्विगुणं फलमश्नुते ॥ ८५ ॥ एवं कुर्याद्व्रती यस्तु द्वादशीव्रतमुत्तमम् ॥ संवत्सरं मुनिश्रेष्ठ स याति परम पदम्॥८६॥ एकमासे द्विमासे
वा यः कुर्याद्भक्तितत्परः ॥ तत्तत्फलमवाप्नोति प्राप्नोति च हरेः पदम् ॥ ८७ ॥ पूर्णं संवत्सरं कृत्वा कुर्यादुद्यापनं व्रती ॥ मार्गशीर्षासिते पक्षे
द्वादश्यां च मुनीश्वर ॥ ८८ ॥ स्नात्वा प्रातर्यथाचारं दन्तधावनपूर्वकम् ॥ शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः ॥ ८९ ॥ मण्डपं कारयेद्दिव्यं चतु
रस्रं सुशोभनम् ॥ घण्टाचामरसंयुक्तं किङ्किणीरवशोभितम् ॥ ९० ॥ अलंकृतं पुष्पमाल्यैर्वितानध्वजराजितम् ॥ छादितं शुक्लवस्त्रेण दीपमालावि
भूषितम् ॥ ९१॥ तन्मध्ये सर्वतोभद्रं कुर्यात्सम्यगलंकृतम् ॥ तस्योपरि न्यसेत्कुम्भान्द्वादशाम्बुप्रपूरितान् ॥९२॥ एकेन शुक्लवस्त्रेण सम्यक्संशोधितेन
च ॥ सर्वानाच्छादयेत्कुम्भान्पञ्चरत्नसमन्वितान् ॥९३॥ लक्ष्मीनारायणं देव कारयेद्भक्तिमान्व्रती ॥ हेम्ना वा रजतेनापि तथा ताम्रेण वा द्विज॥९४॥

स्थापयेत्प्रतिमां तां च कुम्भोपरि सुसंयमी ॥ तन्मूल्यं वा द्विजश्रेष्ठ काञ्चनं च स्वशक्तितः ॥ ९५ ॥ सर्वव्रतेषु मतिमान्वित्तशाठ्यं विवर्ज
येत ॥ यदि कुर्यात्क्षयं यान्ति तस्यायुर्द्धनसंपदः ॥९६॥ अनन्तशायिनं देवं नारायणमनामयम् ॥ पञ्चामृतेन प्रथमं स्नापयेद्भक्तिसंयुतः ॥९७॥
नामभिः केशवाद्यैश्च ह्युपचारान्प्रकल्पयेत् ॥ रात्रौ जागरणं कुर्यात्पुराणश्रवणादिभिः ॥ ९८ ॥ जितनिद्रो भवेत्सम्यक्सोपवासो जितेन्द्रियः ॥
त्रिकालमर्चयेद्देवं यथाविभवविस्तरम् ॥ ९९ ॥ ततः प्रातः समुत्थाय प्रातः कृत्यं समाप्य च॥ तिलहोमान्व्याहृतिभिः सहस्रं कारयेद्द्विजैः ॥१००॥
ततः संपूजयेद्देवं गन्धपुष्पादिभिः क्रमात् ॥ देवस्य पुरतः कुर्यात्पुराणश्रवणं ततः ॥१०१॥ दद्याद्द्वादशविप्रेभ्यो दध्यन्नं पायसं तथा ॥ अपूपैर्दश
भिर्युक्तं सघृतं च सदक्षिणम्॥१०२॥देवदेव जगन्नाथ भक्तानुग्रहविग्रह॥ गृहाणोपायनं कृष्ण सर्वाभीष्टप्रदो भव॥१०३॥ अनेनोपायनं दत्त्वा प्रार्थये
त्प्राञ्जलिः स्थितः ॥ आधाय जानुनी भूमौ विनयावनतो व्रती ॥ १०४ ॥ नमो नमस्ते सुरराजराज नमोऽस्तु ते देव जगन्निवास ॥ कुरुष्व संपूर्ण
फलं ममाद्य नमोऽस्तु तुभ्यं पुरुषोत्तमाय॥१०५॥ इति संप्रार्थयेद्विप्रान्देवं च पुरुषोत्तमम् ॥ दद्यादर्घ्यं च देवाय महालक्ष्मीयुताय वै ॥ १०६ ॥
लक्ष्मीपते नमस्तुभ्यं क्षीरार्णवनिवासिने ॥ अर्घ्यं गृहाण देवेश लक्ष्म्या च सहितः प्रभो॥१०७॥यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥१०८॥ इति विज्ञाप्य देवेशं तत्सर्वं संयमी व्रते ॥ प्रतिमां दक्षिणायुक्तामाचार्याय निवेदयेत्॥१०९॥
ब्राह्मणान्भोजयेत्पश्चाच्छक्त्या दद्याच्च दक्षिणाम् ॥ भुञ्जीत वाग्यतः पश्चात्स्वय बंधुजनैर्वृतः ॥११०॥ आसायं शृणुयाद्विष्णोः कथां विद्वज्जनैः
सह ॥ इत्येवं कुरुते यस्तु मनुजो द्वादशीव्रतम् ॥ १११॥ सर्वान्कामान्स आप्नोति परत्रेह च नारद ॥ त्रिसप्तकुलसंयुक्तः सर्वपापविवर्जितः ॥
प्रयाति विष्णुभवनं यत्र गत्वा न शोचति ॥११२॥ य इदं शृणुयाद्विप्र द्वादशीव्रतमुत्तमम् ॥ वाचयेद्वापि स नरो वाजपेयफलं लभेत् ॥ ११३ ॥
इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे व्रताख्याने मार्गशीर्षशुक्लद्वादशीव्रतकथनं नाम सप्तदशोऽध्यायः ॥१७॥ सनक उवाच ॥ अन्यद्व्रतवरं
वक्ष्ये शृणुष्व मुनिसत्तम ॥ सर्वपापहरं पुण्यं सर्वदुःखनिबर्हणम् ॥ १ ॥ ब्राह्मणक्षत्रियविशां शूद्राणां योषितां तथा॥ समस्तकामफलदं सर्वव्रत
फलप्रदम् ॥ २ ॥ दुःस्वप्ननाशनं धर्म्यं दुष्टग्रहनिवारणम् ॥ सर्वलोकेषु विख्यातं पूर्णिमाव्रतमुत्तमम् ॥ येन चीर्णेन पापानां राशिकोटिः प्रशा
म्यति ॥३॥ मार्गशीर्षे सितपक्षे पूर्णायां नियतः शुचिः ॥स्नानं कुर्याद्यथाचारं दन्तधावनपूर्वकम् ॥४॥ शुक्लाम्बरधरः शुद्धो गृहमागत्य वाग्यतः ॥
प्रक्षाल्य पादावाचम्य स्मरन्नारायणं प्रभुम् ॥ ५ ॥ नित्यं देवार्चनं कृत्वा पश्चात्संकल्पपूर्वकम् ॥ लक्ष्मीनारायणं देवमर्चयेद्भक्तिभावतः ॥ ६ ॥

आवाहनासनाद्यैश्च गन्धपुष्पादिभिर्व्रती ॥ नमो नारायणायेति पूजयेद्भक्तितत्परः ॥७॥ गीतैर्वाद्यैश्च नृत्यैश्च पुराणपठनादिभिः ॥ स्तोत्रैर्वाराधयेद्देवं
व्रतकृत्सुसमाहितः॥८॥देवस्य पुरतः कृत्वा स्थण्डिलं चतुरस्रकम्॥अरत्निमात्रं तत्राग्निं स्थापयेद्गृह्यमार्गतः॥आज्यभागान्तपर्यन्तं कृत्वा पुरुषसूक्ततः॥
चरुणा च तिलैश्चापि घृतेन जुहुयात्तथा ॥ ९ ॥ एकवारं द्विवारं वा त्रिवारं वापि शक्तितः ॥ होमं कुर्यात्प्रयत्नेन सर्वपापनिवृत्तये ॥१०॥प्रायश्चित्ता
दिकं सर्वं स्वगृह्योक्तविधानतः ॥ समाप्य होमं विधिवच्छान्तिसूक्तं जपेद्बुधः ॥ ११ ॥ पश्चाद्देवं समागत्य पुनः पूजां प्रकल्पयेत् ॥ तथोपवासं
देवाय ह्यर्पयेद्भक्तिसंयुतः ॥ १२ ॥ पौर्णमास्यां निराहारः स्थित्वा देव तवाज्ञया ॥ भोक्ष्यामि पुण्डरीकाक्ष परेऽह्नि शरणं भव ॥१३ ॥ इति विज्ञाप्य
देवाय ह्यर्घ्यं दद्यात्तथैन्दवे॥जानुभ्यामवनीं गत्वा शुक्लपुष्पाक्षतान्वितः॥१४॥क्षीरोदार्णवसंभूत अत्रिगोत्रसमुद्भव ॥ गृहाणार्घ्यं मया दत्तं रोहिणीनायक
प्रभो॥ एवमर्घ्यं प्रदायेन्दोः प्रार्थयेत्प्राञ्जलिस्ततः॥१५॥ तिष्ठन्पूर्वमुखो भूत्वा पश्यन्निन्दुं च नारद ॥१६॥ नमः शुक्लांशवे तुभ्यं द्विजराजाय ते नमः॥ रोहि
णीपतये तुभ्यं लक्ष्मीभ्रात्रे नमोऽस्तु ते ॥ १७ ॥ ततश्च जागरं कुर्यात्पुराणश्रवणादिभिः ॥ जितेन्द्रियश्च संशुद्धः पाषण्डालोकवर्जितः ॥ १८ ॥
ततः प्रातः प्रकुर्वीत स्वाचारं च यथाविधि॥ पुनः संपूजयेद्देवं यथाविभवविस्तरम् ॥ १९ ॥ ब्राह्मणान्भोजयेच्छक्त्या ततश्च प्रयतो नरः ॥ बन्धु
भृत्यादिभिः सार्धं स्वयं भुञ्जीत वाग्यतः ॥ २० ॥ एवं पौषादिमासेषु पूर्णमास्यामुपोषितः ॥ अर्चयेद्भक्तिसंयुक्तो नारायणमनामयम् ॥
॥ २१ ॥ एवं संवत्सरं कृत्वा कार्तिक्यां पूर्णिमादिने ॥ उद्यापनं प्रकुर्वीत तद्विधानं वदामि ते ॥ २२ ॥मण्डपं कारयेद्दिव्यं चतुरस्रं सुमङ्गलम् ॥
शोभितं पुष्पमालाभिर्वितानध्वजराजितम् ॥ २३ ॥ बहुदीपसमाकीर्णं किङ्किणीजालशोभितम् ॥ दर्पणैश्चामरैश्चैव कलशैश्च समावृतम् ॥
॥ २४ ॥ तन्मध्ये सर्वतोभद्रं पञ्चवर्णविराजितम् ॥ जलपूर्णं ततः कुम्भं न्यसेत्तस्योपरि द्विज ॥ २५ ॥ पिधाय कुम्भं वस्त्रेण सुसूक्ष्मेणाति
शोभितम् ॥ हेम्ना वा रजतेनापि तथा ताम्रेण वा द्विज ॥ लक्ष्मीनारायणं देवं कृत्वा तस्योपरि न्यसेत् ॥ २६ ॥ पञ्चामृतेन संस्नाप्याभ्यर्च्य
गन्धादिभिः क्रमात् ॥ भक्ष्यैर्भोज्यादिनैवेद्यैर्भक्तितः संयतेन्द्रियः ॥ २७ ॥ जागरं च तथा कुर्यात्सम्यक्छ्रद्धासमन्वितः ॥ परेऽह्नि प्रातर्विधिव
त्पूर्ववाद्विष्णुमर्चयेत् ॥ २८॥ आचार्याय प्रदातव्या प्रतिमा दक्षिणान्विता ॥ ब्राह्मणान्भोजयेच्छक्त्या विभवे सत्यशारितम्॥२९॥ तिलदानं प्रकुर्वीत
यथाशक्त्या समाहितः ॥ कुर्यादग्नौ च विधिवत्तिलहोमं विचक्षणः ॥ ३० ॥ एवं कृत्वा नरः सम्यक् लक्ष्मीनारायणव्रतम् ॥ इह भुक्त्वा
महाभोगान्पुत्रपौत्रसमन्वितः ॥ ३१ ॥ सर्वपापविनिर्मुक्तः कुलायुतसमान्वितः ॥ प्रयाति विष्णुभवनं योगिनामपि दुर्लभम् ॥ ३२ ॥

इति श्रीवृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे व्रताख्याने मागशीर्षपौर्णिमायां लक्ष्मीनारायणव्रतं नामाष्टादशोऽध्यायः ॥ १८ ॥ सनक
उवाच ॥ अन्यद्व्रतं प्रवक्ष्यामि ध्वजारोपणसंज्ञितम् ॥ सर्वपापहरं पुण्यं विष्णुप्रीणनकारणम् ॥ १ ॥ यः कुर्याद्विष्णुभवने ध्वजारोपणमुत्त
मम् ॥ संपूज्यते विरिञ्च्याद्यैः किमन्यैर्बहुभाषितैः ॥ २ ॥ हेमभारसहस्रं तु यो ददाति कुटुम्बिने ॥ तत्फलं तुल्यमात्रं स्याद्ध्वजारोपणकर्मणः ॥
॥ ३ ॥ध्वजारोपणतुल्यं स्याद्गङ्गास्नानमनुत्तमम् ॥ अथवा तुलसीसेवा शिवलिङ्गप्रपूजनम् ॥४॥ अहोऽपूर्वमहोऽपूर्वमहोऽपूर्वमिदं द्विज ॥ सर्वपाप
हरं कर्म ध्वजारोपणसंज्ञितम् ॥५॥ सन्ति वै यानि कार्याणि ध्वजारोपणकर्मणि ॥ तानि सर्वाणि वक्ष्यामि शृणुष्व गदतो मम॥६॥कार्तिकस्य
सिते पक्षे दशम्यां प्रयतो नरः॥स्नानं कुर्यात्प्रयत्नेन दन्तधावनपूर्वकम्॥७॥एकाशी ब्रह्मचारी च स्वपेन्नारायणं स्मरन्॥धौताम्बरधरः शुद्धो विप्रो नारायणा
ग्रतः ॥८॥ ततः प्रातः समुत्थाय स्नात्वाचम्य यथाविधि ॥ नित्यकर्माणि निर्वर्त्य पश्चाद्विष्णुं समर्चयेत् ॥९॥ चतुर्भिर्ब्राह्मणैः सार्द्धं कृत्वा च स्वस्तिवाच
नम् ॥नान्दीश्राद्धं प्रकुर्वीत ध्वजारोपणकर्मणि॥१०॥ध्वजस्तम्भौ च गायत्र्या प्रोक्षयेद्वस्त्रसंयुतौ॥सूर्यं च वैनतेयं च हिमांशुं तत्परोऽर्चयेत्॥११॥धातारं च
विधातारं पूजयेद्ध्वजदण्डके॥हरिद्राक्षतगन्धाद्यैः शुक्लपुष्पैर्विशेषतः॥१२॥ततो गोचर्ममात्रं तु स्थण्डिलं चोपलिप्य वै॥आधायाग्निं स्वगृह्योक्त्या ह्याज्य
भागादिकं क्रमात् ॥१३ ॥ जुहुयात्पायसं चैव साज्यमष्टोत्तरं शतम् ॥ प्रथमं पौरुषं सूक्तं विष्णोर्नुकमिरावतीम् ॥ १४ ॥ ततश्च वैनतेयाय स्वाहे
त्यष्टाहुतीस्तथा ॥ सोमो धेनुमुदुत्यं च जुहुयाच्च ततो द्विज ॥१५॥ सौरमन्त्राञ्जपेत्तत्र शान्तिसूक्तानि शक्तितः ॥ रात्रौ जागरणं कुर्यादुपकण्ठं हरेः
शुचिः ॥१६॥ ततः प्रातः समुत्थाय नित्यकर्म समाप्य च ॥ गन्धपुष्पादिभिर्देवमर्चयेत्पूर्ववत्क्रमात् ॥ १७ ॥ ततो मङ्गलवाद्यैश्च सूक्तपाठैश्च शोभ
नम् ॥ नृत्यैश्च स्तोत्रपठनैर्नयेद्विष्णवालये ध्वजम् ॥ १८॥ देवस्य द्वारदेशे वा शिखरे वा मुदान्वितः॥सुस्थिरं स्थापयेद्विप्र ध्वजं सुस्तम्भसंयुतम्॥
॥ १९ ॥ गन्धपुष्पाक्षतैर्हेवं धूपदीपैर्मनोहरैः ॥ भक्ष्यभोज्यादिसंयुक्तैर्नैवेद्यैश्च हरिं यजेत् ॥२०॥ एवं देवालये स्थाप्य शोभनं ध्वजमुत्तमम् ॥ प्रद
क्षिणमनुव्रज्य स्तोत्रमेतदुदीरयेत् ॥ २१ ॥ नमस्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ॥ नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥ २२ ॥ येनेदम
खिलं जातं यत्र सर्वं प्रतिष्ठितम् ॥ लयमेष्यति यत्रैवं तं प्रपन्नोऽस्मि केशवम् ॥ २३ ॥ न जानन्ति परं भावं यस्य ब्रह्मादयः सुराः ॥ योगिनो
यं न पश्यन्ति तं वन्दे ज्ञानरूपिणम् ॥ २४ ॥ अन्तरिक्षं तु यन्नाभिर्द्यौर्मूर्द्धा यस्य चैव हि॥पादोऽभूद्यस्य पृथिवी तं वन्दे विश्वरूपिणम् ॥२५॥ यस्य
श्रोत्रे दिशः सर्वा यच्चक्षुर्दिनकृच्छशी ॥ऋक्सामयजुषी येन तं वन्दे ब्रह्मरूपिणम् ॥२६॥ यन्मुखाद्ब्राह्मणा जाता यद्बाहोरभवन्नृपाः ॥ वैश्या यस्यो

रुतो जाताः पद्भ्यां शूद्रो व्यजायत ॥ २७ ॥ मायासङ्गममात्रेण वदन्ति पुरुषं त्वजम् ॥ स्वभावविमल शुद्धं निर्विकारं निरञ्जनम् ॥२८ ॥क्षीराब्धि
शायिनं देवमनन्तमपराजितम्॥सद्भक्तवत्सलं विष्णुं भक्तिगम्यं नमाम्यहम् ॥२९॥ पृथिव्यादीनि भूतानि तन्मात्राणींन्द्रियाणि च॥सूक्ष्मासूक्ष्माणि
येनासंस्तं वन्दे सर्वतोमुखम् ॥३०॥ यद्ब्रह्म परमं धाम सर्वलोकोत्तमोत्तमम् ॥ निर्गुणं परमं सूक्ष्मं प्रणतोऽस्मि पुनः पुनः ॥ ३१ ॥ अविकारमजं
शुद्धं सर्वतोबाहुमीश्वरम्॥ यमामनन्ति योगीन्द्राः सर्वकारणकारणम् ॥३२॥ यो देवः सर्वभूतानामन्तरात्मा जगन्मयः ॥ निर्गुणः परमात्मा च स
मे विष्णुः प्रसीदतु ॥ ३३ ॥ हृदयस्थोऽपि दूरस्थो मायया मोहितात्मनाम् ॥ ज्ञानिनां सर्वगो यस्तु स मे विष्णुः प्रसीदतु ॥ ३४ ॥ चतुर्भिश्च
चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ॥ हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥ ३५ ॥ ज्ञानिनां कर्मिणां चैव तथा भक्तिमतां नृणाम् ॥ गतिदाता
विश्वमृग्यः स मे विष्णुः प्रसीदतु॥३६॥जगद्धितार्थं ये देहा ध्रियन्ते लीलया हरेः॥तानर्चयन्ति विबुधाः स मे विष्णुः प्रसीदतु॥३७॥यमामनन्ति वै
सन्तः सच्चिदानन्दविग्रहम्॥निर्गुणं च गुणाधारं स मे विष्णुः प्रसीदतु॥३८॥इति स्तुत्वा नमेद्विष्णुं ब्राह्मणांश्च प्रपूजयेत्॥आचार्यं पूजयेत्पश्चाद्दक्षिणाच्छा
दनादिभिः॥३९॥ब्राह्मणान्भोजयेच्छक्त्या भक्तिभावसमन्वितः॥पुत्रमित्रकलत्राद्यैः स्वयं च सह बन्धुभिः॥४०॥कुर्वीत पारणं विप्र नारायणपरायणः॥
यस्त्वेतत्कर्म कुर्वीत ध्वजारोपणमुत्तमम् ॥ तस्य पुण्यफलं वक्ष्ये शृणुष्व सुसमाहितः ॥ ४१ ॥ पटो ध्वजस्य विप्रेन्द्र यावच्चलति वायुना ॥तावन्ति
पापजालानि नश्यन्त्येव न संशयः ॥ ४२ ॥ महापातकयुक्तो वा युक्तो वा सर्वपातकैः ॥ ध्वजं विष्णुगृहे कृत्वा मुच्यते सर्वपातकैः ॥ ४३ ॥ याव
द्दिनानि तिष्ठत ध्वजो विष्णुगृहे द्विज ॥ तावद्युगसहस्राणि हरिसारूप्यमश्नुते ॥ ४४॥ आरोपितं ध्वजं दृष्ट्वा येऽभिनन्दन्ति धार्मिकाः ॥ तेऽपि सर्वे
प्रमुच्यन्ते महापातककोटिभिः ॥४५॥ आरोपितो ध्वजो विष्णुगृहे धुन्वन्पटं स्वकम् ॥ कर्तुः सर्वाणि पापानि धुनोति निमिषार्द्धतः ॥४६॥ यस्त्वा
रोप्य गृहे विष्णोर्ध्वजं नित्यमुपाचरेत् ॥ स देवयानेन दिवं यातीव सुमतिर्नृपः ॥ ४७ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे [illegible]पादे व्रताख्याने
ध्वजारोपणन्नामैकोनविंशोऽध्यायः ॥ १९ ॥ नारद उवाच ॥ भगवन्सर्वधर्मज्ञ सर्वशास्त्रार्थपारग ॥ सर्वकर्मवरिष्ठं च त्वयोक्तं ध्वजधारणम् ॥ १ ॥
यस्तु वै सुमतिर्नाम ध्वजारोपपरो मुने ॥ त्वयोक्तस्तस्य चरितं विस्तरेण ममादिश॥२॥सनक उवाच ॥ शृणुष्वैकमनाः पुण्यमितिहासं पुरातनम् ॥
ब्रह्मणा कथितं मह्यं सर्वपापप्रणाशनम् ॥ ३ ॥ आसीत्पुरा कृतयुगे सुमतिर्नाम भूपतिः ॥ सोमवंशोद्भवः श्रीमान्सप्तदीपैकनायकः ॥ ४ ॥ धर्मात्मा
सत्यसंपन्नः शुचिवंश्योऽतिथिप्रियः ॥ सर्वलक्षणसंपन्नः सर्वसंपद्विभूषितः ॥५॥सदा हरिकथासेवी हरिपूजापरायणः ॥ हरिभक्तिपराणां च शुश्रूषुर्निरहं

कृतिः ॥ ६ ॥ पूज्यपूजारतो नित्यं समदर्शी गुणान्वितः ॥ सर्वभूतहितः शान्तः कृतज्ञः कीर्तिमांस्तथा ॥ ७ ॥ तस्य भार्या महाभागा सर्वलक्षणसं
युता ॥ पतिव्रता पतिप्राणा नाम्ना सत्यमतिर्मुने ॥ ८ ॥ तावुभौ दम्पती नित्यं हरिपूजापरायणौ॥ जातिस्मरौ महाभागौ सत्यज्ञौ सत्परायणौ॥९॥
अन्नदानरतौ नित्यं जलदानपरायणौ ॥ तडागारामवप्रादीनसंख्यातान्वितेनतुः ॥ १० ॥ सा तु सत्यमतिर्नित्यं शुचिर्विष्णुगृहे सती ॥नृत्यत्यत्यन्त
सन्तुष्टा मनोज्ञा मञ्जुवादिनी ॥ ११ ॥ सोऽपि राजा महाभागो द्वादशीद्वादशीदिने ॥ ध्वजमारोपयत्येव मनोज्ञं बहुविस्तरम् ॥ १२ ॥ एवं
हरिपरं नित्यं राजानं धर्मकोविदम् ॥ प्रियां सत्यमतिं चास्य देवा अपि सदास्तुवन् ॥ १३ ॥ त्रिलोके विश्रुतौ ज्ञात्वा दम्पती धर्मको
विदौ ॥ आययौ बहुभिः शिष्यैर्द्रष्टुकामो विभाण्डकः ॥ १३ ॥ तमायांतं मुनिं श्रुत्वा स तु राजा विभाण्डकम् ॥ प्रत्युद्ययौ सपत्नीकः पूजा
भिर्बहुविस्तरम् ॥ १५ ॥ कृतातिथ्यक्रियं शान्तं कृतासनपरिग्रहम् ॥ नीचासनस्थितो भूपः प्राञ्जलिर्मुनिमब्रवीत् ॥ १६ ॥ राजो
वाच ॥ भगवन्कृतकृत्योऽस्मि त्वदभ्यागमनेन वै ॥ सतामागमनं सन्तः प्रशंसन्ति सुखावहम् ॥ १७ ॥ यत्र स्यान्महतां प्रेम तत्र स्युः सर्व
सम्पदः ॥ तेजः कीर्तिर्धनं पुत्रा इति प्राहुर्विपश्चितः ॥ १८ ॥ तत्र वृद्धिमुपायान्ति श्रेयांस्यनुदिनं मुने ॥ यत्र सन्तः प्रकुर्वन्ति महतीं करुणां प्रभो
॥१९ ॥ यो मूर्ध्नि धारयेद्ब्रह्मन्महत्पादजलं रजः ॥ स स्नातः सर्वतीर्थेषु पुण्यात्मा नात्र संशयः ॥ २० ॥ मम पुत्राश्च दाराश्च संपत्त्वयि समर्पिताः॥
मामाज्ञापय विप्रेन्द्र किं प्रियं करवाणि ते ॥ २१ ॥ विनयावनतं भूपं स निरीक्ष्य मुनीश्वरः ॥ स्पृशन्करेण तं प्रीत्या प्रत्युवाचातिहर्षितः ॥ २२॥
ऋषिरुवाच ॥ राजन्यदुक्तं भवता तत्सर्वं त्वत्कुलोचितम् ॥ विनयावनतः सर्वो बहुश्रयो लभेदिह ॥ २३ ॥ धर्मश्चार्थश्च कामश्च मोक्षश्च
नृपसत्तम ॥ विनयाल्लभते मर्त्यो दुर्लभं किं महात्मनाम् ॥ २४ ॥प्रीतोऽस्मि तव भूपाल सन्मार्गपरिवर्त्तिनः ॥ स्वस्ति ते सततं भूयाद्यत्पृच्छामि
तदुच्यताम् ॥ २५ ॥ पूजा बहुविधाः सन्ति हरितुष्टिविधायिकाः ॥ तासु नित्यं ध्वजारोपे वर्त्तसे त्वं सदोद्यतः ॥ २६ ॥ भार्यापि तव
साध्वीयं नित्यं नृत्यपरायणा ॥ किमर्थमेतद्वृत्तान्तं यथावद्वक्तुमर्हसि ॥ २७ ॥ राजोवाच ॥ शृणुष्व भगवन्सर्वं यत्पृच्छसि वदामि तत् ॥
आश्चर्यभूतं लोकानामावयोश्चरितं त्विह ॥ २८ ॥ अहमासं पुरा शूद्रो मालिनिर्नाम सत्तम ॥ कुमार्गनिरतो नित्यं सर्वलोकाहिते रतः ॥२९ ॥
पिशुनो धर्मविद्वेषी देवद्रव्यापहारकः ॥ गोघ्नश्च ब्रह्महा चौरः सर्वप्राणिवधे रतः ॥ ३० ॥ नित्यं निष्ठुरवक्ता च पापी वेश्यापरायणः ॥ एवं
स्थितः कियत्कालमनादृत्य महद्वचः ॥३१॥ सर्वबन्धुपरित्यक्तो दुःखी वनमुपागतः ॥ मृगमांसाशनो नित्यं तथा पान्थविलुम्पकः॥३२॥एकाकी

दुःखबहुलो न्यवसन्निर्जने वने ॥एकदा क्षुत्परिश्रान्तो निदाघार्त्तः पिपासितः ॥३३॥ जीर्णं देवालयं विष्णोरपश्यं विजने वने ॥ हंसकारण्डवाकीर्णं
तत्समीपे महत्सरः ॥३४॥ पर्यन्तवनपुष्पौघच्छादितं तन्मुनीश्वर ॥ अपिबं तत्र पानीयं तत्तीरे विगतश्रमः ॥ ३५ ॥ फलानि जग्ध्वा शीर्णानि
स्वय क्षुच्च निवारिता ॥ तस्मिञ्जीर्णालये विष्णोर्निवासं कृतवानहम् ॥ ३६ ॥ जीर्णस्फुटितसंधानं तस्य नित्यमकारिषम् ॥ पर्णैस्तृणैश्च काष्ठौघै
र्गृहं सम्यक् प्रकल्पितम् ॥ ३७ ॥ स्वसुखार्थं तु तद्भूमिर्मया लिप्ता मुनीश्वर ॥ तत्राहं व्याधवृत्तिस्थो हत्वा बहुविधान्मृगान् ॥३८ ॥ आजीवं वर्तय
न्नित्यं वर्षाणां विंशतिः स्थितः ॥ अथेयमागता साध्वी विन्ध्यदेशसमुद्भवा॥३९॥निषादकुलजा विप्र नाम्ना ख्याताऽवकोकिला ॥बन्धुवर्गपरित्यक्ता
दुःखिता जीर्णविग्रहा॥४०।क्षुत्तृड्घर्मपरिश्रान्ता शोचन्ती स्वकृतं ह्यघम्॥दैवयोगात्समायाता भ्रमन्ती विजने वने॥४१॥ग्रीष्मतापार्दिता बाह्ये स्वान्ते
चाधिनिपीडिता॥इमां दुःखार्दितां दृष्ट्वा जाता मे विपुला दया॥४२॥दत्तं मया जलं चास्यै मांसं वन्यफलानि च॥गतश्रमा त्वियं ब्रह्मन्मया पृष्टा यथा
तथम्॥४३॥अवेदयत्स्ववृत्तान्तं तच्छृणुष्व महामुने॥नाम्नावकोकिला चाहं निषादकुलसम्भवा॥४४॥दारुकस्य सुता चाहं विन्ध्यपर्वतवासिनी ॥ पर
स्वहारिणी नित्यं सदा पैशुन्यवादिनी॥४५॥ पुंश्चलीत्येवमुक्त्वा तु बन्धुवर्गैः समुज्झिता ॥ कियत्कालं ततः पत्या भृताहं लोकनिन्दिता ॥४६॥दैवा
त्सोऽपि गतो लोकं यमस्यात्र विहाय माम् ॥ कान्तारे विजने चैका भ्रमन्ती दुःखपीडिता ॥४७ ॥ दैवात्त्वत्सविधं प्राप्ता जीविताहं त्वयाधुना ॥
इत्येवं स्वकृतं कर्म मह्यं सर्वं न्यवेदयत् ॥४८॥ ततो देवालये तस्मिन्दम्पतीभावमाश्रितौ ॥ स्थितौ वर्षाणि दश च आवां मांसफलाशिनौ॥४९ ॥
एकदा मद्यपानेन प्रमत्तौ निर्भरं मुने ॥ तत्र देवालये रात्रौ मुदितौ मांसभोजनात् ॥ ५० ॥ तनुवस्त्रापरिज्ञानौ नृत्यं चक्रुव मोहितौ ॥ प्रारब्धकर्म
भोगान्तमावां युगपदागतौ ॥ ॥५१॥ यमदूतास्तदायाताः पाशहस्ता भयंकराः ॥ नेतुमावां मृत्यरतौ सुघोरां यमयातनाम् ॥ ५२ ॥ ततः प्रसन्नो
भगवान्कर्मणा मम मानद ॥ देवावसथसंस्कारसंज्ञितेन कृतेन नः॥ ५३ ॥ स्वदूतान्प्रेषयामास स्वभक्तावनतत्परः ॥ ते दूता देवदेवस्य शङ्खचक्र
गदाधराः ॥ ५४ ॥ सहस्रसूर्यसंकाशाः सर्वे चारुचतुर्भुजाः ॥ किरीटकुण्डलधरा हारिणो वनमालिनः ॥५५॥ दिशो वितिमिरा विप्र कुर्वन्तः स्वेन
तेजसा ॥ भयंकरान्पाशहस्तान्दंष्ट्रिणो यमकिङ्करान् ॥ ५६ ॥ आवयोर्ग्रहणे यत्तानूचुः कृष्णपरायणाः ॥ ५७ ॥ विष्णुदूता ऊचुः ॥ भो भो क्रूरा
दुराचारा विवेकपरिवर्जिताः ॥ मुञ्चध्वमेतौ निष्पापौ दम्पती हरिवल्लभौ ॥ ५८ ॥ विवेकस्त्रिषु लोकेषु संपदाद्यादिकारणम् ॥ अपापे पापधीर्यस्तु
तं विद्यात्पुरुषाधमम् ॥५९॥ पापे त्वपापधीर्यस्तु तं विद्यादधमाधमम् ॥ ६०॥ यमदूता ऊचुः ॥ युष्माभिः सत्यमेवोक्तं किं त्वेतौ पापिसत्तमौ ॥

यमेन पापिनो दण्ड्यास्तन्नेष्यामो वयं त्विमौ ॥६१॥ श्रुतिप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ॥ धर्माधर्मविवेकोऽयं तन्नेष्यामो यमान्तिकम्॥६२॥
एतच्छ्रुत्वातिकुपिता विष्णुदूता महौजसः ॥ प्रत्यूचुस्तान्यमभटानधर्मे धर्ममानिनः ॥६३॥ विष्णदूता ऊचुः॥ अहो कष्टं धर्मदृशामधर्मः स्पृशते
सभाम् ॥ सम्यग्विवेकशून्यानां निदानं ह्यापदां महत् ॥ ६४ ॥ तर्कणाद्यविशेषेण नरकाध्यक्षतां गताः ॥ यूयं किमर्थमद्यापि कर्त्तुं पापानि
सोद्यमाः ॥ ६५ ॥ स्वकर्मक्षयपर्यन्तं महापातकिनोऽपि च ॥ तिष्ठन्ति नरके घोरे यावच्चन्द्रार्कतारकम् ॥ ६६ ॥पूर्वसंचितपापानामदृष्ट्वा निष्कृतिं
वृथा ॥ किमर्थं पापकर्माणि करिष्येऽथ पुनः पुनः ॥ ६७ ॥ श्रुतिप्रणिहितो धर्मः सत्यं सत्यं न संशयः ॥ किन्त्वाभ्यां चरितान्धर्मान्प्रवक्ष्यामो
यथातथम् ॥६८॥एतौ पापविनिर्मुक्तौ हरिशुश्रूषणे रतौ ॥ हरिणा त्रायमाणौ च मुञ्चध्वमविलम्बितम्॥६९॥एषा च नर्तनं चक्रे तथैष ध्वजरोपणम्॥
अन्तकाले विष्णुगृहे तेन निष्पापतां गतौ ॥ ७० ॥ अन्तकाले तु यन्नाम श्रुत्वोक्त्वापि च वै सकृत् ॥ लभते परमं स्थानं किमु शुश्रूषणे रताः ॥
॥ ७१ ॥ महापातकयुक्तो वा युक्तो वाप्युपपातकैः ॥ कृष्णसेवी नरोऽन्तेऽपि लभते परमां गतिम् ॥ ७२ ॥ यतीनां विष्णुभक्तानां परिचर्या
परायणाः ॥ ॥ ते दूताः सहसा यान्ति पापिनोऽपि परां गतिम् ॥ ७३ ॥ मुहूर्तं वा मुहूर्तार्द्धं यस्तिष्ठेद्धरिमन्दिरे ॥ सोऽपि याति परं स्थानं किमु
द्वात्रिंशवत्सरान् ॥ ७४ ॥ उपलेपनकर्त्तारौ संमार्जनपरायणौ ॥ एतौ हरिगृहे नित्यं जीर्णशीर्णाधिरोपकौ ॥ ७५ ॥ जलसेचनकर्त्तारौ दीपदौ
हरिमन्दिरे ॥ कथमेतौ महाभागौ यातनाभोगमर्हथ ॥ ७६ ॥ इत्युक्त्वा विष्णुदूतास्ते च्छित्वा पाशांस्तदैव हि ॥ आरोप्यावां विमानाग्र्यं ययु
र्विष्णोः परं पदम् ॥ ७७ ॥ तत्र सामीप्यमापन्नौ देवदेवस्य चक्रिणः ॥ दिव्यान्भोगान्भुक्तवन्तौ तावत्कालं मुनीश्वर ॥ ७८ ॥ दिव्यान्भो
गांस्तु तत्रापि भुक्त्वा यातौ महीमिमाम् ॥ अत्रापि संपदतुला हरिसेवाप्रसादतः ॥७९ ॥ अनिच्छया कृतेनापि सेवनेन हरेर्मुने ॥ प्राप्तमीदृक् फलं
विप्र देवानामपि दुर्लभम् ॥ ८० ॥ इच्छयाराध्य विश्वेशं भक्तिभावेन माधवम् ॥ प्राप्स्यावः परमं श्रेय इति हेतुर्निरूपितः ॥ ८१ ॥ अवशेनापि
यत्कर्म कृतं स्यात्सुमहत्फलम् ॥ जायते भूमिदेवेन्द्र किं पुनः श्रद्धया कृतम् ॥८२ ॥ एतदुक्तं निशम्यासौ स मुनीन्द्रो विभाण्डकः ॥ प्रशस्य
दम्पती तौ तु प्रययौ स्वतपोवनम् ॥ ८३ ॥ तस्माज्जानीहि देवर्षे देवदेवस्य चक्रिणः ॥ परिचर्या तु सर्वेषां कामधेनूपमा स्मृता ॥ ८४ ॥
हरिपूजापराणां तु हरिरेव सनातनः ॥ ददाति परमं श्रेयः सर्वकामफलप्रदः ॥ ८५ ॥ य इदं पुण्यमाख्यानं सर्वपापप्रणाशनम् ॥ पठेच्च शृणु
याद्वापि सोऽपि याति परां गतिम् ॥ ८६ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे सुमतिभूपकथावर्णनं नाम विंशोऽध्यायः ॥ २० ॥

॥ सनक उवाच ॥ अन्यद्व्रतं प्रवक्ष्यामि शृणु नारद तत्त्वतः ॥ दुर्लभं सर्वलोकेषु विख्यातं हरिपञ्चकम् ॥ १ ॥ नारीणां च नराणां च
सर्वदुःखनिवारणम् ॥ धर्मकामार्थमोक्षाणां निदानं मुनिसत्तम ॥ २ ॥ सर्वाभीष्टप्रदं चैव सर्वव्रतफलप्रदम् ॥ मार्गशीर्षे सिते पक्षे दशम्यां
नियतेन्द्रियः ॥ ३ ॥ कुर्यात्स्नानादिकं कर्म दन्तधावनपूर्वकम् ॥ कृत्वा देवार्चनं सम्यक्तथा पञ्च महाध्वसन् ॥ ४ ॥ एकाशी च भवेत्तस्मिन्
दिने नियममास्थितः ॥ ततः प्रातः समुत्थाय ह्येकादश्यां मुनीश्वरः ॥ ५ ॥ स्नानं कृत्वा यथाचारं हरिं चवार्चद्गृहे ॥ स्नापयेद्देवदेवेशं पञ्चा
मृतविधानतः ॥ ६ ॥ अर्चयेत्परया भक्त्या गन्धपुष्पादिभिः क्रमात् ॥ धूपैर्दीपैश्च नैवेद्यैस्ताम्बूलैश्च प्रदक्षिणैः ॥ ७ ॥ संपूज्य देवदेवेश
मिमं मन्त्रमुदीरयेत् ॥ नमस्ते ज्ञानरूपाय ज्ञानदाय नमोऽस्तु ते ॥ ८ ॥ नमस्ते सर्वरूपाय सर्वसिद्धिप्रदायिने ॥ एवं प्रणम्य देवेशं वासुदेवं
जनार्दनम् ॥९॥ वक्ष्यमाणेन मन्त्रेण ह्युपवासं समर्पयेत् ॥ पञ्चरात्रं निराहारो ह्यद्यप्रभृति केशव ॥१०॥ त्वदज्ञया जगत्स्वामिन्ममाभीष्टप्रदो भव ॥
एव समर्प्य देवस्य उपवासं जितेन्द्रियः ॥११॥ रात्रौ जागरणं कुर्यादेकादश्यामथो द्विज ॥ द्वादश्यां च त्रयोदश्यां चतुर्दश्यां जितेन्द्रियः ॥१२॥
पौर्णमास्यां च कर्त्तव्यमेवं विष्ण्वर्चनं मुने ॥ एकादश्यां पौर्णमास्यां कर्त्तव्यं जागरं तथा ॥ १३॥ पञ्चामृतादिपूजा तु सामान्या दिनपञ्चसु ॥
क्षीरेण स्नापयेद्विष्णुं पौर्णमास्यां तु शक्तितः तिलहोमश्च कर्त्तव्यस्तिलदानं तथैव च ॥ १४ ॥ ततः षष्ठे दिने प्राप्ते निर्वर्त्य स्वाश्रमक्रियाम् ॥
संप्राश्य पञ्चगव्यं च पूजयेद्विधिवद्धरिम् ॥ १५ ॥ ब्राह्मणान्भोजयेत्पश्चाद्विभवे सत्यवारितम् ॥ ततः स्वबन्धुभिः सार्द्धं स्वयं भुञ्जीत वाग्यतः ॥१६॥
एवं पौषादिमासेषु कार्त्तिकान्तेषु नारद ॥ शुक्लपक्षे व्रतं कुर्यात्पूर्वोक्तविधिना नरः ॥ १७ ॥ एवं संवत्सरं कार्यं व्रतं पापप्रणाशनम् ॥ पुनः प्राप्ते
मार्गशीर्षे कुर्यादुद्यापनं व्रती ॥ १८ ॥ एकादश्यां निराहारो भवेत्पूर्वमिव द्विज ॥ द्वादश्यां पञ्चगव्यं च प्राशयेत्सुसमाहितः ॥ १९ ॥ गन्धपुष्पा
दिभिः सम्यग्देवदेवं जनार्दनम् ॥ अभ्यर्च्योपायनं दद्याद्ब्राह्मणाय जितेन्द्रियः ॥ २० ॥ पायसं मधुसंमिश्रं घृतयुक्तं फलान्वितम् ॥ सुगन्धज
लसंयुक्त पूर्णकुम्भं सदक्षिणम् ॥ २१ ॥ वस्त्रेणाच्छादितं कुम्भं पञ्चरत्नसमन्वितम् ॥ दद्यादध्यात्मविदुषे ब्राह्मणाय मुनीश्वर ॥ २२ ॥ सर्वात्मन्
सर्वभूतेश सर्वव्यापिन्सनातन ॥ परमान्नप्रदानेन सुप्रीतो भव माधव ॥ २३ ॥ अनेन पायसं दत्त्वा ब्राह्मणान्भोजयेत्ततः ॥ शक्तितो बन्धुभिः
सार्द्धं स्वयं भुञ्जीत वाग्यतः ॥ २४ ॥ व्रतमेतत्तु यः कुर्याद्धरिपञ्चकसंज्ञितम् ॥ न तस्य पुनरावृत्तिर्ब्रह्मलोकात्कदाचन ॥ २५ ॥ व्रतमेतत्प्रकर्त्तव्य
मिच्छद्भिर्मोक्षमुत्तमम् ॥ समस्तपापकान्तारदावानलसमं द्विज ॥ २६ ॥ गवां कोटिसहस्राणि दत्त्वा यत्फलमाप्नुयात् ॥ तत्फलं लभ्यते पुम्भिरेतस्मा

दुपवासतः ॥२७॥ यस्त्वेतच्छृणुयाद्भक्त्या नारायणपरायणः ॥ स मुच्यते महाघोरैः पातकानां च कोटिभिः ॥ २८ ॥ इति श्रीबृहन्नारदीयपुराणे
पूर्वभागे प्रथमपादे व्रताख्याने मार्गशीर्षशुक्लैकादशीमारभ्य पौर्णिमापर्यन्तं पञ्चरात्रिव्रतं नामैकविंशोऽध्यायः ॥ २१ ॥॥ सनक उवाच ॥ अन्यद् व्रत
वरं वक्ष्ये तच्छृणुष्व समाहितः ॥ सर्वपापहरं पुण्यं सर्वलोकोपकारकम् ॥ १ ॥ आषाढ़े श्रावणे वापि तथा भाद्रपदेऽपि च ॥ तथैवाश्विनके मासे
कुर्यादेतद्व्रतं द्विज ॥ २ ॥ एतेष्वन्यतमे मासे शुक्लपक्षे जितेन्द्रियः ॥ प्राशयेत्पञ्चगव्यं च स्वपेद्विष्णुसमीपतः ॥ ३ ॥ ततः प्रातः समुत्थाय नित्य
कर्म समाप्य च ॥ श्रद्धया पूजयेद्विष्णुं वशी क्रोधविवर्जितः ॥ ४ ॥ विद्वद्भिः सहितो विष्णुमर्चयित्वा यथोचितम् ॥ संकल्पं तु ततः कुर्यात्स्वस्ति
वाचनपूर्वकम् ॥५॥ मासमेकं निराहारो ह्यद्यप्रभृति केशव ॥ मासान्तं पारणं कुर्वे देवदेव तवाज्ञया ॥ ६ ॥ तपोरूप नमस्तुभ्यं तपसां फल
दायक ॥ ममाभीष्टप्रदं देहि सर्वविघ्नान्निवारय ॥ ७ ॥ एवं समर्प्य देवस्य विष्णोर्मासव्रतं शुभम् ॥ ततः प्रभृति मासान्तं निवसेद्धरिमन्दिरे
॥ ८ ॥ प्रत्यहं स्नापयेद्देवं पञ्चामृतविधानतः ॥ दीपं निरन्तरं कुर्यात्तस्मिन्मासे हरेर्गृहे ॥ ९ ॥ प्रत्यहं खादयेत्काष्ठं ह्यपामार्ग
समुद्भवम् ॥ ततः स्नायीत विधिन्नारायणपरायणः ॥ १० ॥ ततः संस्नापयेद्विष्णुं पूर्ववत्प्रयतोऽर्चयेत् ॥ ब्राह्मणान्भोजयेच्छक्त्या भक्तियुक्तः सद
क्षिणम् ॥ ११ ॥ स्वयं च बन्धुभिः सार्द्धं भुञ्जीत प्रयतेन्द्रियः ॥ एवं मासोपवासांश्च व्रती कुर्यात्त्रयोदश ॥ १२ ॥ वर्षान्ते वेदविदुषे गां प्रदद्यात्स
दक्षिणाम् ॥ भोजयेद्ब्राह्मणांस्तत्र द्वादशैव विधानतः ॥ शक्त्या च दक्षिणां दद्याद्ब्राह्मण्याभरणानि च ॥ १३ ॥ मासोपवासत्रितयं यः कुर्यात्संयते
न्द्रियः ॥ आप्तोर्यामस्य यज्ञस्य द्विगुणं फलमश्नुते ॥ १४ ॥ चतुः कृत्वः कृतं येन पाराकं मुनिसत्तम ॥ स लभेत्परमं पुण्यमष्टाग्निष्टोमसंभवम् ॥ १५ ॥
पञ्चकृत्वो व्रतमिदं कृतं येन महात्मना ॥ अत्यग्निष्टोमजं पुण्यं द्विगुणं प्राप्नुयान्नरः ॥ १६ ॥ मासोपवासषट्कं यः करोति सुसमाहितः ॥ ज्योतिष्टो
स्यम यज्ञस्य फलं सोऽष्टगुणं लभेत् ॥ १७ ॥ निराहारः सप्तकृत्वो नरो मासोपवासकान् ॥ अश्वमेधस्य यज्ञस्य फलमष्टगुणं लभेत् ॥ १८ ॥ मासो
पवासान्यः कुर्यादष्टकृत्वो मुनीश्वर ॥ नरमेधाख्ययज्ञस्य फलं पञ्चगुणं लभेत् ॥ १९ ॥ यस्तु मासोपवासांश्च नवकृत्वः समाचरेत् ॥ गोमेधमखजं
पुण्यं लभते त्रिगुणं नरः ॥ २० ॥ दशकृत्वस्तु यः कुर्यात्पराकं मुनिसत्तम ॥ स ब्रह्ममेधयज्ञस्य त्रिगुणं फलमश्नुते ॥ २१ ॥ एकादश पराकांश्च यः
कुर्यात्संयतेन्द्रियः ॥ स याति हरिसारूप्यं सर्वभोगसमन्वितम् ॥२२॥ त्रयोदश पराकांश्च यः कुर्यात्प्रयतो नरः ॥ स याति परमानन्दं यत्र गत्वा न
शोचति ॥ २३ ॥ मासोपवासनिरता गङ्गास्नानपरायणाः ॥ धर्ममार्गप्रवक्तारो मुक्ता एव न संशयः ॥ २४ ॥ अवीराभिश्च नारीभिर्यतिभिर्ब्रह्मचा

रिभिः ॥ मासोपवासः कर्त्तव्यो वनस्थैश्च विशेषतः ॥ २५ ॥ नारी वा पुरुषो वापि व्रतमेतत्सुदुर्लभम् ॥ कृत्वा मोक्षमवाप्नोति योगिनामपि दुर्लभम् ॥ २६ ॥ गृहस्थो वानप्रस्थो वा व्रती वा भिक्षुरेव वा ॥ मूर्खो वा पण्डितो वापि श्रुत्वैतन्मोक्षभागभवेत् ॥२७॥ इदं पुण्यं व्रताख्यानं नारायणपरायणः ॥ शृणुयाद्वाचयेद्वापि सर्वपापैः प्रमुच्यते ॥२८॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे व्रताख्याने मासोपवासवर्णनं नाम द्वाविंशोऽध्यायः ॥ २२ ॥ सनक उवाच ॥ इदमन्यत्प्रवक्ष्यामि व्रतं त्रैलोक्यविश्रुतम् ॥ सर्वपापप्रशमनं सर्वकामफलप्रदम् ॥१॥ ब्राह्मणक्षत्रियविशां शूद्राणां चैव योषिताम् ॥ मोक्षदं कुर्वतां भक्त्या विष्णोः प्रियतरं द्विज ॥२॥ एकादशीव्रतं नाम सर्वाभीष्टप्रदं नृणाम् ॥ कर्त्तव्यं सर्वथा विप्र विष्णुप्रीतिकरं यतः ॥३॥ एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥ यो भुंक्ते सोऽत्र पापीयान्परत्र नरकं व्रजेत् ॥४॥ उपवासफलं लिप्सुर्जह्याद्भुक्तिचतुष्टयम् ॥ पूर्वापरदिने रात्रावहोरात्रं तु मध्यमे ॥५॥ एकादशीदिने यस्तु भोक्तुमिच्छति मानवः ॥ स भोक्तुं सर्वपापानि स्पृहयालुर्न संशयः ॥६॥ भवेद्दशम्यामेकाशी द्वादश्यां च मुनीश्वर ॥ एकादश्यां निराहारो यदि मुक्तिमभीप्सति ॥७॥ यानि कानि च पापानि ब्रह्महत्यादिकानि च ॥ अन्नमाश्रित्य तिष्ठन्ति तानि विप्र हरेर्दिने ॥८॥ ब्रह्महत्यादिपापानां कथंचिन्निष्कृतिर्भवेत् ॥ एकादश्यां तु यो भुङ्क्ते तस्य नैवास्ति निष्कृतिः ॥९॥ महापातकयुक्तो वा युक्तो वा सर्वपातकैः ॥ एकादश्यां निराहारः स्थित्वा याति परां गतिम् ॥१०॥ एकादशी महापुण्या विष्णोः प्रियतमा तिथिः ॥ संसेव्या सर्वथा विप्रैः संसारच्छेदलिप्सुभिः ॥ ११ ॥ दशम्यां प्रातरुत्थाय दन्तधावनपूर्वकम् ॥ स्नापयेद्विधिवद्विष्णुं पूजयेत्प्रयतेन्द्रियः ॥ १२ ॥ एकादश्यां निराहारो निगृहीतेन्द्रियो भवेत् ॥ शयीत सन्निधौ विष्णोर्नारायणपरायणः ॥१३॥ एकादश्यां तथा स्नात्वा सम्पूज्य च जनार्दनम् ॥ गन्धपुष्पादिभिः सम्यक् ततस्त्वेवमुदीरयेत् ॥१४ ॥ एकादश्यां निराहारः स्थित्वाद्याहं परेऽहनि ॥ भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युत ॥ १५ ॥ इमं मन्त्रं समुच्चार्य देवदेवस्य चक्रिणः ॥ भक्तिभावेन तुष्टात्मा उपवासं समर्पयेत् ॥ १६ ॥ देवस्य पुरतः कुर्याज्जागरं नियतो व्रती ॥ गीतैर्वाद्यैश्च नृत्यैश्च पुराणश्रवणादिभिः ॥ १७ ॥ ततः प्रातः समुत्थाय द्वादशीदिवसे व्रती ॥ स्नात्वा च विधिवद्विष्णुं पूजयत्प्रयतेन्द्रियः ॥१८॥ पञ्चामृतेन संस्नाप्य एकादश्यां जनार्दनम् ॥ द्वादश्यां पयसा विप्र हरिसारूप्यमश्नुते ॥१९॥ अज्ञानतिमिरान्धस्य व्रतेनानेन केशव ॥ प्रसीद सुमुखो भूत्वा ज्ञानदृष्टिप्रदो भव ॥ २० ॥ एवं विज्ञाप्य विप्रेन्द्र माधवं सुसमाहितः ॥ ब्राह्मणान्भोजयेच्छक्त्या दद्याद्वै दक्षिणां तथा ॥ २१ ॥ ततः स्वबन्धुभिः सार्द्धं नारायणपरायणः ॥ कृतपञ्चमहायज्ञः स्वयं भुञ्जीत वाग्यतः ॥२२॥ एवं यः प्रयतः कुर्यात्पुण्यमेकादशीव्रतम् ॥ स याति विष्णुभवनं पुनरावृत्तिदुर्लभम् ॥२३॥

उपवासव्रतपरो धर्मकार्यपरायणः ॥ चाण्डालान्पतितांश्चैव नेक्षेदपि कदाचन ॥ २४ ॥ नास्तिकान्भिन्नमर्यादान्निन्दकान्पिशुनांस्तथा ॥ उपवास
व्रतपरो नालपेच्च कदाचन ॥ २५ ॥ वृषलीसूतिपोष्टारं वृषलीपतिमेव च ॥ अयाज्ययाजकं चैव नालपेत्सर्वदा व्रती ॥ २६ ॥ कुण्डाशिनं
गायकं च तथा देवलकाशिनम् ॥ भिषजं काव्यकर्त्तारं देवद्विजविरोधिनम् ॥२७॥ परान्नलोलुपं चव परस्त्रीनिरतं तथा ॥ व्रतोपवासनिरतो वाङ्मा
त्रेणापि नार्चयेत् ॥२८॥ इत्येवमादिभिः शुद्धो वशी सर्वहिते रतः ॥ उपवासपरो भूत्वा परां सिद्धिमवाप्नुयात् ॥२९॥ नास्वि गङ्गासमं तीर्थं नास्ति
मातृसमोगुरुः ॥नास्ति विष्णुसमं दैवं तपो नानशनात्परम्॥३०॥नास्ति क्षमासमा माता नास्ति कीर्तिसमं धनम्॥नास्ति ज्ञानसमो लाभो न च धर्म
समः पिता॥३१॥न विवेकसमो बन्धुर्नैकादश्याः परं व्रतम्॥अत्राप्युदाहरंतीममितिहासं पुरातनम्॥३२॥संवादं भद्रशीलस्य तत्पितुर्गालवस्य च॥पुरा
हि गालवो नाम मुनिः सत्यपरायणः॥३३॥उवा स नर्मदातीरे शान्तो दान्तस्तपोनिधिः॥बहुवृक्षसमाकीर्णे गजभल्लुनिषेविते॥३४॥ सिद्धचारणगन्धर्व
यक्षविद्याधरान्विते ॥ कन्दमूलफलैःपूर्णे मुनिवृन्दनिषेविते ॥३५॥ गालवो नाम विप्रेन्द्रो निवासमकरोच्चिरम् ॥ तस्याभवद्भद्रशील इति ख्यातः सुतो
वशी ॥३६॥ जांतिस्मरो महाभागो नारायणपरायणः ॥ बालक्रीडनकालेऽपि भद्रशीलो महामतिः ॥३७॥ मृदा च विष्णोः प्रतिमां कृत्वा पूजयते
क्षणम् ॥ वयस्यान्बोधयेच्चापि विष्णुः पूज्यो नरैः सदा ॥ ३८ ॥ एकादशीव्रतं चैव कर्त्तव्यमपि पण्डितैः ॥ एवं ते बोधितास्तेन शिशवोऽपि
मुनीश्वर ॥ ३९ ॥ हरिं मृदैव निर्माय पृथक्संभूय वा मुदा ॥ अर्चयन्ति महाभागा विष्णुभक्तिपरायणाः ॥ ४० ॥ नमस्कुर्वन्भद्रमति
र्विष्णवे सर्वविष्णवे ॥ सर्वेषां जगतां स्वस्ति भूयादित्यब्रवीदिदम् ॥ ४१ ॥ क्रीडाकाले मुहूर्तं वा मुहूर्तार्द्धमथापि वा ॥ एकादशीति संकल्प्य
व्रतं यच्छति केशवे ॥ ४२ ॥ एवं सुचरितं दृष्ट्वा तनयं गालवो मुनिः ॥ अपृच्छद्विस्मयाविष्टः समालिंग्य तपोनिधिः ॥ ४३ ॥ गालव
उवाच ॥ भद्रशील महाभाग भद्रशीलोऽसि सुव्रत ॥ चरितं मंगलं यत्ते योगिनामपि दुर्लभम् ॥ ४४ ॥ हरिपूजापरो नित्यं सर्वभूतहितेरतः ॥
एकादशीव्रतपरो निषिद्धाचारवर्जितः ॥ निर्द्वन्द्वो निर्ममः शान्तो हरिध्यानपरायणः ॥ ४५ ॥ एवमेतादृशी बुद्धिः कथं जातार्भकस्य ते ॥
विनापि महतां सेवां हरिभक्तिर्हि दुर्लभा ॥ ४६ ॥ स्वभावतो जनस्यास्य ह्यविद्याकामकर्मसु ॥ प्रवर्त्तते मतिर्वत्स कथं तेऽलौकिकी कृतिः ॥
॥४७॥ सत्सङ्गेऽपि मनुष्याणां पूर्वपुण्यातिरेकतः ॥ जायते भगवद्भक्तिस्तदहं विस्मयं गतः ॥ ४८ ॥ पृच्छामि प्रीतिमापन्नस्तद्भवान्वक्तुमर्हति ॥
भद्रशीलो मुनिश्रेष्ठः पित्रैवं सुविकल्पितैः॥४९॥जातिस्मरः सुकृतात्मा हृष्टप्रहसिताननः ॥ स्वानुभूतं यथावृत्तं सर्वं पित्रे न्यवेदयत्॥५०॥भद्रशील

उवाच ॥ शृणु तात मुनिश्रेष्ठ ह्यनुभूतं मया पुरा ॥ जातिस्मरत्वाज्जानामि यमेन परिभाषितम् ॥ ५१ ॥ एतच्छुत्वा महाभागो गालवो
विस्मयान्वितः ॥ उवाच प्रीतिमापन्नो भद्रशीलं महामतिम् ॥ ५२ ॥ गालव उवाच ॥ कस्त्वं पूर्वं महाभाग किमुक्त च यमेन ते॥कस्य वा केन वा
हेतोस्तत्सर्वं वक्तुमर्हसि ॥ ५३ ॥ भद्रशील उवाच ॥ अहमासं पुरा तात राजा सोमकुलोद्भवः ॥ धर्मकीर्तिरिति ख्यातो दत्तात्रेयेण शासितः ॥
॥ ५४ ॥ नव वर्षसहस्राणि महीं कृत्स्नामपालयम् ॥ अधर्माश्च तथा धर्मा मया तु बहवः कृताः ॥ ५५ ॥ ततः श्रिया प्रमत्तोऽहं बह्वधर्मम
कारिषम् ॥ पाषण्डजनसंसर्गात्पाषण्डचरितोऽभवम् ॥ ५६ ॥ पुरार्जितानि पुण्यानि मया तु सुबहून्यपि ॥ पाषण्डैर्बाधितोऽहं तु वेदमार्गं समत्य
जम् ॥ ५७ ॥ मखाश्च सर्वे विध्वस्ता कूटयुक्तिविदा मया ॥ अधर्मनिरतं मां तु दृष्ट्वा मद्देशजाः प्रजाः ॥ ५८ ॥ सदैव दुष्कृतं चक्रुः षष्ठांशस्तत्र
मेऽभवत् ॥ एवं पापसमाचारो व्यसनाभिरतः सदा ॥ ५९ ॥ मृगयाभिरतो भूत्वा ह्येकदा प्राविशं वनम् ॥ ससैन्योऽहं वने तत्र हत्वा बहुविधा
न्मृगान् ॥ ६० ॥ क्षुत्तृट्परिवृतः श्रांतो रेवातीरमुपागमम् ॥ रवितीक्ष्णातपक्रांता रेवायां स्नानमाचरम् ॥ ६१ ॥ अदृष्टसैन्य एकाकी पीड्यमानः
क्षुधा भृशम् ॥ ६२ ॥ समेतास्तत्र ये केचिद्रेवातीरनिवासिनः ॥ एकादशीव्रतपरा मया दृष्टा निशामुखे ॥ ६३ ॥ निराहारश्च तत्राहमे
काकी तज्जनैः सह ॥ जागरं कृतवांश्चापि सेनया रहितो निशि ॥ ६४ ॥ अध्वश्रमपरिश्रांतः क्षुत्पिपासाप्रपीडितः ॥ तत्रैव जागरान्तेऽहं तात
पंचत्वमागतः ॥ ६५ ॥ ततो यमभटैर्बद्धो महादंष्ट्राभयंकरैः ॥ अनेकक्लेशसंपन्नमार्गेणाप्तो यमांतिकम् ॥ दंष्ट्राकरालवदनमपश्यं समवर्तिनम् ॥
॥६६॥ अथ कालश्चित्रगुप्तमाहूयेदमभाषत ॥ अस्य शिक्षाविधानं च यथावद्वद पंडित ॥६७॥ एवमुक्तश्चित्रगुप्तो धर्मराजेन सत्तम ॥ चिरं
विचारयामास पुनश्चेदमभाषत ॥६८॥ असौ पापरतः सत्यं तथापि शृणु धर्मप ॥ एकादश्यां निराहारः सर्वपापैः प्रमुच्यते ॥६९॥ एष रेवातटे
रम्ये निराहारो हरेर्दिने ॥ जागरं चोपवासं च कृत्वा निष्पापतां गतः ॥७०॥यानि कानि च पापानि कृतानि सुबहूनि च॥ तानि सर्वाणि नष्टानि
ह्युपवासप्रभावतः ॥७१॥ एवमुक्तो धर्मराजश्चित्रगुप्तेन धीमता ॥ ननाम दंडवद्भूमौ ममाग्रे सोऽनुकंपितः ॥७२॥ पूजयामास मां तत्र भक्तिभावेन
धर्मराट् ॥ ततश्च स्वभटान्सर्वानाहूयेदमुवाच ह ॥ ७३ ॥ धर्मराज उवाच ॥ शृणुध्वं मद्वचो दूता हितं वक्ष्याम्यनुत्तमम् ॥ धर्ममार्गरता
न्मर्त्यान्मानयध्वं ममान्तिकम् ॥ ७४ ॥ ये विष्णुपूजनरताः प्रयताः कृतज्ञाश्चैकादशीव्रतपरा विजितेन्द्रियाश्च ॥ नारायणाच्युतहरे शरणं भवेति
शान्ता वदन्ति सततं तरसा त्यजध्वम् ॥ ७५ ॥ नारायणाच्युत जनार्दन कृष्ण विष्णो पद्मेश पद्मजपितः शिव शंकरेति ॥ नित्यं वदंत्यखिललोक
हिताः प्रशान्ता दूराद्भटास्त्यजत तान्न ममैषु शिक्षा ॥ ७६ ॥ नारायणार्पितकृतान्हरिभक्तिभाजः स्वाचारमार्गनिरतान् गुरुसेवकांश्च ॥ सत्पात्रदान

निरतांश्च सुदीनपालान्दूतास्त्यजध्वमनिशं हरिनामसक्तान् ॥ ७७ ॥ पाषंडसङ्गरहितान्द्विजभक्तिनिष्ठान्सत्संगलोलुपतरांश्च तथातिथेयान् ॥ शंभौ
हरौ च समबुद्धिमतस्तथैव दूतास्त्यजध्वमुपकारपराञ्जनानाम् ॥ ७८ ॥ ये वर्जिता हरिकथामृतसेवनैश्च नारायणस्मृतिपरायणमानसैश्च ॥ विप्रें
द्रपादजलसेचनतोऽप्रहृष्टांस्तान्पापिनो मम भटा गृहमानयध्वम् ॥ ७९ ॥ ये मातृतातपरिभर्त्सनशीलिनश्च लोकद्विषो हितजनाहितकर्मणश्च ॥
देवस्वलोभनिरताञ्जननाशकर्तॄनत्रानयध्वमपराधपरांश्च दूताः ॥ ८० ॥ एकादशीव्रतपराङ्मुखमुग्रशीलं लोकापवादनिरतं परनिंदकं च ॥ ग्रामस्य
नाशकरमुत्तमवैरयुक्तं दूताः समानयत विप्रधनेषु लुब्धम् ॥ ८१ ॥ ये विष्णुभक्तिविमुखाः प्रणमंति नैव नारायणं हि शरणागतपालकं च ॥
विष्ण्वालयं च नहि यांति नराः सुमूर्खास्तानानयध्वमतिपापरतान्प्रसह्य ॥ ८२ ॥ एवं श्रुतं यदा तत्र यमेन परिभाषितम् ॥ मयानुतापदग्धेन
स्मृतं तत्कर्म निंदितम् ॥ ८३ ॥ असत्कर्मानुतापेन सद्धर्मश्रवणेन च ॥ तत्रैव सर्वपापानि निःशेषाणि गतानि मे ॥ ८४ ॥ पापशे
षाद्विनिर्मुक्तं हरिसारूप्यतां गतम् ॥ सहस्रसूर्यसंकाशं प्रणनाम यमश्च तम् ॥ ८५ ॥ एवं दृष्ट्वा विस्मितास्ते यमदूता भयोत्कटाः ॥
विश्वासं परमं चक्रुर्यमेन परिभाषिते ॥ ८६ ॥ ततः संपूज्य मां कालो विमानशतसंकुलम् ॥ सद्यः संप्रेषयामास तद्विष्णोः
परमं पदम् ॥ ८७ ॥ विमानकोटिभिः सार्द्धं सर्वभोगसमन्वितैः ॥ कर्मणा तेन विप्रर्षे विष्णुलोके मयोषितम् ॥ ८८ ॥ कल्पकोटिसह
स्राणि कल्पकोटिशतानि च ॥ स्थित्वा विष्णुपदं पश्चादिंद्रलोकमुपागमम् ॥ ८९ ॥ तत्रापि सर्वभोगाढ्यः सर्वदेवनमस्कृतः ॥ तावत्कालं दिवि
स्थित्वा ततो भूमिमुपागतः ॥ ९० ॥ अत्रापि विष्णुभक्तानां जातोऽहं भवतां कुले ॥ जातिस्मरत्वाज्जानामि सर्वमेतन्मुनीश्वर ॥ ९१ ॥ तस्माद्वि
ष्ण्वर्चनोद्योगं करोमि सह बालकैः ॥ एकादशीव्रतमिदमिति न ज्ञातवान्पुरा ॥ ९२ ॥ जातिस्मृतिप्रभावेण तज्ज्ञातं सांप्रतं मया ॥ अत्र स्वेनापि
यत्कर्म कृतं तस्य फलं त्विदम् ॥ ९३ ॥ एकादशीव्रतं भक्त्या कुर्वतां किमुत प्रभो ॥ तस्माच्चरिष्ये विप्रेंद्र शुभमेकादशीव्रतम् ॥ ९४ ॥
विष्णुपूजां चाहरहः परमस्थानकांक्षया ॥ एकादशीव्रतं यत्तु कुर्वंति श्रद्धया नराः ॥ ९५ ॥ तेषां तु विष्णुभवनं परमानंददायकम् ॥ एवं पुत्रवचः
श्रुत्वा संतुष्टो गालवो मुनिः ॥ ९६ ॥ अवाप परमां तुष्टिं मनसा चातिहर्षितः ॥ मज्जन्म सफलं जातं मद्वंशः पावनीकृतः ॥९७॥ यतस्त्वं मद्गृहे
जातो विष्णुभक्तिपरायणः ॥ इति संतुष्टचित्तस्तु तस्य पुत्रस्य कर्मणा ॥ ९८ ॥ हरिपूजाविधानं च यथावत्समबोधयत् ॥ इत्येतत्ते मुनिश्रेष्ठ
यथावत्कथितं मया ॥ संकोचविस्तराभ्यां च किमन्यच्छ्रोतुमिच्छसि ॥ ९९ ॥ इति श्रीबृहन्नारदीये पुराणे पूर्वभागे प्रथमपादे व्रताख्याने एकाद

शीव्रतमहिमानुवर्णनं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥ सूत उवाच ॥ एतन्निशम्य सनकोदितमप्रमेयं पुण्यं हरेर्दिनभवं निखिलोत्तमं च ॥ पापौघशांतिकरणं व्रतसारमेवं ब्रह्मात्मजः पुनरभाषत हर्षयुक्तः ॥ १ ॥ नारद उवाच ॥ कथितं भवता सर्वं मुने तत्त्वार्थकोविद ॥ व्रताख्यानं महापुण्यं यथावद्धरिभक्तिदम् ॥ २ ॥ इदानीं श्रोतुमिच्छामि वर्णाचारविधिं मुने ॥ तथा सर्वाश्रमाचारं प्रायश्चित्तविधिं तथा ॥ ३ ॥ एतत्सर्वं महाभाग सर्वतत्त्वार्थकोविद ॥ कृपया परया मह्यं यथावद्वक्तमहसि ॥४॥ सनक उवाच ॥ शृणुष्व मुनिशार्दूल यथा भक्तप्रियंकरः ॥ वर्णाश्रमाचारपरैः पूज्यते हरिरव्ययः ॥५॥ मन्वाद्यैरुदितं यच्च वर्णाश्रमनिबंधनम् ॥ तत्ते वक्ष्यामि विधिवद्भक्तोऽसि त्वमधोक्षजे ॥ ६ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चत्वार एव ते ॥ वर्णा इति समाख्याता एतेषु ब्राह्मणोऽधिकः ॥ ७ ॥ ब्राह्मणाः क्षत्रिया वैश्या द्विजाः प्रोक्तास्त्रयस्तथा ॥ मातृतश्चोपनयनाद्द्विजत्वं प्राप्यते त्रिभिः॥८॥एतैर्वर्णैः सर्वधर्माः कार्या वर्णानुरूपतः॥स्ववर्णधर्मत्यागेन पाषंडः प्रोच्यते बुधैः ॥९॥ स्वगृह्यचोदितं कर्म द्विजः कुर्वन्कृती भवेत्॥अन्यथा पतितो भूयात्सर्वधर्मबहिष्कृतः॥१०॥युगधर्मः परिग्राह्यो वर्णैरेतैर्यथोचितम्॥देशाचारास्तथा ग्राह्याः स्मृतिधर्माविरोधतः॥११॥कर्मणा मनसा वाचा यत्नाद्धर्म्मं समाचरेत्॥अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु॥१२॥समुद्रयात्रास्वीकारः कमंडलुविधारणम्॥द्विजानामसवर्णासु कन्यासूपयमस्तथा ॥ १३ ॥ देवराच्च सुतोत्पत्तिर्मधुपर्के पशोर्वधः ॥ मांसादनं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ॥ १४ ॥ दत्ताक्षतायाः कन्यायाः पुनर्दानं वराय च ॥ नैष्ठिकं ब्रह्मचर्यं च नरमेधाश्वमेधकौ ॥१५॥ महाप्रस्थानगमनं गोमेधश्च तथा मखः ॥ एतान्धर्मान्कलियुगे वर्ज्यानाहुर्मनीषिणः॥१६॥ देशाचाराः परिग्राह्यास्तत्तद्देशगतैर्नरैः॥अन्यथा पतितो ज्ञेयः सर्वधर्मबहिष्कृतः ॥१७॥ ब्राह्मगक्षत्रियविशां शूद्राणां च द्विजोत्तम॥क्रियाः सामान्यतो वक्ष्ये तच्छृणुष्व समाहितः ॥ १८ ॥ दानं दद्याद्ब्राह्मणेभ्यस्तथा यज्ञैर्यजेत्सुरान् ॥ वृत्त्यर्थं याचयेच्चैव अन्यानध्यापयेत्तथा ॥ १९ ॥ याजयेद्यजने योग्यान्विप्रो नित्योदकी भवेत् ॥ कुर्य्याच्च वेदग्रहणं तथाग्नेश्च परिग्रहम् ॥ २० ॥ ग्राह्ये द्रव्ये च पारक्ये समबुद्धिर्भवेत्तथा॥ सर्वलोकहितं कुर्यान्मृदुवाक्यमुदीरयेत् ॥ २१ ॥ ऋतावभिगमः पत्न्यां शस्यते ब्राह्मणस्य वै ॥ न कस्याप्यहितं ब्रूयाद्विष्णुपूजापरो भवेत् ॥२२ ॥ दद्याद्दानानि विप्रेभ्यः क्षत्रियोऽपि द्विजोत्तम ॥ कुर्य्याच्च वेदग्रहणं यज्ञैर्देवान्यजेत्तथा ॥ २३ ॥ शस्त्राजीवी भवेच्चैव पालयेद्धर्मतो महीम् ॥ दुष्टानां शासनं कुर्य्याच्छिष्टानां पालनं तथा ॥ २४ ॥ पाशुपाल्यं च वाणिज्यं कृषिश्च द्विजसत्तम ॥ वेदस्याध्ययनं चेव वैश्यस्यापि प्रकीर्त्तितम् ॥ २५ ॥ कुर्याच्च दारग्रहणं धर्मांश्चैव समाचरेत् ॥ क्रयविक्रयजर्वापि धनैः कारुक्रियोद्भवैः ॥ २६ ॥ दद्याद्दानानि शूद्रोऽपि पाकयज्ञैर्यजेन्न च ॥ ब्राह्मणक्षत्रियविशां शुश्रूषानि

रतो भवेत्॥२७॥ऋतुकालाभिगामी च स्वदारेषु भवेत्तथा॥सर्वलोकहितैषित्वं मगलं प्रियवादिता॥२८॥अनायासो मनोहर्षस्तितिक्षा नातिमानिता॥
सामान्यं सर्ववर्णानां मुनिभिः परिकीर्तितम् ॥ २९ ॥ सर्वे च मुनितां यांति स्वाश्रमोचितकर्मणा ॥ ब्राह्मणः क्षत्रियाचारमाश्रयेदापदि द्विज ॥३०॥
क्षत्रियोऽपि च विड्वृत्तिमत्यापदि समाश्रयेत् ॥ नाश्रयेच्छूद्रवृत्तिं तु अत्यापद्यपि वै द्विजः ॥३१॥ यद्याश्रयेद्द्विजो मूढस्तदा चांडालतां व्रजेत् ॥
ब्राह्मणक्षत्रियविशां त्रयाणां मुनिसत्तम ॥ ३२ ॥ चत्वार आश्रमाः प्रोक्ताः पंचमो नोपपद्यते ॥ ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्च सत्तम ॥ ३३ ॥
चतुर्भिराश्रमैरेभिः साध्यते धर्म उत्तमः ॥ विष्णुस्तुष्यति विप्रेंद्र कर्मयोगरतात्मनः ॥ ३४ ॥ निःस्पृहाशांतमनसः स्वकर्मनिरतस्य च ॥ ततो
याति परं स्थानं यतो नावर्त्तते पुनः ॥ ३५ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे सदाचारो नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ सनक
उवाच ॥ वर्णाश्रमाचारविधिं प्रवक्ष्यामि विशेषतः ॥ शृणुष्व तन्मुनिश्रेष्ठ सावधानेन चेतसा ॥ १ ॥ यः स्वधर्मं परित्यज्य परधर्मं समा
चरेत् ॥ पाषंडः स हि विज्ञेयः सर्वधर्मबहिष्कृतः ॥ २ ॥ गर्भाधानादिसंस्काराः कार्या मंत्रविधानतः ॥ स्त्रीणाममंत्रतः कार्या यथाकालं
यथाविधि ॥ ३ ॥ सीमंतकर्म प्रथमं चतुर्थे मासि शस्यते ॥ षष्ठे वा सप्तमे वापि अष्टमे वापि कारयेत् ॥ ४ ॥ जाते पुत्रे पिता स्नात्वा सचैलं
जातकर्म च ॥ कुर्य्याच्च नांदीश्राद्धं च स्वस्तिवाचनपूर्वकम् ॥ ५ ॥ हेम्ना वा रजतेनापि वृद्धिश्राद्धं प्रकल्पयेत् ॥ अन्नेन कारयेद्यस्तु स चंडाल
समो भवेत् ॥ ६ ॥ कृत्वाभ्युदयिकं श्राद्धं पिता पुत्रस्य वाग्यतः ॥ कुर्वीत नामनिर्देशं सूतकांते यथाविधि ॥ ७ ॥ अस्पष्टमर्थहीनं च ह्यतिगुर्व
क्षरान्वितम् ॥ न दद्यान्नाम विप्रेंद्र तथा च विषमाक्षरम् ॥८॥ तृतीयवर्षे चौलं च पंचमे षष्ठसम्मिते ॥ सप्तमे चाष्टमे वापि कुर्याद् गृह्योक्तमार्गतः ॥
॥ ९ ॥ दैवयोगादतिक्रांते गर्भाधानादिकर्मणि ॥ कर्तव्यः पादकृच्छ्रो वै चौले त्वर्द्धं प्रकल्पयेत् ॥ १० ॥ गर्भाष्टमेऽष्टमे वाब्दे बटुकस्योपनायनम्॥
आषोडशाब्दपर्यंतं गौणं कालमुशंति च ॥ ११ ॥ गर्भैकादशमेऽब्दे तु राजन्यस्योपनायनम् ॥ आद्वाविंशाब्दपर्यंतं कालमाहुर्विपश्चितः ॥
॥ १२ ॥ वैश्योपनयनं प्रोक्तं गर्भाद्वादशमे तथा॥ चतुर्विंशाब्दपर्यंतं गौणमाहुर्मनीषिणः ॥ १३॥ एतत्कालावधेर्यस्य द्विजस्यातिक्रमो भवेत् ॥
सावित्रीपतितं विद्यात्तं तु नैवालपेत्कदा ॥ १४ ॥ द्विजोपनयने विप्र मुख्यकालव्यतिक्रमे ॥ द्वादशाब्दं चरेत्कृच्छ्रं पश्चाच्चांद्रायणं तथा ॥
सांतपनद्वयं चैव कृत्वा कर्म समाचरेत् ॥ १५ ॥ अन्यथा पतितं विद्यात्कर्त्तापि ब्रह्महा भवेत् ॥ मौंजी विप्रस्य विज्ञेया धनुर्ज्या क्षत्रियस्य

१–"न्नालपेत्तं कदाचन" इति पाठो युक्तः ।

तु ॥ १६ ॥ आवी वैश्यस्य विज्ञेया श्रूयतामजिन तथा ॥ विप्रस्य चौक्तमैणेयं रौरवं क्षत्रियस्य तु ॥१७॥ आजं वैश्यस्य विज्ञेयं दंडान्वक्ष्ये
यथाक्रमम् ॥ पालाशं ब्राह्मणस्योक्तं नृपस्यौदुम्बरं तथा ॥ १८ ॥ बैल्वं वैश्यस्य विज्ञेय तत्प्रमाणं शृणुष्व मे ॥ विप्रस्य केशमानं स्यादा
ललाटं नृपस्य च ॥ १९ ॥ नासाग्रसंमितं दण्डं वैश्यस्याहुर्विपश्चितः ॥ तथा वासांसि वक्ष्यामि विप्रादीनां यथाक्रमम् ॥ २० ॥ कषायं चैव
मांजिष्ठं हारिद्रं च प्रकीर्तितम् ॥ उपनीतो द्विजो विप्र परिचर्यापरो गुरोः ॥ २१ ॥ वेदग्रहणपर्यंतं निवसेद्गुरुवेश्मनि ॥ प्रातःस्नायी भवे
द्वर्णी समित्कुशफलादिकान् ॥ २२ ॥ गुर्वर्थमाहरेन्नित्यं कल्ये कल्ये मुनीश्वर ॥ यज्ञोपवीतमजिनं दंडं च मुनिसत्तम ॥ २३ ॥ नष्टे भ्रष्टे नवं मंत्रा
द्धृत्वा भ्रष्टं जले क्षिपेत् ॥ वर्णिनो वर्त्तनं प्राहुर्भिक्षान्नेनैव केवलम् ॥ २४ ॥ भिक्षा च श्रोत्रियागारादाहरेत्प्रयतेंद्रियः ॥ भवत्पूर्वं ब्राह्मणस्य
भवन्मध्यं नृपस्य च ॥ २५ ॥ भवदंत्यं विशः प्रोक्तं भिक्षाहरणकं वचः ॥ सायंप्रातर्वह्निकार्यं यथाचारं जितेंद्रियः ॥ २६ ॥ ॥ कुर्यात्प्रतिदिनं
वर्णी ब्रह्मयज्ञं च तर्पणम् ॥ अग्निकार्यपरित्यागी पतितः प्रोच्यते बुधैः ॥ २७ ॥ ब्रह्मयज्ञविहीनश्च ब्रह्महा परिकीर्तितः ॥ देवताभ्यर्च्चनं
कुर्याच्छुश्रूषानुपदं गुरोः ॥ २८ ॥ भिक्षान्नं भोजयेन्नित्यं नैकान्नाशी कदाचन ॥ आमीयानिन्द्यविप्राणां गृहाद्भिक्षां जितेंद्रियः ॥२९॥ निवेद्य
गुरवेऽश्नीयाद्वाग्यतस्तदनुज्ञया ॥ मधुस्त्रीमांसलवणं ताम्बूलं दंतधावनम् ॥ ३० ॥ उच्छिष्टभोजनं चव दिवास्वापं च वर्जयेत् ॥ छत्रपादुक
गंधांश्च तथा माल्यानुलेपनम् ॥ ३१ ॥ जलकेलिं नृत्यगीतवाद्यं तु परिवर्जयेत् ॥ परिवादं चोपतापं विप्रलापं तथांजनम् ॥ ३२ ॥ पाषण्ड
जनसंयोगं शूद्रसंगं च वर्जयेत् ॥ अभिवादनशीलः स्याद् वृद्धेषु च यथाक्रमम् ॥ ३३ ॥ ज्ञानवृद्धास्तपोवृद्धा वयोवृद्धा इति त्रयः ॥ आध्यात्मिका
दिदुःखानि निवारयति यो गुरुः ॥३४॥ वेदशास्त्रोपदेशेन तं पूर्वमभिवादयेत् ॥ असावहमिति ब्रूयाद्द्विजो वै ह्यभिवादने ॥३५॥ नाभिवाद्याश्च विप्रेण
क्षत्रियाद्याः कथंचन ॥ नास्तिकं भिन्नमर्यादं कृतघ्नं ग्रामयाजकम् ॥ ३६ ॥ स्तेनं च कितवं चैव कदाचिन्नाभिवादयेत् ॥ पाषण्डं पतितं व्रात्यं
तथा नक्षत्रजीविनम् ॥ ३७ ॥ तथा पातकिनं चैव कदाचिन्नाभिवादयेत् ॥ उन्मत्तं च शठं धूर्त्तं धावन्तमशुचिं तथा ॥ ३८ ॥ अभ्यक्तशिरसं
चैव जपन्तं नाभिवादयेत् ॥ विवादशीलिनं चंडं वमंतं जलमध्यगम् ॥ ३९ ॥ भिक्षान्नधारिणं चैवं शयानं नाभिवादयेत् ॥ भर्तृघ्नीं पुष्पिणीं जारां
सूतिकां गर्भपातिनीम् ॥ ४० ॥ कृतघ्नीं च तथा चंडीं कदाचिन्नाभिवादयेत् ॥ सभायां यज्ञशालायां देवतायतनेष्वपि ॥ ४१ ॥ प्रत्येक तु नमस्कारो
हंति पुण्यं पुराकृतम् ॥ श्राद्धं व्रतं तथा दानं देवताभ्यर्चनं तथा ॥ ४२ ॥ यज्ञं च तर्पणं चैव कुर्वंतं नाभिवादयेत् ॥ कृतेऽभिवादने यस्तु न कुर्या

त्मतिवादनम् ॥ ४३ ॥ नाभिवाद्यः स विज्ञेयो यथा शूद्रस्तथैव सः ॥ प्रक्षाल्य पादावाचम्य गुरोरभिमुखः सदा ॥ ४४ ॥ तस्य पादौ च संगृह्य
अधीयीत विचक्षणः ॥ अष्टकासु चतुर्दश्यां प्रतिपत्पर्वणोस्तथा ॥ ४५ ॥ महाभरण्यां विप्रेंद्र श्रवणद्वादशीदिने ॥ भाद्रपदापरपक्षे द्वितीयायां
तथैव च ॥ ४६ ॥ माघस्य शुक्लसप्तम्यां नवम्यामाश्विनस्य च ॥ परिवेषं गते सूर्ये श्रोत्रिये गृहमागते ॥ ४७ ॥ बंधिते ब्राह्मणे चैव प्रवृद्धकलहे
तथा ॥ संध्यायां गर्जिते मेघे ह्यकाले परिवर्षणे ॥ ४८ ॥ उल्काशनिप्रपाते च तथा विप्रेऽवमानिते॥मन्वादिषु च देवर्षे युगादिषु चतुर्ष्वपि॥४९॥
नाधीयीत द्विजः कश्चित्सर्वकर्मफलोत्सुकः ॥ तृतीया माधवे शुक्ला भाद्रे कृष्णा त्रयोदशी ॥ ५० ॥ कार्त्तिके नवमी शुद्धा माघे पंचदशी तिथिः॥
एता युगाद्याः कथिता दत्तस्याक्षयकारिकाः ॥ ५१ ॥ मन्वादींश्च प्रवक्ष्यामि शृणुष्व सुसमाहितः ॥ अक्षयुक्छुक्लनवमी कार्तिके द्वादशी सिता ॥
॥ ५२ ॥ तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥ आषाढशुक्लदशमी सिता माघस्य सप्तमी ॥ ५३ ॥ श्रावणस्याष्टमी कृष्णा तथाषाढी
च पूर्णिमा ॥ फाल्गुनस्य त्वमावास्या पौषस्यैकादशी सिता ॥ ५४ ॥ कार्तिकी फाल्गुनी चैत्री ज्यैष्ठी पंचदशी सिता॥मन्वादयः समाख्याता दत्त
स्याक्षयकारिकाः॥५५॥द्विजैः श्राद्धं च कर्त्तव्यं मन्वादिषु युगादिषु॥श्राद्धे निमंत्रिते चैव ग्रहणे चंद्रसूर्ययोः॥५६॥अयनद्वितये चैव तथा भूकंपने मुने॥
गलग्रहे दुर्दिने च नाधीयीत कदाचन॥५७॥एवमादिषु सर्वेषु अनध्यायेषु नारद॥अधीयतां सुमूढानां प्रजां प्रज्ञां यशः श्रियम् ॥५८॥आयुष्यं बलमा
रोग्यं निकृंतति यमः स्वयम्॥अनध्याये तु योऽधीते तं विद्याद्ब्रह्मघातकम्॥५९॥न तं संभाषयेद्विप्र न तेन सह संवसेत्॥कुंडगोलकयोः केचिज्जडादीनां च
नारद ॥६०॥वदंति चोपनयनं तत्पुत्रादिषु केचन॥अनधीत्य तु यो वेदमन्यत्र कुरुते श्रमम्॥६१॥शूद्रतुल्यः स विज्ञेयो नरकस्य प्रियोऽतिथिः॥
अनधीतश्रुतिर्विप्र आचारं प्रतिपद्यते ॥६२॥ नाचारफलमाप्नोति यथा शूद्रस्तथैव सः ॥ नित्यं नैमित्तिकं काम्यं यच्चान्यत्कर्म वैदिकम् ॥६३॥
अनधीतस्य विप्रस्य सर्वं भवति निष्फलम् ॥ शब्दब्रह्ममयो विष्णुर्वेदः साक्षाद्धरिः स्मृतः ॥ ६४ ॥ वेदाध्यायी ततो विप्रः सर्वान्कामानवा
प्नुयात् ॥ ६५ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे स्मार्ताचारेषु वर्णाश्रमधर्मेष्वध्ययनादिधर्मनिरूपणं नाम पंचविंशोऽध्यायः ॥ २५ ॥
सनक उवाच ॥ वेदग्रहणपर्यंतं शुश्रूषानियतो गुरोः ॥ अनुज्ञातस्ततस्तेन कुर्यादग्निपरिग्रहम् ॥ १ ॥ वेदांश्च धर्मशास्त्राणि वेदाङ्गान्यपि च
द्विजः ॥ अधीत्य गुरवे दत्त्वा दक्षिणां संविशेद्गृहम् ॥ २ ॥ रूपलावण्यसंपन्नां सगुणां सुकुलोद्भवाम् ॥ द्विजः समुद्वहेत्कन्यां सुशीलां धर्म
चारिणीम् ॥ ३ ॥ मातृतः पंचमीं धीमान्पितृतः सप्तमीं तथा ॥ द्विजः समुद्वहेत्कन्यामन्यथा गुरुतल्पगः ॥ ४ ॥ रोगिणीं चैव वृत्ताक्षीं सरोग

कुलसंभवाम् ॥ अतिकेशामकेशां च वाचालां नोद्वहेद्बुधः ॥ ५ ॥ कोपानां वामनां चैव दीर्घदेहां विरूपिणीम् ॥ न्यूनाधिकाङ्गीमुन्मत्तां पिशुनां नोद्वहेद् बुधः ॥ ६ ॥ स्थूलगुल्फां दीर्घजंघां तथैव पुरुषाकृतिम् ॥ श्मश्रुव्यंजनसंयुक्तां कुब्जां चैवोद्वहेन्न च ॥७॥ वृथाहास्यमुखीं चैव सदान्यगृहवासिनीम्॥विवादशीलां भ्रमितां निष्ठुरां नोद्वहेद्बुधः ॥ ८ ॥ बह्वशिनीं स्थूलदंतां स्थूलोष्ठीं घुर्घुरस्वनाम् ॥ अतिकृष्णां रक्तवर्णां धूर्तां नैवोद्वहेद्बुधः ॥ ९ ॥ सदा रोदनशीलां च पांडुराभां च कुत्सिताम् ॥ कासश्वासादिसंयुक्तां निद्राशीलां च नोद्वहेत् ॥१०॥ अनर्थभाषिणीं चैव लोकद्वेषपरायणाम् ॥ परापवादनिरतां तस्करां नोद्वहेद्बुधः ॥ ११ ॥ दीर्घनासां च कितवां तनूरुहविभूषिषताम् ॥ गर्वितां बकवृत्तिं च सर्वथा नोद्वहेद्बुधः ॥ ॥ १२ ॥ बालभावादविज्ञातस्वभावामुद्वहेद्यदि ॥ प्रगल्भां वाऽगुणां ज्ञात्वा सर्वथा तां परित्यजेत् ॥ १३ ॥ भर्तृपुत्रेषु या नारी सर्वदा निष्ठुरा भवेत् ॥ परानुकूलिनी या च सर्वथा तां परित्यजेत् ॥ १४ ॥ विवाहाश्चाष्टधा ज्ञेया ब्राह्माद्या मुनिसत्तम ॥ पूर्वः पूर्वो वरो ज्ञेयः पूर्वाभावे परः परः ॥ १५ ॥ ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ॥ गं धर्वो राक्षसश्चैव पैशाचश्चाष्टमो मतः ॥ १६ ॥ ब्राह्मेण च विवाहेन वैवाह्यो वै द्विजोत्तमः ॥ दैवेनाप्यथवा विप्र केचिदार्षं प्रचक्षते ॥ १७ ॥ प्राजापत्यादयो विप्र विवाहाः पंच गर्हिताः ॥ अभावेषु तु पूर्वेषां कुर्यादेव परान्बुधः ॥ १८॥ यज्ञोपवीतद्वितयं सोत्तरीयं च धारयेत् ॥ सुवर्णकुंडले चैव धौतवस्त्रद्वयं तथा ॥ १९ ॥ अनुलेपनलिप्तांगः कृत्तकेशनखः शुचिः ॥ धारयेद्वैणवं दंडं सोदकं च कमंडलुम् ॥ २० ॥ उष्णीषममलं छत्रं पादुके चाप्युपानहौ ॥ धारयेत्पुष्पमाल्ये च सुगंधं प्रियदर्शनः ॥ २१ ॥ नित्यं स्वाध्यायशीलः स्याद्यथाचारं समाचरेत् ॥ परान्नं नैव भुञ्जीत परवादं च वर्जयेत् ॥ २२ ॥ पादेन नाक्रमेत्पादमुच्छिष्टं नैव लंघयेत् ॥ न संहताभ्यां हस्ताभ्यां कंडूयेदात्मनः शिरः ॥ २३ ॥ पूज्यं देवालयं चैव नापसव्यं व्रजेद्द्विजः ॥ देवार्चाचमनस्नानव्रतश्राद्धक्रियादिषु ॥ २४ ॥ न भवेन्मुक्तकेशश्च नैकवस्त्रधरस्तथा ॥ नारोहेदुष्ट्रयानं च शुष्कवादं च वर्जयेत् ॥ २५ ॥ अन्यस्त्रियं न गच्छेच्च पैशुन्यं परिवर्जयेत् ॥ नापसव्यं व्रजेद्विप्र गोश्वत्थानलपर्वतान् ॥ २६॥ चतुष्पथं चैत्यवृक्षं देवखातं नृपं तथा ॥ असूयां मत्सरत्वं च दिवास्वापं च वर्जयेत् ॥ २७ ॥ न वदेत्परपापानि स्वपुण्यं न प्रकाशयेत् ॥ स्वकं नाम स्वनक्षत्रं मानं चैवातिगोपयेत्॥२८॥न दुर्जनैः सह वसेन्नाशास्त्रं शृणुयात्तथा ॥ आसवद्यूतगीतेषु द्विजस्तु न रतिं चरेत्॥ २९॥ आर्द्रास्थि च तथोच्छिष्टं शूद्रं च पतितं तथा ॥ सर्पं च भषणं स्पृष्ट्वा सचैलं स्नानमाचरेत् ॥ ३० ॥ चितिं च चितिकाष्टं च यूपं चांडालमेव च ॥ स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत् ॥३१॥दीपखट्वातनुच्छायाकेशव

खकटोदकम् ॥ अजामार्जनिमार्जाररेणुर्द्दैवं शुभं हरेत् ॥ ३२ ॥शूर्प्पवातं प्रेतधूमं तथा शूद्रान्नभोजनम्॥ वृषलीपतिसङ्गं च दूरतः परिवर्जयेत् ॥
॥ ३३ ॥ असच्छास्त्रार्थमननं खादनं नखकेशयोः ॥ तथैव नग्नशयनं सर्वदा परिवर्जयेत् ॥ ३४ ॥ शिरोभ्यंगावशिष्टेन तैलेनांगं न लेपयेत् ॥
तांबूलमशुचिं नाद्यात्तथा सुप्तं न बोधयेत् ॥ ३५ ॥ नाशुद्धोऽग्निं परिचरेत्पूजयेद्गुरुदेवताः ॥ न वामहस्तेनैकेन पिबेद्वक्रेण वा जलम् ॥ ३६ ॥
न चाक्रमेद्गुरोश्छायां तदाज्ञां च मुनीश्वर ॥ न निंदेद्योगिनो विप्रान्व्रतिनोऽपि यतींस्तथा॥३७॥ परस्परस्य मर्माणि न कदापि वदेद्द्विजः॥दर्शे च
पौर्णमास्यां च यागं कुर्याद्यथाविधि ॥ ३८ ॥ उपासनं च होतव्यं सायं प्रातर्द्विजातिभिः ॥ उपासनपरित्यागी सुरापीत्युच्यते बुधैः ॥ ३९ ॥
अयने विषुवे चैव युगादिषु चतुर्ष्वपि ॥ दर्शे च प्रेतपक्षे च श्राद्धं कुर्याद्गृही द्विजः ॥४० ॥ मन्वादिषु मृताहे च अष्टकासु च नारद ॥ नवधान्ये
समायाते गृही श्राद्धं समाचरेत् ॥ ४१ ॥ श्रोत्रिये गृहमायाते ग्रहणे चंद्रसूर्योः ॥ पुण्यक्षेत्रेषु तीर्थेषु गृही श्राद्धं समाचरेत् ॥ ४२ ॥ यज्ञो दानं
तपो होमः स्वाध्यायः पितृतर्पणम् ॥ वृथा भवति तत्सर्वमूर्द्ध्वपुंड्रं विना कृतम् ॥ ४३ ॥ उर्द्ध्वपुंड्रं च तुलसीं श्राद्धे नेच्छंति केचन ॥ वृथाचारः
परित्याज्यस्तस्माच्छ्रेयोऽर्थिभिर्द्विजैः॥४४॥ इत्येवमादयो धर्माः स्मृतिमार्गप्रचोदिताः ॥ कार्या द्विजातिभिः सम्यक्सर्वकर्मफलप्रदाः ॥ ४५ ॥ सदा
चारपरा ये तु तेषां विष्णुः प्रसीदति ॥ विष्णौ प्रसन्नतां याते किमसाध्यं द्विजोत्तम ॥ ४६ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे
स्मार्त्तधर्मेषु वेदाध्ययनादिकस्य गृहस्थधर्मस्य च निरूपणं नाम षड्विंशोऽध्यायः॥२६॥सनक उवाच॥ गृहस्थस्य सदाचारं वक्ष्यामि मुनिसत्तम ॥
यद्वृतां सर्वपापानि नश्यंत्येव न संशयः ॥१॥ ब्राह्मे मुहूर्ते चोत्थाय पुरुषार्थाविरोधिनीम् ॥ वृत्तिं संचिंतयेद्विप्र कृतकेशप्रसाधनः॥२॥ दिवासंध्यासु
कर्णस्थब्रह्मसूत्र उदङ्मुखः ॥ कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः॥३॥ शिरः प्रावृत्य वस्त्रेण ह्यंतर्द्धाय तृणैर्महीम् ॥ वहन्काष्ठं करेणैक तावन्मौनी
भवेद्द्विजः ॥ ४ ॥ पथि गोष्ठे नदीतीरे तडागगृहसन्निधौ॥तथा वृक्षस्य च्छायायां कांतारे वह्निसन्निधौ ॥५॥देवालये तथोद्याने कृष्टभूमौ चतुष्पथे॥
ब्राह्मणानां समीपे च तथा गोगुरुयोषिताम् ॥ ६ ॥ तुषांगारकपालेषु जलमध्ये तथैव च ॥ एवमादिषु देशेषु मलमूत्रं न कारयेत् ॥ ७ ॥
शौचे यतः सदा कार्यः शौचमूलो द्विजः स्मृतः ॥ शौचाचारविहीनस्य समस्तं कर्म निष्फलम् ॥ ८ ॥ शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यंतरं तथा॥
मृज्जलाभ्यां बहिः शुद्धिर्भावशुद्धिस्तथांतरम् ॥ ९ ॥ गृहीतशिश्नश्चोत्थाय शौचाथ मृदमाहरेत् ॥ न मूषकादिखनितां फालोत्कृष्टां तथैव च
॥ १० ॥ वापीकूपतडागेभ्यो नाहरेदपि मृत्तिकाम् ॥ शौचं कुर्यात्प्रयत्नेन समादाय शुभां मृदम् ॥ ११ ॥ लिंगे मृदेका दातव्या तिस्रो वा मेढ्रयो

द्वयोः ॥ एतन्मूत्रसमुत्सर्गे शौचमाहुर्मनीषिणः ॥ १२ ॥ एका लिंगे गुदे पंच दश वामे तथोभयोः ॥ सप्त तिस्रः प्रदातव्याः पादयोर्मृत्तिकाः पृथक् ॥
॥ १३ ॥ एतच्छौचं विडुत्सर्गे गंधलेपापनुत्तये ॥ एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणाम् ॥१४॥त्रिगुणं तु वनस्थानां यतीनां तच्चतुर्गुणम्॥ स्व
स्थाने पूर्णशौचं स्यात्पथ्यर्द्धं मुनिसत्तम ॥ १५ ॥ आतुरे नियमो नास्ति महापदि तथैव च ॥ गंधलेपक्षयकरं शौचं कुर्याद्विचक्षणः ॥१६ ॥ स्त्री
णामनुपनीतानां गंधलेपक्षयावधि ॥ व्रतस्थानां तु सर्वेषां यतिवच्छौचमिष्यते ॥ १७ ॥ विधवानां च विप्रेंद्र एतदेव निगद्यते ॥ एवं शौचं
तु निर्वर्त्य पश्चाद्वै सुसमाहितः ॥ १८ ॥ प्रागास्य उदगास्यो वाप्याचामेत्प्रयतेंद्रियः ॥ त्रिश्चतुर्वा पिबेदापो गंधफेनादिवर्जिताः ॥ १९ ॥ द्विर्मा
र्जयेत्कपोलं च तलेनोष्ठौ च सत्तम ॥ तर्जन्यंगुष्ठयोगेन नासारंध्रद्वयं स्पृशेत् ॥ २० ॥अंगुष्ठानामिकाभ्यां च चक्षुः श्रोत्रे यथाक्रमम् ॥ कनिष्ठांगुष्ठयो
गेन नाभिदेशे स्पृशेद्द्विजः ॥ २१ ॥ तलेनोरःस्थलं चैव अंगुल्यग्रैः शिरः स्पृशेत् ॥ तलेन चांगुलाग्रैर्वा स्पृशेदंसौ विचक्षणः ॥ २२ ॥ एवमा
चम्य विप्रेंद्र शुद्धिमाप्नोत्यनुत्तमाम् ॥ दंतकाष्ठं ततः खादेत्सत्वचं शस्तवृक्षजम् ॥ २३ ॥ बिल्वासनापामार्गणां निम्बाम्रार्कादिशाखिनाम् ॥
प्रक्षाल्य वारिणा चैव मंत्रेणाप्यभिमंत्रितम् ॥ २४ ॥ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ॥ ब्रह्म प्रज्ञां च मेधां च त्वन्नो धेहि वनस्पते ॥
॥ २५ ॥ कनिष्ठाग्रसमं स्थौल्ये विप्रः खादेद्दशांगुलम् ॥ नवांगुलं क्षत्रियश्च वैश्यश्चाष्टांगुलोन्मितम् ॥ २६॥ शूद्रो वेदांगुलमितं वनिता च मुनीश्वर ॥
अलाभे दंतकाष्ठानां गंडूषैर्भानुसंमितैः ॥ २७ ॥ मुखशुद्धिर्विधीयेत तृणपत्रसमन्वितैः ॥ करेणादाय वामेन संचर्वेद्वामदंष्ट्रया ॥ २८ ॥
द्विजान्संघर्ष्य गोदोहं ततः प्रक्षाल्य पाटयेत् ॥ जिह्वामुल्लिख्य ताभ्यां तु दलाभ्यां नियतेंद्रियः ॥ २९ ॥ प्रक्षाल्य प्रक्षिपेद् दूरे भूयश्चा
चम्य पूर्ववत् ॥ ततः स्नानं प्रकुर्वीत नद्यादौ विमले जले ॥ ३० ॥ तटं प्रक्षाल्य दर्भांश्च विन्यस्य प्रविशेज्जलम् ॥ प्रणम्य तत्र तीर्थानि
आवाह्य रविमंडलात् ॥ ३१ ॥ गंधाद्यैर्मंडलं कृत्वा ध्यात्वा देवं जनार्दनम् ॥ स्नायान्मंत्रान्स्मरन्पुण्यांस्तीर्थानि च विरिंचिज ॥ ३२ ॥
गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधुकावेरि जलेऽस्मिन्सन्निधिं कुरु ॥ ३३ ॥ पुष्कराद्यानि तीर्थानि गंगाद्याः सरित
स्तथा ॥ आगच्छंतु महाभागाः स्नानकाले सदा मम ॥ ३४ ॥ अयोध्या मथुरा माया काशी कांची ह्यवंतिका ॥ पुरी द्वारावती ज्ञेया सप्तैता
मोक्षदायिकाः ॥ ३५ ॥ ततोऽघमर्षणं जप्त्वा यतासुर्वारिसंप्लुतः ॥ स्नानांगं तर्पणं कृत्वाचम्यार्घ्यं भानवेऽर्पयेत् ॥ ३६ ॥ ततो ध्यात्वा विवस्वंतं
जलान्निर्गत्य नारद ॥ परिधायाहतं धौतं द्वितीयं परिवीय च ॥ ३७ ॥ कुशासने समाविश्य संध्याकर्म समारभेत् ॥ ईशानाभिमुखो विप्र गाय

त्र्याचम्य वै द्विज ॥३८॥ ऋतमित्यभिमंत्र्याथ पुनरेवाचमेद् बुधः ॥ ततस्तु वारिणात्मानं वेष्टयित्वा समुक्ष्य च ॥ ३९ ॥ संकल्प्य प्रणवान्ते
तु ऋषिच्छंदःसुरान्स्मरन् ॥ भूरादिभिर्व्याहृतिभिः सप्तभिः प्रोक्ष्य मस्तकम् ॥ ४० ॥ न्यासं समाचरेन्मंत्री पृथगेव करांगयोः ॥ विन्यस्य
हृदये तारं भूः शिरस्यथ विन्यसेत् ॥४१॥ भुवः शिखायां स्वश्चैव कवचे भूर्भुवोऽक्षिषु ॥ भूर्भुवः स्वस्तथात्रास्त्र दिक्षु तालत्रयं न्यसेत् ॥ ४२ ॥ तत
आवाहयेत्संध्यां प्रातः कोकनदस्थिताम् ॥ आगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनि ॥४३॥ गायत्रि च्छंदसां मातर्ब्रह्मयोने नमोऽस्तु ते॥मध्याह्ने
वृषभारूढां शुक्लांबरसमावृताम् ॥ ४४ ॥ सावित्रीं रुद्रयोनिं चावाहयेद्रुद्रवादिनीम् ॥ सायं तु गरुडारूढां पीतांबरसमावृताम् ॥ ४५ ॥ सरस्वतीं
विष्णुयोनिमाह्वयेद्विष्णुवादिनीम् ॥ तारं च व्याहृतीः सप्त त्रिपदां च समुच्चरन् ॥ ४६ ॥ शिरः शिखां च संपूर्य कुंभयित्वा विरेचयेत् ॥ वामम
ध्यात्परैर्वायुं क्रमेण प्राणसंयमे ॥ ४७ ॥ द्विराचामेत्ततः पश्चात्प्रातः सूर्यश्चमेति च ॥ आपः पुनंतु मध्याह्ने सायमग्निश्चमेति च ॥ ४८ ॥ आपो
हिष्ठेति तिसृभिर्मार्जनं च ततश्चरेत् ॥ सुमित्रिया न इत्युक्त्वा नासास्पृष्टजलेन च ॥ ४९ ॥ द्विषद्वर्गं समुत्सार्य द्रुपदां शिरसि क्षिपेत् ॥ ऋतं च
सत्यमेतेन कृत्वा चैवाघमर्षणम् ॥ ५० ॥ अंतश्चरसि मंत्रेण सकृदेव पिबेदपः ॥ ततः सूर्याय विधिवद्गन्धं पुष्पं जलांजलिम् ॥ ५१ ॥ क्षिप्त्वोपति
ष्ठेद्देवर्षे भास्करं स्वस्तिकांजलिम् ॥ ऊर्द्ध्वबाहुरधोबाहुः क्रमात्कल्यादिके त्रिके ॥ ५२ ॥ उदुत्यं चित्रं तच्चक्षुरित्येतत्त्रितयं जपेत् ॥ सौराञ्छैवान्वै
ष्णवांश्च मंत्रानन्यांश्च नारद ॥ ५३ ॥ तेजोऽसि गायत्र्यसीति प्रार्थयेत्सवितुर्महः ॥ ततोऽङ्गानि त्रिरावर्त्य ध्यायेच्छक्तीस्तदात्मिकाः ॥ ५४ ॥
ब्रह्माणी चतुराननाक्षवलया कुम्भं करैः स्रुक्स्रुवौ बिभ्राणा त्वरुणेंदुकांतिवदना ऋग्रूपिणी बालिका'। हंसारोहणकेलिखण्खण्मणेर्बिंबार्चिता भूषिता
गायत्री परिभाविता भवतु नः संपत्समृद्ध्यै सदा ॥ ५५ ॥ रुद्राणी नवयौवना त्रिनयना वैयाघ्रचर्मांबरा खट्वांगत्रिशिखाक्षसूत्रवलयाऽभीतिश्रियै
चास्तु नः ॥ विद्युद्दामजटाकलापविलसद्बालेंदुमौलिर्मुदा सावित्री वृषवाहना सिततनुर्ध्येया यजूरूपिणी ॥ ५६ ॥ ध्येया सा च सरस्वती भगवती
पीतांबरालंकृता श्यामा श्यामतनुर्जरोपरिलसद्गात्रांचिता वैष्णवी ॥ तार्क्ष्यस्था मणिनूपुरांगदलसद्ग्रैवेयभूषोज्ज्वला हस्तालंकृतशंखचक्रसुगदापद्मा
श्रियै चास्तु नः॥ ५७ ॥ एवं ध्यात्वा जपेत्तिष्ठन्प्रातर्मध्याह्नके तथा ॥ सायंकाले समासीनो भक्त्या तद्गतमानसः ॥ ५८ ॥ सहस्रपरमां देवीं शत
मध्यां दशावराम् ॥ त्रिपदां प्रणवोपेतां भूर्भुवःस्वरुपक्रमाम् ॥५९॥ षट्तारः संपुटो वापि व्रतिनश्च यतेर्जपः॥गृहस्थस्य सतारः स्याज्जप्य एवंविधो
मुने॥६०॥ ततो जप्त्वा यथाशक्ति सवित्रे विनिवेद्य च॥गायत्र्यै च सवित्रे च प्रक्षिपेदंजलिद्वयम्॥६१॥ ततो विसृज्य तां विप्र उत्तरे इति मंत्रतः॥
ब्रह्मणेशेन हरिणानुज्ञाता गच्छ सादरम् ॥६२॥ दिग्भ्यो दिग्देवताभ्यश्च नमस्कृत्य कृतांजलिः ॥ प्रातरादेः परं कर्म कुर्यादपि विधानतः ॥ ६३ ॥

प्रातर्मध्यंदिने चैव गृहस्थः स्नानमाचरेत् ॥ वानप्रस्थश्च देवर्षे स्नायात्त्रिषवणं यतिः ॥६४॥ आतुराणां तु रोगाद्यैः पांथानां च सकृन्मतम् ॥ ब्रह्म
यज्ञं ततः कुर्याद्दर्भपाणिर्मुनीश्वर ॥ ६५॥ दिवोदितानि कर्माणि प्रमादादकृतानि चेत्॥शर्वर्याः प्रथमे यामे तानि कुर्याद्यथाक्रमम् ॥६६॥ नोपा
स्ते यो द्विजः संध्यां धूर्तबुद्धिरनापदि ॥ पाषंडः स हि विज्ञेयः सर्वधर्मबहिष्कृतः ॥ ६७ ॥ यस्तु संध्यादिकर्माणि कूटयुक्तिविशारदः ॥ परित्य
जति तं विद्यान्महापातकिनां वरम् ॥ ६८ ॥ ये द्विजा अभिभाषंते त्यक्तसंध्यादिकर्मणः ॥ ते यांति नरकान्घोरान्यावच्चंद्रार्कतारकम् ॥ ६९ ॥
देवार्चनं ततः कुर्याद्वैश्वदेवं यथाविधि ॥ तत्रत्यमतिथिं सम्यगन्नाद्यैश्च प्रपूजयेत् ॥७०॥ वक्तव्या मधुरा वाणी तेष्वप्यभ्यागतेषु तु॥जलान्नकंदमूलै
र्वा गृहदानेन चार्चयेत् ॥७१॥ अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ॥ स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥७२॥ अज्ञातगोत्रनामा
नमन्यग्रामादुपागतम्॥ विपश्चितोऽतिथिं प्राहुर्विष्णुवत्तं प्रपूजयेत् ॥ ७३ ॥ स्वग्रामवासिनं त्वेकं श्रोत्रियं विष्णुतत्परम् ॥ अन्नाद्यैः प्रत्यहं विप्र
पितॄनुद्दिश्य तर्पयेत् ॥ ७४ ॥ पंचयज्ञपरित्यागी ब्रह्महेत्युच्यते बुधैः ॥ कुर्यादहरहस्तस्मात्पंचयज्ञान्प्रयत्नतः ॥ ७५ ॥ देवयज्ञो भूतयज्ञः
पितृयज्ञस्तथैव च ॥ नृयज्ञो ब्रह्मयज्ञश्च पंचयज्ञान्प्रचक्षते ॥ ७६ ॥ भृत्यमित्रादिसंयुक्तः स्वयं भुञ्जीत वाग्यतः ॥ द्विजानां भोज्यमश्नी
यात्पात्रं नैव परित्यजेत् ॥ ७७ ॥ संस्थाप्य स्वासने पादौ वस्त्रार्द्धं परिधाय च ॥ मुखेन वमितं भुक्त्वा सुरापीत्युच्यते बुधैः ॥ ७८ ॥
खादितार्द्धं पुनः खादेन्मोदकांश्च फलानि च ॥ प्रत्यक्षं लवणं चैव गोमांसाशीति गद्यते ॥ ७९ ॥ अपोशाने वाचमने अद्यद्रव्येषु च द्विजः ॥
शब्दं न कारयेद्विप्रस्तं कुर्वन्नारकी भवेत् ॥ ८० ॥ पथ्यमन्नं प्रभुञ्जीत वाग्यतोऽन्नमकुत्सयन् ॥ अमृतोपस्तरणमसि अपोशानं भुजेः पुरः
॥ ८१ ॥ अमृतापिधानमसि भोज्यान्तेऽपः सकृत्पिबेत्॥प्राणाद्या आहुतीर्दत्त्वाचम्य भोजनमाचरेत् ॥ ८२ ॥ ततश्चाचम्य विप्रेंद्र शास्त्रचिंता
परो भवेत् ॥ रात्रावपि यथाशक्ति शयनासनभोजनैः ॥८३॥ एवं गृही सदाचारं कुर्यात्प्रतिदिनं मुने ॥ यदाऽऽचारपरित्यागी प्रायश्चित्ती तदा
भवेत् ॥८४॥ दूषितां स्वतनुं दृष्ट्वा पालिताद्यैश्च सत्तम ॥ पुत्रेषु भार्यां निःक्षिप्य वनं गच्छेत्सहैव वा ॥ ८५॥भवेत्त्रिषवणस्नायी नखश्मश्रुजटाधरः ॥
अधःशायी ब्रह्मचारी पञ्चयज्ञपरायणः ॥ ८६ ॥फलमूलाशनो नित्यं स्वाध्यायनिरतस्तथा ॥ दयावान्सर्वभूतेषु नारायणपरायणः ॥८७ ॥ वर्जये
द्ग्रामजातानि पुष्पाणि च फलानि च ॥ अष्टौ ग्रासांश्च भुञ्जीत न कुर्याद्रात्रिभोजनम् ॥ ८८॥अत्यन्तं वर्जयेत्तैलं वानप्रस्थसमाश्रमी ॥ व्यवायं
वर्जयेच्चैव निद्रालस्ये तथैव च ॥ ८९ ॥ शंखचक्रगदापाणिं नित्यं नारायणं स्मरेत्॥ वानप्रस्थः प्रकुर्वीत तपश्चांद्रायणादिकम् ॥ ९० ॥ सहेत

शीततापादिवह्निं परिचरेत्सदा ॥ यदा मनसि वैराग्यं जातं सर्वेषु वस्तुषु ॥ ९१ ॥ तदैव संन्यसेद्विप्र पतितस्त्वन्यथा भवेत् ॥ वेदांताभ्यासनिरतः
शांतो दांतो जितेंद्रियः ॥ ९२॥ निर्द्वंद्वो निरहंकारो निर्ममः सर्वदा भवेत्॥शमादिगुणसंयुक्तः कामक्रोधविवर्जितः ॥९३॥ नग्नो वा जीर्णकौपीनो
भवेन्मुंडो यतिर्द्विजः ॥ समः शत्रौ च मित्रे च तथा मानापमानयोः ॥ ९४ ॥ एकरात्रं वसेद्ग्रामे त्रिरात्रं नगरे तथा ॥ भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी
भवेद्यतिः ॥ ९५ ॥ अनिंदितद्विजगृहे व्यंगारे भुक्तिवर्जिते ॥ विवादरहिते चैव भिक्षार्थं पर्यटेद्यतिः ॥ ९६ ॥ भवेत्त्रिषवणस्नायी नारायणपरायणः॥
जपेच्च प्रणवं नित्यं जितात्मा विजितेंद्रियः॥ ९७॥ एकान्नादी भवेद्यस्तु कदाचिल्लंपटो यतिः ॥ न तस्य निष्कृतिर्दृष्टा प्रायश्चित्तायुतैरपि ॥ ९८॥
लोभाद्यदि यतिर्विप्र तनुपोषपरो भवेत् ॥ स चंडालसमो ज्ञेयो वर्णाश्रमविगर्हितः ॥ ९९ ॥ आत्मानं चिंतयेद्देवं नारायणमनामयम्॥निर्द्वंद्वं निर्ममं
शांतं मायातीतममत्सरम् ॥ १०० ॥ अव्ययं परिपूर्णं च सदानन्दैकविग्रहम् ॥ ज्ञानस्वरूपममलं परं ज्योतिः सनातनम् ॥ १ ॥ अविकारमनाद्यंतं
जगच्चैतन्यकारणम्॥निर्गुणं परमं ध्यायेदात्मानं परतः परम् ॥ २ ॥ पठेदुपनिषद्वाक्यं वेदांतार्थांश्च चिंतयेत् ॥ सहस्रशीर्षं देवं च सदा ध्यायेज्जितें
द्रियः ॥ ३ ॥ एवं ध्यानपरो यस्तु यतिर्विगतमत्सरः ॥ स याति परमानंदं परं ज्योतिः सनातनम् ॥ ४ ॥ इत्येवमाश्रमाचारान्यः करोति द्विजः
क्रमात् ॥ स याति परमं स्थानं यत्र गत्वा न शोचयति ॥५॥वर्णाश्रमाचाररताः सर्वपापविवर्जिताः ॥ नारायणपरा यांति तद्विष्णोः परमं पदम्॥
॥ ६ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे सदाचारेषु गृहस्थवानप्रस्थयतिधर्मनिरूपणं नाम सप्तविंशोऽध्यायः ॥ २७ ॥ सनक
उवाच ॥ शृणुष्व मुनिशार्दूल श्राद्धस्य विधिमुत्तमम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ १ ॥ क्षयाहपूर्वदिवसे स्नात्वा चैकाशनो
भवेत् ॥ अधःशायी ब्रह्मचारी निशि विप्रान्निमंत्रयेत् ॥ २ ॥ दन्तधावनतांबूले तैलाभ्यंगं तथैव च ॥ रत्योषधिपरान्नानि श्राद्धकर्त्ता
विवर्जयेत् ॥ ३ ॥ अध्वानं कलहं क्रोधं व्यवायं च धुरं तथा ॥ श्राद्धकर्त्ता च भोक्ता च दिवास्वापं च वर्जयेत् ॥ ४ ॥ श्राद्धे निमं
त्रितो यस्तु व्यवायं कुरुते यदि ॥ ब्रह्महत्यामवाप्नोति नरकं चापि गच्छति ॥ ५ ॥ श्राद्धे नियोजयेद्विप्रं श्रोत्रियं विष्णुतत्परम् ॥ यथास्वा
चारनिरतं प्रशांतं सत्कुलोद्भवम् ॥ ६ ॥ रागद्वेषविहीनं च पुराणार्थविशारदम् ॥ त्रिमधुत्रिसुपर्णज्ञं सर्वभूतदयापरम् ॥ ७ ॥ देवपूजारतं चैव
स्मृतितत्त्वविशारदम् ॥ वेदांततत्त्वसंपन्नं सर्वलोकहिते रतम् ॥ ८ ॥ कृतज्ञं गुणसंपन्नं गुरुशुश्रूषणे रतम् ॥ परोपदेशनिरतं सच्छा
स्त्रकथनैस्तथा ॥ ९ ॥ एते नियोजितव्या वै श्राद्धे विप्रा मुनीश्वर ॥ श्राद्धे वर्ज्यान्प्रवक्ष्यामि शृणु तान्सुसमाहितः ॥ १० ॥

न्यूनांगश्चाधिकांगश्च कदर्यो रोगितस्तथा ॥ कुष्ठी च कुनखी चैव लंबकर्णः क्षतव्रतः ॥ ११ ॥ नक्षत्रपाठजीवी च तथा च शवदाहकः ॥ कुवादी
परिवेत्ता च तथा देवलकः खलः ॥१२॥ निंदकोऽमर्षणो धूर्तस्तथैव ग्रामयाजकः ॥ असच्छास्त्राभिनिरतः परान्ननिरतस्तथा ॥ १३ ॥ वृषलीसूति
पोष्टा च वृषलीपतिरेव च ॥ कुंडश्च गोलकश्चैव ह्ययाज्यानां च याजकः ॥ १४ ॥ दंभाचारो वृथामुंडी ह्यन्यस्त्रीधनतत्परः ॥विष्णुभक्तिविहीनश्च
शिवभक्तिपराङ्मुखः॥ १५ ॥ वेदविक्रयिणश्चैव व्रतविक्रयिणस्तथा ॥ स्मृतिविक्रयिणश्चैव मंत्रविक्रयिणस्तथा ॥१६॥ गायकाः काव्यकर्त्तारो भिष
क्छास्त्रोपजीविनः ॥ वेदनिंदापरश्चैव ग्रामारण्यप्रदाहकः ॥ १७॥ तथातिकामुकश्चैव रसविक्रयकारकः ॥ कूटयुक्तिरतश्चैव श्राद्धे वर्ज्याः प्रयत्नतः ॥
॥ १८॥ निमंत्रयीत पूर्वेद्युस्तस्मिन्नेव दिनेऽथवा ॥ निमंत्रितो भवेद्विप्रो ब्रह्मचारी जितेंद्रियः॥ १९ ॥ श्राद्धे क्षणस्तु कर्त्तव्यः प्रसादश्चेति सत्तम ॥
निमंत्रयेद्द्विजं प्राज्ञं दर्भपाणिर्जितेंद्रियः ॥ २० ॥ ततः प्रातः समुत्थाय प्रातःकृत्यं समाप्य च ॥श्राद्धं समाचरेद्विद्वान्काले कुतपसंज्ञिते ॥ २१ ॥
दिवसस्याष्टमे काले यदा मंदायते रविः ॥ स कालः कुतपस्तत्र पितॄणां दत्तमक्षयम् ॥ २२ ॥ अपराह्णः पितॄणां तु दत्तः कालः स्वयंभुवा॥ तत्काल
एव दातव्यं कव्यं तस्माद्द्विजोत्तमैः ॥ २३ ॥ यत्कव्यं दीयते द्रव्यैरकाले मुनिसत्तम ॥ राक्षसं तद्धि विज्ञेयं पितॄणां नोपतिष्ठति॥ २४ ॥ कव्यं
प्रतं तु सायाह्ने राक्षसं तद्भवेदपि ॥ दाता नरकमाप्नोति भोक्ता च नरकं व्रजेत् ॥ २५ ॥ क्षयाहस्य तिथेर्विप्र यदि दंडमितिर्भवेत् ॥ विद्धापराह्णि
कायां तु श्राद्धं कार्यं विजानता ॥ २६ ॥ क्षयाहस्य तिथिर्या तु ह्यपराह्णद्वये यदि ॥ पूर्वा क्षये तु कर्त्तव्या वृद्धौ कार्या तथोत्तरा ॥ २७॥ मुहूर्त्त
द्वितये पूर्वदिने स्यादपरेऽहनि ॥ तिथिः सायाह्नगा यत्र परा कव्यस्य विश्रुता ॥ २८ ॥ किंचित्पूर्वदिने प्राहुर्मुहूर्त्तद्वितये सति ॥ नैतन्मतं हि सर्वेषां
कव्यदाने मुनीश्वर ॥ २९ ॥ निमंत्रितेषु विप्रेषु मिलितेषु द्विजोत्तम ॥ प्रायश्चित्तविशुद्धात्मा तेभ्योऽनुज्ञां समाहरेत् ॥ ३० ॥ श्राद्धार्थं समनुज्ञातो
विप्रान्भूयो निमंत्रयेत् ॥ उभौ च विश्वेदेवार्थं पित्रर्थं त्रीन्यथाविधि ॥ ३१ ॥ देवतार्थं च पित्रर्थमेकैकं वा निमंत्रयेत् ॥ श्राद्धार्थं समनुज्ञातः कारये
न्मंडलद्वयम् ॥ ३२ ॥ चतुरस्रं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य वै ॥ वैश्यस्य वर्तुलं ज्ञेयं शूद्रस्याभ्युक्षणं भवेत् ॥ ३३॥ब्राह्मणानामभावे तु भ्रातरं
पुत्रमेव च ॥ आत्मानं वा नियुंजीत न विप्रं वेदवर्जितम् ॥ ३४ ॥ प्रक्षाल्य विप्रपादांश्च ह्याचांतानुपवेश्य च ॥ यथावदर्चनं कुर्यात्स्मर
न्नारायणं प्रभुम् ॥३५॥ ब्राह्मणानां तु मध्ये च द्वारदेशे तथैव च ॥ अपहता इत्यृचा वै कर्त्ता तु विकिरेत्तिलान् ॥ ३६ ॥ यवैर्दर्भैश्च विश्वेषां
देवानामिदमासनम् ॥ दत्त्वेति भूयो दद्याच्च दैवे क्षणप्रतीक्षणम् ॥ ३७ ॥ अक्षय्यासनयोः षष्ठी द्वितीयावाहने स्मृता ॥ अन्नदाने चतुर्थी

स्याच्छेषाः संबुद्धयः स्मृताः ॥ ३८ ॥ आसाद्य पात्रद्वितयं दर्भशाखासमन्वितम् ॥ तत्पात्रे सेचयेत्तोयं शन्नोदेवीत्यृचा ततः ॥ ३९ ॥ यवोसीति
ति यवान् क्षिप्त्वा गंधपुष्पे च वाग्यतः ॥ आवाहयेत्ततो देवान्विश्वे देवास्स इत्यृचा ॥ ४० ॥ या दिव्या इति मंत्रेण दद्यादर्घ्यं समाहितः ॥गंधैश्च
पत्रपुष्पैश्च धूपैर्दीपैर्यजेत्ततः ॥ ४१ ॥ देवैश्च समनुज्ञातो यजेत्पितृगणांस्तथा ॥ तिलसंयुक्तदर्भैश्च दद्यात्तेषां सदासनम् ॥ ४२ ॥
पात्राण्यासादयेत्त्रीणि ह्यर्घार्थं पूर्ववद्द्विजः ॥ शन्नोदेव्या जलं क्षिप्त्वा तिलोसीति तिलान्क्षिपेत् ॥४३॥ उशन्त इत्यृचावाह्य पितॄन्विप्रः समाहितः॥
या दिव्या इति मंत्रेण दद्यादर्घ्यं च पूर्ववत् ॥ ४४ ॥ गंधैश्च पत्रपुष्पैश्च धूपैर्दीपैश्च सत्तम ॥ वासोभिर्भूषणैश्चैव यथाविभवमर्चयेत् ॥
॥ ४५ ॥ ततोऽन्नाग्रं समादाय घृतयुक्तं विचक्षणः ॥ अग्नौ करिष्य इत्युक्त्वा तेभ्योऽनुज्ञां समाहरेत् ॥ ४६ ॥ करवै करवाणीति चापृष्टा
ब्राह्मणा मुने ॥ कुरुष्व क्रियतां वेति कुर्विति ब्रूयुरेव च॥४७॥ उपासनाग्निमाधाय स्वगृह्योक्तविधानतः ॥ सोमाय च पितृमते स्वधा नम इतीरयेत्
॥ ४८ ॥ अग्नये कव्यवाहनाय स्वधा नम इतीह वा ॥ स्वाहांतेनापि वा प्राज्ञो जुहुयात्पितृयज्ञवत् ॥ ४९ ॥ आभ्यामेवाहुतिभ्यां तु पितॄणां
तृप्तिरक्षया ॥ अग्न्यभावे तु विप्रस्य पाणौ होमो विधीयते ॥ ५० ॥ यथाचारं प्रकुर्वीत पाणावग्नौ च वा द्विज ॥ नह्यग्निर्दूरगः कार्यः पार्वणे समु
पस्थिते ॥ ५१ ॥ संधायाग्निं ततः कार्यं कृत्वा तं विसृजेत्कृती ॥ यद्याग्निर्दूरगो विप्र पार्वणे समुपस्थिते ॥ ५२ ॥ भ्रातृभिः कारयेच्छ्राद्धं
साग्निकैर्विधिवद्द्विजैः ॥ क्षयाहे चव संप्राप्ते स्वस्याग्निर्दूरगो यदि ॥ ५३॥ तथैव भ्रातरस्तत्र लौकिकाग्नावपि स्थिताः ॥ उपासनाग्नौ दूरस्थे समीपे
भ्रातरि स्थिते ॥ ५४ ॥ यद्यग्नौ जुहुयाद्वापि पाणौ वा स हि पातकी ॥ उपासनाग्नौ दूरस्थे केचिदिच्छंति वै द्विजाः ॥ ५५ ॥ तच्छेषं विप्रपात्रेषु
विकिरेत्संस्मरन्हरिम् ॥ भक्ष्यैर्भोज्यैश्च लेह्यैश्च स्वाद्यैर्विप्रान्प्रपूजयत् ॥ ५६ ॥ अन्नत्यागं ततः कुर्यादुभयत्र समाहितः॥आगच्छंतु महाभागा विश्वे
देवा महाबलाः ॥ ५७ ॥ ये यत्र विहिताः श्राद्धे सावधाना भवंतु ते ॥ इति संप्रार्थयेद्देवान्ये देवास ऋचा नु वै ॥५८॥ तथा संप्रार्थयद्विप्रान्ये च हेति
ऋचा पितॄन् ॥ अमूर्तानां मूर्तानां च पितॄणां दीप्ततेजसाम् ॥ ५९ ॥ नमस्यामि सदा तेषां ध्यानिनां योगचक्षुषाम् ॥ एवं पितॄन्नमस्कृत्य नारायण
परायणः ॥ ६० ॥ दत्तं हविश्च तत्कर्म विष्णवे विनिवेदयेत् ॥ ततस्ते ब्राह्मणाः सर्वे भुञ्जीरन्वाग्यता द्विजाः ॥ ६१ ॥ हसते वदते
कोऽपि राक्षसं तद्भवेद्धविः ॥ यथाचारं प्रदेयं च मधुमांसादिकं तथा ॥ ६२ ॥ पाकादि च प्रशंसेरन् वाग्यता धृतभाजनाः ॥ यदि पात्रं त्यजे
त्कोऽपि ब्राह्मणः श्राद्धयोजितः॥६३॥ श्राद्धहंता स विज्ञेयो नरकायोपपद्यते ॥ भुंजानेषु च विप्रेषु ह्यन्योन्यं संस्पृशेद्यदि॥६४॥ तदन्नमत्यजन्भुक्त्वा

गायत्र्यष्टशतं जपेत् ॥ भुज्यमानेषु विप्रेषु कर्त्ता श्रद्धापरायणः ॥ ६५ ॥ स्मरेन्नारायणं देवमनंतमपराजितम् ॥ रक्षोघ्नान्वैष्णवांश्चैव पैतृकांश्च
विशेषतः ॥ ६६ ॥ जपेच्च पौरुषं सूक्तं नाचिकेतत्रयं तथा ॥ त्रिमधु त्रिसुपर्णं च पावमानं यजूंषि च ॥ ६७ ॥ सामान्यपि तथोक्तानि वदेत्पुण्यप्रदां
स्तथा ॥ इतिहासपुराणानि धर्मशास्त्राणि चैव हि ॥६८॥भुंजीरन्ब्राह्मणा यावत्तावदेताञ्जपेद्द्विज ॥ ब्राह्मणेषु च भुक्तेषु विकिरं विक्षिपेत्तथा॥६९॥
शेषमन्नं वदेच्चैव मधुसूक्तं च वै जपेत् ॥ स्वयं च पादौ प्रक्षाल्य सम्यगाचम्य नारद ॥ ७० ॥ आचांतेषु च विप्रेषु पिंडं निर्वापयेत्ततः ॥ स्वस्तिवा
चनकं कुर्यादक्षय्योदकमेव च ॥७१ ॥ दत्त्वा समाहितः कुर्यात्तथा विप्राभिवादनम् ॥ अचालयित्वा पात्रं तु स्वस्ति कुर्वंति ये द्विजाः ॥ ७२ ॥
वत्सरं पितरस्तेषां भवंत्युच्छिष्टभोजिनः ॥ दातारो नोऽभिवर्द्धंतामित्याद्यैः स्मृतिभाषितैः ॥७३॥आशीर्वचो लभेत्तेभ्यो नमस्कारं चरेत्ततः॥दद्याच्च
दक्षिणां शक्त्या तांबूलं गंधसंयुतम् ॥७४॥ न्युब्जपात्रमथानीय स्वधाकारमुदीरयेत् ॥ वाजेवाजे इति ऋचा पितॄन्देवान्विसर्जयेत् ॥ ७५ ॥ भोक्ता
च श्राद्धकृत्तस्यां रजन्यां मैथुनं त्यजेत् ॥ तथा स्वाध्यायमध्वानं प्रयत्नेन परित्यजेत् ॥७६ ॥ अध्वगश्चातुरश्चैव विहीनश्च धनैस्तथा ॥आमश्राद्धं
प्रकुर्वीत हेम्ना वास्पृश्यभार्यकः ॥ ७७ ॥ द्रव्याभावे द्विजाभावे ह्यन्नमात्रं च पाचयेत् ॥ पैतृकेन तु सूक्तेन होमं कुर्याद्विचक्षणः ॥ ७८ ॥ अत्यंत
द्रव्यशून्यश्चेत्स्वशक्त्या तु तृणं गवाम् ॥ स्नात्वा च विधिवद्विप्र कुर्याद्वा तिलतर्पणम् ॥ ७९ ॥ अथवा रोदनं कुर्यादत्युच्चैर्विजने वने ॥दरिद्रोऽहं
महापापी वदन्निति विचक्षणः ॥८०॥ परेद्युः श्राद्धकृन्मर्त्यो यो न तर्पयते पितॄन् ॥ तत्कुलं नाशमायाति ब्रह्महत्यां च विंदति ॥ ८१ ॥
श्राद्धं कुर्वंति ये मर्त्याः श्रद्धावंतो मुनीश्वर ॥ न तेषां संततिच्छेदः संपन्नास्ते भवंति च ॥ ८२ ॥ पितॄन्यजंति ये श्राद्धे तैस्तु विष्णुः प्रपूजितः ॥
तस्मिंस्तुष्टे जगन्नाथे सर्वास्तुष्यंति देवताः ॥ ८३ ॥ पितरो देवताश्चैव गंधर्वाप्सरसस्तथा ॥ यक्षाश्च सिद्धा मनुजा हरिरेव सनातनः ॥ ८४ ॥
येनेदमखिलं जातं जगत्स्थावरजंगमम् ॥ तस्माद्दाता च भोक्ता च सर्वं विष्णुः सनातनः ॥ ८५ ॥ यदस्ति विप्र यन्नास्ति दृश्यं चादृश्यमेव च ॥
सर्वं विष्णुमयं ज्ञेयं तस्माद्न्यन्न विद्यते ॥ ८६ ॥ आधारभूतो विश्वस्य सर्वभूतात्मकोऽव्ययः ॥ अनौपम्यस्वभावश्च भगवान्हव्यकव्यभुक् ॥
॥ ८७ ॥ परब्रह्माभिधेयो य एक एव जनार्दनः ॥ कर्त्ता कारयिता चैव सर्वं विष्णुः सनातनः॥ ८८ ॥ इत्येवं ते मुनिश्रेष्ठ श्राद्धस्य विधिरुत्तमः ॥
कथितः कुर्वतामेवं पापं सद्यो विलीयते ॥ ८९ ॥ य इदं पठते भक्त्या श्राद्धकाले द्विजोत्तमः ॥ पितरस्तस्य तुष्यंति संततिश्चैव वर्द्धते ॥ ९० ॥
इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे श्राद्धक्रियावर्णनं नामाष्टाविंशोऽध्यायः ॥ २८ ॥ सनक उवाच ॥ तिथीनां निर्णयं वक्ष्ये प्रायश्चित्त

विधिं तथा ॥ शृणुष्व तन्मुनिश्रेष्ठ कर्मसिद्धिर्यतो भवेत् ॥ १ ॥ श्रौतं स्मार्त्तं व्रतं दानं यच्चान्यत्कर्म वैदिकम्॥अनिर्णीतासु तिथिषु न किंचित्फ
लति द्विज ॥ २ ॥ एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्द्दशी॥अमावास्या तृतीया च ह्युपवासव्रतादिषु ॥३॥परविद्धाः प्रशस्ताः स्युर्न ग्राह्याः पूर्व
संयुताः॥नागविद्धा तु या षष्ठी शिवविद्धा तु सप्तमी ॥४॥दशम्येकादशीविद्धा नोपोष्याः स्युः कदाचन॥दर्शं च पौर्णमासीं च सप्तमीं पितृवास
रम् ॥ ५ ॥ पूर्वविद्धं प्रकुर्वाणो नरकायोपपद्यते ॥ कृष्णपक्षे पूर्वविद्धां सप्तमीं च चतुर्दशीम् ॥ ६॥ प्रशस्तां केचिदाहुश्च तृतीयां नवमीं तथा ॥
व्रतादीनां तु सर्वेषां शुक्लपक्षो विशिष्यते ॥ ७ ॥ अपराह्णाच्च पूर्वाह्णं ग्राह्यं श्रेष्ठत्तरं यतः ॥ असंभवे व्रतादीनां यदि पौर्वाह्णिकी तिथिः ॥ ८ ॥
मुहूर्तद्वितयं ग्राह्यं भगवत्युदिते रवौ ॥ प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ॥ ९ ॥ उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः ॥ तिथिनक्षत्र
संयोगविहितव्रतकर्मणि ॥ १० ॥ प्रदोषव्यापिनी ग्राह्या त्वन्यथा निष्फलं भवेत् ॥ अर्द्धरात्रादधो या तु नक्षत्रव्यापिनी तिथिः ॥ ११ ॥ सैव
ग्राह्या मुनिश्रेष्ठ नक्षत्रविहितव्रते ॥ यद्यर्द्धरात्रयोर्व्याप्तं नक्षत्रं तु दिनद्वये ॥ १२ ॥ तत्पुण्यं तिथिसंयुक्तं नक्षत्रं ग्राह्यमुच्यते ॥ अर्द्धरात्रद्वये स्यातां
नक्षत्रं च तिथिर्यदि ॥ १३ ॥ क्षये पूर्वा प्रशस्ता स्याद्वृद्धौ कार्या तथोत्तरा ॥ अर्द्धरात्रद्वयव्याप्ता तिथिर्नक्षत्रसंयुता ॥ १४ ॥ ह्रासवृद्धिविशून्या
चेद् ग्राह्या पूर्वा तथा परा ॥ ज्येष्ठासंमिश्रितं मूलं रोहिणी वह्निसंयुता॥१५॥ मैत्रेण संयुता ज्येष्ठा संतानादिविनाशिनी ॥ ततः स्युस्तिथयः पुण्याः
कर्मानुष्ठानतो दिवा ॥ १६ ॥ रात्रिव्रतेषु सर्वेषु रात्रियोगो विशिष्यते ॥ तिथिर्नक्षत्रयोगेन या पुण्या परिकीर्तिता ॥ १७ ॥ तस्यां तु तद्व्रतं कार्यं
सैव कार्या विचक्षणैः ॥ उदयव्यापिनी ग्राह्या श्रवणद्वादशी व्रते ॥१८॥ सूर्येन्दुग्रहणे यावत्तावद् ग्राह्या जपादिषु॥ संक्रांतिषु तु सर्वासु पुण्यकालो
निगद्यते ॥ १९ ॥ स्नानदानजपादीनां कुर्वतामक्षय फलम् ॥ तत्र कर्कटको ज्ञेयो दक्षिणायनसंक्रमः ॥ २० ॥ पूर्वतो घटिकास्त्रिंशत्पुण्यकालं विदु
र्बुधाः ॥ वृषभे वृश्चिके चैव सिंहे कुम्भे तथैव च॥२१॥पूर्वमष्टमुहूर्तास्तु ग्राह्याः स्नानजपादिषु ॥ तुलायां चैव मेषे च पूर्वतः परतस्तथा॥२२॥ ज्ञेया
दशैव घटिका दत्तस्याक्षयतावहाः॥कन्यायां मिथुने चैव मीने धनुषि च द्विज॥२३॥ घटिकाः षोडश ज्ञेया परतः पुण्यदायिकाः॥ माकरं संक्रमं प्राहु
रुत्तरायणसंज्ञकम्॥२४॥परास्त्रिंशच्च घटिकाश्चत्वारिंशच्च पूर्ववत्॥आदित्यशीतकिरणौ ग्राह्यावस्तंगतौ यदि॥२५॥स्नात्वा भुंजीत विप्रेंद्र परेद्युः शुद्धमंड
लम्॥दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूः स्मृता॥२६॥अमावास्या द्विधा प्रोक्ता विद्वद्भिर्धर्मलिप्सुभिः॥सिनीवाली द्विजैर्ग्राह्या साग्निकैः श्राद्धकर्मणि
॥२७॥कुहूः स्त्रीभिस्तथा शूद्रैरपि वानग्निकैस्तथा ॥ अपराह्णद्वयव्यापिन्यमावास्या तिथिर्यदि ॥२८॥ क्षये पूर्वा तु कर्त्तव्या वृद्धौ कार्या तथोत्तरा ॥

अमावास्या प्रतीता चेन्मध्याह्नात्परतो यदि ॥ २९ ॥ भूतविद्धेति विख्याता सद्भिः शास्त्रविशारदैः ॥ अत्यंतक्षयपक्षे तु परेद्युर्नापराह्णगा ॥ ३० ॥
तत्र ग्राह्या सिनीवाली सायाह्नव्यापिनी तिथिः॥ अर्वाचीनक्षये चैव सायाह्नव्यापिनी तथा॥ ३१ ॥ सिनीवाली परा ग्राह्या सर्वथा श्राद्धकर्मणि ॥
अत्यंततिथिवृद्धौ तु भूतविद्धां परित्यजेत् ॥ ३२ ॥ ग्राह्या स्यादपराह्णस्था कुहूः पैतृककर्मणि ॥ यथार्वाचीनवृद्धौ तु संत्याज्या भूतसंयुता॥ ३३ ॥
परेद्युर्विबुधश्रेष्ठैः कुहूर्ग्राह्या पराह्णगा ॥ मध्याह्नद्वितये व्याप्ता ह्यमावास्या तिथिर्यदि ॥ ३४ ॥ तत्रेच्छया च संग्राह्या पूर्वा वाथ पराथवा॥ अन्वा
धानं प्रवक्ष्यामि संतः संपूर्णपर्वणि ॥ ३५ ॥ प्रतिपद्दिवसे कुर्याद्यागं च मुनिसत्तम ॥ पर्वणो यश्चतुर्थांश आद्याः प्रतिपदस्त्रयः ॥ ३६ ॥ यागकालः
स विज्ञेयः प्रातरुक्तो मनीषिभिः ॥ मध्याह्नद्वितये स्याताममावास्या च पूर्णिमा ॥ ३७॥परेद्युरेव विप्रेंद्र सद्यः कालो विधीयते ॥ ३८ ॥ पूर्वद्वये
परेद्युः स्यात्संगवात्परतो यदि॥सद्यः कालः परेद्युः स्याज्ज्ञेयमेवं तिथिक्षये ॥ ३९ ॥ सर्वैरेकादशी ग्राह्या दशमीपरिवार्जिता ॥ दशमीसंयुता हंति
पुण्यं जन्मत्रयार्जितम् ॥ ४० ॥ एकादशी कलामात्रा द्वादश्यां तु प्रतीयते ॥ द्वादशी च त्रयोदश्यामस्ति चेत्सा परा स्मृता ॥४१॥ संपूर्णैकादशी
शुद्धा द्वादश्यां च प्रतीयते ॥ त्रयोदशी च रात्र्यंते तत्र वक्ष्यामि निर्णयम् ॥ ४२ ॥ पूर्वा गृहस्थैः सा कार्य्या ह्युत्तरा यतिभिस्तथा ॥ गृहस्थाः
सिद्धिमिच्छंति यतो मोक्षं यतीश्वराः ॥ ४३ ॥ द्वादश्यां तु कलायां वा यदि लभ्येत पारणा ॥तदानीं दशमीविद्धाप्युपोष्यैकादशी तिथिः॥ ४४ ॥
शुक्ले वा यदि वा कृष्णे भवेदेकादशीद्वयम् ॥ गृहस्थानां तु पूर्वोक्ता यतीनामुत्तरा स्मृता ॥४५॥द्वादश्यां विद्यते किंचिद्दशमीसंयुता यदि॥दिनक्षये
द्वितीयैव सर्वेषां परिकीर्तिता ॥ ४६ ॥ विद्धाप्येकादशी ग्राह्या परतो द्वादशी न चेत् ॥ अविद्धापि निषिद्धैव परतो द्वादशी यदि ॥ ४७ ॥ एका
दशी द्वादशी च रात्रिशेषे त्रयोदशी ॥ द्वादशद्वादशीपुण्यं त्रयोदश्यां तु पारणे ॥ ४८ ॥ एकादशी कलामात्रा विद्यते द्वादशीदिने ॥ द्वादशी च त्रयो
दश्यां नास्ति वा विद्यतेऽथवा॥४९॥ विद्धाप्येकादशी तत्र पूर्वा स्याद्गृहिणां तदा ॥ यतिभिश्चोत्तरा ग्राह्या ह्यवीराभिस्तथैव च ॥५०॥संपूर्णैकादशी
शुद्धा द्वादश्यां नास्ति किंचन॥ द्वादशी च त्रयोदश्यामस्ति तत्र कथं भवेत्॥५१॥पूर्वा गृहस्थैः कार्यात्र यतिभिश्चोत्तरा तिथिः॥उपोष्यैव द्वितीयेति
केचिदाहुश्च भक्तितः॥५२॥एकादशी यदा विद्धा द्वादश्यां न प्रतीयते॥द्वादशी च त्रयोदश्यामस्ति तत्रैव चापरे॥५३॥उपोष्या द्वादशी शुद्धा सर्वैरेव न
संशयः ॥ केचिदाहुश्च पूर्वां तु तन्मतं न समंजसम्॥५४॥संक्रातौ रविवारे च पातग्रहणयोस्तथा ॥ पारणं चोपवासं च न कुर्यात्पुत्रवान्गृही ॥५५॥
अर्केऽह्नि पर्वरात्रौ च चतुर्दश्यष्टमी दिवा ॥ एकादश्यामहोरात्रं भुक्ता चांद्रायणं चरेत् ॥५६ ॥ आदित्यग्रहण प्राप्ते पूर्वयामत्रये तथा॥नाद्याद्धै यदि

भुंजीत सुरापेन समो भवेत् ॥ ५७ ॥ अन्वाधानेष्टिमध्ये तु ग्रहणे चंद्रसूर्ययोः ॥ प्रायश्चित्तं मुनिश्रेष्ठ कर्त्तव्यं तत्र याज्ञिकैः ॥ ५८ ॥ चंद्रोपरागे
जुहुयाद्दशमे सोम इत्यृचा ॥ आप्यायस्व ऋचा चैव सोमपास्त इति द्विज ॥५९॥ सूर्योपरागे जुहुयादुदुत्यं जातवेदसम् ॥ आसत्येनोद्वयं चैव त्रयो
मंत्रा उदाहृताः ॥६० ॥ एवं तिथिं विनिश्चित्य स्मृतिमार्गेण पंडितः ॥ यः करोति व्रतादीनि तस्य स्यादक्षयं फलम् ॥ ६१ ॥ वेदप्रणिहितो धर्मो
धर्मैस्तुष्यति केशवः ॥ तस्माद्धर्मपरा यांति तद्विष्णोः परमं पदम् ॥ ६२ ॥ धर्मान्ये कर्तुमिच्छंति ते वै कृष्णस्वरूपिणः ॥ तस्मात्तांस्तु भव
व्याधिः कदाचिन्नैव बाधते ॥ ६३ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे तिथ्यादिनिर्णयो नाम एकोनत्रिंशोऽध्यायः ॥ २९ ॥ सनक
उवाच ॥ प्रायश्चित्तविधिं वक्ष्ये शृणु नारद सांप्रतम्॥प्रायश्चित्तविशुद्धात्मा सर्वकर्मफलं लभेत्॥ १॥प्रायश्चित्तविहीनैस्तु यत्कर्म क्रियते मुने॥तत्सर्वं
निष्फलं प्रोक्तं राक्षसैः परिसेवितम् ॥ २ ॥ कामक्रोधविहीनैश्च धर्मशास्त्रविशारदैः॥प्रष्टव्या ब्राह्मणा धर्मं सर्वधर्मफलेच्छुभिः ॥ ३ ॥ प्रायश्चित्तानि
चीर्णानि नारायणपराङ्मुखैः॥ न निष्पुनंति विप्रेंद्र सुराभांडमिवापगाः ॥ ४ ॥ ब्रह्महा च सुरापी च स्तेयी च गुरुतल्पगः ॥ महापातकिनस्त्वेते
तत्संसर्गी च पंचमः ॥ ५ ॥ यस्तु संवत्सरं ह्येतैः शयनासनभोजनैः ॥ संवसेत्सह तं विद्यात्पतितं सर्वकर्मसु ॥ ६ ॥अज्ञानाद्ब्राह्मणं हत्वा चीरवासा
जटी भवेत् ॥ स्वेनैव हतविप्रस्य कपालमपि धारयेत् ॥७ ॥ तदभावे मुनिश्रेष्ठ कपालं वान्यमेव वा ॥ तद्द्रव्यं ध्वजदंडे तु धृत्वा वनचरो भवेत्
॥८ ॥ वन्याहारो वसेत्तत्र वारमेकं मिताशनः ॥ सम्यक्संध्यामुपासीत त्रिकालं स्नानमाचरेत् ॥ ९ ॥ अध्ययनाध्यापनादीन्वर्जयेत्संस्मरेद्धरिम् ॥
ब्रह्मचारी भवेन्नित्यं गंधमाल्यादि वर्जयेत् ॥ १० ॥ तीर्थान्यनुवसेच्चैव पुण्यांश्चैवाश्रमांस्तथा ॥ यदि वन्यैर्न जीवेत ग्रामे भिक्षां समाचरेत्॥ ११ ॥
द्वादशाब्दं व्रतं कुर्यादेवं हरिपरायणः ॥ ब्रह्महा शुद्धिमाप्नोति कर्मार्हश्चैव जायते ॥ १२ ॥ व्रतमध्ये मृगैर्वापि रोगैर्वापि निषूदितः ॥ गोनिमित्तं
द्विजार्थं वा प्राणान्वापि परित्यजेत् ॥ १३ ॥ यद्वा दद्याद्द्विजेंद्राणां गवामयुतमुत्तमम् ॥ एतेष्वन्यतमं कृत्वा ब्रह्महा शुद्धिमाप्नुयात् ॥ १४ ॥ दीक्षितं
क्षत्रियं हत्वा चरेद्धि ब्रह्महव्रतम् ॥ अग्निप्रवेशनं वापि मरुत्प्रपतनं तथा ॥ १५ ॥ दीक्षितं ब्राह्मणं हत्वा द्विगुणं व्रतमाचरेत्॥ आचार्यादिवधे चैव
व्रतमुक्तं चतुर्गुणम् ॥ १६ ॥ हत्वा तु विप्रमात्रं च चरेत्संवत्सरं व्रतम् ॥ एवं विप्रस्य गदितः प्रायश्चित्तविधिर्द्विज ॥ १७ ॥ द्विगुणं क्षत्रिय
स्योक्तं त्रिगुणं तु विशः स्मृतम् ॥ ब्राह्मणं हंति यः शूद्रस्तं मुशल्यं विदुर्बुधाः ॥ १८ ॥ राज्ञैव शिक्षा कर्तव्या इति शास्त्रेषु निश्चयः ॥ ब्राह्मणीनां
वधे त्वर्द्धं पादः स्यात्कन्यकावधे ॥ १९ ॥ हत्वा त्वनुपनीतांश्च तथा पादव्रतं चरेत् ॥ हत्वा तु क्षत्रियं विप्रः षडब्दं कृच्छ्रमाचरेत् ॥ संवत्सर

त्रयं वैश्यं शूद्रं हत्वा तु वत्सरम् ॥ दीक्षितस्य स्त्रियं हत्वा ब्राह्मणीं चाष्टवत्सरान् ॥२१ ॥ ब्रह्महत्याव्रतं कृत्वा शुद्धो भवति निश्चितम् ॥ प्रायश्चित्तं विधानं तु सर्वत्र मुनिसत्तम ॥२२॥ वृद्धातुरस्त्रीबालानामर्द्धमुक्तं मनीषिभिः ॥ गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा ॥ २३ ॥ चातुर्वर्ण्यैरपेया स्यात्तथा स्त्रीभिश्च नारद ॥ क्षीरं घृतं वा गोमूत्रमेतेष्वन्यतमं मुने ॥२४॥ स्नात्वार्द्रवासा नियतो नारायणमनुस्मरन् ॥ पक्वायसनिभं कृत्वा पिबेच्चैवोदकं ततः ॥ २५ ॥ तत्तु लौहेन पात्रेण ह्यायसेनाथवा पिबेत् ॥ ताम्रेण वाथ पात्रेण तत्पीत्वा मरणं व्रजेत् ॥ २६ ॥ सुरापी शुद्धिमाप्नोति नान्यथा शुद्धिरिष्यते ॥ अज्ञानादात्मबुद्ध्या तु सुरां पीत्वा द्विजश्चरेत् ॥ २७ ॥ ब्रह्महत्याव्रतं सम्यक्तच्चिह्नपरिवर्जितः ॥ यदि रोगनिवृत्त्यर्थमौषधार्थं सुरां पिबेत् ॥ २८ ॥ तस्योपनयनं भूयस्तथा चांद्रायणद्वयम् ॥ सुरासंस्पृष्टपात्रं तु सुराभांडोदकं तथा ॥ २९ ॥ सुरापानसमं प्राहुस्तथा चन्द्रस्य भक्षणम् ॥ तालं च पानसं चैव द्राक्षं खार्जूरसंभवम् ॥ ३० ॥ माधुक शैलमारिष्टं मैरेयं नालिकेरजम् ॥ गौडी माध्वी सुरा मद्यमेवमेकादश स्मृताः ॥ ३१ ॥ एतेष्वन्यतमं विप्रो न पिबेद्वै कदाचन ॥ एतेष्वन्यतमं यस्तु पिबेदज्ञानतो द्विजः ॥ ॥ ३२ ॥ तस्योपनयनं भूयस्तप्तकृच्छ्रं चरेत्तथा ॥ समक्षं वा परोक्षं वा बलाच्चौर्येण वा तथा ॥ ३३ ॥ परस्वानामुपादानं स्तेयमित्युच्यते बुधैः ॥ सुवर्णस्य प्रमाणं तु मन्वाद्यैः परिभाषितम् ॥३४॥ वक्ष्ये शृणुष्व विप्रेंद्र प्रायश्चितोक्तिसाधनम्॥गवाक्षागतमार्तण्डरश्मिमध्ये प्रदृश्यते ॥ ३५ ॥ त्रसरेणुप्रमाणं तु रज इत्युच्यते बुधैः ॥ त्रसरेण्वष्टकं निष्कस्तत्त्रयं राजसर्षपः ॥ ३६ ॥ गौरसर्षपस्तत्त्रयं स्यात्तत्षट्कं यव उच्यते ॥ यवत्रयं कृष्णलः स्यान्माषस्तत्पंचकं स्मृतः ॥ ३७ ॥ माषषोडशमानं स्यात्सुवर्णमिति नारद ॥ हत्वा ब्रह्मस्वमज्ञानाद्द्वादशाब्दं तु पूर्ववत् ॥ ३८॥ कपालध्वजहीनं तु ब्रह्महत्याव्रतं चरेत् ॥ गुरूणां यज्ञकर्तॄणां धार्मिष्ठानां तथैव च ॥ ३९ ॥ श्रोत्रियाणां द्विजानां तु हत्वा हेमैवमाचरेत् ॥ कृतानुतापो देहे च संपूर्णे लेपयेद् घृतम् ॥४० ॥ करीषच्छादितो दग्धःस्तेयपापाद्विमुच्यते ॥ ब्रह्मस्वं क्षत्रियो हत्वा पश्चात्तापमवाप्य च ॥ ४१ ॥ पुनर्ददाति तत्रैव तद्विधानं शृणुष्व मे ॥ तत्र सांतपनं कृत्वा द्वादशाहोपवासतः ॥ ४२ ॥ शुद्धिमाप्नोति देवर्षे ह्यन्यथा पतितो भवेत् ॥ रत्नासनमनुष्यस्त्रीधेनुभूम्यादिकेषु च ॥ ४३ ॥ सुवर्णसदृशेष्वेषु प्रायश्चितार्द्धमुच्यते ॥ त्रसरेणुसमं हेम हत्वा कुर्यात्समाहितः ॥ ४४ ॥ प्राणायामद्वयं सम्यक् तेन शुद्ध्यति मानवः ॥ प्राणायामत्रयं कुर्याद्धृत्वा निष्कप्रमाणकम् ॥ ४५ ॥ प्राणायामाश्च चत्वारो राजसर्षपमात्रके ॥ गौरसर्षपमानं तु हत्वा हेम विचक्षणः ॥ ४६ ॥ स्नात्वा च विधिवज्जप्याद्गायत्र्यष्टसहस्रकम् ॥ यवमात्रसुवर्णस्य स्तेयाच्छुद्धो

भवेद्द्विजः ॥ ४७ ॥ आसायं प्रातरारभ्य जप्त्वा वै वेदमातरम् ॥ हेमकृष्णलमात्रं तु हृत्वा सांतपनं चरेत् ॥ ४८ ॥ माषप्रमाणे
हेम्नस्तु प्रायश्चित्तं निगद्यते ॥ गोमूत्रपक्वयवभुग्वर्षेणैकेन शुद्ध्यति ॥ ४९ ॥ संपूर्णस्य सुवणस्य स्तेयं कृत्वा मुनीश्वर ॥ ब्रह्महत्याव्रतं
कुर्याद्द्वादशाब्दं समाहितः ॥ ५० ॥ सुवर्णमानान्न्यूने तु रजतस्तेयकर्मणि ॥ कुर्यात्सांतपनं सम्यगन्यथा पतितो भवेत् ॥ ५१ ॥ दशनिष्कां
तपर्यंतमूर्द्ध्वं निष्कचतुष्टयात् ॥ हृत्वा च रजतं विद्वान्कुर्याच्चांद्रायणं मुने ॥ ५२ ॥ दशादिशतनिष्कांतं यः स्तेयी रजतस्य तु॥ चांद्रायणद्वयं तस्य
प्रोक्तं पापविशोधकम् ॥५३ ॥ शतादूर्द्ध्वं सहस्रांतं प्रोक्तं चांद्रायणत्रयम् ॥ सहस्रादधिकस्तेये ब्रह्महत्याव्रतं चरेत् ॥ ५४ ॥कांस्यपित्तलमुख्येषु
ह्ययस्कांते तथैव च ॥ सहस्रनिष्कमाने तु पराकं परिकीर्तितम् ॥५५ ॥ प्रायश्चित्तं तु रत्नानां स्तेये राजतवत्स्मृतम् ॥ गुरुतल्पगतानां च प्रायश्चि
त्तमुदीर्यते ॥ ५६ ॥ अज्ञानान्मातरं गत्वा तत्सपत्नीमथापि वा ॥ स्वयमेव स्वमुष्कं तु च्छिद्यात्पापमुदीरयन् ॥ ५७ ॥ हस्ते गृहीत्वा मुष्कं तु
गच्छेद्वै नैर्ऋतीं दिशम् ॥गच्छन्मार्गे सुखं दुःखं न कदाचिद्विचारयेत् ॥ ५८ ॥ अपश्यन्गच्छतो गच्छेत्प्राणान्तं यः स शुद्ध्यति ॥ मरुत्प्रपतनं
वापि कुर्यात्पापमुदाहरन् ॥ ५९ ॥ स्ववर्णोत्तमवर्णस्त्रीगमने त्वविचारतः ॥ ब्रह्महत्याव्रतं कुर्याद्द्वादशाब्दं समाहितः ॥ ६० ॥ अमत्याभ्यासतो
गच्छेत्सवर्णां चोत्तमां तथा ॥ कारीषवह्निना दग्धः शुद्धिं याति द्विजोत्तम ॥ ६१ ॥ रेतःसेकात्पूर्वमेव निवृत्तो यदि मातरि ॥ ब्रह्महत्याव्रतं
कुर्याद्रेतःसेकेऽग्निदाहनम् ॥ ६२ ॥ सवर्णोत्तमवर्णासु निवृत्तो वीर्यसेचनात् ॥ ब्रह्महत्याव्रतं कुर्यान्नवाब्दान्विष्णुतत्परः ॥ ६३ ॥ वैश्यायां
पितृपत्न्यां तु षडब्दं व्रतमाचरेत् ॥ गत्वा शूद्रां गुरोर्भार्यां त्रिवर्षं व्रतमाचरेत् ॥ ६४ ॥ मातृष्वसारं च पितृष्वसारमाचार्यभार्यां श्वशुरस्य
पत्नीम् ॥पितृव्यभार्यामथ मातुलानीं पुत्रीं च गच्छेद्यदि काममुग्धः॥ ६५ ॥ दिनद्वये ब्रह्महत्याव्रतं कुर्याद्यथाविधि ॥ एकस्मिन्नेव दिवसे बहुवारं
त्रिवार्षिकम्॥६६॥एकवारं गते ह्यब्दं व्रतं कृत्वा विशुद्ध्यति॥ दिनत्रये गते वह्निदग्धः शुध्येत नान्यथा ॥६७॥ चांडालीं पुष्कसीं चैव स्नुषां च भगिनीं
तथा॥मित्रस्त्रियं शिष्यपत्नीं यस्तु वै कामतो व्रजेत्॥६८॥ब्रह्महत्याव्रतं कुर्यात्स षडब्दं मुनीश्वर॥अकामतो व्रजेद्यस्तु सोऽब्दकृच्छ्रं समाचरेत्॥६९॥ महा
पातकिसंसर्गे प्रायश्चित्तं निगद्यते ॥ प्रायश्चित्तविशुद्धात्मा सर्वकर्मफलं लभेत् ॥७०॥ यस्य येन भवेत्संगो ब्रह्महादिचतुर्ष्वपि॥ तत्तद्व्रतं स निर्वर्त्य शुद्धिमा
प्नोत्यसंशयम्॥७१॥अज्ञानात्पंचरात्रं तु संगमेभिः करोति यः॥कायकृच्छ्रं चरेत्सम्यगन्यथा पतितो भवेत्॥७२॥द्वादशाहे तु संसर्गे महासांतपनं स्मृतम्॥संगं
कृत्वार्द्धमासं तु द्वादशाहमुपावसेत्॥७३॥पराको माससंसर्गे चांद्रमासत्रये स्मृतम्॥ कृत्वा संगं तु षण्मासं चरेच्चांद्रायणद्वयम् ॥७४॥ किंचिन्न्यूनाब्दसंगे तु
षण्मासव्रतमाचरेत्॥एतच्च त्रिगुणं प्रोक्तं ज्ञानात्संगे यथाक्रमम्॥७५॥ मंडूकं नकुलं काकं वराहं मूषकं तथा॥मार्जाराजाविकं श्वानं हत्वा कुक्कुटकं तथा॥७६॥

कृच्छ्रार्द्धमाचरेद्विप्रोऽतिकृच्छ्रं चाश्वहा चरेत् ॥ तप्तकृच्छ्रं करिवधे पराकं गोवधे स्मृतम् ॥७७ ॥ कामतो गोवधे नैव शुद्धिर्दृष्टा मनीषिभिः ॥ पान
शय्यासनाद्येषु पुष्पमूलफलेषु च ॥७८॥भक्ष्यभोज्यापहारेषु पंचगव्यविशोधनम्॥शुष्ककाष्ठतृणानां च द्रुमाणां च गुडस्य च ॥ ७९॥ चर्मवस्त्रामि
षाणां च त्रिरात्रं स्यादभोजनम् ॥ टिट्टिभं चक्रवाकं च हंसं कारंडवं तथा ॥ ८० ॥ उलूकं सारसं चैव कपोतं जलपादकम्॥ शुकं चाषं बलाकं
च शिशुमारं च कच्छपम् ॥ ८१ ॥ एतेष्वन्यतमं हत्वा द्वादशाहमभोजनम् ॥ प्राजापत्यव्रतं कुर्याद्रेतोविण्मूत्रभोजने ॥ ८२ ॥ चांद्रायणत्रयं
प्रोक्तं शूद्रोच्छिष्टस्य भोजने ॥ रजस्वलां च चांडालं महापातकिनं तथा ॥ ८३ ॥ सूतिकां पतितं चैव उच्छिष्टं रजकादिकम् ॥ स्पृष्ट्वा सचैलं
स्नायीत घृतं संप्राशयेत्तथा ॥ ८४ ॥ गायत्रीं च विशुद्धात्मा जपेदष्टशतं द्विज ॥ एतेष्वन्यतमं स्पृष्ट्वा अज्ञानाद्यदि भोजने ॥ ८५ ॥ त्रिरात्रो
पोषणाच्छुद्ध्येत्पंचगव्याशनाद्द्विज ॥ स्नानदानजपादौ च भोजनादौ च नारद ॥ ८६ ॥एषामन्यतमस्यापि शब्दं यः शृणुयाद्वदेत् ॥ उद्वमेद्भुक्तमन्नं
तत्स्नात्वा चोपवसेत्तथा ॥ ८७ ॥ द्वितीयेऽह्नि घृतं प्राश्य शुद्धिमाप्नोति नारद ॥ व्रतादिमध्ये यद्येषा शृणुयाद्ध्वनिमच्युत ॥ ८८ ॥ अष्टोत्तरसहस्रं
तु जपेद्वै वेदमातरम् ॥ पापानामधिकं पापं द्विजदैवतनिंदनम् ॥ ८९ ॥ न दृष्टा निष्कृतिस्तस्य सर्वशास्त्रेषु नारद ॥ महापातकतुल्यानि यानि
प्रोक्तानि सूरिभिः॥९०॥प्रायश्चित्तं तु तेषां च कुर्यादेवं यथाविधि ॥ प्रायश्चित्तानि यः कुर्यान्नारायणपरायणः॥९१॥तस्य पापानि नश्यंति ह्यन्यथा
पतितो भवेत्॥यस्तु रागादिनिर्मुक्तो ह्यनुतापसमन्वितः॥९२॥ सर्वभूतदयायुक्तो विष्णुस्मरणतत्परः॥महापातकयुक्तो वा युक्तो वा सर्वपातकैः ॥९३॥
विमुक्त एव पापेभ्यो ज्ञेयो विष्णुपरो यतः ॥ नारायणमनाद्यंतं विश्वाकारमनामयम् ॥ ९४ ॥ यस्तु संस्मरते मर्त्यः स मुक्तः पापकोटिभिः ॥ स्मृतो
वा पूजितो वापि ध्यातः प्रणमितोऽपि वा॥ ९५ ॥ नाशयत्येव पापानि विष्णुर्हृद्गमनः सताम् ॥ संपर्काद्यदि वा मोहाद्यस्तु पूजयते हरिम् ॥९६॥
सर्वपापविनिर्मुक्तः स प्रयाति हरेः पदम् ॥ सकृत्संस्मरणाद्विष्णोर्नश्यंति क्लेशसंचयाः ॥ ९७ ॥ स्वर्गादिभोगप्राप्तिस्तु तस्य विप्रानुमीयते॥ मानुष
दुर्लभं जन्म प्राप्यते यैर्मुनीश्वर ॥९८ ॥ तत्रापि हरिभक्तिस्तु दुर्लभा परिकीर्त्तिता ॥ तस्मात्तडिल्लतालोलं मानुष्यं प्राप्य दुर्लभम् ॥ ९९॥ हरिं संपू
जयेद्भक्त्या पशुपाशविमोचनम्॥सर्वेऽन्तराया नश्यंति मनःशुद्धिश्च जायते॥१००॥परं मोक्षं लभेच्चैव पूजिते तु जनार्दने॥ धर्मार्थकाममोक्षाख्याः पुरु
षार्थाः सनतनाः॥१०१॥हरिपूजापराणां तु सिध्यन्ति नात्र संशयः॥पुत्रदारगृहक्षेत्रधनधान्याभिधावतीम्॥१०२॥लब्ध्वेमां मानुषीं वृत्तिं रे रे दर्पं तु मा
कृथाः ॥ संत्यज्य कामं क्रोधं च लोभं मोहं मदं तथा॥१०३॥परापवादं निंदां च भजध्वं भक्तितो हरिम् ॥ व्यापारान्सकलांस्त्यक्त्वा पूजयध्वं जना

र्दनम्॥४॥ निकटा एव दृश्यंते कृतांतनगरद्रुमाः ॥ यावन्नायाति मरणं यावन्नायाति वै जरा ॥ ५ ॥ यावन्नेन्द्रियवैकल्यं तावदेवार्चयेद्धरिम्॥ धीमान्न
कुर्याद्विश्वासं शरीरेऽस्मिन्विनश्वरे ॥ ६ ॥ नित्यं सन्निहितो मृत्युः संपदत्यंतचंचला ॥ आसन्नमरणो देहस्तस्माद्दर्प्पं विमुचत ॥ ७ ॥ संयोगा
विप्रयोगांताः सर्वं च क्षणभंगुरम् ॥ एतज्ज्ञात्वा महाभाग पूजयस्व जनार्दनम् ॥ ८ ॥ आशया व्यथते चैव मोक्षस्त्वत्यंतदुर्लभः ॥ भक्त्या यजति
यो विष्णुं महापातकवानपि ॥ ९ ॥ सोऽपि याति परं स्थानं यत्र गत्वा न शोचति ॥ सर्वतीर्थानि यज्ञाश्च सांगा वेदाश्च सत्तम ॥१०॥ नारायणा
र्चनस्यैते कलां नार्हंति षोडशीम् ॥ किं वै वेदैर्मखैः शास्त्रैः किंवा तीर्थनिषेवणैः ॥११॥ विष्णुभक्तिविहीनानां किं तपोभिर्व्रतैरपि ॥१२॥यजंति
ये विष्णुमनंतमूर्तिं निरीक्ष्य चाकारगतं वरेण्यम् ॥ वेदांतवेद्यं भवरोगवैद्यं ते यांति मर्त्याः पदमच्युतस्य ॥ १३ ॥ अनादिमात्मानमनंतशक्तिमाधार
भूतं जगतः सुरेड्यम् ॥ ज्योतिःस्वरूपं परमच्युताख्यं स्मृत्वा समभ्येति नरः सखायम् ॥ १४ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे
प्रायश्चित्तविधिर्नाम त्रिंशोऽध्यायः ॥३०॥ नारद उवाच ॥ कथितो भवता सम्यग्वर्णाश्रमविधिर्मुने॥ इदानीं श्रोतुमिच्छामि यममार्गं सुदुर्गमम् ॥१॥
सनक उवाच ॥ शृणु विप्र प्रवक्ष्यामि यममार्गं सुदुर्गमम् ॥ सुखदं पुण्यशीलानां पापिनां भयदायकम् ॥२॥षडशीतिसहस्राणि योजनानानि मुनी
श्वर ॥ यममार्गस्य विस्तारः कथितः पूर्वसूरिभिः ॥ ३ ॥ ये नरा दानशीलास्तु ते यांति सुखिनो द्विज ॥ धर्मशून्या नरा यांति दुःखेन भृशमर्दिताः
॥४॥ अतिभीता विवस्त्राश्च शुष्ककंठौष्ठतालुकाः ॥ क्रंदंतो विस्वरं दीनाः पापिनो यांति तत्पथि॥५॥ हन्यमाना यमभटैः प्रतोदाद्यैस्तथायुधैः ॥६॥
इतस्ततः प्रधावंतो यांति दुःखेन तत्पथि॥क्वचित्पंकः क्वचिद्वह्निः क्वचित्सैतप्तसंकतम्॥ क्वचिद्दैं दावरूपेण तीक्ष्णधाराः शिलाः क्वचित् ॥७॥ क्वचि
त्कंटकवृक्षाश्च दुःखारोहशिला नगाः॥गाढांधकाराश्च गुहाः कंटकावरणं महत्॥ ८ ॥वप्राग्रारोहणं चैव कन्दरस्य प्रवेशनम् ॥ शर्कराश्च तथा लोष्टाः
सूचीतुल्याश्च कण्टकाः ॥९ ॥ शैवालं च क्वचिन्मार्गे क्वचित्कीचकपंक्तयः ॥ क्वचिद्व्याघ्राश्च गर्जंते वर्धंते च क्वचिज्ज्वराः॥१०॥एवं बहुविधक्लेशाः
पापिनो यांति नारद ॥ क्रोशंतश्च रुदन्तश्च ग्लायंतश्चैव पापिनः ॥ ११ ॥ पाशेन यंत्रिताः केचित्कृष्यमाणास्तथांकुशैः ॥ शस्त्राग्रैस्ताड्यमानाश्च
पृष्ठतो यांति पापिनः ॥ १२ ॥ नासाग्रपाशकृष्टाश्च केचिदंत्रैश्च बधिताः ॥ वहंतश्चायसां भारं शिश्नाग्रेण प्रयांति वै ॥ १३ ॥ अयोभारद्वयं
केचिन्नासाग्रेण तथापरे ॥ कर्णाभ्यां च तथा केचिद्वहंतो यांति पापिनः ॥१४ ॥ केचिच्च स्खलिता यांति ताड्यमानास्तथापरे ॥ अत्यर्थोच्छ्वसिताः
केचित्केचिदाच्छन्नलोचनाः ॥ १५ ॥ छायाजलविहीने तु पथि यांत्यतिदुःखिताः ॥ शोचन्तः स्वानि कर्माणि ज्ञानाज्ञानकृतानि च ॥ १६ ॥

ये तु नारद धर्मिष्ठा दानशीला सुबुद्धयः ॥ अतीव सुखसंपन्नास्ते यांति धर्ममंदिरम् ॥ १७ ॥ अन्नदास्तु मुनिश्रेष्ठ भुंजंतः स्वादु यांति वै ॥ नीरदा
यांति सुखिनः पिबंतः क्षीरमुत्तमम् ॥ तक्रदा दधिदाश्चैव तत्तद्भोगं लभंति वै ॥ घृतदा मधुदाश्चैव क्षीरदाश्च द्विजोत्तम ॥ १८ ॥ सुधापानं प्रकुर्वंतो
यांति वै धर्ममंदिरम् ॥ शाकदाः पायसं भुंजंन्दीपदो ज्वलयन्दिशः ॥१९॥ वस्त्रदो मुनिशार्दूल याति दिव्याम्बरावृतः ॥ पुराकरप्रदो याति स्तूयमा
नोऽमरैः पथि ॥ २० ॥ गोदानेन नरो याति सर्वसौख्यसमन्वितः ॥ भूमिदो गृहदश्चैव विमाने सर्वसंपदि ॥ २१ ॥ अप्सरोगणसंकीर्णे क्रीडन्याति
वृषालयम् ॥ हयदो यानदश्चापि गजदश्च द्विजोत्तम ॥ २२ ॥ धर्मालयं विमानेन याति भोगान्वितेन वै॥ अनडुद्दो मुनिश्रेष्ठ यानारूढः प्रयाति
वै ॥ २३ ॥ फलदः पुष्पदश्चापि याति संतोषसंयुतः ॥ तांबूलदो नरो याति प्रहृष्टो धर्ममंदिरम् ॥ २४ ॥ मातापित्रोश्च शुश्रूषां कृतवान्यो नरो
त्तमः ॥ स याति परितुष्टात्मा पूज्यमानो दिविस्थितैः ॥ २५ ॥ शुश्रूषां कुरुते यस्तु यतीनां व्रतचारिणाम्॥ द्विजाग्र्यब्राह्मणानां च स यात्यतिसुखा
न्वितः ॥ २६ ॥ सर्वभूतदयायुक्तः पूज्यमानोऽमरैर्द्विजः ॥ सर्वभोगान्वितेनासौ विमानेन प्रयाति च ॥ २७ ॥ विद्यादानरतो याति पूज्यमानोऽब्जसूनु
भिः ॥ पुराणपाठको याति स्तूयमानो मुनीश्वरैः ॥ २८ ॥ एवं धर्मपरा यांति सुखं धमस्य मंदिरम् ॥ यमश्चतुर्भुखो भूत्वा शंखचक्रगदासिभृत् ॥
॥२९॥ पुण्यकर्मरतं सम्यक्स्नेहान्मित्रमिवार्चति ॥ भो भो बुद्धिमतां श्रेष्ठ नरकक्लेशभीरवः ॥३०॥ युष्माभिः साधितं पुण्यमत्रामुत्रसुखावहम् ॥ मनुष्य
जन्म यः प्राप्य सुकृतं न करोति च ॥ ३१ ॥ स एव पापिनां श्रेष्ठ आत्मघातं करोति च ॥ अनित्यं प्राप्य मानुष्यं नित्यं यस्तु न साधयेत् ॥३२॥स
याति नरकं घोरं कोऽन्यस्तस्मादचेतनः॥शरीरं यातनारूपं मलाद्यैः परिदूषितम्॥३३॥तस्मिन्यो याति विश्वासं तं विद्यादात्मघातकम्॥सर्वेषु प्राणिनः
श्रेष्ठास्तेषु वै बुद्धिजीविनः ॥३४॥ बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणास्तथा॥ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः ॥३५॥ कृतबुद्धिषु कर्त्तारः कर्तृषु
ब्रह्मवादिनः ॥ ब्रह्मवादिष्वपि तथा श्रेष्ठो निर्मम उच्यते॥३६॥एतेभ्योऽपि परो ज्ञेयो नित्यं ध्यानपरायणः॥ तस्मात्सर्वप्रयत्नेन कर्त्तव्यो धर्मसंग्रहः
॥३७॥सर्वत्र पूज्यते जंतुर्धर्मवान्नात्र संशयः॥ गच्छ स्वपुण्यैर्मत्स्थानं सर्वभोगसमन्वितम् ॥३८॥ अस्ति चेद्दुष्कृतं किंचित्पश्चादत्रैव भोक्ष्यसे॥ एवं
यमस्तमभ्यर्च्य प्रापयित्वा च सद्गतिम् ॥ ३९ ॥ आहूय पापिनश्चैव कालदंडेन तर्जयेत् ॥ प्रलयांबुदनिर्घोषो ह्यंजनाद्रिसमप्रभः ॥ ४० ॥ विद्युत्प्र
भायुधैर्भीमो द्वात्रिंशद्भुजसंयुतः ॥ योजनत्रयविस्तारो रक्ताक्षो दीर्घनासिकः ॥४१॥ दंष्ट्राकरालवदनो वापीतुल्योग्रलोचनः॥ मृत्युज्वरादिभिर्युक्तश्चि
त्रगुप्तोऽपि भीषणः ॥४२॥ सर्वे दूताश्च गर्जंति यमतुल्यविभीषणाः ॥ ततो ब्रवीति तान्सर्वान्कंपमानांश्च पापिनः ॥४३ ॥शोचन्तः स्वानि कर्माणि

चित्रगुप्तो यमाज्ञया ॥ भो भो पापा दुराचारा अहंकारप्रदूषिताः॥४४॥किमर्थमर्जितं पापं युष्माभिरविवेकिभिः ॥ कामक्रोधादिदुष्टेन सगर्वेण तु चेतसा ॥४५॥ यद्यत्पापतरं तत्तत्किमर्थं चारितं जनाः ॥ कृतवंतः पुरा यूयं पापान्यत्यंतहर्षिताः ॥ ४६ ॥ तथैव यातना भोज्याः किं वृथा ह्यतिदुखिताः ।। भृत्यमित्रकलत्रार्थं दुष्कृतं चारितं यथा ॥४७ ॥ तथा कर्मवशात्प्राप्ता यूयमत्रातिदुःखिताः ।। युष्माभिः पोषिता ये तु पुत्राद्या अन्यतो गताः ॥ ४८ ॥ युष्माकमेव तत्पापं प्राप्तं किं दुःखकारणम् ॥ यथा कृतानि पापानि युष्माभिः सुबहूनि वै ॥ ४९ ॥ तथा प्राप्तानि दुःखानि किमर्थमिह दुःखिताः॥ विचारयध्वं यूयं तु युष्माभिश्चारितं पुरा ॥५०॥ यमः करिष्यते दंडमिति किं न विचारितम् ॥ दरिद्रेऽपि च मूर्खे च पंडिते वा श्रियान्विते॥५१॥ कांदिशीके च वीरे च समवर्ती यमः स्मृतः॥चित्रगुप्तेरितं वाक्यं श्रुत्वा ते पापिनस्तदा॥ ५२ ॥ शोचंतः स्वानि कर्माणि तूष्णीं तिष्ठंति भीषिताः ॥ यमाज्ञाकारिणः क्रूराश्चंडा दूता भयानकाः ॥ ५३ ॥ चंडालाद्याः प्रसह्यैतान्नरकेषु क्षिपंति च ॥ स्वदुष्कर्मफलं ते तु भुक्त्वांते पापशेषतः ॥ ५४ ॥ महीतलं च संप्राप्य भवंति स्थावरादयः ॥ नारद उवाच ॥ भगवन्संशयो जातो मच्चेतसि दयानिधे ॥ ५५॥ त्वं समर्थोऽसि तच्छेत्तुं यतो नो ह्यग्रजो भवान् ॥ धर्माश्च विविधाः प्रोक्ताः पापान्यपि बहूनि च ॥ ५६ ॥ चिरभोज्यं फलं तेषामुक्तं बहुविदा त्वया ॥ दिनांते ब्रह्मणः प्रोक्तो नाशो लोकत्रयस्य वै ॥ ५७ ॥ परार्द्धद्वितयांते तु ब्रह्माण्डस्यापि संक्षयः ॥ ग्रामदानादिपुण्यानां त्वयैव विधिनंदन ॥ ५८ ॥ कल्पकोटिसहस्रेषु महान्भोग उदाहृतः ॥ सर्वेषामेव लोकानां विनाशः प्राकृते लये ॥ ५९ ॥ एकः ।शिष्यत एवेति त्वया प्रोक्तं जनार्दनः ॥ एष मे संशयो जातस्तं भवाञ्छेत्तुमर्हति ॥ ६० ॥ पुण्यपापोपभोगानां समाप्तिर्नास्य संप्लुवे ॥ सनक उवाच ॥ साधु साधु महाप्राज्ञ गुह्याद्गुह्यतमं त्विदम् ॥ ६१ ॥ पृष्टं तत्तेऽभिधास्यामि शृणुष्व सुसमाहितः ॥ नारायणोऽक्षरोऽनंतः परं ज्योतिः सनातनः ॥ ६२ ॥ विशुद्धो निर्गुणो नित्यो मायामोहविवर्जितः ॥ निर्गुणोऽपि परानन्दो गुणवानिव भाति यः ॥ ६३ ॥ ब्रह्मविष्णुशिवाद्यैस्तु भेदवानिव लक्ष्यते ॥ गुणोपाधिकभेदेषु त्रिष्वेतेषु सनातन ॥६४॥संयोज्य मायामखिलं जगत्कार्यं करोति च ॥ ब्रह्मरूपेण सृजति विष्णुरूपेण पाति च ॥ ६५ ॥ अंते च रुद्ररूपेण सर्वमत्तीति निश्चितम्॥ प्रलयांते समुत्थाय ब्रह्मरूपी जनार्दनः ॥ ६६ ॥ चराचरात्मकं विश्वं यथापूर्वमकल्पयत् ॥ स्थावराद्याश्च विप्रेंद्र यत्र यत्र व्यवस्थिताः ॥ ६७ ॥ ब्रह्मा तत्तज्जगत्सर्वं यथापूर्वं करोति वै ॥ तस्मात्कृतानां पापानां पुण्यानां चैव सत्तम ॥ ॥ ६८ ॥ अवश्यमेव भोक्तव्यं कर्मणां ह्यक्षयं फलम् ॥ नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥ ६९ ॥ अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशु

भम् ॥ यो देवः सर्वलोकानामंतरात्मा जगन्मयः ॥ सर्वकर्मफलं भुंक्ते परिपूर्णः सनातनः ॥ ७० ॥ योऽसौ विश्वंभरो देवो गुणभेदव्यवस्थितः ॥ सृजत्यवति चात्त्येतत्सर्वं सर्वभुगव्ययः॥ ७१ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे यमदूतकृत्यनिरूपणं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

॥ सनक उवाच ॥ एवं कर्मपाशनियंत्रितजंतवः स्वर्गादिपुण्यस्थानेषु पुण्यभोगमनुभूय यातनासु चातीव दुःखतरं पापफलमनुभूय प्रक्षीणकर्मावशेषेणामुं लोकमागत्य सर्वभयविह्वलेषु मृत्युबाधासंयुतेषु स्थावरादिषु जायंते ॥ वृक्षगुल्मलतावल्लीगिरयश्च तृणानि च ॥ स्थावरा इति विख्याता महामोहसमावृताः॥ १॥ स्थावरत्वे पृथिव्यामुप्तबीजानि जलसेकानुपदं सुसंस्कारसामग्रीवशादंतरूष्मप्रपाचितान्युच्छूनत्वमापद्य ततो मूलभावं तन्मूलादंकुरोत्पत्तिस्तस्मादपि पर्णकांडनालादिकं कांडेषु च प्रसवमापद्येत तेषु च पुष्पसंभवः ॥ २ ॥ तानि पुष्पाणि कानिचिदफलानि कानिचित्फलहेतुभूतानि तेषु पुष्पेषु वृद्धभावेषु सत्सु तत्पुष्पमूलतस्तुषोत्पत्तिर्जायते तेषु तुषु भोक्तृणां प्राणिनां संस्कारसामग्रीवशाद्धिमरश्मिकिरणासन्नतया तद्दोषधिरसस्तुषांतः प्रविश्य क्षीरभावं समेत्य स्वकाले तंडुलाकारतामुपगम्य प्राणिनां भोगसंस्कारवशात्संवत्सरे फलिनः स्युः ॥३॥ स्थावरत्वेऽपि बहुकालं वानरादिभिर्भुज्यमाना हि च्छेदनदवाग्निदहनशीतातपादिदुःखमनुभूय म्रियंते॥ततश्च क्रिमयो भूत्वा सदादुःखबहुलाः क्षणार्द्धं जीवंतः क्षणार्द्धं म्रियमाणा बलवत्प्राणिपीडायां निवारयितुमक्षमाः शीतवातादिक्लेशभूयिष्ठा नित्यं क्षुधाक्षुधिता मलमूत्रादिषु सचरंतो दुःखमनुभवंति॥४॥तत एव पक्षियोनिमागत्य बलवद्बाधोद्वेजिता वृथोद्वेगभूयिष्ठाः क्षुत्क्षांता नित्यं वनचारिणो मातृष्वपि विषयातुरा वातादिक्लेशबहुलाः कश्मिंश्चिज्जन्मनि तृणाशनाः कस्मिंश्चिज्जन्मनि मांसामेध्याद्यदनाः कस्मिंश्चिज्जन्मनि कंदमूलफलाशना दुर्बलप्राणिपीडानिरता दुःखमनुभवंति॥५॥ अंडजत्वेऽपि वाताशनामांसामेध्याद्यशनाश्च परपीडापरायणा नित्यं दुःखबहुला ग्राम्यपशुयोनिमागता अपि स्वजातिवियोगभारोद्वहनपाशादिबंधनताडनहलादिधारणादिसर्वदुःखान्यनुभवंति ॥६॥ एवं बहुयोनिषु संभ्रांताः क्रमेण मानुषं जन्म प्राप्नुवंति केचिच्च पुण्यविशेषाद्व्युत्क्रमेणापि मनुष्यजन्माश्नुवते ॥७॥ मनुष्यजन्मनापि च चर्मकारचंडालव्याधनापितरजककुंभकारलोहकारस्वर्णकारतंतुवायसौचिकजटिलसिद्धधावकलेखकभृतकशासनहारिनीचभृत्यदरिद्रहीनांगाधिकांगत्वादि दुःखबहुलज्वरतापशीतश्लेष्मगुल्मपादाक्षिशिरोगर्भपार्श्ववेदनादिदुःखमनुभवंति॥८॥मनुष्यत्वेऽपि यदा स्त्रीपुरुषयोर्व्यवायस्तत्समये रेतो यदा जरायुं प्रविशति तदैव कर्मवशाज्जंतुः शुक्रेण सह जरायुं प्रविश्य शुक्रशोणितकलले प्रवर्त्तते॥९॥ तद्वीर्यं जीवप्रवेशात्पञ्चाहात्कललं भवति अर्द्धमासे पललभावमुपेत्य मासे प्रादेशमात्रत्वमापद्यते ॥१०॥ ततः प्रभृति वायुवशाच्चैतन्याभावेऽपि मातुरुदरे दुःसहतापक्लेशतयैकत्र स्थातुमशक्यत्वाद्

भ्रमति॥११॥मासे द्वितीये पूर्णे पुरुषाकारमात्रतामुपगम्य मासत्रितये पूर्णे करचरणाद्यवयवभावमुपगम्य चतुर्षु मासेषु गतेषु सर्वावयवानां संधिभेदपरि
ज्ञानं पंचस्वतीतेषु नखानामभिव्यंजकता षट्स्वतीतेषु नखसंधिपरिस्फुटतामुपगम्य नाभिसूत्रेण पुष्यमाणममेध्यमूत्रसिक्तांगं जरायुणा बंधितरक्तास्थि
क्रिमिवसामज्जास्नायुकेशादिदूषिते कुत्सिते शरीरे निवासिनं स्वयमप्येवं परिदूषितदेहं मातुश्च कट्वम्ललवणात्युष्णभुक्तदह्यमानमात्मानं दृष्ट्वा देही
पूर्वजन्मस्मरणानुभावात्पूर्वानुभूतनरकदुःखानि च स्मृत्वांतर्दुःखेन च परिदह्यमानो मातुर्देहातिमूत्रादिरूक्षेण दह्यमान एवं मनसि प्रलपति॥१२॥अहोऽ
त्यंतपापोऽहंपूर्वजन्मनिभृत्यापत्यमित्रयोषिद्गृहक्षेत्रधनधान्यादिष्वत्यंतरागेण कलत्रपोषणार्थं परधनक्षेत्रादिकं पश्यतो हरणाद्युपायैरपहृत्य कामांधतया
परस्त्रीहरणादिकमनुभूय महापापान्याचरंस्तैः पापैरहमेक एवंविधनरकाननुभूय पुनः स्थावरादिषु महादुःखमनुभूय संप्रति जरायुणा परिवेष्टितोऽन्त
र्दुखेन बहिस्तापेन च दह्यामि ॥ १३ ॥ मया पोषिता दाराश्च स्वकर्मवशादन्यतो गताः ॥१४॥ अहो दुखं हि देहिनाम् ॥१५॥ देहस्तु पापात्संजः
तस्तस्मात्पापं न कारयेत् ॥ भृत्यमित्रकलत्रार्थमन्यद्द्रव्यं हृतं मया ॥ १६ ॥ तेन पापेन दह्यामि जरायुपरिवेष्टितः ॥ दृष्ट्वान्यस्य श्रियं पूर्वं संततो
ऽहमसूयया ॥ १७ ॥ गर्भाग्निनानुदह्येयमिदानीमपि पापकृत् ॥ कायेन मनसा वाचा परपीडामकारिषमृतेन पापेन दह्यामि त्वहमेकोऽतिदुः
खितः॥१८॥एवं बहुविधं गर्भस्थो जंतुर्विलप्य स्वयमेव वा॥१९॥आत्मानमाश्वास्य उत्पत्तेरनंतरं सत्संगेन विष्णोश्चरितश्रवणेन च विशुद्धमना भूत्वा
सत्कर्माणि निर्वर्त्य अखिलजगदंतरात्मनः सत्यज्ञानानंदमयस्य शक्तिप्रभावानुष्ठितविष्टपवर्गस्य लक्ष्मीपतेर्नारायणस्य सकलसुरासुरयक्षगंधर्वराक्षसपन्न
गमुनिकिन्नरसमूहार्चितचरणकमलयुगं भक्तितः समभ्यर्च्य दुःसहः संसारच्छेदस्यकारण भूतं भेदरहस्योपनिषद्भिः परिस्फुटं सकललोकपरायणं हृदि
निधाय दुःखतरमिमं संस्कारागारमतिक्रमिष्यामीति मनसि भावयति॥२०॥यतस्तन्मातुः प्रसूतिसमये सति गर्भस्थोदेही नारदमुने वायुनापरिपीडितो
मातुश्चापि दुःखं कुर्वन्कर्मपाशेन बलाद्योनिमार्गान्निष्क्रामन्सकलयातनाभोगमेककालभवमनुभवति ॥२१॥ तेनातिक्लेशेन योनियंत्रपीडितो गर्भान्नि
ष्क्रांतो निःसंज्ञतां याति ॥ २२ ॥ तं तु बाह्यवायुः समुज्जीवयति ॥ बाह्यवायुस्पर्शसमनंतरमेव नष्टस्मृतिपूर्वानुभूताखिलदुःखानि वर्त्तमानान्यपि
ज्ञानाभावदविज्ञायात्यंतदुःखमनुभवति ॥ २३ ॥ एवं बालत्वमापन्नो जंतुस्तत्रापि स्वमलमूत्रलिप्तदेह आध्यात्मिकादिपीड्यमानोऽपि वक्तुमशक्त
क्षुत्तृषापीडितो रुदिते सति स्तनादिकं देयमिति मन्वानाः प्रयतन्ते ॥ २४ ॥ एवमनेकं देहभोगमन्याधीनतयानुभूयमानो दंशादिष्वपि
निवारयितुमशक्तः ॥ २५ ॥ बाल्यभावमासाद्य मातापित्रोरुपाध्यायस्य ताडनं सदा पर्यटनशीलत्वं पांशुभस्मपंकादिषु क्रीडनं सदा कलहनियतत्वाम

शुचित्वं बहुव्यापाराभासकार्यनियतत्वं तदसंभव आध्यात्मिकदुःखमेवंविधमनुभवति ॥ २६ ॥ ततस्तु तरुणभावेन धनार्जनमार्जितस्य रक्षणं तस्य नाशव्ययादिषु चात्यंतदुःखिता मायया मोहिताः कामक्रोधादिदुष्टमनसः सदासूयापरायणाः परस्वपरस्त्रीहरणोपायपरायणाः पुत्रमित्रकलत्रादिभरणोपायचिंतापरायणा वृथाहंकारदूषिताः पुत्रादिषु व्याध्यादि पीडितेषु सत्सु सर्वव्याप्तिं परित्यज्य रोगादिभिः क्लेशितानां समीपे स्वयमाध्यात्मिकदुःखेन परिप्लुता वक्ष्यमाणप्रकारेण चिंतामश्नुवते ॥ २४ ॥ गृहक्षेत्रादिकं कम किंचिन्नापि विचारितम्॥समृद्धस्य कुटुम्बस्य कथं भवति वर्त्तनम् ॥ २८ ॥ मम मूलधनं नास्ति वृष्टिश्चापि न वर्षति ॥ अश्वः पलायितः कुत्र गावः किं नागता मम ॥ २९ ॥ बालापत्या च मे भार्या व्याधितोऽहं च निर्धनः ॥अविचारात्कृषिर्नष्टा पुत्रा नित्यं रुदंति च॥ ३० ॥भग्नं छिन्नं तु मे सद्म बांधवा अपि दूरगाः ॥ न लभ्यते वर्त्तनं च राजबाधातिदुःसहा ॥ ३१ ॥ रिपवो मां प्रधावंते कथं जेष्याम्यहं रिपून् ॥ व्यवसायाक्षमश्चाहं प्राप्ताः प्राघूर्णका अमी ॥ ३२ ॥ एवमत्यंतचिन्ताकुलः स्वदुःखानि निवारयितुमक्षमो धिग्विधिं भाग्यहीनं मां किमर्थं विदधे इति दैवमाक्षिपति ॥ ३३ ॥ तथा वृद्धत्वमापन्नो हीयमानसारो जरापलितादिव्याप्तदेहो व्याधिबाध्यत्वादिकमापन्नः ॥ प्रकंपमानावयवश्वासकासादिपीडितो लोलाविललोचनः श्लेष्मव्याप्तकंठः पुत्रदारादिभिर्भर्त्स्यमानः कदा मरणमुपयामीति चिंताकुलो मयि मृते सति मदर्जितं गृहक्षेत्रादिकं वस्तु पुत्रादयः कथं रक्षंति कस्य वा भविष्यति ॥ ३४ ॥ मद्धने परैरपहृते पुत्रादीनां कथं वर्त्तनं भविष्यतीति ममतादुःखपरिप्लुतो गाढं निःश्वस्य स्वेन वयसा कृतानि कर्माणि पुनः पुनः स्मरन् क्षणे विस्मरति च संततस्त्वासन्नमरणो ॥ ३५ ॥ व्याधिपीडितोऽन्तस्तापार्तः क्षणं शय्यायां क्षणं मंचे च ततस्ततः पर्यटन् क्षुत्तृट्परिपीडितः किंचिन्मात्रमुदकं देहीत्यतिकार्पण्येन याचमानस्तत्रापि ज्वरविष्टानामुदकं न श्रेयस्करमिति ब्रुवतो मनसातिद्वेषं कुर्वन्मंदचैतन्यो भवति ॥ ३६ ॥ ततश्च हस्तपादाकर्षणे न तु क्षमो रुदद्भिर्बंधुजनैर्वेष्टितो वक्तुमक्षमः स्वार्जितधनादिकं कस्य भविष्यतीति चिंतापरो बाष्पाविलविलोचनः कंठे घुरघुरायमाणे सति शरीरान्निष्क्रांतप्राणो यमदूतैर्भर्त्स्यमानः पाशयंत्रितो नरकादीन्पूर्ववदश्नुते ॥ ३७ ॥ आमलप्रक्षयाद्यद्वदग्नौ धाम्यंति धातवः ॥ तथैव जीविनः सर्व आकर्मप्रक्षयाद् भृशम् ॥ ३८ ॥ तस्मात्संसारदावाग्नितापार्तो द्विजसत्तम ॥ अभ्यसेत्परमं ज्ञानं ज्ञानान्मोक्षमवाप्नुयात् ॥३९ ॥ ज्ञानशून्या नरा ये तु पशवः परिकीर्तिताः ॥ तस्मात्संसारमोक्षाय परं ज्ञानं समभ्यसेत् ॥ ४० ॥ मानुष्यं चैव संप्राप्य सर्वकर्मप्रसाधकम्॥हरिं न सेवते यस्तु कोऽन्यस्तस्मादचेतनः ॥ ४१ ॥ अहो चित्रमहो चित्रमहो चित्रं मुनीश्वराः॥आस्थिते

कामदे विष्णो नरा यांति हि यातनाम् ॥ ४१ ॥ नारायणे जगन्नाथे सर्वकामफलप्रदे ॥ स्थितेऽपि ज्ञानरहिताः पच्यंते नरकेष्वहो ॥ ४२ ॥
स्रवन्मूत्रपुरीषे तु शरीरेऽस्मिन्नृशाश्वते ॥ शाश्वतं भावयंत्यज्ञा महामोहसमावृताः ॥ ४३ ॥ कुत्सितं मांसरक्ताद्यैर्देहं संप्राप्य यो नरः ॥ संसारच्छे
दकं विष्णुं न भजेत्सोऽतिपातकी ॥ ४४ ॥ अहो कष्टमहो कष्टमहो कष्टं हि मूर्खता ॥ हरिध्यानपरो विप्र चण्डालोऽपि महासुखी॥ ४५ ॥स्वदेहा
न्निस्सृतं दृष्ट्वा मलमूत्रादिकिल्बिषम् ॥ उद्वेगं मानवा मूर्खाः किं न यांति हि पापिनः ॥४३॥ दुर्लभं मानुषं जन्म प्रार्थ्यंते त्रिदशैरपि ॥ तल्लब्ध्वा
परलोकार्थं यत्नं कुर्य्याद्विचक्षणः ॥ ४७ ॥ अध्यात्मज्ञानसंपन्ना हरिपूजापरायणाः ॥ लभन्ते परमं स्थानं पुनरावृत्तिदुर्लभम् ॥ ४८ ॥ यतो
जातमिदं विश्वं यतश्चैतन्यमश्नुते॥ यस्मिंश्च विलयं याति स संसारस्य मोचकः॥४९॥ निर्गुणोऽपि परोऽनंतो गुणवानिव भाति यः॥तं समभ्यर्च्य देवेशं
संसारात्परिमुच्यते ॥ ५० ॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे भवाटवीनिरूपणं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ नारद उवाच ॥
भगवन्सर्वमाख्यातं यत्पृष्टं विदुषा त्वया॥ संसारपाशबद्धानां दुःखानि सुबहूनि च॥ १॥अस्य संसारपाशस्य च्छेदकः कतमः स्मृतः॥येनोपायेन मोक्षः
स्यात्तन्मे ब्रूहि तपोधन॥२॥प्राणिभिः कर्मजालानि क्रियंते प्रत्यहं भृशम् ॥ भुज्यंते च मुनिश्रेष्ठ तेषां नाशः कथं भवेत्॥३॥कर्मणा देहमाप्नोति देही
कामेन बध्यते ॥ कामाल्लोभाभिभूतः स्याल्लोभात्क्रोधपरायणः ॥ ४ ॥ क्रोधाच्च धर्मनाशः स्याद्धर्मनाशान्मतिभ्रमः ॥ प्रनष्टबुद्धिर्मनुजः पुनः पापं
करोति च ॥ ५ ॥ तस्माद्देहं पापमूलं पापकर्मरतं तथा ॥ यथा देहभ्रमं त्यक्त्वा मोक्षभाक्स्यात्तथा वद ॥ ६ ॥ सनक उवाच ॥ साधु साधु महा
प्राज्ञ मतिस्ते विमलोर्जिता ॥ यस्मात्संसारदुःखान्नो मोक्षोपायमभीप्ससि ॥ ७ ॥ यस्याज्ञया जगत्सर्वं ब्रह्मा सृजति सुव्रत ॥ हरिश्च पालको रुद्रो
नाशकः स हि मोक्षदः ॥ ८ ॥ अहमादिविशेषांता जाता यस्य प्रभावतः ॥ तं विद्यान्मोक्षदं विष्णुं नारायणमनामयम् ॥ ९ ॥ यस्याभिन्नमिदं
सर्वं यच्चेंगद्यच्च नेंगति ॥ तमुग्रमजरं देवं ध्यात्वा दुःखात्प्रमुच्यते ॥ १० ॥ अविकारमजं शुद्धं स्वप्रकाशं निरंजनम् ॥ ज्ञानरूपं सदानंदं प्राहुर्वै
मोक्षसाधनम् ॥ ११ ॥ यस्यावताररूपाणि ब्रह्माद्या देवतागणाः ॥ समर्चयंति तं विद्याच्छाश्वतस्थानदं हरिम् ॥ १२ ॥ जितप्राणा जिताहाराः सदा
ध्यानपरायणाः ॥ हृदि पश्यंति यं सत्यं तं जानीहि सुखावहम् ॥ १३ ॥निर्गुणोऽपि गुणाधारो लोकानुग्रहरूपधृक् ॥ आकाशमध्यगः पूर्णस्तं प्राहु
र्मोक्षदं नृणाम्॥ १४ ॥ अध्यक्षः सर्वकार्याणां देहिनो हृदये स्थितः ॥ अनूपमोऽखिलाधारस्तं देवं शरणं व्रजेत्॥१५॥ सर्वं संगृह्य कल्पांते शेते यस्तु
जले स्वयम् ॥ तं प्राहुर्मोक्षदं विष्णुं मुनयस्तत्त्वदर्शिनः ॥ १६ ॥ वेदार्थविद्भिः कर्मज्ञैरिज्यते विविधैर्मखैः ॥ स एव कर्मफलदो मोक्षदोऽकामक

मणाम्॥१७॥हव्यकव्यादिदानेषु देवतापितृरूपधृक् ॥ भुंक्ते य ईश्वरोऽव्यक्तस्तं प्राहुर्मोक्षदं प्रभुम् ॥ १८ ॥ ध्यातः प्रणमितो वापि पूजितो वापि
भक्तितः॥ददाति शाश्वतं स्थानं तं दयालुं समर्चयेत्॥१९ ॥आधारः सर्वभूतानामेको यः पुरुषः परः॥. जरामरणनिर्मुक्तो मोक्षदः सोऽव्ययो हरिः ॥
॥ २० ॥संपूज्य यस्य पादाब्जं देहिनोऽपि मुनीश्वर ॥ अमृतत्वं भजंत्याशु तं विदुः पुरुषोत्तमम् ॥ २१ ॥ आनन्दमजरं ब्रह्म परं ज्योतिः सनात
नम् ॥ परात्परतरं यच्च तद्विष्णोः परमं पदम् ॥ २२ ॥ अद्वयं निर्गुणं नित्यमद्वितीयमनौपमम् ॥ परिपूर्णं ज्ञानमय विदुर्मोक्षप्रसाधकम् ॥ २३ ॥
एवंभूतं परं वस्तु योगमार्गविधानतः ॥ य उपास्ते सदा योगी स याति परमं पदम् ॥२४ ॥ सर्वसंगपरित्यागी शमादिगुणसंयुतः ॥ कामद्यैर्वर्जितो
योगी लभते परमं पदम्॥ २५ ॥ नारद उवाच ॥ कर्मणा केन योगस्य सिद्धिर्भवति योगिनाम् ॥ तदुपायं यथातत्त्वं ब्रूहि मे वदतां वर ॥ २६ ॥
सनक उवाच ॥ ज्ञानलभ्यं परं मोक्षं प्राहुस्तत्त्वार्थचिंतकाः ॥ यज्ज्ञानं भक्तिमूलं च भक्तिः कर्मवतां तथा॥ २७ ॥ दांनानि यज्ञा विविधास्ती
र्थयात्रादयः कृताः ॥ येन जन्मसहस्रेषु तस्य भक्तिर्भवेद्धरौ ॥ २८ ॥ अक्षयः परमो धर्मो भक्तिलेशेन जायते ॥ श्रद्धया परया चैव सर्वं पापं
प्रणश्यति ॥ २९ ॥ सर्वपापेषु नष्टेषु बुद्धिर्भवति निर्मला ॥ सैव बुद्धिः समाख्याता ज्ञानशब्देन सूरिभिः ॥ ३० ॥ ज्ञानं च मोक्षदं प्राहुस्तज्ज्ञानं
योगिनां भवेत् ॥ योगस्तु द्विविधः प्रोक्तः कर्मज्ञानप्रभेदतः ॥ ३१ ॥ क्रियायोगं विना नृणां ज्ञानयोगो न सिध्यति ॥ क्रियायोगरतस्तस्मा
च्छ्रद्धया हरिमर्चयेत् ॥ ३२ ॥ द्विजभूम्यग्निसूर्याम्बुधातुहृच्चित्रसंज्ञिताः ॥ प्रतिमाः केशवस्यैता पूज्य एतासु भक्तितः ॥ ३३ ॥ कर्मणा मनसा वाचा
परपीडापराङ्मुखः ॥ तस्मात्सर्वगतं विष्णु पूजयेद्भक्तिसंयुतः ॥ ३४ ॥ अहिंसा सत्यमक्रोधो ब्रह्मचर्यापरिग्रहौ ॥ अनीर्ष्या च दया चैव योगयो
रुभयोः समाः ॥ ४५ ॥ चराचरात्मकं विश्वं विष्णुरेव सनातनः ॥ इति निश्चित्य मनसा योगद्वितयमभ्यसेत् ॥ ३६ ॥ आत्मवत्सर्वभूतानि
ये मन्यंते मनीषिणः ॥ ते जानंति परं भावं देवदेवस्य चक्रिणः ॥ ३७ ॥ यदि क्रोधादिदुष्टात्मा पूजाध्यानपरो भवेत् ॥ न तस्य तुष्यते विष्णुर्य
तो धर्मपतिः स्मृतः ॥ ३८ ॥ यदि कामादिदुष्टात्मा देव पूजापरो भवेत् ॥ दंभाचारः स विज्ञेयः सर्वपातकिभिः समः ॥३९ ॥ तपःपूजाध्यानपरो
यस्त्वसूयारतो भवेत् ॥ तत्तपः सा च पूजा च तद्ध्यानं हि निरर्थकम् ॥ ४० ॥ तस्मात्सर्वात्मकं विष्णुं शमादिगुणतत्परः ॥ मुक्त्यर्थमर्चये
त्सम्यक् क्रियायोगपरो नरः ॥४१॥कर्मणा मनसा वाचा सर्वलोकहिते रतः ॥ समर्चयति देवेश क्रियायोगः स उच्यते ॥४२॥ नारायणं जगद्योनिं
सर्वांतर्यामिणं हरिम् ॥ स्तोत्राद्यैः स्तौति यो विष्णुं कर्मयोगी स उच्यते ॥ ४३ ॥ उपवासादिभिश्चैव पुराणश्रवणादिभिः ॥ पुष्पाद्यैश्चार्चनं

विष्णोः क्रियायोग उदाहृतः ॥ ४४ ॥ एवं भक्तिमतां विष्णौ क्रियायोगरतात्मनाम् ॥ सर्वपापानि नश्यंति पूर्वजन्मार्जितानि वै ॥ ४५ ॥ पाप
क्षयाच्छुद्धमतिर्वांछति ज्ञानमुत्तमम् ॥ ज्ञानं हि मोक्षदं ज्ञेयं तदुपायं वदामि ते ॥ ४६ ॥ चराचरात्मके लोके नित्यं चानित्यमेव च ॥ सम्यग्
विचारयेद्धीमान्सद्भिः शास्त्रार्थकोविदैः ॥ ४७ ॥ अनित्यास्तु पदार्था वै नित्यमेको हरिः स्मृतः ॥ अनित्यानि परित्यज्य नित्यमेव समाश्रयेत् ॥
॥ ४८ ॥ इहामुत्र च भोगेषु विरक्तश्च तथा भवेत् ॥ अविरक्तो भवेद्यस्तु स संसारे प्रवर्तते ॥ ४९ ॥ अनित्येषु पदार्थेषु यस्तु
रागी भवेन्नरः ॥ तस्य संसारविच्छित्तिः कदाचिन्नैव जायते ॥ ५० ॥ शमादिगुणसंपन्नो मुमुक्षुर्ज्ञानमभ्यसेत् ॥ शमादिगुणहीनस्य ज्ञानं
नैव च सिध्यति ॥ ५१ ॥ रागद्वेषविहीनो यः शमादिगुणसंयुतः ॥ हरिध्यानपरो नित्यं मुमुक्षुरभिधीयते ॥ ५२ ॥ चतुर्भिः साधनैरे
भिर्विशुद्धमतिरुच्यते ॥ सर्वंग भावयेद्विष्णुं सर्वभूतदयापरः ॥ ५३ ॥ क्षराक्षरात्मकं विश्वं व्याप्य नारायणः स्थितः ॥ इति जानाति यो विप्र
तज्ज्ञानं योगजं विदुः ॥ ५४ ॥ योगोपायमतो वक्ष्ये संसारविनिवर्त्तकम् ॥ योगो ज्ञानं विशुद्धं स्यात्तज्ज्ञानं मोक्षदं विदुः ॥ ५५ ॥
आत्मानं द्विविधं प्राहुः परापरविभेदतः ॥ द्वे ब्रह्मणी वेदितव्ये इति चाथर्वणी श्रुतिः ॥ ५६ ॥ परस्तु निर्गुणः प्रोक्तो ह्यहंकारयुतोऽपरः
तयोरभेदविज्ञानं योग इत्यभिधीयते ॥ ५७ ॥ पंचभूतात्मके देहे यः साक्षी हृदये स्थितः ॥ अपरः प्रोच्यते सद्भिः परमात्मा परः स्मृतः॥५८॥
शरीरं क्षेत्रमित्याहुस्तत्स्थः क्षेत्रज्ञ उच्यते ॥ अव्यक्तः परमः शुद्धः परिपूर्ण उदाहृतः ॥ ५९ ॥ यदा त्वभेदविज्ञानं जीवात्मपरमात्मनोः ॥
भवेत्तदा मुनिश्रेष्ठ पाशच्छेदोऽपरात्मनः ॥ ६० ॥ एकः शुद्धोऽक्षरो नित्यः परमात्मा जगन्मयः ॥ नृणां विज्ञानभेदेन भेदवानिव लक्ष्यते
॥ ६१ ॥ एकमेवाद्वितीयं यत्परं ब्रह्म सनातनम् ॥ गीयमानं च वेदांतैस्तस्मान्नास्ति परं द्विज ॥ ६२ ॥ न तस्य कर्म कार्यं वा रूपं वर्णमथापि
वा ॥ कर्त्तृत्वं वापि भोक्तृत्वं निर्गुणस्य परात्मनः ॥ ६३ ॥ निदानं सर्वहेतूनां तेजो यत्तेजसां परम् ॥ किमप्यन्यद्यतो नास्ति तज्ज्ञेयं मुक्तिहेतवे
॥६४॥ शब्दब्रह्ममयं यत्तन्महावाक्यादिकं द्विज ॥ तद्विचारोद्भवं ज्ञानं परं मोक्षस्य साधनम् ॥ ६५ ॥ सम्यग्ज्ञानविहीनानां दृश्यते विविध
जगत्॥परमज्ञानिनामेतत्परब्रह्मात्मकं द्विज ॥ ६६ ॥ एक एव परानन्दो निर्गुणः परतः परः ॥ भाति विज्ञानभेदेन बहुरूपधरोऽव्ययः ॥६७॥
मायिनो मायया भेदं पश्यन्ति परमात्मनि॥तस्मान्मायां त्यजेद्योगान्मुमुक्षुर्द्विजसत्तम ॥ ६८ ॥ नासद्रूपा न सद्रूपा माया नैवोभयात्मिका ॥ अनि
र्वाच्या ततो ज्ञेया भेदबुद्धिप्रदायिनी ॥ ६९ ॥ मायैव ज्ञानशब्देन बुद्ध्यते मुनिसत्तम॥ तस्मादज्ञानविच्छेदो भवेद्धौजितमायिनाम् ॥७०॥ सना

तनं परं ब्रह्म ज्ञानशब्देन कथ्यते ॥ ज्ञानिनां परमात्मा वै हृदि भाति निरन्तरम् ॥ ७१ ॥अज्ञानं नाशयेद्योगी योगेन मुनिसत्तम ॥ अष्टांगैः सिद्ध्यते
योगस्तानि वक्ष्यामि तत्त्वतः ॥ ७२ ॥ यमाश्च नियमाश्चैव आसनानि च सत्तम ॥ प्राणायामः प्रत्याहारो धारणा ध्यानमेव च ॥ ७३ ॥समाधिश्च
मुनिश्रेष्ठ योगाङ्गानि यथाक्रमम् ॥ एषां संक्षेपतो वक्ष्ये लक्षणानि मुनीश्वर ॥ ७४ ॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ ॥ अक्रोधश्चानसूया
च प्रोक्ताः संक्षेपतो यमाः ॥ ७५ ॥ सर्वेषामेव भूतानामक्लेशजननं हि यत् ॥ अहिंसा कथिता सद्भिर्योगसिद्धिप्रदायिनी ॥ ७६ ॥ यथार्थकथनं
यच्च धर्माधर्मविवेकतः ॥ सत्यं प्राहुर्मुनिश्रेष्ठ अस्तेयं शृणु साम्प्रतम् ॥ ७७ ॥ चौर्येण वा बलेनापि परस्वहरणं हि यत् ॥ स्तेयमित्यच्युते सद्भिर
स्तेयं तद्विपर्ययम् ॥ ७८॥ सर्वत्र मैथुनत्यागो ब्रह्मचर्यं प्रकीर्त्तितम् ॥ ब्रह्मचर्यपरित्यागाज्ज्ञानवानपि पातकी ॥ ७९ ॥ सर्वसंगपरित्यागी मैथुने
यस्तु वर्तते ॥ स चंडालसमो ज्ञेयः सर्ववर्णबहिष्कृतः ॥ ८० ॥ यस्तु योगरतो विप्र विषयेषु स्पृहान्वितः॥ तत्संभाषणमात्रेण ब्रह्मत्या भवेन्नृणाम्
॥ ८१ ॥ सर्वसंगपरित्यागी पुनः संगी भवेद्यदि ॥ तत्संगसंगिनां संगान्महापातकदोषभाक् ॥ ८२ ॥ अनादानं हि द्रव्याणामापद्यपि मुनीश्वर ॥
अपरिग्रह इत्युक्तो योगसंसिद्धिकारकः ॥ ८३ ॥ आत्मनस्तु समुत्कर्षादतिनिष्ठुरभाषणम् ॥ क्रोधमाहुर्धर्मविदो ह्यक्रोधस्तद्विपर्ययः ॥ ८४॥ धना
वैरधिकं दृष्ट्वा भृशं मनसि तापनम्॥असूया कीर्तिता सद्भिस्तत्त्यागो ह्यनसूयता ॥८५॥एवं संक्षेपतः प्रोक्ता यमा विबुधसत्तम॥नियमानपि वक्ष्यामि
तुभ्यं ताञ्छृणु नारद ॥८६॥ तपःस्वाध्यायसंतोषाः शौचं च हरिपूजनम् ॥संध्योपासनमुख्याश्च नियमाः परिकीर्त्तिताः ॥८७॥ चांद्रायणादिभिर्यत्र
शरीरस्य विशोषणम् ॥ तपो निगदितं सद्भिर्योगसाधनमुत्तमम् ॥ ८८ ॥ प्रणवस्योपनिषदां द्वादशार्णस्य च द्विज ॥ अष्टाक्षरस्य मंत्रस्य महा
वाक्यचयस्य च ॥ ८९ ॥ जपः स्वाध्याय उदितो योगसाधनमुत्तमम् ॥ स्वाध्यायं यस्त्यजेन्मूढस्तस्य योगो न सिध्यति ॥ ९० ॥ योगं विनापि
स्वाध्यायात्पापनाशो भवेन्नृणाम् ॥ स्वाध्यायैस्तोष्यमाणाश्च प्रसीदंति हि देवताः ॥९१ ॥ जपस्तु त्रिविधः प्रोक्तो वाचिकोपांशुमानसः॥ त्रिविधे
ऽपि च विप्रेन्द्र पूर्वात्पूर्वात्परो वरः ॥ ९२ ॥ मंत्रस्योच्चारणं सम्यक्स्फुटाक्षरपदं यथा ॥ जपस्तु वाचिकः प्रोक्तः सर्वयज्ञफलप्रदः ॥ ९३ ॥ मंत्र
स्योच्चारणे किंचित्पदात्पदविवेचनम् ॥ स तूपांशुर्जपः प्रोक्तः पूर्वस्माद्द्विगुणोऽधिकः ॥ ९४ ॥ विधाय ह्यक्षरश्रेण्यां तत्तदर्थविचारणम् ॥ स जपो
मानसः प्रोक्तो योगसिद्धिप्रदायकः ॥ ९५ ॥ जपेन देवता नित्यं स्तुवतः संप्रसीदति ॥ तस्मात्स्वाध्यायसंपन्नो लभेत्सर्वान्मनोरथान् ॥ ९६ ॥
यदृच्छालाभसंतुष्टिः संतोष इति गीयते ॥ संतोषहीनः पुरुषो न लभेच्छर्म कुत्रचित् ॥९७ ॥ न जातुकामः कामानामुपभोगेन शाम्यति ॥ इतोऽधिकं

कदा लप्स्य इति कामस्तु वर्द्धते ॥ ९८ ॥ तस्मात्कामं परित्यज्य देहसंशोषकारणम् ॥ यदृच्छालाभसंतुष्टो भवेद्धर्मपरायणः ॥ ९९ ॥ बाह्याभ्य
न्तरभेदेन शौचं तु द्विविधं स्मृतम्॥मृज्जलाभ्यां बहिः शुद्धिर्भावशुद्धिस्तथान्तरम्॥१००॥अन्तःशुद्धिविहीनैस्तु येऽध्वरा विविधाः कृताः॥न फलंति
मुनिश्रेष्ठ भस्मनि न्यस्तहव्यवत् ॥ १ ॥ भावशुद्धिविहीनानां समस्तं कर्म निष्फलम् ॥ तस्माद्रागादिकं सर्वं परित्यज्य सुखी भवेत् ॥ २ ॥ मृदा
भारसहस्रैस्तु कुम्भकोटिजलैस्तथा॥ कृतशौचोऽपि दुष्टात्मा चंडालसदृशः स्मृतः ॥ ३ ॥ अंतःशुद्धिविहीनस्तु देवपूजापरो यदि ॥ तमेव दैवतं हंति
नरकं च प्रपद्यते ॥ ४ ॥ अंतःशुद्धिविहीनश्च बहिःशुद्धिं करोति यः ॥ अलंकृतः सुराभाण्ड इव शांतिं न गच्छति ॥ ५ ॥ मनश्शुद्धिविहीना ये
तीर्थयात्रां प्रकुर्वते ॥ न तान्पुनंति तीर्थानि सुराभांडमिवापगा ॥ ६ ॥ वाचा धर्मान्प्रवदति मनसा पापमिच्छति ॥ जानीयात्तं मुनिश्रेष्ठ महापात
किनां वरम् ॥ ७ ॥ विशुद्धमानसा ये तु धर्ममात्रमनुत्तमम् ॥ कुर्वंति तत्फलं विद्यादक्षयं सुखदायकम् ॥ ८॥ कर्मणा मनसा वाचा स्तुतिश्रवण
पूजनैः॥हरिभक्तिर्दृढा यस्य हरिपूजेति गीयते ॥९॥ यमाश्च नियमाश्चैव संक्षेपेण प्रबोधिताः॥एभिर्विशुद्धमनसां मोक्षं हस्तगतं विदुः ॥ १०॥यमैश्च
नियमैश्चैव स्थिरबुद्धिर्जितेन्द्रियः॥अभ्यसेदासनंसम्यग्योगसाधनमुत्तमम्॥ ११॥पद्मकं स्वस्तिकं पीठं सैंहं कौक्कुटकौंजरे॥कौर्मं वज्रासनं चैव वाराहं मृग
चैलिकम्॥१२॥ क्रौञ्चं च नालिकं चैव सर्वतोभद्रमेव च॥वार्षभं नागमात्स्ये च वैयाघ्रं चार्द्धचंद्रकम्॥१३॥ दंडवातासनं शैलं स्वभ्रं मौद्गरमेव च॥
माकरं त्रैपथ काष्ठं स्थाणुं वैकर्णिकं तथा ॥१४॥ भौमं वीरासनं चैव योगसाधनकारणम् ॥ त्रिंशत्संख्यान्यासनानि मुनीन्द्रैः कथितानि वै ॥१५॥
एषामेकतमं बद्धा गुरुभक्तिपरायणः ॥ उपासको जयेत्प्राणान्द्वन्द्वातीतो विमत्सरः ॥ १६ ॥ प्राङ्मुखोदङ्मुखो वापि तथा प्रत्यङ्मुखोऽपि
वा ॥ अभ्यासेन जयेत्प्राणान्निःशब्दे जनवर्जिते ॥ १७ ॥ प्राणो वायुः शरीरस्थ आयामस्तस्य निग्रहः ॥ प्राणायाम इति प्रोक्तो द्विविधः स
प्रकीर्त्तितः ॥ १८ ॥ अगर्भश्च सगर्भश्च द्वितीयस्तु तयोर्वरः ॥ जपध्यानं विनागर्भः सगर्भस्तत्समन्वितः ॥ १९ ॥ रेचकः पूरकश्चैव कुंभकः
शून्यकस्तथा ॥ एवं चतुर्विधः प्रोक्तः प्राणायामो मनीषिभिः ॥ १२० ॥ जंतूनां दक्षिणा नाडी पिंगला परिकीर्तिता ॥ सूर्यदैवतका चैव पितृ
योनिरिति श्रुता ॥ २१ ॥ देवयोनिरिति ख्याता इडा नाडी त्वदक्षिणा ॥ तत्राधिदैवत चंद्रं जानीहि मुनिसत्तम ॥ २२ ॥ एतयोरुभयोर्मध्ये सुषु
म्णा नाडिका स्मृता ॥ अतिसूक्ष्मा गुह्यतमा ज्ञेया सा ब्रह्मदैवता ॥ २३ ॥ वामेन रेचयेद्वायुं रेचनाद्रेचकः स्मृतः ॥ पूरयेद्दक्षिणेनैव पूरणात्पू
रकः स्मृतः ॥ २४ ॥ स्वदेहपूरितं वायुं निगृह्य न विमुंचति ॥ संपूणकुंभवत्तिष्ठेत्कुम्भकः स हि विश्रुतः ॥२५॥ न गृह्णाति न त्यजति वायुमंतर्बहिः

स्थितम् ॥ विद्धि तच्छून्यकं नाम प्राणायामं यथास्थितम् ॥ २६ ॥ शनैःशनैर्विजेतव्यःप्राणो मत्तगजेन्द्रवत् ॥ अन्यथा खलु जायन्ते महा
रोगा भयंकराः॥२७॥क्रमेण योजयेद्वायुं योगी विगतकल्मषः ॥ स सर्वपापनिर्मुक्तो ब्रह्मणः पदमाप्नुयात् ॥ २८ ॥ विषयेषु प्रसक्तानि चेन्द्रियाणि
मुनीश्वरः॥समाहृत्य निगृह्णाति प्रत्याहारस्तु स स्मृतः॥२९॥जितेन्द्रिया महात्मानो ध्यानशून्या अपि द्विज॥ प्रयान्ति परमं ब्रह्म पुनरावृत्तिदुर्लभम्
॥ ३० ॥ अनिर्जितेंद्रियग्रामं यस्तु ध्यानपरो भवेत् ॥ मूढात्मानं च तं विद्याद्ध्यानं चास्य न सिध्यति॥३१॥यद्यत्पश्यति तत्सर्वं पश्येदात्मवदा
त्मनि ॥ प्रत्याहृतानीन्द्रियाणि धारयेत्सा तु धारणा ॥ ३२ ॥ योगाज्जितेंद्रियग्रामस्तानि हृत्वा दृढं हृदि ॥ आत्मानं परमं ध्यायेत्सर्वधातारमच्यु
तम् ॥ ३३ ॥ सर्वविश्वात्मकं विष्णुं सर्वलोकैककारणम्॥विकसत्पद्मपत्राक्षं चारुकुण्डलभूषितम् ॥ ३४ ॥ दीर्घबाहुमुदाराङ्गं सर्वालङ्कारभूषितम् ॥
पीताम्बरधरं देवं हेमयज्ञोपवीतिनम् ॥ ३५ ॥ बिभ्रतं तुलसीमालां कौस्तुभेन विराजितम् ॥ श्रीवत्सवक्षसं देवं सुरासुरनमस्कृतम् ॥ ३६ ॥
अष्टारे हृत्सरोजे तु द्वादशांगुलविस्तृते ॥ ध्यायेदात्मानमव्यक्तं परात्परतरं विभुम् ॥ ३७ ॥ ध्यानं सद्भिर्निगदितं प्रत्ययस्यैकतानता ॥
ध्यानं कृत्वा मुहूर्त्तं वा परं मोक्षं लभेन्नरः ॥ ३८ ॥ ध्यानात्पापानि नश्यन्ति ध्यानान्मोक्षं च विंदति ॥ ध्यानात्प्रसीदति हरिर्ध्यानात्सर्वार्थसाध
नम् ॥ ३९ ॥ यद्यद्रूपं महाविष्णोस्तत्तद्ध्यायेत्समाहितम् ॥ तेन ध्यानेन तुष्टात्मा हरिर्मोक्षं ददाति वै ॥४०॥ अचञ्चलं मनः कुर्याद्ध्येये वस्तुनि
सत्तम ॥ ध्यानं ध्येयं ध्यातृभावं यथा नश्यति निर्भरम् ॥ ४१ ॥ ततोऽमृतत्वं भवति ज्ञानामृतनिषेवणात् ॥ भवेन्निरन्तरं ध्यानादभेदप्रति
पादनम् ॥ ४२ ॥ सुषुप्तिवत्परानन्दयुक्तश्चोपरतेन्द्रियः ॥ निर्वातदीपवत्संस्थः समाधिरभिधीयते ॥ ४३ ॥ योगी समाध्यवस्थायां न शृणोति न
पश्यति ॥ न जिघ्रति न स्पृशति न किंचिद्वक्ति सत्तम॥ ४४ ॥ आत्मा तु निर्मलः शुद्धः सच्चिदानन्दविग्रहः ॥सर्वोपाधिविनिर्मुक्तो योगिनां भात्य
चञ्चलः ॥ ४५ ॥ निर्गुणोऽपि परो देवो ह्यज्ञानाद्गुणवानिव ॥ विभात्यज्ञाननाशे तु यथापूर्वं व्यवस्थितम् ॥ ४६ ॥ परं ज्योतिरमेयात्मा मायावा
निव मायिनाम् ॥ तन्नाशे निर्मलं ब्रह्म प्रकाशयति पंडित ॥४७॥ एकमेवाद्वितीयं च परं ज्योतिर्निरंजनम्॥सर्वेषामेव भूतानामंतर्यामितया स्थितम्
॥ ४८ ॥ अणोरणीयान्महतो महीयान्सनातनात्माखिलविश्वहेतुः ॥ पश्यंति यज्ज्ञानविदां वरिष्ठाः परात्परस्मात्परमं पवित्रम् ॥ ४९ ॥
अकारादिक्षकारांतवर्णभेदव्यवस्थितः ॥ पुराणपुरुषोऽनादिः शब्दब्रह्मेति गीयते ॥ ५० ॥ विशुद्धमक्षरं नित्यं पूर्णमाकाशमध्यगम् ॥ आनन्दं निर्मलं
शांतं परं ब्रह्मेति गीयते ॥ ५१ ॥ योगिनो हृदि पश्यन्ति परात्मानं सनातनम्॥अविकारमजं शुद्धं परं ब्रह्मेति गीयते ॥ ५२॥ ध्यानमन्यत्प्रवक्ष्यामि

शृणुष्व मुनि सत्तम ॥ संसारतापतप्तानां सुधावृष्टिसमं नृणाम् ॥ ५३ ॥ नारायणं परानन्दं स्मरेत्प्रणवसंस्थितम् ॥ नादरूपमनौपम्यमर्द्धमात्रोपरि
स्थितम्॥५४॥ अकारं ब्रह्मणो रूपमुकारं विष्णुरूपवत् ॥ मकारं रुद्ररूपं स्यादर्द्धमात्र परात्मकम् ॥ ५५ ॥ मात्रास्तिस्रः समाख्याता ब्रह्मविष्णु
शिवाधिपाः ॥ तेषां समुच्चयं विप्र परब्रह्मप्रबोधकम् ॥ ५६ ॥ वाच्यं तु परमं ब्रह्म वाचकः प्रणवः स्मृतः ॥ वाच्यवाचकसंबन्धो ह्युपचारात्तयो
र्द्विज॥५७॥ जपन्तः प्रणवं नित्यं मुच्यन्ते सर्वपातकैः॥तदभ्यासेन संयुक्ताः परं मोक्षं लभन्ति च ॥५८॥जपंश्च प्रणवं मन्त्रं ब्रह्मविष्णुशिवात्मकम्॥
कोटिसूर्यसमं तेजो ध्यायेदात्मनि निर्मलम् ॥ ५९ ॥ शालग्रामशिलारूपं प्रतिमारूपमेव वा ॥ यद्यत्पापहरं वस्तु तत्तद्वा च्चिन्तयेद्धृदि ॥ ६० ॥
यदेतद्वैष्णवं ज्ञानं कथितं ते मुनीश्वर ॥ एतद्विदित्वा योगीन्द्रो लभते मोक्षमुत्तमम् ॥ ६१ ॥ यस्त्वेतच्छृणुयाद्वापि पठेद्वापि समाहितः ॥ स सर्व
पापनिर्मुक्तो हरिसालोक्यमाप्नुयात्॥ ६२ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे योगनिरूपणं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥
॥ नारद उवाच ॥ समाख्यातानि सर्वाणि योगाङ्गानि महामुने ॥ इदानीमपि सर्वज्ञ यत्पृच्छामि तदुच्यताम्॥ १ ॥ योगो भक्तिमतामेव सिध्यती
ति त्वयोदितम्॥ यस्य तुष्यति सर्वेशस्तस्य भक्तिश्च शाश्वतम्॥ २ ॥यथा तुष्यति सर्वेशो देवदेवो जनार्दनः॥ तन्ममाख्याहि सर्वज्ञ मुने कारुण्यवा
रिधे॥३॥सनक उवाच॥ नारायणं परं देवं सच्चिदानन्दविग्रहम्॥भज सर्वात्मना विप्र यदि मुक्तिमभीप्ससि॥४॥रिपवस्तं न हिंसन्ति न बाधंते ग्रहाश्च
तम्॥ राक्षसाश्च न चेक्षन्ते नरं विष्णुपरायणम्॥५॥ भक्तिर्दृढा भवेद्यस्य देवदेवे जनार्दने॥श्रेयांसि तस्य सिध्यन्ति भक्तिमन्तोऽधिकास्ततः॥६॥पादौ
तौ सफलौ पुंसां यौ विष्णुगृहगामिनौ ॥ तौ करौ सफलौ ज्ञेयौ विष्णुपूजापरौ तु यौ ॥ ७ ॥ ते नेत्रे सुफले पुंसां पश्यतो ये जनार्दनम् ॥ सा जिह्वा
प्रोच्यते सद्भिर्हरिनामपरा तु या ॥ ८ ॥ सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥ तत्त्वं गुरुसमं नास्ति न देवः केशवात्परः ॥ ९ ॥सत्यं वच्मि
हितं वच्मि सारं वच्मि पुनः पुनः॥असारेऽस्मिंस्तु संसारे सत्यं हरिसमर्चनम्॥१०॥संसारपाशं सुदृढं महामोहप्रदायकम्॥ हरिभक्तिकुठारेण च्छित्त्वात्य
न्तसुखी भव ॥ ११॥ तन्मनः संयुतं विष्णौ सा वाणी यत्परायणा ॥ ते श्रोत्रे तत्कथासारपूरिते लोकवंदिते ॥ १२ ॥ आनन्दमक्षरं शून्यमवस्था
त्रितयैरपि ॥ आकाशमध्यगं देवं भज नारद संततम् ॥ १३ ॥ स्थानं न शक्यते यस्य स्वरूपं वा कदाचन ॥ निर्देष्टुं मुनिशार्दूल द्रष्टुं वाप्य
कृतात्मभिः ॥१४ ॥ समस्तैः करणैर्युक्तो वर्त्ततेऽसौ यदा तदा ॥ जाग्रदित्युच्यते सद्भिरन्तर्यामी सनातनः॥१५॥ यदान्तःकरणैर्युक्तः स्वेच्छया विच
रत्यसौ ॥ स्वपन्नित्युच्यते ह्यात्मा यदा स्वापविवर्जितः ॥ १६ ॥ न बाह्यकरणैर्युक्तो न चान्तः करणैस्तथा ॥ अस्वरूपो यदात्मासौ पुण्यापुण्यविव

र्जितः ॥ १७ ॥ सर्वोपाधिविनिर्मुक्तो ह्यानंदो निर्गुणो विभुः॥ परब्रह्ममयो देवः सुषुप्त इति गीयते ॥ १८ ॥ भावनामयमेतद्वै जगत्स्थावरजङ्गमम् ॥
विद्युद्विलोलं विप्रेन्द्र भज तस्माज्जनार्दनम् ॥१९॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ ॥ वर्तते यस्य तस्यैव तुष्यते जगतां पतिः ॥ २० ॥ सर्व
भूतदयायुक्तो विप्रपूजापरायणः ॥ तस्य तुष्टो जगन्नाथो मधुकैटभमर्द्दनः ॥ २१ ॥ सत्कथायां च रमते सत्कथां च करोति यः ॥ सत्सङ्गो निरहं
कारस्तस्य प्रीतो रमापतिः ॥ २२ ॥ नामसंकीर्त्तनं विष्णो क्षुत्तृट्प्रस्खलितादिषु॥ करोति सततं यस्तु तस्य प्रीतो ह्यधोक्षजः ॥ २३ ॥ यातु नारी
पतिप्राणा पतिपूजापरायणा ॥ तस्यास्तुष्टो जगन्नाथो ददाति स्वपदं मुने ॥ २४ ॥ असूयारहिता ये तु ह्यहंकारविवर्जिताः ॥ देवपूजापराश्चैव तेषां
तुष्यति केशवः ॥ २५ ॥ तस्माच्छृणुष्व देवर्षे भजस्व सततं हरिम् ॥ मा कुरुष्व ह्यहंकारं विद्युल्लोलश्रिया वृथा ॥ २६ ॥ शरीरं मृत्युसंयुक्तं जीवितं
चाति चञ्चलम् ॥ राजादिभिर्धनं बाध्यं सम्पदः क्षणभंगुराः ॥ २७ ॥ किंन पश्यसि देवर्षे ह्यायुषार्द्धं तु निद्रया ॥ हतं च भोजनाद्यैश्च कियदायुः
समाहृतम् ॥ २८ ॥ कियदायुर्बालभावाद्वृद्धभावात्कियद्वृथा ॥ कियद्विषयभोगैश्च कदा धर्मान्करिष्यति ॥ २९॥ बालभावे च वार्द्धक्ये न
घटेताच्युतार्चनम् ॥ वयस्येव ततो धर्मान्कुरु त्वमनहंकृतः ॥ ३० ॥ मा विनाशं व्रज मुने मग्नः संसारगह्वरे ॥ वपुर्विनाशनिलयमापदां परमं
पदम् ॥ ३१ ॥ शरीरं भोगनिलयं मलाद्यैः परिदूषितम् ॥ किमर्थं शाश्वतधिया कुर्यात्पापं नरो वृथा ॥ ३२ ॥ आसारभूते संसारे नानादुः
खसमन्विते ॥ विश्वासो नात्र कर्त्तव्यो निश्चितं मृत्युसंकुले ॥ ३३ ॥ तस्माच्छृणुष्व विप्रेन्द्र सत्यमेतद्ब्रवीम्यहम् ॥ देहयोगनिवृत्त्यर्थं सद्य
एव जनार्दनम् ॥ ३४॥ मानं त्यक्त्वा तथा लोभं कामक्रोधविवर्जितः ॥ भजस्व सततं विष्णुं मानुष्यमतिदुर्लभम् ॥ ३५ ॥ कोटिजन्मसहस्रेषु
स्थावरादिषु सत्तम ॥ संभ्रांतस्य तु मानुष्यं कथंचित्परिलभ्यते ॥ ३६ ॥ तत्रापि देवताबुद्धिर्दानबुद्धिश्च सत्तम ॥ भोगबुद्धिस्तथा नृणां जन्मा
न्तरतपःफलम् ॥ ३७ ॥ मानुष्यं दुर्लभं प्राप्य यो हरिं नार्चयेत्सकृत् ॥ मूर्खः कोऽस्ति परस्तस्माज्जडबुद्धिरचेतनः ॥ ३८ ॥ दुर्लभं प्राप्य मानुष्यं
नार्चयन्ति च ये हरिम् ॥ तेषामतीव मूर्खाणां विवेकः कुत्र तिष्ठति ॥ ३९ ॥ आराधितो जगन्नाथो ददात्यभिमतं फलम् ॥ कस्तं न पूजयेद्विप्र
संसाराग्निप्रदीपितः ॥ ४० ॥ चंडालोऽपि मुनिश्रेष्ठ विष्णुभक्तो द्विजाधिकः ॥ विष्णुभक्तिविहीनश्च द्विजोऽपि श्वपचाधमः ॥ ४१ ॥ तस्मात्कामा
दिकं त्यक्त्वा भजेत हरिमव्ययम् ॥ यस्मिंस्तुष्टेऽखिलं तुष्येद्यतः सर्वगतो हरिः ॥ ४२ ॥ यथा हस्तिपदे सर्वं पदमात्रं प्रलीयते ॥ तथा चराचरं
विश्वं विष्णावेव प्रलीयते ॥४३ ॥ आकाशेन यथा व्याप्तं जगत्स्थावरजंगमम् ॥ तथैव हरिणा व्याप्तं विश्वमेतच्चराचरम् ॥ ४४ ॥ जन्मनो मरणं नृणां

जन्म वै मृत्युसाधनम् ॥ उभे ते निकटे विद्धि तन्नाशो हरिसेवया ॥ ४५ ॥ ध्यातः स्मृतः पूजितो वा प्रणतो वा जनार्दनः ॥ संसारपाशविच्छेदी
कस्तं न प्रतिपूजयेत् ॥४६॥ यन्नामोच्चारणादेव महापातकनाशनम् ॥यं समभ्यर्च्य विप्रर्षे मोक्षभागी भवेन्नरः ॥ ४७ ॥ अहो चित्रमहो चित्रमहो
चित्रमिदं द्विज ॥ हरिनाम्नि स्थिते लोकः संसारे परिवर्त्तते ॥४८॥भूयोभूयोऽपि वक्ष्यामि सत्यमेतत्तपोधन ॥ नीयमानो यमभटैरशक्तो धर्मसाधनैः
॥ ४९ ॥ यावन्नेन्द्रियवैकल्यं यावद्व्याधिर्न बाधते॥ तावदेवार्चयेद्विष्णुं यदि मुक्तिमभीप्सति॥ ५० ॥मातुर्गर्भाद्विनिष्क्रान्तो यदा जन्तुस्तदैव हि ॥
मृत्युः संनिहितो भूयात्तस्माद्धर्मपरो भवेत् ॥ ५१ ॥ अहो कष्टमहो कष्टमहोकष्टमिदं वपुः॥ विनश्वरं समाज्ञाय धर्मं नैवाचरत्ययम् ॥ ५२ ॥
सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥ दम्भाचारं परित्यज्य वासुदेवं समर्चयेत् ॥ ५३ ॥ भूयो भूयो हितं वच्मि भुजमुद्धृत्य नारद ॥ विष्णुः
सर्वात्मना पूज्यस्त्याज्यासूया तथानृतम् ॥ ५४ ॥क्रोधमूलो मनस्तापः क्रोधः संसारबन्धनम् ॥ धर्मक्षयकरः क्रोधस्तस्मात्तं परिवर्जयेत् ॥ ५५ ॥
काममूलमिदं जन्म कामः पापस्य कारणम् ॥ यशःक्षयकरः कामस्तस्मात्तं परिवर्जयेत् ॥ ५६ ॥ समस्तदुःखजालानां मात्सर्यं कारणं स्मृतम् ॥
नरकाणां साधनं च तस्मात्तदपि संत्यजेत् ॥५७॥ मन एव मनुष्याणां कारणं बन्धमोक्षयोः ॥ तस्मात्तदभिसंयोज्य परात्मनि सुखी भवेत् ॥ ५८ ॥
अहो धैर्यमहो धैर्यमहो धैर्यमहो नृणाम्॥विष्णौ स्थिते जगन्नाथे न भजंति मदोद्धताः॥५९॥ अनाराध्य जगन्नाथं सर्वधातारमच्युतम्॥संसारसागरे मग्नाः
कथं पारं प्रयांति हि ॥६०॥ अच्युतानंतगोविंदनामोच्चारणभेषजात् ॥ नश्यंति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥ ६१ ॥ नारायण जगन्नाथ
वासुदेव जनार्दन॥ इतीरयन्ति ये नित्यं ते वै सर्वत्र वन्दिताः ॥ ६२ ॥ अद्यापि च मुनिश्रेष्ठ ब्रह्माद्या अपि देवताः॥ यत्प्रभावं न जानन्ति तं याहि
शरणं मुने ॥ ६३ ॥ अहो मौर्ख्यमहो मौर्ख्यमहो मौर्ख्यं दुरात्मनाम् ॥ हृत्पद्मसंस्थितं विष्णुं न विजानन्ति नारद॥ ६४ ॥ शृणुष्व मुनिशार्दूल
भूयोभूयो वदाम्यहम् ॥ हरिः श्रद्धावतां तुष्येन्न धनैर्न च बान्धवैः॥ ६५ ॥ बन्धुमत्त्वं धनाढ्यत्वं पुत्रवत्त्वं च सत्तम ॥ विष्णुभक्तिमतां नृणां
भवेज्जन्मनि जन्मनि ॥ ६६ ॥ पापमूलमयं देहः पापकर्मरतस्तथा ॥ एतद्विदित्वा सततं पूजनीयो जनार्दनः ॥ ६७ ॥ पुत्रमित्रकलत्राद्या
बहवः स्युश्च संपदः ॥ हरिपूजारतानां तु भवत्येव न संशयः ॥६८॥ इहामुत्र सुखप्रेप्सुः पूजयेत्सततं हरिम् ॥ इहामुत्रासुखप्रेप्सुः परनिन्दापरो भवेत्
॥ ६९ ॥ धिग्जन्म भक्तिहीनानां देवदेवे जनार्दने ॥ सत्पात्रदानशून्यं यत्तद्धनं धिक्पुनः पुनः ॥ ७० ॥ न नमेद्विष्णवे यस्य शरीरं कर्मभेदिने ॥
पापानामाकरं तद्वै विज्ञेयं मुनिसत्तम ॥७१॥ सत्पात्रदानरहितं यद्द्रव्यं येन रक्षितम् ॥ चौर्येण रक्षितमिव विद्धि लोकेषु निश्चितम् ॥ ७२ ॥ तडि

ल्लोलश्रिया मत्ताः क्षणभंगुरशालिनः॥ नाराधयंति विश्वेशं पशुपाशविमोचकम् ॥ ७३ ॥ सृष्टिस्तु द्विविधा प्रोक्ता दैवासुरविभेदतः ॥ हरिभक्ति
युता दैवी तद्धीना ह्यासुरी मता ॥ ७४ ॥ तस्माच्छृणुष्व विप्रेंद्र हरिभक्तिपरायणाः ॥ श्रेष्ठाः सर्वत्र विख्याता यतो भक्तिः सुदुर्लभा ॥ ७५ ॥
असूयारहिता ये च विप्रत्राणपरायणाः ॥ कामादिरहिता ये च तेषां तुष्यति केशवः ॥ ७६ ॥ संमार्जनादिना ये तु विष्णुशुश्रूषणे रताः ॥ सत्पात्रदा
ननिरताः प्रयांति परमं पदम् ॥ ७७ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे हरिभक्तिलक्षणं नाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ सनक
उवाच ॥ पुनर्वक्ष्यामि माहात्म्यं देवदेवस्य चक्रिणः ॥ पठतां शृण्वतां सद्यः पापराशिः प्रणश्यति ॥ १ ॥शांता जितारिषड्वर्गा योगेनाप्यनहंकृताः॥
यजंति ज्ञानयोगेन ज्ञानरूपिणमव्ययम् ॥ २ ॥ तीर्थस्नानैर्विशुद्धा ये व्रतदानतपोमखैः॥ यजंति कर्मयोगेन सर्वधातारमच्युतम्॥ ३ ॥ लुब्धा
व्यसनिनोऽज्ञाश्च न यजंति जगत्पतिम् ॥ अजरामरवन्मूढास्तिष्ठंति नरकीटकाः ॥ ४ ॥ तडिल्लेखाश्रिया मत्ता वृथाहंकारदूषिताः ॥ न
यजंति जगन्नाथं सर्वश्रेयोविधायकम् ॥ ५ ॥ हरिधर्मरताः शांता हरिपादाब्जसेवकाः ॥ दैवात्केऽपीह जायंते लोकानुग्रहतत्पराः ॥ ६ ॥
कर्मणा मनसा वाचा यो यजेद्भक्तितो हरिम् ॥ स याति परमं स्थानं सर्वलोकोत्तमोत्तमम् ॥ ७ ॥ अत्रैवोदाहरंतीममितिहासं
पुरातनम् ॥ पठतां शृण्वतां चैव सर्वपापप्रणाशनम् ॥ ८ ॥ तत्प्रवक्ष्यामि चरितं यज्ञमालिसुमालिनोः ॥ यस्य श्रवणमात्रेण वाजिमेध
फलं लभेत् ॥ ९ ॥ कश्चिदासीत्पुरा विप्र ब्राह्मणो रैवतेंऽतरे ॥ वेदमालिरिति ख्यातो वेदवेदांगपारगः ॥ १० ॥ सर्वभूतदयायुक्तो
हरिपूजापरायणः ॥ पुत्रमित्रकलत्रार्थं धनार्जनपरोऽभवत् ॥ ११ ॥ अपण्यविक्रयं चक्रे तथा च रसविक्रयम् ॥ चंडालाद्यैरपि तथा
संभाषी तत्प्रतिग्रही ॥ १२ ॥ तपसां विक्रयं चक्रे व्रतानां विक्रयं तथा ॥ परार्थं तीर्थगमनं कलत्रार्थमकारयत् ॥ १३ ॥ कालेन गच्छता
विप्र जातौ तस्य सुतावुभौ ॥ यज्ञमाली सुमाली च यमलावतिशोभनौ ॥ १४ ॥ ततः पिता कुमारौ तावतिस्नेहसमन्वितः ॥ पोषयामास वात्स
ल्याद्बहुभिः साधनैस्तदा ॥ १५ ॥ वेदमालिर्बहूपायैर्धनं संपाद्य यत्नतः ॥ स्वधनं गणयामास कियत्स्यादिति वेदितुम् ॥ १६ ॥ निधिकोटि
सहस्राणां कोटिकोटिगुणान्वितम् ॥ विगणय्य स्वयं हृष्टो विस्मितश्चार्थचिंतया ॥ १७ ॥ असत्प्रतिग्रहैश्चैव अपण्यानां च विक्रयैः ॥ मया तपो
विक्रयाद्यैरेतद्धनमुपार्जितम् ॥ १८ ॥ नाद्यापि शांतिमापन्ना मम तृष्णातिदुःसहा ॥ मेरुतुल्यसुवर्णानि ह्यसंख्यातानि वांछति ॥ १९ ॥ अहो मन्ये
महाकष्टं समस्तक्लेशसाधनम् ॥ सर्वान्कामानवाप्नोति पुनरन्यच्च कांक्षति ॥ २० ॥ जीर्यंति जीर्यतः केशाः दंता जीर्यंति जीर्यतः ॥ चक्षुःश्रोत्रे

च जीर्यंते तृष्णैका तरुणायते ॥ २१ ॥ ममेंद्रियाणि सर्वाणि मंदभावं व्रजंति च ॥ बलं हतं च जरसा तृष्णा तरुणतां गता ॥ २२ ॥ कष्टाशा
वर्तते यस्य स विद्वानथ पंडितः ॥ सुशांतोऽपि प्रमन्युः स्याद्धीमानप्यतिमूढधीः ॥ २३ ॥ आशा भंगकरी पुंसामजेयारातिसन्निभा ॥ तस्मादाशां
त्यजेत्प्राज्ञो यदीच्छेच्छाश्वतं सुखम् ॥ २४ ॥ बलं तेजो यशश्चैव विद्यां मानं च वृद्धताम् ॥ तथैव सत्कुले जन्म आशा हंत्यतिवेगतः ॥ २५ ॥
नृणामाशाभिभूतानामाश्चर्यमिदमुच्यते ॥ किंचिद्दातापि चांडालस्तस्मादधिकतां गतः ॥ २६ ॥ आशाभिभूता ये मर्त्या महामोहा महोद्धताः ॥
अवमानादिकं दुःखं न जानंति कदाप्यहो ॥ २७ ॥ मयाप्येवं बहुक्लेशैरेतद्धनमुपार्जितम् ॥ शरीरमपि जीर्णं च जरसापहतं बलम् ॥ २८ ॥ इतः
परं यतिष्यामि परलोकार्थमादरात् ॥ एवं निश्चित्य विप्रेंद्र धर्ममार्ग रतोऽभवत् ॥ २९ ॥ तदैव तद्धनं सर्वं चतुर्द्धा व्यभजत्तथा ॥ स्वयं तु भाग
द्वितय स्वार्जितार्थादपाहरत् ॥ ३० ॥ शेषं च भागद्वितयं पुत्रयोरुभयोर्ददौ ॥ स्वेनार्जितानां पापानां नाशं कर्तुमनास्तदा ॥ ३१ ॥ प्रपा
तडागारामांश्च तथा देवगृहान्बहून् ॥ अन्नादीनां च दानानि गंगातीरे चकार सः ॥ ३२ ॥ एवं धनमशेषं च विश्राण्य हरिभक्तिमान् ॥ नरनारायण
स्थानं जगाम तपसे वनम् ॥ ३३ ॥ तत्रापश्यन्महारम्यमाश्रमं मुनिसेवितम् ॥ फलितैः पुष्पितैश्चैव शोभितं वृक्षसंचयैः ॥ ३४ ॥ गृणद्भिः परमं
ब्रह्म शास्त्रचिंतापरैस्तथा ॥ परिचर्यापरैर्वृद्धैर्मुनिभिः परिशोभितम् ॥ ३५ ॥ शिष्यैः परिवृतं तत्र मुनिं जानंति संज्ञकम् ॥ गृणंतं
परमं ब्रह्म तेजोराशिं ददर्श ह ॥ ३६ ॥ शमादिगुणसंयुक्तं रागादिरहितं मुनिम् ॥ शीर्णपर्णाशनं दृष्ट्वा वेदमालिर्ननाम तम् ॥ ३७ ॥ तस्य
जानन्तिरागंतोः कल्पयामास चार्हणम् ॥ कंदमूलफलाद्यैस्तु नारायणधिया मुने ॥ ३८ ॥ कृतातिथ्यक्रियस्तेन वेदमाली कृतांजलिः ॥
विनयावनतो भूत्वा प्रोवाच वदतां वरम् ॥ ३९ ॥ भगवन्कृतकृत्योऽस्मि विगतं कल्मषं मम ॥ मामुद्धर महाभाग ज्ञानदानेन पंडित
॥ ४० ॥ एवमुक्तस्ततस्तेन जानंतिर्मुनिसत्तमः ॥ प्रोवाच प्रहसन्वाग्मी वेदमालिं गुणान्वितम् ॥ ४१ ॥ जानंतिरुवाच ॥ शृणष्व विप्रशार्दूल
संसारच्छेदकारणम् ॥ प्रवक्ष्यामि समासेन दुर्लभं त्वकृतात्मनाम् ॥ ४२ ॥ भज विष्णुं परं नित्यं स्मर नारायणं प्रभुम् ॥ परापवादं पैशुन्यं
कदाचिदपि मा कृथाः ॥ ४३ ॥ परोपकारनिरतः सदा भव महामते ॥ हरिपूजापरश्चैव त्यज मूर्खसमागमम् ॥ ४४ ॥ कामं क्रोधं च लोभं
च मोहं च मदमत्सरौ ॥ परित्यज्यात्मवल्लोकं दृष्ट्वा शांतिं गमिष्यसि ॥ ४५ ॥ असूयां परनिंदां च कदाचिदपि मा कुरु ॥ दंभाचारमहंकारं नैष्ठुर्यं च
परित्यज ॥ ४६ ॥ दयां कुरुष्व भूतेषु शुश्रूषां च तथा सताम् ॥ त्वया कृतांश्च धर्मान्वै मा प्रकाशय पृच्छताम् ॥ ४७ ॥ अनाचारपरान्दृष्ट्वा नोपेक्षां

कुरु शक्तितः ॥ पूजयस्वातिथिं नित्यं स्वकुटुंबाविरोधतः ॥ ४८ ॥ पत्रैः पुष्पैः फलैर्वापि दूर्वाभिः पल्लवैरथ ॥ पूजयस्व जगन्नाथं नारायणमका
मतः ॥ ४९ ॥ देवानृषीन्पितॄश्चापि तर्पयस्व यथाविधि ॥ अग्नेश्च विधिवद्विप्र परिचर्यापरो भव ॥ ५० ॥ देवतायतने नित्यं संमार्जनपरो भव ॥
तथोपलेपनं चैव कुरुष्व सुसमाहितः ॥ ५१ ॥ शीर्णस्फटितसंधानं कुरु देवगृहे सदा ॥ मार्गशोभां च दीपं च विष्णोरायतने कुरु ॥ ५२ ॥ कंद
मूलफलैर्वापि सदा पूजय माधवम् ॥ प्रदक्षिणनमस्कारैः स्तोत्राणां पठनैस्तथा ॥ ५३ ॥ पुराणश्रवणं चैव पुराणपठनं तथा ॥ वेदांतपठनं चैव
प्रत्यहं कुरु शक्तितः॥ ५४ ॥एवं स्थिते तव ज्ञानं भविष्यत्युत्तमोत्तमम् ॥ ज्ञानात्समस्तपापानां मोक्षो भवति निश्चितम्॥५५॥एवं प्रबोधितस्तेन
वेदमालिर्महामतिः ॥ तथा ज्ञानरतो नित्यं ज्ञानलेशमवाप्तवान् ॥५६॥ वेदमालिः कदाचित्तु ज्ञानलेशप्रचोदितः॥ कोऽहं मम क्रिया केति स्वयमेव
व्यचिंतयत् ॥ ५७ ॥ मम जन्म कथं जातं रूपं कीदृग्विधं मम ॥एवं विचारणपरो दिवानिशमतंद्रितः ॥५८॥ अनिश्चितमतिर्भूत्वा वेदमालिर्द्विजो
त्तमः ॥ पुनर्जानंतिमागम्य प्रणम्येदमुवाच ह ॥५९॥ वेदमालिरुवाच॥मम चित्तमतिभ्रांतं गुरो ब्रह्मविदां वर॥कोऽहं मम क्रिया का च मम जन्म
कथं वद ॥ ६० ॥ जानंतिरुवाच ॥ सत्यं सत्यं महाभाग चित्तं भ्रांतं सुनिश्चितम् ॥ अविद्यानिलय चित्तं कथं सद्भावमेष्यति ॥ ६१ ॥ ममेति
गदितं यत्तु तदपि भ्रांतिरिष्यते॥ अहंकारो मनोधर्म आत्मनो नहि पंडित ॥ ६२ ॥पुनश्च कोऽहमित्युक्तं वेदमाले त्वया तु यत् ॥ मम जात्यादि
शून्यस्य कथं नाम करोम्यहम् ॥६३॥ अनौपम्यस्वभावस्य निर्गुणस्य परात्मनः॥ नीरूपस्याप्रमेयस्य कथं नाम करोम्यहम् ॥ ६४॥ परज्योतिः
स्वरूपस्य परिपूर्णाव्ययात्मनः॥अविच्छिन्नस्वभावस्य कथ्यते च कथं क्रिया॥६५॥ स्वप्रकाशात्मनो विप्र नित्यस्य परमात्मनः॥अनंतस्य क्रिया चैव
कथं जन्म च कथ्यते ॥६६॥ ज्ञानैकवेद्यमजरं परं ब्रह्म सनातनम्॥परिपूर्णं परानंदं तस्मान्नान्यदिह द्विज॥६७॥तत्त्वमस्यादिवाक्येभ्यो ज्ञानं मोक्षस्य
साधनम्॥ ज्ञाने त्वनाहते सिद्धे सर्वं ब्रह्ममयं भवेत् ॥ ६८ ॥एवं प्रबोधितस्तेन वेदमालिर्मुनीश्वर ॥ मुमोद पश्यन्नात्मानमात्मन्येवाच्युतं प्रभुम्॥६९॥
उपाधिरहितं ब्रह्म स्वप्रकाशं निरंजनम् ॥ अहमेवेति निश्चित्य परां शांतिमवाप्तवान् ॥ ७० ॥ ततश्च व्यवहारार्थं वेदमालिर्मुनीश्वरम् ॥ गुरुं प्रणम्य
जानंतिं सदा ध्यानपरोऽभवत् ॥ ७१ ॥गते बहुतिथे काले वेदमालिर्मुनीश्वर ॥ वाराणसीपुरं प्राप्य परं मोक्षमवाप्तवान् ॥ ७२ ॥ य इमं पठतेऽ
ध्यायं शृणुयाद्वा समाहितः ॥ स कर्मपाशविच्छेदं प्राप्य सौख्यमवाप्नुयात् ॥ ७३ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे ज्ञाननिरूपणं
नाम पंचत्रिंशोऽध्यायः ॥ ३५ ॥ सनक उवाच॥ वेदमालेः सुतौ प्रोक्तौ यावुभौ मुनिसत्तम ॥ यज्ञमाली सुमाली च तयोः कर्माधुनोच्यते ॥ १ ॥

तयोराद्यो यज्ञमाली विभेद पितृसंचितम् ॥ धनं द्विधा कनिष्ठस्य भागमेकं ददौ तदा ॥२॥ सुमाली च धनं सर्वं व्यसनाभिरतः सदा॥ अपादाना
दिभिश्चैव नाशयामास भो द्विज ॥३॥गीतवाद्यरतो नित्यं मद्यपानरतोऽभवत् ॥ वेश्याविभ्रमलुब्धोऽसौ परदाररतोऽभवत् ॥ ४ ॥ सर्वस्मिन्नाशमायाते
हिरण्ये पितृसंचिते ॥ अपहृत्य परं द्रव्यं वारस्त्रीनिरतोऽभवत् ॥ ५ ॥ दृष्ट्वा सुमालिनः शीलं यज्ञमाली महामतिः ॥ बभूव दुःखितोऽत्यर्थं भ्रातरं
चदमब्रवीत् ॥६॥ अलममत्यंतकष्टेन वृत्तेनास्मत्कुलेऽनुज ॥ त्वमेक एव दुष्टात्मा महापापरतोऽभवः ॥७॥ एवं निवारयंतं तं बहुशो ज्येष्ठसोदरम् ॥
हनिष्यामीति निश्चित्य खड्गहस्तः कचेऽग्रहीत् ॥ ८ ॥ ततो महारवो जज्ञे नगरे भृशदारुणः ॥ बबंधुर्नागराश्चैनं कुपितास्ते सुमालिनम् ॥ ९ ॥
यज्ञमाली ह्यमेयात्मा पौरान्संप्रार्थ्य दुःखितः ॥ बंधनान्मोचयामास भ्रातृस्नेहविमोहितः ॥ १० ॥ यज्ञमाली पुनश्चापि बिभिदे स्वधनं द्विधा ॥
आददे स्वयमर्द्धं च ददावर्द्धं यवीयसे॥११॥सुमाली त्वतिमूढात्मा तद्धनं चापि नारद॥ मूर्खैः पाखंडचंडालैर्बुभुजे च सहोद्धतः॥१२॥असतामुपभो
गाय दुर्जनानां विभूतयः ॥ पिचुमंदः फलाढ्योऽपि काकैरेवोपभुज्यते ॥१३॥ भ्रात्रा दत्तं धनं तच्च सुमाली नाशयन्मुने ॥ मद्यपानप्रमत्तश्च गोमांसा
दीन्यभक्षयत् ॥ १४ ॥ त्यक्तो बंधुजनैः सर्वैश्चांडालस्त्रीसमन्वितः ॥ राज्ञापि बाधितो विप्र प्रपेदे निर्जनं वनम् ॥ १५ ॥यज्ञमाली सुधीर्विप्र सदा
धर्मरतोऽभवत् ॥ अवारितं ददावन्नं सत्सङ्गगतकल्मषः ॥१६॥ पित्रा कृतानि सर्वाणि तडागादीनि सत्तम ॥ अपालयत्प्रयत्नेन सदा धर्मपरायणः ॥
॥१७॥ विश्राणितं धनं सर्वं यज्ञमालेर्महात्मनः ॥ सत्पात्रदाननिष्ठस्य धर्ममार्गप्रवर्तिनः ॥ १८ ॥ अहो सदुपभोगाय सज्जनानां विभूतयः॥कल्पवृक्ष
फलं सर्वममरैरेव भुज्यते ॥ १९ ॥ धनं विश्राण्य धर्मार्थं यज्ञमाली महामतिः ॥ नित्यं विष्णुगृहे सम्यक्परिचर्यापरोऽभवत्॥२०॥कालेन गच्छता
तौ तु वृद्धभावमुपागतौ॥ यज्ञमाली सुमाली च ह्येककाले मृतावुभौ॥२१॥हरिजारतस्यापूस्य यज्ञमालिमहात्मनः॥ हरिः संप्रेषयामास विमानं पार्षदा
वृतम्॥२२॥दिव्यं विमानमारुह्य यज्ञमाली महामतिः ॥ पूज्यमानः सुरगणैः स्तूयमानो मुनीश्वरैः ॥२३॥ गंधर्वैर्गीयमानश्च सेवितश्चाप्सरोगणैः ॥
कामधेन्वा पुष्यमाणश्चित्राभरणभूषितः ॥ २४ ॥ कोमलैस्तुलसीमाल्यैर्भूषितस्तेजसां निधिः ॥ गच्छन्विष्णुपदं दिव्यंमनुजं पथि दृष्टवान् ॥२५॥
ताड्यमानं यमभटैः क्षुत्तृड्भ्यां परिपीडितम् ॥ प्रेतभूतं विवस्त्रं च दुःखितं पाशवेष्टितम् ॥ इतस्ततः प्रधावन्तं विलपंतमनाथवत् ॥२६॥ क्रोशन्तं च
रुदंतं च दृष्ट्वा मनसि विव्यथे॥२७॥यज्ञमालीदयायुक्तो विष्णुदूतान्समीपगान्॥कोऽयं भटैर्बाध्यमानं इत्यपृच्छत्कृतांजलिः॥२८॥अथ ते हरिदूतास्तं
यज्ञमालिमहौजसम् ॥ असौ सुमाली भ्राता ते पापात्मेति समब्रुवन्॥२९॥यज्ञमाली समाकर्ण्य व्याख्यातं विष्णुकिंकरैः ॥ मनसा दुःखमापन्नः पुनः
पप्रच्छ नारद॥३०॥कथमस्य भवेन्मोक्षः संचितैःपापसंचयैः॥तदुपायंवदध्वं मे यूयं हि ममबांधवाः॥३१॥सख्यं साप्तपदीनं स्यादित्याहुर्धर्मकोविदाः॥

सतां सात्तपदी मैत्री सत्सतां त्रिपदी तथा॥३२॥सत्सतामपि ये संतस्तेषां मैत्री पदे पदे॥३३॥तस्मान्मे बांधवा यूयं मां नेतुं समुपागताः॥यतोऽयं मम
भ्रातापि मुच्यते तदिहोच्यताम्॥३४॥ यज्ञमालिवचः श्रुत्वा विष्णुदूता दयालवः॥ पुनः स्मितमुखाः प्रोचुर्यज्ञमालिहरिप्रियम् ॥ ३५ ॥ विष्णुदूता
ऊचुः ॥ यज्ञमालिन्महाभाग नारायणपरायण ॥ उपायं तव वक्ष्यामः सुमालिप्रममुक्तिदम् ॥ ३६ ॥ कृत यत्सुमहत्कर्म त्वया प्राक्तनजन्मनि ॥
प्रवक्ष्यामः समासेन तच्छृणुष्व समाहितः ॥ ३७ ॥ पुरा त्वं वैश्यजातीयो नाम्ना विश्वंभरः स्मृतः ॥ त्वया कृतानि पापानि महांत्यगणितानि
वै॥ ३८॥ सुकर्मवासनाहीनो मातापित्रोर्विरोधकृत् ॥ एकदा बंधुभिस्त्यक्तः शोकसंतापपीडितः ॥३९ ॥ क्षुधाग्निनापि संतप्तः प्राप्तवान्हरिमंदिरम्॥
तदा वृष्टिरभूत्तत्र तत्स्थानं पंकिलं ह्यभूत ॥४०॥ दूरीकृतस्त्वया पंकस्तत्स्थाने स्थातुमिच्छया ॥ उपलेपनतां प्राप्तं तत्स्थानं विष्णुमंदिरे ॥ ४१ ॥
त्वयोषितं तु तद्रात्रौ तस्मिन्देवालये द्विज॥दंशितश्चैव सर्पेण प्राप्तं पञ्चत्वमेव च॥४२॥तेन पुण्यप्रभावेन उपलेपकृतेन च॥ विप्रजन्म त्वया प्राप्तं हरि
भक्तिस्तथाचला ॥ ४२ ॥ कल्पकोटिशतं साग्रं संप्राप्य हरिसन्निधिम् ॥ वसाद्य ज्ञानमासाद्य परं मोक्षं गमिष्यसि ॥ ४३ ॥ अनुजं पातकिश्रेष्ठं त्वं
समुद्धर्तुमिच्छसि ॥ उपायं तव वक्ष्यामस्तं निबोध महामते ॥ ४४ ॥ गोचर्ममात्रभूमेस्तु उपलेपनजं फलम् ॥ दत्त्वोद्धर महाभाग भ्रातरं कृपया
न्वितः ॥ ४५ ॥ एवमुक्तो विष्णुदूतैर्यज्ञमाली महामतिः ॥ तत्फलं प्रददौ तस्मै भ्रात्रे पापविमुक्तये ॥ ४६ ॥ सुमाली भ्रातृदत्तेन पुण्येन
गतकल्मषः ॥ बभूव यमदूतास्तु तं त्यक्त्वा प्रपलायिताः ॥ ४७ ॥ विमानं चागतं सद्यः सर्वभोगसमन्वितम् ॥ तदा सुमाली
स्वर्यानमारुह्य मुमुदे मुने ॥ ४८ ॥ तावुभौ भ्रातरौ विप्र सुरवृंदनमस्कृतौ ॥ अवापतुर्भृशं प्रीतिं समालिंग्य परस्परम् ॥ ४९ ॥
यज्ञमाली सुमाली च स्तूयमानौ महर्षिभिः ॥ गीयमानौ च गंधर्वैर्विष्णुलोक प्रजग्मतुः ॥ ५० ॥ अवाप्य हरिसालोक्यं सुमाली
मुनिसत्तम ॥ यज्ञमाली चोषतुस्तौ कल्पमेकं मुदान्वितौ ॥ ५१ ॥ भुक्त्वा भोगान्बहूँस्तत्र यज्ञमाली महामतिः ॥ तत्रैव ज्ञानसंपन्नः परं मोक्ष
मुपागतः ॥ ५२ ॥ सुमाली तु महाभागो विष्णुलोके मुदान्वितः ॥ स्थित्वा भूमिं पुनः प्राप्य विप्रत्वं समुपागतः ॥ ५३ ॥ अतिशुद्धे कुले जातो
गुणवान्वेदपारगः ॥ सर्वसंपत्समोपेतो हरिभक्तिपरायणः ॥ ५४ ॥ व्याहरन्हरिनामानि प्रपेदे जाह्नवीतटम् ॥ तत्र स्नातश्च गंगायां दृष्ट्वा विश्वेश्वरं
प्रभुम् ॥ ५५ ॥ अवाप परमं स्थानं योगिनामपि दुर्लभम् ॥ उपलेपनमाहात्म्यं कथितं ते मुनीश्वर ॥५६॥ तस्मात्सर्वप्रयत्नेन संपूज्यो जगतांपतिः॥
अकामादपि ये विष्णोः सकृत्पूजां प्रकुर्वते ॥ ५७॥ न तेषां भवबंधस्तु कदाचिदपि जायते ॥ हरिभक्तिरतान्यस्तु हरिबुद्ध्या समर्चयेत् ॥ ५७ ॥

तस्य तुष्यंति विप्रेंद्र ब्रह्मविष्णुमहेश्वराः ॥ हरिभक्तिपराणां तु संगिनां संगमात्रतः ॥ ५९ ॥ मुच्यते सर्वपापेभ्यो महापातकवानपि ॥
हरिपूजापराणां च हरिनामरतात्मनाम् ॥६० ॥ शुश्रूषानिरता यांति पापिनोऽपि परां गतिम् ॥ ६१ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे
विष्णुसेवाप्रभावो नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥ सनक उवाच ॥ भूयः शृणुष्व विप्रेंद्र माहात्म्यं कमलापतेः ॥ कस्य नो जायते प्रीतिः श्रोतुं
हरिकथामृतम् ॥ १ ॥ नराणां विषयान्धानां ममताकुलचेतसाम् ॥ एकमेव हरेर्नाम सर्वपापप्रणाशनम् ॥ २ ॥ सकृद्वा न नमेद्यस्तु विष्णुं
पापहरं नृणाम् ॥ श्वपचं तं विजानीयात्कदाचिन्नालपेच्च तम् ॥३॥ हरिपूजाविहीनं तु यस्य वेश्म द्विजोत्तम ॥ श्मशानसदृशं तद्धि कदाचिदपि नो
विशेत् ॥४॥ हरिपूजाविहीनाश्च वेदविद्वेषिणस्तथा ॥ गोद्विजद्वेषनिरता राक्षसाः परिकीर्त्तिताः ॥ ५ ॥ यो वा को वापि विप्रेन्द्र विप्रद्वेषपरायणः॥
समर्चयति गोविंदं तत्पूजा विफला भवेत् ॥ ६ ॥ अन्यश्रेयोविनाशार्थं येऽर्चयंति जनार्दनम् ॥ सा पूजैव महाभाग पूजकानाशु हंति वै ॥ ७ ॥
हरिपूजाकरो यस्तु यदि पापं समाचरेत् ॥ तमेव विष्णुद्वेष्टारं प्राहुस्तत्त्वार्थकोविदाः ॥ ८॥ ये विष्णुनिरताः संति लोकानुग्रहतत्पराः ॥
धर्मकार्यरताः शश्वद्विष्णुरूपास्तु ते मताः ॥ ९ ॥ कोटिजन्मार्जितैः पुण्यैर्विष्णुभक्तिः प्रजायते ॥ दृढभक्तिमतां विष्णौ पापबुद्धिः कथं
भवेत् ॥ १० ॥ जन्मकोट्यर्जितं पापं विष्णुपूजारतात्मनाम् ॥ क्षयं याति क्षणादेव तेषां स्यात्पापधीः कथम् ॥ ११ ॥ विष्णुभक्तिविहीना
ये चंडालाः परिकीर्तिताः ॥ चंडाला अपि वै श्रेष्ठा हरिभक्तिपरायणाः ॥ १२ ॥ नराणां विषयांधानां सर्वदुःखविनाशिनी ॥ हरिसेवेति विख्याता
भुक्तिमुक्तिप्रदायिनी ॥१३॥ संगात्स्नेहाद्भयाल्लोभादज्ञानाद्वापि यो नरः॥ विष्णोरुपासनं कुर्यात्सोऽक्षयं सुखमश्नुते ॥ १४ ॥ हरिपादोदकं यस्तु
कणमात्रं पिबेदपि ॥ स स्नातः सर्वतीर्थेषु विष्णोः प्रियतरो भवेत् ॥ १५॥ अकालमृत्युशमनं सर्वव्याधिविनाशनम् ॥ सर्वदुःखोपशमनं हरिपादो
दकं स्मृतम् ॥ १६ ॥ नारायणं परं धाम ज्योतिषां ज्योतिरुत्तमम् ॥ ये प्रपन्ना महात्मानस्तेषां मुक्तिर्हि शाश्वती ॥१७॥ अत्राप्युदाहरंतीममितिहासं
पुरातनम् ॥ पठतां शृण्वतां चैव सर्वपापप्रणाशनम् ॥ १८ ॥ आसीत्पुरा कृतयुगे गुलिको नाम लुब्धकः ॥परदारपरद्रव्यहरणे सततोद्यतः ॥ १९ ॥
परनिंदापरो नित्यं जन्तूपद्रवकृत्तथा ॥ हतवान्ब्राह्मणान् गाश्च शतशोऽथ सहस्रशः ॥ २० ॥देवस्वहरणे नित्यं परस्वहरणे तथा ॥ उद्युक्तः सर्वदा
विप्र कीनाशानामधीश्वरः ॥ २१ ॥ तेन पापान्यनेकानि कृतानि सुमहांति च ॥ न तेषां शक्यते वक्तुं संख्या वत्सरकोटिभिः ॥ २२ ॥ स कदा
चिन्महापापो जतूनामन्तकोपमः ॥ सौवीरराज्ञो नगरं सर्वैश्वर्यसमन्वितम् ॥ २३ ॥ योषिद्भिर्भूषिताभिश्च सरोभिर्निर्मलोदकैः ॥ अलंकृतं विप

णिभिर्ययौ देवपुरोपमम् ॥ २४ ॥ तस्योपवनमध्यस्थं रम्यं केशवमंदिरम् ॥ छादितं हेमकलशैर्दृष्ट्वा व्याधो मुदं ययौ ॥ २५ ॥ हराम्यत्र सुवर्णानि बहूनीति विनिश्चितम् ॥ जगामाभ्यंतरं तस्य कीनाशश्चौर्यलोलुपः ॥ २६ ॥ तत्रापश्यद्द्विजवरं शांतं तत्त्वार्थकोविदम् ॥ परिचर्यापरं विष्णोरुत्तंकं तपसां निधिम् ॥ २७ ॥ एकाकिनं दयालुं च निस्पृहं ध्यानलोलुपम् ॥ चौर्यान्तरायकर्तारं तं दृष्ट्वा लुब्धको मुने ॥२८॥ द्रव्यजातं तु देवस्य हर्तुकामोऽतिसाहसी ॥ उत्तंकं हंतुमारेभे विधृतासिर्मदोद्धतः ॥ २९ ॥ पादेनाक्रम्य तद्वक्षो जटाः संगृह्य पाणिना ॥ हंतुं कृतमतिं व्याधमुत्तंकः प्रेक्ष्य चाब्रवीत् ॥ ३० ॥ उत्तंक उवाच ॥ भो भो साधो वृथा मां त्वं हनिष्यसि निरागसम् ॥ मया किमपराद्धं ते तद्वदस्व महामते ॥ ॥३१॥ कृतापराधिनां लोके शक्ताः शिक्षां प्रकुर्वते ॥ नहि सौम्य वृथा घ्नंति सज्जना अपि पापिनः ॥३२॥ विरोधिष्वपि मूर्खेषु निरीक्ष्यावस्थितान् गुणान् ॥ विरोधं नहि कुर्वंति सज्जनाः शांतचेतसः ॥३३॥ बहुधा बोध्यमानोऽपि यो नरः क्षमयान्वितः ॥ तमुत्तमं नरं प्राहुर्विष्णोः प्रियतरं सदा ॥ ॥ ३४ ॥ सुजनो न याति वैरं परहितबुद्धिर्विनाशकालेऽपि ॥ छेदेऽपि चंदनतरुः सुरभयति मुखं कुठारस्य ॥ ३५ ॥ ॥ अहो विधिः सुबलवान्बाधते बहुधा जनान् ॥ सर्वसंगविहीनोऽपि बाध्यते हि दुरात्मना ॥ ३६ ॥ अहो निष्कारणं लोके बाधंते बहुधा जनान् ॥ सर्वसंगविहीनोऽपि बाध्यते पिशुनैर्जनैः ॥ तत्रापि साधून्बाधंते न समानान्कदाचन ॥ ३७ ॥ मृगमीनसज्जनानां तृणजलसंतोषविहितवृत्तीनाम् ॥ लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥ ३८ ॥ अहो बलवती माया मोहयत्यखिलं जगत् ॥ पुत्रमित्रकलत्रार्थं सर्वं दुःखेन योजयेत् ॥ ३९ ॥ परद्रव्यापहारेण कलत्रं पोषितं त्वया ॥ अंते तत्सर्वमुत्सृज्य एक एव प्रयाति वै ॥ ४० ॥ मम माता मम पिता मम भार्या ममात्मजाः ॥ ममेदमिति जंतूनां ममता बाधते वृथा ॥४१॥ यावदर्जयति द्रव्यं बांधवास्तावदेव हि ॥ धर्माधर्मौ सहैवास्तामिहामुत्र न चापरः ॥ ४२ ॥ धर्माधर्मार्जितैर्द्रव्यैः पोषिता येन ये नराः ॥ मृतमग्निमुखे हुत्वा घृतान्नं भुंजते हि ते ॥ ४३ ॥ गच्छंतं परलोकं च नरं तु ह्यनुतिष्ठतः ॥ धर्माधर्मौ न च धनं न पुत्रा न च बांधवाः ॥४४॥ कामः समृद्धिमायाति नराणां पापकर्मिणाम् ॥ कामः संक्षयमायाति नराणां पुण्यकर्मणाम् ॥ ४५ ॥ वृथैव व्याकुला लोका धनादीनां सदार्जने ॥ ४६ ॥ यद्भावि तद्भवत्येव यदभाव्यं न तद्भवेत् ॥ इति निश्चितबुद्धीनां न चिंता बाधते क्वचित् ॥ ४७ ॥ दैवाधीनमिदं सर्वं जगत्स्थावरजंगमम् ॥ तस्माज्जन्म च मृत्युं च दैवं जानाति नापरः ॥ ४८ ॥ यत्र कुत्र स्थितस्यापि यद्भाव्यं तद्भवेद् ध्रुवम् ॥ लोकस्तु तत्र विज्ञाय वृथायासं करोति हि ॥ ४९ ॥ अहो दुःखं मनुष्याणां ममताकुलचेतसाम् ॥ महापापानि कृत्वापि परान्पुष्यंति यत्नतः ॥ ५० ॥

अर्जितं च धनं सर्वं भुंजते बांधवाः सदा ॥ स्वयमेकतमो मूढस्तत्पापफलमश्नुते ॥ ५१ ॥ इति ब्रुवाणं तमृषिं विमुच्य भयविह्वलः ॥ गुलिकः
प्रांजलिः प्राह क्षमस्वेति पुनः पुनः ॥ ५२ ॥ सत्संगस्य प्रभावेण हरिसन्निधिमात्रतः ॥ गतपापो लुब्धकश्च ह्यनुतापीदमब्रवीत् ॥ ५३ ॥ मया कृता
नि पापानि महांति सुबहूनि च॥ तानि सर्वाणि नष्टानि विप्रेंद्र तव दर्शनात् ॥ ५४ ॥ अहोऽहं पापधीर्नित्यं महापापमुपाचरम् ॥ कथं मे निष्कृति
र्भूयो यामि कं शरणं विभोः ॥ ५५ ॥ पूर्वजन्मार्जितैः पापैर्लुब्धकत्वमवाप्तवान् ॥ अत्रापि पापजालानि कृत्वा कां गतिमाप्नुयाम् ॥ ५६ ॥ अहो
ममायुः क्षयमेति शीघ्रं पापान्यनेकानि समर्ज्जितानि ॥ प्रतिक्रिया नैव कृता मयैषां गतिश्च का स्यान्ममजन्म किं वा॥५७॥ अहो विधिः पापशता
कुलं मां किं सृष्टवान्पापतरं च शश्वत् ॥ कथं च यत्पापफलं हि भोक्ष्ये कियत्सु जन्मस्वहमुग्रकर्मा ॥ ५८ ॥ एवं विनिंदन्नात्मानमात्मना लुब्धकस्त
दा ॥ अंतस्तापाग्निसंतप्तः सद्यः पंचत्वमागतः ॥ ५९ ॥ उत्तंकः पतितं प्रेक्ष्य लुब्धकं तं दयापरः ॥ विष्णुपादोदकेनैवमभ्यषिंचन्महामतिः ॥
॥ ६० ॥ हरिपादोदकस्पर्शाल्लुब्धको गतकल्मषः॥ दिव्यं विमानमारुह्य मुनिमेतदथाब्रवीत् ॥ ६१ ॥ गुलिक उवाच ॥ उत्तंक मुनिशार्दूल गुरुस्त्वं
मम सुव्रत ॥ विमुक्तस्त्वत्प्रसादेन महापातककंचुकात् ॥ ६२ ॥ गतस्त्वदुपदेशान्मे संतापो मुनिपुंगव ॥ तथैव सर्वपापानि विनष्टान्यतिवेगतः ॥
॥ ६३ ॥ हरिपादोदकं यस्मान्मयि त्वं सिक्तवान्मुने ॥ प्रापितोऽस्मि त्वया तस्मात्तद्विष्णोः परमं पदम् ॥ ६४ ॥ त्वयाहं तारितो विप्र पापादस्मा
च्छरीरतः ॥ तस्मान्नतोऽस्मि ते विद्वन्मत्कृतं तत्क्षमस्व च ॥ ६५ ॥ इत्युक्त्वा देवकुसुमैर्मुनिश्रेष्ठं समाकिरन् ॥ प्रदक्षिणात्रयं कृत्वा नमस्कारं चकार
सः ॥ ६६ ॥ ततो विमानमारुह्य सर्वकामसमन्वितम्॥ अप्सरोगणसंकीर्णः प्रपेदे हरिमंदिरम् ॥६७॥ एतद्दृष्ट्वा विस्मितोऽसौ ह्युत्तंकस्तपसांनिधिः॥
शिरस्यंजलिमाधाय तुष्टाव कमलापतिम्॥ ६८ ॥ तेन स्तुतो महाविष्णुर्दत्तवान्वरमुत्तमम् ॥ वरेण तेनोत्तंकोऽपि प्रपेदे परमं पदम् ॥ ६९ ॥ इति श्री
बृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे विष्णुमाहात्म्ये सप्तत्रिंशोऽध्यायः॥३७॥नारद उवाच॥कितत्स्तोत्रं महाभाग कथं तुष्टो जनार्दनः॥उत्तंकः पुण्यपु
रुषः कीदृशं लब्धवान्वरम् ॥ १ ॥ सनक उवाच ॥ उत्तंकस्तु तदा विप्रो हरिध्यानपरायणः ॥ पादोदकस्य माहात्म्यं दृष्ट्वा तुष्टाव भक्तितः ॥ २ ॥
उत्तंक उवाच ॥ नतोऽस्मि नारायणमादिदेवं जगन्निवासं जगदेकबंधुम् ॥ चक्राब्जशार्ङ्गासिधरं महांतं स्मृतार्तिनिघ्नं शरणं प्रपद्ये॥३॥ यन्नाभिजाब्ज
प्रभवो विधाता सृजत्यमुं लोकसमुच्चयं च ॥ यत्क्रोधजो हंति जगच्च रुद्रस्तमादिदेवं प्रणतोऽस्मि विष्णुम् ॥ ४ ॥ पद्मापतिं पद्मदलायताक्षं विचि
त्रवीर्यं निखिलैकहेतुम् ॥ वेदांतवेद्यं पुरुषं पुराणं तेजोनिधिं विष्णुमहं प्रपन्नः॥ ५ ॥आत्माक्षरः सर्वगतोऽच्युताख्यो ज्ञानात्मको ज्ञानविदां शरण्यः ॥

ज्ञानैकवेद्यो भगवाननादिः प्रसीदतां व्यष्टिसमष्टिरूपः ॥ ६ ॥ अनंतवीर्यो गुणजातिहीनो गुणात्मको ज्ञानविदां वरिष्ठः ॥ नित्यः प्रपन्नार्ति
हरः परात्मा दयांबुधिर्मे वरदस्तु भूयात् ॥ ७ ॥ यः स्थूलसूक्ष्मादिविशेषभेदैर्जगद्यथावत्स्वकृतं प्रविष्टः ॥ त्वमेव तत्सर्वमनंतसारं त्वत्तः परं नास्ति
यतः परात्मन् ॥ ८ ॥ अगोचरं यत्तव शुद्धरूपं मायाविहीनं गुणजातिहीनम् ॥ निरञ्जनं निर्मलमप्रमेयं पश्यंति सन्तः परमार्थसंज्ञम् ॥ ९ ॥
एकेन हेम्नैव विभूषणानि यातानि भेदत्वमुपाधिभेदात् ॥ तथैव सर्वेश्वर एक एव प्रदृश्यते भिन्न इवाखिलात्मा ॥ १० ॥ यन्मायया मोहितचेतसस्तं
पश्यंति नात्मानमपि प्रसिद्धम् ॥ त एव मायारहितास्तदेव पश्यन्ति सर्वात्मकमात्मरूपम् ॥ ११ ॥ विभुं ज्योतिरनौपम्यं विष्णुसंज्ञं
नमाम्यहम् ॥ समस्तमेतदुद्भूतं यतो यत्र प्रतिष्ठितम् ॥ १२ ॥ यतश्चैतन्यमायातं यद्रूपं तस्य वै नमः ॥ अप्रमेयमनाधारमाधाराधेयरूप
कम् ॥ १३ ॥ परमानन्दचिन्मात्रं वासुदेवं नतोऽस्म्यहम् ॥ हृद्गुहानिलयं देवं योगिभिः परिसेवितम् ॥ १४ ॥ योगानामादिभूतं तं नमामि प्रणव
स्थितम् ॥ नादात्मकं नादबीजं प्रणवात्मकमव्ययम् ॥ १५ ॥ सद्भावं सच्चिदानन्दं तं वन्दे तिग्मचक्रिणम् ॥ अजरं साक्षिणं त्वस्य ह्यवाङ्मन
सगोचरम् ॥ १६ ॥ निरञ्जनमनंताख्यं विष्णुरूपं नतोऽस्म्यहम् ॥ इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ॥ १७ ॥ वासुदेवात्मकान्याहुः क्षेत्रं क्षे
ज्ञमेव च ॥ विद्याविद्यात्मकं प्राहुः परात्परतरं तथा ॥ १८ ॥ अनादिनिधनं शांतं सर्वधातारमच्युतम् ॥ ये प्रपन्ना महात्मानस्तेषां मुक्तिर्हि शाश्वती
॥ १९ ॥ वरं वरेण्यं वरदं पुराणं सनातनं सर्वगतं समस्तम् ॥ नतोऽस्मि भूयोऽपि नतोऽस्मि भूयो नतोऽस्मि भूयोऽपि नतोऽस्मि भूयः ॥ २० ॥ यत्पाद
तोयं भवरोगवैद्यो यत्पादपांशुर्विमलत्वसिद्ध्यै ॥ यन्नाम दुष्कर्मनिवारणाय तमप्रमेयं पुरुषं भजामि ॥ २१ ॥ सद्रूपं तमसद्रूपं सदसद्रूपमव्ययम् ॥ तत्तद्विल
क्षणं श्रेष्ठं श्रेष्ठाच्छ्रेष्ठतरं भजे ॥ २२ ॥ निरञ्जनं निराकारं पूर्णमाकाशमध्यगम् परं च विद्याविद्याभ्यां हृदंबुजनिवासिनम् ॥ २३ ॥ स्वप्रका
शमनिर्देश्यं महतां च महत्तरम् ॥ अणोरणीयांसमजं सर्वोपाधिविवर्जितम् ॥ २४ ॥ यन्नित्यं परमानन्दं परं ब्रह्म सनातनम् ॥ विष्णुसंज्ञं जगद्धाम
तमस्मि शरणं गतः ॥ २५ ॥ यं भजन्ति क्रियानिष्ठा यं पश्यन्ति च योगिनः ॥ पूज्यात्पूज्यतरं शांतं गतोऽस्मि शरणं प्रभुम् ॥ २६ ॥ यं न
पश्यन्ति विद्वांसो य एतद्व्याव्य तिष्ठति ॥ सर्वस्मादधिकं नित्यं नतोऽस्मि विभुमव्ययम् ॥ २७ ॥ अन्तःकरणसंयोगाज्जीव इत्युच्यते च यः ॥ अविद्याकाय
रहितः परमात्मेति गीयते ॥ २८ ॥ सर्वात्मकं सर्वहेतुं सर्वकर्मफलप्रदम् ॥ वरं वरेण्यमजनं प्रणतोऽस्मि परात्परम् ॥ २९ ॥ सर्वज्ञं सर्वगं शांतं सर्वांतया
मिणं हरिम् ॥ ज्ञानात्मकं ज्ञाननिधिं ज्ञानसंस्थं विभुं भजे ॥ ३० ॥ नमाम्यहं वेदनिधिं मुरारिं वेदांतविज्ञानसुनिश्चितार्थम् ॥ सूर्येंदुवत्प्रोज्ज्वलने

त्रमिंद्रं खगस्वरूपं वपतिस्वरूपम्॥३१॥सर्वेश्वरं सर्वगतं महांतं वेदात्मकं वेदविदांवरिष्ठम्॥तंवाङ्मनोऽचिंत्यमनंतशक्तिं ज्ञानैकवेद्यं:पुरुषं भजामि॥३२॥
इन्द्राग्निकालासुरपाशिवायुसोमेशमार्त्तण्डपुरंदराद्यैः॥यःपाति लोकान्परिपूर्णभावस्तमप्रमेयं शरणं प्रपद्ये॥३३॥ सहस्रशीर्षं च सहस्रपादं सहस्रबाहुं च सह
स्रनेत्रम्॥ समस्तयज्ञैः परिजुष्टमाद्यं नतोऽस्मि तुष्टिप्रदमुग्रवीर्यम्॥३४॥कालात्मकं कालविभागहेतुं गुणत्रयातीतमहं गुणज्ञम्॥ गुणप्रियं कामदमस्तसंग
मतींद्रियं विश्वभुजं वितृष्णम् ॥ ३५ ॥ निरीहमग्र्यं मनसाप्यगम्यं मनोमयं चान्नमयं निरूढम् ॥ विज्ञानभेदं प्रतिपन्नकल्पं न वाङ्मयं प्राणम
यं भजामि ॥ ३६ ॥ न यस्य रूपं न बलप्रभावो न यस्य कर्माणि न यत्प्रमाणम् ॥ जानंति देवा कमलोद्भवाद्यस्तोष्याम्यहं तं कथमात्मरूपम् ॥
॥ ३७ ॥ संसारसिंधौ पतितं कदर्यं मोहाकुलं कामशतेन बद्धम् ॥ अकीर्तिभाजं पिशुनं कृतघ्नं सदाशुचिं पापरतं प्रमन्युम् ॥ दयांबुधे पाहि भयाकुलं
मां पुनः पुनस्त्वां शरणं प्रपद्ये ॥ ३८॥ इति प्रसादितस्तेन दयालुः कमलापतिः॥ प्रत्यक्षतामगात्तस्य भगवांस्तेजसां निधिः ॥ ३९ ॥ अतसी
पुष्पसंकाशं फुल्लपङ्कजलोचनम् ॥ किरीटिनं कुण्डलिनं हारकेयूरभूषितम् ॥ ४० ॥ श्रीवत्सकौस्तुभधरं हेमयज्ञोपवीतिनम् ॥ नासाग्रन्यस्तमुक्ता
भवर्धमानतनुच्छविम् ॥ ४१ ॥ पीतांबरधरं देवं वनमालाविभूषितम् ॥ तुलसीकोमलदलैरर्चितांघ्रिं महाद्युतिम् ॥ ४२ ॥ किंकिणीनूपुरा
द्यैश्च शोभितं गरुडध्वजम् ॥ दृष्ट्वा ननाम विप्रेन्द्रो दण्डवत्क्षितिमण्डले ॥ ४३ ॥ अभ्यषिंचद्धरेः पादावुत्तंको हर्षवारिभिः ॥ मुरारे रक्ष रक्षेति
व्याहरन्नान्यधीस्तदा॥४४॥तमुत्थाप्य महाविष्णुरालिलिंग दयापरः॥वरं वृणुष्व वत्सेति प्रोवाच मुनिपुङ्गवम् ॥४५॥असाध्यं नास्ति किंचित्ते प्रसन्ने
मयि सत्तम ॥ इतीरितं समाकर्ण्य ह्युत्तंकश्चक्रपाणिना ॥ पुनः प्रणम्य तं प्राह देवदेवं जनार्दनम् ॥ ४६ ॥ किं मां मोहयसीश त्वं किमन्यैर्देव
मे वरैः त्वयि भक्तिर्दृढा मेऽस्तु जन्मजन्मांतरेष्वपि ॥ ४७ ॥ कीटेषु पक्षिषु मृगेषु सरीसृपेषु रक्षःपिशाचमनुजेष्वपि यत्र तत्रजातस्य मे भवतु केशव
ते प्रसादात्त्वय्येव भक्तिरचलाव्यभिचारणी च ॥ ४८ ॥एवमस्त्विति लोकेशः शङ्खप्रांतेन संस्पृशन् दिव्यज्ञानं ददौ तस्मै योगिनामपिदुर्लभम् ॥
पुनः स्तुवन्तं विप्रेंद्रं देवदेवो जनार्दनःइदमाह स्मितमुखो हस्तं तच्छिरसि न्यसन् ॥ ५० ॥ श्रीभगवानुवाच आराधय क्रियायोगैर्मां सदा
द्विजसत्तम ॥ नरनारायणस्थानं व्रज मोक्षं गमिष्यसि ॥ ५१ ॥ त्वया कृतमिदं स्तोत्रं यः पठेत्सततं नरः ॥ सर्वान्कामानवाप्यांते मोक्षभागी
भवेत्ततः ॥ ५२ ॥ इत्युक्त्वा माधवो विप्र तत्रैवांतर्दधे मुने ॥ नरनरायणस्थानमुत्तंकोऽपि ततो ययौ ॥ ५३ ॥ तस्माद्भक्तिः सदा कार्या देवदेवस्य
चक्रिणः ॥ हरिभक्तिः परा प्रोक्ता सर्वकामफलप्रदा ॥ ५४ ॥ उत्तंको भक्तिभावेन क्रियायोगपरो मुने॥ पूजयन्माधवं नित्यं नरनारायणाश्रमे ॥५५॥

ज्ञानविज्ञानसंपन्नः संच्छिन्नद्वैतसंशयः॥ आवाप दुरवापं वै तद्विष्णोः परमं पदम् ॥ ९६ ॥ पूजितो नमितो वापि संस्मृतो वापि मोक्षदः ॥ नारा
यणो जगन्नाथो भक्तानां मानवर्द्धनः॥ ९७॥तस्मान्नारायणं देवमनंतमपराजितम् ॥ इहामुत्र सुखप्रेप्सुः पूजयेद्भक्तिसंयुतः॥ ९८ ॥यः पठेदिदमाख्यानं
शृणुयाद्वा समाहितः॥सोऽपि सर्वाघनिर्मुक्तः प्रयाति भवनं हरेः॥९९॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे विष्णुमाहात्म्यं नामाष्टत्रिंशोऽध्यायः
॥ ३८ ॥ सनक उवाच ॥ भूयः शृणुष्व विप्रेंद्र माहात्म्यं परमेष्ठिनः ॥ सर्वपापहरं पुण्यं भुक्तिमुक्तिप्रदं नृणाम् ॥ १ ॥ अहो हरिकथा लोके पापघ्नी
पुण्यदायिनी ॥ शृण्वतां वदतां चैव तद्भक्तानां विशेषतः ॥ २ ॥ हरिभक्तिरसास्वादमुदिता ये नरोत्तमाः ॥ नमस्करोम्यहं तेभ्यो यत्संगान्मुक्ति
भाग्नरः ॥ ३ ॥ हरिभक्तिपरा ये तु हरिनामपरायणाः ॥ दुर्वृत्ता वा सुवृत्ता वा तेभ्यो नित्यं नमोनमः ॥ ४ ॥ संसारसागरं तर्तुं य इच्छेन्मु
निपुङ्गव ॥ स भजेद्धरिभक्तानां भक्तान्वै पापहारिणः ॥ ५ ॥ दृष्टः स्मृतः पूजितो वा ध्यातः प्रणमितोऽपि वा ॥ समुद्धरति गोविंदो दुस्तराद्भव
सागरात् ॥ ६ ॥ स्वपन्भुंजन् व्रजंस्तिष्ठन्नतिष्ठंश्च वदंस्तथा ॥ चिंतयेद्यो हरेर्नाम तस्मै नित्यं नमो नमः ॥ ७ ॥ अहो भाग्यमहो भाग्यं विष्णु
भक्तिरतात्मनाम् ॥ येषां मुक्तिः करस्थैव योगिनामपि दुर्लभा ॥ ८ ॥ अत्राप्युदाहरंतीममितिहासं पुरातनम् ॥ वदतां शृण्वतां चैव सर्वपाप
प्रणाशनम्॥ ९ ॥ आसीत्पुरा महीपालः सोमवंशसमुद्भवः ॥ जयध्वज इति ख्यातो नारायणपरायणः ॥ १० ॥ विष्णोर्देवालये नित्यं संमा
र्जनपरायणः ॥ दीपदानरतश्चैव सर्वभूतदयापरः॥ ११ ॥ स कदाचिन्महीपालो रेवातीरे मनोरमे ॥ विचित्रकुसुमोपेतं कृतवान्विष्णुमंदिरम् ॥
॥ १२ ॥ स तत्र नृपशार्दूलः सदा संमार्जने रतः ॥ दीपदानपरश्चैव विशेषेण हरिप्रियः॥ १३ ॥ हरिनामपरो नित्यं हरिसंसक्तमानसः॥
हरिप्रणामनिरतो हरिभक्तजनप्रियः ॥ १४ ॥ वीतिहोत्र इति ख्यातो ह्यासीत्तस्य पुरोहितः॥ जयध्वजस्य चरितं दृष्ट्वा विस्मयमागतः ॥
॥ १५ ॥ कदाचिदुपविष्टं तं राजानं विष्णुतत्परम् ॥ अपृच्छद्वीतिहोत्रस्तु वेदवेदांगपारगः ॥ १६ ॥ वीतिहोत्र उवाच ॥ राजन्परमधर्मज्ञ
हरिभक्तिपरायण ॥ विष्णुभक्तिमतां पुंसां श्रेष्ठोऽसि भरतर्षभ ॥१७॥ संमार्जनपरो नित्यं दीपदानरतस्तथा ॥ तन्मे वद महाभाग किं त्वया विदितं
फलम् ॥ १८ ॥ संपादनेन वर्त्तीनां तैलसंपादनेन च ॥ संयुक्तोऽसि सदा भद्र यद्विष्णोर्गृहमार्जने ॥ १९ ॥ कर्माण्यन्यानि संत्येव विष्णोः
प्रीतिकराणि च ॥ तथापि किं महाभाग एतयोः सततोद्यतः ॥ २० ॥ सर्वात्मना महापुण्य नरेश विदित च यत् ॥ तद् ब्रूहि मे गुह्यतमं प्रीतिर्मयि
तवास्ति चेत् ॥ २१ ॥ पुरोधसैवमुक्तस्तु प्रहसन्स जयध्वजः ॥ विनयावनतो भूत्वा प्रोवाचेदं कृतांजलिः ॥ २२ ॥ जयध्वज उवाच ॥ शृणुष्व

विप्रशार्दूल मयैवाचरितं पुरा ॥ जातिस्मरत्वाज्जानामि श्रोतॄणां विस्मयप्रदम् ॥२३॥ आसीत्पुरा कृतयुगे ब्रह्मन्स्वारोचिषेंऽतरे ॥रैवतो नाम विप्रेंद्रो
वेदवेदांगपारगः ॥ २४ ॥ अयाज्ययाजकश्चैव सदैव ग्रामयाजकः ॥ पिशुनो निष्ठुरश्चैव ह्यपण्यानां च विक्रयी ॥ २५ ॥ निषिद्धकर्माचरणात्परि
त्यक्तः स बन्धुभिः॥दरिद्रो दुःखितश्चैव शीर्णांगो व्याधितोऽभवत्॥२६॥स कदाचिद्धनार्थं तु पृथिव्यां पर्यटन् द्विजः॥ममार नर्मदातीरे श्वासकासप्र
पीडितः॥२७॥तस्मिन्मृते तस्य भार्या नाम्ना बन्धुमती मुने॥कामचारपरा सा तु परित्यक्ता च बन्धुभिः॥२८॥तस्यां जातोऽस्मि चण्डालो दण्डकेतुरिति
श्रुतः॥महापापरतो नित्यं ब्रह्मद्वेषपरायणः ॥ २९॥ परदारपरद्रव्यलोलुपो जन्तुहिंसकः॥ गावश्च विप्रा बहवो निहता मृगपक्षिणः॥ ३० ॥ मेरुतुल्यसु
वर्णानि बहून्यपहृतानि च ॥ मद्यपानरतो नित्यं बहुशो मार्गरोधकृत् ॥ ३१॥ पशुपक्षिमृगादीनां जन्तूनामन्तकोपमः ॥ कदाचित्कामसंतप्तो गंतु
कामो रतिं स्त्रियः ॥ ३२ ॥ शून्यं विष्णुगृहं दृष्ट्वा प्रविष्टश्च स्त्रिया सह ॥ निशि रामोपभोगार्थं शयितं तत्र कामिना ॥ ३३ ॥ ब्रह्मन्स्ववस्त्रप्रांतेन
कियद्देशः प्रमार्जितः ॥ यावंत्यः पांशुकणिकास्तत्र संमार्जिता द्विज ॥ ३४ ॥ तावज्जन्मकृतं पापं तदैव क्षयमागतम् ॥ प्रदीपः स्थापितस्तत्र सुर
तार्थं द्विजोत्तम ॥३५॥ तेनापि मम दुष्कर्म निःशेषं क्षयमागतम् ॥ एवं स्थिते विष्णुगृहे ह्यागताः पुरपालकाः ॥ ३६ ॥ जारोऽयमिति मां तां च
हतवंतः प्रसह्य वै ॥ आवां निहत्य ते सर्वे निवृत्ताः पुररक्षकाः ॥ ३७ ॥ यदा तदैव संप्राप्ता विष्णुदूताश्चतुर्भुजाः ॥ किरीटकुंडलधरा वनमालाविभू
षिताः ॥३८ ॥ तैस्तु संप्रेरितावावां विष्णुदूतैरकल्मषैः ॥ दिव्यं विमानमारुह्य सर्वभोगसमन्वितम् ॥ ३९ ॥ दिव्यदेहधरौ भूत्वा विष्णुलोकमुपाग
तौ ॥ तत्र स्थित्वा ब्रह्मकल्पशतं साग्रं द्विजोत्तम ॥ ४० ॥ दिव्यभोगसमायुक्तौ तावत्कालं दिवि स्थितौ ॥ततश्च भूमिभागेषु देवयोगेषु वै क्रमात्
॥ ४१ ॥ तेन पुण्यप्रभावेण यदूनां वंशसंभवः ॥ तेनैव मेऽच्युता संपत्तथा राज्यमकंटकम् ॥ ४२ ॥ ब्रह्मन्कृत्वोपभोगार्थमेवं श्रेयो ह्यवाप्तवान् ॥
भक्त्या कुर्वंति ये संतस्तेषां पुण्यं न वेद्म्यहम् ॥ ४३ ॥तस्मात्संमार्जने नित्यं दीपदाने च सत्तम ॥ यतिष्ये परया भक्त्या ह्यहं जातिस्मरो यतः
॥ ४४ ॥ यः पूजयेज्जगन्नाथमेकाकी विगतस्पृहः ॥ सर्वपापविनिर्मुक्तः प्रयाति परमं पदम् ॥ ४५ ॥ अवशेनापि यत्कर्म कृत्वेमां श्रियमागतः ॥
भक्तिमद्भिः प्रशांतैश्च किं पुनः सम्यगर्चनात् ॥ ४६ ॥इति भूपवचः श्रुत्वा वीतिहोत्रो द्विजोत्तमः ॥ अनंततुष्टिमापन्नो हरिपूजापरोऽभवत् ॥४७॥
तस्माच्छृणुष्व विप्रेंद्र देवो नारायणोऽव्ययः ॥ ज्ञानतोऽज्ञानतो वापि पूजकानां विमुक्तिदः ॥ ४८ ॥ अनित्या बांधवाः सर्वे विभवो
नैव शाश्वतः ॥ नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसंग्रहः ॥ ४९ ॥ अज्ञो लोको वृथा गर्वं करिष्यति महोद्धतः ॥ कायः संनिहितापायो
धनादीनां किमुच्यते ॥ ५० ॥ जन्मकोटिसहस्रेषु पुण्यं यैः समुपार्जितम् ॥ तेषां भक्तिर्भवेच्छुद्धा देवदेवे जनार्दने ॥ ५१ ॥ सुलभं जाह्नवी

स्नानं तथैवातिथिपूजनम् ॥ सुलभाः सर्वयज्ञाश्च विष्णुभक्तिः सुदुर्लभा ॥ ९२ ॥ दुर्लभा तुलसीसेवा दुर्लभः संगमः सताम् ॥ सर्वभूतदया चापि सुलभा यस्य कस्य चित् ॥ ९३ ॥ सत्संगस्तुलसीसेवा हरिभक्तिश्च दुर्लभा ॥ ९४ ॥ दुर्लभं प्राप्य मानुष्यं न तथा गमयेद्द्रुं बुधः॥ अर्चयेद्धि जगन्नाथं सारमेतद्द्विजोत्तम॥९५॥ तर्त्तुं यदीच्छति जनो दुस्तरं भवसागरम् ॥ हरिभक्तिपरो भूयादेतदेव रसायनम् ॥ ९६ ॥ भ्रातराश्रय गोविंदं मा विलंबं कुरु प्रिय ॥ आसन्नमेव नगरं कृतांतस्य हि दृश्यते ॥ ९७ ॥ नारायणं जगद्योनिं सर्वकारणकारणम् ॥ समर्चयस्व विप्रेंद्र यदि मुक्तिमभीप्ससि ॥ ९८॥ सर्वाधारं सर्वयोनिं सर्वांतयामिणं विभुम् ॥ ये प्रपन्ना महात्मानस्ते कृतार्था न संशयः ॥९९॥ ते वंद्यास्ते प्रपूज्याश्च नमस्कार्या विशेषतः ॥ येऽर्चयंति महाविष्णुं प्रणतार्तिप्रणाशनम् ॥ ६० ॥ ये विष्णुभक्ता निष्कामा यजंति परमेश्वरम् ॥ त्रिःसप्तकुलसंयुक्तास्ते यांति हरिमंदिरम् ॥६१॥ विष्णुभक्ताय यो दद्यान्निष्कामाय महात्मने ॥ पानीयं वा फलं वापि स एव भगवत्प्रियः ॥६२॥ विष्णुभक्तिपराणां तु शुश्रूषां कुर्वते तु ये ॥ ते यान्ति विष्णुभुवनं यावदाभूतसंप्लवम् ॥ ६३ ॥ ये यजंति स्पृहाशून्या हरिभक्तान् हरिं तथा ॥ त एव भुवनं सर्वं पुनंति स्वांघ्रिपांशुना ॥६४॥ देवपूजापरो यस्य गृहे वसति सर्वदा ॥ तत्रैव सर्वदेवाश्च तिष्ठन्ति श्रीहरिस्तथा॥६५॥पूज्यमाना च तुलसी यस्य तिष्ठति वेश्मनि ॥ तत्र सर्वाणि श्रेयांसि वर्द्धंत्यहरहर्द्विज ॥ ६६ ॥ शालग्रामशिलारूपी यत्र तिष्ठति केशवः ॥ न बाधंते ग्रहास्तत्र भूतवेतालकादयः ॥६७॥ शालग्रामशिला यत्र तत्तीर्थं तत्तपोवनम् ॥ यतः संनिहितस्तत्र भगवान्मधुसूदनः ॥६८॥ यद्गृहे नास्ति देवर्षे शालग्रामशिलार्चनम्॥ श्मशानसदृशं विद्यात्तद् गृहं शुभवार्जितम् ॥ ६९ ॥ पुराणन्यायमीमांसा धर्मशास्त्राणि च द्विज ॥ ६९ ॥ सांगा वेदास्तथा सर्वे विष्णोरूपं प्रकीर्तितम् ॥७०॥ भक्त्या कुर्वंति ये विष्णोः प्रदक्षिणचतुष्टयम् ॥ तेऽपि यांति परं स्थानं सर्वकर्मनिबर्हणम् ॥७१॥इति बृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे विष्णुमाहात्म्यं नाम एकोनचत्वारिंशोऽध्यायः ॥ ३९॥सनक उवाच ॥ अतः परं प्रवक्ष्यामि विभूतिं वैष्णवीं मुने॥ यां शृण्वतां कीर्तयतां सद्यः पापक्षयो भवेत् ॥ १ ॥ वैवस्वतेंऽतरे पूर्वं शक्रस्य च बृहस्पतेः ॥ संवादः सुमहानासीत्तं वक्ष्यामि निशामय ॥ २ ॥ एकदा सर्वभोगाढ्यो विबुधैः परिवारितः ॥ अप्सरोगणसंकीर्णो बृहस्पतिमभाषत ॥ ३ ॥ इन्द्र उवाच ॥ बृहस्पते महाभाग सर्वतत्त्वार्थकोविद ॥ अतीतब्रह्मणः कल्पे सृष्टिः कीदृग्विधा प्रभो ॥ ४ ॥ इन्द्रस्तु कीदृशः प्रोक्तो विबुधाः कीदृशाः स्मृताः ॥ तेषां च कीदृशं कर्म यथावद्वक्तुमर्हसि ॥५॥ बृहस्पतिरुवाच ॥ न ज्ञायते मया शक्र पूर्वेद्युश्चरितं विधेः ॥ वर्तमानदिनस्यापि दुर्ज्ञेयं प्रतिभाति मे ॥ ६ ॥ मनवः समतीताश्च तान्वक्तुमपि न क्षमः ॥ यो विजानाति तं तेऽद्य

Nepal Sanskrit University, Balmaki Campus, Kathmandu

कथयामि निशामय ॥ ७ ॥ सुधर्म इति विख्यातः कश्चिदास्ते पुरे तव ॥ भुञ्जानो दिव्यभोगांश्च ब्रह्मलोकादिहागतः ॥ ८ ॥ स वा एत
द्विजानाति कथयामि निशामय ॥ एवमुक्तस्तु गुरुणा शक्रस्तेन समन्वितः ॥९॥ देवतागणसंकीर्णः सुधर्मनिलयं ययौ ॥१०॥ समागतं देवपतिं
बृहस्पतिसमन्वितम् ॥ दृष्ट्वा यथार्हं देवर्षे पूजयामास सादरम् ॥ ११ ॥ सुधर्मेणार्चितः शक्रो दृष्ट्वा तच्छ्रियमुत्तमाम् ॥ मनसा विस्मयाविष्टः
प्रोवाच विनयान्वितः ॥ १२ ॥ इंद्र उवाच ॥ अतीतब्रह्मकल्पस्य वृत्तांतं वेत्सि चद्बुध ॥ तदाख्याहि समायात एतत्प्रष्टुं सयाजकः ॥ १३ ॥
गतनिद्रांश्च देवांश्च येन जानासि सुव्रत ॥ तद्वदस्वाधिकः कस्मादस्मद्भ्योऽपि दिवि स्थितः ॥ १४ ॥ तेजसा यशसा कीर्त्या ज्ञानेन च परंतप ॥
दानेन वा तपोभिर्वा कथमेतादृशः प्रभो॥१५॥इत्युक्तो देवराजेन सुधर्मा प्रहसंस्तदा॥प्रोवाच विनयाविष्टः पूर्ववृत्तं यथाविधि॥१६॥सुधर्म उवाच॥
चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते ॥ एकस्मिन् दिवसे शक्र मनवश्च चतुर्दश ॥ १७ ॥ इंद्राश्चतुर्दश प्रोक्ता देवाश्च विविधाः पृथक् ॥ इंद्राणां
चैव सर्वेषां मन्वादीनां च वासव ॥ १८ ॥ तुल्यता तेजसा लक्ष्म्या प्रभावेण बलेन च ॥ तेषां नामानि वक्ष्यामि शृणुष्व सुसमाहितः ॥ १९ ॥
स्वायंभुवो मनुः पूर्वं ततः स्वारोचिषस्तथा ॥ उत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा ॥ २० ॥ वैवस्वतो मनुश्चैव सूर्यसावर्णिरष्टमः ॥ नवमो दक्ष
सावर्णिः सर्वदेवहिते रतः॥ २१॥ दशमो ब्रह्मसावर्णिर्द्धर्मसावर्णिकस्ततः ॥ ततस्तु रुद्रसावर्णी रोचमानस्ततः स्मृतः॥ २२ ॥ भौत्यश्चतुर्दशः प्रोक्त
एते हि मनवः स्मृताः॥देवानिंद्रांश्च वक्ष्यामि शृणुष्व विबुधर्षभ ॥ २३ ॥ यामा इति समाख्याता देवाः स्वायंभुवेंऽतरे ॥ शचीपतिः समाख्या
तस्तेषामिंद्रो महामतिः ॥२४॥ पारावताश्च तुषिता देवाः स्वारोचिषेंऽतरे ॥विपश्चिन्नाम देवेन्द्रः सर्वसंपत्समन्वितः ॥२५ ॥ सुधामानस्तथा सत्याः
शिवाश्चाथ प्रतर्दनाः ॥ तेषामिंद्रः सुशांतिश्च तृतीये परिकीर्तितः ॥ २६ ॥ सुताः पाराहराश्चैव सुत्याश्चासुधियस्तथा ॥ तेषामिंद्रः शिवः प्रोक्तः शक्र
स्तामसकेंऽतरे ॥ विभुनामा देवपतिः पञ्चमः परिकीर्तितः ॥ २७ ॥ अमिताभादयो देवाः षष्ठेऽपि च तथा शृणु ॥ आर्याद्या विबुधाः प्रोक्तास्तेषा
मिंद्रो मनोजवः ॥२८॥ आदित्यवसुरुद्राद्या देवा वैवस्वतेंऽतरे ॥ इन्द्रः पुरंदरः प्रोक्तः सर्वकामसमन्वितः ॥ २९ ॥ अप्रमेयाश्च विबुधाः सुतपाद्याः
प्रकीर्तिताः ॥विष्णुपूजाप्रभावेण तेषामिंद्रो बलिः स्मृतः ॥ ३० ॥ पाराद्या नवमे देवा इन्द्रश्चाद्भुत उच्यते ॥ सुवासनाद्या विबुधा दशमे परिकी
र्तिताः ॥ ३१ ॥ शांतिर्नाम च तत्रेंद्रः सर्वभोगसमन्वितः ॥ विहंगमाद्या देवाश्च तेषामिंद्रो वृषः स्मृतः ॥ ३२ ॥ एकादशे द्वादशे तु निबोध
कथयामि ते ॥ऋभुनामा च देवेंद्रो हरिनाभास्तथा सुराः ॥ ३३ ॥ सुत्रामाद्यास्तथा देवास्त्रयोदशतमेऽन्तरे ॥ दिवस्पतिर्महावीर्यस्तेषामिंद्रः प्रकी

र्तितः ॥ ३४ ॥ चतुर्दशे चाक्षुषाद्या देवा इन्द्रः शुचिः स्मृतः ॥ एवं ते मनवः प्रोक्ता इंद्रा देवाश्च तत्त्वतः ॥ ३५ ॥ एकस्मिन्ब्रह्मदिवसे स्वाधिकारं प्रभुंजते ॥ ३६ ॥ लोकेषु सर्वसर्गेषु सृष्टिरेकविधा स्मृता ॥ कर्त्तारो बहवः संति तत्संख्यां वेत्ति कोविदः ॥ ३७ ॥ मयि स्थिते ब्रह्मलोके ब्रह्माणो बहवो गताः ॥ तेषां संख्या न संख्यातुं शक्तोऽस्म्यद्य द्विजोत्तम ॥ ३८ ॥ स्वर्गलोकमपि प्राप्य यावत्कालं शृणुष्व मे ॥ चत्वारो मनवोऽतीता मम श्रीश्चातिविस्तरा ॥ ३९ ॥ स्थातव्यं च मयात्रैव युगकोटिशतं प्रभो ॥ ततः परं गमिष्यामि कर्मभूमिं शृणुष्व मे ॥ ॥ ४० ॥ मया कृतं पुरा कर्म वक्ष्यामि तव सुव्रत ॥ वदतां शृण्वतां चैव सर्वपापप्रणाशनम् ॥ ४१ ॥ अहमासं पुरा शक्र गृध्रः पापो विशेषतः ॥ स्थितश्च भूमिभागे वै अमेध्यामिषभोजनः ॥ ४२ ॥ एकदाहं विष्णुगृहे प्राकारे संस्थितः प्रभो ॥ पतितो व्याधशस्त्रेण सायं विष्णोर्गृहांगणे ॥ ४३ ॥ मयि कंठगतप्राणे भषणो मांसलोलुपः ॥ जग्राह मां स्ववक्त्रेण श्वभिरन्यैश्चरन्द्रुतः ॥ ४४ ॥ वहन्मां स्वमुखेनैव भीतोऽन्यैर्भषणैस्तथा ॥ गतः प्रदक्षिणाकारं विष्णोस्तन्मंदिरं प्रभो ॥ ४५ ॥ तेनैव तुष्टिमापन्नो ह्यतरात्मा जगन्मयः ॥ मम चापि शुनश्चापि दत्तावन्परमं पदम् ॥ ४६ ॥ प्रदक्षिणाकारतया गतस्यापीदृशं फलम् ॥ संप्राप्तं विबुधश्रेष्ठ किं पुनः सम्यगर्चनात्॥४७॥इत्युक्तो देवराजस्तु सुधर्मेण महात्मना॥मनसा प्रीतिमापन्नो हरिपूजारतोऽभवत् ॥ ४८ ॥ तथापि निर्जराः सर्वे भारते जन्मलिप्सवः ॥समर्चयंति देवेशं नारायणमनामयम् ॥ तानर्चयन्ति सततं ब्रह्माद्या देवतागणाः ॥ ॥४९॥नारायणानुस्मरणोद्यतानां महात्मनां त्यक्तपरिग्रहाणाम् ॥ कथं भवत्युग्रभवस्य बंधस्तत्सङ्गलुब्धा यदि मुक्तिभाजः ॥५०॥ये मानवाः प्रतिदिनं परिमुक्तसङ्गा नारायणं गरुडवाहनमर्चयंति ॥ ते सर्वपापनिकरैः परितो विमुक्ता विष्णोः .पदं शुभतरं प्रतियांति हृष्टाः ॥ ५१ ॥ ये मानवा विगतरागपरावरज्ञा नारायणं सुरगुरुं सततं स्मरंति ॥ ध्यानेन तेन हतकिल्बिषचेतनास्ते मातुः पयोधररसं न पुनः पिबंति ॥ ५२ ॥ ये मानवा हरिकथाश्रवणास्तदोषाः कृष्णांघ्रिपद्मभजने रतचेतनाश्च ॥ ते वै पुनंति च जगंति शरीरसंगात् संभाषणादपि ततो हरिरेव पूज्यः ॥ ५३ ॥ हरिपूजापरा यत्र महांतः शुद्धबुद्धयः ॥ तत्रैव सकलं भद्रं यथा निम्ने जलं द्विज ॥ ५४ ॥ हरिरेव परो बन्धुर्हरिरेव परा गतिः ॥ हरिरेव ततः पूज्यो यतश्चैतन्यकारणम् ॥ ५५ ॥ स्वर्गापवर्गफलदं सदांनदं निरामयम् ॥ पूज्यस्व मुनिश्रेष्ठ परं श्रेयो भविष्यति ॥ ५६ ॥ पूजयंति हरिं ये तु निष्कामाः शुद्धमानसाः ॥ तेषां विष्णुः प्रसन्नात्मा सर्वान्कामान् प्रयच्छति ॥ ५७ ॥ यस्त्वेतच्छृणुयाद्वापि पठेद्वा सुसमाहितः॥ स प्राप्नोत्यश्वमेधस्य फलं मुनिवरोत्तम ॥ ५८ ॥ इत्येतत्ते समाख्यातं हरिपूजाफलं द्विज ॥ संकोचविस्तराभ्यां तु किमन्यत्कथयामि ते ॥ ५९ ॥

इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे विष्णुमाहात्म्ये चत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ नारद उवाच ॥ आख्यातं भवता सर्वं मुने तत्त्वार्थ
कोविद ॥ इदानीं श्रोतुमिच्छामि युगानां स्थितिलक्षणम् ॥ १ ॥ सनक उवाच ॥ साधु साधु महाप्राज्ञ मुने लोकोपकारक ॥ युगधर्मान्प्रव
क्ष्यामि सर्वलोकोपकारकान् ॥२॥धर्मो विवृद्धिमायाति काले कस्मिंश्चिदुत्तम ॥ तथा विनाशमायाति धर्म्म एव महीतले ॥३ ॥ कृतं त्रेता द्वापरं च
कलिश्चेति चतुर्युगम्॥दिव्यैर्द्वादशभिज्ञय वत्सरैस्तत्र सत्तम ॥४॥ संध्यासन्ध्यांशयुक्तानि युगानि सदृशानि वै ॥ कालतो वेदितव्यानि इत्युक्तं तत्त्वा
दार्शिभिः॥५॥आद्यं कृतयुगं प्राहुस्ततस्त्रेताविधानकम् ॥ ततश्च द्वापरं प्राहुः कलिमंत्यं विदुः क्रमात् ॥६॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥ नास
न्कृतयुगे विप्र सर्वे देवसमाः स्मृताः ॥७॥सर्वे हृष्टाश्च धार्मिष्ठा न तत्र क्रयविक्रयौ ॥ वेदानां च विभागश्च न युगे कृतसंज्ञके॥८ ॥ब्राह्मणाः क्षत्रिया
वैश्याः शूद्राः स्वाचारतत्पराः ॥ सदा नारायणपरास्तपोध्यानपरायणाः॥९॥कामादिदोषनिर्मुक्ताः शमादिगुणतत्पराः॥ धर्मसाधनचित्ताश्च गतासूया
अदांभिकाः ॥ १० ॥ सत्यवाक्यरताः सव चतुराश्रमधार्मिणः ॥ वेदाध्ययनसंपन्नाः सर्वशास्त्रविचक्षणाः ॥ ११ ॥ चतुराश्रमयुक्तेन कर्मणा कालयो
निना ॥ अकामफलसंयोगाः प्रयांति परमां गतिम् ॥ १२ ॥ नारायणः कृतयुगे शुक्लवर्णः सुनिमलः ॥ त्रेताधर्मान्प्रवक्ष्यामि :शृणुष्व सुसमाहितः ॥
॥ १३ ॥ धर्मः पांडुरतां याति त्रेतायां मुनिसत्तम ॥ हरिस्तु रक्ततां याति किंचित्क्लेशान्विता जनाः ॥ १४ ॥ क्रियायोगरताः सर्वे यज्ञकर्मसु
निष्ठिताः ॥ सत्यव्रता ध्यानपराः सदाध्यानपरायणाः ॥ १५ ॥ द्विपादो वर्तते धर्मो द्वापरे च मुनीश्वर ॥ हरिः पीतत्वमायाति वेदश्चापि विभज्यते
॥ १६ ॥ असत्यनिरताश्चापि केचित्तत्र द्विजोत्तमाः ॥ ब्राह्मणाद्याश्च वर्णाः स्युः केचिद्रागादिदुर्गुणाः॥१७॥ केचित्स्वर्गापवर्गार्थं विप्रयज्ञान्प्रकुर्वते ॥
केचिद्धनादिकामाश्च केचित्कल्मषचेतसः ॥ १८ ॥ धर्माधर्मौ समौ स्यातां द्वापरे विप्रसत्तम ॥ अधर्मस्य प्रभावेण क्षीयंते च प्रजास्तथा ॥१९ ॥
अल्पायुषो भविष्यंति केचिच्चापि मुनीश्वर ॥ केचित्पुण्यरतान् दृष्ट्वा असूयां विप्र कुर्वते ॥२०॥ कलिस्थितिं प्रवक्ष्यामि तच्छृणुष्व समाहितः॥ धर्मः
कलियुगे प्राप्ते पादेनैकेन वर्तते ॥ २१॥ तामसं युगमासाद्य हरिः कृष्णत्वमेति च ॥ यः कश्चिदपि धर्मात्मा यज्ञाचारान्करोति च ॥ २२ ॥ यः
कश्चिदपि पुण्यात्मा क्रियायोगरतो भवेत् ॥ नरं धर्मरतं दृष्ट्वा सर्वेऽसूयां प्रकुर्वते ॥ २३ ॥ व्रताचाराः प्रणश्यंति ज्ञानयज्ञादयस्तथा ॥ उपद्रवा
भविष्यंति ह्यधर्मस्य प्रवतनात् ॥२४॥ असूयानिरताः सर्वे दंभाचारपरायणाः॥ प्रजाश्चाल्पायुषः सर्वा भविष्यंति कलौ युगे॥ २५ ॥ नारद उवाच ॥
युगधर्माः समाख्यातास्त्वया संक्षेपतो मुने॥कलिं विस्तरतो ब्रूहि त्वं हि धर्मविदां वरः ॥ २६ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च मुनिसत्तम॥ किमा

हाराः किमाचाराः भविष्यंति कलौ युगे ॥ २७ ॥ सनक उवाच ॥ शृणुष्व मुनिशार्दूल सर्वलोकोपकारक ॥ कलिधर्मान्प्रवक्ष्यामि विस्तरेण
यथातथम् ॥ २८ ॥ सर्वें धर्मा विनश्यंति कृष्णे कृष्णत्वमागते ॥ तस्मात्कलिर्महाघोरः सर्वपातकसंकरः ॥ २९ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा
धर्मपराङ्मुखाः ॥ घोरे कलियुगे प्राप्ते द्विजा वेदपराङ्मुखाः ॥ ३० ॥ व्याजधर्मरताः सर्वें असूयानिरतास्तथा ॥ वृथाहंकारदुष्टाश्च सत्यहीनाश्च
पंडिताः ॥ ३१ ॥ अहमेवाधिक इति सर्वेंऽपि विवदंति च ॥ अधर्मलोलुपाः सर्वें तथा वैतंडिका नराः ॥ ३२ ॥ अतः स्वल्पायुषः सर्वें भविष्यंति
कलौ युगे ॥ अल्पायुष्ट्वान्मनुष्याणां न विद्याग्रहणं द्विज ॥ ३३ ॥ विद्याग्रहणशून्यत्वादधर्मो वर्तते पुनः ॥ व्युत्क्रमेण प्रजाः सर्वा म्रियंते पापत
त्पराः ॥३४॥ ब्राह्मणाद्यास्तथा वर्णाः संकीर्यंते परस्परम् ॥कामक्रोधपरा मूढा वृथासंतापपीडिताः॥३५॥शूद्रतुल्या भविष्यंति सर्वें वर्णा कलौ युगे॥
उत्तमा नीचतां यांति नीचाश्चोत्तमतां तथा॥३६॥राजानो द्रव्यनिरतास्तथा ह्यन्यायवर्त्तिनः ॥ पीडयंति प्रजाश्चैव करैरत्यर्थयोजितैः॥३७॥ शववाहा
भविष्यंति शूद्राणां च द्विजातयः ॥ धर्मस्त्रीष्वपि गच्छंति पतयो जारधर्मिणः ॥३८॥ द्विषंति पितरं पुत्रा भर्तारं च स्त्रियोऽखिलाः ॥ परस्त्रीनिरताः
सर्वें परद्रव्यपरायणाः ॥ ३९ ॥ मत्स्यामिषेण जीवंति दुहंतश्चाप्यजीविकाम् ॥ घोरे कलियुगे विप्र सर्वें पापरता जनाः ॥ ४० ॥ सतामसूयानिरता
उपहासं प्रकुर्वते ॥ सारित्तीरेषु कुद्दालैर्वापयिष्यंति चौषधीः ॥ ४१ ॥ पृथ्वी निष्फलतां याति बीजं पुष्पं विनश्यति ॥ वेश्यालाण्यशीलेषु स्पृहां
कुर्वंति योषितः ॥४२॥ धमविक्रयिणो विप्राःस्त्रियश्च भगविक्रयाः॥ वेदविक्रयकाश्चान्ये शूद्राचाररता द्विजाः ॥४३॥साधूनां विधवानां च वित्तान्य
पहरंति च ॥ न व्रतानि चारिष्यन्ति ब्राह्मणा द्रव्यलोलुपाः॥४४॥धर्माचारं परित्यज्य वृथावादैर्विषज्जिताः ॥ द्विजाः कुर्वंति दंभार्थं पितृश्राद्धादिकाः
क्रियाः ॥४५॥अपात्रेष्वेव दानानि प्रयच्छंति नराधमाः॥ दुग्धलोभनिमित्तेन गोषु प्रीतिं च कुर्वते॥४६॥ न कुर्वंति तथा विप्राः स्नानशौचादिकाः
क्रियाः ॥ अकाले कर्मनिरता भविष्यंति द्विजाधमाः॥ साधुनिंदापराश्चैव विप्रनिंदापरास्तथा॥ न कस्यापि मनो विप्र विष्णुभक्तिपरं भवेत् ॥४८॥
यज्विनश्च द्विजानैव धनार्थं राजकिंकराः॥ताडयंति द्विजान्दुष्टाः कृष्णे कृष्णत्वमागते॥४९॥दानहीना नराः सर्वें घोरे कलियुगे मुने॥प्रातिग्रहं प्रकुर्वंति
पतितानामपि द्विजाः॥५०॥कलेः प्रथमपादेऽपि विनिंदंति हरिं नराः ॥युगान्ते च हरेर्नाम नैव कश्चिद्वदिष्यति॥५१॥शूद्रस्त्रीसंगनिरता विधवासंगलो
लुपाः॥शूद्रान्नभोगनिरता भविष्यंति कलौ द्विजाः॥५२॥विहाय वेदसन्मार्गं कुपथाचारसंगताः॥पाषंडाश्चभविष्यंतिचतुराश्रमनिंदकाः॥५३॥न चाद्विजा
तिशुश्रूषां कुर्वंति चरणोद्भवाः॥ द्विजातिधर्मान्गृह्णन्ति पाखण्डलिङ्गिनोऽधमाः॥५४॥काषायपरिवीताश्च जटिला भस्मधूलिताः॥शूद्राधर्मान्प्रवक्ष्यंती

कूटयुक्तिपरायणाः॥५५॥द्विजाःस्वाचारमुत्सृज्यपरपाकान्नभोजिनः॥भविष्यंतिदुरात्मानःशूद्राःप्रव्रजितास्तथा॥५६॥उत्कोचजीविनस्तत्र भविष्यंति
कलौ मुने॥धर्महीनास्तु पाषंडा कापाला भिक्षवोऽधमाः॥५७॥धर्मविध्वंसशीलानां द्विजानां द्विजसत्तम॥शूद्रा धर्मान्प्रवक्ष्यतिह्यधिरुह्योत्तमासनम्॥
एते चान्येच बहवो नग्नरक्तपटादिकाः॥पाषंडाः प्रचरिष्यंति प्रायो वेदविदूषकाः॥५९॥गीतवादित्रकुशलाःक्षुद्रधर्मसमाश्रयाः॥भविष्यंतिकलौ प्रायो
धर्मविध्वंसका नराः॥६०॥अल्पद्रव्या वृथालिंगा वृथाहंकारदूषिताः॥हर्तारः परवित्तानां भवितारो नराधमाः॥६१॥प्रतिग्रहपरा नित्यं जगदुन्मार्गशी
लिनः॥आत्मस्तुतिपराः सर्वे परनिंदापरास्तथा॥६०॥विश्वस्तघातिनः क्रूरा दयाधर्मविवर्जिताः॥भविष्यंति नरा विप्र कलौ चाधर्मबांधवाः॥६३॥पर
मायुश्च भविता तदा वर्षाणि षोडश॥घोरे कलियुगे विप्र पंचवर्षा प्रसूयते॥६४॥सप्तवर्षाष्टवर्षाश्च युवानोऽतः परे जरा॥स्वकर्मत्यागिनः सर्वे कृतघ्ना
भिन्नवृत्तयः॥६५॥याचकाश्च द्विजा नित्यं भविष्यंति कलौ युगे॥परावमाननिरताःप्रहृष्टाः परवेश्मनि॥६६॥तत्रैव निंदानिरता वृथाविश्रंभिणो जनाः॥
निंदां कुर्वंति सततं पितृमातृसुतेषु च॥६५॥वदंति वाचा धर्मांश्च चेतसा पापलोलुपाः॥ धनविद्यावयोमत्ताः सर्वदुःखपरायणाः॥६६॥व्याधितस्करदु
र्भिक्षैः पीडिता अतिमायिनः ॥ प्रपुष्यंति वृथैवामी न विचार्य च दुष्कृतम् ॥ ६९ ॥ धर्ममार्गप्रणेतारं तिरस्कुर्वंति पापिनः ॥ धर्मकार्ये
रतं चैव वृथाविश्रंभिणो जनाः ॥७०॥ भविष्यंति कलौ प्राप्ते राजानो म्लेच्छजातयः ॥ शूद्रा भैक्ष्यरताश्चैव तेषां शुश्रूषणे द्विजाः ॥७१॥न शिष्यो न
गुरुः कश्चिन्न पुत्रो न पिता तथा ॥ न भार्या न पतिश्चैव भवितारोऽत्र संकरे ॥ ७२ ॥ कलौ गते भविष्यंति धनाढ्या अपि याचकाः ॥ रस
विक्रयिणश्चापि भविष्यंति द्विजातयः॥७३॥धर्मकंचुकसंवीता मुनिवेषधरा द्विजाः॥ अपण्यविक्रयरता अगम्यागामिनस्तथा॥७४॥वेदनिंदापराश्चैव
धर्मशास्त्रविनिंदकाः ॥ शूद्रवृत्त्यैव जीवंति नरकार्हा द्विजा मुने ॥ ७५ ॥ अनावृष्टिभयं प्राप्ता गगनासक्तदृष्टयः ॥ भविष्यंति कलौ मर्त्याः
सर्वे क्षुद्भयकातराः ॥ ७६॥ कंदपर्णफलाहारास्तापसा इव मानवाः॥आत्मानं तारयिष्यंति अनावृष्ट्यातिदुखिताः ॥७७॥ कामार्ता ह्रस्वदेहाश्च लुब्धा
श्चाधर्मतत्पराः ॥ कलौ सर्वे भविष्यंति स्वल्पभाग्या बहुप्रजाः ॥ ७८ ॥ स्त्रियः स्वपोषणपरा वेश्या लावण्यशीलिकाः ॥ पतिवाक्यमनादृत्य
सदान्यगृहतत्पराः ॥ ७९ ॥ दुःशीला दुष्टशीलेषु करिष्यंति सदा स्पृहाम् ॥असद्वृत्ता भविष्यंति पुरुषेषु कुलांगनाः ॥ ८० ॥ चौरादिभयभीताश्च
काष्ठयंत्राणि कुर्वते ॥ दुर्भिक्षकरपीडाभिरतीवोपद्रुता जनाः ॥ ८१ ॥ गोधूमान्नयवान्नाढ्ये देशे यास्यंति दुःखिताः ॥ निधाय हृद्यकर्माणि प्रेर
यंति वचः शुभम् ॥ ८२ ॥ स्वकार्यसिद्धिपर्यंतं बंधुतां कुर्वते जनाः ॥ भिक्षवश्चापि मित्रादिस्नेहसंबंधयंत्रिताः॥ ८३ ॥ अन्नोपाधिनिमित्तेन शिष्या

न्गृह्णंति भिक्षवः ॥ ८४ ॥ उभाभ्यामथ पाणिभ्यां शिरःकंडूयनं स्त्रियः ॥ कुर्वंत्यो गुरुभर्तॄणामाज्ञामुल्लंघयंति च ॥ ८५ ॥ पाषंडालापनिरताः पाषंडजनसंगिनः ॥ यदा द्विजा भविष्यंति तदा वृद्धिं कलिर्व्रजेत् ॥ ८६ ॥ यदा प्रजा न यक्ष्यंति न होष्यंति द्विजातयः ॥ तदैव तु कलेर्वृद्धिरनुमेया विचक्षणैः ॥ ८७ ॥ अधर्मवृद्धिर्भविता बालमृत्युरपि द्विज॥सर्वधर्मेषु नष्टेषु याति निःश्रीकतां जगत् ॥ ८८ ॥ एवं कलेः स्वरूपं ते कथितं विप्र सत्तम ॥ हरिभक्तिपरानेष न कलिर्बाधते क्वचित् ॥ ८९ ॥ ततः परं कृतयुगे त्रेतायां ध्यानमेव च ॥ द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ॥ ९० ॥ यत्कृते दशभिर्वर्षैस्त्रेतायां शरदा च यत् ॥ द्वापरे यच्च मासेन ह्यहोरात्रेण तत्कलौ ॥९१॥ ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ॥ यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम्॥९२॥अहोरात्रं हरेर्नाम कीर्तयंति च ये नराः॥कुर्वंति हरिपूजां वा न कलिर्बाधते च तान्॥९३॥नमो नारायणायेति कीर्तयंति च ये नराः॥निष्कामा वा सकामा वा न कलिर्बाधते च तान्॥९४॥हरिनामपरा ये तु घोरे कलियुगे द्विज॥त एव कृतकृत्याश्च न कलिर्बाधते हि तान् ॥९५॥ हरिपूजापरा ये च हरिनामपरायणाः॥त एव शिवतुल्याश्च नात्र कार्या विचारणा ॥९६॥समस्तजगदाधारं परमार्थस्वरूपिणम्॥घोरे कलियुगे प्राप्ते विष्णुं ध्यायन्न सीदति ॥९७ ॥ अहो अति सुभाग्यास्ते सकृद्वै केशवार्चकाः ॥ घोरे कलियुगे प्राप्ते सर्वधर्मविवर्जिते ॥९८॥न्यूनातिरिक्तदोषाणां कलौ वेदोक्तकर्मणाम् ॥ हरिस्मरणमेवात्र संपूर्णत्वविधायकम् ॥९९॥ हरे केशव गोविंद वासुदेव जगन्मय ॥ इतीरयंति ये नित्यं नहि तान्बाधते कलिः ॥१०० ॥ शिव शंकर रुद्रेश नीलकंठ त्रिलोचन ॥ इति जल्पंति ये वापि कलिस्तान्नापि बाधते ॥ १ ॥ महादेव विरूपाक्ष गंगाधर मृडाव्यय ॥ इत्थं वदंति ये विप्र ते कृतार्था न संशयः ॥ २ ॥ जनार्दन जगन्नाथ पीतांबरधराच्युत ॥ इति वाप्युच्चरंतीह न च तेषां कलेर्भयम् ॥ ३ ॥ संसारे सुलभाः पुंसां पुत्रदारधनादयः ॥ घोरे कलियुगे विप्र हरिभक्तिस्तु दुर्लभा ॥ ४ ॥ कर्मश्रद्धाविहीना ये पाषंडा वेदनिंदकाः ॥ अधर्मनिरता नैव नरकार्हा हरिस्मृतेः ॥ ५ ॥ वेदमार्गबहिष्ठानां जनानां पापकर्मणाम् ॥ मनः शुद्धिविहीनानां हरिनाम्नैव निष्कृतिः ॥ ६ ॥ दैवाधीनं जगत्सर्वमिदं स्थावरजंगमम् ॥ यथाप्रेरितमेतेन तथैव कुरुते द्विज ॥ ७ ॥ शक्तितः सर्वकर्माणि वेदोक्तानि विधाय च ॥ समर्पयेन्महाविष्णौ नारायणपरायणः ॥ ८ ॥ समर्पितानि कर्माणि महविष्णौ परात्मनि ॥ संपूर्णतां प्रयांत्येव हरिस्मरणमात्रतः ॥ ९ ॥ हरिभक्तिरतानां च पापबंधो न जायते ॥ अतोऽतिदुर्लभा लोके हरिभक्तिर्दुरात्मनाम् ॥१०॥अहो हरिपरा ये तु कलौ घोरे भयंकरे ॥ ते सुभाग्या महात्मानः सत्संगरहिता अपि ॥ ११ ॥ हरिस्मरणनिष्ठानां शिवनामरतात्मनाम्॥सत्यं समस्तकर्माणि यांति संपूर्णतां द्विज ॥ १२ ॥ अहो भाग्यमहो भाग्यं हरिनाम

रतात्मनाम् ॥ त्रिदशैरपि ते पूज्याः किमन्यैर्बहुभाषितैः ॥ १३ ॥ तस्मात्समस्तलोकानां हितमेव मयोच्यते ॥ हरिनामपरान्मर्त्यान्न कलिर्बाधते
क्वचित् ॥ १४ ॥ हरेर्नामैव नामैव नामैव मम जीवनम् ॥ कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥ १५ ॥ सूत उवाच ॥ ॥
एवं स नारदो विप्राः सनकेन प्रबोधितः ॥ परां निर्वृत्तिमापन्नः पुनरेतदुवाच ह ॥ १६ ॥ नारद उवाच ॥भगवन्सर्वशास्त्रज्ञ त्वयातिकरुणात्मना ॥
प्रकाशितं जगज्ज्योतिः परं ब्रह्म सनातनम् ॥ १७ ॥ एतदेव परं पुण्यमेतदेव परं तपः॥ यः स्मरेत्पुंडरीकाक्षं सर्वपापविनाशनम् ॥ १८ ॥ ब्रह्मन्नाना
जगच्चैतदेकचित्संप्रकाशितम् ॥ त्वयोक्तं तत्प्रतीयेऽहं कथं दृष्टांतमंतरा ॥ १९ ॥ तस्माद्येन यथा ब्रह्म प्रतीतं बोधितेन तु ॥ तदाख्याहि यथा
चित्तं सीदत्स्थितिमवाप्नुयात् ॥ २० ॥ एतच्छ्रुत्वा वचो विप्रा नारदस्य महात्मनः ॥ सनकः प्रत्युवाचेदं स्मरन्नारायणं परम् ॥ २१ ॥ सनक
उवाच॥ब्रह्मन्नहं ध्यानपरो भवेयं सनंदनं पृच्छ यथाभिलाषम् ॥ वेदांतशास्त्रे कुशलस्तवायं निवर्तयेद्वा परमार्यवंद्यः ॥२२॥ इतीरितं समाकर्ण्य सन
कस्य स नारदः॥सनंदनं मोक्षधर्मान्प्रष्टुं समुपचक्रमे॥२३॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे प्रथमपादे नाममहात्म्यन्नामैकचत्वारिंशोऽध्यायः॥४१॥
श्रीनारद उवाच ॥ कुतः सृष्टमिदं ब्रह्मञ्जगत्स्थावरजंगमम् ॥ प्रलये च कमभ्येति तन्मे ब्रूहि सनन्दन ॥ १ ॥ ससागरः संगगनः सशैलः
सबलाहकः ॥ सभूमिः साग्निपवनो लोकोऽयं केन निर्मितः ॥ २ ॥ कथं सृष्टानि भूतानि कथं वर्णविभक्तयः ॥ शौचाशौचं कथं तेषां धर्माधर्म
विधिः कथम् ॥३॥ कीदृशो जीवतां जीवः क्व वा गच्छंति ये मृताः ॥ ॥ अस्माल्लोकादमुं लोकं सर्वं शंसतु मे भवान् ॥ ४ ॥ सनंदन उवाच ॥
शृणु नारद वक्ष्यामि चेतिहासं पुरातनम् ॥ भृगुणाभिहितं शास्त्रं भरद्वाजाय पृच्छते ॥ ५ ॥ कैलासशिखरे दृष्ट्वा दीप्यमानं महौजसम् ॥ भृगुं
महर्षिमासीनं भरद्वाजोऽन्वपृच्छत ॥ ६ ॥ भरद्वाज उवाच ॥ कथं जीवो विचरति नानायोनिषु संततम् ॥ कथं मुक्तिश्च संसाराज्जायते तस्य मानद
॥ ७ ॥ यश्च नारायणः स्रष्टा स्वयंभूर्भगवन्स्वयम् ॥ सेव्यसेवकभावेन वर्तेते इति तौ सदा ॥ ८ ॥ प्रविशंति लये सर्वे यमीशं सचराचराः ॥
लोकानां रमणः सोऽयं निर्गुणश्च निरंजनः ॥ ९ ॥ अनिर्देश्योऽप्रतर्क्यश्च कथं ज्ञायेत कैर्मुने ॥ कथमेनं परात्मानं कालशक्तिदुरन्वयम् ॥ १० ॥
अतर्क्यचरितं वेदाः स्तुवन्ति कथमादरात् ॥ जीवो जीवत्वमुल्लंघ्य कथं ब्रह्म समन्वयात् ॥ ११ ॥ एतदिच्छाम्यहं श्रोतुं तन्मे ब्रूहि कृपानिधे ॥
एवं स भगवान्पृष्टो भरद्वाजेन संशयम् ॥ १२ ॥ महर्षिर्ब्रह्मसंकाशः सर्वं तस्मै ततोऽब्रवीत् ॥ भृगुरुवाच ॥ मानसो नाम यः पूर्वो विश्रुतो वै महर्षिभिः ॥ १३ ॥ अनादिनिधनो देवस्तथा तेभ्योऽजरामरः ॥ अव्यक्त इति विख्यातः शाश्वतोऽथाक्षयोऽव्ययः ॥ १४ ॥ यतः सृष्टानि भूतानि जायंते च

म्रियंति च॥सोऽसृजत्प्रथमं देवो महांतं नाम नामतः ॥ १५ ॥ आकाशमिति विख्यातं सर्वभूतधरः प्रभुः ॥ आकाशादभवद्वारि सलिलादग्नि
मारुतौ ॥ १६ ॥ अग्निमारुतसंयोगात्ततः समभवन्मही ॥ ततस्तेजोमयं दिव्यं पद्मं सृष्टं स्वयंभुवा ॥ १७ ॥ तस्मात्पद्मात्समभवद्ब्रह्मा वेदमयो
विधिः ॥ अहंकार इति ख्यातः सर्वभूतात्मभूतकृत् ॥ १८ ॥ ब्रह्मा वै स महातेजा य एते पंच धातवः ॥ शैलास्तस्यास्थिसंघास्तु मेदो मांसं च
मेदिनी ॥ १९ ॥ समुद्रास्तस्य रुधिरमाकाशमुदरं तथा ॥ पवनश्चैव निश्वासस्तेजोऽग्निर्निम्नगाः शिराः ॥ २० ॥ अग्नीषोमौ च चंद्रार्कौ नयने तस्य
विश्रुते ॥ नभश्चोर्ध्वंशिरस्तस्य क्षितिः पदौ भुजौ दिशः ॥ २१ ॥ दुर्विज्ञेयो ह्यचिन्त्यात्मा सिद्धैरपि न संशयः ॥ स एष भगवान्विष्णुरनन्त-इति
विश्रुतः ॥ २२ ॥ सर्वभूतात्मभूतस्थो दुर्विज्ञेयोऽकृतात्मभिः ॥ अहंकारस्य यः स्रष्टा सर्वभूतभवायवै ॥ ततः समभवद्विश्व पृष्टोऽहं
यदिह त्वया ॥ २३ ॥ भरद्वाज उवाच ॥ गगनस्य दिशां चैव भूतलस्यानिलस्य च ॥ कान्यत्र परिमाणानि संशयं छिंधि तत्त्वतः ॥ २४ ॥
भृगुरुवाच ॥ अनंतमेतदाकाशं सिद्धदैवतसेवितम् ॥ रम्यं नानाश्रयाकीर्णं यस्यांतो नाधिगम्यते ॥ २५॥ ऊर्ध्वं गतेरधस्तात्तु चंद्रादित्यौ न पश्यतः ॥
तत्र देवाः स्वयं दीप्ता भास्कराभाग्निवर्चसः ॥ २६ ॥ ते चाप्यन्तं न पश्यंति नभसः प्रथितौजसः ॥ दुर्गमत्वादनंतत्वादिति मे वद मानद ॥२७॥ उप
रिष्टोपरिष्टात्तु प्रज्वलद्भिः स्वयंप्रभैः ॥ निरुद्धमेतदाकाशं ह्यप्रमेयं सुरैरपि ॥२८ ॥ पृथिव्यंते समुद्रास्तु समुद्रांते तमः स्मृतम् ॥ तमसोंऽते जलं प्राहु
र्जलस्यांतेऽग्निरेव च ॥ २९ ॥ रसातलांते सलिलं जलांते पन्नगाधिपाः ॥ तदंते पुनराकाशमाकाशांते पुनर्जलम् ॥ ३० ॥ एवमंतं भगवतः प्रमाणं
सलिलस्य च ॥ अग्निमारुततोयेभ्यो दुर्ज्ञेयं दैवतैरपि ॥ ३१ ॥ अग्निमारुततोयानां वर्णा क्षितितलस्य च॥ आकाशसदृशा ह्येते भिद्यते तत्त्वदर्श
नात् ॥ ३२ ॥ पठंति चैव मुनयः शास्त्रेषु विविधेषु च ॥ त्रैलोक्ये सागरे चैव प्रमाण विहितं यथा ॥ ३३॥ अदृश्यो यस्त्वगम्यो यः कः प्रमाण
मुदीरयेत् ॥ सिद्धानां देवतानां च परिमीता यदा गतिः ॥ ३४ ॥ तदागण्यमनंतस्य नामानंतेति विश्रुतम् ॥ नामधेयानुरूपस्य मानसस्य
महात्मनः ॥ ३५॥ यदा तु दिव्यं यद्रूपं ह्रसते वर्द्धते पुनः ॥ कोऽन्यस्तद्वेदितुं शक्यो योऽपि स्यात्तद्विधोऽपरः॥३६॥ ततः पुष्करतः सृष्टः सर्वज्ञो
मूर्तिमान्प्रभुः ॥ ब्रह्मा धर्ममयः पूर्वः प्रजापतिरनुत्तमः ॥ ३७॥ भरद्वाज उवाच ॥ पुष्करो यदि संभूतो ज्येष्ठं भवति पुष्करम् ॥ ब्रह्माणं पूर्वजं
चाह भवान्संदेह एव मे ॥ ३८ ॥ भृगुरुवाच ॥ मानसस्येह या मूर्तिर्ब्रह्मत्वं समुपागता ॥ तस्यासनविधानार्थं पृथिवी पद्ममुच्यते ॥ ३९ ॥ कर्णिका
तस्य पद्मस्य मेरुर्गगनमुच्छ्रितः ॥ तस्य मध्ये स्थितो लोकान्सृजत्येष जगद्विधिः ॥ ४०॥ भरद्वाज उवाच ॥ प्रजाविसर्गं विविधं कथं स सृजति

Nepal Sanskrit University, Balmiki Campus, Kathmandu

प्रभुः ॥ मेरुमध्ये स्थितो ब्रह्मा तद्वहिर्द्विजसत्तम ॥ ४१ ॥ भृगुरुवाच ॥ प्रजाविसर्गं विविधं मानसो मनसाऽसृजत् ॥ संरक्षणार्थं भूतानां सृष्टं प्रथमतो
जलम् ॥ ४२ ॥ यत्प्राणाः सर्वभूतानां सृष्टं प्रथमतो जलम् ॥ यत्प्राणाः सर्वभूतानां वर्द्धंते येन च प्रजाः॥ ४३ ॥ परित्यक्ताश्च नश्यंति तेनेदं
सर्वमावृतम् ॥ पृथिवी पर्वता मेघा मूर्तिमंतश्च ये परे ॥ सर्वं तद्वारुणं ज्ञेयमापस्तस्तंभिरे पुनः ॥ ४४ ॥ भरद्वाज उवाच ॥ कथं सलिलमुत्पन्नं कथं
चैवाग्निमारुतौ ॥ कथं वा मेदिनी सृष्टेत्यत्र मे संशयो महान् ॥ ४५ ॥ भृगुरुवाच ॥ ब्रह्मकल्पे पुरा ब्रह्मन् ब्रह्मर्षीणां समागमे ॥ लोकसंभवसंदेहः
समुत्पन्नो महात्मनाम् ॥ ४६॥ तेऽतिष्ठन्ध्यानमालंब्य मौनमास्थाय निश्चलाः ॥ त्यक्ताहाराः स्पर्द्धमाना दिव्यं वर्षशतं द्विजाः ॥४७॥तेषां ब्रह्ममयी
वाणी सर्वेषां श्रोत्रमागमत् ॥ दिव्या सरस्वती तत्र संबभूव नभस्तलात् ॥ ४८ ॥ पुरास्तिमितमाकाशमनंतमचलोपमम् ॥ नष्टचंद्रार्कपवनं
प्रसुप्तमिव संबभौ ॥४९॥ ततः सलिलमुत्पन्नं तमसीव तमः परम्॥ तस्माच्च सलिलोत्पीडादुदतिष्ठत मारुतः ॥५०॥ यथाभवनमच्छिद्रं निःशब्दमिव
लक्ष्यते॥तच्चांभसा पूर्यमाणं सशब्दं कुरुतेऽनिलः॥ ५१ ॥ तथा सलिलसंरुद्धे नभसोंऽतं निरंतरे॥ भित्त्वार्णवतलं वायुः समुत्पतति घोषवान् ॥५२ ॥
एषु वै चरते वायुरर्णवोत्पीडसंभवः ॥ आकाशस्थानमासाद्य प्रशांतिं नाधिगच्छति ॥ ५३ ॥ तस्मिन्वाय्वम्बुसंघर्षे दीप्ततेजा महाबलः॥
प्रादुरासीदूर्ध्वशिखः कृत्वा निस्तिमिरं तमः ॥५४॥ अग्निः पवनसंयुक्तः खं समाक्षिपते जलम् ॥ तदग्निवायुसंपर्काद्घनत्वमुपपद्यते॥५५॥ तस्याकाशं
निपतितः स्नेहात्तिष्ठति योऽपरः ॥ स संघातत्वमापन्नो भूमित्वमनुगच्छति ॥ ५६ ॥ रसानां सर्वगंधानां स्नेहानां प्राणिनां तथा ॥ भूमिर्योनिरियं
ज्ञेया यस्याः सर्वं प्रसूयते ॥ ५७ ॥ भरद्वाज उवाच ॥ य एते धातवः पंच रक्ष्या यानसृजत्प्रभुः ॥ आवृता यैरिमे लोका महाभूताभिसंज्ञितैः॥५८॥
यदाऽसृजत्सहस्राणि भूतानां स महामतिः ॥ पश्चात्तेष्वेव भूतत्वं कथं समुपपद्यते ॥५९॥ भृगुरुवाच ॥ अमितानि महाद्यानि यांति
भूतानि संभवम् ॥ अतस्तेषां महाभूतशब्दोऽयमुपपद्यते ॥ ६० ॥ चेष्टा वायुः खमाकाशमूष्माग्निः सलिलं द्रवः ॥ पृथिवी चात्र संघातः शरीरं
पांचभौतिकम्॥६१॥ इत्यतः पंचभिर्युक्तैर्युक्तं स्थावरजंगमम् ॥ श्रोत्रे घ्राणो रसः स्पर्शो दृष्टिश्चेंद्रियसंज्ञिताः ॥ ६२ ॥ भरद्वाज उवाच ॥ पंचभिर्यदि
भूतैस्तु युक्ताः स्थावरजंगमाः ॥ स्थावराणां न दृश्यंते शरीरे पंच धातवः ॥६३॥ अनूष्मणामचेष्टानां घनानां चैव तत्त्वतः ॥ वृक्षाणां नोपलभ्यंते
शरीरे पंच धातवः॥६४॥न शृण्वंति न पश्यंति न गंधरसवेदिनः॥न च स्पर्शं हि जानंति ते कथं पंच धातवः ॥६५॥ अद्रवत्वादनग्नित्वादभूमित्वादवायुतः
॥आकाशस्याप्रमेयत्वाद्वृक्षाणां नास्ति भौतिकम् ॥६६॥ भृगुरुवाच॥ घनानामपि वृक्षाणामाकाशोऽस्ति न संशयः ॥ तेषां पुष्पफलव्य

क्तिर्नित्यं समुपपद्यते ॥६७॥ ऊष्मतो म्लायते पर्णं त्वक्फलं पुष्पमेव च ॥म्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते ॥ ६८ ॥ वाय्वग्न्यशनिनिर्घोषैः
फलं पुष्पं विशीर्यते ॥ श्रोत्रेण गृह्यते शब्दस्तस्माच्छृण्वंति पादपाः ॥ ६९ ॥ वल्ली वेष्टयते वृक्षान्सर्वतश्चैव गच्छति ॥ नह्यदृष्टश्च मार्गोऽस्ति
तस्मात्पश्यंति पादपाः ॥ ७० ॥ पुण्यापुण्यैस्तथा गंधैर्धूपैश्च विविधैरपि ॥ अरोगाः पुष्पिताः संति तस्माज्जिघ्रंति पादपाः ॥ ७१ ॥
सुखदुःखयोर्ग्रहणाच्छिन्नस्य च विरोहणात् ॥ जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते ॥ ७२ ॥ तेन तज्जलमादत्ते जरयत्यग्निमारुतौ ॥
आहारपरिणामाच्च स्नेहो वृद्धिश्च जायते ॥ ७३ ॥ जंगमानां च सर्वेषां शरीरे पंच धातवः ॥ प्रत्येकशः प्रभिद्यंते यैः शरीरं
विचेष्टते ॥ ७४ ॥ त्वक् च मांसं तथास्थीनि मज्जा स्नायुश्च पंचमः ॥ इत्येतदिह संघातं शरीरे पृथिवीमये ॥ ७५ ॥ तेजो ह्यग्निस्तथा क्रोधश्चक्षु
रूष्मा तथैव च ॥ अग्निर्जनयते यच्च पंचाग्नेयाः शरीरिणः ॥ ७६ ॥ श्रोत्रं घ्राणं तथास्यं च हृदयं कोष्ठमेव च ॥ आकाशात्प्राणिनामेते शरीरे
पंच धातवः ॥ ७७॥ श्लेष्मा पित्तमथ स्वेदो वसा शोणितमेव च॥इत्यापः पंचधा देहे भवंति प्राणिनां सदा॥७८॥प्राणात्प्रीणयते प्राणी व्यानाद्व्याय
च्छते तथा ॥ ७९ ॥गच्छत्यपानोऽधश्चैव समानो हृद्यवस्थितः ॥ उदानादुच्छ्वसितीति पञ्च (प्रति) भेदाच्च भाषते ॥ इत्येते वायवः पंच वेष्टयंतीह
देहिनम् ॥८०॥ भूमेर्गंधगुणान्वेत्ति रसं चाद्भ्यः शरीरवान्॥तस्य गंधस्य वक्ष्यामि विस्तराभिहितान्गुणान्॥८१॥इष्टश्चानिष्टगंधश्च मधुरः कटुरेव
च ॥ निर्हारी संहतः स्निग्धो रूक्षो विशद एव च ॥ ८२ ॥ एवं नवविधो ज्ञेयः पार्थिवो गंधविस्तरः ॥ ज्योतिः पश्यति चक्षुर्भ्यः स्पर्शं
वेत्ति च वायुना॥८३॥ शब्दः स्पर्शश्च रूपं च रसश्चापि गुणाः स्मृताः॥रसज्ञानं तु वक्ष्यामि तन्मे निगदतः शृणु॥८४॥रसो बहुविधः प्रोक्त ऋषिभिः
प्रथितात्मभिः ॥ मधुरो लवणस्तिक्तः कषायोऽम्लः कटुस्तथा ॥ ८५ ॥ एष षड्विधविस्तारो रसो वारिमयः स्मृतः ॥ शब्दः स्पर्शश्च रूपञ्च
त्रिगुणं ज्योतिरुच्यते ॥ ८६ ॥ ज्योतिः पश्यति रूपाणि रूपं च बहुधा स्मृतम् ॥ ह्रस्वो दीर्घस्तथा स्थूलश्चतुरस्रोऽणुवृत्तवान् ॥ ८७ ॥ शुक्लः
कृष्णस्तथा रक्तो नीलः पीतोऽरुणस्तथा ॥ कठिनश्चिक्कणः श्लक्ष्णः पिच्छिलो मृदु दारुणः ॥ ८८ ॥ एवं षोडशविस्तारो ज्योतीरूपगुणः
स्मृतः ॥ तत्रैकगुणमाकाशं शब्द इत्येव तत्स्मृतम् ॥ ८९ ॥ तस्य शब्दस्य वक्ष्यामि विस्तरं विविधात्मकम् ॥ षड्जो ऋषभगांधारौ मध्यमो
धैवतस्तथा ॥ ९० ॥ पंचमश्चापि विज्ञेयस्तथा चापि निषादवान् ॥ एष सप्तविधः प्रोक्तो गुण आकाशसंभवः ॥ ९१ ॥ ऐश्वर्य्येण
तु सर्वत्र स्थितोऽपि पटहादिषु ॥ मृदंगभेरीशंखानां स्तनयित्नो रथस्य च ॥ ९२ ॥ एवं दहुविधाकारः शब्द आकाशसंभवः॥वायव्यस्तु गुणः स्पर्शः

Nepal Sanskrit University, Balmanki Campus, Kathmandu

स्पर्शश्च बहुधा स्मृतः ॥ ९३ ॥ उष्णः शीतः सुखं दुःख स्निग्धो विशद एव च॥तथा खरो मृदुः श्लक्ष्णो लघुर्गुरुतरोऽपि च ॥ ९४ ॥शब्दस्पर्शौ
तु विज्ञेयौ द्विगुणौ वायुरित्युत ॥ एवमेकादशविधो वायव्यो गुण उच्यते ॥ ९५ ॥ आकाशजं शब्दमाहुरेभिर्वायुगुणैः सह ॥ अन्याहतैश्चेतयते
नवेति विषमा गतिः॥ ९६ ॥ आप्यायंते च ते नित्यं धातवस्तैस्तु धातुभिः ॥ आपोऽग्निर्मारुतश्चैव नित्यं जाग्रति देहिषु ॥ ९७ ॥ मूलमेते शरी
रस्य व्याप्य प्राणानिह स्थिताः ॥ पार्थिवं धातुमासाद्य यथा चेष्टयते बली ॥ ९८ ॥ श्रितो मूर्द्धानमग्निस्तु शरीरं परिपालयेत् ॥ प्राणो मूर्द्धनि
वाग्नौ च वर्तमानो विचेष्टते ॥ ९९ ॥ स जंतुः सर्वभूतात्मा पुरुषः स सनातनः ॥ मनो बुद्धिरहंकारो भूतानि विषयश्च सः ॥ १०० ॥ एवं त्विह
स सर्वत्र प्राणैस्तु परिपाल्यते ॥ पृष्ठतस्तु समानेन स्वां स्वां गतिमुपाश्रितः ॥ १०१ ॥ वस्तिमूलं गुदं चैव पावकं समुपाश्रितः ॥ वहन्मूत्रं पुरीषं
वाप्यपानः परिवर्तते ॥ १०२ ॥ प्रयत्ने कर्मनियमे य एकस्त्रिषु वर्तते ॥ उदान इति तं प्राहुरध्यात्मज्ञानकोविदाः ॥ १०३ ॥ संधिष्वपि च सर्वेषु संनि
विष्टस्तथानिलः ॥ शरीरेषु मनुष्याणां व्यान इत्युपदिश्यते ॥ १०४ ॥ बाहुष्वग्निस्तु विततः समानेन समीरितः ॥ रसान्बाहूँश्च दोषांश्च वर्तयन्नति
चेष्टते ॥ १०५ ॥ अपानप्राणयोर्मध्ये प्राणापानसमीहितः ॥ समन्वितस्त्वधिष्ठानं सम्यक् पचति पावकः ॥ १०६ ॥ आस्यं हि पायुपर्यंतमंते स्याद्गु
दसंज्ञिते ॥ रेतस्तस्मात्प्रजायंते सर्वस्रोतांसि देहिनाम् ॥१०७॥ प्राणानां सन्निपाताच्च सन्निपातः प्रजायते ॥ ऊष्मा चाग्निरिति ज्ञेयो योऽन्नं पचति
देहिनाम् ॥ १०८ ॥ अग्निवेगवहः प्राणो गुदांते प्रतिहन्यते ॥ स ऊर्ध्वमागम्य पुनः समुत्क्षिपति पावकम् ॥१०९॥ पक्वाशयस्त्वधो नाभ्या ऊर्ध्व
मामाशयः स्मृतः ॥ नाभिमूले शरीरस्य सर्वे प्राणाश्च संस्थिताः ॥ ११० ॥ प्रस्थिता हृदयात्सर्वे तिर्यगूर्द्ध्वमधस्तथा ॥ वहंत्यन्नरसान्नाड्यो दश
प्राणप्रचोदिताः ॥ १११ ॥ एष मार्गोऽपि योगानां येन गच्छंति तत्पदम् ॥ जितक्लमाः समा धीरा मूर्द्धन्यात्मानमादधन् ॥ ११२ ॥ एवं सर्वेषु
विहितप्राणापानेषु देहिनाम् ॥ तस्मिन्समिध्यते नित्यमग्निः स्थाल्यामिवाहितः ॥ ११३ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे द्वितीयपादे भृगुभर
द्वाजसंवादे जगदुत्पत्तिवर्णनं नाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ भरद्वाज उवाच ॥ यदि प्राणपतिर्वायुर्वायुरेव विचेष्टते ॥ श्वसित्याभाषते चैव
ततो जीवो निरर्थकः ॥ १ ॥ य ऊष्मभाव आग्नेयो वह्निनवोपलभ्यते ॥ अग्निर्जरयते चैतत्तदा जीवो निरर्थकः ॥ २ ॥ जंतोः प्रम्रियमाणस्य
जीवो नैवोपलभ्यते ॥ वायुरेव जहात्येनमूष्मभावश्च नश्यति ॥३॥ यदि वासुमयो जीवः संश्लेषो यदि वायुना ॥ वायुमंडलवत्पश्येद्गच्छेत्सह मरुद्गणैः
॥ ४ ॥ संश्लेषो यदि वा तेन यदि तस्मात्प्रणश्यति ॥ महार्णवविमुक्तत्वादन्यत्सलिलभाजनम् ॥ ५ ॥ कूपे वा सलिलं दद्यात्प्रदीपं वा हुताशने ॥

क्षिप्रं प्रविश्य नश्येत यथा नश्यत्यसौ तथा ॥ ६ ॥ पंचधारणके ह्यस्मिञ्छरीरे जीवितं कृतम् ॥ येषामन्यतराभावाच्चतुर्णां नास्ति संशयः ॥ ७ ॥
नश्यंत्यापो ह्यनाहाराद्वायुरुच्छ्वासनिग्रहात् ॥ नश्यते कोष्ठभेदार्थमग्निर्नश्यत्यभोजनात् ॥ ८ ॥ व्याधिव्रणपरिक्लेशैर्मेदिनी चैव शीर्यते ॥ पीडितेऽ
न्यतरे ह्येषां संघातो याति पंचताम् ॥ ९ ॥ तस्मिन्पंचत्वमापन्ने जीवः किमनुधावति ॥ किं खेदयति वा जीवः किं शृणोति ब्रवीति च ॥ १० ॥ एषा
गौः परलोकस्थं तारयिष्यति मामिति ॥ यो दत्त्वा म्रियते जंतुः सा गौः कं तारयिष्यति ॥ ११ ॥ गौश्च प्रतिग्रहीता च दाता चैव समं यदा ॥ इहैव विलयं
यांति कुतस्तेषां समागमः ॥ १२ ॥ विहगैरुपभुक्तस्य शैलाग्रात्पतितस्य च ॥ अग्निना चोपयुक्तस्य कुतः संजीवनं पुनः ॥ १३ ॥ छिन्नस्य यदि वृक्षस्य न
मूलं प्रतिरोहति ॥ जीवन्यस्य प्रवर्तंते मृतः क्व पुनरेष्यति ॥१४॥ जीवमात्रं पुरा सृष्टं यदेतत्परिवर्तते ॥ मृता मृताः प्रणश्यंति बीजाद्बीजं प्रणश्यति
॥ १५ ॥ इति मे संशयो ब्रह्मन्हृदये परिधावति ॥ तं निवर्तय सर्वज्ञ यतस्त्वामाश्रितो ह्यहम् ॥१६॥ सनंदन उवाच ॥ एवं पृष्टस्तदानेन स भृगु
र्ब्रह्मणः सुतः ॥ पुनराह मुनिश्रेष्ठ तत्संदेहनिवृत्तये ॥१७॥ भृगुरुवाच ॥ न प्राणाः सन्ति जीवस्य दत्तस्य च कृतस्य च ॥ याति देहांतरं प्राणी शरीरं
तु विशीर्यते ॥ १८ ॥ न शरीराश्रितो जीवस्तस्मिन्नष्टे प्रणश्यति ॥ समिधामग्निदग्धानां यथाग्निर्दृश्यते तथा ॥ १९ ॥भरद्वाज उवाच ॥ अग्नेर्यथा
तस्य नाशात्तद्विनाशो न विद्यते ॥ इन्धनस्योपयोगांते स वाग्निर्नोपलभ्यते ॥ २० ॥नश्यतीत्येव जानामि शांतमग्निमनिन्धनम् ॥ गतिर्यस्य प्रमाणं
वा संस्थानं वा न विद्यते ॥ २१ ॥ भृगुरुवाच ॥ समिधामुपयोगांते स चाग्निर्नोपलभ्यते ॥ नश्यतीत्येव जानामि शांतमग्निमनिंधनम् ॥ २२ ॥
गतिर्यस्य प्रमाणं वा संस्थान वा न विद्यते ॥ समिधामुपयोगांते यथाग्निर्नोपलभ्यते ॥ २३ ॥ आकाशानुगतत्वाद्धि दुर्ग्राह्यो हि निराश्रयः ॥
तथा शरीरसंत्यागे जीवो ह्याकाशवत्स्थितः ॥ २४ ॥ न नश्यते सुसूक्ष्मत्वाद्यथा ज्योतिर्न संशयः ॥ प्राणान्धारयते ह्यग्निः स जीव उपधार्यताम् ॥
॥ २५ ॥ वायुसंधारणो ह्यग्निर्नश्यत्युच्छ्वासनिग्रहात् ॥ तस्मिन्नष्टे शरीराग्नौ ततो देहमचेतनम् ॥ २६ ॥पतितं याति भूमित्वमयनं तस्य हि क्षितिः ॥
जंगमानां हि सर्वेषां स्थावराणां तथैव च ॥ २७ ॥आकाशं पवनोऽन्वेति ज्योतिस्तमनुगच्छति ॥तेषां त्रयाणामेकत्वाद्द्वयं भूमौ प्रतिष्ठितम् ॥ २८ ॥
यत्र खं तत्र पवनस्तत्राग्निर्यत्र मारुतः ॥ अमूर्तयस्ते विज्ञेया मूर्तिमंतः शरीरिणः ॥२९॥ भरद्वाज उवाच ॥ यद्यग्निमारुतौ भूमिः खमापश्च शरीरिषु ॥
जीवः किंलक्षणस्तत्रेत्येतदाचक्ष्व मेऽनघ ॥ ३० ॥पंचात्मके पञ्चरतौ पञ्चविज्ञानसंज्ञके ॥ शरीरे प्राणिनां जीवं वेत्तुमिच्छामि यादृशम् ॥ ३१ ॥
मांसशोणितसंघाते मेदःस्नाय्वस्थिसंचये ॥ भिद्यमाने शरीरे तु जीवो नैवोपलभ्यते ॥ ३२ ॥ यद्यजीवशरीरं तु पञ्चभूतसमन्वितम् ॥ शारीरे मानसे

दुःख कस्तां वेदयते रुजम् ॥ ३३ ॥ शृणोति कथितं जीवः कर्णाभ्यां न शृणोति तत् ॥ महर्षे मनसि व्यग्रे तस्माज्जीवो निरर्थकः ॥ ३४ ॥ सर्वं
पश्यंति यद्दृश्यं मनोयुक्तेन चक्षुषा ॥ मनसि व्याकुले चक्षुः पश्यन्नपि न पश्यति ॥ ३५ ॥ न पश्यति न चाघ्राति न शृणोति न भाषते ॥ न च
स्पर्शमसौ वेत्ति निद्रावशगतः पुनः ॥ ३६ ॥ हृष्यति क्रुद्ध्यते कोऽत्र शोचत्युद्विजते च कः ॥ इच्छति ध्यायति द्वेष्टि वाक्यं वाचयते च कः ॥ ३७ ॥
भृगुरुवाच ॥ तं पंचसाधारणमत्र किंचिच्छरीरमेको वहतेंऽतरात्मा ॥ स वेत्ति गंधांश्च रसान्छुतीश्च स्पर्शं च रूपं च गुणांश्च येऽन्ये ॥ ३८ ॥ पंचा
त्मके पंचगुणप्रदर्शी स सर्वगात्रानुगतोंऽतरात्मा ॥ सदेति दुःखानि सुखानि चात्र तद्विप्रयोगात्तु न वेत्ति देहम् ॥ ३९ ॥ यदा न रूपं न स्पर्शो नोष्मभा
वश्च पावके ॥ तदा शांते शरीराग्नौ देहत्यागेन नश्यति ॥ ४० ॥ आपोमयमिदं सर्वमापोमूर्तिः शरीरिणाम् ॥ तत्रात्मा मानसो ब्रह्मा सर्वभूतेषु लोककृत्
॥ ४१ ॥ आत्मानं तं विजानीहि सर्वलोकहितात्मकम् ॥ तस्मिन्यः संश्रितो देहे ह्यब्बिंदुरिव पुष्करे ॥ ४२ ॥ क्षेत्रज्ञं तं विजानीहि नित्यं लोकहितात्म
कम् ॥ तमोरजश्च सत्त्वं च विद्धि जीवगुणानिमान् ॥ ४३ ॥ अचेतनं जीवगुणं वदंति स चेष्टते चेष्टयते च सर्वम् ॥ अतः परं क्षेत्रविदो वदंति प्रावर्तयद्यो
भुवनानि सप्त ॥ ४४ ॥ न जीवनाशोऽस्ति हि देहभेदे मिथ्यैतदाहुर्मुन इत्यबुद्धाः ॥ जीवस्तु देहांतरितः प्रयाति दशार्द्धतस्तस्य शरीरभेदः ॥ ४५ ॥ एवं
भूतेषु सर्वेषु गूढश्चरति सर्वदा ॥ दृश्यते त्वग्र्या बुध्या सूक्ष्मया तत्त्वदर्शिभिः ॥ ४६ ॥ तं पूर्वापररात्रेषु युंजानः सततं बुधः ॥ लब्धाहारो विशुद्धात्मा
पश्यत्यात्मानमात्मनि ॥ ४७ ॥ चित्तस्य हि प्रसादेन हित्वा कर्म शुभाशुभम् ॥ प्रसन्नात्मात्मनि स्थित्वा सुखमानंत्यमश्नुते ॥ ४८ ॥ मान
सोऽग्निः शरीरेषु जीव इत्यभिधीयते ॥ सृष्टिः प्रजापतेरेषा भूताध्यात्मविनिश्चये ॥ ४९ ॥ असृजद्ब्राह्मणानेव पूर्वं ब्रह्मा प्रजापतिः ॥ आत्मतेजोऽभिनि
र्वृत्तान्भास्कराग्निसमप्रभान् ॥ ५० ॥ ततः सत्यं च धर्मं च तथा ब्रह्म च शाश्वतम् ॥ आचारं चैव शौचं च स्वर्गाय विदधे प्रभुः ॥ ५१ ॥ देवदान
वगंधर्वा दैत्यासुरमहोरगाः ॥ यक्षराक्षसनागाश्च पिशाचा मनुजास्तथा ॥ ५२ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राणामसितस्तथा ॥ भरद्वाज उवाच ॥
चातुर्वर्ण्यस्य वर्णेन यदि वर्णो विभिद्यते ॥ ५३ ॥ स्वेदमूत्रपुरीषाणि श्लेष्मा पित्त सशोणितम् ॥ त्वन्तः क्षरति सर्वेषां कस्माद्वर्णो विभज्यते
॥ ५४ ॥ जंगमानामसंख्येयाः स्थावराणां च जातयः ॥ तेषां विविधवर्णानां कुतो वर्णविनिश्चयः ॥ ५५ ॥ भृगुरुवाच ॥ न विशेषोऽस्ति वर्णानां
सर्वं ब्रह्ममयं जगत् ॥ ब्रह्मणा पूर्वसृष्टं हि कर्मणा वर्णतां गतम् ॥ ५६ ॥ कामभोगाः प्रियास्तीक्ष्णाः क्रोधताप्रियसाहसाः ॥ त्यक्तस्वकर्म
रक्तांगास्ते द्विजाः क्षत्रतां गताः ॥ ५७ ॥ गोभ्यो वृत्तिं समास्थाय पीताः कृष्युपजीविनः ॥ स्वधर्म्मान्नानुतिष्ठंति ते द्विजा वैश्यतां गताः ॥ ५८ ॥

हिंसानृतपरा लुब्धाः सर्वकर्मोपजीविनः॥ कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां गताः ॥ ५९ ॥ इत्येतैः कर्मभिर्व्यस्ता द्विजा वर्णान्तरं गताः॥
ब्राह्मणा धर्मतन्त्रस्थास्तपस्तेषां न नश्यति ॥ ६० ॥ ब्रह्म धारयतां नित्यं व्रतानि नियमांस्तथा ॥ ब्रह्म चैव पुरा सृष्टं येन जानंति तद्विदः ॥६१॥
तेषां बहुविधास्त्वन्यास्तत्र तत्र द्विजातयः॥ पिशाचा राक्षसाः प्रेता विविधा म्लेच्छजातयः ॥सा सृष्टिर्मानसी नाम धर्मतंत्रपरायणा ॥६२॥ भरद्वाज
उवाच ॥ ब्राह्मणः केन भवति क्षत्रियो वा द्विजोत्तम ॥ वैश्यः शूद्रश्च विप्रर्षे तद्ब्रूहि वदतां वर ॥६३॥भृगुरुवाच ॥ जातकर्मादिभिर्यस्तु संस्कारैः
संस्कृतः शुचिः ॥ वेदाध्ययनसंपन्नो ब्रह्मकर्मस्ववस्थितः ॥ ६४ ॥ शौचाचारस्थितः सम्यग्विद्याभ्यासी गुरुप्रियः ॥ नित्यव्रती सत्यपरः
स वै ब्राह्मण उच्यते ॥६५॥ सत्यं दानमथोऽद्रोह आनृशंस्यं कृपा घृणा॥ तपस्यां दृश्यते यत्र स ब्राह्मण इति स्मृतः॥६६॥क्षत्रजं सेवते कर्म
वेदाध्ययनसंगतः ॥ दानादानरतिर्यस्तु स वै क्षत्रिय उच्यते ॥ ६७ ॥ विशत्याशु पशुभ्यश्च कृष्यादानरतिः शुचिः ॥ वेदाध्ययनसंपन्नः स
वैश्य इति संज्ञितः ॥६८॥ सर्वभक्षरतिर्नित्यं सर्वकर्मकरोऽशुचिः ॥ त्यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः॥६९॥शूद्रे चैतद्भवेल्लक्ष्म द्विजे तच्च
न विद्यते ॥ न वै शूद्रो भवेच्छूद्रो ब्राह्मणो ब्राह्मणो न च ॥ ७० ॥ सर्वोपायैस्तु लोभस्य क्रोधस्य च विनिग्रहः ॥ एतत्पवित्र ज्ञानानां तथा
चैवात्मसंयमः॥७१॥वर्ज्यौ सर्वात्मना तौ हि श्रेयोघातार्थमुद्यतौ॥नित्यक्रोधाच्छ्रियं रक्षेत्तपो रक्षेत्तु मत्सरात्॥७२॥विद्यां मानापमानाभ्यामात्मानं
तु प्रमादतः॥७३॥यस्य सर्वे समारंभा निराशीर्बंधना द्विज ॥ त्यागे यस्य हुतं सर्वं स त्यागी स च बुद्धिमान् ॥७४॥ अहिंस्रः सर्वभूतानां
मैत्रायणगतश्चरेत्॥परिग्रहात्परित्यज्य भवेद्बुद्ध्या जितेंद्रियः ॥७५॥ अशोकस्थानमातिष्ठेदिह चामुत्र चाभयम् ॥ तपोनित्येन दांतेन मुनिना संयतात्मना
॥७६॥ अजितं जेतुकामेन व्यासंगेषु ह्यसंगिना ॥ इन्द्रियैर्गृह्यते यद्यत्तत्तद्व्यक्तमिति स्थितिः॥७७॥अव्यक्तमिति विज्ञेयं लिंगग्राह्यमतींद्रियम्॥
अविश्रंभेण मंतव्यं विश्रंभे धारयेन्मनः॥७८॥मनः प्राणेन गृह्णीयात्प्राणं ब्रह्मणि धारयेत् ॥निवेदादेव निवाण न च किंचिद्विचिंतयेत्॥७९॥सुखं वै ब्राह्मणो
ब्रह्मन्निर्वेदेनाधिगच्छति॥शौचे तु सततं युक्तः सदाचारसमन्वितः॥८०॥स्वनुक्रोशश्च भूतेषु तद्द्विजातिषु लक्षणम्॥सत्यं व्रतं तपः शौचं सत्यं विसृजते प्रजा
॥८०॥सत्येन धार्यते लोकः स्वः सत्येनैव गच्छति॥अनृतं तमसो रूपं तमसा नीयते ह्यधः॥८२॥तमोग्रस्ता न पश्यंति प्रकाशं तमसावृताः॥ सुदुष्प्रकाश
इत्याहुर्नरकं तम एव च॥ ८३ ॥सत्यानृतं तदुभयं प्राप्यते जगतीचरैः॥ तत्राप्येवंविधा लोके वृत्तिः सत्यानृते भवेत् ॥८४॥ धर्माधर्मौ प्रकाशश्च
तमो दुःखसुखं तथा ॥ शारीरैर्मानसैर्दुःखैः सुखैश्चाप्यसुखोदयैः ॥ ८५ ॥ लोकसृष्टं प्रपश्यन्तो न मुह्यंति विचक्षणाः ॥ तत्र दुःखविमोक्षार्थं प्रयतेत

विचक्षणः ॥ ८६ ॥ सुखं ह्यनित्यं भूतानामिह लोके परत्र च ॥ राहुग्रस्तस्य सोमस्य यथा ज्योत्स्ना न भासते ॥ ८७ ॥ तथा तमोभिभूतानां
भूतानां नश्यते सुखम् ॥ ८८ ॥ तत्खलु द्विविधं सुखमुच्यते शारीरं मानसं च । इह खल्वमुष्मिंश्च लोके वस्तुप्रवृत्तयः सुखार्थमभिधीयन्ते
नहीतः परत्रापर्वगफलाद्विशिष्टतरमस्ति । स एव काम्यो गुणविशेषो धर्मार्थगुणारंभस्तद्धेतुरस्योत्पत्तिः सुखप्रयोजनार्थमारंभाः ॥ भरद्वाज
उवाच ॥ वदैतद्भवताभिहितं सुखानां परमा स्थितिरिति ॥ ८९॥ न तदुपगृह्णीमो न ह्येषामृषीणां महति स्थितानाम् ॥ ९० ॥ अप्राप्य एष काम्य
गुणविशेषो न चैनमभिशीलयंति । तपसि श्रूयते त्रिलोककृद्ब्रह्मा प्रभुरेकाकी तिष्ठति ब्रह्मचारी न कामसुखेष्वात्मानमवदधाति ॥ ९१ ॥ अपि
च भगवान्विश्वेश्वर उमापतिः काममभिवर्तमानमनंगत्वेन सममनयत् ॥ ९२ ॥ तस्माद्ब्रूमो न तु महात्मभिरंजयति गृहीतो न त्वेष तावद्विशिष्टो
गुणविशेष इति॥९३॥नैतद्भगवतः प्रत्येमि भवता तूक्तं सुखानां परमाः स्त्रिय इति लोकप्रवादो हि द्विविधः फलोदयः सुकृतात्सुखमवाप्यतेऽन्यथा
दुःखमिति ॥ ९४ ॥ भृगुरुवाच ॥ अत्रोच्यते अनृतात्खलु तमः प्रादुर्भूतं ततस्तमोग्रस्ता अधर्ममेवानुवर्तंते न धर्मं क्रोधलोभमोहहिंसानृता
दिभिरवच्छन्नाः खल्वस्मिंल्लोके नामुत्र सुखमाप्नुवंति विविधव्याधिरुजोपतापैरवकीर्यन्ते वधबन्धनपरिक्लेशादिभिश्च क्षुत्पिपासाश्रमकृतैरुपतापैरुपत
प्यंते वर्षवातात्युष्णातिशीतकृतैश्च प्रतिभयैः शारीरैर्दुःखैरुपतप्यंते बंधुधनविनाशविप्रयोगकृतैश्च मानसैः शोकैरभिभूयंते जरामृत्युकृतैश्चान्यै
रिति यस्त्वेतैः ॥९५॥ शारीरं मानसं नास्ति न जरा न च पातकम् ॥ नित्यमेव सुखं स्वर्गे सुखं दुःखमिहोभयम्॥९६॥नरके दुःखमेवाहुः सुखं
तत्परमं पदम् ॥ पृथिवी सर्वभूतानां जनित्री तद्विधाः स्त्रियः ॥ ९७ ॥ पुमान्प्रजापतिस्तत्र शुक्रं तेजोमयं विदुः ॥ इत्येतल्लोकनिर्माता धर्मस्य
चरितस्य च ॥ ९८ ॥ तपसश्च सुतप्तस्य स्वाध्यायस्य हुतस्य च ॥ हुतेन शाम्यते पापं स्वाध्याये शांतिरुत्तमा ॥ ९९ ॥ दानेन भोगानित्याहुस्त
पसा स्वर्गमाप्नुयात् ॥ दानं तु द्विविधं प्राहुः परत्रार्थमिहैव च ॥ १००॥सद्भ्यो यद्दीयते किंचित्तत्परत्रोपतिष्ठते ॥ असद्भ्यो दीयते यत्तु तद्दानमिह
भुज्यते॥यादृशं दीयते दानं तादृशं फलमश्नुते ॥ १०१ ॥ भरद्वाज उवाच ॥ किं कस्य धर्मचरणं किं वा धर्मस्य लक्षणम् ॥ धर्मः कतिविधो वापि
तद्भवान्वक्तुमर्हति ॥१०२॥भृगुरुवाच॥स्वधर्माचरणे युक्ता ये भवंति मनीषिणः ॥ तेषां स्वर्गफलावाप्तिर्योऽन्यथा स विमुह्यते॥१०३॥भरद्वाज उ० ॥
यदेतच्चातुराश्रम्यं ब्रह्मर्षिविहितं पुरा॥तेषां स्वे स्वे समाचारास्तन्मे वक्तुमिहार्हसि॥१०४॥भृगुरुवाच ॥ पूर्वमेव भगवता ब्रह्मणा लोकहितमनुतिष्ठता
धर्मसंरक्षणार्थमाश्रमाश्चत्वारोऽभिनिर्दिष्टाः ॥१०५॥तत्र गुरुकुलवासमेव प्रथममाश्रममाहरंति सम्यगत्र शौचसंस्कारनियमव्रतविनियतात्मा उभे संध्ये

भास्कराग्निदैवतान्युपस्थाय विहाय तद्व्यालस्यं गुरोरभिवादनवेदाभ्यासश्रवणपवित्रीकृतांतरात्मा त्रिषवणमुपस्पृश्य ब्रह्मचर्याग्निपरिचरणगुरुशुश्रूषा नित्यभिक्षाभैक्ष्यादिसर्वनिवेदितांतरात्मा गुरुवचननिदेशानुष्ठानाप्रतिकूलो गुरुप्रसादलब्धस्वाध्यायतत्परः स्यात् ॥१०६॥ भवति चात्र श्लोकः॥गुरुं यस्तु समाराध्य द्विजो वेदमवाप्नुयात्॥तस्य स्वर्गफलावाप्तिः सिद्ध्यते चास्य मानसम्॥इति गार्हस्थ्यं खलु द्वितीयमाश्रमं वदंति॥१०७॥तस्य सदाचारलक्षणं सर्वमनुव्याख्यास्यामः। समावृतानां सदाचाराणां सहधर्मचर्यफलार्थिनां गृहाश्रमो विधीयते॥१०८॥धर्मार्थकामावाप्तिर्ह्यत्र त्रिवर्गसाधनमपेक्ष्यागर्हितकर्मणा धनान्यादाय स्वाध्यायोपलब्धप्रकर्षेण वा ब्रह्मर्षिनिर्मितेन वा अद्भिः सागरगतेन वा द्रव्यनियमाभ्यासदैवतप्रसादोपलब्धेन वा धनेन गृहस्थो गार्हस्थ्यं वर्तयेत् ॥१०९॥ तद्धि सर्वाश्रमणां मूलमुदाहरंति गुरुकुलनिवासिनः परिव्राजका येऽन्ये संकल्पितव्रतनियमधर्मानुष्ठानिनस्तेषामभ्यंतरा च भिक्षाबलिसंविभागाः प्रवर्तंते ॥११०॥ वानप्रस्थानां च द्रव्योपस्कार इति प्रायशः खल्वेते साधवः साधुपथ्योदनाः स्वाध्यायप्रसंगिनस्तीर्थाभिगमनदेशदर्शनार्थं पृथिवीं पर्यटंति ॥ १११ ॥ तेषां प्रत्युत्थानाभिगमनमनसूयावाक्यदानसुखसत्कारासनसुखशयनाभ्यवहारसत्क्रिया चेति ॥११२॥ भवति चात्र श्लोकः ॥ अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ॥ स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥ ११३ ॥ अपि चात्र यज्ञक्रियाभिर्देवताः प्रीयंते निवापेन पितरो विद्याभ्यासश्रवणधारणेन ऋषयः अपत्योत्पादनेन प्रजापतिरिति ॥ ११४ ॥ लोकौ चात्र भवतः॥ वात्सल्याः सर्वभूतेभ्यो वायोः श्रोत्रस्तथा गिरा ॥ परितापोपघातश्च पारुष्यं चात्र गर्हितम् ॥११५ ॥अवज्ञानमहंकारो दंभश्चैव विगर्हितः ॥ अहिंसा सत्यमक्रोधं सर्वाश्रमगतं तपः ॥ ११६ ॥ अपि चात्र माल्याभरणवस्त्राभ्यंगनित्योपभोगनृत्यगीतवादित्रश्रुतिसुखनयनस्नेहरामादर्शनानां प्राप्तिर्भक्ष्यभोज्यलेह्यपेयचोष्याणामभ्यवहार्याणां विविधानामुपभोगः ॥११७॥ स्वविहारसंतोषः कामसुखावाप्तिरिति॥त्रिवर्गगुणनिर्वृत्तिर्यस्य नित्यं गृहाश्रमे॥स सुखान्यनुभूयेह शिष्टानां गतिमाप्नुयात्॥११८॥उंछवृत्तिर्गृहस्थो यः स्वधर्मचरणे रतः॥त्यक्तकामसुखारंभः स्वर्गस्तस्य न दुर्लभः॥११९॥ वानप्रस्थाः खल्वपि धर्ममनुसरंतः पुण्यानि तीर्थानि नदीप्रस्रवणानि स्वभक्तेष्वरण्येषु मृगवराहमहिषशार्दूलवनगजाकीर्णेषु तपस्यंत अनुसंचरंति ॥१२०॥त्यक्तग्राम्यवस्त्राभ्यवहारोपभोगा वन्यौषधिफलमूलपर्णपरिमितविचित्रनियताहाराः स्थानासानिनो भूपाषाणसिकताशर्करावालुकाभस्मशायिनः काशकुशचर्मवल्कलसंवृतांगाः केशश्मश्रुनखरोमधारिणो नियतकालोपस्पर्शनाः शुष्कबलिहोमकालानुष्ठायिनः॥समित्कुशकुसुमापहारसंमार्जनलब्धविश्रामाः शीतोष्णपवनविष्टंभविभिन्नसर्वत्वचो विविधनियमयोगचर्यानुष्ठानविहितपरिशुष्कमांसशोणितत्वगस्थिभूता धृतिपराः सत्त्वयोगाच्छरीराण्युद्व

हंते॥१२१॥यस्त्वेतां नियतचर्यां ब्रह्मर्षिविहितां चरेत्॥स दहेदग्निवद्दोषाञ्जयेल्लोकांश्च दुर्जयान्॥१२२॥पारिव्राजकानां पुनराचारः तद्यथा॥विमुच्याग्निं
धनकलत्रपरिबर्हसंगेष्वात्मानं स्नेहपाशानवधूय परिव्रजंति॥समलोष्टाश्मकांचनास्त्रिवर्गप्रवृत्तेष्वसक्तबुद्धयः॥१२३॥अरिमित्रोदासीनानां तुल्यदर्शनाः
स्थावरजरायुजांडजस्वेदजानां भूतानां वाङ्मनःकर्मभिरनभिद्रोहिणोऽनिकेताः पर्वतपुलिनवृक्षमूलदेवायतनान्यनुसंचरंतो वा सार्थमुपेयुर्नगरं ग्रामं
वा न क्रोधदर्पलोभमोहकार्पण्यदंभपरिवादाभिमाननिर्वृत्तहिंसा इति ॥ १२४ ॥ भवंति चात्र श्लोकाः॥ अभयं सर्वभूतेभ्यो दत्त्वा यश्चरते मुनिः ॥
न तस्य सर्वभूतेभ्यो भयमुत्पद्यते क्वचित् ॥ १२५ ॥ कृत्वाग्निहोत्रं स्वशरीरसंस्थं शरीरमग्निं स्वमुखे जुहोति ॥ विप्रस्तु भैक्षोपगतैर्हविर्भिश्चिता
ग्निना संव्रजते हि लोकान् ॥ १२६॥ मोक्षाश्रमं यश्चरते यथोक्तं शुचिः स्वसंकल्पितयुक्तबुद्धिः॥ अनिंधनं ज्योतिरिव प्रशांतं स ब्रह्मलोकं श्रयते
द्विजातिः ॥ १२७ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे द्वितीयपादे भृगुभरद्वाजसंवादे ब्राह्मणाचारनिरूपणं नाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥
भरद्वाज उवाच ॥ अस्माल्लोकात्परो लोकः श्रूयते नोपलभ्यते ॥ तमहं ज्ञातुमिच्छामि तद्भवान्वक्तुमर्हति ॥ १ ॥ ॥ भृगुरुवाच ॥ उत्तरे
हिमवत्पार्श्वे पुण्ये सर्वगुणान्विते ॥ पुण्यः क्षेम्यश्च काम्यश्च स परो लोक उच्यते ॥ २ ॥ तत्र ह्यपापकर्माणः शुचयोऽत्यंतनिर्मलाः ॥ लोभमोह
परित्यक्ता मानवा निरुपद्रवाः ॥ ३ ॥ स स्वर्गसदृशो देशः तत्र ह्युक्ताः शुभा गुणाः ॥ काले मृत्युः प्रभवति स्पृशंति व्याधयो न च ॥ ४ ॥ न
लोभः परदारेषु स्वदारनिरतो जनः ॥ नान्यो हि वध्यते तत्र द्रव्येषु च न विस्मयः ॥ ५ ॥ परो ह्यधर्मो नैवास्ति संदेहो नापि जायते ॥ कृतस्य
तु फलं तत्र प्रत्यक्षमुपलभ्यते ॥ ६ ॥ यानासनाशनोपेता प्रसादभवनाश्रयाः ॥ सर्वकामैर्वृताः केचिद्धेमाभरणभूषिताः ॥ ७ ॥ प्राणधारणमात्रं
तु केषांचिदुपपद्यते ॥ श्रमेण महता केचित्कुर्वंति प्राणधारणम् ॥ ८ ॥ इह धर्मपराः केचित्केचिन्नैष्कृतिका नराः ॥ सुखिता दुःखिताः
केचिन्निर्धना धनिनो परे ॥ ९ ॥ इह श्रमो भयं मोहः क्षुधा तीव्रा च जायते ॥ लोभश्चार्थकृतो नृणां येन मुह्यंत्यपंडिताः ॥ १० ॥ यस्तद्वेदो
भयं प्राज्ञः पाप्मना न स लिप्यते ॥ सोपधे निकृतिः स्तेयं परिवादोऽभ्यसूयता ॥ ११ ॥ परोपघातो हिंसा च पैशुन्यमनृतं तथा ॥ एतान्संसेवते
यस्तु तपस्तस्य प्रहीयते ॥ १२ ॥ यस्त्वेतानाचरेद्विद्वान्न तपस्तस्य वर्द्धते ॥ इह चिंता बहुविधा धर्माधर्मस्य कर्मणः ॥ १३ ॥ कर्मभूमि
रियं लोके इह कृत्वा शुभाशुभम् ॥ शुभैः शुभमवाप्नोति तथाशुभमथान्यथा ॥ १४ ॥ इह प्रजापतिः पूर्वं देवाः सर्षिगणास्तथा ॥ इष्टे
ष्टतपसः पूता ब्रह्मलोकमुपाश्रिताः ॥ १५ ॥ उत्तरः पृथिवीभागः सर्वपुण्यतमः शुभः ॥ इहस्थास्तत्र जायंते ये वै पुण्यकृतो जनाः ॥ १६ ॥

यदि सत्कारमिच्छंति तिर्यग्योनिषु चापरे ॥ क्षीणायुषस्तथा चान्ये नश्यन्ति पृथिवीतले ॥१७॥ अन्योन्यभक्षणासक्ता लोभमोहसमन्विताः ॥
इहैव परिवर्त्तन्ते न च यान्त्युत्तरां दिशम् ॥ १८ ॥ गुरूनुपासते ये तु नियता ब्रह्मचारिणः ॥ पंथानं सर्वलोकानां विजानंति मनीषिणः ॥ १९ ॥
इत्युक्तोऽयं मया धर्मः संक्षिप्तो ब्रह्मनिर्मितः ॥ धर्माधर्मौ हि लोकस्य यो वै वेत्ति स बुद्धिमान् ॥ २० ॥ भरद्वाज उवाच ॥ अध्यात्मं नाम यदिदं
पुरुषस्येह चिन्त्यते ॥ यदध्यात्मं यथा चैतत्तन्मे ब्रूहि तपोधन ॥ २१ ॥ भृगुरुवाच ॥ अध्यात्ममिति विप्रर्षे यदेतदनुपृच्छसि ॥ तद्व्याख्या
स्यामि ते तात श्रेयस्करतमं सुखम् ॥ २२ ॥ सृष्टिप्रलयसंयुक्तमाचार्यैः परिदर्शितम् ॥ यज्ज्ञात्वा पुरुषो लोके प्रीतिं सौख्यं च विंदति ॥२३ ॥
फललाभश्च तस्य स्यात्सर्वभूतहितं च तत् ॥ पृथिवी वायुराकाशमापो ज्योतिश्च पंचमम् ॥ २४ ॥ महाभूतानि भूतानां सर्वेषां प्रभवाप्ययौ ॥
यतः सृष्टानि तत्रैव तानि यान्ति लयं पुनः ॥ २५ ॥ महाभूतानि भूतेभ्यः सागरस्योर्मयो यथा ॥ प्रसार्य च यथांगानि कूर्मः संहरते पुनः ॥
॥ २६ ॥ तद्वद् भूतानि भूतात्मा सृष्टानि हरते पुनः ॥ महाभूतानि पंचैव सर्वभूतेषु भूतकृत् ॥२७॥अकरोत्तेषु वै सम्यक् तं तु जीवो न पश्यति ॥
शब्दः श्रोत्रं तथा खानि त्रयमाकाशयोनिजम् ॥ २८ ॥ वायोः स्पर्शस्तथा चेष्टा त्वक्चैव त्रितयं स्मृतम् ॥ रूपं चक्षुस्तथा पाकस्त्रिविधं
तेज उच्यते॥२९॥रसाः क्लेदश्च जिह्वा च त्रयो जलगुणाः स्मृताः ॥ घ्रेयं घ्राणं शरीरं च एते भूमिगुणास्त्रयः ॥३०॥ महाभूतानि पंचैव षष्ठं च मन
उच्यते ॥ इन्द्रियाणि मनश्चैव विज्ञातान्यस्य भारत ॥३१॥सप्तमी बुद्धिरित्याहुः क्षेत्रज्ञः पुनरष्टमः ॥ श्रोत्रं वै श्रवणार्थाय स्पर्शनाय च त्वक् स्मृता
॥३२ ॥ रसादानाय रसना गन्धादानाय नासिका ॥ चक्षुरालोकनायैव संशयं कुरुते मनः ॥३३॥ बुद्धिरध्यवसानाय क्षेत्रज्ञः साक्षिवत्स्थितः ॥उर्द्धं
पादतलाभ्यां यदवाक्चोदक्च पश्यति॥३४॥एतेन सर्वमेवेदं विभुना व्याप्तमन्तरम्॥ पुरुषैरिंद्रियाणीह वेदितव्यानि कृत्स्नशः॥३५॥तमो रजश्च सत्त्वं
च तेऽपि भावास्तदाश्रिताः ॥ एतां बुद्धिं नरो बुद्ध्वा भूतानामगतिं गतिम् ॥३६॥समवेक्ष्य शनैश्चैवं लभते शममुत्तमम्॥गुणैर्विनश्यते बुद्धिर्बुद्धेरेवेंद्रिया
ण्यपि ॥ ३७ ॥ मनःषष्ठानि भूतानि बुद्ध्यभावे कुतो गुणाः ॥ इति तन्मयमेवैतत्सर्वं स्थावरजंगमम् ॥ ३८ ॥ प्रलीयते चोद्भवति तस्मान्निर्दिश्यते
तथा ॥ येन पश्यति तच्चक्षुः शृणोति श्रोत्रमुच्यते ॥ ३९ ॥ जिघ्रति घ्राणमित्याहुः रसं जानाति जिह्वया ॥ त्वचा स्पर्शयति स्पर्शं बुद्धिर्विक्रियते
सकृत् ॥ ४० ॥ येन प्रार्थयते किंचित्तदा भवति तन्मनः ॥ अधिष्ठानात्तु बुद्धेर्हि पृथगर्थानि पंचधा ॥ ४१ ॥ इंद्रियाणीति तान्याहुस्तान्यदृश्यो
ऽधितिष्ठति ॥ पुरुषे तिष्ठती बुद्धिस्त्रिषु भावेषु वर्तते॥४२॥ कदाचिल्लभते प्रीतिं कदाचिदुपशोचति॥न सुखेन न दुःखेन कदाचिदपि वर्तते ॥४३॥

एवं नराणां मनसि त्रिषु भावेषु वर्तते ॥ सेयं भावात्मिका भावांस्त्रीनेतानतिवर्तते ॥ ४४ ॥ सरितां सागरो भर्ता वेलानामिव वारिधिः ॥ अतिभावगता बुद्धिर्भावैर्मनसि वर्तते ॥ ४५ ॥ वर्तमानो मुनिस्त्वेवं स्वभावमनुवर्तते ॥ इंद्रियाणि हि सर्वाणि प्रवर्तयति सा सदा ॥ ४६ ॥ प्रीतिः सत्त्वं रजः शोकस्तमः क्रोधस्तु ते त्रयः॥ये ये च भावा लोकेऽस्मिन्सर्वे प्यंतेषु वै त्रिषु॥४७॥इति बुद्धिगताः सर्वा व्याख्यातास्तव भावनाः॥इंद्रियाणि च सर्वाणि विजेतव्यानि धीमता॥४८॥सत्त्वं रजस्तमश्चैव प्राणिनां संश्रिताः सदा॥त्रिविधा वेदनाश्चैव सर्वसत्त्वेषु दृश्यते ॥४९॥ सात्त्विकी राजसी चैव तामसी चेति मानद॥सुखस्पर्शःसत्त्वगुणो दुःखस्पर्शो रजोगुणः॥५०॥तमोगुणेन संयुक्तौ भवतो व्यावहारिकौ॥तव यत्प्रीतिसंयुक्तं काये मनसि वा भवेत्॥५१॥ वर्तते सात्त्विको भाव इत्याचक्षीत तत्तथा॥अथ यद्दुःखसंयुक्तमप्रीतिकरमात्मनः॥५२॥प्रवृत्तं रज इत्येव जानीहि मुनिसत्तम॥अथ यन्मोहसंयुक्तमव्यक्तविषयं भवेत् ॥ ५३ ॥ अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् ॥ प्रहर्षः प्रीतिरानंदः सुखं वा शान्तचित्तता॥५४॥कथंचिदभिवर्तन्त इत्येते सात्त्विका गुणाः॥अतुष्टिः परितापश्च शोको लोभस्तथा क्षमा ॥ ५५ ॥ लिंगानि रजसस्तानि दृश्यंते देहहेतुभिः ॥ अपमानस्तथा मोहः प्रमादः स्वप्नतंद्रिते ॥ ५६ ॥ कथंचिदभिवर्तंते विविधास्तामसा गुणाः ॥ दूषणं बहुधागामि प्रार्थनासंशयात्मकम् ॥ ५७ ॥ मनः स्वनियतं यस्य स सुखी प्रेत्य चेह च ॥सत्त्वक्षेत्रज्ञयोरेतदन्तरं यस्य सूक्ष्मयोः ॥ ५८ ॥ सृजते गुणानेक एको न सृजते गुणान् ॥ मशकोदुंबरौ वापि संप्रयुक्तौ यथा सदा ॥ ॥ ५९ ॥ अन्योन्यमेतौ स्यातां च सप्रयोगस्तथोभयोः ॥ पृथग्भूतौ प्रकृत्या तौ संप्रयुक्तौ च सर्वदा ॥ ६० ॥ यथा मत्स्यो जलं चैव संप्रयुक्तो तथैव तौ ॥ न गुणा विदुरात्मानं स गुणान्वेत्ति सर्वशः ॥ ६१ ॥ परिद्रष्टा गुणानां तु संस्रष्टा मन्यते तथा ॥ इन्द्रियस्तु प्रदीपार्थं कुरुते बुद्धिसत्तमैः ॥ ६२ ॥ निर्विचेष्टैरजानद्भिः परमात्मा प्रदीपवान् ॥ सृजते हि गुणान्सत्त्वं क्षेत्रज्ञः परिपश्यति ॥ ६३ ॥ संप्रयोगस्तयोरेष सत्त्वक्षेत्रज्ञयोर्ध्रुवम् ॥ आश्रयो नास्ति सत्त्वस्य क्षेत्रज्ञस्य च कश्चन ॥ ६४ ॥ सत्त्वं मनः संसृजते न गुणान्वै कदाचन ॥ रश्मींस्तेषां स मनसा यदा सम्यङ्नियच्छति ॥ ६५ ॥ तदा प्रकाशतेऽस्यात्मा घटे दीपो ज्वलन्निव॥त्यक्त्वा यः प्राकृतं कर्म नित्यमात्मरतिर्मुनिः ॥ ६६ ॥ सर्वभूतात्मभूस्तस्मात्स गच्छेदुत्तमां गतिम् ॥ यथा वारिचरः पक्षी सलिलेन न लिप्यते ॥ ६७ ॥ एवमेव कृतप्रज्ञो भूतेषु परिवर्तते ॥ एवं स्वभावमेवैतत्स्वबुद्ध्या विहरेन्नरः ॥ ॥ ६८ ॥ अशोचन्नप्रहृष्यंश्च समो विगतमत्सरः ॥ भावयुक्त्या प्रयुक्तस्तु स नित्यं सृजते गुणान् ॥ ६९ ॥ ऊर्णनाभिर्यथा सूत्रं विज्ञेयास्तंतुवद्गुणाः ॥ प्रध्वस्ता न निवर्तंते निवृत्तिर्नोपलभ्यते ॥ ७० ॥ प्रत्यक्षेण परोक्षं तदनुमानेन सिद्ध्यति ॥ एवमेके व्यवस्यंति निवृत्तिरिति चापरे ॥७१॥

उभयं संप्रधार्यैतद्व्यवस्येत यथामति ॥ इतीमं हृदयग्रथिं बुद्धिचिन्तामयं दृढम् ॥ ७२ ॥ विमुच्य सुखमासीत न शोचेच्छिन्नसंशयः ॥
मलिनाः प्राप्नुयुः शुद्धिं यथा पूर्णां नदीं नराः ॥७३॥ अवगाह्य सुविद्वांसो विद्धि ज्ञानमिदं तथा ॥ महानद्या हि पारज्ञस्तप्यते न तरन्यथा॥७४॥
न तु तप्यति तत्त्वज्ञः कुलज्ञस्तु तरत्युत ॥ एवं ये विदुरध्यात्मं कैवल्यं ज्ञानमुत्तमम् ॥ ७५ ॥ एवं बुद्धा नरः सर्वो भूतानामगतिं गतिम् ॥ अवेक्ष्य
च शनैर्बुद्ध्या लभते च शमं ततः ॥ ७६ ॥ त्रिवर्गो यस्य विदितः प्रेक्ष्य यश्च विमुंचति ॥ अन्विष्य मनसा युक्तस्तत्त्वदर्शी निरुत्सुकः ॥ ७७॥
न चात्मा शक्यते द्रष्टुमिंद्रियेषु विभागशः तत्र तत्र विसृष्टेषु दुर्वापेष्वकृतात्माभिः॥७८॥एतद् बुद्धा भवेद् बुद्धः किमन्यद् बुद्धलक्षणम् ॥विज्ञाय
तद्धि मन्यन्ते कतकृत्या मनीषिणः ॥७९॥ न भवति विदुषां ततो भयं यदविदुषां सुमहद्भयं भवेत् ॥ नहि गतिरधिकास्ति कस्यचित्सति हि गुणे
प्रवदत्यतुल्यताम्॥८०॥यः करोत्यनभिसंधिपूर्वकं तच्च निर्दहति यत्पुराकृतम्॥नाप्रियं तदुभयं कुतः प्रियं तस्य तज्जनयतीह कुर्वतः॥८१॥ लोकमायुर
भिसूयते जनस्तस्य तज्जनयतीह कुर्वतः ॥ तत्र पश्य कुशलान्न शोचते जायते यदि भयं पदं सदा ॥८२॥ भरद्वाज उवाच॥ध्यानयोगं समाचक्ष्व
मह्यं तत्पदसिद्धये ॥ यज्ज्ञात्वा मुच्यते ब्रह्मन्नरस्त्रिविधतापतः ॥ ८३ ॥ भृगुरुवाच॥ हंत ते संप्रवक्ष्यामि ज्ञानयोगं चतुर्विधम्॥ यं ज्ञात्वा शाश्वतीं
सिद्धिं गच्छन्तीह महर्षयः ॥ ८४ ॥ यथा स्वनुष्ठितं ध्यानं तथा कुर्वन्ति योगिनः ॥ महर्षयो ज्ञानतृप्ता निर्वाणगतमानसाः ॥ ८५ ॥ नावर्तंते पुन
श्चापि मुक्ताः संसारदोषतः ॥ जन्मदोषपारक्षीणाः स्वभावे पयवस्थिताः ॥ ८६ ॥ निर्द्वन्द्वा नित्यसत्त्वस्था विमुक्ता निष्परिग्रहाः ॥ असंगान्य
विधादीनि मनःशांतिकराणि च ॥ ८७ ॥ तत्र ध्यानेन संक्लिष्टमेकाग्रं धारयेन्मनः ॥ पिंडीकृत्येन्द्रियग्राममासीनः काष्ठवन्मुनिः ॥ ८८ ॥
शब्दं न विंदेच्छ्रोत्रेण त्वचा स्पर्शं न वेदयेत् ॥ रूपं न चक्षुषा विद्याज्जिह्वया न रसांस्तथा ॥ ८९ ॥ घ्रेयाण्यपि च सर्वाणि जह्याद्ध्यानेन तत्त्व
वित् ॥ पंचवर्गप्रमाथीनि नेच्छेच्चैतानि वीर्यवान् ॥ ९०॥ ततो मनसि संगृह्य पंचवर्गं विचक्षणः ॥ समादध्यान्मनो भ्रांतमिंद्रियैः सह पञ्चभिः ॥
॥ ९१ ॥ विसञ्चारि निरालम्बं पंचद्वारं बलाबलम् ॥ पूर्वध्यानपथे धीरः समादध्यान्मनस्त्वरा ॥ ९२ ॥ इन्द्रियाणि मनश्चैव यदा पिण्डीकरोत्य
यम् ॥ एष ध्यानपथः पूर्वो मया समनुवर्णितः ॥ ९३ ॥ तस्य तत्पूर्वसंरुद्ध आत्मषष्ठमनंतरम्॥ स्फुरिष्यति समुद्भ्रांता विद्युदम्बुधरे यथा ॥ ९४ ॥
जलबिंदुर्यथा लोलः पर्णस्थः सर्वतश्चलः ॥ एवमेवास्य चित्तं च भवति ध्यानवर्त्मनि ॥ ९५ ॥ समाहितं क्षणं किंजिद्ध्यानवर्त्मनि तिष्ठति ॥
पुनर्वायुपथं भ्रांतं मनो भवति वायुवत् ॥ ९६ ॥ अनिर्वेदो गतक्लेशो गततंद्रो ह्यमत्सरी ॥ समादध्यात्पुनश्चेतो ध्यानेन ध्यानयोगवित् ॥ ९७ ॥

विचारश्च वितर्कश्च विवेकश्चोपजायते ॥मुनेः समाधियुक्तस्य प्रथमं ध्यानमादितः ॥ ९८ ॥ मनसा क्लिश्यमानस्तु समाधानं च कारयेत् ॥
न निर्वेदं मुनिर्गच्छेत्कुर्यादेवात्मनो हितम् ॥ ९९ ॥ पांशुभस्मकरीषाणां यथा वै राशयश्चिताः ॥ सहसा वारिणा सिक्ता न यांति परिभावनाः ॥
॥१००॥ किंचित् स्निग्धं यथा च स्याच्छुष्कं चूर्णमभावितम् ॥ क्रमेण तु शनैर्गच्छेत्सर्वं तत्परिभावनम् ॥ १०१॥एवमेवेन्द्रियग्रामं शनैः शं परि
भावयेत् ॥ संहरेत्क्रमशश्चैव सम्यक् तत्प्रशमिष्यति ॥१०२ ॥ स्वयमेव मनश्चैवं पंचवर्गं मुनीश्वर ॥पूर्वं ध्यानपथे स्थाप्य नित्ययोगेन शाम्यति॥
॥१०३॥ न तत्पुरुषकारेण न च दैवेन केनचित् ॥ सुखमेष्यति तत्तस्य यदेवं संयतात्मनः ॥ १०४ ॥ सुखेन तेन संयुक्तो रंस्यते ध्यानकर्मणि ॥
गच्छंति योगिनो ह्येवं निर्वाणं तु निरामयम् ॥ १०५ ॥ सनंदन उवाच ॥ इत्युक्तो भृगुणा ब्रह्मन्भरद्वाजः प्रतापवान् ॥ भृगुं परमधर्मात्मा
विस्मितः प्रत्यपूजयत्॥ १०६॥एष ते प्रसवो विद्वन् जगतः संप्रकीर्तितः॥निखिलेन महाप्राज्ञ किं भूयःश्रोतुमिच्छसि॥१०७॥इति श्रीबृहन्नारदीयपुराणे
द्वितीयपादे चतुश्चत्वारिंशत्तमोऽध्यायः ॥४४॥ सूत उवाच ॥ सनंदनवचः श्रुत्वा मोक्षधर्माश्रितं द्विजाः ॥ पुनः पप्रच्छ तत्त्वज्ञो नारदोऽध्यात्म
सत्कथाम् ॥ १ ॥ नारद उवाच ॥ श्रुतं मया महाभाग मोक्षशास्त्रं त्वयोदितम् ॥ न च मे जायते तृप्तिर्भूयोभूयोऽपि शृण्वतः ॥२ ॥ यथा संमुच्यते
जंतुरविद्याबंधनान्मुने ॥ तथा कथय सर्वज्ञ मोक्षधर्मं सदाश्रितम् ॥ ३ ॥ सनंदन उवाच ॥ अत्राप्युदाहरंतीममितिहासं पुरातनम् ॥ यथा मोक्षमनु
प्राप्तो जनको मिथिलाधिपः ॥ ४ ॥ जनको जनदेवस्तु मिथिलाया अधीश्वरः ॥ और्ध्वदेहिकधर्माणामासीद्युक्तो विचिंतने ॥ ५ ॥ तस्य श्मशान
माचार्या वसति सततं गृहे ॥ दर्शयंतः पृथग्धर्मान्नानापाषंडवादिनः ॥ ६ ॥ स तेषां प्रेत्यभावे च प्रेत्य जातौ विनिश्चये आगमस्थः स भूयिष्ठ
मात्मतत्त्वेन तुष्यति ॥ ७ ॥ तत्र पंचशिखो नाम कापिलेयो महामुनिः ॥ परिधावन्महीं कृत्स्नां जगाम मिथिलामथ ॥ ८ ॥ सर्वसंन्यासधर्माणः
तत्त्वज्ञानविनिश्चये ॥ सुपर्यवसितार्थश्च निर्द्वंद्वो नष्टसंशयः ॥ ९ ॥ ऋषीणामाहुरेकं यं कामादवसितं नृषु ॥ शाश्वतं सुखमत्यंतमन्विच्छन्स सुदु
र्लभम्॥१०॥ यमाहुः कपिलं सांख्याः परमर्षिं प्रजापतिम्॥स मन्ये तेन रूपेण विख्यापयति हि स्वयम्॥११॥ आसुरेः प्रथमं शिष्यं यमाहुश्चिरजी
विनम्॥पंचस्रोतसि यः सत्रमास्ते वर्षसहस्रकम्॥१२॥पंचस्रोतसमागम्य कापिलं मंडलं महत्॥पुरुषावस्थमव्यक्तं परमार्थं न्यवेदयत्॥१३॥इष्टिमंत्रेण
संयुक्तो भूयश्च तपसासुरिः॥क्षेत्रक्षेत्रज्ञयोर्व्यक्तिं विबुधे देहदर्शनः॥१४॥यत्तदेकाक्षरं ब्रह्म नानारूपं प्रदृश्यते॥आसुरिर्मंडले तस्मिन्प्रतिपेदे तमव्ययम्॥
॥ १५ ॥ तस्य पंचशिखः शिष्यो मानुष्या पयसा भृतः ॥ ब्राह्मणी कपिली नाम काचिदासीत्कुटुम्बिनी ॥१६॥ तस्यः पुत्रत्वमागत्य स्त्रियाः स

पिबति स्तनौ ॥ ततश्च कापिलेयत्वं लेभे बुद्धिं च नैष्ठिकीम् ॥१७॥एतन्मे भगवानाह कापिलेयस्य संभवम् ॥ तस्य तत्कापिलेयत्वं सर्ववित्त्वमनु
त्तमम् ॥ १८ ॥ सामात्यो जनको ज्ञात्वा धर्मज्ञो ज्ञानिनं मुने ॥ उपेत्य शतमाचार्यान्मोहयामास हेतुभिः ॥ १९ ॥ जनकस्त्वभिसंरक्तः कापि
लेयानुदर्शनम् ॥ उत्सृज्य शतमाचार्यान्पृष्ठतोऽनुजगाम तम्॥२० ॥तस्मै परमकल्याणं प्रणताय च धर्मतः॥ अब्रवीत्परमं मोक्षं यत्तत्सांख्यं विधी
यते ॥ २१ ॥ जातिनिर्वेदमुक्त्वा स कर्मनिर्वेदमब्रवीत् ॥ कर्मनिर्वेदमुक्त्वा च सर्वनिर्वेदमब्रवीत् ॥२२ ॥ यदर्थं धमसंसर्गः कर्मणां च फलोदयः॥
तमनाश्वासिकं मोहं विनाशि चलमध्रुवम् ॥२३ ॥ दृश्यमाने विनाशे च प्रत्यक्षे लोकसाक्षिके ॥आगमात्परमस्तीति ब्रुवन्नपि पराजितः ॥ २४ ॥
अनात्मा ह्यात्मनो मृत्युः क्लेशो मृत्युर्जरामयः ॥ आत्मानं मन्यते मोहात्तदसम्यक् परं मतम् ॥२५॥अथ चेदेवमप्यस्ति यल्लोके नोपपद्यते ॥अज
रोऽयममृत्युश्च राजासौ मन्यते यथा॥ २६ ॥ अस्ति नास्तीति चाप्येतत्तस्मिन्नसितलक्षणे ॥ किमधिष्ठाय तद् ब्रूयाल्लोकयात्राविनिश्चयम् ॥ २७ ॥
प्रत्यक्षं ह्येतयोर्मूलं कृतांतं ह्येतयोरपि ॥ प्रत्यक्षो ह्यागमो भिन्नः कृतांतो वा न किंचन ॥ २८ ॥ यत्र तत्रानुमानेऽस्मिन्कृतं भावयतेऽपि च॥ अन्यो
जीवः शरीरस्य नास्तिकानां मते स्तिः ॥ २९ ॥ रेतोवटकणीकायां घृतपाकाधिवासनम् ॥ जातिस्मृतिरयस्कांतः सूर्यकांतोऽबुभक्षणम् ॥ ३० ॥
प्रेतभूतप्रियश्चैव देवता ह्युपयाचनम् ॥ मृतकर्मनिवृत्तिं च प्रमाणमिति निश्चयः ॥ ३१ ॥ नन्वेते हेतवः संति ये केचिन्मूर्तिसस्थिताः ॥ अमू
तस्य हि मूर्तेन सामान्यं नोपलभ्यते ॥ ३२ ॥ अविद्या कर्म तृष्णा च केचिदाहुः पुनर्भवम् ॥ तस्मिन्नष्टे च दग्धे च चित्ते मरणधर्मिणि॥३३॥
अन्योऽस्माज्जायते मोहस्तमाहुः सत्त्वसंक्षयम् ॥ यदा सरूपतश्चान्यो जातितः श्रुततोऽर्थतः॥ ३४ ॥कथमस्मिन्स इत्येव संबंधः स्यादसंहितः ॥
एवं सति च का प्रीतिर्ज्ञानविद्यातपोबलैः ॥ ३५ ॥ यदस्याचरितं कर्म सामान्यात्प्रतिपद्यते ॥ अपि त्वयमिहैवान्यैः प्राकृतैर्दुःखितो भवेत् ॥३६॥
सुखितो दुःखितो वापि दृश्यादृश्यविनिर्णयः ॥ यथा हि मुशलैर्हन्युः शरीरं तत्पुनर्भवेत् ॥ ३७ ॥ वृथा ज्ञानं यदन्यच्च येनैतन्नोपलभ्यते ॥ ऋतुम
संवत्सरौ तिष्यः शीतोष्णोऽथ प्रियाप्रिये ॥ ३८ ॥ यथा तातानि पश्यति तादृशः सत्त्वसंक्षयः॥ जरयाभिपरीतस्य मृत्युना च विनाशितम् ॥३९॥
दुर्बलं दुर्बलं पूर्वं गृहस्येव विनश्यति ॥ इन्द्रियाणि मनो वायुः शोणितं मांसमस्थि च ॥४०॥आनुपूर्व्या विनश्यंति स्वं धातुमुपयाति च॥ लोक
यात्राविघातश्च दानधर्मफलागमे ॥ ४१ ॥ तदर्थं वेदशब्दाश्च व्यवहाराश्च लौकिकाः ॥ इति सम्यङ् मनस्येते बहवः संति हेतवः ॥ ४२ ॥ एत
दस्तीति नास्तीति न कश्चित्प्रतिदृश्यते ॥ तेषां विमृशतामेव तत्सम्यगभिधावताम् ॥ ४३ ॥ क्वचिन्निवसते बुद्धिस्तत्र जीर्याति वृक्षवत् ॥ एवतु

र्थैरनर्थैश्च दुःखिताः सर्वजंतवः ॥ ४४ ॥ आगमैरपकृष्यंते हस्तिपैर्हस्तिनो यथा ॥ ४५ ॥ अर्थांस्तथा हंति सुखावहांश्च लिहंत एते बहवोपशु
ष्काः ॥ महत्तरं दुःखमभिप्रपन्ना हित्वामिषं मृत्युवशं प्रयांति॥४६॥ विनाशिनो ह्यध्रुवजीविनः किं किं बंधुभिामत्रपरिग्रहैश्च ॥ विहाय यो गच्छति
सर्वमेव क्षणेन गत्वा न निवर्तते च ॥ ४७ ॥ भूव्योमतोयानलवायवोऽपि सदा शरीरं प्रतिपालयंति ॥ इतीदमालक्ष्य रतिः कुतो भवेद्विनाशि
नाप्यस्य न शर्म विद्यते ॥ ४८ ॥ इदमनुपधिवाक्यमच्छलं परमनिरामयमात्मसाक्षिकम् ॥ नरपतिरभिवीक्ष्य विस्मितः पुनरनुयोक्तुमिदं प्रचक्रमे
॥ ४९ ॥ जनक उवाच ॥ भगवन्यदि न प्रेत्य संज्ञा भवति कस्यचित् ॥ एवं सति किमज्ञानं ज्ञानं वा किं करिष्यति ॥ ५० ॥ सर्वमुच्छेदनिष्ठं
स्यात्पश्य चैतद्द्विजोत्तम॥अप्रमत्तः प्रमत्तो वा किं विशेषं करिष्यति॥५१॥असंसर्गो हि भूतेषु संसर्गो वा विनाशिषु॥कस्मै क्रियेत कल्पेत निश्चयः
कोऽत्र तत्त्वतः॥५२॥सनंदन उवाच ॥ तमसा हि मतिच्छत्रं विभ्रांतमिव चातुरम् ॥ पुनः प्रशमयन्वाक्यैः कविः पंचशिखोऽब्रवीत्॥५३॥ पंच
शिख उवाच ॥ उच्छेदनिष्ठा नेहास्ति भावनिष्ठा न विद्यते ॥ अयं ह्यपि समाहारः शरीरेंद्रियचेतसाम् ॥ ५४ ॥ वर्तते पृथगन्योन्यमप्युपाश्रित्य
कर्मसु॥ धातवः पंचधा तोयं खे वायुर्ज्योतिषो धरा ॥ ५५ ॥ तेषु भावेन तिष्ठंति वियुज्यंते स्वभावतः॥ आकाशं वायुरूष्मा च स्नेहो यश्चापि
पार्थिवः ॥ ५६ ॥ एष पञ्चसमाहारः शरीरमपि नैकधा ॥ ज्ञानमूष्मा च वायुश्च त्रिविधः कायसंग्रहः॥ ५७ ॥ इंद्रियाणींद्रियार्थाश्च स्वभावश्चेतना
मनः ॥ ॥ प्राणापानौ विकारश्च धातवश्चात्र निःसृताः ॥ ५८ ॥ श्रवणं स्पर्शनं जिह्वा दृष्टिर्नासा तथैव च॥इंद्रियाणीति पंचैते चित्तपूर्वंगमा गुणाः॥
॥ ५९ ॥ तत्र विज्ञानसंयुक्ता त्रिविधा चेतना वा ॥ सुखदुःखेति यामाहुरनदुःखासुखेति च ॥ ६० ॥ शब्दः स्पर्शश्च रूपं च मूर्त्यर्थमेव ते
त्रयः ॥ एते ह्यामरणात्पंच सद्गुणा ज्ञानसिद्धये ॥ ६१ ॥ तेषु कर्मणि सिद्धिश्च सर्वतत्त्वार्थनिश्चयः ॥ तमाहुः परमं शुद्धं बुद्धिरित्यव्ययं महत्॥६२॥
इमं गुणसमाहारमात्मभावेन पश्यतः ॥ असम्यग्दर्शनैर्दुःखमनंतं नोपशाम्यति ॥ ६३ ॥ अनात्मेति च यद्दृष्टं तेनाहं न ममेत्यपि ॥ वर्तते किम
धिष्ठानात्प्रसक्ता दुःखसंततिः ॥ ६४॥ तत्र सम्यग्जनो नाम त्यागशास्त्रमनुत्तमम् ॥ शृणुयात्तच्च मोक्षाय भाष्यमाणं भविष्यति ॥६५॥त्याग एव
हि सर्वेषामुक्तानामपि कर्मणाम् ॥ नित्यं मिथ्याविनीतानां क्लेशो दुःखावहो मतः ॥ ६६ ॥ द्रव्यत्यागे तु कर्माणि भोगत्यागे व्रतानि च ॥ सुख
त्यागे तपो योगं सर्वत्यागे समापना ॥ ६७ ॥ तस्य मार्गोऽयमद्वैधः सर्वत्यागस्य दर्शितः ॥ विप्रहाणाय दुःखस्य दुर्गतिर्हि तथा भवेत् ॥ ६८ ॥
पंच ज्ञानेंद्रियाण्युक्त्वा मनःषष्ठानि चेतसि ॥ बलषष्ठानि वक्ष्यामि पंच कर्मेंद्रियाणि तु ॥ ६९ ॥ हस्तौ कर्मेंद्रियं ज्ञेयमथ पादौ गतींद्रियम् ॥ प्रज

नानंदयोमेढ्रो विसर्गो पायुरिंद्रियम् ॥ ७० ॥ वाक्च शब्दविशेषार्थमिति पंचान्वितं विदुः ॥ एवमेकादशैतानि बुद्ध्या त्ववसृजन्मनः ॥ ७१ ॥
कर्णौ शब्दश्च चित्तं च त्रयः श्रवणसंग्रहे ॥ तथा स्पर्शे तथा रूपे तथैव रसगंधयोः ॥ ७२ ॥ एवं पंच त्रिका ह्येते गुणस्तदुपलब्धये ॥ येनायं
त्रिविधो भावः पर्यायात्समुपस्थितः ॥ ७३ ॥ सात्त्विको राजसश्चापि तामसश्चापि ते त्रयः ॥ त्रिविधा वेदना येषु प्रसृता सर्वसाधिनी ॥ ७४ ॥
प्रहर्षः प्रीतिरानंदः सुखं संशान्तचित्तता ॥ अकुतश्चित्कुतश्चिद्वा चित्ततः सात्त्विको गुणः ॥ ७५ ॥ अतुष्टिः परितापश्च शोको लोभस्तथाऽक्षमा ॥
लिंगानि रजसस्तानि दृश्यंते हेत्वहेतुतः ॥ ७६ ॥ अविवेकस्तथा मोहः प्रमादः स्वप्नतंद्रिता ॥ कथंचिदपि वर्तंते विविधास्तामसा गुणाः ॥७७ ॥
इमां च यो वेद विमोक्षबुद्धिमात्मानमन्विच्छति चाप्रमत्तः ॥ न लिप्यते कर्मफलैरनिष्टैः पत्रं विषस्येव जलेन सिक्तम् ॥ ७८ ॥ दृढैर्हि पाशैर्विवि
धैर्विमुक्तः प्रजानिमित्तैरपि दैवतैश्च ॥ यदा ह्यसौ दुःखसौख्ये जहाति मुक्तस्तदाऽग्र्यां गतिमेत्यलिंगः ॥ ७९ ॥ श्रुतिप्रमाणागममंगलैश्च शेते जरामृ
त्युभयादतीतः ॥ क्षीणे च पुण्ये विगते च पापे तनोर्निमित्ते च फले विनष्टे ॥ ८० ॥ अलेपमाकाशमलिंगमेवमास्थाय पश्यंति महत्यशक्ता ॥
यथोर्णनाभिः परिवर्तमानस्तंतुक्षये तिष्ठति यात्यमानः ॥ ८१ ॥ तथा विमुक्तः प्रजहाति दुःखं विध्वंसते लोष्टमिवादिमृच्छन् ॥ यथा रुरुः शृंग
मथो पुराणं हित्वा त्वचं वाप्युरगो यथा च ॥ ८२ ॥ विहाय गच्छन्ननवेक्षमाणस्तथा विमुक्तो विजहाति दुःखम् ॥ मत्स्यं यथा वाप्युदके पतंतमु
त्सृज्य पक्षी निपतत्यशक्तः ॥ ८३ ॥ तथा ह्यसौ दुःखसौख्ये विहाय मुक्तः परार्द्ध्यां गतिमेत्यलिंगः॥८४॥ इदममृतपदं निशम्य राजा स्व ग्रमिह
पंचशिखेन भाष्यमाणम् ॥ निखिलमभिसमीक्ष्य निश्चितार्थः परमसुखी विजहार वीतशोकः॥८५॥ अपि च भवति मैथिलेन गीतं नगरमुपाहितम
ग्निनाभिवीक्ष्य ॥ न खलु मम हि दह्यतेऽत्र किंचित्स्वयमिदमाह किल स्म भूमिपालः॥८६॥ इमं हि यः पठति विमोक्षनिश्चयं महामुने सततमवेक्षते
तथा॥उपद्रवाननुभवते ह्यदुःखितः प्रमुच्यते कपिलमिवैत्य मैथिलः॥८७॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने द्वितीयपादे पञ्चचत्वारिंशत्तमो
ऽध्यायः॥४५॥सूत उवाच ॥ तच्छुत्वा नारदो विप्रा मैथिलाध्यात्मसुत्तमम् ॥ पुनः पप्रच्छ तं प्रीत्या सनंदनमुदारधीः॥ १ ॥ नारद उवाच॥आध्या
त्मिकादित्रिविधं तापं नानुभवेद्यथा॥ प्रब्रूहि तन्मुने मह्यं प्रपन्नाय दयानिधे॥२॥ सनंदन उवाच ॥ तदस्य त्रिविधं दुःखमिह जातस्य पंडित॥ गर्भे
जन्मजराद्येषु स्थानेषु प्रभविष्यतः॥३॥निरस्तातिशयाह्लादसुखभावैकलक्षणा ॥ भेषजं भगवत्प्राप्तिरैका चात्यंतिकी मता ॥४॥ तस्मात्तत्प्राप्तये यत्नः
कर्तव्यः पंडितैर्नरैः ॥ तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं महामुने॥ ५ ॥ आगमोत्थं विवेकाच्च द्विधा ज्ञानं तथोच्यते ॥ शब्दब्रह्मागममयं परं ब्रह्म

विवेकजम् ॥ ६ ॥ मनुरप्याह वेदार्थं स्मृत्वायं मुनिसत्तमः ॥ तदेतच्छ्रूयतामत्र सुबोधं गदतो मम ॥ ७ ॥ द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च
यत् ॥ शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥८॥ द्वे विद्ये वेदितव्ये चेत्याह चाथर्वणी श्रुतिः ॥ परमा त्वक्षरप्राप्तिर्ऋग्वेदादिमया परा॥ ९॥
यत्तदव्यक्तमजरमनीहमजमव्ययम् ॥ अनिर्देश्यमरूपं च पाणिपादादिसंयुतम् ॥१०॥ विभुं सर्वगतं नित्यं भूतयोनिमकारणम् ॥ व्याप्यं व्याप्तं यतः
सर्वं तं वै पश्यंति सूरयः ॥११॥ तद्ब्रह्म तत्परं धाम तद्ध्येयं मोक्षकांक्षिभिः ॥ श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्॥१२॥ तदेव भगवद्वाच्यं
स्वरूपं परमात्मनः ॥ वाचको भगवच्छब्दस्तस्योद्दिष्टोऽक्षयात्मनः ॥ १३ ॥ एवं निगदितार्थस्य यत्तत्वं तस्य तत्त्वतः ॥ ज्ञायते येन तज्ज्ञानं परमन्य
त्रयीमयम् ॥ १४ ॥ अशब्दगोचरस्यापि तस्य वै ब्रह्मणो द्विज॥पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः॥१५॥ शुद्धे महाविभूत्याख्ये परे ब्रह्मणि
वर्त्तते ॥भगवन्भगवच्छब्दः सर्वकारणकारणे॥ १६॥ज्ञेयं ज्ञातेति तथा भकारोऽर्थद्वयात्मकः॥तेनागमपिता स्रष्टा गकारोऽयं तथा मुने॥ १६॥ ऐश्व
र्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ॥ ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥ १७ ॥ वसंति तत्र भूतानि भूतात्मन्यखिलात्मनि ॥ सर्वभूते
ष्वशेषेषु वकारार्थस्ततोऽव्ययः ॥ १८ ॥ एवमेव महाशब्दो भगवानिति सत्तम ॥ परमब्रह्मभूतस्य वासुदेवस्य नान्यगः ॥ १९ ॥ तत्र पूज्यपदार्थोक्तिः
परिभाषासमन्वितः ॥ शब्दोऽयं नोपचारेण चान्यत्र ह्युपचारतः ॥ २० ॥ उत्पत्तिं प्रलय चव भूतानामागतिं गतिम् ॥ वेत्ति विद्यामविद्यां च
स वाच्यो भगवानिति ॥ २१ ॥ ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ॥ भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥ २२ ॥ सर्वाणि तत्र भूतानि
वसंति परमात्मनि ॥ भूतेषु वसनादेव वासुदेवस्ततः स्मृतः ॥ २३ ॥ खांडिक्यं जनकं प्राह पृष्टः केशिध्वजः पुरा ॥ नामव्याख्यामनंतस्य वासुदेवस्य
तत्त्वतः॥२४॥भूतेषु वसते सोंऽतर्वसंत्यत्र च तानि यत्॥धाता विधाता जगतां वासुदेवस्ततः प्रभुः॥२५॥स सर्वभूतप्रकृतिं विकारं गुणादिदोषांश्च मुने
व्यतीतः ॥ अतीतसर्वावरणोऽखिलात्मा तेनास्तृतं यद्भुवनांतरालम् ॥ २६॥ समस्तकल्याणगुणं गुणात्मको हित्वातिदुःखावृतभूतसर्गः ॥ इच्छागृही
ताभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ ॥ २७ ॥ तजोबलैश्वर्यमहावबोधं स्ववीर्यशक्त्यादिगुणैकराशिः ॥ परः पराणां सकला न यत्र
क्लेशादयः संति परावरेशे ॥ २८ ॥ स ईश्वरो व्यष्टिसमष्टिरूपोऽव्यक्तस्वरूपः प्रकटस्वरूपः ॥ सर्वेश्वरः सर्वनिसर्गवेत्ता समस्तशक्तिः पर
मेश्वराख्यः ॥ २९ ॥ स ज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेव रूपम् ॥ संदृश्यते चाप्यवगम्यते च तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ॥ ३० ॥
स्वाध्यायसंयमाभ्यां स दृश्यते पुरुषोत्तमः ॥ तत्प्राप्तिकारणं ब्रह्म तदेतत्प्रतिपद्यते ॥ ३१ ॥ स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमामनेत् ॥

स्वाध्याययोगसंपत्त्या परमात्मा प्रकाशते ॥ ३२ ॥ तदीक्षणाय स्वाध्यायश्चक्षुर्योगस्तथापरम् ॥ न मांसचक्षुषा द्रष्टुं ब्रह्मभूतः स शक्यते ॥ ३३ ॥
॥ नारद उवाच ॥ भगवंस्तमहं योगं ज्ञातुमिच्छामि तं वद ॥ ज्ञाते यत्राखिलाधारं पश्येयं परमेश्वरम् ॥ ३४ ॥ सनंदन उवाच ॥ केशिध्वजो
यथा प्राह खांडिक्याय महात्मने ॥ जनकाय पुरा योगं तथाहं कथयामि ते ॥ ३५ ॥ नारद उवाच ॥ खांडिक्यः कोऽभवद्ब्रह्मन्को वा केशिध्वजो
ऽभवत् ॥ कथं तयोश्च संवादो योगसंबन्धवानभूत् ॥ ३६ ॥ सनंदन उवाच ॥ धर्मध्वजो वै जनकस्तस्य पुत्रोऽमितध्वजः॥ कृतध्वजोऽस्य भ्राताभू
त्सदाध्यात्मरतिर्नृपः ॥ ३७ ॥ कृतध्वजस्य पुत्रोऽभूद्धन्यः केशिध्वजो द्विजः ॥ पुत्रोऽमितध्वजस्यापि खांडिक्यजनकाभिधः ॥ ३७ ॥ कर्ममार्गे हि
खांडिक्यः स्वराज्यादवरोपितः ॥ पुरोधसा मंत्रिभिश्च समवेतोऽल्पसाधनः ॥ ३८ ॥ राज्यान्निराकृतः सोऽथ दुर्गारण्यचरोऽभवत् ॥ इयाज सोऽपि
सुबहून यज्ञाञ्ज्ञानव्यपाश्रयः ॥ ३९ ॥ ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमपि स्वयम् ॥ एकदा वर्तमानस्य यागे योगविदां वर ॥ ४० ॥ तस्य धेनुं
जघानोग्रः शार्दूलो विजने वने॥ ततो राजा हतां ज्ञात्वा धेनुं व्याघ्रेण चर्त्विजः॥ ४१ ॥ प्रायश्चित्तं स पप्रच्छ किमत्रेति विधीयताम्॥ तेःचोचुर्नवयंविद्मः
कशेरुः पृच्छयतामिति ॥ ४२ ॥ कशेरुरपि तेनोक्तस्तथेति प्राह नारद ॥ शुनकं पृच्छ राजेन्द्र नाहं वेद स वेत्स्यति ॥ ४३ ॥ स गत्वा तमपृ
च्छच्च सोऽप्याह नृपतिं मुने ॥ न कशेरुर्नचैवाहं न चान्यः सांप्रतं भुवि ॥ ४४ ॥ वेत्त्येक एव त्वच्छत्रुः खांडिक्यो यो जितस्त्वया ॥ स चाह तं
व्रजाम्येष प्रष्टुमात्मरिपुं मुने ॥ ४५ ॥ प्राप्त एव मया यज्ञे यदि मां स हनिष्यति ॥ प्रायश्चित्तं स चेत्पृष्टो वदिष्यति रिपुर्मम ॥ ४६ ॥ ततश्चावि
कलो योगो मुनिश्रेष्ठ भविष्यति ॥ इत्युक्त्वा रथमारुह्य कृष्णाजिनधरो नृपः ॥ ४७ ॥ वनं जगाम यत्रास्ते खांडिक्यः स महीपतिः ॥ तमायांतं
समालोक्य खांडिक्यो रिपुमात्मनः ॥ ४८ ॥ प्रोवाच क्रोधताम्राक्षः समारोपितकार्मुकः ॥ खांडिक्य उवाच ॥ कृष्णाजिनत्वक्कवचभावेनास्मान्हनि
ष्यसि ॥ ४९ ॥ कृष्णाजिनधरे वेत्सि न मयि प्रहरिष्यति ॥ मृगानां वद पृष्ठेषु मूढ कृष्णाजिनं न किम् ॥ ५० ॥ येषां मत्वा वृथा चोग्राः प्रहिताः
शितसायकाः ॥ स त्वामहं हनिष्यामि न मे जीवन्विमोक्ष्यसे॥ ५१ ॥ आतताय्यसि दुर्बुद्धे मम राज्यहरो रिपुः ॥ केशिध्वज उवाच॥ खांडिक्य संशयं
प्रष्टुं भवंतमहमागतः ॥ ५२ ॥ न त्वां हंतुं विचार्यैतत्कोपं बाणं च मुंच वा ॥ ततः स मंत्रिभिः सार्द्धमेकांते सपुरोहितः ॥ ५३ ॥ मंत्रयामास
खांडिक्यः सर्वैरेव महामतिः॥ तमूचुर्मंत्रिणो वध्यो रिपुरेष वशंगतः ॥ ५४ ॥ हतेऽत्र पृथिवी सर्वा तव वश्या भविष्यति ॥ खांडिक्यश्चाह तान्सर्वानेव

मेव न संशयः॥५५॥हते तु पृथिवी सर्वा मम वश्या भविष्यति ॥ परलोकजयस्तस्य पृथिवी सकला मम ॥ ५६ ॥ न हन्मि चेल्लोकजयो मम
वयत्वसुंधरा ॥ परलोकजयोऽनंतः स्वल्पकालो महीजयः ॥५७॥ तस्मान्नैनं हनिष्येऽहं यत्पृच्छति वदामि तत् ॥ ततस्तमभ्युपेत्याह खांडिक्यो
जनको रिपुम् ॥५८॥ प्रष्टव्यं यत्त्वया सर्वं तत्पृच्छ त्वं वदाम्यहम् ॥ ततः प्राह यथावृत्तं होमधेनुवधं मुने ॥५९॥ ततश्च तं स पप्रच्छ प्रायश्चित्तं
हि तद्व्रतम् ॥ स चाचष्ट यथान्यायं मुने केशिध्वजाय तत्॥६०॥ प्रायश्चित्तमशेषं हि यद्वै तत्र विधीयते॥विदितार्थः स तेनैवमनुज्ञातो महात्मना
॥ ६१ ॥ यागभूमिमुपागत्य चक्रे सर्वां क्रियां क्रमात् ॥ क्रमेण विधिवद्यागं नीत्वा सोऽवभृथाप्लुतः ॥६२॥ कृतकृत्यस्ततो भूत्वा चिंतयामास
पार्थिवः ॥ पूजिता ऋत्विजः सर्वे सदस्या मानिता मया ॥६३॥तथैवार्थिजनोऽप्यर्थैर्योजितोऽभिमतैर्मया ॥ यथाहं मर्त्यलोकस्य मया सर्वं विच
ष्टितम् ॥ ६४ ॥ अनिष्पन्नक्रियं चतस्तथा न मम किं यथा ॥ इत्थं तु चिंतयन्नेव सस्मार स महीपतिः ॥ ६५ ॥ खांडिक्याय न दत्तेति मया वै
गुरुदक्षिणा ॥ स जगाम ततो भूयो रथमारुह्य पार्थिवः ॥६६॥ स्वायंभुवः स्थितो यत्र खांडिक्योऽरण्यदुर्गमम्॥खांडिक्योऽपि पुनर्दृष्ट्वा तमायान्तं
धृतायुधः ॥ ६७ ॥ तस्थौ हंतु कृतमतिस्तमाह स पुनर्नृपः ॥ अहं तु नापकाराय प्राप्तः खांडिक्य मा क्रुधः॥६८॥ गुरोर्निष्कृतिदानाय मामवेहि
सेमागतम् ॥ निष्पादितो मया यागः सम्यक् त्वदुपदेशतः ॥६९॥ सोऽहं ते दातुमिच्छामि वृणीष्व गुरुदक्षिणाम् ॥ इत्युक्तो मंत्रयामास स भूयो
मंत्रिभिः सह ॥ ७०॥गुरोर्निष्कृतिकामोऽय किमयं प्रर्थ्यतां मया ॥ तमूचुर्मंत्रिणो राज्यमशेषं याच्यतामयम् ॥७१॥ कृतिभिः प्रार्थ्यते राज्यमना
यासितसैनिकैः॥प्रहस्य तानाह नृपः स खांडिक्यो महीपतिः ॥ ७२ ॥ स्वल्पकालं महीराज्यं मादृशैः प्रार्थ्यते कथम् ॥ एतमेतद्भवतोऽत्र स्वार्थ
साधनमंत्रिणः ॥७३॥ परमार्थः कथं कोऽत्र यूयं नात्र विचक्षणाः॥ इत्युक्त्वा समुपेत्यैनं स तु केशिध्वजं नृपम्॥७४॥उवाच किमवश्यं त्वं दास्यसि
गुरुदक्षिणाम् ॥ बाढमित्येव तेनोक्तः खांडिक्यस्तमथाब्रवीत् ॥ ७५ ॥ भवानध्यात्मविज्ञानपरमार्थविचक्षणः ॥ यदि चेद्दीयते मह्यं भवता गुरु
निष्क्रयः ॥ ७६ ॥ तत्क्लेशप्रशमायालं यत्कर्म तदुदीरय ॥ केशिध्वज उवाच ॥ न प्रार्थितं त्वया कस्मान्मम राज्यमकंटकम्॥ ७७ ॥राज्यलाभा
द्धि नास्त्यन्यत्क्षत्रियाणामतिप्रियम् ॥ खांडिक्य उवाच॥केशिध्वज निबोध त्वं मया न प्रार्थितं यतः॥७८॥राज्यमेतदशेषेण यन्न गृध्नंति पंडिताः॥
क्षत्रियाणामयं धर्मो यत्प्रजापरिपालनम् ॥ ७९ ॥ वधश्च धर्मयुद्धेन स्वराज्यपरिपंथिनाम् ॥ यत्राशक्तस्य मे दोषो नैवास्त्यपकृते त्वया ॥ ८० ॥
बंधायैव भवत्येषा ह्यविद्या चाक्रमोज्झिता ॥ जन्मोपभोगलिप्सार्थमियं राज्यस्पृहा मम॥ ८१॥अन्येषां दोषजानेव धर्ममेवानुरुध्यते ॥ न याच्ञा

क्षत्रबंधूनां धर्मायैतत्सतां मतम् ॥ ८२ ॥ अतो न याचित राज्यमविद्यांतर्गतं तव ॥ राज्यं गृध्नंति विद्वांसो ममत्वाकृष्टचेतसः ॥८३ ॥ अहंमानमहा
पानमंदमत्ता न मादृशाः ॥ केशिध्वज उवाच ॥ अहं च विद्यया मृत्युं तर्तुकामः करोमि वै॥ ८४ ॥ राज्यं यज्ञांश्च विविधान्भोगे पुण्यक्षयं तथा ॥
तदिदं ते मनो दिष्ट्या विवेकैश्वर्यतां गतम् ॥ ८५ ॥ श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनंदन ॥ अनात्मन्यात्मबुद्धिर्या ह्यस्वे स्वविषया मतिः
॥ ८६ ॥ अविद्यातरुसंभूतं बीजमेतद्द्विधा स्थितम् ॥ पंचभूतात्मके देहे देही मोहतमोवृतः ॥ ८७ ॥ अहमेतदितीत्युच्चैः कुरुते कुमतिर्मतिम् ॥
आकाशवाय्वग्निजलपृथिवीभिः पृथक् स्थिते ॥ ८८ ॥ आत्मन्यात्ममयं भावं कः करोति कलेवरे ॥ कलेवरोपभोग्यं हि गृहक्षेत्रादिकं च यत्
॥ ८९ ॥ अदेहे ह्यात्मानि प्राज्ञो ममेदमिति मन्यते ॥ इत्थं च पुत्रपौत्रेषु तद्देहोत्पादितेषु च ॥ ९० ॥ करोति पंडितः स्वाम्यमनात्मनि
कलेवरे ॥ सर्वदेहोपभोगाय कुरुते कर्म मानवः ॥ ९१ ॥ देहं चान्यद्यदा पुंसस्सदा बंधाय तत्परम् ॥ मृण्मयं हि यथा गेहं लिप्यते वै मृदं
भसा ॥ ९२ ॥पार्थिवोऽयं तथा देहो मृदंभोलेपनस्थितिः ॥ पंचभोगात्मकैर्भोगैः पंचभोगात्मकं वपुः ॥ ९३ ॥ आप्यायते यदि ततः पुंसो
गर्वोऽत्र किंकृतः ॥ अनेकजन्मसाहस्रं ससारपदवीं व्रजन् ॥ ९४ ॥ मोहश्रमं प्रयातोऽसौ वासनारेणुगुंठितः ॥ प्रक्षाल्यते यदा सौम्य रेणुर्ज्ञानो
ष्णवारिणा ॥ ९५ ॥ तदा संसारपांथस्य याति मोहश्रमः शमम् ॥ मोहश्रमे शमं याते स्वच्छांतःकरणः पुमान् ॥ ९६ ॥ अनन्यातिशयाधारः
परं निर्वाणमृच्छति ॥ निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः ॥ ९७ ॥ दुःखाज्ञानमया धर्माः प्रकृतेस्ते तुनात्मनः ॥ जलस्य नाग्निना संगः
स्थालीसंगात्तथापि हि ॥ ९८ ॥ शब्दोद्रेकादिकान्धर्मान्करोति हि यथा बुधः ॥ तथात्मा प्रकृतेः संगादहंमानादिदूषितः ॥ ९९ ॥
भजते प्राकृतान्धर्मान्यस्तस्तंभो हि सोऽव्ययः ॥ तदेतत्कथितं बीजमविद्याया मया तव ॥ १०० ॥ क्लेशानां च क्षयकरं योगादन्यन्न विद्यते ॥
॥१०१॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने द्वितीयपादे षट्चत्वारिंशत्तमोऽध्यायः ॥ ४६॥ सनंदन उवाच॥ एतदध्यात्ममानाढ्यं वचः
केशिध्वजस्य सः ॥ खांडिक्योऽमृतवच्छ्रुत्वा पुनराह तमीरयन् ॥ १ ॥खांडिक्य उवाच ॥ तद् ब्रूहि त्वं महाभाग योगं योगविदुत्तम ॥ विज्ञातयो
गशास्त्रार्थस्त्वमस्यां निमिसंततौ ॥ २ ॥ केशिध्वज उवाच ॥ योगस्वरूपं खांडिक्य श्रूयतां गदतो मम ॥ यत्र स्थितो न च्यवते प्राप्य ब्रह्मलयं
मुनिः ॥३ ॥ मन एव मनुष्याणां कारणं बन्धमोक्षयोः ॥ बंधस्य विषयासंगि मुक्तेर्निर्विषयं तथा ॥ ४ ॥ विषयेभ्यः समाहृत्य विज्ञानात्मा बुधो
मनः ॥ चिंतयेन्मुक्तये तेन ब्रह्मभूतं परेश्वरम् ॥ ५ ॥ आत्मभावं नयेत्तेन तद्ब्रह्मध्यापनं मनः ॥विकार्यमात्मनः शक्त्या लोहमाकर्षको यथा ॥ ६ ॥

आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः ॥ तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥ ७ ॥ एवमत्यंतवैशिष्ट्ययुक्तधर्मोपलक्षणम् ॥ यस्य
योगः स वै योगी मुमुक्षुरभिधीयते ॥८॥ योगयुक् प्रथमं योगी युंजमानोऽभिधीयते ॥ विनिष्पन्नसमाधिस्तु परब्रह्मोपलब्धिमान् ॥ ९ ॥
यद्यंतरायदोषेण दूष्यते नास्य मानसम् ॥ जन्मांतरैरभ्यसनान्मुक्तिः पूर्वस्य जायते ॥ १० ॥ विनिष्पन्नसमाधिस्तु मुक्तिस्तत्रैव जन्मनि ॥
प्राप्नोति योगी योगाग्निदग्धकर्मचयोऽचिरात् ॥ ११ ॥ ब्रह्मचर्यमहिंसां च सत्यास्तेयापरिग्रहान् ॥ सेवेत योगी निष्कामो योगितां स्वमनो नयन्
॥१२॥ स्वाध्यायशौचसंतोषतपांसि नियमान्यमान् ॥ कुर्वीत ब्रह्मणि तथा परस्मिन्प्रवणं मनः॥१३॥ एते यमाश्च नियमाः पंच पञ्चप्रकीर्तिताः॥
विशिष्टफलदाः काम्या निष्कामानां विमुक्तिदाः ॥ १४ ॥ एवं भद्रासनादीनां समास्थाय गुणैर्युतः ॥ यमाख्यैर्नियमाख्यैश्च युंजीत नियतो यतिः॥
॥१५॥ प्राणाख्यमवलंबस्थमभ्यासात्कुरुते तु यत् ॥ प्राणायामः स विज्ञेयः सबीजोऽबीज एव च ॥ १६ ॥ परस्परेणाभिभवं प्राणापानौ यदा
निलौ ॥ कुरुतः सद्विधानेन तृतीयः संयमात्तयोः ॥ १७ ॥ तस्य चालंबनवत्स्थूलं रूपं द्विषत्पते ॥ आलंबनमनंतस्य योगिनोऽभ्यसतः स्मृतम् ॥
॥ १८॥ शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित् ॥ कुर्य्याच्चित्तानुकारीणि प्रत्याहारपरायणः ॥ १९ ॥ वश्यता परमा तेन जायते निश्चला
त्मनाम् ॥ इंद्रियाणामवश्यैस्तैर्न योगी योगसाधकः ॥ २० ॥ प्राणायामेन पवनैः प्रत्याहरेण चेंद्रियैः ॥ वशीकृतैस्ततः कुर्यात्स्थिरं चेतः शुभा
श्रये ॥ २१ ॥ खांडिक्य उवाच ॥ कथ्यतां मे महाभाग चेतसो यः शुभाश्रयः ॥ यदाधारमशेषं तु हंति दोषसमुद्भवम् ॥ २२ ॥ केशिध्वज
उवाच ॥ आश्रयश्चेतसो ज्ञानिन् द्विधा तच्च स्वरूपतः ॥ रूपं मूर्तममूर्तं च परं चापरमेव च ॥ २३ ॥ त्रिविधा भावना रूपं विश्वमेतत्त्रिधोच्यते ॥
ब्रह्माख्या कर्मसंज्ञा च तथा चैवोभयात्मिका ॥ २४ ॥ कर्मभावात्मिका ह्येका ब्रह्मभावात्मिकापरा ॥ उभयात्मिका तथैवान्या त्रिविधा भावभा
वना ॥२५॥ सनकाद्या सदा ज्ञानिन् ब्रह्मभावनया युताः ॥ कर्मभावनया चान्ये देवाद्याः स्थावराश्चराः ॥२६ ॥ हिरण्यगर्भादिषु च ब्रह्मकर्मात्मिका
द्विधा ॥ अधिकारबोधयुक्तेषु विद्यते भावभावना ॥ २७ ॥ अक्षीणेषु समस्तेषु विशेषज्ञानकर्मसु ॥ विश्वमेतत्परं चान्यद्भेदभिन्नदृशां नृप ॥ २८ ॥
प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ॥ वचसामात्मसंतोद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥२९ ॥ तच्च विष्णोः परं रूपमरूपस्याजनस्य च ॥विश्वस्वरूप
वैरूप्यलक्षणं परमात्मनः ॥३० ॥ न तद्योगयुजा शक्यं नृप चिंतयितुं यतः ॥ ततः स्थूलं हरे रूपं चिंत्यं यच्चक्षुगोचरम् ॥ ३१ ॥ हिरण्यगर्भो भग
वान्वासवोऽथ प्रजापतिः ॥ मरुतो वसवो रुद्रा भास्करास्तारका ग्रहाः ॥ ३२ ॥ गन्धर्वा यक्षदैत्याश्च सकला देवयोनयः ॥ मनुष्याः पशवः शैला

समुद्राः सरितो द्रुमाः ॥ ३३ ॥ भूप भूतान्यशेषाणि भूतानां ये च हेतवः ॥ प्रधानादिविशेषांताश्चेतनाचेतनात्मकम् ॥ ३४ ॥ एकपादं द्विपादं च
बहुपादमपादकम् ॥ मूर्त्तमेतद्धरे रूपं भावनात्रितयात्मकम् ॥ ३५ ॥ एतत्सर्वमिदं विश्वं जगदेतच्चराचरम् ॥ परब्रह्मस्वरूपस्य विष्णोः शक्तिसम
न्वितम् ॥ ३६ ॥ विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा ॥ अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥ ३७ ॥ येयं क्षेत्रज्ञशक्तिः सा
चेष्टिता नृप कर्मजा ॥ असारभूते संसारे प्रोक्ता तत्र महामते ॥ ३८ ॥ संसारतापानखिलानवाप्नोत्यनुसंज्ञितान् ॥ तया तिरोहितत्वात्तु शक्तिः क्षेत्रज्ञ
संज्ञिता ॥ ३९ ॥ सर्वभूतेषु भूपाल तारतम्येन लक्ष्यते ॥ अप्राणवत्सु खल्वल्पा स्थावरेषु ततोऽधिका ॥ ४० ॥ सरीसृपेषु तेभ्योऽन्याप्यतिशक्त्या
पतत्रिषु ॥ पतत्रिभ्यो मृगास्तेभ्यः स्वशक्त्या पशवोऽधिकाः॥४१॥ पशुभ्यो मनुजाश्चातिशक्त्या पुंसःप्रभाविताः॥तेभ्योऽपि नागगंधर्वयक्षाद्या देवता
नृप ॥ ४२ ॥ शक्रः समस्तदेवेभ्यस्ततश्चातिप्रजापतिः ॥ हिरण्यगर्भोऽपि ततः पुंसः शक्त्युपलक्षितः ॥ ४३ ॥ एतान्यशेषरूपाणि तस्य रूपाणि
पार्थिव॥यतस्तच्छक्तियोगेन युक्तानि नभसा यथा॥४४॥द्वितीयं विष्णुसंज्ञस्य योगिध्येयं महामते॥अमूर्तं ब्रह्मणो रूपं यत्सदित्युच्यते बुधैः॥४५॥
समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः॥नहि स्वरूपरूपं वै रूपमन्यद्धरेर्महत्॥४६॥समस्तशक्तिरूपाणि तत्करोति जनेश्वर॥देवतिर्यङ्मनुष्यादिचे
ष्टावंति स्वलीलया॥४७॥जगतामुपकाराय तस्य कर्मनिमित्तजा॥चेष्टा तस्याप्रमेयस्य व्यापिन्यविहितात्मिका ॥४८॥ तद्रूपं विश्वरूपस्य चिंत्यं योग
युजा नृप ॥ तस्य ह्यात्मविशुद्ध्यर्थं सर्वकिल्बिषनाशनम् ॥ ४९ ॥ यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ॥ तथा चित्तस्थितो विष्णुर्योगिनां
सर्वकिल्बिषम्॥५०॥ तस्मात्समस्तशक्तीनामाधांते तत्र चेतसः ॥ कुर्वीत संस्थितं साधु विज्ञेया शुद्धलक्षणा ॥५१॥ शुभाश्रयः सचित्तस्य सर्वगस्य
तथात्मनः॥त्रिभावभावनातीतो मुक्तये योगिनां नृप॥५२॥ अन्ये तु पुरुषव्याघ्र चेतसो ये व्यपाश्रयाः॥अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः
॥५३॥मूर्त्तं भगवतो रूपं सर्वापाश्रयनिस्पृहः ॥ एषा वै धारणा ज्ञेया यच्चित्तं तत्र धार्यते॥५४॥तत्र मूर्त्तं हरे रूपं यादृक् चिंत्यं नराधिप ॥तच्छ्रूयता
मनाधारे धारणा नोपपद्यते ॥ ५५ ॥ प्रसन्नचारुवदनं पद्मपत्रायतेक्षणम् ॥ सुकपोलं सुविस्तीर्णं ललाटफलकोज्ज्वलम् ॥ ५६ ॥ समकर्णांसविन्य
स्तचारुकर्णोपभूषणम् ॥ कम्बुग्रीवं सुविस्तीर्णश्रीवत्सांकितवक्षसम् ॥ ५७ ॥ बलित्रिभंगिना भुग्ननाभिना चोदरेण वै ॥ प्रलंबाष्टभुजं विष्णुमथ
वापि चतुर्भुजम् ॥ ५८ ॥ समस्थितोरुजघनं सुस्थिरांघ्रिकरांबुजम् ॥ चिंतयेद्ब्रह्मभूतं तं पीतनिर्मलवाससम् ॥ ५९ ॥ किरीटचारुकेयूरकट
कादिविभूषितम् ॥ शार्ङ्गशंखगदाखड्गप्रकाशवलयांचितम् ॥ ६० ॥ चिंतयेत्तन्मयो योगी समाधायात्ममानसम् ॥ तावद्यावद् दृढीभूता तत्रैव नृप

धारणा ॥ ६१ ॥ वदतस्तिष्ठतो यद्वा स्वेच्छया कर्म कुर्वतः ॥ नापयाति यदा चित्तात्सिद्धां मन्येत तां तदा ॥ ६२ ॥ ततः शंखगदाचक्रशार्ङ्गादि
रहितं बुधः ॥ चिंतयेद्भगवद्रूपं प्रशांतं साक्षसूत्रकम् ॥ ६३ ॥ सा यदा धारणा तद्वदवस्थानवती ततः ॥ किरीटकेयूरमुखैर्भूषणै रहितं स्मरेत्॥६४॥
तदेकावयवं चैवं चेतसा हि पुनर्बुधः ॥ कुर्यात्ततोऽवयविनि प्रणिधानपरो भवेत् ॥ ६५ ॥ तद्रूपप्रत्यये चैकसंनतिश्चान्यनिःस्पृहा ॥तद्ध्यानं प्रथमै
रंगैः षड्भिर्निष्पाद्यते नृप ॥ ६६ ॥ तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् ॥ मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते ॥ ६७ ॥ विज्ञानं
प्रापकं प्राप्ये परे ब्रह्मणि पार्थिव ॥ प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः ॥ ६८ ॥ क्षेत्रज्ञकरणीज्ञानं करणं तेन तस्य तत् ॥ निष्पाद्य मुक्तिकार्यं
वै कृतकृत्यो निवर्तते ॥ ६९ ॥ तद्भावभावनापन्नस्ततोऽसौ परमात्मनः ॥ भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् ॥७०॥ विभेदजनके ज्ञाने नाश
मात्यंतिकं गते ॥ आत्मनो ब्रह्मणाभेदं संमतं कः करिष्यति ॥ ७१ ॥ इत्युक्तस्ते मया योगः खांडिक्य परिपृच्छतः ॥ संक्षेपविस्तराभ्यां तु किम
न्यत्क्रियतां तव ॥ ७२ ॥ खांडिक्य उवाच ॥ कथितो योगसद्भावः सर्वमेव कृतं मम ॥ तवोपदेशात्सकलो नष्टश्चित्तमलो मम ॥ ७३ ॥ ममेति
यन्मया प्रोक्तमसदेतन्न चान्यथा ॥ नरेंद्र गदितुं शक्यमपि विज्ञेयवेदभिः ॥ ७४ ॥ अहं ममेत्यविद्येयं व्यवहारस्तथानयोः ॥ परमार्थस्त्व
संलाप्यो वचसां गोचरो न यः ॥ ७५ ॥ तद्गच्छ श्रेयसे सर्वं ममैतद्भवता कृतम् ॥ यद्विमुक्तिपरो योगः प्रोक्तः केशिध्वजाव्ययः ॥ ७६ ॥ सनंदन
उवाच ॥ यथार्हपूजया तेन खांडिक्येन स पूजितः ॥ आजगाम पुरं ब्रह्मंस्ततः केशिध्वजो नृपः ॥७७॥ खांडिक्योऽपि सुतं कृत्वा राजानं योगसि
द्धये ॥ विशालामगमत्कृष्णे समावेशितमानसः ॥ ७८ ॥ स तत्रैकांतिको भूत्वा यमादिगुणसंयुतः ॥ विष्णवाख्ये निर्मले ब्रह्मण्यवाप नृपतिर्लयम्
॥ ७९ ॥ केशिध्वजोऽपि मुक्त्यर्थं स्वकर्मक्षपणोन्मुखः ॥ बुभुजे विषयान्कर्म चक्रे चानभिसंधितम् ॥ ८०॥ स कल्याणोपभोगैश्च क्षीणपापोऽमल
स्ततः ॥ अवाप सिद्धिमत्यंतत्रितापक्षपणीं मुने ॥ ८१ ॥ एतत्ते कथितं सर्वं यन्मां त्वं परिपृष्टवान् ॥ तापत्रयचिकित्सार्थं किमन्यत्कथयामि ते
॥८२॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे द्वितीयपादे सप्तचत्वारिंशत्तमोऽध्यायः ॥४७॥ नारद उवाच॥ श्रुतं मया महाभाग तापत्रयचिकित्सितम्॥
तथापि मे मनो भ्रांतं न स्थितिं लभतेंऽजसा॥१॥ आस्मव्यतिक्रमं ब्रह्मन्दुर्जनाचरितं कथम् ॥ सोढुं शक्येत मनुजैस्तन्ममाख्याहि मानद ॥२॥ सूत
उवाच॥तच्छ्रुत्वा नारदेनोक्तं ब्रह्मपुत्रः सनंदनः ॥ उवाच हर्षसंयुक्तः स्मरन्भरतचेष्टितम् ॥३॥ सनंदन उवाच ॥अत्र ते कथयिष्यामि इतिहासं पुरात
नम् ॥ यं श्रुत्वा त्वन्मनो भ्रांतमास्थानं लभते भृशम् ॥ ४ ॥ आसीत्पुरा मुनिश्रेष्ठ भरतो नाम भूपतिः ॥ आर्षभो यस्य नाम्नेदं भारतं खण्डमु

च्यते ॥ ५ ॥ स राजा प्राप्तराज्यस्तु पितृपैतामहं क्रमात् ॥ पालयामास धर्मेण पितृवद्रंजयन् प्रजाः ॥ ६ ॥ ईजे च विविधैर्यज्ञैर्भगवंतमधोक्षजम् ॥
सर्वदेवात्मकं ध्यायन्नानाकर्मसु तन्मतिः ॥ ७ ॥ ततः समुत्पाद्य सुतान्विरक्तो विषयेषु सः ॥ मुक्त्वा राज्यं ययौ विद्वान्पुलस्त्यपुलहाश्रमम् ॥ ८॥
शालग्रामं महाक्षेत्रं मुमुक्षुजनसेवितम् ॥ तत्रासौ तापसो भूत्वा विष्णोराराधनं मुने ॥ ९ ॥ चकार भक्तिभावेन यथालब्धसपर्यया ॥ नित्यं प्रातः
समाप्लुत्य निर्मलेंऽभसि नारद ॥१०॥ उपतिष्ठद्रविं भक्त्या गृणन्ब्रह्माक्षरं परम् ॥ अथाश्रमे समागत्य वासुदेवं जगत्पतिम् ॥ ११ ॥ समाहृतैः
स्वयं द्रव्यैः समित्कुशमृदादिभिः॥ फलैः पुष्पैस्तथा पत्रैस्तुलस्याःस्वच्छवारिभिः॥१२॥पूजयन्प्रयतो भूत्वा भक्तिप्रसरसंप्लुतः ॥सचैकदा महाभागः
स्नात्वा प्रातः समाहितः ॥ १३॥ चक्रनद्यां जपंस्तस्थौ मुहूर्तत्रयमंबुनि॥अथाजगाम तत्तीरं जलं पातुं पिपासिता ॥ १४ ॥ आसन्नप्रसवा ब्रह्मन्नेकैव
हरिणी वनात् ॥ ततः समभवत्तत्र पीतप्राये जले तया॥१५॥ सिंहस्य नादः सुमहान् सर्वप्राणिभयंकरः॥ ततः सा सिंहसन्नादादुत्प्लुता निम्नगातटम्
॥ १६ ॥ अत्युच्चारोहणेनास्या नद्यां गर्भः पपात ह ॥ तमुह्यमानं वेगेन वीचिमालापरिप्लुतम् ॥ १७ ॥ जग्राह भरतो गर्भात्पतितं मृगपोतकम् ॥
गर्भप्रच्युतिदुःखेन प्रोत्तुंगाक्रणेनच॥१८॥मुनीन्द्र सा तु हरिणी निपपात ममार च॥हरिणीं तां विलोक्याथ विपन्नां नृपतापसः॥१९॥ मृगपोतं समा
गृह्य स्वमाश्रममुपागतः ॥ चकारानुदिनं चासौ मृगपोतस्य वै नृपः ॥ २० ॥ पोषणं पुष्यमाणश्च स तेन ववृधे मुने ॥ चचाराश्रमपर्यंतं तृणानि
गहनेषु सः ॥ २१ ॥ दूरं गत्वा च शार्दूलत्रासादभ्याययौ पुनः ॥ प्रातर्गत्वातिदूरं च सायमायात्यथाश्रमम् ॥ २२ ॥ पुनश्च भरतस्याभूदाश्रमस्यो
टजांतरे ॥ तस्यतस्मिन्मृगे दूरसमीपपरिवर्तिनि ॥ २३ ॥ आसीच्चेतः समासक्तं न तथा ह्यच्युते मुने ॥ विमुक्तराज्यतनयः प्रोज्झिताशेषबांधवः
॥ २४ ॥ ममत्व स चकारोच्चैस्तस्मिन्हरिणपोतके ॥ किं वृकैर्भक्षितो व्याघ्रैः किं सिंहेन निपातितः ॥ २५ ॥ चिरायमाणे निष्क्रांते तस्यासीदिति
मानसम् ॥प्रीतिप्रसन्नवदनः पार्श्वस्थे चाभवन्मृगे ॥ २६ ॥समाधिभंगस्तस्यासीन्ममत्वाकृष्टमानसः ॥कालेन गच्छता सोऽथ कालं चक्रे महीपतिः
॥ २७ ॥ पितेव सास्रं पुत्रेण मृगपोतेन वीक्षितः ॥ मृगमेव तदाद्राक्षीत्त्यजन्प्राणानसावपि॥२८॥मृगो बभूव स मुने तादृशीं भावनां गतः ॥ जाति
स्मरत्वादुद्विग्नः संसारस्य द्विजोत्तम ॥ २९ ॥ विहाय मातरं भूयः शालग्राममुपाययौ ॥ शुष्कैस्तृणैस्तथा पर्णैः स कुर्वन्नात्मपोषणम् ॥ ३० ॥ मृग
त्वहेतुभूतस्य कर्मणो निष्कृतिं ययौ ॥ तत्र चोत्सृष्टदेहोऽसौ जज्ञे जातिस्मरो द्विजः ॥३१॥ सदाचारवतां शुद्धे योगिनां प्रवरे कुले ॥ सर्वविज्ञान
संपन्नः सर्वशास्त्रार्थतत्त्ववित् ॥ ३२ ॥ अपश्यत्स मुनिश्रेष्ठः स्वात्मानं प्रकृतेः परम् ॥ आत्मनोधिगतज्ञानाद्देवादीनि महामुने॥ ३३ ॥सर्वभूतान्यभे

देन ददर्श स महामतिः ॥ न पपाठ गुरुप्रोक्तं कृतोपनयनः श्रुतम् ॥ ३४ ॥ न ददर्श च कर्माणि शास्त्राणि जगृहे न च ॥ उक्तोऽपि बहुशः किंचिज्जंड
वाक्यमभाषत ॥ ३५ ॥ तदप्यसंस्कारगुणं ग्रामभाषोक्तिसंयुतम् ॥ अपध्वस्तवपुः सोऽपि मलिनांबरधृङ् मुने ॥ ३६ ॥ क्लिन्नदंतांतरः सर्वैः
परिभूतः स नागरैः ॥ संमानेन परां हानिं योगर्द्धेः कुरुते यतः ॥ ३७ ॥ जनेनावमतो योगी योगसिद्धिं च विंदति ॥ तस्माच्चरेत वै योगी सतां
धर्ममदूषयन् ॥ ३८ ॥ जना यथावमन्येयुर्गच्छेयुर्नैव संगतिम् ॥ हिरण्यगर्भवचनं विचिंत्येत्थं महामतिः ॥ ३९ ॥ आत्मानं दर्शयामास जडोन्मत्ताकृतिं
जने ॥ भुंक्ते कुल्माषवटकान् शाकं वन्यफलं कणान्॥४०॥यद्यदाप्नोति स बहूनत्ति वै कालसंभवम् ॥पितर्युपरते सोऽथ भ्रातृभ्रातृव्यबांधवैः
॥ ४१ ॥ कारितः क्षेत्रकर्मादि कदन्नाहारपोषितः ॥ सरूक्षपीनावयवो जडकारी च कर्मणि ॥ ४२ ॥ सर्वलोकोपकरणं बभूवाहारवेतनः ॥ तं
तादृशमसंस्कारं विप्राकृतिविचेष्टितम् ॥ ४३ ॥ क्षत्ता सौवीरराज्यस्य विष्टियोग्यममन्यत ॥ स राजा शिबिकारूढो गंतुं कृतमतिर्द्विज ॥ ४४ ॥
बभूवेक्षुमतीतीरे कपिलर्षेर्वराश्रमम् ॥ श्रेयः किमत्र संसारे दुःखप्राये नृणामिति ॥ ४५ ॥ प्रष्टुं तं मोक्षधर्मज्ञं कपिलाख्यं महामुनिम् ॥ उवाह
शिबिकामस्य क्षत्तुर्वचनचोदितः ॥ ४६ ॥ नृणां विष्टिगृहीतानामन्येषां सोऽपि मध्यगः ॥ गृहीतो विष्टिना विप्र सर्वज्ञानैकभाजनम् ॥ ४७ ॥
जातिस्मरोऽसौ पापस्य क्षयकाम उवाह ताम् ॥ ययौ जडगतिस्तत्र युगमात्रावलोकनम् ॥ ४८ ॥कुर्वन्मतिमतां श्रेष्ठस्ते त्वन्ये त्वरितं ययुः ॥
विलोक्य नृपतिः सोऽथ विषमं शिबिकागतम् ॥ ४९ ॥ किमेतदित्याह समं गम्यतां शिबिकावहाः॥ पुनस्तथैव शिबिकां विलोक्य विषमां हसन् ॥
॥ ५० ॥ नृपः किमेऽतदित्याह भवद्भिर्गम्यतेऽन्यथा ॥ भूपतेर्वदतस्तस्य श्रुत्वेत्थं बहुशो वचः ॥ शिबिकावाहकाः प्रोचुरयं यातीत्यसत्त्वरम् ॥५१॥
राजोवाच॥किं श्रांतोऽस्यल्पमध्वानं त्वयोढा शिबिका मम॥किमायाससहो न त्वं पीवा नासि निरीक्ष्यसे॥५२॥ब्राह्मण उवाच॥नाहं पीवा न चैवोढा
शिबिका भवतो मया॥नश्रांतोऽस्मि न चायासो वोढान्योऽस्ति महीपते॥५३॥राजोवाच॥प्रत्यक्षं दृश्यते पीवा त्वद्यापि शिबिका त्वयि॥श्रमश्च भारोद्वहने
भवत्येव हि देहिनाम्॥५४॥ब्राह्मण उवाच॥प्रत्यक्षं भवता भूप यद्दृष्टं मम तद्वद॥बलवानबलश्चेति वाच्यं पश्चाद्विशेषणम्॥५५॥त्वयोढा शिबिका
चेति त्वय्यद्यापि च संस्थिता॥मिथ्या तदप्यत्र भवान् शृणोतु वचनं मम ॥५६॥ भूमौ पादयुगं चाथ जंघे पादद्वये स्थिते ॥ ऊरू जंघाद्वयावस्थौ
तदाधारं तथोदरम्॥५७॥वक्षस्थलं तथा बाहू स्कंधौ चोदरसंस्थितौ॥स्कंधाश्रितेयं शिबिका ममाधारोऽत्र किंकृतः ॥५८॥ शिबिकायां स्थितं चेदं
देहं त्वदुपलक्षितम् ॥ तत्र त्वमहमप्यत्रेत्युच्यते चेदमन्यथा ॥ ५९ ॥ अहं त्वं च तथान्ये च भूतैरूह्याश्च पार्थिव ॥ गुणप्रवाहपतितो भूतवर्गोऽपि

यात्ययम् ॥६०॥ कर्मवश्या गुणाश्चैते सत्त्वाद्याः पृथिवीपते ॥ अविद्यासंचितं कर्म तच्चाशेषेषु जंतुषु ॥६१॥ आत्मा शुद्धोऽक्षरः शांतो निर्गुणः प्रकृते
परः ॥ प्रवृद्ध्यपचयौ न स्त एकस्याखिलजंतुषु ॥ ६२ ॥ यदा नोपचयस्तस्य नचैवापचयो नृप ॥ तदापि बालिशोऽसि त्वं कया युक्त्या
त्वयेरितम् ॥ ६३ ॥भूपादजंघाकटचूरुजठरादिषु संस्थिता॥ शिबिकेयं यदा स्कंधे तदा भारः समस्त्वया॥ ६४ ॥ तथान्यजंतुभिर्भूप शिबिकोढा न केव
लम् ॥ शैलद्रुमगृहोत्थोऽपि पृथिवीसंभवोऽपि च ॥ ६५ ॥ यथा पुंसः पृथग्भावः प्राकृतैः करणैर्नृप ॥ सोढव्यः सुमहान्भारः कतमो नृप ते
मया ॥६६॥यद्द्रव्यो शिबिका चेयं तद्द्रव्यो भूतसंग्रहः॥भवतो मेऽखिलस्यास्य समत्वेनोपबृंहितः ॥६७॥ सनंदन उवाच ॥ एवमुक्त्वाऽभवन्मौनी स
वहङ्शिबिकां द्विजः ॥ सोऽपि राजाऽवतीर्योर्व्यां तत्पादौ जगृहे त्वरन् ॥ ६८ ॥ राजोवाच ॥ भो भो विसृज्य शिबिकां प्रसादं कुरु मे द्विज ॥
कथ्यतां को भवानत्र जाल्मरूपधरः स्थितः ॥६९॥ यो भवान्यदपत्यं वा यदागमनकारणम् ॥ तत्सर्वं कथ्यतां विद्वन्मह्यं शुश्रूषवे त्वया॥७०॥
ब्राह्मण उवाच ॥ श्रूयतां कोऽहमित्येतद्वक्तुं भूप न शक्यते॥ उपयोगनिमित्त च सर्वत्रागमनक्रिया॥७१ ॥सुखदुःखोपभोगौ तु तौ देहाद्युपपादकौ॥
धर्माधर्मोद्भवौ भोक्तुं जंतुर्देहादिमृच्छति॥७२॥सर्वस्यैव हि भूपाल जंतोः सर्वत्र कारणम्॥धर्माधर्मौ यतस्तस्मात्कारणं पृच्छचेत कुतः॥७३॥राजोवाच
॥ धर्माधर्मौ न संदेहः सर्वकार्येषु कारणम्॥ उपभोगनिमित्तं च देहाद्देहांतरागमः ॥७४॥ यत्त्वेतद्भवता प्रोक्तं कोऽहमित्येतदात्मनः॥वक्तुं न शक्यते
श्रोतुं तन्ममेच्छा प्रवर्तते॥७५॥योऽस्ति योऽहमिति ब्रह्मन्कथं वक्तुं न शक्यते॥आत्मन्येव न दोषाय शब्दोऽहमिति यो द्विज॥७६॥ब्राह्मण उवाच॥
शब्दोऽहमिति दोषाय नात्मन्येवं तथैव तत् ॥ अनात्मन्यात्मविज्ञानं शब्दो वा श्रुतिलक्षणः ॥ ७७॥ जिह्वा ब्रवीत्यहमिति दंतौष्ठतालुकं नृप ॥
॥ एतेनाहं यतः सर्वे वाङ्निष्पादनहेतवः ॥ ७८ ॥ किं हेतुभिर्वदत्येषा वागेवाहमिति स्वयम् ॥ तथापि वागहमेतद्वक्तुमित्थं न युज्यते ॥ ७९ ॥
पिंडः पृथग्यतः पुंसः शिरःपाण्यादिलक्षणः ॥ ततोऽहमिति कुत्रैनां संज्ञां राजन्करोम्यहम् ॥ ८० ॥ यद्यन्योऽस्ति परः कोऽपि मत्तः पार्थिवस
त्तम ॥ न देहोऽहमयं चान्ये वक्तुमेवमपीष्यते ॥ ८१ ॥ यदा समस्तदेहेषु पुमानेको व्यवस्थितः ॥ तदा हि को भवान्कोऽहमित्येतद्विफलं
वचः ॥८२॥ त्वं राजा शिबिका चेयं वयं वाहाः पुरःसराः ॥ अयं च भवतो लोको न सदेतन्नृपोच्यते ॥८३॥वृक्षाद्दारु ततश्चेयं शिबिका त्वदधि
ष्ठिता ॥ क्व वृक्षसंज्ञा वै तस्या दारुसंज्ञाथवा नृप ॥ ८४ ॥ वृक्षारूढो महाराजो नायं वदति ते जनः ॥ न च दारुणि सर्वस्त्वां ब्रवीति शिबि
कागतम्॥८५॥शिबिकादारुसंघातो स्वनामस्थितिसंस्थितः॥अन्विष्यतां नृपश्रेष्ठानन्ददा शिबिका त्वया॥८६॥एवं छत्रं शलाकाभ्यः पृथग्भावो विमृ

श्यताम् ॥ क्व जातं छत्रमित्येष न्यायस्त्वयि तथा मयि ॥ ८७ ॥ पुमान्स्त्री गौरजा वाजी कुंजरो विहगस्तरुः॥ देहेषु लोकसंज्ञेयं विज्ञेया कर्महे
तुषु ॥ ८८ ॥ पुमान्न देवो न नरो न पशुर्न च पादपः ॥ शरीराकृतिभेदास्तु भूपते कर्मयोनयः॥८९॥ वस्तु राजेति यल्लोके यच्च राजभटात्मकम्॥
॥ तथान्यच्च नृपेत्थं तन्न सत्यं कल्पनामयम् ॥९०॥यस्तु कालांतरेणापि नाशसज्ञामुपैति वै ॥ परिणामादिसंभूतं तद्वस्तु नृप तच्च किम् ॥ ९१ ॥
त्वं राजा सर्वलोकस्य पितुः पुत्रो रिपो रिपुः ॥ पत्न्याः पतिः पिता सूनोः कस्त्वं भूप वदाम्यहम् ॥९२॥ त्वं किमेतच्छिरः किं तु शिरस्तव तथो
दरम् ॥ किमु पादादिकं त्वेतन्नैव किं ते महीपते ॥९३॥समस्तावयवेभ्यस्त्वं पृथग्भूतो व्यवस्थितः ॥ कोऽहमित्यत्र निपुणं भूत्वा चिंतय पार्थिव
॥ ९४ ॥ एवं व्यवस्थिते तत्त्वे मयाहमिति भावितुम् ॥ पृथक्कृचरणनिष्पाद्यं शक्यं तु नृपते कथम् ॥ ९५ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे
बृहदुपाख्याने द्वि० पा० षट्चत्वारिंशोऽध्यायः ॥४८॥सनंदन उवाच ॥ निशम्य तस्येति वचः परमार्थसमन्वितम् ॥ प्रश्रयावनतो भूत्वा तमाह नृप
तिर्द्विजम् ॥१॥राजोवाच ॥भगवन्यत्त्वया प्रोक्त परमार्थमयं वचः ॥श्रुते तस्मिन्भ्रमंतीव मनसो मम वृत्तयः ॥ २ ॥ एतद्विवेकविज्ञानं यदि शेषेषु
जंतुषु॥भवता दर्शितं विप्र तत्परं प्रकृतेर्महत्॥३॥नाहं वहामि शिबिकां शिबिका मयि न स्थिता॥शरीरमन्यदस्मत्तो येनेयं शिबिका धृता॥४॥गुण
प्रवृत्तिर्भूतानां, प्रवृत्तिः कर्मचोदिता ॥ प्रवर्तंते गुणाश्चैते किं ममेति त्वयोदितम्॥५॥एतस्मिन्परमार्थज्ञ मम श्रोत्रपथं गते ॥ मनो विह्वलतामेति पर
मार्थार्थतां गतम् ॥६॥ पूर्वमेव महाभाग कपिलर्षिमहं द्विज ॥ प्रष्टुमभ्युद्यतो गत्वा श्रेयः किंत्वत्र संशये ॥ ७ ॥ तदंतरे च भवता यदिदं वाक्यमी
रितम् ॥तेनैव परमार्थार्थं त्वयि चेतः प्रधावति ॥८॥ कपिलर्षिर्भगवतः सर्वभूतस्य वै किल ॥ विष्णोरंशो जगन्मोहनाशाय समुपागतः ॥ ९ ॥
स एव भगवान्नूनमस्माकं हितकाम्यया ॥ प्रत्यक्षतामनुगतस्तथैतद्भवतोच्यते ॥ १० ॥ तन्मह्यं मोहनाशाय यच्छ्रेयः परमं द्विज ॥ तद्वदाखिल
विज्ञानजलवीच्युदधिर्भवान् ॥ ११ ॥ ब्राह्मण उवाच ॥ भूयः पृच्छसि किं श्रेयः परमार्थेन पृच्छसि ॥ श्रेयांसि परमार्थानि ह्यशेषाण्येव भूपते ॥
॥१२॥देवताराधनं कृत्वा धनसंपदमिच्छति॥पुत्रानिच्छति राज्यं च श्रेयस्तस्यैव तन्नृप॥१३॥विवेकिनस्तु संयोगः श्रेयोऽसौ परमात्मना॥कर्मयज्ञा
दिकं श्रयः स्वर्लोकफलदायि यत् ॥ १४ ॥ श्रेयःप्रधानं च फले तदेवानभिसंहिते ॥ आत्मा ध्येयः सदा भूप योगयुक्तैस्तथा परैः ॥ १५ ॥ श्रेय
स्तस्यैव संयोगः श्रेयो यः परमात्मनः ॥ श्रेयांस्येवमनेकानि शतशोऽथ सहस्रशः ॥१६॥ संत्यत्र परमार्थास्तु न त्वेते श्रूयतां च मे ॥ धर्मोऽयं त्यजते
किं तु परमार्थो धनं यदि ॥ १७ ॥ व्ययश्च क्रियत कस्मात्कामप्राप्त्युपलक्षणः ॥ पुत्रश्चेत्परमार्थाख्यः सोऽप्यन्यस्य नरेश्वर ॥ १८ ॥ परमार्थभूतः

सोऽन्यस्य परमार्थो हि नः पिता ॥ एवं न परमार्थोऽस्ति जगत्यत्र चराचरे ॥ १९ ॥ परमार्थो हि कार्याणि करणानामशेषतः ॥ राज्यादिप्राप्तिर
त्रोक्ता परमार्थतया यदि ॥ २० ॥ परमार्था भवंत्यत्र न भवंति च वै ततः ॥ ऋग्यजुःसामनिष्पाद्यं यज्ञकर्म मतं तव ॥ २१ ॥ परमार्थभूतं
तत्रापि श्रूयतां गदतो मम ॥ यत्तु निष्पाद्यते कार्यं मृदा कारणभूतया ॥ २२ ॥ तत्कारणानुगमनाज्जायते नृप मृन्मयम् ॥ एवं विनाशिभिर्द्रव्यैः
समिदाज्यकुशादिभिः ॥ २३ ॥ निष्पाद्यते क्रिया या तु सा भवित्री विनाशिनी ॥ अनाशी परमार्थस्तु प्राज्ञैरभ्युपगम्यते ॥ २४ ॥ यत्तु नाशि
न संदेहो नाशिद्रव्योपपादितम् ॥ तदेवाफलदं कर्म परमार्थो मतो मम ॥ २५ ॥ मुक्तिसाधनभूतत्वात्परमार्थो न साधनम् ॥ ध्यानमेवात्मनो भूप
परमार्थार्थशब्दितम् ॥ २६ ॥ भेदकारि परेभ्यस्तु परमार्थो न भेदवान् ॥ परमार्थात्मनोर्योगः परमार्थ इतीष्यते ॥ २७ ॥ मिथ्यैतदन्यद्द्रव्यं हि
नैतद्द्रव्यमयं यतः ॥ तस्माच्छ्रेयांस्यशेषाणि नृपैतानि न संशयः ॥ २८ ॥ परमार्थस्तु भूपाल संक्षेपाच्छ्रूयतां मम ॥ एको व्यापी समः शुद्धो निर्गुण
प्रकृतेः परः ॥ २९ ॥ जन्मवृद्ध्यादिरहित आत्मा सर्वगतो नृप ॥ परिज्ञानमयो सद्भिर्नामजात्यादिभिर्विभुः ॥ ३० ॥ न योगवान्न युक्तोऽभून्नैव पार्थिवः
योक्ष्यति ॥ तस्यात्मपरदेहेषु सतोऽप्येकमयं हि तत् ॥ ३१ ॥ विज्ञानं परमार्थोऽसौ वेत्ति नोऽतथ्यदर्शनः ॥ वेणुरंध्रविभेदेन भेदः षड्जादिसंज्ञितः ॥ ३२ ॥ अभेदो
व्यापिनो वायोस्तथा तस्य महात्मनः ॥ एकत्वं रूपभेदश्च वाह्यकर्मप्रवृत्तिजः ॥ ३३ ॥ देवादिभेदमध्यास्ते नास्त्येवाचरणो हि सः ॥ शृण्वत्र
भूप प्राग्वृत्तं यद्गीतमृभुणा भवेत् ॥ ३४ ॥ अवबोधं जनयतो निदाघस्य द्विजन्मनः ॥ ऋभुर्नामाऽभवत्पुत्रो ब्रह्मणः परमेष्ठिनः ॥ ३५ ॥ विज्ञात
तत्त्वसद्भावो निसर्गादेव भूपते ॥ तस्य शिष्यो निदाघोऽभूत्पुलस्त्यतनयः पुरा ॥ ३६ ॥ प्रादादशेषविज्ञानं स तस्मै परया मुदा ॥ अवाप्तज्ञान
तत्त्वस्य न तस्याद्वैतवासना ॥ ३७ ॥ स ऋभुस्तर्कयामास निदाघस्य नरेश्वर ॥ देविकायास्तटे वीर नागरं नाम वै पुरम् ॥ ३८ ॥ समृद्धमति
रम्यं च पुलस्त्येन निवेशितम् ॥ रम्योपवनपर्यंतं स तस्मिन्पार्थिवोत्तम ॥ ३९ ॥ निदाघनामायोगज्ञस्तस्य शिष्योऽभवत्पुरा ॥ दिव्ये वर्षसहस्रे
तु समतीतेऽस्य तत्पुरम् ॥ ४० ॥ जगाम स ऋभुः शिष्यं निदाघमवलोकितुम् ॥ स तस्य वैश्वदेवांते द्वारालोकनगोचरः ॥ ४१ ॥ स्थित
स्तेन गृहीतार्थो निजवेश्म प्रवेशितः ॥ प्रक्षालितांघ्रिपाणिं च कृतासनपरिग्रहम् ॥ ४२ ॥ उवाच स द्विजश्रेष्ठो भुज्यतामिति सादरम् ॥ ऋभुरु
वाच ॥ भो विप्रवर्य भोक्तव्यं यदत्र भवतो गृहे ॥ ४३ ॥ तत्कथ्यतां कदन्नेषु न प्रीतिः सततं मम ॥ निदाघ उवाच ॥ सक्तुयावकव्रीहीनामपूपानां
च मे गृहे ॥ ४४ ॥ यद्रोचते द्विजश्रेष्ठ तावद्भुंक्ष्व यथेच्छया ॥ ऋभुरुवाच ॥ कदन्नानि द्विजैतानि मिष्टमन्नं प्रयच्छ मे ॥ ४५ ॥ संयावपायसादीनि

चेक्षुका रसवंति च ॥ निदाघ उवाच ॥ गृहे शालिनि मद्गेहे यत्किंचिदति शोभनम् ॥४६॥ भोज्येषु साधनं मिष्टं तेनास्यान्नं प्रसाधय ॥ इत्युक्ता
तेन सा पत्नी मिष्टमन्नं द्विजस्य तत् ॥ ४७ ॥ प्रसाधितवती तद्वै भर्तुर्वचनगौरवात् ॥ तं भुक्तवंतमिच्छातो मिष्टमन्नं महामुनिम्॥४८॥निदाघः प्राह
भूपाल प्रश्रयावनतः स्थितः॥निदाघ उवाच ॥ अपि ते परमा तृप्तिरुत्पन्ना पुष्टिरेव च॥४९॥अपि ते मानसं स्वस्थमाहारेण कृतं द्विज॥क्व निवासी
भवान्विप्र क्व वा गंतु समुद्यतः॥५०॥आगम्यते च भवता यतस्तच्च निवेद्यताम् ॥ ऋभुरुवाज ॥ क्षुधितस्य च भुक्तेऽन्ने तृप्तिर्ब्रह्मन्विजायते॥५१॥
न मे क्षुधा भवेत्तृप्तिः कस्मान्मां द्विज पृच्छति ॥ वह्निना पार्थिवेनादौ दग्धे वै क्षुत्समुद्भवः ॥ ५२ ॥ भवत्यंभसि च क्षीणे नृणां तृष्णासमुद्भवः ॥
क्षुत्तृष्णे देहधर्माख्ये न ममैते यतो द्विज॥५३॥ततः क्षुत्संभवाभावात्तृप्तिरस्त्येव मे सदा ॥ मनसः स्वस्थता तुष्टिश्चित्तधर्माविमौ द्विज ॥ ५४ ॥
चेतसो यस्य यत्पृष्टं पुमानेभिर्न युज्यते॥ क्व निवासस्तवेत्युक्तं क्व गंतासि च यत्त्वया॥५५॥कुतश्चागम्यते त्वेतत्त्रितयेऽपि निबोध मे ॥ पुमान्स
र्वगतो व्यापीत्याकाशवदयं यतः ॥५६॥ कुतः कुत्र क्व गंतासीत्येतदप्यर्थवत्कथम् ॥ सोऽहं गंता न चागंता नैकदेशनिकेतनः॥ ५७ ॥त्वं चान्ये
च न च त्वं त्वं नान्ये नैवाहमप्यहम् ॥ मिष्टान्ने मिष्टमित्येषा जिह्वा सा मे कृता तव ॥५८॥ किं वक्ष्यतीति तत्रापि श्रूयतां द्विजसत्तम॥ मिष्ट
मेव यदामिष्टं तदेवोद्वेगकारणम् ॥ ५९ ॥ अमिष्टं जायते मिष्टं मिष्टादुद्विजते जनः ॥ आदिमध्यावसानेषु किमन्नं रुचिकारणम् ॥६०॥ मृण्मयं
हि मृदा यद्वद्गृहं लिप्तं स्थिरीभवेत् ॥ पार्थिवोऽयं तथा देहः पार्थिवैः परमाणुभिः ॥ ६१ ॥ यवगोधूममुद्गादि घृतं तैलं पयो दधि ॥ गुडः फलानीति
तथा पार्थिवाः परमाणवः ॥ ६२ ॥ तदेतद्भवता ज्ञात्वा मिष्टामिष्टविचारि यत् ॥ तन्मनःशमनालंबि कार्यं प्राप्यं हि मुक्तये ॥ ६३ ॥ इत्याकर्ण्य
वचस्तस्य परमार्थाश्रितं नृप ॥ प्रणिपत्य महाभागो निदाघो वाक्यमब्रवीत् ॥ ६४ ॥ प्रसीद मद्धितार्थाय कथ्यतां यस्त्वमागतः ॥ नष्टो
मोहस्तवाकर्ण्य वचांस्येतानि मे द्विज॥६५॥ऋभुरुवाच॥ ऋभुरस्मि तवाचार्यःप्रज्ञादानाय ते द्विज ॥ इहागतोऽहं दास्यामि परमार्थं सुबोधितम्॥
॥ ६६ ॥ एक एवमिदं विद्धि न भेदि सकलं जगत् ॥ वासुदेवाभिधेयस्य स्वरूपं परात्मनः ॥ ६७ ॥ ब्राह्मण उवाच ॥ तथेत्युक्ता निदाघेन प्रणि
पातपुरःसरम् ॥ पूजितः परया भक्त्यानिच्छितः प्रययौ विभुः ॥ ६८ ॥ पुनर्वर्षसहस्रांते समायातो नरेश्वर ॥ निदाघज्ञानदानाय तदेव नगरं
गुरुः ॥ ६९ ॥ नगरस्य बहिः सोऽथ निदाघं दृष्टवान्मुनिम् ॥ महाबलपरीवारे पुरं विशति पार्थिवे॥७०॥दूरस्थितं महाभागे जनसंमर्दवर्जकम्॥
क्षुत्क्षामकण्ठमायांतमरण्यात्ससमित्कुशम् ॥ ७१ ॥ दृष्ट्वा निदाघं स ऋभुरुपागत्याभिवाद्य च ॥ उवाच कस्मादेकांते स्थीयते भवता द्विज ॥७२ ॥

॥ निदाघ उवाच ॥ भो विप्र जनसंमर्दो महानेष जनेश्वरे ॥ प्रविविक्षौ पुरे रम्ये तेनात्र स्थीयते मया ॥ ७३ ॥ ऋभुरुवाच ॥ ॥ नराधिपोऽत्र
कतमः कतमश्चेतरो जनः ॥ कथ्यतां मे द्विजश्रेष्ठ त्वमभिज्ञो मतो मम ॥७४॥ निदाघ उवाच ॥ योऽयं गजेंद्रमुन्मत्तमद्रिशृंगसमुच्छ्रयम् ॥ अधि
रूढो नरेन्द्रोऽयं परितो यस्तथेतरः ॥७५॥ ऋभुरुवाच ॥ एतौ हि गजराजानौ दृष्टौ हि युगपन्मया ॥ भवता निर्विशेषेण पृथग्वेदोपलक्षितौ॥७६॥
तत्कथ्यतां महाभाग विशेषो भवतानयोः॥ ज्ञातुमिच्छाम्यहं कोऽत्र गजः को वा नराधिपः॥७७॥निदाघ उवाच ॥ गजोयोऽयमधो ब्रह्मन्नुपर्यस्यैष
भूपतिः ॥ वाह्यवाहकसंबंधं को न जानाति वै द्विज ॥७८॥ ऋभुरुवाच ॥ ब्रह्मन्यथाहं जानीयां तथा मामवबोधय ॥ अधः सत्त्वविभागं किं किं
चोर्द्धमभिधीयते॥७९॥ब्राह्मण उवाच ॥ इत्युक्त्वा सहसारुह्य निदाघः प्राह तं ऋभुम्॥श्रूयतां कथयाम्येष यन्मां त्वं परिपृच्छसि॥८०॥उपर्यहं यथा
राजा त्वमधःकुंजरो यथा ॥ अवबोधाय ते ब्रह्मन्दृष्टांतो दर्शितो मया॥८१॥ऋभुरुवाच ॥ त्वं राजेव द्विजश्रेष्ठ स्थितोऽहं गजवद्यदि॥तदेवं त्वं समा
चक्ष्व कतमस्त्वमहं तथा॥८२॥ ब्राह्मण उवाच॥इत्युक्तः सत्वरस्तस्य चरणावभिवंद्य सः॥निदाघः प्राह भगवन्नाचार्यस्त्वमृभुर्मम॥ ८३ ॥नान्यस्याद्वै
तसंस्कारसंस्कृतं मानसं तथा ॥ यथाचार्यस्य तेन त्वां मन्ये प्राप्तमहं गुरुम्॥८४॥ऋभुरुवाच॥तवोपदेशदानाय पूर्वशुश्रूषणात्तव ॥ गुरुस्नेहादृभुर्नाम
निदाघं समुपागतः ॥ ८५ ॥ तदेतदुपदिष्टं ते संक्षेपेण महामते ॥ परमार्थसारभूतं यत्तदद्वैतमशेषतः ॥ ८६ ॥ ब्राह्मण उवाच ॥ एवमुक्त्वा ददौ
विद्यां निदाघं स ऋभुर्गुरुः॥निदाघोऽप्युपदेशेन तेनाद्वैतपरोऽभवत्॥ ८७ ॥ सर्वभूतान्यभेदेन ददृशे स तदात्मनः ॥ तथा ब्रह्मतनौ मुक्तिमवाप परमा
द्विजः॥८८॥ तथा त्वमपि धर्मज्ञ तुल्यात्मरिपुबांधवः ॥ भव सर्वगतं ज्ञानमात्मानमवनीपते॥८९ ॥सितनीलादिभेदेन यथैकं दृश्यते नभः ॥ भ्रांत
दृष्टिभिरात्मापि तथैकः सन्पृथक् पृथक्॥९०॥एकः समस्तं यदिहास्ति किंचित्तदच्युतो नास्ति परं ततोऽन्यत्॥सोऽहं स च त्वं स च सर्वमेतदात्मा
स्वयं भात्यपभेदमोहः॥९१ ॥ सनंदन उवाच ॥ इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थदृष्टिः॥ स चापि जातिस्मरणावबोधस्तत्रैव जन्मन्य
पवर्गमाप ॥ ९२॥परमार्थाध्यात्ममेतत्तुभ्यमुक्तं मुनीश्वर ॥ ब्राह्मणक्षत्रियविशां श्रोतॄणां चापि मुक्तिदम् ॥९३॥ यथा पृष्टं त्वया ब्रह्मंस्तथा ते गदितं
मया ॥ ब्रह्मज्ञानमिदं शुद्धं किमन्यत्कथयामि वै॥९४॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने द्वि०पा०एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥
सूत उवाच ॥ श्रुत्वा सनंदनस्येत्थं वचनं नारदो मुनिः ॥ असंतुष्ट इव प्राह भ्रातरं तं सनंदनम् ॥ १ ॥ नारद उवाच ॥ भगवन्सर्वमाख्यातं
यत्पृष्टं भवतो मया ॥ तथापि नात्मा प्रीयेत शृण्वन्हरिकथां मुहुः ॥ २ ॥ श्रूयते व्यासपुत्रस्तु शुकः परमधर्मवित् ॥ सिद्धिं सुमहतीं प्राप्तो निर्वि

ण्णोऽवांतरं बहिः ॥३॥ ब्रह्मन्पुंसस्तु विज्ञानं महतां सेवनं विना ॥ न जायते कथं प्राप्तो ज्ञानं व्यासात्मजः शिशुः ॥ ४ ॥ तस्य जन्मरहस्यं मे कम चाप्यस्य शृण्वते॥समाख्याहि महाभाग मोक्षशास्त्रार्थविद्वान्॥५॥सनंदन उवाच॥ शृणु विप्रप्रवक्ष्यामि शुकोत्पत्तिं समासतः॥यां श्रुत्वा ब्रह्मतत्त्वज्ञो जायते मानवो मुने ॥६॥ न हायनैर्न पलितैर्न वित्तेन न बंधुभिः ॥ ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ॥७॥ नारद उवाच ॥ अनूचानः कथंब्रह्मन्पुमान्भवति मानद ॥ तन्मे कर्म समाचक्ष्व श्रोतुं कौतूहलं मम ॥ ८ ॥ सनंदन उवाच ॥ शृणु नारद वक्ष्यामि ह्यनूचानस्य लक्षणम् ॥ यज्ज्ञात्वा सांगवेदानामभिज्ञो जायते नरः ॥ ९॥ शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा ॥ छंदःशास्त्रं षडेतानि वेदांगानि विदुर्बुधाः॥१० ॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ वेदाश्चत्वार एवैते प्रोक्ता धर्मनिरूपणे ॥ ११ ॥ सांगान्वेदान्गुरोर्यस्तु समधीते द्विजोत्तमः ॥ सोऽनूचानः प्रभवति नान्यथा ग्रंथकोटिभिः ॥ १२ ॥ नारद उवाच ॥अंगानां लक्षणं ब्रूहि वेदानां चापि विस्तरात्॥ त्वमस्मासु महाविज्ञः सांगेष्वेतेषु मानद ॥ १३ ॥सनंदन उवाच ॥ प्रश्नभारोऽयमतुलस्त्वया मम कृतो द्विज ॥ संक्षेपात्कथयिष्यामि सारमेषां सुनिश्चितम् ॥ १४ ॥ स्वरः प्रधानः शिक्षायां कीर्त्तितो मुनिभिर्द्विजैः ॥ वेदानां वेदविद्भिस्तु तच्छृणुष्व वदामि ते ॥ १५ ॥ आर्चिकं गाथिकं चैव सामिकं च स्वरान्तरम् ॥ कृतांते स्वरशास्त्राणां प्रयोक्तव्य विशेषतः ॥ १६ ॥ एकांतरः स्वरो ह्यप्सु गाथासुद्व्यंतरः स्वरः ॥ सामसु त्र्यंतरं विद्यादेतावत्स्वरतोऽन्तरम् ॥ १७ ॥ ऋक्सामयजुरंगानि ये यज्ञेषु प्रयुंजते॥ अविज्ञानाद्धि शिक्षायास्तेषां भवति विस्वरः ॥ १८ ॥मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ॥ स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोऽपराधात् ॥ १९ ॥ उरः कंठः शिरश्चैव स्थानानि त्रीणि वाङ्मये ॥ सवनान्याहुरेतानि साम वाप्यर्द्धतोंऽतरम् ॥२०॥ उरः सप्तविवारं स्यात्तथा कंठस्तथा शिरः ॥ न च शक्तोऽसि व्यक्तस्तु तथा प्रावचना विधिः ॥२१॥ कठकालापवृत्तेषु तैत्तिराह्वरकेषु च ॥ ऋग्वेदे सामवेदे च वक्तव्यः प्रथमः स्वरः ॥ २२॥ऋग्वेदस्तु द्वितीयेन तृतीयेन च वर्तते ॥ उच्चमध्यमसंघातः स्वरो भवति पार्थिवः॥२३॥ तृतीयप्रथमक्रुष्टा कुर्वंत्याह्वरकान् स्वरान् ॥ द्वितीयाद्यास्तु मद्रांतास्तैत्तिरीयाश्चतुःस्वरान् ॥२४॥प्रथमश्च द्वितीयश्च तृतीयोऽथ चतुर्थकः ॥मंद्रः क्रुष्टो मुनीश्वर एतान्कुर्वंति सामगाः॥२५॥द्वितीयप्रथमावेतौ नांडिभाह्लविनौ स्वरौ ॥ तथा शातपथावेतौ स्वरौ वाजसनेयिनाम्॥२६॥एते विशेषतः प्रोक्ताः स्वरा वै सार्ववैदिकाः ॥ इत्येतच्चरितं सर्वं स्वराणां सार्ववैदिकम् ॥ २७॥सामवेदे तु वक्ष्यामि स्वराणां चरितं यथा॥ अल्पग्रंथं प्रभूतार्थं सामवेदांगमुत्तमम् ॥२८॥तानरागस्वरग्राममूर्च्छनानां तु लक्षणम् ॥ पवित्रं पावनं पुण्यं यथा तुभ्यं प्रकीर्तितम् ॥ २९ ॥ शिक्षामाहुर्द्विजातीनामृग्यजुःसामलक्ष

णम् ॥ सप्त स्वरास्त्रयो ग्रामा मूर्छनास्त्वेकविंशतिः ॥३०॥ताना एकोनपंचाशदित्येतत्स्वरमंडलम् ॥ षड्जश्च ऋषभश्चैव गांधारो मध्यमस्तथा॥३१॥
पंचमो धैवतश्चैव निषादः सप्तमः स्वरः ॥ षड्जमध्यमगांधारास्त्रयो ग्रामाः प्रकीर्तिताः ॥ ३२ ॥ भूर्लोकाज्जायते षड्जो भुवर्लोकाच्च मध्यमः ॥ स्वर्गाच्चा
च्चैव गांधारो ग्रामस्थानानि त्रीणि हि ॥ ३३ ॥ स्वराणां च विशेषेण ग्रामरागा इति स्मृताः ॥ विंशतिर्मध्यमग्रामे षड्जग्रामे चतुर्दश ॥ ३४ ॥ ताना
न्पंचदशेच्छंति गांधारे सामगायिनाम् ॥ नदी विशाला सुमुखी चित्रा चित्रवती सुखा ॥ ३५ ॥ बला चाप्यथ विज्ञेया देवानां सप्त मूर्छनाः ॥
आप्यायिनी विश्वभृता चंद्रा हेमा कपर्दिनी ॥ ३६ ॥ मैत्री च बार्हती चैव पितॄणां सप्त मूर्छनाः ॥ षड्जे तूत्तरमंद्रा स्यादृषभे चाभिरूहता ॥ ३७ ॥
अश्वक्रांता तु गांधारे तृतीया मूर्च्छना स्मृता ॥ मध्यमे खलु सौवीरा हृषिका पंचमे स्वरे ॥३८॥ धैवते चापि विज्ञेया मूर्छना तूत्तरा मता ॥ निषादे
रजनीं विद्यादृषीणां सप्त मूर्छनाः॥३९॥उपजीवंति गंधर्वा देवानां सप्त मूर्छनाः॥पितॄणां मूर्च्छनाः सप्त तथा यक्षा न संशयः॥४०॥ऋषीणां मूर्छनाः सप्त
यास्त्विमा लौकिकाः स्मृताः ॥ षड्जः प्रीणाति वै देवानृषीन्प्रीणाति चर्षभः॥४१॥पितॄन् प्रीणाति गांधारो गंधर्वान्मध्यमः स्वरः ॥ देवान्पितॄनृषींश्चैव
स्वरः प्रीणाति पंचमः ॥४२॥ यक्षान्निषादः प्रीणाति भूतग्रामं च धैवतः ॥ गानस्य तु दशविधा गुणवृत्तिस्तु तद्यथा ॥ ४३ ॥ रक्तं पूर्णमलंकृतं प्रसन्नं
व्यक्तं विक्रुष्टं श्लक्ष्णं समं सुकुमारं मधुरमिति गुणास्तत्र रक्तं नाम वेणुवीणास्वराणामेकीभावं रक्तमित्युच्यते पूर्णं नाम स्वरश्रुतिपूरणाच्छंदः पादाक्षरं
संयोगात्पूर्णमित्युच्यते अलंकृतं नामोरसि शिरसि कंठयुक्तमित्यलंकृतं प्रसन्नं नामापगतागद्गदनिर्विंशंकं प्रसन्नमित्युच्यते व्यक्तं नाम पदपदार्थप्र
कृतिविकारागमनोपकृत्तद्धितसमासधातुनिपातोपसर्गस्वरलिंगं वृत्तिवार्त्तिकविभक्त्यर्थवचनानां सम्यगुपपादनं व्यक्तमित्युच्यते विक्रुष्टं नामोच्चैरु
च्चारितं व्यक्तपदाक्षरं विक्रुष्टमित्युच्यते श्लक्ष्णं नाम द्रुतमविलंबितमुच्चनीचप्लुतसमाहारहेलतालोपनयादिभिरुपपादनाभिः श्लक्ष्णमित्युच्यते समं
नामावापनिर्वापप्रदेशे प्रत्यंतरस्थानानां समासः सममित्युच्यते सुकुमारं नाम मृदुपदवर्णस्वरकुहरणयुक्तं सुकुमारमित्युच्यते मधुरं नाम स्वभावोपनी
तललितपदाक्षरगुणसमृद्धं मधुरमित्युच्यते एवमेतैर्दशभिर्गुणैर्युक्तं गानं भवति॥१॥भवन्ति चात्र श्लोकाः ॥ शंकितं भीषणं भीतमुद्धुष्टमनुनासिकम् ॥
काकस्वरं मूर्द्धगतं तथा स्थानविवर्जितम् ॥ ४४ ॥ विस्वरं विरसं चैव विश्लिष्टं विषमाहतम् ॥ व्याकुलं तालहीनं च गीतिदोषाश्चतुर्दश ॥ ४५ ॥
आचार्याः सममिच्छंति पदच्छेदं तु पंडिताः ॥ स्त्रियो मधुरमिच्छंति विक्रुष्टमितरे जनाः ॥४६॥ पद्मपत्रप्रभः षड्ज ऋषभः शुकपिंजरः ॥ कनकाभस्तु
गांधारो मध्यमः कुंदसन्निभः ॥४७॥ पंचमस्तु भवेत्कृष्णः पीतकं धैवतं विदुः ॥ निषादः सर्ववर्णः स्यादित्येताः स्वरवर्णताः ॥ ४८ ॥ पंचमो

मध्यमः षड्ज इत्येते ब्राह्मणाः स्मृताः ॥ ऋषभो धैवतश्चापीत्येतौ वै क्षत्रियावुभौ ॥ ४९ ॥ गांधारश्च निषादश्च वैश्यावर्द्धेन वै स्मृतो ॥ शूद्रत्वं
विधिनार्द्धेन पतितत्वान्न संशयः ॥५०॥ ऋषभो मूर्छितवर्जितो धैवतसहितश्च पंचमो यत्र ॥ निपतति मध्यमरागे स निषादं षाड्व विद्यात्॥५१॥
यदि पंचमो विरमते गांधारश्चांतरस्वरो भवति ॥ ऋषभो निषादसहितस्तं पंचममीदृशं विद्यात् ॥५२ ॥ गांधारस्याधिपत्येन निषादस्य गतागतैः॥
धैवतस्य च दौर्बल्यान्मध्यमग्राम उच्यते ॥ ५३ ॥ ईषत्पृष्टो निषादस्तु गांधारश्चाधिको भवेत् ॥ धैवतः कपितो यत्र स षड्जग्राम ईरितः ॥ ५४ ॥
अंतरस्वरसंयुक्तः काकलिर्यत्र दृश्यते ॥ तं तु साधारितं विद्यात्पंचमस्थं तु कैशिकम् ॥ ५५ ॥ कैशिकं भावयित्वा तु स्वरैः सर्वैः समंततः ॥यस्मा
त्तु मध्यमे न्यासस्तस्मात्कैशिकमध्यमः ॥ ५६ ॥ काकलिर्दृश्यते यत्र प्राधान्यं पंचमस्य तु ॥ कश्यपः कैशिकं प्राह मध्यमग्रामसंभवम् ॥ ५७ ॥
गेति गेयं विदुः प्राज्ञा धेति कारुप्रवादनम् ॥ वेति वाद्यस्य संज्ञेयं गंधर्वस्य प्ररोचनम् ॥ ५८ ॥ यः सामगानां प्रथमः स वेणोर्मध्यमः स्वरः ॥ यो
द्वितीयः स गांधारस्तृतीयस्त्वृषभः स्मृतः ॥ ५९ ॥ चतुर्थः षड्ज इत्याहुः पंचमो धैवतो भवेत् ॥ षष्ठो निषादो विज्ञेयः सप्तमः पंचमः स्मृतः ॥६०॥
षड्जं मयूरो वदति गावो रंभंति चर्षभम् ॥ अजाविके तु गांधारं क्रौंचो वदति मध्यमम् ॥ ६१ ॥ पुष्पसाधारणे काले कोकिला वक्ति पञ्चमम् ॥
अश्वस्तु धैवतं वक्ति निषादं वक्ति कुंजरः ॥ ६२॥ कंठादुत्तिष्ठते षड्जः शिरसस्त्वृषभः स्मृतः ॥ गांधारस्त्वनुनासिक्य उरसो मध्यमः स्वरः ॥६३॥
उरसः शिरसः कंठादुत्थितः पंचमः स्वरः ॥ ललाटाद्धैवतं विद्यान्निषादं सर्वसन्धिजम् ॥६४ ॥ नासा कंठमुरस्तालुजिह्वादतांश्च संश्रितः॥षड्भिः सं
जायते यस्मात्तस्मात्षड्ज इति स्मृतः ॥ ६५ ॥ वायुः समुत्थितो नाभेः कंठशीर्षसमाहतः ॥ नर्दत्यृषभवद्यस्मात्तस्मादृषभ उच्यते ॥ ६६ ॥ वायुः
समुत्थितो नाभेः कंठशीर्षसमाहतः ॥ वाति गंधवहः पुण्यो गांधारस्तेन हेतुना ॥ ६७ ॥ वायुः समुत्थितो नाभेरूरौ हृदि समाहतः ॥ नाभिप्राप्तो
मध्यवर्ती मध्यमत्वं समश्नुते ॥ ६८ ॥ वायुः समुत्थितो नाभेरुरोहृत्कंठकाहतः ॥ पंचस्थानोत्थितस्यास्य पंचमत्वं विधीयते ॥ ६९ ॥ धैवतं
च निषादं च वर्जयित्वा तु तावुभौ ॥ शेषान्पंच स्वरांस्त्वन्ये पंचस्थानोत्थितान्विदुः ॥ ७० ॥ पंचस्थानस्थितत्वेन सर्वस्थानानि धार्यते ॥
अग्निगीतस्वरः षड्ज ऋषभो ब्रह्मणोच्यते ॥ ७१ ॥ सोमेन गीतो गांधारो विष्णुना मध्यमः स्वरः ॥ पंचमस्तु स्वरो गीतस्त्वयैवेति निधारय ॥
॥ ७२ ॥ धैवतश्च निषादश्च गीतौ तुंबुरुणा स्वरौ ॥ आद्यस्य दैवतं ब्रह्मा षड्जस्याप्युच्यते बुधैः ॥ ७३ ॥ तीक्ष्णदीप्तप्रकाशत्वादृषभस्य हुताशनः॥
गावः प्रणीते तुष्यंति गांधारस्तेन हेतुना॥७४॥ श्रुत्वा चैवोपतिष्ठंति सौरभेया न संशयः ॥ सोमस्तु पंचमस्यापि दैवतं ब्रह्मराट् स्मृतम् ॥ ७५ ॥

निह्रासो यस्य वृद्धिश्च ग्रासमासाद्य सोमवत् ॥ अतिसंधीयते यस्मादेतान्पूर्वोंत्थितान्स्वरान् ॥ ७६ ॥ तस्मादस्य स्वरस्यापि धैवतत्वं विधीयते ॥ निषीदंति स्वरा यस्मान्निषादस्तेन हेतुना ॥ ७७ ॥ सर्वांश्चाभिभवत्येष यदादित्योऽस्य दैवतम् ॥ ७८ ॥ दारवीं गात्रवीणा च द्वे वीणे गानजातिषु ॥ ७९ ॥ सामनी गात्रवीणा तु तस्यास्त्वं शृणु लक्षणम् ॥ गात्रवीणा तु सा प्रोक्ता यस्यां गायंति सामगाः ॥ ७९ ॥ स्वरव्यंजनसंयुक्ता अंगुल्यंगुष्ठरंजिता ॥ हस्तौ तु संयतौ धार्यौ जानुभ्यामुपरिस्थितौ ॥ ८० ॥ गुरोरनुकृतिं कुर्याद्यथान्या न मतिर्भवेत् ॥ प्रणवं प्राक्प्रयुंजीत व्याहृतीस्तदनंतरम् ॥८२॥ सावित्रीं चानुवचनं ततो वै गानमारभेत् ॥ प्रसार्य चांगुलीः सर्वा रोपयेत्स्वरमंडलम् ॥८३ ॥ न चांगुलीभिरंगुष्ठमंगुष्ठेनांगुलीः स्पृशेत् ॥ विरला नांगुलीः कुर्यान्मूले चैतां न संस्पृशेत् ॥ ८४ ॥ अंगुष्ठाग्रेण ता नित्यं मध्यमे पर्वणि स्पृशेत् ॥ मात्राद्विमात्रवृद्धानां विभागार्थे विभागवित् ॥ ८५ ॥ अंगुलीभिर्द्विमात्रं तु पाणेः सव्यस्य दर्शयेत् ॥ त्रिरेखा यस्य दृश्येत सिद्धिं तत्र विनिर्दिशेत् ॥ ८६ ॥स पर्व इति विज्ञेयः शेपमंतरमंतरम् ॥ पर्वांतरं सामसु च ऋक्षु कुर्यात्तिलांतरम् ॥ ८७ ॥ स्वरान्मध्यमपर्वसु सुनिविष्टं निवेशयेत् ॥ न चात्र कंपयेत्किंचिदंगस्यावयवं बुधः ॥ ८८ ॥ अधस्तनं मृदं न्यस्य हस्तमात्रे यथाक्रमम् ॥ अभ्रमध्ये यथा विद्युद्दृश्यते मणिसूत्रवत् ॥ ८९ ॥ पृषच्छेदविवृत्तीनां यथा बालेषु कर्तरी ॥ कूर्मोऽगानि च संहृत्य चेतोदृष्टिं दिशन्मनः ॥ ९०॥स्वस्थः प्रशांतो निर्भीको वर्णानुच्चारयेद्बुधः ॥ नासिकायास्तु पूर्वेण हस्तं गोकर्णवद्धरेत् ॥ ९१ ॥ निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिंतयेत् ॥ सम्यक्प्रचारयेद्वाक्यं हस्तेन च मुखेन च ॥ :९२ ॥ यथैवोच्चारयेद्वर्णांस्तथैवैनां समापयेत् ॥ नात्याहन्यान्न निर्हण्यान्न प्रगायेन्न कंपयेत् ॥ ९३ ॥ समं सामानि गायेत व्योम्नि स्वेन गतिर्यथा ॥ यथा सुचरतां मार्गो मीनानां नोपलभ्यते॥९४॥ आकाशे वा विहंगानां तद्वत्स्वरगता श्रुतिः॥ यथा दधिनि सर्पिः स्यात्काष्ठस्थो वा यथाऽनलः॥९५॥प्रयत्नेनोपलभ्येत तद्वत्स्वरगता श्रुतिः॥स्वरात्स्वरस्य संक्रामं स्वरसंधिमनुल्बणम्॥९६॥अविच्छिन्नं समं कुर्यात्सूक्ष्मच्छायातपोपमम्॥अनागतमतिक्रांतं विच्छिन्नं विषमाहतम्॥९७॥ तन्वंतमस्थितांतं च वर्जयेत्कर्षणं बुधः॥ स्वरः स्थानाच्च्युतो यस्तु स्वं स्थानमतिवर्तते॥९८॥विस्वरं सामगा ब्रूयुर्विरक्तमिति वीणिनः॥अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम् ॥ ९९ ॥ शिष्यणामुपदेशार्थं कुर्याद्वृत्तिं विलंबिताम् ॥ गृहीतग्रंथ एवं तु ग्रंथोच्चारणशैक्षकान् ॥ १०० ॥ हस्तेनाध्यापयेच्छिष्यान् शैक्षेण विधिना द्विजः ॥ क्रुष्टस्य मूर्द्धनि स्थानं ललाटे प्रथमस्य तु ॥ १०१ ॥ भ्रुवोर्मध्ये द्वितीयस्य तृतीयस्य तु कर्णयोः ॥ कंठस्थानं चतुर्थस्य मंद्रस्य रसनोच्यते॥१०२॥अतिस्वरस्य नीचस्य हृदि स्थानं विधीयते॥अंगुष्ठस्योत्तमे क्रुष्टो ह्यंगुष्ठं प्रथमःस्वरः॥१०३॥ प्रदेशिन्यां

तु गांधार ऋषभस्तदनंतरम्॥अनामिकायां षड्जस्तु कनिष्ठायां तु धैवतः ॥१०४॥ तस्याधस्ताच्च योन्यास्तु निषादं तत्र निर्दिशेत्॥अपर्वत्वादमध्यत्वा
दव्ययत्वाच्च नित्यशः ॥ १०५ ॥ मंद्रो हि मंदीभूतस्तु परिस्वार इति स्मृतः ॥ क्रुष्टेन देवा जीवंति प्रथमेन तु मानुषाः ॥ १०६ ॥ पशवस्तु द्विती
येन गंधर्वाप्सरसस्त्वनु ॥ अंधजाः पितरश्चैव चतुर्थस्वरजीविनः ॥ १०७ ॥ मंद्रत्वेनोपजीवंति पिशाचासुरराक्षसाः ॥ अतिस्वरेण नीचेन जग
त्स्थावरजंगमाः ॥ १०८ ॥ सर्वाणि खलु भूतानि धार्यंते सामिकैः स्वरैः ॥ दीप्तायताकरुणानां मृदुमध्यमयोस्तथा ॥१०९॥श्रुतीनां यो विशेषज्ञो
न स आचार्य उच्यते ॥ दीप्ता मंद्रे द्वितीये च प्रचतुर्थे तथैव च ॥ ११० ॥ अतिस्वरे तृतीये च क्रुष्टे तु करुणा श्रुतिः॥श्रुतयो या द्वितीयस्य
मृदुमध्यायताः स्मृताः॥१११॥तासामपि तु वक्ष्यामि लक्षणानि पृथक् पृथक्॥आयतात्वं भवेन्नीचे मृदुता तु विपर्यये॥११२॥स्वे स्वरे मध्यमात्वं
तु तत्समीक्ष्य प्रयोजयेत् ॥ द्वितीये विरता या तु क्रुष्टश्च परतो भवेत् ॥ ११३ ॥ दीप्तां तां तु विजानीयात्प्राथम्येन मृदुः स्मृतः॥अत्रैव विरता या
तु चतुर्थेन प्रवर्तते ॥११४॥ तथा मंद्रे भवेद्दीप्ता साम्नश्चैव समापने ॥ नातितारश्रुतिं कुर्यात्स्वरयोर्नापि चांतरे ॥ ११५ ॥ तं च ह्रस्वे च दीर्घे च
न चापि घुटिसज्ञके ॥ द्विविधा गतिः पदांतस्थितसंधिः सहोष्मभिः ॥ ११६ ॥स्थानेषु पंचस्वेतेषु विज्ञेय घुटिसंज्ञकम्॥स्वरांतराविरतानि ह्रस्व
दीर्घघुटानि च ॥ १७ ॥ स्थितिस्थानेष्वशेषाणि श्रुतिवत्स्वरतो वदेत् ॥ दीप्तामुदात्ते जानीयाद्दीप्तां च स्वरिते विदुः॥११८॥अनुदात्ते मृदुर्ज्ञेया
गंधर्वाः श्रुतिसंपदे ॥ उदात्तश्चानुदात्तश्च स्वरितप्रचिते तथा ॥ ११९ ॥ निघातश्चेति विज्ञेयः स्वरभेदश्च पंचधा॥अत ऊर्ध्वं प्रवक्ष्यामि आचि
कस्य स्वरत्रयम् ॥ १२० ॥ उदात्तश्चानुदात्तश्च तृतीयः स्वरितः स्वरः ॥य एवोदात्त इत्युक्तः स एव स्वरितात्परः ॥ १२१॥ प्रचयः प्रोच्यते तज्ज्ञैर्न
चात्रान्यत्स्वरांतरम्॥वर्णस्वरोऽतीतस्वरः स्वरितो द्विविधः स्मृतः॥१२२॥ मात्रिको वर्ण एवं तु दीर्घस्तूच्चरितादनु॥स तु सप्तविधो ज्ञेयः स्वरः प्रत्य
यदर्शनात् ॥१२३॥ पदेन तु स विज्ञेयो भवेद्यो यत्र यादृशः ॥ सप्तस्वरान्प्रयुंजीत दक्षिणं श्रवणं प्रति ॥ १२४॥ आचार्यैर्विहितं शास्त्रं पुत्रशिष्य
हितैषिभिः॥उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा॥१२५॥वैस्वर्यस्वारसंज्ञायां किंस्थानः स्वार उच्यते॥उच्चनीचस्य यन्मध्ये साधारणमिति श्रुतिः
॥१२६॥ तं स्वारं स्वारसंज्ञायां प्रतिजानंति शैक्षिकाः ॥उदात्ते निषादगांधारावनुदात्ते ऋषभधैवतो॥१२७॥स्वरितप्रभवा ह्येते षड्जमध्यमपंचमाः॥
यत्र कखपरा ऊष्मा जिह्वामूलप्रयोजनाः ॥ १२८ ॥तानप्याज्ञापयेन्मात्राप्रकृत्यैव तु सा कला॥ जात्यः क्षैप्रोऽभिनिहित स्तैरव्यंजन एव च॥१२९॥
तिरोविरामः प्रश्लिष्टोऽपादवृत्तश्च सप्तमः ॥ स्वराणामहमेतेषां पृथग्वक्ष्यामि लक्षणम् ॥ १३० ॥ उद्दिष्टानां तथा न्यायमुदाहरणमेव च॥सपकारं

सवं वापि ह्यक्षरं स्वरितं भवेत् ॥ १३१ ॥ न चोदात्तं पुरो यस्य जात्यः स्वारः स उच्यते ॥ इउवर्णौ यदोदात्तावापद्येते पवौ क्वचित् ॥१३२॥
अनुदात्तं प्रत्यये तु विद्यात्क्षैप्रस्य लक्षणम्॥ एओआभ्यामुदात्ताभ्यामकारो निहितश्च यः॥१३३॥अकारो यत्र लुंपति तमभिनिहितं विदुः ॥ उदात्तपूर्वं
यत्किंचिच्छंदसि स्वरितं भवेत् ॥ १३४ ॥ एष सर्वबहुस्वारस्तैरव्यंजन उच्यते ॥ अवग्रहात्परं यत्र स्वरितं स्यादनंतरम् ॥ १३५ ॥ तिरोविरामं तं
विद्यादुदात्तो यद्यवग्रहः॥इकारं यत्र पश्येयुरिकारेणैव संयुतम्॥१३६॥उदात्तमनुदात्तेन प्रश्लिष्टं तं विचारय॥स्वरे चेत्स्वरितं यत्र विवृता यत्र संहिता
॥१३७॥एतत्पादांतवृत्तस्य लक्षणं शास्त्रनोदितम्॥ तान्यः स्वारः स जात्येन श्रुत्यग्रे क्षैप्र उच्यते ॥१३८॥ ते मन्वताभिनिहितस्तैरव्यञ्जन ऊतये ॥
तिरोविरामो विष्कषिते प्रश्लिष्टो हीईगोवर्णः॥१३९॥ पादवृत्तः कंदविदे स्वराः सप्तैवमादयः॥उच्चादेकाक्षरात्पूर्वात्स्वरं यद्यदिहाक्षरम्॥१४०॥स्वाराणां
जात्यवर्जानामेषा प्रकृतिरुच्यते ॥ चत्वारस्त्वादितः स्वाराः कंषपुंश्फुतिशास्त्रतः ॥ १४१ ॥ उदात्ते चैकनीचे वा जुह्वोऽग्निस्तन्निदर्शनम्॥इकारांते
पदे पूर्वं उकारे परतः स्थिते ॥ १४२ ॥ ह्रस्वं कंपं विजानीयान्मेधावी नात्र संशयः ॥ इकारांते पदे चैवोकारद्वयं परे पदे॥ १४३ ॥दीर्घं कंपं
विजानीयाच्छाग्धूष्विति निदर्शनम् ॥ त्रयो दीर्घास्तु विज्ञेया ये च संध्यक्षरेषु वै ॥ १४४॥मन्था यथा न इंद्राभ्यां शेषा ह्रस्वाः प्रकीर्तिताः॥
अनेकानामुदात्तानामनुदात्तः प्रत्ययो यदि॥ १४५ ॥शिवकंपं विजानीयादुदात्तः प्रत्ययो यदि ॥ यंत्र द्विप्रभृतीनि स्युरुदात्तान्यक्षराणि तु ॥ १४६ ॥ नीचं
वोच्चं च परतस्तत्रोदात्तं विदुर्बुधाः ॥ न रेफे वा हकारे वा द्विर्भावो जायते क्वचित् ॥ १४७ ॥ न च वर्गद्वितीयेषु न चतुर्थे कदाचन॥ चतुर्थं तु
तृतीयेन द्वितीयः प्रथमेन तु ॥ १४८ ॥आद्यमंत्यं च मध्यं च स्वाराक्षरेण पीडयेत् ॥ अनंत्यश्च भवेत्पूर्वो ह्यंतश्च परतो यदि ॥ १४९॥ तत्र
मध्ये यमस्तिष्ठेत्स्ववर्णः पूर्ववणयोः ॥ वर्गांत्यान् शषसैः सार्द्धमंतस्थैर्वापि संयुतान् ॥ १५० ॥ दृष्ट्वा यमा निवर्तंते अदेशिकमिवाध्वगाः ॥
तृतीयश्च चतुर्थश्च चतुर्थादिपरं पदम्॥ १५१ ॥द्वौ तृतीयौ हकारश्च हकारादिपरं पदम्॥ अनुस्वारोपधामूला तान् क्वचित्क्रमतः परम्॥ १५२ ॥ रहपूर्वे
संयुते चाप्युत्तरं क्रमतेऽक्षरम्॥संयोगो यत्र दृश्येत व्यंजनं विरते पदे॥१५३॥पूर्वांगमादितः कृत्वा परांगादौ निवेशयेत्॥संयोगे स्वरितं यत्र उद्घातः
प्रतनं तथा॥१५४॥पूर्वांगं तद्विजानीयाद्येनारंभः परं हि तत्॥संयोगात्तु विजानीयात्परं संयोगनायकम्॥१५५॥संयुक्तस्य तु वर्णस्य तत्परं पूर्वमक्षरम्॥
अनुस्वारः पदांतश्च क्रमजं प्रत्यये स्वके॥१५६॥स्वरभक्तिस्तथा रेफः पूर्वपूर्वांगमुच्यते॥पादादौ चापादादौ संयोगावग्रहेषु च ॥१५७॥ यशब्द इति
विज्ञयो योऽन्यःसयइति स्मृतः॥पादादावप्यविच्छेदे संयोगान्ते च तिष्ठताम्॥१५८॥वर्जयित्वा रहपाणामुपादेशःप्रदृश्यते॥स्वसंयुक्तो गुरुर्ज्ञेयःसानुस्वारा

ग्रिमः स्फुटः॥अणुशेषो ह्निगो वापि युगलादिरविस्फुटः॥१५९॥ यदुदात्तमुदात्तं तद्यत्स्वरितं नत्पदे भवति ॥यन्नीचं नीचमेव तद्यत्प्रचयस्थं तदपि
नीचम्॥ १६०॥अग्निः सुतो मित्रमिदं तथा वयमयावहाः॥प्रियं दूतं घृतं चित्तमतिशब्दस्तु नीचतः॥१६१॥अक्केष्वेव सुतेष्वेव यज्ञेषु कलशेषु च॥
शतेषु सपवित्रेषु नीचादुच्चार्यते श्रुतिः ॥१६२॥हारिवरुणवरेण्येषु धारापुरुषेषु स्वरतिरेफः॥विश्वानरोनकारश्च शेषास्तुस्वरिता नराः॥१६३॥द्वौ वरुणौ
वस्वरत उदुत्तमंत्वं वरुणधार चौरुधारामुरुधारेस्वदोहते ॥ मात्रिकं वा द्विमात्रं वा स्वर्यते यदिहाक्षरम् ॥तस्यादितोऽर्द्धमात्रं वै शेषं तु परतो भवेत्॥
अदीर्घं दीर्घवत्कुर्याद्विस्वरं यत्प्रयुज्यते ॥ १६४ ॥ कंपोत्स्वरिताभिगीतं ह्रस्वकर्षणमेव च ॥निमेषकाला मात्रा स्याद्विद्युत्कालेति चापरे॥१६५॥
ऋक्स्वरा तुल्ययोगा वा कैश्चिदेवमुदीर्यते ॥ १६६ ॥ समासेऽवग्रहं कुर्यात्पदं चात्रानुसंहितम् ॥ येतीक्षरादिकरणं पदांतस्येति तं विदुः ॥
॥१६७॥ (सर्वत्र मित्रपुत्रसखिशब्दा अहिशतक्रतोरवग्राह्याः ॥ आदित्यविप्रजातवेदाश्च सत्पतिगोपतिवृत्रहासमुद्राश्च ॥ स्वरयुपुवोदेवयवश्चारितं
देवतातपे) चिकितिश्च धचैव नावगृह्णंति पंडिताः ॥ विवृतयश्चतस्रो वै विज्ञेया इति मे मतम् ॥ १६८ ॥ अक्षराणां नियोगेन तासां
नामानि मे शृणु ॥ ह्रस्वादिवत्सानुसृता वत्सानुसारिणी चाग्रे ॥१६९॥ पाकवत्युभयोर्ह्रस्वा दीर्घा वृद्धा पिपीलिकाः ॥ चतसृणां विवृतीना
मंतरं मात्रिकं भवेत् ॥ १७० ॥ अर्द्धमात्रिकमन्येषामन्येषामणुमात्रिकम् ॥१७१॥ आपद्यते मकारो रेफोष्मसु प्रत्ययेऽप्यनुस्वारम्॥ पवेषु परसवर्णं
स्पर्शेषु चोत्तमापतिम् ॥ १७२ ॥ नकारांते पदे पूर्वे स्वरे च परतः स्थिते॥ अकारं रक्तमित्याहुस्तकारेण तु रज्यते॥१७३॥नकारांते पदे पूर्वे व्यंजनैश्च
यवोहिषु॥अर्द्धमात्रा तु पूवस्य रज्यते त्वणुमात्रया॥१७४॥नकारस्वरसंयुक्तश्चतुर्युक्तो विधीयते॥रेफो रंगश्च लोपश्च सानुस्वारोऽपि वा क्वचित्॥१७५॥
हृदयादुत्तिष्ठते रंगः कांस्येन तु समन्वितः॥मृदुश्चैव द्विमात्रश्च दधन्वांइति निदर्शनम् ॥१७६॥ यथा सौराष्ट्रिका नारी अरां इत्यभिभाषते॥एवं रंगः प्रयो
क्तव्यो नारदैतन्मतं मम ॥१७७॥स्वरा गडदबाश्चैव ङणनमाः सहोष्मभिः॥चतुर्णां पदजातीनां पदांता दश कीर्तिताः॥१७८॥स्वर उच्चः स्वरो नीचः
स्वरः स्वरित एव च ॥ व्यंजना न तु वर्तन्ते यत्र तिष्ठति स स्वरः ॥ १७९ ॥ स्वरप्रधानं त्रैस्वर्यमाचार्याः प्रतिजानते ॥ मणिवद्व्यंजनं विद्यात्सूत्र
वच्च स्वरं विदुः ॥ १८० ॥ दुर्बलस्य यथा राष्ट्रं हरते बलवान्नृपः ॥ दुर्बलं व्यजनं तद्वद्धरेत बलवान्स्वरः ॥ १८१ ॥ उभावश्च विवृत्तिश्च शषसा
रेफ एव च ॥ जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥ १८२ ॥ स्वरप्रत्ययाविवृतिः संहितायां तु या भवेत् ॥ विसर्गस्तत्र मंतव्यस्तालव्यश्चात्र
जायते ॥१८३ ॥ संध्यक्षरे परे संधौ प्राप्तलुप्तौ यवौ यदि ॥व्यञ्जनाख्या विवृत्तिस्तु स्वराख्या प्रतिसंहिता ॥ १८४ ॥ऊष्मांतं विरते यत्र संभावो

भवति क्वचित् ॥ विवृत्तिर्या भवेत्तत्र स्वराख्यां तां विनिर्दिशेत् ॥ १८५ ॥ यद्योभावप्रसंधानमृकारादिपरं पदम् ॥ स्वरांतं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ॥ १८६ ॥ प्रथमा उत्तमाश्चैव पदांतेषु यदि स्थिताः ॥ द्वितीयं स्थानमापन्नाः शषसप्रत्यया यदि ॥१८७॥ प्रथमानूष्मसंयुक्तान् द्वितीयानिव दर्शयेत् ॥ न चैतान्प्रतिजानीयाद्यथा मत्स्यः क्षुरोप्सराः ॥ १८८ ॥ छंदोमानं च वृत्तं च पादस्थानं त्रिकारणम् ॥ ऋचः स्वच्छंदवृत्तास्तु पादास्त्वक्षरमानतः ॥ १८९ ॥ ऋग्वर्य्यान् स्वरभक्तिं च छन्दोमानेन निर्द्दिशेत् ॥ प्रत्ययेत सहारेफमिमीते स्वरभक्तया ॥ १९० ॥ ऋवर्णे तु पृथग्रेफः प्रत्ययस्तु वृथा भवेत ॥ विद्याल्लघुमृकारं तु यदि तूष्माणसंयुतः ॥ १९१ ॥ ऊष्मणैव हि संयुक्त ऋकारो यत्र पीड्यते ॥ गुरुवर्णः स विज्ञेयस्तृचं चात्र निदर्शनम् ॥ १९२ ॥ ऋषभं च गृहीतं च बृहस्पतिं पृथिव्यां च ॥ निर्ऋतिपंचमा ह्यत्र ऋकारा नात्र संशयः ॥ १९३ ॥ शषसहरादौ रेफः स्वरभक्तिर्जायते द्विपदसंधौ ॥ इउवर्णाभ्यां हीना क्वचिदेकपदाक्रमवियुक्ता ॥ १९४ ॥ स्वरभक्तिर्द्विधा प्रोक्ता ऋकारे रेफ एव च ॥ स्वरोदा व्यञ्जनोदा च विहिताक्षरचिंतकैः ॥ १९५ ॥ शषसेषु स्वरोदयां हकारे व्यञ्जनोदयाम् ॥ शषसेषु विवृतां तु हकारे संवृतां विदुः ॥ १९६ ॥ स्वरभक्तिं प्रयुंजानस्त्रीन्दोषान्परिवर्जयेत् ॥ इकारं चाप्युकारं ग्रस्तदोषं तथैव च ॥ १९७ ॥ संयोगपरं छपरं विसर्जनीयं द्विमात्रकं चैव ॥ अथ सान्तिक च नङ्मसानुस्वारं घुटतं च ॥ १९८ ॥ यस्याः पादः प्रथमो द्वादशमात्रस्तथा तृतीयोऽपि ॥ अष्टादशो द्वितीयः समापन्नः पञ्चदशमात्रः ॥ दस्या लक्षणमुक्तं या त्वन्या सा स्मृता विपुला ॥ १९९ ॥ अक्षराणां लघुह्रस्वमसंयोगपरं यदि ॥ तत्संयोगोत्तरं विद्याद्गुरुदीर्घाक्षराणि तु ॥ २०० ॥ विवृत्तिर्यत्र दृश्येत स्वारस्यैवाग्रतः स्थितः ॥ २०१ ॥ गुरुस्वारःस विज्ञेयः क्षैप्रस्तत्र न विद्यते ॥ अष्टप्रकारं विज्ञेयं पदानां स्वरलक्षणम् ॥ २०२ ॥ अंतोदात्तमाद्युदात्तमुदात्तमनुदातं नीचस्वरितम् ॥ मध्योदात्तं स्वरितं द्विरुदात्तमित्येता अष्टौ पदसंज्ञाः ॥ २०३ ॥ अग्निः सोमः प्रवो वीर्यं हविषा स्वर्वनस्पतिः ॥ अंतर्मध्यमयोताम्युदमनुनिपात्य आद्यात्स्वरितमुपसर्गे द्विर्नीचमाख्यात इति स्वरितात्पराणि यानि स्युर्द्धारापक्षराणि तु ॥ सर्वाणि प्रचयस्थान्युपोदात्तं निहन्यते ॥ २०४ ॥ प्रचयो यत्र दृश्येत तत्र हन्यात्स्वरं बुधः ॥ स्वरितः केवलो यत्र मृदुस्तत्र निपातयेत् ॥ २०५ ॥ पंचविधमाचार्यकं नाम सुखं न्यासः करणं प्रतिज्ञोच्चारणा । अत्रोच्यते श्रेयः खलु वैश्याः प्रतिज्ञातोच्चारणा यस्य कस्यचिद्वर्णस्य करणं नोपलभ्यते प्रतिज्ञा तत्र वोढव्याकरणं हि तदात्मकम् ॥ २०६ ॥ तुंबुरुभवद्विशिष्टविश्वावस्वादयश्च गंधर्वाः ॥ सामसु निभृतं करणं स्वरसौक्ष्म्यान्नैव जानीयुः ॥ २०७ ॥ कौक्षेयाग्निं सदा रक्षेदश्रीपादर्शनं हेतुम् ॥ जीर्णो हारः प्रबुद्धः खलूषसिन्ब्रह्म चिंतयेत् ॥ २०८ ॥ शरद्विषुवतोतीतादुषस्युत्थानमिष्यते ॥

यावद्वासंतिकी रात्रिर्मध्यमा पर्युपस्थिता ॥ २०९ ॥ आम्रपालाशबिल्वानामपामार्गशिरीषयोः ॥ वाग्यतः प्रातरुत्थाय भक्षयेद्दंतधावनम् ॥
॥ २१० ॥ खादिरश्च कदम्बश्च करवीरकरंजयोः ॥ सर्वे कंटकिनः पुण्याः क्षीरिणश्च यशस्विनः ॥ २११ ॥ तेनास्य करणे सौक्ष्म्यं माधुर्यं चोप
जायते ॥ वर्णांश्च कुरुते सम्यक्प्राचीनौदवतिर्यथा ॥ २१२ ॥ त्रिफलां लवणाख्येन भक्षयेच्छिष्यकः सदा ॥ अग्निमेधाजनन्येषा स्वरवर्णकरी
तथा ॥ २१३ ॥ कृत्वा चावश्यकान्धर्माञ्जाठरं पर्युपास्य च ॥ पीत्वा धूमं घृतं चैव शुचिर्भूत्वा ततो वदेत् ॥ २१४ ॥ मंद्रेणोपक्रमेत्पूर्वं सर्वशा
खास्वयं विधिः ॥ सप्तमंत्रानतिक्रम्य यथेष्टां वाचमुत्सृजेत् ॥ २१५ ॥ न तां समीरयेद्वाचं न प्राणमुपरोधयेत् ॥ प्राणानामुपरोधेन वैस्वर्यं
चोपजायते॥ स्वरव्यंजनमाधुर्यं लुप्यते नात्र संशयः ॥२१६॥ कुतीर्थादागतं दग्धमपवर्णैश्च भक्षितम् ॥ २१७ ॥ न तस्य परिमोक्षोऽस्ति पापाहे
रिव किल्बिषात्॥२१७॥सुतीर्थादागतं जग्धुं स्वाम्नातं सुप्रतिष्ठितम्॥सुस्वरेण स्ववक्रेण प्रयुक्तं ब्रह्म राजति॥२१८॥न करालो न लंबोष्ठो न च सर्वा
तुनासिकः ॥ २१८ ॥ गद्गदो बद्धजिह्वश्च प्रयोगान्वक्तुमर्हति ॥ २१९॥ एकचित्तो निरुद्धांतः स्नातो गानविवर्जितः ॥ स तु वर्णान्प्रयुंजीत दंतोष्ठं
यस्य शोभनम्॥२२०॥पञ्च विद्यां न गृह्णंति चंडा स्तब्धाश्च ये नराः॥अलसाश्च सरोगाश्च येषां च विसृतं मनः॥२२१॥शनैर्विद्यां शनैरर्थानारोहेत्पर्वतं
शनैः ॥ शनैरध्वसु वर्तेत योजनान्न परं व्रजेत् ॥ २२२ ॥ योजनानां सहस्रं तु शनैर्याति पिपीलिका॥अगच्छन्वैनतेयोऽपि पदमेकं न गच्छति
॥ २२३ ॥ नहि पापहता वाणी प्रयोगान्वक्तुमर्हति॥बधिरस्येव जलपस्य विदग्धा वामलोचना ॥ २२४॥ उपांशुचरितं चैव योऽधीते वित्रसन्निव ॥
अपि रूपसहस्रेषु संदेहेष्वेव वर्तते॥२२५॥पुस्तकप्रत्ययाधीतं नाधीतं गुरुसन्निधौ॥राजते न सभामध्ये जारगर्भेव कामिनी॥२२६॥अञ्जनस्य क्षयं दृष्ट्वा
वल्मीकस्य तु संचयम् ॥ अवंध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु॥ २२७॥ यत्कीटैः पांशुभिः श्लक्ष्णैर्वल्मीकः क्रियते महान् ॥ न तत्र बलसामर्थ्य
मुद्योगस्तत्र कारणम्॥२२८॥सहस्रगुणिता विद्या शतशः परिकीर्तिता॥आगमिष्यति जिह्वाग्रे स्थलान्निम्नमिवोदकम् ॥२२९॥हयानामिव जात्यानामर्द्ध
रात्रार्द्धशायिनाम् ॥ नहि विद्यार्थिनां निद्रा चिरं नेत्रेषु तिष्ठति ॥ २३० ॥ न भोजनबिलंबी स्यान्न च नारीनिबंधनः ॥ समुद्रमपि विद्यार्थी
व्रजेद्गरुडहंसवत्॥२३१॥अहिरिव गणाद्भीतः साहित्यान्नरकादिव॥राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति ॥ २३२॥ न शठाः प्राप्नुवन्त्यर्थान्न
क्लीबा न च मानिनः ॥ न च लोकरवा दीना न च स्वस्वप्रतीक्षकाः ॥ २३३ ॥ यथा खनन्खनित्रेण भूतलं वारि विंदति ॥ एवं गुरुगतां
विद्यां शूश्रूषुरधिगच्छति ॥२३४॥ गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ॥ अथवा विद्यया विद्या ह्यन्यथा नोपपद्यते ॥२३५॥ शुश्रूषारहिता विद्या

यद्यपि मेधागुणैः समुपयाति ॥ वन्ध्येव यौवनवती न तस्य साफल्यवति भवति ॥ २३६ ॥ इति दिङ्मात्रमुद्दिष्टं शिक्षाग्रंथं मया तव॥ज्ञात्वा वेदां
गमाद्यं तु ब्रह्मभूयाय कल्पते ॥ २३७ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने द्वितीयपादे पञ्चाशत्तमोऽध्यायः ॥ ५०॥ अथातः संप्रव
क्ष्यामि कल्पग्रंथं मुनीश्वर ॥ यस्य विज्ञानमात्रेण स्यात्कर्मकुशलो नरः ॥ १ ॥ नक्षत्रकल्पो वेदानां संहितानां तथैव च ॥ चतुर्थः स्यादांगिरसः
शांतिकल्पश्च पंचमः॥ २ ॥ नक्षत्राधीश्वराख्यानं विस्तरेण यथातथम् ॥ नक्षत्रकल्पे निर्दिष्टं ज्ञातव्यं तदिहापि च॥ ३॥ वेदकल्पे विधानं तु ऋगादी
नां मुनीश्वर ॥ धर्मार्थकाममोक्षाणां सिद्ध्यै प्रोक्तं सविस्तरम् ॥ ४ ॥ मंत्राणामृषयश्चैव छदांस्यथ च देवताः॥ निर्दिष्टाः संहिताकल्पे मुनिभिस्तत्त्वद
र्शिभिः॥५॥तथैवांगिरसे कल्पे षट्कर्माणि सविस्तरम्॥अभिचारविधानेन निर्दिष्टानि स्वयंभुवा॥६॥शांतिकल्पे तु दिव्यानां भौमानां मुनिसत्तम॥
तथांतरिक्षोत्पातानां शांतयो ह्युदिताः पृथक्॥७॥संक्षेपेणैतदुद्दिष्टं लक्षणं कल्पलक्षणे ॥ विशेषः पृथगेतेषां स्थितः शंखांतरेषु च ॥ ८ ॥ गृह्यकल्पे तु
सर्वेषामुपयोगितयाऽधुना ॥ वक्ष्यामि ते द्विजश्रेष्ठ सावधानतया शृणु ॥ ९ ॥ ॐकारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा ॥ कंठं भित्त्वा विनिर्यातौ
तस्मान्मांगल्यकाविमौ ॥ १० ॥ कृत्वा प्रोक्तानि कर्माणि तदूर्द्ध्वानि करोति यः ॥ सोऽथशब्दं प्रयुंजीत तदानंत्यार्थमिष्यते ॥११॥ कुशाः परिस
मूहाय व्यस्तशाखाः प्रकीर्तिताः ॥ न्यूनाधिका निष्फलाय कर्मणोऽभिमतस्य च ॥ १२ ॥ कृमिकीटपतंगाद्या भ्रमंति वसुधातले ॥ तेषां संरक्षणा
र्थाय प्रोक्तं परिसमूहनम् ॥ १३ ॥ रेखाः प्रोक्ताश्च यास्तिस्रः कर्तव्यास्ताः समा द्विज ॥ न्यूनाधिका न कर्त्तव्या इत्येव परिभाषितम् ॥ १४ ॥
मेदिनी मेदसा व्याप्ता मधुकैटभदैत्ययोः ॥ गोमयेनोपलेप्येयं तदर्थमिति नारद ॥ १५ ॥ वंध्या दुष्टा च दीनांगी मृतवत्सा च या भवेत् ॥ यज्ञा
र्थं गोमयं तस्या नाहरेदिति भाषितम् ॥ १६॥ ये भ्रमंति सदाऽऽकाशे पतंगाद्या भयंकराः ॥तेषां प्रहरणार्थाय मतं प्रोद्धरणं द्विज॥१७॥स्रुवेण च कुशे
नापि कुर्यादुल्लेखनं भुवः॥अस्थिकंटकसिद्ध्यर्थं ब्रह्मणा परिभाषितम्॥१८॥आपो देवगणाः सर्वे तथा पितृगणा द्विज॥तेनाद्भिरुक्षणं प्रोक्तं मुनिभिर्विधि
कोविदैः॥१९॥अग्नेरानयनं प्रोक्तं सौभाग्यस्त्रीभिरेव च॥ शुभदे मृण्मये पात्रे प्रोक्ष्याद्भिस्तं निधायपयेत् ॥ २०॥ अमृतस्य क्षयं दृष्ट्वा ब्रह्माद्यैः सर्वदै
वतैः ॥ वेद्यां निधापितस्तस्मात्समिद्गर्भो हुताशनः ॥ २१॥दक्षिणस्यां दानवाद्याः स्थिता यज्ञस्य नारद॥तेभ्यः संरक्षणार्थाय ब्रह्माणं तद्दिशि न्यसेत्
॥२२॥ उत्तरे सर्वपात्राणि प्रणीताद्यानि पश्चिमे॥यजमानः पूर्वतः स्युर्द्विजाः सर्वेऽपि नारद॥२३॥द्यूते च व्यवहारे च यज्ञकर्मणि चेद्भवेत्॥ कर्तोदासीन
चित्तस्तत्कर्म नश्येदिति स्थितिः॥२४॥ब्रह्माचार्यौ स्वशाखौ हि कर्त्तव्यौ यज्ञकर्मणि॥ऋत्विजां नियमो नास्ति यथालाभं समर्चयेत्॥२५॥द्वे पवित्रे

त्र्यंगुले स्तः प्रोक्षिणी चतुरंगुला॥आज्यस्थाली त्र्यंगुलाथ चरुस्थाली षडंगुला॥२६॥द्व्यंगुलं तूपयमनमेकं संमार्जनांगुलम्॥स्रुवं षडंगुल प्रोक्तं स्रुचं
सार्द्धत्रयांगुलम् ॥ २७ ॥ प्रादशमात्रा समिधः पूर्णपात्रं षडंगुलम् ॥ प्रोक्षिण्या उत्तरे भागे प्रणीतापात्रमष्टभिः ॥ २८ ॥ यानि कानि च तीर्थानि
समुद्राः सरितस्तथा ॥ प्रणीतायां समासन्नास्तस्मात्तां पूरयेज्जलैः ॥२९॥ वेदिका वस्त्रहीना च नग्ना संप्रोच्यते द्विज ॥ परिस्तीर्य्य ततो दर्भैः परिद
ध्यादिमां बुधः ॥३०॥ इंद्रवज्रं विष्णुचक्रं वामदेवत्रिशूलकम्॥दर्भरूपतया त्रीणि पवित्रच्छेदनानि च॥३१॥प्रोक्षणी च प्रकर्तव्या प्रणीतोदकसंयुता॥
तेनातिपुण्यदं कर्म पवित्रमिति कीर्तितम् ॥ ३२ ॥ आज्यस्थाली प्रकर्तव्या पलमात्रप्रमाणिका :॥ कुलालचक्रघटितं आसुरं मृण्मयं स्मृतम् ॥
॥३३॥ तदेव हस्तघटितं स्थाल्यादि दैविकं भवेत् ॥ स्रुवे च सर्वकर्माणि शुभान्यप्यशुभानि च ॥ ३४ ॥ तस्य चैव पवित्रार्थं वह्नौ तापनमीरित
म्॥अग्रे धृतेन वैधव्यं मध्ये चैव प्रजाक्षयः ॥ ३५ ॥ मूले च म्रियते होता तस्माद्धार्यं विचार्य तत्॥अग्निः सूर्यश्च सोमश्च विरिंचिरनिलो यमः॥
॥३६॥ स्रुवे षडेते देवास्तु प्रत्यंगुलमुपाश्रिताः॥ अग्निर्भोगार्थनाशाय सूर्यो व्याधिकरो भवेत् ॥ ३७ ॥ निष्फलस्तु स्मृतः सोमो विरिंचिः सर्वका
मदः ॥ अनिलो वृद्धिदः प्रोक्तो यमो मृत्युप्रदो मतः ॥ ३८ ॥ संमार्जनोपयमनं कर्त्तव्यं च कुशद्वयम् ॥ पूर्वं तु सर्वशाखं स्यात्पंचशाखं
तथापरम् ॥ ३९ ॥ श्रीपर्णी च शमी तद्वत्खदिरश्च विकंकतः ॥ पलाशश्चैव विज्ञेयाः स्रुवे चैव तथा स्रुचि ॥ ४० ॥ हस्तोन्मितं स्रुवं शस्तं
त्रिंदशांगुलिकं स्रुचम् ॥ विप्राणां चैतदाख्यातं ह्यन्येषामंगुलोनकम् ॥ ४१ ॥ शूद्राणां पतितानां च खरादीनां च नारद ॥ दृष्टिदोषविनाशार्थं
पात्राणां प्रोक्षणं स्मृतम् ॥ ४२ ॥ अकृते पूर्णपात्रे तु यज्ञच्छिद्रं समुद्भवेत् ॥ तस्मिन्पूर्णीकृते विप्र यज्ञसंपूर्णता भवेत्॥ ४३ ॥ अष्टमुष्टि
र्भवेत्किंचित्पुष्कलं तच्चतुष्टयम् ॥ पुष्कलानि तु चत्वारि पूर्णपात्रं विदुर्बुधाः ॥४४ ॥ होमकाले तु संप्राप्ते न दद्यादासनं क्वचित् ॥ दत्ते तृप्तो
भवेद्वह्निः शापं दद्याच्च दारुणम् ॥ ४५ ॥ आघारौ नासिके प्रोक्तौ आज्यभागौ च चक्षुषी ॥ प्राजापत्यं मुखं प्रोक्तं कटिर्व्याहृतिभिः स्मृता॥४६॥
शीर्षहस्तौ च पादौ च पंचवारुणमीरितम् ॥ तथा स्विष्टकृतं विप्र श्रोत्रे पूर्णाहुतिस्तथा ॥४७॥ द्विमुखं चैकहृदयं चतुःश्रोत्रं द्विनासिकम्॥ दिशीर्षकं
च षण्नेत्रं पिंगलं सप्तजिह्वकम्॥४८॥ सव्यभागे त्रिहस्तं च चतुर्हस्तश्च दक्षिणे॥स्रुक्स्रुवौ चाक्षमाला च या शक्तिर्दक्षिणे करे॥४९॥त्रिमेखलं त्रिपादं
च घृतपात्रं द्विचामरम् ॥ मेषारूढं चतुःशृंगं बालादित्यसमप्रभम् ॥ ५० ॥ उपवीतसमायुक्तं जटाकुंडलमंडिमम् ॥ ज्ञात्वैवमग्निदेहं तु होमकर्मसमा
चरेत् ॥ ५१ ॥पयो दधि घृतं चैव स्नेहपक्वं तथैव च ॥ जुहुयाद्यस्तु हस्तेन स विप्रो ब्रह्महा भवेत्॥५२॥यदन्नं पुरुषोऽश्नाति तदन्नं तस्य देवताः॥

सर्वकामसमृद्ध्यर्थं तिलाधिक्यं हविर्मतम् ॥ ५३ ॥ होमे मुद्रात्रयं प्रोक्तं मृगी हंसी च सूकरी ॥ अभिचारे सूकरी स्यान्मृगी हंसी शुभात्मके
॥ ५४ ॥ सर्वांगुलीभिः क्रौडी स्याद्धंसी मुक्तकनिष्ठिका ॥ मध्यमानामिकांगुष्ठैर्मृगी मुद्रा प्रकीर्तिता ॥ ५५ ॥ पूर्वप्रमाणयाहुत्या पंचांगुलिगृहीतया॥
दधिमध्वाज्यसंयुक्तं ऋत्विग्भिर्जुहुयात्तिलैः ॥ ५६ ॥ कुशास्त्वनामिकासक्ताः कार्याः स्युः पुण्यकर्मणि ॥ ५७ ॥ विनायकः कर्मविघ्नसिद्ध्यर्थं
विनियोजितः ॥ गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा ॥ ५८ ॥ तेनोपसृष्टो यस्तस्य लक्षणानि निबोध मे ॥ स्वमेव गाहतेत्यर्थं जलं मुंडांश्च
पश्यति ॥ ५९ ॥ कामाय वाससश्चैव क्रव्यादांश्चाधिरोहति ॥ अंत्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठते ॥ ६० ॥ व्रजन्नपि तथात्मानं मन्यतेऽनुगतं परैः
विमना विफलारंभः संसीदत्यनिमित्ततः ॥ ६१ ॥ तेनोपसृष्टो लभते न राज्यं राजनंदनः ॥ कुमारी न च भर्तारमपत्यं गर्भमंगना ॥ आचार्यत्वं
श्रोत्रियश्च न शिष्योऽध्ययनं तथा ॥ ६२ ॥ वणिग्लाभं न चाप्नोति कृषिं चापि कृषीबलः ॥ स्नपनं तस्य कर्तव्यं पुण्येऽह्नि विधिपूर्वकम् ॥ गौरसर्ष
पकल्केन स्वस्ति वाच्या द्विजैः शुभाः ॥ ६३ ॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् ॥ मृत्तिकां रोचनां गंधान् गुग्गुलं चाशु निक्षिपेत्
॥ ६४ ॥ पान्याहृता ह्येकवर्णैश्चतुर्भिः कलशैर्ह्रदात् ॥ चर्मण्यानुडुहे रक्ते स्थाप्यं भद्रासनं ततः ॥६५॥ सहस्राक्षं शतधार मृषिभिः पावनं कृतम् ॥
तेन त्वामभिषिंचामि पावमान्याः पुनंतु ते ॥ ६६ ॥ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः ॥ भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुः ॥ ६७ ॥
यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि ॥ ललाटे कर्णयोरक्ष्णोरापस्तुदंतु सर्वदा ॥ ६८॥ स्नानस्य सार्षपं तैलं स्रुवेणौदुम्बरेण तु ॥ जुहुयान्मूर्द्धनि
कुशान्सव्येन परिगृह्य च ॥६९॥ मितश्च संमितश्चैव तथा शालकटंकटौ ॥ कूष्माण्डो राजपुत्र श्चेत्यंते स्वाहासमन्वितैः ॥ ७० ॥ नामभिर्बलिमंत्रैश्च
नमस्कारसमन्वितैः॥दद्याच्चतुष्पथे सूर्य्ये कुशानास्तीर्य्य सर्वतः॥७१॥कृता कृतांस्तंडुलीश्च पललौदनमेव च॥मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेव
तु॥७२॥पुष्पं चित्रं सुगंधं च सुरां च त्रिविधामपि॥ मूलकं पूरिकापूपांस्तथैवोटस्रजोऽपि च॥७३॥दध्यन्नं पायसं चैव गुडपिष्टं समोदकम्॥एतान्सर्वानुपा
हृत्य भूमौ कृत्वा ततः शिरः॥७४॥विनायकस्य जननी मुपतिष्ठेत्ततोऽम्बिकाम्॥दुर्वासर्षपपुष्पाणां दत्त्वार्घ्यं पूर्णमञ्जलिम्॥७५॥ रूपं देहि यशो देहि
भगं भगवति देहि मे ॥ पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे ॥७६॥ उपस्थाय शिवां दुर्गामुमापतिमथार्चयेत्॥धूपैर्दीपैश्च नैवेद्यैर्गन्धमाल्या
नुलेपनैः ॥ ७७ ॥ततः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ॥ ब्राह्मणान्भोजयेत्पश्चाद्वस्त्रयुगमं गुरोरपि ॥ ७८ ॥ एवं विनायकं पूज्य ग्रहाँश्चैव प्रपूज
येत् ॥ श्रीकामः शांतिकामो वा पुष्टिवृद्ध्यायुर्वीर्य्यवान् ॥७९॥ सूर्य्यः सोमो महीपुत्रो बुधो जीवो भृगुः शनिः॥राहुकेतू नवाप्येते स्थापनीया ग्रहाः
क्रमात् ॥ ८०॥ ताम्रकाद्रजताद्रक्तचंदनात्स्वर्णकादपि ॥हेम्नो रजतादयसः सीसात्कार्या शुभाप्तये ॥८१ ॥ स्ववर्णैर्वा पटे लेख्या गंधैर्मंडलकेषु च ॥

यथावर्णं प्रदेयानि वासांसि कुसुमानि च ॥ ८२ ॥ गंधाश्च बलयश्चैव धूपो देयश्च गुग्गुलुः ॥ कर्तव्या मंत्रवंतश्च चरवः प्रतिदैवतम् ॥ ८३ ॥
आकृष्णेन इमंदेवा अग्निर्मूर्द्धादिवः ककुत् ॥ उद्बुध्यस्वाति यदर्यस्तथैवान्नात्परिस्रुतः ॥८४॥ शन्नोदेवीस्तथा कांडात्केतुं कृण्वन्नकेतवः॥८५॥अर्कः
पलाशः खदिरस्त्वपामार्गोऽथपिप्पलः ॥ उदुंबरः शमी दूर्वा कुशाश्च समिधः क्रमात् ॥ ८६ ॥ एकैकस्मादष्टशतमष्टाविंशतिरेव च ॥
होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा पुनः॥८७॥ गुडौदनं पायसं च हविष्यंक्षीरषाष्टिकम् ॥दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च॥८८॥ दद्या
द्ग्रहक्रमादेतद्द्विजेभ्यो भोजनं बुधः ॥ शक्तितोऽपि यथा लाभं सत्कृत्य विधिपूर्वकम् ॥ ८९ ॥ धेनुः शंखस्तथाऽनड्वान्हिमवासो हयः क्रमात् ॥
कृष्णा गौरायसं छाग एता वै दक्षिणाः स्मृताः ॥ ९० ॥ यस्य यस्य तु यद्द्रव्यं पलेनार्च्यः स तेन च ॥ ब्रह्मन्नेषां वरो दत्तः पूजिताः पूज
यिष्यथः ॥९१॥ ग्रहाधीना नरेंद्राणां धनजात्युच्छ्रयास्तथा ॥ भावाभावौ च जगतस्तस्मात्पूज्यतमा ग्रहाः ॥९२॥ आदित्यस्य सदा पूजा तिलकं
स्वामिनस्तथा ॥ महागणपतेश्चैव कुर्वन्सिद्धिमवाप्नुयात् ॥ ९३॥ कर्मणां सफलत्वं च श्रियं वाप्नोत्यनुत्तमाम् ॥ ९४ ॥ अकृत्वा मातृयागं तु यो
ग्रहार्चां समारभेत् ॥ कुप्यंति मातरस्तस्य प्रत्यूहं कुर्वते तथा ॥ ९५॥ वसोः पवित्रमंत्रेण वसोर्द्धारां प्रकल्प्य च ॥ गौर्याद्या मातरः पूज्या मांग
ल्येषु शुभार्थिभिः ॥९६॥ गौरी पद्मा शची मेधा सावित्री विजया जया ॥ देवसेना स्वधा स्वाहा मातृका वैधृतिर्धृतिः ॥ ९७ ॥ पुष्टिर्हृष्टिस्तथा
तुष्टिरात्मदेवतया सह॥गणेशेनाधिका ह्येता वृद्धौ पूज्यास्तु षोडश॥९८॥आवाहनं तथा पाद्यमर्घ्यं स्नानं च चंदनम् ॥ अक्षतांश्चैव पुष्पाणि धूपं दीपं
फलानि च॥९९॥नैवेद्याचमनीयं च तांबूलं पूगमेव च ॥ नीराजनं दक्षिणां च क्रमाद्द्याच्च तुष्टये ॥१००॥पितृकल्पं प्रवक्ष्यामि धनसंततिवर्द्धनम् ॥
अमावस्याष्टका वृद्धिः कृष्णपक्षायनद्वयम् ॥ १०१ ॥ द्रव्यं ब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः ॥ व्यतीपातो गजच्छाया ग्रहणं चंद्रसूर्ययोः ॥१०२॥
श्राद्धं प्रतिरुचिश्चैव श्राद्धकालाः प्रकीर्तिताः ॥ अग्र्याः सर्वेषु वेदेषु श्रोत्रियो ब्रह्मविद्युवा ॥१०३॥ वेदार्थविज्ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णकः ॥ स्वस्री
य ऋत्विग्जामाता याज्यश्वशुरमातुलाः ॥ १०४ ॥ त्रिणाचिकेतदौहित्रशिष्यसंबंधिबांधवाः ॥ कर्मनिष्ठास्तपोनिष्ठाः पंचाग्निब्रह्मचारिणः ॥
॥१०५ ॥ पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसंपदः ॥ रोगी न्यूनातिरिक्तांगः काणः पौनर्भवस्तथा ॥ १०६ ॥ अवकीर्णी कुंडगोलौ कुनखी श्या
वदंतकः ॥ भृतकाध्यापकः क्लीबः कन्यादूष्यभिशस्तकः ॥ १०७ ॥ मित्रध्रुक् पिशुनः सोमविक्रयी परिविन्दकः ॥ मातृपितृगुरुत्यागी कुंडाशी
वृषलात्मजः ॥ १०८ ॥ परपूर्वापतिः स्तेनः कर्मभ्रष्टाश्च निंदिताः ॥ निमंत्रयीत पूर्वेद्युर्ब्राह्मणानात्मवान् शुचिः ॥ १०९ ॥ तैश्चापि संयतै

र्भाव्यं मनोवाक्कायकमभिः ॥ अपराह्णे समभ्यर्च्य स्वागतेनागतांस्तु तान् ॥ ११० ॥ पवित्रपाणिराचांतानासने चोपवेशयेत् ॥ विप्रान्दैवे
यथाशक्ति पित्र्येऽयुग्मांस्तथैव च ॥ १११ ॥ पराश्रिते शुचौ देशे दक्षिणाप्रवणं तथा ॥ द्वौ दैवे प्राक् त्रयः पित्र्ये उदगेकैकमेव च ॥ ११२ ॥
मातामहानामप्येवं तत्र वा वैश्वदैविकम् ॥ पाणिप्रक्षालनं दत्त्वा विष्टरार्थं कुशानपि ॥ ११३ ॥ आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचा ॥ यवै
रन्वावकीर्याथ भाजने सपवित्रके ॥ ११४ ॥ शन्नो देव्या अपः क्षिप्त्वा यवोऽसीति यवांस्तथा ॥ यादिव्या इति मंत्रेण हस्ते पाद्यं विनिःक्षिपेत्
। ११५॥ दत्त्वोदकं गंधमाल्यं प्रदायान्नं सदीपकम् ॥ अपसव्यं ततः कृत्वा पितॄणां सप्रदक्षिणम् ॥११६॥ द्विगुणांस्तु कुशान्दत्त्वा ह्युशंतस्त्वेत्यृचा
पितॄन् ॥ आवाह्य तदनुज्ञातो जपेदायंतु नस्ततः॥११७॥यवार्थास्तु तिलैः कार्याः कुर्यादर्घ्यादि पूर्ववत्॥दत्त्वार्घ्यं सयवांस्तेषां पात्रे कृत्वा विधानतः
॥ ११८॥ पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः॥अग्नौ करिष्यन्नादाय पृच्छत्यन्नं घृतप्लुतम् ॥ ११९ ॥ कुरुष्वेत्यभ्यनुज्ञातो दत्त्वाग्नौ
पितृयज्ञवत् ॥ हुतशेषं प्रदद्यात्तु भाजनेषु समाहितः ॥ १२० ॥ यथालाभोपपन्नेषु रौप्येषु च विशेषतः ॥ दत्त्वान्नं पृथिवीपात्रमिति पात्रा
भिमंत्रणम् ॥ १२१ ॥ कृत्वेदं विष्णुरित्यन्ने द्विजांगुष्ठं निवेशयेत् ॥ सव्याहृतिकां गायत्रीं मधुवाता इति त्र्यृचम् ॥ १२२ ॥ जप्त्वा यथासुखं
वाच्यं भुञ्जीरंस्तेऽपि वाग्यताः ॥ अन्नमिष्टं हविष्यं च दद्यादक्रोधनोऽत्वरः ॥ १२३ ॥ आतृप्तेस्तु पवित्राणि जप्त्वा पूर्वजपं तथा ॥ अन्नमादाय
तृप्ताःस्थ शेषं चैवानुमान्य च ॥ १२४ ॥ तदन्नं विकिरेद्भूमौ दद्याच्चापः सकृत्सकृत् ॥ सर्वमन्नमुपादाय सतिलं दक्षिणामुखः ॥ १२५ ॥
उच्छिष्टसन्निधौ पिंडान्दद्याद्वै पितृयज्ञवत् ॥ मातामहानामप्येवं दद्यादाचमनं ततः ॥ १२६ ॥ स्वस्तिवाचं ततः कुर्यादक्षय्योदकमेव हि॥दत्त्वा च
दक्षिणां शक्त्या स्वधाकारमुदाहरेत् ॥ १२७ ॥ वाच्यतामित्यनुज्ञातः प्रकृतेभ्यः स्वधोच्यताम्॥ब्रूयुरस्तु स्वधेत्युक्ते भूमौ सिंचेत्ततो जलम् ॥१२८॥
विश्वेदेवाश्च प्रीयंतां विप्रैश्चोक्त इदं जपेत्॥दातारो नोऽभिवर्द्धंतां वेदाः संततिरेव च॥१२९॥श्रद्धा च नो मा व्यगमद्बहु देयं च नोऽस्त्विति॥इत्युक्तो
क्ताः प्रिया वाचः प्रणिपत्य विसर्जयेत् ॥१३०॥ वाजेवाजे इति प्रीतः पितृपूर्वं विसर्जनम् ॥ यस्मिंस्ते संश्रवाः पूर्वमर्घ्यपात्रे निवेशिताः ॥१३१॥
पितृपात्रं तदुत्थानं कृत्वा विप्रान्विसर्जयेत् ॥ प्रदक्षिणमनुव्रज्य भुंजीत पितृसेवितम् ॥१३२॥ ब्रह्मचारी भवेत्तां तु रजनीं ब्राह्मणैः सह॥एवं प्रदक्षि
णावृत्त्या वृद्धौ नांदीमुखान्पितॄन्॥ १३३ ॥ यजेत दधिकर्कंधुमिश्रान्पिडान्यवैः कृतान् ॥एकोद्दिष्टं देवहीनमेवार्घ्यैकपवित्रकम्॥ १३४ ॥
आवाहनाग्नौकरणरहितं ह्यपसव्यवत् ॥ उपतिष्ठतामक्षय्यस्थाने विप्रविसर्जने ॥ १३५ ॥ अभिरम्यतामिति वदेद् ब्रूयुस्तेऽभिरताः स्म ह ॥ गंधोदकं

तिलैर्युक्तं कुर्यात्पात्रचतुष्टयम् ॥ १३६ ॥ अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ॥ ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत् ॥ १३७ ॥ एतत्सपिं
डीकरणमेकोद्दिष्टं स्त्रिया अपि ॥ अर्वाक्सपिंडीकरणं यस्य संवत्सराद्भवेत् ॥१३८॥ तस्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विजे॥मृतेऽहनि तु कर्तव्य
प्रतिमासं तु वत्सरम् ॥ १३९ ॥ प्रतिसंवत्सरं चैव मासमेकादशेऽहनि ॥ पिंडांश्च गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा ॥१४०॥प्रक्षिपेत्सत्सु विप्रेषु
द्विजोच्छिष्टं न मार्जयेत् ॥ हविष्यान्नेन वै मासं पायसेन तु वत्सरम् ॥ १४१॥ मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः ॥ ऐणरौरववाराहशाशैर्मांसैर्य
थाक्रमम् ॥ १४२ ॥ मासवृद्ध्याभितृप्यंति दत्तैरिह पितामहाः ॥ खड्गामिषं महाकल्पं मधु मुन्यन्नमेव च ॥ १४३ ॥ लोहामिषं महाशाकं मांसं
वार्ध्रीणसस्य च ॥ यो ददाति गयास्थश्च सर्वमानंत्यमश्नुते ॥ १४४ ॥ तथा वर्षात्रयोदश्यां मघासु च विशेषतः ॥ कन्यां कन्यावेदिनश्च पशून्वै
सत्सुतानपि ॥ १४५ ॥ द्यूतं कृषिं च वाणिज्यं द्विशफैकशफांस्तथा ॥ ब्रह्मवर्चस्विनः पुत्रान्स्वर्णरूप्ये सकुप्यके ॥ १४६ ॥ ज्ञातिश्रैष्ठ्यं सर्वकामाना
प्नोति श्राद्धदः सदा ॥ प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम् ॥ १४७ ॥ शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते ॥स्वर्गं ह्यपत्यमोजश्च शौर्यं
क्षेत्रं बलं तथा॥ १४८ ॥ पुत्रान् श्रेष्ठांश्च सौभाग्यं समृद्धिं मुख्यतां शुभम् ॥ प्रवृत्तं चक्रतां चैव वाणिज्यप्रभृतीनि च ॥१४९॥ अरोगित्वं यशो
वीतशोकतां परमां गतिम्॥धनं विद्यां भिषक्सिद्धिं कुप्यगा अप्यजाविकम् ॥ १५० ॥ अश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छति ॥ कृत्तिकादि
भरण्यंतं सकामानाप्नुयादिमान् ॥ १५१ ॥ आस्तिकः श्रद्धानश्च व्यपेतमदमत्सरः ॥ वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः ॥ १५२ ॥
प्रीणयंति मनुष्याणां पितॄन् श्राद्धेन तर्पिताः ॥ आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ॥ १५३ ॥ प्रयच्छंति तथा राज्यं नृणां प्रीता
पितामहाः ॥ इत्येवं कथित किंचित्कल्पाध्याये विशेषतः ॥१५४॥ज्ञातव्यं वैदिके तंत्रे पुराणांतरकेऽपि च॥य इमं चिंतयेद्विद्वान्कल्पाध्यायं मुनीश्वर
॥ १५५ ॥ स भवेत्कर्मकुशल इहान्यत्र गतिं शुभाम् ॥ यः शृणोति नरो भक्त्या दैवे पित्र्ये च कर्मणि ॥१५६॥ कल्पाध्यायं स लभते दैवपित्र्य
क्रियाफलम् ॥ धनं विद्यां यशः पुत्रान्परत्र च गतिं पराम्॥१५७॥अतः परं व्याकरणं तुभ्यं वेदमुखाभिधम्॥कथयिष्ये समासेन शृणुष्व सुसमाहितः
॥१५८॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने द्वितीयपादे एकपंचाशत्तमोऽध्यायः॥५१॥सनंदन उवाच॥अथ व्याकरणं वक्ष्ये संक्षेपात्तव
नारद ॥ सिद्धरूपप्रबंधेन मुखं वेदस्य सांप्रतम्॥१॥सुप्तिङंतं पदं विप्र सुपां सप्त विभक्तयः ॥ स्वौजसः प्रथमा प्रोक्ता सा प्रातिपदिकात्मिका ॥ २ ॥
संबोधने च लिंगादावुक्ते कर्मणि कर्तरि॥अर्थवत्प्रातिपदिकं धातुप्रत्ययवर्जितम् ॥३॥अमौशसो द्वितीया स्यात्तत्कर्म क्रियते च यत्॥द्वितीया कर्मणि

प्रोक्तान्तरांतरेण संयुते॥४॥टाभ्यांभिसस्तृतीया स्यात्करणे कर्तरीरिता॥येन क्रियते तत्करणं सः कर्ता स्यात्करोति यः॥५॥ङेभ्यांभ्यसश्चतुर्थी स्यात्सं
प्रदाने च कारके॥यस्मै दित्सा धारयेद्वै रोचते संप्रदानकम्॥६॥पंचमी स्यान्ङसिभ्यांभ्यो ह्यपादाने च कारके ॥यतोऽपैति समादत्ते अपदत्ते च यं
यतः ॥७॥ ङसोसामश्च षष्ठी स्यात्स्वामिसंबंधमुख्यके ॥ ङ्योस्सुपः सप्तमी तु स्यात्सा चाधिकरणे भवेत्॥८॥आधारे चापि विप्रेंद्र रक्षार्थानां
प्रयोगतः ॥ ईप्सितं चानीप्सितं यत्तदपादानकं स्मृतम् ॥९॥ पंचमी पर्युपाङ्योगे इतरर्तेऽन्यदिङ्मुखे ॥ एतैर्योगे द्वितीया स्यात्कर्मप्रवचनीयकैः॥
॥ १० ॥ लक्षणेत्थंभूतोऽभिरभागे चानुपरिप्रति ॥ अंतरेषु सहार्थे च हीने ह्युपश्च कथ्यते ॥ ११ ॥ द्वितीया च चतुर्थी स्याच्चेष्टायां गतिकर्मणि ॥
अप्राणिषु विभक्ती द्वे मन्यकर्मण्यनादरे ॥ १२ ॥ नमःस्वस्तिस्वधास्वाहालंवषड्योग ईरिता ॥ चतुर्थी चैव तादर्थ्ये तुमर्थाद्भाववाचिनः ॥ १३॥
तृतीया सहयोगे स्यात्कुत्सितेंऽगे विशेषणे ॥ काले भावे सप्तमी स्यादेतैर्योगे च षष्ठ्यपि ॥ १४ ॥ स्वामीस्वराधिपतिभिः साक्षिदायादसूतकैः ॥
निर्धारणे द्वे विभक्ती षष्ठी हेतुप्रयोगके ॥ १५ ॥ स्मृत्यर्थकर्मणि तथा करोतेः प्रतिय नके ॥ हिंसार्थानां प्रयोगे च कृतिकर्मणि कर्तरि ॥ १६ ॥
न कर्तृकर्मणोः षष्ठी निष्ठादिप्रतिपादिका ॥ एता वै द्विविधा ज्ञेयाः सुबादिषु विभक्तिषु ॥ भूवादिषु तिङंतेषु लकारा दश वै स्मृताः ॥ १७ ॥ तिप्त
संतीति प्रथमो मध्यमः सिप्थस्थोत्तमः ॥ मिव्वस्मसः परस्मै तु पादानां चा मपनेदम् ॥१८ ॥ त आतेंऽते प्रथमो मध्यः से आथे ध्वे तथोत्तमः॥
ए वहे मह आदेशा ज्ञेया ह्यन्ये लिङादिषु॥१९॥नाम्नि प्रयुज्यमाने तु प्रथमः पुरुषो भवेत् ॥ मध्यमो युष्मदि प्रोक्त उत्तमः पुरुषोऽस्मदि॥२०॥
भूवाद्या धातवः प्रोक्ताः सनाद्यन्तास्तथा ततः ॥ लडीरितो वर्तमाने भूतेऽनद्यतने तथा ॥ २१ ॥ मास्मयोगे च लङ् वाच्यो लोडाशिषि च धातुतः॥
विध्यादौ स्यादाशिषि च लिङितो द्विविधो मुने॥२२॥लिडतीते परोक्षे स्यात् श्वस्तने लुङ् भविष्यति॥स्यादनद्यतने लट् च भविष्यति तु धातुतः॥
॥ २३ ॥ भूते लुङ् तिपस्यपौ च क्रियायां लङ् प्रकीर्तितः ॥ सिद्धोदाहरणं विद्धि संहितादिपुरःसरम् ॥ २४ ॥ दंडाग्रं च दधीदं च मधूदकं पित्र
षभः ॥ होतृकारस्तथा सेयं लांगलीषा मनीषया ॥ २५ ॥ गंगोदकं तवल्कार ऋणार्णं च मुनीश्वर ॥ शीतार्तश्च मुनिश्रेष्ठ सेंद्रः सौकार इत्यपि ॥
॥ २६ ॥ वध्वासनं पित्रर्थो नायको लवणस्तथा ॥ त आद्या विष्णवे ह्यत्र तस्मा अर्घो गुरा अधः ॥ २७ ॥ हरेऽव विष्णोऽवेत्येषादसोमादप्यमी
अघाः ॥ शौरी एतौ विष्णू इमौ दुर्गे अमू नो अर्जुनः ॥ २८ ॥ आ एवं च प्रकृत्यैतं तिष्ठंति मुनिसत्तम॥ षडत्र षण्मातरश्च वाक्छुरो वाग्घरितथा
॥ २९ ॥ हरिश्शेते विभुश्चित्यस्तच्छेपो यच्चरस्तथा ॥ प्रश्नस्त्वथ हरिष्षष्ठः कृष्णष्ठीकत इत्यपि ॥ ३० ॥ भवान्षष्ठश्च षट् सन्तः षट्ते तल्लेप

एव च ॥ चक्रिंश्छिधि भवाञ्छौरिर्भवाञ्शौरिरित्यपि ॥ ३१ ॥ सम्यङ्ङनंतोंगच्छाया कृष्णं वंदे मुनीश्वर ॥ तेजांसि मंस्यते गङ्गा हरिश्छेत्ता
मरश्शिवः ॥ ३२ ॥ राम × काम्यः कृप × पूज्यो हरिः पूज्योऽर्च्य एव हि ॥ रामो दृष्टोऽबला अत्र सुप्ता इष्टा इमा यतः ॥ ३३ ॥ विष्णुर्नम्यो
रविरयं गी ›‹ फलं प्रातरच्युतः ॥ भक्तैर्वंद्योऽप्यंतरात्मा भो भो एष हरिस्तथा ॥ एष शार्ङ्गी सैष रामः संहितैवं प्रकीर्तिता ॥ ३४ ॥ रामेणाभिहितं
करोमि सततं रामं भजे सादरम् ॥ रामेणापहृतं समस्तदुरितं रामाय तुभ्यं नमः ॥ रामान्मुक्तिमभीप्सिता मम सदा रामस्य दासोऽस्म्यहम् ॥
रामे रंजतु मे मनः सुविशदं हे राम तुभ्यं नमः ॥ ३५ ॥ सर्व इत्यादिका गोपाः सखा चैव पतिर्हरिः ॥ ३६ ॥ सुश्रीर्भानुः स्वयंभूश्च
कर्ता रै गौस्तु नौरिति ॥ अनड्वान्गोधुग्लिट् च द्वे त्रयश्चत्वार एव च॥३७॥ राजा पंथास्तथा दंडी ब्रह्महा पंच चाष्ट च ॥ अष्टौ अयं मुने
सम्राट् सविभ्रद्वपुङ्मनः ॥ ३८ ॥ प्रत्यङ् पुमान्महान् धीमान् विद्वान्षट् पिपठीश्च दोः ॥ उशनासाविमे पुंसि स्युरक्तलविरामकाः ॥ ३९ ॥ राधा
सर्वा गतिर्गोपी स्त्री श्रीर्धेनुर्वधूः स्वसा ॥ गौर्नौरुपानद्द्यौर्गीः क्षुत् ककुप्संविन्तु वा क्वचित् ॥४०॥ रुग्विड्डुद्भाः स्त्रियास्तपः कुलं सोमपमक्षि च ॥
ग्रामण्यंबुखलप्वेवं कर्तृ चातिरि वातिनु ॥ ४१ ॥ स्वनडुच्च विमलद्यु वाश्चत्वारीदमेव च ॥एतद्ब्रह्माहश्च दंडी असृक्किंचित्त्यदादि च ॥ ४२ ॥ एतद्वे
भिद्गवाक्गवाङ् गोअक् गोङ्गोक् गोङ् ॥ तिर्यग्यकृच्छकृच्चैव ददद्भवत्पचत्तुदत् ॥ ४३ ॥ दीव्यद्धनुश्च पिपठीः पयोऽदःसुपुमांसि च ॥ गुणद्रव्य
क्रियायोगांस्त्रिलिंगांश्च कति ब्रुवे ॥ ४४ ॥ शुक्तः कीलालपाश्चैव शुचिश्च ग्रामणीः सुधीः ॥ पटुः स्वयंभूः कर्ता च माता चैव व पिता च ना
॥ ४५ ॥ सत्यानाग्युस्तथा पुंसो मतभ्रमरदीर्घपात् ॥ धनाकृसोमौ चागर्हस्ताविर्ग्रथास्वर्णन्बहू ॥ ४६ ॥ रिमषव्विषाद्वंद्वजातानहो तथा
सर्वं विश्वोभये चोभौ अन्यांतरेतराणि च ॥ ४७ ॥ उत्तरश्चोत्तमो नेमस्त्वसमोऽथ समा इषः ॥ पूर्वोत्तरोत्तराश्चैव दक्षिणश्चोत्तराधरौ
॥ ४८ ॥ अपरश्चतुरोऽप्येतद्यावत्तत्किमसौ द्वयम् ॥ युष्मदस्मच्च प्रथमश्चरमोल्पस्तथार्धकः ॥ ४९ ॥ नोरः कतिपयो द्वे च त्रयो शुद्धादयस्तथा ॥
स्वेकाभुविरोधपरि विपर्ययश्चाव्ययास्तथा ॥५०॥ तद्धिताश्चाप्यपत्यार्थे पांडवाः श्रैधरस्तथा ॥ गार्ग्यो नाडायनात्रेयौ गांगेयः पैतृष्वस्रीयः ॥ ५१ ॥
देवतार्थे चेदमर्थे ह्यैंद्रं ब्राह्मो हविर्बली ॥ क्रियायुजोः कर्मकर्त्रोर्धौरेयः कौङ्कुमं तथा॥५२॥भवाद्यर्थे तु कानीनः क्षत्रियो वैदिकः स्वकः ॥ स्वार्थे
चौरस्तु तुल्यार्थे चंद्रवन्मुखमीक्षते ॥५३॥ ब्राह्मणत्वं ब्राह्मणता भावे ब्राह्मण्यमेव च ॥ गोमान्धनी च धनवानस्त्यर्थे प्रमितौ कियान् ॥ ५४ ॥
जातार्थे तुंदिलःश्रद्धालुरौन्नत्ये तु दंतुरः ॥ स्रग्वी तपस्वी मेधावी मायाव्यस्त्यर्थ एव च ॥५५॥ वाचालश्चैव वाचाटो बहुकुत्सितभाषिणि॥ईषदपरि

समाप्तौ कल्पब्देशीय एव च ॥ ५६ ॥ कविकल्पः कविदेश्यः प्रकारवचने तथा ॥पटुजातीयः कुत्सायां वैद्यपाशः प्रशंसने ॥ ५७ ॥ वैद्यरूपो
भूतपूर्वे मतो दृष्टचरो मुने ॥ प्राचुर्यादिष्वन्नमयो मृण्मयः स्त्रीमयस्तथा ॥ ५८ ॥ जातार्थे लज्जितोऽत्यर्थे श्रेयाञ्छ्रेष्ठश्च नारद ॥ कृष्णतरः शुक्ल
तमः किम आख्यानतोऽव्ययान् ॥५९॥ किंतरां चैवातितरामभिह्युच्चैस्तरामपि ॥ परिमाणे जानुदघ्नं जानुद्वयसमित्यपि॥६०॥जानुमात्रं च निर्द्धारे
बहूनां च द्वयोः क्रमात् ॥कतमः कतरः संख्येयविशेषावधारणे ॥ ६१ ॥ द्वितीयश्च तृतीयश्च चतुर्थः षष्ठपंचमौ ॥ एकादशः कतिपयः कतिथः
कति नारद ॥ ६२ ॥ विंशश्च विंशतितमस्तथा शततमादयः ॥ द्वेधा द्वैधा द्विधा संख्या प्रकारेऽथ मुनीश्वर ॥६३॥क्रियावृत्तौ पंचकृत्वो द्विस्त्रिर्बहुश
इत्यपि ॥ द्वितयं त्रियतं चापि संख्यायां हि द्वयं त्रयम् ॥ ६४ ॥ कुटीरश्च शमीरश्च शुंडारोऽल्पार्थके मतः ॥ स्त्रैणः पौषणस्तुंडिभश्च वृंदारकक्रुषी
वलौ॥६५॥मलिनो विकटो गोमी भौरिकीविधमुत्कटम् ॥ अवटीटोवनाटे निबिडं चेक्षुशाकिनम्॥६६॥निबिरीसमेषुकारी वित्तोविद्याचणस्तथा॥
विद्याचुंचुर्बहुतिथं पर्वतः शृंगिणस्तथा ॥६७॥स्वामी विषमरूप्यं चोपत्यकाधित्यका तथा ॥ चिल्लश्च चिपिटं चिक्कं वातूलः कुतपस्तथा ॥६८ ॥
वल्लश्च हिमेलुश्च कहोडश्चोपडस्ततः ॥ ऊर्णायुश्च मरूतश्चैकाकी चर्मण्वती तथा ॥ ६९ ॥ ज्योत्स्नां तमिस्रा ष्ठीवच्च कक्षीवच्चर्मण्वती ॥ आसंदी
वच्च चक्रीवत्तूष्णीकां जल्पतक्यपि ॥ ७० ॥ कंभश्च कंयुः कंवश्च नारदकेतिः कंतुः कंतकंपौ शंवस्तथैव च ॥ शंतः शंतिः शंयशंतौ शंयोहंयुः
शुभंयुवत् ॥७१॥ भवति बभूव भविता भविष्यति भवत्वभवद्भवेच्चापि ॥ ७२ ॥ भूयादभूदभविष्यह्लादावेतानि रूपाणि ॥ अत्ति जघासात्तात्स्य
त्यत्त्वाददद्याद्विरघसदात्स्यत् ॥ ७३ ॥ जुहोति जुहाव जुहवांचकार होता होष्यति जुहोतु ॥ अजुहोज्जुहुयाद्धूयादहौषीदहोष्यदीव्यति ॥
दिदेव देविता देविष्यति च अदीव्यद्दीव्येद्दीव्याद्वै॥७४॥ अदेवीददेवीष्यत्सुनोति सुषाव सोता सोष्यति वै ॥ सुनोत्वसुनोत्सुनुयात्सूयादशावीदसो
ष्युत्तुदति च ॥ ७५ ॥ तुतोद तोत्ता तोत्स्यति तुदत्वतुदत्तुदेत्तुद्याद्धि ॥ अतौत्सीदतोत्स्यदिति च रुणद्धि रुरोध रोद्धा रोत्स्यति वै ॥७६ ॥रुणद्धु
अरुणद्रुध्यादरौत्सीदरोत्स्यच्च ॥ तनोति ततान तनिता तनिष्यति तनोत्वतनोत्तनुयाद्धि ॥ ७७ ॥ अतनीच्चातानीदतनिष्यत्क्रीणाति चिक्राय क्रेता
क्रेष्यति क्रीणात्विति च॥अक्रीणात्क्रीणीयात्क्रीयादक्रैषीदक्रेष्यच्चोरयति चोरयामास चोरयिता चोरयिष्यति चोरयतु॥७८॥अचोरयच्चोरयेच्चोर्यात्
अचूचुरदचोरिष्यदित्येवं दश वै गणाः॥प्रयोजके भावयति सनीच्छायां बुभूषति॥क्रियासमभिहारे तु पंडितो बोभूयते मुने॥७९॥तथा यङ्लुकि बोभ
वीति च पच्यते॥पुत्रीयतीत्यात्मनीच्छायां तथाचारेऽपि नारद ॥ अनुदात्तञितो धातोः क्रियाविनिमये तथा॥८०॥निविशादेस्तथा विप्र विजानीह्या

त्मनेपदम्॥परस्मैपदमाख्यातं शेषात्कर्तरि शाब्दिकैः॥८१॥ञित्स्वरितेतश्च उभे यक्च स्याद्भावकर्मणोः॥सौकर्यातिशयं चैव यदा द्योतयितुं मुने॥८२॥
विवक्ष्यते न व्यापारो लक्ष्ये कर्तुस्तदापरे ॥ लभंते कर्तृतां पश्य पच्यते ह्योदनः स्वयम् ॥ ८३ ॥ साधु वासिश्छिनत्त्येवं स्थाली पचति वै मुने ॥
धातोः सकर्मकाद्भावे कर्मण्यपि लप्रत्ययाः ॥ ८४ ॥ तस्मै वाकर्मकाद्विप्र भावे कर्तरि कीर्तितः ॥ फलव्यापरयोरेकनिष्ठतायामकर्मकः ॥ ८५ ॥
धातुस्तयोर्द्धर्मिभेदे सकर्मक उदाहृतः ॥ गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम् ॥८६॥ बुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छया ॥ प्रयोज्य
कर्मण्यन्येषां ण्यंतानां लादयो मताः ॥ ८७ ॥ फलव्यापारयोर्द्धातुराश्रये तु तिङः स्मृताः ॥ फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥ ८८ ॥
एधितव्यमेधनीयमिति कृत्ये निदर्शनम् ॥ भावे कर्मणि कृत्याः स्युः कृतः कर्तरि कीर्तिताः॥८९॥ कर्ता कारक इत्याद्या भूते भूतादि कीर्तितम् ॥
गम्यादिगम्ये निर्दिष्टं शेषमद्यतने मतम् ॥९०॥अधिस्त्रीत्यव्ययीभावे यथाशक्ति च कीर्तितम् ॥ रामाश्रितस्तत्पुरुषे धान्यार्थो यूपदारु च ॥९१ ॥
व्याघ्रभी राजपुरुषोऽक्षशौंडो द्विगुरुच्यते ॥ पंचगवं दशग्रामी त्रिफलेति तु रूढितः॥९२॥नीलोत्पलं महाषष्ठी तुल्यार्थे कर्मधारयः ॥ अब्राह्मणो न
ञि प्रोक्तः कुंभकारादिकः कृता ॥ ९३॥ अन्यार्थे तु बहुव्रीहौ ग्रामः प्राप्तोदको द्विज॥ पंचगू रूपवद्भार्यो मध्याह्नः ससुतादिकः ॥ ९४ ॥ समुच्चये
गुरुं चेशं भजस्वान्वाचये त्वट ॥ भिक्षामानय गां चापि वाक्यमेवानयोर्भवेत् ॥ ९५ ॥ इतरेतरयोगे तु रामकृष्णौ समाहृतौ ॥ रामकृष्णं
द्विज द्वे द्वे ब्रह्म चैकमुपास्यते ॥९६॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने द्वितीयपादे व्याकरणनिरूपणं नाम द्विपञ्चाशत्तमोऽध्यायः ॥
॥ ५२ ॥ सनंदन उवाच ॥ निरुक्तं ते प्रवक्ष्यामि वेदं श्रोत्रांगमुत्तमम् ॥ तत्पंचविधमाख्यातं वैदिकं धातुरूपकम् ॥ १ ॥ क्वचिद्वर्णागमस्तत्र
क्वचिद्वर्णविपर्ययः॥विकारः क्वापि वर्णानां वर्णनाशः क्वचिन्मतः ॥२॥तथा विकारनाशाभ्यां वर्णानां यत्र नारद ॥धातोर्योगातिशयी च संयोगः परि
कीर्तितः ॥३॥सिद्धेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात्॥गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरः॥४॥भ्रमरादिषु शब्देषु ज्ञेयो योगो हि पञ्चमः॥ बहुलं
छन्दसीत्युक्तमत्र वाच्यं पुनर्वसू ॥ ५ ॥ नभस्वद्वृषणश्चैवापरस्मैपदि चापि हि ॥ परं व्यवहिताश्चापि गतिसंज्ञास्तथा हि आ ॥ ६ ॥ विभक्तीनां
विपर्यासो यथा दध्ना जुहोति हि ॥ अभ्युत्सादयामकेतुर्ध्वनयीत्प्रमुखास्तथा ॥ निष्टक्र्याद्यास्तथोक्ताश्च गृभायेत्यादिकास्तथा ॥ ७ ॥ सुप्ति
ङुपग्रहलिंगनराणां कालहल्च्स्वरकर्तृयडां च ॥ व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिद्ध्यति बाहुल्केन ॥ ८ ॥ रात्री विम्बी
च कद्रूश्चाविष्टो वाजसनेयिनः ॥ ९ ॥ कर्णेभिश्च यशोभाग्य इत्याद्याश्चतुरक्षरम् ॥ देवासोऽथो सर्वदेवतातित्वावत इत्यपि ॥ १० ॥ उभयाविन

माद्याश्च प्रलयाद्याश्च स्तृंच तथा ॥ अपस्पृधेथां नो अव्यादायो अस्मान्मुखास्तथा ॥ ११ ॥ सगभ्योंस्थापदी ऋत्व्योरजिष्टं त्रिपंचकम् ॥
हिरण्ययेन नरं च परमे व्योमनित्यपि ॥ १२ ॥ उर्विया स्वप्रया वारवध्वाददुहवैवधी ॥ यजध्वैनमेमसि च स्नात्वी गत्वा पचास्थभीः ॥ १३ ॥
गोनांचापरिह्वृत्ताश्चातुरीर्ग्रसितादिका ॥ पश्येदधद्धभूथापि प्रमिणांतित्यवीवृधत् ॥ १४ ॥ मित्रयुश्च दुरस्वा वा ह्वात्वा सुधितमित्यपि ॥ दधर्त्याद्या
स्ववद्भिश्च ससूवेति च धिष्व च ॥१५॥ प्रप्रायं च हरिवतेक्षण्वतः सुपथिंतरः ॥ रथीतरी नसताद्या अन्नर्भुवरथो इति ॥१६॥ ब्रह्माद्यादेः परस्याप्यौ
श्रावयेत्यादिके प्लुतः ॥ दाश्वांश्च स्वतवान्यापौत्रिभिष्ठ्व च नृभिष्टुतः॥१७॥अभीषुण ऋतावाहं न्यषीदन्नृमणा अपि॥चतुर्विधाद्बाहुलकात्प्रवृत्तेरप्रवृ
त्तितः ॥ १८ ॥ विभाषयान्यथाभावात्सर्वं सिद्ध्येच्च वैदिकम् ॥ भूवाद्या धातवो ज्ञेयाः परस्मैपदिनस्स्मृताः॥ १९ ॥ एधाद्या आत्मनेभाषा उदात्ताः
षट्त्रिंशसंख्यकाः॥अतादयोऽष्टत्रिंशच्च परस्मैपदिनो मुने॥२०॥शोकृपूर्वा द्विचत्वारिंशदुक्ता च ह्यात्मने पदे॥उदात्तेतस्तु पंचाशत्फक्काद्याः परिकीर्तिताः
॥ २१ ॥ वर्चाद्या अनुदात्तेत एकविंशतिरीरिताः ॥ गुपादयो द्विचत्वारिंशदुदात्तेताः समीरितः॥ २२ ॥ धिण्यादयोऽनुदात्तेतो दश प्रोक्ता हि
शाब्दिकैः॥अणादयोप्युदात्ततः सप्तविंशतिधातवः॥२३॥अमादयःसमुद्दिष्टाश्चतुस्त्रिंशद्धिशाब्दिकः ॥ द्विसप्ततिमिता मव्यमुखाश्चोदात्तबंधना॥२४॥
स्वरितेद्धावुधातुस्तु एक एव प्रकीर्तितः॥क्षुधादयोऽनुदात्तेतो द्विषपंचाशदुदाहृताः॥२५॥घुषिराद्या उदात्ततोऽष्टाशीतिर्धातवो मताः ॥ द्युताद्या अनु
दात्तेतो द्वाविंशतिरतो मताः ॥२६॥ षितस्त्रयोदश घटादिष्वेनुदात्तेत ईरितः ॥ ततो ज्वलदुदात्तेतो द्विपंचाशन्मितास्तथा॥२७॥स्वरितद्राजृसंप्रोक्त
स्तनहेभ्राजृतस्त्रयः॥ अनुदात्तेत अख्याता माद्युदात्ता इतः स्यमात् ॥ २८॥ सहोऽनुदात्तेदेकस्तु रमेंकोऽप्यात्मनेपदी ॥ सदस्त्रय उदात्तेतः कुचाद्वदा
उदात्त इत् ॥ २९ ॥ स्वरितेतः पञ्चत्रिंशद्धिक्काद्याश्च ततः परम् ॥ स्वरितेच्छिञ्भृञाद्याश्चत्वार स्वरितेत्ततः ॥ ३९ ॥ धेटः परस्मैपदिनः षट्चत्वारिं
शदुदीरिताः॥ अष्टादश स्मिङाद्यास्तु आमनेपदिनो मताः॥ ३१ ॥ ततस्त्रयोऽनुदात्तेतः पूङाद्याः परिकीर्तिताः।। हृपरस्मैपदी चात्मनेभाषास्तु
गुपात्रयः ॥३२॥ रभद्यन्दयनुदात्तेतो त्रिक्ष्विदोदात्त इन्मतः ॥ परस्मैपदिनः पंच दश स्कंम्भ्वादयस्तथा ।। ३३ ।। कितधातुरुदात्तेच्च दानशानोभ
यात्मकौ ॥ स्वरितेतः पचाद्यंकाः परस्मैपदिनो मताः ॥ ३४ ॥ स्वरितेतस्त्रयश्चैतौ वदवची परिभाषिणौ ॥ भ्वाद्या एते षडधिकं सहस्रं धातवो
मताः ॥ ३५ ॥ परस्मैपदिनः प्रोक्ता वदाश्वपि हनेति च ॥ स्वरितेतो द्विषाद्यास्तु चत्वारो धातवो मताः ॥ ३६ ॥ चक्षिङेकः
समाख्यातो धातुरत्रात्मनेपदी ॥ इरादयोऽनुदात्तेतो धातवस्तु त्रयोदश ॥ ३७ ॥ आत्मनेपदिनौ प्रोक्तौ पूङ्शीङ्द्वौ शाब्दिकैर्मुने ॥ परस्मैपदिनः
प्रोक्ता घुमुखाः सप्त धातवः ॥ ३८ ॥ स्वरितेद्दुर्णञाख्यातो धातुरेको मुनीश्वर ॥ घुमुखास्त्रय उद्दिष्टाः परस्मैपदिनस्तथा ॥ ३९ ॥ ष्टुञेकस्तु समा

ख्यातः स्मृतो नारद शाब्दिकैः ॥ ४० ॥ अष्टादश राप्रभृतयः परस्मैपदिनः स्मृताः ॥ इङ्ङात्मनेपदी प्रोक्तो धातुर्नारद केवलः ॥ ४१ ॥ विदाद
यस्तु चत्वारः परस्मैपदिनो मताः ॥ ञिष्वप्शये समुद्दिष्टः परस्मैपदिकस्तथा ॥ ४२ ॥ परस्मैपदिनश्चैव ते मयोक्ताः स्यमादयः ॥ दीधीङ्वेवीङ्
स्मृतौ धातू आत्मनेपदिनौ मुने ॥ ४३ ॥ प्रथादयस्त्रयश्चापि उदात्तेतः प्रकीर्तिताः ॥ चर्करीतं च ह्नुङ् प्रोक्तोऽनुदात्तेन्मुनिसत्तम ॥ ४४ ॥ त्रिसप्तति
समाख्याता धातवोऽदादिके गणे ॥दादयो धातवो वेदाः परस्मैपदिनो मताः ॥ ४५ ॥ स्वरितेद्वै भृञाख्यात उदात्तेद्धाक् प्रकीर्तितः ॥ माङ्हाङ्द्वाव
नुदात्तेतौ स्वरितेद्दानधातुषु ॥ ४६ ॥ वाणितिराद्यास्त्रयश्चापि स्वरितेत उदाहृताः ॥ घृमुखा द्वादश तथा परस्मैपदिनो मताः ॥ ४७ ॥ द्वाविंश
तिरिहोद्दिष्टा धातवो ह्वादिके गणे ॥ परस्मैपदिनः प्रोक्ता दिवाद्याः पंचविंशतिः ॥ ४८ ॥ आत्मनेपदिनौ धातू षूङ्दूङ्द्वावपि नारद॥ ओदितः
पूङ्मुखाः सप्त आत्मनेपदिनो मताः ॥ ४९ ॥ आत्मनेपदिनो विप्र दीङ्मुखास्त्विह कीर्तिताः ॥ स्यतिप्रभृतयो वेदाः परस्मैपदिनो मताः ॥५०॥
जन्यादयः पंचदश आत्मनेपदिनो मुने ॥ मृषाद्याः स्वरितेतस्तु धातवः पंच कीर्तिताः ॥ ५१ ॥ एकादश पदाद्यास्तु ह्यात्मनेपदिनो मताः ॥ राधोः
कर्मक एवात्र वृद्धौ स्वादिचुरादिके ॥ ५२ ॥ उदात्तेतस्तुदाद्यास्तु त्रयोदश समीरिताः ॥ परस्मैपदिनोऽष्टात्र रधाद्याः परिकीर्तिताः ॥ ५३॥ समा
द्याश्चाप्युदात्तेतः षट्चत्वारिंशदुदीरिताः ॥ चत्वारिंशच्छतं चापि दिवादौ धातवो मताः ॥ ५४ ॥ स्वादयः स्वरितेत्तोंका धातवः परिकीर्तिताः ॥
सप्ताख्यातो दुनोतिस्तु परस्मैपदिनो मुने ॥ ५५ ॥ अष्टिघावनुदात्तेतौ धातू द्वौ परिकीर्तितौ ॥ परस्मैपदिनस्त्वत्र तिकाद्यास्तु चतुर्दश ॥ ५६ ॥
द्वात्रिंशद्धातवः प्रोक्ता विप्रेन्द्र स्वादिके गणे ॥ स्वरितेतः षडाख्यातास्तुदाद्या मुनिसत्तम ॥ ५७ ॥ ऋष्युदात्तेज्जुषीपूर्वा अत्मनेपदिनोर्णवाः ॥ व्रश्चा
दय उदात्तेतः प्रोक्ताः पंचाधिकं शतम् ॥ ५८ ॥ गूर्युदात्तेदिहोद्दिष्टो धातुरेको मुनीश्वर ॥ णूमुखाश्चैव चत्वारः परस्मैपदिनो मताः ॥ ५९ ॥ कुङा
ख्यातोनुदात्तेच्च कुटाद्याः पूर्तिमागताः ॥ पृङ् मृङ् चात्मनेभाषौ षट् परस्मैपदे रिपेः ॥ ६० ॥ आत्मनेपदिनो धातू दृङ्धृङ्द्वौ चाप्युदाहृतौ॥
प्रच्छादिषोडशाख्याताः परस्मैपदिनो मुने ॥ ६१ ॥ स्वरितेतः षट् ततश्च प्रोक्ता मिलमुखा मुने ॥ कृतीप्रभृतय श्चापि परस्मैपदिनस्त्रयः ॥
॥ ६२ ॥ सप्त पंचाशदधिकास्तुदादौ धातवः शतम् ॥ स्वरितेतो रुधोनंदा परस्मैभाषितः कृती ॥ ६३ ॥ ञिइंधीतोऽनुदात्तेतस्त्रयो धातव
ईरिताः ॥ उदात्तेतः शिषपिषरुधाद्याः पंचविंशतिः ॥ ६४ ॥ स्वरितेतस्तनोः सप्त धातवः परिकीर्तिताः ॥ मनुवन्वात्मनेभाषौ स्वरिते
त्कृञुदाहृतः ॥ ६५ ॥ ततो द्वौ कीर्तितौ विप्र धातवो दश शाब्दिकैः ॥ क्र्याद्याः सप्तोभयेभाषाः सौत्राः स्तंभ्वादिकास्तथा ॥ ६६ ॥ परस्मै

पदिनः प्रोक्ताश्चत्वारोऽपि मुनीश्वर ॥ द्वाविंशतिरुदात्तेतः क्रुधाद्या धातवो मताः ॥ ६७ ॥ वृङ्ङात्मनेपदी धातुः श्रंथाद्याश्चैकविंशतिः ॥ परस्मैपदिनश्चाथ स्वरितेद्ग्रह एव च ॥ ६८ ॥ क्र्यादिकेषु द्विपंचाशद्धातवः कीर्तिता बुधैः ॥ चुराद्या धातवो ञ्यंता षट्त्रिंशदधिकं शतम् ॥ ६९ ॥ चित्याद्यष्टादशाख्याता आत्मनेपदिनो मुने ॥ चर्चाद्या आधृषीयास्तु ञ्यंता वा परिकीर्तिताः ॥ ७० ॥ अदंता धातवश्चैव चत्वारिंशत्तथाष्ट च ॥ पदाद्यास्तु दश प्रोक्ता धातवो ह्यात्मनेपदे ॥ ७१ ॥ सूत्राद्या अष्ट चाप्यत्र ञ्यन्ता प्रोक्ता मनीषिभिः ॥ धात्वर्थे प्रातिपदिकाद्बहुलं चेष्ठवन्मतम् ॥ ॥ ७२ ॥ तत्करोति तदाचष्टे हेतुमत्यपि णिर्मतः ॥ धात्वर्थे कर्तृकरणाच्चित्राद्याश्चापि धातवः॥७३॥अष्ट संग्राम आख्यातोऽनुदात्तेच्छाब्दिकैर्बुधैः ॥ स्तोमाद्याः षोडश तथा अदंतस्य निदर्शनम् ॥७४॥ तथा बाहुलकादन्ये सौत्रलौकिकवैदिकाः ॥ सर्वे सर्वगणीयाश्च तथानेकार्थवाचिनः॥७५॥सनाद्यंता धातवश्च तथा वै नामधातवः॥एवमानंत्यमुद्भाव्यं धातूनामिह नारद॥संक्षेपोऽयं समुद्दिष्टो विस्तरस्तत्र तत्र च॥७६॥ऊदृदंतैर्यौति रुक्ष्णुशीङ्स्नुनुक्षुश्विडीङ्श्रिभिः॥ वृङ्वृञ्भ्यां च विनैकाचोऽजंतेषु निहताः स्मृताः॥७७॥शक्लृपच्मुच्रिच्वच्विच्सिच्प्रच्छित्यज्निजिर्भजः॥भञ्ज्भुज्भ्रस्ज्मस्जियज्युज्रुज्रञ्जविजिर्स्वञ्जिसञ्ज्सृजः ॥७८॥अद्क्षुद्खिद्छिद्तुदिनुदःपद्यभिद्विद्यतिर्विनद्॥शद्सदी स्विद्यतिस्स्कन्दिर्हदी क्रुधृक्षुधिबुध्यती ॥७९॥बंधिर्युधिरुधीराधिव्यध्शुधः साधिसिध्यती ॥ मन्यहन्नाप्क्षिप्छुपितप्तिपस्तृप्यतिदृप्यती ॥८०॥ लिब्लुब्वपूशप्स्वपूसृपियभरभलभगम्नम्यमो रभिः॥क्रुशिर्दंशिदिशी दृश्मृश्रिश्रुश्लिश्विश्स्पृशः कृषिः ॥८१ ॥त्विष्तुष्दुष्पुष्यपिष्विष्शिष्शुष्श्लिष्यतयो घसिः ॥ वसतिर्दहदिहिदुहोनह्मिह्रुह्लिह्वहिस्तथा ॥८२॥ अनुदात्ता हलंतेषु धातवो द्व्यधिकं शतम् ॥ चाद्या निपाता गवयः प्राद्या दिग्देशकालजाः ॥८३॥शब्दाः प्रोक्ता ह्यनेकार्थाः सर्वलिंगा अपि द्विज ॥ गणपाठः सूत्रपाठो धातुपाठस्तथैव च॥८४॥ पाठोनुनासिकानां च परायणमिहोच्यते ॥ शब्दाः सिद्धा वैदिकास्तु लौकिकाश्चापि नारद ॥८५॥ शब्दपारायणं तस्मात्कारणं शब्दसंग्रहे ॥ लघुमार्गेण शब्दानां साधूनां संनिरूपणम्॥८६॥प्रकृतिप्रत्ययादेशलोपागमप्रमुखैः कृतम्॥इत्थमेतत्समाख्यातं निरुक्तं किंचिदेव ते॥कात्स्न्येन वक्तुमानंत्यात्कोऽपिशक्तो न नारद॥८८॥इति श्रीबृहन्नारदीयपुराण पूर्वभागे बृहदुपाख्याने द्वितीयपादे निरुक्तलक्षणनिरूपणं नाम त्रिपञ्चाशत्तमोऽध्यायः॥५३॥सनंदन उवाच॥ज्योतिषांगं प्रवक्ष्यामि यदुक्तं ब्रह्मणा पुरा॥यस्य विज्ञानमात्रेण धर्मसिद्धिर्भवेन्नृणाम् ॥ १ ॥ त्रिस्कंधं ज्यौतिषं शास्त्रं चतुर्लक्षमुदाहृतम् ॥ गणितं जातकं विप्र संहितास्कंधसंज्ञिताः॥२॥गणिते परिकर्मादिखगमध्यस्फुटक्रिये ॥ अनुयोगश्चंद्रसूर्यग्रहणं तचोदस्याकम्॥३॥ छाया शृङ्गोन्नतियुती पातसाधनमीरितम्॥जातके राशिभेदाश्च ग्रहयोनिश्च योनि

जम् ॥ ४ ॥ निषेकजन्मारिष्टानि ह्यायुर्दायो दशाक्रमः ॥ कर्माजीवं चाष्टवर्गो राजयोगाश्च नाभसाः ॥ ५॥ चंद्रयोगाः प्रव्रज्याख्या राशिशीलं च
दृक्फलम् ॥ ग्रहभावफलं चैवाश्रययोगप्रकीर्णके॥ ६ ॥अनिष्टयोगाः स्त्रीजन्मफलं :निर्याणमेव च ॥नष्टजन्मविधानं च तथा द्रेष्काणलक्षणम् ॥
॥ ७ ॥संहिताशास्त्ररूपं च ग्रहचारोऽब्दलक्षणम् ॥ तिथिवासरनक्षत्रयोगतिथ्यर्द्धसंज्ञकाः ॥ ८ ॥ मुहूर्तोपग्रहाः सूयसंक्रांतिर्गोचरः क्रमात् ॥ चंद्रता
रावलं चैव सर्वलग्नार्तवाह्वयः ॥ ९ ॥ आधानपुंससीमंतजातनामान्नभुक्तयः ॥ चौलङ्कर्ण्ययणं मौंजी क्षुरिकाबंधनं तथा ॥ १०॥ समावर्तनवैवाहप्रति
ष्ठासद्मलक्षणम्॥ यात्राप्रवेशनं सद्योवृष्टिः कर्मविलक्षणम्॥ ११॥उत्पत्तिलक्षणं चैव सर्वं संक्षेपतो ब्रुवे॥एकं दश शतं चैव सहस्रायुतलक्षकम्॥ १२॥ प्रयुतं
कोटिसंज्ञां चार्बुदमब्जं च खर्वकम्॥निखर्वं च महापद्मं शंकुर्जलधिरेव च॥ १३॥अत्यं मध्यं परार्द्धं च संज्ञा दशगुणोत्तराः॥क्रमादुत्क्रमतो वापि योगः
कार्योत्तरं तथा॥ १४॥हन्याद्गुणेन गुण्यं स्यात्तेनैवोपांतिमादिकान्॥शुद्धेद्धरोयद्गुणश्चभाज्यांत्यात्तत्फलं मुने॥ १५॥समांकतोऽथो वर्गस्यात्तमेवाहुः कृतिं
बुधाः॥अंत्यात्तु विषमात्त्यक्त्वा कृतिं मूलं न्यसेत्पृथक्॥ १६॥द्विगुणेनामुना भक्ते फलं मूले न्यसेत्क्रमात्॥तत्कृतिं च त्यजेद्विप्र मूलेन विभजेत्पुनः॥ १७॥
एवं मुहुर्वर्गमूलं जायते च मुनीश्वर॥समत्र्यङ्कहतिः प्रोक्तो घनस्तत्र विधिः पदे॥ १८॥प्रोच्यते विषमं त्वाद्यं समे द्वे च ततः परम्॥विशोध्यं विषमादंत्या
द्घनं तन्मूलमुच्यते॥ १९॥त्रिघ्नाद्भजेन्मूलकृत्या समं मूले न्यसेत्फलम्॥तत्कृतित्वेन निहतान्त्रिघ्नीं चापि विशोधयेत्॥ २०॥घनं च विषमादेवं घनमूलं
मुहुर्भजेत् ॥अन्योन्यहारनिहतौ हरांशौ तु समुच्छिदा॥ २१॥लवा लवघ्नाश्च हरा हरघ्ना हि सवर्णनम्॥भागप्रभागे विज्ञेयं मुने शास्त्रार्थचिंतकैः॥ २२॥
अनुबंधेऽपवाहे चैकस्य चेदधिकोनकः॥भागास्तलस्थहारेण हरं स्वांशाधिकेन तान्॥ २३॥ ऊनेन चापि गुणयेद्धनर्णं चिंतयेत्तथा ॥कार्यस्तुल्यहरां
शानां योगश्चाप्यंततो मुने ॥ २४ ॥ अहारराशौ रूप्यं तु कल्पयेद्धरमप्यथ॥अंशाहतिश्छेदघातहृद्भिन्नगुणने फलम् ॥ २५ ॥ छेदं चापि लवं विद्व
न्परिवर्त्य हरस्य च॥ शेषः कार्यो भागहारे कर्तव्यो गुणनाविधिः॥ २६॥हारांशयोः कृती वर्गे घनौ घनविधौ मुने॥पदसिद्ध्यै पदे कुर्यादथो खं सर्वत
श्च खम् ॥ २७॥ छेदं गुणं गुणं छेदं वर्गं मूलं पदं कृतिम्॥ऋणं स्वं स्वमृणं कुर्याद्दृश्ये राशिप्रसिद्धये॥ २८॥अथ स्वांशाधिकोने तु लवाढ्योनो हरो
हरः ॥ अंशस्त्वविकृतस्तत्र विलोमे शेषमुक्तवत् ॥ २९ ॥ उद्दिष्टराशिः संक्षिप्तौ हृतोंऽशै रहितो युतः ॥ इष्टघ्नदृष्टेनैतेन भक्तराशिरनीशितः ॥ ३० ॥
योगोन्तरेणोनयुतोद्वितोराशीतसंक्रमे ॥ राश्यंतरहृतं वर्गोत्तरं योसुतश्च तौ ॥ ३१॥गजघ्नीष्टकृतिर्व्येका दलिता चेष्टभाजिता॥एकोऽस्य वर्गो दलितः
सैको राशिः परो मतः ॥ ३२ ॥ द्विगुणेष्टहृतं रूपं श्रेष्ठं प्राग्रूपकं परम्॥ वर्गयोगांतरे व्येके राश्योर्वर्गौस्त एतयोः॥ ३३॥इष्टवर्गकृतिश्चेष्टघनोष्टघ्नौ च

सैककौ ॥ एषीस्यानामुभे व्यक्ते गणितं व्यक्तमेव च ॥ ३४ ॥ गुणघ्नमूलोनयुतः सगुणार्द्धे कृतं पदम् ॥ दृष्टस्य च गुणार्द्धो न युतं वर्गीकृतं गुणः ॥ ३५ ॥ यदा लवोनपुग्राशिर्दृश्यं भागोनयुग्भुवा ॥ भक्त तथा मूलगुणं ताभ्यां साध्योथ व्यक्तवत् ॥३६॥ प्रमाणेच्छे सजातीये आद्यंते मध्यगं फलम् ॥ इच्छघ्नमाद्यहृत्सेष्टं फलं व्यस्ते विपर्ययात् ॥ ३७ ॥ पंचरास्यादिकेऽन्योन्यपक्ष कृत्वा फलच्छिदाम् ॥ बहुराशिवधं भक्ते फलं स्वल्पवधेन च ॥३८॥ इष्टकर्मवधेर्मूलं च्युतं मिश्रात्कलांतरे ॥ मानघ्नकालश्चातीतकालाघ्नफलसंहृताः ॥ ३९ ॥ स्वयोगभक्तानिघ्नाः स्युः संप्रयुक्तदलानि च ॥ बहुराशिफलात्स्वल्पराशिमासफलं बहु ॥४० ॥चेद्राशिविवरं मासफलांतरहृतं च यः ॥ क्षेपा मिश्रहताः क्षेपयोगभक्ताः फलानि च ॥ ४१ ॥ भजेच्छिदोंशैस्तैर्मिश्रे रूपं कालश्च पूर्तिकृत् ॥पूर्णोगच्छेत्समेध्यव्येसमेवर्गोर्द्धितेत्यतः ॥ ४२ ॥व्यस्तं गच्छतं फलं यद्गुणवर्गं भचहि तत् ॥ व्येकं व्येकगुणाप्तं च प्राघ्नं मानं गुणोत्तरे ॥ ४३ ॥ भुजकोटिकृतियोगमूलं कर्णश्च दोर्भवेत् ॥ श्रुतिकृत्यंतरपद कोटिर्दोः कर्णवर्गयोः ॥ ४४ ॥ विवरात्तत्कर्णपदं क्षेत्रे त्रिचतुरस्रके ॥ राश्योरंतरवर्गेण द्विघ्ने घाते युते तयोः ॥ ४५ ॥ वर्गयोगोथ योगांतहतिर्वर्गांतरं भवेत् ॥व्यास आकृतिसंक्षुण्णोव्यासास्यात्परिधिर्मुने ॥ ४६॥ ज्याव्यासयोगविवराहतमूलोनितोऽर्द्धितः ॥ व्यासः शरः शरोनाच्च व्यासाच्छरगुणात्पदम् ॥ ४७ ॥ द्विघ्नं जीवाथ जीवार्द्धवर्गे शरहृते युते ॥ व्यासोष्टतेभवेदेवं प्रोक्तं गणितकोविदैः ॥ ४८ ॥ चापोननिघ्नः परिधिः प्रगाङ्कः परिधेः कृते ॥ तुर्यांशेन शरघ्नेनाद्येनिनाद्यं चतुर्गणम् ॥४९॥ व्यासघ्नं प्रभजेद्विप्र ज्या काशं जायते स्फुटा॥ज्यांघ्रीषुघ्नोवृत्तवर्गोऽब्धिघ्नव्यासाढ्यमौर्विहृत्॥५०॥ लब्धोनवृत्तवर्गाद्विपदेर्धात्पतिते धनुः ॥ स्थूलमध्यापृवक्त्रवेधो वृत्तांकाशेषभागिकः ॥ ५१ ॥ वृत्तांगांशकृतिर्वेधनिघ्नीयनकरामितौ ॥ वारिव्यासहतं दैर्घ्यवेधांगुलहतं पुनः ॥ ५२ ॥ खखेंदुरामविहृतं मानं द्रोणादिवारिणः॥विस्तारायामवेधानामंगुल्योन्योन्यनाडिघ्नाः ॥ ५३ ॥ रसांकाश्राब्धिभिर्भक्ता धान्ये द्रोणादिकामितिः ॥ उत्सेधव्यासदैर्घ्याणामंगुल्यान्यस्य नो द्विज ॥ ५४ ॥ मिथोघ्नाति भजेत्खाक्षेशैर्द्रोणादिमितिर्भवेत् ॥ विस्ताराद्यंगुलान्येवं मिथोघ्नान्यपसांभवेत ॥ ५५ ॥ वाणेभमार्गणैर्लब्धं द्रोणाद्यं मानमादिशेत् ॥ दीपशंकुतलच्छिद्रघ्नः शंकुर्भैवंभवेन्मुने ॥ ५६ ॥ नरोनदीपकशिखौच्च्यभक्तो ह्यथ भोद्धने ॥ शंकौनृदीपाधश्छिद्रघ्नैर्दीपौच्च्यं नरान्विते ॥५७॥ विशंकुदीपौच्च्यगुणाच्छाया शंकूद्धृता भवेत्॥दीपशंक्वंतरं चाथ च्छायाग्रविवरघ्नभा ॥ ५८ ॥ मानांतरहृद्भूमिः स्यादथोभूनराहतिः ॥ प्रभाप्ता जायते दीपशिखौच्च्यं स्यात्त्रिराशिकात् ॥ ५९ ॥ एतत्संक्षेपतः प्रोक्तं गणिते परिकर्मकम् ॥ ग्रहमध्यादिकं वक्ष्ये गणिते नातिविस्तरात् ॥ ६० ॥ युगमानं स्मृतं विप्र खचतुष्करदार्णवाः ॥ तद

शांशास्तु चत्वारः कृताख्यं पादमुच्यते ॥६१॥ त्रयस्त्रेता द्वापरः द्वौ कलिरेकः प्रकीर्तितः ॥ मनुकृताब्दसहिता युगानामेकसप्ततिः ॥६२॥ विधेर्दिने
स्युर्विप्रेंद्र मनवस्तु चतुर्दश ॥ तावत्येव निशा तस्य विप्रेंद्र परिकीर्तिता॥६३॥स्वयंभुवा शरगतानब्दान्संपिंड्य नारद ॥ खचरानयनं कार्यमथ
वेष्टयुगादितः ॥६४॥ युगे सूर्यज्ञशुक्राणां खचतुष्करदार्णवाः ॥ पूजार्किगुरुशुक्राणां भगणापूर्वपापिनाम् ॥ ६५ ॥ इंदोरसाग्नित्रिषु सप्त भूधरमार्ग
णाः ॥ दस्रत्र्याष्टरसांकाश्विलोचनानि कुजस्य तु ॥६६॥ बुधशीघ्रस्य शून्यर्तुखाद्रित्र्यंकनगेंदवः ॥ बृहस्पतेः खदस्राक्षिवेदस्त्रड्ह्वयस्तथा॥ ६७ ॥
शितशीघ्रस्य यष्णसत्रियमाश्विस्वभूधराः ॥ शनेर्भुजगषट्पचरसवेदनिशाकराः ॥ ६८ ॥ चंद्रोच्चस्याग्निशून्याक्षिवसुसर्पार्णवा युगे ॥ वामं पातस्य
च स्वाग्नियमाश्विशिखिदस्रकाः ॥ ६९ ॥ उदयादुदयं भानोर्भूमेः साचेन वासराः ॥ वसुद्व्यष्टाद्रिरूपांकसप्ताद्रितिथयो युगे ॥ ७० ॥ षड्
वह्नित्रिहुताशांकतिथयश्चाधिमासकाः ॥ तिथिक्षयायमार्थाक्षिद्व्यष्टव्योमशराश्विनः ॥ ७१ ॥ खचतुष्का समुद्राष्टकुर्पंचरविमासकाः ॥
षट्त्र्यग्निवेदग्निपंचशुभ्रांशुमासकाः ॥ ७२ ॥ प्रागातेः सूर्यमंदस्य कल्पेसप्ताष्टवह्नयः ॥ कौजस्य वेदस्वयमा बौधस्याष्टर्तुवह्नयः ॥ ७३ ॥ खखरं
ध्राणि जैवस्य शौक्रस्यार्धगुणेषवः ॥ गोग्नयः शनिमंदस्य पातानामथवा मतः ॥ ७४ ॥ मनुदस्रास्तु कौजस्य बौधस्याष्टाष्टसागराः ॥कृताद्रिचंद्रा
जैवस्य शौक्रस्याग्निखनंदकाः ॥ ७५ ॥ शनिपातस्य भगणाः कल्पे यमरसर्तवः ॥ वर्तमानयुगे पानावत्सराभगणाभिधाः ॥ ७६ ॥ मासीकृतायुता
मासैर्मधुशुक्लादिभिर्गतैः ॥ पृथक्स्थासिधिमासघ्नासूर्यमासविभाजिताः ॥ ७७॥ अथाधिमासकैर्युक्ता दिनीकृत्य दिनान्विताः ॥ द्विस्थास्तितिक्षया
भ्यस्ताश्चांद्रवासरभाजिताः ॥ ७८ ॥ लथोनरात्रिरहितालंकार्यामर्द्धरात्रिकः ॥ सावनोद्यूगसोरर्कादिर्दिनमासाब्दयास्ततः ॥ ७९ ॥ सप्तभिः क्षपितः
शेषः सूर्याद्योवासरेश्वरः ॥ मासाब्ददिनसंख्यासंद्वित्रिघ्नं रूपसंयुतम् ॥८०॥ सप्तोर्द्धनावशेषौ तौ विज्ञेयौ मासवर्षपौ ॥ खेहस्य भगणाभ्यस्तो दिन
राशिः कुवासरैः ॥ ८१ ॥ विभाजितो मध्यगत्या भगणादिर्ग्रहो भवेत् ॥ एवं ह्यशीघ्रमंदाच्च ये प्रोक्ताः पूर्वपापिनः ॥ ८२ ॥ विलोमगतयः पाता
स्तद्वच्चक्राष्विशोधिताः ॥ योजनानि शतान्यष्टौ भूकर्णौ द्विगुणः स्मृतः ॥ ८३ ॥ तद्वर्गतो दशगुणात्पद भूपरिधिर्भवेत् ॥ लंबज्याघ्नस्वजीवाप्तः
स्फुटो भूपरिधिः स्वकः ॥ ८४ ॥ तेन देशांतराभ्यस्ता ग्रहभुक्तिर्विभाजिता ॥ कलादितत्फलं प्राच्याः ग्रहेभ्यः परिशोधयेत् ॥ ८५ ॥ रेखाप्रतीचि
संस्थाने प्रक्षिपेत्स्युः स्वदेशतः ॥ राक्षसातपदेवौकःशैलयोर्मध्यसूत्रगाः ॥ ८६ ॥ अवंतिकारोहतिकं तथा सन्निहितं सरः ॥ वारप्रवृत्तिवाग्देशे क्षयार्द्धे
भ्यधिको भवेत्॥८७॥तद्देशांतरनाडीभिः पश्चादूने विनिर्दिशेत् ॥ इष्टनाडीगुणा भुक्तिः षष्ट्या भक्ता कलादिकम् ॥८८॥ गते शोद्ध्यं तथा योज्यं

गम्ये तात्कालिको ग्रहः ॥ भचक्रलिप्ताशीत्यंशः परमं दक्षिणोत्तरम् ॥ ८९ ॥ विक्षिप्यते स्वपातेन स्वक्रांत्यंतादनुष्णगुः ॥ तत्र वासं द्विगुणितजीवस्त्रिगुणितं कुजः ॥ ९० ॥ बुधशुक्रार्कजाः पातैर्विक्षिप्यंते चतुर्गुणम् ॥ राशिलिप्ताष्टमो भागः प्रथमं ज्यार्द्धमुच्यते ॥ ९१ ॥ ततो द्विभक्तलब्धोनमिश्रितं तद्द्वितीयकम् ॥ आद्येनैव क्रमात्पिंडान्भक्ताल्लब्धोनितैर्युतान् ॥९२॥ खंडकाः स्युश्चतुर्विंशा ज्यार्द्धपिंडाः क्रमादमी ॥ परमापक्रमज्या तु सप्तरंध्रगुणेंदवः ॥ ९३ ॥ तद्गुणज्या त्रिजीवाप्ता तच्चापं क्रांतिरुच्यते ॥ ग्रहं संशोध्य मंदोच्चत्तथा शीघ्राद्विशोध्य च ॥ ९४ ॥ शेषं कंदपदंतस्माद्भुजज्या कोटिरेव च ॥ गताद्भुजज्याविषमे गम्यात्कोटिः पदे भवेत् ॥ ९५ ॥ समेति गम्याद्बाहुज्या कोटिज्यानुगता भवेत् ॥ लिप्तास्तत्त्वयमैर्भक्ता लब्धज्या पिंडकं गतम् ॥ ९६ ॥ गतगम्यांतराभ्यस्तं विभजेत्तत्त्वलोचनैः ॥ तदवाप्तफलं योज्यं ज्यापिंडे गतसंज्ञके ॥ ९७ ॥ स्यात्क्रमज्याविधिश्चैवमुत्क्रमज्यागता भवेत् ॥ लिप्तास्तत्त्वयमैर्भक्ता लब्धज्या पिंडकं गतम् ॥ ९८ ॥ गतगम्यांतराभ्यस्तं विभजेत्तत्त्वलोचनैः ॥ तदवाप्तफलं योज्यं ज्यापिंडे गतसंज्ञके ॥ ९९ ॥ स्यात्क्रमज्याविधिश्चैवमुत्क्रमज्यास्वपिस्मृतः ॥ ज्यां प्रोह्य शेषं तत्त्वताश्वि हतं तद्विवरोद्धृम् ॥१००॥ संख्यातत्त्वाश्विसंवर्ग्यं संयोज्यं धनुरुच्यते ॥ रवेर्मंदपरिध्यंशा मनवः शीतगोरदाः ॥१०१॥ युग्मांते विषमांते तुनखलिप्तोनितास्तयोः॥युग्मांतेर्थाद्रयः खाग्निसुराः सूर्या नवार्णवाः ॥ १०२ ॥ ओजेद्व्यगा च सुयमारदारुद्रागजाब्धयः॥कुजादीनामतः शौघ्न्यायुग्मांतेर्थाग्निदस्रकाः ॥ १०३ ॥ गुणाग्निचंद्राः खनगाद्रिरसाक्षीणि गोऽग्नयः ॥ ओजांते द्वित्रियमताद्विविश्वेयमपर्वताः ॥१०४॥ खर्तुदस्राविपद्वेदाः शीघ्रकर्मणि कीर्तिताः ॥ ओजयुग्मांतरगुणाभुजज्यात्रिज्ययोद्धृताः ॥ १०५ ॥ युग्मवृत्तेधनर्णश्यादोजादूनेऽधिके स्फुटम् ॥ तद्गुणे भुजकोटिज्येभगणांशविभाजिते॥ १०६ ॥ तद्भुजज्याफलधनुर्मांदं लिप्तादिकं फलम् ॥ शैघ्र्यकोटिफलं केंद्रे मकरादौ धनं स्मृतम् ॥ १०७ ॥ संशोध्यं तु त्रिजीवायां कर्कादौ कोटिजं फलम्॥तद्बाहुफलवर्गैक्यान्मूलकर्णश्चलाभिधः ॥१०८॥ त्रिज्याभ्यस्तं भुजफलं मकरादौ धनं स्मृतम् ॥ सशोध्यं तु त्रिजीवायां कर्कादौ कोटिजं फलम् ॥ १०९ ॥ तद्बाहुफलवर्गैक्यान्मूलं कर्णश्चलाभिधः ॥ त्रिज्याभ्यस्तं भुजफलं पलकर्णविभाजितम् ॥११०॥ लब्धस्य चापं लिप्तादि फलं शैघ्र्यमिदं स्मृतम् ॥ एतदादौ कुजादीनां चतुर्थे चैव कर्मणि ॥१११॥ मांद्यं कर्मैकमर्केंद्वोर्भौमादीनामाथोच्यते ॥ शैघ्र्यं माद्यं पुनर्मांद्यं शैघ्र्यं चत्वार्यनुक्रमात् ॥ ११२ ॥ अजादिकेंद्रे सर्वेषां मांद्ये शैघ्र्ये च कर्मणि ॥ धनं ग्रहाणां लिप्तादि तुलादावृणमेव तत्॥११३॥ अर्कबाहुफलाभ्यस्ता ग्रहभुक्तिविभाजिताः ॥ भचक्रकलिकाभिस्तु लिप्ताः कार्या ग्रहेऽर्कवत्॥११४॥ ग्रहभुक्तेः फलं कार्यं ग्रहवन्मंदकर्मणि ॥ कर्कादौ तद्धनं तत्र मकरादावृणं स्मृतम् ॥ ११५ ॥ दोर्ज्यो

त्तद्गुणाभुक्तिस्तत्त्वनेत्रोद्धृता पुनः ॥ स्वमंदपारिधिक्षुण्णा भगणांशोद्धृताःकलाः ॥ ११६ ॥ मंदस्फुटकृता भुक्तिः प्रोह्य शीघ्रोच्चभुक्तितः ॥
तच्छेषं विवरेणाथ हन्यात्त्रिज्यांककर्णयोः ॥ ११७ ॥ चक्रकर्णहतं भुक्तौ कर्णे त्रिज्याधिके धनम्॥ऋणमूनेऽधिके प्रोह्य शेषं वक्रगतिर्भवेत् ॥११८॥
कृतर्तुचंद्रैर्वेदेंद्रैः शून्यत्र्येकैर्गुणाष्टभिः ॥ शररुद्रैश्चतुर्थांशुकेंद्रांशैर्भूसुतादयः ॥११९॥ वक्रिणश्चक्रशुद्धैस्तैरंशैरुज्जुतिवक्रताम्॥क्रमज्या विषुवद्भाघ्नी क्षिति
ज्या द्वादशोद्धृता ॥ १२० ॥ त्रिज्यागुणा दिनव्यासभक्ता चापं च शत्रवः ॥ तत्कार्मुकमुदक्क्रांतौ धनहीनो पृथक्क्षते ॥ १२१ ॥ स्वाहोरात्रचतुर्भागे
दिनरात्रिदले स्मृते ॥ याम्यक्रांतौ विपर्यस्ते द्विगुणैते दिनक्षये ॥ १२२ ॥ भभोगोऽष्टशतीलिप्ताः स्वाश्विशैलोस्तथातिथेः ॥ ग्रहलिप्ता भगाभो
गाभानि भुक्त्यादिनादिकम् ॥ १२३ ॥ रवींदुयोगलिप्तास्तु योगाभभोगभाजिताः ॥ गतगम्याश्च षष्ठिघ्ना भुक्तियोगाप्तनाडिकाः ॥ १२४ ॥
अर्कोनचंद्रलिप्तास्तु तिथयो भोगभाजिताः ॥ गतगम्याश्च षष्ठिघ्ना नाऽतोभुक्ततरोद्धृताः ॥ १२५ ॥ तिथयः शुक्लप्रतिपदो द्विघ्नाः सैका न
गाहताः ॥ शेषं ववो बालवश्च कौलवस्तैतिलो गरः ॥ १२६ ॥ वणिजोभ्रे भवेद्विष्टिः कृष्णभूतापरार्द्धतः ॥ शकुनिर्नागश्च चतुष्पद किंस्तुघ्न
मेवच ॥ १२७ ॥ शिलातलेवसंशुद्धे वज्रलेपेतिवासमे ॥ तत्र शकांगुलैरिष्टैः सममंडलमालिखेत ॥ १२८ ॥ तन्मध्ये स्थापयेच्छंकुं कल्पना
द्वादशांगुलम् ॥ तच्छायाग्रं स्पृशेद्यत्र दत्तं पूर्वापराह्णयोः ॥ १२९ ॥ तत्र बिंदुं विधायोभौ वृत्ते पूर्वापराभिधौ ॥ तन्मध्ये तिमिना रेखा कर्तव्या
दक्षिणोत्तरा ॥ १३० ॥ याम्योत्तरदिशोर्मध्ये तिमिना पूर्वपश्चिमा ॥ दिग्मध्यमत्स्यैः संसाध्या विदिशस्तद्वदेव हि ॥ १३१ ॥ चतुरस्तं बहिः
कुर्यात्सूत्रैर्मध्याद्विनिःसृतैः ॥ भुजसूत्रांगुलैस्तत्र दत्तैरिष्टप्रभा मता ॥ १३२ ॥ प्राक्पश्चिमाश्रिता रेखा प्रोच्यते सममंडलम् ॥ भमंडलं च
विषुवन्मंडलं परिकीर्तितम् ॥ १३३ ॥ रेखा प्राच्यपरा साध्या विषुवद्भाग्रया तथा ॥ इष्टच्छायाविषुवतोर्मध्येह्यग्राभिधीयते ॥ १३४ ॥ शंकु
च्छायाकृतियुतेर्मूलं कर्णोऽय वर्गतः ॥ प्रोह्य शंकुकृते मूलं छाया शंकुविपर्ययात् ॥ १३५ ॥ त्रिंशत्कृत्योयुगे भानां चक्रं प्राक्परिलंबते ॥ तद्गुणा
द्दिनैर्भक्त्या द्युगणाद्यदवाप्यते ॥ १३६ ॥ तद्दोस्त्रिघ्नादशाप्तांशा विज्ञेया अयनाभिधाः ॥ तत्संस्वकृताद्ग्रहात्क्रांतिच्छायावरदलादिकम्॥१३७॥
शंकुच्छायाहते त्रिज्ये विषुवत्कर्कभाजिते ॥ लंबाक्षज्ये तयोश्छाये लंबाक्षौ दक्षिणौ सदा ॥ १३८ ॥ साक्षार्कापक्रमयुतिर्दिक्साम्येंतरमन्यथा ॥
शेषह्यानांशाः सूर्यस्य तद्बाहुज्याथ कोटिजाः ॥ १३९ ॥ शंकुमानांगुलाभ्यस्ते भुजत्रिज्ये यथाक्रमम् ॥ कोटिज्यया विभज्याप्ते छाया
कर्णावहिर्दले ॥ १४० ॥ स्वाक्षार्कनतभागानां दिक्साम्येऽतरमन्यथा ॥ दिग्भेदोपक्रमः शेषस्तस्य ज्या त्रिज्यया हता ॥ १४१ ॥ परमोपक्रमज्याप्त

चापमेषादिगो रविः ॥ कर्कादौ प्रोह्यचक्रार्द्धात्तुलादौ भार्द्धसंयुतात् ॥ १४२॥ मृगादौ प्रोह्यचक्रात्तु मध्याह्नेऽर्कः स्फुटो भवेत् ॥ तन्मंदमसकृद्वामं
फलं मध्यो दिवाकरः ॥१४३॥ ग्रहोदयाः प्राणहताः खखाष्टैकोद्धृता गतिः ॥ चक्रासवो लब्धयुता स्वाहोरात्रासवः स्मृताः ॥१४४॥ त्रिभद्युकर्णा
र्द्धगुणा स्वाहोरात्रार्द्धभाजिताः॥क्रमादेकद्वित्रिभाज्या तच्चापानि पृथक्पृथक्॥ १४५॥ स्वाधोधः प्रविशोध्याथ मेषाल्लंकोदयासवः ॥ स्वागाष्टयोथंगो
गैकाः शरत्र्येकं हिमांशवः॥१४६॥ स्वदेशचरखंडोना भवंतीष्टोदयासवः ॥ व्यस्ताव्यस्तैर्युतास्तैस्तैः कर्कटाद्यास्ततस्तु यः ॥१४७॥ उत्क्रमेण
षडेवैते भवंतीष्टास्तुलादयः॥ गतभोग्यासवः कार्याः सायनास्स्वेष्टभास्कराः ॥१४८॥ स्वोदयात्सुहता भक्ता भक्तभोग्याः स्वमानतः ॥ अभीष्टघ
टिकासुभ्यो भोग्यासून्प्रविशोधयेत् ॥ १४९ ॥ तद्वदेवैष्यलग्नासूनेवं व्याप्तास्तथा क्रमात् ॥ शेषं त्रिंशत्क्रमाद्ध्यस्तमशुद्धेन विभाजितम्॥१५०॥
भागयुक्तं च हीनं च व्ययनांशं तनुः कुजे ॥ प्राक्पश्चान्नतनाडीभ्यस्तद्वल्लंकोदयासुभिः ॥१५१॥ भानौ क्षयधने कृत्वा मध्यलग्नं तदा भवेत् ॥
भोग्यासूनूनकस्याथ भुक्तासूनधिकस्य च ॥१५२॥ सपिंड्यांतरलग्नासूनेवं स्यात्कालसाधनम् ॥ विराह्वर्कभुजांशाश्चेदिंद्राल्पाः स्याद् ग्रहो विधोः
॥१५३॥ तेषां शिवघ्नाः शैलाप्ता व्यावर्काजः शरोंगुलैः ॥ अर्कं विधुर्विधुं भूभा छादयत्यथ छन्नकम् ॥ १५४ ॥ छाद्यछादकमानार्धं शरोन ग्राह्यव
र्जितम् ॥ तत्स्वच्छन्नं च मानैक्यार्द्धांशषष्ठं दशाहतम्॥१५५॥छन्नघ्नमस्मान्मूलं तु खांगोनग्लौवपुर्हृतम्॥स्थित्यर्द्धं घटिकादिस्याद्ध्यंगबाह्वंशसं
मितैः ॥१५६॥इष्टैः पलैस्तदूनाढ्यं व्यगावूनेऽर्कषड्गुणः॥तदन्यथाधिके तस्मिन्नेवं स्पष्टे सुखांत्यगे॥१५७॥ग्रासेन स्वाहते च्छाद्यमानाप्ते स्युर्विंशो
पकाः ॥ पूर्णांतं मध्यमत्र स्याद्दर्शांतिजं त्रिभोनकम् ॥ १५८ ॥ पृथक्तत्क्रांत्यक्षभागसंस्कृतौ स्युर्नतांशकाः॥ तद्विघ्नांशकृतिद्व्यूनाद्धर्कियुता हरिः ॥
॥ १५९ ॥ त्रिभानांगार्कविश्लेषांशोंशोनघ्नाः॥ पुरंदराः ॥ हराप्तालंबनं स्वर्णवित्रिभेर्काधिकोनके ॥१६०॥विश्वघ्नलंबनकलाढ्योनस्तु तिथिवद्गुः॥
शरोनोलंबनषडघ्ने तल्लवाढ्योनवित्रिभात् ॥१६१॥ नतांशास्तजांसाने प्राधृतस्तद्विवर्जितः ॥शब्देंदुलिप्तैः षड्भिस्तु भक्तानतिर्नतांशदिक् ॥१६२॥
तयोर्नाट्योहभिन्नैकदिक्शरः स्फुटतां व्रजेत् ॥ ततश्छन्नस्थितिदले साध्ये स्थित्यर्द्धषट्त्रिभिः ॥ १६३ ॥ अंशस्तैर्वित्रिभंद्विस्थलंबनेतयोःपूर्ववत् ॥
संस्कृतेस्ताभ्यां स्थित्यर्द्धे भवतः स्फुटे ॥१६४॥ ताभ्यां हीनयुतो मध्यदर्शः कालौ सुखांतगौ ॥ अर्काद्यूना विश्व ईशा नवपंचदशांशकाः ॥१६५॥
कालांशास्तैरूनयुक्ते रवौ ह्यस्तोदयौ विधोः ॥ दृष्ट्वा ह्यादौ खेटबिंबं दृगौच्च्ये लंबमीक्ष्य च ॥१६६॥तल्लंबपापबिंबांतर्दृगौ व्याप्तरविघ्नभाः ॥ अस्ते
सावयवा ज्ञेया गतैष्यास्तिथयो बुधैः ॥१६७॥ व्यस्ते युक्रांतिभागैश्च द्विघ्नतिथ्याहता स्फुटम् ॥ संस्कारदिकलंबनमंगुलाद्यं प्रजायते ॥ १६८ ॥

सेष्वंशोनाः सितं तिथ्यो बलन्नाशोन्नतं विधोः ॥ शृङ्गमन्यत्र उद्धाच्यं बलनाग्रुल्लेखनात् ॥ १६९ ॥ पंचत्वे गोंकविशिखाः शेषकर्णहताः पृथक् ॥
विकृज्यकांगसिद्धाग्निभक्तालब्धोनसंयुताः ॥ १७० ॥ त्रिज्याधिकोने श्रवणे वपूंषि स्युर्हताः कुजात् ॥ ऋज्वोरनृज्वोर्विवरं गत्यंतरविभाजितम् ॥
॥ १७१ ॥ वक्रत्वोर्गतियोगाभं गम्येतीते दिनादिकम् ॥ खनत्यासंस्कृतौव्वेषूदक्साम्येन्येंतरं युतिः ॥ १७२ ॥ याम्योदक्खेटविवरं
मानैक्याद्धोल्पकं यदा ॥ यदा भेदोलंबनाद्यं स्फुटार्थं सूर्यपर्ववत् ॥ १७३ ॥ एकायनगतौ स्यातां सूर्याचन्द्रमसौ यदा ॥ तद्युते मंडले
क्रांत्यौ तुल्यत्वे वै धृताभिधः ॥ १७४ ॥ विपटीतायनगतौ चंद्रार्कौ क्रांतिलिप्तिकाः ॥ समास्तदा व्यतीपातो भगणार्द्धे तपोयुतौ ॥
॥ १७५ ॥ भास्करेंद्वोर्भचक्रांतचक्रार्द्धावधिसंस्थयोः ॥ दृक्कलपसाधितांशादियुक्तयोः स्वावपक्रमौ ॥ १७६ ॥ अथोजपदगम्येंदोः क्रांतिर्विक्षे
पसंस्कृता ॥ यदि स्यादधिका भानोः क्रांतेः पातो गतस्तदा । १७७ ॥ न्यूना चेत्स्यात्तदा भावी वामं युग्मपदस्य च ॥ यदान्यत्वं विधोः
क्रांतिः क्षेपाच्चेद्यदि शुद्धयति ॥१७८॥ क्रांत्योर्जेत्रिज्ययाभिस्ते परमायक्रमोद्धते ॥ तच्चापांतर्मर्द्धवायोर्ज्यभाविनशीतगौ ॥ १७९ ॥शोध्यं चंद्राद्गते
पाते तत्सूर्यगतिताडितम् ॥ चंद्रभुक्त्या हृत भानौ लिप्तादिशशिवत्फलम् ॥ १८०॥ तद्वच्छशांकपातस्य फलं देयं विपर्ययात्॥कर्मैतदसकृत्तावत्क्रां
ती यावत्समेतयोः ॥१८१॥ क्रांत्योः समत्वे पातोऽथ प्रक्षिप्तांशोनिते विधौ॥हीनेऽर्द्धरात्रिकाघातो भावी तात्कालिकेऽधिका॥१८२॥स्थिरीकृतार्द्धरा
त्रार्द्धौ द्वयोर्विवरलिप्तकाः ॥ षष्टिघ्नाचंद्रभुक्ताप्ता पातकालस्य नाडिकाः ॥ १८३ ॥ रवींद्वोर्मानयोगार्द्धं षष्ट्या संगुण्य भाजयेत् ॥ तयोर्भुक्त्यंतरेणाप्तं
स्थित्यमर्द्धा नाडिकादिवत् ॥१८४॥ पातकालः स्फुटो मध्यः सोऽपि स्थित्यर्द्धवर्जितः॥तस्य संभवकालः स्यात्तत्संयोगेक्तसंज्ञकः॥८५॥ आद्यंतका
लयोर्मध्ये कालो ज्ञेयोऽतिदारुणः ॥ प्रज्वलज्ज्वलनाकारः सर्वकर्मसु गर्हितः ॥ १८६ ॥ इत्येतद्गणिते किंचित्प्रोक्तं संक्षेपतो द्विज ॥ जातकं वच्मि
समयाद्राशिसंज्ञापुरःसरम् ॥ १८७ ॥ इति श्रीबृहन्नादीयपुराणे पूर्वभागे बृहदुपाख्याने द्वितीयपादे ज्योतिषवर्णनं नाम चतुःपञ्चाशत्तमोऽध्यायः
॥५४॥ सनंदन उवाच ॥ मूर्द्धास्यबाहुहृत्क्रोडांतर्बस्तिव्यंजसोनखः ॥जानुजंघांघ्रियुगलं कालांगानि क्रियादयः ॥१॥ भौमास्फुजिद्बुधेंदुश्च रविसौ
म्यसिताः कुजः ॥ गुरुमंदार्किगुरवो मेषादीनामधीश्वराः ॥२ ॥ होरे विषमभेर्केंदोः समभे शशिसूर्ययोः॥आदिपञ्चनवाधीशाद्रेष्काणेशाः प्रकीर्तिताः
॥ ३ ॥ पंचेष्टाष्टाद्रिपंचांशा कुजार्कीज्यज्ञशुक्रगाः ॥ ओजे विपर्ययाद्युग्मे त्रिशांशेशाः :समीरिताः ॥ ४ ॥ क्रियणतौलिककर्काद्या मेषादिषु नवां
शकाः ॥ स्वभाद्द्वादशभागेशाः षडर्गं राशिपूर्वकम् ॥५॥ गोजाश्च कर्कयुग्मेन रात्र्याख्या पृष्ठकोदयाः ॥ शेषा दिनाख्यास्तूभयं तिमिः क्रूरः सौम्यः

पुमान् ॥ ६ ॥ पुमान् स्त्री च क्लीबश्चरस्थिरद्विःस्वभावकाः ॥ मेषाद्याः पूर्वतोदिक्स्थाः स्वस्वस्थानचरास्तथा ॥ ७ ॥ अजोक्षैणांगनाकीटझषजूका
इनादितः॥उच्चानि द्वित्रिमनुयुक्तिथीषुभनखांशकैः॥८॥तत्तत्सप्तमनीचानि प्राङ्मध्यांत्यांशकाः क्रमात्॥वर्गोत्तमाश्चराधेषु भावाद्द्वादश मूर्तिमान्॥९॥
सिंहोक्षाविस्त्रश्चतौलिकुंभाः सूर्यात्रिकोणभम् ॥ चतुरस्रं तूर्यमृत्युत्रिकोणं नवपंचमम् ॥ १० ॥ रिःफाष्टषट्कं त्रिकभं केंद्रं प्राक्तुर्यसप्तखम् ॥ नृपादः
कीटपशवो बलाढ्याः केंद्रगाः क्रमात् ॥ ११ ॥ केंद्रात्परं पणफरमापोक्लिममतः परम् ॥ रक्तः श्वेतः शुकनिभः पाटलो धूम्रपांडुरौ ॥ १२ ॥
चित्रः कृष्णः पीतपिंगौ बभ्रुः स्वच्छः प्रभाक्रियात् ॥ साम्याशाख्यप्लुवत्वं स्याद्द्वितीये वशिरर्कभात् ॥ १३ ॥ कालात्मार्को मनश्चंद्रः कुजः सत्वं वचो
बुधः ॥ जीवो ज्ञानं सुखं शुक्रः कामो दुःखं दिनेशजः ॥१४॥ नृपौ रवीन्दू नेतासृक् कुमारो ज्ञः कवीज्यकौ॥ सचिवो सूर्यजः प्रेष्यो मतो ज्योति
र्विदां वरैः ॥ १५ ॥ ताम्रशुक्लरक्तहरित्पीतचित्रासिता रवेः ॥ वर्णा वअव्यहहरींद्रा शचीकौधिपारवेः॥ १६॥रविशुक्रारराह्वर्केन्दुविदीज्या दिगीश्वराः॥
क्षीणेंद्वर्काररविजाः पापा पापयुतो बुधः॥१७॥क्लीबौ बुधार्की शुक्रेन्दू स्त्रियौ शेषा नराः स्मृताः॥शिखिभूमिपयोवारिवासिनो भूसुतादयः॥१८॥कवी
ज्यौ कुजसूर्यौ च वेदो ज्ञो वर्णपाः क्रमात्॥सौरोंऽत्यजाधिपः प्रोक्तो राहुर्म्लेच्छाधिपस्तथा॥१९॥चंद्रार्कजीवाज्ञसितौ कुजार्की सात्त्विकादिकाः॥देवतेंद्व
ग्निखैलाभूकोसखायोपराधिपाः॥२०॥वस्त्रं स्थलं नवं वह्निकहतं मद्यदं तथा॥स्फुटितं रवितस्तांम्रं तारं ताम्रपुनिस्तथा॥२१॥ हेमकांस्यायसी ऽयंशैः
शिशिराद्याः प्रकीर्तिताः ॥ सौरशुक्रारचंद्रज्ञगुरुपूद्यत्सु च क्रमात् ॥२२॥ऽयाशत्रिकोणतुर्याष्टसप्तमान्येन वृद्धितः॥ सौरेज्यारापरे पूर्णे क्रमात्पश्यंति
नारद ॥ २३ ॥ अयनक्षणघस्रर्तुमासार्द्धशरदो रवेः ॥ कटुतिक्तक्षारमिश्रमधुराम्लकषायकाः ॥२४॥ त्रिकोणात्स्वांत्यधाधर्मायुः सुखस्वोच्चपः सुहृत्॥
जीवो जीवज्ञौ सितज्ञौ व्यर्का व्याराः क्रमादमी ॥ २५ ॥ वींद्वर्का विकुजेंद्वर्काः सुहृदोऽन्ये रवेर्धृताः॥ मिथोधनव्ययायत्रिबंधुव्यापारगः सुहृत् ॥
॥२६॥ ध्येकानुभक्ता मयान् ज्ञात्वा मिश्रीदीत्सहजान्मुने ॥ मत्कालोधिसुहृन्मित्रपूर्वकान्कल्पयेत्पुनः ॥ २७ ॥ स्वोच्चत्रिकोणगेहाप्तनवांशैस्था
नजं बलम् ॥ दिक्षु सौम्येज्ययोः सूर्यारयोः सौरे सिताब्जयोः ॥२८॥ खाद्दतूदगनेन्ये तु वक्रे च समागमे ॥ उत्तरस्था दीप्तकराश्चेष्टा वीर्ययुता
मताः ॥ २९ ॥ निशींदुकुजसौराश्च सर्वदा क्षोह्नि चापरे ॥ क्रूराः कृष्णे सिते सौम्याः मतं कालबलं बुधैः ॥ ३० ॥ सौरारज्ञेज्यशुक्रेंदुसूर्याधिक्यं
परस्परम् ॥ पापास्तु बलिनः सौम्या विवक्षाः कण्टकोपगे ॥३१॥क्लीबे तद्दूशनाद्वापि चंद्रार्कांशसमं जनुः ॥ स्वांशे पापाः परांशस्थाः सौम्यालग्नं
वियोनिजम् ॥ ३२ ॥ निर्बलं च तदादेश्यं वियोनेर्जन्म पंडितैः ॥ शीर्षं वक्रगले पादावंसौ पृष्ठमुरस्तथा ॥ ३३ ॥ पार्श्वे कुक्षी त्वपानांघ्री

मेढ्रमुष्कौ तथा स्फिजौ ॥ पुच्छं चतुष्पदांगेषु मेषाद्या राशयः स्मृताः ॥ ३४ ॥ लग्नांशाद्ग्रहयुग्दृष्ट्वा वर्णान्बलयुताद्वदेत् ॥ दृक्समानप्रमाणांश्च
इष्टे रेखां स्मरस्थितैः ॥ ३५ ॥ खगत्र्यंशे बलाग्नेगे चरमांशे ग्रहान्विते ॥ वांशे स्थलांबुजः सौरेर्द्दीक्षायोगभवा द्विजाः ॥३६॥ विप्रलैस्तनुचंद्रेज्यार्कै
स्तरूणां जनिं वदेत् ॥ स्थलांबुभेदोशकृतश्चेतरेषामुदाहृतः ॥ ३७ ॥ स्थलांबु च पतिः खेटो लग्नाद्यावन्मिते गृहे ॥ तावंत एव तरवः स्थलजा जल
जास्तथा ॥ ३८ ॥ अंतःसारा रवौ सौरे दुर्भगाः क्षीरिणो विधौ ॥ भौमे कंटकिनो वृक्षा ईज्ये ज्ञे सफलाफलौ ॥ ३९ ॥ पुष्पिता भार्गवे स्निग्धा
श्चंद्रेऽथ कटुकाः कुजे ॥ अशुभर्क्षे शुभः खेटः शुभं वृक्षं कुभूमिजम् ॥ ४० ॥ कुर्याद्विलोमगो वापि स्वांशोक्तपरगैः समम् ॥ कुजेंदुहेतुकं स्त्रीणां प्रति
मासमिहार्तवम् ॥ ४१ ॥ नेष्टस्थेज्येऽन्यथास्ते स्त्रीयुंक्तासन्नरेक्षिते ॥ पापयुक्तेक्षिते द्यूने रुषा प्रीत्या शुभग्रहैः ॥ ४२ ॥ शुक्रार्केंदुजैः स्वांशस्थैरीज्य
चांगत्रिकोणगे ॥ भवेदपत्यं विप्रेन्द्र पुंसां सद्वीर्यशालिनाम् ॥ ४३ ॥ अस्तेऽर्केंदो कुजार्की चेत्पुंस्त्रियोरामयप्रदौ ॥ व्ययखगो युतौ चैकदृष्ट्या मृत्यु
प्रदौ तयोः॥४४॥शुक्रार्कौ मातृपितरौ दिवा नक्तं शशीनजौ॥मातृष्वसृपितृव्याख्यौ वा पञ्चेजि समे शुभौ ॥४५॥पापदृष्टे शुभे क्षीणे तुंगे वा लग्नगे
यमे ॥ क्षीणेंदुकुजसंदृष्टे मृत्युमेत्य गता ध्रुवम् ॥ ४६ ॥ युगपद्वा पृथक्संस्थौ लग्नेंदू पापमध्यगौ ॥ यदा तदा गर्भयुता नारी मृत्युमवाप्नुयात् ॥
॥ ४७ ॥ लग्नाच्चंद्राच्च तुर्यस्थैः पापैर्निधनगे कुजे ॥ नष्टेंदौ कुजरव्योश्च बंधुरिष्फगयोर्मृतिः ॥ ४८ ॥तन्वस्तसंस्थयोभौमरव्योः शस्त्रभवः क्षयः॥
यन्मासाधिपतिर्नष्टस्तन्मासं संस्रवे त्यजेत् ॥ ४९ ॥ लग्नेंदुगैः शुभैः खेटैस्त्रिकोणार्थास्तभूखगैः ॥ पापैस्त्रिषष्ठलाभस्थैः सुखी गर्भो रवीक्षितः ॥
॥ ५० ॥ ओजभे पुरुषांशेऽर्केज्येंदुलग्नैर्बलान्वितैः ॥ गुर्वर्कौ विषमस्थौ वा युंजन्म प्रवदेत्तदा ॥ ५१ ॥ युग्मभांशस्थितैस्तैस्तु वक्रेंदुभृगुभिस्तथा॥
यामस्थानगतैर्वाच्यं स्त्रियो जन्म मनीषिभिः ॥ ५२ ॥ द्व्यंगस्था बुधसंदृष्टाः स्वपक्षेय मलंकराः ॥ लग्नं विनौजभावस्थः सौरः पुंजन्मकृत्तथा॥
॥ ५३ ॥ मिथो रवींदूज्ञार्की वा पश्यतः समगं रविः ॥ वक्रो वांगविधू ओजे जज्ञौ युग्मौजसंस्थितौ ॥ ५४ ॥कुजेक्षितेपुमांशेदुहिता क्लीब जन्म
दा ॥ समे सितेन्दू ओजस्था ज्ञारांगेज्या नृवीक्षितौ ॥५५॥ लग्नेंदुसमगौ युग्मस्थाने वा यमलंकराः॥ग्रहोदयस्थान्द्व्यंगांशान्पश्यति ज्ञे स्वभागगे॥
॥ ५६ ॥ त्रितयं ज्ञांशकाद्युग्मममिश्रैः सममादिशेत् ॥ लग्ने चापांत्यभागस्थे तदंशस्थबलिग्रहैः॥५७॥ वीर्याढ्यज्ञार्किसदृष्टैः कोशस्थावहयोगिनः ॥
सितारेज्यार्कचंद्रार्किज्ञांगेशोर्केंदवोऽधिपाः ॥ ५८ ॥मासानां तत्समं वाच्यं गर्भस्थस्य शुभाशुभम् ॥त्रिकोणे ज्ञे परैर्नेष्टैर्द्विमुखाह्निकपान्वितः॥५९॥
अवागावाटावशुभैर्भसंधिस्थैः प्रजायते ॥ वीरान्सगीश्चदष्टेध्वष्टाकांतभसंहिताः ॥ ६० ॥ आरार्की चेज्यभांशस्थौ सदंतोगर्भकस्तदा ॥ खभेजे भुवि

मंदारदृष्टे कुब्जस्तु गर्भगः ॥ पंगुर्मीने यमेंद्वारैर्दृष्टेथांगेभसंधिगे ॥ ६१ ॥ पापैर्जडो विधौ गर्भः शुभदृष्टिविवर्जिते ॥ मृगांत्यगे वामनकः सौरेंद्वर्कनिरी
क्षिते ॥ धीनयोद्पगैरुर्व्यंशैः पापास्तैरसिरोह्नदाः ॥ ६२ ॥ रवींदुयुक्ते सिंहेंगे माहेयार्किनिरीक्षिते ॥ नेत्रहीना मिश्रखेटैर्दृष्टे बुद्बुदलोचनाः ॥
व्ययेजो वामनयनं दक्षं सूर्यो विनाशयेत् ॥ ६३ ॥ नेष्टा योगाः शुभैर्दृष्टाः पापाः स्युर्नात्र संशयः ॥ मंदेऽस्ते मंदभांशेंगे निषेकेब्दत्रये जनिः
॥ ६४ ॥ द्वादशाब्दे शशिन्येवं सुतावपि विचिंतयेत् ॥ ६५ ॥ आधानेंदुद्वादशांशा पापास्तद्राशिभिः पुरः ॥ ६६ ॥ शशांके जन्मभागादिद्वि
घ्नमिष्टकलाः स्मृताः ॥ ६७ ॥ पितुः परोक्षे जन्मस्यादिन्दौ लग्नमपश्यति ॥ ६८ ॥ मध्याद्भ्रष्टेर्के विदेशस्थे जनने नारिजन्म वै ॥ मंदेंगस्थे कुजे
स्ते च ज्ञोस्फुजि मध्यगे विधौ ॥ ६९ ॥ पापांगेब्जे त्रिभागे लौ स्वायगैः सद्भिरुद्धतः ॥ सूर्यस्तद्दृष्टिगो वापि ज्ञेयो ज्योतिर्विदां वरैः ॥ ७० ॥
चतुष्पदर्क्षगे भानौ शेषैर्बलयुतैः खगैः ॥ कोशादतौ तु यमलौ जायेते मुनिसत्तम ॥ ७१ ॥ सार्क्यारसिंहोज्ञाजांसे भांशतुत्यांगनालयुक् ॥ लग्नमिंदुं
च सार्केंदु न पश्यति यदा गुरुः ॥७२॥ सपापगोऽर्कों जायो वा परवीर्यप्रसूतिकृत् ॥ पापभस्थौ पापखेटैः सूर्यार्घानत्रिकोणगौ॥ ७३ ॥ विदेशगः
पितावृद्धः खेवा राशिवशात्यये ॥ पूर्ण इंदौ स्वभेशेंज्ञे शुभे भुव्यंबुजे तनौ ॥७४॥ द्यूनस्थे वा विधौ यातेंगना नारीप्रसूयते ॥ अब्धांगमन्भगः पूर्णे
ज्यो वा पश्यति नारद॥७५॥ स्वबंधलग्नगः सूतिः सलिले नात्र संसयः॥ पापदृष्टे यमे गुद्यां जन्मांगाजव्ययस्थिते ॥ ७६ ॥ कर्कातिलग्नगेशौरेवटे
जन्माब्जवीक्षिते ॥मंदे जन्मगते लग्ने बुधसूर्येंदुवीक्षिते॥७७॥क्रीडास्थाने देवगेहे प्यूषरे च क्रमाज्जनिः ॥ श्मशाने लग्नदृगसृग्राम्यस्थानेब्जभार्गवौ॥
॥ ७८ ॥ अग्निहोत्रगृहे जीवोऽर्को भूषाभरणो गृहे ॥ शिल्पालये बुधो जन्म कुर्याद्बलसमन्वितः ॥७९ ॥भासमाने सरे मार्गे स्थिरे स्वर्क्षांशगे गृहे॥
त्रिकोणगेज आरार्क्योरस्ते वा सृज्यतेऽम्बया ॥ ८० ॥ गुरुदृष्टे तु दीर्घायुः परं च प्राप्यते पुनः॥पापदृष्टे विधौलग्नेऽस्तेकुजे तु विनश्यति॥ ८१ ॥
भवे कुजार्क्योः संदृष्टे परहस्तगतः सुखी ॥ पापेद्यतायुर्भवति मासः सार्थैः परैरपि ॥८२ ॥ पितृमातृगृहे जन्म तदधीशबलान्मुने ॥ तरुगेहे शुभे नीचे
नैकस्थदृष्टौ लग्नेंदुः ॥ ८३ ॥ एतल्लक्षणसंपन्ना प्रसूतिर्विजने तदा ॥ मंदर्क्षांशे विधौ तुर्ये मंददृष्टेऽब्जगेऽपि वा॥८४॥मंदार्चने वा तमसि शयनं नीचगे
भुवि ॥ शीर्षे पृष्ठोदये जन्म तद्वदेव विनिर्दिशेत॥८५॥ चंद्रास्तसुखगः पापैर्मातुः पीडां समादिशेत् ॥ जीर्णोद्धृतं गृहं मंदे सृजि दग्धं न वा विधौ॥
॥८६॥ काष्ठाढ्यमदृढं सूय बहुशिल्पयुतं बुधे ॥ चित्रयुक्तं नवं शुक्रे दृढे रम्ये गुरौ गृहम्॥८७॥घटाजकर्क्यलिघटे पूर्वे ज्ञेज्यगृहे ह्युदक् ॥वृषे पश्चा

न्मृगे सिंहे दक्षिणे वसतिर्भवेत्॥८८॥गृहप्राच्यादिगौ द्वौ द्वौ द्व्यंगाः कोणेष्वजादयः॥पर्यंके वास्तुवत्पादास्त्रिपदंकांत्यराशयः॥८९॥चंद्रागांतरगैः खेटैः
सूतिकाः समुदाहृताः॥चक्राद्धि बहिरंतश्च दृश्यादृश्योपरेऽन्यथा॥९०॥लग्नाशयसमानांगोबालिखेटंसमोपि वा ॥चंद्रनंदांशवद्वर्णः शीर्षाद्यंगविभाग
युक्॥९१॥शीर्षकं दृक्श्रवे नासा कपोलहनवो मुखम्॥कंठांसपार्श्वहृद्दोषः क्रोडंनाभिश्च बास्तिकः॥९२॥शिश्नापाते च वृषणौ जघने जानुनी तथा॥जंघे
पादौ चोभयत्र त्र्यंशैः समुदितैर्वदेत्॥९३॥पापयुक्ते व्रणस्तस्मिन्नंगे लक्ष्म च तद्युते॥स्वर्क्षांशे स्थिरयुक्ते तु नैज आगंतुकोऽन्यथा॥९४॥मंदेऽनिलाश्मजो
भौमे विषशस्त्राग्निजो बुधे ॥भुजेऽर्के काष्ठपशुजो जेतुः शृंग्यजयोनिजः ॥९५॥ यस्मिन्संज्ञास्त्रयः खेटा अंगेस्युस्तत्र निश्चितम् ॥ व्रणोशुभकृतःपृष्ठे
तनौ राशिसमाश्रिते ॥९६॥ तिलकृन्मसकृद्दृष्टसौम्यैर्युक्तश्च लक्ष्मवान् ॥ चतुरस्रः पिंगदृक् च पैत्तिकोऽल्पकचो रविः ॥९७ ॥ वृतो वातकफी प्राज्ञो
मंदवाक् शुभदृक् शशी ॥ क्रूरदृक्तरुणो भौमः पैत्तिकश्चपलस्तथा ॥ ९८ ॥ त्रिधातुपवृतिर्हास्यरुचिज्ञः श्लिष्टवाक्तथा ॥ पिंगके श्लक्ष्णो दीर्घः कफी
धीमान्गुरुर्मतः ॥ ९९॥ सुवपुर्लोचनः कृष्णवक्रकेशो भृगुः सुखी ॥ दीर्घः कपिलदृङ्मंदो निलीखरकचोलसः॥१००॥ स्नाय्वस्थिरक्तत्वक्शुक्रवसाम
ज्जास्तु धातवः ॥ मंदार्कचंद्रसोम्यास्फुजिज्जीवकुभुवः क्रमात्॥०१ ॥ चंद्रांगपापैर्भांत्यस्थैः सेंबुपापचतुष्टयैः ॥ चक्रपूर्वापरे पापसौम्यैः कीटतनौ
मृतिः ॥१०२॥ उदयास्तगतौ पापौ चंद्रः क्रूरयुतैः शुभैः॥न चेद्दृष्टस्तदा मृत्युर्जंतस्य भवति ध्रुवम् ॥१०३॥क्षीणेऽब्जे व्ययगे पापैर्लग्नाष्टस्थैःशुभा
न चेत् ॥केंद्रेषु वाब्जोसंयुक्तः स्मरांत्यमृतिलग्नगः॥१०४॥केंद्राद्या हस्त सन्खेटैरदृष्टो मृत्युदस्तथा॥षष्ठेमेब्जेऽसदृष्टेसद्यो मृत्युः शुभेक्षिते ॥१०५॥
समादृके मिश्रखेटैर्दृष्टेर्दृष्टे मृतिः शिशोः॥ क्षीणेब्जेंगे रन्ध्रकेन्द्रे पापे पापान्तरस्थिते॥१०६॥भूद्यूननिधने वाब्जे लग्नेऽप्येवं शिशोर्मृतिः॥ पापैश्चन्द्रास्त
गैर्मात्रा सार्द्धं सद्दृष्टिमंतरा॥१०७॥शुभादृष्टे भान्त्यगेब्जे त्रिकोणोपरतैः खलैः॥लग्नस्थे वा विधौ पापैरस्तस्थैर्मृतिमाप्नुयात्॥१०८॥अस्तेऽब्जेऽसद्भिरष्ट
स्थै सृज्यवात्मजयोर्मृतिः ॥ लग्ने रवौ तु शस्त्रेण सवीर्यासद्भिरष्टगैः ॥१०९ ॥ कर्केन्द्वीज्ययुते लग्ने केंद्रे सौम्ये च भार्गवे ॥ शषैर्व्यरीशगैरायुर
मितं भवति ध्रुवम् ॥ ११० ॥ वर्गोत्तमे मीनलग्ने वृषेऽब्जे तत्त्वलिप्सके ॥ स्वतुंगस्थेष्वशेषेषु परमायुः प्रकीर्तितम् ॥ १११ ॥ शुभैर्दृष्टः
सवीर्योंगे केंद्रस्थे चायुरर्थदः ॥ स्वच्चोब्जे स्वर्क्षगैः सौम्यैः सवीर्येंगाधिपे तनौ ॥ ११२ ॥ षष्ठ्यब्दकेंद्रसौम्येभेष्टशुद्धे सप्ततिर्गुरौ ॥ मूलत्रिकोणगैः
सौम्यैर्गुरौ स्वोच्चसमन्विते ॥ ११३॥ लग्नाधिपे बलयुतेशीत्यब्दं त्वायुरीरितम् ॥ सवीर्ये सत्सु केंद्रेषु त्रिंशच्छुद्धियुतेऽष्टमे॥ ११४ ॥ लयेशे धर्मगे
जीवेष्टस्थे क्रूरेक्षिते जिताः ॥ लग्नाष्टमेशावष्टस्थौ भाब्दमायुःकरौ मतौ ॥ ११५ ॥ लग्नेऽशुभेज्यौ ग्लौदृष्टौ मृत्यौ कश्चन चाकृतिः ॥ धर्मांगस्थे

शनौ शुक्रे केंद्रेऽब्जे व्ययधर्मगे ॥११६॥ शताब्दं गीष्पतौ कर्के कंटकस्थसितेज्ययोः ॥ लयेशंगे शुभैर्हीनेऽष्टमे खाब्धिमितं वयः ॥११७॥लग्ने
शेष्टमगेष्टेशे तनुस्थे पंचवत्सरम् ॥कवीज्ययोगे सौम्याब्जौ लग्ने मृत्यौ च स्वेषवः ॥११८॥ एतद्योगजमायुः स्यादथ स्पष्टमुदीर्यते ॥ सूर्याधिक
बले पैंडं निसर्गाच्च विधोर्बले ॥११९॥ अंशायुः सबले लग्ने तत्साधनमथो शृणु ॥गोब्जास्तत्त्वतिथी सूर्यास्तिथिः स्वर्गा नखाः क्रमात्॥१२०॥
नखा विधुर्द्विकाश्च धृतिः स्वाक्षिखमार्गणाः ॥१२१॥ पिंडे निसर्गे खोच्चे नो ग्रहः षड्भाल्पको यदा ॥ चक्रशुद्धस्तदा ग्राह्यस्यांशा आयुषि
संमताः ॥१२२॥ अंशोनाः शत्रुभे कार्या ग्रहं वक्रगतिं विना ॥ मंदशुक्रौ विनार्द्धोना ग्रहस्यास्तंगतस्य च ॥१२३॥ हानिद्वयेऽधिकाः कार्या यदा
क्रूरस्तनौ तदा ॥ विहायारीनंशार्द्धैर्हन्यादायुर्लवान् भजेत् ॥ १२४ ॥ भगणांशैर्लब्धहीनास्तेषां कार्या विचक्षणैः ॥ पापस्यांशाः समग्रोना
सौम्यस्यार्द्धविवर्जिताः ॥१२५ ॥ स्पष्टास्तेंशाः खषट्त्र्यासा गुणयित्वा स्वकैर्गणैः ॥ वर्षाणि शेषमर्कघ्नं हारात्संमासकाः स्मृताः ॥ १२६ ॥ तच्छे
षश्च त्रिगुणितः तेनैवाप्तं दिनानि च ॥ शेषे षष्ट्या हते भक्ते हारेण घटिकादिकम् ॥ १२७ ॥ हित्वा भाज्यंगभागादीन्कलीकृत्य खखा
श्विभिः ॥ भजेद्वर्षाणि शेषे तु गुणिते द्वादशादिभिः ॥ १२८ ॥ द्विसप्तांशे च मासादिलग्नायुर्जायते स्फुटम् ॥ अंशायुषी सलग्नानां खेटाना
मंशका हताः ॥ १२९ ॥ खयुगैरायुरंशाः स्युस्तत्संस्कारं वदामि ते ॥ ग्रहोनलग्नं षड्भात्यं चेत्संस्कारोऽन्यथा नहि ॥ १३० ॥ तदंशः
स्वाग्नयो भक्ता लब्धोनोभूर्गुणो भवेत् ॥ यदैकाल्यं तदास्यांशाः स्वाग्न्याप्तोना च भूर्गुणः ॥ १३१ ॥ सौम्यस्यार्द्धेन पापस्य समग्रेणेति
निश्चयः ॥ गुणकघ्नाश्चायुरंशाः संस्कारोऽयमुदाहृतः ॥१३२॥ आयुरंशकलाभक्ताद्विशत्याब्दा इनाहतम् ॥ शेषं द्विशतभक्तं स्युर्मासाः शेषा दिना
दिकम् ॥ १३३॥ लग्नायुरंशास्त्रिगुणा दिग्भिक्ता स्युः समास्ततः ॥ शेषेऽर्कादिगुणे भक्ते दिग्भर्मासादिकं भवेत् ॥१३४॥ सबलेंगेभतुल्याब्दैर्युतमा
युर्भवेत्स्फुटम् ॥ अंशद्विघ्नमक्षांशं मासाः खत्र्यादिसंगुणात् ॥ १३५ ॥ शेषा दिनादिकं योज्यं नैतत्पिंडनिसर्गयोः ॥ लग्नार्कचन्द्रमध्ये तु
यो वली तद्दशा पुरा ॥ १३६ ॥ ततः केंद्रादिगानां तु द्वित्र्यादौ सबलस्य च ॥ बह्वायुर्यो वीर्यसाम्येर्काद्युतस्य प्राक् याचकः ॥ १३७ ॥
षड्वर्गार्द्धस्य त्रिंशस्य त्रिकोणगश्च स्मरगः ॥ सप्तमासस्य तूर्यस्य चतुरस्रगतस्य च ॥ १३८ ॥ क्रमः केंद्रादिकोऽत्रापि द्वित्र्यादौ सबलस्य
च ॥ पाकपस्याब्धिनागाश्च ह्यर्णवा सहगस्य च ॥ १३९ ॥ त्रिकोणस्थस्य चाष्टाक्षिसूर्या द्यूनगतस्य च ॥ तुर्याष्टगस्य तु स्वर्गा गुणकाः
परिकीर्तिताः ॥ १४० ॥ दशागुणैर्हता भक्त्या गुणैक्येन समागताः ॥ शेषेऽर्कादिहते भक्ते मासाद्यैक्येन नारद ॥ १४१ ॥ अंतर्दशासु विदशास्तासु

चोपदशास्तथा ॥ दशेशमित्रस्वोच्चक्षगोऽजोऽध्येकाद्रिवृद्धिगः॥ १४२॥शुभगो यद्भगस्तद्विस्न्वादिस्थेन तद्धिकृत् ॥ प्रोक्तेतरस्थानगतस्तत्तद्भावक्षयं
करः ॥ १४३ ॥ खगस्य यद्भवेद्द्रव्यं भावभे क्षणयोगजम् ॥ जीविकादिफलं सर्वं दशायां तस्य योजयेत्॥ १४४ ॥ विशन्यापदशायां
यो वैरिदृष्टो विपत्तिकृत् ॥ शुभमित्रेक्षितश्चेष्टसद्वर्गस्थश्च यो ग्रहः ॥ १४५ ॥ तत्काले बलवानापन्नाशकृत्समुदाहृतः ॥ यस्याष्टवर्गजं चापि
फलं पूर्णशुभं भवेत् ॥ १४६ ॥ यश्च मूर्तितनुश्चावो वृद्धिगः स्वोच्चभस्थितः ॥ स्वत्रिकोणसुहृद्भस्थस्तस्य मध्यमसत्फलम् ॥ १४७ ॥श्रेष्ठं शुभतरं
वाच्यं विपरीतगतस्य तु ॥ नेष्टमुत्कटमिष्टं तु स्वल्पं ज्ञात्वा बलं वदेत् ॥ १४८ ॥ चरे सन्मध्यदुष्टाभ्यामंगभंगे विपर्ययात् ॥ स्थिरे नेष्टेष्टमध्या च
होरायारूयंशकैः फलम् ॥ १४९ ॥ स्वामीज्यज्ञयुता होरा दृष्टा वा सत्फलावहा ॥ विनाश दृष्टयुक्ता च पापांतरगतान्यथा ॥१५०॥ प्राग्ध्वांक्षा बंधु
मृत्याय तयोर्द्यूने रविः स्वभात् ॥ वक्रात्स्वादिवसाच्चार्के शुक्राद्यूनां तु षड्तः ॥१५१॥ धर्मध्यायारिगो जीवादिकत्र्यारिगो विधोः॥पृध्यंत्यधीतपाः
सुज्ञा ततोवृद्धचंत्यबंधुराः ॥१५२ ॥ वृद्धिगोंगात्सधनधीतपः स्वाराच्छशी शुभः ॥ स्वद्वृध्यस्तादिषु पृधात्ससाष्टौ पंचयोपगः॥१५३॥षट्‌त्र्यायधी
स्थो मंदाच्च ज्ञाद्वित्र्यायाष्टकेंद्रगः ॥ केंद्राष्टायांत्य इज्याद्वा ज्ञज्यायास्तत्र स्वे कवेः ॥ १५४ ॥ वृद्धाविनात्सादिधिया संगा मायारिगो विधोः ॥
केंद्राष्टापार्थगः स्वर्क्षान्मंदाद्गोष्टायकेंद्रगः ॥३५५॥ षट् त्रिधी भवतः सौम्यात्षड्वांशाष्टगो भृगोः ॥ कर्मायव्ययषष्ठस्थो जीवाद्भौमः शुभः स्मृतः
॥१५६॥ कवेर्द्धर्यीषष्ठमोध्याये सन्ज्ञोमंदान्सधीत्रये ॥ साक्षास्ते भूमिजाज्जीवाद्ययारिभवमृत्युगः ॥ १५७ ॥ धर्मायारिसितांत्येर्कात्साद्यत्रिस्वगता
स्वभात् ॥ षट्खायाष्टाब्धिखेष्विज्यात्सहाद्येषु विलग्नतः ॥१५८ ॥ दिक्वाष्टाद्यस्तबंध्याये कुजात्खात्सत्रिके गुरुः ॥सात्र्यंके सन् रवेः शुक्राद्धीखगो
दिग्भवारिगः ॥ १५९ ॥ चंद्राद्धीशार्थगोस्तेषु मन्दाद्धीत्रिषडंत्यगः ॥ गोऽब्धिधीषट्खखाद्या ये ज्ञात्सद्यूने विलग्नतः॥१६०॥आशु तेशाष्टगोष्वंगः
त्सांतेष्वब्जात्सितः शुभः ॥ स्वात्सज्ञेषु त्रिधीगोऽधी दिक्छिद्रासिगतोर्कजात् ॥ १६१ ॥ रंध्रायव्ययचगः सूर्यादोष्टधीखे सगोर्गुरो ॥ ज्ञाब्धि
त्र्यायारिगोरात्रिषट्ध्यधयांत्यगोषु च ॥१६२ ॥ त्रिधीशारिषु मन्दः खात्साक्षांत्येषु शुभो सृजः॥केंद्रायाष्टधनेष्वर्को लग्नाद्वृद्धयाद्यबंधुषु ॥१६३॥
गोध्वष्टापारिखांत्येज्ञाच्चंद्राल्लाभत्रिषद्भतः ॥ षडष्टांत्यगतः शुक्राद्गुरोर्द्धीशांत्यशत्रुषु ॥ १६४ ॥ उक्तस्थानेषु रेखादो ह्यनुक्तेषु तु बिंदुदाः ॥
जन्मभाद्वृद्धिमित्रोच्चस्वभेधिष्टं परेष्वसत्॥१६५॥ कष्टमर्थक्षयः क्लेशः समतार्थसुखागमः ॥ धनाप्तिः सुखमिष्टाप्तिरिति रेखाफलं क्रमात् ॥ १६६ ॥
पितृमातृद्विषन्मित्रभ्रातृस्त्रीभृतकाद्भवेः ॥ स्वामिलग्नाजयोः स्वस्थाद्वैद्वर्कस्वयशोशयात् ॥ १६७ ॥ तृगस्वर्णाश्वघोरणाद्यैरर्कांशे वृत्तिमादिशेत् ।

कृष्यंबुजस्त्रीभ्योऽब्जांशे कौजे धात्वस्त्रसाहसैः ॥ १६८ ॥ काव्यशिल्पादिभिर्बोधे जवे देवद्विजाकरैः ॥ शौक्रे रजतगोरत्नैर्मांदे हिंसाश्रमाधमैः ॥
॥१६९ ॥ स्वोच्चेष्वार्की तथा ज्यारैरुक्तैकांगे नृपाधिपाः ॥ लग्ने वर्गोत्तमेऽब्जे वा चतुरादिग्रहेक्षिते ॥ १७० ॥ द्वाविंशभूपास्तुंगेसृक्चापेकेंन्दूयम
स्तनौ ॥ भूपकृत्तुंगगोर्कोगेस्तेसाजार्कोखभे गुरौ ॥१७१ ॥ यमेंदुतुंगगौ लग्ने षष्ठेऽर्कज्ञौ तुलाजगौ ॥ सितासृजो गुरौ कर्कौ साराजे लग्नगे नृपाः ॥
॥ १७२ ॥ वृषेगेऽब्जेर्केज्यसौरैः सुहृज्जायाखगैर्नृपः ॥ मंदे मृगांगेऽर्यकांशस्थैरजादिभिर्नृप ॥ १७३ ॥ सेज्याजेश्वे मृगसुखे कुजे तुंगेर्क्षभागवौ ॥
लग्नेऽथ सेज्यकर्केगे ज्ञाजशुक्रैर्भवोपगैः ॥१७४ ॥ मेषेऽर्के भूमिपासेंदौ एवे षांग्रेर्कपपासृजः ॥ सिंहकुंभमृगस्थाश्चेद्भूपः सारेतनावजे ॥ १७५॥ आर्के
जीवे तनौ वापि नृपोऽथो :कुजभास्करौ॥धीस्थौ गुर्विंदुकवयो भूमौ रुयगे बुधैर्नृपः ॥१७६॥मृगास्यलग्नगैः सौरेजाब्जर्क्षहरयः सयाः॥ कविक्षौ तुल
युग्मस्थौ वै भूपः कीर्तिमान्भवेत् ॥ १७७ ॥ यस्य कस्यापि तनयः प्रोक्तैर्योगैर्नृपो भवेत् ॥ वक्ष्यमाणैर्नृपसुतो ज्ञेयो भूयो मुनीश्वर ॥ १७८ ॥
स्वोच्चे त्रिकोणभगते रुयाद्यैर्बलयुतैर्नृपः॥सिंहेऽर्के मेषलग्नेऽजे मृगे भौमे घटेऽष्टमे॥१७९॥चापे जीवे धरानाथःस्यादथ स्वर्क्षगे भृगौ॥पातालगे धर्मगेऽब्जे
शुभदृष्टे युते मुने॥ १८०॥त्रिलग्नभवगैःशेषैर्धराधीशः प्रजायते॥सौम्ये वीर्ययुतेंऽगस्थे बलाढ्ये शुभगे शुभे॥ १८१॥धर्मार्थोपचयस्थैश्च शेषैर्धर्मयुतो नृपः॥
मेषूरणायतनुगाः शशिसूर्यजसूरयः॥ १८२॥ज्ञारौ धने शितरवा हिबुके भूपतिस्तदा॥वृषेंऽगेऽब्जो धनारिस्थो जीवार्की लाभगाःपरे॥ १८३॥सुखे गुरुःखेरवीं
दूयमो लग्ने भवे करौ॥लग्ने वक्रासितौ चंद्रेज्यसितार्कबुधाः क्रमात्॥१८४॥सुखास्तु शुभखाप्तिस्था नरेशं जनयंत्यपि॥कर्मलग्नगखेटस्य दशायां राज्य
संगतिः ॥१८५॥ प्रबलस्य दशायां वा शत्रुनीचा दिगार्तिदाः॥ आसन्नकेंद्रद्वयगैर्वर्गदाख्यः सकलग्रहैः ॥१८६॥ तन्वस्तगैश्च सकटं विहगो राज्यबं
धुगैः ॥ शृङ्गाटकं धिगौगस्थैर्लग्नान्यस्थैर्हलं मतम् ॥ १८७ ॥ वज्रोंङ्गस्थे सत्स्वसत्सु तुर्यखस्थैर्यवोन्यथा ॥ विमिश्रैः कमलं प्राहुर्वायाकंटकबा
ह्यगैः ॥ १८८ ॥ लग्नाच्चतुर्षुगैर्यूपःशरस्तूर्याच्चतुर्षुगैः॥द्यूनाद्वेदक्षगैः शक्तिं र्दऽखादिचतुर्भगैः ॥ १८९ ॥ लग्नात्क्रमात्सप्तभगैर्नौकाकूटस्तु तुर्यतः ॥
छत्रमस्तात्स्वभाद्यायोन्यस्मादर्द्धेन्दुनामकः ॥ १९० ॥ लग्नादेकांतरगतैश्चक्रमर्थात्सरित्पतिः ॥षड्सुस्थानेषु वीणाद्याः समसप्तर्क्षसंस्थितैः॥ १९१ ॥
वीणादामपाशकेदारभूशूलयुगगोलकाः॥ग्रहैः सर्वैश्चरभगै राजयोगः प्रकीर्तितः ॥ १९२॥ स्थिरस्थैर्मुसलं नाम द्विशरीणतैर्नलः ॥ भाला केंद्रस्थितैः
सौम्यैः पापैस्सर्प उदाहृतः ॥१९३ ॥ ईर्ष्युरध्वरुची रज्ज्वां मुसले धनमानयुक् ॥ व्यंगा स्थिरा लोनलजो मोगीस्रग्जोहिजोर्दितः॥ १९४ ॥
वीणोद्भवोतिनिपुण गीतनृत्यरुचिर्भृशम् ॥ दाता समृद्धो दामोस्थः पाशजो धनशीलयुक् ॥१९५॥ केदारोत्थः कृषिकरः शूले शूरोक्षतो धनः

युगं पाषंडयुर्गोले विधनो मलिनस्तथा ॥ १९६ ॥ भूपवंद्यपदश्चक्रे समुद्रे नृपभोगयुक् ॥ सुभगांगोर्द्धचंपात्सुखीशूरश्च चामरः ॥ १९७ ॥ मित्रो
पकारकृच्छत्रे कूटे चानृतबंधराट् ॥ तौजः सकीर्तिः सुखभाक् मानवो भवति ध्रुवम् ॥ १९८ ॥ त्यागी यज्वात्मवान् यूथे हिंस्रो गुह्याधिपः शरैः ॥
शक्तौ नीचोऽलसो निःस्वो दण्डे प्रियवियोगभाक्॥१९९॥व्यर्कैः स्वांत्योभयगतैः खेटैः स्यात्सुनफानफा॥दुरुधरा चैव विधौ ज्ञेयः केमुद्रुमोऽन्यथा
॥ २०० ॥ स्वोपार्जितार्थभुग्दाता सुनफायां धनी सुखी ॥ नीरोगः शीलवान् ख्यातः सुवेषश्चानफाभवः ॥ २०१ ॥ भोगी सुखी धनीदानी
त्यागी दुरुधुरोद्भवः॥केमुद्रुमेऽतिमलिनो दुःखी नीचोऽथ निर्धनः॥२०२॥यन्त्राश्मकारंश॥जोको भौमपुष्करुतें ध्वगः सुज्ञः॥सुकीर्तिनिपुणं विद्वांसं
धनिनं तथा ॥ २०३ ॥ सेन्योन्यकार्यनिरतं सास्फुजिच्छस्त्रजीविनम् ॥ समंदो धातुकुशलं तथा भाडंविदं मुने ॥ २०४ ॥कूटस्न्याशवपण्याठं
नसासृगिंद्रुः प्रसूद्विषम् ॥ कुर्यात्सज्ञोर्थनिपुणं नम्रं सत्कीर्तिसंयुतम् ॥ २०५ ॥ सज्योऽ स्थिरवयं वंश्यं विक्रांतं च समर्थिनम् ॥ ससितोसुकवे
तारं सार्किपोनभवं मुने ॥ २०६ ॥ आरे सज्ञे बाहुयोधी पुराध्यक्षः सगीष्पतौ॥सशुक्रे घूतकर्होयो नृती घूती समंदके ॥ २०७ ॥ सेज्येज्ञ नृत्यर्गी
ताढ्यो मायादक्षः सभार्गवेसमंदे लुब्धकः क्रूरो नरो भवति नारद॥२०८॥सशुक्रे वाक्पतौ विद्वान्सासितेऽन्नघटंकरः॥कवौ स मंदमंदाक्षा व वनि
श्रयवित्तवान् ॥ २०९ ॥ एकस्थैश्चतुराद्यैस्तु खवार्थैः खचरैः पृथक् ॥ कुजज्ञेज्याजशुक्रार्किसूर्यैः परिव्रजेन्नरः ॥ २१० ॥ शाक्याजीवकवृद्धार्थिच
रकाखफलाशनः ॥ तत्स्वामिभिः परिजितैः प्रव्रज्याप्रच्युतिर्भवेत् ॥ २११ ॥ अदीक्षितालपस्तगतैः सबलैस्तत्स्थभक्तयः ॥ जन्मपोन्यैर्यद्यदृष्टो
मंदं पश्यति नारद ॥२१२॥ मंदो वा जन्मपं नष्टं तथा च मंदकागणे ॥ भौमार्कांशे सौरदृष्टे चंद्रे वा दीक्षितो भवेत्॥२१३॥सुरूपो भूषितोऽश्विन्यां
दक्षः सत्यवचा यमे ॥ बहूभुग्परदारघ्नौ स्थिरधीः प्रियवाक्तथा ॥ २१४ ॥ ब्राह्मे धनीमृगे भोगी रौद्रे हिंस्रः शठोऽघकृत्॥ दांतो रोगी शुभोऽदि
त्यां पुष्यर्यजन्मा कविः सुखी॥२१५॥धूर्तः शठः कृतघ्नोऽहौ पापः सर्वाशनो भवेत्॥पत्रे भोगी धनी भक्तो दाता प्रियवचा भगे॥२१६॥धनी भोगी
नरोर्यमर्क्षे स्तेनो धृष्टो घृणी करे॥चित्रांबरः सुदक्त्वाष्ट्रे न च धर्मदयापरः॥२१७॥द्रीशे लुब्धःपटुः क्रोधी मैत्र्यो आठनोविदेशगः॥शाक्रे धर्मपरस्तुष्टो
मूले मानी धनी सुखी ॥२१८॥ आप्ये मानी सुखी हृष्टो वैश्वे नम्रश्च धार्मिकः॥कर्णे धनी सुखी ख्यातो दाता शूरो धनी वसौ ॥ २१९॥शतऽ
रिहंता व्यसनी स्त्रीजितो जाहिभेदिनी ॥ बुध्ने वक्ता सुखी कांतः पौष्णे शूरो धनी शुचिः ॥२२०॥कामी शूरः कृतज्ञोऽजे कांतस्त्यागी क्षमी वृषे॥
युग्मे स्त्रीद्यूतशास्त्रज्ञः स्त्रैणो ह्रस्वः स्वभे विधौ ॥ २२१॥ स्त्रीद्विट् क्रोधी हरौ मानी विक्रांतः स्थिरधीः सुखी ॥ धर्मी श्लक्ष्णः सुधीः षष्ठे प्राज्ञः

प्रांशुर्धनी घटे ॥ २२२ ॥ रोगी पूज्यः क्षती कौर्प्ये कविः शिल्पीज्यभे धनी ॥ मृगेऽलसोऽटनः स्वक्षः परदारार्थहृद्धटे ॥ २२३ ॥ सबलेभेभयेवापिस
वलेजेखिलफलम् ॥अन्यथा विपरीतं तत्फलंमेवं परेऽपि न॥ख्यातः स्त्रीद्विट् धनी तीक्ष्णोज्ञः कविः शौंडिको धनी॥पूज्यो लुब्धोऽधनसखो मेषादौ
भास्करे जनौ ॥ २२४ ॥ निःस्वोऽर्कभे भूमिपुत्रे धनी चांद्रे स्वभेदनः ॥ बौधे कृतज्ञो जैवे तु ख्यातः शौक्रेऽन्यदारिकः॥२२५॥मृगे बह्वात्मजधनः
कुंभे दुःख्यनृती खलः ॥ स्त्रीद्वेष्यः स्वजनद्वेषीनियरत्यः सधीधनः ॥ २२६ ॥ समानार्थः सपुत्रस्त्रीसर्णः सूर्यादिभे बुधे ॥ सेनानीः ख्यर्थपुत्राढ्यः
दक्षमैश्यः परिच्छदी ॥ २२७ ॥ मंडलेशः सार्थसुखः सर्णस्वाम्यर्कभाङ्गुरौ॥ख्याप्तार्थो मंदशोकाढ्यो बंधुद्वेषी धनाघवान् ॥ २२८ ॥ सार्थः प्राज्ञः
समः ख्यातिः स्त्रीजिऽतोर्कादिभे भृगौ ॥व्यंगजार्थो खप्रसूको विधिमित्रो सुखत्रयः॥२२९॥सत्पुत्रस्त्रीधनो राजा ग्रामे शोकादिभेर्कजे ॥ भूपज्ञगुणि
पौरास्वाहृष्टेब्जेजेसृगादिभिः॥२३०॥निः स्वस्तेन नृपाः प्रज्ञप्रेष्यामविनृयुग्मगे ॥ धात्वाजीवी नृपज्ञाभीतंतुवायाधनाः स्वभे॥२३१॥युयुत्सुकविसू
रीज्यधातुजीविद्गामयाः ॥ ज्योतिर्ज्ञाढ्येज्यनु खलु नृपेज्ञादिकर्हरौ ॥२३२॥ षष्ठे शुभैर्नृपचमूपनैपुण्यवतिताशयाः ॥ जूके भूपस्वर्णकारवणिजः
शेषदृग्युते ॥ २३३ ॥ द्विपैतृकाब्धिध्वजिनो व्यंगा स्वक्षितिपा अलौ ॥ ज्ञातिक्ष्माजनयाश्चाये सद्भिर्दर्मी शठस्तथा ॥ २३४ ॥ भूपमंडितसखे
ज्यामृगे भूयान्यदारिकौ ॥ कुंभे शेषैश्च हास्यज्ञनृपज्ञाः सद्भिरंत्यभे ॥२३५॥ हारेशर्क्षदलस्थैस्तु दृष्टो युक्तः शशी शुभः ॥ त्र्यंशे तत्पतिमित्रर्क्षगतै
र्युक्तेक्षितस्तथा ॥ २३६ ॥ द्वादशांशे फलं प्रोक्तं नवांशेऽप्यथ कीर्त्यते ॥ आरक्षेको वधरुचिर्निर्युद्धकुशलोऽर्थवान् ॥ २३७ ॥ कलहः क्षितिजांस्थे
शौक्रे मूर्खोऽन्यदारदः ॥ कविः सुखी बुधांशे तु नटचौरज्ञशिल्पिनः ॥ २३८ ॥ स्वांशे त्वल्पतनुः सखस्तपस्वी लोभतत्परः ॥ क्रोधी निधीशो
मात्यो वा नृपो हिंस्रो सुतो हरेः ॥ २३९ ॥ जीवांशे हास्यविद्योधा बली मंत्री च धार्मिकः ॥ अल्पापत्यो दुःखितो खो दुष्टस्त्रीसौरिभागगे
॥२४०॥ भानावेंद्वादिदृष्टे तु तद्वदेव फलं वदेत् ॥ वर्गोत्तमे खे परभे फल मुक्तं शुभं क्रमात् ॥ २४१ ॥ पुष्टं मध्यं लघु ज्ञेयं यदि चांशपतिर्बली ॥
राशीक्षगफलं रुद्ध्वा ददात्यंशफलं स्फुटम् ॥ २४२ ॥ शूरस्तब्धो विकलदृग्निघृणोऽर्के तनुस्थिते ॥ मेषे धनी तैमिरकः सिंहे रात्र्यंध एव च
॥२४३॥ नीचोधोस्वः कर्कगेऽर्के रुद्बुदाक्षस्तनुस्थिते ॥ द्वितीयेऽर्के बहुधनो नृपदंड्यो मुखामयी ॥२४४॥ त्रिगे बुधो विक्रमी च विसुखः पीडितो
भुवि॥धनापत्योक्तितो धीस्थे बली शत्रुजितोरिगे॥२४५ ॥ स्त्री जितो द्यूनसंस्थे च निधनेल्पात्मजोल्पदृक् ॥ सुतार्थसुखभा भाग्ये दशमे श्रुतशौ
र्यवान् ॥२४६॥ लाभे बहुधनो मानी पतितो खोऽव्यये रवौ ॥मूकोधो बधिरः प्रेष्यो जेगे खाद्याजगे धनी॥२४७॥बुद्धर्वा धनवानधें हिंस्रो विक्रमगे

भवेत् ॥ साधुभावः सुखगते धीस्थे कन्याप्रजोलसः ॥ २४८ ॥ अल्पाग्निकामस्तीक्ष्णोरौईर्ष्युस्तत्रिमदोज्ञखे ॥ व्याधिपीडान्वितो मृत्यौ भानुर्द्धे
नगे मित्रधनान्वितः॥ २४९ ॥ धर्मधीधनयुग्राज्ये ख्यातधीधनयुग्भवेत् ॥ क्षुद्रोंऽगहीनो व्ययगे चंद्रे प्रोक्तं फलं बुधैः ॥२५०॥ लग्ने कुजे क्षततनुर्द्धे
नगे तु कदन्नभुक् ॥ धर्मपापसमाचारोऽन्यत्र सूर्यसमो मतः ॥ २५१॥ विद्वान् धनी च प्रवरः पंडितः सचिवोरियुक् ॥ धर्मज्ञो विस्तृतगुणो गाधो
ज्ञेयरतोऽर्कवत्॥ २५२ ॥ विद्वान्स वाच्यः कृपणी सुखाक्षो रिपुगृद्धिमान् ॥ नीचस्तपस्वी चष्णवनी लोभीदुष्टस्तनोर्गुरो ॥ २५३ ॥ स्मरी सुखी
विलग्नस्थे कलही सुरतोत्सुकः ॥ सुखितस्तनपस्ये च भृगौ जीववदन्यतः ॥ २५४ ॥ निःस्वो रोगी कामवशो मलिनः शैशवार्तियुक् ॥ अलसो
लग्नगे मंदे धर्मात्स्वोच्चगते नृपः ॥ २५५ ॥ ग्रामाधिपः स विद्वांश्च चार्वंगोऽन्यत्र सूर्यवत्॥ पूर्णमुच्चेथ पादोनफलं मूलत्रिकोणगे॥२५६॥शुभग्रहे
दलं स्वर्क्षे मित्रभेंऽघ्रिमितं फलम्॥शत्रुभेऽल्पं तथा नीचास्तंगते फलशून्यता ॥ २५७ ॥ खभराकादिके खेटे कुलतुल्यः कुलाधिकः ॥बंधुपूज्योऽथ
धनवान्सुखी भोगी नृपः क्रमात् ॥ २५८ ॥ परवित्तसुहृद्बंधुपोष्यागणबलाधिपौ ॥ नृपश्च मित्रभस्थेषु खेटे घ्रेंकादिषु क्रमात्॥ २५९ ॥ विषमर्क्षेऽ
र्कहोरायां संस्थिते शुभभेषु च ॥ ख्यातो महोद्यमी चातितेजा धीमान्धनी बली ॥ २६० ॥ शुभेषु चंद्रहोरायां स्थितेषु समराशिषु ॥ कांतिमा
र्दवसौभाग्यभोगधीमान्भवेन्नरः ॥ २६१ ॥ सूर्यहोरागतः पापः समभेषु तु मध्यमाः ॥ विषमर्क्षेषु भास्कर्यां सौम्या नोक्तफलप्रदाः ॥ २६२ ॥
स्वमित्रत्र्यंशगश्चंद्रः सुरूपं गुणिंन नरम् ॥ करोत्यन्नगतस्तद्वत्तत्तुल्यगुणरूपिणम् ॥ २६३ ॥ व्यालायुधे चतुष्पादांऽजेषु च त्र्यंशके च ॥ तीक्ष्णेऽ
तिहिंस्रश्च भवेद्गुरुतल्पगतोटनः ॥ २६४ ॥ स्तेनो भोक्ता सधनधीर्नृपः क्लीबश्च शत्रुहा ॥ विष्टिकृद्दासवृत्तिश्च पापो हिंस्रोऽमतिर्भवेत् ॥ २६५ ॥
मेषादिकोत्तमांशेषु द्वादशांशेषु राशिवत् ॥ जायाबलविभूषाढ्यः सत्त्वयुक्तोऽतिसाहसी ॥ २६६ ॥तेजस्वी च नरः खाये त्रिंशांसे सृजिसंस्थिते ॥
आमयी वा स्वभार्यायां विषमः पारदारिकः ॥ २६७ ॥ दुःखी परिच्छदयुतो मलिनश्चार्कजे स्वके ॥ सुखधीधनकीर्त्यालस्तेजस्वी लोकपूजितः ॥
॥ २६८ ॥ नीरग्गुह्यभवान्भोगी जीवे खत्रिंशभागगे ॥ मेधाकलाकाव्यशिल्पविवादकपटांचितः ॥ २६९ ॥ शास्त्रार्थसाहसयुतो बुधे स्वत्रिंश
भागगे ॥ बह्वपत्सुखारोग्यरोगरूपार्थसंयुतः ॥ २७० ॥ ललितांगो विप्रकीर्णेंद्रियः स्याद्भार्गवे स्वके ॥ शूरस्तब्धौ च विषमवधकौ सद्गुणा
न्वितौ ॥ २७१ ॥ सुखेज्ञो चारु चेष्टांगौ चंद्रार्कौचेत्कुजादिगौ मूलत्रिकोणस्वर्क्षोच्चे कंठस्थास्तु च ये ग्रहाः ॥२७२॥ अन्योन्यकारकास्ते स्युः
कर्मगस्तु विशेषतः ॥ शुभं वर्गोत्तमे जन्म वेसिस्थाने वसद्गृहैः ॥ २७३ ॥ अशून्येषु च केंद्रेषु कारकाख्यगृहेषु च ॥गुरुजन्मेशलग्नेशाः केंद्रस्था

मध्यसौख्यदाः ॥ २७४ ॥ पृष्ठोभवकोदपर्क्षस्थितास्त्वंत्यांतरादिषु ॥ प्रवेशे भास्करकुजौ भृग्वीज्यौ मध्यगौ तथा ॥ २७५ ॥ चंद्रार्की फल
दावंत्ये सदा ज्ञः फलदायकः ॥ लग्नात्पुत्रे कलत्रे वाब्जाच्छुभेशयुतेक्षिते ॥ २७६ ॥ स्यात्तयोः संपदः स्वत्वमन्यथाथांगतोदयः ॥ रवौ मीनेऽर्कजः
स्त्रीघ्नः पुत्रस्थस्तु तथा कुजः ॥ २७७ ॥ सिमातुर्याष्टगैः क्रूरैर्यद्वा क्रूरांतरे सितः ॥ सद्ग्रहायुतदृष्टश्चेदग्निपातान्मृतिः स्त्रियाः ॥ २७८ ॥ लग्नाद्य
पाणिगतयोः शशिरव्योः सह स्त्रिया ॥ एकेन यस्य जन्माहुरथ सप्तमसंस्थयोः ॥ २७९ ॥ नवधीगतयोर्वापि विकलस्त्रीसितार्कयोः॥कोणोदयेऽस्तां
त्यसन्धौ भृगौ बंध्यापतेर्जनिः ॥ २८० ॥ सुतभं चेन्न सौम्याढ्यमथांत्यास्तोदयर्क्षगैः ॥ पापे धीस्थे विधौ क्षीणजन्मा सुतकलत्रिणः ॥ २८१ ॥
शनौ खगेऽस्ते सशुक्रे तद्दृष्टे पारदारिकः ॥ तौ चेत्सेंदुस्त्रिया सार्द्धं पुंश्चलो जायते नरः॥२८२॥भृग्वब्जयोरस्तगयोर्नरो भार्या सुतोऽपि वा॥नृस्त्रियो
स्तु शुभैर्दृष्टौ तौ द्वौ परिणतांगकौ ॥२८३ ॥खास्तांबुगैरिंदुशुक्रपापैर्वंशविनाशकः ॥शिल्पी त्र्यंशे बुधयुते केंद्रसंस्थार्किवीक्षिते ॥ २८४ ॥ दास्यां
जातः सौरिभागे रिःफगे भृगुनंदने ॥ नीचेऽर्कैंदोरस्तगयोर्दृष्टयोः सूर्यजेन वा ॥ २८५ ॥ पापदृष्टौ शनिकुजावस्तगौ वातरुक्प्रदौ ॥ कर्कालयं
शगते केंद्रे पापयुक्ते तु गुह्यरुक् ॥ २८६ ॥ पापातरगतेंऽगेऽब्जे रवौ द्यूने तु कुष्टयुक् ॥ चन्द्रे खेऽस्तंगते भौमे विकलो वेशिगेऽर्कजे ॥२८७॥ मिथो
भांशगयोः शूली रवींद्वोर्युतयोः कृशः॥ निधनारिधनांत्यस्था रवींद्वारयमा यदा ॥ २८८॥ चलद्ग्रहेण दोषेण कुर्वंत्यनयनं नरम् ॥ सौम्या दृष्टा न
वायत्रिधीगताः पापखेचराः ॥ २८९ ॥ कर्णोपघातका द्यूने रदवैकृत्यकारकाः ॥ लग्ने गुरौ द्युने मंदे वातरोगार्दितो भवेत् ॥ २९० ॥ सुखेऽस्ते वा
कुजे जीवे लग्ने वार्कियुतोदये ॥ कुजेन वात्मजे द्यूने संज्ञेंऽत्येऽब्जे च सोन्मदः ॥२९१॥ धीधर्माथांत्यगैः पापैर्भसमस्यान्निबंधनम् ॥ सर्पशृंखलया
शाठ्यैर्दृक्कैर्वलयशुभेक्षितैः ॥ २९२ ॥ समंदेऽब्जे वक्रदृष्टे पस्मारी दुर्वचाः क्षयी ॥ रविमन्दकुजैः खस्थैः सौम्यदृष्टैः समंडलैः ॥ २९३॥भृतकाः पूर्व
मुदितैर्वरमध्याधमा नराः ॥ पुंजनौ तु फलं पण्यस्त्रीणां योग्यं वदेच्च तत् ॥ २९४ ॥ तत्स्वामिष्वखिलं कार्यं तद्भर्तृमरणं मृतौ ॥ लग्नेंदुगं वपुश्चैव
यादयूपपीतद्युने ॥ २९५ ॥ युग्मेषु लग्नशशिनोर्वनिता प्रकृतिस्थिता ॥ सच्छीलभूषणयुता शुभसंदृष्टयोस्तयोः ॥ २९६ ॥ पुरुषाकृति
शीलाढ्या तयोरोजस्थयोर्मता ॥ अथ पापा गुणोनाश्च पापवीक्षितयोस्तयोः ॥ २९७ ॥ कुजार्कीज्यज्ञशुक्राणां कुजर्क्षे क्रमशोऽङ्गना ॥ बाल्यदुष्टा
तथा दासी साध्वी मायावती त्वरा ॥ २९८ ॥ दृष्टा वाकृतिशीला स्यात्तयोरोजस्थयोर्मता ॥ अथ पापा गुणोनाश्च पापवीक्षितयोस्तयोः॥२९९ ॥
दुष्टवाक् पुनर्भूः सगुणा विज्ञा ख्याता स्फुजिद्गृहे ॥ बौधे समा या क्लीवा च सती गुणवती चला॥३००॥ द्वंद्वभे स्वैरिणीशघ्नी गुणाढ्या शिल्पि

काधमा ॥ वाचाटा कुलटा सिंहे रागी पुंधीरगम्यता ॥ ३०१ ॥ जैवे गुणाढ्याऽल्परतिर्गुणज्ञा ज्ञानिनी सती ॥दासी नीचरता साध्वी मांदे दुष्टा
नपत्यका ॥ ३०२ ॥ लग्नेंदुयुक्तैस्त्रिंशांशैः फलमेतद्बलानुगम् ॥ दृग्गैः मिथोंशे शुक्रार्कौ शौक्रे चेद्वा घटांशके ॥ ३०३ ॥ स्त्रीभिः स्त्री मैथुनं याति
मदनानलदीपिता ॥ शून्ये कापुरुषो द्यूने बले क्लीवो न सद्दृशि ॥ ३०४ ॥ बुधार्क्योश्चरभे नित्यं परदेशपरायणः ॥ तत्सृष्टा मदगे सूर्ये स्त्रीबालवि
धवा कुजे ॥ ३०५ ॥ पापदृष्टे शनौ द्यूने कन्यैवापद्यते जराम् ॥ आग्नेयैर्विधवास्तस्थैः पुनर्भूर्मिश्रकैर्भवेत्॥३०६॥ क्रूरे हीनबलेऽस्तस्थे पतित्यक्ता
न सद्दृशि॥मिथोंशगैः सितारौ तु कुरुतोऽन्यरतां स्त्रियम्॥३०७॥शीतरश्मिर्यदा द्यूने तदा भर्तुरनुसया॥सौरारर्क्षे लग्नगते सेंदुशुक्रे तु वंधकी॥३०८॥
मात्रा सार्द्धमसद्दृष्टे तथा कौजेंशकेऽस्तगे॥मंददृष्टे व्याधियोनिः सद्ग्रहांशे पतिप्रिया॥३०९॥मंदर्क्षे वांशके द्यूने वृद्धो मूर्खः पतिः स्त्रियाः ॥स्त्रीलोलः
क्रोधनः कौजे बौधे विद्वांश्च नैपुणः॥३१०॥जितेंद्रियो गुणी जैवे चांद्रे कामी मृदुस्तथा॥शौक्रे सौभाग्ययुक्कांतः सौरेति मृदुकर्मकृत्॥३११॥शुक्राब्जयोर्ल
ग्नगयोःसुखिनीर्ष्यासमन्विता॥ज्ञेंद्वोः कलासु निपुणा सुखिता च गुणान्विता॥३१२॥शुक्रज्ञयोस्तु शुभगा कलाज्ञा रुचिरांगना॥अनेकसौख्यार्थगुणा
लग्ने सौम्यत्रये स्थिते॥३१३॥क्रूरेऽष्टमेऽष्टमेशांशे यस्य स्यात्तद्वयः समे॥वैधव्यं च मृतिस्तस्या स्वयंसत्स्वर्थगेषु तु॥३१४॥अल्पापत्यत्वमब्जेऽस्याः
कन्यालिहरिगोषु तु ॥ सौरे मध्यबले चंद्रशुक्रज्ञैर्बलवर्जितैः ॥३१५ शेषैः सवीर्यैरोजर्क्षे लग्ने कुरूपिणी भवेत् ॥ जीवारकविशौम्येषु बलिषु समभे
तनौ ॥ ३१६ ॥ विख्यातानैकशास्त्रज्ञा वनिता ब्रह्मवादिनी ॥ पापेऽस्ते नवमस्थस्य प्रव्रज्यामेति भामिनी ॥ ३१७ ॥ उद्वाहे वरणे प्रश्ने सर्वमेतद्वि
चिंतयेत् ॥ मृत्युस्थानं पश्यतां स्याद्बलिना धातुकोपतः ॥ ३१८ ॥ नृणां मृत्युर्हितं युक्तं भगात्रोस्थोपथभूरिभिः ॥ सवीर्यैर्बहुजोऽग्न्यक्षतज्वररुग्
द्भवः ॥ ३१९ ॥ तृट्क्षुद्भवश्चाष्टमस्थैः सूर्याद्यैश्च वरादिषु ॥ परस्वाध्वप्रदेशेषु मृत्युः सूर्यमहीजयोः ॥ ३२० ॥ स्वबंधुस्थितयोः पुंसः शैलाग्राभिरु
तस्य च ॥ बंध्वस्तकर्मगैर्मंदभूजैः प्रहौ मृतिः ॥ ३२१ ॥ स्त्रियां हिमोष्णकरयोः स्वजनात्पापदृक्तयोः ॥ तोयमृतो रवीदृतुस्यातांया ह्युभयोदये ॥
॥ ३२२ ॥ शस्त्राग्निजोशुभांतस्थे चंद्रे भौमगृहस्थिते ॥ मृत्युश्चाथ मृगे चंद्रे कर्के मंदे जलोदरात्॥३२३॥स्त्रियामिंदौ रक्तशोथात्सौरे वाज्वग्निपात
जः ॥ पुत्रधर्मस्थस्योर्वंधात्पापयोः सदृष्टयोः॥ ३२४॥सयासशयंनिगडैर्दृकैर्मृत्यौ तु बंधनैः॥स्त्रियां सपापेऽब्जे द्यूने सिते मेषे रवौ तनौ॥३२५॥
मरणं स्त्रीकृते गेहे ह्यथ तुर्ये कुजे रवौ ॥ यमे खेंऽगत्रिकोणस्थैः क्षीणचंद्रांशुभैः सकृत् ॥३२६ ॥ तुर्येऽर्के खे कुजेक्षीण चन्द्रदृष्टे समिद्धतः॥रंध्रखांग
जलैः क्षीणेंद्वारार्कैरविसंयुतैः ॥३२७॥ लकुटेनाथ तैरेव खांकांगतनयस्थितैः ॥ धूमानिबंधनैः कार्यः कुदनैर्मरणं भवेत् ॥ ३२८ ॥ बंध्वस्तख

स्थैर्भौमार्कमंदैः शस्त्राग्निराजभिः ॥ सौरेंद्वारैः स्वांबुखस्थैः क्षतक्रेम्यंगया ततः ॥३२९॥ स्वेऽर्के तुर्ये कुजे यानपातादथ कुजेऽस्तगे ॥ यंत्रोत्सीदुनतः
क्षीणचंद्रशुक्ते मृतिर्भवेत् ॥ ३३० ॥ भौमार्केशीतकिरणैर्जूकाजशनिभस्थितैः ॥ क्षीणेंद्वर्ककुजैः खास्तांबुस्थैर्वारिकरे मृतिः॥३३१ ॥ बल्यारदृष्टे
क्षीणेंदौ मंदे निधनसंस्थिते ॥ गुह्यरुक्कृमिशस्त्राग्निदारुजो मृत्युरंगिराः ॥ ३३२ ॥ सौरेऽर्केऽस्ते मृतो मंदे क्षीणेंदौ भुव्यसंयुते ॥ लग्नध्यायास्त
पःखार्कभौमचन्द्रनिशाकरैः ॥ ३३३ ॥ शैलशृंगस्वरुग्रपातौनुर्निधनं भवेत् ॥ दृक्कोंत्तरे तुर्द्राविंशस्तत्पतिर्मृत्युपोपि वा ॥ ३३४ ॥ स्वगुणैर्निध
नं कुर्याद्बलवान्यो द्वयोर्भवेत् ॥ लग्नांशेशसदृक्स्थाने मृत्युर्योगेक्षणादिभिः ॥ ३३५ ॥ मोदोंतेनुदितांशस्य तुल्यो द्विघ्नः स्वपेक्षिते॥शुभेक्षिते तु त्रि
गुणः कल्प्यमन्यत्स्वबुद्धितः ॥३३६ ॥ वह्न्यंबुभस्मसक्लेदशोषव्यालैर्मृतिस्थितैः ॥ बिंदुतश्चितनीयश्च यथोक्तो मत्युरंगिनः ॥ ३३७ ॥ गुरुः
शशांकशुक्रौ च सूर्यभौमौ यमेंदुजौ ॥ देवपित्रतिरश्चोथ नारकान्कुर्युरष्टमे ॥ ३३८॥ रवींदुबलवश्रंशनाथाच्छ्रेष्ठसमाधमाः ॥ तुंगगः सांदनूकेनुगतिः
षड्भ्रदृक्कपः ॥ ३३९ ॥ द्यूनस्थितो गुरुर्वापि रिपुकेंद्रविनाशगः ॥ स्वोच्चस्थोंऽगे व्यये सौम्यभागे मोक्षो बलान्यतः ॥ ३४० ॥ आधाने जन्मा
ज्ञाने तु वृक्षतां लग्नतो वदेत् ॥ पूर्वापरार्द्धैर्लग्नस्य सौम्ये वाच्यपनेजनिः ॥ ३४१ ॥लग्नत्रिकोणे धीज्यत्र्यंशैर्विकल्पावयवाः समाः ॥ ग्रीष्मोगेऽर्के परे
रम्यापनतांपृतुरर्कभात् ॥ ३४२ ॥ चन्द्रज्ञजीवावृत्यस्याः शुक्रारार्किभिरन्यथा ॥ दृक्कैराद्यैः पूर्वमासस्तिथिस्तत्रानुपातततः ॥ ३४३॥ विलोमजन्म
भागैश्च वेला रात्रिद्युसंज्ञके ॥ त्रिकोणोत्तमवार्यंहि लग्नं वा लभनाभने॥३४४॥यावदूनो विधुर्लग्नात्तावच्चंद्राच्च जन्मभे ॥ गोहरी युग्मवसुभे क्रियजूके
मृगांगने ॥ ३४५॥ दशाष्टसप्तविषये गुण्याः शेषाः खसंख्यया॥ जीवभौमकविज्ञाः स्यु राघवाद्यायरेज्ञवत्॥३४६ ॥भानां नित्यो विधिः खेटवशावद्ध
र्गणास्तथा ॥ सप्तघ्नं भहृतं शेषमृक्षं नवघनर्णतः॥३४७॥द्विघ्ने समर्तुमासाः स्युः पक्षतिथ्यौ गजाहते॥सप्तघ्नं होनिशार्क्षाणीषुघ्नेंगांशेष्टहोरिका ॥
॥ ३४८॥ पुमान्परशुधृक्कृष्णो रक्तदृग्रक्षितुं क्षमः ॥ हृष्टर्तिकपदाश्वास्या रक्तवस्त्रा घटाकृतिः ॥ ३४९ ॥ कपिलो ह्यंधदृक्क्रूरो रक्तवस्त्रः क्षत
व्रतः॥ क्षुत्तृपार्तोदुग्धपटो लूनकुंचितमूर्धजः॥३५०॥मलिनः क्षुत्परोजास्यो दक्षः कृष्यादिकर्मणि॥द्विपकायः सरभयार्तिपगलो व्याकुलांतरः॥३५१॥
शौचिकीरूपिणी साध्वी ह्यप्रजोच्छ्रितपाणिका॥ उद्याने कवची धन्वी क्रीडेच्छर्गरुडाननः॥३५२॥नृत्यादिविद्वरुणवद्बहुरत्नोधनुर्धरः॥द्विपास्यकंठः
क्रोडास्यः काननेशरमाहिकः ॥३५३॥आतव्यशाखां पालाशी रौति मूर्द्धाहिकर्कशा॥ चिपिटास्यो हि संवीतो नौस्थः रूयर्थव्रजत्र्जले ॥ ३५४ ॥
श्वा नरो जंबुकं गृध्रं गृहीत्वा रौति शाल्मलौ॥धन्वी कृष्णाजिनी सिंहवाश्वोन्नतमातुरः॥३५५॥फलामिषघ्नः कूर्ची ना भल्लास्यः कपिचेष्टितः॥पुष्पपूर्ण

च्छटाकन्याविद्येल्ला मलिनांबरा ॥ ३५६ ॥ धन्वी व्ययापकृच्छचामो लिपिकृद्रामशोनरः ॥ गौरीधौतांशुकात्सुचाकुंभहस्तासुरालये ॥ ३५७ ॥
मानोन्मान्पापसोतौलीभांडसुलपविचिंतकः ॥ क्षुत्तृड्युतो नरः कुंभीगृध्रस्य स्त्रीसुतोपगः ॥ ३५८ ॥ धन्वीकिंतरचेष्टस्तुहैमवर्मामृगानुगः ॥ सिंधे
कूजंव्रजंतीस्त्रीनानासर्पसित हिका ॥ ३५९ ॥ सौख्यस्पृहाह्यावृतांगीभत्रर्थकच्छपाकृतिः ॥ कूर्मास्यो मलये सिंहः श्वक्रोंडमृगभीषकः ॥ ३६०॥
वास्यः श्वकायो धानुष्को रक्षस्तापसयज्ञिये ॥ चंपकाभासने मध्या सिंधुरत्रविवर्द्धिनी ॥ ३६१ ॥ कूर्चासने चंपकाभो दंडी कौशेयकानिनी ॥
परमोऽथो गृध्रमुखः स्नेहमद्याशनस्पृहः ॥ ३६२ ॥ दग्धानस्था लोहधरा सभूषाभांडकच्चरा ॥ भांडी रोमश्ववाः श्यामः किरीटी फलयंत्रधृक्
॥ ३६३ ॥ नौस्थोध्वौसंविभूषांर्थ नानारत्नकरोंचितः ॥ नौस्थाब्धेः कूलमायांती सयूथां चम्पकानना ॥३६४॥गर्ते सर्पावृतो नग्नो रुदंश्चौरानलार्दि
तः ॥एतादृशांक्रियांशाः स्तु षं शदुदिताः क्रमात्॥३६५॥ एतत्संक्षेपतः प्रोक्तं जातकं मुनिसत्तम ॥ निबोध संहितास्कंधं लोककृत्युपयोगिनम् ॥
॥ ३६६ ॥ इति श्रीनारदीयपुराणे पूर्वभागे द्वितीयपादे बृहदुपाख्याने जातकनिरूपणन्नाम पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥ सनंदन उवाच ॥
क्रमाच्चैत्रादिमासेषु मेषाद्याः संक्रमा मताः ॥ चैत्रशुक्लप्रतिपदि यो वारः स नृपः स्मृतः ॥१॥मेषप्रवेशे सेनानीः कर्कटे सस्यपो भवेत्॥समोद्यधीश्वरः
सूर्यो मध्यमश्चोत्तमो धुः॥ २ ॥ नेष्टः कुजो बुधो जीवो भृगुस्त्वतिशुभंकरः ॥ अधमो रविजो वाच्यो ज्ञात्वा चैषां बलाबलम् ॥ ३ ॥ दंडाकारे
कबंधे वा ध्वांक्षाकारेऽथ कीलके ॥ दृष्टेऽर्कमण्डले व्याधिर्भ्रांतिश्चोरार्थनाशनम् ॥ ४ ॥ छत्रध्वजपताकाद्यसन्निभस्तिमितैर्ध्वनैः ॥ रविमंडलगैर्धूम्रैः
सस्फुलिंगैर्जगत्क्षयः ॥ ५ ॥ सितरक्तैः पीतकृष्णैर्वर्णैर्विप्रादिपीडनम् ॥ घ्नंति द्वित्रिचतुर्वर्णैर्भुवि राजजनान्मुने ॥६॥ ऊर्द्धैर्भानुकरैस्ताम्रैर्नाश याति
चमूपतिः ॥ पीतैर्नृपसुतः श्वेतैः पुरोधाश्चित्रितैर्जनाः॥७॥धूम्रैर्नृपपिशंगैस्तु जलदाधोमुखैर्जगत् ॥ शुभोऽर्कः शिशिरे ताम्रः कुंकुमाभा वसंतिके॥८॥
ग्रीष्मश्चापांडुरश्चैव विचित्रो जलदागमे ॥ पद्मोदराभः शरदि हेमंते लोहितच्छविः ॥ ९ ॥ पीतः शीते सिते वृष्टौ ग्रीष्मे लोहितभा रविः॥रोगाना
वृष्टिभयकृत् क्रमादुक्तो मुनीश्वर॥ १० ॥ इन्द्रचापार्द्धमूर्तिस्तु भानुर्भूपविरोधकृत् ॥ शशरक्तनिभे भानौ संग्रामो न चिराद्भुवि ॥ ११ ॥मयूरपत्र
संकाशो द्वादशाब्दं न वर्षति ॥ चन्द्रमासदृशो भानुः कुर्याद्भूपांतरं क्षितौ ॥१२ ॥ अर्के श्यामे कीटभयं भस्माभे राष्ट्रजं तथा ॥ छिद्रेऽर्कमंडले दृष्टं
महाराजविनाशनम्॥ १३ ॥ घटाकृतिः क्षुद्भयकृत्पुरहा तोरणाकृतिः ॥ छत्राकृते देशहतिः खंडभानुर्नृपांतकृत्॥ १४॥ उदयास्तमये काले विद्युदुल्का
शनिर्यदि ॥ तदा नृपवधो ज्ञेयस्त्वथवा राजविग्रहः ॥१५॥ पक्षं पक्षार्द्धमर्केन्दुपरिविष्टावहर्निशम् ॥ राजानमन्यं कुरुतो लोहिताम्बुदयास्तगौ॥१६॥

उदयास्तमये भानुराच्छिन्नः शस्त्रसन्निभैः ॥ घनैर्युद्धं खरोष्ट्राद्यैः पापरूपैर्भयप्रदम् ॥ १७ ॥ याम्यशृंगोन्नतश्चंद्रः शुभदो मीनमेषयोः ॥
सौम्यशृंगोन्नतः श्रेष्ठो नृयुङ्मकरयोस्तथा ॥ १८ ॥ घटोक्ष्णस्तु समः कर्कचापयोः शरसन्निभः ॥ चापवत्कौर्महर्योश्च शूलवत्तुलकर्कयोः
॥१९॥ विपरीतोदितश्चंद्रो दुर्भिक्षकलहप्रदः॥आषाढद्वयमूलेंद्रधिष्ण्यानां याम्यगः शशी ॥ २० ॥ अग्निप्रदस्तेयचरवनसर्पविनाशकृत ॥ विशाखा
मित्रयोर्याम्यपार्श्वगः पापगः शशी ॥ २१॥ मध्यमः पितृदैवत्ये द्विदैवे सौम्यगः शशी ॥अप्राप्यपौष्णभाद्रौद्रामदुक्षाविशशी शुभः॥२२॥मध्यगो
द्वारदक्षाणि अतीत्य नववासवात्॥यमेंद्राहीशनोयेशमरुतश्चार्द्धतारकाः ॥२३॥ ध्रुवादितिद्विदैवाः स्युरध्यर्द्धाश्चापराः समाः॥ याम्यशृंगोन्नतो नेष्टः
शुभः शुक्ले पिपीलिका ॥२४॥ कार्यहानिः कार्यवृद्धिर्हानिर्वृद्धिर्यथाक्रमम् ॥ सुभिक्षकृद्विशालेंदुरविशालोघनाशनः ॥२५॥ अधोमुखे शस्त्रभयंकलहो
दंडसन्निभे ॥ कुजाद्यैर्निहते शृंगे मंडले वा यथाक्रमम् ॥ २६ ॥ क्षेमाद्यं वृष्टिभूपालजननाशः प्रजायते ॥ सत्याष्टनवमर्क्षेषु सोदयाद्वक्रिमे कुजे
॥ २७ ॥ तद्वक्रमुष्णंसंज्ञं स्यात्प्रजापीडाग्निसंभवः ॥ दशमैकादशे ऋक्षे द्वादशर्वाग्रतीपयः ॥ २८ ॥ कूक्रं वक्रमुखं ज्ञेयं सस्यवृष्टिविनाशकृत् ॥कुजे
त्रयोदशे ऋक्षे वक्रिते वा चतुर्दशे॥२९॥बालास्यचक्रं तत्तस्मिन्सस्यवृष्टिविनाशनम् ॥ पंचदशे षोडशर्क्षे वक्रे स्याद्रुधिराननम् ॥ ३० ॥ दुर्भिक्षं
क्षुद्भयं रोगान्करोति क्षितिनंदनः ॥ अष्टादशे सप्तदशे तद्वक्रं मुशलाह्वयम् ॥ ३१॥ दुर्भिक्षं धनधान्यादिनाशने भयकृत्सदा ॥ फाल्गुन्योरुदितो
भौमो वैश्वदेवे प्रतीपगः ॥ ३२ ॥ अस्तगश्चतुरास्यार्क्षे लोकत्रयविनाशकृत् ॥ उदितः श्रवणे पुष्ये वक्तृगोश्वनहानिदः ॥३३ ॥ यद्दिग्गोऽभ्युदितो
भौमस्तद्दिग्भूपभयप्रदः ॥ मघामध्यगतो भौमस्तत्र चैव प्रतीपगः ॥ ३४ ॥ अवृष्टिशस्त्रभयदः पीड्यं देवा नृपांतकृत ॥ पितृद्विदैवधातॄणां भिद्यंते
गंडतारकाः ॥ ३५ ॥ दुर्भिक्षं मरणं रोगं करोति क्षितिजस्तदा ॥ त्रिषूत्तरासु रोहिण्यां नैर्ऋते श्रवणे मृगे ॥ ३६ ॥ अवृष्टिदश्चरन्भौमो दक्षिणेरोहि
णीस्थितः ॥ भूमिजः सर्वधिष्ण्यानामुदगामी शुभप्रदः ॥ ३७ ॥ याम्यगोऽनिष्टफलदो भवेद्भेदकरो नृणाम् ॥ विनोत्पातेन शशिनः कदाचिन्नोदयं
व्रजेत् ॥ ३८ ॥ अनावृष्ट्याग्निभयकृदनर्थनृपविग्रहः ॥ वसुवैष्णवविश्वेंदुधातृभेषु चरन्बुधः॥३९॥भिनत्ति यदि तत्तारां बाधावृष्टिभयंकरः ॥ आर्द्रा
दिपितृभांतेषु दृश्यते यदि चंद्रजः ॥ ४० ॥ तदा दुर्भिक्षकलहरोगानावृष्टिभीतिकृत् ॥ हस्तादिषट्सु तारासु विचरन्निंदुनंदनः ॥ ४१॥ क्षेमं सुभिक्ष
मारोग्यं कुरुते रोगनाशनम् ॥ अहिर्बुध्न्यार्यमाग्नेययाम्यभेषु चरन्बुधः ॥४२॥ भिषक्तुरंगवाणिज्यवृत्तीनां नाशकृत्तदा ॥ पूर्वात्रयेचरन्सौम्यो योग
तारां भिनत्ति चेत् ॥ ४३ ॥ क्षुच्छस्त्रानलचौरेभ्यो भयदः प्राणिनां तदा ॥ याम्याग्निधातृवायव्यधिष्ण्येषु प्राकृता गतिः॥४४॥ रौद्रेन्दुसार्पपित्र्येषु

ज्ञेया मिश्राह्वया गतिः॥भाग्यार्यमेज्यादितिषु संक्षिप्ता गतिरुच्यते॥४५॥गतिस्तीक्ष्णाजचरणाहिर्बुध्न्यभाश्विभेषुया॥योमातिकातिविश्वांबुमूलमत्स्यैन्य
जस्य च॥४६॥घोरा गतिर्हरित्वाष्ट्रवसुवारुणभेषु च ॥ इंद्राग्निमित्रमार्तंडभेषु पापाह्वया गतिः॥४७॥प्राकृताद्यासु गतिषु ह्युदितोऽस्तमितोपिवा॥यावं
त्येव दिनान्येष दृश्यस्तावंत्यदृश्यगः ॥४८॥ चत्वारिंशत्क्रमात्त्रिंशद्द्वींदू भूसुतो नव॥पंचदशैकादशभिर्दिवसैः शशिनंदनः ॥४९ ॥ प्राकृतायां गतः
सौम्यः क्षेमारोग्यसुभिक्षकृत्॥मिश्रसंक्षितयोर्मध्ये फलदोऽन्यासु वृष्टिदः॥५०॥वैशाख श्रावणे पौषे आषाढेऽभ्युदितो बुधः॥जगतां पापफलदस्त्वितरे
षु शुभप्रदः ॥५१॥ इषोर्जमासयोः शस्त्रदुर्भिक्षाग्निभयप्रदः ॥ उदितश्चंद्रजः श्रेष्ठो रजतस्फटिकोपमः॥५२॥द्विभाटजोदिमास्तस्य पंचमैकादशाब्धि
भात्॥यन्नक्षत्रोदितो जीवस्तन्नक्षत्राख्यवत्सरः॥५३॥कार्तिको मार्गशीर्षश्च नृणां दुष्टफलप्रदः ॥ शुभप्रदौ पौषमाघौ मध्यमौ फाल्गुनो मधुः ॥ ५४ ॥
माधवः शुभदो ज्येष्ठो नृणां मध्यफलप्रदः ॥ शुचिर्मध्यो नभः श्रेष्ठो भाद्रः श्रेष्ठः क्वचिन्नरः ॥५५ ॥ अतिश्रेष्ठ इषः प्रोक्तो मासानां फलमीदृशम् ॥
सौम्ये भागे चरन्भानां क्षेमारोग्यसुभिक्षकृत् ॥५६॥ विपरीतो गुरुर्याम्ये मध्ये चरति मध्यमम् ॥ पीताग्निश्यामहरितरक्तवर्णोंगिराः क्रमात्॥५७॥
व्याध्यग्निचौरशस्त्रास्त्रभयदः प्राणिनां भवेत्॥ अनावृष्टिं धूम्रनिभः करोति सुरपूजितः ॥ ५८ ॥ दिवादृष्टो नृपवध्यामयंवाराष्ट्रनाशनम् ॥ संवत्सर
शरीरं स्यात्कृत्तिका रोहिणी तथा ॥ ५९ ॥ नाभिस्त्वापाठयुगलमाद्री हृत्कुसुमं मघा ॥ दुर्भिक्षाग्निमरुद्भीतिः शरीरं क्रूरपीडिते ॥ ६० ॥ नाभ्यां
क्षुत्तृड्भयं पुष्ये सम्यङ्मूलफलक्षयः ॥ हृदयेशस्य निधनं शुभं स्यात्संयुतैः शुभैः ॥ ६१ ॥ शस्यवृद्धिः प्रजारोग्यं युद्धं जीवात्यवर्षणम् ॥ इति द्विजा
तिमध्यां तु गोनृपस्त्रीसुखं महत् ॥ ६२ ॥ निःस्वनावृष्टिफणिभिर्वृष्टिः स्वास्थ्यं महोत्सवः ॥ महार्घमपि संपत्तिर्देशनाशोऽतिवर्षणम् ॥६३ ॥अवैरं
रोगमभयं रोगभीः सस्यवर्षणे ॥ रोगो धान्यं नभोऽदृष्टिमघाद्यृक्षगते गुरौ ॥६४॥ सौम्यमध्यमयाम्येषु मार्गेषु वीथिकात्रयम् ॥ शुक्रस्य दस्रभाज्ज्ञेयं
पर्यायैश्च त्रिभिस्त्रिभिः ॥ ६५ ॥ नागेभैरावताश्चैव वृषभोष्ट्रखराह्वयाः ॥ मृगांजदहनाख्याः स्युर्याम्यांता वीथयो नव ॥ ६६ ॥ सौम्य
मार्गे च तिसृषु चरन्वीथिषु भार्गवः ॥ धान्यार्थवृष्टिसस्यानां परिपूर्तिं करोति हि ॥ ६७ ॥ मध्यमार्गे च तिसृषु सर्वमप्यधमं फलम् ॥
पूर्वस्यां दिशि मेघस्तु शुभदः पितृपंचके ॥ ६८ ॥ स्वातित्रये पश्चिमायां तस्यां शुक्रस्तथाविधः ॥ विपरीते त्वनावृष्टिर्वृष्टिवृद्बुधसंयुतः ॥
॥ ६९ ॥ कृष्णाष्टम्यां चतुर्दश्याममायां च यदा सितः ॥ उदयास्तमनं याति तदा जलमयी मही ॥ ७० ॥ मिथः सप्तमराशिस्थौ पश्चा
त्प्राग्वीथिसंस्थितौ ॥ गुरुशुक्रावनावृष्टिदुर्भिक्षसमरप्रदौ ॥ ७१ ॥ कुजज्ञजीवरविजाः शुक्रस्याग्रेसरा यदि ॥ युद्धांतिवायुदुर्भिक्षजलनाशकरा

मताः ॥ ७२ ॥ जलमित्रार्यमाहींद्रनक्षत्रेषु सुभिक्षकृत्॥सच्छस्त्रावृष्टिदो मूलेऽहिर्बुध्न्यांत्यभयोर्भयम् ॥७३॥ श्रवणानिलहस्तार्द्राभरणीभाग्यभेषु च ॥
चरञ्छनैश्चरो नृणां सुभिक्षारोग्यसस्यकृत्॥७४॥मुखे चैकं गुदे द्वे च त्रीणि के नयने द्वयम्॥हृदये पञ्च ऋक्षाणि वामहस्ते चतुष्टयम्॥७५॥वामपादे
तथा त्रीणि दक्षिणे त्रीणि भानि च ॥ चत्वारि दक्षिणे हस्ते जन्मभाद्रविजस्थितिः ॥७६॥ रोगो लाभस्तथा हानिर्लाभः सौख्यं च बंधनम् ॥
आयासः श्रेष्ठयात्रा च धनलाभः क्रमात्फलम् ॥७७॥ बहुधारविजस्त्वेतद्वक्रगः फलमीदृशम् ॥ करोत्येव समः साम्यं शीघ्रगेषूत्क्रमात्फलम् ॥७८॥
विष्णुचक्रोत्कृत्तशिराः पङ्गुः पीयूषपानतः॥ अमृत्युतां गतस्तत्र खेटत्वे परिकल्पितः ॥७९॥ वरणधातुरर्केन्दू तुदते सर्वपर्वणि॥विक्षेपावनतेर्वंगाद्रा
हुर्दूरगतस्तयोः ॥ ८० ॥ षण्मासवृद्ध्या ग्रहणं शोधयेद्रविचंद्रयोः ॥ पर्वेशास्तु तथा सत्यदेवा रव्यादितः क्रमात्॥ ८१ ॥ब्रह्मेन्दिंद्रधनाधीशवरुणा
ग्नियमाह्वयाः॥ पशुसस्यद्विजातीनां वृद्धिर्ब्राह्मे तु पर्वणि ॥८२॥ तद्वदेव फलं सौम्ये श्लेष्मपीडा च पर्वणि ॥ विरोधो भूभुजां दुःखमैंद्रे सस्यविनाश
नम् ॥८३॥ धनिनां धनहानिः स्यात्कौबेरं धान्यवर्धनम् ॥ नृपाणामशिवं क्षेममितरेषां च वारुणे ॥ ८४॥ प्रवर्षणं सस्यवृद्धिः क्षेमं हौताशपर्वणि ॥
अनावृष्टिः सस्यहानिर्दुर्भिक्षं याम्यपर्वणि ॥८५॥ वेलाहीने सस्यहानिर्नृपाणां दारुणं रणम् ॥ अतिवेले पुष्पहानिर्भयं सस्यविनाशनम् ॥८६॥
एकस्मिन्नेव मासे तु चंद्रार्कग्रहणं यदा ॥ विरोधो धरणीशानामर्थवृष्टिविनाशनम्॥८७॥ग्रस्तोदितावस्तमितौ नृपधान्यविनाशदौ॥ सर्वग्रस्ताविनेंदू
तु क्षुद्व्याध्यग्निभयप्रदौ॥ ८८ ॥सौम्यायने क्षत्रविप्रानितरांहन्ति दक्षिणे॥द्विजातींश्चक्रमाद्धंति राहुदृष्टोरगादितः॥८९॥तथैव ग्रासभेदाः स्युर्मोक्षभे
दास्तथा दश ॥ नो शक्ता लक्षितुं देवाः किं पुनः प्राकृता जनाः ॥ ९० ॥ आनीय खेटान्गणितांस्तेषां वारं विचिंतयेत्॥ शुभाशुभान्यैः कालस्य
ग्राहयामो हि लक्षणम् ॥९१॥तस्मादन्वेषणीयं तत्कालज्ञानाय धीमता ॥ उत्पातरूपाः केतूनामुदयास्तमया नृणाम्॥९२॥ दिव्यांतरिक्षा भौमास्ते
शुभाशुभफलप्रदाः ॥ यज्ञध्वजास्त्रभवनरक्षवृद्धिंगजोपमाः ॥ ९३ ॥ स्तम्भशूलांकुशाकारा आंतरिक्षाः प्रकीर्तिताः॥ नक्षत्रसंस्थिता दिव्या भौमा ये
भूमिसंस्थिताः ॥ ९४ ॥ एकोऽपि भिन्नरूपः स्याज्जंतुर्नाम शुभाय वै॥ यावन्तो दिवसान्केतुर्दृश्यते विविधात्मकः॥ ९५ ॥ तावन्मासैः फलं यच्छ
त्यष्टौ सारव्यवत्सरैः॥ये दिव्याः केतवस्तेऽपि शश्वज्जीवफलप्रदाः॥९६॥ह्रस्वः स्निग्धः सुप्रसन्नः श्वेतकेतुः सुवृष्टिकृत्॥क्षिप्रादस्तमयं याति दीर्घकेतु
रवृष्टिकृत् ॥९७॥अनिष्टदो धूमकेतुः शक्रचापसमप्रभः ॥ द्वित्रिचतुःशूलरूपः स च राज्यांतकृन्मतः॥९८॥मणिहारस्तुवर्णाभा दीप्तिमंतोऽर्कसूनवः
केतवश्चोदिताः पूर्वापरयोर्नृपहानिदाः ॥९९॥ वंसुकबिंबक्षितिजच्छुकतुंडादिसन्निभाः ॥ हुताशनोदितास्तेऽपि केतवः फलदाः स्मृताः॥ १०० ॥

भूसुता जलतैलाभा वर्तुलाः क्षुद्भयप्रदाः ॥ सुभिक्षक्षेमदाः श्वेतकेतवः सोमसूनवः ॥१०१॥ पितामहात्मजः केतुस्त्रिवर्णस्त्रिदशान्वितः ॥ ब्रह्मदंडाद्धूमकेतुः
प्रजानामंतकृन्मतः ॥ १०२ ॥ ऐशान्यां भार्गवसुताः श्वेतरूपास्त्वनिष्टदाः ॥ अनिष्टदाः पंगुसुता विशिखाः कमकाह्वयाः॥ १०३ ॥
विकचाख्या गुरुसुता वेष्टा याम्ये स्थिता अपि ॥ सूक्ष्माः शुक्ला बुधसुताश्चौररोगभयप्रदाः ॥ १०४ ॥ कुजात्मजाः कुंकुमाख्या रक्ताः
शूलास्त्वनिष्टदाः॥अग्निजा विश्वरूपाख्या अग्निवर्णाः सुखप्रदाः ॥ १०५ ॥ अरुणाः श्यामलाकारा अर्कपुत्राश्च पापदाः॥शुक्रजा ऋक्षसदृशाः केतवः
शुभदायकाः ॥१०६॥ कृत्तिकासु भवो धूमकेतुर्नूनं प्रजाक्षयः ॥ प्रासादवृक्षशैलेषु जातो राज्ञां विनाशकृत् ॥१०७॥ सुभिक्षकृत्कौमुदाख्यः
केतुः कुमुदसन्निभः ॥ आवर्तकेतुसंध्यायां शशिरो नेष्टदायकः ॥ १०८ ॥ ब्रह्मदेवमनोर्मान पित्र्यं सौरं च सावनम् ॥ चांद्रमार्क्ष गुरोर्मानमिति मानानि
वै नव ॥१०९ ॥एतेषां नवमानानां व्यवहारोऽत्र पञ्चभिः ॥ तेषां पृथक्पृथक्कार्यं वक्ष्यते व्यवहारतः ॥११०॥ ग्रहाणां निखिलश्चारो गृह्यते सौरमानतः
॥ वृष्टेर्विधानं स्त्रीगर्भः सावनेनैव गृह्यते ॥ १११ ॥ प्रवर्षणां समे गर्भौ नाक्षत्रेण प्रगृह्यते ॥ यात्रोद्वाहव्रतक्षौरे तिथिवर्षेशनिर्णयः ॥११२॥
पर्ववास्तूपवासादि कृत्स्नं चांद्रेण गृह्यते ॥ गृह्यते गुरुमानेन प्रभवाद्यब्दलक्षणम्॥ ११३ ॥तत्तन्मासैर्द्वादशभिस्तत्तदब्दो भवेत्ततः ॥ गुरुमध्यमचारेण
षष्ट्यब्दाः प्रभवादयः ॥ ११४ ॥ प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापतिः ॥ अंगिराः श्रीमुखो भावो युवा धाता तथैव च ॥ ११५ ॥ ईश्वरो
बहुधान्यश्च प्रमाथी विक्रमो वृषः ॥ चित्रभानुस्सुभानुश्च तारणः पार्थिवोऽव्ययः॥ ११६ ॥ सर्वजित्सर्वधारी च विरोधी विकृतः खरः ॥ नंदनो
विजयश्चैव जयो मन्मथदुर्मुखौ ॥ ११७ ॥ हेमलंबो विलंबश्च विकारी शार्वरी लवः ॥ शुभकृच्छोभनः क्रोधी विश्वावसुपराभवौ॥ ११८॥ प्लवंगः
कीलकः सौम्यः सामातश्च विरोधकृत् ॥ पारिभावी प्रमादी च आनन्दो राक्षसोऽनलः ॥११९॥ पिंगलः कालयुक्तश्च सिद्धार्थो रौद्रदुर्मतीः॥दुंदुभी
रुधिरोद्गारी रक्ताक्षः क्रोधनः क्षयः ॥ १२० ॥ नामतुल्यफलाः सर्वे विज्ञेयाः षष्टिवत्सराः ॥ युगं स्यात्पंचभिर्वर्षैर्युगान्येवं तु द्वादश॥ १२१॥ तेषामीशाः
क्रमाज्ज्ञेया विष्णुर्देवपुरोहितः॥पुरंदरो लोहितश्च त्वष्टाहिर्बुध्न्यसंज्ञकः ॥१२२॥पितरश्च ततो विश्वे शशींद्राग्न्यश्विनो भगः॥तथा युगस्य
वर्षेशास्त्वग्निनेंदुविधीश्वराः ॥ १२३॥अथाद्वेशचमूनाथसस्यपानां बलाबलम् ॥ तत्कालं ग्रहचारं च सम्यग् ज्ञात्वा फलं पदेत् ॥ १२४ ॥ सौम्यायनं
मासषट्कं मृगाद्यं भानुभुक्तितः ॥ अहः सुराणां तद्रात्रिः कर्काद्यं दक्षिणायनम् ॥ १२५ ॥ गृहप्रवेशवैवाहप्रतिष्ठामौंजिबंधनम् ॥ मघादौ मंगलं
कर्म विधेयं चोत्तरायणे ॥ १२६ ॥ याम्यायने गर्हितं च कर्म यत्नात्प्रशस्यते॥माघादि मासौ द्वौ द्वौ च ऋतवः शिशिरादयः॥ १२७॥मृगाच्छिशि

रवसंतश्च ग्रीष्माः स्युश्चोत्तरायणे ॥ वर्षा शरच्च हेमंतः कर्कार्द्धे दक्षिणायने॥१२८॥चांद्रो दर्शावधिः सौरः संक्रांत्या सावनो दिनैः ॥त्रिंशद्भिश्चंद्रभग
णो मासो नाक्षत्रसंज्ञकः ॥ १२९ ॥ मधुश्च माधवः शुक्रः शुचिश्चाथ नभस्ततः ॥ नभस्य इष ऊर्जश्च सहाश्चैव सहस्यकः ॥ १३० ॥ तपास्तपस्य
क्रमशश्चैत्रादीनां समाह्वयाः ॥ यस्मिन्मासे पौर्णमासी येन धिष्ण्येन संयुता ॥ १३१ ॥ तन्नक्षत्राह्वयो मासः पौर्णमासी तदाह्वया ॥ तत्पक्षौ दैव
पित्राख्यौ शुक्लकृष्णौ तथापरे ॥ १३२ ॥ शुभाशुभे कर्मणि च प्रशस्तौ भवतः सदा ॥ क्रमात्तिथीनां ब्रह्माग्नी विरिंचिविष्णुशैलजाः ॥ १३३ ॥
विनायकयमौ नागचंद्रौ स्कंदोऽर्कवासवौ॥महेन्द्रवासवौ नागदुर्गादंडधराह्वयः॥१३४शिवविष्णूहरिरवीकामःसर्वःकलीततः॥चन्द्रविश्वेदर्शसंज्ञतिथी
शाः पितरः स्मृताः॥१३५॥नंदाभद्राजयारिक्ता पूर्णाः स्युस्तिथयः पुनः॥त्रिरावृत्त्या क्रमाज्ज्ञेया नेष्टमध्येष्टदाः सिते॥१३६॥कृष्णपक्षे त्विष्टमध्यानि
ष्टदाः क्रमशस्तदा ॥ अष्टमी द्वादशी षष्ठी चतुर्थी च चतुर्दशी ॥ १३७॥तिथयः पक्षरंध्राख्या ह्यतिरूक्षा प्रकीर्तिताः ॥ समुद्रमनुरंध्रांकतत्त्वसंख्यास्तु
नाडिकाः ॥ १३८॥ त्याज्याः स्युस्तासु तिथिषु क्रमात्पंच च सर्वदा ॥ अमावास्या च नवमी हित्वा विषमसंज्ञिका॥१३९॥तिथयस्तुप्रशस्तास्युर्म
ध्यमा प्रतिपत्सिता ॥ षष्ठ्यां तैलं तथाष्टम्यां मांसं क्षौरं कलेस्तिथौ ॥१४०॥ पूर्णिमादर्शयोर्नारीसेवनं परिवर्जयेत् ॥ दर्शे षष्ठ्यां प्रतिपदि द्वादश्यां
प्रतिपर्वसु ॥१४१ ॥नवम्यां च न कुर्वीत कदाचिद्दंतधावनम् ॥ व्यतीपाते च संक्रांतावेकादश्यां च पर्वसु ॥ १४२ ॥ अर्कभौमदिने षष्ठ्यां ना
भ्यंगो वैधृतौ तथा ॥ यः करोति दशम्यां च स्नानमामलकैर्नरः ॥ १४३ ॥ पुत्रहानिर्भवेत्तस्य त्रयोदश्यां धनक्षयः ॥ अर्थपुत्रक्षयस्तस्य द्वितीयायां
न संशयः ॥ १४४॥ अमायां च नवम्यां च सप्तम्यां च कुलक्षयः ॥ या पौर्णिमा दिवा चंद्रमती सानुमती स्मृता ॥१४५॥रात्रौ चन्द्रवती राकाऽप्य
मावास्या तथा द्विधा ॥ सिनीवाली चेंदुमती कुहूर्नेंदुमती मता ॥ १४६ ॥ कार्तिके शुक्लनवमी त्वादिः कृतयुगस्य च ॥ त्रेतादिर्माधवे शुक्ले
तृतीया पुण्यसंज्ञिता ॥ १४७ ॥ कृष्णा पंचदशी माघे द्वापरादिरुदीरिता ॥ कल्पादिः स्यात्कृष्णपक्षे नभस्यस्य त्रयोदशी ॥ १४८ ॥ द्वादश्यूर्जे
शुक्लपक्षे नवम्यच्छेश्वयुज्यपि ॥ चैत्रे भाद्रपदे चैव तृतीया शुक्लसंज्ञिता ॥ १४९ ॥ एकादशी सिता पौषे ह्याषाढ़ेर्दशमीसिता ॥ माघे च सप्तमी
शुक्ला नभस्ये त्वसिताष्टमी ॥ १५०॥श्रावणे मास्यमावास्या फाल्गुने मासि पौर्णिमा ॥ आषाढे कार्तिके मासि ज्येष्ठे चैत्रे च पौर्णिमा ॥ १५१ ॥
मन्वादयो मानवानां श्राद्धेष्वत्यंतपुण्यदा ॥ भाद्रे कृष्णत्रयोदश्यां मघामिंदुः करे रविः ॥ १५२ ॥ गजच्छाया तदा ज्ञेया श्राद्धे ह्यत्यंतपुण्यदा ॥
एकस्मिन्वासरे तिस्रस्तिथयः स्यात्तिथिक्षयः॥१५३॥तिथिर्वारत्रये त्वेका ह्यधिका द्वे च निंदिते॥सूर्यास्तमनपर्यंतं यस्मिन्वारे तु या तिथिः॥१५४॥

विद्यते सा त्वखंडा स्यान्न्यूना चेत्खंडसंज्ञिता ॥ तिथेः पंचदशो भागः क्रमात्प्रतिपदादयः ॥ १५५ ॥ क्षणसंज्ञास्तदर्द्धानि तासामर्द्ध
प्रमाणतः ॥ रविः स्थिरश्चरश्चंद्रः क्रूरो वक्रोखिलो बुधः ॥ १५६ ॥ लघुरीज्यो मृदुः शुक्रस्तीक्ष्णो दिनकरात्मजः ॥ अभ्यक्तो भानुवारे यः स नरः
क्लेशवान्भवेत् ॥ १५७ ॥ ऋक्षेशे कांतिभाग्भौमे व्याधि सौभाग्यमिंदुजे ॥ जीवे नैवं सिते हानिर्मन्दे सर्वसमृद्धयः॥ १५८॥ लंकोदयात्स्याद्वारादिस्त
स्मादूर्ध्वमधोऽपिवा॥ देशांतरस्वचरार्द्धनाडीभिरपरे भवेत् ॥ १५९ ॥ बलप्रदस्य खेटस्य कर्म सिद्ध्यति यत्कृतम् ॥ तत्कर्म बलहीनस्य दुःखेनापि
न सिद्ध्यति ॥ १६० ॥ इंदुज्ञजीवशुक्राणां वासराः सर्वकर्मसु॥ फलदास्त्वितरे क्रूरे कर्मस्वभिमतप्रदाः ॥ १६१ ॥ रक्तवर्णौ रविश्चंद्रौ गौरो भौमस्तु
लोहितः ॥ दूर्वावर्णो बुधो जीवः पीतश्वेतस्तु भार्गवः॥ १६२ ॥ कृष्णः सौरिः स्ववारेषु स्वस्ववर्णक्रिया हिताः ॥ अद्रिवाणाश्च यस्तर्कपातालवसुधा
धराः ॥ १६३ ॥ बाणाग्निलोचनानिघ्नवेदबाहुशिलीमुखाः ॥ त्र्येकाहयो नेत्रगोत्ररामाश्चंद्ररसर्तवः ॥ १६४ ॥ कुलिकाश्चोपकुलिका वारवेला
स्तथा क्रमात् ॥ प्रहरार्द्धप्रमाणास्ते विज्ञेयाः सूर्यवासरात् ॥ १६५॥ यस्मिन्वारे क्षणो वारदृष्टस्तद्वासराधिपः॥ आद्यः षष्ठो द्वितीयोऽस्मात्तत्षष्ठस्तुतृ
तीयकः ॥ १६६ ॥ षष्ठः षष्ठश्चेतरेषां कालहोराधिपाः स्मृताः ॥ सार्द्धनाडीद्वयेनैव दिवा रात्रौ यथाक्रमात् ॥ १६७ ॥ वारप्रोक्तं कर्मकार्यं
तद्ग्रहस्य क्षणेऽपि सन् ॥ नक्षत्रेशाः क्रमाद्दस्रयमवह्निपितामहाः ॥ १६८ ॥ चंद्रेशादितिजीवाहिपितरो भगसंज्ञकः ॥ अर्यमार्कत्वष्टृमरुच्छक्राग्निमि
त्रवासवः ॥ १६९ ॥ नैर्ऋत्युदकविश्वेजगोविंदवसुतोयपाः ॥ अजैकपादहिर्बुध्न्या पूषा चेति प्रकीर्तिताः ॥ १७० ॥ पूर्वांत्रयं मघाद्याग्निविशाखाय
समूलभम् ॥ अधोमुखं तु नवकं भानौ तत्र विधीयते ॥ १७१ ॥ बिलप्रवेशगणितभूतसाधनलेखनम् ॥ शिल्पकर्मकलाकूपनिक्षेपोद्धरणादि यत् ॥
॥ १७२॥ मित्रेन्दुत्वाष्ट्रहस्तेन्द्रादितिभांत्याश्विवायुभम् ॥ तिर्यङ्मुखाख्यं नवकं भानौ तत्र विधीयते ॥ १७३॥ हलप्रवाहगमनं गंत्रीपत्रगजोष्ट्रकम् ॥
खरगोरथनौयानलुलायहयकर्म च ॥ १७४ ॥ ब्रह्मविष्णुमहेशार्यशततारावसूत्तराः ॥ ऊर्द्ध्वास्यं नवकं भानां प्रोक्तमत्र विधीयते ॥ १७५ ॥ नृपा
भिषेकमांगल्यवारणध्वजकर्मच ॥ प्रासादतोरणारामप्राकाराद्यं च सिद्ध्यति ॥ १७६ ॥ स्थिरं रोहिण्युत्तराख्यं क्षिप्रं सूर्याश्विपुष्यभम् ॥ साधारणं
द्विदैवत्यं वह्निभं च प्रकीर्तितम् ॥ १७७ ॥ वस्वदित्यंबुपुष्याणि विष्णुभं चरसंज्ञितम् ॥ मृद्विंदुमित्रचित्रांत्यमुग्रं पूर्वामघात्रिकम् ॥ १७८ ॥ मूला
र्द्राहींद्रभं तीक्ष्णं स्वनामसदृशं फलम् ॥ चित्रादित्यंबुविष्ण्वंबांत्याधिमित्रवसूडुषु ॥ १७९ ॥ समृगेज्येषु बालानां कर्णवेधक्रिया हिता ॥ दस्रेन्द्व
दितितिष्येषु करादित्रितये तथा ॥ १८० ॥ गजकर्माखिलं यत्तद्विधेयं स्थिरभेषु च ॥ वाजिकर्माखिलं कार्यं सूर्यवारे विशेषतः ॥ १८१ ॥ चित्रा

वरुणवैरिंचत्र्युत्तरासु गमागमम् ॥ दर्शाष्टम्यां चतुर्दश्यां पशूनां न कदाचन ॥ १८२ ॥ मृदुध्रुवक्षिप्रचरविशाखापितृभेषु च ॥ हलप्रवाहं प्रथमं विद
ध्यान्मूलभे वृषैः ॥ १८३ ॥ हलादौ वृषनाशाय भत्रयं सूर्यभुक्तभात् ॥ अग्रे वृद्ध्यै त्रयं लक्ष्म्यै सौम्यपार्श्वे च पंचकम् ॥ १८४ ॥ शूलत्रयेपि नव
कं मरणाय च पंचकम् ॥ श्रियै पुष्ट्यै त्रयं श्रेष्ठं स्याच्चक्रे लांगलाह्वये ॥ १८५ ॥ मृदुध्रुवक्षिप्रभेषु पितृवायुवसूडुषु ॥ समूलभेषु बीजोप्तिरत्युत्कृष्ट
फलप्रदा ॥ १८६ ॥ भवेद्भत्रितयं मूर्ध्नि धान्यनाशाय राहुभात् ॥ गले त्रयं कज्जलाय वृद्ध्यै च द्वादशोदरे ॥ १८७ ॥ निस्तंडुलत्वं लांगूले भचतु
ष्टयभीतिदम् ॥ नाभौ वह्निः पंचकं यद्बीजोप्ताविति चिंतयेत् ॥१८८॥ स्थिरेष्वदितिसार्पांत्यपितृमारुतभेषु च ॥ न कुर्याद्रोगमुक्तस्य स्नानमाहीं
दुशुक्रयोः॥१८९॥उत्तरात्रयमैत्रेन्द्रवसुवारुणभेषु च॥ पुष्यार्कपौष्णधिष्ण्येषु नृत्यारंभः प्रशस्यते ॥१९०॥ पूर्वार्द्धयुंजि षड्भानि पौष्णभादुद्भात्ततः ॥
मध्ययुंजि द्वादशर्क्षाणीन्द्रभान्नवभानि च॥१९१॥परार्द्धयुंजि क्रमशः संप्रीतिर्दम्पतेर्मिथः॥जघन्यास्तोयपार्द्राहिपवनांतकनाकपाः॥१९२॥क्रमादितिद्वि
दैवत्या बृहत्ताराः पराः समाः ॥ तासां प्रमाणघटिकास्त्रिंशन्नवतिषष्टयः ॥ १९३ ॥ क्रमादभ्युदिते चंद्रे नयत्यर्घसमानि च ॥ अश्वग्नींद्रीज्यनैर्ऋत्य
त्वाष्ट्रजत्र्युत्तराभवाः ॥ १९४ ॥ पितृद्विदैववस्वाख्यास्ताराः स्युः कुलसंज्ञिकाः ॥ धातृज्येष्ठादितिस्वातीपौष्णार्कहरिदेवताः ॥ १९५ ॥ अजाह्व
त्यकभौजंगताराश्चैवाकुलाह्वयाः ॥शेषाः कुलाकुलास्तारास्तासां मध्ये कुलोडुषु ॥ १९६ ॥ प्रयाति यदि भूपालस्तदाप्नोति पराजयम् ॥भेषूपकुलसं
ज्ञेषु जयमाप्नोति निश्चितम् ॥१९७॥ संधिर्वापि तयोः साम्यं कुलाकुलगणोडुषु॥अर्कार्किभौमवारे चेद्भद्राया विषमांघ्रिभम्॥१९८॥त्रिपुष्करं त्रिगु
णदं द्विगुणं यमलाहिभम् ॥ दद्यात्तद्दोषनाशाय गोत्रयं मूल्यमेव वा ॥ १९९ ॥ द्विपुष्करे द्वयं दद्यान्न दोषस्त्वृक्षभोऽपि वा ॥ क्रूरविद्धो युतो वापि
पुष्यो यदि बलान्वितः ॥२००॥विना पाणिग्रहं सर्वमंगलेष्विष्टदः सदा ॥रामाग्निऋतुबाणाग्निभूवेदाग्निशरेषु च॥२०१॥ नेत्रबाहुशरेंद्विदुबाहुवेदा
ग्निसंकराः॥वेदनेत्राब्ध्यग्निशतबाहुनेत्ररदाः क्रमात् ॥२०२॥ तारासंख्याश्च विज्ञेया दस्रादीनां पृथक् पृथक् ॥ या दृश्यंते दीप्तताराः स्वगणे योगता
रकाः ॥ २०३ ॥ वृषो वृक्षोश्वभायाम्यधिष्ण्येयमकरस्तरुः ॥ उडुंबरश्चाग्निधिष्ण्ये रोहिण्यां जंबुकस्तरुः ॥ २०४॥ इन्दुभात्खदिरो जातः कृष्णप्ल
क्षश्च रौद्रभात् ॥ संभूतोऽदितिभाद्वंशः पिप्पलः पुष्यसंभवः ॥२०५॥ सर्पधिष्ण्यान्नागवृक्षो वटः पितृभसंभवः ॥पालाशो भाग्यभाज्जातः अक्षश्चार्यम
संभवः ॥ २०६ ॥ अरिष्टवृक्षो रविभाच्छ्रीवृक्षस्त्वाष्ट्रसंभवः ॥ स्वात्यृक्षजोऽर्जुनो वृक्षो द्विदैवत्याद्विकंकतः ॥ २०७ ॥मित्रभाद्बकुलो जातो विष्टिः
पौरंदरर्क्षजः ॥ सर्जवृक्षो मूलभाच्च वंजुलो वारिधिष्ण्यजः ॥ २०८ ॥ पनसो वैश्वभाज्जातश्चार्कवृक्षश्च विष्णुभात्॥वसुधिष्ण्याच्छमीवृक्षः कदंबो वारु

णर्क्षजः ॥ २०९ ॥अजाहेश्चूतवृक्षोभूद्बुध्न्यजः पिचुमन्दकः ॥मधुवृक्षः पौष्णधिष्ण्याद्धिष्ण्यवृक्षाः प्रकीर्तिताः॥२१०॥ यस्मिन्छनैश्चरो धिष्ण्ये तद्वृक्षो
ऽर्च्यः प्रयत्नतः॥योगेशा यमविश्वेंदुधातृजीवनिशाकराः ॥२११॥इंद्रतोयाहिवह्न्यर्कभूमिरुद्रकतोयपाः॥गणेशरुद्रधनदत्वष्टृमित्रषडाननाः ॥२१२॥
सावित्री कमला गौरी नासत्यौ पितरोऽदितिः॥ वैधृतिश्च व्यतीपातो महापातावुभौ सदा ॥२१३॥ परिघस्य च पूर्वार्द्धं सर्वकार्येषु गर्हितम्॥विष्कं
भवज्रयोस्तिस्रः षड़ा गंडातिगंडयोः ॥२१४॥व्याघाते नव शूले तु पंच नाड्यो हि गर्हिताः ॥ अदितींदुमघाह्यश्वमूलमैत्रेज्यभानि च ॥ २१५ ॥
ज्ञेयानि सहचित्राणि मूर्द्धभानि यथाक्रमम् ॥ लिखेदूर्ध्वगतामेकां तिर्यग्रेखास्त्रयोदश ॥ २१६ ॥ तत्र खार्जूरिके चक्रे कथितं मूर्ध्नि भं न्यसेत् ॥
भाज्यैकरेखागतयोः सूर्याचंद्रमसोर्मिथः ॥ २१७ ॥ एकार्गलो दृष्टिपातश्चाभिजिद्वर्जितानि वै ॥ विनाडीभिर्द्वादशभी रहित घटिकाद्वयम्
॥ २१८ ॥ योगं प्रकरणं योगाः क्रमात्तु सप्तविंशतिः ॥ इन्द्रः प्रजापतिर्मित्रस्त्वष्टाभूहरितिप्रिया ॥ २१९ ॥ कीनाशः कलिरुद्रा
ख्यो तिथ्यर्द्धेशास्त्वहिर्मरुत् ॥ बवादिवणिजांतानि शुभानि करणानि षट् ॥ २२० ॥ परीता विपरीता वा विष्टिर्नेष्टा तु मंगले ॥ मुखे पंच
गले चैका वक्षस्येकादश स्मृतः॥२२१॥नाभौ चतस्रः षट् कट्यां तिस्रः पुच्छाख्यनाडिकाः॥ कार्यहानिर्मुखे मृत्युर्गले वक्षसि निःस्वता ॥ २२२ ॥
कट्यामुन्मत्तता नाभौ च्युतिः पुच्छे ध्रुवं जयः ॥ स्थिराणि मध्यमान्येषां मध्यनागचतुष्पदौ ॥ २२३ ॥ दिवामुहूर्ता रुद्राहिमित्रपितृवसूदकम्॥
विश्वेविधातृब्रह्मेंद्ररुद्राग्निवसुतोयपाः ॥ २२४ ॥ अर्यमा भगसंज्ञश्च विज्ञेया दश पंच च ॥ ईशाजपादाहिर्बुध्न्यपूषाश्वियमवह्नयः॥२२५॥धातृ
इन्द्रादितीज्याख्या विष्णवर्कत्वष्टृवायवः ॥ अह्नः पंचदशो भागस्तथा रात्रिप्रमाणतः ॥२२६॥ मुहूर्तमानं द्वशवक्षणर्क्षाणि समेश्वरम्॥ अर्यमा राक्षस
ब्राह्मौ पित्र्याग्नेयौ तथाभिजित् ॥ २२७ ॥ राक्षसाख्यौ ब्राह्मपित्र्यौ भर्गाजांशाविनादिषु ॥ वारेषु वर्जनीयास्ते मुहूर्ताः शुभकर्मसु॥ २२८ ॥ येषु
ऋक्षेषु यत्कर्म कथितं निखिलं च तत् ॥ तद्दैवत्ये मुहूर्तेऽपि कार्यं यात्रादिकं सदा ॥ २२९ ॥ भूकंपः सूर्यभात्सप्तमर्क्षे विद्युच्च पंचमे॥शूलोऽष्टमे च
दशमे शनिरष्टादशे ततः ॥ २३० ॥ केतुः पंचदशे दंड उल्का एकोनविंशतौ ॥ निर्घातपातसंज्ञश्च ज्ञेयः स नवपंचमे ॥ २३१ ॥ मोहनिर्घातकं
पाश्च कुलिशं परिवेषणम् ॥ विज्ञेया एकविंशर्क्षादारभ्य च यथाक्रमम्॥२३२॥ चन्द्रयुक्तेषु भेष्वेषु शुभकर्म न कारयेत् ॥ सूर्यभात्सर्वपित्र्यर्क्षं त्वाष्ट्र
मित्रातभेषु च ॥ २३३ ॥ सविष्णुभेषु क्रमशो हस्तभाच्चंद्रसंयुतः ॥ धिष्ण्ये तावति सत्यत्र दुष्टयोगः पतत्यसौ॥ २३४ ॥ चंडीशचंडायुधाख्यस्त
स्मिन्नैवाचरेच्छुभम् ॥ त्रयोदश स्युर्मिलनसंख्यया तिथिवारयोः ॥ २३५ ॥ क्रकचो नाम योगोऽयं मंगलेष्वतिगर्हितः ॥ सप्तम्यामर्कवारश्चेत्प्रतिप

त्सौम्यवासरे ॥ २३६ ॥ संवत्तयोगो विज्ञेयः शुभकर्मविनाशकृत् ॥ आनन्दः कालदंडाख्यो धूम्रधातृसुधाकराः ॥ २३७॥ ध्वांक्षध्वजाख्यश्रीवत्स
वज्रमुद्गरछत्रकाः ॥ मित्रमानसपद्माख्यलुम्बकोत्पातमृत्यवः ॥२३८॥ काणसिद्धिशुभा मृत्युमुशलांतककुंजराः ॥ राक्षसाख्यवरस्थैर्यवर्द्धमानाः क्रमा
दमी ॥ २३९ ॥ योगाः स्वसंज्ञाफलदा अष्टाविंशतिरीरिताः ॥ रविवारे क्रमादेव दस्रभादिंदुभाद्विधौ ॥ २४० ॥ सापार्द्भौमे बुधे हस्तान्मैत्रभात्सुर
मंत्रिणि ॥ वैश्वदेवाद्भृगुसुते वारुणाद्भास्करात्मजे ॥ २४१ ॥ हस्तर्क्षं च रवाविंदौ चंद्रभं दस्रभं कुजे ॥ सौम्ये मित्रभमाचार्ये तिष्यः पौष्णं भृगोः
सुते ॥ २४२ ॥ रोहिणी मंदवारे च सिद्धियोगाह्वया अमी ॥आदित्यभौमयोर्नंदा भद्रा शुक्रशशांकयोः॥ २४३ ॥ जयासौम्ये गुरौ रिक्ता शनौ
पूर्णेति नो शुभाः ॥ नन्दा तिथिः शुक्रवारे सौम्ये भद्रा कुजे जया ॥ २४४ ॥ रिक्ता मंदे गुरोर्वारे पूर्णा सिद्धाह्वया अमी ॥ एकादश्यामिंदुवारो
द्वादश्यामर्कवासरः ॥ २४५ ॥ षष्ठी गुरौ तृतीया ज्ञेऽष्टमी शुक्रे शनैश्चरे ॥ नवमी पञ्चमी भौमे दग्धयोगाः प्रकीर्तिताः ॥ २४६ ॥ भरण्यर्कदिने
चंद्रे चित्राभौमेतु विश्वभम् ॥ बुधे श्रविष्ठार्यमभे गुरौ ज्येष्ठा भृगोर्दिने॥२४७॥रेवती मंदवारे तु ग्रहजन्मर्क्षनाशनम्॥ विशाखादिचतुर्वर्गमर्कवारादिषु
क्रमात्॥२४८॥उत्पातमृत्युकाणाख्यसिद्धियोगाः प्रकीर्तिताः॥तिथिवारोद्भवा नेष्टा योगा वारर्क्षसंभवाः॥२४९॥हूणवंगखसेष्वन्यदेशेष्वतिशुभप्रदाः॥
घोराघ्वाक्षीमहोदर्यो मन्दा मंदाकिनी तथा ॥ २५० ॥ मिश्रा राक्षसिका सूर्यवारादिषु यथाक्रमम् ॥ शूद्रतस्करवैश्यक्ष्मादेवभूपगवां क्रमात्॥२५१॥
अनुक्तानां च सर्वेषां घोराद्याः सुखदाः स्मृताः॥ पूर्वाह्णे नृपतीन्हन्ति विप्रान्मध्यंदिने विशः॥२५२॥अपराह्णेऽस्तगे शूद्रान्प्रदोषे च पिशाचकान् ॥
निशि रात्रिचरान्नाटचकारानपररात्रिके ॥ २५३ ॥गोपानुषसि संध्यायां लिंगिनो रविसंक्रमः ॥ दिवा चेन्मेषसंक्रांतिरनर्थकलहप्रदा ॥२५४॥ रात्रौ
सुभिक्षमतुलं संध्ययोर्वृष्टिनाशनम् ॥ हरिशार्दूलवाराहखरकुंजरमाहिषाः॥ अश्वश्वाजवृषाः पादायुधाः करणवाहनाः ॥ २५५॥ भुशुंडी च गदा
खड्गौ दंड इष्वासतोमरौ ॥ २५६ ॥ कुन्तपाशांकुशास्त्रेषून्बिभर्ति करयोस्त्विनः॥अन्नं च पायसं भैक्ष्यं सयूषं च पयो दधि ॥ २५७॥ मिष्टान्नं गुडम
ध्वाज्यशर्करा ववतो हविः ॥ ववोवीवणिजेविश्वां बालवे गोचरस्थितौ ॥ २५८ ॥ कौलवे शकुनौ भानुः किंस्तुघ्ने चोर्द्धसंस्थितः॥चतुःपादे तिले
नागे सुतः क्रांतिं करोति हि ॥ २५९ ॥ धर्मायुर्वृष्टिषु समं श्रेष्ठं नष्टं फलं क्रमात् ॥ आयुधं वाहनाहारौ यज्जातीयं जनस्य च ।।२६० ॥स्वापोप
विष्टास्तिष्ठंतस्ते लोकाः क्षेममाप्नुयुः ॥ अंधकं मंदसंज्ञं च मध्यसंज्ञं सुलोचनम्।। २६१ ॥ पपीयाद्गणयेद्भानि रोहिण्यादिचतुर्विधम् ॥ स्थिरभेष्व
र्कसंक्रांतिर्ज्ञेया विष्णुपदाह्वया ॥ २६२ ॥ षडशीतिमुखा ज्ञेया द्विस्वभावेषु राशिषु ॥ तुलाघटाजयोर्ज्ञेयो विषुवत्सूर्यसंक्रमः ॥ २६३ ॥ याम्या

यने स्थिरे त्वाद्याः पराः सौम्येन्दुमूर्तिभैः ॥ मेध्या विषुवति प्रोक्ताः पुण्यनाड्यस्तु षोडश ॥ २६४ ॥ संध्या त्रिनाडी प्रमितार्कबिंबोर्द्धोदयास्ततः॥ प्राक्पश्चाद्याम्यसौम्ये चेत्पुण्यं पूर्वापरेऽहनि ॥ २६५ ॥ यादृशेनेंदुना भानोः संक्रांतिस्तादृशं फलम् ॥ नरः प्राप्नोति तद्राशौ शीतांशोः साध्वसाधु च ॥ २६६ ॥ संक्रांतेः परतो भानुर्भुक्त्वा यावद्विरंशकैः ॥ रवेरयनसंक्रांतिस्तदा तद्राशिसंक्रमात् ॥ २६७ ॥ संक्रांतिग्रहणर्क्षंवा जन्मन्युभयपार्श्वयोः॥अतोद्वाहादिकेष्वेव द्वयं नेष्टं तु तत्क्रमात्॥२६८॥तिलोपरि लिखेच्चक्रं त्रित्रिशूलं त्रिकोणकम्॥तत्र हेम विनिक्षिप्य दद्याद्दोषापवृत्तये॥२६९॥ तारावलेन शीतांशुर्बलवांस्तद्वशाद्रविः ॥ बली संक्रममाणस्तु तद्वत्खेटा बलाधिकाः ॥२७०॥ शुभोऽर्को जन्मतस्त्र्यायदशषट्सु मुनीश्वर ॥ नवपञ्चांबुरिष्फस्थैर्व्यार्किभिर्विध्यते न चेत् ॥ २७१ ॥ शुभो जन्मर्क्षतश्चंद्रो द्यूनांगायारिखत्रिषु ॥ यथेष्टांत्यांबुधर्मस्थैर्विबुधैर्विध्यते न चेत् ॥ २७२ ॥ त्र्यायारिषु कुजः श्रेष्ठो जन्मना चेन्न विध्यते॥ व्ययेष्वंकस्थितैः सौरिसौम्यसूर्यैः शुभौषधात्॥२७३॥ ज्ञः स्वायार्यष्टखायेषु जन्मतश्चेन्न विध्यते॥ धीत्र्यकादिगजांतस्थैः शशांकरहितैः शुभैः ॥ २७४ ॥ जन्मराशेर्गुरुः श्रेष्ठः स्वायगोऽध्यस्तगो न चेत्॥ विध्यतेंत्याष्टखांबुत्रिगतैः खेटैर्मुनीश्वर॥ ॥ २७५ ॥ जन्मभादासुताष्टांकांत्यायेष्विष्टो भृगोःसुतः ॥ चेन्न विद्धोऽष्टसप्तांगम् खांकाद्यायारिरामगैः ॥२७६॥ न ददाति शुभं किंचिद्गोचरे वेधसंयुते ॥ तस्माद्वेधं विचार्याथ कथनीयं शुभाशुभम् ॥२७७॥ वामभेदविधानेन दुष्टोऽपि स्याच्छुभङ्करः ॥ सौम्येक्षितोऽनिष्टफलः शुभदः पापवीक्षितः ॥२७८ ॥निष्फलौ तौ ग्रहौ स्वेन शत्रुणा च विलोकितौ ॥ नीचराशिगतः स्वस्य शत्रोः क्षेत्रगतोऽपि वा ॥२७९॥ शुभाशुभफलं नैव दद्यादस्तमितोपि वा॥ग्रहेषु विषमस्थेषु शांतिं कुर्यात्प्रयत्नतः॥२८०॥हानिर्वृद्धिर्ग्रहाधीना तस्मात्पूज्यतमा ग्रहाः ॥ मणिर्मुक्ताफलं विद्रुमाख्यं मरकतं तथा॥ २८१ ॥ पुष्परागं तथा वज्रं नीलं गोमेदसंज्ञितम् दूर्यं भास्करादीनां तुष्टद्य धार्यं यथाक्रमम् ॥ २८२ ॥ शुक्लपक्षादिदिवसे चंद्रो यस्य शुभप्रदः ॥ स पक्षस्तस्य शुभदः कृष्णपक्षोन्यथाऽशुभः ॥ २८३ ॥ शुक्लपक्षे शुभश्चंद्रो द्वितीयनवपंचमे ॥ रिःफरंध्रांबुसंस्थैश्चेन्न विद्धो गगनेचरैः ॥ २८४ ॥ जन्म संपद्विपत् क्षेम प्रत्यरिः साधको वधः ॥ मित्रं परममित्रं च जन्मभात्तु पुनः पुन ॥ २८५ ॥ जन्मत्रिपंचसप्ताख्यास्तारा नेष्टफलप्रदाः ॥ शाकं गुडं च लवणं सतिलं कांचनं क्रमात् ॥ २८६ ॥ अनिष्टफलनाशाय दद्यादेतद्द्विजातये ॥ कृष्णे बलवती तारा शुक्लपक्षे बली शशी ॥ चंद्रस्य द्वादशावस्था राशौराशौ यथाक्रमम् ॥ २८७ ॥ यात्रोद्वाहादिकार्येषु नामतुल्यफलप्रदाः ॥ षष्टिघ्नं गतचन्द्रर्क्षं तत्कालघटिकान्वितम् ॥ वेदघ्नमिषुवेदांत्यमवस्था भानुभागतः ॥ २८८ ॥ प्रवासनष्टाख्यमृता जयो हास्यं रतिमुदा ॥

शनिभुक्तिर्ज्वरः कंपः सुस्थितिर्नामसन्निभाः ॥ २८९ ॥ पट्टबंधनयानोग्रसंधिविग्रहभूषणम् ॥ धात्वाकरं युद्धकर्म मेषलग्ने प्रसिद्ध्यति ॥
॥२९०॥ मंगलानि स्थिराण्यंबुवेश्मकर्मप्रवर्तनम् ॥ कृषिवाणिज्यपश्वादिवृषलग्ने प्रसिद्ध्यति॥ २९१ ॥ कलाविज्ञानशिल्पानि भूषणाहवसंश्रवम् ॥
गजोद्वाहाभिषेकाद्यं कर्त्तव्यं मिथुनोदये ॥ २९२ ॥ वापीकूपतडागादि वारिबंधनमोक्षणम् ॥ पौष्टिकं लिपिलेखादि कर्तव्यं कर्कटोदये ॥ २९३ ॥
इक्षुधान्यवणिक्पण्यकृषिसेवादयस्स्थिरे ॥ साहसाहवभूपाद्यं सिंहलग्ने प्रसिद्ध्यति ॥ २९४॥ विद्याशिल्पौषधं कृत्यं भूषणं च चरस्थिरम् ॥ कन्या
लग्ने विधेयं च पौष्टिकाखिलमंगलम् ॥ २९५ ॥ कृषिवाणिज्ययानं च पशूद्वाहव्रतादिकम् ॥ तुलायामखिलं कर्म तुलाभाराश्रिते च यत्॥२९६॥
स्थिरकर्माखिलं कार्यं राजसेवाभिषेचनम् ॥ चौर्यकर्मस्थिरारंभाः कर्तव्या वृश्चिकोदये ॥ २९७ ॥ व्रतोद्वाहप्रयाणाश्वगजशिल्पकलादिकम् ॥ चर
स्थिरविमिश्रं च कर्तव्यं कार्मुकोदये ॥ २९८ ॥ चापबंधनमोक्षास्त्रकृषिगोश्वादिकम यत् ॥ प्रस्थानं पशुदासादि कर्तव्यं मकरोदये ॥ २९९ ॥
कृषिवाणिज्यपश्वंबुशिल्पकर्मकलादिकम् ॥ जलपात्रास्त्रशस्त्रादि कर्तव्य कलशोदये ॥ ३०० ॥ व्रतोद्वाहाभिषेकांबुस्थापनं सन्निवेशनम् ॥ भूषणं
जलपात्राश्वकर्म मीनोदये शुभम् ॥ ३०१ ॥ मेषादिषु विलग्नेषु शुद्धेष्वेवं प्रसिद्ध्यति ॥ क्रूरग्रहेक्षितेषूग्रसंयुतेषूग्रमेव हि ॥ ३०२ ॥ गोयुग्मकर्कक
न्यांत्यतुलाचापधराः शुभाः ॥ शुभर्क्षत्वाशुभासत्य इतरा पापराशयः ॥ ३०३ ॥ ग्रहयोगावलोकाभ्यां राशिर्धत्ते ग्रहोद्भवम् ॥ फलं ताभ्यां वि
हीनोऽसौ स्वभावमुपसर्पति ॥ ३०४ ॥ आदौ संपूर्णफलदं मध्ये मध्यफलप्रदम् ॥ अंते तुच्छफले लग्ने सर्वस्मिन्नेवमेव हि ॥ ३०५ ॥ सर्वत्र
प्रथमं लग्नं कर्तुश्चंद्रबलं ततः ॥ कल्प्यामर्दिदौ बलिनि सप्तमे बलिनो ग्रहाः ॥ ३०६ ॥ चंद्रस्य बलिमाधारमाधेय चान्यखेटकम् ॥ आ
धारभूतेनाधेयं धीयते परिधिष्ठिनम् ॥ ३०७ ॥ चेदिंदुः शुभदः सर्वे ग्रहाः शुभफलप्रदाः ॥ अशुभश्चेदशुभदा वर्जयित्वा धनाधिपम् ॥ ३०८ ॥
लग्नस्याभ्युदिता येंशास्तेष्वंशेषु स्थितो ग्रहः ॥ लग्नोद्भवं फलं धत्ते धनातीतो द्वितीयकम् ॥ ३०९ ॥ एवं स्थानेषु शेषेषु चैवमेवं प्रकल्प
येत् ॥ लग्नं सर्वगुणोपेतं लभ्यतेऽल्पैर्दिनैर्नहि ॥३१०॥दोषाल्पत्वं गुणाधिक्यं बहु संततमिष्यते॥दोषादुष्टो हि कालस्तमपि मार्ष्टि पितामहः ॥३११॥
अप्यशौचगुणाधिक्यं दोषान्यत्ते ततो हि ते ॥ अमारिक्ताष्टमीषष्ठीद्वादशीप्रतिपत्स्वपि ॥ ३१२ ॥ परिघस्य च पूर्वार्द्धं व्यतीपाते सवैधृतौ ॥
संध्यासूपप्लुवे विष्टयामशुभं प्रथमार्त्तवम् ॥ ३१३ ॥ रुग्णा पतिप्रिया दुःखा पुत्रिणी भोगनी तथा॥पतिव्रता केशयुक्ता सूयवारादिषु क्रमात्॥३१४॥
यामाग्निरौद्रभाग्याहिद्वीशेंद्रादिद्युपद्विषाः ॥ तारका न हिता मासा मधूर्जशुचिपौषकाः॥ ३१५॥भद्रा च संक्रमो निद्रा रात्रिश्चंद्रार्कयोर्ग्रहः॥ कुलटा

पापभोगेषु निंद्यर्क्षे निंद्यवासरे ॥ ३१६ ॥ तिलाज्यदूर्वा जुहुयाद्गायत्र्याष्टशतं बुधः ॥ सुवर्णगोतिलान्दद्यात्सर्वदोषापनुत्तये ॥ ३१७ ॥ आद्या निश
श्चतस्रस्तु त्याज्या ह्यपि समाः परैः ॥ ओजराश्यंशगे चंद्रे लग्ने पुंग्रहवीक्षिते ॥३१८॥उपवीती युग्मतिथावनग्नः कामयेत्स्त्रियम्॥पुत्रार्थी पुरुषस्त्य
क्ता पौष्णमूलाहिपित्र्यभम् ॥ ३१९ ॥ प्रसिद्धे प्रथमे गर्भे तृतीये वा द्वितीयके ॥ मासे पुंसवनं कार्यं सीमंतं च यथा तथा ॥ ३२० ॥ चतुर्थे मासि
षष्ठे वाप्यष्टमे वा तदीश्वरे ॥ बलोपपन्ने दंपत्योश्चंद्रताराबलान्विते ॥ ३२१ ॥ अरिक्तापर्वदिवसे कुजजीवार्कवासरे ॥ तीक्ष्णमिश्रार्कवर्ज्येषु पुंभांशे
रात्रिनायके ॥३२२॥ शुद्धेऽष्टमे जन्मलग्नात्तयोर्लग्ने न नैधने ॥ शुभग्रहयुते दृष्टे पापदृष्टिविवर्जिते ॥ ३२३ ॥ शुभग्रहेषु धीधर्मकेंद्रेष्वारिभवे त्रिषु ॥
पापेषु सत्सु चंद्रेंत्यनिधनाद्यारिवर्जिते ॥ ३२४ ॥ क्रूरग्रहाणामेकोपि लग्नादंत्यात्मजाष्टगः ॥ सीमंतिनीं वा तद्गर्भं बली हंति न संशयः ॥ ३२५ ॥
तस्मिञ्जन्ममुहूर्तेऽपि सूतकांतेपि वा शिशोः ॥ जातकर्म प्रकर्तव्यं पितृपूजनपूर्वकम् ॥ ३२६॥सूतकांते नामकर्म विधेयं तत्कुलोचितम् ॥ नामपूर्वं
प्रशस्तं स्यान्मंगलैः सुसमीक्षितैः ॥३२७ ॥ देशकालोपघाताद्यैः कालातिक्रमणं यदा ॥ अनस्तगे भृगावीज्ये तत्कार्यं चोत्तरायणे ॥ ३२८ ॥ चर
स्थिरमृदुक्षिप्रनक्षत्रे शुभवासरे ॥ चन्द्रताराबलोपेते दिवसे च शिशोः पितुः॥३२९॥शुभलग्ने शुभांशे च निधने शुद्धिसंयुते ॥ षष्ठे मास्यष्टमे वापि
पुंसां स्त्रीणां तु पञ्चमे ॥ ३३० ॥ सप्तमे मासि वा कार्यं नवान्नप्राशनं शुभम् ॥ रिक्तां दिनक्षयं नन्दां द्वादशीमष्टमीमथ ॥ ३३१॥ त्यक्त्वान्यतिथिषु
प्रोक्तं प्राशनं शुभवासरे ॥ चरस्थिरमृदुक्षिप्रनक्षत्रे शुभनैधने ॥ ३३२ ॥ दशमे शुद्धिसंयुक्ते शुभलग्ने शुभांशके ॥ पूर्वार्द्धे सौम्यखेटेन संयुक्ते वीक्षिते
पि वा॥३३२ ॥ त्रिषष्ठलाभगैः क्रूरैः केंद्रधीधर्मगैः शुभैः॥व्ययारिनिधनस्थे च चन्द्रेऽन्नप्राशनं शुभम्॥३३४॥तृतीये पञ्चमे चाब्दे स्वकुलाचारतोऽपि
वा ॥ बालानां जन्मतश्चौलं स्वगृह्योक्तविधानतः ॥ ३३५ ॥ सौम्यायने नास्तगयोः सुरारिसुरमन्त्रिणोः ॥ अपर्वरिक्तातिथिषु शुक्रेज्यज्ञेंदुवासरे
॥३३६ ॥ दस्रादितीज्यचंद्रेन्द्रपूषभानि शुभानि च ॥ चौलकर्मणि हस्तर्क्षात्त्रीणित्रीणि च विष्णुभात्॥३३७॥ पट्टबंधनचौलान्नप्राशने चोपनायने॥
शुभदं जन्मनक्षत्रमशुभं त्वन्यकर्मणि ॥ ३३८ ॥ अष्टमे शुद्धिसंयुक्ते शुभलग्ने शुभांशके ॥ जन्माष्टमे न शीतांशौ षष्ठाष्टांत्यविवर्जिते ॥ ३३९ ॥
धनत्रिकोणकेंद्रस्थैः शुभैस्त्र्यायारिगैः परैः ॥ अभ्यक्ते सन्ध्ययोर्नारे निशि भुक्त्वा न वाहवे ॥ ३४० ॥ नोत्कटे भूषिते नैव याने न नवमेऽह्नि
च ॥ क्षौरकर्म महीपानां पञ्चमेपंचमेऽहनि ॥ ३४१ ॥ कर्तव्यं क्षौरनक्षत्रेऽप्यथ वास्योदये शुभम् ॥ नृपविप्राज्ञया यज्ञे मरणे बन्धमोक्षणे
॥ ३४२ ॥ उद्वाहेऽखिलवारर्क्षतिथिषु क्षौरमिष्टदम् ॥ कर्तव्यं मङ्गलेष्वादौ मङ्गलाय क्षुरार्पणम् ॥ ३४३ ॥ नवमे सप्तमे वापि पञ्चमे

दिवसेऽपि वा ॥ तृतीये बीजनक्षत्रे शुभवारे शुभोदये ॥ ३४४ ॥ सम्यग्गृहाण्यलंकृत्य वितानध्वजतोरणः ॥ आशिषो वाचनं कार्यं पुण्यं
पुण्यांगनादिभिः ॥ ३४५ ॥ सहवादित्रनृत्याद्यैर्गत्वा प्रागुत्तरां दिशम् ॥ तत्र मृदततस्तीक्ष्णा गृहीत्वा पुनरागतः ॥ ३४६ ॥ मृण्मयेऽप्यथ
वा वेणवेऽपि पात्रे प्रपूरयेत् ॥ अनेकबीजसंयुक्तं तोयं पुष्पाभिशोभितम् ॥ ३४७ ॥ आधानादष्टमे वर्षे जन्मतो वाग्रजन्मनाम् ॥ राज्ञा
मेकादशे मौंजीबंधनं द्वादशे विशाम् ॥ ३४८ ॥ जन्मतः पंचमे वर्षे वेदशास्त्रविशारदः ॥ उपवीती यतः श्रीमान्कार्यं तत्रोपनायनम् ॥ ३४९ ॥
वालस्य बलहीनोऽपि सितो जीवः शुभप्रदः ॥ यथोक्तवत्सरे कार्यमनुक्ते नोपनायनम् ॥ ३५० ॥ दृश्यमानगुरौ शुक्रे शाखेशे चोत्तरायणे ॥ वेदा
नामधिपा जीवशुक्रभौमबुधाः क्रमात् ॥ ३५१ ॥ शरद्ग्रीष्मवसंतेषु व्युत्क्रमात्तु द्विजन्मनाम् ॥ मुख्यं साधारणं तेषां तपोमासादिपंचसु ॥ ३५२ ॥
स्वकुलाचारधर्मज्ञो माघमासे तु फाल्गुने ॥ विधिज्ञश्चार्थवांश्चैत्रे वेदवेदांगपारगः ॥ ३५३ ॥ वैशाषे धनवान्वेदशास्त्रविद्याविशारदः ॥ उपनीतो
वलाढ्यश्च ज्येष्ठे विधिविदां वरः ॥ ३५४ ॥ शुक्लपक्षे द्वितीया च तृतीया पंचमी तथा ॥ त्रयोदशी च दशमी सप्तमी व्रतबंधने ॥ ३५५ ॥
श्रेष्ठा त्वेकादशी षष्ठी द्वादश्यन्यास्तु मध्यमाः ॥ कृष्णे द्वित्रिषुसंख्याश्च तिथ्योऽन्या ह्यतिनिंदिताः ॥ ३५६ ॥ धिष्ण्यान्यर्कत्रयांतेज्यरुद्रादित्युत्त
राणि च ॥ विष्णुत्रयाश्विमित्राब्जयोनिभान्युपनायने ॥ ३५७ ॥ जन्मभाद्दशमं कर्म संघातर्क्षं तु षोडशम् ॥ अष्टादशं समुदयं त्रयोविंशं वि
नाशनम् ॥ ३५८ ॥ मानसं पंचविंशर्क्षं नाचरेच्छुभमेषु तु ॥ आचार्यसौम्यकाव्यानां वाराः शस्ताः शशीनयोः ॥ ३५९ ॥ वारौ तु मध्यमौ चैव
व्रतेऽन्यौ निंदितौ मतौ ॥ त्रिधा विभज्य दिवसं तत्रादौ कर्म दविकम् ॥ ३६० ॥ द्वितीये मानुषं काय तृतीयेंशे च पैतृकम् ॥ स्वनीचगे तदंशे वा
स्वारिभे वा तदंशके ॥ ३६१ ॥ गुरुशिखिनोश्च शाखेशे कलाशीलविवर्जितः ॥ स्वाधिशत्रुगृहस्थे वा तदंशस्थेऽथ वा व्रती ॥ ३६२ ॥ शाखेशे वा गुरौ शुक्रे
महापातककृद्भवेत् ॥ स्वोच्चसंस्थे तदंशे वा स्वराशौ राशिगे गणे ॥ ३६३ ॥ शाखेशे वा गुरौ शुक्रे केंद्रगे वा त्रिकोणगे ॥ अतीव धनवांश्चैव वेदवेदांगपा
रगः ॥ ३६४ ॥ परमोच्चगते जीवे शाखेशे वाथ वा सिते ॥ व्रती विशुद्धे निधने वेदशास्त्रविशारदः ॥ ३६५ ॥ स्वाधिमित्रगृहस्थे वा तस्योच्चस्थे
तदंशगे ॥ गुरौ भृगौ वा शाखेशे विद्याधनसमन्वितः ॥ ३६६ ॥ शाखाधिपतिवारश्च शाखाधिपबलं शिशोः ॥ शाखाधिपतिलग्नं च दुर्लभं त्रितयं
व्रते ॥ ३६७ ॥ तस्माद्द्वांशगे चंद्रे व्रती विद्याविशारदः ॥ पापांशगे स्वांशगे वा दरिद्रो नित्यदुःखितः ॥ ३६८ ॥ श्रवणादिनि नक्षत्रे कर्कांशस्थे
निशाकरे ॥ तदा व्रती वेदशास्त्रधनधान्यसमृद्धिमान् ॥ ३६९ ॥ शुभलग्ने शुभांशे च नैधने शुद्धिसंयुते ॥ लग्ने तु निधने सौम्यैः संयुते वा निरी

क्षिते ॥३७०॥ इष्टैर्जीवार्कचंद्राद्यैः पंचभिर्बलिभिर्ग्रहै ॥ स्थानादिबलसंपूर्णैश्चतुर्भिर्वा शुभान्वितैः ॥ ३७१ ॥ ईक्षन्नैवात्रैकविंशमहादोषविवर्जिते ॥
राशयः सकलाः श्रेष्ठाः शुभग्रहयुतेक्षिताः ॥ ३७२ ॥ शुभनवांशकगता ग्राह्यास्ते शुभराशयः ॥ न कदाचित्कर्कटांशशुभेक्षितयुतोऽपि वा ॥३७३॥
तस्माद्गोमिथुनांशाश्च तुलाकन्यांशकाः शुभाः ॥ एवंविधे लग्नगते नवांशे व्रतमीरितम् ॥ ३७४ ॥ त्रिषडायगतैः पापैः षडष्टांत्यविवर्जितैः ॥ शुभैः
षष्ठाष्टलग्नांत्यवर्जितेन हिमांशुना ॥ ३७५ ॥ स्वोच्चसंस्थोऽपि शीतांशुर्व्रतिनो यदि लग्नगः ॥ न करोति शिशुं निःस्वं सर्वतः क्षयरोगिणम्॥३७६॥
स्फूर्जिते केंद्रगे भानौ व्रतिनां पितृनाशनम् ॥ पंचदोषोनितं लग्नं शुभदं चोपनायने ॥ ३७७ ॥ विना वसंतऋतुना कृष्णपक्षे गलग्रहे ॥ अनध्याये
विष्टिषष्ठ्योर्न तु सस्कारमर्हति ॥३७८॥ त्रयोदश्यादिचत्वारि सप्तम्यादिदिनत्रयम् ॥ चतुर्थी वा शुभाः प्रोक्ता अष्टावेते गलग्रहाः ॥ ३७९ ॥ क्षुरि
कावंधनं वक्ष्ये नृपाणां प्राक्करग्रहात् ॥ विवाहोक्तेषु मासेषु शुक्लपक्षेऽप्यनस्तगे ॥ ३८० ॥ जीवे शुक्रे च भूपुत्रे चंद्रताराबलान्विते ॥ मौंजीबंधो
क्ततिथिषु कुजवर्जितवासरे ॥ ३८१ ॥ नचेन्नवांशके कर्तुरष्टमोदयवर्जिते ॥ शुद्धेऽष्टमे विधौ लग्ने षष्ठाष्टांत्यविवर्जिते ॥३८२ ॥धनत्रिकोणकेंद्रस्थैः
शुभैरुयायारिगैः परैः ॥ क्षुरिकाबंधनं कार्यमर्चयित्वामरान्पितॄन् ॥३८३॥ अर्चयेत्क्षुरिकां सम्यग्देवतानां च सन्निधौ ॥ ततः सुलग्ने बध्नीयात्कटयां
लक्षणसंयुताम् ॥ ३८४ ॥ आयामार्द्धाग्रविस्तारप्रमाणेनैवच्छेदयत् ॥ तच्छेदखंडान्यायाः स्युर्ध्वजाये रिपुनाशनम् ॥ ३८५ ॥ धूम्राये मरणं
सिंहे जयः शुनि च रोगिता ॥ धनलाभो वृषेऽत्यंतं दुःखी भवति गर्दभे ॥३८६ ॥ गजायेऽत्यंतसंप्रीतिर्ध्वांक्षे वित्तविनाशनम् ॥ खड्गपुत्रिकयोर्मानं
गणयेत्स्वांगुलेन तु ॥ ३८७ ॥ मानांगुलेषु पर्यायामेकादशमितां त्यजेत् ॥ शेषाणामगुलीनां च फलानि स्युर्यथाक्रमम् ॥ ३८८ ॥ पुत्रलाभः
शत्रुवधः स्त्रीलाभो गमन शुभम् ॥ अर्थहानिश्चार्थवृद्धिः प्रीति सिद्धिजयः स्तुतिः ॥ ३८९ ॥ स्थितो ध्वजे वृषाये वा नष्टाचेत्पूर्वतो व्रणम् ॥ सिंहे
गजे मध्यभागे त्वंतभागे श्वकाकयोः ॥ ३९० ॥ धूम्रगर्दभयोर्नैव व्रणं श्रयोंत्यभागगम् ॥ अथोत्तरायणे शुक्रजीवयोर्दृश्यमानयोः ॥ ३९१ ॥ द्विजा
तीनां गुरोर्गेहान्निवृत्तानां यतात्मनाम् ॥ चित्रोत्तरादितीज्यांत्यहरिमित्रविधातृषु ॥ ३९२ ॥ भेष्वर्केंदुज्ञेज्यशुक्रवारलग्नांशकेषु च ॥ प्रतिपत्पर्वरिक्ता
मा चाष्टमी च दिनत्रयम् ॥३९३ ॥ हित्वान्यदिवसे कार्यं समावर्तनमुंडनम् ॥ सर्वाश्रमाणां विप्रेंद्र ह्युत्तमोऽयं गृहाश्रमः ॥ ३९४ ॥सुखं तत्रापि भा
मिन्यां शीलवत्यां स्थितं ततः ॥ तस्याः सच्छीललब्धस्तु सुलग्नवशतः खलु ॥३९५॥ पितामहोक्तं संवीक्ष्य लग्नशुद्धिं प्रवक्ष्यहम् ॥ पुण्येऽह्नि
लक्षणोपेतं सुखासीनं सुचेतसम् ॥ ३९६ ॥ प्रणम्य देववत्पृच्छेद्दैवज्ञं भक्तिपूर्वकम् ॥ तांबूलफलपुष्पाद्यैः पूर्णांजलिरुपागतः ॥ ३९७ ॥ तत्र चल्ल

ग्नगः क्रूरस्तस्मात्सप्तमगः कुजः ॥ दंपत्योर्मरणं वाच्य वर्षाणामष्टकात्पुरा ॥ ३९८ ॥यदि लग्नगतश्चंद्रस्तस्मात्सप्तमगः कुजः ॥ विज्ञेयं
भर्तृमरणमष्टवर्षांतरे बुधैः ॥ ३९९॥ लग्नात्पंचमगः पापः शत्रुदृष्टश्च नीचगः ॥ मृतपुत्राथ वा कन्या कुलटा वा न संशयः ॥ ४०० ॥
तृतीयपंचसप्तायकर्मगो वा निशाकरः ॥ लग्नात्करोति संबंधं दंपत्योर्गुरुवीक्षितः ॥ ४०१ ॥ तुलागोकर्कटा लग्नसंस्थाः शुक्रेंदुसंयुताः ॥ वीक्षिताः
पृच्छतां नृणां कन्यालाभो भवेत्तदा ॥ ४०२ ॥ स्त्रीद्रेष्काणः स्त्रीनवांशे युग्मलग्नं समागतम् ॥ वीक्षितं चंद्रशुक्राभ्यां कन्यालाभो भवेत्तदा॥४०३॥
एवं स्त्रीणां भर्तृलब्धिः पुंलग्ने पुंनवांशके ॥ पृच्छकस्य भवेल्लग्नं पुंग्रहैरवलोकितम्॥४०४॥कृष्णपक्षे प्रश्नलग्नाद्यस्य राशौ शशी यदा ॥ पापदृष्टोऽथ
वा रंध्रे न संबंधो भवेत्तदा ॥ ४०५ ॥ पुण्यैर्निमित्तशकुनैः प्रश्नकाले तु मंगलम्॥दंपत्योरशुभैरेतैरशुभं सर्वतो भवेत् ॥ ४०६ ॥ पंचांगशुद्धिदिवसे
चंद्रताराबलान्विते ॥ विवाहभस्योदये वा कन्यावरणमन्वयैः ॥ ४०७ ॥ भूषणैः पुष्पतांबूलफलैर्गंधाक्षतादिभिः ॥ शुक्लांबरैर्गीतवाद्यैर्विप्राशीर्वचनैः
सह ॥ ४०८ ॥ कारयेत्कन्यकागेहे वरः प्रणवपूर्वकम् ॥ तदा कुर्यात्पिता तस्याः प्रदानं प्रीतिपूर्वकम् ॥ ४०९ ॥ कुलशीलवयोरूपवित्त
विद्यायुताय च ॥ वशय च रूपवतीं कन्यां दद्याद्यवीयसीम् ॥ ४१० ॥ संपूज्य प्रार्थयित्वा च शचीं देवीं गुणाश्रयाम् ॥ त्रैलोक्यसुन्दरीं
दिव्यगंधमाल्यांबरावृताम् ॥ ४११ ॥ सर्वलक्षणसंयुक्तां सर्वाभरणभूषिताम् ॥ अनर्घमणिमालाभिर्भासयंतीं दिगंतरान् ॥ ४१२ ॥
विलासिनीसहस्राद्यैः सेवमानामहर्निशम् ॥ एवंविधां कुमारीं तां पूजांते प्रार्थयेदिति ॥ ४१३ ॥ देवींद्राणि नमस्तुभ्यं देवेंद्रप्रियभा
मिनि ॥ विवाहे भाग्यमारोग्यं पुत्रलाभं च देहि मे ॥ ४१४ ॥ युग्मेऽब्दे जन्मतः स्त्रीणां प्रीतिदं पाणिपीडनम् ॥ एतत्पुंसामयुग्मेऽब्दे व्यत्यये
नाशनं तयोः ॥ ४१५ ॥ माघफाल्गुनवैशाखज्येष्ठमासाः शुभप्रदाः ॥ मध्यमा कार्तिको मार्गशीर्षो वै निंदिताः परे ॥ ४१६ ॥
न कदाचिद्दशर्क्षेषु भानोरार्द्राप्रवेशनात् ॥ विवाहो देवतानां च प्रतिष्ठां चोपनायनम् ॥ ४१७ ॥ नास्तंगते सिते जीवे न तयोर्बालवृद्धयोः ॥
न गुरौ सिंहराशिस्थे सिंहांशकगतेपि वा ॥ ४१८ ॥ पश्चात्प्रागुदितः शुक्रो दशत्रिदिवसं शिशुः ॥ वृद्धः पंचदिनं पक्ष गुरुः पक्षं च सर्वतः॥४१९ ॥
अप्रबुद्धो हृषीकेशो यावत्तावन्न मंगलम् ॥ उत्सवे वासुदेवस्य दिवसे नान्यमंगलम् ॥ ४२०॥ न जन्ममासे जन्मर्क्षे न जन्मदिवसेऽपि च ॥ आद्य
गर्भसुतस्याथ दुहितुर्वा करग्रहः ॥ ४२१ ॥ नैवोद्वाहो ज्येष्ठपुत्रीपुत्रयोश्च परस्परम् ॥ ज्येष्ठमासे तयोरेकज्येष्ठे श्रेष्ठश्च नान्यथा ॥ ४२२॥ उत्पातग्रह
णादूर्ध्वं सप्ताहमखिलग्रहे ॥ नाखिले त्रिदिनं नेष्टं त्रिद्युस्पृक्च क्षयं तथा॥४२३॥ग्रस्तास्ते त्रिदिनं पूर्वं पश्चाद्ग्रस्तोदयेऽथवा ॥ संध्यायां त्रिदिनं तद्व

त्रिशीथे सप्त एव च ॥ ४२४ ॥ मासान्ते पच दिवसांस्त्यजेद्रिक्तां तथाष्टमीम् ॥ व्यतीपातं वैधृतिं च संपूर्णं परिघार्द्धकम् ॥ ४२५ ॥ पौष्णभत्र्युत्त
रामैत्रमरुचंद्रार्कपित्र्यभैः ॥ समूलभैरविद्धैस्तैः स्त्रीकरग्रह इष्यते ॥ ४२६॥ विवाहे बलमावश्यं दंपत्योर्गुरुसूर्ययोः ॥ चेत्पूजा यत्नतः कार्या दुर्बल
ग्रहयोस्तयोः ॥ ४२७॥ गोचरं वेधजं चाष्टवर्गजं रूपजं बलम् ॥ यथोत्तरं बलाधिक्यं स्थूलं गोचरमार्गजम् ॥ ४२८ ॥ चंद्रताराबलं वीक्ष्य ततः
पंचांगजं बलम् ॥ तिथिरेकगुणा वारो द्विगुणस्त्रिगुणं च भम् ॥ ४२९ ॥ योगश्चतुर्गुणः पञ्चगुणं तिथ्यर्द्धसंज्ञितम् ॥ ततो मुहूर्तो बलवांस्ततो लग्न
बलाधिकम् ॥ ४३० ॥ ततो बलवती होरा द्रेष्काणो बलवांस्ततः ॥ ततो नवांशो बलवान्द्वादशांशो बली ततः॥४३१ ॥त्रिंशांशो बलवांस्तस्माद्वी
क्ष्यमेतद्बलाबलम् ॥ शुभेक्षितयुताः शस्ता उद्वाहेऽखिलराशयः॥४३२॥चंद्रार्केज्यादयः पच यस्य राशेस्तु खेचराः॥इष्टास्तच्छुभदं लग्नं चत्वारोऽपि बला
न्विताः॥ १३३॥जामित्रशुद्ध्यैकविंशन्महादोषविवर्जितम्॥एकविंशतिदोषाणां नामरूपफलानि च॥४३४॥वक्ष्यंतेऽत्र समासेन शृणु नारद सांप्रतम् ॥
पञ्चांगशुद्धिरहित्यं दोषस्त्वाद्यः प्रकीर्तितः॥४३५॥उदयास्तशुद्धिर्हीनो द्वितीयः सूर्यसंक्रमः॥तृतीयः पापषड्वर्गो भृगुःषष्ठः कुजोऽष्टमः॥४३६॥गंडांतं
कर्तरी रिष्फषडष्टेन्दुगतो ग्रहः ॥ दंपत्योरष्टमं लग्नं राशिर्विषघटी तथा ॥४३७ ॥ दुर्मुहूर्तो वारदोषः खार्जूरिकसमाङ्घ्रिभम् ॥ ग्रहणोत्पातभं क्रूरवि
द्धर्क्षं क्रूरसंयुतम् ॥ ४३८ ॥ कुनवांशो महापातो वैधृतिश्चैकविंशतिः ॥ तिथिवारर्क्षयोगानां करणस्य च मेलनम् ॥ ४३९ ॥ पंचांगमस्य शुद्धि
स्तु पंचांगशुद्धिरीरिता ॥ यस्मिन्पंचांगदोषोऽस्ति तस्मिँल्लग्ने निरर्थकम् ॥ ४४० ॥ त्यजेत्पंचैष्टिकं चापि विषसंयुक्तदुग्धवत् ॥ लग्नलग्नांशकौ
स्वस्वपतिना वीक्षितौ युतौ ॥ ४४१ ॥ न चेद्वान्योन्यपतिना शुभमित्रेण वा तथा ॥ वरस्य मृत्युः स्यात्ताभ्यां सप्तसप्तोदयांशकौ ॥ ४४२ ॥
एवं तौ न युतौ दृष्टौ मृत्युर्वध्वाः करग्रहे॥ त्याज्याः सूर्यस्य संक्रांतेः पूर्वतः परतस्तथा ॥ ४४३ ॥ विवाहादिषु कार्येषु नाड्यः षोडशषोडश॥ षड्वर्गः
शुभदः श्रेष्ठो विवाहस्थापनादिषु ॥ ४४४ ॥ भृगुषष्ठाह्वयो दोषो लग्नात्षष्ठगते सिते ॥ उच्चगे शुभसंयुक्ते तल्लग्नं सर्वदा त्यजेत् ॥ ४४५ ॥ कु
जोऽष्टमो महादोषो लग्नादष्टमगे कुज ॥ शुभत्रययुतं लग्नं न त्यजेत्तुंगगो यदि ॥ ४४६ ॥ पूर्णानंदाख्ययोस्तिथ्योः संधिर्नाडीद्वयं यदा ॥ गंडांतं
मृत्युदं जन्मयात्रोद्वाहव्रतादिषु ॥४४७॥ कुलीरसिंहयोः कीटचापयोर्मीनमेषयोः ॥ गंडातमंतरालं स्याद्घटिकार्द्धं मृतिप्रदम् ॥ ४४८ ॥ सार्पैन्द्रपौ
ष्णभेष्वंत्यषोडशैशा भसंधयः ॥ तदग्रिमेष्वाद्यपादा भानां गंडातसंज्ञकाः ॥ ४४९ ॥ उग्रं च संधित्रितयं गंडातं त्रिविधं महत् ॥ लग्नाभिमुखयोः
पापग्रहयोर्ऋजुवक्रयोः ॥ ४५० ॥ सा कर्तरीति विज्ञेया दंपत्योर्गलकर्तरी ॥ कर्तरीयोगदुष्टं यल्लग्नं तत्परिवर्जयेत् ॥ ४५१ ॥ अपि

सौम्यग्रहैर्युक्तं गुणैः सर्वैः समन्वितम् ॥ षडष्टरिष्फगे चंद्रे लग्नदोषः स्वसंज्ञकः ॥ ४५२ ॥ तल्लग्नं वर्जयेद्यत्नाज्जीवशुक्रसमन्वितम् ॥
उच्चगे नीचगे वापि मित्रभे शत्रुराशिगे ॥ ४५३ ॥ अपि सर्वगुणोपेतं दंपत्योर्निधनप्रदम् ॥ शशांके ग्रहसंयुक्ते दोषः संग्रहसंज्ञकः ॥ ४५४ ॥ तस्मि
न्संग्रहदोषे तु विवाहं नैव कारयेत् ॥ सूर्येण संयुते चंद्रे दारिद्र्यं भवति स्फुटम् ॥ ४५५ ॥ कुजेन मरणं व्याधिः सौम्येन त्वनपत्यता ॥ दौर्भाग्यं
गुरुणा युक्ते सापत्यं भार्गवेण तु॥ ४५६ ॥ प्रव्रज्या सूर्यपुत्रेण राहुणा मूलसंक्षयः॥ केतुना संयुते चन्द्रे नित्यं कष्टं दरिद्रता ॥४५७॥ पापग्रहयुते
चन्द्रे दंपत्योर्मरणं भवेत् ॥ शुभग्रहयुते चंद्रे स्वोच्चस्थे मित्रराशिगे ॥४५८ ॥ दोषायनं भवेल्लग्नं दंपत्योः श्रेयसे सदा॥स्वोच्चगो वा स्वर्क्षगो वा मित्र
क्षेत्रगतोऽपि वा ॥ ४५९ ॥ पापग्रहयुतश्चंद्रः करोति मरणं तयोः ॥ दंपत्योरष्टमं लग्नमष्टमो राशिरेव च ॥४६०॥यदि लग्नगतः सोपि दंपत्योर्मरण
प्रदः ॥ स राशिः शुभसंयुक्तो लग्नं वा शुभसंयुतम् ॥ ४६१ ॥ लग्नं विवर्जयेद्यत्नात्तदंशांशतदीश्वराम् ॥ दंपत्योर्द्वादशं लग्नं राशिर्वा यदि लग्नगः
॥ ४६२ ॥ अर्थहानिस्तयोरस्मात्तदंशस्वामिनं त्यजेत् ॥ जन्मराश्युदयश्चैव जन्मलग्नोदयः शुभः ॥४६३॥ तयोरुपचयस्थानं लग्नेत्यंतशुभप्रदम्॥
खमार्गणा वेदपक्षाः खरामा वेदमार्गणाः ॥ ३६४ ॥ वह्निचंद्रा रूपदस्राः खरामा व्योमबाहवः ॥ द्विरामाः स्वाग्नयः शून्यदस्राः कुंजरभूमयः॥४६५॥
रूपपक्षा व्योमदस्रा वेदचन्द्राश्चतुर्दश ॥ शून्यचन्द्रा वेदचन्द्रा षड्ऋक्षा वेदबाहवः ॥४६६॥ शून्यदस्राः शून्यचंद्राः पूर्णचंद्रा गतेंद्रवः॥ तर्कचंद्रा
वेदपक्षाः खरामाश्चाश्विभात्क्रमात् ॥ ४६७ ॥ आभ्यः परास्तु घटिकाश्चतस्रो विषसंज्ञिताः ॥ विवाहादिषु कार्येषु विषनाडीं विव
र्जयेत् ॥ ४६८ ॥ भास्करादिषु वारेषु ये मुहूर्ताश्च निंदिताः ॥ विवाहादिषु ते वर्ज्या अपिलक्षगुणैर्युताः ॥ ४६९ ॥ निहिता
वारदोषा ये सूर्यवारादिषु क्रमात् ॥ अपि सर्वगुणोपेतास्ते वर्ज्याः सर्वमंगले ॥ ४७० ॥ एकार्गलांघ्रितुल्यं यत्तल्लग्नं च विवर्जयेत् ॥
अपिशुक्रेज्यसंयुक्तं विषसंयुक्तदुग्धवत् ॥ ४७१ ॥ ग्रहणोत्पातभं त्याज्यं मंगलेषु ऋतुत्रयम् ॥ यावच्च शशिना भुक्ता भुक्तभं दग्धकाष्ठवत् ॥
॥ ४७२ ॥ मंगलेषु त्यजेत्खेटैर्विद्धं च क्रूरसंयुतम् ॥ अखिलर्क्षं पंचगव्यं सुराबिंदुयुतं यथा ॥ ४७३ ॥ पाद एव शुभैर्विद्धमशुभं नैव कृत्स्नभम्
क्रूरविद्धं युतं धिष्ण्यं निखिलं नैव मंगलम् ॥ ४७४ ॥ तुलामिथुनकन्यांशा धनुरंत्यार्द्धसंयुताः ॥ एते नवांशाः शुभदा वृषभस्यांशकाः खलु
॥ ४७५ ॥ अंत्यांशास्तेपि शुभदा यदि वर्गोत्तमाह्वयाः ॥ अन्ये नवांशा न ग्राह्या यतस्ते कुनवांशकाः ॥ ४७६ ॥ कुनवांशकलग्नं यत्त्याज्यं
सर्वगुणान्वितम् ॥ यस्मिन्दिने महापातस्तद्दिनं वर्जयेच्छुभे ॥ ४७७ ॥ अपि सर्वगुणोपेतं दम्पत्योर्मृत्युदं यतः ॥ अनुक्ताः स्वल्पदोषाः स्युर्विद्युन्नी

हारवृष्टयः ॥ ४७८ ॥ प्रत्यर्कपरिवेषेंद्रचापांबुधरगर्जनाः ॥ लत्तोपग्रहपाताख्या मासदग्धाह्वया तिथिः ॥ ४७९ ॥ दग्धलग्नांधबधिरपंगुसंज्ञाश्च
राशयः ॥ एवमाद्यास्ततस्तेषां व्यवस्था क्रियतेऽधुना ॥ ४८० ॥ अकालजा भवंत्येते विद्युन्नीहारवृष्टयः ॥ दोषाय मंगले नूनमदोषायैव कालतः ॥
॥ ४८१ ॥ बृहस्पतिः केंद्रगतः शुक्रो वा यदि वा बुधः ॥ एकोऽपि दोषनिचयं हरत्येव न संशयः ॥ ४८२ ॥ तिर्यक्पंचोर्द्ध्वगाः पञ्च रेखा द्वे द्वे च
कोणयोः ॥ द्वितीये शंभुकोणेऽग्निधिष्ण्यं चक्रे प्रविन्यसेत् ॥ ४८३॥ भान्यत्र साभिजित्येकरेखाखेटेन विद्धभम् ॥पुरतः पृष्ठतोऽर्काद्या दिनर्क्षं लत्त
यंति यत् ॥ ४८४ ॥ अर्काकृतिगुणाद्यंगबाणाष्टनवसंख्यभम् ॥ सूर्यभात्सार्प्पपित्र्यांत्यत्वाष्ट्रमित्रोडुविष्णुभम् ॥ ४८५ ॥ संख्यया दिनभे
तावदश्विभात्पातदुष्टभम् ॥ सौराष्ट्रे साल्वदेशे तु लत्तितं भं विवर्जयेत् ॥ ४८६ ॥ कलिंगवंगदेशेषु पातितं न शुभप्रदम् ॥ बाह्लिके कुरुदेशे
चान्यस्मिन्देशे न दूषणम् ॥ ४८७ ॥ तिथयो मासदग्धाश्च दग्धलग्नानि यान्यपि ॥ मध्यदेशे विवर्ज्यानि न दुष्टानीतरेषु च॥४८८॥ पङ्गवं
धकाणलग्नानि मासशून्याश्च राशयः ॥ गौडमालवयोस्त्याज्या अन्यदेशे न गर्हिताः॥ ४८९ ॥दोषदुष्टं सदा कालं सन्निमार्ष्टुं न शक्यते ॥
अपि धातुरतो ग्राह्यं दोषाल्पत्वं गुणाधिकम् ॥ ४९० ॥ एवं सुलग्ने दंपत्योः कारयेत्सम्यगीक्षणम् ॥ हस्तोच्छ्रितां चतुर्हस्तैश्चतुरस्रां समंततः
॥ ४९१ ॥ स्तंभश्चतुर्भिः सुश्लक्ष्णैर्वामभागे तु सन्नताम् ॥ समंडपां चतुर्दिक्षु सोपानैरतिशोभिताम् ॥ ४९२ ॥ प्रागुदक्प्रवणां रंभास्तंभैर्हंसशुका
दिभिः ॥ विचित्रितां चित्रकुंभैर्विविधैस्तोरणांकुरैः ॥ ४९३ ॥ शृङ्गारपुष्पनिचयैर्वर्णकैः समलंकृताम् ॥ विप्राशीर्वचनैः पुण्यस्त्रीभिर्दिव्यैर्मनो
रमाम् ॥ ४९४ ॥ वादित्रनृत्यगीताद्यैर्हृदयानंदिनीं शुभाम् ॥ एवंविधां समारोहेन्मिथुनं स्वाग्निवेदिकाम् ॥ ४९५ ॥ अष्टधा राशिकूटं च स्वादू
डुगणराशयः ॥ राशीशयोनिवर्णाख्यऋतवः पुत्रपौत्रदाः ॥४९६॥ एकराशौ पृथग्धिष्ण्ये दंपत्योः पाणिपीडनम् ॥ उत्तमं मध्यमं भिन्नं राश्यैकत्वं
ययोस्तयोः ॥ ४९७ ॥ एकर्क्षे त्वेकराशौ हि विवाहः प्राणहानिदः ॥ स्त्रीधिष्ण्यादाद्यनवके स्त्रीदूरमतिनिंदितम् ॥ ४९८ ॥ द्वितीये मध्यमं श्रेष्ठं
तृतीये नवके नृभम् ॥ तिस्रः पूर्वोत्तरा धातृयाम्यमाहेशतारकाः ॥४९९॥ इति मर्त्यगणे ज्ञेयः स्यादमर्त्यगणः परः॥ हर्यादित्यार्कवाय्वंत्यमित्राश्वी
ज्येंदुतारकाः ॥५००॥ रक्षोगणः पितृत्वाष्ट्रद्विदैवाग्नींद्रतारकाः ॥ वसुवारीशमूलाहितारकाभिर्युतास्ततः ॥ ५०१ ॥ दंपत्योर्जन्मभे चैकगणे प्रीतिर
नेकधा ॥ मध्यमा देवमर्त्यानां राक्षसानां तयोर्मृतिः ॥ ५०२ ॥ मृत्युः षष्ठाष्टके पंचनवमे त्वनपत्यता ॥ नैःस्व्य द्विर्द्वादशेऽन्येषु दंपत्योः प्रीतिरुत्त
मा ॥ ५०३ ॥ एकाधिपे मित्रभावे शुभदं पाणिपीडनम् ॥ द्विर्द्वादशे त्रिकोणे च न कदाचित्षडष्टके ॥ ५०४ ॥अश्वेभमेषसर्पाहिश्वो

तुमेषोतुमूषकाः ॥ आखुगोमहिषव्याघ्रकालीव्याघ्रमृगद्वयम् ॥ ५०५ ॥ श्वानः कपिर्बभ्रुयुगं कपिसिंहतुरंगमाः ॥ सिंहगोदंतिनो भानां योनयः
स्युर्यथाश्विभात् ॥ ५०६ ॥ श्वैणं बभ्ररगं मेषवानरौ सिंहवारणम् ॥ गोव्याघ्रमाखुमार्जारं महिषाश्वं च शात्रवम् ॥ ५०७ ॥ झषालिकर्कटा विप्रास्त
दूर्ध्वाः क्षत्रियादयः ॥ पुंवर्णराशेः स्त्रीराशौ सति हीने यथाशुभम् ॥ ५०८ ॥ चतुस्त्रिद्व्यंघ्रिभोत्थायाः कन्यायाश्चाश्विभात्क्रमात् ॥ वह्निभादिंदुभान्ना
डीत्रिचतुःपंचपर्वसु ॥ ५०९ ॥ गणयेत्संख्यया चैकनाड्यां मृत्युर्न पार्श्वयोः ॥ प्राजापत्यब्राह्मदैवा विवाहाश्चार्षसंयुताः ॥ ५१० ॥ उक्तकाले तु
कर्तव्याश्चत्वारः फलदायकाः ॥ गंधर्वासुरपैशाचराक्षसाख्यास्तु सर्वदा ॥ ५११ ॥ चतुर्थमभिजिल्लग्नमुदयर्क्षाच्च सप्तमम् ॥ गोधूलिकं तदुभयं विवाहे
पुत्रपौत्रदम् ॥ ५१२ ॥ प्राच्यान च कलिंगानां मुख्यं गोधूलिकं स्मृतम् ॥ अभिजित्सर्वदेशेषु मुख्यो दोषविनाशकृत् ॥ ५१३ ॥ मध्यंदिनगते
भानौ मुहूर्तोऽभिजिदाह्वयः ॥ नाशयत्यखिलान्दोषान्पिनाकी त्रिपुरं यथा ॥५१४॥ पुत्रोद्वाहात्परं पुत्रीविवाहो न ऋतुत्रये ॥ न तयोर्व्रतमुद्वाहा
न्मंगले नान्यमंगलम् ॥ ५१५ ॥ विवाहश्चैकजन्यानां षण्मासाभ्यंतरे यदि ॥ असंशयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेत् ॥ ५१६ ॥ प्रत्युद्वाहो
नैव कार्यो नैकस्मै दुहितृद्वयम् ॥ न चैकजन्ययोः पुंसोरेकजन्ये तु कन्यके ॥ ५१७ ॥ नैवं कदाचिदुद्वाहो नैकदा मुंडनद्वयम् ॥ दिवाजातस्तु
पितरं रात्रौ तु जननीं तथा ॥ ५१८ ॥ आत्मानं संध्ययोर्हंति नास्ति गंडे विपर्ययः ॥ सुतः सुता वा नियतं श्वसुरं हंति मूलजः ॥ ५१९ ॥
तदंत्यपादजो नैव तथाश्लेषाद्यपादजः ॥ ज्येष्ठांत्यपादजौ ज्येष्ठं बालो हंति न बालिका ॥ ५२० ॥ न बालिकांबुमूलर्क्षे मातरं पितरं तथा ॥
सैंद्री धवाग्रजं हंति देवरं तु द्विदैवजा ॥ ५२१ ॥ आरभ्योद्वाहदिवसात् षष्ठे वाप्यष्टमे दिने ॥ वधूप्रवेश संपत्त्यैदशमे सप्तमे दिने ॥ ५२२ ॥
हायनद्वितयं जन्मभलग्नदिवसानपि ॥ संत्यज्य द्युतिशुक्रेऽपि यात्रा वैवाहिकी शुभा ॥ ५२३ ॥ श्रीप्रदं सर्वगीर्वाणस्थापनं चोत्तरायणे ॥ गीर्वाणपू
र्वगीर्वाणमत्रिणोर्दृश्यमानयोः ॥५२४॥ विचैत्रेष्वेव मासेषु माघादिषु च पंचसु ॥ शुक्लपक्षेषु कृष्णेषु तदादिष्वष्टसु शुभम् ॥५२५॥ दिनेषु यस्य
देवस्य या तिथिस्तत्र तस्य च ॥ द्वितीयादिद्वये पंचम्यादितस्तिसृषु क्रमात् ॥ ५२६ ॥ दशम्यादेश्चतसृषु पौर्णमास्यां विशेषतः ॥ त्र्युत्तरादितिचंद्रां
त्यहस्तत्रयगुरूडुषु ॥ ५२७ ॥ साश्विधातृजलाधीशहरिमित्रवसुष्वपि ॥ कुजवार्जितवारेषु कर्तुः सूर्ये बलप्रदे ॥ ५२८ ॥चंद्रताराबलोपेते पूर्वाह्णे शोभ
ने दिने ॥शुभलग्ने शुभांशे च कर्तुर्न निधनोदये ॥ ५२९ ॥ राशयः सकलाः श्रेष्ठाः शुभग्रहयुतेक्षिताः ॥ पंचाष्टके शुभे लग्ने नैधने शुद्धिसंयुते
॥ ५३० ॥ लग्नस्थाश्चंद्रसूर्यारराहुकेत्वर्कसूनवः ॥ कर्तुर्मृत्युप्रदाश्चान्ये धनधान्यसुखप्रदाः ॥५३१॥ द्वितीये नेष्टदाः पापाः सौम्याश्चंद्रश्चः वित्तदाः ॥

तृतीये निखिलाः खेटाः पुत्रपौत्रसुखप्रदाः ॥ ५३२ ॥ चतुर्थे सुखदाः सौम्याः क्रूराः खेटाश्च दुःखदाः ॥ ग्लानिदाः पंचमे क्रूराः सौम्याः पुत्रसुख
प्रदाः॥५३३ ॥षष्ठे शुभाः शत्रुदाः स्युः पापाः शत्रुक्षयंकराः ॥ व्याधिदाः सप्तमे पापाः सौम्याः शुभफलप्रदाः ॥ ५३४ ॥ अष्टमस्थाः खगाः सर्वे
कर्तुर्मृत्युप्रदायकाः ॥ धर्मे पापा घ्नंति सौम्याः शुभदा मंगलप्रदाः ॥५३५ ॥ कर्मगा दुःखदाः पापा सौम्याश्चंद्रश्च कीर्तिदाः ॥ लाभस्थानगताः सर्वे
भूरिलाभप्रदा ग्रहाः ॥ ५३६ ॥ व्ययस्थानगताः शश्वद्बहुव्ययकरा ग्रहाः ॥ हंत्यर्थहीनाः कर्तारं मंत्रहीनास्तु ऋत्विजम् ॥ ५३७ ॥ स्थिरं लक्षणही
नास्तु न प्रतिष्ठासमो रिपुः ॥ गुणाधिकतरे लग्ने दोषः स्वल्पतरो यदि ॥ ५३८॥ सुराणां स्थापनं तत्र कर्तुरिष्टार्थसिद्धिदम् ॥ निर्माणायतनग्रामगृहा
दीनां समासतः॥५३९॥क्षेत्रमादौ परीक्षेत गंधवर्णरसांशकैः॥मधुपुष्पाम्लपिशितगंधं विप्रानुपूर्वकम्॥५४०॥सितं रक्तं च हरितं कृष्णवर्णं यथाक्रमम् ॥
मधुरं कटुकं तिक्तं कषायकरसं क्रमात् ॥ ५४१ ॥ अत्यंतवृद्धिदं नृणामीशानप्रागुदक्प्लुवम् ॥ अन्यदिक्षु प्लुवे तेषां शश्वदत्यंतहानिदम् ॥ ५४२ ॥
समगर्तारत्निमात्रं खनित्वा तत्र पूरयेत् ॥ अत्यंतवृद्धिरधिके हीने हानिः समे समम् ॥ ५४३ ॥ तथा निशादौ तत्कृत्वा पानीयेन प्रपूरयेत् ॥ प्रात
र्दृष्टे जले वृद्धिः समं पंके क्षयः क्षये ॥ ५४४ ॥ एवं लक्षणसंयुक्तं सम्यक् क्षेत्रं समीक्ष्यते ॥ दिक्साधनाय तन्मध्ये समं मंडलमालिखेत् ॥ ५४५ ॥
द्वादशांगुलकं शंकुं स्थाप्येक्षेत्तत्र दिक्क्रमम् ॥ चतुरस्त्रीकृते क्षेत्रे षड्वर्गपरिशोधिते॥५४६॥ रेखामार्गे च कर्त्तव्यं प्राकारं सुमनोहरम् ॥ आयामेषु चतु
र्दिक्षु प्रागादिषु च सत्स्वपि ॥ ५४७ ॥ अष्टावष्टौ प्रतिदिशं द्वाराणि स्युर्यथाक्रमम् ॥ प्रदक्षिणक्रमात्तेषाममूनि च फलानि वै॥५४८॥हानिर्नैःस्व्यं
धनप्राप्तिर्नृपपूजा महद्धनम् ॥अतिचौर्यमतिक्रोधो भीतिर्दिशि शचीपतेः ॥५४९॥ निधनं बंधनं भीतिरर्थाप्तिर्द्धनवर्द्धनम् ॥ अनातंकं व्याधिभयं
निःसत्त्वं दक्षिणादिशि ॥ ५५० ॥ पुत्रहानिः शत्रुवृद्धिर्लक्ष्मीप्राप्तिर्द्धनागमः ॥ सौभाग्यमतिदौर्भाग्यं दुःखं शोकश्च पश्चिमे ॥ २५१ ॥ कलत्रहा
निर्निःसत्त्वं हानिर्द्धान्यधनागमः ॥ संपद्वृद्धिर्मासभीतिरामयं दिशि शीतगोः ॥ ५५२ ॥ एवं गृहादिषु द्वारविस्ताराद्द्विगुणोच्छ्रितम् ॥पश्चिमे दक्षिणे
वापि कपाटं स्थापयेद्गृहे ॥ ५५३ ॥ प्राकारांतःक्षितिं कुर्यादेकाशीतिपदं यथा ॥ मध्ये नवपदे ब्रह्मस्थानं तदतिनिंदितम्॥ ५५४ ॥ द्वात्रिंशदंशाः
प्राकारसमीयांशाः समंततः ॥ पिशाचांशे गृहारंभो दुःखशोकभयप्रदः ॥ ५५५ ॥ शेषांशाः स्युश्च निर्माणे पुत्रपौत्रधनप्रदाः ॥ शिराः स्युर्वास्तुनो
रेखा दिग्विदिग्मध्यसंभवाः ॥५५६॥ ब्रह्मभागाः पिशाचांशाः शिराणां यत्र संहतिः ॥ तत्र तत्र विजानीयाद्वास्तुनो मर्मसंधयः ॥५५७ ॥ मर्माणि
संधयो नेष्टाः स्वस्थेऽप्येवं निवेशने ॥ सौम्यफाल्गुनवैशाखमाघश्रावणकार्तिकाः॥५५८ ॥ मासाः स्युर्गृहनिर्माणे पुत्रारोग्यधनप्रदाः ॥ अकारादिषु

भागेषु दिक्षु प्रागादिषु क्रमात् ॥ ५५९ ॥ खरोश्वोथ हरिः श्वाख्यः सर्पाखुगजशाशकाः ॥ दिग्वर्गाणामियं योनिः स्ववर्गात्पंचमो रिपुः॥५६०॥ साध्यवर्गः पुरः स्थाप्य पृष्ठतः साधकं न्यसेत् ॥ व्यत्यये नाशनं तस्य ऋणमध्यं धनाच्छुभम् ॥ ५६१ ॥ आरभ्य साधकं धिष्ण्यं साध्यं यावच्चतुर्गुणम् ॥ विभजेत्सप्तभिः शेषं साधकस्य धनं तदा ॥ ५६२ ॥ विस्तार आयामगुणो गृहस्य पदमुच्यते ॥ तस्माद्धनाधनायर्क्षवारांशाः संख्यया क्रमात् ॥ ५६३ ॥ धनाधिकं गृहं वृद्ध्यै ऋणाधिकमशोभनम् ॥ विषमायः शुभायैव समायो निर्धनाय च ॥ ५६४ ॥ धनक्षयस्तृतीयर्क्षे पचमर्क्षे परः क्षयः ॥ आत्मक्षयः सप्तमर्क्षे भवत्येव हि भर्तृभात् ॥ ५६५ ॥ द्विर्द्वादशो निर्धनाय त्रिकोणमसुताय च ॥ षट्काष्टकं मृत्यवे स्याच्छुभदा राशयः परे ॥५६६॥ सूर्यांगारकवारांशा वैश्वानरभयप्रदाः ॥ इतरे ग्रहवारांशाः सर्वकामार्थसिद्धिदाः ॥ ५६७ ॥ नभस्यादिषु मासेषु त्रिषु त्रिषु यथाक्रमम् ॥ पूर्वादिकशिरोवामपार्श्वैशायाप्रदक्षिणम् ॥५६८॥ चराह्वयो वास्तुपुमान् चरत्येवं महोदरः॥यद्दिङ्मुखो वास्तुपुमान्कुर्यात्तद्दिङ्मुखं गृहम् ॥५६९॥ प्रतिकूलमुखं गेहं रोगशोकभयप्रदम् ॥ सबलो मुखगेहानामेष दोषो न विद्यते ॥ ५७० ॥ वृत्येटिका स्वर्णरेणुधान्यशैवलसंयुतम् ॥ गृहमध्ये हस्तमात्रे गर्ते न्यासाय विन्यसेत् ॥ ५७१ ॥ वस्त्वायामदलं नाभिस्तस्माद्ध्यंगुलत्रयम् ॥ कुक्षिस्तस्मिन्न्यसेच्छंकुं पुत्रपौत्रविवर्धनम् ॥ ॥ ५७२ ॥ चतुर्विंशत्त्रयोविंशत्षोडशद्वादशांगुलैः ॥ विप्रादीनां कुक्षिमानं स्वर्णवस्त्राद्यलंकृतम् ॥५७३॥ खदिरार्जुनशालोत्थं युगयंत्रं तरूद्भवम् ॥ रक्तचंदनपालाशरक्तशालविशालजम् ॥ ५७४ ॥ शंकुं त्रिधा विभज्याद्यं चतुरस्रं ततः परम् ॥ अष्टास्रं च तृतीयासौ मन्वस्रं मृदुमव्रणम्॥५७५॥ एवं लक्षणसंयुक्तं परिकल्प्य शुभे दिने ॥ षड्वर्गशुद्धिसूत्रेण सूत्रिते धरणीतले ॥ ५७६ ॥ मृदुध्रुवक्षिप्रभेषु रिक्तामावर्जिते दिने ॥ व्यर्कारचरलग्नेषु पापे चाष्टमवर्जिते ॥ ५७७ ॥ नैधने शुद्धिसंयुक्ते शुभलग्ने शुभांशके ॥ शुभेक्षितेऽथ वा युक्ते लग्ने शंकुं विनिक्षिपेत् ॥५७८॥ पुण्याहघोषैर्वादित्रैः पुण्यपुण्यांगनादिभिः ॥ स्वत्रिकेंद्रत्रिकोणस्थैः शुभैस्त्र्यायारिगैः परैः ॥ ५७९ ॥ लग्नांशाष्टारिचंद्रेण दैवज्ञार्चनपूर्वकम् ॥ एकद्वित्रिचतुःशालाः सप्त शाला दशाह्वयाः ॥५८०॥ ताः पुनः षड्विधाः शालाः प्रत्येकं दशषड्विधाः ॥ ध्रुवं धान्यं जयं नंदं खरं कांतं मनोरमम्॥५८१॥सुमुखं दुर्मुखं क्रूरं शत्रुं स्वर्णप्रदं क्षयम् ॥ आक्रंदं विपुलाख्य च विजयं षोडशं गृहम् ॥ ५८२ ॥ गृहाणि गणयेदेवं तेषां प्रस्तारभेदतः ॥ गुरोरधो लघुः स्थाप्यः पुरस्तादूर्ध्ववन्न्यसेत् ॥ ५८३ ॥ गुरुभिः पूरयेत्पश्चात्सर्वलघ्ववधीर्विधिः ॥ कुर्याल्लघुपदेऽलिंदं गृहद्वारात्प्रदक्षिणम् ॥ ५८४ ॥ पूर्वादिगेष्वलिंदेषु गृहभेदास्तु षोडश ॥ स्नानागारं दिशि प्राच्यामाग्नेय्यां पाकमंदिरम्॥५८५॥ याम्यां च शयनागारं नैर्ऋत्यां शास्त्रमंदिरम् ॥प्रतीच्यां भोजनगृहं वा

यव्यां धान्यमदिरम् ॥ ५८६॥ कौबेर्यां देवतागारमीशान्यां क्षीरमंदिरम् ॥ शय्यामूत्रास्त्रतद्विद्य भोजनं मंगलाश्रयम् ॥५८७॥धान्यस्त्रीभोगवित्तं च
शृंगारायतनानि च ॥ ईशान्यादिक्रमस्तेषां गृहनिर्माणकं शुभम् ॥ ५८८ ॥ एतेष्वेतानि शस्त्राणि स्वं स्थाप्यानि स्वदिक्ष्वपि ॥ ध्वजो धूम्रोथ
सिंहः श्वा सौरमेयः खरो गजः ॥ ५८९ ॥ ध्वांक्षश्चैव भवंत्यष्टौ पूर्वादिपाः क्रमादमी ॥ प्लक्षोदुंबरचूताख्या निंबस्तु हि विभीतकाः ॥ ५९० ॥
य कटका दुग्धवृक्षा वृक्षाश्वत्थकपित्थकाः ॥ अगस्तिसिंधुवालाख्यतिंतिडीकाश्च निंदिताः ॥ ५९१ ॥ पित्तवाग्रजदेहस्यात्पश्चिमे दक्षिणे तया ॥
गृहपादागृहस्तभाः समाः शस्ताश्च नासमाः ॥ ५९२ ॥ नात्युच्छ्रितं नातिनीचं कुडचोत्सेधं यथारुचि ॥ गृहोपरि गृहादीनामेवं सर्वत्र चिंतयेत् ॥
॥ ५९३ ॥ गृहादीनां गृहश्रावं क्रमशोऽष्टविधं स्मृतम् ॥ पांचालमानं वैदेहं कौरवं च कुजन्यकम् ॥ ५९४ ॥ मागधं शूरसेनं च गांधारावंतिका
स्मृतम् ॥ सचतुर्भागविस्तारमुत्सेधं यत्तदुच्यते ॥ ५९५ ॥ पांचालमातुलानां च ह्युत्तरोत्तरवृद्धितः ॥ वैदेहादीन्यशेषाणि मानानि स्युर्यथाक्रमम् ॥
॥५९६॥ पांचालमानं सर्वेषां साधारणमतः परम् ॥ अवंतिमानं विप्राणां गांधारं क्षत्रियस्य च ॥ ५९७ ॥ कौजन्यमानं वैश्यानां विप्रादीनां यथो
त्तरम् ॥ यथोदितं जलस्राव्यं द्वित्रिभूमिकवेश्मनाम् ॥ ५९८ ॥ उष्ट्रकुंजरशालानां ध्वजायेप्यथ वा गजे ॥ पशुशालाश्च शालानां ध्वजायेप्यथ वा
गजे ॥ ५९९ ॥ द्वारशय्याशनामत्रध्वजाः सिंहवृषध्वजाः ॥ वास्तुपूजाविधिं वक्ष्ये नववेश्मप्रवेशने ॥६००॥ हस्तमात्रा लिखेद्रेखा दश पूर्वा दशो
त्तराः ॥ गृहमध्ये तंडुलोपर्येकाशीतिपद भवेत् ॥ ६०१ ॥ पंचोत्तरान्वक्ष्यमाणांश्चत्वरिंशत्सुरान् लिखेत् ॥ द्वात्रिंद्वाह्यतः पूज्यास्तत्रांतःस्थास्त्रयो
दश ॥ ६०२ ॥ तेषां स्थानानि नामानि वक्ष्यामि क्रमशोधुना ॥ ईशानकोणतो बाह्ये द्वात्रिंशत्त्रिदशा अमी ॥६०३॥ कृपीटयोनिः पर्जन्यो जयंतः
पाकशासनः॥ सूर्यः शशी मृगाकाशौ वायुः पूषा च नैर्ऋतिः ॥६०४॥गृहाक्षतो दंडधरो गांधर्वो भृगुराजकः ॥ मृगः पितृगणाधीशस्ततो दौवारि
काह्वयः ॥ ६०५ ॥ सोमः सूर्योऽदितिदिती द्वात्रिंशत्त्रिदशा अमी ॥ अथेशानादिकोणस्थाश्चत्वारस्तत्समीपगाः ॥ ६०६॥ आपः सावित्रसंज्ञश्च
जयो रुद्रः क्रमादमी ॥ एकांतरा स्युः प्रागाद्याः परितो ब्रह्मणः स्मृताः ॥ ६०७ ॥ अर्यमा सविता विंबविवस्वान्वसुधाधिपः ॥ मित्रोथ
राजयक्ष्मा च तथा पृथ्वीधराह्वयः ॥ ६०८ ॥ आपवत्सोऽष्टमः पंचचत्वारिंशत्सुरा अमी ॥ आपश्चैवापवत्सश्च पर्जन्योऽग्निर्दितिः क्रमात् ॥
॥ ६०९ ॥ यद्दिक्कानां च वर्गोऽयमेवं कोणेष्वशेषतः ॥ तन्मध्ये विंशतिर्बाह्या द्विपदास्ते तु सर्वदा ॥ ६१० ॥ अर्यमा च विवस्वांश्च मित्रः पृथ्वी
धराह्वयः ॥ ब्रह्मणः परितो दिक्षु चत्वारस्त्रिपदाः स्मृताः ॥ ६११ ॥ ब्रह्माणं च तथैकद्वित्रिपदानर्चयेत्सुरान् ॥ वास्तुमंत्रेण वास्तुज्ञो दूर्वादध्य

क्षतादिभिः ॥ ६१२ ॥ ब्रह्ममंत्रेण वा श्वेतवस्त्रयुग्मं प्रदापयेत् ॥ आवाहनादिसर्वोपचारांश्च क्रमशस्तथा ॥ ६१३॥ नैवेद्यं त्रिविधान्नेन वाद्यैः सह
समर्पयेत् ॥ ताम्बूलं च ततः कर्ता प्रार्थयेद्वास्तुपूरुषम् ॥६१४॥ वास्तुपुरुष नमस्तेऽस्तु भूशय्यानिरत प्रभो॥मद्गृहं धनधान्यादिसमृद्धं कुरु सर्वदा
॥ ६१५ ॥ इति प्रार्थ्य यथाशक्त्या दक्षिणामर्चकाय च ॥ दद्यात्तदग्रे विप्रेभ्यो भोजनं च स्वशक्तितः ॥ ६१६ ॥ अनेन विधिना सम्यग्वास्तुपूजां
करोति यः ॥ आरोग्यं पुत्रलाभं च धनं धान्यं लभेन्नरः ॥ ६१७ ॥ अकृत्वा वास्तुपूजां यः प्रविशेन्नवमंदिरम् ॥ रोगान्नानाविधान्क्लेशानश्नुते सर्वं
संकटम् ॥ ६१८ ॥ अकपाटमनाच्छन्नमदत्तबलिभोजनम् ॥ गृहं न प्रविशेदेवं विपदामाकरं हि तत् ॥ ६१९ ॥ अथो यात्रा नृपादीनामभीष्टफल
सिद्धये ॥ स्यात्तथा तां प्रवक्ष्यामि सम्यग्विज्ञातजन्मनाम् ॥ ६२० ॥ अज्ञातजन्मनां नृणां फलाप्तिर्घुणवर्णवत् ॥ प्रश्नोदयनिमित्ताद्यैस्तेषामपि
फलोदयः ॥ ६२१ ॥ षष्ठचष्टमीद्वादशीषु रिक्तामापूर्णिमासु च॥यात्रा शुक्लप्रतिपदि निर्द्धनाय क्षयाय च ॥६२२॥ मैत्रादितींद्वर्कांत्याश्विहरितिष्यव
सूडुषु ॥ असप्तपञ्चत्र्याद्येषु यात्राभीष्टफलप्रदाः ॥६२३॥ न मंदेंदुदिने प्राचीं न व्रजेद्दक्षिणं गुरौ ॥ सितार्कयोर्न प्रतीचीं नोदीचीं ज्ञारयोर्दिने ॥
॥ ६२४ ॥ इंद्राजपादचतुरास्यार्यमर्क्षाणि पूर्वतः ॥ शूलानि सर्वद्वाराणि मित्रार्केज्याश्वभानि च ॥ ६२५॥क्रमाद्दिग्द्वारभानि स्युः सप्तसप्ताग्निधि
ष्ण्यतः ॥ परिघं लंघयेद्दंडं नाग्निश्वसनर्दिग्गमम् ॥६२६॥आग्नेयं पूर्वदिग्धिष्ण्यैर्विदिशश्चैवमेव हि॥दिग्राशयस्तु क्रमशो मेषाद्याश्च पुनः पुनः ॥
॥ ६२७ ॥ दिगीश्वरे ललाटस्थे यातुर्न पुनरागमः ॥ लग्नस्थो भास्करः प्राच्यां दिशि यातुर्ललाटगः ॥ ६२८ ॥ द्वादशैकादशः शुक्रोऽप्याग्नेय्यां
तु ललाटगः ॥ दशमस्थः कुजो लग्नाद्याम्यां यातुर्ललाटगः ॥ ६२९ ॥ नवमाष्टमगो राहुर्नैरृत्यां तु ललाटगः ॥ लग्नात्सप्तमगः सौरिः प्रतीच्यां
तु ललाटगः ॥ ६३० ॥ षष्ठः पञ्चमगश्चन्द्रो वायव्यां च ललाटगः ॥ चतुर्थस्थानगः सौम्यश्चोत्तरस्यां ललाटगः॥ ६३१ ॥ द्वित्रिस्थानगतो जीव
ईशान्यां वै ललाटगः ॥ ललाटं तु परित्यज्य जीवितेच्छुर्व्रजेन्नरः ॥ ६३२ ॥ विलोमगो ग्रहो यस्य यात्रालग्नोपगो यदि ॥ तस्य भङ्गप्रदो राज्ञस्त
दुर्गोऽपि विलग्नगः ॥ ६३३ ॥ खींद्वयनयोर्यातमनुकूलं शुभप्रदम् ॥ तदभावे दिवारात्रौ यायाद्यातुर्वधोऽन्यथा ॥६३४॥ मूढे शुक्रे कार्यहानिः
प्रतिशुक्रे पराजयः ॥ प्रतिशुक्रकृतं दोषं हंतुं शक्ता ग्रहा न हि ॥ ६३५ ॥ वासिष्ठकाश्यपेयात्रिभारद्वाजाः सगौतमाः ॥ एतेषां पञ्चगोत्राणां
प्रतिशुक्रो न विद्यते ॥ ६३६ ॥ एकग्रामे विवाहे च दुर्भिक्षे राजविग्रहे ॥ द्विजक्षोभे नृपक्षोभे प्रतिशुक्रो न विद्यते ॥६३७॥नीचगोऽरिगृहस्थो वा
वक्रगो वा पराजितः ॥ यातुर्भंगप्रदः शुक्रः स्वोच्चस्थश्चेज्जयप्रदः ॥ ६३८ ॥ स्वाष्टलग्नेष्टराशौ वा शत्रुभात्त्वष्टमेपि वा ॥ तेषामीशस्थराशौ वा

यातुर्मृत्युर्न संशयः ॥ ६३९ ॥ जन्मेशाष्टमलग्नेशौ मिथो मित्रे व्यवस्थितौ ॥ जन्मराश्यष्टमर्क्षोत्थदोषा नश्यंति भावतः ॥ ६४० ॥ क्रूरग्रहेक्षितो
युक्तो द्विःस्वभावोऽपि भंगदः ॥ याने स्थिरोदये नेष्टो भव्ययुक्तेक्षितः स्वयम् ॥ ६४१ ॥ वस्वंत्यार्द्धादिपं च संग्रहं तृणकाष्ठयोः ॥ याम्यदिग्गमनं
शय्या न कुर्याद्गेहगोपनम् ॥ ६४२ ॥ जन्मोदये जन्मभे वा तयोरीशस्यभेपि वा ॥ ताभ्यां तयोरिकेंद्रेषु यातुः शत्रुक्षयो भवेत् ॥ ६४३ ॥ शीर्षोदये
लग्नगते दिग्लग्ने लग्नगेपि वा ॥ शुभवर्गोथ वा लग्ने यातुः शत्रुक्षयस्तदा ॥ ६४४ ॥ शत्रुजन्मोदये जन्मराशेर्वा निधनोदये ॥ तयोरीशस्थिते राशौ
यातुः शत्रुक्षयो भवेत् ॥ ६४५ ॥ वक्रः पन्था मीनलग्ने यातुर्मीनांशकेपि वा ॥ निंद्यो निखिलयात्रासु घटलग्नो घटांशकः ॥ ६४६ ॥ जललग्नो
जलांशो वा जलयोनेः शुभावहः ॥ मूर्तिः कोशो धन्विनश्च वाहनं मंत्रसंज्ञकम् ॥ ६४७॥शत्रुमार्गस्तथायुश्च मनोव्यापारसंज्ञिकम् ॥ प्राप्तिरप्राप्तिरु
दयाद्भावाः स्युर्द्वादशैव ते ॥६४८ ॥ घ्नंति क्रूरारुयाप्तिवर्गं भावान्सूर्यमहीसुतौ ॥ न निघ्नतो हि व्यापारं सौम्याः पुष्णंत्यरिं विना ॥ ६४९ ॥
शुक्रोऽस्तं च न पुष्णाति मूर्तिं मृत्युं च चंद्रमाः॥ याम्यदिग्गमनं त्यक्त्वा सर्वकाष्ठासु यायिनाम् ॥६५०॥ अभिजित्क्षणयोगोऽयमभीष्टफलसिद्धिदः॥
पञ्चांगशुद्धिरहिते दिवसेऽपि फलप्रदः ॥६५१ ॥ यात्रायोगा विचित्रास्तान्योगान्वक्ष्ये यतस्ततः ॥ फलसिद्धिर्योगलग्नाद्राज्ञां विप्रस्य धिष्ण्यतः ॥
॥६५२ ॥ मुहूर्तशक्तितोऽन्येषां शकुनैस्तस्करस्य च ॥ केंद्रत्रिकोणे ह्येकेन योगः शुक्रज्ञसूरिणाम् ॥६५३॥ अधियोगो भवेद्द्वाभ्यां त्रिभिर्योगाधि
योगकः ॥ योगेऽपि यायिनां क्षेममधियोगे जयो भवेत् ॥ ६५४ ॥ योगाधियोगे क्षेमं च विजयार्थविभूतयः॥ व्यापारशत्रुमूर्तिस्थैश्चन्द्रमंददिवाकरैः॥
॥ ६५५ ॥ रणे गतस्य भूपस्य जयलक्ष्मीः प्रमाणिका॥ शुक्रार्कज्ञार्किभौमेषु लग्नाध्वस्तत्रिशत्रुषु ॥६५६॥ गतस्याग्रे वैरिचमूर्वह्नौ लाक्षेव लीयते ॥
लग्नस्थे त्रिदशाचार्ये धनायस्थैः परग्रहैः ॥ ६५७॥ गतस्य राज्ञोऽरिसेना नीयते यममंदिरम् ॥ लग्ने शुक्रे रवौ लाभे चन्द्रे बन्धुस्थिते यदा॥६५८॥
गतो नृपो रिपून्हंति केसरीवेभसंहतिम् ॥ स्वोच्चसंस्थे सिते लग्ने स्वोच्चे चन्द्रे च लाभगे ॥ ६५९॥हंति यातोऽरिष्टतनां केशवः पूतनामिव॥ त्रिकोणे
केंद्रगाः सौम्याः क्रूरारुयायारिगा यदि ॥ ६६० ॥ यस्य यातेर्लक्ष्मीस्तमुपैतीवाभिसारिका ॥जीवार्कचन्द्रा लग्नारिरंध्रगा यदि गच्छतः॥ ६६१ ॥
तस्याग्रे खलमैत्रीव न स्थिरा रिपुवाहिनी ॥ त्रिखडायेषु मन्दारौ बलवंतः शुभा यदि ॥ ६६२ ॥ यात्रायां नृपतस्तस्य हस्तस्था शत्रुमेदिनी ॥
स्वोच्चस्थे लग्नगे जीवे चंद्रे लाभगते यदि ॥६६३॥ गतो राजा रिपून्हति पिनाकी त्रिपुरं यथा॥ मस्तकोदयगे शुक्र लग्नस्थे लाभगे गुरौ॥६६४॥
गतो राजा रिपून्हंति कुमारस्तारकं यथा ॥ जीवे लग्नगते शुक्रे केंद्रे वापि त्रिकोणगे ॥ ६६५ ॥ गतो दहत्यरीन्राजा कृष्णवर्त्मा यथा वनम् ॥

लग्नगे ज्ञे शुभे केंद्रे धिष्ण्ये चोपकुले गतः ॥ ६६६ ॥ नृपाः शुष्यंत्यरीन् ग्रीष्मे ह्रदिनीं वार्करश्मयः ॥ शुभे त्रिकोणे केंद्रस्थे लाभे चंद्रेऽथवा रवौ
॥६६७॥ शत्रून्हन्ति गतो राजा ह्यंधकारं यथा रविः ॥ स्वक्षेत्रगे शुभे कद्रे त्रिकोणायगते गतः ॥ ६६८ ॥ विनाशयत्यरीन्राजा तूलराशिमिवा
नलः ॥ इंदौ स्वस्थे गुरौ केंद्रे मंत्रः सप्रणवो गतः ॥ ६६९ ॥ नृपो हंति रिपून्सर्वान्पापान्पंचाक्षरो यथा ॥ वर्गोत्तमगते शुक्रेऽप्येकस्मिन्नेव लग्नगे
॥ ६७० ॥ हरिस्मृतिर्यथाघौघान्हंति शत्रून् गतो नृपः ॥ शुभे केंद्रे त्रिकोणस्थे चंद्रे वर्गोत्तमे गतः ॥ ६७१ ॥ सगोत्रारीन्नृपान् हंति यथा गोत्रांश्च
गोत्रभित ॥ मित्रभेऽथ गुरौ केंद्रे त्रिकोणस्थेऽथ वा सिते ॥ ६७२ ॥ शत्रून्हंति गतो राजा भुजंगान् गरुडो यथा ॥ शुभकद्रत्रिकोणस्थे वर्गोत्तम
गते गतः ॥ ६७३ ॥ विनाशयत्यरीन्राजा पापान्भागीरथी यथा ॥ ये नृपा यान्त्यरीञ्जेतुं तेषां योगैर्नृपाह्वयैः ॥ ६७४ ॥ उपैति शांतिं
कोपाग्निः शत्रुयोषाश्रुबिंदुभिः ॥ बलक्षयपक्षदशमीमासीषे विजयाभिधा ॥ ६७५ ॥ विजयस्तत्र यातॄणां संधिर्वा न पराजयः ॥ निमित्त
शकुनादिभ्यः प्रधानं हि मनोदयः ॥ ६७६ ॥ तस्मान्मनस्विनां यत्नात्फलहेतुर्मनोदयः ॥ उत्सवोपनयोद्वाहप्रतिष्ठाशौचसूतके ॥ ६७७ ॥
असमाप्ते न कुर्वीत यात्रां मर्त्यो जिर्जीविषुः ॥ महिषोंदुरयोर्युद्धे कलत्रकलहार्तवे ॥ ६७८ ॥ वस्त्रादेः स्खलिते क्रोधे दुरुक्ते न व्रजे
न्नृपः ॥ घृतान्नं तिलपिष्टान्नं मत्स्यान्नं घृतपायसम् ॥ ६७९ ॥ प्रागादिक्रमशो भुक्त्वा याति राजा जयत्यरीन् ॥ सम्भिका परमा
न्नं च कांजिक च पयो दधि ॥६८०॥ क्षीरं तिलोदनं भुक्त्वा भानुवारादिषु क्रमात् ॥ कुल्माषांश्च तिलान्नं च दधि क्षौद्रं घृतं पयः ॥६८१॥ मृगमांसं
च तत्सारं पायसं च खगं मृगम् ॥ शशमांसं च षाष्टिक्यं प्रियंगुकमपूपकम् ॥६८२॥ चित्रांडजफलं कूर्मश्वाविद्गोधांश्च शास्वकम्॥ हविष्यं कृशरान्नं
च मुद्गान्नं यवपिष्टिकम् ॥ ६८३ ॥ मत्स्यान्नं च विचित्रान्नं दध्यन्नं दस्रभात्क्रमात् ॥ भुक्त्वा राजेभाश्वरथनरैर्याति जयत्यरीन्॥६८४॥ हुताशनं तिलै
र्हुत्वा पूजयेत दिगीश्वरम् ॥ प्रणम्य देवभूदेवानाशीर्वादैर्नृपो व्रजेत् ॥६८५॥ यद्वर्णवस्त्रगंधाद्यैस्तन्मंत्रेण विधानतः॥ इंद्रमैरावतारूढं शच्या सह विरा
जितम् ॥६८६॥ वज्रपाणिं स्वर्णवर्णं दिव्याभरणभूषितम् ॥ सप्तहस्तं सप्तजिह्वं षण्मुखं मेषवाहनम् ॥ ६८७॥ स्वाहाप्रियं रक्तवर्णं स्रुक्स्रुवायुधधारि
णम् ॥ दंडायुधं लोहिताक्षं यमं महिषवाहनम् ॥ ६८८ ॥ श्यामलं सहितं रक्तवर्णैरूर्द्ध्वमुखं शुभम् ॥ खड्गचर्मधरं नीलं निर्ऋतिं नरवाहनम् ॥
॥ ६८९ ॥ उर्द्ध्वकेशं विरूपाक्षं दीर्घग्रीवायुतं विभुम् ॥ नागपाशधरं पीतवर्णं मकरवाहनम् ॥ ६९० ॥ वरुणं कालिकानाथं रत्नाभरणभूषि
तम् ॥ प्राणिनां प्राणरूपं तं द्विबाहुं दंडपाणिकम् ॥ ६९१ ॥ वायुं कृष्णमृगारूढं पूजयेदंजनीपतिम् ॥ अश्वारूढं कुंभपाणिं द्विबाहुं स्वर्णसन्नि

भम् ॥ ६९२ ॥ कुबेरं चित्रलेखेशं यक्षगंधर्वनायकम् ॥ पिनाकिनं वृषारूढं गौरीपतिमनुत्तमम् ॥ ६९३ ॥ श्वेतवर्णं चंद्रमौलिं नागयज्ञोपवीति
नम् ॥ अग्रयाणे स्वयं कार्या प्रेक्षया भूभुजस्तथा ॥ ६९४ ॥ कार्यं निगमनं छत्रं ध्वजशस्त्रास्त्रवाहनैः ॥ स्वस्थानान्निर्गमस्थानं दडानां च शत
द्वयम् ॥ ६९५ ॥ चत्वारिंशद्वादशैव प्रस्थितः स स्वयं गतः ॥ दिनान्येकत्र न वसेत्सप्तषट् वा परो जनः ॥ ६९६ ॥ पंचरात्रं च पुरतः पुनर्ल
ग्नांतरे व्रजेत् ॥ अकालजेषु नृपतिर्विद्युद्गर्जितवृष्टिषु ॥ ६९७ ॥ उत्पातेषु त्रिविधेषु सप्तरात्रं तु न व्रजेत् ॥ रत्नाकुब्यशिवाकाककपोतानां
गिरस्तथा ॥ ६९८ ॥ झझेभुकूहेमवक्षीरस्वराणां वामतो गतिः ॥ पीतकारभरद्वाजपक्षिणां दक्षिणा गतिः ॥६९९॥ चाषं त्यक्त्वा चतुष्पात्तु शुभदा
वामतो मताः ॥ कृष्णं त्यक्त्वा प्रयाणे तु कृकलासेन वीक्षितः ॥७०० ॥ वाराहशशगोधास्तु सर्पाणां कीर्तनं शुभम् ॥ हतेक्षणं नेष्टमेवाव्यपत्ययं कपि
ऋक्षयोः ॥ ७०१ ॥ मयूरच्छागनकुलचाषपारावताः शुभाः ॥ दृष्टमात्रेण यात्रायां व्यस्तं सर्वं प्रवेशने ॥ ७०२ ॥ यात्रासिद्धिर्भवेद्दृष्टे शवे रोदनव
र्जिते ॥ प्रवेशे रोदनयुतः शवः शवप्रदस्तथा ॥ ७०३ ॥ पतितक्लीबजटिलमत्तवांतौषधादिभिः ॥अभ्यक्तवसास्थिचर्मांगारदारुणरोगिभिः ॥७०४॥
गुडकार्पासलवणारिपुप्रश्नतृणोरगैः ॥ वंध्याकुजककाषायमुक्तकेशबुभुक्षितैः ॥ ७०५ ॥ प्रयाणसमये नग्नैर्दृष्टैः सिद्धिर्न जायते ॥ प्रज्वलाग्नीन्तुरग
नृपासनपुरांगनाः ॥ ७०६॥ गंधपुष्पाक्षतच्छत्रचामरांदोलिकं नृपः ॥ भक्ष्येक्षुफलमृत्स्नान्नमध्वाज्यदधिगोदयाः ॥ ७०७ ॥ मद्यमांससुधाधौत
वस्त्रशंखवृषध्वजाः ॥ पुण्यस्त्रीपुण्यकलशरत्नभृंगारगोद्विजाः ॥ ७०८ ॥ भेरीमृंदगपटहघंटावीणादिनिःस्वनाः ॥ वेदमंगलघोषाः स्युः या
यिनां कार्यसिद्धिदाः ॥ ७०९ ॥ आदौ विरुद्धशकुनं दृष्ट्वा यायीष्टदेवताम् ॥ स्मृत्वा द्वितीये विप्राणां कृत्वा पूजां निवर्तयेत् ॥ ७१० ॥ सर्वदिक्षु
क्षुतं नेष्टं गोक्षुतं निधनप्रदम् ॥ अफलं यद्बालवृद्धरोगिपैनसिकैः कृतम् ॥ ७११ ॥ परस्त्री द्विजदेवस्वं तत्स्पृशेद्दिग्गजाश्वकान् ॥ हन्या
त्परपुरप्राप्तो न स्त्रीर्नित्यं निरायुधान् ॥ ७१२ ॥ आदौ सौम्यायने कार्यंनववास्तुप्रवेशनम् ॥ विधाय पूर्वदिवसे वास्तुपूजाबलिक्रियाम् ॥ ७१३ ॥
माघफाल्गुनवैशाखज्येष्ठमासेषु शोभनम्॥प्रवेशो मध्यमो ज्ञेयः सौम्यकार्तिकमासयोः ॥ ७१४ ॥ शशीज्यांतेषु वरुणत्वाष्ट्रमित्रस्थिरोडुषु ॥
शुभः प्रवेशो देवेज्यशुक्रयोर्दृश्यमानयोः ॥ ७१५ ॥ व्यर्कारवारे तिथिषु रिक्तामावर्जितेषु च ॥ दिवा वा यदि वा रात्रौ प्रवेशो मंगल
प्रदः ॥ ७१६ ॥ चंद्रताराबलोपेते पूर्वाह्णे शोभने दिने ॥ स्थिरलग्ने स्थिरांशे च नैधने शुद्धिसंयुते ॥ ७१७ ॥ त्रिकोणकेंद्रसंस्थैश्च सौम्यै
स्त्र्यायारिगैः परैः ॥ लग्नांत्याष्टमषष्ठस्थवर्जितेन हिमांशुना ॥ ७१८॥ कर्तुर्वा जन्मभ लग्ने ताभ्यामुपचयेऽपि वा ॥ प्रवेशलग्ने स्याच्छुद्धिरन्यभे

शोकनिःस्वता॥ ७१९ ॥ दर्शनीय गृहं रम्यं विविधैर्मंगलस्वनैः ॥ कृत्वार्कं वामतो विद्वान्भृंगारं चाग्रतो विशेत् ॥७२०॥ वर्षाप्रवेशे शशिनि जल
राशिगतेपि वा ॥ केंद्रगे वा शुक्लपक्षे चातिवृष्टिः शुभेक्षिते॥७२१॥अल्पवृष्टिः पापदृष्टे प्रावृट्कालेऽचिराद्भवेत्॥चंद्रश्चेद्भार्गवे सर्वमेवंविधगुणान्विते
॥ ६२२॥ प्रावृषींदुः सितात्सप्तराशिगः शुभवीक्षितः॥मंदात्त्रिकोणसप्तस्थो यदि वा वृष्टिकृद्भवेत्॥७२३॥सद्यो वृष्टिकरः शुक्रो यदा बुधसमीपगः॥
तयोर्मध्यगते भानौ भवेद्वृष्टिविनाशनम् ॥ ७२४ ॥ मघादिपंचधिष्ण्यस्थः पूर्वे स्वातित्रये परे ॥ प्रवर्षणं भृगुः कुर्याद्विपरीते न वर्षणम्॥७२५॥
पुरतः पृष्ठतो भानोर्ग्रहा यदि समीपगाः ॥ तदा वृष्टिं प्रकुर्वन्ति न ते चेत्प्रतिलोमगाः ॥७२६॥वामभागस्थितः शुक्रो वृष्टिकृच्चेत्तु याम्यगः ॥उदया
स्तेषु वृष्टिः स्याद्भानोरार्द्राप्रवेशने ॥ ७२७॥संध्ययोः सस्यवृद्धिः स्यात्सर्वसंपन्नृणान्निशि ॥ स्तोकवृष्टिरनर्घः स्यादवृष्टिः सस्यसंपदः ॥ ७२८ ॥
आर्द्रोदयेप्रभिन्ना चेद्भवेदिति न संशयः॥चन्द्रेज्ये ज्ञेथ वा शुके केंद्रेन्बीतिर्विनश्यति॥७२९॥पूर्वाषाढां गतो भानुर्जीमूतैः परिवेष्टितः॥वर्षत्यार्द्रादि
मूलांतं प्रत्यक्षं प्रत्यहं तथा ॥७३०॥ वृष्टिश्चेत्पौष्णभे तस्माद्दशर्क्षेषु न वर्षति ॥ सिंहे भिन्ने कुजो वृष्टिरभिन्ने कर्कटे तथा ॥७३१ ॥ कन्योदये प्र
भिन्ने चेत्सर्वदा वृष्टिरुत्तमा ॥ अहिर्बुध्न्यं पूर्वशस्यं परशस्या च रेवती ॥७३२॥ भरणी सर्वसस्या च सर्वनाशाय चाश्विनी ॥ गुरोः सप्तमरा
शिस्थः प्रत्यग्गो भृगुजो यदा ॥ ७३३ ॥ तदातिवर्षणं भूरि प्रावृट्काले बलोज्झिते ॥ आसन्नमर्क्षशशिनः परिवेशगतोत्तरा॥ ७३४ ॥ विद्यु
त्प्रपूर्णमंडूकास्वनावृष्टिर्भवेत्तदा॥यदाप्रत्यङ्नता मेघाः खसप्तोपरि संस्थिताः ॥७३५॥ पतंति दक्षिणस्था येभवेद्वृष्टिस्तदाचिरात्॥नखैर्लिखन्तो
मार्जाराश्चावनिं लोहसंयुते ॥६३६॥ रथ्यायां सेतुबंधाः स्युर्बालानां वृष्टिहेतवः ॥ पिपीलिकाश्रेणयश्छिन्नाः खद्योता बहवस्तदा॥७३७॥द्रुमादिरोहः
सर्पाणां प्रीतिर्दुर्वृष्टिसूचकाः ॥ उदयास्तमये काले विवर्णोऽर्कोथ वा शशी ॥७३८॥ मधुवर्णोऽतिवायुश्चेदतिवृष्टिर्भवेत्तदा॥प्राङ्मुखस्य तु कूर्मस्य
नवांगेषु धरामिमाम् ॥ ७३९ ॥ विभज्य नवधा खण्डे मंडलानि प्रदक्षिणम् ॥ अन्तर्वेदाश्च पांचालस्तस्येदं नाभिमण्डलम् ॥ ७४० ॥ प्राच्या
मागधलाटोत्था देशास्तन्मुखमंडलम् ॥ स्त्रीकलिंगकिराताख्या देशास्तद्बाहुमंडलम् ॥ ७४१ ॥ अवंती द्राविडा भिल्ला देशास्तत्पार्श्वमण्डलम् ॥
गौडकौंकणशाल्वांध्रपौंड्रस्तत्पादमण्डलम् ॥ ७४२ ॥ सिंधुकाशिमहाराष्ट्रसौराष्ट्राः पुच्छमण्डलम् ॥पुलिंदचीनयवनगुर्जराः पादमंडलम् ॥ ७४३ ॥
कुरुकाश्मीरमाद्रेयमत्स्यास्तत्पार्श्वमण्डलम्॥ खसांगवंगबाह्लीकं कांबोजाः पाणिमंडलम्॥७४४॥कृत्तिकादीनि धिष्ण्यानि त्रीणि त्रिणि क्रमान्न्यसे
त् ॥ नाभ्यादिषु नवांगेषु पापैर्दुष्टं शुभैः शुभम्॥७४५॥देवता यत्र नृत्यंति पतंति प्रज्वलंति च॥मुहू रुदंति गायंति प्रस्विद्यंति हसंति च॥७४६॥

वमंत्यग्निं तथा धूमं स्नेहं रक्तं पयो जलम्॥अधोमुखाधितिष्ठंति स्थानात्स्थानं व्रजंति च॥७४७॥एवमाद्या हि दृश्यंते विकाराः प्रतिमासु च॥गंधर्वं
नगरं चैव दिवा नक्षत्रदर्शनम्॥७४८॥महोल्कापतनं काष्ठतृणरक्तप्रवर्षणम्॥गांधर्वं देहदिग्धूमं भूमिकंपं दिवा निशि॥७४९॥अनग्नौ च स्फुलिंगाश्च
ज्वलनं च विनेंधनम्॥निशींद्रचापमंडूकं शिखरे श्वेतवायसः॥७५०॥दृश्यंते विस्फुलिंगाश्च गोगजाश्वोष्ट्रगात्रतः॥जंतवो द्वित्रिशिरसो जायंते वापि
योनिषु॥७५१॥प्रातःसूर्याश्चतसृषु ह्यर्दितायुगपद्रवेः ॥ जम्बूकग्रामसंवासः केतूनां च प्रदर्शनम्॥७५२॥काकानामाकुलं रात्रौ कपोतानां दिवा यदि॥
अकाले पुष्पिता वृक्षा दृश्यंते फलिता यदि ॥ १५३ ॥ कार्यं तच्छेदनं तत्र ततः शांतिर्मनीषिभिः ॥ एवमाद्या महोत्पाता बहवः स्थाननाशदा
॥७५४॥ केचिन्मृत्युप्रदाः केचिच्छत्रुभ्यश्च भयप्रदाः ॥मध्याद्भयं यशो मृत्युः क्षयः कीर्तिः सुखासुखम् ॥ ७५५ ॥ ऐस्वर्यं धनहानिं च मधुच्छत्रं
च वाल्मिकम् ॥ इत्यादिषु च सर्वेषूत्पातेषु द्विजसत्तम ॥ ७५६ ॥ शांतिं कुर्यात्प्रयत्नेन कल्पोक्तविधिना शुभम् ॥ इत्येतत्कथितं विप्र ज्यौतिषं ते
समासतः ॥७५७॥ अतः परं प्रवक्ष्यामि च्छंदःशास्त्रमनुत्तमम्॥७५८॥इति श्रीबृहन्ना०पूर्व०बृहदुपाख्याने द्वितीयपादे षट्पञ्चाशत्तमोऽध्यायः॥५६॥
सनंदन उवाच ॥ वैदिकं लौकिकं चापि छन्दो द्विविधमुच्यते ॥ मात्रावर्णविभेदेन तच्चापि द्विविधं पुनः ॥ १ ॥ मयौ रसौ तजौ भनौ गुरुर्लघुरपि
द्विज ॥ कारणं छंदसि प्रोक्ताश्छन्दःशास्त्रविशारदैः ॥ २ ॥ सर्वगो मगणः प्रोक्तो मुखलो यगणः स्मृतः॥मध्यलो रगणश्चैव प्रांत्यगः सगणो मतः॥
॥३॥ तगणोंऽतलघुः ख्यातो मध्यगो जो भआदिगः ॥ त्रिलघुर्नगणः प्रोक्तस्त्रिका वर्णगणा मुने॥४॥चतुर्लास्तु गणाः पञ्च प्रोक्ता आर्यादिसंमताः॥
संयोगश्च विसर्गश्चानुस्वारो लघुतः परः ॥५॥लघोर्दीर्घत्वमाख्याति दीर्घो गो लो लघुर्मतः ॥ पादश्चतुर्थभागः स्याद्विच्छेदोयतिरुच्यते॥ ६ ॥सम
मर्द्धसमं वृत्तं विषमं चापि नारद ॥ तुल्यलक्षणतः पादचतुष्के सममुच्यते ॥ ७॥ आदित्रिके द्विचतुर्थे सममर्द्धसमं ततम् ॥ लक्ष्म भिन्नं यस्य पादच
तुष्के विषमं हि तत् ॥८॥एकाक्षरात्समारभ्य वर्णैकैकस्य वृद्धितः ॥ षाड्विंशत्यक्षरं यावत्पादस्तावत्पृथक् पृथक् ॥ ९ ॥ तत्परं चंडवृष्ट्यादिदंडकाः
परिकल्पिताः ॥ त्रिभिः षड्भिः पदैर्गाथाः शृणु संज्ञा यथोत्तरम् ॥ १० ॥ उक्तात्युक्ता तथा मध्या प्रतिष्ठान्या सुपूर्विका ॥ गायत्र्यु
ष्णिगनुष्टप्च बृहती पंक्तिरेव च॥ ११ ॥त्रिष्टुप्च जगती चैव तथातिजगती मता ॥ शक्वरी सातिपूर्वा च अष्टयत्यष्टी ततः स्मृते ॥ १२ ॥ धृतिश्च
विधृतिश्चैव कृतिः प्रकृतिराकृतिः ॥ विकृतिः संकृतिश्चैव तथातिकृतिरुत्कृतिः ॥ १३ ॥ इत्येताश्छन्दसां संज्ञाः प्रस्ताराद्भेदभागिकाः॥पादे सर्वगुरौ
पूर्वाल्लघुं स्थाप्य गुरोरधः ॥१४॥ यथोपरि तथा शेषमग्रे प्राग्वन्न्यसेदपि ॥ एष प्रस्तार उदितो यावत्सर्वलघुर्भवेत् ॥१५॥ नष्टांकार्द्धे समे[illegible]लः स्या

द्विषमे सैव सोर्द्धगः ॥ उद्दिष्टे द्विगुणानाद्यादंगान्संमील्य लस्थितान् ॥ १६॥ कृत्वा सैकान्वदेत्संख्यामिति प्राहुः पुराविदः ॥वणान्सैकान्वृत्तभवा
नुत्तराधरतः स्थितान् ॥ १७ ॥एकादिक्रमतश्चैकानुपर्य्युपरि विन्यसेत्॥उपांत्यतो निवर्तेत त्यजन्नेकैकमूर्द्धतः ॥१८॥ उपर्याद्याद्गुरोरेवमेकद्व्यादिल
गक्रिया ॥ लगक्रियांकसंदोहे भवेत्संख्याविमिश्रिते॥१९॥उद्दिष्टांकसमाहारः सैको वा जनयेदिमाम् ॥ संख्यैव द्विगुणैकोना सद्भिरध्वा प्रकीर्तितः
॥ २० ॥ इत्येतत्किंचिदाख्यातं लक्षणं छंदसां मुने ॥ प्रस्तारोक्तप्रभेदानां नामानंत्यं प्रगाहते॥२१ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपा
ख्याने द्वितीयपादे सङ्क्षिप्तच्छन्दोवर्णनं नाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥ नारद उवाच ॥ अनूचानप्रसंगेन वेदांगान्यखिलानि च॥श्रुतानि
त्वन्मुखांभोजात्समासव्यासयोगतः ॥ १ ॥ शुकोत्पत्तिं समाचक्ष्व विस्तरेण महामते ॥ सनंदन उवाच ॥ मेरुशृङ्गे किल पुरा कर्णिकारवनायते
॥ २ ॥ विजहार महादेवो भौमैर्भूतगणैर्वृतः ॥ शैलराजसुता चैव देवी तत्राभवत्पुरा ॥ ३ ॥ तत्र दिव्यं तपस्तेपे कृष्णद्वैपायनः प्रभुः ॥
योगेनात्मानमाविश्य योगधर्मपरायणः ॥ ४ ॥ धारयन्स तपस्तेपे पुत्रार्थं मुनिसत्तमः ॥ अग्नेर्भूमेस्तथा वायोरंतरिक्षस्य चाभितः
॥ ५ ॥ वीर्येण संमतः पुत्रो मम भूयादिति स्म ह ॥ संकल्पेनाथ सोऽनेन दुष्प्रापमकृतात्मभिः ॥ ६ ॥ वरयामास देवेशमा
स्थितस्तप उत्तमम् ॥ अतिष्ठन्मारुताहारः शतं किल समाः प्रभुः ॥ ७ ॥ आराधयन्महादेवं बहुरूपमुमापतिम् ॥ तत्र ब्रह्मर्षय
श्चैव सर्वे देवर्षयस्तथा ॥ ८ ॥ लोकपालाश्च साध्याश्च वसुभिश्चाष्टभिः सह ॥ आदित्याश्चैव रुद्राश्च दिवाकरनिशाकरौ ॥ ९ ॥ विश्वा
वसुश्च गंधर्वः सिद्धाश्चाप्सरसांगणाः ॥ तत्र रुद्रो महादेवः कर्णिकारमयीं शुभाम् ॥ १० ॥ धारयानः स्रजं भाति शरदीव निशाकरः ॥ तस्मिन्
दिव्ये वने रम्ये देवदेवर्षिसंकुले ॥११॥ आस्थितः परमं योगं व्यासः पुत्रार्थमुद्यतः ॥ न चास्य हीयते वर्णो न ग्लानिरुपजायते ॥ १२ ॥ त्रयाणा
मपि लोकानां तदद्भुतमिवाभवत् ॥ जटाश्च तेजसा तस्य वैश्वानरशिखोपमाः ॥ १३ ॥ प्रज्वलंत्यः स्म दृश्यंते शुक्तस्यामिततेजसः ॥ एवं विधेन
तपसा तस्य भक्त्या च नारद ॥१४॥ महेश्वरः प्रसन्नात्मा चकार मनसा मतिम् ॥ उवाच चैनं भगवांस्त्र्यंबकः प्रहसन्निव॥१५॥यथा ह्यग्निर्यथा वायु
र्यथा भूमिर्यथा जलम् ॥ यथा खं च तथा शुद्धो भविष्यति सुतस्तव ॥ १६ ॥ तद्भावभागी तद्बुद्धिस्तदात्मा तदुपाश्रयः॥ तेजसा तस्य लोकांस्त्री
न्यशः प्राप्स्यति केवलम् ॥ १७ ॥ एवं लब्ध्वा वरं देवो व्यासः सत्यवतीसुतः ॥ अरणिं त्वथ संगृह्य ममंथाग्निचिकीर्षया ॥ १८ ॥ अथ रूपं परं
विप्र बिभ्रतीं स्वेन तेजसा ॥ घृताचीं नामाप्सरसं ददर्श भगवानृषिः ॥ १९ ॥ स तामप्सरसं दृष्ट्वा सहसा काममोहितः ॥अभवद्भगवान्व्यासो वने

तस्मिन्मुनीश्वर ॥२०॥ सा तु कृत्वा तदा व्यासं कामसंविघ्नमानसम्॥ शुकीभूया महारम्या घृताची समुपागमत् ॥२१॥ स तामप्सरसं दृष्ट्वा रूपेणा
न्येनसंवृताम् ॥ स्मरराजेनानुगतः सर्वगात्रातिगेन ह॥२२॥स तु धैर्येण महता निगृह्णन् हृच्छयं मुनिः ॥ न शशाक नियंतुं तं व्यासः प्रविसृतं मनः
॥२३॥भावित्वाच्चैव भाव्यस्य घृताच्या वपुषा॥हृतम् यत्नान्नियच्छतश्चापि मुने एतच्चिकीर्षया॥२४॥अरण्यामेव सहसा तस्य शुक्रमवापतत्॥शुक्रे
निर्मथ्यमानेऽस्यां शुको जज्ञे महातपाः ॥ २५ ॥ परमर्षिर्महायोगी अरणीगर्भसंभवः ॥ यथैव हि समिद्धोऽग्निर्भाति हव्यमुपात्तवान् ॥ २६ ॥ तथा
रूपः शुको जज्ञे प्रज्वलन्निव तेजसा ॥ बिभ्रच्चित्रं च विप्रेंद्र रूपवर्णमनुत्तमम्॥२७॥तं गंगां सरितां श्रेष्ठां मेरुपृष्ठे स्वरूपिणीम् ॥ अभ्येत्य स्नापया
मास वारिणा स्वेन नारद ॥ २८ ॥ कृष्णाजिनं चांतरिक्षाच्छुकार्थे भुव्यवापतत् ॥ जगीयंत च गंधर्वा ननृतुश्चाप्सरोगणाः ॥ २९ ॥ देवदुन्दुभय
श्चैव प्रावाद्यंत महास्वनाः ॥ विश्वावसुश्च गंधर्वस्तथा तुंबुरुनारदौ ॥ ३० ॥ हाहाहूहूश्च गंधर्वौ तुष्टुवुः शुकसंभवम् ॥तत्र शक्रपुरोगाश्च लोकपालाः
समागताः ॥३१॥ देवा देवर्षयश्चैव तथा ब्रह्मर्षयोऽपि च ॥ दिव्यानि सर्वपुष्पाणि प्रववर्ष च मारुतः॥३२॥ जंगमं स्थावरं चैव प्रहृष्टमभवज्जगत् ॥
तं महात्मा स्वयं प्रीत्या देव्या सह महाद्युतिः ॥ ३३ ॥ जातमात्रं मुनेः पुत्रं विधिनोपानयत्तदा ॥ तस्य देवेश्वरः शक्रो दिव्यमद्भुतदर्शनम् ॥३४॥
ददौ कमंडलुं प्रीत्या देवा वासांसि चाभितः ॥ हंसाश्च शतपत्राश्च सारसाश्च सहस्रशः ॥ ३५ ॥ प्रदक्षिणमवर्तंत शुकाश्चाषाश्च नारद ॥ आरणे
यस्तदा दिव्यं प्राप्य जन्म महामुनिः ॥ ३६ ॥ तत्रैवोवास मेधावी व्रतचारी समाहितः ॥ उत्पन्नमात्रं तं वेदाः सरहस्याः ससंग्रहाः ॥ ३७ ॥ उप
तस्थुर्मुनिश्रेष्ठं यथास्य पितरं तथा ॥ बृहस्पतिं स वव्रे च वेदवेदांगभाष्यवित् ॥ ३८ ॥ उपाध्यायं द्विजश्रेष्ठ धर्ममेवानुचिंतयन् ॥ सोऽधीत्य वेदान
खिलान्सरहस्यान्ससंग्रहान् ॥ ३९ ॥ इतिहासं च कात्स्न्र्येन वेदशास्त्राणि चाभितः ॥ गुरवे दक्षिणां दत्त्वा समावृत्तो महामुनिः ॥४०॥ उग्रं तपः
समारेभे ब्रह्मचारी समाहिताः ॥ देवतानामृषीणां च बाल्येऽपि सुमहातपाः ॥४१॥सेंमत्रणीयो जन्यश्च ज्ञानेन तपसा तथा ॥ न त्वस्य रमते बुद्धि
राश्रमेषु मुनीश्वर ॥ ४२ ॥ त्रिषु गार्हस्थ्यमूलेषु मोक्षधर्मानुदर्शिनः ॥ स मोक्षमनुचिंत्यैव शुकः पितरमभ्यगात् ॥ ४३ ॥ प्राहाभिवाद्य च तदा
श्रेयोऽर्थी विनयान्वितः ॥ मोक्षधर्मेषु कुशलो भगवान् प्रब्रवीतु मे॥४४॥यथैव मनसः शांतिः परमा संभवेन्मुने ॥ श्रुत्वा पुत्रस्यवचनं परमर्षिरुवा
च तम् ॥ ४५ ॥ अधीष्व मोक्षशास्त्रं वै धर्मांश्च विविधानपि ॥ पितुर्निदेशाज्जग्राह शुको ब्रह्मविदां वरः ॥ ४६ ॥ योगशास्त्रं च निखिलं कापिलं
चैव नारद ॥ शतं ब्राह्या श्रिया युक्तं ब्रह्मतुल्यपराक्रमम् ॥ ४७ ॥ मेने पुत्रं यथा व्यासो मोक्षशास्त्रविशारदम् ॥ उवाच गच्छेति तदा जनकं मिथि

लेश्वरम् ॥४८॥ स ते वक्ष्यति मोक्षार्थं निखिलेन नराधिपः ॥ पितुर्नैयोगादगमज्जनकं मैथिलं नृपम्॥ ४९ ॥ प्रष्टुं धर्मस्य निष्ठां वै मोक्षस्य च
परायणम् ॥ उक्तश्च मानुषेण त्वं तथा गच्छेत्यविस्मितः ॥५०॥ न प्रभावेण गंतव्यमंतरिक्षचरेण वै ॥ आर्जवेनैव गंतव्यं न सुखाय क्षणात्त्वया ॥
॥५१॥ न द्रष्टव्या विशेषा हि विशेषा हि प्रसंगिनः ॥ अहंकारो न कर्तव्यो याज्ये तस्मिन्नराधिपे ॥५२॥स्थातव्यं वसथे तस्य स ते छेत्स्यति सं
शयम् ॥ स धर्मकुशलो राजा मोक्षशास्त्रविशारदः ॥५३॥ यथा यथा च ते ब्रूयात्तत्कार्यमविशंकया ॥एवमुक्तः स धर्मात्मा जगाम मिथिलां मुनिः॥
॥५४॥ पद्भ्यां शक्तोंतरिक्षेण क्रांतुं भूमिं ससागराम् ॥ सगिरींश्चाप्यतिक्रम्य भारतं वर्षमासदत् ॥ ५५ ॥ स देशान्विविधान्स्फीतानतिक्रम्य महा
मुनिः ॥ विदेहान्वै समासाद्य जनकेन समागमत् ॥ ५६ ॥ राजद्वारं समासाद्य द्वारपालैर्निवारितः ॥ तस्थौ तत्र महायोगी क्षुत्पिपासादिवर्जितः॥
॥५७॥ आतपे ग्लानिरहितो ध्यानयुक्तश्च नारद ॥ तेषां तु द्वारपालानामेकस्तत्र व्यवस्थितः ॥ ५८ ॥ मध्यंगतमिवादित्यं दृष्ट्वा शुकमवस्थितम् ॥
पूजयित्वा यथान्यायमभिवाद्य कृताञ्जलिः ॥ ५९ ॥ प्रावेशयत्ततः कक्षां द्वितीयां राजवेश्मनः ॥ तत्रांतःपुरसंबद्धं महच्चैत्ररथोपमम् ॥ ६० ॥
सुविभक्तजलाक्रीडं रम्यं पुष्पितपादपम् ॥ दर्शयित्वासने स्थाप्य राजानं च व्यजिज्ञपत् ॥६१॥ श्रुत्वा राजा शुकं प्राप्तं वारस्त्रीः स न्ययुंक्त च ॥
सेवायै तस्य भावस्य ज्ञानाय मुनिसत्तम ॥ ६२ ॥ तं चारुकेश्यः शुश्रोण्यस्तरुण्यः प्रियदर्शनाः॥ सूक्ष्मरक्तांबरधरास्तप्तकांचनभूषणाः ॥ ६३ ॥
संलापालापकुशला भावज्ञाः सर्वकोविदाः ॥ परं पंचाशतस्तस्य पाद्यादीनि व्यकल्पयन् ॥६४॥ देशकालोपपन्नेन साध्वन्नेनाप्यतर्पयन् ॥ तस्य
भुक्तवतस्तात तास्ततः पुरकाननम् ॥ ६५ ॥ सुरम्यं दर्शयामासुरेकैकत्वेन नारद ॥ क्रीडंत्यश्च हसंत्यश्च गायंत्यश्चैव ताः शुकम् ॥ ६६ ॥ उदा
रसत्त्वं सत्वज्ञास्सर्वाः पर्य्यचरंस्तदा ॥ आरणेयस्तु शुद्धात्मा जितक्रोधो जितेंद्रियः ॥ ६७ ॥ ध्यानस्थ एव सततं न हृष्यति न कुप्यति ॥पादशौचं
तु कृत्वा वै शुकः संध्यामुपास्य च ॥ ६८ ॥ निषसादासने पुण्ये तमेवार्थं व्यचिंतयत् ॥ पूर्वरात्रे तु तत्रासौ भूत्वा ध्यानपरायणः ॥ ६९॥ मध्य
रात्रे यथान्याय्यं निद्रामाहारयत्प्रभुः ॥ ततः प्रातः समुत्थाय कृत्वा शौचमनंतरम् ॥७०॥ स्त्रीभिः परिवृतो धीमान्ध्यानमेवान्वपद्यत ॥ अनेन
विधिना तत्र तदहःशेषमप्युत॥७१॥ तां च रात्रिं नृपकुले वर्तयामास नारद ॥७२॥इति श्रीबृहन्नारदी० पूर्वभागे बृहदुपाख्याने द्वितीयभागे शुकप्रलोभनं
नामाष्टपञ्चाशत्तमोऽध्यायः ॥५८॥ सनंदन उवाच ॥ ततः स राजा सहितो मंत्रिभिर्द्विजसत्तम ॥पुरः पुरोहितं कृत्वा सर्वाण्यंतःपुराणि च ॥ १ ॥ शिर
सा चार्घ्यमादाय गुरुपुत्रं समभ्यगात् ॥ महदासनमादाय सर्वरत्नविभूषितम् ॥ २ ॥ प्रददौ गुरुपुत्राय शुकाय परमोचितम् ॥ तत्रोपविष्टं तं कार्ष्णि

शास्त्रदृष्टेन कर्मणा ॥ ३ ॥ पाद्यं निवेद्य प्रथमं सार्घ्यं गां च न्यवेदयत् ॥ स च तांमंत्रतः पूजां प्रतिगृह्य द्विजोत्तमः ॥ ४ ॥ पर्यपृच्छन्महातेजा
राज्ञः कुशलमव्ययम् ॥ उदारसत्त्वाभिजनो राजापि गुरुसूनवे ॥ ५ ॥ आवेद्य कुशलं भूमौ निषसाद तदाज्ञया ॥ सोऽपि वैयासकिं भूयः पृष्ट्वा
कुशलमव्ययम् ॥ किमागमनमित्येव पर्यपृच्छद्विधानवित् ॥ ६ ॥ शुक उवाच ॥ पित्राहमुक्तो भद्रं ते मोक्षधर्मार्थकोविदः ॥ विदेहराजोयाज्यो
मे जनको नाम विश्रुतः ॥७॥तत्र त्वं गच्छ तूर्णं वै स ते हृदयसंशयम् ॥ प्रवृत्तौ च निवृत्तौ च सर्वं छेत्स्यत्यसंशयम्॥८॥ सोऽहं पितुर्नियोगात्त्वा
मुपप्रष्टुमिहागतः ॥ तन्मे धर्मभृतां श्रेष्ठ यथावद्वक्तुमर्हसि ॥ ९ ॥ किं कार्यं ब्राह्मणेनेह मोक्षार्थश्च किमात्मकः ॥ कथं च मोक्षः कर्तव्यो ज्ञानेन
तपसापि वा ॥१०॥जनक उवाच ॥ यत्कार्यं ब्राह्मणेनेह जन्मप्रभृति तच्छृणु॥कृतोपनयनस्तात भवेद्वेदपरायणः॥११॥तपसा गुरुवृत्त्या च ब्रह्मचर्येण
चान्वितः ॥ देवतानां पितॄणां च ह्यनृणश्चानसूयकः ॥ १२ ॥ वेदानधीत्य नियतो दक्षिणामपवर्त्य च ॥ अभ्यनुज्ञामनुप्राप्य समावर्तेत वै द्विजः
॥ १३ ॥ समावृत्तस्तु गार्हस्थ्ये सदारो नियतो वसेत् ॥ अनसूयुर्यथान्यायमाहिताग्निरनादृते ॥ १४ ॥ उत्पाद्य पुत्रपौत्रांश्च वन्याश्रमपदे वसेत् ॥
तानेवाग्नीन्यथान्यायं पूजयन्नतिथिप्रियः ॥ १५ ॥ सर्वानग्नीन्यथान्यायमात्मन्यारोप्य धर्मवित् ॥ निर्द्वंद्वो वीतरागात्मा ब्रह्माश्रमपदे वसेत् ॥१६॥
शुक उवाच ॥ उत्पन्ने ज्ञानविज्ञाने प्रत्यक्षे हृदि शाश्वते॥ न विना गुरुसंवासाज्ज्ञानस्याधिगमः स्मृतः॥१७॥किमवश्यं तु वस्तव्यमाश्रमेषु न वा नृप
॥एतद्भवंतं पृच्छामि तद्भवान्वक्तुमर्हति॥१८॥जनक उवाच ॥न विना ज्ञानविज्ञाने मोक्षस्याधिगमो भवेत्॥न विना गुरुसंबधाज्ज्ञानस्याधिगमस्तथा
॥१९॥आचार्यः प्लाविता तस्य ज्ञानं प्लव इहोच्यते॥विज्ञाय कृतकृत्यस्तु तीर्णस्तत्रोभयं त्यजेत्॥२० ॥ अनुच्छेदाय लोकानामनुच्छेदाय कर्मणाम् ॥
॥ कृत्वा शुभाशुभं कर्म मोक्षो नामेह लभ्यते ॥२१॥भावितैः कारणैश्चायं बहुसंसारयोनिषु ॥ आसादयति शुद्धात्मा मोक्षं हि प्रथमाश्रमे ॥ २२ ॥
तमासाद्य तु मुक्तस्य दृष्टार्थस्य विपश्चितः ॥ त्रिधाश्रमेषु कोन्वर्थो भवेत्परमभीप्सतः ॥२३॥ राजसांस्तामसांश्चैव नित्यं दोषान्विसर्जयेत्॥सात्त्विकं
मार्गमास्थाय पश्येदात्मानमात्मना ॥ २४ ॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ॥ संपश्यन्नैव लिप्येत जले वारिचरो यथा ॥ २५ ॥ पक्षीव
प्लवनादूर्ध्वममुत्रानंत्यमश्नुते ॥ विहाय देहं निर्मुक्तो निर्द्वंद्वः शुभसंगतः ॥२६॥अत्र गाथाः पुरा गीताः शृणु राज्ञा ययातिना॥धार्यते या द्विजैस्तात
मोक्षशास्त्रविशारदैः ॥ २७ ॥ ज्योतिश्चात्मनि नान्यत्र रतं तत्रैव चैव तत् ॥ स्वयं च शक्यं तद्द्रष्टुं सुसमाहितचेतसा ॥ २८ ॥ न बिभेति
परो यस्मान्न बिभेति पराच्च यः ॥ यश्च नेच्छति न द्वेष्टि ब्रह्म संपद्यते स तु ॥ २९ ॥ यदा भावं न कुरुते सर्वभूतेषु पापकम् ॥ पूर्वैराचरितो

धर्मश्चतुराश्रमसंज्ञकः॥ ३० ॥अनेन क्रमयोगेन बहुजातिसुकर्मणाम्॥ कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा॥ ३१ ॥संयोज्य तपसात्मानमीर्ष्यामुत्सृ
ज्य मोहिनीम् ॥ त्यक्त्वा कामं च लोभं च ततो ब्रह्मत्वमश्नुते ॥ ३२ ॥ यदा श्राव्ये च दृश्ये च सर्वभूतेषु चाव्ययम् ॥ समो भवति निर्द्वं
द्वो ब्रह्म संपद्यते तदा॥ ३३ ॥यदा स्तुतिं च निंदां च समत्वेन च पश्यति॥ कांचनं चाऽयसं चैव सुखदुःखे तथैव च ॥३४ ॥शीतमुष्णं तथैवार्थमन
र्थं प्रियमप्रियम् ॥ जीवितं मरणं चैव ब्रह्म संपद्यते तदा ॥ ३५ ॥ प्रसार्येह यथांगानि कूर्मः संहरते पुनः ॥ तथेंद्रियाणि मनसा संयंतव्यानि
भिक्षुणा ॥ ३६ ॥ तमःपरिगतं वेश्म यथा दीपेन दृश्यते ॥ तथा बुद्धिप्रदीपेन शक्य आत्मा निरीक्षितुम् ॥ ३७ ॥ एतत्सर्वं प्रपश्यामि
त्वयि बुद्धिमतांवर ॥ यच्चान्यदपि वेत्तव्यं तत्त्वतो वेत्ति तद्भवान् ॥ ३८ ॥ ब्रह्मर्षे विदितश्चासि विषयांतमुपागतः ॥ गुरोश्चैव प्रसादेन तव
चैवोपशिक्षया ॥ ३९ ॥ तस्य चैव प्रसादेन प्रादुर्भूतं महामुनेः ॥ ज्ञानं दिव्यं समादीप्तं तेनासि विदितो मम ॥ ४० ॥ अधिकं तव विज्ञानमधि
कावगतिस्तव ॥ अधिकं च तवैश्वर्यं तच्च त्वं नावबुध्यसे ॥ ४१ ॥ बाल्याद्वा संशयाद्वापि भयाद्वापि विमोक्षजात् ॥ उत्पन्ने चापि विज्ञा
ने नाधिगच्छंति तां गतिम्॥ ४२ ॥व्यवसायेन शुद्धेन मद्विधैश्छिन्नसंशयाः॥ विमुच्य हृदयग्रंथीनार्तिमासादयंति ताम्॥ ४३ ॥भवांश्चोत्पन्नविज्ञानः स्थिर
बुद्धिरलोलुपः ॥ व्यवसायादृते ब्रह्मन्नासादयति तत्पदम् ॥ ४४ ॥ नास्ति ते सुखदुःखेषु विशेषो नास्ति वस्तुषु ॥ नौत्सुक्यं नृत्यगीतेषु
न राग उपजायते ॥ ४५ ॥ न बंधुषु निबंधस्ते न भयेष्वस्ति ते भयम् ॥ पश्यामि त्वां महाभाग तुल्यनिंदात्मसंस्तुतिम् ॥ ४६ ॥ अहं च त्वानुपश्यामि ये
चान्येऽपि मनीषिणः ॥ आस्थितं परमं मार्गं अक्षयं चाप्यनामयम् ॥ ४७ ॥ यत्फलं ब्राह्मणस्येह मोक्षार्थश्चापदात्मकः ॥ तस्मिन्वै वर्तसे विप्र
किमन्यत्परिपृच्छसि ॥४८ ॥सनंदन उवाच ॥ एतच्छ्रुत्वा तु वचनं कृतात्मा कृतनिश्चयः ॥ आत्मनात्मानमास्थाय दृष्ट्वा चात्मानमात्मना ॥४९॥
कृतकार्यः सुखी शांतस्तूष्णीं प्रायादुदङ्मुखः॥ शैशिरं गिरिमासाद्य पाराशर्यं ददर्श च ॥५०॥शिष्यानध्यापयंतं च पैलादीन्वेदसंहिताः॥आरणेयो
विशुद्धात्मा दिवाकरसमप्रभः ॥ ५१॥ पितुर्जग्राह पादौ च सादरं हृष्टमानसः ॥ ततो निवेदयामास पितुः सर्वमुदारधीः ॥ ५२ ॥ शुको जनकरा
जेन संवादं मोक्षसाधनम् ॥ तच्छ्रुत्वा वेदकर्तासौ प्रहृष्टेनांतरात्मना ॥ ५३ ॥ समालिंग्य सुतं व्यासः स्वपार्श्वस्थं चकार च ॥ ५४ ॥ ततः पैला
दयो विप्रा वेदान् व्यासादधीत्य च॥शैलशृंगाद्भुवं प्राप्ता याजनाध्यापने रताः॥५५॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने एकोनषष्टितमो
ऽध्यायः ॥५९ ॥ सनंदन उवाच ॥ अवतीर्णेषु विप्रेषु व्यासः पुत्रसहायवान् ॥ तूष्णीं ध्यानपरो धीमानेकांते समुपाविशत् ॥ १ ॥ तमुवाचाशरी

री वाक्र व्यासं पुत्रसमन्वितम् ॥ भो भो महर्षे वासिष्ठ ब्रह्मघोषो न वर्तते ॥ २ ॥ एको ध्यानपरस्तूष्णीं किमास्से चिंतयन्निव ॥
ब्रह्मघोषैर्विरहितः पर्वतोऽयं न शोभते ॥ ३ ॥ तस्मादधीष्व भगवन्सार्द्धं पुत्रेण धीमता ॥ वेदान्वेदविदा चैव सुप्रसन्नमनाः सदा ॥ ४ ॥ तच्छुत्वा
वचनं व्यासो नभोवाणीसमीरितम् ॥ शुकेन सह पुत्रेण वेदाभ्यासमथाकरोत् ॥ ५ ॥ तयोरभ्यसतोरेवं बहुकालं द्विजोत्तम ॥ वातोऽतिमात्रं प्रववौ
समुद्रानिलवीजितः ॥ ६॥ ततोऽनध्याय इति तं व्यासः पुत्रमवारयत् ॥ शुको वारितमात्रस्तु कौतूहलसमन्वितः ॥ ७ ॥ अपृच्छत्पितरं तत्र कुतो
वायुरभूदयम् ॥ आख्यातुमर्हति भवान्सर्वं वायोर्विचेष्टितम् ॥ ८॥ शुकस्यैतद्वचः श्रुत्वा व्यासः परमविस्मितः ॥ अनध्यायनिमित्तेऽस्मिन्निदं वचन
मब्रवीत् ॥ ९ ॥ दिव्यं ते चक्षुरुत्पन्नं स्वस्थं ते निश्चलं मनः ॥ तमसा रजसा चापि त्यक्तः सत्ये व्यवस्थितः ॥ १० ॥ तस्यात्मनि स्वयं
वेदान्बुद्धा समनुचिंतय ॥ देवयानचरो विष्णोः पितृयानश्च तामसः ॥ ११ ॥ द्वावेतौ प्रत्ययं यातौ दिवं चाधश्च गच्छतः ॥ पृथिव्यामंतरिक्षे
च यतः संयांति वायवः ॥ १२ ॥ सप्त ते वायुमार्गा वै तान्निबोधानुपूर्वशः ॥ तत्र देवगणाः साध्याः समभूवन्महाबलाः ॥ १३ ॥ तेषामप्यभव
त्पुत्रः समानो नाम दुर्जयः ॥ उदानस्तस्य पुत्रोऽभूद्व्यानस्तस्याभवत्सुतः ॥ १४ ॥ अपानश्च ततो जज्ञे प्राणश्चापि ततः परम् ॥ अनपत्यो
ऽभवत्प्राणो दुर्द्धर्षः शत्रुमर्दनः ॥ १५ ॥ पृथक्कर्माणि तेषां तु प्रवक्ष्यामि यथा तथा ॥ प्राणिनां सर्वतो वायुश्चेष्टा वर्तयते पृथक् ॥ १६ ॥ प्रीण
नाच्चैव सर्वेषां प्राण इत्यभिधीयते ॥ प्रेषयत्यभ्रसंघातान्धूमजांश्चोष्मजांस्तथा ॥ १७ ॥ प्रथमः प्रथमे मार्गे प्रवहो नाम सोऽनिलः ॥ अंबरे
स्नेहमात्रेभ्यस्तडिद्भ्यश्चोत्तमद्युतिः ॥ १८ ॥ आवहो नाम सोऽभ्येति द्वितीयः श्वसनो नदन् ॥ उदयं ज्योतिषां शश्वत्सोमादीनां करोति यः ॥
॥ १९ ॥ अंतर्देहेषु चोदानं यं वदंति मनीषिणः॥यश्चतुर्भ्यः समुद्रेभ्यो वायुर्द्धारयते जलम् ॥ २०॥ उद्धृत्य ददते चापो जीमूतेभ्यो वनेऽनिलः॥
योऽद्भिः संयोज्य जीमूतान्पर्जन्याय प्रयच्छति ॥ २१ ॥ उद्वहो नाम बंहिष्ठस्तृतीयः स सदागतिः ॥ संनीयमाना बहुधा येन नीला महाघनाः ॥
॥ २२ ॥ वर्षमोक्षकृतारंभास्ते भवंति घनाघनाः॥योऽसौ वहति देवानां विमानानि विहायसा ॥ २३ ॥ चतुर्थः संवहो नाम वायुः स गिरिमर्दनः ॥
येन वेगवता रुग्णाः क्रियन्ते तरुजा रसाः ॥ २४ ॥ पंचमः स महावेगो विवहो नाम मारुतः ॥ यस्मिन्परिप्लुवे दिव्या वहंत्यापो विहायसा ॥
॥ २५ ॥ पुण्यं चाकाशगंगायास्तोयं तिष्ठति तिष्ठति ॥ दूरात्प्रतिहतो यस्मिन्नेकरश्मिर्दिवाकरः ॥ २६ ॥ योनिरंशुसहस्रस्य येन याति वसुंधराम् ॥
यस्मादाप्यायते सोमो निधिर्दिव्योऽमृतस्य च ॥ २७ ॥ षष्ठः परिवहो नाम स वायुर्जीवतां वरः ॥ सर्वप्राणभृतां प्राणान्योंऽतकाले निरस्यति ॥२८॥

यस्य धर्मेऽनुवर्तेते मृत्युवैवस्वतावुभौ ॥ सम्यगन्वीक्षता बुद्ध्या शांतयाऽध्यात्मनित्यया ॥२९ ॥ ध्यानाभ्यासाभिरामाणां योऽमृतत्वाय कल्पते ॥ यं समासाद्य वेगेन दिशामंतं प्रपेदिरे ॥ ३० ॥ दक्षस्य दश पुत्राणां सहस्राणि प्रजापतेः ॥ येन वृष्ट्या पराभूतस्तोयान्येन निवर्तते ॥ ३१ ॥ परीवहो नाम वरो वायुः स दुरतिक्रमः ॥ एवमेते दितेः पुत्रा मरुतः परमाद्भुताः ॥ ३२ ॥ अनारमंतः सर्वांतः सर्वगाः सर्वचारिणः ॥ एतत्तु महदाश्चर्यं यदयं पर्वतोत्तमः ॥ ३३ ॥ कंपितः सहसा तेन पवमानेन वायुना ॥ विष्णोर्निःश्वासवातोऽयं यदा वेगसमीरितः ॥ ३४ ॥ सहसोदीर्यते तात जगत्प्रव्यथते तदा ॥तस्माद्ब्रह्मविदो ब्रह्म न पठंत्यतिवायुतः॥३५॥वायोर्वायुभयं ह्युक्तं ब्रह्म तत्पीडितं भवेत्॥एतावदुक्त्वा वचनं पराशरसुतः प्रभुः॥ ॥ ३६ ॥ उक्त्वा पुत्रमधीष्वेति व्योमगंगामगात्तदा ॥ ततो व्यासे गते स्नातुं शुको ब्रह्मविदां वरः ॥ ३७॥ स्वाध्यायमकरोद्ब्रह्मन्वेदवेदांगपारगः ॥ तत्र स्वाध्यायसंसक्तं शुकं व्याससुतं मुने ॥ ३८ ॥ सनत्कुमारो भगवानेकांते समुपागतः ॥ उत्थाय सत्कृतस्तेन ब्रह्मपुत्रो हि कार्ष्णिना ॥ ॥ ३९ ॥ ततः प्रोवाच विप्रेंद्र शुकं विदां वरः ॥ किं करोषि महाभाग व्यासपुत्र महाद्युते ॥ ४० ॥ शुक उवाच॥स्वाध्याये संप्रवृत्तोऽहं ब्रह्मपुत्राधुना स्थितः ॥ त्वद्दर्शनमनुप्राप्तः केनापि सुकृतेन च ॥ ४१॥ किंचित्त्वां प्रष्टुमिच्छामि तत्त्वं मोक्षार्थसाधनम् ॥ तद्वदस्व महाभाग यथा तज्ज्ञानमाप्नुयाम्॥४२॥सनत्कुमार उवाच ॥ नास्ति विद्यासमं चक्षुर्नास्ति विद्यासमं तपः ॥ नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम्॥४३॥ निवृत्तिः कर्मणः पापात्सततं पुण्यशीलता ॥ सद्वृत्तिः समुदाचारः श्रेय एतदनुत्तमम् ॥ ४४ ॥ मानुष्यमसुखं प्राप्य यः सज्जति स मुह्यति॥ नालं स दुःखमोक्षाय संगो वै दुःखलक्षणः ॥ ४५ ॥ सक्तस्य बुद्धिर्भवति मोहजालविवर्द्धिनी ॥ मोहजालावृतो दुःखमिहामुत्र तथाश्नुते ॥ ४६ ॥ सर्वोपायेन कामस्य क्रोधस्य च विनिग्रहः ॥ कार्यः श्रेयोर्थिना तौ हि श्रेयोघातार्थमुद्यतौ ॥ ४७ ॥ नित्यं क्रोधात्तपो रक्षेच्छ्रियं रक्षेच्च मत्सरात् ॥ विद्यां मानावमानाभ्यामात्मानं तु प्रमादतः ॥ ४८ ॥ आनृशंस्यं परो धर्मः क्षमा च परमं बलम् ॥ आत्मज्ञानं परं ज्ञानं सत्यं हि परमं हितम् ॥ ४९ ॥ येन सर्वं परित्यक्तं स विद्वान्स च पंडितः ॥ इंद्रियैरिंद्रियार्थेभ्यश्चरत्यात्मवशैरिह ॥ ५० ॥ असज्जमानः शांतात्मा निर्विकारः समाहितः ॥ आत्मभूतैरतद्भूतः सह चैव विनैव च ॥ ५१ ॥ स विमुक्तः परं श्रेयो न चिरेणाधिगच्छति ॥ अदर्शनमसंस्पर्शस्तथैवाभाषणं सदा ॥ ५२ ॥ यस्य भूतैः सह मुने स श्रेयो विंदते महत् ॥ न हिंस्यात्सर्वभूतानि भूतैर्मैत्रायणश्चरेत् ॥ ५३ ॥ नेदं जन्म समासाद्य वैरं कुर्वीत केन चित् ॥ आकिंचन्यं सुसंतोषो निराशिष्ट्वमचापलम् ॥ ५४ ॥ एतदाहुः परं श्रेय आत्मज्ञस्य जितात्मनः ॥ परिग्रहं परित्यज्य भव तात

जितेंद्रियः ॥ ५५ ॥ अशोकं स्थानमातिष्ठ इह चामुत्र चाभयम् ॥ निराशिषो न शोचंति त्यजेदाशिषमात्मनः ॥ ५६ ॥ परित्यज्याशिषं सौम्य
दुःखग्रामाद्विमोक्ष्यसे ॥ तपोनित्येन दांतेन मुनिना संयतात्मना॥५७॥अजितं जेतुकामेन भाव्यं संगेष्वसंगिना ॥ गुणसंगेष्वनासक्त एकचर्या
रतः सदा ॥ ५८ ॥ ब्राह्मणो न चिरादेव सुखमायात्यनुत्तमम् ॥ द्वंद्वारामेषु भूतेषु वराको रमते मुनिः ॥५९॥ किंचित्प्रज्ञानतृप्तोऽसौ ज्ञानतृप्तो न
शोचति ॥ शुभैर्लभेत देवत्वं व्यामिश्रैर्जन्म मानुषम् ॥ ६० ॥ अशुभैश्चाप्यधो जन्म कर्मभिर्लभतेऽवशः ॥तत्र मृत्युजरादुःखैः सततं समभिद्रुतम् ॥
॥६१॥ संसारं पश्यते जंतुस्तत्कथं नावबुध्यसे ॥ अहिते हितसंज्ञस्त्वमध्रुवे ध्रुवसंज्ञकः ॥ ६२ ॥ अनर्थे वार्थसंज्ञस्त्वं किमर्थं नावबुध्यसे ॥ संवे
ष्ट्यमानं बहुभिर्मोहतंतुभिरात्मजैः ॥ ६३॥ कोशकारवदात्मानं वेष्टितो नावबुध्यसे ॥ अलं परिग्रहेणेह दोषवान् हि परिग्रहः ॥६४॥कृमिर्हि कोशका
रस्तु बध्यते स्वपरिग्रहात् ॥ पुत्रदारकुटुंबेषु सक्ताः सीदंति जंतवः ॥ ६५ ॥ सरःपंकार्णवे मग्ना जीर्णा वनगजा इव ॥ मोहजालसमाकृष्टान्पश्य
जंतून्सुदुःखितान् ६६ ॥ कुटुंबं पुत्रदारं च शरीरं द्रव्यसंचयम् ॥ पारक्यमध्रुवं सर्वं किं स्वं सुकृतदुष्कृते ॥ ६७ ॥ यदा सर्वं परित्यज्य
गंतव्यमवशेन वै ॥ अनर्थे किं प्रसक्तस्त्वं स्वमर्थं नानुतिष्ठसि ॥ ६८ ॥ अविश्रांतमनालंबमपाथेयमदेशिकम् ॥ तमःकांतारमध्वानं कथमेको
गमिष्यसि ॥ ६९ ॥ नहि त्वां प्रस्थितं कश्चित्पृष्ठतोऽनुगमिष्यति ॥ सुकृतं दुष्कृतं च त्वां गच्छंतमनुयास्यतः ॥ ७० ॥ विद्या कर्म च शौर्यं
च ज्ञानं च बहुविस्तरम् ॥ अथार्थमनुशीर्यंते सिद्धार्थस्तु विमुच्यते ॥ ७१ ॥ निर्बंधिनी रज्जुरेषा या ग्रामे वसतो रतिः ॥ छित्वैनां सुकृतो
यांति नैनां छिंदंति दुष्कृतः ॥ ७२ ॥ तुल्यजातिवयोरूपान् हतान्पस्यसि मृत्युना ॥ न च नामास्ति निर्वेदो लोहं हि हृदयं तव ॥ ७३ ॥
रूपकूलां मनःस्रोतां स्पर्शद्वीपां रसावहाम् ॥ गंधपंकां शब्दजलां स्वर्गमार्गदुरारुहाम् ॥ ७४ ॥ क्षमारित्रां सत्यमयीं धर्मस्थैर्यकराकराम् ॥
त्यागवाताध्वगां शीघ्रां बुद्धिनावं नदीं तरेत् ॥ ७५ ॥ त्यक्त्वा धर्ममधर्मं च ह्युभे सत्यानृते त्यज ॥ त्यज धर्ममसंकल्पादधर्मं चाप्यहिंसया ॥
॥ ७६ ॥ उभे सत्यानृते बुद्ध्वा बुद्धिं परमनिश्चयात् ॥ अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ॥ ७७ ॥ चर्मावनद्धं दुर्गंधि पूर्णं मूत्रपुरी
षयोः ॥ जराशोकसमाविष्टं रोगायतनमस्थिरम् ॥ ७८ ॥ रजस्वलमनित्यं च भूतावासं समुत्सृज ॥ इदं विश्वं जगत्सर्वमजगच्चापि यद्भवेत् ॥
॥ ७९ ॥ महाभूतात्मकं सर्वमस्माद्यत्परमाणुमत् ॥ इंद्रियाणि च पंचैव तमः सत्त्वं रजस्तथा ॥ ८० ॥ इत्येष सप्तदशको राशिरव्यक्तसंज्ञकः ॥
सर्वैरिहेंद्रियार्थैश्च व्यक्ताव्यक्तैर्हि संहितम् ॥ ८१ ॥ पंचविंशक इत्येष व्यक्ताव्यक्तमयो गणः ॥ एतैः सर्वैः समायुक्तमनित्यमभिधीयते ॥ ८२ ॥

त्रिवर्गोऽत्र सुखं दुःख जीवितं मरणं तथा ॥ य इदं वेद तत्त्वेन स वेद प्रभवाप्ययौ॥८३॥इन्द्रियैर्गृह्यते यद्यत्तद्व्यक्तमभिधीयते॥अव्यक्तमथ तज्ज्ञेयं
लिंगग्राह्यमतींद्रियम् ॥ ८४ ॥ इन्द्रियैर्नियतैर्देही धाराभिरिव तर्प्यते ॥ लोके विहितमात्मानं लोकं चात्मनि पश्यति ॥ ८५ ॥ परावरदृशः शक्ति
र्ज्ञानवेलां न पश्यति ॥ पश्यतः सर्वभूतानि सर्वावस्थासु सर्वदा ॥ ८६ ॥ ब्रह्मभूतस्य संयोगो नाशुभेनोपपद्यते ॥ ज्ञानेन विविधात्क्लेशान्न निवृ
त्तिश्च देहजात् ॥ ८७ ॥ लोकबुद्धिप्रकाशेन लोकमार्गो न रिष्यति ॥ अनादिनिधनं जंतुमात्मनि स्थितमव्ययम् ॥ ८८ ॥ अकर्तारममूढं च
भगवानाह तीर्थवित् ॥ यो जन्तुः स्वकृतैस्तैस्तैः कर्मभिर्नित्यदुःखितः ॥ ८९ ॥ स्वदुःखप्रतिघातार्थं हंति जंतुरनेकधा ॥ ततः कर्म समादत्ते
पुनरन्यन्नवं बहु ॥ ९० ॥ तप्यतेऽथ पुनस्तेन भुक्त्वाऽपथ्यमिवातुरः ॥ अजस्रमेव मोहांतो दुःखेषु सुखसंज्ञितः ॥ ९१ ॥ वध्यते तप्यते चैव
भयवत्कर्मभिः सदा ॥ ततो निवृत्तो बंधात्स्वात्कर्मणामुदयादिह ॥ ९२ ॥ परिभ्रमति संसारे चक्रवद्बाहुवर्जितः ॥ संयमेन च संबंधान्निवृत्त्या तपसो
वलात् ॥९३॥ सम्प्राप्ता बहवः सिद्धिं अव्याबाधां सुखोदयाम्॥९४॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे द्वितीयपादे बृहदुपाख्याने षष्टितमोऽध्यायः
॥६० ॥ सनत्कुमार उवाच ॥ अशोकं शोकनाशार्थं शास्त्रं शांतिकरं शिवम् ॥ निशम्य लभ्यते बुद्धिर्लब्धायां सुखमेधते ॥ १ ॥ हर्षस्थानसहस्रा
णि शोकस्थानशतानि च ॥ दिवसे दिवसे मूढमाविशंति न पंडितम् ॥ २॥अनिष्टसंप्रयोगाच्च विप्रयोगात्प्रियस्य च ॥ मनुष्या मानसैर्दुःखैर्युज्यन्ते
येऽल्पवुद्धयः ॥ ३ ॥द्रव्येषु समतीतेषु ये गुणास्तान्न चिंतयेत् ॥ ताननाद्रियमाणश्च स्नेहबन्धाद्विमुच्यते ॥४॥ दोषदर्शी भवेत्तत्र यत्र रागः प्रवर्त्तते॥
अनिष्टबुद्धितां यच्छेत्ततः क्षिप्रं विराजते ॥ ५ ॥ नार्थो न धर्मो न यशो योऽतीतमनुशोचति ॥ अस्याभावेन युज्येत तच्चास्य तु निवर्तते ॥ ६ ॥
गुणैर्भूतानि युज्यंते तथैव च न युज्यते ॥ सर्वाणि नैतदेकस्य शोकस्थानं हि विद्यते ॥७॥ मृतं वा यदि वा नष्टं योऽतीतमनुशोचति॥दुःखेन लभते
दुःखं महानर्थं प्रपद्यते ॥ ८ ॥ दुःखोपघाते शारीरे मानसे चाप्युपस्थिते ॥ यस्मिन्न शक्यते कर्तुं यत्नस्तन्नानुचिंतयेत् ॥ ९ ॥ भैषज्यमेतद्दुःखस्य
यदेतन्नानुचिंतयेत्॥ चिंत्यमानं हि न व्येति भूयश्चाभिप्रवर्द्धते ॥ १० ॥ प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः ॥ एतद्विज्ञाय सामर्थ्यं न
वान्यैः समतामियात् ॥ ११ ॥ अनित्यं जीवितं रूपं यौवनं द्रव्यसञ्चयः ॥ आरोग्यं प्रियसंवासं न गृध्येत्पंडितः क्वचित् ॥
॥ १२ ॥ नाज्ञानप्रभवं दुःखमेकं शोचितुमर्हति ॥ अशोचन्प्रतिकुर्वीत यदि पश्येदुपक्रमम् ॥ १३ ॥ सुखात्प्रियतरं दुःखं जीविते
नात्र संशयः ॥ जरामरणदुःखेभ्यः प्रियमात्मानमुद्धरेत् ॥ १४ ॥ भजंति हि शारीराणि रोगाः शरीरमानसाः ॥ सायका इव तीक्ष्णाग्राः प्रयुक्ता

दृढधन्विभिः ॥ १५ ॥ व्याधितस्य चिकित्साभिस्त्रस्यतो जीवितैषिणः ॥ आमयस्य विनाशाय शरीरमनुकृष्यते ॥ १६ ॥ स्रंसंति न निवर्तंत
स्रोतांसि सरितामिव ॥ आयुरादाय मर्त्यानां रात्र्यहानि पुनःपुनः ॥ १७ ॥ अपयंत्ययमत्यंतं पक्षयोः शुक्लकृष्णयोः ॥ जातं मर्त्यं जरयति
निमिषं नावतिष्ठते ॥ १८ ॥ सुखदुःखाभिभूतानामजरो जरयत्यसून् ॥ आदित्यो ह्यस्तमभ्येति पुनःपुनरुदेति च ॥१९॥ अदृष्टपूर्वानादाय भावा
नपरिशंकितान् ॥इष्टानिष्टा मनुष्याणां मतं गच्छन्ति रात्रयः ॥ २० ॥ यो यदिच्छेद्यथाकामं कामानां तत्तदाप्नुयात् ॥ यदि स्यान्नपराधीनं पुरुषस्य
क्रियाफलम् ॥ २१ ॥ संयताश्चैव दक्षाश्च मतिमंतश्च मानवाः ॥ दृश्यंते निष्फलाः संतः प्रहीनाश्च स्वकर्मभिः ॥ २२ ॥ अपरे निष्फलाः सन्तो
निर्गुणाः पुरुषाधमाः ॥ आशाभिरप्यसंयुक्ता दृश्यन्ते सर्वकामिनः ॥ २३ ॥ भूतानामपरः कश्चिद्धिंसायां सततोत्थितः॥ वंचनायां च लोकेषु ससु
खेष्वेव जीयते ॥ २४ ॥ अचेष्टमानमासीनं श्रीः कंचिदुपतिष्ठति ॥ कश्चित्कर्माणि कुरुते न प्राप्यमधिगच्छति ॥ २५ ॥ अपराधान्समाचष्टुं पुरु
षस्य स्वभावतः ॥ शुक्रमन्यत्र संभूतं पुनरन्यत्र गच्छति ॥ २६ ॥ तस्य योनौ प्रसक्तस्य गर्भो भवति मानवः ॥ आम्रपुष्पोपमा यस्य निवृत्तिरुप
लभ्यते ॥२७॥ केषांचित्पुत्रकामानामनुसन्तानमिच्छताम् ॥ सिद्धौ प्रयतमानानां नैवांडमुपजायते ॥ २८ ॥ गर्भादुद्विजमानानां क्रुद्धादाशीविषा
दिव ॥ आयुष्मान् जायते पुत्रः कथं प्रेतः पितेव सः ॥ २९ ॥ देवानिष्ट्वा तपस्तप्त्वा कृपणैः पुत्रहेतुभिः ॥ दशमासान्परिधृता जायते कुल
पांसनाः ॥ ३० ॥ अपरे धनधान्यानि भोगांश्च पितृसंचितान् ॥ विमलानभिजायन्ते लब्ध्वा तैरेव मङ्गलैः ॥३१॥ अन्योन्य समभिप्रेत्य मैथु
नस्य समागमे ॥ उपद्रवइवादृष्टो योनौ गर्भः प्रपद्यते ॥ ३२ ॥ स्निग्धत्वादिंद्रियार्थेषु मोहान्मरणमप्रियम् ॥ परित्यजति यो दुःखं
सुखमप्युभयं नरः ॥ ३३ ॥ अत्येति ब्रह्म सोऽत्यन्तं सुखमप्यश्नुते परम् ॥ दुःखमर्था हि त्यज्यंते पालने च न ते सुखाः ॥ ३४ ॥ श्रुत्वैव नाधिग
मनं नाशमेषां न चिंतयेत् ॥ अन्यामन्यां धनावस्थां प्राप्य वैशेषिका नराः ॥ ३५ ॥ अतृप्ता यांति विध्वंसं सन्तोषं यांति पंडिताः ॥ सर्वे क्षयांता
निचयाः पतनांताः समुच्छ्रयाः ॥ ३६ ॥ संयोगा विप्रयोगांता मरणांतं हि जीवितम् ॥ अन्तो नास्ति पिपासायास्तुष्टिस्तु परमं सुखम् ॥ ३७ ॥
तस्मात्संतोषमेवेह धनं शंसन्ति पंडिताः ॥ निमेषमात्रमपि हि योऽधिगच्छन्न तिष्ठति ॥ ३८॥सशरीरेष्वनित्येषु नित्यं किमनुचिंतयेत्॥ भूतेषु भावं
संचिंत्य ये बुद्ध्या तमसः परम् ॥ ३९ ॥ ॥ न शोचंति गताध्वानः पश्यंति परमां गतिम् ॥ संचिन्वन्नेकमेवैनं कामानामवितृप्तकम् ॥४०॥ व्याघ्र
पशुमिवासाद्य मृत्युरादाय गच्छति ॥ अथाप्युपायं संपश्येद्दुःखस्यास्य विमोक्षणे ॥ ४१ ॥ अशोचन्नारभेन्नैव युक्तश्चाव्यसनी भवेत् ॥ शब्दे

स्पर्शे रसे रूपे गंधे च परमं तथा ॥ ४२ ॥ नोपभोगात्परं किंचिद्धनिनो वाऽधनस्य वा ॥ वाक्संप्रयोगाद्भूतानां नास्ति दुःखमनामयम् ॥
॥ ४३ ॥ विप्रयोगश्च सर्वस्य न वाचा न च विद्यया ॥ प्रणयं परिसंहृत्य संस्तुतेष्वितरेषु च ॥४४॥ विचरेदसमुन्नद्धः स सुखी स च पंडितः ॥
अध्यात्मगतमालीनो निरपेक्षो निरामिषः ॥ ४५ ॥ आत्मनैव सहायेन यश्चरेत्स सुखी भवेत् ॥ सुखदुःखविपर्यासो यदा समुपपद्यते ॥ ४६ ॥
नैनं प्रज्ञा सुनियतं त्रायते नापि पौरुषम्॥स्वभावाद्यत्नमातिष्ठेद्यत्नवान्नावसीदति॥४७॥उपद्रव इवानिष्टो योनिं गर्भः प्रपद्यते ॥ तानि पूर्वशरीराणि
नित्यमेकं शरीरिणम् ॥ ४८ ॥ प्राणिनां प्राणसंरोधे मांसश्लेष्मविचेष्टितम् ॥ निर्दग्धं परदेहेन परदेहं बलाबलम् ॥ ४९ ॥ विनश्यति विनाशांते
नावि नावमिवाचलाम् ॥ संगत्या जठरे न्यस्तं रेतोबिंदुमचेतनम् ॥ ५० ॥ केन यत्नेन जीवंत गर्भं त्वमिह पश्यसि ॥ अन्नपानानि जीर्यंते यत्र
भक्ष्याश्च भक्षिताः ॥५१॥तस्मिन्नेवोदरे गर्भः किं नान्नमिव जीर्यति ॥ गर्भे मूत्रपुरीषाणां स्वभावनियता गतिः ॥५२ ॥ धारणे वा विसर्गे च न
कर्तु विद्यतेऽवशः ॥ प्रभवंत्युदरे गर्भा जायमानास्तथापरे ॥ ५३ ॥ आगमेन महान्येषां विनाश उपपद्यते ॥ एतस्माद्योनिसंबंधाद्यो जीवन्परिमु
च्यते ॥५४॥ पूजां न लभते कांचित्पुनर्द्वंद्वेषु मज्जति ॥ गर्भस्य सह जातस्य सप्तमीमीदृशीं दशाम्॥५५॥प्राप्नुवंति ततः पंच न भवंति शतायुषः॥
नाभ्युत्थाने मनुष्याणां योगाः स्युर्नात्र संशयः ॥ ५६ ॥ व्याधिभिश्च विबध्यंते व्याघ्रैः क्षुद्रमृगा इव ॥ व्याधिभिर्भक्ष्यमाणानां त्यजतां विपुलं
धनम् ॥५७॥ वेदना नापकर्षंति यतमानाश्चिकित्सकाः ॥५८॥ते चापि विविधा वैद्याः कुशला संमतौषधाः॥व्याधिभिः परिकृष्यंते मृगा व्याघ्रैरि
वार्दिताः ॥५९॥ते पिबंति कषायांश्च सर्पींषि विविधानि च॥दृश्यंते जरया भग्ना नागैर्नागा इवोत्तमाः॥६०॥ कैर्वा भुवि चिकित्स्यंते रोगार्त्ता मृगप
क्षिणः ॥ श्वापदाश्च दरिद्राश्च प्रायो नार्ता भवंति ते ॥६१॥ घोरानपि दुराधर्षान्नृपतीनुग्रतेजसः ॥आक्रम्य रोग आदत्ते पशून्पशुपचो यथा॥६२॥
इति लोकमनाक्रंदं मोहशोकपरिप्लुतम् ॥ स्रोतसा महता क्षिप्रं ह्रियमाणं बलीयसा ॥ ६३ ॥ न धनेन न राज्येन नोग्रेण तपसा तथा॥स्वभावा ह्य
तिवर्तंते ये निर्मुक्ताः शरीरिषु ॥६४॥ उपर्युपरि लोकस्य सर्वो भवितुमिच्छति ॥ यतते च यथाशक्ति न च तद्वर्तते तथा॥ ६५॥ न म्रियेरन्नजीर्ये
रन्सर्वे स्युः सार्वकामिकाः ॥ नाप्रियं प्रतिपद्येरन्नुत्थानस्य फलं प्रति ॥ ६६॥ ऐश्वर्यमदमत्ताश्च मानान्मयमदेन च ॥ अप्रमत्ताः शठाः क्रूरा
विक्रांताः पर्युपासते ॥ ६७ ॥ शोकाः प्रतिनिवर्तंते केषांचिदसमीक्षताम् ॥ स्वं स्वं च पुनरन्येषां न कंचिदतिगच्छति ॥ ६८ ॥ महच्च फलवैषम्यं
दृश्यते कर्मसंधिषु ॥ वहंति शिबिकामन्ये यांत्यन्ये शिबिकारुहः ॥ ६९ ॥ सर्वेषामृद्धिकामानामन्ये रथपुरःसराः ॥ मनुजाश्च गतश्रीकाः शत

शो विविधाः स्त्रियः ॥ ७० ॥ द्वंद्वारामेषु भूतेषु गच्छन्त्येकैकशो नराः ॥ इदमन्यत्परं पश्य नात्र मोहं करिष्यसि ॥ ७१ ॥ धर्मं चापि त्यजा
धर्मं त्यज सत्यानृतां धियम् ॥ सर्वं त्यक्त्वा स्वरूपस्थः सुखी भव निरामयः ॥७२॥एतत्ते परमं गुह्यमाख्यातमृषिसत्तम ॥ येन देवाः परित्यज्य
मर्त्यलोकं दिवं गताः ॥ ७३ ॥ सनंदन उवाच ॥ इत्युक्त्वा व्यासतनयं समापृच्छ्य महामुनिः ॥ सनत्कुमारः प्रययौ पूजितस्तेन सादरम् ॥
॥ ७४ ॥ शुकोऽपि योगिनां श्रेष्ठः सम्यग्ज्ञात्वा ह्यवस्थितिम् ॥ ब्रह्मणः पदमन्वेष्टुमुत्सुकः पितरं ययौ ॥ ७५ ॥ ततः पित्रा समागम्य प्रणम्य
च महामुनिः ॥ शुकः प्रदक्षिणीकृत्य ययौ कैलासपर्वतम् ॥ ७६ ॥ व्यासस्तद्विरहाद्दूनः पुत्रस्नेहसमावृतः ॥ क्षणैकं स्थीयतां पुत्र इति चु
क्रोश दुर्मनाः ॥७७॥ निरपेक्षः शुको भूत्वा निःस्नेहो मुक्तबन्धनः ॥ मोक्षमेवानुसंचित्य गत एव परं पदम् ॥७८॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे
बृहदुपाख्याने द्वितीयपादे एकषष्टितमोऽध्यायः ॥६१॥ सूत उवाच ॥ एतच्छ्रुत्वा तु वचनं नारदो भगवानृषिः॥ पुनः पप्रच्छ तं विप्र शुकाभिपतनं
मुनिम् ॥१॥ नारद उवाच ॥ भगवन्सर्वमाख्यातं त्वयाऽतिकरुणात्मना ॥ यच्छ्रुत्वा मानसं मेऽद्य शांतिमग्र्यामुपागतम् ॥२॥ पुनश्च मोक्षशास्त्रं मे
त्वमादिश महामुने ॥ नहि सम्पूर्णतामेति तृष्णा कृष्णगुणार्णवे ॥ ३ ॥ ये तु संसारनिर्मुक्ता मोक्ष शास्त्रपरायणाः ॥ कुत्र ते निवसंतीह संशयो मे
महानयम्॥४॥तं छिन्धि सुमहाभाग त्वत्तो नान्यो विदांवरः॥सनं०उ०॥धारयामास चात्मानं यथाशास्त्रं महामुनिः॥५॥पादात्प्रभृति गात्रेषु क्रमेण
क्रमयोगवित् ॥ ततः स प्राङ्मुखो विद्वानादित्येन विरोचिते ॥ ६ ॥ पाणिपादं समाधाय विनीतवदुपाविशत्॥न तत्र पक्षिसंघातो न शब्दो न च
दर्शनम् ॥ ७ ॥ यत्र वैयासकिर्धीमान् योक्तुं समुपचक्रमे ॥ स ददर्श तदात्मानं सर्वसंगविनिःसृतः ॥८॥ प्रजहास ततो हासं शुकः सम्प्रेक्ष्य भास्क
रम् ॥ स पुनर्योगमास्थाय मोक्षमार्गोपलब्धये ॥९॥ महायोगीश्वरो भूत्वा सोऽत्यक्रामद्विहायसम्॥अंतरिक्षचरः श्रीमान्व्यासपुत्रः सुनिश्चितः ॥
॥ १० ॥ तमुद्यंतं द्विजश्रेष्ठं वैनतेयसमद्युतिम् ॥ ददृशुः सर्वभूतानि मनोमारुतरंहसम् ॥ ११ ॥ यथाशक्ति यथान्यायं पूजयांचक्रिरे तथा ॥ पुष्प
वर्षैश्च दिव्यैस्तमवचक्रुर्दिवौकसः॥१२॥तं दृष्ट्वा विस्मिताः सर्वे गंधर्वाप्सरसां गणाः ॥ ऋषयश्चैव संसिद्धाः कोऽयं सिद्धिमुपागतः॥१३॥ ततोऽसौ
स्वाह्वयं तेभ्यः कथयामास नारद ॥ उवाच च महातेजास्तानृषीन्संप्रहर्षितः ॥ १४ ॥ पिता यद्यनुगच्छेन्मां क्रोशमानः शुकेति वै॥तस्मै प्रतिवचो
देयं भवद्भिस्तु समाहितैः॥१५॥बाढमुक्तस्ततस्तैस्तु लोकान्हित्वा चतुर्विधान् ॥ तमो ह्यष्टविधं त्यक्त्वा जहौ पञ्चविधं रजः॥१६॥ततः सत्वं जहौ
धीमांस्तदद्भुतमिवाभवत्॥ततस्तस्मिन्पदे नित्ये निर्गुणे लिंगपूजिते॥१७॥ततः स शृङ्गेऽप्रतिमे हिमवन्मेरुसन्निभे॥संश्लिष्टे श्वेतपीते च रुक्मरूप्यमये

शुभे॥१८॥शतयोजनविस्तारे तिर्यगूर्द्ध्वंच नारद॥सोऽविशंकेन मनसा तथैवाभ्यपतच्छुकः॥१९॥ते शृङ्गेऽत्यंतसंश्लिष्टे सहसैव द्विधाकृते॥अदृश्येतां
द्विजश्रेष्ठ तदद्भुतमिवाभवत्॥२०॥ततः पर्वतशृंगाभ्यां सहसैव विनिःसृतः॥न च प्रतिजघानास्य स गतिं पर्वतोत्तमः॥२१॥ ततो मंदाकिनीं दिव्या
मुपरिष्टादभिव्रजन्॥ शुको ददर्श धर्मात्मा पुष्पितद्रुमकाननम्॥२२॥ तस्यां क्रीडासु निरताः स्नांति चैवाप्सरोगणाः॥ निराकारं तु साकारा
ददृशुस्तं विवाससः॥२३॥ तं प्रक्रमंतमाज्ञाय पिता स्नेहसमन्वितः॥उत्तमां गतिमास्थाय पृष्ठतोऽनुससार ह॥२४॥ शुकस्तु मारुतादूर्द्ध्वं गतिं कृत्वां
तरिक्षगाम्॥दर्शयित्वा प्रभावं स्वं सर्वभूतोऽभवत्तदा॥२५॥ अथ योगगतिं व्यासः समास्थाय महातपाः॥ निमेषांतरमात्रेण शुकाभिपतनं ययौ
॥२६॥ स ददर्श द्विधा कृत्वा पर्वताग्रं गतं शुकम्॥ शशंसुर्मुनयः सिद्धा गतिं तस्मै सुतस्य ताम्॥२७॥ ततः शुकेतिशब्देन दीर्घेण क्रंदितं तदा॥
स्वयं पित्रा स्वरेणोच्चैस्त्रींल्लोकाननुनाद्य वै॥२८॥ शुकः सर्वगतिर्भूत्वा सर्वात्मा सर्वतोमुखः॥ प्रत्यभाषत धर्मात्मा भोः शब्देनानुनादयन्॥२९॥
तत एकाक्षरं नादं भोरित्येवमुदीरयन्॥ प्रत्याहरज्जगत्सर्वमुच्चैः स्थावरजंगमम्॥३०॥ ततःप्रभृति वाऽद्यापि शब्दानुच्चारितान्पृथक्॥ गिरिगह्वर
पृष्ठेषु व्याजहार शुकं प्रति॥३१॥ अंतर्हितप्रभावं तं दर्शयित्वा शुकस्तदा॥ गुणान्संत्यज्य सत्त्वादीन्पदमध्यगमत्परम्॥३२॥ महिमानं
तु तं दृष्ट्वा पुत्रस्यामिततेजसः॥ सोऽनुनीतो भगवता व्यासो रुद्रेण नारद॥३३॥ किमु त्वं ताम्यसि मुने पुत्रं प्रति समाकुलः॥ पश्यसि
विप्र नायांतं ब्रह्मभूतं निजांतिके॥३४॥ इत्येवमनुनीतोऽसौ व्यासः पुनरुपाव्रजत्॥ स्वाश्रमं स शुको ब्रह्मभूतो लोकांश्चचार ह॥३५॥
तत कालांतरे ब्रह्मन्व्यासः सत्यवतीसुतः॥ नरनारायणौ द्रष्टुं ययौ बदरिकाश्रमम्॥३६॥ तत्र दृष्ट्वा तु तौ देवौ तप्यमानो महत्तपः॥
स्वयं च तत्र तपसि स्थितः शुकमनुस्मरन्॥३७॥ यावत्तत्र स्थितो व्यासः शुकः परमयोगवित्॥ श्वेतद्वीपं गतस्तात यत्र त्वमगमः पुरा॥३८॥
तत्र दृष्टप्रभावस्तु श्रीमान्नारायणः प्रभुः॥ दृष्टः श्रुतिविमृग्यो हि देवदेवो जनार्दनः॥३९॥ स्तुतश्च शुकदेवेन प्रसन्नः प्राह नारद॥ श्रीभगवा
नुवाच॥ त्वया दृष्टोऽस्मि योगीन्द्र सर्वदेवरहःस्थितः॥४०॥ सनत्कुमारादिष्टेन सिद्धो योगेन वाडव॥ त्वं सदागतिमार्गस्थो लोकान्पश्य यथे
च्छया॥४१॥ इत्युक्तो वासुदेवेन तं नत्वारणिसंभवः॥ वैकुंठं प्रययौ विप्र सर्वलोकनमस्कृतम्॥४२॥ वैमानिकैः सुरैर्जुष्टं विरजापरिचेष्टित
म्॥ यं भांतमनुभांत्येते लोकाः सर्वेऽपि नारद॥४३॥ यत्र विद्रुमसोपानाः स्वर्णरत्नविचित्रिताः॥ वाप्य उत्पलसंछन्नाः सुरस्त्रीक्रीडनाकुलाः॥
॥४४॥ दिव्यैर्हंसकुलैर्घुष्टाः स्वच्छांबुनिभृताः सदा॥ तत्र द्वाःस्थैश्चतुर्हस्तैर्नानाभरणभूषितैः॥४५॥ विष्वक्सेनानुगैः सिद्धैः कुमुदाद्यैरवा

रितः ॥ प्रविश्याभ्यंतरं तत्र देवदेवं चतुर्भुजम् ॥ ४६ ॥ शांतं प्रसन्नवदनं पीतकौशेयवाससम् ॥ शंखचक्रगदापद्मैर्मूर्तिमद्भिरुपासितम् ॥४७॥ वक्ष
स्थलस्थया लक्ष्म्या कौस्तुभेन विराजितम् ॥ कटिसूत्रब्रह्मसूत्रकटकांगदभूषितम् ॥ ४८ ॥ भ्राजत्किरीटवलयं मणिनूपुरशोभितम् ॥ ददर्श सिद्धनि
करैः सेव्यमानमहर्निशम् ॥ ४९ ॥ तं दृष्ट्वा भक्तिभावेन तुष्टाव मधुसूदनम् ॥ शुक उवाच ॥ नमस्ते वासुदेवाय सर्वलोकैकसाक्षिणे ॥ ५० ॥ जगद्बी
जस्वरूपाय पूर्णाय निभृतात्मने ॥ हरये वासुकिस्थाय श्वेतद्वीपनिवासिने ॥ ५१ ॥ हंसाय मत्स्यरूपाय वाराहतनुधारिणे ॥ नृसिंहाय ध्रुवेज्याय
सांख्ययोगेश्वराय च ॥ ५२ ॥ चतुःसनाय कूर्माय पृथवे स्वसुखात्मने ॥ नाभेयाय जगद्धात्रे विधात्रेंऽतकराय च ॥ ५३ ॥ भार्गवेंद्राय रामा
य राघवाय पराय च ॥ कृष्णाय वेदकर्त्रे च बुद्धकल्किस्वरूपिणे ॥ ५४ ॥ चतुर्व्यूहाय वेद्याय ध्येयाय परमात्मने ॥ नरनारायणाख्याय शि
पिविष्टाय विष्णवे ॥ ५५ ॥ ऋतधाम्ने विधाम्ने च सुपर्णाय स्वरोचिषे ॥ ऋभवे सुव्रताख्याय सुधाम्ने चाजिताय च॥५६॥विश्वरूपाय विश्वाय
सृष्टिस्थित्यंतकारिणे ॥ यज्ञाय यज्ञभोक्त्रे च स्थविष्ठायाणवेऽर्थिने ॥ ५७ ॥ आदित्यसोमनेत्राय सहओजोबलाय च॥ ईज्याय साक्षिणेऽजायबहु
शीर्षाङ्घ्रिबाहवे ॥ ५८ ॥ श्रीशाय श्रीनिवासाय भक्तवश्याय शार्ङ्गिणे ॥ अष्टप्रकृत्यधीशाय ब्रह्मणेऽनंतसक्तये॥५९॥ बृहदारण्यवेद्याय हृषीकेशाय
वेधसे ॥ पुंडरीकनिभाक्षाय क्षेत्रज्ञाय विभासिने ॥ ६० ॥ गोविंदाय जगत्कर्त्रे जगन्नाथाय योगिने ॥ सत्याय सत्यसंधाय वैकुंठायाच्युताय च
॥६१॥ अधोक्षजाय धर्माय वामनाय त्रिधातवे ॥ घृतार्चिषे विष्णवे तेऽनंताय कपिलाय च ॥६२॥ विरिंचये त्रिककुद्दे ऋग्यजुःसामरूपिणे ॥एक
शृंगाय च शुचिश्रवसे शास्त्रयोनये ॥ ६३ ॥ वृषाकपय ऋद्धाय प्रभवे विश्वकर्मणे ॥ भूर्भुवुःस्वःस्वरूपाय दैत्यघ्ने निर्गुणाय च ॥ ६४ ॥ निरंज
नाय नित्याय ह्यव्ययायाक्षराय च ॥ नमस्ते पाहि मामीश शरणागतवत्सल ॥ ६५ ॥ इति स्तुतः स भगवाञ्च्छंखचक्रगदाधरः ॥ आरणेयमु
वाचेदं भृशं प्रणतवत्सलः ॥ ६६ ॥श्रीभगवानुवाच ॥ व्यासपुत्र महाभाग प्रीतोऽस्मि तव सुव्रत ॥ विद्यामाप्नुहि भक्तिं च ज्ञानी त्वं मम रूपधृक्॥
॥ ६७ ॥ यद्रूपं मम दृष्टं प्राक् श्वेतद्वीपे त्वया द्विज ॥ सोऽहमेवावतारार्थं स्थितो विश्वंभरात्मकः ॥ ६८ ॥ सिद्धोऽसि त्वं महाभाग मोक्षधर्मानुचिं
तया ॥ वरलोकान्यथा वायुर्यथा खं सविता तथा ॥ ६९ ॥ नित्यमुक्तस्वरूपस्त्वं पूज्यमानः सुरैर्नरैः ॥ भक्तिर्हि दुर्लभा लोके मयि सर्व
परायणे ॥ ७० ॥ तां लब्ध्वा नापरं किंचिल्लब्धव्यमवशिष्यते ॥ आकल्पांतः तपःसंस्थौ नरनारायणावृषी ॥ ७१ ॥ तयोर्निदेशतो व्यासो जनक
स्तव सुव्रतः ॥ कर्ता भागवतं शास्त्रं तदधीष्व भुवं व्रज ॥७२॥ स तप्यति तपस्त्वद्य पर्वते गंधमादने॥ त्वद्वियोगेन खिन्नात्मा तं प्रसादय मत्प्रिय

म्॥ ७३ ॥ एवमुक्तः शुको विप्र नमस्कृत्य चतुर्भुजम् ॥ यथागतं निवृत्तोऽसौ पितुरंतिकमागमत् ॥ ७४ ॥ अथ तं स्वांतिके दृष्ट्वा पाराशर्य्यः प्रता
पवान् ॥ पुत्रं प्राप्य प्रहृष्टात्मा तपसो निववर्त ह ॥ ७५ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ आरणेयसमायुक्तः स्वाश्रमं समुपागमत् ॥
॥ ७६ ॥ नारायणनियोगात्तु त्वन्मुखेन मुनीश्वर॥ चकार संहितां दिव्यां नानाख्यानसमन्विताम् ॥ ७७ ॥ वेदतुल्यां भागवतीं हरिभक्तिविवर्द्धनी
म् ॥ निवृत्तिनिरतं पुत्रं शुकमध्यापयच्च ताम् ॥ ७८ ॥ आत्मारामोऽपि भगवान्पाराशर्यात्मजः शुकः ॥ अधीतवान्संहितां वै नित्यं विष्णुजनप्रिया
म् ॥ ७९ ॥ एवमेते समाख्याता मोक्षधर्मास्तवानघ ॥ पठतां शृण्वतां चापि हरिभक्तिविवर्द्धनाः ॥ ८० ॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे द्वितीय
पादे बृहदुपाख्याने मोक्षधर्म्मनिरूपणं नाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ समाप्तश्चायं द्वितीयः पादः ॥ शौनक उवाच ॥ सूत साधो चिरं जीव
सर्वशास्त्रविशारदः ॥ यत्त्वया पायिता विद्वन्वयं कृष्णकथामृतम् ॥ १ ॥ श्रुत्वा तु मोक्षधर्मान्वै नारदो भगवत्प्रियः॥ सनंदनमुखोद्गीतान्किं पप्रच्छ
ततः परम् ॥ २ ॥ मानसा ब्रह्मणः पुत्राः सनकाद्या मुनीश्वराः ॥ चरंति लोकान्संसिद्धा लोकोद्धरणतत्पराः ॥ ३ ॥ नारदोऽपि महाभाग नित्यं
कृष्णपरायणः ॥ तेषां समागमे भद्रा का कथा लोकपावनी ॥ ४ ॥ सूत उवाच ॥ साधु पृष्टं महाभाग त्वया लोकोपकारिणा ॥ कथयिष्यामि
तत्सर्वं यत्पृष्टं नारदर्षिणा॥५॥श्रुत्वा सनंदनप्रोक्तान्मोक्षधर्मान्सनातनान्॥नारदो भार्गवश्रेष्ठ पुनः पप्रच्छ तान्मुनीन्॥६॥नारद उवाच॥ सर्वदेवेश्वरो
विष्णुर्वेदे तंत्रे च कीर्तितः॥समाराध्यः सएवात्र सर्वैः सर्वार्थकांक्षिभिः॥७॥कैर्मंत्रैर्भगवान्विष्णुः समाराध्यो मुनीश्वराः॥के देवाः पूजनीयाश्च विष्णुपाद
परायणैः ॥८॥ तंत्रं भागवतं विप्रा गुरुशिष्यप्रयोजकम् ॥ दीक्षणं प्रातराद्यं च कृत्यं स्याद्यत्तदुच्यताम् ॥९॥यैर्मासैः कर्मभिर्यैर्वा जप्यैर्होमादिभिस्त
था॥प्रीयेत परमात्मा वै तद्ब्रूत मम मानदाः ॥१०॥ सूत उवाच॥ एतच्छ्रुत्वा वचस्तस्य नारदस्य महात्मनः॥सनत्कुमारो भगवानुवाचार्कसमद्युतिः
॥११॥सनत्कुमार उवाच ॥ शृणु नारद वक्ष्यामि तंत्रं भागवतं तव ॥ यज्ज्ञात्वाऽमलया भक्त्या साधयेद्विष्णुमव्ययम्॥१२॥ त्रिपदार्थं चतुष्पादं
महातंत्रं प्रचक्षते ॥ भोगमोक्षक्रियाचर्याह्वया पादाः प्रकीर्तिताः ॥ १३ ॥पादार्थास्तु पशुपतिः पशुपाशास्त्रय एव हि ॥ पतिस्तत्र शिवोह्येको जीवा
स्तु पशवः स्मृताः॥१४॥ यावन्मोहादिसंयोगाः स्वरूपाबोधलक्षणाः ॥ तावत्पशुत्वमेतेषां द्वैतवत्पश्य नारद ॥ १५ ॥ पाशाः पंचविधास्त्वेषां
प्रत्येकं तेषु लक्षणम् ॥पशवस्त्रिविधाश्चापि विज्ञाताः कलसंज्ञिकाः ॥ १६ ॥ तलपाकलसंज्ञश्च सकलश्चेति नामतः ॥ तत्राद्यो मलसंयुक्तो मलकर्म
युतः परः ॥ १७ ॥ मलमायाकर्मयुतस्तृतीयः पार्कीर्तितः ॥ आद्यस्तु द्विविधस्तत्र समासकलुषस्तथा ॥ १८ ॥ असमासमलश्चेति द्वितीयोऽपि

पुनस्तथा ॥ पक्वापक्वमलेनैव द्विविधः परिकीर्तितः ॥ १९ ॥ शुद्धेऽध्वनि गतावेतौ विज्ञानप्रलयाकलौ ॥ कलादितत्त्वनियतः सकलः पर्यटत्ययम्
॥ २० ॥ कर्मानुगशरीरेषु तत्तद्भुवनगेषु च ॥ पाशाः पंच तथा तत्र प्रथमौ मलकर्मजौ ॥ २१ ॥ मायेयश्च तिरोधानशक्तिजो बिंदुजः परः ॥
एकोऽप्यनेकशक्तिर्दृक्क्रियाच्छादनकोमलः ॥ २२ ॥ तुषकंचुकवद्देहनिमित्तं चात्मनामिह ॥ धर्माधर्मात्मकं कर्म विचित्रफलभोगदम् ॥ २३ ॥
प्रवाहनित्यं तद्बीजांकुरन्यायेन संस्थितम् ॥ इत्येतौ प्रथमौ चाथ मायेयाद्यान् शृणु द्विज ॥ २४ ॥ सच्चिदानंदविभवः परमात्मा सनातनः ॥
पतिर्जयति सर्वेषामेको बीजं विभुः परम् ॥ २५ ॥ मनस्यति न चोदेति निवृत्तिं च प्रयच्छति ॥ वर्वर्ति दृक्क्रियारूपं तत्तेजः शांभवं परम् ॥ २६ ॥
शक्तो मया हरौ भुक्तो मुक्तो पशुगणस्य हि ॥ तच्छक्तिमाद्यामेकांतां विद्रूपाख्यां वदंति हि ॥ २७ ॥ तया चोज्जृंभितो बिंदुर्दृक्क्रियात्मा
शिवाभिधः ॥ अशेषतत्त्वजातस्य कारणं विभुरव्ययम् ॥ २८ ॥ अस्मिन्निलीना निखिला इच्छायाः शक्तयः स्वकम् ॥ कृत्यं कुर्वंति तेनेदं
सर्वानुग्राहकं मुने ॥ २९ ॥ चिज्जडानुग्रहार्थाय यस्य विश्वं सिसृक्षतः ॥ आद्योन्मेषोऽस्य नादात्मा शांत्यादिभुवनात्मकः ॥ ३० ॥ तच्छक्तितत्त्वं
विप्रेंद्र प्रोक्तं सावयवं परम् ॥ ततो ज्ञानक्रियाशक्त्योस्तथोत्कर्षापकर्षयोः ॥ ३१ ॥ प्रसरश्चाप्यभावेन तत्त्वं चैतत्सदाशिवम् ॥ दृक्शक्तिर्यत्र न्यग्भूता
क्रियाशक्तिर्विशिष्यते ॥ ३२ ॥ ईश्वराख्यं तु तत्तत्त्वं प्रोक्तं सर्वार्थकर्तृकम् ॥ यत्र क्रिया हि न्यग्भूता ज्ञानाख्योद्रेकमश्नुते ॥ ३३ ॥ तत्तत्त्वं चैव
विद्याख्यं ज्ञानरूपं प्रकाशकम् ॥ नादो बिंदुश्च सकलः सदाख्यं तत्त्वमाश्रितौ ॥ ३४ ॥ विद्येशाः पुनरैशं तु मंत्रा विद्याभिधं पुनः ॥ इमानि चैव
तत्त्वानि शुद्धाध्वेति प्रकीर्तितम् ॥ ३५ ॥ साक्षान्निमित्तमीशोऽत्रेत्युपादानसबिंदुराट् ॥ पंचानां कालराहित्याक्रमो नास्तीति निश्चितम् ॥ ३६ ॥
व्यापारवसतो ह्येषां विहिता खलु कल्पना ॥ तत्त्वं वस्तुत एकं तु शिवाख्यं चित्रशक्तिकम् ॥ ३७ ॥ शक्तं यां वृत्तिभेदात्तु विहिताः खलु कल्पनाः ॥
चिज्जडानुग्रहार्थाय कृत्वा रूपाणि वै प्रभुः ॥ ३८ ॥ अनादिमलरुद्धानां कुरुतेऽनुग्रहं चिताम् ॥ भुक्तिं मुक्तिं च विश्वेषां स्वव्यापारे समर्थताम् ॥ ३९ ॥
विधत्ते जडवर्गस्य सर्वानुग्राहकः शिवः ॥ शिवसामान्यरूपो हि मोक्षस्तु चिदनुग्रहः ॥ ४० ॥ सोऽनादित्वात्कर्मणो हि तत्तद्भोगं विना भवेत् ॥ तेना
नुग्राहकः शम्भुस्तद्भुक्त्यै प्रभुरव्ययः ॥ ४१ ॥ कुरुते सूक्ष्मकरणभुवनोत्पत्तिमंजसा ॥ कर्त्तोपादानकरणैर्विना कार्यं न दृश्यते ॥ ४२ ॥ शक्तयः
करणं चात्र मायोपादानमिष्यते ॥ नित्यैका च शिवा शक्त्या ह्यनादिनिधना सती ॥ ४३ ॥ साधारणी नराणां वै भुवनानां च कारणम् ॥
स्वभावान्मोहजननी स्वचिताजनकर्मभिः ॥ ४४ ॥ विभ्वी सूक्ष्मा परा माया विकृतैः परतस्तु सा ॥ कर्माण्यावेक्ष्य विद्येशो मायां विक्षोभ्य शक्ति

भिः ॥ ४५ ॥ विधत्ते जीवभोगार्थं वपूंषि करणानि च ॥ सृजत्यादौ कालतत्त्वं नानाशक्तिमयी च सा ॥ ४६ ॥ भावि भूतं भवच्चेदं जगत्कलयते
लयम् ॥ सूते ह्यनंतरं माया शक्तिं नियमनात्मिकाम् ॥ ४७ ॥ सर्वं नियमयत्येषा तेनेयं नियतिः स्मृता ॥ अनंतरं च सा माया नित्या विश्वविमो
हिनी ॥ ४८ ॥ अनादिनिधना तत्त्वं कलाख्यं जनयत्यपि ॥ एकतस्तु नृणां येन कलयित्वा मलं ततः ॥४९॥कर्तृशक्तिं व्यंजयति तेनेदं तु कला
भिधम् ॥ कालेन च नियत्योपसर्गतां समुपेतया ॥ ५० ॥ व्यापारं विदधात्येषा भूपर्यंतं स्वकीयकम् ॥प्रदर्शनाथ वै पुंसो विषयाणां च सा पुनः ॥
॥ ५१ ॥ प्रकाशरूपं विद्याख्यं तत्त्वं सूते कलैव हि ॥ विद्या त्वावरणं भित्त्वा ज्ञानशक्तेः स्वकर्मणा ॥ ५२ ॥ विषयान्दर्शयत्येषात्मनांशाकारणं
ह्यतः ॥ करोति भोग्यं येनासौ करणेन परेण वै॥५३॥उद्बुद्धशक्तिः पुरुषः प्रचोद्य महदादिकान्॥भोग्ये भोगं च भोक्तारं तत्परं करणं तु सा॥५४॥
भोग्येस्य भोग्यतिर्मांसाच्चिद्व्यक्तिर्भोग उच्यते ॥ सुखादिरूपा विषयाकारा बुद्धिः समासतः ॥ ५५ ॥ भोग्यं भोक्तुश्च स्वेनैव विद्याख्यं करणं तु
तत् ॥ यद्यर्कवत्प्रकाशा धीः कर्मत्वाच्च तथापि ि ॥५६॥करणांतरसापेक्षा शक्ता ग्राहयितुं च तम् ॥ संबन्धात्कारणाद्यैस्तद्भोगौत्सुक्येन चोदनात्॥
॥५७ ॥ तच्चेष्टाफलयोगाच्च संसिद्धा कर्तृतास्य तु ॥ अकर्तृत्वाभ्युपगमे भोक्तृत्वाख्या वृथास्य तु ॥ ५८॥ किं च प्रधानचरितं व्यर्थं सर्वं भवेत्ततः ॥
कर्तृत्वरहिते पुंसि करणाद्यप्रयोजके ॥ ५९ ॥ भोगस्यासंभवस्तस्मात्स एवात्र प्रवर्तकः ॥ करणादिप्रयोक्तृत्वं विद्ययैवास्य संमतम् ॥ ६० ॥ अनं
तरं कलारागं सूते भिद्यंगरूपकम् ॥ येन भोग्याय जनिता भिद्यंगे पुरुषे पुनः ॥ ६१ ॥ क्रियाप्रवृत्तिर्भवति तेनेदं रागसंज्ञिकम् ॥ एभिस्तत्त्वैश्च
भोक्तृत्वदशायां कलितो यदा ॥ ६२ ॥ नित्यस्तदायमात्मा तु लभते पुरुषाभिधाम् ॥कलैव पश्चादव्यक्तं सूते भोग्याय चास्य तु ॥ ६३ ॥ सप्त
ग्रंथिविधानस्य यत्तद्गौणस्यकारणम् ॥ गुणानामविभागोऽत्र ह्याधारे क्ष्मादिभागवत् ॥ ६४ ॥ आधारोऽपि च यस्तेषां तदव्यक्तं च गीयते ॥ त्रय
एव गुणा ह्येषामव्यक्तादेव संभवः ॥ ६५ ॥ सत्त्वं रजस्तमःप्रख्या व्यापारनियमात्मिका ॥ गुणतो धीश्च विषयाध्यवसायस्वरूपिणी ॥ ६६ ॥
गुणतस्त्रिविधा सापि प्रोक्ता कर्मानुसारतः ॥ महत्तत्वादहंकारो जातः संरंभवृत्तिमान् ॥ ६७॥ संभेदादस्य विषयः प्राप्नोति व्यवहार्यताम् ॥ सत्त्वा
दिगुणभेदेन स पुनस्त्रिविधो भवेत् ॥ ६८ ॥ तैजसो राजसश्चैव तामसश्चेति नामतः ॥ तत्र तैजसतो ज्ञानेंद्रियाणि मनसा सह ॥६९॥ प्रकाशान्व
यतस्तस्माद्बोधकानि भवन्ति हि ॥ राजसाच्च क्रियाहेतोस्तथा कर्मेंद्रियाणि तु ॥ ७० ॥ तामसाच्चैव जायन्ते तन्मात्रा भूतयोनयः ॥ इच्छारूपं
च संकल्पव्यापारं तत्र वै मनः ॥ ७१ ॥ द्विधाधिकारि तच्चित्तं भोक्तृभोगोपपादकम् ॥ बहिःकरणभावेन स्वोचितेन यतः सदा ॥ ७२ ॥ इंद्रिया

णांच सामर्थ्यं संकल्पेनात्मवृत्तिना ॥ करोत्यंतःस्थितं भूयस्ततोऽन्तःकरणं मनः॥७३॥मनोऽहंकारबुद्ध्याख्यमस्त्यन्तःकारणं त्रिधा ॥ इच्छासंरंभबो
धाख्या वृत्तयः क्रमतोऽस्य तु ॥७४॥ ज्ञानेंद्रियाणि श्रोत्रं त्वक् चक्षुर्जिह्वा च नासिका ॥ ग्राह्याश्च विषया ह्येषां ज्ञेयाः शब्दादयो मुने॥७५ ॥शब्द
स्पर्शरूपरसगन्धाः शब्दादयो मताः ॥ वाक्पाणिपादपायूपस्थास्तु कर्मेंद्रियाण्यपि ॥७६ ॥ वचनादानगमनोत्सर्गानंदेषु कर्मसु ॥ करणानि च सि
द्धिना न कृतिः करणैर्विना ॥ ७७ ॥ दशधा करणैश्चेष्टां कार्यमाविश्य कार्यते ॥ चेष्टते कार्यमालंब्य विभुत्वात्करणानि तु ॥७८ ॥ तन्मात्राणि तु
खंवायुस्तेजोऽम्भः क्ष्मेति पञ्च वै॥ तेभ्यो भूतान्येकगुणान्याख्यातानि भवंति हि ॥७९॥इति पञ्चसु शब्दोऽयं स्पर्शो भूतचतुष्टये॥रूपं त्रिषु रसश्चैव
द्वयोर्गंधः क्षितौ तथा ॥ ८० ॥ कार्याण्येषां क्रमेणैवावकाशो व्यूहकल्पनम् ॥ पाकश्च संग्रहश्चैव धारणं चेति कथ्यते ॥ ८१ ॥ आशीतोष्णौ महा
वायौ शीतोष्णौ वारितेजसोः ॥ भास्वदग्नौ जले शुक्लं क्षितौ शुक्लाद्यनेकधा ॥८२॥ रूपं त्रिषु रसोऽम्भःसु मधुरः षड्विधः क्षितौ॥ गन्धः क्षितावसुर
भिः सुरभिश्च प्रकीर्तितः ॥ ८३ ॥ तन्मात्रं तद्भूतगुणं करणं पोषणं तथा ॥ भूतस्य तु विशेषोऽयं विशेषरहितं तु तत् ॥ ८४ ॥ इमानि पञ्चभूतानि
संनिविष्टानि सर्वतः ॥ पञ्चभूतात्मकं सर्वं जगत्स्थावरजङ्गमम् ॥ ८५ ॥ शरीरसंनिविष्टत्वमेषां तावन्निरूप्यते ॥ देहेऽस्थिमांसकेशत्वङ्नखदन्ताश्च
पार्थिवाः ॥ ८६ ॥ मूत्ररक्तकफस्वेदशुक्रादिषु जलस्थितिः ॥हृदि पंक्तौ दृशोः पित्ते तेजस्तद्धर्मदर्शनात् ॥ ८७ ॥ प्राणादिवृत्तिभेदेन वायुश्चैवात्र
संस्थितः ॥ वियत्सर्वासु नाडीषु गर्भवृत्यनुषंगतः॥८८ ॥ प्रयोक्त्यादिमहीप्रांतमेतदंडार्थसाधनम्॥ प्रत्यात्मनियतं भोगभेदतो व्यवसीयते ॥८९ ॥
तत्त्वान्येवं कलाद्यानि प्रतिपुंनियतानि हि ॥ देहेषु कर्मवशतः सर्वेषु विचरंति हि ॥ ९० ॥ मायेयश्चैव पाशोऽयं येनावृतमिदं जगत् ॥अशुद्धाध्वा
मतो ह्येष धरण्यादिकलावधिः ॥ ९१ ॥ तत्र भूमण्डलस्थोऽसौ स्थावरो जङ्गमात्मकः ॥ स्थावरा गिरिवृक्षाद्या जङ्गमस्त्रिविधः पुनः ॥ ९२ ॥
स्वेदजाश्चांडजाश्चैव तथैव च जरायुजाः ॥ चराचरेषु लक्षाणां चतुराशीतियोनयः ॥ ९३ ॥ भ्रममाणस्तेषु जीवः कदाचिन्मानुषं वपुः ॥प्राप्नोति
कर्मवशतः परं सर्वार्थसाधकम् ॥ ९४ ॥ तत्रापि भारते खण्डे ब्राह्मणादिकुलेषु च ॥ महापुण्यवशेनैव जनिर्भवति दुर्लभा ॥ ९५ ॥ जनिश्च पुं
स्त्रियोर्योगः शुक्रशोणितयोगतः ॥बिंदुरेकः प्रविशति यदा गर्भे द्वयात्मकः ॥९६॥ तदा रजोऽधिके नारी भवेद्रेतोऽधिके पुमान्॥मलकर्मादिपाशेन
कश्चिदात्मा नियंत्रितः ॥ ९७ ॥ जीवभावं तदा तस्मिन्सकलः प्रतिपद्यते ॥ अथ तत्राहृतैर्मात्रा पानान्नाद्यैश्च पोषितः ॥ ९८ ॥ पक्षमासादिकालेन
वर्धते वपुरत्र हि ॥ दुःखाद्यैः पीडितश्चैवाच्छन्नदेहो जरायुणा ॥ ९९ ॥ एवं तत्र स्थितो गर्भे प्राग्जन्मोत्थं शुभाशुभम् ॥ स्मरंस्तिष्ठति दुःखात्मा

पीड्यमानो मुहुर्मुहुः ॥१००॥ कालक्रमेण बालोऽसौ मातरं पीडयन्नपि ॥ संपीडितो निःसरति योनियंत्रादवाङ्मुखः ॥ १०१ ॥ क्षणं तिष्ठति निश्चेष्टस्ततो रोदितुमिच्छति ॥ ततः क्रमेण स शिशुर्वर्धमानो दिनेदिने॥१०२॥बालपौगंडभेदेन युवत्वं प्रतिपद्यते॥ एवं क्रमेण लोकेऽस्मिन्देहिनां देहसंभवः ॥ १०३ ॥ मानुषं दुर्लभं प्राप्य सर्वलोकोपकारकम् ॥ यस्तारयति नात्मानं तस्मात्पापतरोऽत्र कः ॥ १०४ ॥ आहारश्चैव निद्रा च भयं मैथुनमेव च ॥ पश्वादीनां च सर्वेषां साधारणमितीरितम्॥१०५॥चतुर्ष्वेवानुरक्तो यः स मूर्खो ह्यात्मघातकः॥मनुष्याणामयं धर्मः स्वबंधच्छेदनात्मकः ॥१०६॥ पाशबंधनविच्छेदो दीक्षयैव प्रजायते ॥ अतो बंधनविच्छित्त्यै मंत्रदीक्षां समाचरेत् ॥१०७॥ दीक्षाज्ञानाख्यया शक्त्या ह्यपध्वंसितबन्धनः ॥ शुद्धात्मतत्त्वनामासौ निर्वाणपदमश्नुते ॥१०८ ॥ स्वशक्त्यात्मिकया दृष्ट्या शिवं ध्यायति पश्यति॥यजते शिवमंत्रैश्च स्वपरेषां हिताय सः ॥ १०९ ॥ शिवार्कशक्तिदीधित्या समर्थीकृतचिद्दृशा ॥ शिवशक्त्यादिभिः सार्द्धं पश्यत्यात्मगतावृतिः ॥ ११० ॥ अंतःकरणवृत्तिर्यां बोधाख्या सा महेश्वरम् ॥ न प्रकाशयितुं शक्ता पाशत्वान्निगडादिवत् ॥ १११ ॥ दीक्षैव परमो हेतुः पाशविच्छेदने पुनः ॥ अतः शास्त्रोक्तविधिना मत्रदीक्षां समाचरेत् ॥ ११२ ॥ दीक्षितस्तंत्रविधिना स्ववर्णाचारतत्परः ॥ अनुष्ठानं प्रकुर्वीत नित्यनमित्तिकात्मकम् ॥ ११३ ॥ निजवर्णाश्रमाचारान्मनसापि न लंघयेत् ॥ यो यस्मिन्नाश्रमे तिष्ठन्दीक्षां प्राप्नोति मानवः ॥ ११४ ॥ स तस्मिन्नाश्रमे तिष्ठेत्तद्धर्माननुपालयेत् ॥ कृतान्यपि न कर्माणि बंधनाय भवंति हि ॥ ११५ ॥ एकं तु फलदं कर्म मंत्रानुष्ठानसंभवम् ॥ दीक्षितोऽभिलषेद्भोगान्यद्यल्लोकगतानसौ ॥११६॥ मंत्राराधनसामर्थ्यात्तद्भुक्त्वा मोक्षमश्नुते ॥ नित्यं नैमित्तिकं दीक्षां प्राप्य यो नाचरेन्नरः ॥११७॥ कंचित्कालं पिशाचत्वं प्राप्यांते मोक्षमश्नुते ॥ तस्मात्तु दीक्षितः कुर्य्यान्नित्यनैमित्तिकादिकम् ॥ ११८ ॥ अनुष्ठानं च तेनास्य दीक्षां प्राप्याऽनुमीयते ॥ नित्यनैमित्तिकाचारपालकस्य नरस्य तु ॥ ११९ ॥ दीक्षावैकल्यविरहात्सद्यो मुक्तिस्तु जायते ॥ तत्रापि गुरुभक्तस्य गतिर्भवति नान्यथा ॥ १२० ॥ दीक्षया गुरुमूर्तिस्थः सर्वानुग्राहकः शिवः ॥ दृष्टाद्यर्थतया यस्य गुरुभक्तिस्तु कृत्रिमा ॥ १२१ ॥ कृतेऽपि विफलं तस्य प्रायश्चित्तं पदे पदे ॥ कायेन मनसा वाचा गुरुभक्तिपरस्य च ॥ १२२ ॥ प्रायश्चित्तं भवेन्नैव सिद्धिस्तस्य पदे पदे ॥ गुरुभक्तियुते शिष्ये सर्वस्वविनिवेदके ॥ १२३ ॥ मिथ्याप्रयुक्तमन्त्रस्तु प्रायाश्चित्ती भवेद्गुरुः ॥ १२४ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे त्रिषष्टितमोऽध्यायः॥ ६३॥ सनत्कुमार उवाच ॥ अथ जीवस्य पाशौघच्छेदनायेष्टसिद्धिदम् ॥ दीक्षाविधिं प्रवक्ष्यामि मन्त्रसामर्थ्यदायकम् ॥ १ ॥ दिव्यं भावं यतो दद्यात्क्षिणुया

दुरितानि च ॥ अतो दीक्षेति सा प्रोक्ता सर्वागमविशारदैः ॥ २ ॥ मननं सर्ववेदित्वं त्राणं संसार्यनुग्रहः ॥ मननात्त्राणधर्मत्वान्मंत्र इत्यभिधीयते॥
॥ ३ ॥ स्त्रीपुंनपुंसकात्मानस्ते मंत्रास्तु त्रिधा मताः ॥ स्त्रीमंत्रास्तु द्विठांताः स्युः पुंमंत्रा हुंफडंतकाः ॥ ४ ॥ क्लीबाश्चैव नमोंऽताः स्युर्मंत्राणां जातयः
स्मृताः ॥ पुंदेवतास्तु मन्त्रा स्युर्विद्याः स्त्रीदेवता मताः ॥ ५ ॥ षट्कर्मसु प्रशस्तास्ते मनवस्त्रिविधाः पुनः ॥ तारांत्यरेफः स्वाहास्तु तत्राग्नेयाः समी
रिताः ॥ ६ ॥ सौम्यास्तु भृगुपीयूषबीजाढ्याः कथिता मुने ॥ अग्नीषोमात्मका ह्येवं मंत्रा ज्ञेया मनीषिभिः ॥ ७ ॥ बोधमायांति चाग्नेयाः श्वसने
पिंगलाश्रिते ॥ सौम्याश्चैव प्रबुध्यंते वामे वहति मारुते ॥ ८ ॥ सर्वे मंत्राः प्रबुध्यंते वायौ नाडिद्वयाश्रिते ॥ स्वापकाले तु मन्त्रस्य जपोऽनर्थफल
प्रदः ॥ ९ ॥ प्रत्येकं मन्त्रमुच्चार्य नाव्यानां तान्समुच्चरेत् ॥ अनुलोमे बिंदुयुक्तान्विलोमे सर्गसंयुतान् ॥ १० ॥ जप्तो यदि स वै देवं प्रबुद्धः क्षिप्रसि
द्धिदः ॥ अनया मालया जप्तो दुष्टमन्त्रोऽपि सिद्ध्यति ॥ ११ ॥ क्रूरे क र्णि चाग्नेयाः सौम्याः सौम्य फलप्रदाः ॥ शांतज्ञानेति रौद्रेयशांतिजाति
समन्वितः ॥ १२ ॥ शांतोऽपि रौद्रतामेति हुंफट्पल्लवयोजनात् ॥ छिन्नादिदोषयुक्तास्ते नैव रक्षंति साधकम् ॥ १३ ॥ छिन्नो रुद्धः शक्तिहीनस्तत
श्चैव पराङ्मुखः ॥ कणहीनो नेत्रहीनः कीलितः स्तंभितस्तथा ॥ १४ ॥ दग्धः स्रस्तश्च भीतश्च मलिनश्च तिरस्कृतः ॥ भेदितश्च सुषुप्तश्च मदो
न्मत्तश्च मूर्च्छितः ॥ १५ ॥ हतवीर्यो भ्रांतसंज्ञः प्रध्वस्तो बालकस्तथा ॥ कुमारोऽथ युवा प्रौढो वृद्धो निस्त्रिंशकस्तथा ॥ १६ ॥ निर्बीजः
सिद्धिहीनश्च मंदः कूटो निरंशकः ॥ सत्त्वहीनः केकरश्च बीजहीनश्च धूमितः ॥ १७ ॥ आलिंगितो मोहितश्च क्षुधार्तश्चातिदीप्तकः ॥ अंगही
नोऽतिक्रुद्धश्चातिक्रूरो व्रीडितस्तथा ॥ १८ ॥ प्रशांतमानसः स्थानभ्रष्टश्च विकलस्तथा ॥ अतिवृद्धोऽतिनिःस्नेहः पीडितश्च तथा पुनः ॥ १९ ॥
दोषा ह्येते समाख्याता वक्ष्याम्येषां च लक्षणम् ॥ संयुक्तं वा वियुक्तं वा त्रिधा वा स्वरसंयुतम् ॥ २० ॥ मनोर्यस्यादिमध्यांते वह्निबीजं
तथोच्यते ॥ चतुर्द्धा पञ्चधा वापि स मन्त्रश्छिन्नसंज्ञकः ॥ २१ ॥ मनोर्यस्यादिमध्यांते भूबीजद्वयमुच्यते ॥ स तु रुद्धो मनुर्ज्ञेयो ह्यतिक्लेशेन सिद्धिदः
॥ २२ ॥ तारवर्मत्रया लक्ष्मीरेवं हीनस्तु यो मनुः ॥ शक्तिहीनः स विज्ञेयश्चिरकालफलप्रदः ॥ २३ ॥ कामबीजं मुखे माया ह्यंते चैवाङ्कुशं
तथा ॥ असौ पराङ्मुखो ज्ञेयो भजतां चिरसिद्धिदः ॥ २४ ॥ आदिमध्यावसानेषु सकारो दृश्यते यदि ॥ स मन्त्रो बधिरः प्रोक्तः कष्टेनाल्पफल
प्रदः ॥ २५ ॥ पञ्चार्णो यदि रेफार्कबिंदुवर्जितविग्रहः ॥ नेत्रहीनस्तु विज्ञेयः क्लेशेनापि न सिद्धिदः ॥ २६ ॥ आदिमध्यावसानेषु हंसः
प्रासादवाग्भवौ ॥ हंसेंदुर्वा सकारो वा फकारो वर्म वा पुनः ॥ २७ ॥ माया नमामि च पदं नास्ति यस्मिन्स कीलितः ॥ एवं

मध्ये द्वयं मूर्ध्नि यस्मिन्नस्त्रलकारकौ ॥ २८ ॥ न विद्येते स मंत्रस्तु स्तंभितः सिद्धिरोधकृत् ॥ अग्निः पवनसंयुक्तो मनोर्यस्य तु मूर्द्धनि ॥
॥ २९ ॥ स सार्णो दृश्यते यस्तु स मंत्रो दग्धसंज्ञकः ॥ अस्त्रं द्वाभ्यां त्रिभिः षड्भिरष्टाभिर्दृश्यतेऽक्षरैः ॥ ३० ॥ त्रस्तः स मंत्रो विज्ञेयो
मुखे तारविवर्जितः ॥ हकारः शक्तिरथवा भीतो मंत्रः स एव हि ॥ ३१ ॥ मनोर्यस्यादिमध्यांते स्यान्मकारचतुष्टयम् ॥ मलिनस्तु
स विज्ञेयो ह्यतिक्लेशेन सिद्धिदः ॥ ३२ ॥ दार्णो यस्य मनोर्मध्ये मूर्ध्नि क्रोधयुगं तथा ॥ अस्त्रं चास्ति स मंत्रस्तु तिरस्कृत उदीरितः ॥ ३३ ॥
म्योद्वयं हृदयं शीर्षे वषड्वौषट्कमध्यमः ॥ यस्य स्याद्भेदितो मंत्रस्त्याज्यः क्लिष्टफलप्रदः ॥ ३४ ॥ त्र्यक्षरो हंसहीनो यः सुषुप्तः कीर्ति
तस्तु सः ॥ विद्या वाप्यथवा मंत्रो भवेत्सप्तदशाक्षरः ॥३५॥ षट्कारपंचकादिर्यो मदोन्मत्तस्तु स स्मृतः ॥ यस्य मध्ये स्थितं चास्त्रं स मंत्रो
मूर्च्छितः स्मृतः॥३६॥विरामस्थानगं चास्त्रं हतवीर्यःस उच्यते॥मंत्रस्यादौ च मध्ये च मूर्ध्नि चास्त्रचतुष्टयम्॥३७॥ज्ञातव्यो भ्रांत इत्येष यः स्यादष्टा
दशाक्षरः॥पुनर्विंशतिवर्णो वा यो मंत्रः स्मरसंयुतः॥३८॥हृल्लेखांकुशबीजाढ्यः प्रध्वस्तः स कथ्यते॥सप्तार्णो बालमंत्रस्तु कुमारो वसुवर्णवान्॥३९॥
षोडशार्णो युवा प्रौढश्चत्वारिंशतिवर्णकः ॥ त्रिंशद्वर्णश्चतुःषष्टिवर्णश्चापि शताक्षरः ॥ ४० ॥ चतुःशताक्षरो मंत्रो वृद्ध इत्यभिधीयते ॥ नवार्णस्तार
संयुक्तो मंत्रो निस्त्रिंश उच्यते ॥ ४१ ॥ यस्यांते हृदयं प्रोक्तं शिरोमंत्रोऽथ मध्यगः ॥ शिखा वर्म च यस्यांते नेत्रमस्त्रं च दृश्यते ॥४२॥ शिव
शक्त्यर्णहीनो वा निर्बीजः स मनुः स्मृतः॥आद्यंतमध्ये फट्कारः षोढा यस्मिन्प्रदृश्यते॥४३॥स मनुः सिद्धिहीनः स्यान्मंदः पंक्त्यक्षरो मनुः ॥
कूट एकाक्षरो मंत्रः स एवोक्तो निरंशकः ॥ ४४ ॥ द्विवर्णः सत्त्वहीनः स्यात्केकरश्चतुरक्षरः ॥षड्णो बीजहीनो वा सार्द्धसप्ताक्षरोऽपि वा ॥ ४५ ॥
सार्द्धद्वादशवर्णो वा धूमितो निंदितस्तु सः ॥ सार्द्धबीजत्रययुतो मंत्रो विंशतिवर्णवान् ॥ ४६ ॥ त्रिंशद्वर्णश्चैकविंशद्वर्णश्चालिंगितस्तु सः ॥ यो
मंत्रो दंतवर्णस्तु मोहितः स तु कीर्तितः ॥ ४७ ॥ चतुर्विंशतिवर्णो वा सप्तविंशतिवर्णवान् ॥ क्षुधार्तः स तु विज्ञेयो मंत्रसिद्धिविवर्जितः ॥ ४८ ॥
एकादशाक्षरो वापि पंचविंशतिवर्णकः ॥ त्रयोविंशतिवर्णो वा स मनुर्दृप्तसंज्ञकः ॥ ४९ ॥ षड्विंशत्यक्षरो वापि षट्त्रिंशद्वर्णकोऽपि वा ॥ एकोन
त्रिंशदर्णो वा मंत्रो हीनांगकः स्मृतः ॥ ५० ॥ अष्टाविंशतिवर्णो वा तथैकात्रिंशदर्णकः ॥ अतिक्रूरः स विज्ञेयोऽखिलकर्मसु गर्हितः ॥ ५१ ॥
चत्वारिंशत्समारभ्य त्रिषष्टंचतस्तु यो मनुः ॥ व्रीडितः स तु विज्ञेयः सर्वकर्मसु न क्षमः॥ ५२ ॥पञ्चषष्ट्यक्षरा मन्त्रा ज्ञेया वै शांतमानसाः ॥
पञ्चषष्ट्यर्णमारभ्य नवनन्दाक्षरावधि ॥ ५३ ॥ ये मंत्रास्ते तु विज्ञेयाः स्थानभ्रष्टा मुनीश्वर॥त्रयोदशार्णा ये मन्त्रास्तिथ्यर्णाश्च तथा पुनः ॥५४॥

विकलास्ते समाख्याताः सर्वतंत्रविशारदैः ॥ शतं सार्द्धशतं वापि शतद्वयमथापि वा ॥ ५५ ॥ द्विनवत्येकहीनो वा शतत्रयमथापि वा ॥ ये
मंत्रा वर्णसंख्याका निःस्नेहास्ते प्रकीर्तिताः ॥ ५६ ॥ चतुःशतं समारभ्य सहस्रार्णावधि द्विज ॥ अतिवृद्धाः प्रयोगेषु शिथिलास्ते समीरिताः ॥
॥ ५७ ॥ सहस्रवर्णादधिका मंत्रास्ते पीडिताह्वयाः ॥ तदूर्द्ध्वं चैव ये मंत्राः स्तोत्ररूपास्तु ते स्मृताः ॥ ५८ ॥ एवं विधाः समाख्याता मनवो दोष
संयुताः ॥ दोषानेतानविज्ञाय मंत्रानेताञ्जपन्ति ये ॥ ५९ ॥ सिद्धिर्न जायते तेषां कल्पकोटिशतैरपि ॥ छिन्नादिदोषदुष्टानां मंत्राणां साधनं ब्रुवे ॥
॥ ६० ॥ योनिमुद्रासने स्थित्वा प्रजपेद्यः समाहितः ॥ यं कंचिदपि वा मंत्रं तस्य स्युः सर्वसिद्धयः ॥ ६१ ॥ सव्यपार्ष्णिं गुदे स्थाप्य दक्षिणं च
ध्वजोपरि ॥ योनिमुद्राबंध एवं भवेदासनमुत्तमम्॥ ६२॥अन्योऽप्यत्र प्रकारोऽस्ति योनिमुद्रानिबंधने ॥ तदग्रे सरहस्यं ते कथयिष्यामि नारद ॥
॥ ६३ ॥ पारंपर्यक्रमप्राप्तो नित्यानुष्ठानतत्परः ॥ गुर्वनुज्ञारतः श्रीमानभिषेकसमन्वितः ॥ ६४ ॥ सुंदरः सुमुखः शांतः कुलीनः सुलभो वशी ॥
मंत्रतंत्रार्थतत्त्वज्ञो निग्रहानुग्रहक्षमः ॥ ६५ ॥ निरपेक्षो मुनिर्दांतो हितवादी विचक्षणः ॥ तत्त्वनिष्कासने दक्षो विनयी च सुवेषवान् ॥ ६६ ॥
आश्रमी ध्याननिरतः संशयच्छित्सुबुद्धिमान् ॥ नित्यानुष्ठानसंयुक्तस्त्वाचार्यः परिकीर्तितः ॥ ६७ ॥ शांतो विनीतः शुद्धात्मा सर्वलक्षणसंयुतः ॥
शमादिसाधनोपेतः श्रद्धावान् सुस्थिराशयः ॥ ६८ ॥ शुद्धदेहोऽन्नपानाद्यैर्द्धार्मिकः शुद्धमानसः ॥ दृढव्रतसमाचारः कृतज्ञः पापभीरुकः ॥
॥ ६९ ॥ गुरुध्यानस्तुतिकथासेवनासक्तमानसः ॥ एवंविधो भवेच्छिष्यस्त्वन्यथा गुरुदुःखदः ॥ ७० ॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपा
ख्याने तृतीयपादे चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥ सनत्कुमार उवाच ॥ परीक्ष्य शिष्यं तु गुरुर्मंत्रशोधनमाचरेत् ॥ प्राक्प्रत्यग्दक्षिणोदक्च
पंचसूत्राणि पातयेत् ॥ १ ॥ चतुष्टयं चतुष्कानां स्यादेवं नृपकोष्ठके ॥ तत्राद्यप्रथमे त्वाद्यं द्वितीयाद्ये द्वितीयकम्॥ २ ॥ तृतीयाद्ये तृतीयं स्याच्च
तुर्थाद्ये तुरीयकम् ॥ तत्तदाग्नेयकोष्ठेषु तत्तत्पंचममक्षरम् ॥ ३ ॥ विलिख्य क्रमतो धीमान्मनुं सशोधयेत्ततः ॥ नामाद्यक्षरमारभ्य यावन्मन्त्रादि
वर्णकम् ॥ ४ ॥ चतुष्के यत्र नामार्णस्तत्स्यात्सिद्धिचतुष्ककम् ॥ प्रादक्षिण्यात्तद्द्वितीयं साध्याख्यं परिकीर्तितम् ॥ ५ ॥ तृतीयं पुंसि सिद्धाख्यं
तुरीयमरिसंज्ञकम् ॥ द्वयोर्वर्णावेककोष्ठे सिद्धसिद्धेति तन्मतम् ॥ ६ ॥ तद्द्वितीये तु मंत्रार्णे सिद्धसाध्यः प्रकीर्तितः ॥ तृतीये तत्सुसिद्धः स्यात्सि
द्धारिस्तच्चतुर्थके ॥ ७ ॥ नामार्णान्यचतुष्कात्तु द्वितीये मंत्रवर्णके ॥ चतुष्के चेत्तदा पूर्वं यत्र नामाक्षरं स्थितम् ॥ ८ ॥ तत्र तत्कोष्ठमारभ्य गणये
त्पूर्ववत्क्रमात् ॥ साध्यसिद्धः साध्यसाध्यस्तत्सुसिद्धश्च तद्रिपुः ॥ ९ ॥ तृतीये चेच्चतुष्के तु यदि स्यान्मंत्रवर्णकः ॥ तदा पूर्वोक्तरीत्या तु क्रमा

देयं मनीषिभिः ॥ १० ॥ सुसिद्धसिद्धस्तत्साध्यस्तत्सुसिद्धश्च तदृषिः ॥ तुरीये चेच्चतुष्के तु तदैवं गणयेत्सुधीः ॥ ११ ॥ अरिसिद्धोऽरिसाध्यश्च
तत्सुसिद्धश्च तद्रिपुः ॥ सिद्धसिद्धो यथोक्तेन द्विगुणात्सिद्धिसाध्यकः ॥ १२ ॥ सिद्धः सुसिद्धोर्द्धतयात्सिद्धारिर्हंति गोत्रजान् ॥ द्विगुणा
त्साध्यसिद्धस्तु साध्यसाध्यो विलंबतः ॥ १३ ॥ साध्यः सुसिद्धो द्विगुणात्साध्यारिर्हंति बांधवान् ॥ सुसिद्धसिद्धोर्द्धतया तत्साध्यो द्विगुणा
ज्जपात् ॥ १४ ॥ तत्सुसिद्धप्राप्तिमात्रात्सुसिद्धारिः कुटुंबहृत् ॥ अरिसिद्धस्तु पुत्रघ्नोऽरिसाध्यः कन्यकापहः ॥ १५ ॥ तत्सुसिद्धः
कलत्रघ्नः साधकघ्नोरेऽप्यरिः स्मृतः ॥ अन्येऽप्यत्र प्रकारा हि संति वै बहवो मुने ॥ १६ ॥ सर्वेषु मुख्योऽयं तेऽत्र कथितो कथहाभिधः ॥
एवं संशोध्य मंत्रं तु शुद्धे काले स्थले तथा ॥ १७ ॥ दीक्षयेच्च गुरुः शिष्यं तद्विधानमुदीर्यते ॥ नित्यकृत्यं विधायाथ प्रणम्य
गुरुपादुकाम् ॥ १८ ॥ प्रार्थयेत्सद्गुरुं भक्त्याभीष्टमंत्रार्थमादृतः ॥ संपूज्य वस्त्रालंकारगोहिरण्यधरादिभिः ॥ १९ ॥ कृत्वा स्वस्ति
विधानं तु मंडलादि च तुष्टिमान् ॥ गुरुः शिष्येण सहितः शुचिर्यागगृहं विशेत् ॥ २० ॥ सामान्यार्घोदकेनाथ संप्रोक्ष्य द्वारमस्त्रतः ॥
दिव्यानुत्सारयेद्विघ्नान्नभस्थानर्च्य वारिणा ॥ २१ ॥ पार्ष्णिघातैस्त्रिभिर्भौमांस्ततः कर्म समाचरेत् ॥ वर्णकैः सर्वतोभद्रे यथोक्तपरिकल्पिते ॥ २२ ॥
वह्निमण्डलमभ्यर्च्य तत्कलाः परिपूज्य च ॥ अस्त्रप्रक्षालितं कुंभं यथाशक्ति विनिर्मितम् ॥ २३ ॥तत्र संस्थाप्य विधिवत्तत्र भानोः कलां यजेत् ॥
विलोममातृकामूलमुच्चरन् शुद्धवारिणा ॥ २४ ॥ आपूर्य कुंभं तत्रार्चेत्सोमस्य विधिवत्कलाः॥ धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिंगिनी॥
॥ २५ ॥ सुश्रीः सुरूपा कपिला हव्यकव्यवहा तथा ॥ वह्नेर्दश कलाः प्रोक्ताः प्रोच्यंतेऽथ रवेः कलाः ॥२६॥ तपिनी तापिनी धूम्रा मरीचिज्वा
लिनी रुचिः ॥ सुषुम्णा भोगदा विश्वा बोधिनी धारिणी क्षमा॥ २७ ॥ अथेंदोश्च कला ज्ञेया ह्यमृता मानदा पुनः ॥ पूषा तुष्टिश्च पुष्टिश्च रतिश्च
धृतिसंज्ञिकाः ॥ २८ ॥ शशिनी चंद्रिका कांतिर्ज्योत्स्ना श्रीः प्रीतिरंगदा ॥ पूर्णापूर्णामृता चेति प्रोक्ताश्चंद्रमसः कलाः ॥ २९ ॥ वस्त्रयुग्मेन
संवेष्ट्य तस्मिन्सर्वौषधीः क्षिपेत् ॥ नवरत्नानि निक्षिप्य विन्यसेत्पञ्चपल्लवान् ॥ ३० ॥ पनसाम्रवटाश्वत्थवकुलेति च तान् विदुः ॥ मुक्तामाणिक्य
वैडूर्यगोमेदान्वज्रविद्रुमौ ॥ ३१ ॥ पद्मरागं मरकतं नीलं चेति यथाक्रमम् ॥ एवं रत्नानि निक्षिप्य तत्रावाह्येष्टदेवताम् ॥ ३२ ॥ संपूज्य विधि
वन्मंत्री ततः शिष्यं स्वलंकृतम् ॥ वेद्यां संवेश्य संप्रोक्ष्य प्रोक्षणीस्थेन वारिणा ॥ ३३ ॥ भूतशुद्ध्यादिकं कृत्वा तच्छरीरे विधानतः ॥ न्यास
जालेन संशोध्य मूर्ध्नि विन्यस्य पल्लवान् ॥ ३४ ॥ अष्टोत्तरशतेनाश मूलमंत्रेण मंत्रितैः ॥ अभिषिंचेत्प्रियं शिष्यं जपन्मूलमनुं हृदि॥ ३५ ॥

शिष्टोदकेन वाचम्य परिधायांबरं शिशुः ॥ गुरुं प्रणम्य विधिवत्संविशेत्पुरतः शुचिः ॥ ३६ ॥ अथ शिष्यस्य शिरसि हस्तं दत्वा गुरुस्ततः ॥
जपेदष्टोत्तरशतं देयमन्त्रं विधानतः ॥ ३७ ॥ समोऽस्त्वित्यक्षरान्दद्यात्ततः शिष्योऽर्चयेद्गुरुम् ॥ ततः सचन्दनं हस्तं दत्वा शिष्यस्य मस्तके ॥
॥ ३८ ॥ तत्कर्णे प्रवदेद्विद्यामष्टवारं समाहितः ॥ संप्राप्तविद्यः शिष्योऽपि निपतेद्गुरुपादयोः ॥ ३९ ॥ उत्तिष्ठ वत्स मुक्तोऽसि सम्यगाचार
वान्भव ॥ कीर्तिश्रीकांतिपुत्रायुर्बलारोग्यं सदास्तु ते ॥ ४० ॥ ततः शिष्यः समुत्थाय गन्धाद्यैर्गुरुमर्चयेत् ॥ दद्याच्च दक्षिणां तस्मै वित्तशाठ्य
विवर्जितः ॥ ४१ ॥ संप्राप्यैवं गुरोर्मंत्रं तदारभ्य धनादिभिः ॥ देहपुत्रकलत्रैश्च गुरुसेवापरो भवेत् ॥ ४२ ॥ स्वेष्टदेवं यजेन्मध्ये दत्वा पुष्पांजलिं
ततः ॥ अग्निनैर्ऋतिवागीशान् क्रमेण परिपूजयेत् ॥ ४३ ॥ यदा मध्ये यजेद्विष्णुं बाह्यादिषु विनायकम् ॥ रविं शिवां शिवं चैव यदा मध्ये तु
शङ्करम् ॥ ४४ ॥ रविं गणेशमंबां च हरिं चाथ यदा शिवाम् ॥ ईशं विघ्नार्कगोविंदान्मध्ये चेद्गणनायकम् ॥ ४५ ॥ शिवं शिवां रविं विष्णुं रवौ
मध्यगते पुनः ॥ गणेशं विष्णुमंबां च शिवं चेति यथाक्रमम् ॥ ४६ ॥ एवं नित्यं समभ्यर्च्य देवपञ्चकमादृतः ॥ ब्राह्मे मुहूर्ते ह्युत्थाय कृत्वाचा
वश्यकं बुधः ॥ ४७ ॥ अशंकितो वा शय्यायां स्वकीयशिरसि स्मरेत् ॥ सहस्रदलशुक्लाब्जकर्णिकास्थेंदुमण्डले॥४८॥ अकथादित्रिकोणस्थं वरा
भयकरं गुरुम् ॥द्विनेत्रं द्विभुजं शुक्लगंधमाल्यानुलेपनम् ॥ ४९ ॥ वामे शक्त्या युतं ध्यात्वा मानसैरुपचारकैः ॥ आराध्य पादुकामन्त्रं दशधा
प्रजपेत्सुधीः ॥ ५० ॥ वा माया श्रीभृगेंद्राढ्या वियद्धंसखकाग्नयः ॥ हसक्षमलवार्यग्निवामकर्णेंदुयुग्मरुत् ॥ ५१ ॥ ततो भृग्वाकाशखाग्नि
भृगेंद्राढ्याः परंतिमः ॥ सहक्षमलतोयाग्निचंद्रशांतियुतो मरुत् ॥ ५२ ॥ ततः श्रीश्चामुकांते तु नन्दनाथामुकी पुनः ॥ देव्यंबांते श्रीपादुकां
पूजयामि हृदंतिमे ॥ ५३ ॥ अयं श्रीपादुकामंत्रः सर्वसिद्धिप्रदो नृणाम् ॥ गुह्येति च समर्प्याथ मन्त्रैरेतैर्नमेत्सुधीः ॥ ॥ ५४ ॥ अखण्ड
मंडलाकारं व्याप्तं येन चराचरम् ॥ तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ५५ ॥ अज्ञानतिमिरांधस्य ज्ञानाञ्जनशलाकया ॥ चक्षुरुन्मीलितं
येन तस्मै श्रीगुरवे नमः ॥ ५६ ॥ नमोऽस्तु गुरवे तस्मा इष्टदेवस्वरूपिणे ॥ यस्य वागमृतं हंति विषं संसारसंज्ञकम् ॥ ५७ ॥ इति नत्वा
पठेत्स्तोत्रं सद्यः प्रत्ययकारकम् ॥ ॐ नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ॥ ५८ ॥ विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह ॥ नवाय
तनरूपाय परमार्थैकरूपिणे ॥ ५९ ॥ सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते ॥ स्वतंत्राय दयाक्लृप्तविग्रहाय शिवात्मने ॥ ६० ॥ परतं
त्राय भक्तानां भव्यानां भावरूपिणे ॥ विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ॥ ६१ ॥ प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ॥

पुरस्तात्पार्श्वयोः पृष्ठे नमस्तुभ्यमुपर्यधः ॥ ६२ ॥ सदा सच्चित्स्वरूपेण विधेहि भवदासनम् ॥ त्वत्प्रसादादहं देव कृतकृत्योऽस्मि सर्वतः ॥
॥ ६३ ॥ मायामृत्युमहापाशाद्विमुक्तोऽस्मि शिवोऽस्मि वः ॥ इति स्तुत्वा ततः सर्वं गुरवे विनिवेदयेत् ॥ ६४ ॥ प्रातःप्रभृति सायांतं
सायादिप्रातरंततः ॥ यत्करोमि जगन्नाथ तदस्तु तव पूजनम् ॥ ६५ ॥ ततश्च गुरुपादाब्जगलितामृतधारया ॥ क्षालितं निजमात्मानं
निर्मलं भावयेत्सुधीः ॥ ६६ ॥ मूलादिब्रह्मरंध्रांतं मूलविद्यां विभावयेत् ॥ मूलाधारादधो भागे वर्तुलं वायुमंडलम् ॥ ६७ ॥ तत्रस्थवायुबीजोत्थ
वायुना च तदूर्द्ध्वकम् ॥ त्रिकोणं मंडलं वह्नेस्तत्रस्थवह्निबीजतः ॥ ६८ ॥ उत्पन्नेनाग्निना मूलाधारावस्थितविग्रहाम् ॥ प्रसुप्तभुजगाकारां स्वयं
भूलिंगवेष्टिनीम् ॥ ६९ ॥ विसतंतुनिभां कोटिविद्युदाभां तनीयसीम् ॥ कुलकुंडलिनीं ध्यात्वा कूर्चेनोत्थापयेच्च ताम् ॥ ७० ॥ सुषुम्णावर्त्मना
तां च षट्चक्रक्रमभेदिनीम् ॥ गुरूपदिष्टविधिना ब्रह्मरंध्रं नयेत्सुधीः ॥ ७१ ॥ तत्रस्थामृतसंमग्नीकृत्यात्मानं विभावयेत् ॥ तत्प्रभापटलव्याप्तं
विमलं चिन्मयं परम् ॥ ७२ ॥ पुनस्तां स्वस्थलं नीत्वा हृदि देवं विचिंतयन् ॥ दृष्ट्वा च मानसैर्द्रव्यैः प्रार्थयेन्मनुनामुना ॥ ७३ ॥ त्रैलोक्यचैत
न्यमयादिदेव श्रीनाथ विष्णो भवदाज्ञयैव ॥प्रातः समुत्थाय तव प्रियार्थं संसारयात्रां त्वनुवर्तयिष्ये ॥ ७४ ॥ विष्णोरिति स्थले विप्र कार्य ऊहो
ऽन्यदैवते ॥ ततः कुर्यात्सर्वसिद्ध्यै त्वजपाया निवेदनम् ॥ ७५ ॥ षट्शतानि दिवा रात्रौ सहस्राण्येकविंशतिः ॥ अजपाख्यां तु गायत्रीं जीवो
जपति सर्वदा ॥ ७६ ॥ ऋषिर्हंसस्तथाऽव्यक्तगायत्रीछंद ईरितम् ॥ देवता परमोहंसश्चाद्यंते बीजशक्तिकम् ॥ ७७ ॥ ततः षडंगं कुर्वीत सूर्यः सोमो
निरंजनः ॥ निराभासश्च धर्मश्च ज्ञानं चेति तथा पुनः ॥ ७८ ॥ क्रमादेतान्हंसपूर्वानात्मनेपदपश्चिमान् ॥ जातयुक्तान्साधकेंद्र षडंगेषु नियोज
येत् ॥ ७९ ॥ हकारः सूर्यसंकाशतेजाः संगच्छते बहिः ॥ सकारस्तादृशश्चैव प्रवेशे ध्यानमीरितम्॥ ८०॥ एवं ध्यात्वार्पयेद्धीमान्वह्नचक्रेषु विभा
गशः ॥मूलाधारे वादिसांतबीजयुक्ते चतुर्दले ॥ ८१ ॥ बंधूकाभे स्वशक्त्या तु सहितापास्वगाय च ॥ पाशांकुशसुधापात्रमोदकोल्लासपाणये ॥
॥ ८२ ॥ षट्शतं तु गणेशाय वागधीशाय चार्पयेत् ॥ स्वाधिष्ठाने विद्रुमाभे वादिलांतार्णसंयुते ॥८३ ॥ वामांगशक्तियुक्ताय विद्याधिपतये तथा ॥
स्रुवाक्षमालालसितबाहवे पद्मजन्मने ॥ ८४ ॥ ब्रह्मणे षट्सहस्रं तु हंसारूढाय चार्पयेत् ॥ विद्युल्लसितमेघाभे डादिफांतार्णपत्रके ॥ ८५ ॥ मणि
पूरे शंखचक्रगदापंकजधारिणे ॥ सश्रिये षट्सहस्रं च विष्णवे विनिवेदयेत् ॥ ८६ ॥अनाहतेऽर्कपत्रे च कादिठांतार्णसंयुते ॥ शुक्ले शूलाभयवरसुधा
कलशधारिणे॥८७॥वामांगे शक्तियुक्ताय विद्याधिपतये सुधीः॥वृषारूढाय रुद्राय षट्सहस्रं निवेदयेत् ॥ ८८॥ विशुद्धे षोडशदले स्वराढ्ये शुक्लव

णके॥महाज्योतिप्रकाशायेन्द्रियाधिपतये ततः॥८९॥सहस्रमर्पयेत्प्राणशक्त्या युक्तेश्वराय च॥आज्ञाचक्रे हक्षयुक्ते द्विदिलेऽब्जे सहस्रकम्॥९०॥सदाशि
वाय गुरवे पराशक्तियुताय वै ॥ सहस्रारे महापद्मे नादबिन्दुद्वयान्विते ॥ ९१ ॥ विलसन्मातृकावर्णे वराभयकराय च ॥ परमाद्ये च गुरवे सहस्रं
विनिवेदयेत् ॥९२॥ चुलुकेंऽबु पुनर्द्धत्वा स्वभावादेव सिध्यतः ॥एकविंशतिसाहस्रप्रमितस्य जपस्य च ॥ ९३ ॥ षट्शताधिकसंख्यास्या दजपाया
विभागशः ॥ संकल्पेन मोक्षदाता विष्णुर्मे प्रीयतामिति ॥ ९४ ॥ अस्याः संकल्पमात्रेण महापापैः प्रमुच्यते ॥ ब्रह्मैवाहं न संसारी नित्यमुक्तो न
शोकभाक् ॥ ९५ ॥ सच्चिदानंदरूपोऽहमात्मानमिति भावयेत् ॥ ततः समाचरेद्देहकृत्यं देवार्चनं तथा ॥ ९६ ॥ तद्विधानं प्रवक्ष्यामि सदाचारस्य
लक्षणम् ॥ ९७ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे पञ्चषष्टितमोऽध्यायः ॥६५॥सनत्कुमार उवाच ॥ ततः श्वासानुसारेण
दत्वा पादं महीतले ॥ समुद्रमेखले देवि पर्वतस्तनमंडले ॥ १ ॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ इति भूमिं तु संप्रार्थ्य विहरेच्च
यथाविधि ॥ २ ॥ रक्षःकोणे ततो ग्रामाद्गत्वा मंत्रमुदीरयेत् ॥ गच्छंतु ऋषयो देवाः पिशाचा ये च गुह्यकाः ॥ ३ ॥ पितृभूतगणाः सर्वे करिष्ये
मलमोचनम् ॥ इति तालत्रयं दत्वा शिरः प्रावृत्य वाससा ॥४॥ दक्षिणाभिमुखं रात्रौ दिवा स्थित्वा ह्युदङ्मुखः॥मलं विसृज्य शौचं तु मृदाद्भिः
समुपाचरेत् ॥ ५ ॥ एका लिंगे गुदे तिस्रो दश वामकरे मृदः ॥ करयोः सप्त वै दद्यात्त्रिस्त्रिवारं च पादयोः ॥६॥ एवं शौचं विधायाथ गंडूषान्द्वाद
शैव तु ॥ कृत्वा वनस्पतिं चाथ प्रार्थयेन्मनुनामुना ॥७ ॥ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च॥श्रियं प्रज्ञां च मेधां च त्वं नो देहि वनस्पते
॥ ८ संप्रार्थ्यैवं दंतकाष्ठं द्वादशांगुलसंमितम् ॥ गृहीत्वा काममंत्रेण कुर्यान्मंत्री समाहितः ॥ ९ ॥ कामदेवपदं ङेन्तं तथा सर्वजनप्रियम् ॥ ह्रदंतः
कामबीजाढ्यं दन्तांश्चानेन शोधयेत् ॥ १० ॥ जिह्वोल्लेखो वाग्भवेन मूलेन क्षालयेन्मुखम् ॥ देवागारं ततो गत्वा निर्माल्यमपसार्य च ॥ ११ ॥
परिधायांबरं शुद्धं मंगलारार्तिकं चरेत् ॥ अस्त्रेण पात्रं संप्रोक्ष्य मूलेन ज्वालयेच्च तम् ॥ १२ ॥ संपूज्य पात्रमादायोत्थाय घंटां च वादयेत् ॥
सुगोघृतप्रदीपेन भ्रामितेन समंततः ॥ १३ ॥ वाद्यैर्गीतैर्मनोज्ञैश्च देवस्यारार्तिकं भवेत् ॥ इति नीराजनं कृत्वा प्रार्थयित्वा निजेश्वरम् ॥ १४ ॥
स्नातुं यायान्निम्नगादौ कीर्तयन्देवतागुणान् ॥ गत्वा तीर्थं नमस्कृत्य स्नानीयं च निधाय वै ॥१५॥ मूलाभिमंत्रितमृदमादाय कटिदेशतः ॥ विलिप्य
पादपर्यंत क्षालयेत्तीर्थवारिणा ॥ १६ ॥ ततश्च पञ्चभिः पादौ प्रक्षाल्यांतर्जले पुनः ॥ प्रविश्य नाभिमात्रे तु मृदं वामकरस्य च ॥ १७ ॥
मणिबन्धे हस्ततले तदग्रे च तथा पुनः ॥ कृत्वांगुल्या गांगमृदमादायास्त्रेण तत्पुनः ॥१८॥ निजोपरि च मंत्रज्ञो भ्रामयित्वा त्यजेत्सुधी ॥ तलस्थां

च षडंगेषु तन्मंत्रैः प्रविलेपयेत् ॥ १९ ॥ निमज्य क्षालयेत्सम्यग् मलस्नानमितीरितम् ॥ विभाव्येष्टमयं सर्वमांतरं स्नानमाचरेत् ॥ २० ॥ अनंता
दित्यसंकाशं निजभूषायुधैर्युतम् ॥ मंत्रमूर्तिं प्रभुं स्मृत्वा तत्पादोदकसंभवाम् ॥ २१ ॥ धारां च ब्रह्मरंध्रेण प्रविशंतीं निजां तनुम् ॥ तया संक्षालये
त्सर्वमंतर्देहगतं मलम् ॥ २२ ॥ तत्क्षणाद्विरजा मंत्री जायते स्फटिकोपमः ॥ ततः श्रौतोक्तविधिना स्नात्वा मन्त्री समाहितः ॥ २३ ॥ मंत्रस्नानं
ततः कुर्यात्तद्विधानमथोच्यते ॥ देशकालौ च संकीर्त्य प्राणायामषडंगकैः ॥ २४ ॥ कृत्वार्कमंडलात्तीर्थान्याह्वयेन्मुष्टिमुद्रया ॥ ब्रह्माण्डोदरतीर्थानि
करैः स्पृष्टानि ते रवेः ॥ २५ ॥ तेन सत्येन मे देव देहि तीर्थं दिवाकर ॥२६॥ गंगे च यमुने चैव गोदावरि सरस्वति॥नर्मदे सिंधुकावेरि जलेऽस्मि
न्संनिधिं कुरु ॥२७॥ इत्यावाह्य जले तानि सुधाबीजेन योजयेत् ॥ गोमुद्रयामृतीकृत्य कवचेनावगुंठ्य च ॥२८॥ संरक्ष्यास्त्रेण तत्पश्चाच्चक्रमुद्रां
प्रदर्शयेत् ॥ वह्नचर्केंदुमंडलानि तत्र साचतयेद्बुधः ॥ २९॥ मंत्रयेदर्कमन्त्रेण सुधाबीजेन तज्जलम्॥मूलेन चैकादशधा तत्र संमंत्र्य भावयेत् ॥३०॥
पूजायंत्रं च तन्मध्ये स्वांतादावाह्य देवताम् ॥ स्नापयित्वार्चयेत्तां च मानसैरुपचारकैः ॥३१ ॥सिंहासनस्थां तां नत्वा तज्जलं प्रणमेत्सुधीः ॥
आधारः सर्वभूतानां विष्णोरतुलतेजसः ॥ ३२ ॥ तद्रूपाश्च ततो जाता आपस्ताः प्रणमाम्यहम् ॥ इति नत्वा समारुन्ध्य सप्तच्छिद्राणि साधकः ॥
॥ ३३ ॥ निमज्य सलिले तस्मिन्मूलं देवाकृतिं स्मरेत्॥निमज्ज्योन्मज्ज्य त्रिश्चैवं सिंचेत्कं कुंभमुद्रया ॥ ३४॥त्रिर्मूलेन चतुर्मंत्रैरभिषिंचेन्निजां
तनुम् ॥ चत्वारो मनवस्तेऽत्र कथ्यन्ते तांत्रिका मुने॥३५॥सिसृक्षोर्निखिलं विश्वं मुहुः शुक्रं प्रजापतेः॥मातरः सर्वभूतानामापो देव्यः पुनंतु माम् ॥
॥ ३६ ॥ अलक्ष्मीर्मलरूपा या सर्वभूतेषु संस्थिता ॥ क्षालयंति च तां स्पर्शादापो देव्यः पुनंतु माम् ॥ ३७ ॥ यन्मे केशेषु दौर्भाग्यं सीमन्ते यच्च
मूर्द्धनि ॥ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नन्तु वो नमः ॥ ३८ ॥ आयुरारोग्यमैश्वर्यमरिपक्षक्षयं शुभम्॥सन्तोषः क्षांतिरास्तिक्यं विद्या भवतु वो नमः॥
॥ ३९ ॥ विप्रपादोदकं पीत्वा शालग्रामशिलाजलम् ॥ पिबेद्विरुद्धं नो कुर्यादेषां तु नियतो विधिः ॥४०॥पृथिव्यां यानि तीर्थानि दक्षांघ्रौ तानि
भूसुरे॥स्वेष्टदेवं समुद्वास्य मन्त्री मार्तंडमण्डले ॥ ४१ ॥ ततस्तीरं समागत्य वस्त्रं संक्षाल्य यत्नतः॥वाससी परिधायाथ कुर्यात्सन्ध्यादिकं सुधीः॥
॥ ४२ ॥ रोगाद्यशक्तो मनुजः कुर्यात्तत्राघमर्षणम् ॥ अथवा भस्मना स्नातो रजोभिश्चैव वाऽक्षमः ॥ ४३ ॥ अथ सन्ध्यादिकं कुर्यात् स्थित्वा
चैवासने शुभे ॥ केशवेन तथा नारायणेन माधवेन च ॥ ४४ ॥ संप्राश्य तोयं गोविंदविष्णुभ्यां क्षालयेत्करौ ॥ मधुसूदनत्रिविक्रमाभ्यामोष्ठौ
च मार्जयेत् ॥ ४५ ॥ वामनश्रीधराभ्यां च मुखं हस्तौ स्पृशेत्ततः ॥ हृषीकेशपद्मनाभाभ्यां स्पृशेच्चरणौ ततः ॥ ४६ ॥ दामोदरेण

मूर्द्धानं मुखं संकर्षणेन च ॥ वासुदेवेन प्रद्युम्नेन स्पृशेन्नासिके ततः ॥ ४७ ॥ अनिरुद्धपुरुषोत्तमाभ्यां नेत्रे स्पृशेत्ततः ॥ अधोक्षजनृसिंहाभ्यां
श्रवणे संस्पृशेत्तथा ॥ ४८ ॥ नाभिं स्पृशेदच्युतेन जनार्दनेन वक्षसि ॥ हरिणा विष्णुनांसौ च वैष्णवाचमनं त्विदम् ॥ ४९ ॥ प्रणवाद्यैर्ङेंत
मोंतैः केशवादिकनामभिः ॥ मुखे नसोः प्रदेशिन्याऽनामया नेत्रकर्णयोः ॥५०॥ कनिष्ठया नाभिदेशं सर्वत्रांगुष्ठयोजनम् ॥ आत्मविद्याशिवैस्तत्त्वैः
स्वाहांतैः शवमीरितम् ॥ ५१ :॥ दीर्घत्रयेंदुयुग्व्योमपूर्वकैश्च पिबेज्जलम् ॥ आत्मविद्याशिवैरेव शैवं स्वाहावसानिकैः॥ ५२ ॥ वाग्लज्जाश्री
मुखैः प्रोक्तं शाक्तं स्वाहावसानिकैः ॥ वाग्लज्जाश्रीमुखैः प्रोक्तं द्विजाचमनमर्थदम् ॥ ५३ ॥ तिलकं च ततः कुर्याद्भाले सुष्ठु गदाकृति ॥ नंदकं
हृदये शंखचक्रे चैव भुजद्वये ॥ ५४ ॥ शार्ङ्गबाणं मस्तके च विन्यसेत्क्रमशः सुधीः ॥ कर्णमूले पार्श्वयोश्च पृष्ठे नाभौ ककुद्यपि ॥ ५५ ॥ एवं तु
वैष्णवः कुर्यान्मृद्भिस्तीर्थोद्भवादिभिः ॥ अग्निहोत्रोद्भवं भस्म गृहीत्वा त्र्यंबकेण तु ॥ ५६ ॥ किंवाग्निरिति मंत्रेणाभिमंत्र्य पञ्चमन्त्रकैः ॥ क्रमात्त
त्पुरुषाघोरसद्योजातादिनामभिः ॥ ५७॥ पञ्च कुर्यात्त्रिपुंड्राणि भालांसोदरहृत्सु च॥ शैवः शाक्तस्त्रिकोणाभं नारीवद्वा समाचरेत् ॥ ५८ ॥ कृत्वा तु
वैदिकीं संध्यां तांत्रिकीं च समाचरेत् ॥ आचम्य विधिवन्मन्त्री तीर्थान्यावाह्य पूर्ववत् ॥ ५९॥ ततस्त्रिवारं दर्भेण भूमौ तोयं विनिःक्षिपेत् ॥सप्तधा
तज्जलेनाथ मूर्द्धानमभिषिचयेत् ॥ ६० ॥ ततश्च प्राणानायम्य कृत्वा न्यासं षडंगकम् ॥ आदाय वामहस्तेंऽबु दक्षेणाच्छाद्य पाणिना ॥ ६१ ॥
वियद्वाय्वग्नितोयक्ष्माबीजैः संमंत्र्य मंत्रवित् ॥ मूलेन तस्मात् श्चोतद्भिर्बिन्दुभिस्तत्त्वमुद्रया ॥ ६२॥ स्वशिरः सप्तधा प्रोक्ष्यावशिष्टं तत्पुनर्जलम् ॥
कृत्वा तदक्षरं मंत्री नासिकांतिकमानयेत् ॥ ६३ ॥ जलं तेजोमयं तच्चाकृष्यांतश्चेडया पुनः ॥ प्रक्षाल्यांतर्गतं तेन कल्मषं तज्जलं पुनः ॥ ६४ ॥
कृष्णवर्णं पिंगलया रेचयेत्स्वाग्रतस्तथा ॥ क्षिपेदस्त्रेण तत्पश्चात्कल्पिते कुलिशोपले ॥ ६५ ॥ एतद्धि सर्वपापघ्नं प्रोक्तं चैवाघमर्षणम् ॥ ततश्च
हस्तौ प्रक्षाल्य प्राग्वदाचम्य मंत्रवित् ॥ ६६ ॥ समुत्थाय च मंत्रज्ञस्ताम्रपात्रे सुमादिकम् ॥ प्रक्षिप्यार्घं प्रदद्याद्धै मूलांतैर्मंत्रमुच्चरन् ॥ ६७ ॥ रवि
मंडलसंस्थाय देवायार्घ्यं प्रकल्पयेत् ॥ दत्त्वार्घं त्रिरनेनाथ देवं रविगतं स्मरेत् ॥ ६८ ॥ स्वकल्पोक्तां च गायत्रीं जपेदष्टोत्तरं शतम् ॥ अष्टां
विंशतिवारं वा गुह्येतिमनुनार्पयेत् ॥ ६९॥ उद्यदादित्यसंकाशां पुस्तकाक्षकरांबुजाम् ॥ कृष्णाजिनांबरां ब्राह्मीं ध्यायेत्तारांकितेऽम्बरे ॥७०॥मध्याह्ने
वरदां देवीं पार्वतीं संस्मरेत्पराम् ॥ शुक्लांबरां वृषारूढां त्रिनेत्रां रविबिंबगाम्॥७१॥ वरं पाशं च शूलं च दधानां नृकरोटिकाम् ॥ सायाह्ने रत्नभूषाढ्यां
पीतकौशेयवाससाम् ॥ ७२ ॥ श्यामरंगां चतुर्हस्तां शंखचक्रलसत्कराम् ॥ गदापद्मधरां देवीं सूर्यासनकृताश्रयाम् ॥ ७३ ॥ ततो देवानृषींश्चैव

पितॄंश्चापि विधानवित् ॥ तर्पयित्वा स्वेष्टदेवं तर्पयेत्कल्पमार्गतः ॥ ७४ ॥ गुरुपंक्तिं च संतर्प्य सांगं सावरणं तथा ॥ सायुधं वैनतेयं संतर्प
यामीति तर्पयेत्॥७५॥नारदं पर्वतं जिष्णुं निशठोद्धवदारुकान्॥ विष्वक्सेनं च शैलेयं वैष्णवः परितर्पयेत्॥७६॥एवं संतर्प्य विप्रेंद्र दत्त्वार्घ्यं च विव
स्वते॥पूजागारं समागत्य प्रक्षाल्यांघ्री उपस्पृशेत्॥७७॥अग्निहोत्रस्थितानग्नीन् हुत्वोपस्थाय यत्नतः॥पूजास्थलं समागत्य द्वारपूजां समाचरेत्॥ ७८॥
गणेशं चोर्द्ध्वशाखायां महालक्ष्मीं च दक्षिणे॥सरस्वतीं वामभागे दक्षे विघ्नेश्वरं पुनः॥७९॥क्षेत्रपालं तथा वामे दक्षे गंगां प्रपूजयेत्॥वामे च यमुनां दक्षे
धातारं वामतस्तथा॥८०॥विधातारं शंखपद्मनिधींश्च वामदक्षयोः॥द्वारपालांस्ततोऽभ्यर्चेत्तत्तत्कल्पोदितान्सुधीः॥८१॥नंदः सुनंदश्चंडश्च प्रचंडः प्रचलो
बलः॥भद्रः सुभद्रश्चेत्याद्या वैष्णवा द्वारपालकाः॥८२॥नंदी भृंगी रिटी स्कंदो गणेशोमामहेश्वराः॥वृषभश्च महाकालः शैवा वै द्वारपालकाः ॥ ८३ ॥
ब्राह्म्याद्या मातरोऽष्टौ तु शक्तयो द्वाःस्थिताः स्वयम्॥सेंदुः स्वनामाद्यवर्णाद्या ङेनमोंता इमे स्मृताः ॥८४ ॥ ततः स्थित्वासने धीमानाचम्य प्रयतः
शुचिः॥ दिव्यांतरिक्षभौमांश्च विघ्नानुत्सार्य यत्नतः ॥८५॥ केशवाद्यां मातृकां तु न्यसेद्वैष्णवसत्तमः ॥ केशवः कीर्तिसंयुक्तः कांत्या नारायणस्तथा ॥
॥८६॥ माधवस्तुष्टिसहितो गोविंदः पुष्टिसंयुतः ॥ विष्णुस्तु धृतिसंयुक्तः शांतियुङ्मधुसूदनः॥८७॥ त्रिविक्रमः क्रियायुक्तो वामनो दयितायुतः॥
श्रीधरो मेधया युक्तो हृषीकेशश्च हर्षया ॥ ८८ ॥ पद्मनाभयुता श्रद्धा लज्जा दामोदरान्विता ॥ वासुदेवश्च लक्ष्मीयुक् संकर्षणसरस्वती ॥ ८९ ॥
प्रद्युम्नः प्रीतिसंयुक्तोऽनिरुद्धो रतिसंयुतः ॥ चक्री जयायुतः पश्चाद्गदी दुर्गासमन्वितः ॥ ९० ॥ शार्ङ्गी तु प्रभया युक्तः खड्गी युक्तस्तु सत्यया ॥
शंखी चंडासमायुक्तो हली वाणीसमायुतः ॥ ९१ ॥ मुसली च विलासिन्या शूली विजययान्वितः ॥ पाशी विरजया युक्तो कुशी विश्वासम
न्वितः॥ ९२ ॥ मुकुंदो विनतायुक्तो नंदजश्च सुनंदया॥नंदी स्मृत्या समायुक्तो नरो वृद्ध्या समन्वितः ॥९३ ॥ समृद्धियुङ्नरकजिच्छुद्धियुक्च हरिः
स्मृतः ॥ कृष्णो बुद्ध्या युतः सत्यो भुक्त्या मुक्त्याथ सात्वतः ॥ ९४ ॥ सौरिक्षमे सूररमे उमायुक्तो जनार्दनः ॥ भूधरः क्लेदिनीयुक्तो विश्व
मूर्तिश्च क्लिन्नया ॥ ९५ ॥ वैकुंठो वसुधायुक्तो वसुदः पुरुषोत्तमः ॥ बली तु परया युक्तो बलानुजपरायणे ॥ ९६ ॥ बालसूक्ष्मे वृषघ्नस्तु संध्यायुक्
प्रज्ञया वृषः ॥ हंसः प्रभासमायुक्तो वराहो निशया युतः ॥ ९७ ॥ विमलो धारया युक्तो नृसिंहो विद्युता युतः॥ केशवादिमातृकाया मुनिर्नारा
यणो मतः ॥ ९८ ॥ अमृताद्या च गायत्री छंदो विष्णुश्च देवता ॥ चक्राद्यायुधसंयुक्तं कुंभादर्शधरं हरिम् ॥ ९९ ॥ लक्ष्मीयुतं विद्युदाभं बहुभू
षायुतं भजेत् ॥ एवं ध्यात्वा न्यसेच्छक्तिं श्रीकामपुटिताक्षरम् ॥ १०० ॥ वदेत्तद्विष्णुशक्तिभ्यां हृदयं प्रणवादिकम् ॥ त्वगसृङ्मांसमेदोऽस्थिम

ञांशुकाण्यसून्वदेत् ॥ १०१ ॥ प्राणं क्रोधं तथा मभ्यामन्तान्यादिदशस्वपि ॥ एकं मौलौ मुखे चैकं द्विकं नेत्रे द्विकं श्रुतौ ॥ १०२॥ नसोर्द्वयं
कपोले च द्वयं द्वे द्विरदच्छदे॥एकं तु रसनामूले ग्रीवायामेकमेव च॥१०३॥कवर्गं दक्षिणे बाहौ चवर्गं वामबाहुके ॥टतवर्गौ पादयोस्तु पफौ कुक्षि
द्वये न्यसेत्॥१०४॥पृष्ठवंशे बमित्युक्तं नाभौ भं हृदये तु मम्॥यादिसप्तापि धातुस्था हं प्राणे लं तथात्मनि॥१०५॥क्षं क्रोधे क्रमतो न्यस्य विष्णु
पूजाक्षमो भवेत् ॥ पूर्णोदर्या तु श्रीकंठो ह्यनंतो विजरान्वितः॥१०६॥ सूक्ष्मेशः शाल्मलीयुक्तो लोलाक्षीयुक्त्रिमूर्तकः ॥ महेश्वरो वर्तुलाक्ष्यार्घीशो
वै दीर्घघोणया॥१०७॥दीर्घमुख्या भारभूतिस्तिथीशो गोमुखीयुतः ॥ स्थावरेशो दीर्घजिह्वायुग्धरः कुंडोदरीयुतः ॥ १०८॥ ऊर्द्ध्वकेश्या तु झिंटीशो
भौतिको विकृतास्यया ॥ सद्यो ज्वालामुखीयुक्तोल्कामुख्यानुग्रहो युतः ॥१०९ ॥ अक्रूर आस्यया युक्तो महासेनो विद्यया युतः ॥ क्रोधीशश्च
महाकाल्या :चंडेशेन सरस्वती॥ ११०॥पञ्चांतकः सिद्धगौर्या युक्तश्चाथ शिरोत्तमः ॥ त्रैलोक्यविद्यया युक्तो मन्त्रशक्त्यैकरुद्रकः ॥१११॥ कूर्मेशः
कमठीयुक्तो भूतमात्रैकनेत्रकः ॥ लम्बोदर्या चतुर्वक्रो ह्यजेशो द्राविणीयुतः ॥११२॥सर्वेशो नागरीयुक्तः सोमेशः खेचरीयुतः ॥ मर्यादया लांगलीशो
दारुकेशेन रूपिणी ॥ ११३ ॥ वारुण्या त्वर्द्धनारीशो उमाकांतो मुनीश्वरः ॥ काकोदर्या तथाषाढी पूतनासंयुतो मतः ॥ ११४ ॥ दंडीशो भद्रका
लीयुगत्रीशो योगिनीयुतः॥ मीनेशः शंखिनीयुक्तो मेषेशस्तर्जनीयुतः॥११५॥लोहितः कालरात्र्या च शिखीशः कुजनीयुतः॥छलगण्डः कपर्दिन्या
द्विरंडेशश्च वज्रया ॥११६ ॥ महाबलो जयायुक्तो बलीशः सुमुखेश्वरी ॥भुजंगो रेवतीयुक्तः पिनाकी माधवीयुतः ॥११७॥ खड्गीशो वारुणीयुक्तो
बकेशो वायवीयुतः ॥ श्वेतोरस्को विदारिण्या भृगुः सहजया युतः ॥ ११८ ॥ लकुलीशश्च लक्ष्मीयुक् शिवेशो व्यापिनीयुतः ॥ संवर्तके महामाया
प्रोक्ता श्रीकंठमातृका ॥ ११९ ॥ यत्र स्वीशपदं नोक्तं तत्र सर्वत्र योजयेत्॥ मुनिस्स्याद्दक्षिणामूर्तिर्गायत्रीछन्द ईरितम्॥१२०॥देवता चार्द्धनारीशो
विनियोगोऽखिलाप्तये ॥ हलो बीजानि चोक्तानि स्वराः शक्तय ईरिताः॥१२१॥कुर्याद्भृगुस्थाकाशेन षड्दीर्घाढ्येन चांगकम् ॥ बंधूकस्वर्णव
र्णांगं वराक्षांकुशपाशिनम् ॥ १२२ ॥ अर्द्धेंदुशेखरं त्र्यक्षं देववंद्यं विचिंतयेत् ॥ ध्यात्वैवं शिवशक्तीश्च चतुर्थी हृदयांतिमे ॥ १२३ ॥ सौबीजमातृका
पूर्वे विन्यसेन्मातृका स्थले ॥ विघ्नेशश्च ह्रिया युक्तो विघ्नराजः श्रिया युतः ॥ १२४ ॥ विनायकस्तथा पुष्ट्या शांतियुक्तः शिवोत्तमः ॥
विघ्नकृत्स्वस्तिसंयुक्तो विघ्नहर्ता सरस्वती॥१२५॥स्वाहया गणनाथश्च एकदंतः सुमेधया ॥कांत्या युक्तो द्विदंतस्तु कामिन्या गजवक्त्रकः ॥ १२६॥
निरंजनो मोहिनीयुक्कपर्दी तुनटीयुतः॥दीर्घजिह्वः पार्वतीयुग्ज्वालिन्या शंकुकर्णकः॥१२७॥वृषध्वजो नन्दया च सुरेश्या गणनायकः॥गजेन्द्रः कामरू

पिण्या शूर्पकर्णस्तथोमया॥ १२८॥विरोचनस्तेजोवत्या सत्या लम्बोदरेण च॥महानंदश्च विघ्नेश्या चतुर्मूर्तिस्वरूपिणी॥ १२९॥सदाशिवःकामदया ह्या
मोदो मदजिह्वया॥दुर्मुखो भूतिसंयुक्तः सुमुखो भौतिकीयुतः॥ १३०॥प्रमोदः सितया युक्त एकपादो रमायुतः॥द्विजिह्वो महिषीयुक्तो जंभिन्या शूरनाम
कः ॥ १३१ ॥ वीरो विकर्णया युक्तः षण्मुखो भृकुटीयुतः ॥ वरदो लज्जया वामदेवेशो दीर्घघोणया॥ १३२ ॥धनुर्द्धया वक्रतुडो द्विरंडो यामिनी
युतः॥सेनानी रात्रिसंयुक्तः कामांधो ग्रामणीयुतः ॥ १३३ ॥ मत्तः शशिप्रभायुक्तो विमत्तो लोलनेत्रया ॥मत्तवाहश्चंचलया जटी दीप्तिसमन्वितः ॥
॥१३४॥मुंडी सुभगया युक्तः खड्गी दुर्भगया युतः॥वरेण्यश्च शिवायुक्तो भगया वृषकेतनः॥ १३५ ॥भक्ष्यप्रियो भगिन्या च गणेशो भगिनीयुतः ॥
मेघनादः सुभगया व्यापी स्यात्कालरात्रियुक् ॥ १३६॥ गणेश्वरः कालिकया प्रोक्ता विघ्नेशमातृकाः॥ गणेशमातृकायास्तु गणो मुनिभिरीरितः ॥
१३७ ॥ त्रिवृद्गायत्रिकाछन्दो देवः शक्तिगणेश्वरः॥षड्दीर्घाढ्येन बीजेन कृत्वांगानि ततः स्मरेत् ॥ १३८॥पांशांकुशाभयवरान्दधानं कंजहस्तया ॥
पत्न्याश्लिष्टं रक्ततनुं त्रिनेत्रं गणपे भवेत् ॥ १३९ ॥ एवं ध्यात्वा न्यसेत्स्वीयबीजपूर्वाक्षरान्वितम् ॥ निवृत्तिश्च प्रतिष्ठा च विद्या शांतिस्तथेधिका
॥१४०॥ दीपिका रेचिका चापि मोचिका च पराभिधा ॥ सूक्ष्मासूक्ष्मामृता ज्ञानामृता चाप्यायिनी तथा ॥ १४१ ॥व्यापिनी व्योमरूपा चानंता
सृष्टिः समृद्धिका ॥ स्मृतिर्मेधा ततः कांतिर्लक्ष्मीर्द्धृतिः स्थिरा स्थितिः ॥ १४२ ॥ सिद्धिर्जरा पालिनी च क्षांतिरीश्वरिका रतिः ॥ कामिका वरदा
वाथ ह्लादिनी प्रीतिसंयुता ॥१४३॥ दीर्घा तीक्ष्णा तथा रौद्रा प्रोक्ता निद्रा च तंद्रिका ॥ क्षुधा च क्रोधिनी पश्चाक्रियाकारी समृत्युका ॥ १४४ ॥
पीता श्वेतारुणा पश्चादसितानंतया युता ॥ उक्ता कलामातृकैवं तत्तद्भक्तः समाचरेत् ॥ १४५ ॥ कलायुङ्मातृकायास्तु मुनिः प्रोक्तः प्रजापतिः ॥
गायत्रीछन्द आख्यातं देवता शारदाभिधा ॥ १४६॥ ह्रस्वदीर्घांतरस्थैश्च तारैः कुर्यात्षडंगकम्॥पद्मचक्रगुणैणांश्च दधतीं च त्रिलोचनाम्॥१४७॥
पञ्चवक्रां भारतीं तां मुक्ताभूषां भजेत्सुधीः ॥ ध्यात्वैवं तारपूर्वां तां न्यसेन्ङन्तकलान्विताम् ॥ १४८ ॥ ततश्च मूलमन्त्रस्य षडंगानि समाचरेत् ॥
हृदयादिचतुर्थ्यंते जातीः संयोज्य विन्यसेत् ॥१४९ ॥ नमः स्वाहा वषट् हुं वौषट् फट् जातय ईरिताः ॥ ततो ध्यात्वेष्टदेवं तं भूषायुधसमन्वितम्॥
॥१५०॥न्यस्यांगषट्कं तन्मूर्तौ ततः पूजनमारभेत्॥१५१॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे संध्यादिनिरूपणं नाम षट्षष्टि
तमोऽध्यायः ॥ ६६॥ सनत्कुमार उवाच॥ अथ वक्ष्ये देवपूजां साधकाभीष्टसिद्धिदाम् ॥ त्रिकोणं चतुरस्रं वा वामभागे प्रकल्प्य च ॥१॥सम्पूज्या
स्त्रेण संक्षाल्य हृदाधारं निधाय च॥तत्राग्निमण्डलं चेद्वा पात्रं संक्षाल्य चास्त्रतः ॥ २ ॥ आधारे नमसं स्थाप्य तत्र चेद्रविमंडलम्॥विलोममातृका

मूलमुच्चरन्पूरयेज्जलैः ॥ ३ ॥ तत्रेंदुमंडलं प्रार्च्य तीर्थान्यावाह्य पूर्ववत् ॥ गोमुद्रयामृतीकृत्य कवचेनावगुंठयेत् ॥ ४ ॥ संक्षाल्यास्त्रेण प्रणवं तदुप
र्यष्टधा जपेत् ॥ सामान्यार्घमिदं प्रोक्तं सर्वसिद्धिकरं नृणाम् ॥ ५॥ तज्जलं किंचिदुद्धृत्य प्रोक्षिण्या साधकोत्तमः ॥ आत्मानं यागवस्तूनि तेन
संप्रोक्षयेत्पृथक् ॥ ६ ॥ आत्मवामाग्रतः कुर्यात्षट्कोणांतस्त्रिकोणकम् ॥ चतुरस्रेण संवेष्ट्य संक्षाल्यार्घोदकेन च ॥ ७ ॥ ततस्तु साधकश्रेष्ठः
स्तंभयेच्छंखमुद्रया ॥ आग्नेयादिषु कोणेषु हृदाद्यंगचतुष्टयम् ॥ ८ ॥ नेत्रं मध्ये दिक्षु चास्त्रं त्रिकोणे पूजयेत्ततः ॥ मूलखंडत्रयेनाथा
धारशक्तिं तु मध्यगाम् ॥ ९ ॥ एवं संपूज्य विधिवदस्त्रसंक्षालितं हृदा ॥ प्रतिष्ठाप्य त्रिपदिकां पूजयेन्मनुनामुना ॥ १० ॥ मं वह्निमण्डला
येति ततो दशकलात्मने ॥ अमुकार्घ्येति पात्रांते सनापहृदयोंऽतिमे ॥ ११ ॥ चतुर्विंशतिवर्णोऽयमाधारस्यार्चने मनुः ॥ स्वमंत्रक्षालितं
शखं संस्थाप्याथ समर्चयेत् ॥ १२ ॥ तारः कार्म्ममहांस्ते तु ततो जलचराय च ॥ वर्म फट् हृदयं पांचजन्याय हृदयं मनुः ॥ १३ ॥
तत्रार्कमण्डलायेति द्वादशांते कलात्मने ॥ अमुकार्घ्येति पात्रांते नमोंतरुयक्षिवर्णवान् ॥ १४॥ सम्पूज्य तेन तत्रार्चेद्द्वादशार्ककलाः क्रमात् ॥ ततः
शुद्धजलैर्मूलं विलोममातृकां पठन् ॥ १५ ॥ शङ्खमापूरयेत्तस्मिन्पूजयेन्मनुनामुना ॥ ॐ सोममण्डलायेति षोडशांते कलात्मने ॥१६ ॥ अमुका
र्घ्यामृतायेति हन्मनुश्चार्घ्यपूजने ॥ तत्र षोडशसंख्याका यजेच्चंद्रमसः कलाः ॥ १७ ॥ ततस्तु तीर्थान्यावाह्य गङ्गे चेत्यादिपूर्ववत् ॥गोमुद्रयामृती
कृत्याच्छादयेन्मत्स्यमुद्रया ॥ १८ ॥ कवचेनावगुंठ्याथ रक्षेदस्त्रेण तत्पुनः ॥ चिंतयित्वेष्टदेवं च ततो मुद्राः प्रदर्शयेत् ॥ १९ ॥ शङ्खमौ
शलचक्राख्याः परमीकरणं ततः ॥ महामुद्रां योनिमुद्रां दर्शयेत्क्रमतः सुधीः ॥२०॥ गारुडी गालिनी चैव मुख्ये मुद्रे प्रकीर्तिते ॥ गन्धपुष्पादिभि
स्तत्र पूजयेद्देवतां स्मरन् ॥ २१ ॥ अष्टकृत्वो जपेन्मूलं प्रणवं चाष्टधा तथा ॥ शंखाद्दक्षिणदिग्भागे प्रोक्षणीपात्रमादिशेत् ॥ २२ ॥ प्रोक्षण्यां
तज्जलं किंचित्कृत्वात्मानं त्रिधा ततः ॥ आत्मतत्त्वात्मने हृच्च विद्यातत्त्वात्मने नमः ॥२३॥ शिवतत्त्वात्मने हृच्च इत्येतैर्मनुभिस्त्रिभिः ॥प्रोक्षेत्पुष्पाक्ष
तैश्चापि मण्डलं विधिवत्सुधीः ॥२४ ॥ अथवा मूलगायत्र्या पूजाद्रव्याणि प्रोक्षयेत् ॥ पाद्यार्घ्याचमनीयार्थं मधुपर्कार्थमच्युत॥२५॥ पात्राण्याधा
रयुक्तानि स्थापयेद्विधिना पुरः ॥ पाद्यं श्यामाकदूर्वाब्जविष्णुक्रांतजलैः स्मृतम् ॥ २६ ॥ अर्घ्यं पुष्पाक्षतयवैः कुशाग्रतिलसर्षपैः ॥ गंधदूर्वादलैः
प्रोक्तं ततश्चाचमनीयकम् ॥ २७ ॥ जातीफलं च कंकोलं लवंगं च जलान्वितम् ॥ क्षौद्राज्यदधिसंमिश्रं मधुपर्कसमीरितम् ॥२८॥ एकस्मिन्नथवा
पात्रे पाद्यादीनि प्रकल्पयेत् ॥ शंकरार्कार्चने शंखमयेनैव प्रशस्यते ॥ २९ ॥ श्वेताकृष्णारुणापीताश्यामारक्तासितासिताः ॥ रक्तांबराभयकरा

ध्येयास्स्युः पीठशक्तयः ॥ ३० ॥ स्वर्णादिलिखिते यंत्रे शालग्रामे मणौ तथा ॥ विधिना स्थापितायां वा प्रतिमायां प्रपूजयेत् ॥ ३१ ॥ अंगुष्ठा
दिवितस्त्यंतमाना स्वर्णादिधातुभिः ॥ निर्मिता शुभदा गेहे पूजनाय दिने दिने ॥ ३२ ॥ वक्रां दग्धां खंडितां च भिन्नमूर्द्धदृशं पुनः ॥ स्पृष्टां वाप्य
न्त्यजाद्यैश्च प्रतिमां नैव पूजयेत् ॥ ३३ ॥ बाणादिलिंगे वाभ्यर्चेत्सर्वलक्षणलक्षिते ॥ मूलेन मूर्तिं संकल्प्य ध्यात्वा देवं यथोदितम् ॥ ३४ ॥
आवाह्य पूजयेत्तस्यां परिवारगणैः सह ॥ शालग्रामे स्थापितायां नावाहनविसर्जने॥३५॥पुष्पांजलिं समादाय ध्यात्वा मंत्रमुदरियेत् ॥३६॥
आत्मसंस्थमजं शुद्धं त्वामहं परमेश्वर ॥ अरण्यामिव हव्याशं मूर्तावावाहयाम्यहम् ॥ ३७ ॥ तवेयं हि महामूर्तिस्तस्यां त्वां सर्वगं प्रभो ॥
॥भक्तिस्नेहसमाकृष्टं दीपवत्स्थापयाम्यहम् ॥ ३८ ॥ सर्वांतर्यामिणे देवं सर्वबीजमय शुभम् स्वात्मस्थाय परं शुद्धमासनं कल्पया
म्यहम् ॥ ३९ ॥ अनन्या तव देवेश मूर्तिशक्तिरियं प्रभो ॥ सांनिध्यं कुरु तस्यां त्वं भक्तानुग्राहकारक ॥४०॥अज्ञानादुत्त मत्तत्त्वाद्वैकल्यात्साध
नस्य च ॥ यद्यपूर्णं भवेत्कल्पं तथाप्यभिमुखो भव ॥४१ ॥ दृशा पीयूषवर्षिण्या पूरयन्यज्ञविष्टरे ॥ मूर्तौ वा यज्ञसंपूर्त्यै स्थितो भव महे
श्वर ॥ ४२ ॥ अभक्तवाङ्मनश्चक्षुः श्रोत्रदूरायितद्युते॥स्वतेजःपंजरेणाशु वेष्टितो भव सर्वतः ॥४३॥ यस्य दर्शनमिच्छंति देवाः स्वाभीष्टसिद्धये ॥
तस्मै ते परमेशाय स्वागतं स्वागतं च मे॥४४॥कृतार्थोऽनुगृहीतोऽस्मि सफलं जीवितं मम ॥ आगतो देवदेवेशः सुस्वागतमिदं पुनः ॥४५॥यद्भक्ति
लेशसंपर्कात्परमानंदसंभवः ॥ तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्प्यते ॥ ४६ ॥ वेदानामपि वेदाय देवानां देवतात्मने ॥ आचामं कल्प
यामीश शुद्धानां शुद्धिहेतवे ॥४७॥ तापत्रयहरं दिव्यं परमानन्दलक्षणम्॥तापत्रयविनिर्मुक्त्यै तवार्घ्यं कल्पयाम्यहम् ॥ ४८ ॥सर्वकालुष्यहीनाय परि
पूर्णसुखात्मने ॥ मधुपर्कमिदं देव कल्पयामि प्रसीद मे ॥ ४९ ॥ उच्छिष्टोऽप्यशुचिर्वापि यस्य स्मरणमात्रतः ॥ शुद्धिमाप्नोति तस्मै ते पुनरा
चमनीयकम् ॥ ५० ॥ स्नेहं गृहाण स्नेहेन लोकनाथ महाशय॥सर्वलोकेषु शुद्धात्मन्ददामि स्नेहमुत्तमम् ॥५१॥परमानंदबोधाब्धिनिमग्ननिजमूर्तये॥
सांगोपांगमिदं स्नानं कल्पयाम्यहमीश ते॥सहस्रं वा शतं वापि यथाशक्त्यादरेण च॥५२॥गन्धपुष्पादिकैरीश मनुना चाभिषिंचयेत्॥५३॥मायाचि
त्रपटच्छन्ननिजगुह्योरुतेजसे ॥ निरावरणविज्ञान वासस्ते कल्पयाम्यहम्॥५४॥यमाश्रित्य महामाया जगत्संमोहिनी सदा ॥ तस्मै ते परमेशाय
कल्पयाम्युत्तरीयकम्॥५५॥ रक्तं शक्त्यर्कविघ्नेषु पीतं विष्णौ सितं शिवे॥तैलादिदूषितं जीर्णं सच्छिद्रं मलिनं त्यजेत्॥५६॥यस्य शक्तित्रयेणेदं संप्रीतम
खिलं जगत् ॥ यज्ञसूत्राय तस्मै ते यज्ञसूत्रं प्रकल्पये ॥ ५७ ॥ स्वभावसुन्दरांगाय नानाशक्त्याश्रयाय ते ॥ भूषणानि विचित्राणि कल्पया

म्यमरार्चित ॥५८॥ परमानन्दसौरभ्यपरिपूर्णदिगंतरम् ॥ गृहाण परम गंध कृपया परमेश्वर॥५९॥तुरीयवनसंभूतं नानागुणमनोहरम् ॥ अमंदसौरभं
पुष्पं गृह्यतामिदमुत्तमम्॥ जपाक्षतार्कधत्तूरान्विष्णौ नैवार्पयेत्कचित्॥६०॥केतकीं कुटजं कुंदं बंधूकं केसरं जपाम् ॥ मालतीपुष्पकं चैव नार्पयेत्तु
महेश्वरे ॥६१॥मातुलिंगं च तगरं रवौ नैवार्पयेत्कचित् ॥ शक्तौ दूर्वार्कमंदारान् गणेशे तुलसीं त्यजेत्॥६२ ॥ सरोजिनीदमनकौ तथा मरुबकः
कुशः ॥ विष्णुक्रांता नागवल्ली दूर्वापामार्गदाडिमौ ॥६३॥ धात्री मुनियुतानां च पत्रैर्देवार्चनं चरेत् ॥ कदली बदरी धात्री तिंतिणी बीजपूरकम्॥
॥ ६४ ॥ आम्रदाडिमजंबीरजंबूपनसभूरुहाः ॥ एतेषां तु फलैः कुर्याद्देवतापूजनं बुधः ॥ ६५॥ शुष्कैस्तु नार्चयेद्देवं पत्रैः पुष्पैः फलैरपि ६६॥धात्री
खदिरबिल्वानां तमालस्य दलानि च ॥ छिन्नभिन्नान्यपि मुने न दूष्याणि जगुर्बुधाः ॥ ६७ ॥ पद्ममामलकं तिष्ठेच्छुद्धं चैव दिनत्रयम् ॥
सर्वदा तुलसी शुद्धा बिल्वपत्राणि वै तथा॥६८॥पलाशकाशकुसुमैस्तमालतुलसीदलैः॥धात्रीदलैश्च दूर्वाभिनार्चयेज्जगदंबिकाम्।६९॥ नार्पयेत्कुसुमं
पत्रं फलं देवे ह्यधोमुखम् ॥ पुष्पपत्रादिकं विप्र यथोत्पन्नं तथार्पयेत् ॥ ७० ॥ वनस्पतिरसं दिव्यं गंधाढ्यं सुमनोहरम् ॥ आघ्रेयं देवदेवेश
धूपं भक्त्या गृहाण मे॥७१॥सुप्रकाशं महादीपं सर्वदा तिमिरापहम्॥घृतवर्तिसमायुक्तं गृहाण मम सत्कृतम्॥७२॥अन्नं चतुर्विधं स्वादु रसैः षड्भिः
समन्वितम्॥भक्त्या गृहाण मे देव नैवेद्यंतुष्टिदंसदा॥७३॥नागवल्लीदलं श्रेष्ठं पूगखदिरचूर्णयुक्॥कर्पूरादिसुगंधाढ्यं यद्दत्तं तद्गृहाण मे॥७४॥दद्यात्पुष्पा
ञ्जलिं पश्चात्कुर्यादावरणार्चनम्॥७५॥यदाशाभिमुखो भूत्वा पूजनं तु समाचरेत्॥सैव प्राची तु विज्ञेया ततोऽन्या विदिशो दश॥७६॥केशरेष्वग्निकोणादि
हृदयादीनि पूजयेत् ॥ नेत्रमग्रे दिक्षु चास्त्रं अंगमंत्रैर्यथाक्रमम् ॥ ७७॥ शुक्लश्वेतसितश्यामकृष्णरक्तार्चिषः क्रमात् ॥ वराभयकरा ध्येयाः स्वस्वदिक्ष्वं
गशक्तयः ॥ ७८ ॥ अमुकावरणांते तु देवता इति संवदेत् ॥ सालंकारास्ततः पश्चात्सांगाः सपरिचारिकाः ॥ ७९ ॥ सवाहनाः सायुधाश्च ततः सर्वो
पचारकैः ॥ संपूजितास्तर्पिताश्च वरदाः संत्विदं पठेत् ॥ ८० ॥ मूलांते च समुच्चार्य देवतायै निवेदयेत् ॥ अभीष्टसिद्धिं मे देहि शरणागतवत्सल
॥ ८१ ॥ भक्त्या समर्पये तुभ्यममुकावरणार्चनम् ॥ इत्युच्चार्य क्षिपेत्पुष्पाञ्जलिं देवस्य मस्तके ॥ ८२ ॥ ततस्त्वभ्यर्च्यनीयाः स्युः कल्पोक्ताश्चा
वृतीः क्रमात् ॥ सायुधांस्तत इंद्राद्यान्स्वस्वदिक्षु प्रपूजयेत् ॥ ८३ ॥ इंद्रो वह्निर्यमो रक्षो वरुणः पवनो विधुः ॥ ईशानोऽथ विधिश्चैवमधस्तात्पन्न
गाधिपः ॥ ८४ ॥ ऐरावतस्तथा मेषो महिषः प्रेतस्तिमिर्मृगः ॥ वाजी वृषो हंसकूर्मौ वाहनानि विदुर्बुधाः ॥ ८५ ॥ वज्रं शक्तिं दंडखड्गौ पाशां
कुशगदा अपि ॥ त्रिशूलं पद्मचक्रे च क्रमादिंद्रादिहेतयः ॥ ८६ ॥ समाप्यावरणार्चां तु देवतारार्तिकं चरेत् ॥ शंखतोयं परिक्षिप्यो

द्वाहुर्नृत्यन् पतेत्क्षितौ ॥ ८७ ॥ दंडवच्चाप्यथोत्थाय प्रार्थयित्वा निजेश्वरम् ॥ दक्षिणे स्थंडिलं कृत्वा तत्र संस्कारमाचरेत्॥८८॥ मूलेनेक्षणमस्त्रेण प्रोक्षणं ताडनं पुनः ॥ कुशैस्तद्वर्मणाभ्युक्ष्य पूज्य तत्र न्यसेद्वसुम् ॥ ८९ ॥ प्रदाप्य तत्र जुहुयाद्ध्यात्वा चैवेष्टदेवताम् ॥ महाव्याहृतिभिर्यस्तु समस्ताभिश्चतुष्टयम् ॥ ९० ॥ जुहुयात्सर्पिषा भक्तैस्तिलैर्वा पायसेन वा ॥ सघृतैः साधकश्रेष्ठः पञ्चविंशतिसंख्यया ॥ ९१ ॥ पुनर्व्याहृतिभिर्हुत्वा गंधाद्यैः पुनरर्चयेत् ॥ देवं संयोजयेन्मूर्तौ ततो वह्निं विसर्जयेत् ॥ ९२ ॥ भो भो वह्ने महाशक्ते सर्वकर्मप्रसाधक ॥ कर्मांतरेऽपि संप्राप्ते सान्निध्यं कुरु सादरम्॥९३॥विसृज्याग्निदेवतायै दद्यादाचमनीयकम्॥अवशिष्टेन हविषा गंधपुष्पाक्षतान्वितम्॥९४॥देवतापार्षदेभ्योऽपि पूर्वोक्तेभ्यो बलिं ददेत् ॥ ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः ॥ ९५ ॥योगिन्यो ह्युग्ररूपाश्च गणानामधिपाश्च ये ॥विघ्नभूतास्तथा चान्ये दिग्विदिक्षु समाश्रिताः॥९६॥ सर्वे ते प्रीतमनसः प्रतिगृह्णन्त्विमं बलिम्॥इत्यष्टदिक्षु दत्वा च पुनर्भूतबलिं चरेत्॥९७॥ पानीयममृतीकृत्य मुद्रया धेनुसंज्ञया॥ देवतायाः करे दद्यात्पुनश्चाचमनीयकम् ॥ ९८ ॥ देवमुद्वास्य मूर्तिस्थं पुनस्तत्रैव योजयेत् ॥नैवेद्यं च ततो दद्यात्तत्तदुच्छिष्टभोजिने ॥ ९९ ॥ महेश्वरस्य चंडेशो विष्वक्सेनस्तथा हरेः ॥ चंडांशुस्तरणेर्वक्रतुंडश्चापि गणेशितुः ॥ शक्तेरुच्छिष्टचांडाली प्रोक्ता उच्छिष्टभोजिनः ॥ १००॥ ततो ऋष्यादिकं स्मृत्वा कृत्वा मूलषडंगकम् ॥ जप्त्वा मंत्रं यथाशक्ति देवतायै निवेदयेत् ॥ १०१ ॥ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थिता॥१०२॥ ततः पराङ्मुखं चार्घं कृत्वा पुष्पैः प्रपूजयेत् दोर्भ्यां पद्भ्यां च जानुभ्यामुरसा शिरसा दृशा ॥ मनसा वचसा चेति प्रणामोऽष्टांग ईरितः ॥ १० ॥ बाहुभ्यां च सजानुभ्यां शिरसा वचसापि वा ॥ पंचांगकः प्रणामः स्यात्पूजायां प्रवरावुभौ ॥ १०४ ॥ नत्वा च दंडवन्मंत्री ततः कुर्यात्प्रदक्षिणाः ॥ विष्णुसोमार्कविघ्नानां वेदार्धैंद्वद्रिवह्नयः ॥ १०५ ॥ ततः स्तोत्रादिकं मंत्री प्रपठेद्भक्तिपूर्वकम् ॥ इतः पूर्णं प्राणबुद्धिदेहधर्माधिकारतः ॥ १०६ ॥ जाग्रत्स्वप्नसुषुप्त्यंतेऽवस्थासु मनसा वदेत् ॥ वाचा हस्ताभ्यां च पद्भ्यामुदरेण ततः परम् ॥ १०७ ॥ शिष्णांते यत्स्मृतं पश्चाद्यदुक्तं यत्कृतं ततः ॥ तत्सर्वं च ततो ब्रह्मार्पणं भवतु ठद्वयम् ॥ १०८ ॥ मां मदीयं च सकलं विष्णवे च समर्पये ॥ तारं तत्सदतो ब्रह्मार्पणमस्तु मनुर्मतः ॥ १०९ ॥ प्रणवाद्योऽष्टवस्वर्णो ह्यनेनात्मानमर्पयेत् ॥ अज्ञानाद्वा प्रमादाद्वा वैकल्यात्साधनस्य च ॥ ११० ॥ यन्न्यूनमतिरिक्तं वा तत्सर्वं क्षन्तुमर्हसि ॥ द्रव्यहीनं क्रियाहीनं मंत्रहीनं मयान्यथा ॥ १११ ॥ कृतं यत्तत्क्षमस्वेश कृपया त्वं दयानिधे ॥ यन्मया क्रियते कर्म जाग्रत्स्वप्नसुषुप्तिषु ॥ ११२ ॥ तत्सर्वं तावकी पूजा भूयाद्भूत्यै च मे प्रभो ॥ भूमौ

स्खलितपादानां भूमिरेवावलंबनम् ॥ ११३ ॥ त्वयि जातापराधानां त्वमेव शरणं प्रभो ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥ ११४ ॥
तस्मात्कारुण्यभावेन क्षमस्व परमेश्वर ॥ अपराधसहस्राणि क्रियंतेऽहर्न्निशं मया ॥ ११५ ॥ दासोऽयमिति मां मत्वा क्षमस्व जगतां पते ॥ आवाहनं
न जानामि न जानामि विसर्जनम् ॥ ११६ ॥ पूजां चैव न जानामि त्वं गतिः परमेश्वर ॥ संप्रार्थ्यैवं ततो मंत्री मूलांते श्लोकमुच्चरेत् ॥ ११७ ॥
गच्छ गच्छ परं स्थानं जगदीश जगन्मय ॥ यन्न ब्रह्मादयो देवा जानंति च सदाशिवः ॥ ११८ ॥ इति पुष्पांजलिं दत्वा ततः संहारमुद्रया ॥ निधाय
देवं सांगं च स्वीयहृत्सरसीरुहे ॥ ११९ ॥ सुषुम्णावर्त्मना पुष्पमाघ्रायोद्वासयेद् बुधः ॥ शंखचक्रशिलालिंगविघ्नसूर्यद्वयं तथा ॥ १२० ॥ शक्तित्रयं
न चैकत्र पूजयेद्दुःखकारणम् ॥ अकालमृत्युहरणं सर्वव्याधिविनाशनम् ॥ १२१ ॥ सर्वपापक्षयकरं विष्णुपादोदकं शुभम् ॥ १२२ ॥ तत्तद्भक्तैर्गृही
तव्यं तन्नैवेद्यनिवेदितम् ॥ अग्राह्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलम् ॥ १२३ ॥ शालग्रामशिलास्पर्शात्सर्वं याति पवित्रताम् ॥ पूजा पंचविधा
तत्र कथिता नारदाखिलैः ॥ १२४ ॥ आतुरी सौतिकी त्रासी साधना भाविनी तथा ॥ दौर्बोधी च क्रमादासां लक्षणानि शृणुष्व मे ॥ १२५ ॥
रोगादियुक्तो न स्नायान्न जपेन्न च पूजयेत् ॥ विलोक्य पूजां देवस्य मूर्तिं वा सूर्य्यमंडलम् ॥ १२६ ॥ प्रणम्याथ स्मरन्मंत्रमर्पयेत्कुसुमांजलिम् ॥
रोगे निवृत्ते स्नात्वाथ नत्वा संपूयेद्गुरुम् ॥ १२७ ॥ त्वत्प्रसादाज्जगन्नाथ जगत्पूज्य दयानिधे ॥ पूजाविच्छेददोषो मे मास्त्विति प्रार्थयेच्च तम् ॥
॥ १२८ ॥ द्विजानपि च संपूज्य यथाशक्त्या प्रतोष्य च ॥ तेभ्यश्चाशिषमादाय देवं प्राग्वत्ततोऽर्चयेत् ॥ १२९ ॥ आतुरी कथिता ह्येषा सौतिक्यथ
निगद्यते ॥ सूतकं द्विविधं प्रोक्तं जाताख्यं मृतसंज्ञकम् ॥ १३० ॥ तत्र स्नात्वा मानसीं तु कृत्वा संध्यां समाहितः ॥ मनसैव यजेद्देवं मनसैव जपे
न्मनुम् ॥ १३१ ॥ निवृत्ते सूतके प्राग्वत्संपूज्य च गुरुं द्विजान् ॥ तेभ्यश्चाशिषमादाय ततो नित्यकर्म चरेत् ॥ १३२ ॥ एषा तु सौतिकी प्रोक्ता
त्रासी चाथ निगद्यते ॥ दुष्टेभ्यस्त्रासमापन्नो यथालब्धोपचारकैः ॥ १३३ ॥ मानसैर्वा यजेद्देवं त्रासी सा परिकीर्तिता ॥ पूजासाधनवस्तूनाम
सामर्थ्ये तु सर्वतः ॥ १३४ ॥ पुष्पैः पत्रैः फलैर्वापि मनसा वा यजेद्विभुम् ॥ साधनाभाविनी ह्येषा दौर्बोधीं शृणु नारद ॥ १३५ ॥ स्त्रियो वृद्धा
स्तथा बाला मूर्खास्तैस्तु यथाक्रमम् ॥ यथाज्ञानकृता सा तु दौर्बोधीति प्रकीर्तिता ॥ १३६ ॥ एवं यथाकथंचित्तु पूजां कुर्याद्धि साधकः ॥
देवपूजाविहीनो यः स गच्छेन्नरकं ध्रुवम् ॥ १३७ ॥ वैश्वदेवादिकं कृत्वा भोजयेद्द्विजसत्तमान् ॥ देवे निवेदितं पश्चाद्भुंजीत स्वगणैः स्वयम् ॥ १३८ ॥
आचम्याननशुद्धिं च कृत्वा तिष्ठेत् कियत्क्षणम् ॥ पुराणमितिहासं च शृणुयात्स्वजनैः सह ॥ १३९ ॥ समर्थः सर्वकल्पेषु योऽनुकल्पं समाचरेत् ॥

न सांगशयिकं तस्य दुर्मतेर्जायते फलम् ॥१४०॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे देवपूजानिरूपणं नाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ श्रीसनत्कुमार उवाच ॥ अथ वक्ष्ये गणेशस्य मंत्रान्सर्वेष्टदायकान् ॥ यान्समाराध्य विप्रेंद्र साधको भुक्तिमुक्तिमान् ॥ ॥ १ ॥ अव्ययो विष्णुवनिता शंभुस्त्री मीनकेतनः ॥ स्मृतिर्मांसेंदुमन्वाढ्या सा पुनश्चंद्रशेखरा ॥ २ ॥ ङेंतो गणपतिस्तोयं भुजंगो वरदेति च ॥ सर्वांते जनमुच्चार्य ततो मे वशमानय ॥ ३ ॥ वह्निःप्रियांतो मंत्रोऽयमष्टाविंशतिवर्णवान् ॥ गणकोऽस्य मुनिश्छंदो गायत्री निचृदादिका ॥ ४ ॥ गणेशो देवता बीजं षष्ठशक्तिस्तदादिका ॥ श्रीमन्महागणपतिप्रीतये विनियोगकः ॥ ५ ॥ ऋषिं शिरसि वक्त्रे तु छन्दश्च हृदि देवताम् ॥ गुह्ये बीजं पदोः शक्तिं न्यसेत्साधकसत्तमः॥६॥ षड्दीर्घाढ्येन बीजेन यं च बीजादिना पुनः॥ षडंगानि न्यसेदस्य जातियुक्तानि मंत्रवित् ॥७॥ शैवी षडंगमुद्रात्र न्यस्तव्या हि षडंगके॥ गामाद्यं चैव भूर्लोकं नाभ्यंतं पादयोर्न्यसेत् ॥८॥गीमाद्यं च भुवर्लोकं कंठांतं नाभितो न्यसेत् ॥ स्वर्लोकं चैव गूमाद्यं कंठादिमस्तकावधि ॥ ९ ॥ व्यापकं मूलमन्त्रेण न्यासोऽयं भुवनाभिधः ॥ मूलमंत्रं समुच्चार्य मातृकावर्णमीरयेत् ॥ १० ॥ तदंतेऽपि च मूलं स्यान्नमोंऽतं मातृकास्थले ॥ क्षांतं विन्यस्य मूलेन व्यापकं रचयेत्सुधीः ॥ ११॥ वर्णन्यासोऽयमाख्यातः पदन्यासस्तथोच्यते ॥ पञ्चत्रिबाणवह्नींदुचंद्राक्षिनिगमैः क्रमात् ॥ १२ ॥ विभक्तैर्मूलगायत्र्या हृदंतैरष्टभिः पदैः ॥ भालदेशे मुखे कण्ठे हृदि नाभ्पूरुजानुषु ॥ १३ ॥ पादयोश्चैव विन्यस्य मूलेन व्यापकं चरेत् ॥ वदेत्तत्पुरुषायांते विद्महेति पदं ततः ॥ १४ ॥ वक्रतुंडाय शब्दांते धीमहीति समीरयेत् ॥ तन्नो दंतिः प्रचोवर्णा दयादिति वदेत्पुनः ॥ १५ ॥एषोक्ता मूलगायत्री सर्वसिद्धिप्रदायिनी ॥ एवं न्यासविधिं कृत्वा ध्याये देवं हृदंबुजे ॥ १६ ॥ उद्यन्मार्तण्डसदृशं लोकस्थित्यंतकारणम् ॥ सशक्तिकं भूषितांगं दंतचक्राद्युदायुधम् ॥ १७ ॥एवं ध्यात्वा चतुश्चत्वारिंशत्साहस्रसंयुतम् ॥ चतुर्लक्षं जपेन्मंत्रं अष्टद्रव्यैर्दशांशतः ॥ १८ ॥ जुहुयाद्विधिवन्मंत्री संस्कृते हव्यवाहने ॥ इक्षवः सक्तवो मोचाफलानि चिपिटास्तिलाः ॥ १९ ॥ मोदका नारिकेलानि लाजा द्रव्याष्टकं स्मृतम् ॥ पीठमाधारशक्त्यादिपरतत्वांतमर्चयेत् ॥ २० ॥ षट्कोणांतस्त्रिकोणं च बहिरष्टदलं लिखेत् ॥ भूपुरं तद्बहिः कृत्वा गणेशं तत्र पूजयेत् ॥ २१ ॥ तीव्राख्या ज्वालिनी नंदा भोगदा कामरूपिणी ॥ उग्रा तेजोवती सत्या नवमी विघ्ननाशिनी ॥ २२ ॥ सर्वादिशक्तिकमलासनाय हृदयांतिकः ॥ पीठमंत्रोऽयमेतेन दद्यादासनमुत्तमम् ॥ २३ ॥ तत्रावाह्य गणाधीशं मध्ये सम्पूज्य यत्नतः ॥ त्रिकोणबाह्ये पूर्वादिचतुर्दिक्ष्वर्चयेत्क्रमात् ॥ २४ ॥ श्रियं श्रियः पतिं चैव गौरीं गौरी

पतिं तथा ॥ रतिं रतिपतिं पश्चान्महीपूर्वं च पोत्रिणम्॥ २५ ॥ क्रमाद्बिल्ववटाश्वत्थप्रियगूनामघोऽर्चयेत् ॥ रमा पद्मद्वयकरा शंखचक्रधरो हरिः ॥
॥२६ ॥ गौरी पाशांकुशधरा टंकशूलधरो हरः ॥ रतिः पद्मकरा पुष्पबाणचापधरः स्मरः ॥ २७ ॥ शूकव्रीह्यग्रहस्ता भूः पोत्री चक्रगदाधरः ॥
देवाग्रे पूजयेल्लक्ष्मीसहितं तु विनायकम् ॥२८॥पूजयेत्षट्सु कोणेषु ह्यामोदाद्यान्प्रियायुतान् ॥आमोदं सिद्धिसंयुक्तमग्रतः परिपूजयेत्॥२९॥प्रमोदं
चाग्निकोणे तु समृद्धिसहितं यजेत् ॥ ईशकोणे यजेत्कीर्तिसंयुतं सुमुखं तथा॥३०॥वारुणे मदनावत्या संयुतं दुर्मुखं यजेत् ॥ यजेन्नैर्ऋत्यकोणे तु
विघ्नं मदद्रवायुतम् ॥३१॥ द्राविण्या विघ्नकर्तारं वायुकोणे समर्चयेत् ॥ पाशांकुशाभयकरांस्तरुणार्कसमप्रभान् ॥ ३२॥ कपोलविगलद्दानगंधलुब्धा
लिशोभितान्॥षट्कोणोभयपार्श्वे तु शंखपद्मनिभौ क्रमात्॥३३॥ सहितौ निजशक्तिभ्यां ध्यात्वा पूर्ववदर्चयेत्॥केशरेषु षडंगानि पत्रेष्वष्टौ तु मातरः॥
॥३४॥इन्द्राद्यानपि वज्रादीन्पूजयेद्धरणीगृहे॥ एवमाराध्य विघ्नेशं साधयेत्स्वमनोरथान्॥३५ ॥चतुश्चत्वारिंशताढ्यं चतुःशतमतंद्रितः॥तर्पयेदंबुभिः
शुद्धैर्गजास्यं दिनशः सुधीः॥३६॥पद्मैस्तु वशयेद्भूपांस्तत्पत्नीश्चोत्पलैस्तथा॥कुमुदैर्मंत्रिणोऽश्वत्थसमिद्भिर्वाडवाञ्छुभैः॥३७॥उदुंम्बरोत्थैर्नृपतीन्वैश्या
न्प्लक्षसमुद्भवैः ॥ वटोद्भवैः समिद्भिश्च वशयेदंतिमान्बुधः ॥ ३८ ॥ आज्येन श्रियमाप्नोति स्वर्णाप्तिर्मधुना भवेत्॥ गोदुग्धेन गवां लाभो दध्ना सर्व
समृद्धिमान् ॥ ३९ ॥ अन्नाप्तिरन्नहोमेन समिद्भिर्वेतसां जलम् ॥ वासांसि लभते हुत्वा कुसुंभकुसुमैः शुभैः ॥४० ॥ अथ सर्वेष्टदं वक्ष्ये चतुरावृत्तित
र्पणम् ॥ मूलेनादौ चतुर्वारं प्रत्येकं च प्रतर्पयेत् ॥ ४१ ॥ पूर्वमंत्राक्षरैर्मंत्रैः स्वाहांतैश्च चतुश्चतुः॥मूलमंत्रैश्चतुर्वारपूर्वकं संप्रतर्प्य च ॥ ४२ ॥ मिथु
नादींस्ततः पश्चात्पूर्ववत्संप्रतर्पयेत्॥ देवेन सहितां शक्तिं शक्त्या च सहितं तु तम् ॥ ४३॥ एवंच षड्विंशतिधा मिथुनानि भवंति हि ॥ स्वनामा
द्यर्णबीजानि तानि सन्तर्पयेत्क्रमात्॥ ४४ ॥ भवेत्संभूय सचतुश्चत्वारिंशच्चतुःशतम् ॥ एवं संतर्प्य तत्पश्चात्पूर्ववत्सोपचारकैः ॥ ४५ ॥ सर्वाभीष्टं
च संप्रार्थ्य प्रणम्योद्वासयेत्सुधीः ॥ भाद्रकृष्णचतुर्थ्यादिप्रतिमासमतंद्रितः ॥ ४६॥ आरभ्यार्कोदयं मंत्री यावच्चंद्रोदयो भवेत्॥ तावन्नोपविशेद्भूमौ
जितवाक्स्थिरमानसः ॥ ४७ ॥ ततश्चंद्रोदये मन्त्री पूजयेद्गणनायकम् ॥ पूर्वोक्तविधिना सम्यङ्नानापुष्पोपहारकैः ॥ ४८ ॥ एकविंशतिसंख्या
कान्मोदकांश्च निवेदयेत् ॥ तदग्रे प्रजपेन्मन्त्रमष्टोत्तरसहस्रकम् ॥ ४९ ॥ ततः कर्पूरकाश्मीररक्तपुष्पैः सचन्दनैः ॥ अर्घ्यं दद्यात्तु मूलांते ङेंते
गणपतिं ततः ॥ ५० ॥ इदमर्घ्यं कल्पयामि हृदंतोऽर्घ्यमनुर्मतः ॥ स्तुत्वा नत्वा विसृज्याथ यजेच्चंद्रमसं पुनः ॥ ५१॥ अर्घ्यं दद्याच्चतुर्वारं पूज
यित्वा गुरुं ततः ॥ निवेदितेषु विप्राय दद्यादर्घांश्च मोदकान्॥ ५२॥ स्वयमर्द्धान्प्रभुंजीत ब्रह्मचारी जितेंद्रियः ॥ एवं व्रतं यः कुरुते सम्यक्सं

वत्सरावधि ॥ ५३ ॥ पुत्रान्पौत्रान्सुखं वित्तमारोग्यं लभते नरः ॥ सूर्योदयादशक्तश्चेदस्तमारभ्य मंत्रवित्॥ ५४ ॥ चंद्रोदयांतं पूर्वोक्तविधिना ब्रत
माचरेत् ॥एवं कृतेऽपि पूर्वोक्तं फलमाप्नोति निश्चितम्॥५५॥गणेशप्रतिमां दंतिदंतेन कपिनापि वा॥गजभग्नेन निंबेन सितार्केणाथवा पुनः॥५६॥
कृत्वा तस्यां समावाह्य प्राणस्थापनपूर्वकम्॥अभ्यर्च्य विधिवन्मन्त्री राहुग्रस्ते निशाकरे॥५७॥ स्पृष्ट्वा चैव निराहारस्तां शिखायां समुद्वहन् ॥ द्यूते
विवादे समरे व्यवहारे जयं लभत्॥५८॥ बीजं वराहो बिंद्वाढ्यौ मन्विद्वान्नौ कलौ ततः॥स्मृतिर्मांसेंदुमन्वाग्रा कर्णोच्छिष्टगणे वदेत् ॥५९॥ बकः
सदीर्घपवनो महायक्षाय यं बलिः ॥बलिमंत्रोऽयमाख्यातो न चेद्वर्णोऽखिलेष्टदः॥६०॥प्रणवो भुवनेशानीस्वबीजांते नवार्णकः॥हस्तीति च पिशा
चीति लिखेच्चवाग्निसुदरी ॥ ६१ ॥ नवार्णोऽयं समुद्दिष्टो भजतां सर्वसिद्धिदः ॥ पदैः सर्वेण मंत्रेण पञ्चांगानि प्रकल्पयेत् ॥ ६२॥ अन्यत्सर्वं
समानं स्यात्पूर्वमंत्रेण नारद ॥ अथाभिधास्ये विधिवद्वक्रतुंडमनुत्तमम् ॥ ६३ ॥ तोयं विधिर्वह्नियुक्तकर्णेंद्वाढ्यो हरिस्तथा॥ सदीर्घो दारको
वायुर्वर्मांतोऽयं रसार्णकः॥६४॥भार्गवोऽस्य मुनिश्छन्दोऽनुष्टुब्देवो गणाधिपः॥वक्रतुण्डाभिधो बीजं वं शक्तिः कवचं पुनः ॥६५॥ तारहृन्मध्यगै
मंत्रवर्णैश्चंद्रविभूषितैः॥कृत्वा षडंगमन्त्रार्णान्भ्रूमध्ये च गले हृदि॥६६॥नाभौ लिंगे पदे न्यस्याखिलेन व्यापकं चरेत्॥उद्यदर्कद्युतिं हस्तैः पाशांकुश
वराभयान् ॥ ६७ ॥ दधतं गजवक्त्रं च रक्तभूषांबरं भजेत् ॥ ध्यात्वैवं प्रजपेत्तर्कलक्षं द्रव्यैर्दशांशतः॥ ६८ ॥ अष्टभिर्जुहुयात्पीठे तीव्रादिसहितेऽ
र्चयेत् ॥ मूर्तिं मूर्तेन संकल्प्य तस्यामावाह्य पूजयेत् ॥ ६९ ॥ षट्कोणेषु षडंगानि पत्रेष्वष्टौ तु शक्तयः ॥ यजेद्विद्यां विधात्रीं च भोगदां विघ्न
घातिनीम् ॥ ७० ॥ निधिप्रदीपां पापघ्नीं पुण्यां पश्चाच्छशिप्रभाम् ॥ दलाग्रेषु वक्रतुंड एकदंष्ट्रमहोदरौ ॥७१॥ गजास्यलंबोदरकौ विकटौ विघ्न
राट् तथा ॥ धम्रवणस्ततो बाह्ये लोकेशान्हेतिसंयुतान् ॥ ७२ ॥ एवमावरणैरिष्ट्वा पञ्चभिर्गणनायकम् ॥ साधयेदखिलान्कामान्वक्रतुंडप्रसादतः ॥
॥ ७३॥ लब्ध्वा गुरुमुखान्मंत्रं दीक्षासंस्कारपूर्वकम् ॥ ब्रह्मचारी हविष्याशी सत्यवाक् च जितेंद्रियः ॥ ७४ ॥ जपेदर्कसहस्रं तु षण्मासं
होमसंयुतम्॥दारिद्र्यं तु पराभूय जायते धनदोपमः॥७५॥चतुर्थ्यादि चतुर्थ्यंतं जपेदयुतमादरात्॥अष्टोत्तरशतं नित्यं हुत्वा प्राग्वत्फलं लभेत् ॥७६॥
पक्षयोरुभयोर्मंत्री चतुर्थ्यां जुहुयाच्छतम् ॥ अपूपैर्वत्सरे स स्यात्समृद्धेः परमं पदम् ॥७७॥ अङ्गारकचतुर्थ्यां तु देवमिष्ट्वा विधानतः ॥ हविषा
पात्यसान्नेन नैवेद्यं परिकल्पयेत् ॥ ७८ ॥ ततो गुरुं समभ्यर्च्य भोजयेद्विधिवत्सुधीः॥निवेदितेन जुहुयात्सहस्रं विधिवद्वसौ॥ ७९ ॥एवं संवत्सरं
कृत्वा महतीं श्रियमाप्नुयात् ॥ अथान्यत्साधनं वक्ष्ये लोकानां हितकाम्यया ॥ ८० ॥ इष्ट्वा गणेशं पृथुकैः पायसापूपमोदकः ॥ नानाफलैस्ततो
मंत्री हरिद्रामथ सैन्धवम् ॥ ८१ ॥ वचां निष्कार्द्धभागं च तदर्द्धं वा मनुं जपेत् ॥ विशोध्य चूर्णं प्रसृतौ गवां मूत्रे विनिक्षिपेत्॥८२॥ सहस्रकृत्वो

मनुना मंत्रयित्वा प्रयत्नतः ॥ स्नातामृतुदिने शुद्धां शुक्लांबरधरां शुभाम् ॥ ८३ ॥ देवस्य पुरतः स्थाप्य पाययेदौषधं सुधीः ॥ सर्वलक्षणसंपन्नं
वंध्यापि लभते सुतम् ॥ ८४ ॥ अथान्यत्संप्रवक्ष्यामि रहस्यं परमाद्भुतम् ॥ गोचर्ममात्रां धरणीमुपलिप्य प्रयत्नतः ॥ ८५ ॥ विकीर्य धान्यप्रक
रस्तत्र संस्थापयेद्घटम् ॥ शुद्धोदकेन संपूर्य तस्योपरि निधापयेत् ॥ ८६ ॥ कपिलाज्येन संपूर्णं शराव नूतनं शुभम् ॥ षडष्टाक्षरमंत्राभ्यां दीप
मारोपयेच्छुभम् ॥ ८७ ॥ दीपे देवं समावाह्य गंधपुष्पादिभिर्यजेत् ॥ स्नातां कुमारीमथवा कुमार पूजयेत्सुधीः ॥ ८८ ॥ दीपस्य पुरतः स्थाप्य
ध्यात्वा देवं जपेन्मनुम् ॥ प्रदीपे स्थापिते पश्येद्द्विजरूपं गणेश्वरम् ॥ ८९ ॥ पृष्टस्ततः संपदि वा नष्टं चैवाप्यनागतम् ॥ सकलं प्रवदेद्देवं कुमारी
वा कुमारकः ॥ ९० ॥ षडक्षरो ह्रदंतश्चेद्भवेदष्टाक्षरो मनुः ॥ अन्येऽपि मंत्रा देवर्षे सन्ति तंत्रे .गणेशितुः ॥ ९१ ॥ किंत्वत्र यन्न साध्यं स्यात्रिषु
लोकेषु साधकैः॥अष्टविंशरसार्णाभ्यां तन्न पश्येदपि क्वचित् ॥९२॥ एतद्गणेशमंत्राणां विधानं ते मयोदितम्॥ शठेभ्यः परशिष्येभ्यो वंचकेभ्योऽपि
मा वद॥९३॥एवं यो भजते देवं गणेशंसर्वसिद्धिदम्॥प्राप्येह सकलान्भोगानंते मुक्तिपदं व्रजेत्॥९४॥इतिश्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने
तृतीयपादे गणेशमन्त्रविधाननिरूपणं नामाष्टषष्टितमोऽध्यायः॥६८॥सनत्कुमार उवाच॥अथ वक्ष्ये त्रयीमूर्तेर्विधानं त्वब्जिनीपतेः॥मन्त्राणां यत्समा
राध्य सर्वेष्टं प्राप्नुयाद्भुवि ॥ १ ॥तारो रेचिकया युक्तो मेधानेत्रयुता रतिः॥ ससर्गो वामकर्णाढ्यो भृगुर्वढचासनो मरुत्॥ २ ॥शेषोदित्य ई॰. प्रोक्तो
वसुवर्णो भुक्तिमुक्तिदः॥ देवभागो मुनिश्छन्दो गायत्री देवता रविः॥ ३ ॥ माया वीजं रमा शक्तिर्दृष्टादृष्टे नियोगकः ॥ सत्याय हृदयं पश्चाद्ब्रह्मणे
शिर ईरितम् ॥ ४ ॥ विष्णव तु शिखावर्म रुद्राय परिकीर्तितम् ॥ नेत्रं स्यादग्नये पश्चात्शर्वायास्त्रमुदाहृतम् ॥ ५ ॥ नेत्रो ज्वाला मनो हुं फट्
स्वाहांता मनवो गणाः ॥ पुनः षडर्णैर्ह्रीं लक्ष्म्याः कृत्वांतःस्थैः षडंगकम् ॥ ६॥ शिष्टारौजठरे पृष्ठे तयोर्ङेंताख्यया न्यसेत् ॥ आदित्यं च रविं पश्चा
द्भानुं भास्करमेव च ॥ ७ ॥ सूर्यं च मूर्ध्नि वदने हृदि गुह्ये च पादयोः ॥ सद्यादिपञ्च ह्रस्वाद्यान् न्यसेन्ङे हृदयोंऽतिमान् ॥ ८ ॥ह्रीं रमामध्य
गामष्टौ वर्णास्तारादिकान्न्यसेत् ॥ मूर्द्धास्यकंठहृत्कुक्षिनाभिलिंगगुदेषु च ॥ ९ ॥ सचंद्रस्वरपूर्वं तु ङेंतं शीतांशुमण्डलम् ॥ मूर्द्धादिकंठपर्यंतं
न्यसेच्चांद्रिमनुस्मरन् ॥ १० ॥ स्पर्शान्सेंदून्समुच्चार्य ङेंतं भास्करमण्डलम् ॥ न्यसेत्कंठादिनाभ्यंतं ध्यायन्प्रद्योतनं हृदि ॥ ११ ॥ यादीन्सचंद्रा
नुच्चार्य ङेंतं च वह्निमंडलम् ॥ नाभ्यादिपादपर्यंतं न्यसेद्वह्निमनुस्मरन्॥१२॥ प्रोक्तोऽयं मण्डलन्यासो महातेजोविधायकः ॥ आदिठांतार्णपूर्वं ङें
नमोंतं सोममण्डलम् ॥ १३ ॥ मूर्द्धादिहृदयांतं तु विन्यसेत्साधकोत्तमः ॥ डकारादिक्षकारांतवर्णाद्यं वह्निमण्डलम् ॥ १४ ॥ ङेंतं हृदादिपा

दान्तं विन्यसेत्सुसमाहितः ॥ अग्नीषोमात्मको न्यासः कथितः सर्वसिद्धिदः ॥ १५ ॥ न्यसेत्सेंदून्मातृकार्णाञ्जयांतपुरुषात्मने ॥ नमोंते
व्यापकं मंत्री हंसन्यासोऽयमीरितः ॥ १६ ॥ अष्टावष्टौ स्वराञ्शेषान्पंचपञ्च मितान्पुनः ॥ उक्तादित्यमुखानेतान्विन्यसेच्च नवग्रहान् ॥ १७ ॥
आधारलिंगयोर्नाभौ हृदि कंठे मुखांतरे ॥ भ्रूमध्ये च तथा भाले ब्रह्मरंध्रे न्यसेत्क्रमात् ॥ १८ ॥ हंसाख्यमग्नीषोमाख्यं मंडलत्रयमेव च ॥ पुनर्न्या
सत्रयं कुर्यान्मूलेन व्यापकं चरेत् ॥ १९ ॥ एवं न्यासविधिं कृत्वा ध्यायेत्सूर्यं हृदंबुजे ॥ दानाभयाब्जयुगलं धारयंतं करै रविम् ॥ २० ॥ कुंडलां
गदकेयूरहारिणं च त्रयीतनुम् ॥ ध्यात्वैवं प्रजपेन्मंत्री वसुलक्षं दशांशतः ॥ २१ ॥ रक्तांभोजैस्तिलैर्वापि जुहुयाद्विधिवद्वसौ ॥ प्रथमं पीठयजने
धर्मादीनां स्थले यजेत् ॥ २२ ॥ प्रभूतं विमलं शारं समाराध्यमनंतरम् ॥ परमादिमुखं मध्ये स्वबिंबांतं प्रपूजयेत् ॥ २३ ॥ सोमाग्निमंडलं पूज्य
रविमंडलमर्चयेत् ॥ दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा ॥ २४ ॥ अमोघा विद्युता सर्वतोमुखी पीठशक्तयः ॥ ह्रस्वत्रयोक्तिजाः क्लीबही
ना वह्नींदुसंयुताः ॥२५॥ स्वरा बीजानि शक्तीनां तदाद्याः पूजयेत्तुः ताः ॥ ब्रह्मविष्णुशिवात्मा ते सृष्टिः शेषान्विताप्यसौ ॥२६॥ एवं चान्ते योग
पीठात्मने हृदयमीरयेत् ॥ ताराद्योऽयं पीठमंत्रस्त्वनेनासनमादिशेत् ॥२७ ॥ ध्रुवो वियद्विंदुयुतं खं खखोल्काय हृन्मनुः॥नवार्णाय च मनवे मूर्तिं
संकल्पयेत्सुधीः ॥ २८ ॥ साक्षिणं जगतां तस्यामावाह्य विधिवद्यजेत् ॥ ततः षडंगामाराध्य द्विक्ष्वष्टांगं प्रपूजयेत् ॥ २९ ॥ संपूज्य मध्ये वादित्यं
रविं भानुं च भास्करम् ॥ सूर्यं दिशासु सद्यादिपंच ह्रस्वादिकानिमान् ॥ ३० ॥ स्वस्वनामादिवर्णाद्याः शक्तयोऽर्च्या विदिक्षु च ॥ उषां प्रज्ञां
प्रभां संध्यां ततो ब्रह्मादिकान्यजेत् ॥ ३१ ॥ पुरतोऽरुणमभ्यर्च्य सोमं ज्ञं च गुरुं भृगुम् ॥ दिक्ष्वर्यमादिकानिष्ट्वा भूमिजं च शनैश्चरम् ॥ ३२ ॥
राहुं केतुं च कोणेषु पूर्ववत्परिपूजयेत् ॥ इंद्राद्यानपि वज्राद्यान्पूजयेत्पूर्ववत्सुधीः ॥ ३३ ॥ इत्थं संपूज्य विधिवद्भास्करं भक्तवत्सलम् ॥
समाहितो दिनेशाय दद्यादर्घ्यं दिने दिने॥३४॥ प्राणानायम्य सद्भूमौ न्यासान्कृत्वा पुरोदितान्॥विधाय मंडलं भानोः पीठं पूर्ववदर्चयेत् ॥ ३५॥
ध्यात्वार्कं प्रयजेद्दिव्यैर्मानसैरुपचारकैः ॥ पात्रं ताम्रमयं प्रस्थतोयग्राहि सुशोभनम् ॥ ३६ ॥ निधाय मंडले रक्तचंदनादिविनिर्मिते ॥ विलो
ममातृकामूलमुच्चरन्पूरयेज्जलैः ॥ ३७ ॥ सूर्यबिंबविनिर्गच्छत्सुधांबुधिविभावितैः ॥ कुंकुमं रोचनां राजीं चंदनं रक्तचंदनम् ॥ ३८ ॥ करवीरं जपा
शालिकुशश्यामाकतंडुलान् ॥ तिलवेणुयवांश्चैव निक्षिपेत्सलिले शुभे ॥ ३९ ॥ सांगं सावरणं तत्रावाह्यार्कं पूर्ववद्यजेत् ॥ गंधपुष्पधूपदीपनैवेद्याद्यै
र्विधानतः ॥ ४० ॥ प्राणायामत्रयं कृत्वा कुर्यादंगानि पूर्ववत् ॥ सुधाबीजं चंदनेन दक्षे करतले लिखेत् ॥ ४१ ॥ तेनाच्छाद्यार्घ्यपात्रं च जपेन्म

नुमनन्यधीः ॥ अष्टोत्तरशतावृत्त्या पुनः संपूज्य भास्करम् ॥ ४२ ॥ हस्ताभ्यां पात्रमादाय जानुभ्यामवनौं गतः ॥ आमूर्ध्नि पात्रमुद्धृत्यांबरेण
वरणे रवेः ॥ ४३ ॥ दृष्टिं चाधाय मनसा पूजयित्वा रविं पुनः ॥ साधकेन स्वकैक्येन मूलमंत्रं धिया जपन् ॥ ४४ ॥ अर्घ्यं दद्याद्रविं ध्याय
न्रक्तचंदनमंडले ॥ दत्त्वा पुष्पांजलिं भूयो जपेदष्टोत्तरं शतम् ॥४५॥ नित्यं वा तद्दिनेऽप्येवमर्घ्यं दद्याद्विवस्वते ॥ तेन तुष्टो दिनेशोऽस्मै दद्याद्वित्तं
यशः सुखम् ॥ ४६ ॥ पुत्रान्पौत्रानभीष्टं च यद्यत्सर्वं प्रयच्छति ॥ अर्घ्यदानमिदं प्रोक्तमायुरारोग्यवर्द्धनम् ॥ ४७ ॥ धनधान्यपशुक्षेमक्षेत्रमित्रकल
त्रदम् ॥ तेजोवीर्ययशःकीर्तिविद्याविभवभोगदम् ॥४८॥ गायत्र्याराधनासक्तः संध्यावंदनतत्परः ॥ एवं मनुं जपन्विप्रो दुःखं नैवाप्नुयात्क्वचित् ॥
॥४९॥ विकर्तनाय निर्माल्यमेवं संपूज्य दापयेत् ॥ वियद्वह्निमरुत्साद्यांतार्वीसेंदुसमन्वितम् ॥५०॥ मार्तंडभैरवाख्यं हि बीजं त्रैलोक्यमोहनम् ॥ बिंबबी
जेन पुटितं सर्वकामफलप्रदम् ॥५१॥ पूर्ववत्सकलं चान्यदत्र ज्ञेयं मनीषिभिः ॥ भृगुर्जलेंदुमन्वाढ्यः सोमाय हृदयांतिमः ॥५२॥ षडक्षरो मंत्रराजो मुनि
रस्य भृगुर्मतः ॥ छंदः पंक्तिस्तु सोमोऽस्य देवता परिकीर्तिता ॥ ५३ ॥ आद्यं बीजं नमः शक्तिर्विनियोगोऽखिलाप्तये ॥ षड्दीर्घेण स्वबी
जेन षडंगानि समाचरेत् ॥ ५४ ॥ पूर्णेंद्वास्यं स्फटिकभं नीलालकलसन्मुखम् ॥ बिभ्राणमिष्टं कुमुदं ध्यायेन्मुक्तास्रजं विधुम् ॥ ५५ ॥ ऋतुलक्षं
जपेन्मंत्रं पायसेन ससर्पिषा ॥ जुहुयात्तद्दशांशेन पीठे सोमांतपूजिते ॥ ५६ ॥ मूर्तिमूलेन संकल्प्य पूजयेद्विधिवद्विधुम् ॥ केसरेष्वंगपूजा स्यात्पत्रे
ष्वेताश्च शक्तयः ॥ ५७ ॥ रोहिणी कृत्तिका चैव रेवती भरणी पुरः ॥ रात्रिरार्द्रा ततो ज्योत्स्ना कला हारसमप्रभा ॥ ५८ ॥ सुशुक्लमाल्यवसना
मुक्ताहारविभूषिताः ॥ सर्वास्स्तनभराक्रांता रचितांजलयः शुभाः ॥ ५९ ॥ स्वप्रियासक्तमनसो मदविभ्रममंथराः ॥ समभ्यर्च्याः सरोजाक्ष्यः पूर्णेंदुस
दृशाननाः ॥ ६० ॥ दलाग्रेषु समभ्यर्च्यास्त्वष्टौ सूर्यादिका ग्रहाः ॥ आदित्यभूसुतबुधमंददेवेज्यराहवः ॥ ६१ ॥ शुक्रकेतुयुता ह्येते पूज्याः पत्राग्रगा
ग्रहाः ॥ रक्तारुणश्वेतनीलपीतधूम्रसिताऽसिताः ॥६२॥ वामोरुन्यस्ततद्धस्ता दक्षिणेन धृताभयाः ॥ लोकपालांस्तदस्त्राणि तद्बाह्ये पूजयेत्सुधीः ॥
॥ ६३ ॥ एवं संसाधितो मंत्रः प्रयच्छेदिष्टमात्मनः ॥ पौर्णमास्यां जिताहारो दद्यादर्घ्यं विधूदये ॥ ६४ ॥ मंडलत्रितयं कुर्यात्प्राक्प्रत्यगायतं
भुवि ॥ पश्चिमे मंडले स्थित्वा पूजाद्रव्यं च मध्यमे ॥ ६५ ॥ संस्थाप्य सोममन्यस्मिन्मंडलेऽब्जसमन्विते ॥ समभ्यर्च्य विधानेन पीठपूज
नपूर्वकम् ॥ ६६ ॥ स्थापयेद्राजतं पात्रं पुरतस्तत्र मंत्रवित् ॥ सुरभीपयसापूर्य्य तं स्पृशन्प्रजपेन्मनुम् ॥ ६७ ॥ अष्टोत्तरशतं पश्चाद्विद्या
मंत्रेण मंत्रवित् ॥ दद्यान्निशाकरायार्घ्यं सर्वाभीष्टार्थसिद्धये ॥ ६८ ॥ कुर्यादनेन विधिना प्रतिमासमतंद्रितः ॥ वर्षांतरेण सर्वष्टं प्राप्नोति भुवि

मानवः ॥ ६९ ॥ विद्ये विद्यामालिनि स्यादंते चंद्रिणि संवदेत् ॥ चंद्रमुखि द्विठांतोऽयं विद्यामंत्र उदाहृतः ॥ ७० ॥ एवं कुमुदिनीनाथमंत्रं यो जपति
ध्रुवम् ॥ धनं धान्यं सुतान्पौत्रान्सौभाग्यं लभतेऽचिरात्॥ ७१ ॥अथांगारकमंत्रं तु वक्ष्ये धनसुतप्रदम् ॥ तारो दीर्घेंदुयुग्व्योम तदेवेंदुयुतः पुनः ॥
॥ ७२ ॥ षांतः सर्गी च चंडीशौ क्रमादिंदुविसर्गिणौ ॥ षडर्णोऽयं महामंत्रो मंगलस्याखिलेष्टदः ॥ ७३ ॥ विरूपाक्षो मुनिश्छंदो गायत्रं देवता कुजः ॥
मंत्रार्णैः षड्भिरंगानि कुर्वन्ध्यायेद्धरात्मजम् ॥ ७४ ॥ मेषस्थं रक्तवस्त्रांगं शूलशक्तिगदावरान् ॥ करैर्बिभ्राणमीशानस्वेदजं भूसुतं स्मरेत् ॥ ७५ ॥
रसलक्षं जपेन्मंत्रं दशांशं खदिरोद्भवैः ॥ समिद्भिर्जुहुयादग्नौ शैवे पीठे यजेत्कुजम् ॥ ७६ ॥ प्रागंगानि समाराध्य ह्येकविंशतिकोष्ठकम् ॥ मंगलो
भूमिपुत्रश्च ऋणहर्ता धनप्रदः ॥ ७७ ॥ स्थिरासनो महाकायः सर्वकर्मावरोधकः ॥ लोहितो लोहिताक्षश्च सामगानां कृपाकरः ॥ ७८ ॥
धरात्मजः कुजो भौमो भूमिदो भूमिनंदनः ॥ अंगारको महीसूनुः सर्वरोगापहारकः ॥ ७९ ॥ वृष्टिकर्ता वृष्टिहर्ता सर्वकार्यार्थसिद्धिदः ॥ इत्येक
विंशतिः प्रोक्ता मूर्तयो भूसुतस्य वै ॥ ८० ॥ मंगलादीन्यजेन्मंत्री स्वस्वस्थानस्थितान्क्रमात् ॥ इंद्राद्यानपि वज्रादीनेवं सिद्धो भवेन्मनुः ॥ ८१ ॥
सुतकामा कुरंगाक्षी भौमव्रतमुपाचरेत् ॥ मार्गशीर्षेऽथ वैशाखे व्रतारंभः प्रशस्यते ॥ ८२ ॥ अरुणोदयवेलायामुत्थायावश्यकं पुनः ॥ विनि
वर्त्य रदान्धावेदपामार्गेण वाग्यता ॥ ८३ ॥ स्नात्वा रक्तांबरधरा रक्तमाल्यविलेपना ॥ नैवेद्यादींश्च संभारान्रक्तान्सर्वान्प्रकल्पयेत् ॥
॥ ८४ ॥ योग्यं विप्रं समाहूय कुजमर्चेत्तदाज्ञया ॥ रक्तगोगोमयालिप्तभूमौ रक्तासने विशेत् ॥ ८५ ॥ आचम्य देशकालौ च स्मृत्वा
काम्य समुच्चरन् ॥ मङ्गलादीनि नामानि स्वकीयांगेषु विन्यसेत् ॥ ८६ ॥ मुखे प्रविन्यसेत्साध्वी सामगानां कृपाकरम् ॥ धरात्मजं
नसोरक्ष्णोः कुजं भौमं ललाटके ॥ ८७ ॥ भूमिदं तु भ्रुवोर्मध्ये मस्तके भूमिनन्दनम् ॥ अङ्गारकं शिखायां च सर्वांगे च महीसुतम् ॥
॥ ८८ ॥ बाहुद्वये न्यसेत्पश्चात्सर्वरोगापहारकम् ॥ मूर्द्धादि वृष्टिकर्तारमापादांतं न्यसेत्सुधीः ॥ ८९ ॥ विन्यसेद्वृष्टिहर्तारं मूर्द्धांतं चरणादितः ॥
न्यसेदंते ततो दिक्षु सर्वकार्यार्थसिद्धिदम् ॥ ९० ॥ नाभौ हृदि शिरस्यारं वक्रे भूमिजमेव च ॥ विन्यस्यैवं निजे देहे ध्यायेत्प्राग्वद्धरात्मजम् ॥
॥ ९१ ॥ मानसैरुपचारैश्च संपूज्यार्घ्यं निधापयेत् ॥ एकविंशतिकोष्ठाढ्ये त्रिकोणे ताम्रपत्रगे ॥ ९२ ॥ आवाह्याङ्गारकं तत्र रक्तपुष्पादिभिर्य
जेत् ॥ अङ्गानि पूर्वमाराध्य मङ्गलादीन्प्रपूजयेत् ॥ ९३ ॥ एकविंशतिकोष्ठेषु चक्रमारं च भूमिजम् ॥ त्रिकोणेषु च सम्पूज्य बहिरष्टौ
च मातृकाः ॥ ९४ ॥ इंद्रादीनथ वज्रादीन्बाह्ये संपूजयेत्पुनः ॥ धूपदीपौ समर्प्याथ गोधूमान्नं निवेदयेत् ॥ ९५ ॥ ताम्रपात्रे शुद्धतोयपूरिते

रक्तचंदनम् ॥ रक्तपुष्पाक्षतफलान्याक्षिप्यार्घ्यं समर्पयेत् ॥ मंगलाय ततो मंत्री इदं मंत्रद्वयं पठेत् ॥ ९६ ॥ भूमिपुत्र महातेजः स्वेदोद्भव
पिनाकिनः ॥ सुतार्थिनी प्रपन्ना त्वां गृहाणार्घ्यं नमोऽस्तु ते ॥ ९७ ॥ रक्तप्रवालसंकाश जपाकुसुमसन्निभ ॥ महीसुत महाभाग गृहाणार्घ्यं
नमोऽस्तु ते ॥ ९८ ॥ एकविंशतिपूर्वोक्तैर्ङेनमोंतैश्च नामभिः ॥ ताराद्यैः प्रणमेत्पश्चात्तावत्यश्च प्रदक्षिणाः ॥ ९९ ॥ धरणीगर्भसंभूतं विद्युत्तेजः
समप्रभम् ॥ कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम् ॥ १०० ॥ ततो रेखात्रयं कुर्यात्खदिरांगारकेण च ॥ मार्जयेद्वामपादेन
मंत्राभ्यां च समाहिता ॥ १०१ ॥ दुःखदौर्भाग्यनाशाय पुत्रसंतानहेतवे ॥ कृतरेखात्रयं वामपादेनैतत्प्रमार्ज्म्यहम् ॥ १०२ ॥ ऋणदुःखविनाशाय
मनोभीष्टार्थसिद्धिये ॥ मार्जयाम्यसिता रेखास्तिस्रो जन्मत्रयोद्भवाः ॥ १०३ ॥ स्तुवीत धरणीपुत्रं पुष्पांजलिकरा ततः ॥
ध्यायंती तत्पदांभोजं पूजासांगत्वसिद्धये ॥ १०४॥ ऋणहर्त्रे नमस्तुभ्यं दुःखदारिद्र्यनाशिने ॥ सौभाग्यसुखदो नित्यं भव मे धरणीसुत ॥ १०५॥
तप्तकांचनसंकाश तरुणार्कसमप्रभ ॥ सुखसौभाग्यधनद ऋणदारिद्र्यनाशक ॥ १०६ ॥ ग्रहराज नमस्तेऽस्तु सर्वकल्याणकारक ॥ प्रसादं
कुरु देवेश सर्वकल्याणभाजन ॥१०७॥ देवदानवगंधर्वयक्षराक्षसपन्नगाः ॥ आप्नुवन्ति शिवं सर्वे सदा पूर्णमनोरथाः ॥१०८॥ आचिरादेव लोके
ऽस्मिन्यस्याराधनतो जनाः ॥ प्राप्नुवन्ति सुखं तस्मै नमो धरणिसूनवे ॥१०९॥ यो वक्रगतिमापन्नो नृणां दुखं प्रयच्छति ॥ पूजितः सुखसौभाग्यं
तस्मै क्ष्मासूनवे नमः ॥ ११० ॥ नभसि द्योतमानाय सर्वकल्याणहेतवे ॥ मङ्गलाय नमस्तुभ्यं धनसंतानहेतवे ॥ १११ ॥ प्रसादं कुरु मे भौम
मंगलप्रद मंगल ॥ मेषवाहन रुद्रात्मन्देहि पुत्रान्धनं यशः ॥ ११२ ॥ एवं स्तुत्वा प्रणम्याथ विसृज्य धरणीसुतम् ॥ यथाशक्त्या प्रदाय स्वं गृह्णीयाद्ब्राह्मणाशिषः ॥ ११३ ॥ गुरवे दक्षिणां दत्त्वा भुञ्जीयात्तन्निवेदितम् ॥ ११४ ॥ एवमावत्सरं कुर्यात्प्रतिमंगलवासरम् ॥ तिलैर्होमं विधायाथ
शतार्द्धं भोजयेद्द्विजान् ॥ ११५॥ भौममूर्तिं स्वर्णमयीमाचार्याय समर्पयेत् ॥ मंडलस्थे घटेऽभ्यर्च्येत्सुतसौभाग्यसिद्धये॥११६॥ एवं व्रतपरा नारी
प्राप्नुयात्सुभगान्सुतान् ॥ ऋणनाशाय वित्तार्थं व्रतं कुर्यात्पुमानपि ॥ ११७ ॥ ब्राह्मणः प्रजपेन्मन्त्रमग्निर्मूर्द्धेति वैदिकम् ॥ अंगारकस्य गायत्री
वक्ष्ये यजनसिद्धये ॥ ११८॥अंगारकाय शब्दांते विद्महे पदमीरयेत् ॥ शक्तिहस्ताय वर्णांते धीमहीति समुच्चरेत् ॥ ११९ ॥तन्नो भौमः प्रचोवर्णान्दयादिति
च संवदेत् ॥भौमस्यैषा तु गायत्री जप्तुः सर्वेष्टसिद्धिदा ॥१२०॥ भौमोपासनमेतद्धि बुधमन्त्रमथोच्यते॥फांतः कर्णेंदुसंयुक्तो बुधो ङेंते
हृदंतिमः॥१२१॥रसार्णो बुधमन्त्रोऽयं मुनिर्ब्रह्मास्य कीर्तितः॥पंक्तिश्छेदो देवता तु बुधः सर्वेष्टदो नृणाम्॥१२२॥आद्यं बीजं नमः शक्तिर्विनियोगो

ऽखिलाप्तये ॥ वंदे बुधं सदा भक्त्या पीताम्बरविभूषणम् ॥ १२३ ॥ जानुस्थवामहस्ताढ्यं साभयेतरपाणिकम् ॥ ध्यात्वैवं प्रजपेत्सहस्रं विजितेंद्रियः ॥ १२४ ॥ दशांशं जुहुयादाज्यैः पीठे पूर्वोदितेऽर्चयेत् ॥ अङ्गमातृदिशापालहेतिभिर्बुधमर्चयेत् ॥ १२५ ॥ एवं सिद्धे मनौ मंत्री साधयेत्स्वमनोरथान् ॥ सहस्रं प्रजपेन्मंत्रं नित्यं दशदिनावधि ॥ १२६ ॥ तस्याशु ग्रहजा पीडा नश्यत्येव न संशयः ॥ बुधस्याराधनं प्रोक्तं गुरोराराधनं शृणु ॥ १२७ ॥ बृहस्पतिपदं ङेऽतं सेंद्वाद्यर्णाद्यमंडितम् ॥ नमोंतो वसुवर्णोऽयं मुनिर्ब्रह्मास्य संमतः ॥ १२८ ॥ छन्दोऽनुष्टुप्सुराचार्यो देवता बीजमादिमम् ॥ हृच्छक्तिर्दीर्घवह्नींदुयुगलेनांगकल्पना ॥ १२९ ॥ न्यस्तवामकरं राशौ रत्नानां दक्षिणात्करात् ॥ किरंतं पीतपुष्पालंकारालेपांशुकार्चितम् ॥ १३० ॥ सर्वविद्यानिधिं देवगुरुं स्वर्णद्युतिं स्मरेत् ॥ लक्षं जपो दशांशेन घृतेनान्नेन वा हुनेत् ॥ १३१ ॥ धर्मादिपीठे प्रयजेदंगदिक्पालहेतिभिः ॥ एवं सिद्धे मनौ मंत्री साधयेदिष्टमात्मनः ॥ १३२ ॥ विषरोगादिपीडासु कलहे स्वजनोद्भवे ॥ पिप्पलोत्थसमिद्भिश्च जुहुयात्तन्निवृत्तये ॥ १३३ ॥ हुत्वा दिनत्रयं मन्त्री निशापुष्पैर्घृतप्लुतैः ॥ स विंशतिशतं शीघ्रं वासांसि लभते महीम् ॥ १३४ ॥ गुरोराराधनं प्रोक्तं शृणु शुक्रस्य सांप्रतम् ॥ वस्त्रं मे देहि शुक्राय ठद्वयांतो ध्रुवादिकः ॥ १३५ ॥ रुद्रार्णोऽयं मनुर्ब्रह्मा मुनिश्छन्दोऽविराडुत ॥ दैत्येज्यो देवता बीजं ध्रुवः शक्तिर्वसुप्रिया ॥ १३६ ॥ भूनेत्रचन्द्रनेत्राग्निनेत्रार्णैः स्यात्षडंगकम् ॥ शुक्लांबरालेपभूषं करेण ददतं धनम् ॥ १३७ ॥ वामेन शक्रं व्याख्यानमुद्रादोषं स्मरेत्सुधीः ॥ अयुतं प्रजपेन्मन्त्रं दशांशं जुहुयाद् घृतैः ॥ १३८ ॥ धर्मादिपीठे प्रयजेदंगेंद्रादितदायुधैः ॥ श्वेतपुष्पैः सुगंधैश्च जुहुयाद् भृगुवासरे ॥ १३९ ॥ एकविंशतिवारं यो लभते सोंऽशुकं मणीन् ॥ मनवोऽमी सदा गोप्या न देया यस्य कस्यचित् ॥ १४० ॥ भक्तियुक्ताय शिष्याय देया वा निजसूनवे ॥ १४१ ॥

इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे मन्त्रविधाननिरूपणं नामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

सनत्कुमार उवाच ॥ अथ वक्ष्ये महाविष्णोर्मन्त्रान्लोकेषु दुर्लभान् ॥ यान्प्राप्य मानवास्तूर्णं प्राप्नुवंति निजीप्सितम् ॥ १ ॥ येषामुच्चारणेनैव पापसंघः प्रलीयते ॥ ब्रह्मादयोऽपि यान्ज्ञात्वा समर्थाः स्युर्जगत्कृतौ ॥ २ ॥ तारहृत्पूर्वकं ङेंतं नारायणपदं भवेत् ॥ अष्टाक्षरो मनुश्चास्य साध्यो नारायणो मुनिः ॥ ३ ॥ छन्दः प्रोक्तं च गायत्री देवता विष्णुरव्ययः ॥ ॐ बीजं यं च तथा शक्तिर्विनियोगोऽखिलाप्तये ॥ ४ ॥ क्रुद्धोल्काय हृदाख्यातं महोल्काय शिरः स्मृतम् ॥ वीरोल्काय शिखा प्रोक्ता द्युल्काय कवचं मतम् ॥ ५ ॥ महोल्कायेति चास्त्रं स्यादित्थं पंचांगकल्पना ॥ पुनः षडंगमंत्रोत्थैः षड्वर्णैश्च समाचरेत् ॥ ६ ॥ अवशिष्टौ न्यसेत्कुक्षिपृष्ठयोर्मंत्रवर्णकौ ॥ सुदर्शनस्य मंत्रेण कुर्याद्दिग्बन्धनं ततः ॥ ७ ॥

तारो नमश्चतुर्थ्यंतं सुदर्शनपदं वदेत् ॥ अस्त्रायफडिति प्रोक्तो मंत्रो द्वादशवर्णवान् ॥ ८॥ दशावृत्तिमय न्यासं वक्ष्ये विभूतिपञ्जरम् ॥ मूला
र्णान्स्वतनौ न्यस्येदाधारे हृदये मुखे ॥ ९ ॥ दोःपन्मूलेषु नासायां प्रथमावृत्तिरीरिता ॥ गले नाभौ हृदि कुचपार्श्वपृष्ठेषु तत्पराः ॥ १० ॥
मूर्द्धास्यनेत्रश्रवणघ्राणेषु च तृतीयकाः ॥ दोःपादसंध्यंगुलिषु वेदावृत्त्या च विन्यसेत् ॥ ११ ॥ धातुप्राणेषु हृदये विन्यसेत्तदनंतरम् ॥ शिरोनेत्रा
स्यहृत्कुक्षिसोरुजंघापदद्वये ॥ १२ ॥ एकैकशो न्यसेद्वर्णान्मंत्रस्य क्रमतः सुधीः ॥ न्यसेद्धृदंसोरुपदेष्वर्णान्वेदमितान्मनोः ॥ १३ ॥ चक्रशं
खगदांभोजपदेषु स्वस्वमुद्रया ॥ शेषांश्च न्यासवर्योऽयं विभूतिपञ्जराभिधः ॥ १४ ॥ न्यसेन्मूलार्णमेकैकं सचंद्रं तारसम्पुटम् ॥ अथवा वै
नमोंतेन न्यसेदित्यपरे जगुः ॥ १५ ॥ तत्त्वन्यासं ततः कुर्याद्विष्णुभावप्रसिद्धये ॥ अष्टार्णोऽष्टप्रकृत्यात्मा गदितः पूर्वसूरिभिः॥१६॥पृथिव्यादीनि
भूतानि ततोऽहंकारमेव च ॥ महांश्च प्रकृतिश्चैवेत्यष्टौ प्रकृतयो मताः ॥ १७ ॥ पादे लिंगे हृदि मुखे मूर्ध्नि वक्षसि हृत्स्थले ॥ सर्वांगे व्यापकं
कुर्यादेकेन साधकोत्तमः ॥ १८ ॥ मंत्रार्णहृत्परायाद्यमात्मने हृदयांतिमम् ॥ तत्तन्नाम समुच्चार्य्य न्यसेत्तत्तत्स्थले बुधः ॥ १९ ॥ अयं तत्त्वाभिधो
न्यासः सर्वन्यासोत्तमोत्तमः ॥ मूर्तीर्न्यसेद्द्वादश वै द्वादशादित्यसंयुताः ॥ २० ॥ द्वादशाक्षरवर्णाद्या द्वादशादित्यसंयुताः ॥ अष्टार्णोऽयं मनुश्चा
ष्टप्रकृत्यात्मा समीरितः॥२१॥ तासामात्मचतुष्कस्य योगादर्काक्षरो भवेत् ॥ ललाटकुक्षिहृत्कंठदक्षपार्श्वांसकेषु च ॥ २२ ॥ गले च वामपार्श्वां
सगलपृष्ठेष्वनंतरम् ॥ ककुद्यपि न्यसेन्मंत्री मूर्तीर्द्वादश वै क्रमात्॥२३॥धात्रा तु केशवं न्यस्यार्यम्णं नारायणं पुनः ॥ मित्रेण माधवं न्यस्य गोविंदं
वरुणेन च॥२४॥विष्णुं चैवांशुना युक्तं भगेन मधुसूदनम् ॥न्यसेद्विवस्वता युक्तं त्रिविक्रममतः परम्॥२५॥वामनं च तथद्रुण पूष्णा श्रीधरमेव च॥
हृषीकेशं न्यसेत्पश्चात्पर्जन्येन समन्वितम्॥ २६ ॥ त्वष्ट्रा युतं पद्मनाभं दामोदरं च विष्णुना ॥ द्वादशार्णं ततो मंत्रं समस्ते शिरसि न्यसेत्॥२७ ॥
व्यापकं विन्यसेत्पश्चात्किरीटमनुना सुधीः ॥ ध्रुवःकिरीटकेयूरहारांते मकरेतिच॥२८ ॥ कुंडलांते चक्रशंखगदांतेंऽभोजहस्ततः ॥ पीतांबरांते श्रीवत्सां
कितवक्षःस्थलेति च॥२९॥श्रीभूमिसहितस्वात्मज्योतिर्द्वयमतः परम् ॥ वदेद्दीप्तिकरायांते सहस्रादित्यतेजसे ॥३०॥ नमोंतो बाणषड्वर्णैः किरीटमनु
रीरितः॥एवं न्यासविधिं कृत्वा ध्यायेन्नारायणं विभुम् ॥३१॥उद्यत्कोटयर्कसदृशं शंखं चक्रं गदांबुजम् ॥दधतं च करैर्भूमिश्रीभ्यां पार्श्वद्वयांचितम्
॥३२ ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम् ॥ हारकेयूरवलयांगदं पीतांबरं स्मरेत् ॥३३॥वर्णलक्षं जपेन्मंत्रं विधिवन्नियतेंद्रियः ॥ प्रथमेन तु
लक्षेण स्वात्मशुद्धिर्भवेद्ध्रुवम् ॥३४॥लक्षद्वयजपेनाथ मंत्रशुद्धिमवाप्नुयात् ॥ लक्षत्रयेण जप्तेन स्वर्लोकमधिगच्छति ॥ ३५॥ विष्णोः समीपमाप्नोति

वेदलक्षजपान्नरः ॥ तथा च निर्मलं ज्ञानं पंचलक्षजपाद्भवेत् ॥ ३६ ॥ लक्षषष्ठेन चाप्नोति मंत्री विष्णौ स्थिरां मतिम् ॥ सप्तलक्षजपान्मंत्री विष्णोः सारूप्यमाप्नुयात् ॥ ३७ ॥ अष्टलक्षं जपेन्मंत्री निर्वाणमधिगच्छति ॥ एवं जप्त्वा ततः प्राज्ञो दशांशं सरसीरुहैः॥३८॥ मधुराक्तैः प्रजुहुयात्संस्कृते हव्यवाहने ॥ मंडूकात्परतत्वांतं पीठे संपूज्य यत्नतः ॥ ३९ ॥ विमलोत्कर्षिणी ज्ञाना क्रिया योगा ततः परा ॥ प्रह्वी सत्या तथेशानानुग्रहा नवमी मता ॥४० ॥ तारो नमो भगवते विष्णवे सर्वभू ततः ॥ तात्मने वासुदेवाय सर्वात्मेति पदं वदेत् ॥४१ ॥ संयोगयोगपद्मांते पीठाय हृदयांतिमः ॥ षड्विंशदक्षरः पीठमंत्रोऽनेनासनं दिशेत् ॥ ४२ ॥ मूर्तिं संकल्प्य मूलेन तस्यामावाह्य पूजयेत् ॥ आदौ चांगानि संपूज्य मंत्राणां केशरेषु च ॥४३॥ प्रागादिदिग्दले वासुदेवं संकर्षणं तथा ॥ प्रद्युम्नमनिरुद्धं च शक्तीः कोणेष्वथार्चयेत् ॥ ४४ ॥ शांतिं श्रियं सरस्वत्या रतिं संपूजयेत्क्रमात् ॥ हेमपीततमालेंद्रनीलाभाः पीतवाससः ॥ ४५ ॥ चतुर्भुजाः शंखचक्रगदांभोजधरा इमे ॥ सितकांचनगोदुग्धदूर्वावर्णाश्च शक्तयः ॥ ४६ ॥ दलाग्रेषु चक्रशंखगदापंकजकौस्तुभान् ॥ पूजयेन्मुसलं खड्गं वनमालां यथाक्रमात् ॥ ४७ ॥ रक्ताजपीतकनकश्यामकृष्णासितार्जुनान् ॥ कुंकुमाभं समभ्यर्च्येंद्रहिरग्रे खगेश्वरम् ॥ ४८ ॥ पार्श्वयोः पूजयेत्पश्चाच्छंखपद्मनिधी क्रमात् ॥ मुक्तामाणिक्यसंकाशौ पश्चिमे ध्वजमर्चयेत् ॥ ४९ ॥ रक्तं विघ्नं तथाग्नेये श्याममार्यं च राक्षसे ॥ दुर्गां श्यामां वायुकोणे सेनान्यं पीतमैश्वरे ॥ ५० ॥ लोकेशानायुधैर्युक्तान्बहिः संपूजयेत्सुधीः ॥ एवमावरणैर्युक्तं योऽर्चयेद्विष्णुमव्ययम् ॥ ५१ ॥ भुक्तेह सकलान्भोगानंते विष्णुपदं व्रजेत् ॥ क्षेत्रधान्यसुवर्णानां प्राप्तये धरणीं स्मरेत् ॥ ५२ ॥ देवीं दूर्वादलश्यामां दधानां शालिमंजरीम् ॥ चिंतयेद्भारतीं देवीं वीणापुस्तकधारिणीम् ॥ ५३ ॥ दक्षिणे देवदेवस्य पूर्णचंद्रनिभाननाम् ॥ क्षीराब्धिफेनपुंजाभे वसानां श्वेतवाससी ॥ ५४॥ भारत्या सहितं यो वै ध्यायेद्देवं परात्परम् ॥ वेदवेदार्थतत्त्वज्ञो जायते सर्ववित्तमः ॥ ५५ ॥ नारसिंहमिवात्मानं देवं ध्यात्वातिभैरवम् ॥ शस्त्रं संमंत्र्य मंत्रेण शत्रून्हत्वा निवर्तते ॥ ५६ ॥ नारसिंहेन बीजेन मंत्रं संयोज्य साधकः ॥ शतमष्टोत्तरं जप्त्वा वामहस्ताभिमंत्रिताः ॥ ५७ ॥ पुनः पुनरपः सिंचेत्सर्पदष्टोऽपि जीवति ॥ गारुडेन च संयोज्य पंचार्णेन जपेत्तदा ॥ ५८ ॥ निर्विषीकरणे ध्यायेद्विष्णुं गरुडवाहनम् ॥ अशोकफलके तार्क्ष्यमालिख्याशोकसंहतौ ॥ ५९ ॥ अशोकपुष्पैः संपूज्य भगवंतं तदग्रतः ॥ जुहुयात्तानि पुष्पाणि त्रिसंध्यं सप्तपत्रकम् ॥ ६० ॥ प्रत्यक्षो जायते पक्षी वरमिष्टं प्रयच्छति ॥ गाणपत्येन संयोज्य जपेल्लक्षं पयोव्रतः ॥ ६१ ॥ महागणपतिं देवं प्रत्यक्षमिह पश्यति ॥ वाणीबीजेन संयुक्तं षण्मासं योजयेन्नरः ॥ ६२ ॥ महाकविवरो

भूत्वा मोहयेत्सकलं जगत् ॥ हुत्वा गुडूचीशकलान्यर्द्धांगुलमितानि च ॥ ६३ ॥ दधिमध्वाज्ययुक्तानि मृत्युं जयति साधकः ॥ शनैश्चर
दिने सम्यक् स्पृष्ट्वाश्वत्थं च पाणिना ॥ ६४ ॥ जप्त्वा चाष्टशतं युद्धे ह्यपमृत्युं जयत्यसौ ॥ पञ्चविंशतिधा जप्त्वा नित्यं प्रातः पिबेज्जलम् ॥
॥ ६५ ॥ सर्वपापविनिर्मुक्तो ज्ञानवान् रोगवर्जितः ॥ कुंभं संस्थाप्य विधिवदापूर्य शुद्धवारिणा ॥ ६६ ॥ जप्त्वायुतं ततस्तेनाभिषेकः
सर्वरोगनुत् ॥ चंद्रसूर्योपरागे तु ह्युपोष्याष्टसहस्रकम् ॥ ६७ ॥ स्पृष्ट्वा ब्राह्मीघृतं जप्त्वा पिबेत्साधकसत्तमः ॥ मेधां कवित्वं वाक्सिद्धिं लभते
नात्र संशयः ॥ ६८ ॥ जुहुयादयुतं विल्वैर्महाधनपतिर्भवेत् ॥ नारायणस्य मन्त्रोऽयं सर्वमंत्रोत्तमोत्तमः ॥ ६९ ॥ आलयः सर्वसिद्धीनां कथितस्तव
नारद ॥ नारायणाय शब्दांते विद्महे पदमीरयेत्॥७०॥वासुदेवपदं ङेंतं धीमहीति ततो वदेत्॥ तन्नो विष्णुः प्रचोवर्णान्संवदेच्चोदयादिति ॥ ७१ ॥
एषोक्ता विष्णुगायत्री सर्वपापप्रणाशिनी ॥ तारो हृद्भगवान् ङेंतो वासुदेवाय कीर्तितः ॥ ७२ ॥ द्वादशार्णो महामन्त्रो भुक्तिमुक्तिप्रदायकः॥ स्त्रीशू
द्राणां वितारोऽयं सतारस्तु द्विजन्मनाम् ॥ ७३ ॥ प्रजापतिर्मुनिश्चास्य गायत्री छन्द ईरितः ॥ देवता वासुदेवस्तु बीजं शक्तिर्ध्रुवश्च हृत् ॥७४॥
चन्द्राक्षिवेदपञ्चार्णैः समस्तेनांगकल्पनम् ॥ मूर्ध्नि भाले दृशोरास्ये गले दोर्हृदये पुनः ॥ ७५ ॥ कुक्षौ नाभौ ध्वजे जानुद्वये पादद्वये तथा॥न्यसे
त्क्रमान् मन्त्रवर्णान्सृष्टिन्यासोऽयमीरितः ॥ ७६ ॥ हृदादिमस्तकांतं तु स्थितिन्यासं प्रचक्षते॥पादादारभ्य मूर्द्धानं न्यासं संहारकं विदुः॥ ७७ ॥
तत्त्वन्यासं ततः कुर्यात्सर्वतंत्रेषु गोपितम् ॥ जीवं प्राणं तथा चित्तं हृत्पद्मं सूर्यमण्डलम्॥७८॥चन्द्राग्निमण्डले चैव वासुदेवं ततः परम्॥संकर्षणं च
प्रद्युम्नमनिरुद्धं ततः परम् ॥ ७९ ॥ नारायणं चक्रमतस्तत्त्वानि द्वादशैव तु ॥ मूलार्णहृत्परायाद्यमात्मने हृदयांतिमम् ॥ ८० ॥ तत्त्वे नाम
समुच्चार्य्य न्यसेन्मूर्द्धादिषु क्रमात् ॥ पूर्वोक्तं ध्यानमत्रापि भानुलक्षजपो मनोः ॥ ८१ ॥ तद्दशांशं तिलैराज्यलोलितैर्हवनं चरेत् ॥ पीठे पूर्वोदिते
मन्त्री मूर्तिं संकल्प्य मूलतः ॥ ८२ ॥ तस्यामावाह्य देवेशं वासुदेवं प्रपूजयेत् ॥ अङ्गानि पूर्वमभ्यर्च्य वासुदेवादिकास्ततः ॥ ८३ ॥
शांत्यादिशक्तयः पूज्याः प्राग्वद्दिक्षु विदिक्षु च ॥ तृतीयावरणे पूज्याः प्रोक्ता द्वादश मूर्तयः ॥ ८४ ॥ इंद्राद्यानायुधैर्युक्तान् पूजयेद्धरणीगृहे ॥
एवमावरणैरिष्ट्वा पञ्चभिर्विष्णुमव्ययम् ॥ ८५ ॥ प्राप्नुयात्सकलानर्थानन्ते विष्णुपदे व्रजेत् ॥ पुरुषोत्तमसंज्ञस्य विष्णोर्भेदचतुष्टयम् ॥ ८६ ॥
त्रैलोक्यमोहनस्तेषां प्रथमः परिकीर्तितः ॥ श्रीकरश्च हृषीकेशः कृष्णश्चात्र चतुर्थकः ॥ ८७ ॥ तारः कामो रमा पश्चान् ङेंतः स्यात्पुरुषो
त्तमः ॥ वर्मास्त्राण्यग्निप्रियांतो मन्त्रो वह्नीन्दुवर्णवान् ॥ ८८ ॥ ब्रह्मा मुनिः स्याद्गायत्री छन्दः प्रोक्तोऽथ देवता ॥ पुरुषोत्तमसंज्ञोऽत्र बीजशक्ती

स्मरेदिरे ॥ ८९ ॥ भूचंद्रैकरसाक्ष्यक्षिमंत्रवर्णैर्विभागतः ॥ कृत्वांगानि ततो ध्यायेद्विधिवत्पुरुषोत्तमम् ॥ ९० ॥ समुद्यदादित्यनिभं शंख
चक्रगदांबुजैः ॥लसत्करं पीतवस्त्रं स्मरेच्छ्रीपुरुषोत्तमम् ॥९१॥ महारत्नौघखचितस्फुरत्तोरणमंडपे॥ मौक्तिकौघशमदमविराजितवितानके ॥ ९२ ॥
नृत्यद्देवांगनावृंदक्कणत्किंकिणिनूपुरे ॥ लसन्माणिक्यवेद्यां तु दीप्तार्कायुततेजसि ॥ ९३ ॥ वृंदारकव्रातकिरीटाग्ररत्नाभिचर्चिते ॥ नवलक्षं जपेन्मंत्रं
जुहुयात्तद्दशांशतः ॥ ९४ ॥ उत्फुल्लैः कमलैः पीठे पूर्वोक्ते वैष्णवेऽर्चयेत् ॥ एवमाराध्य देवेशं प्राप्नोति महतीं श्रियम् ॥ ९५॥ पुत्रान्पौत्रान्यशः
कांतिं भुक्तिं मुक्तिं च विंदति ॥ उत्तिष्ठेति पदं पश्चाच्छ्रीकराग्निप्रियांतिमः ॥ ९६ ॥ अष्टार्णोऽस्य मुनिर्व्यासः पंक्तिश्छंद उदाहृतम् ॥ श्रीकाराख्यो
हरिः प्रोक्तो देवता सकलेष्टदः ॥ ९७ ॥ भीषयद्वितयं हृत्स्यात् त्रासयद्वितयं शिरः ॥ शिखा प्रमर्दयद्वंद्वं वर्म प्रध्वंसयद्वयम् ॥ ९८ ॥ अस्त्रं
रक्षद्वयं सर्वे हुमंताः समुदीरिताः ॥ मस्तके नेत्रयोः कंठे हृदये नाभिदेशके ॥ ९९ ॥ ऊरूजंघांघ्रियुग्मेषु मंत्रवर्णान्क्रमान्न्यसेत् ॥ ततः
पुरुषसूक्तोक्तमंत्रैर्न्यासं समाचरेत् ॥१००॥ मुखे न्यसेद्ब्राह्मणोऽस्य मुखमासीदिमं मनुम् ॥ बाहुयुग्मे तथा बाहूराजन्य इति विन्यसेत् ॥ १०१ ॥
ऊरू तदस्य यद्वैश्य इममूरुद्वये न्यसेत् ॥ न्यसेत्पादद्वये मंत्री पद्भ्यां शूद्रो अजायत ॥ १०२ ॥ चक्रं शंखं गदां पद्मं कराग्रेष्वथ विन्य
सेत् ॥ एवं न्यासविधिं कृत्वा ध्यायेत्पूर्वोक्तमण्डपे॥१०३॥ अरुणाब्जासनस्थस्य तार्क्ष्यस्योपरि संस्थितम्॥पूर्वोक्तरूपिणं देवं श्रीकरं लोकमोहनम्
॥ १०४॥ ध्यात्वैवं पूजयेदष्टलक्षं मंत्री दशांशतः॥ रक्तांबुजैः समिद्भिश्च विल्वक्षीरिद्रुमोद्भवैः॥१०५॥पयोऽन्नैः सर्पिषा हुत्वा प्रत्येकं सुसमाहितः॥
अश्वत्थोदुंबरप्लक्षवटाः क्षीरिद्रुमाः स्मृता ॥१०६ ॥ पूजयेद्वैष्णवे पीठे मूर्तिं संकल्प्य मूलतः ॥ अंगावरणदिक्पालहेतिभिः सहितं विभुम् ॥१०७॥
इत्थं सिद्धे मनौ मंत्री प्रयोगान्पूर्ववच्चरेत् ॥ तारो हृद्भगवान् ङेंतो वराहेति ततः परम् ॥ १०८ ॥ रूपाय भूर्भुवः स्वः स्याल्लोहितकामिका च ये॥
भूपतित्वं च मे देहि ददापय शुचिप्रिया ॥ १०९ ॥ रामाग्निवर्णो मंत्रोऽयं भार्गवोऽस्य मुनिर्मतः॥छन्दोऽनुष्टुब्देवतादिवराहः समुदीरितः॥ ११० ॥
एकदंष्ट्राय हृदयं व्योमोल्काय शिरः स्मृतम् ॥ शिखा तेजोऽधिपतये विश्वरूपाय वर्म च ॥ १११ ॥ महादंष्ट्राय चास्त्रं स्यात्पञ्चांगमिति कल्पयेत्॥
अथवा गिरिषट्सप्तबाणैर्वसुभिरक्षरैः ॥ ११२ ॥ विभक्तैर्मंत्रवर्यस्य पञ्चागांनि प्रकल्पयेत् ॥ ततो ध्यायेदनेकार्कनिभमादिवराहकम् ॥ ११३ ॥
आं ह्रौं स्वर्णनिभं जान्वोरधो नाभेः सितप्रभम् ॥ इष्टाभीतिगदाशंखचक्रशक्त्यसिखेटकान् ॥ ११४ ॥ दधतं च करैर्दंष्ट्राग्रलसद्धरणिं स्मरेत् ॥
एवं ध्यात्वा जपेल्लक्ष दशांशं सरसीरुहैः ॥ ११५ ॥ मध्वक्तैर्जुहयात्पीठे पूर्वोक्ते वैष्णवे यजेत्॥मूलेन मूर्तिं सङ्कल्प्य तस्यां सम्पूजयेद्विभुम्॥११६॥

अङ्गावरणदिक्पालहेतियंत्रप्रसिद्धये ॥ जपादेवावर्निं दद्याद्धनं धान्यं महीं श्रियम् ॥ ११७ ॥ सिंहार्के सितपक्षस्याष्टम्यां गव्येषु पञ्चसु ॥
शिलां शुद्धां विनिक्षिप्य स्पृष्ट्वा तामयुतं जपेत् ॥ ११८ ॥ उदङ्मुखस्ततो मंत्री तां शिलां निखनेद्भुवि ॥ भूतप्रेताहिचौरादिकृतां बाधां
निवारयेत् ॥ ११९ ॥ प्रातर्भृगुदिने साध्यभूतलान्मृदमाहरेत् ॥ मंत्रितां मूलमंत्रेण विभजेत्तां त्रिधा पुनः ॥ १२० ॥ चुल्ह्यामेकं समालिप्याप्यपरं
पाकभाजने ॥ गोदुग्धे परमालोड्य शोधितांस्तंडुलान् क्षिपेत् ॥ १२१ ॥ सम्यक् शुद्धे शुचिः केशे जपन्मंत्रं पचेच्चरुम् ॥ अवतार्य चरुं पश्चाद्वह्नौ
देयं यथाविधि ॥ १२२ ॥ सम्पूज्य धूपदीपाद्यैः पश्चादाज्यप्लुतं चरुम् ॥ जुहुयात्संस्कृते वह्नौ अष्टोत्तरशतं सुधीः ॥ १२३ ॥ एवं प्रजुहुयान्मंत्री
कविवारेषु सप्तसु ॥ विरोधो नश्यति क्षेत्रे शत्रुचौराद्युपद्रवाः ॥ १२४ ॥ भानूदयेप्यारवारे साध्यक्षेत्रान्मृदं पुनः ॥ आदाय पूर्वविधिना हविरापाद्य
पूर्ववत् ॥ १२५ ॥ जुहुयादेधिते वह्नौ पूर्वसंख्याकमादरात् ॥ एवं स सप्तारवारेषु जुहुयात्क्षेत्रसिद्धये ॥ १२६ ॥ जुहुयाल्लक्षसंख्याकं गव्यै
श्चैव सपायसैः ॥ अभीष्टभूम्याधिपत्यं लभते नात्र संशयः ॥ १२७ ॥ उद्यद्दोः परिघं दिव्यं सितदंष्ट्राग्रभूधरम् ॥ स्वर्णाभं पार्थिवे पीते
मंडले सुसमाहितः ॥ १२८ ॥ ध्यात्वाप्नोति महीं रम्यां वराहस्य प्रसादतः ॥ वारुणे मण्डले ध्यायेद्वाराहं हिमसन्निभम् ॥ १२९ ॥ महोप
द्रवशांतिः स्यात्साधकस्य न संशयः ॥ वश्यार्थ च सदा ध्यायेद्वह्न्याभं वह्निमण्ले ॥ १३० ॥ ध्यायेदेवं रिपूच्चाटे कृष्णाभं वायुमण्डले ॥
ह्यमण्डलगतं स्वच्छं वाराहं सर्वसिद्धिदम् ॥ १३१ ॥ शत्रुभूतग्रहक्ष्वेडामयपीडादिशांतये ॥ भगवर्धीशयुतं व्योमबिंदुभूषितमस्तकम् ॥ १३२ ॥
एकाक्षरो वराहस्य मन्त्रः कल्पद्रुमोऽपरः ॥ पूजाद्यर्घ्यादिकं सर्वमस्यां पूर्वोक्तवच्चरेत् ॥ १३३ ॥ सवामकर्णानिद्रास्याद्वराहाय हृदंतिमः ॥
ताराद्यो वसुवर्णोऽयं सर्वैश्वर्यप्रदायकः ॥ १३४ ॥ ब्रह्मा मुनिः स्याद्गायत्री छन्दो वाराहसंज्ञकः ॥ देवश्चंद्रेंद्वब्धिनेत्रैः सर्वेणांगक्रिया मता ॥
॥ १३५ ॥ ध्यानपूजाप्रयोगादि प्राग्वदस्यापि कल्पयेत् ॥ प्रगवादौ च ङेन्तं च भगवतीति पदं ततः ॥ धरणिद्वितयं पश्चाद्धरेर्द्वयमुदीरयेत ॥ १३६ ॥
एकोनविंशत्यर्णाढ्यो मन्त्रो वह्निप्रियांतिमः ॥ वराहोऽस्य मुनिश्छन्दो गायत्री निवृदादिका ॥ १३७ ॥ देवता धरणी बीजं तारःशक्तिर्वसुप्रिया ॥
रामवेदाग्निबाणाक्षिनेत्रार्णैरंगकल्पनम् ॥ १३८ ॥ श्यामां चित्रविभूषाढ्यां पद्मस्थां तुंगसुस्तनीम् ॥ नीलांबुजद्वयं शालिमंजरींच शुकं करैः ॥ १३९ ॥
दधतीं चित्रवसनां धरां भगवतीं स्मरेत् ॥ एवं ध्यात्वा जपेल्लक्षं दशांशं पायसेन तु ॥ १४० ॥ साज्येन जुहुयान्मन्त्री विष्णोः पीठे समर्चयेत् ॥
मूर्तिं संकल्प्य मूलेन तस्यां वसुमतीं यजेत् ॥ १४१ ॥ अङ्गानि पूर्वमाराध्य भूवह्निजलमारुतान् ॥ दिक्पात्रेषुच सम्पूज्य कोणपत्रेषु तत्कलाः ॥ १४२ ॥

निवृत्तिश्च प्रतिष्ठा च विद्यानां तैश्च तत्कलाः ॥ इंद्राद्यानपि वज्रादीन्पूजयेत्तदनंतरम् ॥ १४३ ॥ एवं सिद्धे मनौ मंत्री साधयेदिष्टमात्मनः ॥ धरणीं
प्रभजन्नेवं पशुरत्नांबरादिभिः ॥ १४४ ॥ धरण्या वल्लभः स स्यात्सुखी जीवेच्छतं समाः ॥ त्रैलोक्यमोहनो मंत्रो जगन्नाथस्य कीर्त्यते ॥ १४५ ॥
तारः कामो रमा बीजं हृदंते पुरुषोत्तमः ॥ श्रीकंठः प्रतिरूपांते लक्ष्मीति च निवासि च ॥ १४६ ॥ सकलांते जगत्पश्चात्क्षोभणेति पदं वदेत् ॥
सर्वस्त्रीहृदयांते तु विदारणपदं वदेत् ॥ १४७ ॥ ततस्त्रिभुवनांतं तु मदोन्मादकरेति च ॥ सुरासुरांते मनुजसुंदरीजनवर्णतः ॥ १४८ ॥ मनांसि
तापयद्द्वंद्वं दीपयद्द्वितयं ततः ॥ शोषयद्द्वितयं पश्चान्मारयद्द्वितयं ततः ॥ १४९ ॥ स्तंभयद्द्वितयं भूयो मोहयद्द्वितय ततः ॥ द्रावयद्द्वितयं
तावदाकर्षययुगं ततः ॥ १५० ॥ समस्तपरमो येन सुभगेन च संयुतम् ॥ सर्वसौभाग्यशब्दांते करसर्वपदं वदेत् ॥ १५१ ॥ कामप्रदादमुन्ब्रह्मा
सेंदुर्हनुयुगं ततः ॥ चक्रेण गदया पश्चात्खड्गेन तदनंतरम् ॥ १५२ ॥ सर्वबाणैर्भेदियुगं पाशेनांते कटद्वयम् ॥ अंकुशेनेति संप्रोच्य ताडय
द्वितयं पुनः ॥ १५३ ॥ कुरुशब्दद्वयमथो किं तिष्ठसि पदं वदेत् ॥ तावद्यावत्पदस्यांते समाहितमनंतरम् ॥ ततो मे सिद्धिराभास्य
भवमन्ते च वर्म फट् ॥ १५४ ॥ हृदंतोऽयं महामंत्रो द्विशतार्णः समीरितः ॥ जैमिनिर्मुनिरस्योक्तश्छंदश्चामितमीरितम् ॥ १५५॥ देवता जगतां
मोहे जगन्नाथः प्रकीर्तितः ॥ कामो बीजं रमा शक्तिर्विनियोगोऽखिलाप्तये ॥१५६॥ पुरुषोत्तमत्रिभुवनोन्मादकांतेऽग्निवर्म च ॥ हृदयं कीर्तितं
पश्चाज्जगत्क्षोभणशब्दतः ॥ १५७ ॥ लक्ष्मीदयितवर्मान्तः शिरः प्रोक्तं शिखा पुनः ॥ मन्मथो तमशब्दांते मंगजे पदमीरयेत् ॥ १५८ ॥ कामदायेति
हुं प्रोच्य न्यसेद्वम ततः परम् ॥ परमांते भृगुकर्णाभ्यां च सर्वपदं ततः ॥ १५९ ॥ सौभाग्यकरवर्मांते कवचं परिकीर्तितम् ॥ सुरासुरांते
मनुंजसुंदरीति पदं वदेत् ॥ १६० ॥ हृदयांते विदा पश्चाद्रणसर्वपदं वदेत् ॥ ततः प्रहरणधरसर्वकामुकतत्पदम् ॥ १६१ ॥ हनयुग्मं च हृदयं बंधनानि
ततो वदेत् ॥ आकर्षयद्वयं पश्चान्महाबलपदं ततः ॥ १६२ ॥ वर्म चास्त्रं समाख्यातं नेत्रं स्यात्तदनंतरम् ॥ वदेत्त्रिभुवनं पश्चाच्चर सर्वजनेति
च ॥ १६३ ॥ मनांसि हरयुग्मांते दारयद्द्वितयं च मे ॥ वशमानय वर्मांते नेत्रमंत्रः समीरितः ॥ १६४ ॥ षडंगमंत्रास्ताराद्याः फट्नमोंताः प्रकीर्तिताः
॥ तारस्त्रैलोक्यशब्दांते मोहनेति पदं वदेत् ॥ १६५ ॥ हृषीकेशेति संप्रोच्याप्रतिरूपादिशब्दतः ॥ मन्मथानंतरं सर्वस्त्रीणां हृदयमीरयेत्
॥ १६६ ॥ आकर्षणपदा गच्छदागच्छहृदयांतिमः ॥ अनेन व्यापकं कृत्वा जगन्नाथं स्मरेत् सुधीः॥१६७॥ क्षीराब्धेस्तु तटे रम्यं सुरद्रुमलतांचितम् ॥
उद्यदर्कांशुजालाभं स्वधाम्नोज्वालदिङ्मुखम् ॥ १६८ ॥ प्रसूनावलिसौरभ्यमाद्यन्मधुकरारवम् ॥ दिव्यवातोच्चलत्कंजपरागोद्धूलितांबरम् ॥ १६९ ॥

स्वर्वधूगीतमाधुर्याभिराम चिंतयेद्वनम् ॥ तदंतर्मणिसम्पत्तिस्फुरत्तोरणमण्डपे ॥ १७० ॥ विलसन्मौक्तिकोद्दामदामराजद्वितानके ॥ मणिवेद्यादि
वियत्किरीटाग्रसमर्चिते ॥ १७१ ॥ दिव्यसिंहासने विप्र समासीनं स्मरेद्विभुम् ॥ शंखपाशेषु चापानि मुसलं नंदकं गदाम् ॥ १७२ ॥
अंकुशं दधतं दोर्भिः श्लिष्टे कमलयोरसि ॥ पश्यत्यंकस्थयांभोजश्रिया रागोल्लसद्दृशा ॥ १७३ ॥ ध्यात्वैवं प्रजपेल्लक्षचतुष्कं तद्दशांशतः ॥ कुंडे
ऽर्द्धचंद्रे पद्मैर्वा जातीपुष्पैश्च होमयेत् ॥ १७४ ॥यागभूमिं तथात्मानं यागोपकरणं तथा ॥ पूजयिष्यन् जगन्नाथं गायत्र्या प्रोक्षयेद्बुधः ॥ १७५ ॥
त्रैलोक्यमोहनायांते विद्महे पदमीरयेत् ॥ स्मराय धीमहीत्युक्त्वा तन्नो विष्णुः प्रचोदयात् ॥१७६॥ गायत्र्येषा समाख्याता सर्वशुद्धिकरी परा ॥ कल्प
येदासनं पीठे पूर्वोक्ते वैष्णवे सुधीः ॥ १७७ ॥ पक्षिराजाय ठद्वंद्वं पीठमंत्रोऽयमीरितः ॥ मूर्तिं संकल्पमूलेन तस्यामावाहयेदतः ॥ १७८ ॥ व्यापक
न्यासमंत्रेण ततः सम्पूज्य भक्तितः ॥ श्रीवत्सहृदयं तेन श्रीवत्सं स्तनयोर्यजेत् ॥ १७९ ॥ कौस्तुभाय हृदंतेन यजेद्वक्षसि कौस्तुभम् ॥ पूजयेद्वनमा
लायै हृदंतेन गले च ताम् ॥ १८० ॥ कर्णिकायां ततोऽभ्यर्च्येद्विधिवच्चांगदेवताः ॥ दलेषु पूजयेत्पश्चाल्लक्ष्म्याद्यावृतचामराः ॥ १८१ ॥ बन्धूककुसु
माभासो मुक्ताहारलसत्कुचाः॥ उत्फुल्लांभोजनयना मदविभ्रममंथराः ॥ १८२ ॥ लक्ष्मी सरस्वती चैव धृतिः प्रीतिस्ततः परम् ॥ कांतिः शांतिस्तु
ष्टिपुष्टिबीजाद्या ङेनमोंतिकाः ॥ १८३ ॥ भृगुः खड्गाशचन्द्राढ्यो देव्या बीजमुदाहृतम् ॥ ह्रस्वत्रयक्लीबसर्वरहितस्वरसंयुतम् ॥ १८४ ॥ देव्या बीजं
क्रमादासामादौ च विनियोजयेत्॥दलाग्रेषु यजेच्छंखं शार्ङ्गं चक्रमसिं गदाम् ॥ १८५ ॥ अंकुशं मुसलं पाशं स्वमुद्रामनुभिः पृथक् ॥महाजलचरा
यांते वर्मास्त्रं वह्निवल्लभा॥ १८६ ॥पांचजन्या प्रताराद्यो नमोंतः शंखपूजने॥ शार्ङ्गाय सशयांते च वर्मास्त्रं वह्निवल्लभा ॥ १८७ ॥ शार्ङ्गाय हृदयं
मन्त्रो महाद्यः शार्ङ्गपूजने ॥ सुदर्शनमहांते तु चक्रराजपदं वदेत् ॥ १८८ ॥ हययुग्मं सर्वदुष्टभयमन्ते कुरुद्वयम्॥छिंधिद्वयं ततः पश्चाद्विदारययुगं
ततः ॥ १८९ ॥ परमन्त्रान् ग्रसद्वन्द्वं भक्षयद्वितयं पुनः ॥भूतानि त्रासयद्वंद्वं वर्मफड्वह्निसुंदरी ॥ १९० ॥ सुदर्शनाय हृदयं प्रोक्तश्चक्रार्चने मनुः ॥
महाखड्गतीक्ष्णपदाच्छिधियुग्मं समीरयेत् ॥ १९१ ॥ हुं फट् स्वाहा च खड्गाय नमः खड्गार्चने मनुः ॥ महाकौमोदकीत्यन्ते वदेच्चैव महाबले ॥
॥ १९२ ॥ सर्वासुरांतके पश्चात्प्रसीदयुगलेति च ॥ वर्मास्त्रवह्निजायांतकौमोदकि हृदंतिमः ॥ १९३ ॥ कौमोदक्यर्चने प्रोक्तो मन्त्रः सर्वार्थसा
धकः ॥ महांकुशपदात्कुट्टयुग्मं हुंफट्वसुप्रिया ॥ १९४॥ अंकुशाय नमः प्रोक्तो मन्त्रश्चैवांकुशार्चने ॥संवर्तकमहांते तु मुसलेति पदं वदेत् ॥ १९५ ॥
योधयद्वितयं वर्म फडंते वह्निसुंदरी॥ मुसलाय नमः प्रोक्तो मन्त्रो मुसलपूजने॥ १९६॥महापाशपदाद्बंधद्वयमाकर्षयद्वयम्॥हुं फट् स्वाहा च पाशाय

नमः पाशार्चने मनुः ॥ १९७ ॥ ताराद्या मनवो ह्येते ततः शक्रादिकान्यजेत् ॥ १९८ ॥ वज्राद्यानपि संपूज्य सर्वसिद्धीश्वरो भवेत् ॥ मासमात्रं तु
कुसुमैः पूजयित्वा हयारिजैः ॥ १९९ ॥ कुमुदैर्वा प्रजुहुयादष्टोत्तरसहस्रकम् ॥ मासमात्रेण वश्यास्स्युस्तस्य सर्वे नृपोत्तमाः ॥ २०० ॥ यस्य नाम
युतं मंत्रं जपेदयुतसंख्यया ॥ स भवेद्दासवत्सद्यो मंत्रस्यास्य प्रभावतः ॥ २०१ ॥ बहुना किमिहोक्तेन मनुनानेन साधकः॥साधयेत्सकलान्कामा
न्विष्णुतुल्यो न संशयः॥२०२॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे सप्ततितमोऽध्यायः॥७०॥सनत्कुमार उवाच॥ शृणु नारद
वक्ष्यामि दिव्यान्नरहरेर्मनून्॥यान्समाराध्य ब्रह्माद्याश्चक्रुः सृष्ट्यादि कर्म वै॥१॥ संवर्तकश्चंद्रमौलिर्मनुर्वह्निविभूषितः॥एकाक्षरः स्मृतो मंत्रो भजतां सुर
पादपः ॥२॥ मुनिरत्रिश्च जगती छंदो बुद्धिमतां वर ॥ देवता नृहरिः प्रोक्तो विनियोगोऽखिलाप्तये ॥ ३ ॥ क्षं बीजं शक्तिरी प्रोक्ता षड्दीर्घेण षडंग
कम् ॥ अर्केन्दुवह्निनयनं शरदिंदुरुचं करैः ॥ ४ ॥ धनुश्चक्राभयवरान्दधतं नृहरिं स्मरेत् ॥ लक्षं जपस्तद्दशांशहोमश्च घृतपायसैः ॥ ५ ॥यजेत्पीठे
वैष्णवे तु केसरेष्वंगपूजनम् ॥ खगेशं शंकरं शेषं शतानन्दं दिगालिषु ॥६॥ श्रियं ह्रियं धृतिं पुष्टिं कोणपत्रेषु पूजयेत् ॥ दंतच्छदेषु नृहरींस्तावतः
पूजयेत्क्रमात् ॥ ७ ॥ कृष्णो रुद्रो महाघोरो भीमो भीषण उज्ज्वलः॥करालो विकरालश्च दैत्यांतो मधुसूदनः ॥ ८ ॥ रक्ताक्षः पिंगलाक्षश्चांजनो
दीप्तरुचिस्तथा ॥ सुघोरकश्च सुहनुर्विश्वको राक्षसांतकः ॥ ९ ॥ विशालको धूम्रकेशो हयग्रीवो घनस्वनः ॥ मेघवर्णः कुंभकर्णः कृतांततीव्रतेज
सौ ॥ १० ॥ अग्निवर्णो महोग्रश्च ततो विश्वविभूषणः ॥ विघ्नक्षमो महासेनः सिंहा द्वात्रिंशदीरिताः ॥ ११ ॥ तद्बहिः प्रार्चयेद्दिक्ष्वाँल्लोकपालान्सहेति
कान् ॥ एवं सिद्धे मनौ मन्त्री साधयेदखिलेप्सितान् ॥ १२ ॥ विष्णुः प्रद्युम्नयुक् शार्ङ्गी साग्निर्वीरं महांस्ततः ॥ विष्णुं ज्वलंतं भृग्वीशो
जलं पद्मासनं ततः ॥ १३ ॥ हरिस्तु वासुदेवाय वैकुंठो विष्णुसंयुतः ॥ गदी सेंदुनृसिंहं च भीषणं भद्रमेव च ॥ १४ ॥ मृत्युमृत्यु
ततः शौरिर्भानोर्नारायणान्वितः ॥ नृहरेर्द्वाविंशदर्णोऽयं मन्त्रः साम्राज्यदायकः ॥ १५ ॥ ब्रह्मा मुनिस्तु गायत्री छंदोऽनुष्टुबुदाहृतम् ॥
देवता नृहरिश्चास्य सर्वेष्टफलदायकः ॥ १६ ॥ हं बीजं इं तथा शक्तिर्विनियोगोऽखिलाप्तये ॥ वेदैश्चतुर्भिर्वसुभिः षड्भिः षड्भिर्युगाक्षरैः ॥ १७ ॥
षडंगानि विधायाथ मूर्ध्नि भाले च नेत्रयोः ॥ मुखबाह्वंघ्रिसंध्यग्रेष्वथ कुक्षौ तथा हृदि ॥ १८ ॥ गले पार्श्वद्वये पृष्ठे ककुद्यर्णान्मनूद्भवान् ॥
प्रणवांतरितान् कृत्वा न्यसेत्साधकसत्तमः ॥ १९ ॥ नृसिंहसांनिध्यकरो न्यासो दशविधो यथा ॥ करांघ्र्यष्टाद्यंगुलीषु पृथगाद्यंतपर्वणोः २०॥ ॥
सर्वांगुलीषु विन्यस्यावशिष्टं तलयोर्न्यसेत् ॥ शिरोललाटे भ्रूमध्ये नेत्रयोः कर्णयोस्तथा ॥२१॥ कपोलकर्णमूले च चिबुकोर्द्ध्वाधरोष्ठके ॥

कण्ठे घोणे च भुजयोर्हृत्तनौ नाभिमण्डले ॥ २२ ॥ दक्षान्पदोस्तले कट्यां मेढ्रोर्वोर्जानुजंघयोः ॥ गुल्फे पादकरांगुल्योः सर्वसन्धिषु रोमसु ॥
॥२३॥ रक्तास्थिमज्जासु तनौ न्यसेद्वर्णान्विचक्षणः ॥ वर्णान्पदे गुल्फजानुकटिनाभिहृदि स्थले ॥२४॥ बाह्वोः कंठे च चिबुके चौष्ठे गण्डे प्रविन्य
सेत् ॥ कर्णयोर्वदने नासापुटे नेत्रे च मूर्द्धनि ॥ २५ ॥ पदानि तु मुखे मूर्ध्नि नसि चक्षुषि कर्णयोः ॥ आस्ये च हृदय नाभौ पादान्सर्वांगके
न्यसेत् ॥२६॥ अर्द्धद्वयं न्यसेन्मूर्ध्नि आहृत्पादात्तदंगकम् ॥ उग्रादीनि पदानीह मृत्युमृत्युं नमाम्यहम् ॥ २७ ॥ इत्यंतान्यास्यकघ्राणचक्षुःश्रोत्रेषु
पक्ष्मसु ॥ हृदि नाभौ च कट्यादिपादांतं नवसु न्यसेत् ॥२८॥ वीराद्यानपि तान्येव यथापूर्व प्रविन्यसेत् ॥ नृसिंहाद्यानि तान्येव पूर्ववद्विन्यसे
त्सुधीः ॥ २९ ॥ चंद्राग्निवेदषड्रामनेत्रदिग्बाहुभूमितान् ॥ विभक्तान्मंत्रवर्णांश्च क्रमात्स्थानेषु विन्यसेत् ॥ ३० ॥ मूले मूलाच्च नाभ्यंतं नाभ्यादि
हृदयावधि ॥ हृदयाद्भ्रूयुगांतं तु नेत्रत्रये च मस्तके ॥ ३१ ॥ बाह्वोरंगुलिषु घ्राणमूर्द्धादि चरणावधि ॥ विन्यसेन्नामतो धीमान्हरिन्यासोऽय
मीरितः ॥ ३२ ॥ न्यासस्यास्य तु माहात्म्यं जानात्येको हरिः स्वयम् ॥ एवं न्यासविधिं कृत्वा ध्यायेच्च नृहरिं हृदि ॥ ३३ ॥ गलासक्तलसद्बाहु
स्पृष्टकेशोऽब्जचक्रधृक् ॥ नखाग्रभिन्नदैत्येशो ज्वालामालासमन्वितः ॥ ३४ ॥ दीप्तजिह्वस्त्रिनयनो दंष्ट्रोग्रं वदनं वहन् ॥ नृसिंहोऽस्मान्सदा पातु
स्थलांबुगगनोपगः ॥३५॥ ध्यात्वैवं दर्शयेन्मुद्रां नृसिंहस्य महात्मनः ॥ जानुमध्यगतौ कृत्वा चिबुकोष्ठौ समावुभौ ॥३६॥ हस्तौ च भूमिसंलग्नौ
कंपमानः पुनःपुनः ॥ मुखं विजृंभितं कृत्वा लेलिहानां च जिह्विकाम् ॥ ३७ ॥ एषा मुद्रा नारसिंही प्रधानेति प्रकीर्तिता ॥ वामस्यांगुष्ठतो बद्ध्वा
कनिष्ठामंगलीत्रयम् ॥ ३८॥ त्रिशूलवत् संमुखोर्द्ध्वे कुर्यान्मुद्रां नृसिंहगाम् ॥ अंगुष्ठाभ्यां च करयोस्तथाऽऽक्रम्य कनिष्ठके ॥ ३९ ॥ अधोमुखाभिः
शिष्टाभिः शेषाभिर्नृहरौ ततः॥हस्तावधोमुखौ कृत्वा नाभिदेशे प्रसार्य च ॥ ४० ॥ तर्जनीभ्यां नयेत्स्कंधौ प्रोक्ता चांत्रणमुद्रिका ॥ हस्तावूर्द्ध्वमुखौ
कृत्वा तले संयोज्य मध्यमे ॥ ४१॥ अनामायां तु वामायां दक्षिणां तु विनिक्षिपेत् ॥ तर्जन्यौ पृष्ठतो लग्नौ अंगुष्ठौ तर्जनीश्रितौ॥ ४२ ॥चक्रमुद्रा
भवेदेषा नृहरेः संनिधौ मता ॥ चक्रमुद्रा तथा कृत्वा तर्जनीभ्यां तु मध्यमे ॥ ४३ ॥ पीडयेदंष्ट्रमुद्रैषा सर्वपापप्रणाशिनी ॥ एता मुद्रा नृसिंहस्य
सर्वमंत्रेषु संमताः ॥ ४४ ॥ वर्णलक्षं जपेन्मंत्र तद्दशांशं च पायसैः ॥ घृताक्तैर्जुहुयाद्वह्नौ पीठे पूर्वोदितेऽर्चयेत् ॥ ४५ ॥ अंगान्यादौ समाराध्य
दिक्पत्रेषु यजेत्पुनः ॥ गरुडादीन् श्रीमुखांश्च विदिक्षु लोकपान्बहिः ॥४६॥ एवं संसाधितो मंत्रः सर्वान्कामान्प्रपूरयेत् ॥ सौम्ये कार्ये स्मरेत्सौम्यं
क्रूरं क्रूरे स्मरेद्बुधः ॥ ४७ ॥ पूर्वमृत्युपदे शत्रोर्नाम कृत्वा स्वयं हरिः ॥ निशितैर्नखदंष्ट्राग्रैः खाद्यमानं च संस्मरेत् ॥ ४८ ॥ अष्टोत्तरशतं नित्यं

जपेन्मन्त्रमतंद्रितः ॥ जायते मण्डलादर्वाक् शत्रुर्वै शमनातिथिः ॥४९॥ध्यानभेदा नथो वक्ष्ये सर्वसिद्धिप्रदायकान्॥ श्रीकामः सततं ध्यायेत्पूर्वोक्तं
नृहरिं सितम् ॥ ५० ॥ वामांकस्थितया लक्ष्म्यालिंगितं पद्महस्तया ॥ विषमृत्यूपरोगादिसर्वोपद्रवनाशनम् ॥ ५१ ॥ नरसिंहं महाभीमं कालानल
समप्रभम् ॥ आंत्रमालाधरं रौद्रं कण्ठहारेण भूषितम्॥५२॥ नागयज्ञोपवीतं च पञ्चाननसुशोभितम्॥ चन्द्रमौलिं नीलकण्ठं प्रतिवक्रं त्रिनेत्रकम् ॥
॥ ५३ ॥ भुजैः परिघसंकाशैर्दशभिश्चोपशोभितम् ॥ अक्षसूत्रं गदापद्मं शंखं गोक्षीरसन्निभम् ॥ ५४॥ धनुश्च मुशलं चैव बिभ्राणं चक्रमुत्तमम् ॥
खड्गं शूलं च बाणं च नृहरिं रुद्ररूपिणम् ॥५५॥ इन्द्रगोपाभनीलाभं चन्द्राभं स्वर्णसन्निभम् ॥ पूर्वादि चोत्तरं यावदूर्द्ध्वास्यं सर्ववर्णकम् ॥५६॥
एवं ध्यात्वा जपेन्मंत्री सर्वव्याधिविमुक्तये ॥ सर्वमृत्युहरं दिव्य स्मरणात्सर्वसिद्धिदम्॥५७॥ध्यायेद्यदा महत्कर्म तदा षोडशहस्तवान् ॥ नृसिंहः
सर्वलोकेशः सर्वाभरणभूषितः ॥ ५८ ॥ द्वौ विदारणकर्मांतौ द्वौ चांत्रोद्धरणान्वितौ ॥ शङ्खचक्रधरौ द्वौ तु द्वौ च बाणधनुर्द्धरौ॥५९॥खड्गखेटधरौ
द्वौ च द्वौ गदापद्मधारिणौ ॥ पाशांकुशधरौ द्वौ च द्वौ रिपोर्मुकुटार्पितौ ॥ ६० ॥ इति षोडशदोर्दंडमण्डितं नृहरिं विभुम्॥ध्यायेन्नारद नीलाभमुग्र
कर्मण्यनन्यधीः ॥ ६१ ॥ ध्येयो महत्तमे कार्ये द्वात्रिंशद्धस्तवान्बुधैः ॥ नृसिंहः सर्वभूतेशः सर्वसिद्धिकरः परः॥ ६२ ॥ दक्षिणे चक्रपद्मे च परशुं
पाशमेव च ॥ हलं च मुशलं चैव अभयं चांकुशं तथा ॥ ६३ ॥ पट्टिशं भिंदिपालं च खड्गमुद्गरतोमरान् ॥ वामभागे करैः शंङ्खं खेटं पाशं च
शूलकम् ॥६४॥ अग्निं च वरदं शक्तिं कुंडिकां च ततः परम् ॥ कार्मुकं तर्जनीमुद्रां गदां डमरुशूर्पकौ ॥ ६५ ॥ द्वाभ्यां कराभ्यां च रिपोर्जानु
मस्तकपीडनम् ॥ ऊर्द्ध्वीकृताभ्यां बाहुभ्यां आंत्रमालाधरं विभुम् ॥६६॥अधःस्थिताभ्यां बाहुभ्यां हिरण्यकविदारणम्॥प्रियंकरं च भक्तानां दैत्यानां
च भयंकरम्॥ ६७ ॥ नृसिंहं तं स्मरेदित्थं महामृत्युभयापहम्॥एवं ध्यात्वा जपेन्मन्त्री सर्वकार्यार्थसिद्धये॥६८॥ अथोच्यते ध्यानमन्यन्मुखरोगहरं
शुभम् ॥ स्वर्णवर्णसुपर्णस्थं विद्युन्मालासटान्वितम् ॥६९॥ कोटिपूर्णेन्दुवण च सुमुखं त्र्यक्षिवीक्षणम् ॥पीतवस्त्रोरुभूषाढ्यं नृसिंहं शान्तविग्रहम्॥
चक्रशंखाभयवरान्दधतं करपल्लवैः॥७०॥क्ष्वेडरोगादिशमनं स्वैर्ध्यानैः सुरवंदितम्॥ शत्रोः सेनानिरोधेन यत्नं कुर्याच्च साधकम् ॥७१ ॥ अक्षकाष्ठैरे
धितेऽग्नौ विचिंत्य रिपुमर्दनम् ॥ देवं नृसिंहं संपूज्य कुसुमाद्युपचारकैः॥७२॥ समूलमूलैर्जुहुयाच्छरैर्दशशतं पृथक् ॥ रिपुं खादन्निव जपेन्निर्दहन्निव
तं क्षिपेत् ॥७३॥हुत्वा सप्तदिनं मन्त्री सेनामिष्टां महीपतेः॥प्रस्थापयेच्छुभे लग्ने परराष्ट्रजयेच्छया॥७४॥तस्याः पुरस्तान्नृहरिं निघ्नन्तं रिपुमण्डलम्॥
स्मृत्वा जपं प्रकुर्वीत यावदायाति सा पुनः॥७५॥निर्जित्य निखिलाञ्छत्रून्सह वीरश्रियासुखात्॥प्रीणयेन्मान्त्रिणं राजा विभवैः प्रीतमानसः ॥७६॥

गजाश्वरथरत्नैश्च ग्रामक्षेत्रधनादिभिः॥यदि मन्त्री न तुष्येत तदानर्थो महीपतेः॥७७। जायते तस्य राष्ट्रेषु प्राणेभ्योऽपि महाभयम् ॥ अष्टोत्तरशत
मूलमन्त्रमंत्रितभस्मना ॥ ७८ ॥ नाशयेन्मूषिकालूतावृश्चिकाद्युत्थितं विषम् ॥ लिप्तांगः सर्वरोगैश्च मुच्यते नात्र संशयः ॥७९॥ सेवंतीकुसुमैर्हुत्वा
महतीं श्रियमाप्नुयात ॥ औदुम्बरसमिद्भिस्तु भवेद्धान्यसमृद्धिमान्॥ ८० ॥ अपूपलक्षहोमे तु भवेद्वैश्रवणोपमः ॥ क्रुद्धस्य सन्निधौ राज्ञो जपेदष्टो
त्तरं शतम्॥८१॥सद्यो नैर्मल्यमाप्नोति प्रसादं चाधिगच्छति॥कुंदप्रसूनैरुदयं मोचाभिर्विघ्ननाशनम्॥८२॥तुलसीपत्रहोमेन महतीं कीर्तिमाप्नुयात्॥
शाल्युत्थसक्तुहोमेन वशयेदखिलं जगत्॥८३॥मधूकपुष्पैरिष्टं स्यात्स्तंभनं धात्रिखण्डकैः ॥ दधिमध्वाज्यमिश्रां तु गुडूचीं चतुरंगुलाम्॥८४॥जुहुया
दयुतं योऽसौ शतं जीवति रोगजित्॥शनैश्चरदिनेऽश्वत्थं स्पृष्ट्वा चाष्टोत्तरं शतम्॥८५॥जपेज्जित्वासोऽपमृत्युं शतवर्षाणि जीवति॥अथ त संप्रवक्ष्यामि
यंत्रं त्रैलोक्यमोहनम् ॥८६॥ यस्य संधारणादेव भवेयुःसर्वसंपदः ॥श्वेतभूर्ज्जे लिखेत्पद्मं द्वात्रिंशतिंसहसंयुतम्॥८७॥मध्ये सिंहे स्वबीजं च लिखेत्पू
र्ववदेव तु॥श्रीबीजेन तु तु संवेद्य वलयत्रयसंयुतम्॥८८॥पाशांकुशैश्च संवेष्ट्य पूजयेद्यंत्रमुत्तमम् ॥त्रैलोक्यमोहनं नाम सर्वकामार्थसाधनम् ॥ ८९ ॥
चक्रराजं महाराजं सर्वचक्रेश्वरेश्वरम् ॥ धारणाज्जयमाप्नोति सत्यं सत्यं न संशयः ॥ ९० ॥ अथ यन्त्रांतरं वक्ष्ये शृणु नारद सिद्धिदम् ॥ अष्टारं
विलिखेद्यंत्रं श्लक्ष्णं कर्णिकया युतम् ॥ ९१ ॥ मूलमंत्रं लिखेत्तत्र प्रणवेन समन्वितम् ॥ एकाक्षरं नारसिंहं मध्ये चैव ससाध्यकम् ॥ ९२ ॥ जपे
दष्टसहस्रं तु सूत्रेणावेष्ट्य तद्बहिः ॥ स्वर्णरौप्यसुताम्रैश्च वेष्टयेत्क्रमतः सुधीः ॥ ९३ ॥ लाक्षया वेष्टितं कृत्वा पुनर्मंत्रेण मंत्रयेत् ॥ कंठे भुज शिखायां
वा धारयेद्यंत्रमुत्तमम् ॥ ९४ ॥ नरनारीनरेंद्राश्च सर्वे स्युर्वशगा भुवि ॥ दुष्टास्तं नैव बाधंते पिशाचोरगराक्षसाः ॥ ९५ ॥ यंत्रराजप्रसादेन सर्वत्र
जयमाप्नुयात् ॥ अथान्यत्संप्रवक्ष्यामि यंत्रं सर्ववशंकरम् ॥ ९६ ॥ द्वादशारं महाचक्रं पूर्ववद्विलिखेत्सुधीः ॥ मात्राद्वादशसंभिन्नदलेन विलिखेद्बुधः
॥ ९७ ॥ मध्ये मंत्रं शक्तियुक्तं श्रीबीजेन तु वेष्टयेत्॥ कालांतकं नाम चक्रं सुरासुरवशंकरम् ॥ ९८ ॥ चक्रमुल्लेखयेद्भूर्जे सर्वशत्रुनिवारणम्॥ यस्य
धारणमात्रेण सर्वत्र विजयी भवेत ॥ ९९ ॥ अथ सर्वेष्टदं ज्वालामालिसंज्ञं वदाम्यहम् ॥ बीजं हृद्भगवान्ङेंतो नरसिंहाय तत्परम् ॥ १०० ॥
ज्वालिने मालिने दीप्तदंष्ट्राय अग्निने पदम् ॥ त्राय सर्वादिरक्षोघ्नाय च नः सर्वभूपदम् ॥ १०१ ॥ हारिर्विनाशनायांते सर्वज्वरविनाशनः ॥
नामांते दहयुग्मं च पचद्वयमुदीरयेत् ॥ १०२ ॥ रक्षयुग्मं च वर्मास्त्रठद्वयांतो ध्रुवादिकः ॥ अष्टषष्ट्यक्षरैः प्रोक्तो ज्वालामाली मनूत्तमः ॥ १०३ ॥
पुण्यादिकं तु पूर्वोक्तं त्रयोदशभिरक्षरैः ॥ पंक्तिभी रुद्रसंख्याकैरष्टादशभिरक्षरैः ॥ १०४ ॥ भानुभिः करणैर्मंत्री वरैरंगानि कल्पयेत् ॥

पूर्वोक्तरूपिणं ज्वालामालिनं नृहरिं स्मरेत् ॥ १०५ ॥ लक्षं जपो दशांशं च जुहुयात्कपिलाघृतैः ॥ रौद्रापस्मारभूतादिनाशकोऽयं मनूत्तमः ॥
॥ १०६ ॥ प्राणो माया नृसिंहश्च सृष्टिर्ब्रह्मास्त्रमीरितः ॥ षडक्षरो महामंत्रः सर्वाभीष्टप्रदायकः ॥ १०७ ॥ मुनिर्ब्रह्मा तथा छंदः पंक्तिर्देवो
नृकेसरी ॥ षड्दीर्घभाजा बीजेन षडंगानि समाचरेत् ॥१०८ ॥ पूर्वोक्तेनैव विधिना ध्यानं पूजां समाचरेत् ॥ सिद्धेन मनुनानेन सर्वसिद्धिर्भवे
न्नृणाम् ॥ १०९ ॥ रमाबीजादिकोऽनुष्टुप्त्रयस्त्रिशार्णवान्मनुः ॥ प्रजापतिर्मुनिश्च्छंदोऽनुष्टुप् लक्ष्मीनृकेसरी ॥ ११० ॥ देवता च पदैः सर्वेणांगकल्प
नमीरितम् ॥ विन्यस्यैवं तु पंचांगं स्वात्मरक्षां समाचरेत् ॥ ११२ ॥ संस्पृशन् दक्षिणं बाहुं शरभस्य मनुं जपेत् ॥ प्रणवो हच्छिवायेति महते
शरभाय च ॥ ११२ ॥ वह्निप्रियांतो मंत्रस्तु रक्षार्थे समुदाहृतः ॥ अथवा राममंत्रांते परं क्षद्वितयं पठेत् ॥ ११३ ॥ अथवा केशवाद्यैस्तु रक्षां
कुर्यात्प्रयत्नतः ॥ केशवः पातु पादौ मे जंघे नारायणोऽवतु ॥११४॥ माधवो मे कटिं पातु गोविन्दो गुह्यमेव च ॥ नाभिं विष्णुश्च मे पातु जठरं
मधुसूदनः ॥ ११५ ॥ ऊरू त्रिविक्रमः पातु हृदयं पातु मे नरः ॥ श्रीधरः पातु कण्ठं च हृषीकेशो मुखं मम ॥११७॥ पद्मनाभः स्तनौ पातु शीर्षं
दामोदरोऽवतु ॥ एवं विन्यस्य चांगेषु जपकाले तु साधकः ॥ ११७ ॥ निर्भयो जायते भूतवेतालग्रहराक्षसात् ॥ पुनर्न्यसेत्प्रयत्नेन ध्यानं कुर्व
न्समाहितः ॥ ११८ ॥ पुरस्तात्केशवः पातुः चक्री जांबूनदप्रभः ॥ पश्चान्नारायणः शंखी नीलजीमूतसन्निभः ॥ ११९ ॥ उर्द्ध्वमिंदीवरश्यामो माध
वस्तु गदाधरः ॥ गोविन्दो दक्षिणे पार्श्वे धन्वी चन्द्रप्रभो महान् ॥ १२० ॥ उत्तरे हलधृग्विष्णुः पद्मकिंजल्कसन्निभः॥आग्नेय्यामरविंदाक्षो मुसली
मधुसूदनः ॥ १२१ ॥ त्रिविक्रमः खड्गपाणिर्नैर्ऋत्यां ज्वलनप्रभः ॥ वायव्यां माधवो वज्री तरुणादित्यसन्निभः ॥ १२२ ॥ ऐशान्यां पुण्डरीकाक्षः
श्रीधरः पट्टिशायुधः ॥ विद्युत्प्रभो हृषीकेश ऊर्द्ध्वे पातु समुद्गरः ॥ १२३ ॥ अधश्च पद्मनाभो मे सहस्रांशुसमप्रभः ॥ सर्वायुधः सर्वशक्तिः सर्वाद्यः
सर्वतोमुखः ॥ १२४ ॥ इन्द्रगोपप्रभः पायात्पाशहस्तोऽपराजितः ॥ स बाह्याभ्यंतरे देहमव्याद्दामोदरो हरिः ॥ १२५ ॥ एवं सर्वत्र निश्छिद्रं नाम
द्वादशपञ्जरम् ॥ प्रविष्टोऽहं न मे किंचिद्भयमस्ति कदाचन ॥ १२६ ॥ एवं रक्षां विधायाथ दुर्द्धर्षो जायते नरः ॥ सर्वेषु नृहरेर्मंत्रवर्गेष्वेवं
विधिर्मतः ॥ १२७ ॥ पूर्वोक्तविधिना सव ध्यानपूजादिकं चरेत् ॥ जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ॥ १२८ ॥ नमस्तेऽस्तु हृषीकेश महा
पुरुष ते नमः॥ इत्थं संप्रार्थ्य जप्त्वा च पठित्वा विसृजेद्विभुम्॥१२९॥एवं सिद्धे मनौ मन्त्री जायते सम्पदां पदम्॥जयद्वयं श्रीनृसिंहेत्यष्टार्णोऽयं
मनूत्तमः ॥१३०॥मुनिर्ब्रह्माथ गायत्री छन्दः प्रोक्तोऽस्य देवता ॥ श्रीमाञ्जयनृसिंहस्तु सर्वाभीष्टप्रदायकः॥१३१॥ सेंदुगोविंदपूर्वेण वियता सेन्दुना

पुनः ॥ षड्दीर्घाढ्ये न कुर्वीत षडंगानि विशालधीः ॥ १३२ ॥ ततो ध्यायेद्धृदि विभुं नृसिंहं चन्द्रशेखरम्॥१३३॥श्रीमन्नृकेसरितनो जगदेकबन्धो
श्रीनीलकण्ठ करुणार्णव सामराज ॥ वह्नीन्दुतीव्रकरनेत्र पिनाकपाणे शीतांशुशेखर रमेश्वर पाहि विष्णो ॥ १३४ ॥ ध्यात्वैवं प्रजपेल्लक्षाष्टकं मन्त्री
दशांशतः ॥ साज्येन पायसान्नेन जुहुयात्प्राग्वदर्चनम् ॥१३५॥ तारो माया स्वबीजांते कर्णोग्रं वीरमीरयेत् ॥ महाविष्णुं ततो ब्रूयाज्ज्वलंतं सर्व
तोमुखम् ॥ १३६ ॥ स्फुरद्वयं प्रस्फुरेति द्वयं घोरपदं ततः ॥ वदेद्धोरतरं ते तु तनुरूपं च ठद्वयम् ॥ १३७ ॥ प्रचटद्वयमाभाष्य कहयुग्म च
मद्वयम् ॥ बन्धद्वयं घातयेति द्वयं वर्मास्त्रमीरयेत् ॥ १३८ ॥ नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम्॥ पञ्चाशीत्यक्षरो मन्त्रो भजतामिष्टदायकः॥
॥ १३९ ॥ ऋषी ह्यघोरब्रह्माणौ तथा त्रिष्टुबनुष्टुभौ ॥ छन्दसी च तथा घोरनृसिंहो देवता मतः ॥ १४० ॥ ध्यानार्चनादिकं चास्य कुर्यादानुष्टुभं
सुधीः ॥ विशेषान्मन्त्रवर्योऽयं सर्वरक्षाकरो मतः ॥१४१॥ बीजं जययुगं पश्चान्नृसिंहेत्यष्टवर्णवान् ॥ ऋषिः प्रजापतिश्चास्यानुष्टुप्छन्द उदाहृतम् ॥
॥१४२॥ विदारणनृसिंहोऽस्य देवता परिकीर्तितः ॥जं बीजं हं तथा शक्तिर्विनियोगोऽखिलाप्तये॥१४३॥दीर्घाढ्येन नृसिंहेन षडंगन्यासमाचरेत्॥
रौद्रं ध्यायेन्नृसिंहं तु शत्रुवक्षोविदारणम् ॥ १४४ ॥ नखदंष्ट्रायुधं भक्ताभयद श्रीनिकेतनम् ॥ तप्तहाटककेशांतज्वलत्पावकलोचनम् ॥ १४५ ॥
वज्राधिकनखस्पर्श दिव्यसिंह नमोऽस्तु ते ॥ मुनिर्ब्रह्मा समाख्यातोऽनुष्टुप्छंदः समीरितः ॥ १४६ ॥ देवतास्य रदार्णस्य दिव्यपूर्वो नृकेसरी ॥
पादैश्चतुर्भिः सर्वेण पंचांगानि समाचरेत् ॥१४७॥ ध्यानपूजादिकं सर्वं प्रागवत्प्रोक्तं मुनीश्वर ॥ पूर्वोक्तानि च सर्वाणि कार्याण्यायांति सिद्धताम् ॥
॥ १४८॥ तारो नमो भगवते नरसिंहाय हृच्च ते ॥ जस्तेजसे आविराविर्भव वज्रनखांततः ॥ १४९ ॥ व्रजदंष्ट्रेति कर्मांते त्वासयाक्रंदयद्वयम् ॥
तमो ग्रसद्वयं पश्चात्स्वाहांते चाभयं ततः ॥ १५० ॥आत्मन्यंते च भूयिष्ठा ध्रुवो बीजांतिमो मनुः ॥ द्विषष्ट्यर्णोऽस्य मुन्यादि सर्वं पूर्ववदीरितम् ॥
॥ १५१ ॥ तारो नृसिंहबीजं च नमो भगवते ततः ॥ नरसिंहाय तारश्च बीजमस्य यदा ततः ॥ १५२ ॥ रूपाय तारः स्वबीजं कूर्मरूपाय ता
कम् ॥ बीजं वराहरूपाय तारो बीजं नृसिंहतः ॥ १५३ ॥ रूपाय तार स्वं बीजं वामनांते च रूपतः ॥ पापध्रुवत्रयं बीजं रामाय निगमादितः
॥ १५४ ॥ बीजं कृष्णाय तारांते बीजं च कल्किने ततः ॥ जयद्वयं ततः शालग्रामांते च निवासिने ॥ १५५ ॥ दिव्यसिंहाय ङेन्तः स्यात्स्वयंभूः
पुरुषाय हृत् ॥ तारः स्वं बीजमित्येष महासाम्राज्यदायकः ॥ १५६ ॥ नृसिंहमन्त्रः खांकार्णो मुनिरत्रिः प्रकीर्तितः ॥ छन्दोऽतिजगती प्रोक्तं देवता
कथिता मनोः ॥ १५७ ॥ दशावतारो नृहरिं बीजं खं शक्तिरव्ययः ॥ षड्दीर्घाढ्येन बीजेन कृत्वांगानि च भावयेत् ॥१५८॥ अनेकचन्द्रप्रतिमो

लक्ष्मीमुखकृतेक्षणः ॥ दशावतारैः सहितस्तनोतु नृहरिः सुखम् ॥ १५९ ॥ जपोऽयुतं दशांशेन होमः स्यात्पायसेन तु ॥ प्रागुक्ते पूजयेत्पीठे मूर्तिं
संकल्प्य मूलतः ॥१६०॥ अंगान्यादौ च मत्स्याद्यान्दिग्दलेषु ततोऽर्चयेत् ॥ इन्द्राद्यानपि वज्राद्यान्सम्पूज्येष्टमवाप्नुयात॥१६१॥सहस्रार्णं महामंत्रं
वक्ष्ये तंत्रेषु गोपितम् ॥ तारो माया रमा कामो बीजं क्रोधपदं ततः ॥१६२ ॥मूर्तें नृसिंहशब्दांते महापुरुष ईरयेत्॥प्रधानधर्माधर्मान्ते निगडेतिपदं
वदेत् ॥१६३॥ निर्मोचनांते कालेति ततः पुरुष ईरयेत् ॥ कालांतकसहस्त्रोयं स्वेश्वरांते सहग्जलम् ॥१६४॥ श्रांतांते तु निविष्टेति चैतन्यचित्सदा
ततः ॥ भासकांते तु कालाद्यतीतनित्योदितेति च ॥ १६५ ॥ उदयास्तमयाक्रान्तमहाकारुणिकेति च ॥ हृदयाब्जचतुश्चोक्ता दलांते तु निवि
ष्टितः ॥ १६६ ॥ चैतन्यात्मंश्चतुरामन्द्वादशात्मंस्ततः परम् ॥चतुर्विंशात्मन्नन्ते तु पञ्चविंशात्मन्नित्यपि ॥१६७॥ बको हरिः सहस्रांते मूर्तें एह्येहि
शब्दतः ॥ भगवन्नृसिंहपुरुष क्रोधेश्वर रसा सह ॥१६८॥ स्ववंदितांते पादेति कल्पांताग्निसहस्र च ॥ कोट्याभांते महादेव निकायदशशब्दतः ॥
॥६६९ ॥ शतयज्ञातलं ज्ञेयं ततश्चामलयुग्मकम् ॥ पिंगलेक्षणसटादंष्ट्रा दंष्ट्रायुध नखायुध ॥ १७० ॥ दानवेंद्रांतकावह्निणशोणितपदं ततः ॥ सं
सक्तिविग्रहांते तु भूतापस्मारयातुधान् ॥ १७१ ॥ सुरासुरवंद्यमानपादपंकजशब्दतः ॥ भगवन्व्योमचक्रेश्वरांते तु प्रभवाप्यय ॥ १७२ ॥ रूपे
णोत्तिष्ठ चोत्तिष्ठ अविद्यानिचयं दह ॥ दह ज्ञानैश्वर्यमंते प्रकाशययुगं ततः ॥ १७३ ॥ ॐ सर्वज्ञ अरोषांते जंभाजृंभ्यवतारकम् ॥ सत्यपुरुष
शब्दांते सदसन्मध्य ईरयेत् ॥ १७४ ॥ निविष्टं मम दुःस्वप्नभयं निगडशब्दतः ॥ भयं कांतारशब्दांते भयं विषपदात्ततः ॥ १७५ ॥ ज्वरांते
डाकिनी कृत्याध्वरेवतीभयं ततः ॥ अशन्यंते भयं दुर्भिक्षभयं मारीशब्दतः ॥१७६॥ भयं मारीचशब्दांते भयं छायापदं ततः ॥ स्कंदापस्मारशब्दांते
भयं चौरभयं ततः ॥ १७७ ॥ जलस्वप्नाग्निभयं गजसिंहभुजङ्गगतः ॥ भयं जन्मजरांते मरणादिशब्दमीरयेत् ॥ १७८ ॥ भयं निर्मोचययुगं
प्रशमययुगं ततः ॥ ज्ञेयरूपधारणांते नृसिंहबृहत्सामतः ॥ १७९ ॥ पुरुषांते सर्वभयनिवारणपदं ततः ॥ अष्टाष्टकं चतुःषष्टि
चेटिकाभयमीरयेत् ॥ १८० ॥ विद्यावृतस्त्रयस्त्रिंशद्देवताकोटिशब्दतः ॥ नमितांते पदपदात्पंकजान्वित ईरयेत् ॥ १८१ ॥ सह
स्रवदनांते तु सहस्रोदर संवदेत् ॥ सहस्रेक्षणशब्दांते सहस्रपादमीरयेत् ॥ १८२ ॥ सहस्रभुज संप्रोच्य सहस्रजिह्व संवदेत् ॥
सहस्रांते ललाटेति सहस्रायुधतो धरात् ॥ १८३ ॥ तमःप्रकाशक पुरमथनान्ते तु सर्व च ॥ मन्त्रराजेश्वरपदाद्विहायसगतिप्रद ॥ १८४ ॥
पातालगतिप्रदांते यन्त्रमर्दन ईरयेत् ॥ घोराट्टहासहसितविश्वावासपदं ततः ॥ १८५ ॥ वासुदेव ततोऽक्रूर ततो हयमुखेति च ॥ परमहंस

विश्वेश विश्वांते तु विडंबन ॥ १८६ ॥ निविष्टांते ततः प्रादुर्भावकारक ईरयेत् ॥ हृषीकेश च स्वच्छंद निःशेषजीव विन्यसेत्॥१८७ ॥ ग्रासकांते
महा पश्चात्पिशितासृगितीरयेत्॥लंपटान्ते खेचरीति सिद्ध्यंते तु प्रदायक॥१८८॥अजेयाव्यय अव्यक्त ब्रह्माण्डोदर इत्यपि॥ततो ब्रह्मसहस्रांते कोटि
स्रग्मुंडशब्दतः ॥ १८९ ॥ माल पंडितमुण्डेति मत्स्य कूर्म ततः परम् ॥ वराहांते नृसिंहेति वामनांते समीरयेत् ॥१९०॥ त्रैलोक्याक्रमणांते तु पादशा
लिक ईरयेत् ॥ रामत्रय ततो विष्णुरूपांते धर एव च ॥१९१॥तत्त्वत्रयांते प्रणवाधारतस्तच्छिखां पदम्॥निविष्टवह्निजायांते स्वधा चैव ततो वषट्॥
॥ १९२॥ नेत्र वर्मास्त्रमुच्चार्य्य प्राणाधार इतीरयेत् ॥ आदिदेवपदात्प्राणापानपश्चान्निविष्टितः ॥१९३॥पांचरात्रिक दितिज विनिधनांते करेति च ॥
महामाया अमोघांते दर्यं दैत्येंद्रशब्दतः ॥१९४॥ दर्यांते दलनेत्युक्ता तेजोराशिन् ध्रुवं स्मरः॥ तेजस्वरांते पुरुषपंडेंते सत्यपूरुष॥ १९५ ॥अस्त्रतारो
ऽच्युतास्त्रं च तारो वाचा सुदेव फट् ॥ तारमायामूर्तेः फट् वः कामः स्वरादिमः॥१९६ ॥मूर्तेस्त्रमव्ययोबीजं विश्वमूर्तेस्त्रिमव्ययः ॥ मायाविश्वात्मने
फट् च तारः सौचं तुरात्मने ॥ १९७॥ फट् तारोहं विश्वरूपिन्नस्त्रं च तदनंतरम् ॥ तारौह्वैपरमांते तु ह्वसफट्प्रणवस्ततः ॥१९८ ॥ ह्वः हिरण्यगर्भरूप
धारणांते च फट् ध्रुवः ॥ ह्वौं अनौपम्यरूपधारिणास्त्रं ध्रुवस्ततः ॥ १९९ ॥ क्षौं नृसिंहरूपधारिन् ॐ क्रूं श्लश्च स्वरादिकः ॥ ध्रांगविन्यासविन्य
स्तमूर्तिधारिंस्ततश्च फट् ॥ २०० ॥ ह्वौ निसर्गसिद्ध्यैकरूपधारिंस्ततश्च फट् ॥ तारो वर्मत्रयं संकरं वं चामुकमस्तकम् ॥ २०१ ॥ खंडद्वयं खाद
येतिद्वयं क्लीं साध्यमानय ॥ द्वयं ततो महात्मन्स्यान्सम्यग्दर्शययुग्मकम् ॥ २०२ ॥ षड्दीर्घाढ्यां स्वबीजं च क्षपितांते तु कल्मष ॥ उत्तरायं
द्वयं पंचबाणबीजानि वोच्चरेत् ॥ २०३ ॥ नृसिंहांते ततो ज्वालात्मने स्वाहा समीरयेत्॥नृसिंहान्ते ततः कालात्मने स्वाहा ध्रुवस्ततः ॥ २०४ ॥
खबीजं कामबीजं च लक्ष्मीबीजद्वयं ततः॥ मायातारांतिमो मन्त्रः सहस्राक्षरसंमितः ॥ २०५ ॥ कपिलोऽस्य मुनिश्छन्दो जगती देवता पुनः॥श्रील
क्ष्मीर्नृहरिर्बीजं क्षौं शक्तिर्वह्निवल्लभा ॥२०६ ॥ श्वेतो वर्ण उदात्तश्च स्वरः प्रोक्तो मनीषिभिः॥क्षेत्रं च परमात्मा तु विनियोगोऽखिलाप्तये॥२०७॥
क्षः सहस्रबाहवेंते सहस्रायुधधराय च ॥ नृसिंहांतं वह्निजायास्त्रायफट् मन्त्र ईरितः ॥ २०८ ॥ अनेन करशुद्धिं च कृत्वांगानि समाचरेत् ॥ तारः
क्षां च सहस्रांते क्षरशब्दाद्विजृंभितम् ॥२०९॥ नृसिंहायाग्निजायांतो हृदये मनुरीरितः ॥ मारः क्षीं च महातेतुं प्रभांते विकरेति च ॥ २१० ॥नृसिंहा
याग्निजायांते शिरोमंत्रः प्रकीर्तितः ॥ तारः क्ष्रूं तप्तयंहायश्चाहक्रूकेशांत ईरयेत् ॥ २११ ॥ ज्वलत्यावकलो कूर्मो दीर्घा वज्राधिकेति च ॥ नख
स्पर्शाद्दिव्यासिंह नमोऽस्तु भगवन् हारिः ॥ २१२ ॥ महाध्वस्त जगद्रूप नृसिंहाय द्वयंद्वयम् ॥ अनेन च शिखा प्रोक्ता कवचं तदनंतरम्॥ २१३ ॥

तारः क्षें च सुवर्ण ते मदमत्तपदं ततः ॥ विह्वलितनृसिंहाय स्वाहांतं कवचं स्मृतम् ॥ २१४ ॥ तारः क्षौं च सहस्राक्ष विश्वरूपपदं वदेत् ॥ धारणेग्नि
प्रियांतोऽयं नेत्रमंत्रः प्रकीर्तितः ॥ २१५ ॥ तारो क्षश्च सहस्रांते वारावेपदमीरयेत् ॥ सहस्रांते शुधायाथ नृसिंहायाग्निसुंदरी ॥ २१६ ॥
अस्त्रमंत्रः समाख्यातस्ततो ध्यायेन्नृकेसरी ॥ उद्यदर्कसहस्राभं त्रीक्षणं भीमभूषणम् ॥ २१७ ॥ सुतीक्ष्णाग्रभुजो दंडैर्दैत्यदारणकं स्मरेत् ॥
एवं ध्यात्वा जपेन्मंत्री सहस्रं पायसेन च ॥ २१८ ॥ आज्यप्लुतेन जुहुयात्सम्यक्सिद्धो भवेन्मनुः ॥ प्रागुक्ते वैष्णवे पीठे मूर्तिं संकल्प्य मूलतः ॥
॥ २१९ ॥ संपूज्य नृहरिं पश्चादादावंगानि पूजयेत् ॥ चक्र शंखं च पाशं वांकुशं कुलिशमेव च ॥ २२० ॥ गदाकृपाणिक्ष्वेडानि दलेषु परिपूज
येत् ॥ लोकेशानपि वज्राद्यान्पूजयेत्तदनंतरम् ॥ २२१ ॥ एवं सिद्धे मनौ मन्त्री प्रयोगान्कर्तुमर्हति ॥ भस्माभिमंत्रितं कृत्वा ग्रहग्रस्तं विलेपयेत् ॥
॥ २२२ ॥ भस्मसंलेपनादेव सर्वग्रहविनाशनम् ॥ अनेनैव विधानेन यक्षराक्षसकिन्नरः ॥ २२३ ॥ भूतप्रेतपिशाचाश्च नश्यंत्येव न संशयः ॥
पराभिचारकृत्यानि मनुनानेन मंत्रितम् ॥ २२४ ॥ भस्म संलेपयेत्सद्यो दुराधर्षो भवेन्नरः ॥ सुदिने स्थापयेत्कुम्भे सर्वतोभद्रमण्डले॥२२५ ॥ तीर्थ
तोयेन संपूर्य जपेदष्टोत्तरं शतम् ॥ तेनाभिषिक्तो मनुजः सर्वापत्तिं तरेद् ध्रुवम्॥२२६॥किं बहूक्तेन सर्वेष्टदायकोऽयं मनूत्तमः ॥ वज्रनखाय विद्महे
तीक्ष्णदंष्ट्राय धीमहि ॥ तन्नो नृसिंहः शब्दांते वदेच्चैव प्रचोदयात् ॥ २२७ ॥ एषा नृसिंहगायत्री सर्वाभीष्टप्रदायिनी ॥ एतस्याः स्मरणादेव
सर्वपापक्षयो भवेत् ॥२२८॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे नृसिंहोपासनामन्त्रगायत्र्यादिनिरूपणं नामैकसप्ततितमो
ऽध्यायः ॥ ७१ ॥ सनत्कुमार उवाच ॥ प्रणवो हृदयं विष्णुर्नेन्तः सुरपतिस्तथा ॥ महाबलाय स्वाहांतो मंत्रो वसुधराक्षरः ॥ १ ॥ मुनिरिंदुर्विराट्
छन्दो देवता दधिवामनः ॥ तारो बीजं तथा शक्तिर्वह्निजाया प्रकीर्तिता ॥२॥ चंद्राक्षिरामबाणेषु नेत्रसंख्यैर्मनूद्भवैः॥वर्णैः षडंगं कृत्वा च मूर्ध्नि भाले
च नेत्रयोः ॥ ३ ॥ कर्णयोर्घ्राणयोरोष्ठतालुकण्ठभुजेषु च ॥ पृष्ठे हृद्युदरे नाभौ गुह्ये चोरुस्थले पुनः ॥ ४ ॥ जानुद्वयं जङ्घयोश्च पादयोर्विन्यसे
त्क्रमात् ॥ अष्टादशैव मंत्रोत्थास्ततो देवं विचिंतयेत् ॥ ५ ॥ मुक्तागौरं रत्नभूषं चन्द्रस्थं भृङ्गसन्निभैः ॥ अलकैर्विलसद्वक्त्रं कुम्भं शुद्धांबुपूरि
तम् ॥ ६ ॥ दध्यन्नपूर्णचषकं दोर्भ्यां संदधतं भजेत् ॥लक्षत्रयं जपेन्मन्त्रं तद्दशांशं घृतप्लुतैः ॥ ७॥पायसान्नैः प्रजुहुयाद्दध्यन्नेन यथाविधि॥चन्द्रांते
कल्पिते पीठे पूर्वोक्ते पूजयेच्च तम्॥ ८ ॥ संकल्पमूर्तिमूलेन संपूज्य च विधानतः ॥ केसरेषु षडंगानि संपूज्य दिग्दलेषु च ॥ ९ ॥ वासुदेवं संकर्षणं
प्रद्युम्नमनिरुद्धकम्॥कोणपत्रेषु शांतिं च श्रियं सरस्वतीं रतिम्॥१०॥ध्वजं च वैनतेयं च कौस्तुभं वनमालिकम् ॥शंखं चक्रं गदां शार्ङ्गं दलेष्वष्टसु

पूजयेत् ॥ ११ ॥ दलाग्रेषु केशवादीन्दिक्पालांस्तदनंतरम् ॥तदस्त्राणि च सम्पूज्य गजानष्टौ समर्चयेत् ॥१२॥ ऐरावतः पुण्डरीको वामनः कुमुदो
ऽजनः ॥ पुष्पदंतः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥१३ ॥ करिण्योऽभ्रमुकपिलापिंगलानुपमाः क्रमात् ॥ ताम्रकर्णी शुभ्रदंती चांगना ह्यंजना
वती ॥ १४ ॥ एवमाराधितो मंत्री दद्यादिष्टानि मंत्रिणे ॥ श्रीकामः पायसाज्येन सहस्रं जुहुयात्सुधीः॥१५॥महतीं श्रियमाप्नोति धान्याप्तिर्धान्य
होमतः ॥ शतपुष्पासमुत्थैश्च बीजैर्हुत्वा सहस्रतः ॥ १६ ॥ महाभयं नाशयेद्धि नात्र कार्या विचारणा ॥ दध्योदनेन शुद्धेन हुत्वा मुच्येत दुर्गतेः
॥ १७ ॥ ध्यात्वा त्रैविक्रमं रूपं जपेन्मंत्रं समाहितः ॥ कारागृहाद्भवेन्मुक्तो बद्धो मंत्रप्रभावतः ॥ १८ ॥ भित्तौ संपाद्य देवेशं फलके वा प्रपूज
येत् ॥ नित्यं सुगंधकुसुमैर्महतीं श्रियमाप्नुयात्॥१९॥ हुत्वा रक्तोत्पलैर्मंत्री वशयेत्सकलं जगत् ॥ अन्नाज्यैर्जुहुयान्नित्यमष्टाविंशतिसंख्यया ॥२०॥
सिताज्यान्नं च विधिवत्प्राप्नुयादन्नमक्षयम् ॥ अपूपैः षड्रसोपेतैर्हुनेद्वसुसहस्रकम् ॥ २१ ॥ अलक्ष्मीं च पराभूय महतीं श्रियमाप्नुयात् ॥ जुहुयाद
युतं मंत्री दध्यन्नं च सितान्वितम् ॥२२॥ यत्र यत्र वसेत्सोऽपि तत्रान्नगिरिमाप्नुयात् ॥ पद्माक्षैर्युतं बिल्वांतिकस्थो जुहुयान्नरः ॥२३॥ महालक्ष्मीं
स लभते तत्र तत्र न संशयः ॥ जुहुयात्पायसैर्लक्षं वाचस्पतिसमो भवेत् ॥ २४ ॥ लक्षं जप्त्वा तद्दशांशं पुत्रजीवफलैर्हुनेत् ॥ तत्काष्ठैरेधिते वह्नौ
श्रेष्ठं पुत्रमवाप्नुयात् ॥२५॥ससाध्यतारं विलसत्कर्णिकं च सुवर्णकैः ॥ विलसत्केसरं मंत्राक्षरद्वंद्वाष्टपत्रकम् ॥२६॥ शेषयुग्मार्णात्यपत्रं द्वादशाक्षरवे
ष्टितम् ॥ तद्बहिर्मातृकावर्णैर्यंत्रं सम्पत्प्रदं नृणाम् ॥२७॥ रक्तं त्रिविक्रमं ध्यात्वा प्रसूनै रक्तवर्णकैः ॥ जुहुयादयुतं मंत्री सर्वत्र विजयी भवेत्॥२८॥
ध्यायेच्चंद्रासनगतं पद्मानामयुतं हुनेत् ॥ लभेदकंटकं राज्यं सर्वलक्षणसंयुतम् ॥ २९ ॥ हुत्वा लवंगैर्मध्वाक्तैरपामार्गदलैस्तु वा ॥ अयुतं साध्यना
माढ्यं स वश्यो जायते ध्रुवम् ॥ ३० ॥ अष्टोत्तरशतं हुत्वा ह्यपामार्गदलैः शुभैः ॥ तावज्जप्त्वा च सप्ताहान्महारोगात्प्रमुच्यते ॥३१॥उद्गिरत्पदमा
भाष्य प्रणवोद्गीय शब्दतः ॥ सर्ववागीश्वरेत्यंते प्रवदेदीश्वरेत्यथ॥३२॥ सर्ववेदमयाचिंत्यपदान्ते सर्वमीरयेत् ॥ बोधयद्वितवांतोऽयं मन्त्रस्तारादिरी
रितः ॥३३॥ ऋषिर्ब्रह्मास्य निर्दिष्टश्छंदोऽनुष्टुबुदाहृतम् ॥ देवता स्याद्धयग्रीवो वागैश्वर्यप्रदो विभुः ॥ ३४ ॥ तारेण पादैर्मंत्रस्य पञ्चांगानि प्रकल्प
येत् ॥ तुषाराद्रिसमच्छायं तुलसीदामभूषितम् ॥३५॥तुरंगवदनं वंदे तुंगसारस्वतः पदम् ॥ ध्यात्वैवं प्रजपेन्मंत्रमयुतं तद्दशांशतः ॥ ३६ ॥ मध्वक्तैः
पायसैर्हुत्वा विमलादिसमन्विते ॥ पूजयेद्वैष्णवे पीठे मूर्तिं संकल्प्य मूलतः ॥ ३७ ॥ कर्णिकायां चतुर्दिक्षु यजेत्पूर्वादितः क्रमात् ॥ सनंदनं च
सनकं श्रियं च पृथिवीं तथा ॥ ३८ ॥ तद्बहिर्दिक्षु वेदाश्च षट्कोणेषु ततोऽर्चयेत् ॥ निरुक्तं ज्योतिषं पश्चाद्यजेद्व्याकरणं ततः॥३९॥कल्पं शिक्षां च

छंदांसि वेदांगानि त्विमानि वै ॥ ततोऽष्टदलमूले तु मातरोऽष्टौ समर्चयेत् ॥ ४० ॥ वक्रतुंडादिकानष्टौ दलमध्ये प्रपूजयेत् ॥ दलाग्रेष्वर्चयेत्प
श्चात्साधकश्चाष्टभैरवान् ॥ ४१ ॥ असितांगं रुरुं चैव भीषणं रक्तनेत्रकम् ॥ बटुकं कालदमनं दंतुरं विकटं तथा ॥ ४२ ॥ तद्बहिः षोडशदले
ष्ववतारान्हरेर्दश ॥ शंखं चक्रं गदां पद्मं नंदकं शार्ङ्गमेव च ॥ ४३ ॥ तद्बहिर्भूगृहे शक्रमुखान्दश दिगीश्वरान् ॥ वज्राद्यांस्तद्बहिश्चेष्ट्वा
द्वारेषु च ततः क्रमात् ॥ ४४ ॥ महागणपतिं दुर्गां क्षेत्रेशं बटुकं तथा ॥ समस्तप्रकटाद्याश्च योगिन्यस्तद्बहिर्भवेत् ॥ ४५ ॥ तद्बहिः सप्त नद्यश्च
तद्बाह्ये तु ग्रहान्नव ॥ तद्बाह्ये पर्वतानष्टौ नक्षत्राणि च तद्बहिः॥ ४६ ॥एवं पंचदशावृत्त्या संपूज्य तुरगाननम् ॥ वागीश्वरसमो वाचि धनैर्धनपतिर्भवेत्
॥ ४७ ॥ एवं सिद्धे मनौ मंत्री प्रयोगान्कर्तुमर्हति ॥ अष्टोत्तरसहस्रं तु शुद्धं वार्यभिमंत्रितम् ॥ ४८ ॥ बीजेन मासमात्रं यः पिबेद्धीमान् जित
न्द्रियः ॥ जन्ममूकोऽपि स नरो वाक्सिद्धिं लभते ध्रुवम् ॥४९ ॥ वियद्भृगुस्थमर्घीराबिंदुमद्बीजमीरितम् ॥ चंद्रसूर्योपरागे तु पात्रे रुक्ममये क्षिपेत्
॥ ५० ॥ दुग्धं वचां ततो मंत्री कंठमात्रोदके स्थितः ॥ स्पर्शाद्विमोक्षपर्यंतं प्रजपेन्मंत्रमादरात् ॥ ५१ ॥ पिबेत्तत्सर्वमचिरात्तस्य सारस्वतं भवेत् ॥
ज्योतिष्मतीलताबीजं दिनेष्वेकैकवर्द्धितम् ॥ ५२ ॥ अष्टोत्तरशतं यावद्भक्षयेदभिमंत्रितम् ॥ सरस्वत्यवतारोऽसौ सत्यं स्याद्भुवि मानवः ॥ ५३ ॥
किं बहूक्तेन विप्रेंद्र मनोरस्य प्रसादतः ॥ सर्ववेदागमादीनां व्याख्याता ज्ञानवान् भवेत् ॥ ५४ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने
सनत्कुमारविभागे तृतीयपादे हयग्रीवोपासनानिरूपणं नाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ सनत्कुमार उवाच ॥ अथ रामस्य मनवो वक्ष्यंते
सिद्धिदायकाः ॥ येषामाराधनान्मर्त्यास्तरंति भवसागरम् ॥ १ ॥ सर्वेषु मंत्रवर्येषु श्रेष्ठं वैष्णवमुच्यते ॥ गाणपत्येषु सौरेषु शाक्तशैवेष्वभीष्टदम्
॥ २ ॥ वैष्णवेष्वपि मंत्रेषु राममंत्राः फलाधिकाः ॥ गाणपत्यादिमंत्रेभ्यः कोटिकोटिगुणाधिकाः ॥३॥ विष्णुशय्यास्थितो वह्निरिंदुभूषितमस्तकः ॥
रामाय हृदयांतोऽयं महाघौघविनाशनः ॥ ४ ॥ सर्वेषु राममंत्रेषु ह्यतिश्रेष्ठः षडक्षरः ॥ ब्रह्महत्यासहस्राणि ज्ञाताज्ञातकृतानि च ॥५॥ स्वर्णस्तेय
सुरापानगुरुतल्पायुतानि च ॥ कोटिकोटिसहस्राणि ह्युपपापानि यानि वै ॥ ६ ॥मंत्रस्योच्चारणात्सद्यो लयं यांति न संशयः ॥ ब्रह्मा मुनिः स्याद्गा
यत्री छंदो रामश्च देवता ॥७॥ आद्यं बीजं च हृच्छक्तिर्विनियोगोऽखिलाप्तये ॥ षड्दीर्घभाजा बीजेन षडंगानि समाचरेत् ॥८ ॥ब्रह्मरंध्रे भ्रुवोर्मध्ये
हृन्नाभ्योर्गुह्यपादयोः ॥ मंत्रवर्णान्क्रमान्न्यस्य केशवादीन्प्रविन्यसेत् ॥ ९ ॥ पीठन्यासादिकं कृत्वा ध्यायेद्धृदि रघूत्तमम् ॥ कालांभोधरकांतं च वीरा
सनसमास्थितम् ॥१०॥ ज्ञानमुद्रां दक्षहस्ते दधतं जानुनीतरम् ॥ सरोरुहकरां सीतां विद्युदाभां च पार्श्वगाम्॥ ११॥पश्यंतीं रामवक्त्राब्जं विविधाक

रूपभूषिताम् ॥ ध्यात्वैवं प्रजपेद्वर्णलक्षं मंत्री दशांशतः ॥१२ ॥ कमलैर्जुहुयाद्वह्नौ ब्राह्मणान्भोजयेत्ततः॥पूजयेद्वैष्णवे पीठे विमलादिसमन्विते ॥१३॥
मूर्तिं मूलेन संकल्प्य तस्यामावाह्य साधकः ॥ सीतां वामे समासीनां तन्मन्त्रेण प्रपूजयेत् ॥ १४ ॥ रमासीतापदं ङेंतं द्विठांतो जानकीमनुः ॥
अग्रेः शार्ङ्गं च सम्पूज्य शरान्पार्श्वद्वयेऽर्चयेत् ॥ १५ ॥ केशरेषु षडंगानि पत्रेष्वेतान्समर्चयेत् ॥ हनुमंतं च सुग्रीवं भरतं सबिभीषणम् ॥ १६ ॥
लक्ष्मणांगदशत्रुघ्नान् जांबवंतं क्रमात्पुनः॥वाचयंतं हनूमंतमग्रतो धृतपुस्तकम् ॥ १७ ॥ यजेद्भरतशत्रुघ्नौ पार्श्वयोर्धृतचामरौ ॥ धृतातपत्रं हस्ताभ्यां
लक्ष्मणं पृष्ठतोऽर्चयेत् ॥ १८ ॥ ततोऽष्टपत्रे सृष्टिं च जयंतं विजयं तथा ॥ सुराष्ट्रं राष्ट्रपालं च अकोपं धर्मपालकम्॥१९॥सुमंतं चेति सम्पूज्य लोके
शानायुधैर्युतान्॥एवं रामं समाराध्य जीवन्मुक्तः प्रजायते॥२०॥चंदनाक्तैः प्रजुहुयाज्जातीपुष्पैः समाहितः ॥ राजवश्याय कमलैर्धनधान्यादिसिद्धये
॥२१॥ लक्ष्मीकामः प्रजुहुयात्प्रसूनैर्विल्वसंभवैः॥आज्याक्तैर्नीलकमलैर्वशयेदखिलं जगत्॥२२॥घृताक्तशतपर्वाभिर्दीर्घायुश्च निरामयः॥रक्तोत्पलानां
होमेन धनं प्राप्नोति वांछितम्॥२३॥पालाशकुसुमैर्हुत्वा मेधावी जायते नरः॥तज्जतांभः पिबेत्प्रातर्वत्सरात्कविराड् भवेत् ॥२४॥तन्मंत्रितान्नं भुंजीत
महारोगप्रशांतये॥रोगोक्तौषधहोमेन तद्रोगान्मुच्यते क्षणात्॥२५॥नदीतीरे च गोष्ठे वा जपेल्लक्षं पयोव्रतः॥पायसेनाज्ययुक्तेन हुत्वा विद्यानिधिर्भवेत्
॥२६ ॥ परिक्षीणाधिपत्यो यः शाकाहारो जलांतरे ॥जपेल्लक्षं च जुहुयाद्विल्वपुष्पैर्दशांशतः॥२७॥तदैव पुनराप्नोति स्वाधिपत्यं न संशयः ॥ उपोष्य
गङ्गातीरांते स्थित्वा लक्षं जपेन्नरः॥२८॥दशांशं कमलैर्हुत्वा विल्वोत्थैर्वा प्रसूनकैः ॥ मधुरत्रयसंयुक्तैराज्यश्रियमवाप्नुयात् ॥ २९ ॥ मार्गमासे जले
स्थित्वा कन्दमूलफलाशनः॥लक्षं जप्त्वा दशांशेन पायसैर्जुहुयाद्वसौ॥३०॥श्रीरामचन्द्रसदृशः पुत्रः पौत्रोऽपि जायते॥अन्येऽपि बहवः संति प्रयोगा
मन्त्रराजके ॥ ३१ ॥ किंतु प्रयोगकर्तॄणां परलोको न विद्यते ॥ षट्कोणं वसुपत्रं च तद्बाह्यार्कदलं लिखेत् ॥ ३२ ॥ षट्कोणेषु षडर्णानि मन्त्रस्य
विलिखेद् बुधः ॥अष्टपत्रे तथाष्टार्णांल्लिखेत्प्रणवगर्भितान् ॥ ३३॥ कामबीजं रविदले मध्ये मन्त्रावृताभिधाम् ॥ सुदर्शनावृतं बाह्ये दिक्षु युग्मावृतं
तथा ॥३४ ॥ वज्रोल्लसद्भूमिगेहं कन्दर्पांकुशपाशकैः ॥ भूम्या च विलसत्कोणं यन्त्रराजमिदं स्मृतम् ॥ ३५ ॥ भूर्जेऽष्टगन्धैः संलिख्य पूजयेदुक्तव
र्त्मना ॥ षट्कोणेषु दलार्काब्जान्यावेष्टवृतयुग्मतः॥ ३६॥केशरेष्वष्टपत्रस्य स्वरद्वंद्वं लिखेद् बुधः ॥ बहिस्तु मातृकां चैव मन्त्रं प्राणनिधायनम् ॥
॥३७ ॥ यन्त्रमेतच्छुभे घस्रे कण्ठे वा दक्षिणे भुजे ॥ मूर्ध्नि वा धारयेन्मंत्री सर्वपापैः प्रमुच्यते ॥ ३८ ॥ सुदिने शुभनक्षत्रे सुदेशे शल्यवर्जिते ॥
वश्याकर्षणविद्वेषद्रावणोच्चाटनादिकम् ॥ ३९ ॥ पुष्यद्वयं तथादित्याद्रांसघासु यथाक्रमम् ॥ दूर्वोत्था लेखनी वश्ये तथाकृष्टौ करंजजा ॥ ४० ॥

नरास्थिजा मारणे तु स्तंभने राजवृक्षजा ॥ शांतिपुष्ट्यायुषां सिद्ध्यै सर्वापच्छमनाय च ॥ ४१ ॥ विभ्रमोत्पादने चैव शिलायां विलिखेद् बुधः॥
खरचर्मणि विद्वेषे ध्वजे तूच्चाटनाय च ॥ ४२ ॥ शत्रूणां ज्वरसन्तापशोकमारणकर्मणि ॥ पीतवस्त्रे लिखित्वा तु साधयेत्साधकोत्तमः ॥ ४३ ॥
वश्याकृष्टौ चाष्टगन्धैः सम्पूज्य च यथाविधि ॥ चितांगारादिना चैव ताडनोच्चाटनादिकम्॥ ४४॥ विषार्कक्षीरयोगेन मारणं भवति ध्रुवम्॥लिखि
त्वैवं यंत्रराजं गन्धपुष्पादिभिर्यजेत् ॥ ४५ ॥ त्रिलोहवेष्टितं कृत्वा धारयेत्साधकोत्तमः ॥ बीजं रामाय ठद्वंद्वं मन्त्रोऽयं रसवर्णकः ॥ ४६ ॥ महा
सुदर्शनमनुः कथ्यते सिद्धिदायकः ॥ सुदर्शनमहाशब्दाच्चक्रराजेश्वरेति च ॥ ४७ ॥ दुष्टांतकदुष्टभयानकदुष्टभयंकरम् ॥ छिंधिद्वयं भिंधियुग्मं
विदारययुगं ततः ॥ ४८ ॥ परमन्त्रान् ग्रसद्वंद्वं भक्षयद्वितयं ततः ॥ त्रासयद्वितयं वर्मास्त्राग्निजायांतिमो मनुः ॥ ४९ ॥ अष्टषष्ट्यक्षरः प्रोक्तो
यंत्रसंवेष्टने त्वयम् ॥ तारो हृद्भगवान् ङेंतो ङेंतो हि रघुनन्दनः॥५०॥ रक्षोघ्नविशदायांते मधुरादिप्रसन्न च॥ वरदानायामितांते नुतेजसेपदमीरयेत्॥
॥ ५१ ॥ बालयांते तु रामाय विष्णवे हृदयांतिमः ॥ सप्तचत्वारिंशदर्णो मालामन्त्रोऽयमीरितः ॥ ५२ ॥ विश्वामित्रो मुनिश्चास्य गायत्री
छंद ईरितम् ॥ श्रीरामो देवता बीजं ध्रुवः शक्तिश्च ठद्वयम् ॥ ५३ ॥ षड्दीर्घस्वरयुग्मायाबीजेनांगानि कल्पयेत् ॥ध्यानपूजादिकं सर्वमस्य
पूर्ववदाचरेत् ॥ ५४ ॥ अयमाराधितो मन्त्रः सर्वान्कामान्प्रयच्छति ॥ स्वकामसत्यवाग्लक्ष्मीताराद्यः पञ्चवर्णकः ॥ ५५ ॥ षडक्षरः षड्विधः
स्याच्चतुर्वर्गफलप्रदः ॥ ब्रह्मा संमोहनः शक्तिर्दक्षिणामूर्तिसंज्ञकः ॥ ५६ ॥ अगस्त्यः श्रीशिवः प्रोक्तास्ते तेषां मुनयः क्रमात् ॥ अथवा कामबीजा
देर्विश्वामित्रो मुनिः स्मृतः ॥ ५७ ॥ छन्दः प्रोक्तं च गायत्री श्रीरामो देवता पुनः ॥ बीजशक्तिराधमांत्यं मन्त्रार्णैः स्यात्षडंगकम्॥ ५८ ॥ बीजैः
षड्दीर्घयुक्तैर्वा मन्त्रार्णान्पूर्ववन्न्यसेत् ॥ ध्यायेत्कल्पतरोर्मूले सुवर्णमयमण्डपे ॥ ५९ ॥ पुष्पकाख्यविमानांतःसिंहासनपरिच्छदे ॥ पद्मे वसुदले
देवमिंद्रनीलसमप्रभम् ॥ ६० ॥ वीरासनसमासीनं ज्ञानमुद्रोपशोभितम् ॥ वामोरुन्यस्ततद्धस्तसीतालक्ष्मणसेवितम् ॥ ६१ ॥ रत्नाकल्पं विभुं
ध्यात्वा वर्णलक्षं जपेन्मनुम् ॥ यद्वा स्मारादिमन्त्राणां जयाभं च हरिं स्मरेत् ॥ ६२ ॥ यजनं काम्यकर्माणि सर्वं कुर्यात्षडर्णवत्॥ रामश्च चन्द्रभ
द्रांतो ङेनमोंतो ध्रुवादिकः ॥ ६३॥ मन्त्रावष्टाक्षरौ ह्येतौ तारांत्यौ चेन्नवाक्षरौ ॥ एतेषां यजनं सर्वं कुर्यान्मंत्री षडर्णवत ॥६४॥ जानकीवल्लभो ङें
तो द्विठांतः कवचादिकः ॥ दशार्णोऽयं महामन्त्रो विशिष्टोऽस्य मुनिः स्वराट् ॥६५॥ छन्दश्च देवता सीता पतिर्बीजं तथादिमम्॥ स्वाहा शक्तिश्च
कामेन कुर्यादंगानि षट् क्रमात् ॥ ६६ ॥शिरोललाटभ्रूमध्यतालुकण्ठेषु हृद्यपि ॥ नाभ्यंघ्रिजानुपादेषु दशार्णान्विन्यसेन्मनोः ॥ ६७ ॥ अयो

ध्यानगरे रत्नचित्रसौवर्णमण्डपे ॥ मंदारपुष्पैराबद्धविताने तोरणान्विते ॥६८॥ सिंहासनसमासीन पुष्पकोपरि राघवम् ॥ रक्षोभिर्हरिभिर्देवैः सुवि
मानगतैः शुभैः ॥६९॥संस्तूयमानं मुनिभिः प्रह्वैश्च परिसेवितम् ॥सीतालंकृतवामांगं लक्ष्मणेनोपशोभितम् ॥ ७० ॥श्यामं प्रसन्नवदनं सर्वाभरणभू
पितम् ॥ एवं ध्यात्वा जपेन्मंत्री वर्णलक्षं समाहितः॥७१॥दशांशः कमलैर्होमो यजनं च षडर्णवत्॥रामो ङेन्तो धनुष्पाणिर्ङेंतोंऽते वह्निसुंदरी॥७२॥
दशाक्षरोऽयं मंत्रोऽस्य मुनिर्ब्रह्मा विराट् पुनः ॥ छन्दस्तु देवता प्रोक्तो रामो राक्षसमर्दनः ॥७३॥ आद्यं बीजं द्विठः शक्तिर्बीजेनांगानि कल्पयेत् ॥
वर्णन्यासं तथा ध्यानं पुरश्चर्यार्चनादिकम् ॥ ७४ ॥ दशाक्षरोक्तवत्कुर्याच्चापबाणधरं स्मरेत् ॥ तारो नमो भगवते रामान्ते चंद्रभद्रकौ ॥ ७५ ॥
ङेंतावर्काक्षरौ मंत्रौ ऋषिध्यानादि पूर्ववत् ॥ श्रीपूर्वं जयपूर्वं च तद्द्विधा रामनाम च ॥७६॥ त्रयोदशाक्षरो मंत्रो मुनिर्ब्रह्मा विराट् स्मृतम् ॥ छन्दस्तु
देवता प्रोक्तो रामः पापौघनाशनः ॥ ७७ ॥ षडंगानि प्रकुर्वीत द्विरावृत्त्या पदत्रयैः ॥ ध्यानार्चनादिकं सव ह्यस्य कुर्याद्दशार्णवत् ॥ ७८ ॥
तारो नमो भगवते रामायांते महापदम् ॥ पुरुषाय हृदंतोऽयं मनुरष्टादशाक्षरः॥ ७९ ॥विश्वामित्रो मुनिश्छंदो धृती रामोऽस्य देवता॥तारो बीजं नमः
शक्तिश्चंद्राक्ष्यब्ध्यग्निषड्भुजैः ॥ ८० ॥ वर्णैमंत्रोत्थितैः कुर्यात्षडंगानि समाहितः ॥ निश्शाणभेरीपटहशंखतुर्यादिनिःस्वनैः ॥ ८१ ॥ प्रवृत्तनृत्ये
परितो जयमंगलभाषिते ॥ चंदनागरुकस्तूरीकर्पूरादिसुवासिते ॥ ८२ ॥ नानाकुसुमसौरभ्यवाहिगंधवहान्विते ॥ देवगंधर्वनारीभिर्गायन्तीभिरल
कृते ॥ ८३ ॥ सिंहासने समासीनं पुष्पकोपरि राघवम् ॥ सौमित्रिसीतासहितं जटामुकुटशोभितम् ॥ ८४ ॥ चापबाणधरं श्यामं ससुग्रीवविभी
षणम् ॥ हत्वा रावणमायांतं कृतत्रैलोक्यरक्षणम् ॥८५॥ एवं ध्यात्वा जपेद्वर्णं लक्षं मंत्री दशांशतः ॥ घृताक्तैः पायसैर्हुत्वा यजनं पूर्ववच्चरेत् ॥ ८६ ॥
प्रणवो हृदयं सीतापतये तदनंतरम् ॥ रामाय हनयुग्मांते वर्मास्त्राग्निप्रियांतिमः ॥ ८७ ॥ एकोनविंशद्वर्णोऽयं मंत्रः सर्वार्थसाधकः ॥ विश्वामित्रो
मुनिश्चास्यानुष्टुप्छन्द उदाहृतम्॥८८॥देवता रामभद्रो जं बीजं शक्तिर्नम इति॥मंत्रोत्थितैः क्रमाद्वर्णैस्ततो ध्यायेच्च पूर्ववत्॥८९॥पूजनं काम्यकर्मादि
सर्वमस्य षडर्णवत् ॥ तारः स्वबीजं कमला रामभद्रेति संपठेत् ॥ ९० ॥ महेष्वासपदांते तु रघुवीर नृपोत्तम ॥ दशास्यांतकशब्दांते मां रक्ष
देहि संपठेत् ॥ ९१॥ परमांते मे श्रियं स्यान्मंत्रो बाणगुणाक्षरः ॥ बीजैर्वियुक्तो द्वात्रिंशदर्णोऽयं फलदायकः॥९२॥ विश्वामित्रो मुनिश्चास्यानुष्टुप्छंद
उदाहृतम् ॥ देवता रामभद्रोऽत्र बीजं स्वं शक्तिरिंदिरा ॥ ९३ ॥ बीजत्रयाद्यैः कुर्वीत पदैः सर्वेण मंत्रवित् ॥ पंचांगानि च विन्यस्य मंत्रवर्णान्क्रमा
न्न्यसेत् ॥ ९४ ॥ मूर्ध्नि भाले दृशोः श्रोत्रे गंडयुग्मे सनासिके ॥ आस्ये दोःसंधियुगले स्तनहृन्नाभिषु क्रमात् ॥ ९५ ॥ कटौ मेढ्रे पायुपादसं

धिष्वर्णान्न्यसेन्मनोः ॥ ध्यानार्चनादिकं चास्य पूर्ववत्समुपाचरेत् ॥ ९६ ॥ लक्षत्रयं पुरश्चर्या पायसैर्हवनं मतम् ॥ ध्यात्वा रामं पीतवर्णं जपेल्लक्षं समाहितः ॥ ९७ ॥ दशांशं कमलैर्हुत्वा धनैर्धनपतिर्भवेत् ॥ तारो माया रमाद्वंद्वं दाशरथाय हृच्च वै ॥ ९८ ॥ एकादशाक्षरो मंत्रो मुन्याद्यर्चास्य पूर्ववत् ॥ त्रैलोक्यांते तु नाथाय हृदंतो वसुवर्णवान् ॥ ९९ ॥ अस्यापि पूर्ववत्सर्वं न्यासध्यानार्चनादिकम् ॥ आंजनेयपदांते तु गुरवे हृदयांतिमः ॥ १०० ॥ मंत्रो नवाक्षरोऽस्यापि यजनं पूर्ववन्मतम् ॥ ॥ ङेतं रामपद पश्चाद्धृदयं पंचवर्णवत् ॥ १०१ ॥ मुनिध्यानार्चनं चास्य प्रोक्तं सर्वं षडर्णवत् ॥ रामांते चंद्रभद्रौ च ङेंतौ पावकवल्लभा ॥ १०२ ॥ मंत्रौ द्वौ च समाख्यातौ मुन्याद्यर्चादि पूर्ववत् ॥ वह्निः शेषान्वितश्चैव चंद्रभूषितमस्तकः ॥ १०३ ॥ एकाक्षरो रघुपतेर्मंत्रः कल्पद्रुमोऽपरः ॥ ब्रह्मा मुनिः स्याद्गायत्री छंदो रामोऽस्य देवता ॥ १०४ ॥ षड्दीर्घाढ्येन मंत्रेण षडंगानि समाचरेत् ॥ सरयूतीरमंदारवेदिकापंकजासने ॥१०५॥ श्यामं वीरासनासीनं ज्ञानमुद्रोपशोभितम् ॥ वामोरुन्यस्ततद्धस्तं सीतालक्ष्मणसंयुतम् ॥ १०६ ॥ अवेक्षमाणमात्मानं मन्मथामिततेजसम् ॥ शुद्धस्फटिकसंकाशं केवलं मोक्षकांक्षया ॥ १०७ ॥ चिंतयेत्परमात्मानमृतुलक्षं जपेन्मनुम् ॥ सर्व्वं षडर्णवच्चास्य होमनित्यार्चनादिकम् ॥ १०८ ॥ वह्निः शेषासनो भांतः केवलो द्व्यक्षरो मनुः ॥ एकाक्षरोक्तवत्सर्वं मुनिध्यानार्चनादिकम् ॥ १०९ ॥ तारमानारमानंगचास्त्रबीजैर्द्विवर्णकः ॥ त्र्यक्षरो मंत्रराजः स्यात्षड्विधः सकलेष्टदः ॥ ११० ॥ द्व्यक्षरश्चंद्रभद्रांतो द्विविधश्चतुरक्षरः ॥ एकार्णोक्तवदेतेषां मुनिध्यानार्चनादिकम् ॥ १११ ॥ तारो रामश्चतुर्थ्यंतो वर्मास्त्रं वह्निवल्लभा ॥ अष्टार्णोऽयं महामंत्रो मुन्याद्यर्चा षडर्णवत् ॥ ११२ ॥ तारो मया हृदंते स्याद्रामाय प्रणवांतिमः ॥ शिवोमाराममंत्रोऽयमष्टार्णः सर्वसिद्धिदः ॥ ११३ ॥ ऋषिः सदाशिवः प्रोक्तो गायत्री छंद ईरितम् ॥ शिवोमारामचंद्रोऽत्र देवता परिकीर्त्तितः ॥११४॥ षड्दीर्घयामाय यातु ध्रुवपंचार्णयुक्तया॥ षडंगानि विधायाथ ध्यायेद्धृदि सुरार्चितम् ॥ ११५ ॥ रामं त्रिनेत्रं सोमार्द्धधारिणं शूलिनं वरम् ॥ भस्मोद्धूलितसर्वांगं कपर्दिनमुपास्महे ॥ ११६॥ रामाभिरामां सौंदर्यसीमां सोमावतंसिनीम् ॥ पाशांकुशधनुर्बाणधरां ध्यायेत्त्रिलोचनाम् ॥ ११७ ॥ एवं ध्यात्वा जपेद्वर्णलक्षं त्रिमधुरान्वितैः ॥ विल्वपत्रैः फलैः पुष्पैस्तिलैर्वा पंकजैर्हुनेत् ॥ ११८ ॥ स्वयमायांति निधयः सिद्धयश्च सुरेप्सिताः ॥ तारो माया च भरताग्रजराममनोभवः ॥ ११९ ॥ वह्निजायाद्वादशार्णो मंत्रः कल्पद्रुमोऽपरः ॥ अंगिराश्च मुनिश्छंदो गायत्री देवता पुनः ॥ १२० ॥ श्रीरामो भुवनाबीजं स्वाहाशक्तिः समीरितः ॥ चंद्रैकमुनिभूनेत्रैर्मंत्रार्णैरंगकल्पनम् ॥ १२१ ॥ ध्यानपूजादिकं चास्य सर्वं कुर्यात्षडर्णवत् ॥ प्रणवो हृदयं सीतापते रामश्च ङेंतिमः ॥ १२२ ॥

हनद्वयांते वर्मास्त्रं मंत्रः षोडशवर्णवान् ॥ अगस्त्योऽस्य मुनिश्छंदो बृहती देवता पुनः ॥१२३॥श्रीरामोऽहं तथा बीजं रां शक्तिः समुदीरिता ॥रामा
ब्धिवह्निवेदाक्षिवर्णैः पंचांगकल्पना ॥ १२४ ॥ ध्यानपूजादिकं सर्वमस्य कुर्यात्षडर्णवत् ॥ तारो हृच्चैव ब्रह्मण्यसेव्याय पदमीरयेत् ॥ १२५ ॥
रामायाकुंठशब्दांतं तेजसे च समीरयेत् ॥ उत्तमश्लोकधुर्याय स्वं भृगुः कामिकान्वितः ॥ १२६ ॥ दंडार्पितां प्रिये मंत्रो रामरामाक्षरो मतः ॥
ऋषिः शुक्रस्तथानुष्टुप्छंदो रामोऽस्य देवता ॥ १२७ ॥ पादैः सर्वेण पंचांगं कुर्याच्छेषं षडर्णवत् ॥ लक्षं जपो दशांशेन जुहुयात्पायसैः सुधीः ॥
॥ १२८॥ सिद्धमंत्रस्य भुक्तिः स्यान्मुक्तिः पातकनाशनम् ॥आदौ दाशरथायांते विद्महे पदमुच्चरेत् ॥१२९॥ ततः सीतावल्लभाय धीमहीति समुच्च
रेत् ॥ तन्नो रामः प्रचो वर्णो दयादिति च संवदेत्॥ १३० ॥ एषोक्तारा मगायत्री सर्वाभीष्टफलप्रदा ॥ पद्मासीतापदं ङेतं ठद्वयांतः षडक्षरः ॥
॥ १३१ ॥ वाल्मीकिश्च मुनिश्छंदो गायत्री देवता पुनः ॥ सीता भगवती प्रोक्ता श्रीं बीजं वह्निसुन्दरी ॥ १३२ ॥ शक्तिः षड्दीर्घयुक्तेन बीजेनां
गानि कल्पयेत् ॥ ततो ध्यायन्महादेवीं सीतां त्रैलोक्यपूजिताम् ॥ १३३ ॥ तप्तहाटकवर्णाभां पद्मयुग्मं करद्वये ॥ सद्रत्नभूषणस्फूर्जद्दिव्यदेहां
शुभात्मिकाम् ॥ १३४ ॥ नानावस्त्रां शशिमुखीं पद्माक्षीं मुदितांतराम् ॥ पश्यंतीं राघवं पुण्यं शय्याढ्यां षड्गुणेश्वरीम् ॥१३५॥ एवं ध्यात्वा जपे
द्वर्णलक्षं मंत्री दशांशतः॥जुहुयात्कमलैः फुल्लैःपीठे पूर्वोदिते यजेत्॥१३६॥मूर्तिं संकल्प्य मूलेन तस्यामावाह्य जानकीम्॥संपूज्य दक्षिणे राममभ्यर्च्या
ग्रेऽनिलात्मजम्॥१३७॥पृष्ठे लक्ष्मणमभ्यर्च्य षट्कोणेष्वंगपूजनम् ॥ पत्रेषु मंत्रिमुख्यांश्च बाह्ये लोकेश्वरान्पुनः॥१३८॥वज्राद्यानपि संपूज्य सर्वसिद्धी
श्वरो भवेत् ॥ जातीपुष्पैश्चन्दनाक्तै राजवश्याय होमयेत् ॥ १३९ ॥ कमलैर्धनधान्याप्तिर्नीलाब्जैर्वशयन् जगत् ॥ विल्वपत्रैः श्रियःप्राप्त्यै दूर्वाभी
रोगशांतये॥१४०॥किं बहूक्तेन सौभाग्यं पुत्रान्पौत्रान्परं सुखम्॥धनं धान्यं च मोक्षं च सीताराधनतो लभेत्॥१४१॥ शक्रः सेंदुर्लक्ष्मणाय हृदयं
सप्तवर्णवान्॥अगस्त्योऽस्य मुनिश्छंदो गायत्री देवता पुनः॥१४२॥लक्ष्मणाख्यो महावीरश्चाद्यं हृद्बीजशक्तिके॥षड्दीर्घाढ्येन बीजेन षडंगानि समाच
रेत्॥१४३॥द्विभुजं स्वर्णरुचिरतनुं पद्मनिभेक्षणम्॥धनुर्बाणकरं रामसेवासंसक्तमानसम्॥१४४॥ध्यात्वैवं प्रजपेद्वर्णलक्षं मंत्री दशांशतः॥मध्वाक्तैः पाय
सैर्हुत्वा रामपीठे प्रपूजयेत्॥१४५॥रामवद्यजनं चास्य सर्वसिद्धिप्रदो ह्ययम्॥साकल्यं रामपूजाया यदीच्छेन्नियतं नरः॥१४६॥तेन यत्नेन कर्तव्यं लक्ष्म
णार्चनमादरात् ॥ श्रीरामचंद्रभेदास्तु बहवः संति सिद्धिदाः ॥१४७॥ तत्साधकैः सदा कार्यं लक्ष्मणाराधनं शुभम् ॥ अष्टोत्तरसहस्रं वा शतं वा
सुसमाहितैः ॥ १४८ । लक्ष्मणस्य मनुर्जप्यो मुमुक्षुभिरतंद्रितैः ॥ अजप्त्वा लक्ष्मणमनुं राममंत्रान् जपंति ये ॥१४९॥ न तेषां जायते सिद्धिर्हानि

रेव पदे पदे ॥ यो जपेल्लक्ष्मणमनुं नित्यमेकांतमास्थितः ॥१५०॥ मुच्यते सर्वपापेभ्यः सर्वान्कामानवाप्नुयात्॥जयप्रधानो मंत्रोऽयं राज्यप्राप्त्यैक
साधनम् ॥ १५१ ॥ नष्टराज्याप्तये मंत्रं जपेल्लक्षं समाहितः ॥ सोऽचिरान्नष्टराज्यं स्वं प्राप्नोत्येव न संशयः॥१५२॥ ध्यायन्राममयोध्यायामभिषिक्त
मनन्यधीः ॥ पञ्चायुतं मनुं जप्त्वा नष्टराज्यमवाप्नुयात् ॥१५३॥ नागपाशविनिर्मुक्तं ध्यात्वा लक्ष्मणमादरात् ॥ अयुतं प्रजपेन्मंत्रं निगडान्मुच्यते
ध्रुवम् ॥१५४॥ वातात्मजेनानीताभिरोषधीभिर्गतव्यथम् ॥ ध्यात्वा लक्षं जपन्मंत्रमल्पमृत्युं जयेद्ध्रुवम् ॥१५५॥ घातयंतं मेघनादं ध्यात्वा लक्षं
जपेन्मनुम् ॥ दुर्जयं वापि वेगेन जयद्रिपुकुलं महत् ॥ १५६ ॥ ध्यात्वा शूर्पणखानासाछेदनोद्युक्तमानसम् ॥ सहस्रं प्रजपेन्मंत्रं पुरुहूतादिकान्
जयेत् ॥ १५७ ॥ रामपादाब्जसेवार्थं कृतोद्योगमथो स्मरन् ॥ प्रजपल्लँक्षमेकांते महारोगात्प्रमुच्यते ॥ १५८ ॥ त्रिमासं विजिताहारो
नित्यं सप्तसहस्रकम् ॥ अष्टोत्तरशतैः पुष्पैर्निश्छिद्रैः शातपत्रकैः ॥ १५९ ॥ पूजयित्वा विधानेन पायसं च सशर्करम् ॥ निवेद्य
प्रजपेन्मंत्रं कुष्ठरोगात्प्रमुच्यते ॥ १६० ॥ विजने विजिताहारः षण्मासं विधिनामुना ॥ क्षयरोगात्प्रमुच्येत सत्यं सत्यं न संशयः
॥ १६१ ॥ अभिमंत्र्य जलं प्रातर्मंत्रेण त्रिः समाहितः ॥ त्रिसंध्यं वा पिबेन्नित्यं मुच्यते सर्वरोगतः ॥ १६२ ॥ दारिद्र्यं च पराभूतं जायते धनदो
पमः ॥ विषादिदोषसंस्पर्शो न भवेत्तु कदाचन ॥ १६३ ॥ मनुना मंत्रितैस्तोयैः प्रत्यहं क्षालयेन्मुखम् ॥ मुखनेत्रादिसंभूताञ्जयेद्रोगांश्च दारु
णान् ॥ १६४ ॥ पीत्वाभिमंत्रितं त्वंभः कुक्षिरोगान् जयेद्ध्रुवम् ॥ लक्ष्मणप्रतिमां कृत्वा दद्याद्भक्त्या विधानतः ॥ १६५ ॥स सर्वेभ्योऽथ रोगेभ्यो
मुच्यते नात्र संशयः ॥ कन्यार्थी विमलपाणिग्रहणासक्तमानसः ॥ १६६॥ ध्यायन् लक्षं जपेन्मंत्री अब्जैर्हुत्वा दशांशतः ॥ ईप्सितां लभते कन्यां
शीघ्रमेव न संशयः॥ १६७ ॥दीक्षितं जृंभणास्त्राणां मंत्रेषु नियतव्रतम् ॥ ध्यात्वा च विधिवन्नित्यं जपेन्मासत्रयं मनुम् ॥ १६८ ॥ पूजापुरःसरं
सप्तसहस्रं विजितेंद्रियः ॥ सर्वासामपि विद्यानां तत्त्वज्ञो जायते नरः ॥ १६९ ॥ विश्वामित्रक्रतुवरे कृताद्भुतपराक्रमम् ॥ ध्यायँल्लक्षं जपेन्मंत्रं मुच्यते
महतो भयात् ॥ १७० ॥ कृतनित्यक्रियः शुद्धस्त्रिकालं प्रजपेन्मनुम् ॥ सर्वपापविनिर्मुक्तो याति विष्णोः परं पदम् ॥ १७१ ॥ दीक्षितो विधिव
न्मंत्री गुणैर्विगतकल्मषः ॥ स्वाचारनियतो दांतो गृहस्थो विजितेंद्रियः ॥ १७२ ॥ ऐहिकाननपेक्ष्यैव निष्कामो योऽर्चयेद्विभुम् ॥ स सर्वान्पुण्य
पापौघान्दग्ध्वा निर्मलमानसः ॥ १७३ ॥ पुनरावृत्तिरहितः शाश्वतं पदमश्नुते ॥ सकामो वांछितान् लब्ध्वा भुक्त्वा भोगान् मनोगतान् ॥ १७४ ॥
जातिस्मरश्चिरं भूत्वा याति विष्णोः परं पदम् ॥ निद्राचन्द्रान्विता पश्चाद्भरताय हृदंतिमः ॥ १७५ ॥ सप्ताक्षरो मनुश्चास्य मुन्याद्यर्चादि पूर्ववत् ॥

वकः सेंदुश्च शत्रुघ्नपरं ङेंतं हृदंतिमः ॥१७६॥ सप्ताक्षरोऽयं शत्रुघ्नमंत्रः सर्वेष्टसिद्धिदः ॥१७७॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने
सनत्कुमारविभागे तृतीयपादे रामाद्युपासनावर्णनं नाम त्रिसप्ततितमोऽध्यायः ॥७३॥ सनत्कुमार उवाच॥अथोच्यंते हनुमतो मंत्राः सर्वेष्टदायकाः॥
यान्समाराध्य विप्रेंद्र तत्तुल्याचरणा नराः ॥ १ ॥ मनुः स्वरेंदुसंयुक्तं गगनं च भगान्विताः ॥ हसफाग्निनिशाधीशाः द्वितीयं बीजमीरितम् ॥ २ ॥
स्वफाग्नयो भगेंद्वाढ्यास्तृतीयं बीजमीरितम् ॥वियद्भृग्वग्निमन्विंदुयुक्तं स्याच्च चतुर्थकम् ॥ ३ ॥ पंचमं भगचंद्राढ्यावियद्भृगुस्वकाग्नयः ॥ मन्वि
द्वाढ्यौ हसौ षष्ठं ङेंतः स्याद्धनुमांस्ततः ॥ ४ ॥ हृदयांतो महामंत्रराजोऽयं द्वादशाक्षरः ॥ रामचन्द्रो मुनिश्चास्य जगतीछंद ईरितम्॥ ५ ॥देवता
हनुमान्बीजं षष्ठं शक्तिर्द्वितीयकम् ॥ षड्बीजैश्च षडंगानि शिरोभाले दृशोर्मुखे ॥ ६ ॥ गलबाहुद्वये चैव हृदि कुक्षौ च नाभितः ॥ ध्वजे जानु
द्वये पादद्वये वर्णान्क्रमान्न्यसेत् ॥ ७ ॥ षड्बीजानि पदद्वंद्वं मूर्ध्नि भाले मुखे हृदि ॥ नाभावूर्वोर्जंघयोश्च पादयोर्विन्यसेत्क्रमात् ॥ ८ ॥ अंजनीग
र्भसंभूतं ततो ध्यायेत्कपीश्वरम् ॥ उद्यत्कोटयर्कसंकाशं जगत्प्रक्षोभकारकम् ॥९॥ श्रीरामांघ्रिध्याननिष्ठं सुग्रीवप्रमुखार्चितम् ॥ वित्रासयंतं नादेन
राक्षसान्मारुतिं भजेत् ॥ १० ॥ ध्यात्वैवं प्रजपेद्भानुसहस्रं विजितेंद्रियः ॥ दशांशं जुहुयाद्व्रीहीन्पयोदध्याज्यमिश्रितान् ॥११॥पूर्वोक्ते वैष्णवे पीठे
मूर्तिं संकल्प्य मूलतः ॥ आवाह्य तत्र संपूज्य पाद्यादिभिरुपायनैः॥१२॥केशरेष्वंगपूजा स्यात्पत्रेषु च ततोऽर्चयेत्॥रामभक्तो महातेजाः कपिराजो
महाबलः॥१३॥द्रोणाद्रिहारको मेरुपीठकार्चनकारकः॥दक्षिणाशाभास्करश्च सर्वविघ्नविनाशकः॥१४॥इत्थं सम्पूज्य नामानि दलाग्रेषु ततोऽर्चयेत्॥
सुग्रीवमंगद नीलं जांबवंतं नलं तथा ॥ १५ ॥ सुषेणं द्विविदं मैंदं लोकपालस्ततोऽर्चयेत् ॥ वज्राद्यानपि संपूज्य सिद्धश्चैवं मनुर्भवेत् ॥१६॥ मंत्रं
नवशतं रात्रौ जपेद्दशदिनावधि ॥ यो नरस्तस्य नश्यंति राजशत्रूत्थभीतयः ॥ १७ ॥ मातुलिंगाम्रकदलीफलैर्हुत्वा सहस्रकम्॥ द्वाविंशतिब्रह्मचारि
विप्रान्संभोजयेच्छुचीन् ॥ १८ ॥ एवंकृते भूतविषग्रहरोगाद्युपद्रवाः ॥ नश्यंति तत्क्षणादेव विद्वेषिग्रहदानवाः ॥ १९ ॥ अष्टोत्तरशतेनांबु मंत्रितं
विषनाशनम् ॥ भूतापस्मारकृत्योत्थज्वरे तन्मंत्रमंत्रितैः ॥ २० ॥ भस्मभिः सलिलैर्वापि ताडयेज्ज्वरिणं क्रुधा ॥ त्रिदिनाज्ज्वरमुक्तोऽसौ सुखं च
लभते नरः ॥ २१ ॥ औषधं वा जलं वापि भुक्त्वा तन्मंत्रमंत्रितम् ॥ सर्वान्रोगान्पराभूय सुखी भवति तत्क्षणात् ॥ २२ ॥ तज्जप्तभस्मलिप्तांगो
भुक्त्वा तन्मंत्रितं पयः ॥ योद्धुं गच्छेच्च यो मंत्री शस्त्रसंघैर्न बाध्यते ॥ २३ ॥ शस्त्रक्षतं व्रणस्फोटो लूतास्फोटोऽपि भस्मना ॥ त्रिर्जप्तेन च संस्पृष्टाः
शुष्यंत्येव न संशयः ॥ २४ ॥ जपेदर्कास्तमारभ्य यावदर्कोदयो भवेत् ॥ मन्त्रं सप्तदिनं यावच्चादाय भस्मकीलकौ ॥ २५ ॥ निखनेदभिमन्त्र्याशु

शत्रूणां द्वार्यलक्षितः॥ विद्वेषं मिथ आपन्नाः पलायंतेऽरयोऽचिरात्॥२६॥भस्मांबु चंदनं मंत्री मंत्रेणानेन मंत्रितम्॥भक्ष्यादियोजितं यस्मै ददाति स
तु दासवत् ॥ २७ ॥ क्रूराश्च जंतवोऽप्येवं भवंति वशवर्तिनः ॥ गृहीत्वेशानदिक्संस्थं करंजतरुमूलकम् ॥ २८ ॥ कृत्वा तेनांगुष्ठमात्रां प्रतिमां च
हनूमतः ॥ कृत्वा प्राणप्रतिष्ठां च सिंदूराद्यैः प्रपूज्य च ॥ २९ ॥ गृहस्याभिमुखीं द्वारे निखनेन्मंत्रमुच्चरन् ॥ ग्रहाभिचाररोगाग्निविषचौरनृपोद्भवाः
॥ ३० ॥ न जायंते गृहे तस्मिन् कदाचिदप्युपद्रवाः ॥ तद्गृहं धनपुत्राद्यैरेधते प्रत्यहं चिरम् ॥ ३१ ॥ निशि यत्र वने भस्म मृत्स्नया
वापि यत्नतः ॥ शत्रोः प्रतिकृतिं कृत्वा हृदि नाम समालिखेत् ॥ ३२ ॥ कृत्वा प्राणप्रतिष्ठांतं भिंद्याच्छस्त्रैर्मनुं जपन् ॥ मंत्रांते
प्रोच्चरेच्छत्रोर्नाम छिंधि च भिंधि च ॥ ३३ ॥ मारयेति च तस्यांते दंतैरोष्ठं निपीड्य च ॥ पाण्योस्तले प्रपीड्याथ त्यक्त्वा तं स्वगृहं व्रजेत् ॥३४॥
कुर्वन्सप्तदिनं चैवं हन्याच्छत्रुं न संशयः ॥ राजिकालवणैर्मुक्तचिकुरः पितृकानने ॥ ३५ ॥ धत्तूरफलपुष्पैश्च नखरोमविषैरपि ॥ ढिक (काक)
कौशिकगृध्राणां पक्षैः श्लेष्मांतकाक्षजैः ॥ ३६ ॥ समिद्भिस्त्रिशतं याम्यदिङ्मुखो जुहुयान्निशि ॥ एवं सप्तदिनं कुर्वन्मारयेदुद्धतं रिपुम् ॥ ३७ ॥
वित्रासस्त्रिदिनं रात्रौ श्मशाने षट्शतं जपेत् ॥ ततो वेताल उत्थाय वदेद्भावि शुभाशुभम् ॥ ३८ ॥ किंकरीभूय वर्त्तेत कुरुते साधकोदितम् ॥
भस्मांबुमंत्रितं रात्रौ सहस्रावृत्तिकं पुनः ॥ ३९ ॥ दिनत्रयं च तत्पश्चात्प्रक्षिपेत्प्रतिमासु च ॥ यासु कासु च स्थूलासु लघुष्वपि विशेषतः
॥ ४० ॥ मंत्रप्रभावाच्चलनं भवत्येव न संशयः ॥ अष्टम्यां वा चतुर्दश्यां कुजे वा रविवासरे ॥ ४१ ॥ हनुमत्प्रतिमां पट्टे माषैः स्नेहपरिप्लुतैः ॥
कुर्याद्रम्यां विशुद्धात्मा सर्वलक्षणलक्षिताम् ॥ ४२ ॥ तैलदीपं वामभागे घृतदीपं तु दक्षिणे ॥ संस्थाप्यावाहयेत्पश्चान्मूलमंत्रेण मंत्रवित् ॥ ४३ ॥
प्राणप्रतिष्ठां कृत्वा च पाद्यादीनि समर्पयेत् ॥ रक्तचंदनपुष्पैश्च सिंदूराद्यैः समर्चयेत् ॥ ४४ ॥ धूपं दीपं प्रदायाथ नैवेद्यं च समर्पयेत् ॥अपूपमो
दनं शाकमोदकान्वटकादिकम् ॥ ४५ ॥ साज्यं च तत्समर्प्याथ मूलमंत्रेण मंत्रवित् ॥ अखंडितान्यहिलतादलानि सप्तविंशतिम् ॥ ४६ ॥त्रिधा
कृत्वा सपूगानि मूलेनैव समर्पयेत्॥एवं संपूज्य मंत्रज्ञो जपेद्दशशतं मनुम् ॥४७॥कर्पूरारार्तिकं कृत्वा स्तुत्वा च बहुधा सुधीः॥निजेप्सितं निवेद्याथ
विधिवद्विसृजेत्ततः ॥ ४८ ॥ नैवेद्यान्नेन संभोज्य ब्राह्मणान्सप्तसंख्यया ॥ निवेदितानि पर्णानि तेभ्यो दद्याद्विभज्य च ॥ ४९ ॥ दक्षिणां च यथा
शक्ति दत्त्वा तान् विसृजेत्सुधीः॥तत इष्टगणैः सार्द्धं स्वयं भुंजीत वाग्यतः ॥५०॥ तद्दिने भूमिशय्यां च ब्रह्मचर्य्यं समाचरेत् ॥एवं यः कुरुते मर्त्यः
सोऽचिरादेव निश्चितम्॥५१॥प्राप्नुयात्सकलान्कामान्कपीशस्य प्रसादतः ॥हनुमत्प्रतिमां भूमौ विलिखेत्तत्पुरो मनुम् ॥५२ ॥ साध्यनाम द्वितीयांतं

विमोचय विमोचय ॥ तत्पूर्वं मार्जयेद्वामपाणिनाथ पुनर्लिखेत् ॥ एवमष्टोत्तरशतं लिखित्वा मार्जयेत्पुनः ॥५३॥एवं कृते महाकारागृहाच्छीघ्रं विमु
च्यते ॥ एवमन्यानि कर्माणि कुर्य्यात्पल्लवमुल्लिखन् ॥ ५४॥ सर्षपैर्वश्यकृद्धोमो विद्वेषे हयमारजैः ॥ कुंकुमैरिध्मकाष्ठैर्वा मरीचैर्जीरकैरपि ॥ ५५॥
ज्वरे दूर्वागुडूचीभिर्दध्ना क्षीरेण वा घृतैः ॥ शूले करंजवातारिसमिद्भिस्तैललोलितैः ॥ ५६ ॥ तैलाक्ताभिश्च निर्गुंडीसमिद्भिर्वा प्रयत्नतः ॥ सौभाग्ये
चंदनैश्चंद्रलोचनैर्वा लवंगकैः ॥ ५७॥ सुगंधपुष्पैर्वस्त्राप्त्यै तत्तद्धान्यैस्तदाप्तये ॥ रिपुपादरजोभिश्च राजीलवणमिश्रितैः ॥ ५८ ॥ होमयेत्सप्तरात्रं च
रिपुर्याति यमालयम् ॥ धान्यैः संप्राप्यते धान्यमन्नैरन्नसमुच्छ्रयः ॥ ५९ ॥ तिलाज्यक्षीरमधुभिर्महिषीगोसमृद्धये ॥ किं बहूक्तैर्विषे व्याधौ शांतौ
मोहे च मारणे ॥ ६० ॥ विवादे स्तंभने द्यूते भूतभीतौ च संकटे ॥ वश्ये युद्धे क्षते दिव्ये बंधमोक्षे महावने ॥ ६१ ॥ साधितोऽयं नृणां दद्यान्मंत्रः
श्रेयः सुनिश्चितम् ॥ वक्ष्येऽथ हनुमद्यंत्रं सर्वसिद्धिप्रदायकम् ॥ ६२ ॥ लांगूलाकारसंयुक्तं वलयत्रितयं लिखेत् ॥ साध्यनाम लिखेन्मध्ये पाशिबीज
प्रवेष्टितम् ॥ ६३ ॥ उपर्यष्टच्छदं कृत्वा पत्रेषु कवचं लिखेत् ॥ तद्बहिर्दंतमालिख्य तद्बहिश्चतुरस्रकम् ॥ ६४ ॥ चतुरस्रस्य रेखाग्रे त्रिशूलानि
समालिखेत् ॥ सौं बीजं भूपुरस्याष्टवज्रेषु विलिखेत्ततः ॥ ६५ ॥ कोणेष्वंकुशमालिख्य मालामंत्रेण वेष्टयेत् ॥ तत्सर्वं वेष्टयेद्यंत्रवलयत्रितयेन
च ॥ ६६ ॥ शिलायां फलके वस्त्रे ताम्रपत्रेऽथ कुड्यके ॥ ताडपत्रेऽथ भूर्जे वा रोचनानाभिकुंकुमैः॥६७॥यंत्रमेतत्समालिख्य निराहारो जितेंद्रियः॥
कपेः प्राणान्प्रतिष्ठाप्य पूजयेत्तद्यथाविधि ॥ ६८ ॥ अशेषदुःखशान्त्यर्थं यंत्रं संधारयेद्बुधः ॥ मारीज्वराभिचारादिसर्वोपद्रवनाशनम् ॥ ६९ ॥
योषितामपि बालानां धृतं जनमनोहरम् ॥ भूतकृत्यापिशाचानां दर्शनादेव नाशनम् ॥ ७० ॥ मालामंत्रमथो वक्ष्ये तारो वाग्विष्णुगेहिनी ॥
दीर्घत्रयान्विता माया प्रागुक्तं कूटपञ्चकम् ॥ ७१ ॥ ध्रुवो हृद्धनुमान्ङेंतोऽथ प्रकटपराक्रमः ॥ आक्रांतदिग्मंडलांते यशोवितानसंवदेत् ॥ ७२ ॥
धवलीकृतवर्णांते जगत्त्रितयवज्र च ॥ देहज्वलदग्निसूर्य कोटच्येत च समप्रभ ॥ ७३ ॥ तनूरुहपदांते तु रुद्रावतार संवदेत् ॥ लंकापुरी ततः
पश्चाद्दहनोदधिलंघन ॥ ७४ ॥ दशग्रीवशिरः पश्चात्कृतांतकपदं वदेत् ॥ सीतांते श्वसनपदं वाय्वंते सुतमीरयेत्॥ ७५ ॥अंजनागर्भसंभूतः श्रीरामल
क्ष्मणान्वितः ॥ नंदंति कर वर्णांते सैन्यप्राकार ईरयेत् ॥ ७६ ॥ सुग्रीवसख्यकाद्वर्णाद्रणवालिनिवर्हण ॥कारणद्रोणशब्दांते पर्वतोत्पाटनेति च ॥
॥ ७७॥ अशोकवनवीथ्यंते दारुणाक्षकुमारक ॥ छेदनांते वनरक्षाकरांते तु समूह च ॥ ७८ ॥ विभञ्जनांते ब्रह्मास्त्रब्रह्मशक्ति ग्रसेति च ॥
लक्ष्मणांते शक्तिभेदनिवारणपदं वदेत् ॥ ७९ ॥ विशल्योषधिशब्दांते समानयन संपठेत् ॥ बालोदित ततो भानुमंडलग्रसनेति च ॥ ८० ॥

मेघनादहोमपदाद्विध्वंसनपदं वदेत् ॥ इंद्रजिद्वधकारांते णसीतारक्षकेति च ॥ ८१ ॥ राक्षसीसंघशब्दांते विदारणपदं वदेत् ॥ कुंभकर्णादिसंकीर्त्य
वधांते च परायण ॥ ८२ ॥ श्रीरामभक्तिवर्णांते तत्परेति समुद्र च॥ व्योमद्रुमलंघनेति महासामर्थ्य संवदेत्॥ ८३ ॥ महातेजःपुंजशब्दाद्विराजमानवो
च्चरेत् ॥ स्वामिवचनसंपादितार्जुनांते च संयुग ॥८४॥ सहायांते कुमारेति ब्रह्मचारिन्पदंवदेत् ॥ गंभीरशब्दोदयांते दक्षिणापथ संवदेत् ॥ मार्त्तण्डमेरु
शब्दांते वदेत्पर्वतपीठिका ॥ ८५ ॥ अर्चनांते तु सकलमंत्रांते मपदं वदेत् ॥ आचार्यमम शब्दांते सर्वग्रहविनाशन ॥ ८६ ॥ सर्वज्वरोच्चाटनांते
सर्वविषविनाशन ॥ सर्वापत्तिनिवारण सर्वदुष्टनिबर्हण ॥ ८७ ॥ सर्वव्याध्यादि सम्प्रोच्य भयांते च निवारण ॥ ८८॥ सर्वशत्रुच्छेदनेति ततो मम
परस्य च ॥ ८९ ॥ ततस्त्रिभुवनांते तु पुंस्त्रीनपुंसकात्मकम् ॥ सर्वजीवपदांते तु जातं वशययुग्मकम् ॥ ९० ॥ ममाज्ञाकारकं पश्चात्संपादय
युगं पुनः ॥ ततो नानानामधेयान्सर्वान् राज्ञः स संपठेत् ॥ ९१ ॥ परिवारान्ममेत्यंते सेवकान् कुरु युग्मकम् ॥ सर्वशस्त्रास्त्रवीत्यंते षाणि विध्वंसय
द्वयम्॥९२॥लज्जादीर्घत्रयोपेता होत्रयं चैहि युग्मकम् ॥ विलोमं पंचकूटानि सर्वशत्रून्हनद्वयम्॥९३॥परबलानि परांते सैन्यानि क्षोभयद्वयम्॥९४॥
मम सर्वं कार्यजातं साधयेति द्वयं ततः ॥९५ ॥ सर्वदुष्टदुर्जनांते मुखानि कीलयद्वयम् ॥ घेत्रयं वर्मत्रितयं फट्त्रयं हांत्रयं ततः ॥ ९६॥ वह्निप्रियांतो
मंत्रोऽयं मालासंज्ञोऽखिलेष्टदः ॥९७॥वस्वष्टबाणवर्णोऽयं मंत्रः सर्वेष्टसाधकः॥९८॥महाभये महोत्पाते स्मृतोऽयं दुःखनाशनः॥ द्वादशार्णस्य षट्कूटं
त्यक्त्वा बीजं तथादिमम् ॥ ९९ ॥ पंचकूटात्मको मंत्रः सर्वकामप्रदायकः ॥ रामचंद्रो मुनिश्चास्य गायत्री छंद ईरितम् ॥१०० ॥ हनुमान्देवता
प्रोक्तो विनियोगोऽखिलाप्तये ॥ पंचबीजैः समस्तेन षडंगानि समाचरेत्॥ १०१ ॥ रामदूतो लक्ष्मणांते प्राणदाताञ्जनीसुतः ॥ सीताशोकविनाशोऽयं
लंकाप्रासादभंजनः ॥ १०२ ॥हनुमदाद्याः पंचैते बीजाद्या ङेयुताः पुनः ॥ षडंगमनवो ह्येते ध्यानपूजादि पूर्ववत् ॥ १०३ ॥ प्रणवो वाग्भवं पद्मा
माया दीर्घत्रयान्विता ॥ पंचकूटानि मंत्रोऽयं रुद्रार्णः सर्वसिद्धिदः ॥ १०४ ॥ ध्यानपूजादिकं सर्वमस्यापि पूर्ववन्मतम् ॥ अयमारा
धितो मंत्रः सर्वाभीष्टप्रदायकः ॥ १०५ ॥ नमो भगवते पश्चादनंतश्चंद्रशेखरां ॥ जनेयाय महांते तु बलायांतेऽग्निवल्लभा ॥ १०६ ॥
अष्टादशार्णो मंत्रोऽयं मुनिरीश्वरसंज्ञकः ॥ छंदोऽनुष्टुप्देवता तु हनुमान्पवनात्मजः ॥ १०७ ॥ हं बीजं वह्निवनिता शक्तिः प्रोक्ता मनीषिभिः ॥
आंजनेयाय हृदयं शिरश्च रुद्रमूर्तये ॥ १०८ ॥ शिखायां वायुपुत्रायाग्निगर्भाय वर्मणि ॥ रामदूताय नेत्रं स्याद्ब्रह्मास्त्रायास्त्रमीरितम् ॥ १०९ ॥
तप्तचामीकरनिभं भीघ्नसंविहिताञ्जलिम् ॥ चलत्कुंडलदीप्तास्यं पद्माक्षं मारुतिं स्मरेत् ॥ ११० ॥ ध्यात्वैवमयुतं जप्त्वा दशांशं जुहुयात्तिलैः॥

वैष्णवे पूजयेत्पीठे प्रागुद्दिष्टेन वर्त्मना॥ १११ ॥ अष्टोत्तरशतं नित्यं नक्तभोजी जितेंद्रियः ॥ जपित्वा क्षुद्ररोगेभ्यो मुच्यते नात्र संशयः ॥
॥ ११२ ॥ महारोगनिवृत्त्यै तु सहस्रं प्रत्यहं जपेत् ॥ राक्षसौघं विनिघ्नंतं कपिं ध्यात्वाघनाशनम् ॥ ११३ ॥ अयुतं प्रजपेन्नित्यमचिराज्ज
यति द्विषम् ॥ सुग्रीवेण समं रामं संदधानं कपिं स्मरन् ॥ ११४ ॥ प्रजपेदयुतं यस्तु संधिं कुर्याद्द्विपद्वयोः ॥ ध्यात्वा लंकां दहंतं तमयुतं प्रजपे
न्मनुम् ॥ ११५ ॥ अचिरादेव शत्रूणां ग्रामान्संप्रदहेत्सुधीः ॥ ध्यात्वा प्रयाणसमये हनुमन्तं जपेन्मनुम् ॥ ११६॥ यो याति सोऽचिरात्स्वेष्टं साध
यित्वा गृहे व्रजेत् ॥ हनुमंतं सदा गेहे योऽर्चयेज्जपतत्परः ॥ ११७ ॥ आरोग्यं च श्रियं कांतिं लभते निरुपद्रवम् । कानने व्याघ्रचौरेभ्यो रक्षेन्मनु
रयं स्मृतः ॥ ११८ ॥ प्रस्वापकाले शय्यायां स्मरेन्मंत्रमनन्यधीः ॥ तस्य दुःस्वप्नचौरादिभयं नैव भवेत्क्वचित् ॥ ११९ ॥ वियत्सेंदुर्हनुमते ततो
रुद्रात्मकाय च ॥ वर्मास्त्रांतो महामंत्रो द्वादशार्णोऽष्टसिद्धिकृत् ॥ १२० ॥ रामचन्द्रो मुनिश्चास्य जगती छन्द ईरितम् ॥ हनुमान्देवता बीजमाद्यं
शक्तिर्हुमीरिता ॥ १२१ ॥ षड्दीर्घभाजा बीजेन षडंगानि समाचरेत् ॥ महाशैलं समुत्पाट्य धावंतं रावणं प्रति ॥ १२२ ॥ लाक्षारक्तारुणं रौद्रं
कालांतकयमोपमम् ॥ ज्वलदग्निसमं जैत्रं सूर्यकोटिसमप्रभम् ॥ १२३ ॥ अंगदाद्यैर्महावीरैर्वेष्टितं रुद्ररूपिणम् ॥ तिष्ठ तिष्ठ रणे दुष्ट सृजंतं घोरनिः
स्वनम् ॥ १२४ ॥ शैवरूपिणमभ्यर्च्य ध्यात्वा लक्ष जपेन्मनुम् ॥ दशांशं जुहुयाद्व्रीहीन्पयोदध्याज्यमिश्रितान् ॥ १२५ ॥ पूर्वोक्ते वैष्णवे पीठे
विमलादिसमन्विते ॥ मूर्तिं संकल्प्य मूलेन पूजा कार्या हनूमतः ॥ १२६ ॥ ध्यानैकमात्रोऽपि नृणां सिद्धिरेव न संशयः ॥ अथास्य साधनं वक्ष्ये
लोकानां हितकाम्यया ॥ १२७ ॥ हनुमत्साधनं पुण्यं महापातकनाशनम् ॥ एतद्गुह्यतमं लोके शीघ्रसिद्धिकरं परम् ॥ १२८ ॥मंत्री यस्य प्रसादेन
त्रैलोक्यविजयी भवेत् ॥ प्रातः स्नात्वा नदीतीरे उपविश्य कुशासने ॥ १२९ ॥ प्राणायामषडंगे च मूलेन सकलं चरेत् ॥ पुष्पांजल्यष्टकं दत्वा
ध्यात्वा रामं ससीतकम् ॥ १३० ॥ ताम्रपात्रे ततः पद्ममष्टपत्रं सकेशरम् ॥ कुचंदनेन घृष्टेन संलिखेत्तच्छलाकया ॥ १३१ ॥ कर्णिकायां लिखे
न्मंत्रं तत्रावाह्य कपीश्वरम् ॥ मूर्तिं मूलेन संकल्प्य ध्यात्वा पाद्यादिकं चरेत् ॥ १३२ ॥ गंधपुष्पादिकं सर्वं निवेद्य मूलमंत्रतः ॥ केसरेषु षडंगानि
दलेषु च ततोऽर्चयेत् ॥ १३३ ॥ सुग्रीवं लक्ष्मणं चैव ह्यंगदं नलनीलकौ ॥ जांबवंतं च कुमुदं केसरीशं दलेऽर्चयेत् ॥ १३४ ॥ दिक्पालांश्चापि
वज्रादीन्पूजयेत्तदनंतरम् ॥ एवं सिद्धे मनौ मंत्री साधयेत्स्वेष्टमात्मनि ॥ १३५ ॥ नदीतीरे कानेन वा पर्वते विजनेऽथवा ॥ साधयेत्साधक
श्रेष्ठो भूमिग्रहणपूर्वकम् ॥ १३६ ॥ जिताहारो जितश्वासो जितवाक्च जितेंद्रियः ॥ दिग्बन्धनादिकं कृत्वा न्यासध्यानादिपूर्वकम् ॥ १३७ ॥लक्षं

जपेन्मंत्रराजं पूजयित्वा तु पूर्ववत् ॥ लक्षांते दिवसं प्राप्य कुर्य्यांच्च पूजनं महत् ॥ १३८ ॥ एकाग्रमनसा सम्यग्ध्यात्वा पवननंदनम् ॥ दिवारात्रौ
जपं कुर्याद्यावत्संदर्शनं भवेत् ॥ १३९ ॥ सुदृढं साधकं मत्वा निशीथे पवनात्मजः ॥ सुप्रसन्नस्ततो भूत्वा प्रयाति साधकाग्रतः ॥ १४० ॥ यथे
प्सितं वरं दत्वा साधकाय कपीश्वरः ॥ वरं लब्ध्वा साधकेंद्रो विहरेदात्मनः सुखैः ॥ १४१ ॥ एतद्धि साधनं पुण्यं लोकानां हितकाम्यया ॥ प्रका
शितं रहस्यं वै देवानामपि दुर्लभम् १४२ ॥ अन्यानपिप्रयोगांश्च साधयेदात्मनो हितान् ॥ वियदिंदुयुतं पश्चान्ङेंतं पवननंदनम् ॥१४३॥ वह्निप्रि
यांतो मंत्रोऽयं दशार्णः सर्वकामदः ॥ मुन्यादिकं च पूर्वोक्तं षडंगान्यपि पूर्ववत् ॥ १४४ ॥ ध्यायेद्रणे हनूमंतं सूर्यकोटिसमप्रभम् ॥ धावंतं रावणं
जतुं दृष्ट्वा सत्वरमुत्थितम् ॥ १४५ ॥ लक्ष्मणं च महावीरं पतितं रणभूतले ॥ गुरुं च क्रोधमुत्पाद्य ग्रहीतुं गुरुपर्वतम्॥१४६ ॥ हाहाकारैः सदर्पै
श्च कंपयंतं जगत्त्रयम् ॥ आब्रह्मांड समाव्याप्य कृत्वा भीमं कलेवरम् ॥ १४७ ॥ लक्षं जपेद्दशांशेन जुहुयात्पूर्ववत्सुधीः ॥पूर्ववत्पूजनं प्रोक्तं मंत्र
स्यास्य विधानतः ॥ १४८ ॥ एवं सिद्धे मनौ मंत्री साधयेदात्मनो हितम् ॥ अस्यापि मंत्रवर्यस्य रहस्यं साधनं तु वै ॥१४९॥ सुगोप्यं सर्वतंत्रेषु
न देयं यस्य कस्यचित् ॥ ब्राह्मे मुहूर्ते चोत्थाय कृतनित्यक्रियः शुचिः ॥ १५० ॥ गत्वा नदीं ततः स्नात्वा तीर्थमावाह्य चाष्टधा ॥ मूलमंत्रं
ततो जप्त्वा सिंचेदादित्यसंख्यया ॥ १५१ ॥ एवं स्नानादिकं कृत्वा गंगातीरेऽथवा पुनः ॥ पर्वते वा वने वापि भूमिग्रहणपूर्वकम् ॥ १५२ ॥ आद्य
वर्णैः पूरकं स्यात्पञ्चवर्गैश्च कुम्भकम् ॥ रेचकं च पुनर्याद्यैरेवं प्राणान्नियम्य च ॥ १५३ ॥ विधाय भूतशुद्ध्यादि पीठन्यासावधि पुनः ॥ ध्यात्वा
पूर्वोक्तविधिना संपूज्य च कपीश्वरम् ॥ १५४ ॥ तदग्रे प्रजपेन्नित्यं साधकोऽयुतमादरात् ॥ सप्तमे दिवसे प्राप्ते कुर्याच्च पूजनं महत् ॥१५५॥एकाग्र
मनसा मन्त्री दिवारात्रं जपेन्मनुम् ॥ महाभयं प्रदत्वा त्रिभागशेषासु निश्चितम् ॥ १५६॥ यामिनीषु समायाति नियतं पवनात्मजः ॥ यथेप्सितं वरं
दद्यात्साधकाय कपीश्वरः ॥ १५७ ॥ विद्यां वापि धनं वापि राज्यं वा शत्रुनिग्रहम् ॥तत्क्षणादेव चाप्नोति सत्यं सत्यं न संशयः ॥१५८॥ इह लोके
ऽखिलान्कामान्भुक्त्वांते मुक्तिमाप्नुयात् ॥ सद्याचितं वायुयुग्मं हनूमंतेति चोद्धरेत् ॥ १५९ ॥ फलांते फक्रियानेत्रयुक्ता च कामिका ततः ॥ घगंते
धगितेत्युक्त्वा आयुरास्व पदं ततः ॥ १६० ॥ लोहितो गरुडो हेतिबाणनेत्राक्षरो मनुः ॥ मुन्यादिकं तु पूर्वोक्तं प्लीहरोगहरो हरिः ॥ १६१ ॥
देवता च समुद्दिष्टा प्लीहयुक्तोदरे पुनः ॥ नागवल्लीदलं स्थाप्यमुपर्याच्छादयेत्ततः ॥ १६२ ॥ वस्त्रं चैवाष्टगुणितं ततः साधकसत्तमः ॥ शकलं
वंशजं तस्योपरि मुंचेत्कपिं स्मरेत् ॥ १६३ ॥ आरण्यसाणकोत्पन्ने वह्नौ यष्टिं प्रतापयेत् ॥ बदरीभूरुहोत्थां तां मंत्रेणानेन सप्तधा ॥ १६४ ॥

तया संताडयेद्वंशशकलं जठरस्थितम् ॥ सप्तकृत्वः प्लीहरोगो नाशमायाति निश्चितम् ॥ १६५ ॥ तारो नमो भगवते आंजनेयाय चोच्चरेत् ॥
अमुकस्य शृंखलां त्रोटयद्वितयमीरयेत् ॥ १६६ ॥ बंधमोक्षं कुरुयुगं स्वाहांतोऽयं मनुर्मतः ॥ ईश्वरोऽस्य मुनिश्छन्दोऽनुष्टुप्च देवता पुनः ॥
॥ १६७ ॥ शृंखलामोचकः श्रीमान्हनूमान्पवनात्मजः ॥ हं बीजं ठद्वयं शक्तिर्बंधमोक्षे नियोगता ॥ १६८ ॥ षड्दीर्घवह्नियुक्तेन बीजेनां
गानि कल्पयेत् ॥ वामे शैलं वैरिभिदं विशुद्धं टंकमन्यतः ॥ १६९ ॥ दधानं स्वर्णवर्णं च ध्यायेत्कुंडलिनं हरिम् ॥ एवं ध्यात्वा जपेल्लक्ष
दशांशं चूतपल्लवैः ॥ १७० ॥ जुहुयात्पूर्ववत्प्रोक्तं यजनं वास्य सूरिभिः ॥ महाकारागृहे प्राप्तो ह्ययुतं प्रजपेन्नरः ॥ १७१ ॥ शीघ्रं कारागृ
हान्मुक्तः सुखी भवति निश्चितम् ॥ यंत्रं चास्य प्रवक्ष्यामि बन्धमोक्षकरं शुभम् ॥ १७२ ॥ अष्टच्छदांतः षट्कोणं साध्यनामसमन्वितम् ॥
षट्कोणेषु ध्रुवं ङेंतमांजनेयपदं लिखेत् ॥ १७३ ॥ अष्टच्छदेषु विलिखेत्प्रणवो वातुवात्विति ॥ गोरोचनाकुंकुमेन लिखित्वा यंत्रमुत्तम
म् ॥ १७४ ॥ धृत्वा मूर्ध्नि जपेन्मंत्रमयुतं बन्धमुक्तये ॥ यन्त्रमेतल्लिखित्वा तु मृत्तिकोपरि मार्जयेत् ॥ १७५ ॥ दक्षहस्तेन मन्त्रज्ञः प्रत्यहं मंडला
वधि ॥ एवं कृते महाकारागृहान्मंत्री विमुच्यते ॥ १७६ ॥ गगनं ज्वलनः साक्षी मर्कटेति द्वयं ततः ॥ तोयं शशेषे मकरे परिमुंचति
मुंचति ॥ १७७ ॥ ततः शृंखलिकां चेति वेदनेत्राक्षरो मनुः ॥ इमं मंत्रं दक्षकरे लिखित्वा वामहस्ततः ॥ १७८ ॥ दूरीकृत्य
जपेन्मंत्रमष्टोत्तरशतं बुधः ॥ त्रिसप्ताहात्प्रबद्धोऽसौ मुच्यते नात्र संशयः ॥ १७९ ॥ मुन्याद्यर्चादिकं सर्वमस्य पूर्ववदाचरेत् ॥ लक्षं
जपो दशांशेन शुभैर्द्रव्यैश्च होमयेत् ॥ १८० ॥ पुच्छाकारे सुवस्त्रे च लेखन्या क्षुरकोत्थया ॥ गन्धाष्टकैर्लिखेद्रूपं कपिराजस्य सुन्दरम् ॥ १८१ ॥
तन्मध्येऽष्टदशार्णं तु शत्रुनामान्वितं लिखेत् ॥ तेन मन्त्राभिजप्तेन शिरोबद्धेन भूमिपः ॥१८२॥ जयत्यरिगणं सर्वं दर्शनादेव निश्चितम्॥चन्द्रसूर्यो
परागादौ पूर्वोक्तं लेखयेद्ध्वजे ॥ १८३ ॥ ध्वजमादाय मन्त्रज्ञः संस्पर्शान्मोक्षणावधि ॥ मातृकां जापयेत्पश्चाद्दशांशेन च होमयेत् ॥ १८४ ॥ तिलैः
सर्षपसंमिश्रैः संस्कृते हव्यवाहने ॥ गजे ध्वजं समारोप्य गच्छेद्युद्धाय भूपतिः॥ १८५ ॥ गजस्थं तं ध्वजं दृष्ट्वा पलायन्तेऽरयो ध्रुवम्॥ महारक्षाकरं
यन्त्रं वक्ष्ये सम्यग्घनूमतः ॥ १८६ ॥ लिखेद्वसुदलं पद्मं साध्याख्यायुतकर्णिकम् ॥ दलेऽष्टकोणमालिख्य मालामन्त्रेण वेष्टयेत् ॥ १८७ ॥ तद्बहि
र्माययावेष्ट्य प्राणस्थापनमाचरेत् ॥ लिखितं स्वर्णलेखन्या भूर्जपत्रे सुशोभने ॥ १८८ ॥ काश्मीररोचनाभ्यां तु त्रिलोहेन च वेष्टितम् ॥ सम्पा
तसाधितं यंत्रं भुजे वा मूर्ध्नि धारयेत् ॥१८९॥ रणे दुरोदरे वादे व्यवहारे जयं लभेत् ॥ ग्रहैर्विघ्नैर्विषैः शस्त्रैश्चौरैर्नैवाभिभूयते ॥ १९० ॥ सर्वांत्रो

गानपाकृत्य चिरं जीवेंच्छतं समाः॥ षड्दीर्घयुक्तं गगन वह्न्याख्यं तारसंपुटम् ॥ १९१ ॥ अष्टार्णोऽयं महामंत्रो मालामंत्रोऽथ कथ्यते ॥ प्रणवो वज्रकायेति वज्रतुंडेति संपठेत् ॥ १९२ ॥ कपिलांते पिंगलेति उर्द्धकेशमहापदम् ॥ बलरक्तमुखांते तु तडिज्जिह्व महा ततः ॥ १९३ ॥ रौद्रदंष्ट्रोत्कटं पश्चात्कहद्वंद्वं करालिति ॥ महद्दढप्रहारेण लंकेश्वरवधात्ततः ॥ १९४ ॥ वायुर्महासेतुपदं बंधांते च महा पुनः ॥ शैलप्रवाह गगनेचर एह्येहि संवदेत् ॥ १९५ ॥ भगवन्महाबलांते पराक्रमपदं वदेत् ॥ भैरवाज्ञापयैह्येहि महारौद्रपदं ततः ॥ १९६ ॥ दीर्घपुच्छेन वर्णांते वदेद्वेष्टय वैरिणम् ॥ जंभयद्वयमाभाष्य वर्मास्त्रांतो मनुर्मतः ॥ १९७ ॥ मालाह्वयो द्विजश्रेष्ठ शरनेत्रधराक्षरः ॥ मालामंत्राष्टार्णयोश्च मुन्याद्यर्चा तु पूर्ववत् ॥ १९८ ॥ जप्तो युद्धे जयं दद्याद्व्याधौ व्याधिविनाशनः ॥ एवं यो भजते मंत्री वायुपुत्रं कपीश्वरम् ॥ १९९॥ सर्वान्स लभते कामान्देवैरपि सुदुर्लभान् ॥ धनं धान्यं सुतान्पौत्रान्सौभाग्यमतुलं यशः ॥ २०० ॥ मेधां विद्यां प्रभां राज्यं विवादे विजयं तथा ॥ वश्याद्यानि च कर्माणि संगरे विजयं तथा ॥ २०१ ॥ उपासितोऽजनागर्भसंभूतः प्रददात्यलम् ॥ २०२ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने सनत्कुमारविभागे तृतीयपादे हनुमन्मंत्रकथनंनाम चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ सनत्कुमार उवाच ॥ अथ दीपविधिं वक्ष्ये सरहस्यं हनूमतः॥ यस्य विज्ञानमात्रेण सिद्धो भवति साधकः ॥ १॥ दीपपात्रप्रमाणं च तैलमानं क्रमेण तु ॥ द्रव्यस्य च प्रमाणं वै तत्तु मानमनुक्रमात् ॥ २ ॥ स्थानभेदं च मंत्रं च दीपदानमतुं पृथक् ॥ पुष्पवासिततैलेन सर्वकामप्रदं मतम् ॥ ३ ॥ तिलतैलं श्रियः प्राप्त्यै पथिकागमनं प्रति ॥ अतसीतैलमुद्दिष्टं वश्यकर्मणि निश्चितम् ॥ ४ ॥ सार्षपं रोगनाशाय कथितं कर्मकोविदैः ॥ मारणे राजिकोत्थं वा विभीतकसमुद्भवम्॥५॥ उच्चाटने करंजोत्थं विद्वेषे मधुवृक्षजम् ॥ अलाभे सर्वतैलानां तिलजं तैलमुत्तमम् ॥ ६॥ गोधूमाश्च तिला माषा मुद्गा वै तंडुलाः क्रमात् ॥ पंचधान्यमिदं प्रोक्तं नित्यदीपं तु मारुतेः॥७ ॥ पंचधान्यसमुद्भूतं पिष्टमात्रं सुशोभनम् ॥ सर्वकामप्रदं प्रोक्तं सर्वदा दीपदानके ॥ ८॥ वश्ये तंडुलपिष्टोत्थं मारणे माषपिष्टजम् ॥ उच्चाटने कृष्णतिलपिष्टजं च प्रकीर्तितम् ॥ ९ ॥ पथिकागमने प्रोक्तं गोधूमोत्थं सतंडुलम् ॥ मोहने त्वाढकीजात विद्वेषे च कुलत्थजम् ॥ १० ॥ संग्रामे केवला माषाः प्रोक्ता दीपस्य पात्रके॥ सधौ त्रिपिष्टजं लक्ष्मीहेतोः कस्तूरिकाभवम् ॥ १४ ॥ एलालवंगकर्पूरमृगनाभिसमुद्भवम् ॥कन्याप्राप्त्यै तथा राजवश्ये सख्ये तथैव च ॥ १२ ॥ अलाभे सर्ववस्तूनां पंचधान्यं वरं स्मृतम्॥ अष्टमुष्टिर्भवेत्किञ्चित्किञ्चिदष्टौ चः पुष्कलम् ॥ १३॥ पुष्कलानां चतुर्णां च ह्याढकः परिकीर्तितः ॥ चतुराढको भवेद्द्रोणः खारी द्रोणचतुष्टयम् ॥ १४ ॥ खारीचतुष्टयं प्रस्थ

संज्ञा च परिकीर्तिता ॥ अथवान्यप्रकारेण मानमत्र निगद्यते ॥ १५ ॥ पलद्वयं तु प्रसृतं द्विगुणं कुडवं मतम् ॥ चतुर्भिः कुडवैः प्रस्थस्तै
श्चतुर्भिस्तथाढकः ॥ १६ ॥ चतुराढको भवेद्द्रोणः खारी द्रोणचतुष्टयम् ॥ क्रमेणैतेन ते ज्ञेयाः पात्रे षट्कर्मसंभवे ॥ १७ ॥ पञ्च सप्त नव तथा
प्रमाणास्ते यथाक्रमम् ॥ सौगंधे नैव मानं स्यात्तद्यथारुचि संमतम् ॥१८॥ नित्यपात्रे तु तैलानां नियमो वार्तकोद्भवः ॥ सोमवारे गृहीत्वा तद्धान्यं
तोयप्लुतं धरेत् ॥ १९ ॥ पश्चात्प्रमाणतो ज्ञेयं कुमारीहस्तपेषणम् ॥ तत्पिष्टं शुद्धपात्रे तु नदीतोयेन पिंडितम् ॥ २० ॥ दीपपात्रं ततः कुर्याच्छुद्धः
प्रयतमानसः ॥ दीपपात्रे ज्वाल्यमाने मारुतेः कवचं पठेत् ॥ २१ ॥ शुद्धभूमौ समास्थाप्य भौमे दीपं प्रदापयेत् ॥ मालामनूनां ये वर्णाः साध्य
नामसमन्विताः ॥ २२ ॥ वर्तिकायां प्रकर्त्तव्यास्तंतवस्तत्प्रमाणकाः ॥ तत्त्रिंशांशेन वा ग्राह्या गुरुकार्येऽखिलाव्यता ॥ २३ ॥ कूटतुल्याः स्मृता
नित्ये सामान्येऽथ विशेषके ॥ रुद्राः कूटगणाः प्रोक्ता न पात्रे नियमो मतः ॥ २४ ॥ एकविंशतिसंख्याकास्तन्तवोऽथाध्वनि स्मृताः ॥
रक्तसूत्रं हनुमतो दीपदाने प्रकीर्तितम् ॥ २५ ॥ कृष्णमुच्चाटने द्वेषेऽरुणं मारणकर्मणि ॥ कूटतुल्यपलं तैलं गुरुकार्ये शिवैर्गुणम् ॥ २६ ॥ नित्ये
पंचपलं प्रोक्तमथवा मानसी रुचिः ॥ २७ ॥ हनुमत्प्रतिमायास्तु सन्निधौ दीपदापनम् ॥ शिवालयेऽथवा कुर्यान्नित्यनैमित्तिके स्थले ॥ २८ ॥
विशेषोऽस्त्यत्र यः कश्चिन्मारुते रुच्यते मया ॥ २९ ॥ प्रतिमाग्रे प्रमोदेन ग्रहभूतग्रहेषु च ॥ चतुष्पथे तथा प्रोक्तं षट्सु दीपप्रदापनम् ॥ ३० ॥
सन्निधौ स्फाटिके लिंगे शालग्रामस्य सन्निधौ ॥ नानाभोगश्रियै प्रोक्तं दीपदानं हनूमतः ॥ ३१ ॥ गणेशसन्निधौ विघ्नमहासंकटनाशने ॥ विषव्या
धिभये घोरे हनुमत्सन्निधौ स्मृतम् ॥ ३२ ॥ दुर्गायाः सन्निधौ प्रोक्तं संग्रामे दीपदापनम्॥ चतुष्पथे व्याधिनष्टौ दुष्टदृष्टौ तथैव च ॥ ३३ ॥
राजद्वारे बंधमुक्तौ कारागारेऽथवा मतम् ॥ अश्वत्थवटमूले तु सर्वकार्यप्रसिद्धये॥ ३४ ॥ वश्ये भये विवादे च वेश्मसंग्रामसंकटे ॥ द्यूते दृष्टिस्तंभने
च विद्वेषे मारणे तथा ॥३५॥ मृतकोत्थापने चैव प्रतिमाचालने तथा ॥ विषे व्याधौ ज्वरे भूतग्रहे कृत्याविमोचने ॥ ३६ ॥ क्षतग्रंथौ महारण्ये दुर्गे
व्याघ्रे च दंतिनि॥क्रूरसत्त्वेषु सर्वेषु शश्वद्बंधविमोक्षणे॥३७॥पथिकागमने चैव दुःस्थाने राजमोहने॥आगमे निर्गमे चैव राजद्वारे प्रकीर्तितम् ॥३८॥
दीपदानं हनुमतो नात्र कार्या विचारणा॥३९॥रुद्रैकविंशपिंडांश्च त्रिधा मंडलमानकम्॥लघुमानं स्मृतं पंच सप्त वा नव वा तथा॥४०॥क्षीरेण नवनी
तेन दध्ना वा गोमयेन च॥प्रतिमाकरणं प्रोक्तं मारुतेर्दीपदापने॥४१॥दक्षिणाभिमुखं वीरं कृत्वा केसरिविक्रमम्॥४२॥ऋक्षविन्यस्तपादं च किरीटेन
विराजितम् ॥ लिखेद्भित्तौ पटे वापि पीठे वा मारुतेः शुभे ॥४३॥ मालामंत्रेण दातव्यं दीपदानं हनूमतः ॥नित्यदीपः प्रकर्त्तव्यो द्वादशाक्षरविद्यया

॥४४॥विशेषस्तत्र यस्तं वै दीपदानेऽवधारय॥षष्ठ्यादौ च द्वितीयादाविमं दीपमितीरयेत्॥४५॥गृहाणेति पदं पश्चाच्छेषं पूर्ववदुच्चरेत्॥कूटादौ नित्य दीपे च मंत्रं सूर्याक्षरं वदेत्॥४६॥तत्र मालाख्यमनुना तत्तत्कार्येषु कारयेत्॥गोमयेनोपलिप्तायां भूमौ तद्गतमानसः॥४७॥ षट्कोणं वसुपत्रं च भूमौ रेखासमन्वितम् ॥ कमलं च लिखेद्भद्रं तत्र दीपं निधापयेत् ॥४८॥ शैवे वा वैष्णवे पीठे पूजयेदंजनासुतम् ॥ कूटषट्कं च षट्कोणे अंतराले पर लिखेत् ॥४९॥ षट्कोणेषु षडंगानि बीजयुक्तानि संलिखेत् ॥ सौम्यं मध्यगतं लेख्यं तत्र संपूज्य मारुतिम् ॥५०॥ षट्कोणेषु षडंगानि नामानि च पुरोक्तवत् ॥ वसुपत्रे क्रमात्पूज्या अष्टावेते च वानराः ॥ ५१ ॥ सुग्रीवायांगदायाथ सुषेणाय नलाय च ॥नीलायाथो जांबवते प्रहस्ताय तथैव च ॥ ५२ ॥ सुवेषाय ततः पश्चाद्यजेत्षडंगदेवताः ॥ आदावंजनापुत्राय ततश्च रुद्रमूर्तये ॥ ५३ ॥ ततो वायुसुतायाथ जानकीजीवनाय च ॥ रामदूताय ब्रह्मास्त्रनिवारणाय तत्परम् ॥ ५४ ॥ पंचोपचारैः संपूज्य देशकालौ च कीर्तयेत् ॥ कुशोदकं समादाय दीपमंत्रं समुच्चरेत् ॥ ५५॥ उत्तराभिमुखो जप्त्वा साधयेत्साधकोत्तमः॥तं मंत्रं कूटधा जप्त्वा जलं भूमौ विनिक्षिपेत् ॥ ५६ ॥ ततः करपुटं कृत्वा यथाशक्ति जपेन्मनुम् ॥ अनेन दीपवर्येण उदङ्मुखगतेन वै ॥ ५७ ॥ तथा विधेहि हनुमन्यथा स्युर्मे मनोरथाः ॥ त्रयोदशैवं द्रव्याणि गोमयं मृत्तिका मसी॥५८॥ अलक्तं दरदं रक्तचंदनं चंदनं मधु ॥ कस्तूरिका दधि क्षीरं नवनीतं घृतं तथा ॥ ५९ ॥गोमयं द्विविधं तत्र प्रोक्तं गोमहिषीभवम् ॥ पश्चाद्विनष्टद्रव्यातौ माहिषं गोमयं स्मृतम् ॥६०॥ पथिकागमने दूरान्महादुर्गस्य रक्षणे ॥ बालादिरक्षणे चैव चौरादिभयनाशने ॥ ६१॥ स्त्रीवश्यादिषु कार्येषु शस्तं गोगोमयं मुने ॥ भूमिस्पृष्टं न तद्ग्राह्यमंतरिक्षाच्च भाजने ॥ ६२ ॥चतुर्विधा मृत्तिका तु श्वेता पीतारुणासिता ॥ तत्र गोपीचंदनं तु हरितालं च गैरिकम् ॥ ॥ ६३ ॥ मषी लाक्षारसोद्भूता सर्वं वान्यत्स्फुटं मतम् ॥ कृत्वा गोपीचंदनेन चतुरस्रं गृहं सुधीः ॥ ६४ ॥ तन्मध्ये माहिषेणाथ कुर्यान्मूर्तिं हनूमतः ॥बीजं क्रोधाच्च तत्पुच्छं लिखेन्मंत्री समाहितः॥६५॥तैलेन स्नापयेन्मूर्तिं गुडेन तिलकं चरेत् ॥ शतपत्रसमो धूपः शालनिर्याससंभवः ॥६६॥ कुर्याच्च तैलदीपं तु वर्तिपंचकसंयुतम् ॥ दध्योदनेन नैवेद्यं दद्यात्साधकसत्तमः ॥ ६७ ॥ वारत्रयं कंठदेशे सशेषविषमुच्चरन् ॥ एवं कृते तु नष्टानां महिषीणां गवामपि ॥ ६८ ॥ दासीदासादिकानां च नष्टानां प्राप्तिरीरिता ॥ चौरादिदुष्टसत्त्वानां सर्पादीनां भये पुनः॥ ६९॥ तालेन च चतुर्द्वारं गृहं कृत्वा सुशोभनम्॥ पूर्वद्वारे गजः स्थाप्यो दक्षिणे महिषस्तथा ॥ ७० ॥ सर्पस्तु पश्चिमे द्वारे व्याघ्रश्चैवोत्तरे तथा ॥ एवं क्रमेण खड्गं च क्षुरिकादंडमुद्गरान् ॥ ७१ ॥ विलिख्य मध्ये मूर्तिं च महिषीगोमयेन वै ॥ कृत्वा डमरुहस्तां च चकिताक्षीं प्रयत्नतः ॥ ७२ ॥ पयसा

स्नापनं रक्तचंदनेनानुलेपनम् ॥ जातीपुष्पैस्तु संपूज्य शुद्धधूप प्रकल्पयेत् ॥ ७३ ॥ घृतेन दीपं दत्त्वाथ पायसान्नं निवेदयेत् ॥ गगनं दीपिकें
द्राख्यं शास्त्रं च पुरतो जपेत् ॥ ७४ ॥ एवं सप्तदिनं कृत्वा मुच्यते महतो भयात् ॥ अनयोर्भौमवारे तु कुर्यादारंभमादरात् ॥ ७५ ॥शत्रुसेना
भये प्राप्ते गैरिकेण तु मंडलम् ॥ कृत्वा तदंतरे तालमीषन्नम्रं समालिखेत् ॥ ७६ ॥ तत्रावलंबमानां च प्रतिमां गोमयेन तु ॥ वामहस्तेन तालाग्रं
दक्षिणे ज्ञानमुद्रिका ॥ ७७ ॥ तालमूलात्स्वकाष्ठायां मार्गे हस्तमिते गृहम् ॥ चतुरस्रं विधायाथ तन्मध्ये मूर्तिमालिखेत् ॥ ७८ ॥ दक्षिणाभिमु
खीं रम्यां हृदये विहितांजलिम् ॥ तोयेन स्नानगंधादि यथासंभवमर्पयेत् ॥ ७९ ॥ कृशरान्नं च नैवेद्यं साज्यं तस्यै निवेदयेत् ॥ किलिद्वयं जपं
प्रोक्तमेवं कुर्याद्दिने दिने ॥ ८० ॥ एवं कृते भवेच्छीघ्रं पथिकानां समागमः ॥ श्यामपाषाणखण्डेन लिखित्वा भूपतेर्गृहम् ॥ ८१ ॥ प्राकारं तु
चतुर्द्वारयुक्तं द्वारेषु तत्र वै ॥ अन्योन्यपुच्छैरिधित्रययुक्तां हनूमतः ॥ ८२ ॥ कुर्यान्मूर्तिं गोमयेन धत्तूरकुसुमैर्यजेत् ॥ जटामांसीभवं धूपं तैला
क्तघृतदीपकम् ॥ ८३ ॥ नैवेद्यं तिलतैलाक्तसक्षारा माषरोटिका ॥ ध्येयो दक्षिणहस्तेन रोटिकां भक्षयन्हरिः ॥ ८४ ॥ वामहस्तेन पाषाणैस्त्रासय
न्परसैनिकान् ॥ मारयन्भ्रुकुटीं बद्ध्वा भीषयन्मथयन्स्थितः ॥ ८५ ॥ जपेच्च भुग्भुगिति वै सहस्रं ध्यानतत्परः ॥ एवं कृतविधानेन पर
सैन्यं विनाशयेत् ॥ ८६ ॥ रक्षा भवति दुर्गाणां सत्यं सत्य न संशयः ॥ प्रयोगा बहवस्तत्र संक्षेपादुदिता मया ॥ ८७ ॥ प्रत्यहं यो विधा
नेन दीपदानं हनूमतः ॥ तस्यासाध्यं न वै किंचिद्विद्यते भुवनत्रये ॥ ८८ ॥ न देयं दुष्टहृदये दुष्टचिंतनबुद्धये ॥ अविनीताय शिष्याय
पिशुनाय कदाचन ॥ ८९ ॥ कृतघ्नाय न दातव्यं दातव्यं च परीक्षिते ॥ बहुना किमिहोक्तेन सर्वं दद्यात्कपीश्वरः ॥ ९० ॥ अथ मन्त्रा
न्तरं वक्ष्ये तत्त्वज्ञानप्रदायकम् ॥ तारो नमो हनुमते जाठरत्रयमीरयेत् ॥ ९१ ॥ दनक्षोभं समाभाष्य संहरद्वयमीरयेत् ॥ आत्मतत्त्वं ततः
पश्चात्प्रकाशययुगं ततः ॥ ९२ ॥ वर्मास्त्रवह्निजायांतः सार्द्धषड्विंशदर्णवान् ॥ वसिष्ठोऽस्य मुनिश्छन्दोऽनुष्टुप् च देवताः पुनः ॥ ९३ ॥
हनुमान्मुनिसप्तर्तुवेदाष्टनिगमैः क्रमात् ॥ मंत्रार्णैश्च षडंगानि कृत्वा ध्यायेत्कपीश्वरम् ॥ ९४ ॥ जानुस्थवामबाहुं च ज्ञानमुद्रापरं
हृदि ॥ अध्यात्मचित्तमासीनं कदलीवनमध्यगम् ॥ ९५ ॥ बालार्ककोटिप्रतिमं ध्यायेज्ज्ञानप्रदं हरिम् ॥ ध्यात्वैवं प्रजपेल्लक्षं दशांशं
जुहुयात्तिलैः ॥ ९६ ॥ साज्यैः संपूजयेत्पीठे पूर्वोक्ते पूर्ववत्प्रभुम् ॥ जप्तोऽयं मदनक्षोभं नाशयत्येव निश्चितम् ॥ ९७ ॥ तत्त्वज्ञानमवाप्नोति
कपींद्रस्य प्रसादतः ॥ अथ मंत्रातरं वक्ष्ये भूतविद्रावणं परम् ॥ ९८ ॥ तारः काशींकुक्षिपरवराहश्चांजनापदम् ॥ पवनो वनपुत्रांते

आवेशिद्वयमीरयेत् ॥ ९९ ॥ तारः श्रीहनुमत्पश्चादस्त्ररचभुजाक्षरः ॥ ब्रह्मा मुनिः स्याद्गायत्री छंदोऽत्र देवता पुनः ॥ १०० ॥ हनुमा
न्कमला बीजं फट् शक्तिः परिकीर्तितः ॥ षड्दीर्घाढ्येन बीजेन षडङ्गानि समाचरेत् ॥ १०१ ॥ आंजनेय पाटलास्यं स्वर्णाद्रिसमविग्र
हम् ॥ पारिजातद्रुमूलस्थं चिंतयेत्साधकोत्तमः ॥ १०२ ॥ एवं ध्यात्वा जपेल्लक्षं दशांशं जुहुयात्तिलैः ॥ त्रिमध्वक्तैर्यजेत्पीठे पूर्वोक्ते
पूर्ववत्सुधीः ॥ १०३ ॥ अनेन मनुना मंत्री ग्रहग्रस्तं प्रमार्जयेत् ॥ आक्रंदस्तं विमुच्याथ ग्रहः शीघ्रं पलायते ॥ १०४ ॥ मनवोऽमी सदा
गोप्या न प्रकाश्या यतस्ततः ॥ परीक्षिताय शिष्याय देया वा निजसूनवे ॥ १०५ ॥ हनुमद्भजनासक्तः कार्तवीर्यार्जुनं सुधीः ॥ विशेषतः
समाराध्य यथोक्तं फलमाप्नुयात् ॥ १०६ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे दीपविधिनिरूपणं नाम पञ्चसप्ततितमोऽ
ध्यायः ॥ ७५ ॥ नारद उवाच ॥ कार्तवीर्यप्रभृतयो नृपा बहुविधा भुवि ॥ जायंतेऽथ प्रलीयंते स्वस्वकर्मानुसारतः ॥ १ ॥ तत्कथं राजवर्योऽसौ लोके
सेव्यत्वमागतः ॥ समुल्लंघ्य नृपानन्यानेतन्मे नुद संशयम् ॥ २ ॥ सनत्कुमार उवाच ॥ शृणु नारद वक्ष्यामि संदेहविनिवृत्तये ॥ यथा सेव्यत्वमा
पन्नः कार्तवीर्यार्जुनो भुवि ॥ ३ ॥ यः सुदर्शनचक्रस्यावतारः पृथिवीतले ॥ दत्तात्रेयं समाराध्य लब्धवांस्तेज उत्तमम् ॥ ४ ॥ तस्य क्षितीश्व
रेंद्रस्य स्मरणादेव नारद ॥ शत्रूञ्जयति संग्रामे नष्टं प्राप्नोति सत्वरम् ॥ ५ ॥ तेनास्य मंत्रपूजादि सर्वतंत्रेषु गोपितम् ॥ तुभ्यं प्रकाशयिष्येऽहं सर्व
सिद्धिप्रदायकम् ॥ ६ ॥ वह्नितारयुता रौद्री लक्ष्मीरग्नींदुशांतियुक् ॥ वेधाधगेन्दुशांत्याढ्यो निद्रयाशाग्नि बिंदुयुक् ॥ ७ ॥ पाशो मायांकुशं पद्मा वर्मास्त्रे
कार्तवीपदम् ॥ रेफोवा द्यासनोऽनन्तो वह्निजौ कर्णसंस्थितौ ॥ ८ ॥ मेषः सदीर्घः पवनो मनुरुक्तो हृदंतिमः ॥ ऊनविंशतिवर्णोऽयं तारादिर्नखवर्णकः ॥
॥ ९ ॥ दत्तात्रेयो मुनिश्चास्यच्छन्दोऽनुष्टुबुदाहृतम् ॥ कार्तवीर्यार्जुनो देवो बीजशक्तिर्ध्रुवश्च हृत् ॥ १० ॥ शेषाढ्यबीजयुग्मेन हृदयं विन्यसेदधः ॥
शांतियुक्तचतुर्थेन कामाद्येन शिरोऽगकम् ॥ ११ ॥ इन्द्राढ्यं वामकर्णाद्यमाययोर्वीशयुक्तया ॥ शिखामंकुशपद्माभ्यां सवाग्भ्यां वर्म विन्यसेत् ॥
॥ १२ ॥ वर्मास्त्राभ्यामस्त्रमुक्तं शेषार्णैर्व्यापकं पुनः ॥ हृदये जठरे नाभौ जठरे गुह्यदेशतः ॥ १३ ॥ दक्षपादे वामपादे सक्थ्नि जानुनि
जंघयोः ॥ विन्यसेद्बीजदशकं प्रणवद्वयमध्यगम् ॥ १४ ॥ ताराद्यानथ शेषार्णान्मस्तके च ललाटके ॥ भ्रुवोः श्रुत्योस्तथैवाक्ष्णोर्नसि वक्रे
गलेंऽसके ॥ १५ ॥ सर्वमन्त्रेण सर्वांगे कृत्वा व्यापकमादृतः ॥ सर्वेष्टसिद्धये ध्यायेत्कार्तवीर्यं जनेश्वरम् ॥ १६ ॥ उद्यदर्कसहस्राभं सर्वभूपतिवन्दि
तम् ॥ दोर्भिः पञ्चाशता दक्षैर्बाणान्वामैर्धनूंषि च ॥ १७ ॥ दधतं स्वर्णमालाढ्यं रक्तवस्त्रसमावृतम् ॥ चक्रावतारं श्रीविष्णोर्ध्यायेदर्जुनभूपतिम् ॥ १८ ॥

लक्षमेकं जपेन्मन्त्रं दशांशं जुहुयात्तिलैः ॥ सतण्डुलैः पायसेन विष्णुपीठे यजेत्तु तम्॥ १९ ॥ षट्कोणेषु षडंगानि ततो दिक्षु विदिक्षु च॥चौरमदवि
भञ्जनं मारीमदविभंजनम् ॥ २० ॥अरिमदविभंजनं दैत्यमदविभंजनम् ॥दुष्टनाशं दुःखनाशं दुरितापद्विनाशकम् ॥ २१ ॥ दिक्ष्वष्टशक्तयः पूज्याः
प्राच्यादिष्वसितप्रभाः ॥ क्षेमंकरी वश्यकरी श्रीकरी च यशस्करी ॥ २२ ॥आयुःकरी तथा प्रज्ञाकरी विद्याकरी पुनः। धनकर्यष्टमी पश्चाल्लोकेशा
अस्त्रसंयुताः॥ २३ ॥ एवं संसाधितो मंत्रः प्रयोगार्हः प्रजायते ॥ कार्तवीर्यार्जुनस्याथ पूजायंत्रमिहोच्यते ॥२४ ॥ स्वबीजानंगध्रुववाक्कर्णिकं दिग्दलं
लिखेत् ॥ तारादिवर्मांतदलं शेषवर्णदलांतरम् ॥२५॥ ऊष्मान्त्यस्वरकिंजल्कं शेषार्णैः परिवेष्टितम् ॥कोणालंकृतभूतार्णभूगृहं यन्त्रमीशितुः ॥ २६ ॥
शुद्धभूमावष्टगन्धैर्लिखित्वा यन्त्रमादरात् ॥ तत्र कुंभं प्रतिष्ठाप्य तत्रावाह्यार्चयेन्नृपम् ॥२७ ॥ स्पृष्ट्वा कुंभं जपेन्मन्त्रं सहस्रं विजितेंद्रियः ॥अभिषिं
चेत्तदंभोभिः प्रियं सर्वेष्टसिद्धये ॥ २८॥ पुत्रान्यशो रोगनाशमायुः स्वजनरंजनम् ॥वाक्सिद्धिं सुदृशः कुम्भाभिषिक्तो लभते नरः ॥२९ ॥ शत्रूप
द्रव आपन्ने ग्रामे वा पुटभेदने ॥ संस्थापयेदिदं यन्त्रं शत्रुभीतिनिवृत्तये ॥ ३० ॥ सर्षपारिष्टलशुनकार्पासैर्मार्यते रिपुः॥धत्तूरैः स्तभ्यते निम्बैर्द्वे
ष्यते वश्यतेंऽबुजैः ॥ ३१ ॥ उच्चाटने विभीतस्य समिद्भिः खदिरस्य च ॥ कटुतैलमहिष्याज्यैर्होमद्रव्यांजनं स्मृतम् ॥ ३२ ॥ यवैर्हुते श्रियः प्राप्ति
स्तिलैराज्यैरघक्षयः ॥ तिलतंडुलसिद्धार्थजालैर्वश्यो नृपो भवेत् ॥ ३३ ॥ अपामार्गार्कदूर्वाणां होमो लक्ष्मीप्रदोऽघनुत् ॥ स्त्रीवश्यकृत्प्रियंगूणां
सुराणां भूतशांतिदः ॥ ३४ ॥ अश्वत्थोदुंबरप्लक्षवटबिल्वसमुद्भवाः ॥ समिधो लभते हुत्वा पुत्रानायुर्द्धनं सुखम् ॥ ३५ ॥ निर्मोकहेमसिद्धार्थलव
णैश्चौरनाशनम् ॥ रोचनागोमयैस्तंभो भूप्राप्तिः शालिभिर्हुतैः ॥ ३६ ॥ होमसंख्या तु सर्वत्र सहस्रादयुतावधि ॥ प्रकल्पनीया मन्त्रज्ञैः कार्य्यगौ
रवलाघवात् ॥ ३७ ॥ कार्तवीर्य्यस्य मन्त्राणामुच्यते लक्षणं बुधाः ॥ कार्तवीर्यार्जुनं ङेंतं सर्वमंत्रेषु योजयेत् ॥ ३८ ॥ स्वबीजाद्यो दशार्णोऽसौ
अन्ये नवशिवाक्षराः ॥ आद्यबीजद्वयेनासौ द्वितीयो मन्त्र ईरितः ॥ ३९ ॥ स्वकामाभ्यां तृतीयोऽसौ स्वभ्रूभ्यां तु चतुर्थकः ॥ स्वपाशाभ्यां पञ्च
मोऽसौ षष्ठः स्वेन च मायया ॥ ४० ॥ स्वांकुशाभ्यां सप्तमः स्यात्स्वरमाभ्यामथाष्टमः ॥ स्ववाग्भवाभ्यां नवमो वर्मास्त्राभ्यामथांतिमः ॥ ४१ ॥
द्वितीयादिनवांतेषु बीजयोः स्याद्व्यतिक्रमः ॥ मंत्रे तु दशमे वर्णा नववर्मास्त्रमध्यगाः ॥४२॥एतेषु मंत्रवर्येषु स्वानुकूलं मनुं भजेत् ॥एषामाद्ये विरा
ट्छंदोऽन्येषु त्रिष्टुबुदाहृतम् ॥ ४३ ॥ दश मंत्रा इमे प्रोक्ता यदा स्युः प्रणवादिकाः॥ तदादिमः शिवार्णः स्यादन्ये तु द्वादशाक्षराः ॥ ४४ ॥ त्रिष्टुप्
छन्दस्तथाद्ये स्यादन्येषु जगती मता ॥ एवं विंशतिमंत्राणां यजनं पूर्ववन्मतम् ॥ ४५ ॥ दीर्घाढ्यमूलबीजेन कुर्यादेषां षडंगकम् ॥

तारो हृत्कार्तवीर्यार्जुनाय वर्मास्त्रठद्वयम् ॥ ४६ ॥ चतुर्दशार्णो मंत्रोऽयमस्येज्या पूर्ववन्मता ॥ भूनेत्रसमनेत्राक्षिवर्णैरस्यांगपंचकम् ॥ ४७ ॥
तारो हृद्भगवान् ङेंतः कार्तवीर्यार्जुनस्तथा ॥ वर्मास्त्राग्निप्रियामंत्रः प्रोक्तो ह्यष्टादशार्णकः ॥ ४८ ॥ त्रिवेदसप्तयुग्माक्षिवर्णैः पंचांगकं मनोः ॥
नमो भगवते श्रीति कार्तवीर्यार्जुनाय च ॥ ४९ ॥ सर्वदुष्टांतकायेति तपोबलपराक्रमः ॥ परिपालितसप्तांते द्वीपाय सर्वरापदम् ॥ ५० ॥ जन्यचूडा
मणांते ये महाशक्तिमते ततः ॥ सहस्रदहनप्रांते वर्मास्त्रांतो महामनुः ॥ ५१ ॥ त्रिषष्टिवर्णवान्प्रोक्तः स्मरणात्सर्वविघ्नहृत् ॥ राजन्यचक्रवर्ती च
वीरः शूरस्तृतीयकः ॥ ५२ ॥ माहिष्मतीपतिः पश्चाच्चतुर्थः समुदीरितः ॥ रेवांबुपरितृप्तश्च काणो हस्तप्रबाधितः ॥ ५३ ॥ दशास्येति च षड्भिः
स्यात्पदैर्ङेंतैः षडंगकम् ॥ सिंच्यमानं युवतिभिः क्रीडंतं नर्मदाजले ॥ ५४ ॥ हस्तैर्जलौघं रुंधंतं ध्यायेन्मत्तं नृपोत्तमम् ॥ एवं ध्यात्वा
युतं मंत्रं जपेदन्यत्तु पूर्ववत् ॥ ५५ ॥ पूर्वं तु प्रजपेल्लक्षं पूजायोगश्च पूर्ववत् ॥ कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान् ॥ ५६ ॥ तस्य
संस्मरणादेव हृतं नष्टं च संवदेत् ॥ लभ्यते मंत्रवर्योऽयं द्वात्रिंशद्वर्णसंयुतः ॥ ५७ ॥ पादैः सर्वेण पंचांगं ध्यानपूजादि पूर्ववत् ॥ कार्तवीर्याय
शब्दांते विद्महे पदमुच्चरेत् ॥ ५८ ॥ महावीर्याय वर्णांते धीमहीति पदं वदेत्॥ तन्नोऽर्जुनः प्रवर्णांते चोदयात्पदमीरयेत् ॥ ५९ ॥ गायत्र्येषार्जुन
स्योक्ता प्रयोगादौ जपेत्तु ताम् ॥ अनुष्टुभं मनुं रात्रौ जपतां चौरसंचयाः ॥ ६० ॥ पलायंते गृहाद्दूरं तर्पणाद्धवनादपि ॥ अथो दीपविधिं
वक्ष्ये कार्तवीर्यप्रियंकरम् ॥ ६१ ॥ वैशाखे श्रावणे मार्गे कार्तिकाश्विनपौषतः ॥ माघफाल्गुनयोर्मासोर्दीपारंभं समाचरेत् ॥ ६२ ॥
तिथौ रिक्ताविहीनायां वारे शनिकुजौ विना ॥ हस्तोत्तराश्विरौद्रेयपुष्यवैष्णववायुभे ॥ ६३ ॥ द्विदैवते च रोहिण्यां दीपारंभो हितावहः ॥
चरमे च व्यतीपाते धृतौ वृद्धौ सुकर्मणि ॥ ६४ ॥ प्रीतौ हर्ष च सौभाग्ये शोभनायुष्मतोरपि ॥ करणे विष्टिरहिते ग्रहणेऽर्द्धोदयादिषु ॥ ६५ ॥
योगेषु रात्रौ पूर्वाह्ने दीपारंभः कृतः शुभः ॥ कार्तिके शुक्लसप्तम्यां निशीथेऽतीव शोभनः ॥ ६६ ॥ यदि तत्र रवेर्वारः श्रवणं भं च दुर्लभम् ॥ अत्या
वश्यककार्येषु मासादीनां न शोधनम् ॥ ६७ ॥ आद्ये ह्युपोष्य नियतो ब्रह्मचारी सपीतकैः ॥ प्रातः स्नात्वा शुद्धभूमौ लिप्तायां गोमयोदकैः ॥
॥ ६८ ॥ प्राणानायम्य संकल्प्य न्यासान्पूर्वोदितांश्चरेत् ॥ षट्कोणं रचयेद्भूमौ रक्तचंदनतंडुलैः ॥ ६९ ॥ अतः स्मरं समालिख्य षट्कोणेषु समा
लिखेत् ॥ नवार्णैर्वेष्टयेत्तच्च त्रिकोणं तद्बहिः पुनः ॥७०॥ एवं विलिखिते यन्त्रे निदध्याद्दीपभाजनम्॥स्वर्णजं रजतोत्थं वा ताम्रजं तदभावतः॥७१॥
कांस्यपात्रं मृण्मयं च कनिष्ठं लोहजं मृतौ ॥ शांतये मुद्गचूर्णोत्थं संधौ गोधूमचूर्णजम् ॥ ७२ ॥ आज्ये पलसहस्रे तु पात्रं शतपलं स्मृतम् ॥

आज्येऽयुतपले पात्रं पलपंचशता स्मृतम् ॥ ७३ ॥ पंचसप्ततिसंख्ये तु पात्रं षष्टिपलं स्मृतम् ॥ त्रिसाहस्री घृतपले शर्करापलभाजनम् ॥ ७४ ॥
द्विसाहस्र्यां द्विशतमितं च भाजनमिष्यते ॥ शतेऽक्षिचरसंख्यातमेवमन्यत्र कल्पयेत् ॥७५॥ नित्यदीपे वह्निपलं पात्रमाज्यं पलं स्मृतम् ॥ एवं पात्रं
प्रतिष्ठाप्य वर्तीः सूत्रोत्थिताः क्षिपेत् ॥ ७६ ॥ एका तिस्रोऽथवा पंचसप्ताद्या विषमा अपि ॥ तिथिमानादासहस्रं तंतुसंख्या विनिर्मिता ॥
॥ ७७ ॥ गोघृतं प्रक्षिपेत्तत्र शुद्धवस्त्रविशोधितम् ॥ सहस्रपलसंख्यादिदशांशं कार्यगौरवात् ॥ ७८ ॥ सुवर्णादिकृतां रम्यां शलाकां
षोडशांगुलाम् ॥ तदर्द्धां वा तदर्द्धां वा सूक्ष्माग्रां स्थूलमूलिकाम् ॥ ७९ ॥ विमुंचेद्दक्षिणे पात्रमध्ये चाग्रे कृताग्रिकाम् ॥ पात्रदक्षिणदिग्देशे मुक्त्वां
गुलचतुष्टयम् ॥ ८० ॥ अधोग्रां दक्षिणाधारां निखनेच्छुरिकां शुभाम् ॥ दीपं प्रज्वालयेत्तत्र गणेशस्मृतिपूर्वकम् ॥ ८१ ॥ दीपात्पूर्वत्र दिग्भागे
सर्वतोभद्रमंडले ॥ तंडुलाष्टदले वापि विधिवत्स्थापयेद्घटम् ॥ ८२ ॥ तत्रावाह्य नृपाधीशं पूजयेत्पूर्ववत्सुधीः ॥ जलाक्षतान्समादाय दीपं
संकल्पयेत्ततः ॥ ८३ ॥ दीपसंकल्पमंत्रोऽयं कथ्यते द्वीषुभूमितः ॥ प्रणवः पाशमाये च शिखा कार्ताक्षराणि च ॥ ८४ ॥ वीर्या
र्जुनाय माहिष्मतीनाथाय सहस्र च ॥ बाहवे इति वर्णांते सहस्रपदमुच्चरेत् ॥ ८५ ॥ क्रतुदीक्षितहस्ताय दत्तात्रेयप्रियाय च ॥ आत्रेयायानुसूयांते
गर्भरत्नाय तत्परम् ॥ ८६ ॥ नमो ग्रीवामकर्णेंदुस्थितौ पाश इमं ततः ॥ दीपं गृहाण अमुकं रक्ष रक्ष पदं पुनः ॥ ८७ ॥ दुष्टा
न्नाशययुग्मं स्यात्तथा पातय घातय ॥ शत्रून् जहिद्वयं माया तारः स्वं बीजमात्मभूः ॥ ८८ ॥ वह्निप्रिया अनेनाथ दीपवर्येण पश्चिमा ॥
भिमुखेनामुकं रक्ष अमुकांते वरप्रद ॥ ८९ ॥ मायाकाशद्वयं वामनेत्रचंद्रयुतं शिवा ॥ वेदादिकामचामुंडाः स्वाहा तु पूसबिंदुकौ ॥ ९० ॥
प्रणवोऽग्निप्रिया मंत्रो नेत्रबाणाधराक्षरः ॥ दत्तात्रेयो मुनिर्मालामंत्रस्य परिकीर्तितः ॥ ९१ ॥ छन्दोऽमितं कार्तवीर्यार्जुनो देवोऽखिलाप्ति
कृत् ॥ चामुंडया षडंगानि चरेत्षड्दीर्घयुक्तया ॥ ९२ ॥ ध्यात्वा देवं ततो मंत्रं पठित्वांते क्षिपेज्जलम् ॥ गोविंदाढ्यो हली सेंदुश्चामुंडाबीजमी
रितम् ॥ ९३ ॥ ततो नवाक्षरं मंत्रं सहस्रं तत्पुरो जपेत् ॥ तारोऽनंतो बिंदुयुक्तो मायास्वं वामनेत्रयुक् ॥ ९४ ॥ कूर्माग्नी शांतिबिंद्वाढ्यौ वह्नि
जायांकुशं ध्रुवम् ॥ ऋषिः पूर्वोदितोनुष्टुप्छंदोऽन्यत्पूर्ववत्पुनः ॥ ९५ ॥ सहस्रं मंत्रराजं च जपित्वा कवचं पठेत् ॥ एवं दीपप्रदानस्य
कर्ताप्नोत्यखिलेऽप्सितम् ॥ ९६ ॥ दीपप्रबोधकाले तु वर्जयेदशुभां गिरम् ॥ विप्रस्य दर्शनं तत्र शुभदं परिकीर्तितम् ॥ ९७ ॥ शूद्राणां
मध्यमं प्रोक्तं म्लेच्छस्य वधबन्धनम् ॥ आख्वोत्वोर्दर्शनं दुष्टं गवाश्वस्य सुखावहम् ॥ ९८ ॥ दीपज्वाला समा सिद्ध्यै वक्रा नाशविधायिनी ॥

शब्दा भयदा कर्तुरुज्ज्वला सुखदा मता ॥ ९९ ॥ कृष्णा शत्रुभयोत्पत्त्यै वमंती पशुनाशिनी ॥ कृते दीपे यदा पात्रं भग्नं दृश्येत दैवतः ॥१००॥
पक्षादर्वाक्तदा गच्छेद्यजमानो यमालयम् ॥ वर्त्यंतरं यदा कुर्यात्कार्यं सिद्ध्येद्विलंबतः ॥ १०१ ॥ नेत्रहीनो भवेत्कर्ता तस्मिन्दीपांतरे कृते ॥
अशुचिस्पर्शने व्याधिर्दीपनाशे तु चौरभीः ॥ १०२ ॥ श्वमार्जाराखुसंस्पर्शे भवेद्भूपतितो भयम् ॥ पात्रारंभे वसुपलैः कृतो दीपोऽखिलेष्टदः ॥ १०३ ॥
तस्माद्दीपः प्रयत्नेन रक्षणीयोंऽतरायतः ॥ आसमाप्तेः प्रकुर्वीत ब्रह्मचर्यं च भूशयः ॥ १०४॥ स्त्रीशूद्रपतितादीनां संभाषामपि
वर्जयेत् ॥ जपेत्सहस्रं प्रत्येकं मंत्रराजं नवाक्षरम् ॥ १०५ ॥ स्तोत्रपाठं प्रतिदिनं निशीथिन्यां विशेषतः ॥ एकपादेन दीपाग्रे स्थित्वा यो मंत्रनायकम् ॥
१०६ ॥सहस्रं प्रजपेद्रात्रौ सोऽभीष्टं क्षिप्रमाप्नुयात् ॥ समाप्य शोभनदिने संभोज्य द्विजसत्तमान् ॥ १०७ ॥ कुंभोदकेन कर्तारमभिषिंचन्मनुं जपेत्॥
कर्ता तु दक्षिणां दद्यात्पुष्कलां तोषहेतवे॥ १०८॥ गुरौ तुष्टे ददातीष्टं कृतवीर्यसुतो नृपः ॥ गुर्वाज्ञया स्वयं कुर्याद्यदि वा कारयेद्गुरुः ॥
१०९ ॥ दत्त्वा धनादिकं तस्मै दीपदानाय नारद ॥ गुर्वाज्ञामन्तरा कुर्याद्यो दीपं स्वेष्टसिद्धये ॥११० ॥ सिद्धिर्न जायते तस्य हानिरेव
पदे पदे ॥ उत्तमं गोघृतं प्रोक्तं मध्यमं महिषीभवम् ॥ १११ ॥ तिलतैलं तु तादृक् स्यात्कनीयोऽजादिजं घृतम् ॥ आस्यरोगे सुगंधेन दद्यात्तैलेन
दीपकम् ॥ ११२ ॥ सिद्धार्थसंभवेनाथ द्विषतां नाशनाय च ॥ सहस्रेण पलैर्दीपे विहिते च न दृश्यते ॥ ११३ ॥ कार्यसिद्धिस्तदा कुर्यात्त्रिवारं
दीपजं विधिम् ॥ तदा सुदुर्लभमपि कार्य्यं सिद्ध्येन्न संशयः ॥ ११४॥ दीपप्रियः कार्तवीर्यो मार्तंडो नतिवल्लभः ॥ स्तुतिप्रियो महाविष्णुर्गणेशस्तर्पणप्रियः ॥
११५ ॥ दुर्गार्चनप्रिया नूनमभिषेकप्रियः शिवः ॥ तस्मात्तेषां प्रतोषाय विदध्यात्तत्तदादरात् ॥ ११६ ॥इति श्रीबृहन्नारदीयपुराणे
पूर्वभागे बृहदुपाख्याने तृतीयपादे कार्तवीर्यमाहात्म्यमन्त्रदीपकथनं नाम षट्सप्ततितमोऽध्यायः ॥७६॥ नारद उवाच ॥ साधु साधु महाप्राज्ञ सर्वतंत्रविशारद॥
त्वया मह्यं समाख्यातं विधानं तंत्रगोपितम्॥ १॥अधुना तु महाभाग कीर्तवीर्यहनूमतोः॥कवचे श्रोतुमिच्छामि तद्वदस्व कृपानिधे॥२॥
सनत्कुमार उवाच॥ शृणु विप्रेन्द्र वक्ष्यामि कवचं परमाद्भुतम्॥कार्तवीर्यस्य येनासौ प्रसन्नः कार्यसिद्धिकृत्॥३॥सहस्रादित्यसंकाशे नानारत्नसमुज्ज्वले॥
भास्वद्ध्वजपताकाढ्ये तुरगायुतभूषिते ॥ ४ ॥ महासंवर्तकांभोधिभीमरावविराविणि ॥ समुद्धृतमहाछत्रवितानितवियत्पथे ॥ ५ ॥ महारथवरे दीप्तनानायुधविराजिते ॥
सुस्थितं विपुलोदारं सहस्रभुजमंडितम् ॥ ६ ॥ वामैरुद्दंडकोदंडान्दधानमपरैः शरान् ॥ किरीटहारमुकुटकेयूरवलयांगदैः ॥
॥ ७ ॥ मुद्रिकोदरबन्धाद्यैर्मौंजीनूपुरकादिभिः ॥ भूषितं विविधाकल्पैर्भास्वरैः सुमहाधनैः ॥ ८ ॥ आबद्धकवचं वीरं सुप्रसन्नाननांबुजम् ॥ धनुर्ज्या

सिंहनादेन कंपयंतं जगत्रयम् ॥ ९ ॥ सर्वशत्रुक्षयकरं सर्वव्याधिविनाशनम् ॥ सर्वसंपत्प्रदातारं विजयश्रीनिषेवितम् ॥ १० ॥ सर्वसौभाग्यदं भद्रं
भक्ताभयविधायिनम् ॥ दिव्यमाल्यानुलेपाढ्यं सर्वलक्षणसंयुतम् ॥ ११ ॥ रथनागाश्वपादातवृंदमध्यगमीश्वरम् ॥ वरदं चक्रवर्तीनं सर्वलोकैकपाल
कम् ॥ १२ ॥ समानोदितसाहस्रदिवाकरसमद्युतिम् ॥ महायोगभवैश्वर्यकीर्त्याक्रांतजगत्रयम् ॥ १३ ॥ श्रीमच्चक्रं हरेरंशादवतीर्णं महीतले ॥
सम्यगात्मादिभेदेन ध्यात्वा रक्षामुदीरयेत् ॥१४ ॥ अस्यांगमूर्तयः पंच पांतु मां स्फटिकोज्ज्वलाः ॥ अग्नीशासुरवायव्यकोणेषु हृदयादिकाः॥१५॥
सर्वतोऽत्रज्वलद्रूपा दरचर्मासिपाणयः ॥ अव्याहतबलैश्वर्यशक्तिसामर्थ्यविग्रहाः ॥ १६ ॥ क्षेमंकरीशक्तियुतश्चौरवर्गविभञ्जनः॥प्राचीं दिशं रक्षतु मे
बाणबाणासनायुधः ॥ १७ ॥ श्रीकरीशक्तिसहितो मारीभयविनाशकः ॥ शरचापधरः श्रीमान् दिशं मे पातु दक्षिणाम् ॥ १८ ॥ महावश्यकरी
युक्तः सर्वशत्रुविनाशकृत्॥महेषुचापधृक्पातु मम प्राचेतसीं दिशम् ॥ १९ ॥ यशःकर्या समायुक्तो दैत्यसंघविनाशनः ॥ परिरक्षतु मे सम्यग्विदिशं
चैत्रभानवीम् ॥ २० ॥ विद्याकरीसमायुक्तः सुमहद्दुःखनाशनः॥ पातु मे नैर्ऋतीं चापपाणिर्विदिशमीश्वरः ॥ २१ ॥ धनकर्या समायुक्तो महादुरित
नाशनः ॥ इष्वासनेषुधृक्पातु विदिशं मम वायवीम् ॥ २२॥ आयुःकर्या युतः श्रीमान्महाभयविनाशनः॥चापेषुधारी शैवीं मे विदिशं परिरक्षतु ॥
॥ २३ ॥ विजयश्रीयुतः साक्षात्सहस्रारधरो विभुः ॥ दिशमूर्द्ध्वामवतु मे सर्वदुष्टभयंकरः ॥ २४ ॥ शंखभृत्सुमहाशक्तिसंयुतोऽप्यधरां दिशम् ॥
परिरक्षतु मे दुःखध्वांतसम्भेदभास्करः ॥ २५ ॥ महायोगसमायुक्तः सर्वदिक्चक्रमंडलः ॥ महायोगीश्वरः पातु सर्वतो मम पद्मभृत् ॥२६॥ एतास्तु
मूर्तयो रक्ता रक्तमाल्यांशुकावृताः प्रधानदेवतारूपाः पृथग्रथवरे स्थिताः ॥ २७ ॥ शक्तयः पद्महस्ताश्च नीलेंदीवरसन्निभाः ॥ शुक्लमाल्यानुवसनाः
सुलिप्ततिलकोज्ज्वलाः ॥ २८ ॥ तत्पार्षदेश्वराः स्वस्ववाहनायुधभूषणाः ॥ स्वस्वदिक्षु स्थिताः पांतु मामिंद्राद्या महाबलाः ॥ २९ ॥ एतास्तस्य
समाख्याताः सर्वावरणदेवताः ॥ सर्वतो मां सदा पांतु सर्वशक्तिसमन्विताः ॥ ३० हृदये चोदरे नाभौ जठरे गुह्यमण्डले ॥ तेजोरूपाः स्थिताः
पांतु वांछासुरवनद्रुमाः ॥ ३१ ॥ दिशं चान्ये महावर्णा मन्त्ररूपा महोज्ज्वलाः ॥ व्यापकत्वेन पांत्वस्मानापादतलमस्तकम् ॥ ३२ ॥ कार्तवीर्यः
शिरः पातु ललाटं हैहयेश्वरः ॥ सुमुखो मे मुखं पातु कर्णौ व्याप्तजगत्त्रयः ॥ ३३ ॥ सुकुमारो हनुं पातु भ्रूयुगं मे धनुर्धरः ॥ नयनं पुंडरीकाक्षो
नासिकां मे गुणाकरः ॥ ३४ ॥ अधरोष्ठौ सदा पातु ब्रह्मज्ञेयो द्विजान्कविः ॥ सर्वशास्त्रकलाधारी जिह्वां चिबुकमव्ययः ॥ ३५॥ दत्तात्रेयप्रियः
कंठं स्कंधौ राजकुलेश्वरः ॥ भुजौ दशास्यदर्पघ्नो हृदयं मे महाबलः ॥ ३६ ॥ कुक्षिं रक्षतु मे विद्वान् वक्षः परपुरंजयः ॥ करौ सर्वार्थदः पातु

कराग्राणि जगत्प्रियः ॥ ३७ ॥ रेवांबुलीलासंहृत्तो जठरं परिरक्षतु ॥ वीरशूरस्तु मे नाभिं पार्श्वौ मे सर्वदुष्टहा ॥३८॥ सहस्रभुजभृत्पृष्ठं सप्तद्वीपाधिपः
कटिम् ॥ऊरू माहिष्मतीनाथो जानुनी वल्लभो भुवः ॥३९॥ जंघे वीराधिपः पातु पातु पादौ मनोजवः॥पातु सर्वायुधधरः सर्वांगं सर्वमर्मसु॥४०॥
सर्वदुष्टांतकः पातु धात्वष्टककलेवरम् ॥ प्राणादिदशजीवेशान्सर्वशिष्टेष्टदोऽवतु ॥ ४१ ॥ वशीकृतेंद्रियग्रामः पातु सर्वेन्द्रियाणि मे ॥ अनुक्तमपि
यत्स्थान शरीरांतर्बहिश्च यत् ॥ ४२ ॥ तत्सर्वं पातु मे सर्वलोकनाथेश्वरेश्वरः ॥ वज्रात्सारतरं चेदं शरीरं कवचावृतम् ॥ ४३ ॥ बाधाशतविनिर्मुक्त
मस्तु मे भयवर्जितम् ॥ बद्ध्वेदं कवचं दिव्यमभेद्यं हैहयेशितुः ॥ ४४ ॥ विचरामि दिवा रात्रौ निर्भयेनांतरात्मना ॥ राजमार्गे महादुर्गे मार्गे चौरा
दिसंकुले ॥ ४५ ॥ विषमे विपिने घोरे दावाग्नौ गिरिकंदरे ॥ संग्रामे शस्त्रसंघाते सिंहव्याघ्रनिषेविते ॥ ४६ ॥ गह्वरे सर्वसंकीर्णे संध्याकाले नृपा
लये ॥ विवादे विपुलावर्ते समुद्रे च नदीतटे ॥ ४७ :॥ परिपंथिजनाकीर्णे देशे दस्युगणावृते ॥ सर्वस्वहरणे प्राप्ते प्राप्ते प्राणस्य संकटे ॥ ४८ ॥
नानारोगज्वरावेशे पिशाचप्रेतयातने ॥ मारीदुःस्वप्नपीडासु क्लिष्टे विश्वासघातके ॥ ४९ ॥ शारीरे च महादुःखे मानसे च महाज्वरे ॥ आधिव्या
धिभये विघ्नज्वालोपद्रवकेऽपि च ॥ ५० ॥ न भवेत्तु भयं किंचित्कवचेनावृतस्य मे ॥ आगंतुकामानखिलानस्मद्वसुविलुंपकान् ॥ ५१ ॥
निवारयतु दोर्दंडसहस्रेण महारथः ॥ स्वकरोद्धृतसाहस्रपाशबद्धान्सुदुर्जयान् ॥ ५२ ॥ संरुद्धगतिसामर्थ्यान्करोतु कृतवीर्यजः ॥ सृणिसाहस्रनि
र्भिन्नान्सहस्रशरखंडितान् ॥ ५३ ॥ राजचूडामणिः क्षिप्रं करोत्वस्मद्विरोधकान् ॥ खड्गसाहस्रदलितान्सहस्रमुशलार्दितान् ॥ ५४ ॥ चौरादि
दुष्टसत्त्वौघान्करोतु कमलेक्षणः ॥ स्वशंखनादसंत्रस्तान्सहस्रारसहस्रभृत् ॥ ५५ ॥ अवतारो हरेः साक्षात्पालयत्वखिलं मम ॥ कार्तवीर्य महावीर्य
सर्वदुष्टविनाशन ॥ ५६ ॥ सर्वत्र सर्वदा दुष्टचौरान्नाशाय नाशय ॥ किं त्वं स्वपिषि दुष्टघ्न किं तिष्ठसि चिरायसि ॥ ५७ ॥ उत्तिष्ठ पाहि नः
सर्वभयेभ्यः स्वसुतानिव ॥ ये चौरा वसुहर्तारो विद्विषो ये च हिंसकाः ॥ ५८ ॥ साधुभीतिकरा दुष्टाश्छद्मका ये दुराशयाः ॥ दुर्हृदो दुष्टभू
पाला दुष्टामात्याश्च पापकाः ॥ ५९ ॥ ये च कार्यविलोतारो ये खलाः परिपंथिनः ॥ सर्वस्वहारिणां ये च पंच मायाविनोऽपरे :॥ ६० ॥ महाक्ले
शकरा म्लेच्छा दस्यवो वृषलाश्च ये ॥ येऽग्निदा गरदातारो वंचकाः शस्त्रपाणयः ॥ ६१ ॥ ये पापा दुष्टकर्माणो दुःखदा दुष्टबुद्धयः ॥
व्याजकाः कुपथासक्ता ये च नानाभयप्रदाः ॥ ६२ ॥ छिद्रान्वेषरता नित्यं येऽस्मान्बाधितुमुद्यताः ॥ ते सर्वे कातवीर्यस्य महाशखरवा
हताः ॥ ६३ ॥ सहसा विलयं यान्तु दूरादेव विमोहिताः ॥ य दानवा महादित्या ये यक्षा ये च राक्षसाः ॥ ६४ ॥ पिशाचा ये महासत्त्वा

ये भूतब्रह्मराक्षसाः ॥ अपस्मारग्रहा ये च ये ग्रहाः पिशिताशनाः ॥ ६५ ॥ महालोहितभोक्तारो वेताला ये च गुह्यकाः ॥ गंधर्वाप्सरसः सिद्धा ये
च देवादियोनयः ॥ ६६ ॥ डाकिन्यो द्रुणसाः प्रेताः क्षेत्रपाला विनायकाः॥ महाव्याघ्रमहामेघा महातुरगरूपकाः ॥ ६७ ॥ महागजा महासिंहा
महामहिषयोनयः ॥ ऋक्षवाराहशुनकवानरोलूकमूर्तयः ॥ ६८ ॥ महोष्ट्रखरमार्जारसर्पगोवृषमस्तकाः ॥ नानारूपा महासत्त्वा नानाक्लेशसहस्रदाः
॥ ६९ ॥ नानारोगकराः क्षुद्रा महावीर्या महाबलाः॥ वातिकाः पैत्तिका घोरा श्लैष्मिकाः सान्निपातिकाः ॥ ७०॥ माहेश्वरा वैष्णवाश्च वैरिंच्याश्च
महाग्रहाः ॥ स्कांदा वैनायकाः क्रूरा ये च प्रमथगुह्यकाः ॥ ७१ ॥ महाशत्रुग्रहा रौद्रा महामारीमसूरिकाः ॥ ऐकाहिका द्व्याहिकाश्च त्र्याहिकाश्च
महाज्वराः ॥ ७२ ॥ चातुर्थिकाः पाक्षिकाश्च मास्याः षाण्मासिकाश्च ये ॥ सांवत्सरा दुर्निवार्या ज्वराः परमदारुणाः ॥ ७३ ॥ स्वाप्निका
ये महोत्पाता ये च दुःस्वाप्निका ग्रहाः ॥ कूष्मांडा जृंभिका भौमा द्रोणाः सान्निध्यवंचकाः ॥ ७४ ॥ भ्रमिकाः प्राणहर्तारो ये च बालग्रहादयः ॥
मनोबुद्धीन्द्रियहराः स्फोटकाश्च महाग्रहाः ॥७५ ॥महाशना बलिभुजो महाकुणपभोजनाः॥ दिवाचरा रात्रिचरा ये च संध्यासु दारुणाः ॥ ७६ ॥
प्रमत्ता वाऽप्रमत्ता वै ये मां बाधितुमुद्यताः ॥ ते सर्वे कार्त्तवीर्यस्य धनुर्मुक्तशराहताः ॥ ७७ ॥ सहस्रधा प्रणश्यंतु भग्नसत्त्वबलोद्यमाः ॥ ये सर्पा ये
महानागा महागिरिबिलेशयाः ॥७८॥ कालव्याला महादंष्ट्रा महाजगरसंज्ञकाः ॥ अनंतशूलिकाद्याश्च दंष्ट्राविषमहाभयाः ॥ ७९ ॥ अनेकशत
शीर्षाश्च खंडपुच्छाश्च दारुणाः ॥ महाविषजलौकाश्च वृश्चिका रक्तपुच्छकाः ॥ ८०॥ आशीविषाः कालकूटा महाहालाहलाह्वयाः ॥ जलसर्पा जल
व्याला जलग्राहाश्च कच्छपाः ॥ ८१ ॥ मत्स्यका विषपुच्छाश्च ये चान्ये जलवासिनः ॥ जलजाः स्थलजाश्चैव कृत्रिमाश्च महाविषाः ॥ ८२ ॥
गुप्तरूपा गुप्तविषा मूषिका गृहगोधिकाः ॥ नानाविषाश्च ये घोरा महोपविषसंज्ञकाः ॥ ८३ ॥ येऽस्मान्बाधितुमिच्छंति शरीरप्राणनाशकाः ॥ ते
सर्वे कार्तवीर्यस्य खड्गसाहस्रदारिताः ॥ ८४ ॥ दूरादेव विनश्यंतु प्रणष्टेंद्रियसाहसाः॥ मनुष्याः पशवो त्वृक्षवानरा वनगोचराः ॥ ८५ ॥ सिंह
व्याघ्रवराहाश्च महिषा ये महामृगाः ॥ गजास्तुरंगा गवया रासभाः शरभा वृकाः ॥८६ ॥ शुनका द्वीपिनः शुभ्रा मार्जारा बिललोलुपाः ॥ शृगालाः
शशकाः श्येना गरुत्मन्तो विहंगमाः ॥ ८७ ॥ भेरुंडा वायसा गृध्रा हंसाद्याः पक्षिजातयः ॥ उद्भिज्जाश्चांडजाश्चैव स्वेदजाश्च जरायुजाः ॥ ८८ ॥
नानाभेदकुले जाता नानाभेदाः पृथग्विधाः ॥ येऽस्मान्बाधितुमिच्छंति संध्यासु च दिवा निशि ॥८९ ॥ ते सर्वे कार्तवीर्यस्य गदासाहस्रदारिताः ॥
दूरादेव विनश्यंतु विनष्टगतिपौरुषाः ॥ ९० ॥ ये चाक्षेमप्रदातारः कूटमायाविनश्च ये ॥ मारणोत्सादनोन्मूलद्वेषमोहनकारकाः ॥ ९१ ॥ विश्वास

घातका दुष्टा ये च स्वामिद्रुहो नराः ॥ ये चाततायिनो दुष्टा ये पापा गोप्यहारिणः ॥ ९२ ॥ दाहोपघातगरलशस्त्रपातातिदुःखदाः॥ क्षेत्रवित्तादिहरणबंधनादिभयप्रदाः ॥ ९३ ॥ ईतयो विविधाकारा ये चान्ये दुष्टजातयः ॥ पीडाकरा ये सततं छिद्रमिच्छंति बाधितुम् ॥ ९४ ॥ ते सर्वे कार्तवीर्यस्य चक्रसाहस्रदारिताः ॥ दूरादेव क्षयं यांतु विनष्टबलसाहसाः ॥ ९५ ॥ ये मेघा ये महावर्षा ये वाता याश्च विद्युतः ॥ ये महाशनयो दीप्ता ये निर्घाताश्च दारुणाः ॥ ९६ ॥ उल्कापाताश्च ये घोरा ये महेंद्रायुधादयः ॥ सूर्येंदुकुजसौम्याश्च गुरुकाव्यशनैश्चराः ॥ ९७ ॥ राहुश्च केतवो घोरा नक्षत्रा राशयस्तथा ॥ तिथयः संक्रमा मासा हायना युगनायकाः ॥९८ ॥ मन्वंतराधिपाः सिद्धा ऋषयो योगसिद्धयः ॥ निधयो ऋग्यजुःसामाथर्वाणश्चैव वह्नयः ॥ ९९ ॥ ऋतवो लोकपालाश्च पितरो देवसंहतिः ॥ विद्याश्चैव चतुःषष्टिभेदा या भुवनत्रये ॥ १०० ॥ ये त्वत्र कीर्तिताः सर्वे ये चान्ये नानुकीर्तिताः ॥ ते संतु नः सदा सौम्याः सर्वकालसुखावहाः ॥ १०१ ॥ आज्ञया कार्तवीर्यस्य योगीन्द्रस्यामितद्युतेः ॥ कार्तवीर्यार्जुनो धन्वी राजेन्द्रो हैहयेश्वरः ॥ १०२ ॥ दशास्यदर्पहा रेवालीलाहप्तः सुदुर्जयः ॥ दुःखहा चौरदमनो राजराजेश्वरः प्रभुः ॥ १०३ ॥ सर्वज्ञः सर्वदः श्रीमान् सर्वशिष्टेष्टदः कृती ॥ राजचूडामणिर्योगी सप्तद्वीपाधिनायकः ॥ १०४ ॥ विजयी विश्वजिद्वाग्मी महागतिरलोलुपः ॥ यज्वा विप्रप्रियो विद्वान् ब्रह्मज्ञेयः सनातनः ॥ १०५ ॥ माहिष्मतीपतिर्योधा महाकीर्तिर्महाभुजः ॥ सुकुमारो महावीरो मारीघ्नो मदिरेक्षणः ॥ १०६ ॥ शत्रुघ्नः शाश्वतः शूरः शंखभृद्योगिवल्लभः ॥ महाभागवतो धीमान्महाभयविनाशनः ॥ १०७॥ असाध्याविग्रहो दिव्यो भावो व्याप्तजगत्त्रयः ॥ जितेंद्रियो जितारातिः स्वच्छंदोऽनंतविक्रमः ॥१०८ ॥ चक्रभृत्परचक्रघ्नः संग्रामविधिपूजितः ॥ सर्वशास्त्रकलाधारी विरजा लोकवंदितः ॥ १०९ ॥ वीरो विमलसत्त्वाढ्यो महाबलपराक्रमः ॥ विजयश्रीमहामान्यो जितारिर्मंत्रनायकः ॥ ११० ॥ खड्गभृत्कामदः कांतः कालघ्नः कमलेक्षणः ॥ भद्रवादप्रियो वैद्यो विबुधो वरदो वशी ॥ १११ ॥ महाधनो निधिपतिर्महायोगी गुरुप्रियः ॥ योगाढ्यः सर्वरोगघ्नो राजिताखिलभूतलः ॥ ११२ ॥ दिव्यास्त्रभृदमेयात्मा सर्वगोप्ता महोज्ज्वलः ॥ सर्वायुधधरोऽभीष्टप्रदः परपुरंजयः ॥११३ ॥ योगसिद्धो महाकायो महावृंदशताधिपः ॥ सर्वज्ञाननिधिः सर्वसिद्धिदानकृतोद्यमः ॥ ११४ ॥ इत्यष्टशतनामोक्त्या मूर्तयो दश दिक्पथि ॥ सम्यग्दशदिशो व्याप्य पालयंतु च मां सदा ॥११५॥स्वस्थाः सर्वेन्द्रियाः संतु शांतिरस्तु सदा मम ॥ शेषाद्या मूर्तयोऽष्टौ च विक्रमेणैव भास्वराः॥ ॥११६ ॥ अग्निनिर्ऋतिवाय्वीशकोणगाः पांतु मां सदा ॥ मम सौख्यमसंबाधमारोग्यमपराजयः ॥ ११७ ॥ दुःखहानिरविघ्नश्च प्रजावृद्धिः सुखो

दयः ॥ वांछाप्तिरतिकल्याणमवैषम्यमनामयम् ॥ ११८ ॥ अनालस्यमभीष्टं स्यान्मृत्युहानिर्बलोन्नतिः ॥ भयहानिर्यशः कांतिर्विद्या ऋद्धिर्महा
श्रियः ॥ ११९ ॥ अनष्टद्रव्यता चैव नष्टस्य पुनरागमः ॥ दीर्घायुष्यं मनोहर्षः सौकुमार्यमभीप्सितम् ॥ १२० ॥ अप्रधृष्यतमत्वं च महासाम
र्थ्यमेव च ॥ संतु मे कार्तवीर्य्यस्य हैहयेंद्रस्य कीर्तनात् ॥ १२१ ॥ य इदं कार्तवीर्य्यस्य कवचं पुण्यवर्द्धनम् ॥ सर्वपापप्रशमनं सर्वो
पद्रवनाशनम् ॥ १२२ ॥ सर्वशांतिकरं गुह्यं समस्तभयनाशनम् ॥ विजयार्थप्रदं नृणां सर्वसंपत्प्रदं शुभम् ॥ १२३ ॥ शृणुयाद्वा पठेद्वापि
सर्वकामानवाप्नुयात् ॥ चौरैर्हृतं यदा पश्येत्पश्वादिधनमात्मनः ॥ १२४ ॥ सप्तवारं तदा जप्येन्निशि पश्चिमदिङ्मुखः ॥ सप्तरात्रेण लभते
नष्टद्रव्यं न संशयः ॥ १२५ ॥ सप्तविंशतिधा जप्त्वा प्राचीदिग्वदनः पुमान् ॥ देवासुरनिभं चापि परचक्रं निवारयेत् ॥ १२६ ॥ विवादे कलहे घोरे
पंचधा यः पठेदिदम् ॥ विजयो जायते तस्य न कदाचित्पराजयः ॥ १२७ ॥ सर्वरोगप्रपीडासु त्रेधा वा पंचधा पठेत् ॥ स रोगमृत्युवेतालभूतप्रेतैर्न
बाध्यते ॥ १२८ ॥ सम्यग्द्वादशधा रात्रौ प्रजपेद्बंधमुक्तये ॥ त्रिदिनान्निगडाद्बद्धो मुच्यते नात्र संशयः ॥ १२९ ॥ अनेनैव विधानेन सर्वसा
धनकर्मणि ॥ असाध्यमपि सप्ताहात्साधयेन्मंत्रवित्तमः ॥ १३० ॥ यात्राकाले पठित्वेदं मार्गे गच्छति यः पुमान् ॥ न दुष्टचौरव्याघ्राद्यैर्भयं
स्यात्परिपंथिभिः ॥ १३१ ॥ जपन्नासेचनं कुर्वञ्जलेनांजलिना तनौ ॥ न चासौ विषकृत्यादिरोगस्फोटैः प्रबाध्यते ॥ १३२ ॥ कार्तवीर्यः खल
द्वेषी कृतवीर्यसुतो बली ॥ सहस्रबाहुः शत्रुघ्नो रक्तवासा धनुर्धरः ॥ १३३ ॥ रक्तगंधो रक्तमाल्यो राजा स्मर्तुरभीष्टदः ॥ द्वादशैतानि नामानि कार्त
वीर्यस्य यः पठेत् ॥ १३४ ॥ संपदस्तस्य जायंते जनास्तस्य वशे सदा ॥ यः सेवते सदा विप्र श्रीमच्चक्रावतारकम् ॥ १३५ ॥ तस्य रक्षां सदा
कुर्याच्चक्रं विष्णोर्महात्मनः ॥ मयैतत्कवचं विप्र दत्तात्रेयान्मुनीश्वरात् ॥ १३६ ॥ श्रुतं तुभ्यं निगदितं धारयस्वाखिलेष्टदम् ॥ १३७ ॥ इति
श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे कार्तवीर्यकवचकथनं नाम सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ सनत्कुमार उवाच ॥ कार्तवी
र्यस्य कवचं कथितं ते मुनीश्वर ॥ मोहविध्वंसनं जैत्रं मारुतेः कवचं शृणु ॥ १ ॥ यस्य संधारणात्सद्यः सर्वे नश्यंत्युपद्रवाः ॥ भूतप्रेतारिजं दुःखं
नाशमेति न संशयः ॥ २ ॥ एकदाहं गतो द्रष्टुं रामं रमयतां वरम् ॥ आनंदवनिकासंस्थं ध्यायंतं स्वात्मनः पदम् ॥ ३ ॥ तत्र रामं रमानाथं
पूजितं त्रिदशेश्वरैः ॥ नमस्कृत्य तदादिष्टमासनं स्थितवान् पुरः ॥ ४ ॥ तत्र सर्वं मया वृत्तं रावणस्य वधांतकम् ॥ पृष्टं प्रोवाच राजेंद्रः श्रीरामः
स्वयमादरात् ॥ ५ ॥ ततः कथांते भगवान्मारुतेः कवचं ददौ ॥ मह्यं तत्ते प्रवक्ष्यामि न प्रकाश्यं हि कुत्रचित् ॥ ६ ॥ भविष्यदेतन्निर्दिष्टं बाल

भावेन नारद ॥ श्रीरामेणांजनासूनोर्भुक्तिमुक्तिप्रदायकम् ॥ ७ ॥ हनुमान् पूर्वतः पातु दक्षिणे पवनात्मजः ॥ पातु प्रतीच्यामक्षघ्नः सौम्ये सागरतारकः ॥८॥ ऊर्द्ध्वं पातु कपिश्रेष्ठः केसरिप्रियनंदनः ॥ अधस्ताद्विष्णुभक्तस्तु पातु मध्ये च पावनिः॥९॥ लंकाविदाहकः पातु सर्वापद्भ्यो निरंतरम्॥ सुग्रीवसचिवः पातु मस्तकं वायुनंदनः ॥ १० ॥ भालं पातु महावीरो भ्रुवोर्मध्ये निरंतरम् ॥ नेत्रे छायापहारी च पातु नः प्लवगेश्वरः ॥ ११ ॥ कपोलौ कर्णमूले च पातु श्रीरामकिंकरः ॥ नासाग्रमंजनासूनुः पातु वक्त्रं हरीश्वरः ॥ १२ ॥ पातु कंठे तु दैत्यारिः स्कंधौ पातु सुरारिजित् ॥ भुजौ पातु महातेजाः करौ च चरणायुधः ॥ १३ ॥ नखान्नखायुधः पातु कुक्षौ पातु कपीश्वरः ॥ वक्षो मुद्रापहारी च पातु पार्श्वे भुजायुधः॥ १४ ॥लंकानिभर्जनः पातु पृष्ठदेशे निरंतरम् ॥ नाभिं श्रीरामभक्तस्तु कटिं पात्वनिलात्मजः ॥ १५ ॥ गुह्यं पातु महाप्राज्ञः सक्थिनी अतिथिप्रियः॥ ऊरू च जानुनी पातु लंकाप्रासादभंजनः ॥ १६॥ जंघे पातु कपिश्रेष्ठो गुल्फौ पातु महाबलः ॥ अचलोद्धारकः पातु पादौ भास्करसन्निभः ॥ १७ ॥ अङ्गानि पातु सत्त्वाढ्यः पातु पादांगुलीः सदा ॥ मुखागानि महाशूरः पातु रोमाणि चात्मवान्॥१८॥दिवारात्रौ त्रिलोकेषु सदागतिसुतोऽवतु ॥ स्थितं व्रजंतमासीनं पिबंतं जक्षतं कपिः ॥ १९ ॥ लोकोत्तरगुणः श्रीमान् पातु त्र्यंबकसंभवः ॥ प्रमत्तमप्रमत्तं वा शयानं गहनेऽम्बुनि ॥ २० ॥ स्थलेंऽतरिक्षे ह्यग्नौ वा पर्वते सागरे द्रुमे ॥ संग्रामे संकटे घोरे विराड्रूपधरोऽवतु ॥२१॥ डाकिनीशाकिनीमारीकालरात्रिमरीचिकाः ॥ शयानं मां विभुः पातु पिशाचोरगराक्षसीः ॥ २२ ॥दिव्यदेहधरो धीमान्सर्वसत्त्वभयंकरः ॥ साधकेंद्रावनः शश्वत्पातु सर्वत एव माम् ॥ २३ ॥ यद्रूपं भीषणं दृष्ट्वा पलायंते भयानकाः ॥ स सर्वरूपः सर्वज्ञः सृष्टिस्थितिकरोऽवतु ॥ २४ ॥ स्वयं ब्रह्मा स्वयं विष्णुः साक्षाद्देवो महेश्वरः ॥ सूर्यमंडलगः श्रीदः पातु कालत्रयेऽपि माम् ॥ २५ ॥ यस्य शब्दमुपाकर्ण्य दैत्यदानवराक्षसाः ॥ देवा मनुष्यास्तिर्यंचः स्थावरा जङ्गमास्तथा ॥ २६ ॥ सभया भयनिमुक्ता भवंति स्वकृतानुगाः ॥ यस्यानेककथाः पुण्याः श्रूयंते प्रतिकल्पके ॥ २७ ॥ सोऽवतात्साधकश्रेष्ठं सदा रामपरायणः ॥ वैधात्रधातृप्रभृति यत्किंचिद्दृश्यतेऽत्यलम् ॥ २८ ॥ विद्धि व्याप्तं यथा कीशरूपेणानंजनेन तत्॥यो विभुः सोऽहमेषोऽहं स्वीयः स्वयमणुर्बृहत्॥२९॥ऋग्यजुः सामरूपश्च प्रणवस्त्रिवृदध्वरः ॥ तस्मै स्वस्मै च सर्वस्मै नतोऽस्म्यात्मसमाधिना ॥ ३० ॥ अनेकानन्तब्रह्माण्डधृते ब्रह्मस्वरूपिणे ॥ समीरणात्मने तस्मै नतोऽस्म्यात्मस्वरूपिणे ॥ ३१ ॥ नमो हनुमते तस्मै नमो मारुतसूनवे ॥ नमः श्रीरामभक्ताय श्यामाय महते नमः ॥ ३२ ॥ नमो वानरवीराय सुग्रीवसख्यकारिणे ॥ लंकाविदहनायाथ महासागरतारिणे ॥ ३३ ॥ सीताशोकविनाशाय राममुद्राधराय च ॥ रावणांतनिदानाय नमः

सर्वोत्तरात्मने ॥३४॥ मेघनादमखध्वंसकारणाय नमोनमः॥अशोकवनविध्वंसकारिणे जयदायिने ॥३५॥ वायुपुत्राय वीराय आकाशोदरगामिने ॥
वनपालशिरश्छेत्रे लंकाप्रासादभंजिने ॥ ३६ ॥ ज्वलत्कांचनवर्णाय दीर्घलांगूलधारिणे॥ सौमित्रिजयदात्रे च रामदूताय ते नमः ॥ ३७ ॥ अक्षस्य
वधकर्त्रे च ब्रह्मशस्त्रनिवारिणे ॥ लक्ष्मणांगमहाशक्तिजातक्षतविनाशिने॥३८॥ रक्षोघ्नाय रिपुघ्नाय भूतघ्नाय नमोनमः ॥ऋक्षवानरवीरौघप्रासादाय
नमोनमः ॥३९॥ परसैन्यबलघ्नाय शस्त्रास्त्रघ्नाय ते नमः ॥ विषघ्नाय द्विषघ्नाय भयघ्नाय नमोनमः॥४०॥महारिपुभयघ्नाय भक्तत्राणैककारिणे॥
परप्रेरितमन्त्राणां मंत्राणां स्तंभकारिणे ॥ ४१ ॥ पयःपाषाणतरणकारणाय नमोनमः ॥ बालार्कमंडलग्रासकारिणे दुःखहारिणे ॥ ४२ ॥ नखायु
धाय भीमाय दन्तायुधधराय च॥ विहंगमाय शवाय वज्रदेहाय ते नमः ॥ ४३ ॥ प्रतिग्रामस्थितायाथ भूतप्रेतवधार्थिने ॥करस्थशैलशस्त्राय राम
शस्त्राय ते नमः ॥ ४४ ॥ कौपीनवाससे तुभ्यं रामभक्तिरताय च ॥ दक्षिणाशाभास्कराय सतां चन्द्रोदयात्मने ॥ ४५ ॥ कृत्याक्षतव्यथाघ्नाय
सर्वक्लेशहराय च ॥ स्वाम्याज्ञापार्थसंग्रामसख्यसंजयकारिणे ॥ ४६॥ भक्तानां दिव्यवादेषु संग्रामे जयकारिणे ॥ किलिकिलाबुवकाराय घोरशब्द
कराय च ॥ ४७॥ सर्वाग्निव्याधिसंस्तंभकारिणे भयहारिणे ॥ सदा वनफलाहारसंतृप्ताय विशेषतः ॥ ४८ ॥ महार्णवशिलाबद्धसेतुबंधाय ते नमः॥
इत्येतत्कथितं विप्र मारुतेः कवचं शिवम् ॥ ४९॥ यस्मै कस्मै न दातव्यं रक्षणीयं प्रयत्नतः ॥ अष्टगंधैर्विलिख्याथ कवचं धारयेत्तु यः ॥ ५० ॥
कंठे वा दक्षिणे बाहौ जयस्तस्य पदे पदे ॥ किं पुनर्बहुनोक्तेन साधितं लक्ष्मादरात् ॥ ५१॥ प्रजप्तमेतत्कवचमसाध्यं चापि साधयेत् ॥ ५२ ॥
इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे हनुमत्कवचनिरूपणं नामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ सनत्कुमार उवाच ॥अथापरं
वायुसूनोश्चरितं पापनाशनम् ॥ यदुक्तं स्वासु रामेण आनन्दवनवासिना ॥१॥ सद्योजाते महाकल्पे श्रुतवीर्ये हनूमति ॥ मम श्रीरामचन्द्रस्य
भक्तिरस्तु सदैव हि ॥ २ ॥ शृणुष्व गदतो मत्तः कुमारस्य कुमारक ॥ चरितं सर्वपापघ्नं शृण्वतां पठतां सदा ॥ ३ ॥ वांछाम्यहं सदा विप्र संगमं
कीशरूपिणा ॥ रहस्यं रहसि स्वस्य ममानन्दवनोत्तमे ॥ ४ ॥ परीतेऽत्र सखायो मे सख्यश्च विगतज्वराः ॥ क्रीडंति सर्वदा चात्र
प्राकट्येऽपि रहस्यपि ॥ ५ ॥ कस्मिंश्चिदवतारे तु यद्वृत्तं च रहो मम ॥ तदत्र प्रकटं तुभ्यं करोमि प्रीतमानसः ॥ ६ ॥ आविर्भूतोऽस्म्यहं पूर्वं
राज्ञो दशरथक्षये ॥ चतुर्यूहात्मकस्तत्र तस्य भार्यात्रये मुने ॥ ७ ॥ ततः कतिपयैरब्दैरागतो द्विजपुंगवः ॥ विश्वामित्रोऽर्थयामास पितरं
मम भूपतिम् ॥ ८ ॥ यक्षरक्षोविघातार्थं लक्ष्मणेन सहैव माम् ॥ प्रेषयामास धर्मात्मा सिद्धाश्रममरण्यकम् ॥ ९ ॥ तत्र गत्वाश्रममृषेर्दू

षयन्तौ निशाचरौ ॥ ध्वस्तौ सुबाहुमारीचौ प्रसन्नोऽभूत्तदा मुनिः ॥ १० ॥ अस्त्रग्रामं ददौ मह्यं मासं चावासयत्तथा ॥ ततो गाधिसुतो
धीमान् ज्ञात्वा भाव्यर्थमादरात् ॥ ११ ॥ मिथिलामनयत्तत्र रौद्रं चादर्शयद्धनुः ॥ तस्य कन्यां पणीभूतां सीतां सुरसुतोपमाम् ॥ १२ ॥
धनुर्विभज्य समिति लब्धवान्मानिनोऽस्य च ॥ ततो मार्गे भृगुपतेर्दर्प्पमूढं चिरं स्मयन् ॥ १३ ॥ व्यपनीयागमं पश्चादयोध्यां स्वपितुः पुरीम् ॥
ततो राज्ञाहमाज्ञाय प्रजाशीलनमानसः ॥ १४॥ यौवराज्ये स्वय प्रीत्या सम्मंत्र्यातैर्विकल्पितः॥तच्छुत्वा सुप्रिया भार्या कैकयी भूपतिं मुने॥१५॥
देवकार्यविधानार्थं विदूषितमतिर्जगौ ॥ पुत्रो मे भरतो नाम यौवराज्येऽभिषिच्यताम् ॥१६॥ रामश्चतुर्दशसमा दंडकान्प्रविवास्यताम्॥तदाकर्ण्या
हमुद्युक्तोऽरण्यं भार्यानुजान्वितः ॥ १७ ॥ गंतुं नृपतिनानुक्तोऽप्यगमं चित्रकूटकम् ॥ तत्र नित्यं वन्यफलैर्मांसैश्चावर्तितक्रियः ॥ १८ ॥निवसन्नेव
राज्ञस्तु निधनं चाप्यवागमम् ॥ ततो भरतशत्रुघ्नौ भ्रातरौ मम मानदौ॥१९॥ मातृवर्गयुतौ दीनौ साचार्यामात्यनागरौ ॥ व्यजिज्ञपतमागत्य
पंचवट्यां निजाश्रमम् ॥ २० ॥ अकल्पयं भ्रातृभार्यासहितश्च त्रिवत्सरम् ॥ ततस्त्रयोदशे वर्षे रावणो नाम राक्षसः ॥ २१ ॥ मायया हृतवान्सीतां
प्रियां मम परोक्षतः ॥ ततोऽहं दीनवदन ऋष्यमूकं हि पर्वतम् ॥ २२ ॥ भार्यामन्वेषयन्प्राप्तः सख्यं हर्यधिपेन च ॥ अथ वालिनमाहत्य सुग्रीव
स्तत्पदे कृतः ॥ २३ ॥ सह वानरयूथैश्च साहाय्यं कृतवान्मम ॥ विरुध्य रावणेनालं मम भक्तो विभीषणः ॥ २४ ॥ आगतो ह्यभिषिच्याशु
लंकेशो हि विकल्पितः ॥ हत्वा तु रावणं संख्ये सपुत्रामात्यबांधवम् ॥ २५ ॥ सीतामादाय संशुद्धामयोध्यां समुपागतः ॥ ततः कालांतरे विप्र
सुग्रीवश्च विभीषणः॥ २६ ॥ निमंत्रितौ पितुः श्राद्धे षट्कुलाश्च द्विजोत्तमाः॥ अयोध्यायां समाजग्मुस्ते तु सर्वे निमंत्रिताः ॥२७॥ऋते विभीषणं
तत्र चिंतयाने रघूत्तमे॥ शंभुर्ब्राह्मणरूपेण षट्कुलैश्च सहागतः ॥२८॥अथ पृष्टो मया शंभुर्विभीषणसमागमे॥नीत्वा मां द्रविडे देशे मोचय द्विजबंध
नात् ॥२९॥ मया निमंत्रिताः श्राद्धे ह्यगस्त्याद्या मुनीश्वराः ॥ संभोजितास्तु प्रययुः स्वस्वमाश्रममंडलम् ॥ ३० ॥ ततः कालांतरे विप्रा देवा
दैत्या नरेश्वराः ॥ गौतमेन समाहूताः सर्वे यज्ञसभाजिताः ॥ ३१ ॥ ते सर्वे स्फाटिकं लिंगं त्र्यंबकाद्रौ निवेशितम् ॥ संपूज्य न्यवसंस्तत्र देव
दैत्यनृपाग्रजाः ॥ ३२ ॥ तस्मिन्समाजे वितते सर्वैर्लिंगे समर्चिते ॥ गौतमोऽप्यथ मध्याह्ने पूजयामास शंकरम् ॥ ३३ ॥ सर्वे शुक्लांबरधरा भस्मो
द्धूलितविग्रहाः ॥ सितेन भस्मना कृत्वा सर्वस्थाने त्रिपुंड्रकम् ॥ ३४ ॥ नत्वा तु भार्गवं सर्वे भूतशुद्धिं प्रचक्रमुः ॥ हृत्पद्ममध्ये सुषिरं तत्रैव भूत
पञ्चकम् ॥ ३५ ॥ तेषां मध्ये महाकाशमाकाशे निर्मलामलम् ॥ तन्मध्ये च महेशानं ध्यायेद्दीप्तिमयं शुभम् ॥ ३६ ॥ अज्ञानसंयुतं भूतं समलं

कर्मसंगतः ॥ तं देहमाकाशदीपे प्रदहेज्ज्ञानवह्निना॥३७॥आकाशस्यावृतिं चाहं दग्ध्वाकाशमथो दहेत॥ दग्ध्वाकाशमथो वायुमग्निभूतं तथा दहेत्
॥ ३८ ॥ अब्भूतं च ततो दग्ध्वा पृथिवीभूतमेव च॥तदाश्रितान्गुणान्दग्ध्वा ततो देहं प्रदाहयेत्॥३९॥एवं प्रदग्ध्वा भूतादिं देही तज्ज्ञानवह्निना॥
शिखामध्यस्थितं विष्णुमानंदरसनिर्भरम् ॥ ४० ॥ निष्पन्नचंद्रकिरणसंकाशकिरणं शिवम् ॥ शिवांगोत्पन्नकिरणैरमृतद्रवसंयुतैः ॥ ४१ ॥ सुशी
तला ततो ज्वला प्रशांता चंद्ररश्मिवत् ॥ प्रसारितसुधारुग्भिः सांद्रीभूतश्च संप्लवः ॥ अनेन प्लावितं भूतग्रामं संचिंतयेत्परम् ॥ ४२ ॥ इत्थं कृत्वा
भूतशुद्धिं क्रियार्हो मर्त्यः शुद्धो जायते ह्येव सद्यः ॥ पूजां कर्तुं जप्यकर्मापि पश्चादेवं ध्यायेद्ब्रह्महत्यादिशुद्ध्यै ॥४३॥एवं ध्यात्वा चंद्रदीप्तिप्रकाशं
ध्यानेनारोप्याशु लिंगे शिवस्य ॥ सदाशिवं दीपमध्ये विचिंत्य पञ्चाक्षरेणार्चनमव्ययं तु ॥ ४४ ॥ आवाहनादीनुपचारांस्तथापि कृत्वा स्नानं
पूर्ववच्छंकरस्य॥औदुंबरं राजतं स्वर्णपीठं वस्त्रादिच्छन्नं सर्वमेवेह पीठम्॥४५॥अंते कृत्वा बुद्बुदाभ्यां च सृष्टिं पीठे पीठे नागमेकं पुरस्तात्॥कुर्या
त्पीठे चोर्द्ध्वके नागयुग्मं देवाभ्याशे दक्षिणे वामतश्च॥ ४६॥जपापुष्पं नागमध्ये निधाय मध्ये वस्त्रं द्वादशप्रातिगुण्ये॥ सुश्वेतेन तस्य मध्ये महेशं
लिंगाकारं पीठयुक्तं प्रपूज्यम्॥४७॥एवं कृत्वा साधकास्ते तु सर्वे दत्त्वा दत्त्वा पंचगंधाष्टगंधम्॥पुष्पैः पत्रैः श्रीतिलैरक्षतैश्च तिलोन्मिश्रैः केवलैश्च
प्रपूज्य ॥४८॥धूपं दत्त्वा विधिवत्संप्रयुक्तं दीपं दत्त्वा चोक्तमेवोपहारम् ॥पूजाशेषं ते समाप्याथ सर्वे गीतं नृत्यं तत्र तत्रापि चक्रुः॥४९॥काले
चास्मिन्सुव्रते गौतमस्य शिष्यः प्राप्तः शंकरात्मेति नाम्ना॥५०॥ उन्मत्तवेषो दिग्वासा अनेकां वृत्तिमास्थितः॥ क्वचिद्द्विजातिप्रवरः क्वचिच्चंडालस
न्निभः॥ ५१ ॥ क्वचिच्छूद्रसमो योगी तापसः क्वचिदप्युत ॥ गर्जत्युत्पतते चैव नृत्यति स्तौति गायति ॥ ५२ ॥ रोदिति शृणुतेऽत्युक्तं पतत्यु
त्तिष्ठति क्वचित् ॥ शिवज्ञानैकसंपन्नः परमानदनिर्भरः ॥ ५३ ॥ संप्राप्तो भोज्यवेलायां गौतमस्यांतिकं ययौ ॥ बुभुजे गुरुणा साकं क्वचिदुच्छिष्ट
मेव च॥५४॥क्वचिल्लिहति तत्पात्रं तूष्णीमेवाभ्यगात्क्वचित् ॥ हस्तं गृहीत्वैव गुरोः स्वयमेवाभुनक्क्वचित्॥५५॥क्वचिद् गृहांतरे मूत्रं क्वचित्कर्दमले
पनम् ॥ सर्वदा तं गुरुर्दृष्ट्वा करमालंब्य मंदिरम्॥५६॥प्रविश्य स्वीयपीठे तमुपवेश्याप्यभोजयत् ॥स्वयं तदस्य पात्रेण बुभुजे गौतमो मुनिः॥५७॥
तस्य चित्तं परिज्ञातुं कदाचिदथ सुंदरी॥अहल्या शिष्यमाहूय भुङ्क्ष्वेति प्राह तं मुदा ॥निर्दिष्टो गुरुपत्न्या तु बुभुजे सोऽविशेषतः॥५८॥यथा पपौ हि
पानीयं तथा वह्निमपि द्विज॥ कंटकानन्नवद्भुक्त्वा यथापूर्वमतिष्ठत॥५९॥पुरो हि मुनिकन्याभिराहूतो भोजनाय च॥दिनेदिने तत्प्रदत्तं लोष्टमंबु च
गोमयम्॥६०॥ कर्दमं काष्ठदंडं च भुक्त्वा पीत्वाथ हर्षितः॥एतादृशो मुनिरसौ चंडालसदृशाकृतिः॥६१॥सुजीर्णोपानहौ हस्ते गृहीत्वा प्रलपन्हसन्॥

अंत्यजोचितवेषश्च वृषपर्वाणमभ्यगात् ॥ ६२ ॥ वृषपर्वेशयोर्मध्ये दिग्वासाः समतिष्ठत ॥ वृषपर्वा तमज्ञात्वा पीडयित्वा शिरोऽच्छिनत् ॥ ६३ ॥
हते तस्मिन्द्विजश्रेष्ठे जगदेतच्चराचरम् ॥ अतीव कलुषं ह्यासीत्तत्रस्था मुनयस्तथा ॥ ६४ ॥गौतमस्य महाशोकः संजातः सुमहात्मनः ॥ निर्ययौ
चक्षुषो वारि शोकं संदर्शयन्निव ॥ ६५ ॥ गौतमः सर्वदैत्यानां सन्निधौ वाक्यमुक्तवान् ॥ किमनेन कृतं पापं येन च्छिन्नमिदं शिरः ॥६६॥ मम
प्राणाधिकस्येह सर्वदा शिवयोगिनः ॥ ममापि मरणं सत्यं शिष्यच्छद्मा यतो गुरुः ॥ ६७ ॥शैवानां धर्मयुक्तानां सर्वदा शिववर्तिनाम् ॥ मरणं
यत्र दृष्टं स्यात्तत्र नो मरणं ध्रुवम् ॥ ६८ ॥ तच्छ्रुत्वा ह्यसुराचार्यः शुक्रः प्राह विदांवरः ॥ एनं संजीवयिष्यामि भार्गवं शंकरप्रियम् ॥ ६९ ॥
किमर्थं म्रियते ब्रह्मन्पश्य मे तपसो बलम् ॥ इति वादिनि विप्रेंद्रे गौतमोऽपि ममार ह॥७०॥तस्मिन्मृतेऽथ शुक्रोऽपि प्राणांस्तत्याज योगतः॥तस्यैवं
हतिमाज्ञाय प्रह्लदाद्या दितीश्वराः ॥७१॥ देवा नृपा द्विजाः सर्वे मृता आसंस्तदद्भुतम् ॥ मृतमासीदथ बलं तस्य बाणस्य धीमतः ॥७२॥अहल्या
शोकसंतप्ता रुरोदोच्चैः पुनःपुनः ॥ गौतमेन महेशस्य पूजया पूजितो विभुः ॥ ७३ ॥ वीरभद्रो महायोगी सर्वं दृष्ट्वा चुकोप ह ॥ अहो कष्टमहोकष्टं
महेशा बहवो हताः ॥ ७४ ॥ शिवं विज्ञापयिष्यामि तेनोक्तं करवाण्यथ ॥ इति निश्चित्य गतवान्मंदराचलमव्ययम्॥७५॥नमस्कृत्वा विरूपाक्षं वृत्त
सर्वमथोक्तवान्॥ ब्रह्माणं च हरिं तत्र स्थितौ प्राह शिवो वचः॥७६॥मद्भक्तैः साहसं कर्म कृतं ज्ञात्वा वरप्रदम्॥ गत्वा पश्यामि हे विष्णो सर्वं तत्कृ
तसाहसम् ॥ ७७ ॥ इत्युक्त्वा वृषमारुह्य वायुना धूतचामरः॥नन्दिकेन सुवेषेण धृते छत्रेऽतिशोभने॥७८॥सुश्वेते हेमदंडे च नान्ययोग्ये धृते विभो ॥
महेशानुमतिं लब्ध्वा हरिर्नागांतके स्थितः ॥७९॥ आरक्तनीलच्छत्राभ्यां शुशुभे लक्ष्मकौस्तुभः ॥ शिवानुमत्या ब्रह्मापि हंसारूढोऽभवत्तद॥८०॥
इंद्रगोपप्रभाकारच्छत्राभ्यां शुशुभे विधिः ॥ इन्द्रादिसर्वदेवाश्च स्वस्ववाहनसंयुताः ॥ ८१ ॥ अथ ते निर्ययुः सर्वे नानावाद्यानुमोदिताः ॥
कोटिकोटिगणाकीर्णा गौतमस्याश्रमं गताः ॥ ८२ ॥ ब्रह्मविष्णु महेशाना दृष्ट्वा तत्परमाद्भुतम् ॥ स्वभक्तं जीवयामास वामकोणनिरीक्षणात्
॥ ८३ ॥ शंकरो गौतमं प्राह तुष्टोऽहं ते वरं वृणु ॥ तदाकर्ण्य वचस्तस्य गौतमः प्राह सादरम् ॥ ८४ ॥ यदि प्रसन्नो देवेश यदि देयो वरो
मम ॥ त्वल्लिंगार्चनसामर्थ्यं नित्यमस्तु ममेश्वर ॥ ८५ ॥ वृतमेतन्मया देव त्रिनेत्र शृणु चापरम् ॥ शिष्योऽयं मे महाभागो हेयादेयादिवर्जितः
॥८६॥ प्रेक्षणीयं ममत्वेन न च पश्यति चक्षुषा ॥ न घ्राणग्राह्यं देवेश न पातव्यं न चेतरत् ॥८७॥ इति बुद्ध्या तथा कुर्वन्स हि योगी महायशाः ॥
उन्मत्तविकृताकारः शंकरात्मेति कीर्तितः ॥ ८८ ॥ न कश्चित्तं प्रति द्वेषी न च तं हिंसयेदपि ॥ एतन्मे दीयतां देव मृतानाममृतिस्तथा ॥ ८९ ॥

तच्छ्रुत्वोमापतिः प्रीतो निरीक्ष्य हरिमव्ययः ॥ स्वांशेन वायुना देहमाविशज्जगदीश्वरः ॥ ९० ॥ हरिरूपः शंकरात्मा मारुतिः कपिस
त्तमः ॥ पर्यायैरुच्यतेऽधीशः साक्षाद्विष्णुः शिवः परः ॥ ९१ ॥ आकल्पमेष प्रत्येकं कामरूपमुपाश्रितः ॥ ममाज्ञाकारको रामभक्तः पूजितविग्रहः
॥ ९२ ॥ अनंतकल्पमीशानः स्थास्यति प्रीतमानसः॥त्वया कृतमिदं वेश्म विस्तृतं सुप्रतिष्ठितम्॥९३॥ नित्यं वै सर्वरूपेण तिष्ठामः क्षणमादरात्॥
समर्चिताः प्रयास्यामः स्वस्ववासं ततः परम् ॥ ९४ ॥ अथाबभाषे विश्वेशं गौतमो मुनिपुंगवः ॥ अयोग्यं प्रार्थयामीश ह्यर्थी दोषं न पश्यति
॥ ९५ ॥ ब्रह्माद्यलभ्यं देवेश दीयतां यदि रोचते ॥ अथेशो विष्णुमालोक्य गृहीत्वा तत्करं करे ॥ ९६ ॥ प्रहसन्नंबुजाभाक्षमित्युवाच सदाशिवः॥
क्षामोदरोऽसि गोविंद देयं ते भोजनं किमु॥९७॥स्वयं प्रविश्य यदि वा स्वयं भुंक्ष्व स्वगेहवत्॥गच्छ वा पार्वतीगेहं या कुक्षिं पूरयिष्यति॥९८॥इत्युक्त्वा
तत्करालंबी ह्येकांतमगमद्विभुः॥आदिश्य नंदिनं देवो द्वाराध्यक्षं यथोक्तवत्॥९९॥स गत्वा गौतमं वाथ ह्युक्तवान्विष्णुभाषणम्॥संपादयान्नं देवेशा भोक्तु
कामा वयं मुने ॥१००॥ इत्युक्त्वैकांतमगमद्वासुदेवेन शंकरः ॥ मृदुशय्यां समारुह्य शयितौ देवतोत्तमौ॥१०१॥अन्योन्यं भाषणं कृत्वा प्रोत्तस्थतुरु
भावपि ॥ गत्वा तडागं गंभीरं स्नास्यंतौ देवसत्तमौ ॥१०२॥ करांबुपातमन्योन्यं पृथक्कृत्वोभयत्र च ॥ मुनयो राक्षसाश्चैव जलक्रीडां प्रचक्रिरे ॥
॥ १०३ ॥ अथ विष्णुर्महेशश्च जलपानानि शीघ्रतः ॥ चक्रतुः शंकरः पद्मकिंजल्कांजलिना हरेः ॥ १०४ ॥ अवाकिरन्मुखे तस्य पद्मोत्फुल्ल
विलोचने ॥ नेत्रे केशरसंपातात्प्रमीलयत केशवः ॥ १०५ ॥ अत्रांतरे हरेः स्कंधमारुरोह महेश्वरः ॥ हर्युत्तमांगं बाहुभ्यां गृहीत्वा संन्यमज्जयत् ॥
॥ १०६ ॥ उन्मज्जयित्वा च पुनः पुनश्चापि पुनःपुनः॥ पीडितः स हरिः सूक्ष्मं पातयामास शंकरम् ॥ १०७ ॥ अथ पादौ गृहीत्वा तं भ्रामयन्विच
कर्ष ह ॥ अताडयद्धरेर्वक्षः पातयामास चाच्युतम् ॥ १०८॥ अथोत्थितो हरिस्तोयमादायांजलिना ततः ॥ शीर्षे चैवाकिरच्छंभुमथ शंभुरथो हरिः॥
॥ १०९ ॥ जलक्रीडैवमभवदथ चर्षिगणांतरे ॥ जलक्रीडासंभ्रमेण विस्रस्तजटबंधनाः ॥ ११० ॥ अथ संभ्रमतां तेषामन्योन्यजटबंधनम् ॥ इतरे
तरबद्धासु जटासु च मुनीश्वराः ॥ १११ ॥ शक्तिमंतोऽशक्तिमत आकर्षंति च सव्यथम् ॥ पातयंतोऽन्यतश्चापि क्रोशंतो रुदतस्तथा ॥ ११२ ॥
एवं प्रवृत्ते तुमुले संभूते तोयकर्मणि ॥ आकाशे वानरेशस्तु ननर्त च ननाद च ॥ ११३ ॥ विपंचीं वादयन्वाद्यं ललितां गीतिमुज्जगौ ॥ सुगीत्या
ललिता यास्तु अगायत विधा दश ॥ ११४ ॥ शुश्राव गीतिं मधुरां शंकरो लोकभावतः ॥ स्वयं गातुं हि ललितं मंदंमंदं प्रचक्रमे ॥ ११५ ॥
स्वयं गायति देवेशे विश्रामं गलदेशिकम् ॥ स्वरं ध्रुवं समादाय सर्वलक्षणसंयुतम् ॥ ११६॥ स्वधारामृतसंयुक्तं गानेनैवमपोनयन् ॥ वासुदेवो

मर्दलं च कराभ्यामप्यवादयत् ॥ ११७ ॥ अम्बुजांगश्चतुर्वक्रस्तुंबुरुर्मुखरो बभौ ॥ तानका गौतमाद्यास्तु गायको वायुजोऽभवत् ॥ ११८ ॥
गायके मधुरं गीतं हनूमति कपीश्वरे ॥ म्लानमम्लानमभवत्कृशाः पुष्टास्तदाभवन् ॥ ११९ ॥ स्वां स्वां गीतिमतः सर्वे तिरस्कृत्यैव मूर्च्छिताः ॥
तूष्णीभूतं समभवद्देवर्षिगणदानवम् ॥ १२० ॥ एकः स हनुमान् गाता श्रोतारः सर्व एव ते ॥मध्याह्नकाले वितते गायमाने हनूमति ॥ स्वस्ववाह
नमारुह्य निर्गताः सर्वदेवताः ॥ १२१ ॥ गानप्रियो महेशस्तु जग्राह प्लवगेश्वरम्॥ प्लवग त्वं मयाज्ञप्तो निःशंको वृषमारुह॥१२२॥मम चाभिमुखो
भूत्वा गायस्वानेकगायनम् ॥ अथाह कपिशार्दूलो भगवंतं महेश्वरम् ॥ १२३ ॥ वृषभारोहसामर्थ्यं तव नान्यस्य विद्यते ॥ तव वाहनमारुह्य
पातकी स्यामहं विभो ॥ १२४ ॥ मामेवारुह देवेश विहंगः शिवधारणः ॥ तव चाभिमुखं गानं करिष्यामि विलोकय ॥ १२५ ॥ अथेश्वरो हनूमं
तमारुरोह यथा वृषम् ॥ आरूढे शंकरे देवे हनुमत्कंधरां शिवः॥ १२६ ॥ छित्वा त्वचं परावृत्य सुखं गायति पूर्ववत् ॥ शृण्वन्गीतिसुधां शंभुर्गौत
मस्य गृहं ततः ॥ १२७ ॥ सर्वे चाप्यागतास्तत्र देवर्षिगणदानवाः ॥ पूजिता गौतमेनाथ भोजनावसरे सति ॥ १२८ ॥ यच्छुष्कं दारुसंभूतं गृहो
पकरणादिकम् ॥ प्ररूढमभवत्सर्वं गायमाने हनूमति ॥ १२९ ॥ तस्मिन्गाने समस्तानां चित्रं दृष्टिरतिष्ठत ॥ १३० ॥ द्विबाहुरीशस्य पदाभिवं
दनः समस्तगात्राभरणोपपन्नः ॥ प्रसन्नमूर्तिस्तरुणः सुमध्ये विन्यस्तमूर्द्धांजलिभिः शिरोभिः ॥ १३१ ॥ शिरः कराभ्यां परिगृह्य शंकरो हनूमतः
पूर्वमुखं चकार ॥ पद्मासनासीनहनूमतोऽजलौ निधाय पादं त्वपरं मुखे च॥१३२॥पादांगुलीभ्यामथ नासिकां विभुः स्नेहेन जग्राह च मन्दमन्दम्॥
स्कन्धे मुखे त्वंसतले च कण्ठे वक्षस्थले च स्तनमध्यमे हृदि ॥१३३॥ ततश्च कुक्षावथ नाभिमंडले पादं द्वितीयं विदधाति चांजलौ॥शिरो गृहीत्वाऽ
वनमय्य शंकरः पस्पर्श पृष्ठं चिबुकेन सोऽध्वनि ॥१३४॥ हारं च मुक्तापरिकल्पितं शिवो हनूमतः कंठगतं चकार ॥१३५॥ अथ विष्णुर्महेशानमिदं
वचनमुक्तवान् ॥ हनूमता समो नास्ति कृत्स्नब्रह्माण्डमण्डले ॥ १३६॥ श्रुतिदेवाद्यगम्यं हि पदं तव कपिस्थितम् ॥ सर्वोपनिषदव्यक्तं त्वत्पदं कपि
सर्वयुक् ॥ १३७ ॥ यमादिसाधनैर्योगैर्न क्षणं ते पदं स्थिरम् ॥ महायोगिहृदंभोजे परं स्वस्थं हनूमति ॥ १३८ ॥ वर्षकोटिसहस्रं तु सहस्राब्दैरथा
न्वहम् ॥ भक्त्या संपूजितोऽपीश पादो नो दर्शितस्त्वया॥ १३९ ॥ लोके वादो हि सुमहाञ्छंभुर्नारायणप्रियः॥हरिप्रियस्तथा शंभुर्न तादृग्भाग्य
मस्ति मे॥१४०॥तच्छ्रुत्वा वचनं शंभुर्विष्णोः प्राह मुदान्वितः॥न त्वया सदृशो मह्यं प्रियोऽन्योऽस्ति हरे क्वचित्॥१४१॥पार्वती वा त्वया तुल्या
वर्तते नैव भिद्यते॥अथ देवाय महते गौतमः प्रणिपत्य च॥ १४२॥व्यजिज्ञपदमेयात्मन्देवैर्हि करुणानिधे॥मध्याह्नोऽयं व्यतिक्रांतो भुक्तिवेलाखिलस्य

च ॥१४३॥ अथाचम्य महादेवो विष्णुना सहितो विभुः ॥ प्रविश्य गौतमगृहं भोजनायोपचक्रमे ॥ १४४ ॥ रत्नांगुलीयैरथ नूपुराभ्यां दुकूलबंधन
तडित्सुकांच्या ॥ हारैरनेकैरथ कण्ठनिष्कयज्ञोपवीतोत्तरवाससी च ॥ १४५ ॥ विलंबिचंचन्मणिकुंडलेन सुपुष्पधम्मिल्लवरेण चैव ॥ पंचांगगंधस्य
विलेपनेन बाह्वंगदैः कंकणकांगुलीयैः ॥ १४६ ॥ अथो विभूषितः शिवो निविष्ट उत्तमासने ॥ स्वसंमुखं हरिं तथा न्यवेशयद्वरासने ॥ १४७ ॥ देव
श्रेष्ठौ हरीशौ तावन्योन्याभिमुखस्थितौ ॥ सुवर्णभाजनस्थान्नं ददौ भक्त्या स गौतमः ॥ १४८ ॥ त्रिंशत्प्रभेदान्भक्ष्यांस्तु पायसं च चतुर्विधम् ॥
सुपक्वं पाकजातं च कल्पितं यच्छतद्वयम्॥१४९॥ अपक्वं मिश्रकं तद्वत्त्रिंशतं परिकल्पितम् ॥शतं शतं सुकन्दानां शाकानां च प्रकल्पितम्॥१५०॥
पंचविंशतिधा सर्पिःसंस्कृतं व्यंजनं तथा ॥ शर्कराद्यं तथा चूतमोचाखर्जूरदाडिमम् ॥१५१ ॥ द्राक्षेक्षुनागरंगं च मिष्टं पक्वं फलोत्करम् ॥ प्रियालकं
जम्बुफलं विकंकतफलं तथा ॥ १५२ ॥ एवमादीनि चान्यानि द्रव्याणीशे समर्प्य च॥दत्त्वापोशानकं विप्रो भुंजध्वमिति चाब्रवीत् ॥ १५३ ॥
भुंजानेषु च सर्वेषु व्यजनं सूक्ष्मविस्तृतम् ॥ गौतमः स्वयमादाय शिवविष्णू अवीजयत्॥१५४॥परिहासमथो कर्तुमियेष परमेश्वरः॥पश्य विष्णो
हनूमन्तं कथं भुंक्ते स वानरः ॥ १५५ ॥ वानरं पश्यति हरौ मण्डकं विष्णुभाजने ॥ चिक्षेप मुनिसंघेषु पश्यत्स्वपि महेश्वरः ॥ १५६ ॥ हनूमते
दत्तवांश्च स्वोच्छिष्टं पायसादिकम् ॥ त्वदुच्छिष्टमभोज्यं तु तवैव वचनाद्विभो ॥ १५७ ॥ अनर्हं मम नैवेद्यं पत्रं पुष्पं फलादिकम् ॥ मह्यं निवेद्य
सकलं कूप एव विनिःक्षिपेत् ॥ १५८ ॥ अभुक्ते त्वद्वचो नूनं भुक्ते चापि कृपा तव॥ बाणलिंगे स्वयंभूते चन्द्रकांते हृदि स्थिते॥१५९॥चांद्रायण
समं ज्ञेयं शम्भोर्नैवेद्यभक्षणम् ॥ भुक्तिवेलेयमधुना तद्वैरस्यं कथांतरात् ॥१६०॥ भुक्त्वा तु कथयिष्यामि निर्विशंकं विभुंक्ष्व तत्॥अथासौ जलसं
स्कारं कृतवान् गौतमो मुनिः ॥ १६१ ॥ आरक्तसुस्निग्धसुसूक्ष्मगात्राननेकधाधौतसुशोभितांगान् ॥ तडागतोयैः कतबीजघर्षितैर्विशोधितैस्तैः
करकानपूरयत् ॥ १६२ ॥ नद्याः सैकतवेदिकां नवतरां संछाद्य सूक्ष्मांबरैः शुद्धैः श्वेततरैरथोपरि घटांस्तोयेन पूर्णान्क्षिपेत् ॥ लिप्त्वा नालक
जातिमास्तपुटकं तत्कौलकं कारिकाचूर्णं चन्दनचन्द्ररश्मिविशदां मालां पुटांतं क्षिपेत् ॥ यामस्यापि पुनश्च वारिवसनेनाशोध्य कुम्भेन
तच्चंद्रग्रन्थिमथो निधाय बकुलं क्षिप्त्वा तथा पाटलम्॥१६३॥शेफालीस्तबकमथो जलं च तत्र विन्यस्य प्रथमत एव तोयशुद्धिम्॥कृत्वाथो मृदुतर
सूक्ष्मवस्त्रखण्डेनावेष्टेत्सृणिकमुखं च सूक्ष्मचन्द्रम् ॥ १६४ ॥ अनातपप्रदेशे तु निधाय करकानथ ॥ मन्दवातसमोपेते सूक्ष्मव्यजन
वीजिते ॥ १६५ ॥ सिंचच्छीतैर्जलैश्चापि वासितैः सृणिकामपि ॥ संस्कृताः स्वायतास्तत्र नरा नार्योऽथवा नृपाः ॥ १६६ ॥ तत्कन्या

वा क्षालितांगा धौतपादास्सुवाससः ॥ मधुपिंगमनिर्यासमसांद्रमगुरूद्भवम् ॥ १६७ ॥ बाहुमूले च कंठे च विलिप्यासांद्रमेव च ॥ मस्तके
जावकं न्यस्य पंचगंधविलेपनम् ॥ १६८ ॥ पुष्पनद्धसुकेशास्तु ताः शुभाः स्युः सुनिर्मलाः ॥ एवमेवार्चिता नार्य आप्तकुंकुमविग्रहाः ॥ १६९ ॥
युवत्यश्चारुसर्वांग्यो नितरां भूषणैरपि ॥ एतादृग्वनिताभिर्वा नरैर्वा दापयेज्जलम् ॥ १७० ॥ तेऽपि प्रादानसमये सूक्ष्मवस्त्राल्पवेष्टनम् ॥ अथ
वामकरे न्यस्य करकं प्रेक्ष्य तत्र हि ॥ १७१ ॥ दोरिकान्यस्तमुन्मुच्य ततस्तोयं प्रदापयेत् ॥ एवं स कारयामास गौतमो भगवान्मुनिः ॥ १७२ ॥
महेशादिषु सर्वेषु भुक्तवत्सु महात्मसु ॥ प्रक्षालितांघ्रिहस्तेषु गंधोद्वर्तितपाणिषु ॥ १७३ ॥ उच्चासनसमासीने देवदेवे महेश्वरे ॥ अथ नीचसमासीना
देवाः सर्षिगणास्तथा ॥ १७४ ॥ मणिपात्रेषु संवेष्ट्य पूगखंडान्सुधूपितान् ॥ अकोणान्वर्तुलान्स्थूलानसूक्ष्मानकृशानपि ॥ १७५ ॥ श्वेतपत्राणि
संशोध्य क्षिप्त्वा कर्पूरखंडकम् ॥ चूर्णं च शंकरायाथ निवेदयति गौतमे ॥ १७६ ॥ गृहाण देव तांबूलमित्युक्तवचने मुनौ ॥ कपे गृहाण तांबूलं
प्रयच्छ मम खंडकान् ॥ १७७ ॥ उवाच वानरो नास्ति मम शुद्धिर्महेश्वर ॥ अनेकफलभोक्तृत्वाद्वानरस्तु कथं शुचिः ॥ १७८ ॥ तच्छ्रुत्वा तु
विरूपाक्षः प्राह वानरसत्तमम् ॥ मद्वाक्यादखिलं शुद्ध्येन्मद्वाक्यादमृतं विषम् ॥ १७९ ॥ मद्वाक्यादखिला वेदा मद्वाक्याद्देवतादयः ॥ मद्वाक्याद्धर्मविज्ञानं
मद्वाक्यान्मोक्ष उच्यते ॥ १८० ॥ पुराणान्यागमाश्चैव स्मृतयो मम वाक्यतः ॥ अतो गृहाण तांबूलं मम देहि सुखंडकान् ॥ १८१ ॥
हरिर्वामकरेणाधात्तांबूलं पूगखंडकम् ॥ ततः पत्राणि संगृह्य तस्मै खंडान्समर्पयत् ॥ १८२ ॥ कर्पूरमग्रतो दत्तं गृहीत्वाभक्षयच्छिवः ॥ देवे तु
कृततांबूले पार्वती मंदराचलात् ॥ १८३ ॥ जयाविजययोर्हस्तं गृहीत्वायान्मुनेर्गृहम् ॥ देवपादौ ततो नत्वा विनम्रवदनाभवत् ॥ १८४ ॥ उन्नमय्य
मुखं तस्या इदमाह त्रिलोचनः ॥ त्वदर्थं देवदेवेशि अपराधः कृतो मया ॥ १८५ ॥ यत्त्वां विहाय भुक्तं हि तथान्यच्छृणु सुंदरि ॥ यत्त्वां स्वमंदिरे
त्यक्त्वा महदेनो मया कृतम् ॥ १८६ ॥ क्षंतुमर्हसि देवेशि त्यक्तकोपा विलोकय ॥ न बभाषेऽप्येवमुक्ता सारुंधत्या विनिर्ययौ ॥ १८७ ॥ निर्गच्छंतीं मुनिर्ज्ञात्वा
दंडवत्प्रणनाम ह ॥ अथोवाच शिवा तं च गौतम त्वं किमिच्छसि ॥ १८८ ॥ अथाह गौतमो देवीं पार्वतीं प्रेक्ष्य सस्मिताम् ॥ कृतकृत्यो
भवेयं वै भुक्तायां मद्गृहे त्वयि ॥ १८९ ॥ ततः प्राह शिवा विप्रं गौतमं रचितांजलिम् ॥ भोक्ष्यामि त्वद्गृहे विप्र शंकरानुमतेन वै ॥ १९० ॥ अथ
गत्वा शिवं विशे लब्धानुज्ञस्त्वरागतः ॥ भोजयामास गिरिजां देवीं चारुंधतीं तथा ॥ १९१ ॥ भुक्त्वाथ पार्वती सर्वगंधपुष्पाद्यलंकृता ॥ सहानुचरकन्याभिः
सहस्राभिर्हरं ययौ ॥ १९२ ॥ अथाह शंकरो देवीं गच्छ गौतममंदिरम् ॥ संध्योपास्तिमहं कृत्वा ह्यागमिष्ये तवांतिकम् ॥ १९३ ॥ इत्युक्त्वा

प्रययौ देवी गौतमस्यैव मंदिरम् ॥ संध्यावदनकामास्तु सर्व एव विनिर्गताः ॥१९४॥ कृतसंध्यास्तडागे तु महेशाद्याश्च कृत्स्नशः ॥ अथोत्तरमुखः
शंभुर्न्यास कृत्वा जजाप ह ॥ १९५ ॥ अथ विष्णुर्महातेजा महेशमिदमब्रवीत् ॥ सर्वैर्नमस्यते यस्तु सर्वैरेव समर्च्यते ॥ १९६॥ हूयते सर्वयज्ञेषु
स भवान्किं जपिष्यति॥ रचितांजलयः सर्वे त्वामेवैकमुपासिते ॥ १९७॥ स भवान्देवदेवेशः कस्मै विरचितांजलिः ॥ नमस्कारादिपुण्यानां फल
दस्त्वं महेश्वर ॥१९८॥तव कः फलदो वंद्यः को वा त्वत्तोऽधिको वद ॥ तच्छ्रुत्वा शंकरः प्राह देवदेवं जनार्दनम्॥१९९॥ ध्याये न किंचिद्गोविंद
नमस्ये ह न किंचन ॥ किंतु नास्तिकजंतूनां प्रवृत्त्यर्थमिदं मया ॥२००॥ दर्शनीयं हरे चैतदन्यथा पापकारिणः॥ तस्माल्लोकोपकारार्थमिदं सर्वं
कृतं मया ॥ २०१ ॥ ओमित्युक्त्वा हरिरथ तं नत्वा समतिष्ठत ॥अथ ते गौतमगृहं प्राप्ता देवर्षयस्तदा॥२०२॥सर्वे पूजामथो चक्रुर्देवदेवाय शूलिने॥
देवो हनूमता सार्द्धं गायन्नास्ते मुनीश्वर ॥ २०३ ॥ पञ्चाक्षरीं महाविद्यां सर्व एव तदाऽजपन् ॥ हनुमत्करमालंब्य देवाभ्यां संगतो हरः ॥ २०४ ॥
एकशय्यासमासीनौ तावुभौ देवदंपती ॥ गायन्नास्ते च हनुमांस्तुंबुरुप्रमुखास्तथा ॥ २०५ ॥ नानाविधविलासांश्च चकार परमेश्वरः ॥ आहूय
पार्वतीमीश इदं वाक्यमुवाच ह ॥ २०६ ॥रचयिष्यामि धम्मिल्लमेहि मत्पुरतः शुभे ॥ देव्याह न च युक्तं तद्भर्त्रा शुश्रूषणं स्त्रियः ॥२०७ ॥ केश
प्रसाधनकृतावनर्थांतरमापतेत् ॥ केशप्रसाधने देव तत्त्वं सर्वं न चेप्सितम् ॥ २०८ ॥ अथ बंधकृते पश्चादंसप्रांतप्रमार्जनम् ॥ ततश्चरमसंलग्न
केशपुष्पादिमार्जनम् ॥ २०९ ॥ एतस्मिन्वर्तमाने तु महात्मानो यदागमन् ॥ तदा किमुत्तरं वाच्यं तव देवादिवंदित ॥ २१० ॥ नायांति चेदथ
विभो भीतिर्नाशमुपैष्यति ॥ एवं हि भाषमाणां तां करेणाकृष्य शंकरः ॥ २११ ॥ स्वोर्वोः संस्थापयित्वैव विस्रस्य कचबंधनम् ॥ विभज्य च
कराभ्यां स प्रससार नखैरपि ॥ २१२ ॥विष्णुदत्तां पारिजातस्रजं कचगतामपि ॥ कृत्वा धम्मिल्लमकरोदथ मालां करागताम् ॥ २१३ ॥
मल्लिकास्रजमादाय बबंध कचबंधने ॥ कल्पप्रसूनमालां च ब्रह्मदत्तां महेश्वरः ॥ २१४ ॥ पार्वतीवसने गूढगन्धाढ्यं च समाददात् ॥ अथांसपृष्ठ
संलग्नमार्जनं कृतवान् विभुः ॥ २१५ ॥ श्लथन्नीवेरधो देव्या वस्त्रवेष्टादधोगतः ॥ किमिदं देवि चेत्युक्त्वा नीवीबंधं चकार ह ॥ २१६ ॥ नासा
भूषणमेतत्ते सत्यमेव वदामि ते ॥ ततः प्राह शिवा शंभुं स्मित्वा पर्वतनंदिनी ॥ २१७ ॥ अहो त्वन्मंदिरे शंभो सर्ववस्तु समृद्धिमत् ॥ पूर्वमेव
मया सर्वं ज्ञातप्रायमभूत्किल ॥ २१८ ॥ सर्वद्रविणसंपत्तिर्भूषणैरवगम्यते ॥ शिरो विभूषितं देव ब्रह्मशीर्षस्य मालया ॥ २१९ ॥ नरकस्य तथा
माला वक्षस्थलविभूषणम् ॥शेषश्च वासुकिश्चैव सविषौ तव कङ्कणौ ॥२२० ॥ दिशोंऽबरं जटाः केशा भसितं चांगरागकम्॥ महोक्षो वाहनं गोत्रं

कुलं चाज्ञातमेव च ॥ २२१ ॥ ज्ञायेते पितरौ नैव विरूपाक्षं तथा वपुः ॥ एवं वदंतीं गिरिजां विष्णुः प्राहातिकोपनः ॥२२२॥ किमर्थं निंदसे देवि देवदेवं जगत्पतिम् ॥ दुष्प्राणा न प्रिया भद्रे तव नूनमसंयमात् ॥ २२३ ॥ यत्रेशनिंदनं भद्रे तत्र नो मरणव्रतम् ॥ इत्युक्त्वाथ नखाभ्यां हि हरिश्छेत्तुं शिरो गतः ॥२२४ ॥ महेशस्तत्करं गृह्य प्राह मा साहसं कृथाः ॥ पार्वतीवचनं सर्वं प्रियं मम न चाप्रियम् ॥२२५॥ समाप्रियं हृषीकेश कर्तुं यत्किंचिदिष्यते ॥ ओमित्युक्त्वाथ भगवांस्तूष्णींभूतोऽभवद्धरिः॥ २२६ ॥ हनुमानथ देवाय व्यज्ञापयदिदं वचः ॥ अर्थयामि विनिष्कामं मम पूजाव्रतं तथा ॥ २२७ ॥ पूजार्थमप्यहं गच्छे मामनुज्ञातुमर्हसि ॥ तच्छ्रुत्वा शंकरो देवः स्मित्वा प्राह कपीश्वरम् ॥ २२८ ॥ कस्य पूजा क्व वा पूजा किं पुष्पं किं दलं वद ॥ को गुरुः कश्च मंत्रस्ते कीदृशं पूजन तथा ॥२२९॥ एवं वदति देवेशे हनुमान्नीतिसंयुतः ॥ वेपमान समस्तांग स्तोतुमेवं प्रचक्रमे ॥ २३० ॥ नमो देवाय महते शंकरायामितात्मने ॥योगिने योगधात्रे च योगिनां गुरवे नमः ॥ २३१ ॥योगगम्याय देवाय ज्ञानिनां पतये नमः ॥ वेदानां पतये तुभ्यं देवानां पतये नमः ॥२३२॥ ध्यानाय ध्यानगम्याय ध्यातॄणां गुरवे नमः ॥ अष्टमूर्ते नमस्तुभ्यं पशूनां पतये नमः ॥ २३३ ॥ अंबकाय त्रिनेत्राय सोमसूर्याग्निचक्षुषे ॥ सुभृङ्गराजधत्तूरद्रोणपुष्पप्रियस्य ते ॥ २३४ ॥ बृहतीपूगपुन्नागचपकादिप्रियाय च ॥ नमस्तेऽस्तु नमस्तेऽस्तु भूय एव नमोनमः ॥ २३५ ॥ शिवो हरिमथ प्राह मा भैषीर्वद मेऽखिलम् ॥ ततस्त्यक्त्वा भयं प्राह हनुमान् वाक्यकोविदः ॥ २३६ ॥ शिवलिंगार्चनं कार्यं भस्मोद्धूलितदेहिना ॥ दिवा संपादितैस्तोयैः पुष्पाद्यैरपि तादृशैः ॥ ॥ २३७ ॥ देव विज्ञापयिष्यामि शिवपूजाविधिं शुभम् ॥ सायंकाले तु संप्राप्ते अशिरःस्नानमाचरेत् ॥ २३८ ॥ क्षालितं वसनं शुष्कं धृत्वाचम्य त्रिरन्यधीः ॥ अथ भस्म समादाय आग्नेयं स्नानमाचरेत् ॥ २३९ ॥ प्रणवेन समामंत्र्य अष्टवारमथापि वा ॥ पञ्चाक्षरेण मन्त्रेण नाम्ना वा येन केनचित् ॥ २४० ॥ सप्ताभिमंत्रितं भस्म दर्भपाणिः समाहरेत् ॥ ईशानः सर्वविद्यानामुक्त्वा शिरसि पातयेत् ॥ २४१ ॥ तत्पुरुषाय विद्महे मुखे भस्म प्रसेचयेत् ॥ अघोरेभ्योऽथ घोरेभ्यो भस्म वक्षसि निक्षिपेत् ॥ २४२ ॥ वामदेवाय नमः इति गुह्यस्थाने विनिक्षिपेत् ॥ सद्योजातं प्रपद्यामि निक्षिपेदथ पादयोः ॥ २४३ ॥ उद्धूलयेत्समस्तांगं प्रणवेन विचक्षणाः ॥ त्रैवर्णिकानामुदितः स्नानादिविधिरुत्तमः ॥ २४४ ॥ शूद्रादीनां प्रवक्ष्यामि यदुक्तं गुरुणा तथा ॥ शिवेति पदमुच्चार्य भस्म संमन्त्रयेत्सुधीः ॥ २४५ ॥ सप्त वारमथादाय शिवायेति शिरस्यथ ॥ शंकराय मुखे प्रोक्तं सर्वज्ञाय हृदि क्षिपेत् ॥ २४६ ॥ स्थाणवे नम इत्युक्त्वा मुखे चापि स्वयंभुवे ॥

उच्चार्य पादयोः क्षिप्त्वा भस्म शुद्धमतः परम् ॥ २४७ ॥ नमः शिवायेत्युच्चार्य सर्वांगोद्धूलनं स्मृतम् ॥ प्रक्षाल्य हस्तावाचम्य दर्भपाणिः
समाहितः ॥ २४८ ॥ दर्भाभावे सुवर्णं स्यात्तदभावे गवालुकाः ॥ तदभावे तु दूर्वाः स्युस्तदभावे तु राजतम् ॥ २४९ ॥ संध्योपास्तिं जपं
देव्याः कृत्वा देवगृहं व्रजेत् ॥ देववेदीमथो वापि कल्पितं स्थंडिलं तु वा ॥ २५० ॥ मृण्मयं कल्पितं शुद्धं पद्मादिरचनायुतम् ॥ चातुर्वर्णकरं
गैश्च श्वेतेनैकेन वा पुनः ॥ २५१ ॥ विचित्राणि च पद्मानि स्वस्तिकादि तथैव च ॥ उत्पलादिगदाशंखत्रिशूलडमरूंस्तथा ॥ २५२ ॥ शरोक्तपंच
प्रासादं शिवलिंगमथैव च ॥ सर्वकामफलं वृक्षं कुलकं कोलकं तथा ॥२५३॥ षट्कोणं च त्रिकोणं च नवकोणमथापि वा ॥ कोणे द्वादशकांदोलापा
दुकाव्यजनानि च ॥२५४॥ चामरच्छत्रयुगलं विष्णुब्रह्मादिकांस्तथा॥चूर्णैर्विरचयेद्वेद्यां धीमान्देवालयेऽपि वा॥२५५॥ यत्रापि देवपूजा स्यात् तत्रैवं
कल्पयेद्बुधः ॥ स्वहस्तरचितं मुख्यं क्रीतं चैव तु मध्यमम् ॥ २५६ ॥ याचितं तु कनिष्ठं स्याद्बलात्कारमथोऽधमम् ॥ अर्हेषु यस्त्वनर्हेषु
बलात्कारात्तु निष्फलम् ॥ २५७ ॥ रक्तशालिजपाशाणकलमासितरक्तकैः तंदुलैर्व्रीहिमात्रोत्थैः कणैश्चैव यथाक्रमम् ॥ २५८ ॥ उत्तमैर्मध्यमै
श्चैव कनिष्ठैरधमैस्तथा ॥ पद्मादिस्थापनैरेव तत्सम्यग्यागमाचरेत्॥ २५९ ॥ प्रागुत्तरमुखो वापि यदि वा प्राङ्मुखो भवेत् ॥ आसनं च प्रवक्ष्यामि
यथादृष्टं यथा श्रुतम् ॥ २६० ॥ कौशं चार्मं चैलतल्पे दारवं तालपत्रकम् ॥ कांबलं कांचनं चैव राजतं ताम्रमेव च ॥ २६१ ॥ गोकरीषार्कजै
र्वापि ह्यासनं परिकल्पयेत् ॥ वैयाघ्रं रौरवं चैव हारिण मार्गमेव च॥२६२॥ चार्मं चतुर्विधं ज्ञेयमथ बंधुकमेव च ॥ यथासंभवमेतेषु ह्यासनं परिक
ल्पयेत् ॥ २६३ ॥ कृतपद्मासनो वापि स्वस्तिकासन एव च ॥ दर्भभस्मसमासीनः प्राणानायम्य वाग्यतः ॥ २६४ ॥ तावत्स देवतारूपो ध्यानं
चांतः समाचरेत् ॥ शिखांते द्वादशांगुल्ये स्थितं सूक्ष्मतनुं शिवम् ॥ २६५॥ अंतश्चरंतं भूतेषु गुहायां विश्वतोमुखम् ॥ सर्वाभरणसंयुक्तमणिमादिगुणा
न्वितम् ॥ २६६ ॥ ध्यात्वा तं धारयेच्चित्ते तद्दीप्त्या पूरयेत्तनुम् ॥ तया दीप्त्या शरीरस्थं पापं नाशमुपागतम् ॥ २६७ ॥ स्वर्णपादैरसंपर्काद्रक्त
श्वेतं यथा भवेत् ॥ तद्द्वादशदलावृत्तमष्ट पंच त्रिरेव वा ॥ २६८ ॥ परिकल्प्यासनं शुद्धं तत्र लिंगं निधाय च ॥गुहास्थितं महेशानं लिंगेशं चिंत
येत्तथा ॥२६९॥ शोधिते कलशे तोयं शोधितं गंधवासितम् ॥ सुगन्धपुष्पं निक्षिप्य प्रणवेनाभिमंत्रितम् ॥ २७० ॥ प्राणायामश्च प्रणवः शूद्रेषु न
विधीयते ॥ प्राणायामपदे ध्यानं शिवेत्योंकारमंत्रितम्॥२७१॥गन्धपुष्पाक्षतादीनि पूजाद्रव्याणि यानि च ॥ तानि स्थाप्य समीपे तु ततः संकल्प
माचरेत् ॥२७२॥शिवपूजां करिष्यामि शिवतुष्ट्यर्थमेव च॥इति संकल्पयित्वा तु तत आवाहनादिकम्॥२७३॥ कृत्वा तु स्नानपर्यंतं ततः स्नानं प्रक

लपयेत्॥नमस्तेत्यादिमंत्रेण शतरुद्रविधानतः॥२७४॥अविच्छिन्ना तु या धारा मुक्तिधारेति कीर्तिता॥तया यः स्नापयेन्मासं जपन्रुद्रमुखांश्च वा॥२७५॥
एकवारं त्रिवारं च पंच सप्त नवापि वा ॥ एकादश तथा वारमथैकादशधान्वितम् ॥ २७६ ॥ मुक्तिस्नानमिदं ज्ञेयं मासं मोक्षप्रदायकम् ॥ शैवया
विद्यया स्नानं केवलं प्रणवेन वा २७७ ॥ मृण्मयैर्नालिकेरस्य शकलैश्चोर्मिभिस्तथा ॥ कांस्येन मुक्ताशुक्त्या च पुष्पादिकेसरेण वा ॥ २७८ ॥
स्नापयेद्देवदेवेशं यथासंभवमीरितैः ॥ शृंगस्य च विधिं वक्ष्ये स्नानयोग्यं यथा भवेत् ॥२७९॥पूर्वमंतस्तु संशोध्य बहिरंतस्तु शोधयेत् ॥ सुस्निग्धं
लघु कृत्वाथ नांगं छिंद्यात्कथंचन ॥ २८० ॥ नीचैकदेशविन्यस्तद्वारद्रोण्या सुहृत्तया ॥ कृशानुयुक्तं स्नानं तु देवाय परिकल्पयेत् ॥ २८१ ॥
एवं गवयशृंगस्य जलपूर्तिरथोच्यते ॥ द्वारे निषिद्धलोहार्द्धसंधिद्वारासमन्विते ॥ २८२ ॥ योगवक्रं नागदंडं नागाकारं प्रकल्पयेत् ॥ फलस्थाने तु
चषकं दंडेन समरंध्रकम् ॥ २८३ ॥ तत्रैव पातयेत्तोयं मूर्द्धयंत्रघटे स्थितम् ॥ पातयेदथ चान्येन वामेनैव करेण वा ॥ २८४ ॥ मुक्तिधारा कृता तेन
पवित्रं पापनाशनम् ॥ एवं संस्नाप्य देवेशं पंचगव्यैस्तथैव च ॥ २८५ ॥ पञ्चामृतैरथ स्नाप्य मधुरत्रितयेन च ॥ विभूष्य भूषणैर्देवं पुनः स्नाप्य
महेश्वरम् ॥२८६॥ शीतोपचारं कृत्वाथ तत आचमनादिकम् ॥ वस्त्रं तथोपवीतं च गंधद्रव्यकमेव च॥२८७॥ कर्पूरमगरुं चापि पाटीरमथवा भवेत्॥
उभयमिश्रितं चापि शिवलिंगं प्रपूजयेत् ॥ कृत्स्नं पीठं गंधपूर्णं यद्वा विभवसारतः ॥ तूष्णीमथोपचारं वा कालीयं पुष्पमेव च॥२८८॥श्रीपत्रसरु
चित्याज्यं यथाशक्त्यखिलं यथा॥अनेकद्रव्यधूपं च गुग्गुलं केवलं तथा ॥:२८९ ॥ कपिलाघृतसंयुक्तं सर्वधूपं प्रशस्यते॥धूपं दत्वा यथाशक्ति कपि
लाघृतदीपकान्॥२९०॥अथवा पूजामात्रेण दीपान्दत्वोपहारकम्॥नैवेद्यमुपपन्नं च दत्वा पुष्पसमन्वितम्॥२९१॥मुखशुद्धिं ततः कृत्वा दत्त्वा तांबूल
मादरात्॥प्रदक्षिणनमस्कारौ पूजैवं हि समाप्यते॥२९२॥गीत्यंगपंचकं पश्चात्तानि विज्ञापयामि ते॥गीतिर्वाद्यं पुराणं च नृत्यं हासोक्तिरेव च॥२९३॥
नीराजनं च पुष्पाणामंजलिश्चाखिलार्पणम् ॥ क्षमापनं चोद्वसनं प्रोक्तं पंचोपचारकम् ॥ २९४ ॥ भूषणं च तथा छत्रं चामरव्यजने अपि ॥ उप
वीतं च कैंकर्यं षोडशानुपचारकान् ॥ २९५ ॥ द्वात्रिंशदुपचारैस्तु यः समाराधयेच्छिवम् ॥ एकेनाह्ना समस्तानां पातकानां क्षयो भवेत् ॥ २९६॥
एतच्छ्रुत्वा हनुमतो वचनं प्राह शंकरः ॥ एवमेतत्कपिश्रेष्ठ यदुक्तं पूजनं मम ॥ २९७ ॥ सारभूतमहं तुभ्यमुपदेक्ष्यामि सांप्रतम् ॥ आराधनं यथा
लिंगे विस्तरेण त्वयोदितम् ॥ २९८ ॥ मत्पादयुगलं प्रार्च्य पूजाफलमवाप्नुहि ॥ ततः प्राह कपिश्रेष्ठो देवदेवमुमापतिम् ॥ २९९ ॥ गुरुणा लिंगपू
जैव नियता परिकल्पिता ॥ तां करोमि पुरा देव पश्चात्त्वत्पादपूजनम् ॥ ३०० ॥ इत्युक्त्वेश नमस्कृत्य शिवलिंगार्चनाय च ॥ सरःस्तीरमागत्य

कृत्वा सैकतवेदिकाम् ॥ ३०१ ॥ तालपत्रैर्विरचितमासनं पर्यकल्पयत् ॥ प्रक्षाल्य पादौ हस्तौ च समाचम्य समाहितः ॥ ३०२ ॥ भस्मस्नानमथो
चक्रे पुनराचम्य वाग्यतः ॥ देववेद्यामथो चक्रे पद्मं च सुमनोहरम् ॥ ३०३ ॥ अनंतरं तालपत्रे पद्मासनगतः कपिः ॥ प्राणानायम्य संन्यस्य
शुक्लध्यानसमन्वितः ॥ ३०४ ॥ प्रणम्य गुरुमीशानं जपन्नासीदतः परम् ॥ अथ देवार्चनं कर्तुं यत्नमास्थितवान्कपिः ॥ ३०५ ॥ पलाशपत्रपुटकद्व
यानीतजलं शुचि ॥ शिरः कमंडलुगतं निधायाग्निनिमंत्रितम् ॥ ३०६ ॥ आवाहनादि कृत्वाथ स्नानपर्यंतमेव च ॥ अथ स्नापयितुं देवमादाय कर
संपुटे ॥ ३०७ ॥ कृत्वा निरीक्षणं देवपीठं नो दृष्टवान्कपिः ॥ लिङ्गमात्रं करगतं दृष्ट्वा भीतिसमन्वितः ॥ ३०८ ॥ इदमाह महायोगी किंवा पापं
मया कृतम् ॥ यदेतत्पीठरहितं शिवलिङ्गं करस्थितम् ॥ ३०९ ॥ ममाद्य मरणं सिद्धं न पीठं चागमिष्यति ॥ अथ रुद्रं जपिष्यामि तदायाति महे
श्वरः ॥ ३१० ॥ इति निश्चित्य मनसा जजाप शतरुद्रियम् ॥ यदा तु न समायातो महेशोऽथ कपीश्वरः ॥ ३११ ॥ रुद्रं न्यपातयद्भूमौ वीरभद्रः
समागतः ॥ किमर्थं रुद्यते भद्र रुदिते कारणं वद ॥ ३१२ ॥ तच्छ्रुत्वा प्राह हनुमान्वीरभद्रं मनोगतम् ॥ पीठहीनमिदं लिंगं पश्य मे पाप
संचयम् ॥ ३१३ ॥ वीरभद्रस्ततः प्राह श्रुत्वा कपिसमीरितम् ॥ यदि नायाति पीठं ते लिंगे मा साहसं कुरु ॥ ३१४ ॥ दाहयिष्या
म्यहं लोकान्यदि नायाति पीठकम् ॥ पश्य दर्शय मे लिंगं पीठं चात्रागतं न वा ॥ ३१५ अथ दृष्ट्वा वीरभद्रो लिंगे पीठमनागतम् ॥
दग्धुकामोऽखिलाँल्लोकान्वीरभद्रः प्रतापवान् ॥ ३१६ ॥ अनलं भुवि चिक्षेप क्षणाद्दग्धा मही तदा ॥ अथ सप्ततलान्दग्ध्वा पुनरूर्द्ध्वमव
र्तत ॥ ३१७ ॥ पश्चोर्द्ध्वलोकानदहज्जनलोकनिवासिनः ॥ ललाटनेत्रसंभूतं नखेनादाय चानलम् ॥ ३१८ ॥ जंबीरफलसंकाशं कृत्वा कर
तले विभुः ॥ तपः सत्यं च संदग्धुमुद्यतोऽभून्मुनीश्वरः ॥ ३१९ ॥ ततस्तु मुनयो दृष्ट्वा तपोलोकनिवासिनः ॥ दग्धुकामं वीरभद्रं गौतमा
श्रममागताः ॥ ३२० ॥ न दृष्ट्वा तत्र देवेशं शंकरं स्वात्मनि स्थितम् ॥ अस्तुवन्भक्तिसंयुक्ताः स्तोत्रैर्वेदसमुद्भवैः ॥ ३२१ ॥ ॐ वेदवेद्याय देवाय तस्मै
शुद्धप्रभाचिन्त्यरूपाय कस्मै ॥ ब्रह्माद्यधीशाय सृष्ट्यादिकर्त्रे विष्णुप्रियायार्तिहंत्रेऽतकर्त्रे ॥ ३२२ ॥ नमस्तेऽखिलाधीश्वरायांबराय नमस्ते चरस्थावर
व्यापकाय ॥ नमो वेदगुह्याय भक्तप्रियाय नमः पाकभोक्त्रे मखेशाय तुभ्यम् ॥ ३२३ ॥ नमस्ते शिवायादिदेवाय कुर्मो नमो व्यालयज्ञोपवीतप्रधर्त्रे ॥
नमस्ते सुराबिन्दुवर्षापनाय त्रयीमूर्तये कालकालाय नाथ ॥ ३२४ ॥ धारित्रीमरुद्व्योमतोयेंदुवह्निप्रभामंडलात्माष्टधामूर्तिधर्त्रे ॥ शिवायाशिवघ्नाय
वीराय भूयात्सदा नः प्रसन्नो जगन्नाथकेज्यः ॥ ३२५ ॥ कलानाथभालाय आत्मा महात्मा मनो ह्यग्रयानो निरूप्यो न वाग्भिः ॥ जगज्जाड्यविध्वंसनो

भुक्तिमुक्तिप्रदः स्तात्प्रसन्नः सदा शुद्धकीर्तिः॥३२६॥यतः संप्रसूतं जगज्जातमीशात्स्थितं येन रक्षावता भावितं च ॥ लयं यास्यते यत्र वाचां विदूरे स वै नः प्रसन्नोऽस्तु कालत्रयात्मा॥ ६२७ ॥ यदादिं च मध्यं तथांतं न केऽपि विजानन्ति विज्ञा अपि स्वानुमानाः॥ स वै सर्वमूर्तिः सदा नो विभूत्यै प्रसन्नोऽस्तु किं ज्ञापयामोऽत्र कृत्यम् ॥ ३२८ ॥ एतां स्तुतिमथाकर्ण्य भगनेत्रप्रदः शिवः ॥ विष्णुमाह मुनीनेतानानयस्व मदंतिकम् ॥ ३२९॥ अथ विष्णुः समागत्य तपोलोकनिवासिनः ॥ मुनीन्सांत्वय्य विश्वेशं दर्शयामास शंकरम् ॥ ३३०॥ तानाह शंकरो वाक्यं किमर्थं यूयमागताः ॥ तपोलोकाद्भूमिलोकं मुनयो मुक्तकिल्बिषाः॥३३१॥तच्छ्रुत्वा शूलिनो वाक्यं प्रोचुस्ते मुनिसत्तमाः ॥ देव द्वादशलोकानां दृश्यंते भस्मराशयः ॥३३२ ॥ स्थितमेकं वनमिदं पश्य तल्लोकसंक्षयम् ॥ तच्छ्रुत्वा गिरिशः प्राह तान्मुनीनूर्द्धरेतसः ॥ ३३३॥ भूर्लोकस्य तु संदाहे पातालानां तथैव च॥सन्देहो नास्ति मुनयः स्थितानां नो रहःस्थले ॥ ३३४ ॥ ऊर्द्धपंचकलोकानां दाहे संदेह एव नः ॥ कथमंगारवृष्टिश्च कथं नो वा महाध्वनिः ॥ ३३५ ॥ तदाकर्ण्य विभोर्वाक्यं शंकरस्य मुनीश्वराः ॥ प्रोचुः प्रांजलयो देवं ब्रह्मादिसुरसंगतम् ॥ ३३६ ॥ भीतिरस्माकमधुना वर्तते वीरभद्रतः ॥ स एवांगारवृष्टिं च पिपासुरपिबद्विभोः ॥ ३३७ ॥ देवोऽथ वीरमाहूय किं वीरेत्यब्रवीद्वचः ॥वीरोऽप्याह कपेर्लिंगे पीठाभावादिदं कृतम् ॥ ३३८ ॥ तच्छ्रुत्वाह शिवो देवो मुनींस्तान्भयविह्वलान् ॥ कपेश्चित्तं परिज्ञातुं मया कृतमिदं द्विजाः ॥ ३३९ ॥ मा भष्ट भवतां सौख्यं सदा संपादयाम्यहम् ॥ इत्युक्त्वा तु यथापूर्वं देवदेवः कृपानिधिः ॥ ३४० ॥ दग्धानप्यखिलाँल्लोकान्पूर्वतः शोभनान्विभुः ॥ कल्पयामास विश्वात्मा वीरभद्रमथाब्रवीत् ॥ ३४१ ॥ साधु वत्स यतो भद्रं भक्तानामीहसे सदा ॥ ततस्ते विपुला कीर्तिर्लोके स्थास्यति शाश्वती ॥ ३४२ ॥ इत्युक्त्वालिंग्य शिरसि समाघ्राय महेश्वरः ॥ तांबूलं वीरभद्राय दत्तवान्प्रीतमानसः ॥ ३४३ ॥ अथासौ हनुमानीशपूजनं कृतवान्यथा ॥ समाप्तायां तु पूजायां हनुमान्प्रीतमानसः ॥ ३४४ ॥ एकं वनचरं तत्र गंधर्वं सविपंचकम् ॥ ददर्श तमथाभ्याह वीणा मे दीयतामिति ॥ ३४५ ॥ गंधर्वोऽप्याह न मया त्याज्या वीणा प्रिया मम ॥ ममापीष्टेह गंधर्व वीणेत्याह कपीश्वरः ॥ ३४६ ॥ यदा न दत्ते गंधर्वो वल्लकीं कपये प्रियाम् ॥ तदा मुष्टिप्रहारेण गंधर्वः पातितः क्षितौ ॥ ३४७ ॥ वीणामादाय महतीं स्वरतंतुसमन्विताम् ॥ हनुमान्वानरश्रेष्ठो गायन्प्रागाच्छिवांतिकम् ॥ ॥ ३४८ ॥ ततो गानेन महता प्रसाद्य जगदीश्वरम् ॥ बृहतीकुसुमैः शुद्धैर्देवपादावपूजयत् ॥३४९॥ततः प्रसन्नो विश्वात्मा मुनीनां सन्निधौ तदा॥ दैत्यानां देवतानां च नृपाणां शंकरोऽपि च ॥३५० ॥ तस्मै वरमथ प्रादात्कल्पांतं जीवितं पुनः॥समुद्रलंघने शक्तिं शास्त्रज्ञत्वं बलोन्नतिम्॥३५१॥

एवं दत्तं वरं प्राप्य महेशेन महात्मना ॥ प्रत्यक्षं मम विप्रेंद्र हनुमान्हर्षमागतः॥३९२॥समस्तभूषासुविभूषितांगः स्वदीप्तिमदीकृतदेवदीप्तिः ॥ प्रसन्न
मूर्तिस्तरुणः शिवांशः संभावयामास समस्तदेवान् ॥ ३९३ ॥ आज्ञप्तो हनुमांस्तत्र मत्सेवायै मुनीश्वरः ॥ महेशेनाहमप्येनं शशिमौलिमवैमि
च ॥ ३९४ ॥ किं बहूक्तेन विप्रर्षे यादृशो वानरेश्वरः ॥ बुद्धौ न्याये च वै धैर्ये तादृगन्योऽस्ति न क्वचित्॥३९५ ॥इति ते सर्वमाख्यातं चरितं पाप
नाशनम्॥पठतां शृण्वतां चैव गच्छ विप्र यथासुखम्॥३९६॥तच्छ्रुत्वा रामभद्रस्य रघुनाथस्य धीमतः॥वचनं दक्षिणीकृत्य नत्वा चागां यथागतः॥
॥ ३९७ ॥एतत्तेऽभिहितं विप्र चरितं च हनूमतः ॥ सुखदं मोक्षदं सारं किमन्यच्छ्रोतुमिच्छसि ॥ ३९८ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदु
पाख्याने तृतीयपादे हनुमच्चरित्रं नाम एकोनाशीतितमोऽध्यायः ॥ ७९ ॥ सूत उवाच ॥ श्रुत्वा तु नारदो विप्राः कुमारवचनं मुनिः ॥ यत्प
प्रच्छ पुनस्तच्च युष्मभ्यं प्रवदाम्यहम् ॥ १ ॥ कार्तवीर्यस्य कवचं तथा हनुमतोऽपि च ॥ चरितं च महत्पुण्यं श्रुत्वा भूयोऽब्रवीद्वचः ॥ २ ॥
नारद उवाच ॥ साधु साधु मुनिश्रेष्ठ त्वयातिकरुणात्मना ॥ श्रावितं चरितं पुण्यं शिवस्य च हनूमतः ॥ ३ ॥ तन्त्रस्यास्य क्रमप्राप्तं कथनीयं च
यत्त्वया ॥तत्प्रब्रूहि महाभाग किं पृष्टान्यद्विदांवर ॥ ४ ॥ सनत्कुमार उवाच ॥ अथ वक्ष्ये कृष्णमंत्रान्भुक्तिमुक्तिफलप्रदान् ॥ ब्रह्माद्या यान्स
माराध्य सृष्ट्यादिकरणे क्षमाः ॥ ५ ॥ कामः कृष्णपदं ङतं गोविंदं च तथाविधम् ॥ गोपीजनपदं पश्चाद्वल्लभायाग्निसुंदरी ॥ ६ ॥ अष्टादशार्णो
मंत्रोऽयं दुर्गाधिष्ठातृदैवतः ॥ नारदोऽस्य मुनिश्छंदो गायत्री देवता पुनः ॥७ ॥ श्रीकृष्णः परमात्मा च कामो बीजं प्रकीर्तितम् ॥ स्वाहा शक्तिर्नि
योगस्तु चतुर्वर्गप्रसिद्धये ॥ ८ ॥ ऋषिं शिरसि वक्रे तु छंदश्च हृदि देवताम् ॥ गुह्ये बीजं पदोः शक्तिं न्यसेत्साधकसत्तमः ॥ ९ ॥ युगवेदाब्धि
निगमैर्द्वाभ्यां वर्णैर्मनूद्भवैः ॥ पंचांगानि प्रविन्यस्य तत्त्वन्यासं समाचरेत् ॥ १० ॥ हृदंतिमादिकांतार्णमपराद्यानि चात्मने॥ मत्यंतानि च तत्वानि
जीवाद्यानि न्यसेत्क्रमात् ॥ ११ ॥ जीवं प्राणं मतिमहंकारं मनस्तथैव च ॥ शब्दं स्पर्शं रूपरसौ गंधं श्रोत्रं त्वचं तथा ॥ १२ ॥ नेत्रं च रसनां
घ्राणं वाचं पाणिं पदेंद्रियम् ॥ पायुं शिश्नमथाकाशं वायुं वह्निं जलं महीम् ॥ १३ ॥ जीवं प्राणं च सर्वांगे मत्यादित्रितयं हृदि ॥ मूर्द्धास्यहृद्गुह्य
पादेष्वथ शब्दादिकान्न्यसेत् ॥ १४ ॥ कर्णादिस्वस्वस्थानेषु श्रोत्रादीनींद्रियाणि च ॥ तथा वागादींद्रियाणि स्वस्वस्थानेषु विन्यसेत् ॥ १५ ॥
मूर्द्धास्यहृद्गुह्यपादेष्वाकाशादीन्न्यसेत्ततः ॥ हृत्पुंडरीकमर्केन्दुवह्निबिंबान्यनुक्रमात् ॥१६ ॥ द्विषट्कह्यष्टदशकलाव्याप्तानि च तथा मतः ॥ भूताष्टां
गाक्षिपदगैर्वर्णैः प्रविन्न्यसेद्धृदि ॥ १७ ॥ अथाकाशादिस्थलेषु वासुदेवादिकांस्ततः ॥ वासुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः ॥१८॥ नारायणश्च

क्रमशः परमेष्ठ्यादिभिर्युताः ॥ परमेष्ठिपुमांच्छौचविश्वनिवृत्तिसर्वकाः ॥ १९ ॥ श्वेतानिलाग्न्यंबुभूमिवर्णैः प्राग्वत्प्रविन्यसेत् ॥ स्वबीजाद्यं
कोपतत्वं नृसिंहं व्यापकेन च ॥ २० ॥ प्राग्वद्विन्यस्य सर्वांगे तत्त्वन्यासोऽयमीरितः ॥ मकाराद्या आद्यवर्णाः सर्वे स्युश्चंद्रभूषिताः ॥ २१ ॥
वासुदेवादिका ज्ञेया ङेंताः साधकसत्तमैः ॥ प्राणायामं ततः कृत्वा पूरकुम्भकरेचकैः ॥ २२ ॥ चतुर्भिः षड्भिर्द्वाभ्यां च मूलमंत्रेण मंत्रवित् ॥
केचिदाहुरिहाचार्याः प्राणायामोत्तरं पुनः ॥ २३ ॥ पीठन्यासं विधायाथ न्यासानन्यान्समाचरेत् ॥ दशतत्त्वादि विन्यस्य वक्ष्यमाणविधानतः
॥ २४ ॥ मूर्तिपंजरनामानं पूर्वोक्तं विन्यसेद्बुधः ॥ सर्वांगे व्यापकं कृत्वा किरीटमनुना सुधीः ॥२५॥ ततस्तारपुटं मंत्रं व्यापय्य करयोस्त्रिशः ॥
पंचांगुलीषु करयोः पंचांगं विन्यसेत्ततः ॥ २६ ॥ त्रिशो मूलेन मूर्द्धादिपादांतं व्यापकं न्यसेत् ॥ सकृद्व्यापय्य तारेण मंत्रन्यासं ततश्चरेत् ॥२७॥
शिरोललाटे भ्रूमध्ये कर्णयोश्चक्षुषोस्तथा ॥ घ्राणयोर्वदने कंठे हृदि नाभौ तथा पुनः ॥ २८ ॥ कट्यां लिंगे जानुनोश्च पादयोर्विन्यसेत्क्रमात् ॥
हृदंतान्मंत्रवर्णांश्च ततो मूर्ध्नि ध्रुवं न्यसेत् ॥ २९ ॥ पुनर्नयनयोरास्ये हृदि गुह्ये च पादयोः ॥ विन्यसेद्धृदयांतानि मनोः पंचपदानि च ॥ ३० ॥
भूयो मुन्यादिकं न्यस्य पंचांगं पूर्ववन्न्यसेत् ॥ अथ वक्ष्ये महागुह्यं सर्वन्यासोत्तमोत्तमम् ॥ ३१ ॥ यस्य विज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः ॥ अणि
माद्यष्टसिद्धीनामीश्वरः स्यान्न संशयः ॥ ३२ ॥ यस्याराधनतो मंत्री कृष्णसांनिध्यतां व्रजेत् ॥ ताराद्याभिर्व्याहृतिभिः संपुटं विन्यसेन्मनुम् ॥ ३३ ॥
मंत्रेण पुटितांश्चापि प्रणवाद्यांस्ततो न्यसेत् ॥ गायत्र्या पुटितं मंत्रं विन्यसेन्मातृकास्थले ॥ ३४ ॥ मंत्रेण पुटितां तां च गायत्रीं विन्यसेत्क्रमात् ॥
मातृकापुटितं मूलं विन्यसेत्साधकोत्तमः ॥३५॥ मूलेन पुटितां चैव मातृकां विन्यसेत्क्रमात् ॥ तृचं न मातृकावर्णान्पूर्वं तत्तत्स्थले सुधीः ॥ ३६॥
विन्यसेन्न्यासषट्कं च षोढा न्यासोऽयमीरितः ॥ अनेन न्यासवर्येण साक्षात्कृष्णसमो भवेत् ॥ ३७ ॥ न्यासेन पुटितं दृष्ट्वा सिद्धगंधर्वकिन्नराः ॥ देवा अपि
नमंत्येनं किंपुनर्मानवा भुवि ॥ ३८ ॥ सुदर्शनस्य मंत्रेण कुर्याद्दिग्बंधनं ततः ॥ देवं ध्यायन्स्वहृदये सर्वाभीष्टप्रदायकम् ॥ ३९ ॥ उत्फुल्लकुसुम
व्रातनम्रशाखैर्वरद्रुमैः ॥ सस्मेयमंजरीवृंदवल्लरीवेष्टितैः शुभैः ॥ ४० ॥ गलत्परागधूलीभिः सुरभीकृतदिङ्मुखः ॥ स्मरेच्छिशिरितं वृंदावनं मंत्री
समाहितः ॥ ४१ ॥ उन्मीलन्नवकंजालिविगलन्मधुसंचयैः ॥ लुब्धांतःकरणैर्गुंजद्विरेफपटलैः शुभम् ॥ ४२ ॥ मरालपरभृत्कीरकपोतनिकरैर्मुहुः ॥
मुखरीकृतमानृत्यन्मायूरकुलमंजुलम् ॥ ४३ कालिंद्या लोलकल्लोलविप्रुषैर्मंदवाहिभिः ॥ उन्निद्रांबुरुहव्रातरजोभिर्धूसरैः शिवैः ॥ ४४ ॥ प्रदीपित
स्मरैर्गोपसुंदरीमृदुवाससाम् ॥ विलोलनपरैः संसेवितं वा तैर्निरंतरम् ॥ ४५ ॥ स्मरेत्तदंते गीर्वाणभूरुहं सुमनोहरम् ॥ तदधः स्वर्णवेद्यां च रत्नपी

ठमनुत्तमम् ॥ ४६ ॥ रत्नकुट्टिमपीठेऽस्मिन्नरुणं कमलं स्मरेत्॥ अष्टपत्रं च तन्मध्ये मुकुंदं संस्मरेत्स्थितम् ॥ ४७ ॥ फुल्लेंदीवरकांतं च केकिबर्हावतं
सकम् ॥ पीतांशुकं चंद्रमुखं सरसीरुहनेत्रकम् ॥ ४८ ॥ कौस्तुभोद्भासितांगं च श्रीवत्सांकं सुभूषितम् ॥ व्रजस्त्रीनेत्रकमलाभ्यर्चितं गोगणावृतम् ॥
॥ ४९ ॥ गोपवृंदयुतं वंशीं वादयंतं स्मरेत्सुधीः ॥ एवं ध्यात्वा जपेदादावयुतद्वितयं बुधः ॥ ५० ॥ जुहुयादरुणांभोजैस्तद्दशांशं समाहितः ॥
जपेत्पश्चान्मंत्रसिद्ध्यै भूतलक्षं समाहितः ॥ ५१ ॥ अरुणैः कमलैहुत्वा सर्वसिद्धीश्वरो भवेत् ॥ पूर्वोक्ते वैष्णवे पीठे मूर्तिं संकल्प्य मूलतः ॥
॥ ५२ ॥ तस्यामावाह्य चाभ्यर्चेद्गोपीजनमनोहरम् ॥ मुखे वेणुं समभ्यर्च्य वनमालां च कौस्तुभम् ॥ ५३ ॥ श्रीवत्सं च हृदि प्रार्च्य
ततः पुष्पांजलिं क्षिपेत् ॥ ततः श्वेतां च तुलसीं शुक्लचंदनपंकिलाम् ॥ ५४ ॥ रक्तां च तुलसीं रक्तचंदनाक्तां क्रमात्सुधीः ॥ अर्पयेद्दक्षिणे
वामभागे ध्यायन्सुरेश्वरम् ॥५५ ॥ हयमारद्वयेनैव हृदि मूर्ध्नि तथा पुनः ॥ पद्मद्वयं च विधिवत्ततः शीर्षे समर्पयेत् ॥ ५६ ॥ तुलसीद्वयमंभो
जद्वयमश्वारियुग्मकम् ॥ ततः सर्वाणि पुष्पाणि सर्वाङ्गेषु समर्पयेत् ॥ ५७ ॥ दक्षिणे वासुदेवाख्यं स्वच्छं चैतन्यमव्ययम् ॥ वामे च रुक्मिणीं
तद्वन्नित्यां रक्तां रजोगुणाम् ॥ ५८ ॥ एवं संपूज्य गोपालं कुर्यादावरणार्चनम् ॥ यजेद्दामसुदामौ च वसुदामं च किंकिणीम् ॥ ५९ ॥ पूर्वा
द्याशासु दामाद्या ङेंनमोन्तध्रुवादिकाः ॥ अग्निनैर्ऋतिवाय्वीशकोणेषु हृदयादिकान् ॥६०॥दिक्ष्वस्त्राणि समभ्यर्च्य पत्रेषु महिषीर्यजेत् ॥ रुक्मिणी
सत्यभामा च नाग्नजित्यभिधा पुनः ॥ ६१ ॥ सुविंदा मित्रविंदा च लक्ष्मणा चर्क्षजा ततः ॥ सुशीला च लसद्रम्यचित्रितांबरभूषणा ॥६२॥ ततो
यजेद्दलाग्रेषु वसुदेवञ्च देवकीम् ॥ नंदगोपं यशोदां च बलभद्रं सुभद्रिकाम् ॥ ६३ ॥ गोपान्गोपीश्च गोविंदविलीनमतिलोचनान् ॥ ज्ञानमुद्राभयकरौ
पितरौ पीतपांडुरौ ॥ ६४ ॥ दिव्यमाल्यांबरालेपभूषणे मातरौ पुनः ॥ धारयंत्यौ चरुं चैव पायसीं पूर्णपात्रिकाम् ॥६५॥ अरुणश्यामले हारमणिकुं
डलमंडिते ॥ बलः शंखेंदुधवलो मुशलं लांगलं दधत् ॥६६॥ हालालोलो नीलवासा हलवानेककुंडलः ॥कला या श्यामला भद्रा सुभद्रा भद्रभू
षणा ॥ ६७ ॥ वराभययुता पीतवसना रूढयौवना ॥ वेणुवीणाहेमयष्टिशंखशृंगादिपाणयः ॥ ६८ ॥ गोपा गोप्यश्च विविधप्राभृतान्नकरांबुजाः ॥
मंदारादींश्च तद्बाह्ये पूजयेत्कल्पपादपान् ॥ ६९ ॥ मंदारश्च तथा संतानको वै पारिजातकः ॥ कल्पद्रुमस्ततः पश्चाद्धरिचन्दनसंज्ञकः ॥ ७० ॥
मध्ये दिक्षु समभ्यर्च्य बर्हिः शक्रादिकान्यजेत् ॥ तदस्त्राणि च संपूज्य यजेत्कृष्णाष्टकेन च ॥ ७१ ॥ कृष्णं च वासुदेवं च देवकीनन्दनं
तथा ॥ नारायणं यदुश्रेष्ठं वार्ष्णेयं धर्मपालकम् ॥ ७२ ॥ असुराक्रांतभूभारहारिणं पूजयेत्ततः ॥ एभिरावरणैः पूजा कर्तव्यासुरवैरिणः ॥ ७३ ॥

संसारसागरोत्तीर्त्यै सर्वकामाप्तये बुधैः ॥ एवं पूजादिभिः सिद्धो भवेद्वैश्रवणो यमः ॥ ७४ ॥ त्रिकालपूजनं चास्य वक्ष्ये सवार्थसिद्धिदम् ॥ श्रीम
दुद्यानसंवीतिहेमभूरत्नमंडपे ॥ ७५ ॥ लसत्कल्पद्रुमाधस्थरत्नाब्जपीठसंस्थितम् ॥ सुत्रामरत्नसंकाशं गुडस्निग्धालकं शिशुम् ॥ ७६ ॥ चलत्कन
ककुंडलोल्लसितचारुगंडस्थलं सुघोणधरमद्भुतस्मितमुखांबुजं सुन्दरम् ॥स्फुरद्विमलरत्नयुक्कनकसूत्रनद्धं दधत्सुवर्णपरिमंडितं सुभगपौंडरीकं नखम्
॥ ७७ ॥ समुद्धूसरोरस्थले धेनुधूल्या सुपुष्टांगमष्टापदाकल्पदीप्तम् ॥ कटीलस्थले चारुजंघान्तयुग्मं पिनद्धं क्वणत्किंकिणीजालदाम्ना ॥ ७८ ॥
हसन्तं हसद्बंधुजीवप्रसूनप्रभापाणिपादांबुजोदारकांत्या ॥ दधानं करे दक्षिणे पायसान्न सुहैयंगवीनं तथा वामहस्ते ॥ ७९ ॥ लसद्गोपगोपीगवां
वृंदमध्ये स्थितं वासवाद्यैः सुरैरार्चितांघ्रिम् ॥ महीभारभूतामरारातियूथांस्ततः पूतनादीन्निहंतुं प्रवृत्तम् ॥ ८० ॥ एवं ध्यात्वार्चयेद्देवं पूर्ववत्स्थिरमा
नसः ॥ दध्ना गुडेन नैवेद्यं दत्वा दशशतं जपेत् ॥८१ ॥मध्यंदिने यजेद्देवं विशिष्टरूपधारिणम् ॥ नारदाद्यैर्मुनिगणैः सुरवृन्दैश्च पूजितम् ॥८२॥
लसद्गोपगोपीगवां वृन्दमध्यस्थितं सांद्रमेघप्रभं सुन्दरांगम् ॥ शिखंडिच्छदापीडमब्जायताक्षं लसच्चिल्लिकं पूर्णचद्रानन च ॥८३ ॥ चलत्कुण्डलोल्ला
सिगंडस्थलश्रीभरं सुन्दरं मंदहासं सुनासम् ॥ सुकार्तस्वराभांबरं दिव्यभूषं क्वणत्किंकिणीजालमत्तानुलेपम् ॥ ८४ ॥ वेणुं धमंतं स्वकरे दधानं
सव्ये दरं यष्टिमुदारवेषम्॥दक्षे तथैवेप्सितदानदक्षं ध्यात्वार्चयेन्नंदजमिंदिराप्त्यै ॥ ८५ ॥ एवं ध्यात्वार्चयेत्कृष्णं पूर्ववद्वैष्णवोत्तमः ॥ अपूपपायसा
न्नाद्यैर्नैवेद्यं परिकल्पयेत् ॥ ८६ ॥ हुत्वा चाष्टोत्तरशतं पयोऽन्नैः सर्पिषाप्लुतैः ॥स्वस्वदिक्षु बलिं दद्याद्दिशेदाचमनं ततः ॥ ८७ ॥अष्टोत्तरसहस्रं च
प्रजपेन्मंत्रमुत्तमम् ॥ अह्नो मध्ये यजेद्देवं यः कृष्णं वैष्णवोत्तमः ॥ ८८ ॥ देवाः सर्वे नमस्यंति लोकानां वल्लभो नरः ॥ मेधायुःश्रीकांतियुक्तः
पुत्रैः पौत्रैश्च वर्द्धते ॥८९॥ तृतीयकालपूजायामस्ति कालविकल्पना ॥ सायाह्ने निशि वेत्यत्र वदंत्येके विपश्चितः ॥ ९० ॥ दशाक्षरेण चेद्रात्रौ
सायाह्नेऽष्टादशार्णतः ॥ उभयीमुभयेनैव कुर्यादित्यपरे जगुः ॥९१॥सायाह्ने द्वारवत्यां तु चित्रोद्यानोपशोभिते ॥ अष्टसाहस्रसंख्यातैर्भवनैरुपमंडिते
॥ ९२ ॥ हंससारससंकीर्णकमलोत्पलशालिभिः ॥ सरोभिर्निर्मलांभोभिः परीते भवनोत्तमे ॥ ९३ ॥ उद्यत्प्रद्योतनोद्योतद्युतौ श्रीमणिमंडले ॥
हेमांभोजासनासीनं कृष्णं त्रैलोक्यमोहनम् ॥९४ ॥ मुनिवृंदैः परिवृतमात्मतत्त्वविनिर्णये ॥ तेभ्यो मुनिभ्यः स्वं धाम दिशंतं परमक्षरम् ॥ ९५ ॥
उन्निद्रेंदीवरश्यामं पद्मपत्रायतेक्षणम् ॥ स्निग्धं कुंतलसंभिन्नकिरीटवनमालिनम् ॥ ९६ ॥ चारुप्रसन्नवदनं स्फुरन्मकरकुंडलम् ॥ श्रीवत्स
वक्षसं भ्राजत्कौस्तुभं सुमनोहरम् ॥ ९७ ॥ काश्मीरकपिशोरस्कं पीतकौशेयवाससम् ॥ हारकेयूरकटककटिसूत्रैरलंकृतम् ॥ ९८ ॥ हतविश्वंभ

राभूरिभारं मुदितमानसम् ॥ शंखचक्रगदापद्मराजद्भुजचतुष्टयम् ॥ ९९ ॥ एवं ध्यात्वार्चयेन्मन्त्री स्यादंगैः प्रथमावृतिः ॥ द्वितीया महिषीभिस्तु
तृतीयायां समर्चयेत् ॥ १०० ॥ नारदं पर्वतं जिष्णुं निशठोद्धवदारुकान् ॥ विष्वक्सेनं च शैनेयं दिक्ष्वग्रे विनतासुतम् ॥ १०१ ॥ लोकपालैश्च
वज्राद्यैः पूजयेद्वैष्णवोत्तमः ॥ एवं संपूज्य विधिवत्पायसं विनिवेदयेत् ॥ १०२ ॥ तर्पयित्वा खंडमिश्रदुग्धबुद्ध्या जलैरिह ॥ जपेदष्टशतं मन्त्री
भावयन्पुरुषोत्तमम् ॥ १०३ ॥ पूजासु होमं सर्वासु कुर्यान्मध्यंदिनेऽथवा ॥ आसनादर्घ्यपर्यंतं कृत्वा स्तुत्वा नमेत्सुधीः ॥ १०४ ॥ समर्था
त्मानमुद्वास्य स्वीयहृत्सरसीरुहे ॥ विन्यस्य तन्मयो भूत्वा पुनरात्मानमर्चयेत् ॥ १०५ ॥ सायाह्ने वासुदेवं यो नित्यमेवं समर्चयेत् ॥ सर्वा
न्कामानवाप्यांते स याति परमां गतिम् ॥ १०६ ॥ रात्रौ चेन्मदनाक्रांतचेतसं नन्दनन्दनम् ॥ यजेद्रासपरिश्रांतं गोपीमंडलमध्यगम् ॥ १०७ ॥
विकसत्कुंदकह्लारमल्लिकाकुसुमोद्गतैः ॥ रजोभिर्धूसरैर्मंदमारुतैः शिशिरीकृते ॥ १०८ ॥ उन्मीलन्नवकैरवालिविगलन्माध्वीकलब्धांतरं
भ्राम्यन्मत्तमिलिंदगीतललिते सन्मल्लिकोज्जृम्भिते ॥ पीयूषांशुकरैर्विशालितहरित्प्रांते स्मरोद्दीपने कालिन्दीपुलिनांगणे स्मितमुखं वेणुं
रणंतं मुहुः ॥ १०९ ॥ अन्तस्तोयलसन्नवांबुदघटासंघट्टकारत्विषं चंचच्चिल्लिकमंबुजायतदृशं बिम्बाधरं सुन्दरम् ॥ मायूरच्छदबद्धमौलिवि
लसद्धम्मिल्लमालं चलं दीप्यत्कुण्डलरत्नरश्मिविलसद्गंडद्वयोद्भासितम् ॥ ११० ॥ कांचीनूपुरहारकंकणलसत्केयूरभूषान्वितं गोपीनां द्वितयां
तरे सुललितं वन्यप्रसूनस्रजम् ॥ अन्योन्यं विनिबद्धगोपदयितादोर्वल्लिवीतं लसद्रासक्रीडनलोलुपं मनसिजाक्रांतं मुकुन्दं भजेत् ॥ १११ ॥
विविधश्रुतिभिन्नमनोज्ञतरस्वरसप्तकमूर्छनतानगणैः ॥ भ्रममाणममूभिरुदारमणिस्फुटमंडनसिंजितचारुतनुम् ॥ ११२ ॥ इतरेतरबद्धकरप्रमदागण
कल्पितरासविहारविधौ ॥ मणिशंकुगमप्यमुना वपुषा बहुधा विहितस्वकदिव्यतनुम् ॥ ११३ ॥ एवं ध्यात्वार्चयेन्मन्त्री स्यादंगैः प्रथमावृतिः ॥
श्रीकामः सस्वराद्यानि कलाब्जैर्वैष्णवोत्तमः ॥ ११४ ॥ यजेत्केशवकीर्त्यादिमिथुनानि च षोडश ॥ इन्द्राद्यानपि वज्रादीन्पूजयेत्तदनन्तरम् ॥ ११५ ॥
पृथुं सुवृत्तं मसृणं वितस्तिमात्रोन्नतं कौ विनिखन्य शंकुम् ॥ आक्रम्य पद्भ्यामितरेतरैस्तु हस्तैर्भ्रमोऽयं खलु रासगोष्ठी ॥ ११६ ॥ संपूज्यैवं च पयसा सुसितो
पलसर्पिषा ॥ नैवेद्यमर्चयित्वा तु चषकैर्नृपसंख्यकैः ॥ ११७ ॥ ससितं पायसं मंत्री मिथुनेष्वर्पयेत्क्रमात् ॥ विधाय पूर्ववच्छेषं सहस्रं प्रजपेन्मनुम् ॥ ११८ ॥
स्तुत्वा नत्वा च संप्रार्थ्य पूजाशेषं समापयेत् ॥ एवं यः पूजयेत्कृष्णं स समृद्धेः पदं भवेत् ॥ ११९ ॥ अणिमाद्यष्टसिद्धीनामीश्वरः स्यान्न संशयः ॥ भुक्त्वेह
विविधान्भोगानंते विष्णुपदं व्रजेत् ॥ १२० ॥ एवं पूजादिभिः सिद्धे मनौ काम्यानि साधयेत् ॥ अष्टाविंशतिवारं वा त्रिकालं पूजयेत्सुधीः ॥ १२१ ॥

स्वकालविहितान् भूयः परिवारांश्च तर्पयेत् ॥ प्रातर्दध्ना गुडाक्तेन मध्याह्ने पयसा पुनः॥१२२॥नवनीतयुतेनाथ सायाह्ने तर्पयेत्पुनः॥ ससितोपलमि
श्रेण पयसा वैष्णवोत्तमः ॥ १२३ ॥ तर्पयामिपदं योज्यं मंत्रांते स्वेषु नामसु ॥ द्वितीयांतेषु तु पुनः पूजाशेषं समापयेत् ॥ १२४ ॥ अभ्युक्ष्य
तत्प्रसादाद्भिरात्मानं प्रपिबेदपः ॥ तत्तृप्तस्तमथोद्वास्य तन्मयः प्रजपेन्मनुम् ॥ १२५ ॥ अथ द्रव्याणि काम्येषु प्रोच्यंते तर्पणेषु च ॥ तानि प्रोक्त
विधानानामाश्रित्यान्यतमं भजेत् ॥ १२६ ॥पायसं दाधिकं चाज्यं गौडान्नं कृसरं पयः ॥ दधीनि कदली मोचा चिंचा रजस्वला तथा ॥ १२७ ॥
अपूपा मोदका लाजाः पृथुका नवनीतकम् ॥ द्रव्यषोडशकं ह्येतत्कथितं पद्मजादिभिः ॥ १२८ ॥ लाजांते पृथुकं प्राक्च समर्प्य च सितोपलम् ॥
चतुःसप्ततिवारं यः प्रातरेवं प्रतर्पयेत् ॥ १२९ ॥ ध्यात्वा कृष्णपदं मंत्री मंडलादिष्टमाप्नुयात् ॥ धारोष्णपक्वपयसा नवनीतं दधीनि च ॥
॥ १३० ॥ दौग्धान्नमाज्यं मत्स्यंडी क्षौद्रं कीलालमेव चं ॥ पूजयेन्नवभिर्द्रव्यैः प्रत्येकं रविसंख्यया ॥ १३१ ॥ एवमष्टोत्तरशतसंख्याकं तर्पणं
पुनः ॥ यः कुर्याद्वैष्णवश्रेष्ठः पूर्वोक्तं फलमाप्नुयात् ॥ १३२ ॥ किं बहूक्तेन सर्वेष्टदायकं तर्पणं त्विदम् ॥ ससितोपलधारोष्णदुग्धबुद्ध्या जलेन
वै ॥ १३३ ॥ कृष्णं प्रतपर्यन् ग्रामं व्रजन्प्राप्नोति साधकः ॥ धनवस्त्राणि भोज्यं च परिवारगणैः सह ॥ १३४ ॥ यावत्संतर्पयेन्मंत्री तावत्संख्यं
जपेन्मनुम् ॥ तर्पणैनैव कार्याणि साधयेदखिलान्यपि ॥ १३५ ॥ काम्यहोममथो वक्ष्ये साधकानां हिताय च ॥ श्रीपुष्पैर्जुहुयान्मंत्री श्रियमिच्छ
न्ननिंदिताम् ॥ १३६ ॥ साज्येनान्नेन जुहुयात्घृतान्नस्य समृद्धये ॥ वन्यपुष्पैर्द्विजान् जातीपुष्पैश्च पृथिवीपतीन् ॥ १३७ ॥ असितैः कुसुमै
र्वैश्यान् शूद्रान्नीलोत्पलैस्तथा ॥ वशयेल्लवणैः सर्वानंबुजैर्युवतीजनम् ॥ १३८ ॥ गोशालासु कृतो होमः पायसेन ससर्पिषा ॥ गवां शांतिं करोत्याशु
गोपालो गोकुलेश्वरः ॥ १३९ ॥ शिक्षावेषधरं कृष्णं किंकिणीजालशोभितम् ॥ ध्यात्वा प्रतर्पयेन्मंत्री दुग्धबुद्ध्या शुभैर्जलैः ॥ १४० ॥ धनं
धान्यं सुतान्कीर्तिं प्रीतस्तस्मै ददाति सः ॥ ब्रह्मवृक्षसमिद्भिर्वा कुशैर्वा तिलतंदुलैः ॥ १४१ ॥ जुहुयादयुतं मंत्री त्रिमध्वाक्तैर्हुताशने ॥ वशये
द्ब्राह्मणांश्चाथ राजवृक्षसमुद्भवैः ॥ १४२ ॥ प्रसूनैः क्षत्रियान्वैश्यान्कुरंडकुसुमैस्तथा ॥ पाटलोत्थैश्च कुसुमैर्वशयेदंतिमान्सुधीः ॥ १४३ ॥
श्वेतपद्मै रक्तपद्मैश्चंपकैः पाटलैः क्रमात् ॥ हुत्वायुतं त्रिमध्वाक्तैर्वशयेत्तद्वरांगनाः ॥ १४४ ॥ नित्यं हयारिकुसुमैर्निशीथे त्रिमधुप्लुतैः ॥ वरस्त्री
र्वशयेत्प्राज्ञः सम्यग्धृत्वा दिनाष्टकम् ॥ १४५ ॥ अयुतत्रितयं रात्रौ सिद्धार्थैस्त्रिमधुप्लुतैः ॥ प्रत्यहं जुह्वतो मासात्सुरेशोऽपि वशीभवेत् ॥ १४६ ॥
आहृत्य बल्लवीवस्त्राण्यारूढं नीपभूरुहे ॥ स्मरेत्कृष्णं जपेद्रात्रौ सहस्रं खेंद्रहात्सुधीः ॥ १४७ ॥ हठादाकर्षयेच्छीघ्रमुर्वशीमपि साधकः ॥ बहुना

किमिहोक्तेन मंत्रोऽयं सर्ववश्यकृत् ॥ १४८ ॥ रहस्यं परमं चाथ वक्ष्ये मोक्षप्रदं नृणाम् ॥ ध्यायेत्स्वहृत्सरसिजे देवकीनंदनं विभुम् ॥ १४९॥
श्रीमत्कुन्देंदुगौरं सरसिजनयनं शङ्खचक्रे गदाब्जे बिभ्राणं हस्तपद्मैर्नवनलिनलसन्मालयादीप्यमानम् ॥ वंदे वेद्यं मुनींद्रैः कणिकमुनिलसद्दिव्य
भूषाभिरामं दिव्यांगालेपभासं सकलभयहरं पीतवस्त्रं मुरारिम् ॥ १५० ॥ एवं ध्यात्वा पुमांसं स्फुटहृदयसरोजासनासीनमाद्यं
सांद्रांभोदाच्छबिंबाद्भुतकनकनिभं संजपेदर्कलक्षम् ॥ मन्वोरेकं द्वितारांतरितमथ हुनेदर्कसाहस्रमिध्मैः क्षीरिद्रूत्थयर्थोक्तैः समधु
घृतसितेनाथवा पायसेन ॥ १५१ ॥ एवं लोकेश्वराराध्यं कृष्णं स्वहृदयांबुजे ॥ ध्यायन्ननुदिनं मंत्री त्रिसहस्रं जपेन्मनुम् ॥ १५२ ॥
सायाह्नोक्तेन विधिना संपूज्य हवनं पुनः ॥ कृत्वा पूर्वोक्तविधिना मन्त्री तद्गतमानसः ॥ १५३ ॥ एवं यो भजते नित्यं विद्वान्
गोपालनंदनम् ॥ समुत्तीर्य भवांभोधिं स याति परमं पदम् ॥ १५४ ॥ मध्ये कोणेषु बाह्येष्वनलपुरपुटस्यालिखेत्कार्णिकायां कंदर्पं साध्ययुक्तं
विवरगतषडर्णंद्विषः केशरेषु॥शक्तिः श्रीपूर्विकाणिद्विनवलिपिमनोरक्षराणिच्छदानां मध्ये वर्णान्दशान्तो दशलिपिमनुवर्यस्य वैकैकशोऽब्जम्॥ १५५॥
भूसद्मनाभिवृतमस्रगमन्मथेन गोरोचनाविलिखितं तपनीयसूच्या ॥ पट्टे हिरण्यरचिते गुलिकीकृतं तद्गोपालयंत्रमखिलार्थदमेतदुक्तम् ॥ १५६ ॥
संयातसिक्तमभिजप्तमिमं महद्भिर्धार्यं जगत्त्रयवशीकरणैकदक्षम् ॥ रक्षायशः सुतमहीधनधान्यलक्ष्मीसौभाग्यलिप्सुभिरजस्रमनर्घ्यवीर्यम् ॥ १५७ ॥
स्मरस्त्रिविक्रमाक्रांतश्चाक्रीष्टचाय ह्रदित्यसौ॥षडक्षरोऽयं संप्रोक्तः सर्वसिद्धिकरो मनुः॥१५८॥ क्रोडः शान्तींदुवह्न्याढ्यो माया बीज प्रकीर्तितम्
॥ गोविंदवह्निचन्द्राढ्यो मनुः श्रीबीजमीरितम् ॥ १५९ ॥ आभ्यामष्टादशक्लिपिः स्याद्विंशत्यक्षरो मनुः॥शालग्रामे मणौ यंत्रे मंडले प्रतिमासु
वा ॥ १६० ॥ नित्यं पूजा हरेः कार्या न तु केवलभूतले ॥ एवं यो भजते कृष्णं स याति परमां गतिम् ॥ १६१ ॥ विंशार्णस्य मुनिर्ब्रह्मा
गायत्री छन्द ईरितम् ॥ कृष्णश्च देवता कामो बीजं शक्तिर्द्विठो बुधैः ॥ १६२ ॥ रामाग्निवेदवेदाब्धेर्नेत्रार्णैरंगकल्पनम् ॥ मूलेन व्यापकं कृत्वा
मनुना पुटितानथ ॥ १६३ ॥ मातृकार्णान्न्यसेत्तत्तत्स्थानेषु सुसमाहितः ॥ दशतत्त्वानि विन्यस्य मूलेन व्यापकं चरेत् ॥ १६४ ॥ मंत्रन्यासं
ततः कुर्याद्देवताभावसिद्धये ॥ शीर्षे ललाटे भ्रूमध्ये नेत्रयोः कर्णयोस्तथा ॥ १६५ ॥ नसोर्वक्त्रे च चिबुके कण्ठे दोर्मूलके हृदि ॥ उदरे नाभि
देशे च लिंगे मूलसरोरुहे ॥१६६ ॥ कट्यां जान्वोर्जंघयोश्च गुल्फयोः पादयोः क्रमात्॥ न्यसेद्धृदंतान्मंत्राणां सृष्टिन्यासोऽयमीरितः ॥१६७॥
हृदये चोदरे नाभौ लिंगे मूलसरोरुहे ॥ कट्यां जान्वोर्जंघयोश्च गुल्फयोः पादयोस्तथा ॥ १६८ ॥ मूर्ध्नि कपोले भ्रूमध्ये नेत्रयोः कर्णयोर्नसोः ॥

वदने चिबुके कंठे दोर्मूले विन्यसेत्क्रमात्॥ १६९॥ नमोंतान्मंत्रवर्णांश्च स्थितिन्यासोऽयमीरितः॥ पादयोर्गुल्फयोश्चैव जंघयोर्जानुनोस्तथा॥ १७०॥
कट्यां मूले ध्वजे नाभौ जठरे हृदये पुनः ॥ दोर्मूले कंठदेशे च चिबुके वदने नसोः ॥१७१॥ कर्णयोर्नेत्रयोश्चैव भ्रूमध्ये निटिले तथा ॥ मूर्ध्नि न्यसे
न्मंत्रवर्णान्संहाराख्योऽयमीरितः ॥ १७२ ॥ पुनः सृष्टिस्थितिन्यासौ विधाय वैष्णवोत्तमः ॥ मूर्तिपंजरनामानं विन्यसेत्पूर्ववत्ततः ॥ १७३ ॥ पुनः
षडंगं कृत्वाथ ध्यायेत्कृष्णं हृदंबुजे ॥ द्वारवत्यां सहस्रार्कभास्वरैर्भवनोत्तमैः ॥ १७४ ॥ अनल्पैः कल्पवृक्षैश्च परीते मणिमण्डपे ॥ ज्वलद्रत्न
मयस्तंभद्वारतोरणकुड्यके ॥ १७५ ॥ फुल्लप्रफुल्लसच्चित्रवितानालंबिमौक्तिके ॥ पद्मरागस्थलीराजद्रत्नसंघैश्च मध्यतः ॥ १७६ ॥ अनारतगल
द्रत्नधाराढ्यस्वस्तरोरधः ॥ रत्नप्रदीपावलिभिः प्रदीपितदिगंतरे ॥ १७७ ॥ उद्यदादित्यसंकाशमणिसिंहासनांबुजे ॥ समासीनोऽच्युतो ध्येयो द्रुतहा
टकसन्निभः ॥ १७८ ॥ समानोदितचंद्रार्कतडित्कोटिसमद्युतिः ॥ सर्वांगसुंदरः सौम्यः सर्वाभरणभूषितः ॥१७९॥ पीतवासाः शंखचक्रगदांभोजल
सत्करः ॥ अनाहतोच्छलद्रत्नधारौघकलशं स्पृशन् ॥ १८० ॥ वामपादांबुजाग्रेण मुष्णता :पल्लवच्छविम् ॥ रुक्मिणीसत्यभामेऽस्य मूर्ध्नि रत्नौघ
धारया ॥ १८१ ॥ सिंचंत्यौ दक्षवामस्थे स्वदोस्थकलशोत्थया ॥ नाग्नजिती सुनंदा च दिशंत्यौ कलशौ तयोः ॥ १८२ ॥ ताभ्यां च
दक्षवामस्थमित्रविंदासुलक्ष्मणे ॥ रत्ननद्याः समुद्धृत्य रत्नपूर्णौ घटौ तयोः ॥ १८३ ॥ जांबवती सुशीला च दिशंत्यौ दक्षवामके ॥ बहिः षोडश
साहस्रसंख्याकाः परितः प्रियाः ॥ १८४ ॥ ध्येयाः कनकरत्नौघधारायुक्कलशोज्वलाः ॥ तद्बहिश्चाष्टनिधयः पूरयंतो धनैर्धराम् ॥ १८५ ॥
तद्बहिर्वृष्णयः सर्वे पुरोवच्च स्वरादयः ॥ एवं ध्यात्वा जपेल्लक्षपंचकं तद्दशांशतः ॥ १८६ ॥ अरुणैः कमलैर्हुत्वा पीठे पूर्वोदिते यजेत् ॥
विलिप्य गंधपंकेन लिखेदष्टदलांबुजम् ॥ १८७ ॥ कर्णिकायां च षट्कोणं ससाध्यं तत्र मन्मथम् ॥ शिष्टैस्तु सप्तदशभिरक्षरैर्वेष्टयेत्स्वरम् ॥ १८८ ॥
प्राग्रक्षोऽनिलकोणेषु श्रियं शिष्टेषु संविदम् ॥ षट्सु संधिषु षट्कर्णे केसरेषु त्रिशस्त्रिशः ॥ १८९ ॥ विलिखेत्स्मरगायत्रीं मालमंत्रं दलाष्टके ॥
षट्शः संलिख्य तद्बाह्ये वेष्टयेन्मातृकाक्षरैः ॥ १९० ॥ भूबिंबं च लिखेद्बाह्ये श्रीमायादिग्विदिक्ष्वपि ॥ भूग्रहं चतुरस्रं स्यादष्टवज्रविभूषितम्॥
॥ १९१ ॥ एतद्यंत्रं हाटकादिपट्टेष्वालिख्य पूर्ववत् ॥ संस्कृतं धारयेद्यो वै सोऽर्च्यते त्रिदशैरपि॥ १९२॥स्याद्गायत्री वामदेवपुष्पबाणौ तु ङेंतिमौ ॥
विद्महेधीमहियुतौ तन्नोऽनंगः प्रचोदयात् ॥ १९३ ॥ जप्या जपादौ गोपालमनूनां जनरंजनी ॥ हृदयं कामदेवाय ङेंतं सर्वजनप्रियम् ॥ १९४ ॥
उक्त्वा सर्वजनांते तु संमोहनपदं तथा ॥ ज्वल ज्वल प्रज्वलेति प्रोच्य सर्वजनस्य च ॥ १९५ ॥ हृदयं मम च ब्रूयाद्वशंकुरुयुगं शिरः ॥ प्रोक्तो

मदनमंत्रोऽष्टचत्वारिंशद्भिरक्षरैः ॥ १९६ ॥ जपादौ स्मरबीजाद्यो जगत्त्रयवशीकरः ॥ पीठ प्राग्वत्समभ्यर्च्य मूर्तिं संकल्प्य मूलतः ॥ १९७ ॥
तत्रावाह्याच्युतं भक्त्या सकलीकृत्य पूजयेत् ॥ आसनादिविभूषांतं पुनर्न्यासक्रमाद्यजेत् ॥ १९८ ॥ सृष्टिं स्थितिं षडंगं च किरीटं कुंडलद्वयम् ॥
शंखं चक्रं गदां पद्मं मालां श्रीवत्सकौस्तुभौ ॥१९९॥ गन्धपुष्पैः समभ्यर्च्य मूलेन वैष्णवोत्तमः॥षट्कोणेषु षडंगानि दिग्दलेषु क्रमाद्यजेत्॥२००॥
वासुदेवादिकान्कोणेषु तु शांत्यादिकांस्ततः ॥ पत्राग्रगा महिष्योऽष्टौ यजेत्साधकसत्तमः ॥ २०१ ॥ ततः षोडशसाहस्रं सकृदेवार्चयेत्प्रियाः ॥
इंद्रनीलमुकुंदांश्च करालानंदकच्छपान् ॥ २०२ ॥ शंखपद्मौ ततः पश्चान्निधीनष्टौ क्रमाद्यजेत् ॥ तद्बहिर्लोकपालांश्च वज्राद्यानपि पूजयेत् ॥
॥ २०३ ॥ एवं सप्तावृत्तिवृतं कृष्णमभ्यर्च्य चादरात् ॥ प्रीणयेद्दधिखंडाज्यमिश्रेण तु पयोंऽधसा ॥ २०४ ॥ दिव्योपचारं दत्वाथ स्तुत्वा नत्वा च
केशवम् ॥ उद्वासयेत्स्वहृदये परिवारगणैः सह ॥ २०५ ॥ न्यस्यात्मानं समभ्यर्च्य तन्मयो विहरेत्सुधीः ॥ रत्नाभिषेकध्यानेज्या विंशत्यर्णाश्रिते
रिता ॥ २०६ ॥ एवं यो भजते मन्त्रं स समृद्धेः पदं भवेत् ॥ जपहोमार्चनध्यानैर्यो मनुं प्रजपेदमुम् ॥२०७॥ तद्वेश्म पूर्यते रत्नैः स्वर्णधान्यैरनार
तम् ॥ पृथ्वी पृथ्वी करे तस्य सर्वसस्यसमाकुला ॥ २०८ ॥ पुत्रैर्मित्रैः सुसंपन्नः प्रयात्यंते परां गतिम् ॥ वह्नावभ्यर्च्य गोविंदं शुक्लपुष्पैः सतंदुलैः
॥ २०९ ॥ आज्याक्तैरयुतं हुत्वा भस्म तन्मूर्ध्नि धारयेत् ॥ तस्यान्नादिसमृद्धिः स्यात्तद्वशे सर्वयोषितः ॥ २१० ॥ रक्तांभोजैस्त्रिमध्वक्तैर्हुनेल्लक्षं
समाहितः ॥ श्रिया तस्यैंद्रमैश्वर्यं तृणलेशायते ध्रुवम् ॥ २११॥ त्रिमध्वक्तैः सितैः पुष्पैरष्टोत्तरसहस्रकम् ॥ यो हुनेत्प्रत्यहं मासात्पुरोधा नृपतेर्भवेत्
॥ ११२ ॥ एवमादिप्रयोगांश्च साधयेन्मनुनामुना ॥ मन्त्रराजमथो वक्ष्ये दशार्णं सर्वसिद्धिदम् ॥ २१३ ॥ स्मृतिः सद्यान्विता साक्षिर्लोहितो
जनवल्लभा ॥ पवनोऽग्निप्रियांतोऽयं दशार्णो मन्त्र ईरितः ॥२१४॥ नारदोऽस्य मुनिश्छंदो विराट् कृष्णोऽस्य देवता॥कामो बीजं वह्निजाया शक्तिः
प्रोक्ता मनीषिभिः ॥ २१५ ॥ आचक्रं च विचक्रं च सुचक्रं तदनन्तरम् ॥ त्रैलोक्यरक्षणं चक्रमसुरांतकचक्रकम् ॥ २१६ ॥ एतैर्ङेंटद्वयांतैश्च चक्रैः
पंचांगकं मनोः ॥ ततस्तारपुटं मन्त्रं व्यापय्य करयोस्त्रिशः ॥ २१७ ॥ सेंदून्हृदंतान्मंत्रार्णान्प्रणवांतरितान्न्यसेत् ॥ दक्षांगुष्ठाच्च वामांगुष्ठांतमंगुलि
पर्वसु ॥ २१८॥ सृष्टिन्यासोऽयमुदितः स्थितिन्यासोऽधुनोच्यते ॥ न्यसेद्वामकनिष्ठादिकनिष्ठांतं स्थितौ सुधीः ॥ २१९ ॥ वामांगुष्ठान्न्यसेद्दक्षां
गुष्ठांतं संहृतौ तथा ॥ संहृतिर्दोषसंघातहारिणी परिकीर्तिता ॥ २२० ॥ विद्याप्रदश्च सृष्ट्यंतो वर्णिनां शुद्धचेतसाम् ॥ स्थित्यंतः स्याद्गृहस्थाना
मेवं काम्यादिरूपतः ॥ २२१ ॥ संहारांतो मुनींद्राणां विरक्तानां च सर्वशः ॥ पुनः स्थितिक्रमेणार्णान्मनोरंगुलिषु न्यसेत् ॥ २२२ ॥

पुनश्चक्रैश्च पूर्वोक्तैः पंचागं करयोर्न्यसेत् ॥ ततो मूलेन पुटितान्मातृकार्णान्सबिंदुकान् ॥ २२३ ॥ विन्यसेन्मातृकान्यासस्थानेषु प्रणतः सुधीः ॥
ततस्तारपुटं मूलं व्यापकत्वेन विन्यसेत् ॥ २२४ ॥ संहारसृष्टिभेदेन दशतत्त्वानि विन्यसेत् ॥ नमोंतमूलमंत्रार्णपदायाग्यानि चात्मने ॥ २२५ ॥
मत्यंतानि च तत्त्वानि पृथिव्याद्यानि च क्रमात्॥पृथ्वी जलं तथा वह्निर्वायुराकाशमेव च ॥ २२६॥ अहंकारो महत्तत्वं प्रकृतिं पुरुषं परम् ॥ प्रवि
न्यसेन्मस्तके च नेत्रयोः श्रोत्रयोर्नसोः॥ २२७ ॥ वदने हृदये नाभौ लिंगे जान्वोश्च पादयोः॥प्रणवांतरितान्वर्णान्हृदंतान्विन्यसेन्मनोः ॥२२८ ॥
सृष्टिन्यासोऽयमाख्यातः स्थितिन्यासं शृणु द्विज ॥ हृदि नाभौ ध्वजे जान्वोः पादयोर्मस्तके पुनः ॥ २२९ ॥ नेत्रयोः कर्णयोर्घ्राणे वदने विन्यसे
त्क्रमात् ॥ पदोर्जान्वोर्लिंगदेशे नाभौ हृदि मुखे नसोः ॥२३०॥ कर्णयोर्नेत्रयोर्मूर्ध्नि संहाराख्योऽयमीरितः ॥ सृष्ट्यंतो वर्णिनांन्यासः स्थित्यंतो गृहमे
धिनाम् ॥ २३१॥ यतेर्वैराग्ययुक्तस्य संहारांतः प्रकीर्तितः ॥ चतुर्द्धा वर्णिनां चैव गृहस्थानां च पंचधा॥ २३२॥ यतीनां च त्रिधा न्यासः प्रोक्तोऽयं
क्रमतः शुभः ॥ केचिद्विरक्ते गृहगे संहारांतं विदुर्बुधाः ॥२३३ ॥ विभूतिपंजरं न्यासं कुर्यादिष्टाप्तये ततः॥मनोर्दशावृत्तिमयं कृष्णसांनिध्यकारकम्॥
॥२३४॥ आधारे च ध्वजे नाभौ हृदि कंठे मुखे शये॥ ऊर्वोश्च कंधरायां च नाभौ कुक्षौ तथा हृदि ॥२३५॥ स्तनयोः पार्श्वयोः श्रोण्योर्मस्तके वदने
तथा ॥ नेत्रयोः कर्णयोर्नासापुटयोश्च कपोलयोः ॥२३६॥ एवं दक्षिणदोर्मूलसंध्यग्रेष्वंगुलीषु च ॥ततः शिरसि तत्पूर्वाद्याशासु स्वकलासु च॥२३७॥
दोष्णोः सक्थ्नोः शिरोक्ष्यास्यकंठहृज्जठरेषु च ॥ मूलाधारे लिंगदेशे जानुनोः पादयोस्तथा ॥ २३८ ॥ श्रोत्रगंडांसवक्षोजपार्श्वलिंगेषु विन्यसेत् ॥
ऊर्वोर्जान्वोर्जंघयोश्च पादयोर्विन्यसेत्क्रमात् ॥ २३९ ॥ विभूतिपंजराख्योऽयं न्यासः सर्वार्थसिद्धिदः ॥ अनेन न्यासवर्येण साक्षात्कृष्णतनुर्भ
वेत् ॥ २४० ॥ मूर्तिपंजरनामानं न्यासं पूर्वोदितं न्यसेत् ॥ ततो दशांगपंचांगौ न्यासवर्यौ न्यसे क्रमात् ॥ २४१ ॥ हृदि मूर्ध्नि शिखायां च
सर्वांगे दिक्षु पार्श्वयोः ॥ कट्यां पृष्ठे तथा मूर्ध्नि विन्यसेद्वैष्णवोत्तमः ॥ २४२ ॥ पंचांगानि न्यसेद्भूयश्चक्रैः प्राग्वत्समाहितः ॥ अन्योऽप्यष्टादशा
र्णोक्तः कर्तव्यो न्याससंचयः ॥ २४३ ॥ ततः किरीटमंत्रेण व्यापकं रचयेत्सुधीः ॥ वेणुबिल्वादिमुद्रांश्च दर्शयेत्साधकोत्तमः ॥ २४४ ॥
सुदर्शनस्य मंत्रेण कुर्याद्दिग्बंधनं ततः ॥ अनंगुष्ठाश्च ऋजवः करशाखा भवंति चेत् ॥ २४५ ॥ हृन्मुद्रेयं समाख्याता शिरोमुद्रा तथा भवेत् ॥
अधोंगुष्ठा तु या मुष्टिः शिखामुद्रेयमीरिता ॥ प्रसारितकरांगुल्योर्वर्ममुद्रेयमीरिता ॥ २४६ ॥ नाराचमुष्ट्या धृतबाहुयुग्मकां ष्ठतर्जन्युदितो ध्वनि
स्तु ॥ विष्वग्विमुक्ता कथितास्त्रमुद्रा यत्राक्षिणी तर्जनीमध्यमे च ॥ २४७ ॥ ओष्ठे वामकरांगुष्ठो लग्नस्तस्य कनिष्ठिका ॥ दक्षिणांगुष्ठसंसक्ता

तत्कनिष्ठा प्रसारिता ॥ २४८ ॥ तर्जनी मध्यमानामा किंचित्संकुच्य चालिता ॥ वेणुमुद्रेयमुदिता सुगुप्ता प्रेयसी हरेः ॥ नोच्यंते तत्र
सिद्धत्वान्मालाश्रीवत्सकौस्तुभाः ॥ २४९ ॥ वामांगुष्ठं समुद्रं तमपरकरांगुष्ठकेनाथ बद्ध्वा संपीड्याग्रं च दक्षांगुलिभिरपि च तां वामहस्तांगु
लीभिः ॥ गाढं बद्ध्वा स्वकीये हृदयसरसिजे स्थापयेत्कामबीजं प्रोच्चार्यैषा तु गोप्या सकलसुखकरी विल्वमुद्रा मुनींद्रैः ॥२५०॥ कायेन मनसा वाचा
यत्पापं समुपार्जितम् ॥ मुद्राया ज्ञानमात्रेण सर्वं नाशमुपैष्यति ॥ २५१ ॥ ध्यानं जपस्त्रिकालार्चा कार्या पूर्वोदिता मनोः ॥ सर्वेष्वेकः क्रमः प्रोक्तो
दशार्णाष्टादशार्णयोः ॥ २५२ ॥ एवं सिद्धे मनौ मंत्री प्रयोगान्कर्तुमर्हति ॥ उद्दंडबाहुदोर्दंडधृतगोवर्द्धनाचलम् ॥२५३॥ अन्यहस्तांगुलीव्यक्तस्वरवं
शार्पिताननम्॥ध्यायन्कृष्णं जपेन्मंत्रं व्रजेच्छत्रं विना सुधीः॥२५४॥वर्षवाताशनिभ्योऽपि भयं तस्य न जायते ॥ मोघमेघौघव्राताद्रगतेन्द्रं तं स्मर
न्हुनेत् ॥ २५५ ॥ लोणैरयुतसंख्यैः स्यादनावृष्टिर्न संशयः ॥ क्रीडंतमर्कजातीरे मज्जनस्नापनादिभिः ॥ २५६ ॥ तच्छीकरजलासारैः सिच्यमानं
प्रियाजनैः ॥ ध्यात्वायुतं पयः सिक्तैर्हुनेद्वा नीरतर्पणैः ॥२५७॥ वृष्टिर्भवत्यकालेऽपि महती नात्र संशयः॥सदाहमोहैरार्तस्य विस्फोटकज्वरादिभिः
॥२५८॥ अमुमेव स्मरन्मूर्ध्नि जपेच्छांतिर्भवेत्क्षणात् ॥ अथवा गरुडारूढं प्रद्युम्नबलसंयुतम् ॥ २५९ ॥ निजज्वरनिष्पिष्टज्वराभिष्टुतमच्युतम् ॥
ध्यात्वा मूर्ध्नि जपेन्मंत्रं ज्वरमुक्तो भवेज्ज्वरी ॥ २६० ॥ ध्यात्वैवमग्नावभ्यर्च्य यथोक्तैश्चतुरंगुलैः ॥ जुहुयादमृताखण्डैरयुतं ज्वरशांतये ॥ २६१ ॥
शिलीमुखविनिर्भिन्नभीष्मतापहरं हरिम् ॥ ध्यात्वा जपेत्स्पृशन्नार्तं पाणिभ्यां ज्वरशांतये ॥ २६२ ॥ सांदीपनाय ददतं पुत्रं ध्यात्वायुतं हुनेत् ॥
यथोक्तैरमृताखंडैरपमृत्युनिवृत्तये ॥ २६३ ॥ सपार्थं मृतपुत्रायार्पयंतं च द्विजन्मने ॥ सुतं ध्यात्वा जपेल्लक्षं पुत्रपौत्रादिवृद्धये ॥ २६४ ॥ पुत्रजीव
फलैर्हुत्वायुतं मधुरसंप्लुतैः ॥ तत्काष्ठैरेधिते वह्नौ सुतान्दीर्घायुषो लभेत् ॥ २६५ ॥ क्षीरद्रुक्वाथसंपूर्णमभ्यर्च्य कलशं निशि ॥ प्रातर्जप्त्वायुतं
नारीमभिषिंचेद्द्विषड्दिनम् ॥ २६६ ॥ एवं कृते तु वंध्यापि लभेत्पुत्रांश्चिरायुषः ॥ प्रातर्वाचंयमाश्वत्थदलसंपुटकं जलम्॥२६७॥ अष्टोत्तरशतं जप्तं
मासं पुत्रार्थिनी पिबेत् ॥ सर्वलक्षणसंपन्नं वंध्यापि लभते सुतम् ॥२६८॥ जित्वा कृत्यां काशिराजप्रेषितां च निजारिणः॥तेजसा तस्य नगरं दहंतं
भावयन्हरिम् ॥ २६९ ॥ हुनेत्सप्तदिनं मंत्री सुस्नेहाक्तैश्च सर्षपैः ॥ कृत्याकर्तारमेवास्मै कुपिता नाशयेद्ध्रुवम् ॥ २७० ॥ बदरीद्रुमसंकीर्णे स्थितं
दिव्याश्रमे शुभे ॥ स्पृशंतं करपद्माभ्यां घंटाकर्णकलेवरम् ॥ २७१ ॥ ध्यात्वैवं जुहुयाल्लक्षं तिलैस्त्रिमधुराप्लुतैः ॥ महापापयुतोऽप्येवं पूतो भवति
तत्क्षणात् ॥२७२॥ द्यूतासक्तौ रुक्मिबलौ द्वेषयंतं हरिं स्मरन् ॥ जुहुयादिष्टयोर्द्विष्ट्यै गुलिका गोमयोद्भवाः ॥ २७३॥ नित्यं सहस्रं सप्ताहान्मिथो

िद्वेषयेदरीन् ॥ वर्षंतं गरुडारूढं ज्वलदग्निमुखैः शरैः ॥ २७४ ॥ धावंतं रिपुसंघातमनुधावत्तमच्युतम् ॥ ध्यात्वा सप्तसहस्रं तु जपे
न्मंत्रमनन्यधीः ॥ २७५ ॥ उच्चाटनं भवत्येव शत्रूणां सप्तभिर्दिनैः ॥ ध्यायन्नुत्क्षिप्तवत्सं तु कपित्थफलहारिणम् ॥ २७६ ॥ प्रजपेदयुतं शत्रुमुच्चा
टयति तत्क्षणात् ॥ आत्मानं कंसमथनं ध्यायन्मंचान्निपातितम् ॥२७७॥ कंसात्मानं व्यकर्षन्तं गतासुं तं जपेन्मनुम् ॥ रिपुजन्मर्क्षवृक्षोत्थसमि
द्भिरयुतं निशि ॥२७८॥ जुहुयादेवमुग्रोऽपि सपत्नो निधनं व्रजेत् ॥ अथवा निंबतैलाक्तैर्हुनेदेधोभिरक्षजैः ॥२७९॥ अयुतं नियतो रात्रौ मारये
दचिरादरीन् ॥ निशादिष्टदलव्योषकार्पासास्थिकरैर्निशि ॥ २८० ॥ हुनेदेरंडतैलाक्तैः श्मशाने रिपुशांतये ॥ न शस्तं मारणं कर्म कुर्याच्चेदयुतं
हुनेत् ॥ २८१ ॥ पायसैर्वा हुनेत्तावच्छांतये शांतमानसः ॥ पारिजातहरं कृष्णं ध्यायन् लक्षं जपेन्मनुम् ॥ २८२ ॥ सर्वत्रैव जयस्तस्य न कदापि
पराजयः ॥ व्याख्यामुद्राकरं कृष्णं रथस्थं भावयञ्जपेत् ॥२८३॥ पार्थे दिशंतं गीतार्थं धर्मवृद्ध्यै सुमानवः ॥ पालाशपुष्पमध्वक्तैर्लक्षं विद्याप्तये
हुनेत् ॥ २८४ ॥ राष्ट्रपूर्ग्रामवस्तूनां शरीरस्यापि रक्षणे ॥ विश्वरूपधरं प्रोद्यद्भानुकोटिसमप्रभम् ॥ २८५ ॥ अग्नीषोमात्मकं कृष्णं द्रुतचामीकरप्र
भम् ॥ अर्काग्निद्योतितास्यांघ्रिपंकज दिव्यभूषणम् ॥ २८६ ॥ नानायुधधरं प्राप्तं विश्वाकाशावकाशकम् ॥ ध्यात्वा लक्ष जपेन्मन्त्रं रक्षणाय समा
हितः ॥ २८७ ॥ रक्तैर्वन्यप्रसूनैर्यो दिनादौ पूजयेद्धरिम् ॥ दिनमध्योक्तविधिना जपेदष्टोत्तरं शतम् ॥ २८८ ॥ सहस्रमंडलान्मन्त्री वशयेन्मुखरा
न्द्विजान् ॥ जातिपुष्पैः क्षत्रियांश्च गोपवेषधरं स्मरन् ॥ २८९ ॥ ध्यायन् क्रीडारतं कृष्णं रक्तैरश्वारिपुष्पकैः ॥ वशयेद्वैश्यजातीयान् शूद्रान्नीलो
त्पलैः स्मरन् ॥ २९० ॥ गीतनृत्यरतं श्वेतपुष्पैः साज्यैश्च तंदुलैः ॥ हुत्वान्वहं सप्तदिनं भस्म भाले च मूर्द्धनि ॥ २९१ ॥ धारयन्वशयेत्कांतां
सापि तद्वत्पतिं ध्रुवम् ॥ तांबूलं कुसुमं वासोंऽजनं चंदनमेव च ॥ २९२ ॥ सहस्रं मनुना जप्तं दद्याद्यस्मै नराय च ॥ सोऽचिरादेष वशगः
सपुत्रपशुबांधवः ॥ २९३ ॥ वृन्दारण्यस्थितं ध्यायन्बल्लवीसंयुतं हरिम् ॥ अपामार्गसमिद्भिस्तु हुत्वा तु वशयेज्जगत् ॥ २९४ ॥ संप्राप्य सद्गुरो
र्दीक्षां कृष्णं यो विधिनामुना ॥ अर्चयेद्वैष्णवश्रेष्ठः सोऽष्टसिद्धीश्वरो भवेत् ॥ २९५॥ तम्य दर्शनमात्रेण वादिनो निष्प्रभाः स्मृताः ॥ वसेत्सर
स्वती वक्त्रे गृहे चापि सभासदः ॥ २९६ ॥ भुक्त्वा नानाविधान्भोगानंते विष्णुपदं व्रजेत् ॥ २९७ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे तृतीयपादे
कृष्णमन्त्रनिरूपणं नामाशीतितमोऽध्यायः ॥ ८० ॥ श्रीसनत्कुमार उवाच ॥ अथ कृष्णस्य मंत्राणां वक्ष्ये भेदान् मुनीश्वर ॥ यान्समा
राध्य मनुजाः साधयंतीष्टमात्मनः ॥ १ ॥ शक्तिश्रीमारपूर्वश्च श्रीशक्तिस्मरपूर्वकः ॥ मारशक्तिरमापूर्वो दशार्णा मनवस्त्रयः ॥ २ ॥ मुनिः स्यान्ना

रदश्छन्दो गायत्री देवता पुनः ॥ कृष्णो गोविंदनामात्र सर्वकामप्रदो नृणाम्॥ ३ ॥चक्रैः पूर्ववदंगानि त्रयाणामपि कल्पयेत् ॥ ततः किरीटमनुना
व्यापकं हि समाचरेत् ॥ ४ ॥ सुदर्शनस्य मनुना कुर्याद्दिग्बंधनं तथा ॥ विंशत्यर्णोक्तवत्कुर्यादाद्ये ध्यानार्चनादिकम् ॥ ५ ॥ द्वितीये तु दशार्णोक्तं
ध्यानपूजादिकं चरेत् ॥ तृतीये तु हरिं ध्यायेत्समाहितमनाः सुधीः ॥ ६ ॥ शंखचक्रधनुर्बाणपाशांकुशधरारुणम् ॥ दोर्भ्यां धृतं धमंतं च वेणुं
कृष्णदिवाकरम् ॥ ७ ॥ एवं ध्यात्वा जपेन्मंत्रान्पञ्चलक्षं पृथक् सुधीः ॥ जुहुयात्तद्दशांशेन पायसेन ससर्पिषा ॥ ८ ॥ एवं सिद्धे मनौ
मंत्री कुर्यात्काम्यानि पूर्ववत् ॥ श्रीशक्तिकामः कृष्णाय गोविंदायाग्निसुन्दरी ॥ ९ ॥ रव्यर्णो ब्रह्मगायत्रीकृष्णा ऋष्यादयोऽस्य तु ॥ बीजै
रमाब्धियुग्मार्णैः षडंगानि प्रकल्पयेत् ॥ १० ॥ विंशत्यर्णोदितजपध्यानहोमार्चनादिकम् ॥ किं बहूक्तेन मंत्रोऽयं सर्वाभीष्टफलप्रदः ॥ ११॥
श्रीशक्तिस्मरपूर्वोगजन्मा शक्तिरमांतिकः ॥ दशाक्षरः स एवादौ प्रोक्तः शक्तिरमायुतः ॥ १२ ॥ मन्त्रौ षोडशरव्यर्णौ चक्रैरंगानि कल्पयेत् ॥
वरदाभयहस्ताभ्यां श्लिष्यंतं स्वांगके प्रिये ॥ १३ ॥ पद्मोत्पलकरे ताभ्यां श्लिष्टं चक्रदरोज्वलम् ॥ ध्यात्वैवं प्रजपेल्लक्षदशकं तद्दशांशतः
॥ १४ ॥ आज्यैर्हुत्वा ततः सिद्धौ भवेतां मन्त्रनायकौ ॥ सर्वकामप्रदौ सर्वसंपत्सौभाग्यदौ नृणाम् ॥ १५ ॥ अष्टादशार्णः कामांतो मनुः सुत
धनप्रदः ॥ नारदोऽस्य मुनिश्छंदो गायत्री देवता मनोः ॥ १६ ॥ कृष्णः कामो बीजमुक्तं शक्तिर्वह्निप्रिया मता ॥ षड्दीर्घाढ्येन बीजेन षडंगानि
समाचरेत् ॥ १७ ॥ पाणौ पायसपक्वं च दक्षे हैयंगवीनकम् ॥ वामे दधद्दिव्यदिगंबरो गोपीसुतोऽवतु ॥ १८ ॥ ध्यात्वैवं प्रजपेन्मंत्रं द्वात्रिंशल्लक्ष
मानतः ॥ दशांशं जुहुयादग्नौ सिताढ्येन पयोंऽधसा ॥ १९ ॥ पूर्वोक्तवैष्णवे पीठे यजेदष्टादशार्णवत् ॥ पद्मस्थं कृष्णमभ्यर्च्य तर्पयेत्तन्मुखां
बुजे ॥ २० ॥ क्षीरेण कदलीपक्वैर्दध्ना हैयंगवेन च ॥ पुत्रार्थी तर्पयेदेवं वत्सराल्लभते सुतम् ॥ २१ ॥ यद्यदिच्छति तत्सर्वं तर्पणादेव सिद्ध्यति ॥
वाक्कामो ङेयुतं कृष्णपदं माया ततः परम् ॥ २२॥ गोविंदाय रमा पश्चाद्दशार्णं च समुद्धरेत् ॥ मनुस्वरयुतौ सर्गयुक्तौ भृगुतदूर्ध्वगौ॥ २३॥ द्वाविंश
त्यक्षरो मन्त्रो वागीशत्वप्रदायकः ॥ ऋषिः स्यान्नारदश्छन्दो गायत्री देवता पुनः ॥ २४ ॥ विद्याप्रदश्च गोपालः कामो बीजं प्रकीर्ति
तम् ॥ शक्तिस्तु वाग्भवं विद्याप्राप्तये विनियोजना ॥ २५ ॥ वामोर्द्ध्वहस्ते दधतं विद्यापुस्तकमुत्तमम् ॥ अक्षमालां च दक्षोर्द्ध्वस्फाटिकीं मातृका
मयीम् ॥ २६ ॥ शब्दब्रह्ममयं वेणुमधः पाणिद्वये पुनः ॥ गायत्रीगीतवसनं श्यामलं कोमलच्छविम् ॥ २७ ॥ बर्हावतंसं सर्वज्ञं सेवितं
मुनिपुंगवैः ॥ ध्यात्वैवं प्रमदावेशविलासं भुवनेश्वरम् ॥ २८ ॥ वेदलक्षं जपेन्मंत्रं किंशुकैस्तद्दशांशतः ॥ हुत्वा तु पूजयेन्मन्त्री विंशत्यर्ण

विधानतः ॥२९॥ एवं यो भजते मन्त्रं भवेद्वागीश्वरस्तु सः ॥ अदृष्टान्यपि शास्त्राणि तस्य गंगातरंगवत् ॥३०॥ तारः कृष्णयुगं पश्चान्महाकृष्ण
इतीरयेत् ॥ सर्वज्ञ त्वंप्रशब्दांते सीदमेऽग्निश्च मारम ॥ ३१ ॥ णांते विद्येश विद्यामाशु प्रयच्छ ततश्च मे ॥ त्रयस्त्रिंशदक्षरोऽयं महाविद्याप्रदो
मनुः ॥ ३२ ॥ नारदोऽस्य मुनिश्छन्दोऽनुष्टुप् कृष्णोऽस्य देवता ॥ पादैः सर्वेण पंचांगं कृत्वा ध्यायेत्ततो हरिम् ॥ ३३ ॥ दिव्योद्याने विवस्वत्प्रति
ममणिमये मण्डपे योगपीठे मध्ये यः सर्ववेदांतमयसुरतरोः संनिविष्टो मुकुन्दः ॥ वेदैः कल्पद्रुरूपैः शिखरिशतसमालंबिकोशैश्चतुर्भिर्न्यायैस्तर्कैं
पुराणैः स्मृतिभिरभिवृतस्तादृशैश्चामराद्यैः ॥ ३४ ॥ दद्याद्विभ्रत्कराग्रैरपि दरमुरलीपुष्पबाणेक्षुचापानक्षस्पृक्पूर्णकुंभौ स्मरललितवपुर्दिव्यभूषांग
रागः ॥व्याख्यां वामे वितन्वन् स्फुटरुचिरपदो वेणुना विश्वमात्रे शब्दब्रह्मोद्भवेन श्रियमरुणरुचिर्बल्लवीवल्लभो नः ॥ ३५ ॥ एवं ध्यात्वा जपेल्लक्षं
दशांशं पायसैर्हुनेत् ॥ अष्टादशार्णवत्कुर्याद्यजनं चास्य मन्त्रवित् ॥ ३६ ॥ तारो नमो भगवते नन्दपुत्राय संवदेत् ॥ आनन्दवपुषे दद्याद्दशार्णं
तदनंतरम् ॥ ३७ ॥ अष्टाविंशतिवर्णोऽयं मंत्रः सर्वेष्टदायकः ॥ नंदपुत्रपदं ङेंतं श्यामलांगपदं तथा ॥ ३८ ॥ तथा बालवपुःकृष्णं गोविंदं
च तथा पुनः ॥ दशार्णोऽतो भवेन्मंत्रो द्वात्रिंशदक्षरान्वितः ॥ ३९ ॥ अनयोर्नारदऋषिश्छंदस्तूष्णिगनुष्टुभौ ॥ देवता नन्दपुत्रस्तु विनियोगोऽ
खिलाप्तये ॥ ४० ॥ चक्रैः पंचांगमर्चास्यादंगदिक्पालहेतिभिः ॥ दक्षिणे रत्नचषकं वामे सौवर्णनेत्रकम् ॥ ४१ ॥ करे दधानं देवीभ्यां
श्लिष्टं संचिंतयेद्विभुम् ॥ लक्षं जपो दशांशेन जुहुयात्पायसेन तु ॥ ४२ ॥ एताभ्यां सिद्धमंत्राभ्यां मंत्री कुर्याद्यथेप्सितम् ॥ प्रणवः कमला
माया नमो भगवते ततः ॥ ४३ ॥ नंदपुत्राय तत्पश्चाद्बालान्ते वपुषे पदम् ॥ ऊनविंशतिवर्णोऽयं मुनिर्ब्रह्मा समीरितः ॥ ४४ ॥
छंदोऽनुष्टुप् देवता च कृष्णो बालवपुः स्वयम् ॥ मन्त्रोऽयं सर्वसंपत्तिसिद्धये सेव्यते बुधैः ॥ ४५ ॥ तारो हृद्भगवान्ङेंतो रुक्मिणीवल्लभाय च ॥
वह्निजायावधिः प्रोक्तो मंत्रः षोडशवर्णवान् ॥४६॥ नारदोऽस्य मुनिश्छन्दोऽनुष्टुप् च देवता मनोः ॥ रुक्मिणीवल्लभश्चंद्रदृग्वेदांगाक्षिवर्णकैः ॥पञ्चां
गानि प्रकुर्वीत ततो ध्यायेत्सुरेश्वरम् ॥ ४७ ॥ तापिच्छच्छविरंकगां प्रियतमां स्वर्णप्रभामंबुजप्रोद्यद्वामभुजां स्ववामभुजयाश्लिष्यन्स्वचित्ताशया ॥
श्लिष्यंतीं स्वयमन्यहस्तविलसत्सौवर्णवेत्रश्चिरं पायान्नः सुविशुद्धपीतवसनो नानाविभूषो हरिः ॥ ४८ ॥ ध्यात्वैवं प्रजपेल्लक्षं रक्तैः पद्मैर्दशांशतः ॥
॥ ४९ ॥ त्रिमध्वक्तैर्हुनेत्पीठे पूर्वोक्ते पूजयेद्धरिम् ॥ अंगैर्नारदमुख्यैश्च लोकेशैश्च तदायुधैः ॥ ५० ॥ एवं सिद्धो मनुर्दद्यात्सर्वान्कामांश्च मंत्रिणे ॥
लीलादंडपदाब्जोऽपि जनसंसक्तदोः पदम् ॥५१॥ दंडांते वा धरावह्निरधीशाढ्योऽथ लोहितः ॥ मेघश्यामपदं पश्चाद्भगवन् सलिलंसदृक् ॥ ५२ ॥

ष्णो इत्युक्त्वा ठद्वयं स्यादेकोनत्रिंशदर्णवान्॥नारदोऽस्य मुनिश्छंदोऽनुष्टुप् च देवता मनोः॥९३॥लीलादंडहरिः प्रोक्तो मन्वब्धियुगवह्निभिः॥वेदैः पंचां
गकं भागैर्मंत्रवर्णोत्थितैः क्रमात् ॥ ९४ ॥ संमोहयंश्च निजवामकरस्थलीलादंडेन गोपयुवतीः परसुंदरीश्च ॥ दिश्यन्निजप्रियसखांसगदक्षहस्तो देव
श्रियं निहतकंस उरुक्रमो नः ॥ ९५ ॥ लक्षं जपो दशांशेन जुहुयात्तिलतण्डुलैः ॥ त्रिमध्वक्तैस्ततोऽभ्यर्च्चेदंगं दिक्पालहेतिभिः ॥ ९६ ॥ लीलादंड
हरिं यो वै भजते नित्यमादरात् ॥ स सर्वैः पूज्यते लोकैस्तस्य गेहे स्थिरा रमा ॥ ९७ ॥ सद्योरूढा स्मृतिस्तोयं केशवाढ्यधरायुगम् ॥ भयाग्निव
ल्लभामंत्रः सप्तार्णः सर्वसिद्धिदः ॥ ९८ ॥ ऋषिः स्यान्नारदश्छंदो उष्णिग्गोवल्लभस्य तु ॥ देवतापूर्ववच्चक्रैः पञ्चांगानि तु कल्पयेत् ॥ ९९ ॥
ध्येयो हरिः सकपिलागणमध्यसंस्थस्ता आह्वयन्दधद्दक्षिणदोस्थवेणुम् ॥ पाशं सयष्टिमपरत्र पयोदनीलः पीताम्बराहिरिपुपिच्छकृतावतंसः
॥ ६० ॥ सप्तलक्षं जपेन्मंत्रं दशांशं जुहुयात्ततः ॥ गोदुग्धैः पूजयेत्पीठे स्यादंगैः प्रथमावृतिः ॥ ६१ ॥ सुवर्णपिंगलां गौरपिंगलां रक्तपिंगलाम् ॥
गुडपिंगां बभ्रुवर्णां चोत्तमां कपिलां तथा ॥ ६२ ॥ चतुष्कपिङ्गलां पीतपिङ्गलां चोत्तमां शुभाम् ॥ गोगणाष्टकमभ्यर्च्य लोकेशानायुधैर्युतान्
॥ ६३ ॥ संपूज्यैवं मनौ सिद्धे कुर्यात्काम्यानि मंत्रवित् ॥अष्टोत्तरसहस्रं यः पयोभिर्दिनशो हुनेत् ॥ ६४ ॥ पक्षात्सगोगणो मुक्तो दशार्णे
चाप्ययं विधिः ॥तारो हृद्भगवान् ङेंतः श्रीगोविंदस्तथा भवेत् ॥६५॥ द्वादशार्णो मनुः प्रोक्तो नारदोऽस्य मुनिर्मतः॥छंदः प्रोक्तं च गायत्री श्रीगो
विन्दोऽस्य देवता ॥ चन्द्राक्षियुगभूतार्णैः सर्वैः पंचांगकल्पनम्॥ ६६॥ ध्यायेत्कल्पद्रुमूलाश्रितमणिविलसद्दिव्यसिंहासनस्थं मेघश्यामं पिशंगांशुकम
तिसुभगं शंखवेत्रे कराभ्याम् ॥ ६७ ॥ बिभ्राणं गोसहस्रैर्वृतममरपतिं प्रौढहस्तैककुंभप्रश्चोतत्सौधधारास्नपितमभिनवांभोजपत्राभनेत्रम् ॥ ६८ ॥
रविलक्षं जपेन्मंत्रं दुग्धैर्हुत्वा दशांशतः ॥ यजेच्च पूर्ववद्गोष्ठस्थितं वा प्रतिमादिषु ॥ ६९ ॥ पूर्वोक्ते वैष्णवे पीठे मूर्तिं संकल्प्य मूलतः ॥ तत्रा
वाह्य यजेत्कृष्णं गुरुपूजनपूर्वकम् ॥ ७० ॥ रुक्मिणीं सत्यभामां च पार्श्वयोरिंद्रमग्रतः ॥ पृष्ठतः सुरभिं चेष्ट्वा केसरेष्वंगपूजनम् ॥ ७१ ॥ कालिं
द्याद्या महिष्योऽष्टौ वसुपत्रेषु संस्थिताः ॥ पीठकोणेषु बद्धादिकिंकिणीं च तथा पुनः ॥ ७२ ॥ दामानि पृष्ठयोर्वेणुं पुरः श्रीवत्सकौस्तुभौ ॥
अग्रतो वनमालादिर्दिक्ष्वष्टसु तथा स्थिताः ॥ ७३ ॥ पांचजन्यं गदा चक्रं वसुदेवश्च देवकी ॥ नंदगोपो यशोदा च सगोगोपालगो
पिकाः ॥ ७४ ॥ इंद्राद्याश्च स्थिता बाह्ये वज्राद्याश्च ततः परम् ॥ कुमुदः कुमुदाक्षश्च पुंडरीकोऽथ वामनः ॥ ७५ ॥ शंकुकर्णः
सर्वनेत्रः सुमुखः सुप्रतिष्ठितः ॥ विष्वक्सेनश्च संपूज्यः स्वात्मा चार्च्यस्ततः परम् ॥ ७६ ॥ एककालं त्रिकालं वा यो गोविंदं यजेन्नरः ॥

स चिरायुर्निरातंको धनधान्यपतिर्भवेत् ॥ ७७ ॥ स्मृतिः सद्यान्विता चक्री दक्षकर्णयुतोधरा ॥ नाथाय हृदयांतोऽयं वसुवर्णो महामनुः
॥ ७८ ॥ मुनिर्ब्रह्मास्य गायत्री छंदः कृष्णोऽस्य देवता ॥ वर्णद्वंद्वैश्च सर्वेण पंचांगान्यस्य कल्पयेत् ॥ ७९ ॥ पंचवर्षमतिलोलमंगणे
धावमानमतिचंचलेक्षणम् ॥ किंकिणीवलयहारनूपुरै रंजितं नमत गोपबालकम् ॥ ८० ॥ एवं ध्यात्वा जपेदष्टलक्षं मंत्री दशांशतः ॥ ब्रह्मवृक्षस
मिद्भिश्च जुहुयात्पायसेन वा ॥ ८१ ॥ प्रागुक्ते वैष्णवे पीठे मूर्तिं संकल्प्य मूलतः ॥ तत्रावाह्यार्चयेत्कृष्णं मंत्री वै स्थिरमानसः ॥ ८२ ॥ केसरेषु
चतुर्दिक्षु विदिक्ष्वंगानि पूजयेत् ॥ वासुदेवं बलं दिक्षु प्रद्युम्नमनिरुद्धकम् ॥ ८३ ॥ विदिक्षु रुक्मिणीसत्यभामे वै लक्ष्मणर्क्षजे ॥ लोकेशान्सा
युधान्बाह्ये एवं सिद्धो भवेन्मनुः ॥ ८४ ॥ तारः श्रीभुवनाकामो ङेंतं श्रीकृष्णमीरयेत् ॥ श्रीगोविंदं ततः प्रोच्य गोपीजनपदं ततः॥८५॥ वल्ल
भाय ततः पद्मात्रयं तत्वाक्षरो मनुः ॥ मुन्यादिकं च पूर्वोक्तं सिद्धगोपालकं स्मरेत् ॥ ८६ ॥ माधवीमंडपासीनौ गरुडेनाभिपालितौ ॥ दिव्य
क्रीडासु निरतौ रामकृष्णौ स्मरन् जपेत् ॥ ८७ ॥ पूजनं पूर्ववच्चास्य कर्तव्यं वैष्णवोत्तमैः ॥ चक्री मुनिस्वरोपेतः सर्गी चैकाक्षरो मनुः ॥ ८८ ॥
कृष्णेति द्व्यक्षरः प्रोक्तः कामादिः स्यात्त्रिवर्णकः॥ सैव ङेंतो युगार्णः स्यात्कृष्णाय नम इत्यपि॥८९॥ पंचाक्षरश्च कृष्णाय कामरुद्धस्तथा परः ॥
गोपालायाग्निजायांतो रसवर्णः प्रकीर्तितः ॥ ९० ॥ कामः कृष्णपदं ङेंतं वह्निजायांतकः परः ॥ कृष्णगोविंदकौ ङेंतौ सप्तार्णः सर्वसिद्धिदः
॥९१॥श्रीशक्तिकामाः कृष्णाय कामः सप्ताक्षरः परः ॥ कृष्णगोविंदकौ ङेंतौ हृदंतोऽन्यो नवाक्षरः ॥९२॥ ङेंतौ च कृष्णगोविंदौ तथा कामः पुटः
परः ॥कामः शार्ङ्गी धरासंस्थो मन्विद्वाब्यश्च मन्मथः॥९३॥श्यामलांगाय हृदयं दशार्णः सर्वसिद्धिदः ॥ बालंते वपुषे कृष्णायाग्निजायांतिमोऽपरः॥
॥९४॥ द्विठांते बालवपुषे कामः कृष्णाय संवदेत् ॥ ततो ध्यायन्स्वहृदये गोपीजनमनोहरम् ॥ ९५॥श्रीवृन्दाविपिनप्रतोलिषु नमत्संफुल्लवल्लीतति
ष्वंतर्जालविघट्टनैः सुरभिणा वातेन संसेविते ॥ कालिंदीपुलिने विहारिणमथो राधैकजीवातुकं वंदे नन्दकिशोरमिंदुवदनं स्निग्धांबुदाडंबरम् ॥
॥ ९६॥ पूर्वोक्तवर्त्मना पूजा ज्ञेया ह्येषां मुनीश्वर ॥ देवकीसुतवर्णांते गोविंदपदमुच्चरेत् ॥ ९७ ॥ वासुदेवपदं प्रोच्य संबुद्ध्यंतं जगत्पतिम् ॥ देहि
मे तनयं पश्चात्कृष्ण त्वामहमीरयेत् ॥९८॥ शरणं गत इत्यंतो मन्त्रो द्वात्रिंशदक्षरः ॥ नारदोऽस्य मुनिश्छंदो गायत्री चाप्यनुष्टुभम् ॥ देवः सुतप्रदः
कृष्णः पादैः सर्वेण चांगकम्॥९९॥विजयेन युतो रथस्थितः प्रसमानीय समुद्रमध्यतः॥ प्रददत्तनयान् द्विजन्मने स्मरणीयो वसुदेवनन्दनः॥१००॥ लक्षं
जपोऽयुतं होमास्तिलैर्मधुरसंप्लुतैः॥अर्चा पूर्वोदिते पीठे अंगलोकेश्वरायुधैः॥१०१॥ एवं सिद्धे मनौ मंत्री वंध्यायामपि पुत्रवान् ॥तारो माया ततः सांत

सेंदुध्वांतश्च सर्ववान्॥१०२॥सोऽहं वह्निप्रियांतोऽयं मंत्रो वस्वक्षरः परः॥पंचब्रह्मात्मकस्यास्य मंत्रस्य मुनिसत्तमः॥१०३॥ऋषिर्ब्रह्मा च परमा गायत्री
छंद ईरितम्॥परंज्योतिः परं ब्रह्म देवता परिकीर्तितम्॥१०४॥प्रणवो बीजमाख्यातं स्वाहा शक्तिरुदाहृता॥स्वाहेति हृदयं प्रोक्तं सोऽहं वेति शिरो मतम्
॥१०५॥हंसश्चेति शिखा प्रोक्ता हृल्लेखा कवचं स्मृतम्॥प्रणवो नेत्रमाख्यातमस्त्रं हरिहरेति च॥१०६॥स ब्रह्मा स शिवो विप्र स हरिः सैव देवराट्॥स सर्व
रूपः सर्वाख्यः सोऽक्षरः परमः स्वराट्॥१०७॥एवं ध्यात्वा जपेदष्टलक्षहोमो दशांशतः॥पूजाप्रणवपीठेऽस्य सांगावरणकैर्मता॥१०८॥एवं सिद्धे मनौ
ज्ञानं साधकेंद्रस्य नारद ॥ जायते तत्त्वमस्यादिवाक्योक्तं निर्विकल्पकम् ॥ १०९ ॥ कामो ङेंतो हृषीकेशो हृदयांतो गजाक्षरः ॥ऋषिर्ब्रह्मास्य
गायत्री छंदो गायत्रमीरितम् ॥११०॥ देवता तु हृषीकेशो विनियोगोऽखिलाप्तये ॥कामो बीजं तथायेति शक्तिरस्य ह्युदाहृता ॥ १११ ॥बीजेनैव
षडंगानि कृत्वा ध्यानं समाचरेत् ॥ पुरुषोत्तममंत्रोक्तं सर्वं वास्य प्रकीर्तितम् ॥ ११२ ॥ लक्षं जपोऽयुतं होमो घृतेनैव प्रकीर्तितः ॥ तर्पणं सर्व
कामाप्त्यै प्रोक्तं संमोहिनीसुमैः ॥ ११३ ॥ श्रीबीजं च चतुर्थ्यंतः श्रीधरो ङेंतकस्तथा ॥ त्रैलोक्यमोहनः शब्दो नमोंऽतो मनुरीरितः॥ ११४ ॥
ऋषिर्ब्रह्मा च गायत्री छन्दः श्रीधरदेवता ॥ श्रीबीजं शक्तिरापेति बीजेनैव षडंगकम् ॥ ११५ ॥ पुरुषोत्तमवद्ध्यानपूजादिकमिहोदितः ॥ लक्षं
जपस्तथा होम आज्येनैव दशांशतः ॥११६ ॥सुगंधश्वेतपुष्पैस्तु पूजां होमादिकं चरेत्॥एवं कृते तु विप्रेन्द्र साक्षात्स्याच्छ्रीधरः स्वयम् ॥११७॥
अच्युतानन्तगोविंदपदं ङेंतं नमोंतिमम् ॥ मंत्रोऽस्य शौनकऋषिर्विराट् छंदः प्रकीर्तितम्॥११८॥एषां पराशरव्यासनारदा ऋषयः स्मृताः॥विराट्
छन्दः समाख्यातं परब्रह्मात्मको हरिः ॥ ११९ ॥ देवताबीजशक्ती तु पूर्वोक्ते साधकैर्मते ॥ शंखचक्रधरं देवं चतुर्बाहुं किरीटिनम् ॥ १२० ॥
सर्वैरप्यायुधैर्युक्तं गरुडोपरि संस्थितम् ॥ सनकादिमुनींद्रैस्तु सर्वदेवैरुपासितम् ॥ १२१ ॥ श्रीभूमिसहितं देवमुदयादित्यसन्निभम् ॥ प्रातरुद्य
त्सहस्रांशुमंडलोपमकुंडलम् ॥ १२२ ॥ सर्वलोकस्य रक्षार्थमनन्तं नित्यमेव हि ॥ अभयं वरदं देवं प्रयच्छंतं मुदान्वितम् ॥ १२३ ॥ एवं ध्यात्वा
र्चयेत्पीठे वैष्णवे सुसमाहितः ॥ आद्यावरणसंगैः स्याच्चक्रशंखगदासिभिः ॥ १२४ ॥ मुशलाढ्यधनुःपाशांकुशैः प्रोक्तं द्वितीयकम्॥सनकादिकशा
क्तेयव्यासनारदशौनकैः॥१२५ ॥ तृतीयं लोकपालैस्तु चतुर्थं परिकीर्तितम् ॥ लक्षं जपो दशांशेन घृतेन हवनं स्मृतम्॥ १२६ ॥एवं सिद्धे मनौ
मंत्री प्रयोगानप्युपाचरेत् ॥ श्रीवृक्षमूले देवेंशं ध्यायन्वै रोगिणं स्मरन् ॥ १२७ ॥ स्पृष्ट्वा जप्त्वायुतं साध्यं स्मृत्वा वा मनसा द्विज ॥ रोगिणां रोग
निर्मुक्तिं कुर्यान्मंत्री तु मंडलात् ॥ १२८ ॥ कन्यार्थी जुहुयाल्लाजैर्बिल्वैश्चापि धनाप्तये ॥ वस्त्रार्थी गन्धकुसुमैरारोग्याय तिलैर्हुनेत् ॥ १२९ ॥

रविवारे जले स्थित्वा नाभिमात्रे जपेत्तु यः ॥ अष्टोत्तरसहस्रं वै स ज्वरं नाशयेद् ध्रुवम् ॥ १३० ॥ विवाहार्थं जपेन्मासं शशिमण्डलमध्यगम् ॥
ध्यात्वा कृष्णं लभेत्कन्यां वांछितां चापि नारद ॥ १३१ ॥ वसुदेवपदं प्रोच्य निगडच्छेदशब्दतः॥ वासुदेवाय वर्मास्त्रे स्वाहांतो मनुरीरितः॥ १३२॥
नारदोऽस्य ऋषिश्छन्दो गायत्री कृष्णदेवता ॥ वर्म बीजं शिरः शक्तिरन्यत्सर्वं दशार्णवत्॥ १३३॥बालः पवनदीर्घेंदुयुक्तो झिंटीशयुर्जलम् ॥ अत्रि
र्व्यासाय हृदयं मनुरष्टाक्षरोऽवतु ॥ १३४ ॥ ब्रह्मानुष्टुप् मुनिश्छन्दो देवः सत्यवतीसुतः ॥ आद्यं बीजं नमः शक्तिर्दीर्घाढ्यो नादिनांगकम् ॥ १३५॥
व्याख्यामुद्रिकया लसत्करतलं सद्योगपीठस्थितं वामे जानुतले दधानमपरं हस्तं सुविद्यानिधिम् ॥ विप्रव्रातवृतं प्रसन्नमनसं पाथोरुहांगद्युतिं
पाराशर्य्यमतीव पुण्यचरितं व्यासं स्मरेत्सिद्धये ॥१३६॥ जपेदष्टसहस्राणि पायसैर्होममाचरेत् ॥ पूर्वोक्तपीठे व्यासस्य पूर्वमंगानि पूजयेत्॥ १३७॥
प्राच्यादिषु यजेत्पैलं वैशंपायनजैमिनी ॥ सुमंतुं कोणभागेषु श्रीशुकं रोमहर्षणम् ॥ १३८ ॥ उग्रश्रवसमन्यांश्च मुनीन्सेंद्रादिकायुधान् ॥ एवं सिद्ध
मनुर्मंत्री कवित्वं शोभनाः प्रजाः ॥१३९॥ व्याख्यानशक्तिं कीर्तिं च लभते संपदां चयम् ॥ नृसिंहो माधवो दृष्टो लोहितो निगमादिमः ॥१४०॥
कृशानुजाया पञ्चार्णो मनुर्विषहरः परः ॥ अनंतपंक्तिपक्षीन्द्रा मुनिश्छन्दःसुरा मताः ॥ १४१ ॥ तारवह्निप्रिये बीजशक्ती मन्त्रस्य कीर्तिते ॥ज्वल
ज्वल महामंत्री स्वाहा हृदयमीरितम् ॥ १४२ ॥ गरुडेति पदस्यांते चूडाननशुचिप्रिया ॥ शिरोमन्त्रो गरुडतः शिखे स्वाहा शिखा मनुः ॥ १४३ ॥
गरुडेति पदं प्रोच्य प्रभंजययुगं वदेत् ॥ प्रभेदययुगं पश्चाद्वित्रासय विमर्दय ॥१४४॥ प्रत्येकं द्विस्ततः स्वाहा कवचस्य मनुर्मतः ॥ उग्ररूपधरांते तु
सर्वविषहरेतिच॥ १४५॥ भीषयद्वितयं प्रोच्य सर्वं दहदहेति च॥ भस्मीकुरु ततः स्वाहा नेत्रमन्त्रोऽयमीरितः॥ १४६॥ अप्रतिहतवर्णांते बलाय प्रहते
ति च॥ शासनांते तथा हुं फट् स्वाहास्त्रमनुरीरितः॥ १४७॥ पादे कटौ हृदि मुखे मूर्ध्नि वर्णान्प्रविन्यसेत्॥ १४८॥ तप्तस्वर्णनिभं फणींद्रनिकरैः क्लृप्तांग भूषं
प्रभुं स्मर्तॄणां शमयन्तमुग्रमखिलं नृणां विषं तत्क्षणात् ॥ चंच्वग्रप्रचलद्भुजंगमभयं पाण्योर्वरं बिभ्रतं पक्षोच्चारितसामगीतममलं श्रीपक्षिराजं
भजे ॥ १४९ ॥ पञ्चलक्षं जपेन्मंत्रं दशांशं जुहुयात्तिलैः ॥ पूजयेन्मातृकापीठे गरुडं वेदविग्रहम् ॥ १५० ॥ चतुर्थ्यन्तः पक्षिराजः स्वाहा पीठ
मनुः स्मृतः ॥ दृष्ट्वांगं कर्णिकामध्ये नागान्यंत्रेषु पूजयेत् ॥ १५१ ॥ तद्बहिर्लोकपालांश्च वज्राद्यैर्विलसत्करान् ॥ एवं सिद्धमनुर्मंत्री
नाशयेद्गरलद्वयम् ॥ देहांते लभते चापि श्रीविष्णोः परमं पदम् ॥ १५२ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे कृष्णादि
मन्त्रभेदनिरूपणं नामैकाशीतितमोऽध्यायः ॥ ८१ ॥ सनत्कुमार उवाच ॥ किं त्वं नारद जानासि पूर्वजन्मनि यत्त्वया ॥ प्राप्तं भगवतः साक्षा

च्छूलिनो युगलात्मकम् ॥ १ ॥ कृष्णमंत्ररहस्यं च स्मर विस्मृतिमागतम् ॥ सूत उवाच ॥ इत्युक्तो नारदो विप्राः कुमारेण तु धीमता ॥
॥ २ ॥ ध्याने विवेदाशु चिरं चरितं पूर्वजन्मनः ॥ ततश्चिरं ध्यानपरो नारदो भगवत्प्रियः ॥ ३ ॥ ज्ञात्वा सर्वं सुवृत्तांतं सुप्रसन्नाननोऽब्रवीत् ॥
भगवन्सर्ववृत्तांतः पूर्वकल्पसमुद्भवः ॥ ४ ॥ मम स्मृतिमनुप्राप्तो विना युगललंभनम् ॥ तच्छुत्वा वचनं तस्य नारदस्य महात्मनः ॥ ५ ॥
सनत्कुमारो भगवान् व्याजहार यथातथम् ॥ सनत्कुमार उवाच ॥ शृणु विप्र प्रवक्ष्यामि यस्मिञ्जन्मनि शूलिनः ॥ ६ ॥ प्राप्तं कृष्णरहस्यं वै
सावधानो भवाधुना ॥ अस्मात्सारस्वतात्कल्पात्पूर्वस्मिन्पंचविंशके ॥ ७ ॥ कल्पे त्वं काश्यपो जातो नारदो नाम नामतः ॥ तत्रैकदा त्वं
कैलासं प्राप्तः कृष्णस्य योगिनः ॥ ८ ॥ संप्रष्टुं परमं तत्वं शिवं कैलासवासिनम् ॥ त्वया पृष्टो महादेवो रहस्यं स्वप्रकाशितम् ॥ ९ ॥ कथया
मास तत्वेन नित्यलीलानुगं हरेः ॥ ततस्तदन्ते तु पुनस्त्वया विज्ञापितो हरः ॥ १० ॥ नित्यां लीलां हरेर्द्रष्टुं ततः प्राह सदाशिवः ॥ गोपीजन
पदस्यांते वल्लभेति पदं ततः ॥ ११ ॥ चरणाच्छरणं पश्चात्प्रपद्ये इति वै मनुः ॥ मंत्रस्यास्य ऋषिः प्रोक्तो सुरभिश्छंद एव च ॥ १२ ॥ गायत्री
देवता चास्य बल्लवीवल्लभो विभुः ॥ प्रपन्नोऽस्मीति तद्भक्तौ विनियोग उदाहृतः ॥ १३ ॥ नास्य सिद्धादिकं विप्र शोधनं न्यासकल्पनम् ॥
केवलं चिंतनं सद्यो नित्यलीलाप्रकाशकम् ॥ १४ ॥ आभ्यंतरस्य धर्मस्य साधनं वच्मि सांप्रतम् ॥ १५ ॥ संगृह्य मन्त्रं गुरुभक्तियुक्तो विचिंत्य
सर्वं मनसा तदीहितम् ॥ कृपां तदीयां निजधर्मसंस्थो विभावयन्नात्मनि तोषयेद्गुरुम् ॥ १६ ॥ सतां शिक्षेत वै धर्मान्प्रपन्नानां भयापहान् ॥
ऐहिकामुष्मिकीचिंताविधुरान् सिद्धिदायकान् ॥ १७ ॥ स्वेष्टदेवधिया नित्यं तोषयेद्वैष्णवांस्तथा ॥ भर्त्सनादिकमेतेषां न कदाचिद्विचिंतयेत् ॥ १८ ॥
पूर्वकर्मवशाद्भव्यमैहिकं भोग्यमेव च ॥ आयुष्यकं तथा कृष्णः स्वयमेव करिष्यति ॥ १९ ॥ श्रीकृष्णं नित्यलीलास्थं चिंतयेत्स्वधियानिशम् ॥
श्रीमदर्चावतारेण कृष्णं परिचरेत्सदा ॥ २० ॥ अनन्यचिंतनीयोऽसौ प्रपन्नैः शरणार्थिभिः ॥ स्थेयं च देहगेहादावुदासीनतया बुधैः ॥ २१ ॥
गुरोरवज्ञां साधूनां निंदां भेदं हरे हरौ ॥ वेदनिंदां हरेर्नामबलात्पापसमीहनम् ॥ २२ अर्थवादं हरे नांम्नि पाषंडं नामसंग्रहे ॥ अलसे नास्तिके
चैव हरिनामोपदेशनम् ॥ २३ ॥ नामविस्मरणं चापि नाम्न्यनादरमेव च ॥ संत्यजेद् दूरतो वत्स दोषानेतान्सुदारुणान् ॥ २४ ॥ प्रपन्नोऽस्मीति
सततं चिंतयेद्धृद्गतं हरिम् ॥ स एव पालनं नित्यं करिष्यति ममेति च ॥ २५ ॥ तवास्मि राधिकानाथ कर्मणा मनसा गिरा ॥ कृष्णकांतेति
चैवास्मि युवामेव गतिर्मम ॥ २६ ॥ दासाः सखायः पितरः प्रेयस्यश्च हरेरिह ॥ सर्वे नित्या मुनिश्रेष्ठ चिंतनीया महात्मभिः ॥ २७ ॥ गमनागमने नित्य

करोति वनगोष्ठयोः ॥ गोचारणं वयस्यैश्च विनासुरविघातनम् ॥ २८ ॥ सखायो द्वादशाख्याता हरेः श्रीदामपूर्वकाः ॥ राधिकायाः सुशी
लाद्याः सख्यो द्वात्रिंशदीरिताः ॥ २९ ॥ आत्मानं चिंतयेद्वत्स तासां मध्ये मनोरमाम् ॥ रूपयौवनसंपन्नां किशोरीं च स्वलंकृताम् ॥ ३० ॥
नानाशिल्पकलाभिज्ञां कृष्णभोगानुरूपिणीम् ॥ तत्सेवनसुखाह्लादभावेनातिसुनिर्वृताम् ॥ ३१ ॥ ब्राह्मं मुहूर्तमारभ्य यावदर्धनिशा भवेत् ॥ ताव
त्परिचरेत्तौ तु यथाकालानुसेवया ॥ ३२ ॥ सहस्रं च तयोर्नाम्नां पठेन्नित्यं समाहितः ॥ एतत्साधनमुद्दिष्टं प्रपन्नानां मुनीश्वर ॥ ३३ ॥ नाख्येयं
कस्यचित्तुभ्यं मया तत्त्वं प्रकाशितम् ॥ सनत्कुमार उवाच ॥ ततस्त्वं नारद पुनः पृष्टवान्वै सदाशिवम् ॥ ३४ ॥ नाम्नां सहस्रं तच्चापि प्रोक्तवां
स्तच्छृणुष्व मे ॥ ध्यात्वा वृंदावने रम्ये यमुनातीरसंगतम् ॥ ३५ ॥ कल्पवृक्षं समाश्रित्य तिष्ठंतं राधिकायुतम् ॥ पठेन्नामसहस्रं तु युगलाख्यं
महामुने ॥ ३६ ॥ देवकीनंदनः शौरिर्वासुदेवो बलानुजः ॥ गदाग्रजः कंसमोहः कंससेवकमोहनः ॥ ३७ ॥ भिन्नार्गलो भिन्नलोहः पितृबाह्यः पितृस्तुतः ॥
मातृस्तुतः शिवध्येयो यमुनाजलभेदनः ॥ ३८ ॥ व्रजवासी व्रजानंदी नंदबालो दयानिधिः ॥ लीलाबालः पद्मनेत्रो गोकुलोत्सव ईश्वरः ॥ ३९ ॥ गोपि
कानंदनः कृष्णो गोपानंदः सतां गतिः ॥ बकप्राणहरो विष्णुर्बकमुक्तिप्रदो हरिः ॥ ४० ॥ बलदोलाशयशयः श्यामलः सर्वसुंदरः ॥ पद्मनाभो
हृषीकेशः क्रीडामनुजबालकः ॥ ४१ ॥ लीलाविध्वस्तशकटो वेदमंत्राभिषेचितः ॥ यशोदानंदनः कांतो मुनिकोटिनिषेवितः ॥ ४२ ॥ नित्यं
मधुवनावासी वैकुंठः संभवः क्रतुः ॥ रमापतिर्यदुपतिर्मुरारिर्मधुसूदनः ॥ ४३ ॥ माधवो मानहारी च श्रीपतिर्भूधरः प्रभुः ॥ बृहद्वनमहा
लीलो नंदसूनुर्महासनः ॥ ४४ ॥ तृणावर्तप्राणहारी यशोदाविस्मयप्रदः ॥ त्रैलोक्यवक्त्रः पद्माक्षः पद्महस्तः प्रियंकरः ॥ ४५ ॥ ब्रह्मण्यो
धर्मगोप्ता च भूपतिः श्रीधरः स्वराट् ॥ अजाध्यक्षः शिवाध्यक्षो धर्माध्यक्षो महेश्वरः ॥ ४६ ॥ वेदांतवेद्यो ब्रह्मस्थः प्रजापतिरमोघदृक् ॥
गोपीकरावलंबी च गोपबालकसुप्रियः ॥ ४७ ॥ बालानुयायी बलवान् श्रीदामप्रिय आत्मवान् ॥ गोपीगृहांगणरतिर्भद्रः सुश्लोकमंगलः ॥ ४८ ॥
नवनीतहरो बालो नवनीतप्रियाशनः ॥ बालवृन्दी मर्कवृंदी चकिताक्षः पलायितः ॥ ४९ ॥ यशोदातर्जितः कंपी मायारुदितशोभनः ॥ दामोदरोऽप्रमे
यात्मा दयालुर्भक्तवत्सलः ॥ ५० ॥ सुबद्धोलूखले नम्रशिरा गोपीकदर्थितः ॥ वृक्षभंगी शोकभंगी धनदात्मजमोक्षणः ॥ ५१ ॥ देवर्षिवचनश्लाघी भक्त
वात्सल्यसागरः ॥ व्रजकोलाहलकरो व्रजानंदविवर्द्धनः ॥ ५२ ॥ गोपात्मा प्रेरकः साक्षी वृंदावननिवासकृत् ॥ वत्सपालो वत्सपतिर्गोपदारकमं
डनः ॥ ५३ ॥ बालक्रीडो बालरतिर्बालकः कनकांगदी ॥ पीताम्बरो हेममाली मणिमुक्ताविभूषणः ॥ ५४ ॥ किंकिणीकटकी सूत्री नूपुरी मुद्रि

कान्वितः ॥ वत्सासुरपतिध्वंसी बकासुरविनाशनः ॥ ५५ ॥ अघासुरविनाशी च विनिद्रीकृतबालकः ॥ आद्य आत्मप्रदः संगी यमुनातीरभोजनः
॥ ५६ ॥ गोपालमंडलीमध्यः सर्वगोपालभूषणः ॥ कृतहस्ततलग्रासो व्यंजनाश्रितशाखिकः ॥ ५७ ॥ कृतबाहुशृंगयष्टिगुंजालंकृतकंठकः ॥
मयूरपिच्छमुकुटो वनमालाविभूषितः ॥ ५८ ॥ गैरिकाचित्रितवपुर्नवमेघवपुः स्मरः ॥ कोटिकंदर्पलावण्यो लसन्मकरकुंडलः ॥ ५९ ॥ आजा
नुबाहुर्भगवान्निद्रारहितलोचनः ॥ कोटिसागरगांभीर्यः कालकालः सदाशिवः ॥ ६० ॥ विरंचिमोहनवपुर्गोपवत्सवपुर्द्धरः ॥ ब्रह्मांडकोटिजनको
ब्रह्ममोहविनाशकः ॥ ६१ ॥ ब्रह्मा ब्रह्मेडितः स्वामी शक्रदर्पादिनाशनः ॥ गिरिपूजोपदेष्टा च धृतगोवर्द्धनाचलः ॥ ६२ ॥ पुरंदरेडितः पूज्यः
कामधेनुप्रपूजितः ॥ सर्वतीर्थाभिषिक्तश्च गोविंदो गोपरक्षकः ॥ ६३ ॥ कालियार्तिकरः क्रूरो नागपत्नीडितो विराट् ॥ धेनुकारिः प्रलंबारि
र्वृषासुरविमर्दनः ॥ ६४ ॥ मायासुरात्मजध्वंसी केशिकंठविदारकः॥ गोपगोप्ता धेनुगोप्ता दावाग्निपरिशोषकः ॥ ६५ ॥ गोपकन्यावस्त्रहारी गोप
कन्यावरप्रदः ॥ यज्ञपत्न्यन्नभोजी च मुनिमानापहारकः ॥ ६६ ॥ जलेशमानमथनो नन्दगोपालजीवनः ॥ गन्धर्वशापमोक्ता च शंखचूडशिरो
हरः ॥ ६७ ॥ वंशी वटी वेणुवादी गोपीचिन्तापहारकः ॥ सर्वगोप्ता समाह्वानः सर्वगोपीमनोरथः ॥ ६८ ॥ व्यंगधर्मप्रवक्ता च गोपीमण्डल
मोहनः ॥ रासक्रीडारसास्वादी रसिको राधिकाधवः ॥ ६९ ॥ किशोरीप्राणनाथश्च वृषभानसुताप्रियः ॥ सर्वगोपीजनानंदी गोपीजनवि
मोहनः ॥ ७० ॥ गोपिकागीतचरितो गोपीनर्तनलालसः ॥ गोपीस्कन्धाश्रितकरो गोपिकाचुंबनप्रियः ॥ ७१ ॥ गोपिकामार्जितमुखो
गोपीव्यंजनवीजितः ॥ गोपिकाकेशसंस्कारी गोपिकापुष्पसंस्तरः ॥ ७२ ॥ गोपिकाहृदयालंबी गोपीवहनतत्परः ॥ गोपिकामदहारी
च गोपिकापरमार्जितः ॥ ७३ ॥ गोपिकाकृतसंनीलो गोपिकासंस्मृतप्रियः ॥ गोपिकावन्दितपदो गोपिकावशवर्तनः ॥ ७४ ॥ राधा
पराजितः श्रीमान्निकुन्जेसुविहारवान् ॥ कुञ्जप्रियः कुञ्जवासी वृन्दावनविकासनः ॥ ७५ ॥ यमुनाजलसिक्तांगो यमुनासौख्यदायकः ॥
शशिसंस्तंभनः शूरः कामी कामविमोहनः ॥ ७६ ॥ कामाद्याः कामनाथश्च काममानसभेदनः ॥ कामदः कामरूपश्च कामिनीकामसंचयः ॥
॥ ७७ ॥ नित्यक्रीडो महालीलः सर्वः सर्वगतस्तथा ॥ परमात्मा पराधीशः सर्वकारणकारणः (मू) ॥ ७८ ॥ गृहीतनारदवचा ह्यक्रूरपरिचिंतितः ॥
अक्रूरवन्दितपदो गोपिकातोषकारकः ॥ ७९ ॥ अक्रूरवाक्यसंग्राही मथुरावासकारणः (मू) ॥ अक्रूरतापशमनो रजकायुःप्रणाशनः ॥ ८० ॥
मथुरानन्ददायी च कंसवस्त्रविलुण्ठनः ॥ कंसवस्त्रपरीधानो गोपवस्त्रप्रदायकः ॥ ८१ ॥ सुदामगृहगामी च सुदामपरिपूजितः ॥ तंतुवाय

कसंप्रीतः कुब्जाचंदनलेपनः ॥ ८२ ॥ कुब्जारूपप्रदो विज्ञो मुकुंदो विष्टरश्रवाः ॥ सर्वज्ञो मथुरालोकी सर्वलोकाभिनंदनः ॥ ८३ ॥ कृपाकटाक्षदर्शी च दैत्यारिर्देवपालकः ॥ सर्वदुःखप्रशमनो धनुर्भङ्गी महोत्सवः ॥ ८४ ॥ कुवलयापीडहंता दंतस्कंधबलाग्रणीः ॥ कल्परूपधरो धीरो दिव्यवस्त्रानुलेपनः ॥ ८६ ॥ मल्लरूपो महाकालः कामरूपी बलान्वितः ॥ कंसत्रासकरो भीमो मुष्टिकांतश्च कंसहा ॥ ८६ ॥ चाणूरघ्नो भयहरः शलारिस्तोशलांतकः ॥ वैकुंठवासी कंसारिः सर्वदुष्टनिषूदनः ॥ ८७ ॥ देवदुंदुभिनिर्घोषी पितृशोकनिवारणः ॥ यादवेंद्रः सतांनाथो यादवारिप्रमर्दनः ॥८८॥ शौरिशोकविनाशी च देवकीतापनाशनः ॥ उग्रसेनपरित्राता उग्रसेनाभिपूजितः ॥८९॥ उग्रसेनाभिषेकी च उग्रसेनदयापरः ॥ सर्वसात्वतसाक्षी च यदूनामभिनंदनः ॥ ९० ॥ सर्वमाथुरसंसेव्यः करुणो भक्तबांधवः ॥ सर्वगोपालधनदो गोपीगोपाललालसः ॥ ९१ ॥ शौरिदत्तोपवीती च उग्रसेनदयाकरः ॥ गुरुभक्तो ब्रह्मचारी निगमाध्ययने रतः ॥ ९२ ॥ संकर्षणसहाध्यायी सुदामसुहृदेव च ॥ विद्यानिधिः कलाकोशो मृतपुत्रप्रदस्तथा ॥ ९३ ॥ चक्री पांचजनी चैव सर्वनारकिमोचनः ॥ यमार्चितः परो देवो नामोच्चारवसो (शो)ऽच्युतः ॥९४॥ कुब्जाविलासी सुभगो दीनबंधुरनूपमः ॥ अक्रूरगृहगोप्ता च प्रतिज्ञापालकः शुभः॥ ९५ ॥ जरासंधजयी विद्वान् यवनांतो द्विजाश्रयः ॥ मुचुकुंदप्रियकरो जरासंधपलायितः ॥ ९६ ॥ द्वारकाजनको गूढो ब्रह्मण्यः सत्यसंगरः ॥ लीलाधरः प्रियकरो विश्वकर्मा यशःप्रदः ॥ ९७ ॥ रुक्मिणीप्रियसंदेशो रुक्मशोकविवर्द्धनः ॥ चैद्यशोकालयः श्रेष्ठो दुष्टराजन्यनाशनः ॥ ९८ ॥ रुक्मिवैरूप्यकरणो रुक्मिणीवचने रतः ॥ बलभद्रवचोग्राही मुक्तरुक्मी जनार्दनः ॥ ९९ ॥ रुक्मिणीप्राणनाथश्च सत्यभामापतिः स्वयम् ॥ भक्तपक्षी भक्तिवश्यो ह्यक्रूरमणिदायकः ॥ १०० ॥ शतधन्वाप्राणहारी ऋक्षराजसुताप्रियः ॥ सत्राजित्तनयाकांतो मित्रविंदापहारकः ॥ १०१ ॥ सत्यापतिर्लक्ष्मणाजित्पूज्यो भद्राप्रियंकरः ॥ नरकासुरघाती च लीलाकन्याहरो जयी ॥ १०२ ॥ मुरारिर्मदनेशोऽपि धरित्रीदुःखनाशनः ॥ वैनतेयी स्वर्गगामी अदित्यै कुंडलप्रदः ॥ १०३ ॥ इंद्रार्चितो रमाकांतो वज्रिभार्याप्रपूजितः ॥ पारिजातापहारी च शक्रमानापहारकः ॥ १०४ ॥ प्रद्युम्नजनकः सांबतातो बहुसुतो विधुः ॥ गर्गाचार्यः सत्यगतिर्धर्माधारो धराधरः ॥ १०५ ॥ द्वारकामंडनः श्लोक्यः सुश्लोको निगमालयः ॥ पौंड्रकप्राणहारी च काशीराजशिरोहरः ॥१०६॥ अवैष्णवविप्रदाही सुदक्षिणभयावहः ॥ जरासंधविदारी च धर्मनन्दनयज्ञकृत् ॥ १०७ ॥ शिशुपालशिरश्छेदी दंतवक्रविनाशनः ॥ विदूरथांतकः श्रीशः श्रीदो द्विविदनाशनः ॥ १०८ ॥ रुक्मिणीमानहारी च रुक्मिणीमानवर्द्धनः ॥ देवर्षिशापहर्ता च द्रौपदीवाक्यपालकः ॥ १०९ ॥दुर्वासो

भयहारी च पांचालीस्मरणागतः ॥ पार्थदूतः पार्थमन्त्री पार्थदुःखौघनाशनः ॥ ११० ॥ पार्थमानापहारी च पार्थजीवनदायकः ॥ पांचाली
वस्त्रदाता च विश्वपालकपालकः ॥ १११ ॥ श्वेताश्वसारथिः सत्यः सत्यसाध्यो भयापहः ॥ सत्यसंधः सत्यरतिः सत्यप्रिय उदारधीः ॥ ११२ ॥
महासेनजयी चैव शिवसैन्यविनाशनः ॥ बाणासुरभुजच्छेत्ता बाणबाहुवरप्रदः ॥ ११३ ॥ तार्क्ष्यमानापहारी च तार्क्ष्यतेजोविवर्द्धनः ॥
रामस्वरूपधारी च सत्यभामामुदावहः ॥ ११४ ॥ रत्नाकरजलक्रीडो व्रजलीलाप्रदर्शकः ॥ स्वप्रतिज्ञापरिध्वंसी भीष्माज्ञापरिपालकः ॥ ११५ ॥
वीरायुधहरः कालः कालिकेशो महाबलः ॥ वर्वरीषशिरोहारी वर्वरीषशिरःप्रदः ॥ ११६ ॥ धर्मपुत्रजयी शूरदुर्योधनमदांतकः ॥ गोपिकाप्री
तिनिर्बंधनित्यक्रीडो व्रजेश्वरः ॥ ११७ ॥ राधाकुंडरतिर्धन्यः सदांदोलसमाश्रितः ॥ सदामधुवनानन्दी सदावृंदावनप्रियः ॥ ११८ ॥
अशोकवनसन्नद्धः सदातिलकसंगतः ॥ सदागोवर्द्धनरतिः सदा गोकुलवल्लभः ॥ ११९ ॥ भांडीरवटसंवासी नित्यं वंशीवटस्थितः ॥ नन्द
ग्रामकृतावासो वृषभानुग्रहप्रियः ॥ १२० ॥ गृहीतकामिनीरूपो नित्यं रासविलासकृत् ॥ वल्लवीजनसंगोप्ता वल्लवीजनवल्लभः ॥ १२१ ॥ देवशर्म
कृपाकर्ता कल्पपादपसंस्थितः ॥ शिलानुगन्धनिलयः पादचारी घनच्छविः ॥ १२२ ॥ अतसीकुसुमप्रख्यः सदा लक्ष्मीकृपाकरः ॥ त्रिपुरारि
प्रियकरो ह्युग्रधन्वापराजितः ॥ १२३ ॥ षड्धुरध्वंसकर्ता च निकुंभप्राणहारकः ॥ वज्रनाभपुरध्वंसी पौंड्रकप्राणहारकः ॥ १२४ ॥ बहुला
श्वप्रीतिकर्ता द्विजवर्यप्रियंकरः॥ शिवसंकटहारी च वृकासुरविनाशनः ॥ १२५ ॥ भृगुसत्कारकारी च शिवसात्त्विकताप्रदः ॥ गोकर्णपूजकः सांब
कुष्ठविध्वंसकारणः ॥ १२६ ॥ वेदस्तुतो वेदवेत्ता यदुवंशविवर्द्धनः॥ यदुवंशविनाशी च उद्धवोद्धारकारकः ॥१२७॥ राधा च राधिका चैव आनंदा
वृषभानुजा॥वृन्दावनेश्वरी पुण्या कृष्णमानसहारिणी॥१२८॥प्रगल्भा चतुरा कामा कामिनी हरिमोहिनी॥ललिता मधुरा माध्वी किशोरी कनकप्रभा
॥१२९॥जितचंद्रा जितमृगा जितसिंहा जितद्विपा ॥ जितरंभा जितपिका गोविंदहृदयोद्भवा॥१३०॥जितबिंबा जितशुका जितपद्मा कुमारिका॥
श्रीकृष्णाकर्षणा देवी नित्यं युग्मस्वरूपिणी॥१३१॥नित्यं विहारिणी कांता रसिका कृष्णवल्लभा ॥आमोदिनी मोदवती नंदनंदनभूषिता॥१३२॥
दिव्यांबरा दिव्यहारा मुक्तामणिविभूषिता॥ कुञ्जप्रिया कुञ्जवासा कुञ्जनायकनायिका ॥१३३॥चारुरूपा चारुवक्त्रा चारुहेमांगदा शुभा ॥ श्रीकृष्ण
वेणुसंगीता मुरलीहारिणी शिवा ॥ १३४ ॥ भद्रा भगवती शांता कुमुदा सुन्दरी प्रिया ॥ कृष्णक्रीडा कृष्णरतिः श्रीकृष्णसहचारिणी ॥ १३५ ॥
वंशीवटप्रियस्थाना युग्मायुग्मस्वरूपिणी ॥ भांडीरवासिनी शुभ्रा गोपीनाथप्रिया सखी ॥ १३६ ॥ श्रुतिनिःश्वसिता दिव्या गोविंदरस

दायिनी ॥ श्रीकृष्णप्रार्थनीशाना महानन्दप्रदायिनी ॥ १३७ ॥ वैकुंठजनसंसेव्या कोटिलक्ष्मीसुखावहा ॥ कोटिकंदर्पलावण्या रतिकोटि
रतिप्रदा ॥ १३८ ॥ भक्तिग्राह्या भक्तिरूपा लावण्यसरसी उमा ॥ ब्रह्मरुद्रादिसंराध्या नित्यं कौतूहलान्विता ॥ १३९ ॥ नित्यलीला नित्यकामा
नित्यशृंगारभूषिता ॥ नित्यवृन्दावनरसा नन्दनन्दनसंयुता ॥ १४० ॥ गोपिकामण्डलीयुक्ता नित्यं गोपालसंगता ॥ गोरसक्षेपणी शूरा सानन्दा
नन्ददायिनी ॥ १४१ ॥ महालीला प्रकृष्टा च नागरी नगचारिणी ॥ नित्यमाघूर्णिता पूर्णा कस्तूरीतिलकान्विता ॥ १४२ ॥ पद्मा
श्यामा मृगाक्षी च सिद्धिरूपा रसावहा ॥ कोटिचन्द्रानना गौरी कोटिकोकिलसुस्वरा ॥ १४३ ॥ शीलसौंदर्यनिलया नन्दनन्दनलालिता ॥
अशोकवनसंवासा भांडीरवनसङ्गता ॥ १४४ ॥ कल्पद्रुमतलाविष्टा कृष्णा विश्वा हरिप्रिया ॥ अजागम्या भवागम्या गोवर्द्धनकृतालया॥ १४५ ॥
यमुनातीरनिलया शश्वद्गोविंदजल्पिनी ॥ शश्वन्मानवती स्निग्धा श्रीकृष्णपरिवन्दिता ॥ १४६॥ कृष्णस्तुता कृष्णवृता श्रीकृष्णहृदयालया॥
देवद्रुमफला सेव्या वृन्दावनरसालया ॥ १४७ ॥ कोटितीर्थमयी सत्या कोटितीर्थफलप्रदा ॥ कोटियोगसुदुष्प्राप्या कोटियज्ञदुरा
श्रया ॥ १४८ ॥ मनसा शशिलेखा च श्रीकोटिसुभगाऽनघा ॥ कोटिमुक्तसुखा सौम्या लक्ष्मीकोटिविलासिनी ॥ १४९ ॥ तिलोत्तमा
त्रिकालस्था त्रिकालज्ञाप्यधीश्वरी ॥ त्रिवेदज्ञा त्रिलोकज्ञा तुरीयांतनिवासिनी ॥ १५० ॥ दुर्गाराध्या रमाराध्या विश्वाराध्या चिदात्मिका ॥
देवाराध्या पराराध्या ब्रह्माराध्या परात्मिका ॥ १५१ ॥ शिवाराध्या प्रेमसाध्या भक्ताराध्या रसात्मिका ॥ कृष्णप्राणार्पिणी भामा शुद्ध
प्रेमविलासिनी ॥ १५२ ॥ कृष्णाराध्या भक्तिसाध्या भक्तवृन्दनिषेविता ॥ विश्वाधारा कृपाधारा जीवधारातिनायिका ॥ १५३ ॥
शुद्धप्रेममयी लज्जा नित्यसिद्धा शिरोमणिः ॥ दिव्यरूपा दिव्यभोगा दिव्यवेषा मुदान्विता ॥ १५४ ॥ दिव्यांगनावृन्दसारा नित्यनूतन
यौवना ॥ परब्रह्मावृता ध्येया महारूपा महोज्ज्वला ॥ १५५ ॥ कोटिसूर्यप्रभा कोटिचन्द्रबिंबाधिकच्छविः ॥ कोमलामृतवागाद्या वेदाद्या
वेददुर्लभा ॥ १५६ ॥ कृष्णासक्ता कृष्णभक्ता चन्द्रावलिनिषेविता ॥ कलाषोडशसंपूर्णा कृष्णदेहार्द्धधारिणी ॥ १५७ ॥ कृष्णबुद्धिः कृष्णसारा
कृष्णरूपविहारिणी ॥ कृष्णकान्ता कृष्णधना कृष्णमोहनकारिणी॥ १५८॥ कृष्णदृष्टिः कृष्णगोत्री कृष्णदेवी कुलोद्वहा ॥ सर्वभूतस्थितावात्मा
सर्वलोकनमस्कृता ॥ १५९ ॥ कृष्णदात्री प्रेमधात्री स्वर्णगात्री मनोरमा ॥ नगधात्री यशोदात्री महादेवी शुभंकरी ॥ १६० ॥ श्रीशेषदेवज
ननी अवतारगणप्रसूः ॥ उत्पलांकारविंदांका प्रसादांका द्वितीयका ॥ १६१ ॥ रथांका कुंजरांका च कुंडलांकपदस्थिता ॥ छत्रांका विद्युदंका

च पुष्पमालांकितापि च ॥ १६२ ॥ दंडांका मुकुटांका च पूर्णचन्द्रा शुकांकिता ॥ कृष्णान्नाहारपाका च वृन्दाकुंजविहारिणी ॥ १६३ ॥
कृष्णप्रबोधनकरी कृष्णशेषान्नभोजिनी ॥ पद्मकेसरमध्यस्था संगीतागमवेदिनी ॥ १६४ ॥ कोटिकल्पांतभ्रूभंगा अप्राप्तप्रलयाच्युता ॥ सर्वसत्त्व
निधिः पद्मशंखादिनिधिसेविता ॥ १६५ ॥ अणिमादिगुणैश्वर्या देववृन्दविमोहिनी ॥ सर्वानन्दप्रदा सर्वा सुवर्णलतिकाकृतिः ॥ १६६ ॥ कृष्णा
भिसारसंकेता मालिनी नृत्यपंडिता ॥ गोपीसिंधुसकाशाह्वा गोपमंडपशोभिनी ॥ १६७ ॥ श्रीकृष्णप्रीतिदा भीता प्रत्यंगपुलकांचिता ॥ श्रीकृष्णा
लिंगनरता गोविंदविरहाक्षमा ॥ १६८ ॥ अनंतगुणसंपन्ना कृष्णकीर्तनलालसा ॥ बीजत्रयमयी मूर्तिः कृष्णानुग्रहवांछिता ॥ १६९ ॥ विमलादि
निषेव्या च ललिताद्यार्चिता सती ॥ पद्मवृन्दस्थिता हृष्टा त्रिपुरापरिसेविता ॥ १७० ॥ वृन्तावत्यर्चिता श्रद्धा दुर्ज्ञेया भक्तवल्लभा ॥ दुर्लभा
सांद्रसौख्यात्मा श्रेयोहेतुः सुभोगदा ॥ १७१ ॥ सारंगा शारदा बोधा सद्वृंदावनचारिणी ॥ ब्रह्मानन्दा चिदानन्दा ध्यानानन्दार्द्धमात्रिका ॥
॥१७२॥ गंधर्वा सुरतज्ञा च गोविंदप्राणसंगमा ॥ कृष्णांगभूषणा रत्नभूषणा स्वर्णभूषिता॥१७३॥श्रीकृष्णहृदयावासमुक्ताकनकनालि (सि) का॥
सद्रत्नकंकणयुता श्रीमन्नीलगिरिस्थिता ॥ १७४ ॥ स्वर्णनूपुरसंपन्ना स्वर्णकिंकिणिमंडिता ॥ अशेषरासकुतुका रंभोरूस्तनुमध्यमा ॥ १७५ ॥
पराकृतिः परानन्दा परस्वर्गविहारिणी ॥ प्रसूनकबरी चित्रा महासिंदूरसुन्दरी ॥ १७६ ॥ कैशोरवयसा बाला प्रमदाकुलशेखरा ॥ कृष्णाधरसुधा
स्वादा श्यामप्रेमविनोदिनी ॥ १७७ ॥ शिखिपिच्छलसच्चूडा स्वर्णचंपकभूषिता ॥ कुंकुमालक्तकस्तूरीमंडिता चापराजिता ॥ १७८ ॥ हेमह
रान्वितापुष्पा हाराढ्या रसवत्यपि ॥ माधुर्य्यमधुरा पद्मा पद्महस्ता सुविश्रुता ॥ १७९ ॥ भ्रूभंगाभंगकोदंडकटाक्षशरसंधिनी ॥ शेषदेवा
शिरस्था च नित्यस्थलविहारिणी ॥ १८० ॥ कारुण्यजलमध्यस्था नित्यमत्ताधिरोहिणी ॥ अष्टभाषवती चाष्टनायिका लक्षणान्विता ॥ १८१ ॥
सुनीतिज्ञा श्रुतिज्ञा च सर्वज्ञा दुःखहारिणी ॥ रजोगुणेश्वरी चैव जरच्चंद्रनिभानना ॥ १८२ ॥ केतकीकुसुमाभासा सदा सिंधुवनास्थिता ॥हेमपुष्पा
धिककरा पञ्चशक्तिमयी हिता ॥ १८३ ॥ स्तनकुभी नराढ्या च क्षीणापुण्या यशस्विनी ॥ वैराजसूयजननी श्रीशा भुवनमोहिनी ॥ १८४ ॥
महाशोभा महामाया महाकांतिर्महास्मृतिः ॥ महामोहा महाविद्या महाकीर्तिर्महारतिः ॥ १८५ ॥ महाधैर्या महावीर्या महाशक्तिर्महाद्युतिः ॥
महागौरी महासंपन्महाभोगविलासिनी ॥ १८६ ॥ समया भक्तिदाशोका वात्सल्यरसदायिनी ॥ सुहृद्भक्तिप्रदा स्वच्छा माधुर्यरसव
र्षिणी ॥ ८७ ॥ भावभक्तिप्रदा शुद्धप्रेमभक्तविधायिनी ॥ गोपरामाभिरामा च क्रीडारामा परेश्वरी ॥ १८८ ॥ नित्यरामा चात्मरामा

कृष्णरामा रमेश्वरी ॥ एकानेकजगद्व्याप्ता विश्वलीलाप्रकाशिनी ॥ १८९ ॥ सरस्वतीशा दुर्गेशा जगदीशा जगद्विधिः ॥ विष्णुवंशनिवासा
च विष्णुवंशसमुद्भवा ॥ १९० ॥ विष्णुवंशस्तुता कर्त्री विष्णुवंशावनी सदा ॥ आरामस्था वनस्था च सूर्य्यपुत्र्यवगाहिनी ॥ १९१ ॥
प्रीतिस्था नित्ययंत्रस्था गोलोकस्था विभूतिदा ॥ स्वानुभूतिस्थिता व्यक्ता सर्वलोकनिवासिनी ॥ १९२ ॥ अमृता ह्यद्भुता श्रीमन्नारायणस
मीडिता ॥ अक्षरापि च कूटस्था महापुरुषसंभवा ॥ १९३ ॥ औदार्यभावसाध्या च स्थूलसूक्ष्मातिरूपिणी ॥ शिरीषपुष्पमृदुला गांगेयमुकुर
प्रभा ॥ १९४ ॥ नीलोत्पलजिताक्षी च सद्रत्नकवरान्विता ॥ प्रेमपर्यंकनिलया तेजोमंडलमध्यगा ॥ १९५ ॥ कृष्णांगगोपनाऽभेदा लीला
वरणनायिका ॥ सुधासिंधुसमुल्लासामृतास्यंदविधायिनी ॥ १९६ ॥ कृष्णचित्ता रासचित्ता प्रेमचित्ता हरिप्रिया ॥ अचिंतनगुणग्रामा कृष्ण
लीला मलापहा ॥ १९७ ॥ राससिंधुशशांका च रासमंडलमंडिनी ॥ नतव्रता सिंहरीच्छा सुमूर्तिः सुरवंदिता ॥ १९८ ॥ गोपीचूडामणिर्गोपी
गणेड्या विरजाधिका ॥ गोपप्रेष्ठा गोपकन्या गोपनारी सुगोपिका ॥ १९९ ॥ गोपधामा सुदामांबा गोपाली गोपमोहिनी ॥ गोपभूषा कृष्ण
भूषा श्रीवृन्दावनचंद्रिका ॥ २०० ॥ वीणादिघोषनिरता रासोत्सवविकासिनी ॥ कृष्णचेष्टा परिज्ञाता कोटिकंदर्पमोहिनी ॥ २०१ ॥ श्रीकृष्ण
गुणनागाढ्या देवसुंदरिमोहिनी ॥ कृष्णचंद्रमनोज्ञा च कृष्णदेवसहोदरी ॥ २०२ ॥ कृष्णाभिलाषिणी कृष्णप्रेमानुग्रहवांछिता ॥ क्षेमा च
मधुरालापा भ्रुवोमाया सुभद्रिका ॥ २०३ ॥ प्रकृतिः परमानंदा नीपद्रुमतलस्थिता ॥ कृपाकटाक्षा बिंबोष्ठी रंभा चारुनितं
बिनी ॥ २०४ ॥ स्मरकेलिनिधाना च गंडताटंकमंडित्ता ॥ हेमाद्रिकांतिरुचिरा प्रेमाढ्या मदमंथरा ॥ २०५ ॥ कृष्णचिंता प्रेमचिंता
रतिचिन्ता च कृष्णदा ॥ रासचिंता भावचिंता शुद्धचिंता महारसा ॥ २०६ ॥ कृष्णादृष्टित्रुटियुगा दृष्टिपक्ष्मिविनिंदिनी ॥ कन्दर्प
जननी मुख्या वैकुंठगतिदायिनी ॥ २०७ ॥ रासभावा प्रियाश्लिष्टा प्रेष्ठा प्रथमनायिका ॥ शुद्धा सुधादेहिनी च श्रीरामा रस
मञ्जरी ॥ २०८ ॥ सुप्रभावा शुभाचारा स्वर्णदी नर्मदांबिका ॥ गोमती चंद्रभागेड्या सरयूस्ताम्रपर्णिसूः ॥ २०९ ॥ निष्कलंकचरित्रा च निर्गुणा च
निरंजना ॥ एतन्नामसहस्रं तु युग्मरूपस्य नारद ॥ २१० ॥ पठनीयं प्रयत्नेन वृन्दावनरसावहे ॥ महापापप्रशमनं वंध्यात्वविनिवर्तकम् ॥ २११ ॥ दारिद्र्य
शमनं रोगनाशनं कामदं महत् ॥ पापापहं वैरिहरं राधामाधवभक्तिदम् ॥ २१२ ॥ नमस्तस्मै भगवते कृष्णायाकुंठमेधसे ॥ राधासंगसुधासिंधौ
नमो नित्यविहारिणे ॥ २१३ ॥ राधादेवी जगत्कर्त्री जगत्पालनतत्परा ॥ जगल्लयविधात्री च सर्वेशी सर्वसूतिका ॥ २१४ ॥ तस्या नामसहस्रं

वे मया प्रोक्तं मुनीश्वर॥भुक्तिमुक्तिप्रदं दिव्यं किं भूयःश्रोतुमिच्छसि॥२१५॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे राधाकृष्ण सहस्रनामकथनं नाम द्व्यशीतितमोऽध्यायः॥८२॥

श्रीशौनक उवाच॥ साधु सूत महाभाग:जगदुद्धारकारकम्॥महातंत्रविधानं नः कुमारोक्तं त्वयोदितम् ॥ १ ॥ अलभ्यमेतत्तंत्रेषु पुराणेष्वपि मानद ॥ यदिहोदितमस्मभ्यं त्वयातिकरुणात्मना ॥ २ ॥ नारदो भगवान्सूत लोकोद्धरणतत्परः ॥ भूयः पप्रच्छ किं साधो कुमारं विदुषां वरम् ॥ ३ ॥ सूत उवाच ॥ श्रुत्वा स नारदो विप्राः युग्मनामसहस्रकम् ॥ सनत्कुमारमप्याह प्रणम्य ज्ञानिनां वरम् ॥ ४ ॥ नारद उवाच ॥ ब्रह्मंस्त्वया समाख्याता विधयस्तंत्रचोदिताः ॥ तत्रापि कृष्णमंत्राणां वैभवं ह्युदितं महत ॥ ५ ॥ या तत्र राधिका देवी सर्वाद्या समुदाहृता ॥ तस्या अंशावताराणां चरितं मंत्रपूर्वकम् ॥ ६ ॥ तंत्रोक्तं वद सर्वज्ञ त्वामहं शरणं गतः ॥ शक्तेस्तंत्राण्यनेकानि शिवोक्तानि मुनीश्वर ॥ ७ ॥ यानि तत्सारमुद्धृत्य साकल्येनाभिधेहि नः॥ तच्छ्रुत्वा वचनं तस्य नारदस्य महात्मनः ॥८॥ सनत्कुमारः प्रोवाच स्मृत्वा राधापदांबुजम्॥सनत्कुमार उवाच ॥शृणु नारद वक्ष्यामि राधांशानां समुद्भवम्॥९॥शक्तीनां परमाश्चर्यं मंत्रसाधनपूर्वकम्॥ या तु राधा मया प्रोक्ता कृष्णार्द्धांगसमुद्भवा ॥ १० ॥ गोलोकवासिनी सा तु नित्या कृष्णसहायिनी॥तेजोमंडलमध्यस्था दृश्यादृश्यस्वरूपिणी ॥ ११ ॥ कदाचित्तु तया सार्द्धं स्थितस्य मुनिसत्तम ॥ कृष्णस्य वामभागात्तु जातो नारायणः स्वयम् ॥ १२ ॥ राधिकायाश्च वामांगान्महालक्ष्मीर्बभूव ह ॥ ततः कृष्णो महालक्ष्मीं दत्त्वा नारायणाय च ॥ १३ ॥ वैकुंठे स्थापयामास शश्वत्पालनकर्मणि ॥ अथ गोलोकनाथस्य लोम्नां विवरतो मुने ॥ १४ ॥ जाताश्चासंख्यगोपालास्तेजसा वयसा समाः॥ प्राणतुल्यप्रियाः सर्वे बभूवुः पार्षदा विभोः ॥ १५ ॥ राधांगलोमकूपेभ्यो बभूवुर्गोपकन्यकाः ॥ राधातुल्याः सर्वतश्च राधादास्यः प्रियंवदाः ॥ १६ ॥ एतस्मिन्नंतरे विप्र सहसा कृष्णदेहतः ॥ आविर्बभूव सा दुर्गा विष्णुमाया सनातनी ॥ १७॥ देवीनां बीजरूपां च मूलप्रकृतिरीश्वरी॥परिपूर्णतमा तेजःस्वरूपा त्रिगुणात्मिका॥१८॥ सहस्रभुजसंयुक्ता नानाशस्त्रा त्रिलोचना॥या तु संसारवृक्षस्य बीजरूपा सनातनी ॥ १९ ॥ रत्नसिंहासनं तस्यै प्रददौ राधिकेश्वरः ॥ एतस्मिन्नंतरे तत्र सस्त्रीकस्तु चतुर्मुखः ॥ २० ॥ ज्ञानिनां प्रवरः श्रीमान् पुमानोंकारमुच्चरन् ॥ कमंडलुधरो जातस्तपस्वी नाभितो हरेः ॥ २१ ॥ स तु संस्तूय सर्वेशं सावित्र्या भार्यया सह ॥ निषसादासने रम्ये विभोस्तस्याज्ञया मुने ॥ २२ ॥ अथ कृष्णो महाभाग द्विधारूपो बभूव ह ॥ वामार्द्धांगो महादेवो दक्षार्द्धो गोपिकापतिः॥२३॥ पंचवक्त्रस्त्रिनेत्रोऽसौ वामार्द्धांगो मुनीश्वरः॥ स्तुत्वा कृष्णं समाज्ञप्तो निषसाद हरेः पुरः ॥२४॥ अथ कृष्णश्चतुर्वक्त्रं प्राह सृष्टिं कुरु प्रभो ॥ सत्यलोके स्थितो नित्यं गच्छ मां

स्मर सर्वदा ॥ २५ ॥एवमुक्तस्तु हरिणा प्रणम्य जगदीश्वरम् ॥जगाम भार्यया साकं स तु सृष्टिं करोति वै॥२६॥पितास्माकं मुनिश्रेष्ठ मानसीं कल्प
दैहिकीम्॥ ततः पश्चात्पंचवक्त्रं कृष्णः प्राह महामते॥२७॥ दुर्गां गृहाण विश्वेश शिवलोके तपश्चर॥यावत्सृष्टिस्तदंते तु लोकान्संहर सर्वतः ॥२८ ॥
सोऽपि कृष्णं नमस्कृत्य शिवलोकं जगाम ह ॥ ततः कालांतरे ब्रह्मन्कृष्णस्य परमात्मनः ॥ २९ ॥ वक्त्रात्सरस्वती जाता वीणापुस्तकधारिणी ॥
तामादिदेश भगवान् वैकुंठं गच्छ मानदे ॥ ३० ॥ लक्ष्मीसमीपे तिष्ठ त्वं चतुर्भुजसमाश्रया ॥सापि कृष्णं नमस्कृत्य गता नारायणांतिकम् ॥३१॥
एवं पञ्चविधा जाता सा राधा सृष्टिकारणम् ॥ आसां पूर्णस्वरूपाणां मंत्रध्यानार्चनादिकम् ॥ ३२ ॥ वदामि शृणु विप्रेंद्र लोकानां सिद्धिदायकम्॥
तारः क्रियायुक् प्रतिष्ठा प्रीत्याढ्या च ततः परम् ॥ ३३ ॥ ज्ञानामृता क्षुधायुक्ता वह्निजायांतको मनुः ॥ सुतपास्तु ऋषिश्छन्दो गायत्री देवता
मनोः ॥ ३४ ॥ राधिका प्रणवो बीजं स्वाहा शक्तिरुदाहृता ॥ षडक्षरैः षडंगानि कुर्याद्बिन्दुविभूषितैः॥३५ ॥ ततो ध्यायन्स्वहृदये राधिकां कृष्ण
भामिनीम् ॥ श्वेतचंपकवर्णाभां कोटिचन्द्रसमप्रभाम् ॥ ३६ ॥ शरत्पार्वणचन्द्रास्यां नीलेंदीवरलोचनाम्॥सुश्रोणीं सुनितंबां च पक्वबिंबाधरांबराम्
॥ ३७ ॥ मुक्ताकुंदाभदशनां वह्निशुद्धांशुकान्विताम् ॥ रत्नकेयूरवलयहारकुण्डलशोभिताम् ॥ ३८ ॥ गोपीभिः सुप्रियाभिश्च सेवितां श्वेतचामरैः ॥
रासमंडलमध्यस्थां रत्नसिंहासनस्थिताम् ॥ ३९॥ ध्यात्वा पुष्पांजलिं क्षिप्त्वा पूजयेदुपचारकैः ॥ लक्षषट्कं जपेन्मंत्रं तद्दशांशं हुनेत्तिलैः ॥ ४० ॥
आज्याक्तैर्मातृकापीठे पूजा चावरणैः सह ॥ षट्कोणेषु षडंगानि तद्बाह्येऽष्टदले यजेत् ॥४१ ॥ मालावतीं माधवीं च रत्नमालां सुशीलिकाम् ॥ ततः
शशिकलां पारिजातां पद्मावतीं तथा ॥ ४२ ॥ सुंदरीं च क्रमात्प्राच्यां दिग्विदिक्षु ततो बहिः॥ इन्द्राद्यान्सायुधानिष्ट्वा विनियोगांस्तु साधयेत् ॥
॥ ४३ ॥राधा कृष्णप्रिया रासेश्वरी गोपीगणाधिपा ॥ निर्गुणा कृष्णपूज्या च मूलप्रकृतिरीश्वरी ॥ ४४॥ सर्वेश्वरी सर्वपूज्या वैराजजननी तथा॥
पूर्वाद्याशासु रक्षंतु पांतु मां सर्वतः सदा ॥ ४५ ॥ त्वं देवि जगतांमाता विष्णुमाया सनातनी ॥कृष्णमायादिदेवी च कृष्णप्राणाधिके शुभे॥४६॥
कृष्णभक्तिप्रदे राधे नमस्ते मंगलप्रदे ॥ इति सम्प्रार्थ्य सर्वेशीं स्तुत्वा हृदि विसर्जयेत्॥ ४७॥एवं यो भजते राधां सर्वाद्यां सर्वमंगलाम् ॥ भुक्त्वेह
भोगानखिलान्सोऽन्ते गोलोकमाप्नुयात्॥ ४८ ॥ अथ तुभ्यं महालक्ष्म्या विधानं वच्मि नारद॥यदाराधनतो भूयात्साधको भुक्तिमुक्तिमान्॥ ४९॥
लक्ष्मीमायाकामवाणीपूर्वा कमलवासिनी ॥ ङेंता वह्निप्रियांतोऽयं मंत्रकल्पद्रुमः परः ॥ ५० ॥ ऋषिर्नारायणश्चास्य छन्दो हि जगती तथा ॥देवता
तु महालक्ष्मीर्द्विद्विवर्णैः षडंगकम् ॥ ५१॥ श्वेतचंपकवर्णाभां रत्नभूषणभूषिताम् ॥ ईषद्धास्यप्रसन्नास्यां भक्तानुग्रहकातराम् ॥५२॥ बिभ्रतीं रत्नमालां

च कोटिचंद्रसमप्रभाम् ॥ ध्यात्वा जपेदर्कलक्षं पायसेन दशांशतः ॥५३ ॥ जुहुयादेधिते वह्नौ श्रीद्रुकाष्ठैः समर्चयेत् ॥ नवशक्तियुते पीठे ह्यंगे
रावरणैः सह ॥ ५४ ॥ विभूतिरुन्नतिः कांतिः सृष्टिः कीर्तिश्च सन्नतिः ॥ व्युष्टिरुत्कृष्टिर्ऋद्धिश्च संप्रोक्ता नव शक्तयः ॥५५॥ अत्रावाह्य च मूलेन
मूर्तिं संकल्प्य साधकः॥ षट्कोणेषु षडंगानि दक्षिणे तु गजाननम् ॥५६ ॥ वामे कुसुमधन्वानं वसुपत्रे ततो यजेत् ॥ उमां श्रीं भारतीं दुर्गां धरणीं
वेदमातरम् ॥ ५७ ॥ देवीमुषां च पूर्वादौ दिग्विदिक्षु क्रमेण हि ॥ जह्नुसूर्यसुते पूज्ये पादप्रक्षालनोद्यते ॥ ५८ ॥ शंखपद्मनिधीं पूज्यौ पार्श्वयोर्धृत
चामरौ ॥ धृतातपत्रं वरुणं पूजयेत्पश्चिमे ततः ॥ ५९ ॥ संपूज्य राशीन्परितो यथास्थानं नवग्रहान् ॥ चतुर्दन्तैरावतादीन् दिग्विदिक्षु ततोऽर्चयेत्
॥ ६० ॥ तद्बहिर्लोकपालांश्च तदस्त्राणि च तद्बहिः ॥ दूर्वाभिराज्यसिक्ताभिर्जुहुयादायुषे नरः ॥ ६१ ॥ गुडूचीमाज्यसंसिक्तां जुहुयात्सप्तवासरम्॥
अष्टोत्तरसहस्रं यः स जीवेच्छरदां शतम् ॥६२ ॥ हुत्वा तिलान्घृताभ्यक्तान्दीर्घमायुष्यमाप्नुयात् ॥आरभ्यार्कदिनं मंत्री दशाहं घृतसंप्लुतः॥६३ ॥
जुहुयादर्कसमिधः शरीरारोग्यसिद्धये ॥ शालिभिर्जुह्वतो नित्यमष्टोत्तरसहस्रकम् ॥ ६४ ॥ अचिरादेव महती लक्ष्मी संजायते ध्रुवम् ॥ उषाजा
जीनालिकेररजोभिर्घृतमिश्रितैः ॥ ६५ ॥ हुनेदष्टोत्तरशतं पायसाशी तु नित्यशः ॥ मण्डलाज्जायते सोऽपि कुबेर इव मानवः ॥ ६६ ॥ हविषा गुड
मिश्रेण होमतो ह्यन्नवान्भवेत् ॥ जपापुष्पाणि जुहुयादष्टोत्तरसहस्रकम् ॥ ६७ ॥ तांबूलरससंमिश्रं तद्भस्मतिलकं चरेत् ॥ चतुर्णामपि वर्णानां मोह
नाय द्विजोत्तमः ॥ ६८ ॥ एवं यो भजते लक्ष्मीं साधकेंद्रो मुनीश्वर॥सम्पदस्तस्य जायंते महालक्ष्मीः प्रसीदति॥६९ ॥ देहांते वैष्णवं धाम लभते
नात्र संशयः॥ या तु दुर्गा द्विजश्रेष्ठ शिवलोकं गता सती ॥७०॥सा शिवाज्ञामनुप्राप्य दिव्यलोकं विनिर्ममे॥देवीलोकेति विख्यातं सर्वलोकवि
लक्षणम् ॥ ७१ ॥ तत्र स्थिता जगन्माता तपोनियममास्थिता ॥विविधान् स्वावतारान्हि त्रिकाले कुरुतेऽनिशम्॥ ७२॥मायाधिका ह्लादिनीयुक्
चन्द्राढ्या सार्गिणी पुनः ॥ प्रतिष्ठा स्मृतिसंयुक्ता क्षुधया सहिता पुनः ॥७३॥ ज्ञानामृता वह्निजायांतस्ताराद्यो मनुर्मतः॥ ऋषिः स्याद्वामदेवोऽस्य
छंदो गायत्रमीरितम् ॥ ७४ ॥ देवता जगतामादिर्दुर्गा दुर्गतिनाशिनी ॥ ताराद्यैकैकवर्णेन हृदयादित्रयं मतम् ॥ ७५ ॥त्रिभिर्वर्मेक्षणं द्वाभ्यां सर्वैर
स्त्रमुदीरितम् ॥ महामरकतप्रख्यां सहस्रभुजमंडिताम् ॥ ७६ ॥ नानाशस्त्राणि दधतीं त्रिनेत्रां शशिशेखराम् ॥ कंकणांगदहाराढ्यां क्वणन्नूपुरकान्वि
ताम् ॥ ७७ ॥ किरीटकुंडलधरां दुर्गां देवीं विचिंतयेत् ॥ ७८ ॥ वसुलक्षं जपेन्मंत्रं तिलैः समधुरैर्हुनेत् ॥ पयोऽधसा वा सहस्रं नवपद्मात्मके यजेत्
॥ ७९ ॥ प्रभा माया जया सूक्ष्मा विशुद्धानंदिनी पुनः ॥ सुप्रभा विजया सर्वसिद्धिदा पीठशक्तयः ॥ ८० ॥ अद्भिर्हस्वत्रयक्लीबरहितैः पूजये

दिमाः ॥ प्रणवो वज्रनखदंष्ट्रायुधाय महापदात् ॥ ८१ ॥ सिंहाय वर्मास्त्रं हृच्च प्रोक्तः सिंहमनुर्मुने ॥ दद्यादासनमेतेन मूर्तिं मूलेन कल्पयेत्
॥ ८२ ॥ अङ्गावृत्तिं पुराभ्यर्च्य शक्तीः पत्रेषु पूजयेत् ॥ जया च विजया कीर्तिः प्रीतिः पश्चात्प्रभा पुनः ॥ ८३ ॥ श्रद्धा मेधा श्रुतिश्चैव
स्वनामाद्यक्षरादिकाः ॥ पत्राग्रेष्वर्चयेदष्टावायुधानि यथाक्रमात् ॥ ८४ ॥ शंखचक्रगदाखड्गपाशांकुशशरान्धनुः ॥ लोकेश्वरांस्ततो बाह्ये तेषाम
स्त्राण्यनंतरम् ॥ ८५ ॥इत्थं जपादिभिर्मंत्री मंत्रे सिद्धे विधानवित् ॥ कुर्यात्प्रयोगानमुना यथा स्वस्वमनीषितान्॥८६॥ प्रतिष्ठाप्य विधानेन कलशा
न्नवशोभनान् ॥ रत्नहेमादिसंयुक्तान्घटेषु नवसु स्थितान् ॥ ८७ ॥ मध्यस्थे पूजयेद्देवीमितरेषु जयादिकाः ॥ संपूज्य गन्धपुष्पाद्यैरभिषिंचेन्नरा
धिपम् ॥ ८८॥ राजा विजयते शत्रून्योऽधिको विजयश्रियम् ॥ प्राप्नोत्यरोगो दीर्घायुः सर्वव्याधिविवर्जितः ॥ ८९ ॥ वन्ध्याभिषिक्ता विधिना
लभते तनयं वरम् ॥ मन्त्रेणानेन संजप्तमाज्यं क्षुद्रग्रहापहम् ॥ ९० ॥ गर्भिणीनां विशेषेण जप्तं भस्मादिकं तथा ॥ जृंभश्वासे तु कृष्णस्य प्रविष्टे
राधिकामुखम् ॥ ९१ ॥ या तु देवी समुद्भूता वीणापुस्तकधारिणी ॥ तस्या विधानं विप्रेंद्र शृणु लोकोपकारकम् ॥ ९२ ॥ प्रणवो वाग्भवं माया
श्रीः कामः शक्तिरीरिता ॥ सरस्वती चतुर्थ्यंता स्वाहांतो द्वादशाक्षरः ॥ ९३ ॥ मनुर्नारायण ऋषिर्विराट् छन्दः समीरितम्॥ महासरस्वती चास्य
देवता परिकीर्तिता ॥ ९४ ॥ वाग्भवेन षडंगानि कृत्वा वर्णान्न्यसेद् बुधः॥ ब्रह्मरंध्रे न्यसेत्तारं लज्जां भ्रूमध्यगां न्यसेत् ॥ ९५ ॥ मुखनासादिकर्णेषु
गुदेषु श्रीमुखार्णकान् ॥ ततो वाग्देवतां ध्यायेद्वीणापुस्तकधारिणीम् ॥ ९६ ॥ कर्पूरकुंदधवलां पूर्णचंद्रोज्ज्वलाननाम् ॥ हंसाधिरूढां भालें
दुदिव्यालंकारशोभिताम् ॥९७॥ जपेद्द्वादशलक्षाणि तत्सहस्रं सितांबुजैः॥ नागचंपकपुष्पैर्वा जुहुयात्साधकोत्तमः॥९८॥ मातृकोक्ते यजेत्पीठे वक्ष्य
माणक्रमेण ताम्॥ वर्णाब्जेनासनं दद्यान्मूर्तिं मूलेन कल्पयेत्॥९९॥देव्या दक्षिणतः पूज्या संस्कृता वाङ्मयी शुभा॥ प्राकृता वामतः पूज्या वाङ्मयी
सर्वसिद्धिदा ॥१००॥ पूर्वमंगानि षट्कोणे प्रज्ञाद्याः प्रयजेद्बहिः॥प्रज्ञा मेधा श्रुतिः शक्तिः स्मृतिर्वागीश्वरी मतिः॥१०१॥ स्वस्तिश्चेति समाख्याता
ब्राह्म्याद्यास्तदनंतरम्॥ लोकेशानर्चयेद्भूयस्तदस्त्राणि च तद्बहिः॥१०२॥एवं संपूज्य वाग्देवीं साक्षाद्वाग्वल्लभो भवेत् ॥ ब्रह्मचर्यरतः शुद्धः शुद्धदंतनखा
दिकः ॥ १०३ ॥ संस्मरन् सर्ववनिताः सततं देवताधिया ॥ कवित्वं लभते धीमान् मासैर्द्वादशभिर्ध्रुवम् ॥ १०४ ॥ पीत्वा तन्मंत्रितं तोय सहस्रं
प्रत्यहं मुने ॥ महाकविर्भवेन्मंत्री वत्सरेण न संशयः ॥ १०५ ॥ उरोमात्रोदके स्थित्वा ध्यायन्मार्तंडमंडले ॥ स्थितां देवीं प्रतिदिनं त्रिसहस्रं जपे
न्मनुम् ॥ १०६॥ लभते मंडलात्सिद्धिं वाचामप्रतिमां भुवि ॥ पालाशबिल्वकुसुमैर्जुहुयान्मधुरोक्षितैः ॥ १०७ ॥ समिद्भिर्वा तदुत्थाभिर्यशः

प्राप्नोति वाक्पतेः ॥ राजवृक्षसमुद्भूतैः प्रसूनैर्मधुराप्लुतैः ॥ १०८॥ तत्समिद्भिश्च जुहुयात्कवित्वमतुलं लभेत् ॥ अथ प्रवक्ष्ये विप्रेंद्र सावित्रीं ब्रह्मणः
प्रियाम् ॥ १०९ ॥ यां समाराध्य ससृजे ब्रह्मा लोकांश्चराचरान् ॥ लक्ष्मी माया कामपूर्वा सावित्री ङेसमन्विता ॥ ११० ॥ स्वाहांतो मनुरा
ख्यातः सावित्र्या वसुवर्णवान्॥ ऋषिर्ब्रह्मास्य गायत्री छंदः प्रोक्तं च देवता ॥ १११ ॥ सावित्री सर्वदेवानां सावित्री परिकीर्तिता ॥ ह्रदंतिकैर्ब्रह्म
विष्णुरुद्रेश्वरसदाशिवैः ॥ ११२ ॥ सर्वात्मना च ङेयुक्तैरंगानां कल्पनं मतम् ॥ तप्तकांचनवर्णाभां ज्वलंतीं ब्रह्मतेजसा ॥ ११३ ॥ ग्रीष्ममध्याह्न
मार्तंडसहस्रसमविग्रहाम् ॥ ईषद्धास्यप्रसन्नास्यां रत्नभूषणभूषिताम् ॥ ११४ ॥ बह्निशुद्धांशुकाधानां भक्तानुग्रहकातराम् ॥ सुखदां मुक्तिदां चैव सर्व
संपत्प्रदां शिवाम् ॥ ११५ ॥ वेदबीजस्वरूपां च ध्यायेद्वेदप्रसूं सतीम्॥ ध्यात्वैवं मण्डले विद्वान् त्रिकोणोज्ज्वलकर्णिके॥ ११६॥सौरे पीठे यजेद्देवीं
दीप्तादिनवशक्तिभिः ॥ मूलमंत्रेण क्लृप्तायां मूर्तौ देवीं प्रपूजयेत् ॥ ११७ ॥ कोणेषु त्रिषु संपूज्या ब्राह्म्याद्याः शक्तयो बहिः ॥आदित्याद्यास्ततः
पूज्या उषादिसहिताः क्रमात् ॥ ११८ ॥ ततः षडंगान्यभ्यर्च्य केसरेषु यथाविधि ॥ प्रह्लादिनीं प्रभां पश्चान्नित्यां विश्वंभरां पुनः ॥११९॥ विला
सिनीप्रभावत्यौ जयां शांतां यजेत्पुनः ॥ कांतिं दुर्गासरस्वत्यौ विद्यारूपां ततः परम् ॥ १२०॥ विशालसंज्ञितामीशां व्यापिनीं विमलां यजेत् ॥
तमोपहारिणीं सूक्ष्मां विश्वयोनिं जयावहाम् ॥१२१ ॥पद्मालयां परां शोभां ब्रह्मरूपां ततोऽर्चयेत् ॥ ब्राह्म्याद्याः शारणा बाह्ये पूजयेत्प्रोक्तलक्षणाः
॥१२२॥ततोऽभ्यर्च्येद् ग्रहान्बाह्ये शक्राद्यानायुधैः सह ॥ इत्थमावरणैर्देवीः दशभिः परिपूजयेत् ॥ १२३॥ अष्टलक्षं जपेन्मंत्रं तत्सहस्रं हुनेत्तिलैः ॥
सर्वपापविनिर्मुक्तो दीर्घमायुः स विंदति ॥ १२४ ॥ अरुणाब्जैस्त्रिमध्वक्तैर्जुहुयादयुतं ततः ॥ महालक्ष्मीर्भवेत्तस्य षण्मासान्नात्र संशयः ॥ १२५ ॥
ब्रह्मवृक्षप्रसूनैस्तु जुहुयाद्ब्रह्मतेजसे ॥ बहुना किमिहोक्तेन यथावत्साधिता सती ॥ १२६ ॥ साधकानामियं विद्या भवेत्कामदुघा मुने ॥ अथ ते
संप्रवक्ष्यामि रहस्यं परमाद्भुतम् ॥१२७॥ सावित्रीपंजरं नाम सर्वरक्षाकरं नृणाम् ॥ व्योमकेशालकासक्तां सुकिरीटविराजिताम् ॥ १२८ ॥ मेघभ्रुकु
टिलाक्रांतां विधिविष्णुशिवाननाम् ॥ गुरुभार्गवकर्णांतां सोमसूर्याग्निलोचनाम् ॥ १२९ ॥ इडापिंगलिकासूक्ष्मावायुनासापुटान्विताम् ॥
संध्याद्विजोष्ठपुटितां लसद्वागुपजिह्विकाम् ॥ १३० ॥ संध्यासूर्यमणिग्रीवां मरुद्बाहुसमन्वितान् ॥ पर्जन्यहृदयासक्तां वस्वाख्यप्रतिमंडलाम् ॥१३१॥
आकाशोदरविभ्रांतां नाभ्यवांतरवीथिकाम् ॥ प्रजापत्याख्यजघनां कटींद्राणीसमाश्रिताम् ॥ १३२ ॥ ऊर्वोर्मलयमेरुभ्यां शोभमानां सरिद्वराम् ॥
सुजानुजह्नुकुशिकां वैश्वदेवाख्यसंज्ञिकाम् ॥ १३३ ॥ पादांघ्रिनखलोमाख्यभूनागद्रुमलक्षिताम् ॥ ग्रहराश्यर्क्षयोगादिमूर्तावयवसंज्ञिकाम् ॥ १३४ ॥

तिथिमासर्तुपक्षाख्यैः संकेतनिमिषात्मिकाम् ॥ मायाकल्पितवैचित्र्यसंध्याख्यच्छदनावृताम् ॥ १३५ ॥ ज्वलत्कालानलप्रख्यां तडित्कोटिसम
प्रभाम् ॥ कोटिसूर्यप्रतीकाशां शशिकोटिसुशीतलाम् ॥ १३६ ॥ सुधामंडलमध्यस्थां सांद्रानंदामृतात्मिकाम् ॥ वागतीतां मनोऽगम्यां वरदां
वेदमातरम् ॥ १३७ ॥ चराचरमयीं नित्यां ब्रह्माक्षरसमन्विताम् ॥ ध्यात्वा स्वात्माविभेदेन सावित्रीपंजरं न्यसेत् ॥ १३८ ॥ पञ्जरस्य ऋषिः
सोऽहं छंन्दो विकृतिरुच्यते॥ देवता च परो हंसः परब्रह्मादिदेवता ॥ १३९॥ धर्मार्थकाममोक्षाप्त्यै विनियोग उदाहृतः ॥ षडंगदेवतामन्त्रैरंगन्यासं
समाचरेत् ॥ १४०॥ त्रिधामूलेन मेधावी व्यापकं हि समाचरेत् ॥ पूर्वोक्तां देवतां ध्यायेत्साकारां गुणसंयुताम् ॥१४१ ॥ त्रिपदा हरिजा पूर्वमुखी
ब्रह्मास्त्रसंज्ञिका ॥ चतुर्विंशतितत्त्वाढ्या पातु प्राचीं दिशं मम ॥ १४२ ॥ चतुष्पदा ब्रह्मदंडा ब्रह्माणी दक्षिणानना ॥ षड्विंशतत्त्वसंयुक्ता पातु
मे दक्षिणां दिशम् ॥ १४३ ॥ प्रत्यङ्मुखी पञ्चपदी पञ्चाशत्तत्त्वरूपिणी ॥ पातु प्रतीचीमनिशं मम ब्रह्मशिरोंकिता ॥ १४४ ॥ सौम्यास्या ब्रह्म
तुर्याढ्या साथर्वांगिरसात्मिका ॥उदीचीं षट्पदा पातु षष्टितत्त्वकलात्मिका ॥१४५॥ पञ्चाशद्वर्णरचिता नवपादा शताक्षरी ॥ व्योमा संपातु मे वोर्द्ध्वं
शिरो वेदांतसंस्थिता ॥१४६ ॥ विद्युन्निभा ब्रह्मसन्ध्या मृगारूढा चतुर्भुजा ॥चापेषुचर्मासिधरा पातु मे पावकीं दिशम् ॥ १४७ ॥ ब्राह्मी कुमारी
गायत्री रक्तांगी हंसवाहिनी ॥ बिभ्रत्कमंडलुं चाक्षं स्रुक्स्रुवौ पातु नैर्ऋतिम् ॥ १४८ ॥ शुक्लवर्णा च सावित्री युवती वृषवाहना ॥ कपालशूलका
क्षस्रग्धारिणी पातु वायवीम्॥ १४९ ॥ श्यामा सरस्वती वृद्धा वैष्णवी गरुडासना॥ शंखचक्राभयकरा पातु शैवीं दिशं मम ॥ १५० ॥ चतुर्भुजा
देवमाता गौरांगी सिंहवाहना ॥ वराभयखड्गचर्मभुजा पात्वधरां दिशम् ॥ १५१ ॥ तत्तत्पार्श्वे स्थिताः स्वस्ववाहनायुधभूषणाः ॥ स्वस्वदिक्षु
स्थिताः पांतु ग्रहशक्त्यंगसंयुताः ॥ १५२ ॥ मंत्राधिदेवतारूपा मुद्राधिष्ठातृदेवताः ॥ व्यापकत्वेन पांत्वस्मानापादतलमस्तकम् ॥ १५३ ॥
इदं ते कथितं सत्यं सावित्रीपंजरं मया ॥ संध्ययोः प्रत्यहं भक्त्या जपकाले विशेषतः ॥ १५४ ॥ पठनीयं प्रयत्नेन भुक्तिं मुक्तिं समिच्छता ॥
भूतिदा भुवना वाणी महावसुमती मही ॥१५५ ॥ हिरण्यजननी नन्दा सविसर्गा तपस्विनी॥यशस्विनी सती सत्या वेदविच्चिन्मयी शुभा ॥१५६॥
विश्वा तुर्या वरेण्या च निसृणी यमुना भुवा ॥ मोदा देवी वरिष्ठा च धीश्च शांतिर्मती मही ॥१५७॥ धिषणा योगिनी युक्ता नदी प्रज्ञाप्रचोदनी ॥
दया च यामिनी पद्मा रोहिणी रमणी जया ॥ १५८ ॥ सेनामुखी साममयी बगला दोषवार्जिता ॥ माया प्रज्ञा परा दोग्ध्री मानिनी पोषिणी
क्रिया ॥ १५९ ॥ ज्योत्स्ना तीर्थमयी रम्या सौम्यामृतमया तथा ॥ ब्राह्मी हैमी भुजंगी च वशिनी सुंदरी वनी ॥ १६० ॥ ॐकारहसिनी सर्व

सुधा सा षड्गुणावती ॥ माया स्वधा रमा तन्वी रिपुघ्नी रक्षणी सती ॥ १६१ ॥ हैमी तारा विधुगतिर्विषघ्नी च वरानना ॥ अमरा तीर्थदा दीक्षा
दुर्धर्षा रोगहारिणी ॥ १६२ ॥ नानापापनृशंसघ्नी षट्पदी वज्रिणी रणी ॥योगिनी विमला सत्या अबला बलदा जया ॥१६३॥ गोमती जाह्नवी
रज्वी तपनी जातवेदसा ॥ अचिरा वृष्टिदा ज्ञेया ऋततंत्रा ऋतात्मिका॥ १६४॥ सर्वकामदुघा सौम्या भवाहंकारवार्जिता ॥ द्विपदा या चतुष्पदा
त्रिपदा या च षट्पदा ॥१६५॥अष्टापदी नवपदी सहस्राक्षाक्षरात्मिका ॥ अष्टोत्तरशतं नाम्नां सावित्र्या यः पठेन्नरः॥१६६॥स चिरायुः सुखी पुत्री
विजयी विनयी भवेत् ॥ एतत्ते कथितं विप्र पंचप्रकृतिलक्षणम् ॥ १६७ ॥ मंत्राराधनपूर्वं च विश्वकामप्रपूरणम् ॥ १६८ ॥ इति श्रीबृहन्नारदीय
पुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे पञ्चप्रकृतिमन्त्रादिनिरूपणं नाम त्र्यशीतितमोऽध्यायः ॥८३॥सनत्कुमार उवाच ॥ कलिकल्पांतरे ब्रह्मन्
ब्रह्मणोऽव्यक्तजन्मनः॥लोकपद्मे तपस्थस्य सृष्ट्यर्थं संबभूवतुः॥ १॥विष्णुकर्णमलोद्भूतावसुरौ मधुकैटभौ॥तौ जातमात्रौ पयसि लोकप्रलयलक्षणे॥२॥
जानुमात्रे स्थितौ दृष्ट्वा ब्रह्माणं कमलस्थितम् ॥प्रवृत्तावत्तुमालक्ष्य तुष्टाव जगदंबिकाम्॥३॥ततो देवी जगत्कर्त्री शर्वी शक्तिरनुत्तमा ॥ नारायणाक्षिसं
स्थाना निद्रा प्रीता बभूव ह ॥ ४ ॥ तस्या मंत्रादिकं सर्वं कथयिष्यामि तच्छृणु ॥ सारुणा क्रोधनी शांतिश्चंद्रालंकृतशेखरा ॥ ५ ॥एकाक्षरीबीज
मन्त्रऋषिः शक्तिरुदाहृता॥ गायत्री च भवेच्छन्दो देवता भुवनेश्वरी ॥६ ॥ षड्दीर्घयुक्तबीजेन कुर्यादंगानि षट् क्रमात्॥ संहारसृष्टिमार्गेण मातृका
न्यस्तविग्रहः ॥ ७ ॥ मन्त्रन्यासं ततः कुर्याद्देवताभावसिद्धये ॥ हृल्लेखां मूर्ध्नि वदने गगनां हृदयांबुजे ॥ ८ ॥ रक्तां करालिकां गुह्ये महोच्छुष्मां
पदद्वये ॥ ऊर्द्ध्वप्राग्दक्षिणोदीच्यपश्चिमेषूत्तरेऽपि च ॥ ९ ॥ सद्यादिह्रस्वबीजाद्यान्वस्तव्या भूतसप्रभाः ॥ अंगानि विन्यसेत्पश्चाज्जातियुक्तानि षट्
क्रमात् ॥ १० ॥ ब्रह्माणं विन्यसेद्भाले गायत्र्या सह संयुतम् ॥ सावित्र्या सहितं विष्णुं कपोले दक्षिणे न्यसेत् ॥११॥ वागीश्वर्या समायुक्तं वामगंडे
महेश्वरम् ॥ श्रिया धनपतिं न्यस्य वामकर्णाग्रके पुनः ॥ १२ ॥ रत्या स्मरं मुखे न्यस्य पुण्यागणपतिं न्यसेत् ॥ सव्यकर्णोपरि निधाकर्णगंडांतरा
लयोः ॥ १३ ॥ न्यस्तव्यं वदने मूलं भूपश्चैत्रांस्ततो न्यसेत् ॥ कण्ठमूले स्तनद्वंद्वे वामांसे हृदयांबुजे ॥ १४ ॥ सव्यांसे पार्श्वयुगले नाभिदेशे च
देशिकः ॥ मालांश्च पार्श्वजठरे पार्श्वांसापरके हृदि ॥ १५ ॥ब्रह्माण्याद्यास्तनौ न्यस्य विधिना प्रोक्तलक्षणाः ॥ मूलेन व्यापकं देहे न्यस्य देवीं
विचिंतयेत् ॥ १६ ॥ उद्यद्दिवाकरनिभां तुंगोरोजां त्रिलोचनाम् ॥ स्मेरास्यामिंदुमुकुटां वरपाशांकुशाभयाम् ॥ १७ ॥ रदलक्षं जपेन्मंत्रं त्रिमध्वक्तै
र्हुनेत्ततः ॥ अष्टद्रव्यैर्दशांशेन ब्रह्मवृक्षसमिद्वरैः ॥ १८ ॥ द्राक्षाखर्जूरवातादशर्करानालिकेरकम् ॥ तन्दुलाज्यतिलं विप्र द्रव्याष्टकमुदा

हृतम् ॥ १९ ॥ दद्यादर्घ्यं दिनेशाय तत्र संचिन्त्य पार्वतीम् ॥ पद्ममष्टदलं बाह्ये वृत्तं षोडशभिर्दलैः ॥ २० ॥ विलिखेत्कर्णिकामध्ये
षट्कोणमतिसुन्दरम् ॥ ततः संपूजयेत्पीठं नवशक्तिसमन्वितम् ॥ २१ ॥ जयाख्या विजया पश्चादजिताह्वापराजिता ॥ नित्या विलासिनी दोग्ध्री
त्यघोरा मंगला नव ॥ २२ ॥ बीजाढ्यमासनं दत्त्वा मूर्तिं तेनैव कल्पयेत् ॥ तस्यां संपूजयेद्देवीमावाह्यावरणैः क्रमात् ॥ २३॥ मध्यप्राग्याम्यसौ
म्येषु पूजयेदंगदेवताः ॥ षट्कोणेषु यजेन्मंत्री पश्चान्मिथुनदेवताः ॥ २४ ॥ इन्द्रकोणे लसद्दंडकुंडिकाक्षगुणाभयाम् ॥ गायत्रीं पूजयेन्मंत्री ब्रह्माण
मपि तादृशम् ॥ २५ ॥ रक्षःकोणे शंखचक्रगदापंकजधारिणीम् ॥ सावित्रीं पीतवसनां यजेद्विष्णुं च तादृशम् ॥ २६ ॥ वायुकोणे परश्वक्षमाला
भयवरान्विताम् ॥ यजेत्सरस्वतीमच्छां रुद्रं तादृशलक्षणम् ॥ २७ ॥ वह्निकोणे यजेद्रत्नकुंभं मणिकरंडकम् ॥कराभ्यां बिभ्रतीं पीतां तुंदिलं धनदा
यकम् ॥ २८ ॥ आलिंग्य सव्यहस्तेन वामे तांबूलधारिणीम् ॥ धनदांकसमारूढां महालक्ष्मीं प्रपूजयेत् ॥ २९ ॥ पश्चिमे मदनं बाणपाशांकुश
शरासनाम् ॥ धारयंतं जपारक्तं पूजयेद्रक्तभूषणम् ॥ ३० ॥ सव्येन पतिमाश्लिष्य वामेनोत्पलधारिणीम् ॥ पाणिना रमणांकस्थां रतिं सम्यक्सम
र्चयेत् ॥ ३१ ॥ ऐशान्ये पूजयेत्सम्यक् विघ्नराजं प्रियान्वितम् ॥ सृणिपाशधरं कांतं वरांगासृक्कलांगुलिम् ॥ ३२ ॥ माध्वीपूर्णकपालाढ्यं विघ्न
राजं दिगंबरम् ॥ पुष्करे विगलद्रत्नस्फुरच्चषकधारिणम् ॥ ३३ ॥ सिंदूरसदृशाकारामुद्दाममदविभ्रमाम् ॥ धृतरक्तोत्पलामन्यपाणिना तु
ध्वजस्पृशाम् ॥ ३४ ॥ आश्लिष्टकांतामरुणां पुष्टिमर्चेद्दिगंबराम् ॥ कर्णिकायां निधी पूज्यौ षट्कोणस्याथ पार्श्वयोः ॥ ३५ ॥ अंगानि
केसरेष्वेताः पश्चात्पत्रेषु पूजयेत् ॥ अनंगकुसुमा पश्चाद्द्वितीयानंगमेखला ॥ ३६ ॥ अनंगगमना तद्वदनंगमदनातुरा ॥ भुवनपाला गगनवेगा
षष्ठी चैव ततः परम् ॥ ३७ ॥ शशिलेखा गगनलेखा चेत्यष्टौ यत्र शक्तयः॥ खड्गखेटकधारिण्यः श्यामाः पूज्याश्च मातरः ॥ ३८ ॥ पद्माद्बहिः
समभ्यर्च्याः शक्तयः पारिचारिकाः॥प्रथमानंगरूपास्यादनंगमदना ततः॥३९॥ मदनातुरा भवनवेगा ततो भुवनपालिका॥स्यात्सर्वशिशिरानंगवेदना
नंगमेखला ॥ ४० ॥ चषकं तालवृंतं च तांबूलं छत्रमुज्ज्वलम् ॥ चामरे चांशुकं पुष्पं बिभ्राणाः करपंकजैः ॥ ४१ ॥ सर्वाभरणसंदीप्तान् लोकपाला
न्बहिर्यजेत् ॥ वज्रादीन्यपि तद्बाह्ये देवीमित्थं प्रपूजयेत ॥ ४२ ॥ मंत्री त्रिमधुरोपेतैर्हुत्वाश्वत्थसमिद्वरैः ॥ ब्राह्मणान्वशयेच्छीघ्रं पार्थिवान्पद्महो
मतः ॥ ४३ ॥ पलाशपुष्पैस्तत्पत्नीं मंत्रिणः कुमुदैरपि ॥ पंचविंशतिधा जप्तैर्जलैः स्नानं दिने दिने ॥ ४४ ॥ आत्मानमभिषिंचेद्यः सर्वसौभाग्य
वान्भवेत् ॥ पंचविंशतिधा जप्तं जलं प्रातः पिबेन्नरः ॥४५॥ अवाप्य महतीं प्रज्ञां कवीनामग्रणीर्भवेत्॥कर्पूरागरुसंयुक्तकुंकुमं साधु साधितम्॥४६॥

गृहीत्वा तिलकं कुर्याद्राजवश्यमनुत्तमम् ॥ शालिपिष्टमयीं कृत्वा पुत्तलीं मधुरान्विताम् ॥ ४७ ॥ जप्तां प्रतिष्ठितप्राणां भक्षयेद्रविवासरे ॥ वशं
नयति राजानं नारीं वा नरमेव च ॥ ४८ ॥ कण्ठमात्रोदके स्थित्वा वीक्ष्य तोयोद्गतं रविम् ॥ त्रिसहस्रं जपेन्मंत्रं कन्यामिष्टां लभेत्ततः ॥ ४९ ॥
अन्नं तन्मंत्रितं मंत्री भुंजीत श्रीप्रसिद्धये ॥ लिखितां भस्मना मायां ससाध्यां फलकादिषु ॥ ५० ॥ तत्कालं दर्शयेद्यंत्र सुखं सूयेत गर्भिणी ॥
भुवनेशीयमाख्याता सहस्रभुजसंभवा ॥ ५१ ॥ भुक्तिमुक्तिप्रदा नृणां स्मर्तॄणां द्विजसत्तम ॥ ततः कल्पांतरे विप्र कदाचिन्महिषासुरः ॥ ५२ ॥
बभूव लोकपालांस्तु जित्वा भुंक्ते जगत्त्रयम् ॥ ततस्तत्पीडिता देवा वैकुंठं शरणं ययुः ॥५३॥ ततो देवी महालक्ष्मीश्चक्राद्यंगोत्थतेजसा ॥ श्रीर्बभूव
मुनिश्रेष्ठ मूर्ता व्याप्तजगत्त्रया ॥ ५४॥ स्वयं सा महिषादींस्तु निहत्य जगदीश्वरी ॥ अरविंदवनं प्राप्ता भजतामिष्टदायिनी ॥५५॥ तस्याः समर्चनं
वक्ष्ये संक्षेपेण शृणु द्विज ॥ मृत्युक्रोधेन गुरुणा बिंदुभूषितमस्तका ॥५६॥ बीजमन्त्रः श्रियः प्रोक्तो भजतामिष्टदायकः॥ ऋषिर्भृगुर्निवृच्छंदो देवता
श्रीः समीरिता ॥ ५७ ॥ षड्दीर्घयुक्तबीजेन कुर्यादंगानि षट् क्रमात् ॥ ततो ध्यायेज्जगद्देव्यां श्रियं संपत्तिदायिनीम् ॥ ५८ ॥ कांचनाभां गजैः
श्वेतैश्चतुर्भिः स्वकरोद्धृतैः ॥ हिरण्मयामृतघटैः सिच्यमानां सरोजगाम् ॥ ५९ ॥ वराभयाब्जस्रग्घस्तां क्षौमवस्त्रां किरीटिनीम् ॥ सिद्धलक्षं जपे
न्मंत्रं तत्सहस्रं हुनेत्तथा ॥ ६० ॥ सुगंधकुसुमैरिष्ट्वा कमलैर्मधुरप्लुतैः ॥ महालक्ष्म्युदिते पीठे मूर्तिं मूलेन कल्पयेत् ॥ ६१ ॥ यजेत्पूर्ववदं
गानि दिग्दलेष्वर्चयेत्ततः ॥ वासुदेवं संकर्षणं प्रद्युम्नमनिरुद्धकम् ॥ ६२ ॥ हिमपीततमालेंद्रनीलाभान्पीतवाससः ॥ शंखचक्रगदापद्मधारिण
स्तांश्चतुर्भुजान् ॥ ६३ ॥ विदिगंतेषु पत्रेषु दमकादीन्यजेद्गजान् ॥ दमकं पुण्डरीकं च गुग्गुलं च कुरंटकम् ॥६४॥ यजेच्छंखनिधिं देव्या दक्षिणे
प्रमदान्वितम् ॥ मुक्तामाणिक्यसंकाशौ किंचित्स्मितमुखांबुजौ ॥ ६५ ॥ अन्योन्यालिंगनपरौ शंखपंकजधारिणौ ॥ विगलद्रत्नवर्षाभ्यां शंख
भ्यां मूर्ध्नि लांछितौ ॥ ६६ ॥ तुंदिलं कंबुकनिधिं वसुधारां घनस्तनीम् ॥ वामतः पंकजनिधिं प्रियया सहितं यजेत् ॥ ६७ ॥ सिंदूराभौ भुज
शिलष्टौ रक्तपद्मोत्पलान्वितौ ॥ निःसरद्रत्नवर्षाभ्यां पद्माभ्यां मूर्ध्नि लांछितौ ॥ ६८ ॥ तुंदिलं पंकजनिधिं तत्त्वां वसुमतीमपि ॥ दलाग्रेषु यजेदेता
बलाक्याद्याः समंततः ॥६९॥ बलाकी विमला चैव कमला वनमालिका ॥ विभीषिका मालिका च शांकरी वसुमालिका ॥७०॥ पंकजद्वयधारिण्यो
मुक्ताहारसमप्रभाः ॥ लोकेशान्पूजयेदंते वज्राद्यस्त्राणि तद्बहिः ॥ ७१ ॥ इत्थं यो भजते देवीं विधिना साधकोत्तमः ॥ धनधान्यसमृद्धः स्याच्छ्रि
यमाप्नोत्यनिंदिताम् ॥ ७२ ॥ वक्षःप्रमाणसलिले स्थित्वा मन्त्रमिमं जपेत् ॥ त्रिलक्षमर्कगं ध्यायन्स भवेत्कमलालयः ॥ ७३ ॥ विष्णुगेहस्थ

बिल्वस्य मूले लक्षत्रयं जपेत् ॥ साधको यः स लभते वांछितं धनसंचयम् ॥ ७४ ॥ अशोकवह्नावाज्याक्तैस्तंडुलैर्वशयेज्जगत् ॥ होमेन
खादिरे वह्नौ तंडुलैर्मधुरोक्षितैः ॥ ७५ ॥ राजा वश्यो भवेच्छीघ्रं महालक्ष्मीश्च वर्द्धते ॥ बिल्वच्छायामधिवसन्बिल्वमिश्रहविष्यभुक् ॥ ७६ ॥
संवत्सरत्रयं हुत्वा तत्फलैरथवांबुजैः ॥ साधकेंद्रो महालक्ष्मीं चक्षुषा पश्यति ध्रुवम् ॥ ७७ ॥ अथ कल्पांतरे ब्रह्मन्देवराज्यविलुंपकौ ॥ जातौ
शुंभनिशुंभौ द्वावसुरौ लोककंटकौ ॥ ७८ ॥ ततो ऽष्टाधिकारैस्तु शक्राद्यैः संस्तुता मुने ॥ महासरस्वती देवी तदा चावततार ह ॥ ७९ ॥ हिमालये
महापुण्ये शैलोद्देशेऽतिशोभने ॥ ततः शुम्भादिकान्हत्वा दैवतैः परिपूजिता ॥८०॥वरं दत्त्वाविशद्देवी मानसं नाम वै सरः॥ तस्या मंत्रं प्रवक्ष्यामि
शृणुष्वावहितो मुने॥८१॥ ज्ञानामृता शशधरा क्रांतभालोपशोभिता ॥ वाग्बीजं तेन चांगानि कल्पयेत्साधकोत्तमः ॥ ८२ ॥ऋषिः सदाशिवश्चास्य
छंदोऽनुष्टुबुदाहृतम् ॥ देवता वाक्समाख्याता भजतामिष्टदायिनी ॥८३॥ श्वेतांबरां विसश्वेतां वीणापुस्तकधारिणीम्॥ दिव्यैराभरणैर्युक्तां ध्यायेद्देवीं
निरंतराम् ॥ ८४ ॥ महासरस्वतीपीठे मूर्तिं मूलेन कल्पयेत् ॥ देवीं संपूजयेत्तस्यामंगाद्यावरणैः सह ॥ ८५ ॥ आदावंगावृतिः पश्चादंबिकाद्यास्स
मीरिताः ॥ द्वितीया मातृभिः प्रोक्ता तृतीयाद्यष्टशक्तिभिः ॥ ८६॥ चतुर्थी पंचमी प्रोक्ता द्वात्रिंशच्छक्तिभिः पुनः॥चतुःषष्ट्या स्मृता षष्ठी शक्ति
भिर्लोकनायकैः ॥ ८७॥ सप्तमी पुनरेतेषामस्त्रैः स्यादष्टमावृतिः ॥ एवं पूज्या जगद्धात्री श्रीमती वाग्भवाभिधा ॥ ८८ ॥ स्थानेषु पूर्वमुक्तेषु यजे
दंगानि साधकः ॥ अम्बिका वाग्भवा दुर्गा श्रीशक्तिश्चोक्तलक्षणा ॥ ८९ ॥ ब्रह्माद्याश्च ततः पूज्याः कराली विकराल्युमा ॥ सरस्वती श्रीर्दुर्गा
च लक्ष्मीश्चैव धृतिः स्मृतिः ॥ ९० ॥ श्रद्धा मेधा रतिः कांतिरार्या षोडश शक्तयः ॥ खड्गखेटकधारिण्यः श्यामाः पूज्याः स्वलं
कृताः ॥ ९१ ॥ विषघ्नी पुष्टयः प्रज्ञा सिनीवाली कुहूः पुनः ॥ रुद्रवीर्या प्रभा नंदा पोषणा वृद्धिदा शुभा ॥ ९२ ॥ कालरात्रिर्महारात्रिर्भद्रकाली
कपर्दिनी ॥ विकृतिर्दंडिमुंडिन्यौ सेंदुखंडा शिखण्डिनी ॥ ९३ ॥ निशुम्भशुम्भमथनी चण्डमुण्डविनाशिनी ॥ इन्द्राणी चैव रुद्राणी
शंकरार्द्धशरीरिणी ॥ ९४ ॥ नारी नारायणी चैव त्रिशूलिन्यपि पालिनी ॥ अम्बिका ह्लादिनी चैव द्वात्रिंशच्छक्तयः सिताः ॥ ९५ ॥
चक्रहस्ताः पिशाचास्याः संपूज्याश्चारुभूषणाः ॥ पिंगलाक्षी विशालाक्षी समृद्धिर्बुद्धिरेव च ॥ ९६ ॥ श्रद्धा स्वाहा स्वधा भिक्षा माया संज्ञा वसुं
धरा ॥ त्रिलोकधात्री गायत्री सावित्री त्रिदशेश्वरी ॥ ९७ ॥ सरूपा बहुरूपा च स्कंदमाता श्रुतप्रिया॥विमला कमला पश्चादरुणी पुनरारुणी ॥
॥९८ ॥ प्रकृतिर्विकृतिः सृष्टिः स्थितिः संहृतिरेव च॥सन्ध्या माता सती हंसी मर्दिका वज्रिका परा ॥९९॥ देवमाता भगवती देवकी कमलासना॥

त्रिमुखी सप्तवदना सुरासुरविमर्दिनी ॥ १०० ॥ लंबोष्ठी चोर्द्ध्वकेशी च बहुशिश्रा वृकोदरी ॥स्थरेखाह्वया पश्चाच्छिरेखा तथापरा ॥ १०१ ॥
गगनवेगा पवनवेगा वेगा च तदनंतरम् ॥ ततो भुवनपालाख्या ततः स्यान्मदनातुरा ॥ १०१ ॥ अनंगानंगवदना तथैवानंगमेखला ॥ अनंग
कुसुमा विश्वरूपा सुरभयंकरी ॥१०३॥ अक्षोभ्या सप्तवाहिन्या वज्ररूपा शुचिव्रता ॥वरदाख्याथ वागीशी चतुःषष्टिस्समीरिताः ॥१०४॥चापबाण
धराः सर्वा ज्वालाजिह्वा महाप्रभाः ॥ दंष्ट्रिण्यश्चोर्द्ध्वकेश्यस्ता युद्धोपक्रांतमानसाः ॥ १०५ ॥ सर्वाभरणसंदीप्ता पूजनीयाः प्रयत्नतः ॥ लोकेशाः
पूर्ववत्पूज्यास्तद्वद्वज्रादिकान्यपि ॥ १०६ ॥ जपेत्षोडशलक्षं च तद्दशांशं हुनेत्सुधीः ॥ आज्येन खादिरे वह्नौ ततः सिद्धो भवेन्मनुः ॥ १०७ ॥
कमलैरयुतं हुत्वा राजानं वशमानयेत् ॥ उत्पलैर्जुह्वतो नूनं महालक्ष्मीः प्रजायते ॥ १०८ ॥ पलाशकुसुमैर्हुत्वा वत्सरेण कविर्भवेत् ॥ राजीलवण
होमेन वनितां वशमानयेत् ॥ १०९ ॥ भूमौ भोगांस्तु भुक्त्वांते विष्णुलोकमवाप्नुयात् ॥ वाणीबीजजपाशक्तो नात्र कार्या विचारणा ॥ ११० ॥
इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे देवीमंत्रनिरूपणं नाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥ सनत्कुमार उवाच ॥वाग्देवता
वतारोऽन्यः कालिकेति प्रकीर्तिता ॥ तस्या मन्त्रं प्रवक्ष्यामि भुक्तिमुक्तिप्रदं नृणाम् ॥ १ ॥ सृष्टिक्रियान्विता शांतिर्बिद्वाढ्या च त्रिधा
पुनः ॥ अरुणाक्ष्यादीपिका च बिंदुयुक्ता द्विधा ततः ॥ २ ॥ मायाद्वयं ततः पश्चाद्दक्षिणे कालिके पदम् ॥ पुनश्च सप्तबीजानि स्वाहांतोऽयं
मनूत्तमः ॥ ३ ॥ भैरवोऽस्य ऋषिश्छन्द उष्णिक्काली तु देवता ॥ बीजं मायादीर्घवर्त्म शक्तिरुक्ता मुनीश्वर ॥ ४ ॥ षड्दीर्घाढ्येन बीजेन
विद्याया अंगमीरितम् ॥ मातृकार्णान्दश दश हृदये भुजयोः पदोः ॥ ५ ॥ विन्यस्य व्यापकं कुर्यान्मूलमंत्रेण साधकः ॥ शिरः कृपाणमभयं वरं
हस्तैश्च बिभ्रतीम् ॥ ६ ॥ मुंडस्रङ्मस्तकां मुक्तकेशां:पितृवनस्थिताम् ॥सर्वालंकृतवर्णां च श्यामांगीं कालिकां स्मरेत् ॥ ७ ॥ एवं ध्यात्वा जपेल्लक्षं
जुहुयादयुतं ततः ॥ प्रसूनैः करवीरोत्थैः पूजायंत्रमथोच्यते ॥ ८ ॥ विलिख्य पूर्वं षट्कोणं त्रिकोणत्रितयं ततः ॥ पद्ममष्टदलं बाह्ये भूपुरं तत्र पूज
येत् ॥ ९ ॥ जया च विजया चापि अजिता चापराजिता ॥ नित्या विलासिनी वापि दोग्ध्र्यघोरा च मंगला ॥१०॥ पीठस्य शक्तयो मायात्मने
हृत्पीठमंत्रकः ॥ शिवरूपशवस्थां च शिवाभिर्दिक्षु वेष्टिताम् ॥११॥ महाकालरतासक्तां ध्यात्वांगान्यर्चयेत्पुरा ॥कालीं कपालिनीं कुल्लां कुरुकुल्लां
विरोधिनीम् ॥ १२ ॥ विप्रचित्तां च षट्कोणे नवकोणे ततोऽर्चयेत् ॥ उग्रामुग्रप्रभां दीप्तां नीलाघानां बलाकिकाम् ॥ १३ ॥ मात्रां मुद्रां तथा
मित्रां पूज्याः पत्रेषु मातरः ॥ पद्मस्यास्य सुयत्नेन ब्राह्मी नारायणीत्यपि ॥ १४ ॥ माहेश्वरी च चामुंडा कौमारी चापराजिता ॥ वाराही नार

सिंही च पुनरेतास्तु भूपुरे ॥ १५ ॥ भैरवीं महदाद्यां तां सिंहाद्यां धूम्रपूर्विकाम् ॥ भीमोन्मत्तादिकां चापि वशीकरणभैरवीम् ॥ १६ ॥ मोहनाद्यां
समाराध्य शक्रादीन्यायुधान्यपि ॥ एवमाराधिता काली सिद्धा भवति मंत्रिणाम् ॥ १७ ॥ ततः प्रयोगान्कुर्वीत महाभैरवभाषितान् ॥ आत्मनो
वा परस्यार्थं क्षिप्रसिद्धिप्रदायकान्॥ १८॥स्त्रीणां प्रहारं निंदां च कौटिल्यं वाप्रियं वचः॥ आत्मनो हितमन्विच्छन् कालीभक्तो विवर्जयेत् ॥१९॥
सुदृशो मदनावासं पश्यन्यः प्रजपेन्मनुम् ॥ अयुतं सोऽचिरादेव वाक्पपतेः समतामियात् ॥२०॥ दिगम्बरो मुक्तकेशः श्मशानस्थोऽधियामिनि ॥
जपेद्योऽयुतमेतस्य भवेयुः सर्वसिद्धयः ॥ २१ ॥ शवस्य हृदये स्थित्वा निर्वासाः प्रेतभूमिगः ॥ अर्कपुष्पसहस्रेणाभ्यक्तेन स्वीयरेतसा ॥ २२ ॥
देवीं यः पूजयेद्भक्त्या जपन्नेकैकशो मनुम् ॥ सोऽचिरेणैव कालेन धरणीप्रभुतां व्रजेत्॥ २३॥ रजःकीर्णं भगं नार्या ध्यायन्यो ह्ययुतं जपेत् ॥ सक
वित्वेन रम्येण जनान्मोहयति ध्रुवम् ॥ २४ ॥ त्रिपञ्चारे महापीठे शिवस्य हृदि संस्थिताम् ॥ महाकालेन देवेन मारयुद्धं प्रकुर्वतीम् ॥ २५ ॥ तां
ध्यायन्स्मेरवदनां विदधत्सुरतं स्वयम् ॥ जपेत्सहस्रमपि यः स शंकरसमो भवेत् ॥ २६ ॥ अस्थिलोमत्वचायुक्तं मांसं मार्जारमेषयोः ॥ उष्ट्रस्य
महिषस्यापि बलिं यस्तु समर्पयेत् ॥ २७ ॥ भूताष्टम्योर्मध्यरात्रे वश्याः स्युस्तस्य जन्तवः ॥ विद्यालक्ष्मीयशःपुत्रैः स चिरं सुखमेधते ॥ २८ ॥
यो हविष्याशनरतो दिवा देवीं स्मरन् जपेत् ॥ नक्तं निधुवनासक्तो लक्षं स स्याद्धरापतिः ॥ २९ ॥ रक्तांभोजैर्हुनेन्मंत्री धनैर्जयति वित्तपम्॥बिल्व
पत्रैर्भवेद्राज्यं रक्तपुष्पैर्वशीकृतिः ॥ ३० ॥ असृजा महिषादीनां कालिकां यस्तु तर्पयेत् ॥ तस्य स्युरचिरादेव करस्थाः सर्वसिद्धयः ॥
॥ ३१ ॥ यो लक्षं प्रजपेन्मन्त्रं शवमारुह्य मन्त्रवित् ॥ तस्य सिद्धो मनुः सद्यः सर्वेप्सितफलप्रदः ॥ ३२ ॥ तेनाश्वमेधप्रमुखैर्यागैरिष्टं
सुजन्मना ॥ दत्तं दानं तपस्तप्तं उपास्ते यस्तु कालिकाम् ॥ ३३ ॥ ब्रह्मा विष्णुः शिवो गौरी लक्ष्मीर्गणपती रविः ॥ पूजिताः सकला देवा यः
कालीं पूजयेत्सदा ॥ ३४ ॥ अथापरः सरस्वत्या ह्यवतारो निगद्यते ॥ यां निषेव्य नरा लोके कृतार्थाः स्युर्न संशयः ॥ ३५ ॥ आप्या
यिनी चन्द्रयुक्ता माया च वदनांतरे ॥ सकामिका क्रुधा शांतिश्चन्द्रालंकृतमस्तका ॥ ३६ ॥ दीपिका सासना चन्द्रयुगस्त्रं मनुरीरितः ॥ मुनि
रक्षोभ्य उद्दिष्टश्छन्दस्तु बृहती मतम्॥ ३७ ॥ तारारव्या देवता बीजं द्वितीयञ्च चतुर्थकम् ॥ शक्तिः षड्दीर्घयुक्तेन द्वितीयेनांगकल्पनम् ॥ ३७ ॥
षोढा न्यासं ततः कुर्यात्तारायाः सर्वसिद्धिम् ॥ श्रीकण्ठादीन्न्यसेद्रुद्रान्मातृकावर्णपूर्वकान् ॥ ३९ ॥ मातृकोक्तस्थले माया तृतीयक्रोधपूर्वकान् ॥
चतुर्थीनमसायुक्तान्प्रथमो न्यास ईरितः ॥ ४० ॥ शवपीठसमासीनां नीलकांतिं त्रिलोचनाम् ॥ अर्द्धेन्दुशेखरां नानाभूषणाढ्यां स्मरन्न्यसेत् ॥४१॥

द्वितीये तु ग्रहन्यासं कुर्यात्तां समनुस्मरन् ॥ त्रिबीजस्वरपूर्वं तु रक्तसूय हृदि न्यसेत् ॥ ४२ ॥ तथा पवर्गपूर्वं तु शुक्लं सोमं भ्रुवोर्द्वये ॥ कवर्ग
पूर्वं रक्ताभं मंगलं लोचनत्रयम् ॥ ४३ ॥ चवर्गाद्यं बुधं श्यामं न्यसेद्वक्षस्थले बुधः ॥ दवर्गाद्यं पीतवर्णं कण्ठकूपे बृहस्पतिम् ॥ ४४ ॥ तवर्गाद्यं श्वेत
वर्णं घटिकायां तु भार्गवम् ॥ नीलवर्णं पवर्गाद्यं नाभिदेशे शनैश्चरम् ॥ ४५ ॥ शवर्गाद्यं धूम्रवर्णं ध्यात्वा राहुं मुखे न्यसेत् ॥ त्रिबीजपूर्वकश्चैवं
ग्रहन्यासः समीरितः ॥ ४६ ॥ तृतीयं लोकपालानां न्यासं कुर्यात्प्रयत्नतः ॥ मायादिबीजत्रितयपूर्वकं सर्वसिद्धये ॥ ४७ ॥ स्वमस्तके ललाटादि
दिक्ष्वष्टस्वधऊर्द्ध्वतः ॥ ह्रस्वदीर्घकादिकाष्टवर्गपूर्वान्दिशाधिपान् ॥ ४८ ॥ शिवशक्त्यभिधे न्यासं चतुर्थे तु समाचरेत् ॥ त्रिबीजपूर्वकान्न्यस्येत्षट्
शिवाञ्छक्तिसंयुतान् ॥ ४९ ॥ आधारादिषु चक्रेषु स्वचक्रवर्णपूर्वकान् ॥ ब्रह्माणं डाकिनीयुक्तं वादिसांतार्णपूर्वकम् ॥ ५० ॥ मूलाधारे विन्यसेच्च
चतुर्दलसमन्वितम् ॥ श्रीविष्णुं राकिणीयुक्तबादिलांतार्णपूर्वकम् ॥ ५१ ॥ स्वाधिष्ठानाभिधे चक्रे लिंगस्थे षड्दले न्यसेत् ॥ रुद्रं तु डाकिनीयुक्तं
डादिफांतार्णपूर्वकम् ॥ ५२ ॥ चक्रे दशदले न्यस्येन्नाभिस्थे मणिपूरके ॥ ईश्वरं कादिठान्तार्णपूर्वकं शाकिनीयुतम् ॥ ५३ ॥ विन्यसेद्द्वादशदले
हृदयस्थे त्वनाहते ॥ सदाशिवं शाकिनीं च षोडशस्वरपूर्वकम् ॥ ५४ ॥ कण्ठस्थे षोडशदले विशुद्धाख्ये प्रविन्यसेत् ॥ आज्ञाचक्रे परशिवं हाकिनीसंयुतं
न्यसेत् ॥ ५५ ॥ लक्षार्णपूर्वं भ्रूमध्यसंस्थितेऽतिमनोहरे ॥ तारादिपंचमं न्यासं कुर्यात्सर्वेष्टसिद्धये ॥ ५६ ॥ अष्टौ वर्गान्स्वरद्वंद्वपूर्वकान् बीजसंयुतान् ॥
ताराद्या न्यासपूर्वाश्च प्रयोज्या अष्टशक्तयः ॥ ५७ ॥ ताराथोग्रा महोग्रापि वज्रा काली सरस्वती ॥ कामश्वेरी च चामुंडा इत्यष्टौ तारिकाः स्मृताः
॥ ५८ ॥ ब्रह्मरंध्रे ललाटे च भ्रूमध्ये कण्ठदेशतः ॥ हृदि नाभौ फले मूलाधारे चेताः क्रमान्न्यसेत् ॥ ५९ ॥ अङ्गन्यासं ततः कुर्यात्पीठाख्यं सर्वसिद्धिदम् ॥
आधारे कामरूपाख्यं बीजं ह्रस्वार्णपूर्वकम् ॥ ६० ॥ हृदि जालंधरं बीजं दीर्घपूर्वं प्रविन्यसेत् ॥ ललाटे पूर्णगिर्याख्यं कवर्गाद्यं न्यसेत्सुधीः ॥ ६१ ॥
उड्डीयानं चवर्गाद्यं केशसन्धौ प्रविन्यसेत् ॥ कण्ठे तु मथुरापीठं दशम यादिकं न्यसेत् ॥ ६२ ॥ षोढा न्यासस्तु तारायाः प्रोक्तोऽभीष्टप्रदायकः ॥
हृदि श्रीमदेकजटां तारिणीं शिरसि न्यसेत् ॥ ६३ ॥ वज्रोदके शिखां पातु उग्रतारां तु वर्मणि ॥ महोग्रा वत्सरे नेत्रे पिंगाग्रैकजटास्त्रके ॥ ६४ ॥
षड्दीर्घयुक्तमायाया एतान्यष्टौ षडंगके ॥ अंगुष्ठादिष्वंगुलीषु पूर्वं विन्यस्य यत्नतः ॥ ६५ ॥ तर्जनीमध्यमाभ्यां तु कृत्वा तालत्रयं ततः ॥ छोटि
कामुद्रया कुर्याद्दिग्बन्धं देवतां स्मरन् ॥ ६६ ॥ विद्यया तारपुटया व्यापकं सप्तधा चरेत् ॥ उग्रतारां ततो ध्यायेत्सद्यो वादेऽतिसिद्धिदाम् ॥ ६७ ॥
लयाब्धावंबुजन्मस्थां नीलाभां दिव्यभूषणाम् ॥ कम्बुं खड्गं कपालं च नीलाब्जं दधतीं करैः ॥ ६८ ॥ नागश्रेष्ठालंकृतांगीं रक्तनेत्रत्रयां स्मरेत् ॥ जपे

ल्लक्षचतुष्कं हि दशांशं रक्तपद्मकैः ॥ ६९ ॥ हुनेत्क्षीराज्यसंमिश्रैः शंखं संस्थाप्य संजपेत् ॥ नारीं पश्यन्स्पृशन्गच्छन्महानिशि बलिं चरेत् ॥
॥ ७० ॥ श्मशाने शून्यसदने देवागारेऽथ निर्जने ॥ पर्वते वनमध्ये वा शवमारुह्य मंत्रवित् ॥ ७१ ॥ समरे शत्रुनिहतं यद्वा षाण्मासिकं शिशुम् ॥
विद्यां साधयतः शीघ्रं साधितैवं प्रसिद्ध्यति ॥ ७२ ॥ मेधा प्रज्ञा प्रभा विद्या धीवृत्तिस्मृतिबुद्धयः ॥ विश्वेश्वरीति संप्रोक्ताः पीठस्य
नव शक्तयः ॥ ७३ ॥ भृगुर्मन्विदुसंयुक्तं मेघवर्त्मं सरस्वती ॥ योगपीठात्मने हार्दं पीठस्य मनुरीरितः ॥ ७४ ॥ दत्त्वानेनासनं मूर्तिं मूल
मंत्रेण कल्पयेत् ॥ पूजयेद्विधिवद्देवीं तद्विधानमथोच्यते ॥ ७५ ॥ तारो माया भगं ब्रह्मा जटे सूर्यः सदीर्घकम् ॥ यक्षाधिपतये तंद्री
सोपनीतं बलिं ततः ॥ ७६ ॥ गृहयुग्मं शिवा स्वाहा बलिमंत्रोऽयमीरितः ॥ दद्यान्नित्यं बलिं तेन मध्यरात्रे चतुष्पथे ॥ ७७ ॥ जलदानादिकं मंत्रं
विंदध्याद्दशभिस्ततः ॥ ध्रुवो वज्रोदके वर्म फट्सप्तार्णो जलग्रहे ॥ ७८ ॥ ताराद्या वह्निजायांता माया हि क्षालने मता ॥ तारो मायाः भृगुः कर्णो
विशुद्धं धर्मवर्मतः ॥ ७९ ॥ सर्वपापानि शाम्यंते छेतो नेत्रयुतं जलम् ॥ कल्पान्तनयनस्वाहा मंत्र आचमने मतः ॥ ८० ॥ ध्रुवो मणिधरीत्यंते
वज्रिण्यक्षियुता मृतिः ॥ खरिविद्याग्निजश्च सर्ववांते बकोऽब्जवान् ॥ ८१ ॥ कारिण्यंते दीर्घवर्म अस्त्रं वह्निप्रियांतिमः ॥ त्रयोविंशतिवर्णात्मा
शिखाया बंधने मनुः ॥ ८२ ॥ प्रणवो रक्षयुगलं दीर्घवर्मास्त्रठद्वयम् ॥ नवार्णेनामुना मंत्री कुर्याद्भूमिविशोधनम् ॥ ८३ ॥ नारांते सर्वविघ्नानुत्सार
येति पदं ततः ॥ हुं फट् स्वाहा गुणेंद्वर्णो मनुर्विघ्ननिवारणम् ॥ ८४ ॥ मायाबीजं जपापुष्पनिभं नाभौ विचिंतयेत्॥ तदुत्थेनाग्निना देहं दहेत्साद्ध
स्वपाप्मना ॥ ८५ ॥ ताराबीजं सुवर्णाभं चिंतयेद्धृदि मंत्रवित् ॥ पवनेन तदुत्थेन पापभस्म क्षिपेद्भुवि ॥ ८६ ॥ तुरीयं चंद्रकुंदाभं बीजं ध्यात्वा
ललाटतः॥ तदुत्थसुधयादेहं स्वयं वै देवतानिभम् ॥८७॥ अनया भूतशुद्ध्या तु देवीसादृश्यमाप्नुयात् ॥ तारोऽनंतो भगुः कर्णो पद्मनाभयुतो बली॥
॥ ८८ ॥ खे वज्ररेखे क्रोधाख्यं बीजं पावकवल्लभा ॥ अमुना द्वादशार्णेन रचयेन्मंडलं शुभम् ॥ ८९ ॥ तारो यथागता निद्रा सदृक्कुषेकभृगुर्विषम् ॥
सदीर्घस्मृतिरौ साक्षौ महाकालो भगान्वितः ॥९०॥ क्रोधोऽस्त्रं मनुवर्णोऽयं मनुः पुष्पादिशोधने ॥ तारः पाशः परा स्वाहा पंचार्णश्चित्तशोधने ॥
॥ ९१ ॥ मनवो दश संप्रोक्ता अर्घ्यस्थापनमुच्यते ॥ सेंदुभ्यां मासतो माया भुवं संसृज्य भूगृहम् ॥ ९२ ॥ वृतं त्रिकोणसंयुक्तं कुर्यान्मं
डलमंत्रतः ॥ यजेत्तत्राधारशक्तिं वह्निमंडलमध्यगाम् ॥ वह्निमंडलमभ्यर्च्य महाशंखं निधापयेत् ॥ ९३ ॥ वामकर्णेन्दुयुक्तेन फडंतेन विहायसा ॥
प्रक्षालितं भृगुदडी त्रिमूर्तीदुयुतं पठेत् ॥ ९४ ॥ ततोऽर्चयेन्महाशंखं जपन्मंत्रचतुष्टयम् ॥ दीर्घत्रयान्विता माया काली सृष्टिः सदीर्घसः ॥ ९५ ॥

प्रतिमासंयुतं मासं यवनं हृदयं ततः ॥एकादशार्णः प्रथमो महाशंखार्चने मनुः ॥ ९६ ॥ हंसो हरिभुजंगेशयुक्तो दीर्घत्रयेंदुयुक् ॥ तारिण्यंते कपालाय
नमोंतो द्वादशाक्षरः ॥९७॥ स्वं दीर्घत्रयमन्वाढ्यमेषो वामदगन्वितः ॥लोकपालाय हृदयं तृतीयोऽयं शिवाक्षरः ॥ ९८ ॥ मायास्त्रीबीजमर्द्धेंदुयुतं
स्वं स्वर्गखादिमः ॥पालाय सर्वाधाराय सर्वः सर्वोद्भवस्तथा॥९९॥सर्वशुद्धिमयश्चेति ङेंताः सर्वासुरांतिकम् ॥ रुधिरा रतिदीर्घा च वायुः शुभ्रानिलः
सुरा ॥ १०० ॥ भाजनाय भगी सत्यो विकपालाय हृन्मनुः ॥ तुर्यो रसेषु वर्णोऽयं महाशंखप्रपूजने ॥ १०१ ॥ नवार्कमंडलं चेष्ट्वा सलिलं
मूलमंत्रतः ॥ प्रपूरयेत्सुधाबुद्ध्या गंधपुष्पाक्षतादिभिः ॥ १०२ ॥ मुद्रां त्रिखंडां संदर्श्य पूजयेच्चंद्रमंडलम् ॥ वाक्सत्यपद्मागगने रेफान्नुग्रहबिंदु
युक् ॥ १०३ ॥ मूलमंत्रो विपद्ध्वंसमनुसर्गसमन्वितम् ॥ अष्टकृत्वोऽमुना मंत्री मंत्रयेत्प्रयतो जलम् ॥ १०४ ॥ मायया मदिशं क्षिप्त्वा खं योनिं
च प्रदर्शयेत् ॥ तत्र वृत्ताष्टषट्कोणं ध्यात्वा देवीं विचिंतयेत् ॥ १०५ ॥ पूर्वोक्तां पूजयेत्त्वेनां मूलेनाथ प्रतर्पयेत् ॥ तर्जनीमध्यमानामाकनि
ष्ठाभिर्महेश्वरीम् ॥ १०६ ॥ सांगुष्ठानिश्चतुर्वारं महाशंखस्थिते जले ॥ खंरेफमनुबिंद्वाढ्यं भृगुमन्विंदुयुक्तया ॥ १०७ ॥ ध्रुवाद्येन नमोंतेन
तर्प्यादानंदभैरवम् ॥ ततस्तेनार्घतोयेन प्रोक्षेत्पूजनसाधनम् ॥ १०८ ॥ योनिमुद्रां प्रदर्श्यापि प्रणमेद्भवतारिणीम् ॥ विधानमर्घे संप्रोक्तं
सर्वसिद्धिप्रदायकम् ॥ १०९ ॥ पूर्वोक्ते पूजयेत्पीठे पद्मे षट्कोणकर्णिके ॥ धरागृहावृते रम्ये देवीं रम्योपचारकैः ॥ ११० ॥ महीगृहे चतुर्दिक्षु
गणेशादीन्प्रपूजयेत् ॥ पाशांकुशौ कपालं च त्रिशूलं दधतं करैः ॥१११॥ अलंकारचयोपेतं गणेशं प्राक्तमर्चयेत् ॥ कपालशूले हस्ताभ्यां दधतं
सर्पभूषणम् ॥ ११२ ॥ स्वयूथवेष्टितं रम्यं बटुकं दक्षिणेऽर्चयेत् ॥ असिशूलकपालानि डमरुं दधतं करैः ॥ ११३ ॥ कृष्णं दिगंबरं क्रूरं क्षेत्रपालं
च पश्चिमे ॥ कपालं डमरुं पाशं लिंगं शंबिभ्रतीं करैः ॥ ११४ ॥ अध्याकन्या रक्तवस्त्रा योगिनीरुत्तरे यजेत्॥ अक्षोभ्यं प्रयजेन्मूर्ध्नि देव्या
मंत्रऋषिं शुभम् ॥ ११५ ॥ अक्षोभ्यं वस्त्रपुष्पं च प्रतीच्छानलवल्लभा ॥ अक्षोभ्यपूजने मंत्रः षट्कोणेषु षडंगकम् ॥ ११६ ॥ वैरोचनं चामि
ताभं पद्मनाभाभिधं तथा ॥ शंखं पांडुरसंज्ञं च दिग्दलेषु प्रपूजयेत् ॥ ११७ ॥ लभकां मानकां चैव पांडुरां तारकां तथा ॥ विदिग्गताब्जपत्रेषु
पूजयेदिष्टसिद्धये ॥ ११८ ॥ बिंदुनामादिवर्णाद्याः संबुद्ध्यंतास्तथाभिधाः ॥ व्रजपुष्पं प्रतीच्छाग्निप्रियांताः प्रणवादिकाः ॥ ११९ ॥ वैरोचनादि
पूजायां मनवः परिकीर्तिताः ॥ भूधरश्च चतुर्द्वार्षु पद्मांतकयमांतकौ ॥ १२० ॥ विघ्नांतकाभिधः पश्चान्नरांतक इमान्यजेत् ॥ शक्रादींश्चैव
वज्रादीन्प्रजपेत्तदनंतरम् ॥ १२१ ॥ एवं संपूजयन्देवीं पांडित्यं धनमद्भुतम् ॥ पुत्रान्पौत्राञ्छुभां कीर्तिं लभते जनवश्यताम् ॥ १२२ ॥ तारो

माया श्रीमदेकजटे नीलसरस्वती ॥ महोग्रतारे देवासः सनेत्रो गदियुग्मकम् ॥ १२३ ॥ सर्वदेवपिशाकर्मो दीर्घोऽग्निर्मरुसान्ग्रस ॥ अभ्रगुमम जाड्यं
च छेदयद्वितयं रमा ॥ १२४ ॥ मायास्त्राग्निप्रियांतोऽयं द्विपंचाशल्लिपिर्मनुः ॥ अनेन नित्यं पूजांतेऽन्वहं देव्यै बलिं हरेत् ॥ १२५ ॥ एवं सिद्धे
मनौ मंत्री प्रयोगान्विदधाति च ॥ जातमात्रस्य बालस्य दिवसत्रितयादधः ॥ १२६ ॥ जिह्वायां विलिखेन्मंत्रं मध्वाज्याभ्यां शलाकया ॥ सुवर्ण
कृतया यद्वा मंत्री धवलदूर्वया ॥१२७॥ गतेऽष्टमेऽब्दे बालोऽपि जायते कविरद्भुतम् ॥ तथापरैरजेयोऽपि भूपसंघैर्द्धनार्चितः ॥ १२८॥ उपरागे
दतानीव नरदारुसरोजले ॥ निर्माय कीलकं तेन तैलमध्वमृतैर्लिखेत् ॥ १२९ ॥ सरोजिनीदले मंत्रं वेष्टयेन्मातृकाक्षरैः ॥ निखाय तदलं
कुंडे चतुरस्रे समेखले ॥ १३० ॥ संस्थाप्य पावकं तत्र जुहुयान्मनुनामुना ॥ सहस्रं रक्तपद्मानां धेनुदुग्धजलाप्लुतम् ॥ १३१ ॥ होमांते
विविधै रत्नैः पलैरपि बलिं हरेत् ॥ बलिं मंत्रेण विधिवद्बलिमंत्रः प्रकाश्यते ॥ १३२ ॥ तारः पद्मे युग तंद्री वियद्दीर्घं च लोहितः ॥ अत्रिर्विषभ
गारूढो वदेत्पद्मावतीपदम् ॥ १३३ ॥ झिंटीशाब्योनिलस्वाहा षोडशार्णो बलेर्मनुः ॥ ततो निशीथे च बलिं पूर्वोक्तमनुना हरेत् ॥ १३४ ॥
एवं कृते पंडितानां स जयी कविराड् भवेत् ॥ निवासो भारतीलक्ष्म्योर्जनतारञ्जनक्षमः ॥ १३५ ॥शताभिजप्त्या यो मंत्री रोचनां मस्तके धरेत् ॥
यं यं पश्यति तस्यासौ दासवज्जायते क्षणात् ॥ १३६ ॥ श्मशानांगारमाश्रित्य पूर्वायां कुजवासरे ॥ तेन मंत्रेण संवेष्ट्य निबद्धं रक्ततंतुभिः
॥ १३७ ॥ शताभिजप्तं मूलेन निक्षिपेद्वैरिवेश्मनि ॥ उच्चाटयति सप्ताहात्सकुंटुबान्विरोधिनः ॥ १३८ ॥ क्षीराढ्यया निशामंत्रं लिखित्वा पौरु
षेऽस्थनि ॥ रविवारे निशीथिन्यां सहस्रमभिमंत्रयेत् ॥ १३९ ॥ तत्क्षिप्तं शत्रुसदने मंडलाद्भ्रंशकं भवेत् ॥ क्षेत्रे क्षिप्तं सस्यहान्योजवद्दत्तुरमा
लयेत् ॥ १४० ॥ षट्कोणांतर्लिखेन्मूलं साध्यार्णं केशरे स्वरैः ॥ बाह्येऽष्टवर्गयुक्पत्रं पद्मभूमिपरावृतम् ॥ १४१ ॥ यंत्रं भूर्जे जतुरसैर्लिखेत्पीताम्बरा
वृतम् ॥ पट्टसूत्रेण सन्नद्धं शिशुकंठगतं ध्रुवम्॥१४२॥ भूतभीतिहरं वामबाहौ स्त्रीणां च पुत्रदम्॥नृणां दक्षिणबाहुस्थं निर्धनानां धनप्रदम् ॥१४३॥
ज्ञानदं ज्ञानमिच्छूनां राज्ञां तु विजयप्रदम् ॥ १४४ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे यक्षिणीमन्त्रभेदनिरूपणं नाम
पञ्चाशीतितमोऽध्यायः॥८५॥सनत्कुमार उवाच ॥ सरस्वत्यवतारास्ते कथिताः सिद्धिदा नृणाम् ॥अथ लक्ष्म्यवतारांस्ते वक्ष्ये सर्वार्थसिद्धिदान्॥ १ ॥
वाणीमन्मथशक्त्याख्यं बीजत्रितयमीरितम् ॥ ऋषिः स्याद्दक्षिणामूर्तिः पंक्तिश्छंदः प्रकीर्तितम् ॥ २॥देवता त्रिपुरा बाला मध्यांते शक्तिबीजके ॥
नाभेरापादमाद्यं तु नाभ्यंतं हृदयात्परम्॥३॥मूर्ध्नो हृदंतं तार्तीयं क्रमाद्देहेषु विन्यसेत्॥आद्यं वामकरे दक्षकरे तदुभयोः परम्॥४॥ पुनर्बीजत्रयं न्यस्य

मूर्ध्नि गुह्ये च वक्षसि॥नव योन्याभिधं न्यासे नवकृत्वो मनुं न्यसेत् ॥ ५ ॥ कर्णयोश्चिबुके न्यस्येच्छंखयोर्मुखपंकजे ॥ नेत्रयोर्नासिकायां च स्कंधयो
रुदरे तथा ॥ ६ ॥ न्यसेत्कूर्परयोर्नाभौ जानुनोर्लिंगमस्तके ॥ पादयोरपि गुह्ये च पार्श्वयोर्हृदये पुनः ॥ ७ ॥ स्तनयोः कंठदेशे च वामांगादिषु
विन्यसेत् ॥ वाग्भवाद्यां रतिं गुह्ये प्रीतिमत्यादिकां हृदि ॥ ८ ॥ कामबीजादिकान्पश्येद्भ्रूमध्ये तु मनोभवाम् ॥ पुनर्वागकात्ममाद्यास्तिस्रएव च
विन्यसेत् ॥ ९ ॥ अमृतेशीं च योगेशीं विश्वयोनिं तृतीयकाम् ॥ मूर्ध्नि वक्रे हृदि न्यस्येद्गुह्ये चरणयोरपि॥ १०॥कामेशी पंचबीजाढ्यां स्मरात्पञ्च
न्यसेत्क्रमात् ॥ मायाकामौ च वाग्लक्ष्मी कामेशी पंचबीजकम् ॥ ११ ॥ मनोभवश्च मकरध्वजकंदर्पमन्मथाः ॥ कामदेवः स्मरः पंच कीर्तिता
न्याससिद्धिदाः ॥ १२ ॥ शिरःपन्मुखगुह्येषु हृदये बाणदेवताः ॥ द्राविण्याद्याः क्रमान्न्यस्येद्बाणेशीबीजपूर्वकाः ॥ १३ ॥ द्रांद्रीं क्लींजूंस इति वै
बाणेशीबीजकं च कम् ॥ द्राविणी क्षोभिणी वशीकरण्याकर्षणी तथा ॥ १४ ॥संमोहनी च बाणानां देवताः पञ्च कीर्तिताः॥तार्तीयवाग्मध्यगेन कामेन
स्यात्षडंगकम् ॥ १५ ॥ षड्दीर्घस्वरयुक्तेन ततो देवीं विचिंतयेत् ॥ ध्यायेद्रक्तसरोजस्थां-रक्तवस्त्रां त्रिलोचनाम् ॥ १६ ॥ उद्यदर्कनिभां विद्यां
मालाभयवरोद्वहाम् ॥ लक्षत्रयं जपेन्मंत्रं दशांशं किंशुकोद्भवैः ॥ १७ ॥ पुष्पैर्हयारिजैर्वापि जुहुयान्मधुरान्वितैः ॥ नवयोन्यात्मकं यंत्रं बहिरष्टदला
वृतम् ॥१८॥ केसरेषु स्वरान्न्यस्येद्वर्गानष्टौदलेष्वपि॥ दलाग्रेषु त्रिशूलानि पद्म तु मातृकावृतम् ॥१९॥ एवं विलिखिते यंत्रे पीठशक्तीः प्रपूजयेत् ॥
इच्छा ज्ञाना क्रिया चैव कामिनी कामदायिनी ॥२०॥ रती रतिप्रिया नंदा मनोन्मन्यपि चोदिताः॥पीठशक्तीरिमा इष्ट्वा पीठं तन्मनुना दिशेत् ॥
॥ २१ ॥ व्योमपूर्वं तु तार्तीयं सदाशिवमहापदम् ॥ प्रेतपद्मासनं ङेंतं नमोंतः पीठमन्त्रकः ॥ २२॥ षोडशार्णस्ततो मूर्तौ क्लृप्तायां मूलमंत्रतः ॥
आवाह्य प्रजपेद्देवीमुपचारैः पृथग्विधैः ॥ २३ ॥ देवीमिष्ट्वा मध्ययोनौ त्रिकोणे रतिपूर्विकाम् ॥ वामकोणे रतिं दक्षे प्रीतिमग्रे मनोभवाम् ॥ २४ ॥
योन्यन्तर्वह्निकोणादवंगान्यग्रेर्विदिक्ष्वपि ॥ मध्ययोनेर्बहिः पूर्वादिषु चाग्रे स्मरानपि ॥ २५ ॥ बाणदेवीस्तद्वदेव शक्तीरष्टसु योनिषु॥ सुभगाख्या
भगा पश्चात्तृतीया भगसर्पिणी ॥ २६ ॥ भगमाला तथानंगा नगाद्या कुसुमापरा ॥ अनंगमेखलानंगमदनेत्यष्टशक्तयः ॥ २७ ॥ पद्मकेशरगा ब्राह्मी
मुखाः पत्रेषु भैरवाः ॥ दीर्घाद्या मातरः पूज्या ह्रस्वाद्याश्चाष्टभैरवाः ॥ २८ ॥ दलाग्रेष्वष्टपीठानि कामरूपाख्यमादिमम् ॥ मलयं कोल्लगि
र्याख्यं चौहाराख्यं कुलांतकम् ॥ २९ ॥ जालंधरं तथोड्डासं कोटपीठमथाष्टमम् ॥ भूगृहे दशदिक्ष्वर्चेद्धेतुकं त्रिपुरांतकम् ॥ ३० ॥ वैतालमग्नि
जिह्वं च कमलांतकपालिनौ ॥ एकपादं भीमरूपं विमलं हाटकेश्वरम् ॥ ३१ ॥ शक्राद्यानायुधैः सार्द्धं स्वस्वदिक्षु समर्चयेत् ॥ तद्बहिर्दिक्षु बटुकं

योगिनीं क्षेत्रनायकम् ॥ ३२ ॥ गणेशं विदिशास्वर्चेद्वसून्सूर्यांञ्छिवांस्तथा॥भूतांश्चेत्थं भजन्बालामीशः स्याद्धनविद्ययोः॥३३॥रक्तांभोजैर्हुतैर्नार्यो
वश्याः स्युः सर्षपैर्नृपाः ॥ नंद्यावर्तैं राजवृक्षैः कुंदैः पाटलचंपकैः ॥ ३४ ॥ पुष्पैर्बिल्वफलैर्वापि होमाल्लक्ष्मीः स्थिरा भवेत् ॥ अपमृत्युं जयेन्मन्त्री
गुडूच्या दुग्धयुक्तया ॥ ३५ ॥ यथोक्तदूर्वाहोमेन नीरोगायुः समश्नुते ॥ ज्ञानं कवित्वं लभते चन्द्रागुरुसुरैर्हुतैः॥३६॥पलाशपुष्पैर्वाक्सिद्धिरन्नाप्ति
श्चान्नहोमतः ॥ सुरभिक्षीरदध्यक्ताँल्लाजान्हुत्वा रुजो जयेत् ॥ ३७ ॥ रक्तचन्दनकर्पूरकर्चूरागुरुरोचनाः ॥ चन्दनं केशरं मांसीं क्रमाद्भागैर्नियो
जयेत् ॥३८॥ भूमिचंद्रैकनन्दाब्धिदिक्सप्तनिगमोन्मितैः॥श्मशाने कृष्णभूतस्य निशि नीहारपाथसा ॥ ३९ ॥ कुमार्या पेषयेत्तानि मंत्रेणाथाभि
मंत्र्य च ॥ विदध्यात्तिलकं तेन दर्शनाद्वशयेज्जनान्॥४०॥ गजसिंहादिभूतानि राक्षसाञ्छाकिनीरपि॥प्रयोजनानां सिद्ध्यै तु देव्याः शापं निवर्त्य
च ॥ ४१ ॥ विधायोत्कीलितां पश्चाज्जपमस्य समाचरेत् ॥ यो जपेदादिमे बीजे वराहभृगुपावकान्॥४२ ॥ मध्यमादौ नभोहंसौ मध्यमांते तु पाव
कम् ॥ आदावंते च तार्तीयक्रमात्स्वं धूम्रकेतनम् ॥ ४३ ॥ एवं जप्त्वा शतं विद्या शापहीना फलप्रदा ॥ यद्वाद्ये चरमे बीजे नैव रेफं वियोजयेत्
॥ ४४ ॥ शापोद्धारप्रकारोऽन्यो यद्वायं कीर्तितो बुधैः ॥ आद्यमाद्यं हि तार्तीयं कामः कामोऽथ वाग्भवम् ॥ ४५ ॥ अंत्यमंत्यमनंगश्च नवार्णः
कीर्तितो मनुः ॥ जप्तोऽयं शतधा शापं बालाया विनिवर्तयेत् ॥ ४६ ॥ चैतन्याह्लादिनीमन्त्रौ जप्तौ निष्कीलताकरौ ॥ त्रिस्वराश्चेतनं मन्त्री
धरः शांतिरनुग्रहः ॥ ४७ ॥ तारादिहृदयांतः स्यात्काम आह्लादिनीमनुः ॥ तथा त्रयाणां बीजानां दीपनैर्मनुभिस्त्रिभिः ॥ ४८ ॥ सुदीप्तानि विधा
यादौ जपेत्तानीष्टसिद्धये ॥ वदयुग्मं सदीर्घांबु स्मृतिवालावनंगतौ॥४९॥ सत्यः सनेत्रो नस्ताद्दग्वा वाग्वर्णाद्यदीपिनी॥क्लिन्ने क्लेदिनि वैकुंठो दीर्घं
स्वं सद्यगोंतिमः॥५०॥ निद्रा सचंद्रा कुर्वीत शिवार्णां मध्यदीपिनी॥तारो मोक्षं च कुरुते नायं वर्णास्यदीपिनी ॥ ५१ ॥ दीपिनीमंतरा बाला
साधितापि न सिद्ध्यति ॥ वागंत्यकामान् प्रजयेदरीणां क्षोभहेतवे ॥ ५२ ॥ कामवागंत्यबीजानि त्रैलोक्यस्य वशीकृतौ ॥ कामांत्यवाणीबीजानि
मुक्तये नियतो जपेत् ॥ ५३ ॥ पूजारंभे तु बालायास्त्रिविधानर्चयेद्गुरून् ॥ दिव्यौघश्चैव सिद्धौघो मानवौघ इति त्रिधा ॥ ५४ ॥ परप्रकाशः परमे
शानः परशिवस्तथा ॥ कामेश्वरस्ततो मोक्षः षष्ठः कामोऽमृतोंऽतिमः॥५५॥एते दशैव दिव्यौघा आनन्दपदपश्चिंमाः॥ईशानाख्यस्तत्पुरुषोऽघोराख्यो
वामदेवकः ॥५६॥ सद्योजात इमे पंच सिद्धौघाख्याः स्मृता मुने ॥मानवौघाः परिज्ञेयाः स्वगुरोः सम्प्रदायतः॥५७॥नवयोन्यात्मके यन्त्रे विलिखे
न्मध्ययोनितः॥प्रादक्षिण्येन बीजानि त्रिवारं साधकोत्तमः॥५८॥त्रींस्त्रीन्वर्णांस्तु गायत्र्या अष्टपत्रेषु संलिखेत्॥ बहिर्मातृकयाऽऽवेष्ट्य तद्बहिर्भूपुरद्व

यम्॥५९॥कामबीजलसत्कोणं व्यतिभिन्नं परस्परम्॥पत्रे त्रैपुरमाख्यातं जपसंपातसाधितम्॥६०॥बाहुना विधृते दद्याद्धनं कीर्तिं सुखं सुतान्॥कामांते
त्रिपुरा देवी विद्महे कविषं भहिम् ॥ ६१ ॥ बकः खड्गी समारूढः सनेत्रोऽग्निश्च धीमहि ॥तत्र क्लिन्ने प्रचोदांते यादित्येषा प्रकीर्तिता॥६२॥गायत्री
त्रैपुरा सर्वसिद्धिदा सुरसेविता ॥ अथ लक्ष्म्यवतारोऽन्यः कीर्त्यते सिद्धिदो नृणाम् ॥ ६३ ॥ वेदादिर्गिरिजा पद्मा मन्मथो हृदयं भृगुः ॥ भगवति
माहेश्वरी ङेन्तेऽन्नपूर्णे दहनांगना ॥६४॥ प्रोक्ता विंशतिवर्णेयं विद्या स्याद्द्रुहिणो मुनिः ॥ धृतिश्छंदोऽन्नपूर्णेशी देवता परिकीर्तिता ॥६५॥षड्दीर्घा
ढ्येन हृल्लेखाबीऽजेन स्यात्षडंगकम् ॥ मुखनासाक्षिकर्णांसगुदेषु नवसु न्यसेत् ॥ ६६ ॥ पदानि नव तद्वर्णसंख्येदानीमुदीर्यते ॥ भूमिचंद्रधरै
काक्षिवेदाब्धियुगबाहुभिः ॥ ६७ ॥ पदसंख्यामिता वर्णैस्ततो ध्यायेत्सुरेश्वरीम् ॥ स्वर्णाभांगां त्रिनयनां वस्त्रालंकारशोभिताम् ॥ ६८ ॥ भूरमासं
युतां देवीं स्वर्णामत्रकरांबुजाम् ॥ लक्षं जपोऽयुतं होमो घृताक्तचरुणा तथा ॥ ६९॥ जयादिनवशक्त्याढ्ये पीठे पूजा समीरिता॥ त्रिकोणा वेदपत्रा
ष्टपत्रषोडशपत्रके ॥ ७० ॥ भूपुरेण युते यंत्रे प्रदद्यान्मायया मनुम् ॥ अग्न्यादिकोणत्रितये शिववाराहमाधवान् ॥ ७१ ॥ अचर्ययेत्स्वस्वमंत्रैस्तु
प्रोच्यंते मनवस्तु ते ॥ प्रणवो मनुचन्द्राढ्यं गगनं हृदयं शिवा ॥ ७२ ॥ मारुतः शिवमंत्रोऽयं सप्तार्णः शिवपूजने ॥ वाराहनारायणयोर्मंत्रौ पूर्व
मुदीरयेत् ॥ ७३ ॥ षडंगानि ततोऽभ्यर्च्य वामे दक्षे धरां रमाम् ॥ यजेत्स्वस्वमनुभ्यां तु तावुच्येते मुनीश्वर ॥ ७४ ॥ अन्नं मह्यन्नमित्युक्त्वा मे
देह्यन्नाधिपोर्णकाः ॥ नयेममन्नं प्राणांते दापयानलसुंदरी ॥ ७५ ॥ द्वाविंशत्यक्षरो मंत्रो भूमीष्टौ भूमिसंपुटः ॥ लक्ष्मीष्टौ श्रीपुटो विप्र स्मृति
र्लभनुचंद्रयुक् ॥ ७६ ॥ भुवो बीजमिति प्रोक्तं श्रीबीजं प्रागुदाहृतम् ॥ मंत्रादिस्थचतुर्बीजपूर्विकाः परिपूजयेत् ॥ ७७ ॥ शक्तीश्वतस्रो
वेदास्रे परा च भुवनेश्वरी ॥ कमला सुभगा चति ब्राह्म्याद्या अष्टपत्रगाः ॥ ७८ ॥ षोडशारे स्मृते चैव मानदातुष्टिपुष्टयः ॥ प्रीती रतिर्ह्रीः
श्रीश्चापि स्वधा स्वाहा दशम्यथ ॥ ७९ ॥ ज्योत्स्ना हैमवती छाया पूर्णिमा संहतिस्तथा ॥ अमावास्येति संपूज्या मंत्रशे प्राणपूर्विका ॥ ८० ॥
भूपुरे लोकपालाः स्युस्तदस्त्राणि तदग्रतः ॥ इत्थं जपादिभिः सिद्धे मंत्रेऽस्मिन्धनसंचयैः ॥ ८१ ॥ कुबेरसदृशो मंत्री जायते जनवंदितः ॥ अथ
लक्ष्म्यवतारोऽन्यः कीर्त्यते मुनिसत्तम ॥ ८२ ॥ प्रणवः शांतिररुणाक्रियाढ्याचन्द्रभूषिताः ॥ बगलामुखिसर्वांते इंधिकाह्लादिनीयुता ॥ ८३ ॥
पीताजरायुक्प्रतिष्ठा पुनर्दीर्घोदसंयुता ॥ वाचं मुखं पदं स्तंभयांते जिह्वापदं वदेत् ॥ ८४ ॥ कीलयेति च बुद्धिं विनाशयांते स्वबीजकम् ॥
तारोऽग्निसुंदरी मंत्रो बगलायाः प्रकीर्तितः ॥८५॥ मुनिस्तु नारदश्छदो बृहती बगलामुखी ॥ देवता नेत्रपंचेषुनवपंचदिगर्णकैः ॥ ८६॥ अंगानि

कल्पयित्वा च ध्यायेत्पीताम्बरां ततः ॥ स्वर्णासनस्थां हेमाभां स्तंभिनीमिंदुशेखराम् ॥८७ ॥दधतीं मुद्गरं पाशं वज्रं च रसनां करैः ॥ एवं ध्यात्वा
जपेल्लक्षमयुतं चंपकोद्भवैः ॥८८ ॥ कुसुमैर्जुहुयात्पीठे बालायाः पूजयेदिमाम् ॥ चंदनागुरुचंद्राद्यैः पूजार्थं यंत्रमालिखेत् ॥ ८९ ॥ त्रिकोणषड्द
लाष्टास्रषोडशारे यजेदिमाम्॥ मंगला स्तंभिनी चैव जृंभिणी मोहिनी तथा ॥९०॥ वश्या चला बलाका च भूधरा कल्मषाभिधा॥धात्री च कलना
कालकर्षिणी भ्रामिकापि च ॥ ९१॥ मंदगापि च भोगस्था भाविका षोडशी स्मृता ॥ भूगृहस्य चतुर्दिक्षु पूर्वादिषु यजेत्क्रमात् ॥ ९२ ॥ गणेशं
बटुकं चापि योगिनीः क्षेत्रपालकम् ॥ इंद्रादींश्च ततो बाह्ये निजायुधसमन्वितान् ॥ ९३॥ इत्थं सिद्धे मनौ मंत्री स्तंभयेद्देवतादिकान्॥ पीतवस्त्रप
दासीनः पीतमाल्यानुलेपनः ॥ ९४ ॥ पीतपुष्पैर्यजेद्देवीं हरिद्रोत्थस्रजा जपेत् ॥ पीतां ध्यायन्भगवतीं पयोमध्येऽयुतं जपेत् ॥ ९५ ॥ त्रिमध्वा
ज्यतिलैर्होमो नृणां वश्यकरो मतः ॥ मधुरत्रितयाक्तैः स्यादाकर्षो लवणैर्ध्रुवम् ॥ ९६ ॥ तैलाभ्यक्तैर्निम्बपत्रैर्होमो विद्वेषकारकः ॥ ताललोण
हरिद्राभिर्द्विषां संस्तंभनं भवेत् ॥ ९७ ॥ आगारधूमं राजीश्च माहिषं गुग्गुलं निशि ॥ श्मशाने पावके हुत्वा नाशयेदचिरादरीन् ॥ ९८ ॥ गरुतो
गृध्रकाकानां कटुतैलं विभीतकम् ॥ गृहधूमं चितावह्नौ हुत्वा प्रोच्चाटयेद्रिपून् ॥ ९९ ॥ दूर्वागुडूचीलाजान्यो मधुरत्रितयान्वितान् ॥ जुहोति
सोऽखिलान् रोगान् शमयेद्दर्शनादपि ॥ १०० ॥ पर्वताग्रे महारण्ये नदीसंगे शिवालये ॥ ब्रह्मचर्यरतो लक्षं जपेदखिलसिद्धये ॥ १०१ ॥ एक
वर्णगवीदुग्धं शर्करामधुसंयुतम् ॥ त्रिशतं मंत्रितं पीतं हन्याद्विषपराभवम् ॥ १०२ ॥ श्वेतपालाशकाष्ठेन रचिते रम्यपादुके ॥ अलक्तरंजिते लक्षं
मन्त्रयेन्मनुनामुना ॥ १०३ ॥ तदारूढः पुमान् गच्छेत्क्षणेन शतयोजनम् ॥ पारदं च शिलां तालं पिष्टं मधुसमन्वितम्॥१०४॥मनुना मन्त्रयेल्लक्षं
लिंपेत्तेनाखिलां तनुम् ॥ अदृश्यः स्यान्नृणामेष आश्चर्य्यं दृश्यतामिदम् ॥ १०५ ॥ षट्कोणं विलिखेद्बीजं साध्यनामान्वितं मनोः ॥हरितालनिशा
चूर्णैरुन्मत्तरससंयुतैः ॥ १०६ ॥ शेषाक्षरैः समानीतं धरागेहविराजितम् ॥तद्यंत्रं स्थापितप्राणं पीतसूत्रेण वेष्टयेत्॥ १०७ ॥ भ्राम्यत्कुलालचक्रस्थां
गृहीत्वा मृत्तिकां तथा ॥ रचयेद्वृषभं रम्यं यंत्रं तन्मध्यतः क्षिपेत् ॥ १०८ ॥ हरितालेन संलिप्य वृषं प्रत्यहमर्चयेत् ॥ स्तंभयेद्विद्विषां वाचं गतिं
कार्यपरंपराम् ॥ १०९॥ आदाय वामहस्तेन प्रेतभूस्थितकर्परम् ॥ अंगारेण चितास्थेन तत्र यंत्रं समालिखेत् ॥ ११० ॥ मंत्रितं निहितं भूमौ रिपूणां
स्तंभयेद्गतिम्॥प्रेतवस्त्रे लिखेद्यंत्रं अंगारेणैव तत्पुनः॥ १११॥मंडूकवदने न्यस्येत्पीतसूत्रेण वेष्टितम्॥पूजितं पीतपुष्पैस्तद्वाचं संस्तंभयेद्द्विषाम्॥ ११२॥
यद्भूमौ भविता दिव्यं तत्र यंत्रं समालिखेत् ॥ मार्जितं तद्द्विषां पात्रैर्दिव्यस्तम्भनकृद्भवेत् ॥११३॥ इन्द्रवारुणिकामूलं सप्तशो मनुमंत्रितम् ॥ क्षिप्तं

जले दिव्यकृतं जलस्तंभनकारकम् ॥११४॥ किं बहूक्त्या साधकेन मन्त्रः सम्यगुपासितः ॥ शत्रूणां गतिबुद्ध्यादेः स्तंभनो नात्र संशयः॥११५ ॥
इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे यक्षिणीमन्त्रसाधननिरूपणं नाम षडशीतितमोऽध्यायः॥८६॥ सनत्कुमार उवाच ॥
अवतारत्रयं लक्ष्म्याः कथित ते द्विजोत्तम ॥ दुर्गायाश्चाभिधास्यामि सर्वलोकोपकारकान् ॥ १ ॥ प्रणवः श्रीः शिवायुग्मं वाणीवैरोचनीपदम् ॥
वज्राद्यं क्षुधिता सूक्ष्मा मृता स्वाग्नींदुसंयुता॥२॥प्रतिष्ठाप्य शिवा फट्ट च स्वाहांतोऽत्यष्टिवर्णवान्॥भैरवोऽस्य मुनिः सम्राट् छन्दो मन्त्रस्य देवता॥३॥
छिन्नमस्ता रमा बीजं स्वाहा शक्तिरुदीरिता॥ आं खड्गाय हृदाख्यातमीं खड्गाय शिरः स्मृतम् ॥ ४ ॥ ॐ वज्राय शिखा प्रोक्ता ऐं पाशाय तनुच्छ
दम् ॥ औमंकुशाय नेत्रं स्याद्विसर्गो वसुरक्षयुक् ॥ ५ ॥ मायायुग्मं चास्त्रमंगं मनवः प्रणवादिकाः ॥ स्वाहांताश्चैवमंगानि कृत्वा ध्यायेदथांबिकाम्
॥ ६ ॥ भानुमण्डलसंस्थानां प्रविकीर्णालकं शिरः॥ छिन्नं स्वकं स्फारमुखं स्वरक्तं प्रपिबद्गलत् ॥ ७ ॥ उपरिस्थां रतासक्तरतिमन्मथयोर्निजे ॥
डाकिनीवर्णिनीसख्यौ दृष्ट्वा मोदभराकुलाम् ॥ ८ ॥ ध्यात्वैवं प्रजपेल्लक्षचतुष्कं तद्दशांशतः ॥ पालाशैर्बिल्वजैर्वापि जुहुयात्कुसुमैः फलैः ॥ ९ ॥
आधारशक्तिमारभ्य परतत्त्वांतपूजिते ॥ पीठे जयाख्या विजया जिता चापि पराजिता ॥ १० ॥ नित्या विलासिनी षष्ठी दोग्ध्य
घोरा च मंगला ॥ दिक्षु मध्ये च संपूज्या नव पीठस्य शक्तयः ॥ ११ ॥ सर्वबुद्धिप्रद वर्णनीये सर्वभृगुः सदृक् ॥ सिद्धिप्रदे
डाकिनीये तारो वज्रः सभौतिकः ॥ १२ ॥ खड्गीशो रोचनीयेंते भगं घेहि नमोंतकः ॥ तारादिपीठमन्त्रोऽयं वेदरामाक्षरो मतः ॥ १३ ॥
समर्प्यासनमेतेन तत्र संपूजयेच्छिवाम् ॥ त्रिकोणमध्यषट्कोणपद्मभूपुरमध्यतः ॥ १४ ॥ बाह्यावरणमारभ्य पूजयेत्प्रतिलोमतः ॥भूपुरे बाह्यभागेषु
वज्रादीनि प्रपूजयेत् ॥ १५ ॥ तदंतः सुरराजादीन्पूजयेद्धरितां पतीन् ॥ भूपुरस्य चतुर्द्वार्षु द्वारपालान्यजेदथ ॥ १६ ॥ करालविकरालाख्याव
तिकालस्तृतीयकः ॥ महाकालश्चतुर्थः स्यादथ पद्मेष्टशक्तयः ॥ १७ ॥ एकलिंगा योगिनी च डाकिनी भैरवी तथा ॥ महाभैरवकेंद्राक्षी त्वसि
तांगी तु सप्तमी ॥ १८ ॥ संहारिण्यष्टमी चेति षट्कोणेष्वंगमूर्तयः ॥ त्रिकोणगा छिन्नमस्ता पार्श्वयोस्तु सखीद्वयम् ॥ १९ ॥ डाकिनीवर्णनीसंज्ञं
तारावाग्भ्यां प्रपूजयेत् ॥ एवं पूजादिभिः सिद्धे मन्त्रे मंत्री मनोरथान् ॥ २० ॥ प्राप्नुयान्निखिलान्सद्यो दुर्लभांस्तत्प्रसादतः ॥ श्रीपुष्पैर्लभते
लक्ष्मीं तत्फलैश्च समीहितम् ॥२१॥ वाक्सिद्धिं मालतीपुष्पैश्चंपकैर्हवनात्सुखम् ॥ घृताक्तं छागमांसं यो जुहुयात्प्रत्यहं शतम् ॥ २२ ॥ मासमेकं
तु वशगास्तस्य स्युः सर्वपार्थिवाः ॥ करवीरसुमैः श्वेतैर्लक्षसंख्यैर्जुहोति यः ॥ २३ ॥ रोगजालं पराभूय सुखी जीवेच्छतं समाः॥ रक्तै

स्तत्संख्यया हुत्वा वशयेन्मंत्रिणो नृपान् ॥ २४ ॥ फलैर्हुत्वाप्नुयाल्लक्ष्मीमुदुंबरपलाशजैः ॥ गोमायुमांसैस्तामेव कवितां पायसांधसा ॥ २५ ॥
बंधूककुसुमैर्भाग्यं कर्णिकारैः समीहितम् ॥ तिलतंडुलहोमेन वशयेन्निखिलाञ्जनान् ॥२६॥नारीरजोभिराकृष्टैर्मृगमांसैः समीहितम्॥ स्तंभनं माहिषै
र्मांसैः पंकजैः सघृतैरपि॥२७॥ चिताग्नौ परभृत्पक्षैर्जुहुयादरिमृत्यवे ॥ उन्मत्तकाष्ठदीप्तेऽग्नौ तत्फलं वायसच्छदैः॥२८॥ द्यूते वने नृपद्वारे समरे वैरि
संकटे ॥विजयं लभते मंत्री ध्यायन्देवीं जपन्मनुम् ॥२९॥ भुक्त्यै मुक्त्यै सितां ध्यायेदुच्चाटे नीलरोचिषम्॥ रक्तां वश्ये मृतौ धूम्रां स्तंभने कनकप्र
भाम्॥३०॥ निशि दद्याद्बलिं तस्यै सिद्ध्यै मदिरादिना॥गोपनीयः प्रयोगोऽय प्रोच्यते सर्वसिद्धिदः॥३१॥भूताहे कृष्णपक्षस्य मध्यरात्रे तमोघने ॥
स्नात्वा रक्ताम्बरधरो रक्तमाल्यानुलेपनः॥३२॥आनीय पूजयेन्नारीं छिन्नमस्तास्वरूपिणीम्॥सुन्दरीं यौवनाक्रांतां नरपञ्चकगामिनीम्॥३३॥ सुस्मितां
मुक्तकबरीं भूषादानप्रतोषिताम्॥विवस्त्रां पूजयित्वैनामयुतं प्रजपेन्मनुम्॥३४॥बलिं दत्त्वा निशां नीत्वा संप्रेष्य धनतोषिताम् ॥ भोजयेद्विविधैरन्नैर्ब्राह्म
णान्भोजनादिना ॥ ३५ ॥ अनेन विधिना लक्ष्मीं पुत्रान्पौत्रान्धनं यशः ॥ नारीमायुः सुखं धर्ममिष्टं च समवाप्नुयात् ॥ ३६ ॥ तस्यां रात्रौ
व्रतं कार्यं विद्याकामेन मंत्रिणा ॥ मनोरथेषु चान्येषु गच्छेत्तां प्रजपन्मनुम् ॥ ३७ ॥ उषस्युत्थाय शय्यायामुपविष्टो जपेच्छतम् ॥ षण्मासाभ्यन्तरे
मन्त्री कवित्वेन जयेत्कविम् ॥ ३८ ॥ शिवेन कीलिता चेयं तदुत्कीलनमुच्यते ॥ मायां तारपुटां मंत्री जपेदष्टोत्तरं शतम् ॥ ३९ ॥ मन्त्रस्यादौ
तथैवांते भवेत्सिद्धिप्रदा तु सा ॥ उदिता छिन्नमस्तेयं कलौ शीघ्रमभीष्टदा ॥४०॥ अवतारांतरं देव्या वच्मि ते मुनिसत्तम ॥ ज्ञानामृतारुणा श्वेता
क्रोधिनींदुसमन्विता ॥४१॥ शांतिस्तथाविधा चापि नीचसर्गान्वितास्तथा ॥ वाग्भवं कामराजाख्यं शक्तिबीजाह्वयं तथा ॥४२॥ त्रिभिर्बीजैः पंच
कूटात्मिका त्रिपुरभैरवी ॥ ऋषिः स्याद्दक्षिणामूर्तिश्छन्दः पंक्तिरुदीरिता ॥ ४३ ॥ देवता देशिकैरुक्ता देवी त्रिपुरभैरवी ॥ नाभेराचरणं न्यस्य
वाग्भवं मन्त्रवित्पुनः ॥ ४४ ॥ हृदयान्नाभिपर्यंतं कामबीजं प्रविन्यसेत् ॥ शिरसो हृत्प्रदेशांतं तार्तीयं विन्यसेत्ततः ॥ ४५ ॥ आद्यं द्वितीयं कर
योस्तार्तीयमुभयं न्यसेत् ॥ मूलाधारे हृदि न्यस्य भूयो बीजत्रयं क्रमात्॥ ४६ ॥ नवयोन्यात्मकं न्यासं कुर्याद्बीजैस्त्रिभिः पुनः ॥ बालोदितप्रका
रेण मूर्तिन्यासमथाचरेत् ॥ ४७ ॥ स्वस्वबीजादिकं पूर्वं मूर्ध्नीशानमनोभवम् ॥ न्यसेद्वक्त्रे तत्पुरुषं मकरध्वजमात्मवित्॥ ४८ ॥ हृद्य
घोरकुमारादिकंदर्प्पं तदनंतरम् ॥ गुह्यदेशे प्रविन्यस्येद्वामदेवादिमन्मथम् ॥ ४९ ॥ सद्योजातं कामदेवं पादयोर्विन्यसेत्ततः ॥ ऊर्द्ध्वं
प्राग्दक्षिणोदीच्यपश्चिमेषु मुखेषु तान् ॥ ५० ॥ प्रविन्यसेद्यथापूर्वं भृगुर्व्योमाग्निसंस्थितः ॥ सद्यादिपञ्चह्रस्वाद्या बीजमेषां प्रकीर्तितम्॥५१॥

षड्दीर्घयुक्तेनाद्येन बीजेनांगक्रिया मता ॥ पञ्चबाणांस्ततो न्यस्येन्मन्त्री त्रैलोक्यमोहनान् ॥ ५२ ॥ द्रामाद्यां द्राविणीं मूर्ध्नि द्रामाद्यां क्षोभणी
पदे ॥ क्लींवशीकरणीं वक्त्रे गुह्ये ब्लुं बीजपूर्विकाम् ॥५३॥ आकर्षणीं हृदि पुनः सर्वांतभृगुसंस्थिताम् ॥ संमाहनीं क्रमादेवं बाणन्यासोऽयमीरितः
॥ ५४ ॥ भालभ्रूमध्यवदने घंटिकाकण्ठहृत्सु च ॥ नाभ्यधिष्ठानयोः पञ्च ताराद्याः सुभगादिकाः ॥ ५५ ॥ मस्तकावधि नाभेश्च मंत्रिणा सुभगा
भगा ॥ भगसर्पिण्यथ परा भगमालिन्यनंतरम् ॥ ५६ ॥ अनंगानंगकुसुमा भूयश्चानंगमेखला ॥ अनंगमदना सर्वा मदविभ्रममंथरा ॥ ५७ ॥
प्रधानदेवता वर्णभूषणाद्यैरलंकृताः ॥ अक्षस्रक्पुस्तकाभीतिवरदाढ्यकरांबुजाः ॥ ५८ ॥ वाक्कामब्लूं स्त्रीं सरांते ताराः पंच प्रकीर्तिताः ॥ ततः
कुर्याद्भूषणाख्यं न्यासमुक्तदिशा मुने ॥ ५९ ॥एवं न्यस्तशरीरोऽसौ ध्यायेत्त्रिपुरभैरवीम् ॥ सहस्रभानुसंकाशामरुणक्षौमवाससीम् ॥ ६० ॥
शिरोमालामसृग्लिप्तस्तनीं जपवटीं करैः ॥ विद्यामभीतिं च वरं दधतीं त्रीक्षणाननाम् ॥ ६१ ॥ दीक्षां प्राप्य जपेन्मंत्रं तत्त्वलक्षं जितेंद्रियः ॥
पुष्पैर्भानुसहस्राणि जुहुयाद्ब्रह्मवृक्षजैः ॥ ६२ ॥ त्रिमध्वक्तैः प्रसूनैर्वा करवीरसमुद्भवैः ॥ पद्मं वसुदलोपेतं नवयोन्यष्टकर्णिकम् ॥ ६३ ॥ इच्छा
दिशक्तिभिर्युक्तं भैरव्याः पीठमर्चयेत् ॥ इच्छा ज्ञाना क्रिया पश्चात्कामिनी कामदायिनी ॥६४॥ रतिप्रिया मदानन्दा नवमी स्यान्मनोन्मनी ॥
वरदाभयधारिण्यः संप्रोक्ता नव शक्तयः ॥ ६५ ॥ वाग्भवं लोहितो रायै श्रीकंठो लोहितोऽनलः ॥ दीर्घवान्यै परा पश्चादपरायौ हसौ युतः ॥
॥ ६६ ॥ सदाशिवमहाप्रेतङेंतं पद्मासनं नमः ॥ अनेन मनुना दद्यादासनं श्रीगुरुक्रमम् ॥ ६७ ॥ प्राङ्मध्ययोन्यंतराले पूजयेत्कल्पये
त्ततः ॥ पंचभिः प्रणवैर्मूर्तिं तस्यामावाह्य देवताम् ॥ ६८ ॥ पूजयेदागमोक्तेन विधानेन समाहितः ॥ तारावाक्छक्तिकमला हसखफ्रें हसौः
स्मृताः ॥ ६९ ॥ वामकोणे यजेद्देव्या रतिमिंदुसमप्रभाम् ॥ सृणिपाशधरां सौम्यां मदविभ्रमविह्वलाम् ॥ ७० ॥ प्रीतिं दक्षिणकोणस्थां तप्त
कांचनसन्निभाम् ॥ अङ्कुशं प्रणतं दोर्भ्यां धारयन्तीं समर्चयेत् ॥ ७१ ॥अग्रे मनोभवां रक्तां रक्तपुष्पाद्यलंकृताम् ॥ इक्षुकार्मुकपुष्पेषुधारिणीं
सस्मिताननाम् ॥ ७२ ॥ अङ्गान्यभ्यर्चयेत्पश्चाद्यथापूर्वं विधानवित् ॥ दिक्ष्वग्रे च निजैर्मंत्रैः पूजयेद्बाणदेवताः ॥ ७३ ॥ हस्ताब्जैर्धृत
पुष्पेषुप्रणामामृतसप्रभाः ॥ अष्टयोनिष्वष्टशक्तीः पूजयेत्सुभगादिकाः ॥७४॥ मातरो भैरवांकस्था मदविभ्रमविह्वलाः ॥ अष्टपत्रेषु संपूज्या यथावत्कु
सुमादिभिः ॥ ७५ ॥ लोकपालांस्ततो दिक्षु तेषामस्त्राणि तद्बहिः ॥ पूर्वजन्मकृतैः पुण्यैर्ज्ञात्वैनां परदेवताम् ॥ ७६ ॥ यो भजेदुक्तमार्गेण स भवेत्सं
पदां पदम् ॥ एवं सिद्धमनुर्मंत्री साधयेदिष्टमात्मनः ॥ ७७ ॥ जुहुयादरुणांभोजैरदोषैर्मधुराप्लुतैः ॥ लक्षसंख्यं तदर्द्धं वा प्रत्यहं भोजयेद्द्वि

जान्॥७८ ॥ वनिता युवती रम्याः प्रीणयेद्देवताधिया ॥ होमांते धनधान्याद्यैस्तोषयेद्गुरुमात्मनः ॥ ७९॥एवं कृते जगद्वश्यो रमाया भवनं भवेत्॥
रक्तोत्पलैस्त्रिमध्वक्तैररुणैर्वा हयारिजैः ॥ ८० ॥ पुष्पैः पयोन्नैः सघृतैर्होमाद्विश्वं वशं नयेत्॥वाक्सिद्धिं लभते मन्त्री पलाशकुसुमैर्हुतैः ॥ ८१ ॥
कर्पूरागुरुसंयुक्तं गुग्गुलं जुहुयात्सुधीः ॥ ज्ञानं दिव्यमवाप्नोति तेनैव स भवेत्कविः ॥ ८२ ॥ क्षीराक्तैरमृताखंडैर्होमः सर्वापमृत्युजित् ॥ दूर्वाभि
रायुषे होमः क्षीराक्ताभिर्दिनत्रयम् ॥ ८३ ॥ गिरिकर्णीभवैः पुष्पैर्ब्राह्मणान्वशयेद्धुतैः ॥ कह्लारैः पार्थिवान्पुष्पैस्तद्वधूः कार्णिकारजैः ॥ ८४ ॥
मल्लिकाकुसुमैर्हुत्वा राजपुत्रान्वशं नयेत् ॥ कोरंटकुसुमैर्वैश्यान्वृषलान्पाटलोद्भवैः ॥ ८५ ॥ अनुलोमां विलोमांतस्थितसाध्याह्वयान्वितम् ॥
मन्त्रमुच्चार्य जुहुयान्मंत्री मधुरलोलितैः ॥ ८६ ॥ सर्षपैर्मधुसंमिश्रैर्वशयेत्पार्थिवान् क्षणात् ॥ अनेनैव विधानेन तत्पत्नीस्तत्सुतानपि ॥ ८७ ॥
जातिबिल्वभवैः पुष्पैर्मधुरत्रयसंयुतैः ॥ नरनारीनरपतीन्होमेन वशयेत्क्रमात् ॥ ८८ ॥ मालतीबकुलोद्भूतैः पुष्पैश्चन्दनलोलितैः ॥ जुहुयात्क
वितां मन्त्री लभते वत्सरांतरे ॥ ८९॥ मधुरत्रयसंयुक्तैः फलैर्बिल्वसमुद्भवैः ॥ जुहुयाद्वशयेल्लोकं श्रियं प्राप्नोति वांछिताम् ॥ ९० ॥ साज्यमन्नं
प्रजुहुयाद्भवेदन्नसमृद्धिमान्॥कस्तूरीकुंकुमोपेतं कर्पूरं जुहुयाद्वशी॥९१॥कन्दर्पादधिकं सद्यः सौंदर्यमधिगच्छति॥लाजान्प्रजुहुयान्मंत्री दधिक्षीरमधुप्लु
तान् ॥९२ ॥ विजित्य रोगानखिलान्स जीवेच्छरदां शतम् ॥ पादद्वयं मलयजं पादं कुंकुमकेसरम् ॥ ९३ ॥ पादं गोरोचनांतानि त्रीणि पिष्ट्वा
हिमांभसा॥ विदध्यात्तिलकं भाले यान्पश्येद्यैर्विलोक्यते॥९४॥यान्स्पृशेत्स्पृश्यते यैर्वा वश्याः स्युस्तस्य तेऽचिरात्॥कर्पूरकपिचोराणि समभागानि
कल्पयेत् ॥ ९५ ॥ चतुर्भुजा जटामांसी तावती रोचना मता ॥ कुंकुमं समभागं स्याद्दिग्भागं चन्दनं मतम् ॥ ९६ ॥ अगुरुर्नवभागं स्यादिति
भागक्रमेण च ॥हिमाद्रिः कन्यया पिष्टमेतत्सर्वं सुसाधितम् ॥ ९७ ॥ आदाय तिलकं भाले कुर्याद्भूमिपतीन्नरान्॥ वनितामदगर्वाढ्या मदोन्म
त्तान्मतंगजान् ॥ ९८ ॥ सिंहव्याघ्रान्महासर्पान्भूतवेतालराक्षसान् ॥दर्शनादेव वशयेत्तिलकं धारयन्नरः ॥ ९९ ॥ इत्येषा भैरवी प्रोक्ता ह्यवतारांतरं
शृणु ॥ वाङ्माया कमला तारो नमोंते भगवत्यथ ॥ १०० ॥श्रीमातंगेश्वरि वदेत्सर्वजनमनोहरि ॥ सर्वादिसुखराज्यंते सर्वादिसुखरंजनी॥१०१॥
सर्वराजवशं पश्चात्करिसर्वपदं वदेत्॥स्त्रीपुरुषवशं सृष्टिविद्याक्रोधिनिकान्विता ॥ १०२ ॥ सर्वं दुष्टमृगवशं करिसर्वपदं ततः ॥ सर्वसत्त्ववशंकारि
सर्वलोकं ततः परम् ॥१०३ ॥ अमुकं मे वशं पश्चादानयानलसुन्दरी ॥ अष्टाशीत्यक्षरो मन्त्रो मुन्याद्या भैरवीगताः ॥ १०४ ॥ न्यासान्मंत्री तनौ
कुर्याद्वक्ष्यमाणान्यथाक्रमम् ॥शिरोललाटभ्रूमध्ये तालुकण्ठगलोरसि॥ १०५॥ अनाहते भुजद्वंद्वे जठरे नाभिमण्डले॥स्वाधिष्ठाने गुप्तदेशे पादयोर्दक्ष

वाम्रयोः ॥ १०६ ॥ मूलाधारे गुदे न्यस्येत्पदान्यष्टादश क्रमात् ॥ गुणैकद्विचतुःषड्भिर्वसुपर्वनवाष्टभिः ॥ १०७ ॥नंदपंक्त्यष्टवेदाग्निचन्द्रयुग्मगुणा
ग्निभिः॥यदुक्तिरियं प्रोक्ता मंत्रवर्णैर्यथाक्रमम् ॥१०८॥ रत्याद्या मूलहृदयभ्रूमध्येषु विचक्षणः ॥ वाक्शक्तिलक्ष्मीबीजाद्या मातंग्यंताः प्रविन्यसेत्
॥१०९॥शिरोवदनहृद्गुह्यपादेषु विधिना न्यसेत् ॥ हृल्लेखां गगनां रक्तां भूयो मन्त्री करालिकाम्॥११०॥महोच्छुष्मां स्वनामादिवर्णबीजपुरःसराः॥
मातंग्यंताः षडंगानि ततः कुर्वीत साधकः ॥१११॥ वर्णैश्चतुर्विंशतिभिर्हृत्त्रयोदशभिः शिरः ॥ शिखाष्टादशभिः प्रोक्ता वर्म तावद्भिरक्षरैः ॥११२॥
स्यात्त्रयोदशभिर्नेत्रं द्वाभ्यामस्त्रं प्रकीर्तितम् ॥ बाणन्यासं ततः कुर्याद्वैरवीप्रोक्तवर्त्मना ॥ ११३ ॥ मातंगीपदयोश्चान्यं मन्मथान्वदनांशयोः ॥
पार्श्वकटयोर्नाभिदेशे कटिपार्श्वांशके पुनः ॥ ११४ ॥ बीजत्रयादिकान्मंत्री मन्मथं मकरध्वजम् ॥ मदनं पुष्पधन्वानं पंचमं कुसुमायुधम् ॥
॥ ११५ ॥ षष्ठं कन्दर्पनामानं मनोभवरतिप्रियौ ॥ मातंग्यंतास्ततो न्यस्येत्स्थानेष्वेतेषु मंत्रवित् ॥ ११६ ॥ कुसुमा मेखला चैव मदना मदना
तुरा ॥ मदनवेगा सम्भवा च भुवनपालेंदुरेखिका ॥११७॥ अनंगपदपूर्वाश्च मातंग्यंताः समीरिताः ॥ विन्यस्तव्यास्ततो मूलेऽधिष्ठाने मणिपूरके ॥
॥ ११८ ॥ हृत्कंठास्ये भ्रुवोर्मध्ये मस्तके चापि मंत्रिणा ॥ आद्ये लक्ष्मीसरस्वत्यौ रतिः प्रीतिश्च कृत्तिका ॥ ११९ ॥ शांतिः पुष्टिः पुनस्तु
ष्टिर्मातंगीपदशेखरा ॥ मूलमन्त्रं पृथङ्न्यस्येन्निजमूर्द्धनि मन्त्रवित् ॥ १२० ॥ आधारदेशेऽधिष्ठाने नाभौ पश्चादनाहते ॥ कंठदेशे भ्रुवोर्मध्ये बिंदौ
भूयः कला पदोः ॥ १२१ ॥ निरोधिकायामर्द्धेंदुनादे नादांतयोः पुनः ॥ उन्नतांसेषु वक्रे च ध्रुवमण्डलके शिवे ॥ १२२ ॥ मातंग्यंताः प्रविन्यस्ये
द्वामां ज्येष्ठमतः परम्॥ रौद्रीं प्रशांतां श्रद्धाख्यां पुनर्माहेश्वरीमथ॥१२३॥ क्रियाशक्तिं सुलक्ष्मीं च सृष्टिं संज्ञां च मोहिनीम्॥प्रमथाश्वासिनीं विद्युल्लतां
चिच्छक्तिमप्यथ ॥ १२४ ॥ ततश्च सुन्दरीं निंदां नन्दबुद्धिमिमाः क्रमात् ॥ शिरोभालहृदाधारेष्वेता बीजत्रयाधिकाः ॥ १२५ ॥ मातंग्याद्याः
प्रविन्यस्येद्यथावद्देशिकोत्तमः ॥ मातंगीं महदाद्यां तां महालक्ष्मीपदादिकाम् ॥ १२६ ॥ सिद्धलक्ष्मीपदाद्यां च मूलमाधारमण्डलम् ॥ न्यसेत्तेनैव
कुर्वीत व्यापकं देशिकोत्तमः ॥ १२७ ॥ एवं न्यस्तशरीरोऽसौ चिंतयेन्मंत्रदेवताम् ॥ श्यामां शुकोक्तिं शृण्वंतीं न्यस्तैकांघ्रिशिरोरुहाम् ॥१२८॥
शशिखण्डधरां वीणां वादयंतीं मधून्मदाम् ॥ रक्तांशुकां च कह्लारमालाशोभितचूलिकाम् ॥ १२९ ॥ शंखपत्रां तु मातंगीं चित्रकोद्भासिमस्त
काम् ॥ अयुतं प्रजपेन्मंत्रं तद्दशांशं मधूकजैः ॥ १३० ॥ पुष्पैस्त्रिमधुरोपेतैर्जुहुयान्मंत्रसिद्धये ॥ त्रिकोणकर्णिकं पद्ममष्टपत्रं प्रकल्पयेत् ॥
॥ १३१ ॥ अष्टपत्रावृतं बाह्ये वृतं षोडशभिर्दलैः॥ चतुरस्रीकृतं बाह्ये कांत्या दृष्टिमनोहरम् ॥ १३२ ॥ एतस्मिन्पूजयेत्पीठे नवशक्तीः क्रमा

दिमाः ॥ विभूतिपूर्वाः पूर्वोक्ता मातंगीपदपश्चिमाः ॥ १३३ ॥ सर्वांते शक्तिकमलासनाय नम इत्यथ ॥ वाक्सत्यलक्ष्मी बीजाद्य उक्तः
पीठार्चने मनुः ॥ १३४ ॥ मूलेन मूर्तिं संकल्प्य तस्यामावाह्य देवताम् ॥ अर्चयेद्विधिनानेन वक्ष्यमाणेन मन्त्रवित् ॥ १३५ ॥ रत्याद्यास्त्रिषु
कोणेषु पूजयेत्पूर्ववत्सुधीः ॥ हृल्लेखाः पंचपूज्या मध्ये दिक्षु च मंत्रिणा ॥ १३६ ॥ पाशांकुशाभयाभीष्टधारिण्यो भूतसप्रभाः ॥ अंगानि पूज
येत्पश्चाद्यथापूर्वं विधानवित् ॥ १३७ ॥ बाणानभ्यर्चयेद्दिक्षु पंचमं पुरतो यजेत् ॥ दलमध्येऽथ संपूज्या अनंगकुसुमादिकाः ॥ १३८ ॥ पाशांकुशा
भयाभीष्टधारिण्योऽरुणविग्रहाः॥ पत्राग्रेषु पुनः पूज्या लक्ष्म्याद्या वल्लकीकराः॥ १३९॥बहिरष्टदलेष्वर्च्या मन्मथाद्या मदोद्धताः॥अपरांगा निषंगाद्याः
पुष्पास्त्रेषुधनुर्द्धराः ॥ १४० ॥ पत्रस्था मातरः पूज्या ब्राह्म्याद्याः प्रोक्तलक्षणाः ॥ तदग्रेष्वर्चयेद्विद्वानसितांगादिभैरवान् ॥ १४१ ॥ पुनः षोडश
पत्रेषु पूज्याः षोडश शक्तयः ॥ वामाद्याः कलवीणाभिर्गायंत्यः श्यामविग्रहाः ॥ १४२ ॥ चतुरस्रे चतुर्दिक्षु चतस्रः पूजयेत्पुनः ॥ मातंग्याद्या
मदोन्मत्ता वीणोल्लसितपाणयः ॥ १४३ ॥ आग्नेयकोणे विघ्नेशं दुर्गां नैशाचरे यजेत् ॥ वायव्ये बटुकान् पश्चादीशाने क्षेत्रपं यजेत् ॥ १४४ ॥
लोकपाला बहिः पूज्या वज्राद्यैरायुधैः सह ॥ मंत्रेऽस्मिन्संधिते मन्त्री साधयेदिष्टमात्मनः ॥ १४५ ॥ मल्लिकाजातिपुन्नागैर्होमाद्भाग्यालयो भवेत् ॥
फलैर्बिल्वसमुद्भूतैस्तत्पत्रैर्वा हुताद्भवेत् ॥ १४६ ॥ राजपुत्रस्य राज्याप्तिः पंकजैः श्रियमाप्नुयात् ॥ उत्पलैर्वशयेद्विश्वं क्षारैर्मध्वाश्रितैः स्त्रियम् ॥ १४७ ॥
वंजुलस्य समिद्धोमो वृष्टिं वितनुतेऽचिरात् ॥ क्षीराक्तैरमृताखंडैर्होमान्नाशयति ज्वरम् ॥ १४८॥ दूर्वाभिरायुराप्नोति तन्दुलैर्धनवान्भवेत् ॥ कदंबैर्व
श्यमाप्नोति सर्वं त्रिमधुरप्लुतम् ॥१४९ ॥ नंद्यावर्तभवैः पुष्पैर्होमो वाक्सिद्धिदायकः ॥ निंबप्रसूनैर्जुहुयादीप्सितश्रीसमृद्धये ॥ १५० ॥ पलाशकुसु
मैर्होमात्तेजस्वी जायते नरः ॥ चन्दनागुरुकस्तूरीचन्द्रकुंकुमरोचनाः ॥ १५१ ॥ वश्याय च प्रियत्वाय हुताश्च तिलकीकृताः ॥ निर्गुंडीमूलहोमेन
निगडान्मुच्यते नरः ॥ १५२ ॥ निंबतैलान्वितैर्लोणैर्होमः शत्रुविनाशनः ॥ हरिद्राचूर्णसंमिश्रैर्लवणैः स्तंभयेज्जगत् ॥१५३॥ मातंगीसिद्धविद्यैषा
प्रोक्ता ते द्विजसत्तम ॥ अवतारांतरं भूयो वर्णयामि निशामय ॥ १५४ ॥ दीपिकाप्रीतिचन्द्राढ्या द्विधा चेद्रञ्जिता पुनः ॥ वतिवह्निप्रियामंत्रो धूमा
वत्या गजाक्षरः ॥ १५५ ॥ पिप्पलादो मुनिश्छंदो निवृद्धूमावतीश्वरी ॥बीजेन षड्दीर्घजातियुक्तेन परिकल्पयेत् ॥ १५६ ॥ ततो धूमावतीं ध्याये
च्छत्रुनिग्रहकारिणीम् ॥ विवर्णां चंचलां दुष्टां दीर्घां च मलिनांबराम् ॥ १५७ ॥ विमुक्तकुंतलां सूक्ष्मां विधवां विरलद्विजाम् ॥ कंकध्वजरथारूढां
प्रलंबितपयोधराम् ॥ १५८ ॥ सूर्यहस्तां निरुक्षांकधृतहस्तांबरान्विताम् ॥ प्रवृद्धलोमां तु भृशं कुटिलाकुटिलेक्षणाम् ॥ १५९ ॥ क्षुत्पिपासार्दितां

नित्यं भयदां कलहप्रियाम् ॥ एवंविधां तु संचिंत्य नमः स्वाहा फडंतकम् ॥ १६०॥ बीजं साध्योपरि न्यस्य तस्मिन्स्थाप्य शवं जपेत् ॥ अव
घृभ्य शवं शत्रुनाम्नाथ प्रजपेन्मनुम् ॥ १६१॥ सोष्णीषकंचुको विद्वान्कृष्णे भूते दिवानिशम् ॥ उपवासी श्मशाने वा विपिने शून्यमंदिरे॥ १६२॥
मंत्रस्य सिद्ध्यै यतवाग्ध्यायन्देवीं निरंतरम् ॥ सहस्रादूर्द्धतः शत्रुर्ज्वरेण परिगृह्यते ॥१६३॥ पंचगव्येन शांतिः स्याज्ज्वरस्य पयसापि वा॥मंत्राद्या
क्षरमालिख्य शत्रुनाम ततः परम् ॥ १६४ ॥ द्वितीयं मनुवर्ण च शत्रुनामैवमालिखेत् ॥ सर्वं मनुदिक्सहस्रजपाच्छवमृतिर्भवेत् ॥ १६५ ॥दग्ध्वा
कंकं श्मशानाग्नौ तद्भस्मादाय मन्त्रवित् ॥ विरोधिनाम्नाष्टशतं जप्तमुच्चाटनं रिपोः ॥ १६६ ॥ श्मशानभस्मना कृत्वा शवं तस्योपरि न्यसेत्
॥ विरोधिनामसंरुद्धं कृष्णे पक्षे समुच्चरेत् ॥ १६७ ॥ महिषीक्षीरधूपं च दद्याच्छत्रुविपत्करम् ॥ एवं संक्षेपतः प्रोक्तं अवतारचतुष्टयम् ॥
॥ १६८ ॥ दुर्गाया जगदंबायाः किं पुनः प्रष्टुमिच्छसि ॥ १६९ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे दुर्गामन्त्रचतुष्ट
यवर्णनं नाम सप्ताशीतितमोऽध्यायः ॥ ८७ ॥ सूत उवाच ॥ श्रुत्वेत्थं यजनं विप्रा मन्त्रध्यानपुरःसरम् ॥ सर्वासामवताराणां नारदो देव
दर्शनः ॥ १ ॥ सर्वाद्याया जगन्मातुः श्रीराधायाः समर्चनम् ॥ अवतारकलानां हि पप्रच्छ विनयान्वितः॥२ ॥नारद उवाच ॥ धन्योऽस्मि
कृतकृत्योऽस्मि जातोऽहं त्वत्प्रसादतः ॥ यज्जगन्मातृमंत्राणां वैभवं श्रुतवान्मुने ॥ ३ ॥ यथा लक्ष्मीमुखानां तु अवताराः प्रकीर्तिताः ॥
तथा राधावताराणां श्रोतुमिच्छामि वैभवम् ॥ ४ ॥ यत्संख्याकाश्च यद्रूपा यत्प्रभावा विदांवर ॥ राधावतारास्तान्सत्यं कीर्तयाशेषसिद्धिदान्
॥५॥ एतच्छुत्वा वचस्तस्य नारदस्य विधेः सुतः ॥ सनत्कुमारः प्रोवाच ध्यात्वा राधापदांबुजम् ॥ ६ ॥ सनत्कुमार उवाच ॥ शृणु विप्र प्रवक्ष्यामि
रहस्यातिरहस्यकम् ॥ राधावतारचरितं भजतामिष्टिसिद्धिदम् ॥ ७ ॥ चन्द्रावली च ललिता द्वे सख्यौ सुप्रिये सदा ॥ मालावतीमुखाद्यानां
चन्द्रावल्यधिपा स्मृता ॥८॥ कलावतीमुखाद्यानामीश्वरी ललिता मता ॥ राधाचरणपूजायामुक्ता मालावतीमुखाः ॥९॥ ललिताधीश्वरीणां तु नामानि
शृणु सांप्रतम् ॥ कलावती मधुमती विशाखा श्यामलाभिधा ॥ १० ॥ शैब्या वृन्दा श्रीधराख्या सर्वास्तत्तुल्यविग्रहाः ॥ सुशीलाप्रमुखा
श्चान्याः सख्यो द्वात्रिंशदीरिताः ॥ ११ ॥ ताः शृणुष्व महाभाग नामतः प्रवदामि ते ॥ सुशीला शशिलेखा च यमुना माधवी रतिः ॥ १२ ॥
कदम्बमाला कुन्ती च जाह्नवी च स्वयंप्रभा ॥ चन्द्रानना पद्ममुखी सावित्री च सुधामुखी ॥ १३ ॥ शुभा पद्मा पारिजाता गौरिणी सर्वमंगला ॥
कालिका कमला दुर्गा विरजा भारती सुरा ॥१४ ॥ गंगा मधुमती चैव सुन्दरी चन्दना सती ॥ अपर्णा मनसानन्दा द्वात्रिंशद्राधिकाप्रियाः ॥ १५॥

कदाचिल्ललिता देवी पुंरूपा कृष्णविग्रहा ॥ ससर्ज षोडशकलास्ताः सर्वास्तत्समप्रभाः ॥ १६ ॥ तासां मन्त्रं तथा ध्यानं यन्त्रार्चादिक्रमं तथा ॥
वर्णये सर्वतंत्रेषु रहस्यं मुनिसत्तम ॥ १७ ॥ वातो मरुच्चाग्निवह्नी धराक्ष्मे जलचारिणी ॥ विमुखं चरशुचिविभू वनस्वशक्तयः स्वराः ॥ १८ ॥
प्राणस्तेजः स्थिरा वायुर्वायुश्चापि प्रभा तथा ॥ ज्यकुमभ्रं तथा नादो दावकः पाथ इत्यथ ॥ १९ ॥ व्योमरयः शिखी गोत्रा तोयं शून्यजवी
द्युतिः ॥ भूमी रसो नमो व्याप्तं दाहश्चापि रसांबु च ॥ २० ॥ वियत्स्पर्शश्च हृद्धंसहलाग्रासो हलात्मिकाः ॥ चन्द्रावली च ललिता हंसेला नायके
मते ॥ २१ ॥ ग्रासस्थिता स्वयं राधा स्वयं शक्तिस्वरूपिणी ॥ शेषास्तु षोडशकला द्वात्रिंशत्तत्कलाः स्मृताः ॥ २२ ॥ वाङ्मयं निखिलं व्याप्तमाभि
रेव मुनीश्वर ॥ ललिताप्रमुखाणां तु षोडशीत्वमुपागता ॥२३॥ श्रीराधा सुन्दरी देवी तांत्रिकैः परिकीर्त्यते ॥ कुरुकुल्ला च वाराही चन्द्रालिललिते
उभे ॥ २४ ॥ संभूते मन्त्रवर्गं तेऽभिधास्येऽहं यथातथम् ॥ हृत्प्राणेलाहंसदाहवह्निस्वैर्ललितेरिता ॥२५॥ त्रिविधा हंसभेदेन शृणु तां च यथाक्र
मम् ॥ हंसाद्ययाऽद्या मध्या स्यादादिमध्यस्थहंसया ॥२६॥ तृतीया प्रकृतिः सैव तुर्या तैरंत्यमायया ॥ आसु तुर्याभवन्मुक्त्यै तिस्रोऽन्याः स्युश्च
संपदे ॥ २७ ॥ इति त्रिपुरसुंदर्या विद्या सम्यक्समीरिता ॥ दाहभूमीरसाक्ष्मास्वैर्वशिनीबीजमीरितम् ॥ २८ ॥ प्राणो रसाशक्तियुतः कामेश्वर्यक्षरं
महत् ॥ शून्यमंबुरसावह्निस्वयोगान्मोहनीमनुः ॥ २९ ॥ व्याप्तं रसाक्ष्मास्वयुतं विमलाबीजमीरितम् ॥ ज्यानभोदाहवह्निस्वयोगैः स्यादरुणामनुः
॥ ३० ॥ जयिन्यास्तु समुद्दिष्टः सर्वत्र जयदायकः ॥ कं नभोदाहसहितं व्याप्तक्ष्मास्वयुतं मनुः ॥ ३१॥ सर्वेश्वर्याः समाख्यातः सर्वसिद्धिकरः
परः ॥ ग्रासो नभोदाहवह्निस्वैर्युक्तः कौलिनीमनुः ॥ ३२ ॥ एतैर्मनुभिरष्टाभिः शक्तिभिर्वर्गसंयुतैः ॥ वाग्देवतांतैर्न्यासः स्याद्येन देव्यात्मको भवेत्
॥ ३३ ॥ रंध्रे भाले तथाज्ञायां गले हृदि तथा न्यसेत् ॥ नाभावाधारके पादद्वये मूलाग्रकावधि ॥३४॥ षड्दीर्घाढ्येन बीजेन कुर्याच्चैव षडंगकम् ॥
लोहितां ललितां बाणचापपाशसृणीः करैः ॥ ३५ ॥ दधानां कामराजांके यन्त्रितां मुदितां स्मरेत् ॥ मध्यस्थदेवी त्वेकैव षोडशाकारतः स्थिता
॥ ३६ ॥ यतस्तस्मात्तनौ तस्यास्त्वन्याः पंचदशार्चयेत् ॥ ऋषिः शिवश्छंद उक्ता देवता ललितादिकाः ॥ ३७ ॥ सर्वासामपि नित्यानामावृती
र्नामसंचये ॥ पटले तु प्रयोगांश्च वक्ष्याम्यग्रे सविस्तरम् ॥ ३८ ॥ अथ षोडशनित्यासु द्वितीया या समीरिता ॥ कामेश्वरीति तां सर्वकामदां शृणु
नारद ॥ ३९ ॥ शुचिः स्वेन युतस्त्वाद्यो ललिता स्याद्द्वितीयकः ॥ शून्यमग्नियुतं पश्चाद्द्वयोर्व्याप्तेन संयुतम् ॥ ४० ॥ प्राणो रसाग्निसहितः
शून्ययुग्मं चरान्वितम् ॥ नभोगोत्रा पुनश्चैषां दाहेन समयोजिता ॥ ४१ ॥ अंबु स्याच्चरसंयुक्तं नवशक्तियुतं च हृत् ॥ एषा कामेश्वरी नित्या

कामदैकादशाक्षरी ॥ ४२ ॥ मूलविद्याक्षरैरेव कुर्यादंगानि षट् क्रमात् ॥ एकेन हृदयं शीर्षं तावताथो द्वयं द्वयात् ॥४३॥ चतुर्भिर्नयनं तद्वदस्त्रमेकेन कीर्तितम् ॥ दृक्श्रोत्रनासाद्वितये जिह्वाहृन्नाभिगुह्यके ॥ ४४ ॥ व्यापकत्वेन सर्वांगे मूर्द्धादिप्रपदावधि ॥ न्यसेद्विद्याक्षराण्येषु स्थानेषु तदनंतरम् ॥ ४५ ॥ समस्तेन व्यापकं तु कुर्यादुक्तक्रमेण तु ॥ अथ ध्यानं प्रवक्ष्यामि नित्यपूजासु चोदितम् ॥ ४६ ॥ येन देवी सुप्रसन्ना ददातीष्टमयत्नतः ॥ बालार्ककोटिसंकाशां माणिक्यमुकुटोज्ज्वलाम् ॥ ४७ ॥ हारग्रैवेयकांचीभिर्हार्मिकानूपुरादिभिः ॥ मंडितां रक्तवसनां रत्नाभरणशोभिताम् ॥ ४८ ॥ षड्भुजां त्रीक्षणामिंदुकलाकलितमौलिकाम् ॥ पश्चाष्टषोडशद्वंद्वषट्कोणचतुरस्रगाम् ॥४९॥ मंदस्मितलसद्वक्त्रां दयामंथरवीक्षणाम् ॥ पाशांकुशौ च पुंड्रेक्षुचापं पुष्पशिलीमुखम् ॥ ५० ॥ रत्नपात्रं सीधुपूर्णं वरदं बिभ्रतीं करैः ॥ ततः प्रयोगान्कुर्वीत सिद्धे मंत्रे तु साधकः ॥ ५१ ॥ तृतीयामथ वक्ष्यामि नाम्ना तु भगमालिनी ॥ कामेश्वर्यादिरादिः स्याद्रसश्चापस्थिरारसः ॥ ५२ ॥ धरायुक्सचरा पश्चात्स्थिरा पश्चाद्रसः स्मृतः ॥ स्थिराशून्येऽग्निसंयुक्ते रसः स्यात्तदनंतरम् ॥ ५३॥ स्थिरा भूसहिता गोत्रा सदाहोऽग्निरसः स्थिरा ॥नभश्च मरुता युक्तं रसवर्णसमन्वितम्॥५४॥ततो रसः स्थिरा पश्चान्मरुता सह योजिता॥अंबहंसचरोऽथोक्तो रसोऽथ स्यात्स्थिरा पुनः॥५५॥स्थिराधरान्विता हंसो व्याप्तेन च चरेण च॥ रसः स्थिरा ततो व्याप्तं भूयुतं शून्यमग्नियुक्॥५६॥रसः स्थिरा ततः साग्निशून्यं तद्वियुतो मरुत्॥ रयः शून्यं चाग्नियुतं हृदाहंसाद्य तत्परम्॥५७॥रसः स्थिरांबु च वियत्स्वयुतं प्राण एव च॥दाहोऽग्नियुग्रसस्तस्मात्स्थिराक्ष्मा दाहसंयुता॥सचरः स्याज्जवीपूर्वविद्या तार्तीयतः क्रमात्॥५८॥चतुष्टयमथार्णानां रसस्तदनु च स्थिरा॥हृदंबुयुक् क्ष्मया दाहः सचरः स्याज्जवी च हृत्॥५९॥दाहोंऽबुमरुता युक्तो व्योम्नि साग्निरसस्तुतः॥ स्थिरा तु मरुता युक्ता शून्यं साग्निनभश्चरौ॥६०॥हंसो व्याप्तमरुद्युक्तः शून्यं व्याप्तमतोंऽबु च॥दाहो गोत्राचरयुता तथा दाहस्तथा रयः॥६१॥हृद्धरासहितं दाहरयौ चरसमन्वितौ॥रसः स्थिरा ततः प्राणो रसाग्निसहितो भवेत् ॥६२॥ शून्ययुग्मं चरयुतं ततः पूर्वमतः परम् ॥ शून्ययुग्मं च गोत्रा स्याद्दाहयुक्तांबुना चरः॥६३॥प्राणो रसाचरयुतो गोत्रव्यसिमतः परम् ॥ गोत्रादाहमरुद्युक्ता त्वंबुन्यासमतो भवेत् ॥ ६४॥ युक्तोनांभश्च भूयुक्तं वाश्चरेण समन्वितम् ॥ श्वासो धरायुतः पश्चाद्रसः शक्त्या समन्वितः ॥ ६५ ॥ श्वासो भूसहितो विप्र रसो व्याप्तं ततश्च हृत् ॥दाहोनांबु च हृत्पश्चाद्रयेंऽबुमरुदन्वितः ॥६६ ॥ शून्यं च केवलं चैव रसश्च सचरस्थिरा ॥ वियदंबुयुतं दाहस्त्वग्नियुक्सयुतः शुचिः ॥ ६७ ॥ भूमी रसाक्ष्मास्वयुता पंचैकांतरिताः स्थिताः ॥ तदंतरितबीजानि स्वसंयुक्तानि पंच वै ॥ ६८ ॥ तानि क्रमाज्ज्यासचरो रसो भूश्च नभोयुता ॥ हंसश्चरयुतो द्विः स्यात्ततः प्राणो रसाग्नियुक् ॥६९॥ शून्य

युग्मं चरयुतं हृद्दाहोंबुमरुद्युतः ॥ व्योमाग्निसहितं पश्चाद्धसश्च मरुता स्थिरा ॥७०॥ शून्यं साग्निनभश्चैव चरेण सहितं तथा ॥ अंबु पश्चाद्वियत्तस्मान्न
भश्च मरुदन्वितम् ॥ ७१ ॥ शून्यं व्याप्तं च दद्युक्तं रयदाहस्ववह्निभिः ॥ हंसः सदाहोंबुरसा चरस्वैः संयुतो भवेत् ॥७२॥ हंसः सदाहवह्निस्वैर्युक्त
मंत्यमुदीरितम् ॥ सप्तत्रिंशच्छतार्णैः स्यान्नित्या सौभगमालिनी॥ ७३॥ अंगानि मंत्रवर्णैः स्युराद्येन हृदुदीरितम् ॥ ततश्चतुर्भिः शीर्षं स्याच्छिखा
त्रिभिरुदीरिता ॥ ७४ ॥ गुणवेदाक्षरैः शेषाण्यंगानि षडिति क्रमात् ॥ अरुणामरुणाकल्पां सुंदरीं सुस्मिताननाम् ॥ ७५ ॥ त्रिनेत्रां बाहुभिः षड्भि
रुपेतां कमलासनाम् ॥ कह्लारपाशपुंड्रेक्षुकोदंडान्वामबाहुभिः ॥ ७६ ॥ दधानां दक्षिणैः पद्ममंकुशं पुष्पसायकम् ॥ तथाविधाभिः पारितो युतां
शक्तिगणैः स्तुतैः॥७७ ॥ अक्षरोक्ताभिरन्याभिः स्मरोन्मादमदात्मभिः ॥ एषा तृतीया कथिता वनिता जनमोहिनी ॥ ७८ ॥ चतुर्थीं शृणु विप्रेन्द्र
नित्यक्लिन्नासमाह्वयाम् ॥ हंसस्तु दाहवह्निस्वैर्युक्तः प्रथममुच्यते ॥७९ ॥ कामेश्वर्यास्तृतीयादिवर्णानामष्टकं भवेत् ॥ हृदंबुमरुता युक्तः स एवै
कादशाक्षरः ॥ ८० ॥ एकादशाक्षरी चेयं विद्यार्णैरंगकल्पनम् ॥ आद्येन मन्त्रवर्णेन हृदयं समुदीरितम् ॥ ८१ ॥ द्वाभ्यां द्वाभ्यां तु शेषाणि
अंगानि परिकल्पयेत् ॥ न्यसेदंगुष्ठमूलादिकनिष्ठाग्रांतमूर्द्धगम् ॥८२॥ शेषं तद्वलये न्यस्य हृद्दक्छ्रोत्रे नसोर्द्वयोः ॥ त्वचि ध्वजे च पायौ च पादयो
र्णकान्न्यसेत् ॥ ८३ ॥ अरुणामरुणाकल्पामरुणांशुकधारिणीम् ॥ अरुणस्रग्विलेपां तां चारुस्मेरमुखांबुजाम् ॥ ८४ ॥ नेत्रत्रयोल्लसद्वक्त्रां भाले
घर्मांबुमौक्तिके ॥ विराजमानां मुकुटलसदर्द्धेंदुशेखराम् ॥ ८५ ॥ चतुर्भिर्बाहुभिः पाशमंकुशं पानपात्रकम् ॥ अभयं बिभ्रतीं पद्ममध्यासीनां
मदालसाम् ॥ ८६ ॥ ध्यात्वैवं पूजयेन्नित्यक्लिन्नां नित्यां स्वशक्तिभिः। पुण्या चतुर्थी गदिता नित्याक्लिन्नाह्वया मुने ॥ ८७ ॥ वनिता नव
नीतस्य दाविकाग्निर्जयादिना ॥ भूः स्वेन युक्ता प्रथमं प्राणो दाहेन तद्युतः ॥ ८८ ॥ रसो दाहेन तद्युक्तं प्रभादाहेन तद्युता ॥ ज्या च दाहेन तद्युक्ता
नित्याक्लिन्नांतगद्वयम् ॥ ८९ ॥ एषा नवाक्षरी नित्या भेरुण्डा सर्वसिद्धिदा ॥ प्रणवं ठद्वयं त्यक्त्वा मध्यस्थैः षड्भिरक्षरैः ॥ ९० ॥ षडंगानि प्रकुर्वीत
वर्णन्यासं ततः परम् ॥ रंध्राद्यामुखकंठेषु हन्नाभ्यां धारयद्वयम् ॥ ९१ ॥ न्यसेन्मंत्रार्णनवकं मातृकान्यासपूर्वकम् ॥ अथ ध्यानं प्रवक्ष्यामि देव्याः
सर्वार्थसिद्धिदम् ॥ ९२ ॥तप्तकांचनसंकाशदेहां नेत्रत्रयान्विताम् ॥ चारुस्मितां चितमुखीं दिव्यालंकारभूषिताम् ॥ ९३॥ ताटंकहारकेयूररत्नस्तबक
मंडिताम् ॥ रसनानूपुरोर्म्यादिभूषणैरतिसुन्दरीम् ॥ ९४ ॥ पाशांकुशौ चर्मखड्गौ गदावह्निधनुःशरान् ॥ करैर्दधानामासीनां पूजायां मत्परां
स्थिताम् ॥ ९५ ॥ शक्तीश्च तत्समाकारास्तेजोहेतिभिरन्विताः ॥ पूजयेत्तद्वदभितः स्मितास्या विजयादिकाः ॥ ९६ ॥ पंचमीयं समाख्याता

भेरुंडाख्या मुनीश्वर ॥ यस्याः स्मरणतो नश्येद्गरलं त्रिविधं क्षणात् ॥९७॥ या तु षष्ठी द्विजश्रेष्ठ सा नित्या वह्निवासिनी ॥ तद्विधानं शृणुष्वाद्य
साधकानां सुसिद्धिदम् ॥ ८८ ॥ भेरुंडाद्यमिहाद्यं स्यान्नित्यक्लिन्नाद्यनंतरम् ॥ ततोऽम्बुशून्ये हंसाग्निद्युत्तमंबुमरुद्युतम् ॥ ९८॥ हृदग्निना युतं शून्यं
व्याप्तेन शुचिना च युक् ॥ शून्यं नभः शक्तियुतं नवार्णेयमुदाहृता ॥ १०० ॥ विद्या द्वितीयबीजेन स्वरान्दीर्घान्नियोजयेत् ॥ मायांतान्षड्भिरेवां
गान्याचरेत्सकरांगयोः ॥ १०१ ॥ नवाक्षराणि विद्याया नवरंध्रेषु विन्यसेत् ॥ व्यापकं च समस्तेन कुर्यादेवात्मसिद्धये ॥१०२ ॥ सर्वास्वपि च
विद्यासु व्यापकन्यासमाचरेत् ॥ तप्तकांचनसंकाशां नवयौवनसुन्दरीम् ॥ १०३ ॥ चारुस्मेरमुखांभोजां विलसन्नयनत्रयाम् ॥ अष्टाभिर्बाहुभिर्युक्तां
माणिक्याभरणोज्ज्वलाम् ॥ १०४ ॥ पद्मरागकिरीटांशुसंभेदारुणितांबराम् ॥ पीतकौशेयवसनां रत्नमंजीरमेखलाम् ॥ १०५ ॥ रक्तमौक्तिकसं
भिन्नस्तबकाभरणोज्ज्वलाम् ॥ रत्नाब्जकंबुपुंड्रेक्षुचापपूर्णेन्दुमंडलम् ॥ १०६ ॥ दधानां बाहुभिर्वामैः कह्लारं हेमशृंगकम् ॥ पुष्पेषुं मातुलिंगं च
दधानां दक्षिणैः करैः ॥ १०७ ॥ स्वस्वनामाभिरभितः शक्तिभिः परिवारिताम् ॥ एवं ध्यात्वार्चयेद्वह्निवासिनीं वह्निविग्रहाम् ॥ १०८ ॥ यस्याः
स्मरणतो वश्यं जायते भुवनत्रयम् ॥ अथ या सप्तमी नित्या महावज्रेश्वरी मुने ॥ १०९ ॥ तस्या विद्यां प्रवक्ष्यामि साधकानां सुसिद्धिदाम् ॥
द्वितीयं वह्निवासिन्या नित्यक्लिन्ना चतुर्थकम् ॥ ११० ॥ पंचमं भगमालाद्यं भेरुंडाया द्वितीयकम्॥नित्यक्लिन्नाद्वितीयं च तृतीयं षष्ठसप्तमौ॥१११॥
अष्टमं नवमं चापि पूर्वं स्यादंतिमं पुनः॥द्वयमेकैकमथ च द्वयद्वयमथ द्वयम्॥११२॥मायया पुटितं कृत्वा कुर्यादंगानि षट् क्रमात् ॥प्रत्येकं शक्ति
पुटितैर्मंत्रार्णैर्दशभिर्न्यसेत् ॥ ११३ ॥ हृच्छ्रोत्रनासावाग्वक्षोनाभिगुह्येषु च क्रमात् ॥ रक्तां रक्तांबरां रक्तगंधमालाविभूषणाम् ॥ ११४ ॥ चतुर्भुजां
त्रिनयनां माणिक्यमुकुटोज्ज्वलाम् ॥ पाशांकुशामिक्षुचापं दाडिमीशायकं तथा ॥११५॥ दधानां बाहुभिर्नेत्रैर्दयासुप्रीतिशीतलैः॥ पश्यंती साधके
अस्त्रषट्कोणाब्जमहीपुरे ॥११६ ॥ चक्रमध्ये सुखासीनां स्मेरवक्त्रसरोरुहाम्॥ शक्तिभिः स्वस्वरूपाभिरावृतां पीतमध्यगाम्॥ ११७॥ सिंहासनेऽभितः
प्रेंखत्पोतस्थाभिश्च शक्तिभिः ॥वृतां ताभिर्विनोदानि यातायातादिभिः सदा॥ ११८॥ कुर्वाणामरुणांभोधौ चिंतयेन्मन्त्रनायकम् ॥ एषा तु सप्तमी
प्रोक्ता दूतीं चाप्यष्टमीं शृणु ॥ ११९ ॥ वज्रेश्वर्याद्यमाद्यं स्याद्वियदग्नियुतं ततः॥ अंबु स्यान्मरुता युक्तं गोत्रा क्ष्मासंयुता ततः॥१२०॥ रयोर्व्या
सेन शुचिना युतः स्यात्तदनंतरम् ॥अत्यार्णा वह्निवासिन्या दूती नित्या समीरिताः ॥१२१ ॥षड्दीर्घस्वरयुक्तेन विद्यायाः स्यात्षडंगकम् ॥ तेनैव
पुटितैरर्णैर्न्यसेच्छ्रोत्रादिपञ्चसु ॥ १२२ ॥ षष्ठकं नासि विन्यस्य व्यापकं विद्यया न्यसेत ॥ निदाघकालमध्याह्नदिवाकरसमप्रभाम् ॥ १२३ ॥

नवरत्नकिरीटां च त्रीक्षणामरुणांबराम् ॥ नानाभरणसंभिन्नदेहकांतिविराजिताम् ॥ १२४ ॥ शुचिस्मितामष्टभुजां स्तूयमानां महर्षिभिः ॥ पाशं
खेटं गदां रत्नचषकं वामबाहुभिः ॥ १२५ ॥ दक्षिणैरंकुशं खड्गं कट्टारं कमलं तथा ॥ दधानां साधकाभीष्टदानोद्यमसमन्विताम् ॥ १२६॥ ध्यात्वैवं
पूजयेद्देवीं दूतीं दुर्नीतिनाशिनीम् ॥ इत्येषा कथिता तुभ्यं समस्तापन्निवारिणी ॥ १२७ ॥ श्रीकरी शिवतावासकारिणी सर्वसिद्धिदा ॥ अथ ते
नवमीं नित्यां त्वरितां नाम नारद ॥ १२८ ॥ प्रवक्ष्यामि यशोविद्याधनारोग्यसुखप्रदाम् ॥ आद्यं तु वह्निवासिन्या दूत्यादिस्तदनन्तरम् ॥१२९॥
हंसो धरा स्वयं युक्तस्तेजश्वरसमन्वितम् ॥ वायुः प्रभाचरयुता ग्रासशक्तिसमन्वितः ॥ १३० ॥ हृदार येण दाहेन वह्निस्वावष्टमं तथा ॥ हंसः
क्ष्माखंयुतो ग्रासश्वरयुक्तो द्वितीयकः ॥ १३१ ॥ द्वितिर्नादयुता नित्या त्वरिता द्वादशाक्षरी ॥ विद्या चतुर्थवर्णादिसप्तभिस्त्वक्षरैस्तथा ॥ १३२ ॥
कुर्यादंगानि युग्मार्णैः षट्क्रमेण करांगयोः ॥ शिरोललाटकंठेषु हृन्नाभ्याधारके तथा ॥ १३३॥ ऊरुयुग्मे तथा जानुद्वये जंघाद्वये तथा ॥ पादयुग्मे तथा
वर्णान्मंत्रजान्दश विन्यसेत्॥ १३४॥द्वितीयोपांत्यमध्यस्थैर्मंत्रार्णैरितरैरपि ॥ ताराद्यैः शृणु तद्ध्यानं सर्वसिद्धिविधायकम् ॥१३५॥श्यामवर्णांशुभाकारां
नवयौवनशोभिताम् ॥ द्विद्विक्रमादष्टनागैः कल्पिताभरणोज्ज्वलैः ॥ १३६ ॥ ताटंकमंगदं तद्वद्रसना नूपुरं च तैः ॥ विप्रक्षत्रियविट्शूद्रजातिभिर्भी
मविग्रहैः ॥ १३७ ॥ पल्लवांशुकसंवीतां शिखिपिच्छकृतैः शुभैः ॥ वलयैर्भूषितभुजां माणिक्यमुकुटोज्ज्वलाम् ॥ १३८ ॥ बर्हिबर्हकृतापीडां तच्छत्रां
तत्पताकिनीम् ॥ गुंजागुणलसद्वक्षःकुचकुंकुममंडलाम् ॥ १३९ ॥ त्रिनेत्रां चारुवदनां मंदस्मितमुखांबुजाम् ॥ पाशांकुशवराभीतिलसद्भुज
चतुष्टयाम् ॥ १४० ॥ ध्यात्वैवं तोतलां देवीं पूजयेच्छक्तिभिर्वृताम् ॥ तदग्रस्था लु फट्कारी शरचापकरोज्ज्वला ॥ १४१ ॥ प्रसीदेत्फलदाने च
साधकानां त्वरान्विता ॥ एषा तु नवमी नित्या त्वारितोक्ता मुनीश्वर॥ १४२ ॥ विघ्नदुःस्वप्रशमनी सर्वाभीष्टप्रदायिनी ॥ शुचिः स्वेन युतस्त्वाद्यो
रसावह्निसमन्वितः ॥ १४३॥ घ्राणो द्वितीयः स्वयुतो वनदुच्छक्तिभिः परः ॥ इतीरिता त्र्यक्षराख्या नित्येयं कुलसुंदरी ॥ १४४ ॥ यस्याः स्मरण
मात्रेण सर्वज्ञत्वं प्रजायते ॥ त्रिभिस्तैरुदितैर्मूलवर्णैः कुर्य्यात्षडंगकम् ॥ १४५ ॥ आदिमध्यावसानेषु पूजाजपविधिक्रमात् ॥ प्रत्येक तैस्त्रिभिर्बीज
दीर्घस्वरसमन्वितैः ॥१४६॥ कुर्यात्करांगवक्त्राणां न्यासं प्रोक्तं यथाविधि ॥ ऊर्द्ध्वप्रागदक्षिणोदक्च पश्चिमाधरनामभिः ॥१४७॥सुविनद्यंतरस्थैस्तन्न
दात्मसु यथाक्रमम् ॥ आधाररंध्रहत्स्वेकं द्वितीयं लोचनत्रये॥१४८॥ तृतीयं श्रोत्रचिबुके चतुर्थं घ्राणतालुषु ॥ पंचमं चांसनाभीषु ततः पाणिपद
द्वये ॥ १४९ ॥ मूलमध्याग्रतो न्यस्येन्नवधा मूलवर्णकैः ॥ लोहितां लोहिताकारशक्तिवृंदनिषेविताम् ॥ १५० ॥ लोहितांशुकभूषास्रगे

पनां षण्मुखांबुजाम् ॥ अनर्घ्यरत्नघटितमाणिक्यमुकुटोज्वलाम् ॥ १५१ ॥ रत्नस्तबकसंभिन्नलसद्वक्षःस्थलां शुभाम् ॥ कारुण्यानंदपरमा
मरुणांबुजविष्टराम् ॥ १५२॥भुजैर्द्वादशभिर्युक्तां सर्वेषां सर्ववाङ्मयीम् ॥ प्रवालाक्षस्रजं पद्मं कुंडिकां रत्ननिर्मिताम् ॥ १५३ ॥ रत्नपूर्णं तु चषकं
लुंगीं व्याख्यानमुद्रिकाम् ॥ दधानां दक्षिणैर्वामैः पुस्तकं चारुणोत्पलम् ॥१५४॥ हैमीं च लेखनीं रत्नमालां कंबुवरं भुजैः ॥ अभितः स्तूयमानां
च देवगंधर्वकिन्नरैः॥१५५॥यक्षराक्षसदैत्यार्षिसिद्धविद्याधरादिभिः ॥ ध्यात्वैवमर्चयेन्नित्यां वाग्लक्ष्मीकान्तिसिद्धये ॥ १५६ ॥सितां केवलवाक्सिद्धयै
लक्ष्म्यै हेमप्रभामपि ॥ धूमाभां वैरिविद्विष्टयै मृतये निग्रहाय च ॥ १५७॥ नीलां च मूकीकरणे स्मरेत्तत्तदपेक्षया ॥ इत्येषा दशमी नित्या
प्रोक्ता ते कुलसुन्दरी ॥ १५८ ॥ नित्यानित्यां तु दशमीं त्रिकुटां वच्मि सांप्रतम् ॥ हंसश्च हृत्प्राणरसादाहकर्णैः समन्वितः ॥ १५९ ॥ विद्यया
कुलसुंदर्या योजितः संप्रदायतः ॥ नित्यानित्यत्रिवर्णेयं षड्भिः कूटाक्षरैर्युता ॥१६०॥ प्रतिलोमादिभी रूपैर्द्विसप्ततिभिदा मता ॥ यस्या भजनतः
सिद्धो नरः स्यात्खेचरः सुखी ॥ १६१ ॥ निग्रहानुग्रहौ कर्तुं क्षमः स्याद्भुवनत्रये॥दीर्घस्वरसमेताभ्यां हंसहृद्भ्यां षडंगकम् ॥१६२ ॥ भ्रूमध्ये कण्ठहृ
न्नाभिगुह्याधारेषु च क्रमात् ॥ विद्याक्षराणि क्रमशो न्यसेद्बिंदुयुतानि च ॥ १६३ ॥ व्यापकं च समस्तेन विधाय विधिना पुनः ॥ ध्यायेत्समस्त
संपत्तिहेतोः सर्वात्मिकां शिवाम् ॥ १६४ ॥ उद्यद्भास्करबिंबाभां माणिक्यमुकुटोज्ज्वलाम् ॥ पद्मरागकृताकल्पामरुणांशुकधारिणीम् ॥ १६५ ॥
चारुस्मितलसद्वक्त्रषट्सरोजविराजिताम् ॥ प्रतिवक्त्रं त्रिनयनां भुजैर्द्वादशभिर्युताम् ॥ १६६ ॥ पाशाक्षगुणपुंड्रेक्षुचापखेटत्रिशूलकान् ॥ करैर्वामैर्द
धानां च अङ्कुशं पुस्तकं तथा ॥ १६७ ॥ पुष्पेषुमंबुजं चैव नृकपालाभये तथा ॥ दधानां दक्षिणैर्हस्तैर्ध्यायेद्देवीमनन्यधीः ॥ १६८ ॥ इत्येषैका
दशी प्रोक्ता द्वादशीं शृणु नारद ॥ त्वरितोयांत्यमाद्यं स्याद्युतिदोहचरस्वयुक्॥१६९॥हृच्च दाहक्ष्मास्वयुतं वज्रेशीपञ्चमं तथा॥ मरुत्स्वयुक्तो मध्याब्यो
दशम्याः परतः पुनः॥१७० ॥भूमी रसाक्ष्मास्वयुता वज्रेशीत्यष्टमः क्रमात् ॥ षडक्षराणि त्वरिता तृतीयं तदनंतरम् ॥ १७१ ॥ द्युतिर्दाहचरस्वेन
अस्या आद्यमनन्तरम् ॥ उक्ता नीलपताकाख्या नित्या सप्तदशाक्षरी॥१७२॥द्विद्विपक्षाक्षिषड्वर्णैर्मंत्रोत्थैरंगकल्पनम् .॥ श्रोत्रादिनासायुगले वाचि
कण्ठे हृदि क्रमात् ॥१७३॥ नाभावाधारकेऽथापि पादसंधिषु च क्रमात् ॥मन्त्राक्षराणि क्रमशो न्यसेत्सप्तदशापि च॥१७४ ॥ व्यापकं च सम
स्तेन विदध्याच्च यथाविधि ॥ इन्द्रनीलनिभां भास्वन्मणिमौलिविराजिताम् ॥ १७५ ॥ पञ्चवक्त्रां त्रिनयनामरुणांशुकधारिणीम् ॥ दशहस्तां लस
न्मुक्तामण्याभरणमंडिताम् ॥ १४६ ॥ रत्नस्तबकसंपन्नदेहां चारुस्मिताननाम् ॥ पाशं पताकां चर्मापि शार्ङ्गचापं वरं करैः ॥ १७७ ॥ दधानां वाम

पार्श्वस्थैः सर्वाभरणभूषितैः ॥ अंकुशं च तथा शक्तिं खड्गं बाणं तथाभयम् ॥ १७८ ॥ दधानां दक्षिणैर्हस्तैरासीनां पद्मविष्टरे ॥ स्वाकारवर्ण
वेषास्यपाण्यायुधविभूषणैः ॥ १७९ ॥ शक्तिवृन्दैर्वृतां ध्यायेद्देवीं नित्यार्चनक्रमे ॥ त्रिषट्कोणयुतं पद्ममष्टपत्रं ततो बहिः ॥ १८० ॥
अष्टास्रं भूपुरद्वन्द्वावृतं तत्पुरयुग्मकम् ॥ चतुर्द्वारयुतं दिक्षु शाखाभिश्च समन्वितम् ॥ १८१ ॥ कृत्वा नामावृतां शक्तिं गणैस्तत्रार्चयेच्छिवाम् ॥
एषा ते द्वादशी नित्या प्रोक्ता नीलपताकिनी ॥ १८२ ॥ समरे विजयं खड्गपादुकांजनसिद्धिदा ॥ वेतालयक्षिणीचेटपिशाचादिप्रसाधिनी ॥
॥ १८३ ॥ निधानबिलसिद्धान्नसाधिनी कामचोदिता ॥ अथ त्रयोदेशीं नित्यां वक्ष्यामि शृणु नारद ॥ १८४ ॥ रसो नभस्तथा दाहो
व्याप्तक्ष्मावनपूर्विका ॥ खेन युक्ता भवेन्नित्या विजयैकाक्षरा मुने ॥ १८५ ॥ विद्याया व्यंजनैर्दीर्घस्वरयुक्तैश्चतुष्टयम् ॥ शेषाभ्यां च द्वयं कुर्या
त्षडंगानि करांगयोः ॥ १८६ ॥ ज्ञानेंद्रियेषु श्रोत्रादिष्वथ चित्ते च विन्यसेत् ॥ अक्षराणि क्रमाद्बिन्दुयुतान्यन्यत्तु पूर्ववत् ॥ १८७ ॥ पञ्च
वक्त्रां दशभुजां प्रतिवक्त्रं त्रिलोचनाम् ॥ भास्वन्मुकुटविन्यासचन्द्रलेखाविराजिताम् ॥ १८८ ॥ सर्वाभरणसंयुक्तां पीतांबरसमुज्ज्वलाम् ॥
उद्यद्भास्वद्बिंबतुल्यदेहकांतिं शुचिस्मिताम् ॥ १८९ ॥ शंखं पाशं खेटचापौ कह्लारं वामबाहुभिः ॥ चक्रं तथांकुशं खड्गं सायकं मातुलुं
गकम् ॥ १९० ॥ दधानां दक्षिणैर्हस्तैः प्रयोगे भीमदर्शनाम् ॥ उपासनेति सौम्यां च सिंहोपरि कृतासनाम् ॥ १९१ ॥ व्याघ्रारूढाभिरभितः
शक्तिभिः परिवारिताम् ॥ समरे पूजनेऽन्येषु प्रयोगेषु सुखासनाम् ॥ १९२ ॥ शक्तयश्चापि पूजायां सुखासनसमन्विताः ॥ सर्वा देव्याः
समाकारसुखपाण्यायुधा अपि ॥ १९३ ॥ चतुरस्रद्वयं कृत्वा चतुर्द्वारोपशोभितम् ॥ शाखाष्टकसमोपेतं तत्र प्राग्वत्समर्चयेत् ॥ १९४ ॥ तदंतर्वृत
युग्मांतरष्टकोणं विधाय तु ॥ तदंतश्च तथा पद्मं षोडशच्छदसंयुतम् ॥ १९५ ॥ तथैवाष्टच्छद पद्मं विधायावाह्य तत्र ताम् ॥ तत्तच्छक्त्या वृतां सम्य
गुपचारैस्तथार्चयेत् ॥ १९६ ॥ एषा त्रयोदशी प्रोक्ता वादे युद्धे जयप्रदा ॥ चतुर्दशीं प्रवक्ष्येऽथ नित्यां वै सर्वमंगलाम् ॥१९७॥ हृदंबुवनयुक्तं खं
नित्या स्यात्सर्वमंगला ॥१९८॥एकाक्षर्यनया सिद्धो जायते खेचरः क्षणात् ॥ षड्दीर्घाढ्यां मूलविद्यां षडंगेषु प्रविन्यसेत् ॥१९९॥ तां नित्यां जात
रूपाभां मुक्तामाणिक्यभूषणाम् ॥ माणिक्यमुकुटां नेत्रद्वयप्रेंखद्दयापराम् ॥ २००॥ द्विभुजां शासनां पद्मे त्वष्टषोडशतद्द्वयैः ॥ पत्रैरुपेते सचतुर्द्वार
भूसद्मयुग्मके ॥ २०१ ॥ मातुलुंगफलं दक्षे दधानां करपंकजे ॥ वामेन निजभक्तानां प्रयच्छंतीं धनादिकम् ॥ २०२ ॥ स्वसमानाभिरभितः
शक्तिभिः परिवारिताम् ॥ षट्सप्ततिभिरन्याभिरप्सरोत्थाभिरन्विताम् ॥ २०३ ॥ प्रयोगेष्वन्यदा नित्यं सपर्यासक्तशक्तिकाम् ॥ एषा चतुर्दशी

प्रोक्ता तथा पंचदशीं शृणु ॥ २०४॥ भूः शून्यं नभसा भूश्च रसश्चाथ स्थिरांबु च॥रयोग्निना युतीज्यांबुमरुद्युक्तारसा मरुत् ॥२०५॥नभश्च मरुता
युक्तं रसा शून्येऽपि संयुते॥गोत्रा चरेण सहिता अंबुपूर्वाक्षरस्तथा॥२०६॥अंब्वग्नी हच्च दाहांबुरसक्ष्मारयहत्स्वयुक्॥हंसश्च मरुता दाहः प्राणश्च मरुता
युतः ॥ २०७ ॥ दाहः साग्निप्राणचरौ ज्यामरुत्सहितारयः ॥ चरेणांबु च गोत्राहत्साग्निज्यांबुरसा स्वयुक् ॥२०८॥ रयः साग्निज्यांबुरसा पुनरेते
जवी ततः ॥ दाहेनानेन ते द्विः स्याद्ध्रस्वो दाहमरुत्स्वयुक् ॥ २०९ ॥ हंसः सदाहवह्निस्वो दाहक्ष्मास्वयुतश्च सः ॥ सप्तदाहास्ततोऽस्याः स्युरष्ट
मायास्तु पंच ते ॥ २१० ॥ उपांत्याधः स्थितं नीलपताकाया अनंतरम् ॥ त्वरिता त्वं च भेरुंडाष्टमं च नवमं तथा ॥ २११ ॥ सा ज्वालामालिनी
नित्या त्रिषष्ट्यर्णा समीरिता ॥ एकद्वयचतुःपंचचतुष्टयदशाक्षरैः ॥ २१२ ॥ कुर्यादंगानि मूलार्णैरादितः षड्रांगयोः ॥ शेषैस्तु व्यापकं कुर्यात्ततो
ध्यायेत्सनातनीम् ॥२१३॥ ज्वलज्ज्वलनसंकाशां माणिक्यमुकुटोज्ज्वलाम् ॥ षड्वक्त्रां द्वादशभुजां सर्वाभरणभूषिताम् ॥ २१४॥ पाशांकुशौ खड्ग
खेटौ चापबाणौ गदादरौ ॥ शूलवह्नी वराभीती दधानां करपंकजैः ॥ २१५ ॥ स्वप्रमाणाभिरभितः शक्तिभिः परिवारिताम् ॥ चारुस्मितलसद्वक्त्र
सरोजां त्रीक्षणान्विताम् ॥ २१६ ॥ ध्यात्वैवमुपचारैस्तैरर्चयेत्तां तु नित्यशः ॥ चतुरस्रद्वयं कृत्वा चतुर्द्वारसमन्वितम् ॥ २१७ ॥ सशाखम
ष्टपत्राब्जमंतरा त्र्यस्रकं ततः ॥ षट्कोणं मध्यतस्त्र्यस्रं विधायात्र शिवां यजेत् ॥२१८॥ एषा पंचदशी प्रोक्ता षोडशीं शृणु नारद ॥ वायुप्रणवतत्त्वैस्तु
चित्रास्यादक्षरद्वया ॥ २१९ ॥ या सिद्धा धनधान्यात्मनिधिलाभाय कल्प्यते ॥ विद्याद्यवायुना कुर्याद्दीर्घस्वरयुजा क्रमात् ॥ २२० ॥ षडंगानि
यथापूर्वं मातृकां विद्यया न्यसेत् ॥ उद्यदादित्यबिंबाभां नवरत्नविभूषणाम् ॥ २२१ ॥ नवरत्नकिरीटां च चित्रपट्टांशुकोज्ज्वलाम् ॥ चतुर्भुजां त्रिन
यनां शुचिस्मितलसन्मुखीम् ॥ २२२ ॥ सर्वानंदमयीं नित्यां समस्तेप्सितदायिनीम् ॥ चतुर्भुजेषु वै पाशमंकुशं वरदाभये ॥२२३॥दधानां मंगला
पद्मकर्णिकायोनिमध्यगाम् ॥ तच्छक्तिभिश्च तच्चक्रे तथैवार्चनमीरितम् ॥ २२४ ॥ प्राणदाहौ धरायुक्तो पुनराद्यं रसे मरुत् ॥ व्यासं मरुच्छक्तियुतं
भूः स्वयुक्ता ततस्त्रयम् ॥ २२५ ॥ अस्या आद्यं रसायुग्मं चरणेन प्रयोजितम् ॥ दाहेन वह्निशक्तिभ्यां युतो हंसस्ततः परम् ॥ २२६ ॥ नभो
र्दिहृत्सदाहांबुज्या शून्यं स्वेन संयुतम्॥ अंबु पश्चाद्विषयुक्तं मरुता तु नभोयुतम् ॥ २२७ ॥ शून्यं व्याप्तं भुवा हंसः पूर्वांत्यौ स्यान्मनुत्रयम् ॥
अस्याः षष्ठादिपंचार्णा दैत्यास्यादाद्य ईरितः ॥ २२८ ॥ एकादशाक्षरादंत्या द्वितीयः खंड ईरितः ॥ तृतीयः पंचविंशार्णः प्रोक्ता मंत्रा इति क्रमात् ॥
॥२२९ ॥ बाला बीजत्रयाद्यैर्द्विस्त्रिभिर्मंत्रैः षडंगकम् ॥ विकीर्णकुंतलां नग्नां रक्तामानंदविग्रहाम् ॥ २३० ॥ दधानां चिंतयेद्बाणचापपाशसृणी

करैः ॥ तत्समानायुधाकारवर्णा देव्यस्तु वाह्मगाः ॥ २३१ ॥ ऋतुस्नाताः स्फुरद्योन्यः सदानंदारुणेक्षणाः ॥ इत्येषा कुरुकुल्लांते प्रोक्ता चंद्रावली
स्वयम् ॥ २३२ ॥ वाराहीमभिधास्यामि ललितायाः परा तनुः ॥ शुचिः स्वेनाथ शून्यं स्यान्नभसाग्ररसस्थिरा ॥ २३३ ॥ अंबु पश्चाद्दयः साग्नि
र्मरुतांबुरयौ तथा ॥ इलायुतोऽग्निरेतानि पुनरंबुमरुद्युतम् ॥२३४॥ दाहांबुमरुताहंसस्त्वग्निनैतत्त्रयं पुनः ॥अम्बुदाहौ मरुद्युक्तौ हंसोऽथ धरया नभः
॥ २३५ ॥ तेजोग्निना पुनः पंच वातः स्वेन समायुतः॥तोयं चरेण तत्पूर्वं तोयमग्नियुतं ततः ॥२३६ ॥शून्यं व्याप्तेन शुचिना शून्यं शक्त्या नभो
युतम् ॥ दाहो धरा स्वसहितस्तोयं चरसमन्वितम् ॥ २३७ ॥ एतत्पूर्वमधुः प्रोक्तं चतुष्टयमतः परम्॥ ज्याख्येन युक्ता सचरो रसश्चैतस्य पूर्वकम् ॥
॥२३८॥रसोऽग्निना पुनः प्रोक्तं चतुष्का अपयं ततः॥शुभोभ्रता चरेणापि हंसः स्वेन सपूर्वकम्॥२३९॥हंसोऽग्निना प्राक् त्रितयं हृदयं स्वसमायुतम्॥
रसश्चरेण तत्पूर्वमग्निना च रसो युतः॥२४०॥पश्चादुक्तस्त्रयं वातो धरया च नभोन्वितम्॥प्राणः स्वेन युतः पश्चाद्धृदयस्वयुतं रसः॥२४१॥व्याप्तमेतत्त्रयं
पश्चाद्दाहेनांबु समन्वितम् ॥ गोत्राभरायुता स्पर्शो नादयुक्तो जवीयुतः ॥ २४२ ॥ दाहेन पूर्वपूर्वं च पूर्वं च मरुता युतम् ॥ शून्यं मरुत्स्वसहितं
हृद्दाहेनांबुना चरः ॥ २४३ ॥ स्पर्शो मरुत्स्वसहितो हृद्दाहेनांबुसंयुतम् ॥ज्याभिः स्वसंयुतो हंसस्तथांबु मरुता सह ॥ २४४ ॥ हृद्रूपेण स्वेन युतं
रसश्च स्वेन संयुतः॥ प्राणदाहौ धरायुक्तौ पुनस्तौ वह्निना वियत् ॥ २४५ ॥ वाह्नींहयुक्तमंबु स्यादिषष्ट्यासस्वसंयुतम् ॥ पूर्वद्विरुक्तवर्णौ च शुद्धिः
स्वेन युतस्तथा ॥ २४६ ॥ स्थिरा रसा वतस्वेन दावौ हंसौ धरा स्वयुक् ॥ युतिर्नादवती पश्चाद्धृदंबुमरुता युतम् ॥२४७ ॥हंसश्च मरुता वियः
दशोत्तरशताक्षरी ॥ वाराही पंचमी विश्वविजया भद्रकौमुदी॥२४८॥वार्तालीति च विख्याता स्तंभनाद्यखिलेष्टदा॥ अंगानि कुर्यान्मंत्रार्णैः सप्तभि
षड्भिरेव च॥२४९॥दशभिः सप्तभिः सप्तसंख्यैर्जातिभिरर्दिताः॥त्रिकोणवृत्तषट्कोणवृत्तद्वयसमन्वितम् ॥२५०॥ विधाय चक्रं तत्रैव स्वनामालिख्य
पूजयेत् ॥ ध्यायेच्च देवीं कीलास्यां ततः कांचनसन्निभाम् ॥ २५१ ॥ आकंठं वनितारूपां ज्वलत्पिंगसरोरुहाम् ॥ त्रिनेत्रामष्टहस्तां च चक्रं शंख
मथांकुशम्॥ २५२ ॥ पाशं च मुशलं शीर्षमभयं वरदं तथा॥ दधाना गरुडस्कन्धे सुखासीनां विचिंतयेत् ॥ २५३ ॥ नित्यपूजासु तच्छक्तीस्तत्स
मानाः स्मरेन्मुने ॥ प्रयोगेषु स्मरेद्देवीं सिंहस्थां व्याघ्रगामपि ॥२५४॥गजारूढां हयारूढां तार्क्ष्यारूढां च शक्तिभिः ॥ श्यामामप्यरुणां पीतामसि
तांभोजविग्रहाम् ॥ २५५ ॥तत्तत्प्रयोगेषु तथा ध्यायेत्तत्तदवाप्तये ॥अरुणां पंचमीं वश्ये पीतां स्तंभनके स्मरेत्॥२५६॥श्यामां च दुर्गमे मार्गे सितां
युद्धेऽरिनष्टये॥धूम्रामुच्चाटने ध्यायेत्साधको द्विजसत्तमः॥२५७॥एताः षोडश नित्यास्ते संक्षेपात्समुदीरिताः॥ भजतामिष्टदाः सद्यः सर्वपापक्षयंकराः

॥२५८॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे राधादिमन्त्रनिरूपणं नामाष्टाशीतितमोऽध्यायः॥८८॥सनत्कुमार उवाच॥अथा
सामावृतिस्थानां शक्तीनां समयेन च ॥ नाम्नां सहस्रं वक्ष्यामि गुरुध्यानपुरःसरम् ॥१॥ नाथा नव प्रकाशाद्याः सुभगांताः प्रकीर्तिताः ॥ भूम्यादीनि
शिवांतानि विद्धि तत्त्वानि नारद॥२॥गुरुजन्मादिपर्वाणि दर्शान्तानि च सप्त वै॥एतानि श्राङ्मनोवृत्त्या चिंतयेत्साधकोत्तमः॥३॥गुरुस्तोत्रं जपेच्चापि
तद्गतेनांतरात्मना ॥ नमस्ते नाथ भगवञ्शिवाय गुरुरूपिणे ॥ ४ ॥ विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह ॥ नवाय नवरूपाय परमार्थैकरूपिणे
॥ ५ ॥ सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते ॥ स्वतंत्राय दयाक्लृप्तविग्रहाय शिवात्मने॥ ६ ॥ परतंत्राय भक्तानां भव्यानां भव्यरूपिणे॥ विवेकिनां
विवेकाय विमर्शाय विमर्शिनाम् ॥ ७ ॥ प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ॥ पुरस्तात्पार्श्वयोः पृष्ठे नमः कुर्यामुपर्यधः ॥ ८ ॥ सदा
मच्चित्तसदने विधेहि भवदासनम् ॥ इति स्तुत्वा गुरुं भक्त्या परां देवीं विचिंतयेत् ॥ ९ ॥ गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम् ॥ देवीं मंत्रमयीं
नौमि मातृकापीठरूपिणीम् ॥ १० ॥ प्रणमामि महादेवीं मातृकां परमेश्वरीम् ॥ कालहृल्लोहलोल्लोहकलानाशनकारिणीम् ॥ ११॥ यदक्षरै
कमात्रेऽपि संसिद्धे स्पर्द्धते नरः ॥ रवितार्क्ष्येंदुकन्दर्पैः शंकरानलविष्णुभिः ॥ १२ ॥ यदक्षरशशिज्योत्स्नामंडितं भुवनत्रयम् ॥ वन्दे सर्वेश्वरीं देवीं
महाश्रीसिद्धमातृकाम् ॥ १३ ॥ यदक्षरमहासूत्रप्रोतमेतज्जगत्त्रयम् ॥ ब्रह्मांडादिकटाहांतं तां वन्दे सिद्धमातृकाम् ॥ १४ ॥ यदेकादशमाधारं
बीजं कोणत्रयोद्भवम् ॥ ब्रह्मांडादिकटाहांतं जगदद्यापि दृश्यते ॥ १५ ॥ अकचादिटतोन्नद्धपयशाक्षरवर्गिणीम् ॥ ज्येष्ठांगबाहुहृत्कंठकटिपाद
निवासिनीम् ॥ १६ ॥ नौमीकाराक्षरोद्धारां सारात्सारां परात्पराम् ॥ प्रणमामि महादेवीं परमानंदरूपिणीम् ॥ १७ ॥ अथापि यस्या जानंति
न मनागपि देवताः ॥ केयं कस्मात्क्व केनेति सरूपारूपभावनाम् ॥१८॥ वंदे तामहमक्षय्यां क्षकाराक्षररूपिणीम् ॥ देवीं कुलकलोल्लोलप्रोल्लसन्तीं
शिवां पराम् ॥ १९ ॥ वर्गानुक्रमयोगेन यस्याख्योमाष्टकं स्थितम् ॥ वन्दे तामष्टवर्गोत्थमहासिद्ध्यादिकेश्वरीम् ॥ २० ॥ कामपूर्णजकाराख्य
सुपीठांतर्न्निवासिनीम् ॥ चतुराज्ञाकोशभूतां नौमि श्रीत्रिपुरामहम् ॥ २१ ॥ एतत्स्तोत्रं तु नित्यानां यः पठेत्सुसमाहितः ॥ पूजादौ तस्य सर्वास्ता
वरदाः स्युर्न संशयः ॥ २२ ॥ अथ ते कवचं देव्या वक्ष्ये नवरतात्मकम् ॥ येन देवासुरनरजयी स्यात्साधकः सदा ॥ २३ ॥ सर्वतः सर्वदा
त्मानं ललिता पातु सर्वगा ॥ कामेशी पुरतः पातु भगमाली त्वनंतरम् ॥ २४ ॥ दिशं पातु तथा दक्षपार्श्वं मे पातु सर्वदा ॥ नित्यक्लिन्नाथ भेरुण्डा
दिशं मे पातु कौणपीम् ॥ २५ ॥ तथैव पश्चिमं भागं रक्षताद्वह्निवासिनी ॥ महावज्रेश्वरी नित्या वायव्ये मां सदावतु ॥ २६ ॥वामपार्श्वं सदा पातु

इतीमेलरिता ततः ॥ माहेश्वरी दिशं पातु त्वरितं सिद्धिदायिनी ॥ २७ ॥ पातु मामूर्ध्वतः शश्वद्देवताकुलसुंदरी ॥ अधो नीलपताकाख्या विजया
सर्वतश्च माम् ॥ २८ ॥ करोतु मे मंगलानि सर्वदा सर्वमंगला ॥ देहेंद्रियमनःप्राणाञ्ज्वालामालिनिविग्रहा ॥ २९ ॥ पालयत्वनिशं चित्ता चित्तं
मे सर्वदावतु ॥ कामात्क्रोधात्तथा लोभान्मोहान्मानान्मदादपि ॥ ३० ॥ पापान्मां सर्वतः शोकात्संक्षयात्सर्वतः सदा ॥ असत्यात्क्रूरचिंतातो
हिंसातश्चौरतस्तथा ॥ स्तैमित्याच्च सदा पांतु प्रेरयंत्यः शुभं प्रति ॥ ३१॥ नित्याः षोडश मां पांतु गजारूढाः स्वशक्तिभिः ॥ तथा हयसमारूढाः
पांतु मां सर्वतः सदा ॥३२॥ सिंहारूढास्तथा पांतु पांतु ऋक्षगता अपि ॥ रथारूढाश्च मां पांतु सर्वतः सर्वदा रणे ॥ ३३ ॥ तार्क्ष्यारूढाश्च मां पांतु
तथा व्योमगताश्च ताः ॥ भूतगाः सर्वगाः पांतु पांतु देव्यश्च सर्वदा ॥ ३४ ॥ भूतप्रेतपिशाचाश्च परकृत्यादिकान् गदान् ॥ द्रावयंतु स्वशक्तीनां
भूषणैरायुधैर्मम ॥ ३५ ॥ गजाश्वद्वीपिपंचास्यतार्क्ष्यारूढाखिलायुधाः ॥ असंख्याः शक्तयो देव्यः पांतु मां सर्वतः सदा ॥ ३६ ॥ सायं
प्रातर्जपन्नित्याकवचं सर्वरक्षकम् ॥ कदाचिन्नाशुभं पश्येत्सर्वदानंदमास्थितः ॥ ३७ ॥ इत्येतत्कवचं प्रोक्तं ललितायाः शुभावहम् ॥
यस्य संधारणान्मर्त्यो निर्भयो विजयी सुखी ॥ ३८ ॥ अथ नाम्नां सहस्रं ते वक्ष्ये सावरणार्चनम् ॥ षोडशानामपि मुने स्वस्वक्रमगतात्मकम् ॥
॥ ३९ ॥ ललिता चापि वा कामेश्वरी च भगमालिनी ॥ नित्यक्लिन्ना च भेरुंडा कीर्तिता वह्निवासिनी ॥ ४० ॥ वज्रेश्वरी तथा दूती त्वरिता
कुलसुंदरी ॥ नित्या संवित्तथा नीलपताका विजयाह्वया ॥ ४१ ॥ सर्वमंगलिका चापि ज्वालामालिनिसंज्ञिता ॥ चित्रा चेति क्रमान्नित्याः षोड
शापीष्टविग्रहाः ॥ ४२ ॥ कुरुकुल्ला च वाराही द्वे एते चेष्टविग्रहे ॥ वशिनी चापि कामेशी मोहिनी विमलारुणा ॥ ४३ ॥ तपिनी च तथा सर्वेश्वरी
चाप्यथ कौलिनी ॥ मुद्राणंतनुरिष्वर्णरूपा चापार्णविग्रहा ॥ ४४ ॥पाशवर्णशरीरा चाकुर्वर्णसुवपुर्द्धरा ॥ त्रिखंडा स्थापनी सन्निरोधनी चावगुंठनी
॥ ४५ ॥ सन्निधानेषु चापाख्या तथा पाशांकुशाभिधा ॥ नमस्कृतिस्तथा संक्षोभणी विद्रावणी तथा ॥ ४६ ॥ आकर्षणी च विख्याता तथैवावे
शकारिणी ॥ उन्मादिनी महापूर्वा कुशाथो खेचरी मता ॥ ४७ ॥ बीजा शक्त्युत्थापना च स्थूलसूक्ष्मपराभिधा ॥ अणिमा लघिमा चैव
महिमा गरिमा तथा ॥४८॥ प्राप्तिः प्रकामिता चापि चेशिता वशिता तथा॥भुक्तिः सिद्धिस्तथैवेच्छा सिद्धिरूपा च कीर्तिता ॥४९॥ ब्राह्मी माहेश्वरी
चैव कौमारी वैष्णवी तथा ॥ वाराहींद्राणी चामुंडा महालक्ष्मीस्वरूपिणी ॥ ५० ॥ कामा बुद्धिरहंकारशब्दस्पर्शस्वरूपिणी ॥रूपरूपा रसाह्वा
च गंधवित्तधृतिस्तथा ॥ ५१ ॥ नाभबीजामृताख्या च स्मृतिदेहात्मरूपिणी ॥ कुसुमा मेखला चापि मदना मदनातुरा ॥ ५२ ॥ रेखा संवे

गिनी चैव ह्यंकुशा मालिनीति च॥संक्षोभिणी तथा विद्राविण्याकर्षणरूपिणी ॥५३॥आह्लादिनीति च प्रोक्ता तथा समोहिनीति च॥स्तंभिनी जंभिनी चैव वशंकर्यथ रंजिनी॥५४॥उन्मादिनी तथैवार्थसाधिनीति प्रकीर्तिता ॥ संपत्तिपूर्णा सा मंत्रमयी द्वंद्वक्षयंकरी ॥५५॥सिद्धिः संपत्प्रदा चैव प्रियमंगलकारिणी॥कामप्रदा निगदिता तथा दुःखविमोचिनी॥५६॥मृत्युप्रशमनी चैव तथा विघ्ननिवारिणी॥अंगसुंदरिका चैव तथा सौभाग्यदायिनी ॥ ५७ ॥ ज्ञानैश्वर्यप्रदा ज्ञानमयी चैव च पंचमी ॥ विंध्यवासनका घोरस्वरूपा पापहारिणी ॥ ५८ ॥ तथानंदमयी रक्षा रूपेप्सितफलप्रदा ॥ जयिनी विमला चाथ कामेशी वज्रिणी भगा ॥ ५९ ॥ त्रैलोक्यमोहना स्थाना सर्वाशापरिपूरणी॥सर्वसक्षोभणगता सौभाग्यप्रदसंस्थिता ॥ ६० ॥ सर्वार्थसाधकागारा सर्वरोगहरास्थिता ॥ सर्वरक्षाकरास्थाना सर्वसिद्धिप्रदस्थिता ॥ ६१ ॥ सर्वानंदमयाधारबिंदुस्थानशिवात्मिका ॥ प्रकृष्टा च तथा गुप्ता ज्ञेया गुप्ततरापि च ॥ ६२ ॥ संप्रदायस्वरूपा च कुलकौलनिगर्भगा ॥ रहस्यापरापरप्राकृत्तथैवातिरहस्यका ॥ ६३ ॥ त्रिपुरा त्रिपुरेशी च तथैव पुरवासिनी ॥ श्रीमालिनी च सिद्धान्ता महात्रिपुरसुंदरी ॥ ६४ ॥ नवरत्नमयद्वीपनवखंडविराजिता ॥ कल्पकोद्यानसंस्था च ऋतुरूपेंद्रियार्चका ॥ ६५ ॥ कालमुद्रा मातृकाख्या रत्नदेशोपदेशिका ॥ तत्त्वाग्रहाभिधा मूर्तिस्तथैव विषयद्विपा ॥ ६६ ॥ देशकालाकारशब्दरूपा संगीतयोगिनी ॥ समस्तगुप्तप्रकटसिद्धयोगिनिचक्रयुक् ॥ ६७ ॥ वह्निसूर्येन्दुभूताह्वा तथात्माष्टाक्षराह्वया ॥ पंचधार्चास्वरूपा च नानाव्रतसमाह्वया ॥ ॥ ६८ ॥ निषिद्धाचाररहिता सिद्धचिह्नस्वरूपिणी ॥ चतुर्द्धा कूर्मभागस्था नित्याद्यर्चास्वरूपिणी ॥ ६९ ॥ दमनादिसमभ्यर्चा षट्कर्मसिद्धिदायिनी ॥ तिथिवारपृथग्द्रव्यसमर्चनशुभावहा ॥ ७० ॥ वायोश्यनंगकुसुमा तथैवानंगमेखला ॥ अनंगमदनानंगमदनातुरसाह्वया ॥ ७१ ॥ मददेगिनिका चैव तथा भुवनपालिनी ॥ शशिलेखा समुद्दिष्टा गतिलेखाह्वया मता ॥ ७२ ॥ श्रद्धा प्रीती रतिश्चैव धृतिः कांतिर्मनोरमा ॥ मनोहरा समाख्याता तथैव हि मनोरथा ॥ ७३ ॥ मदनोन्मादिनी चैव मोदिनी शंखिनी तथा ॥ शोषिणी चैव शंकारी सिंजिनी सुभगा तथा ॥७४॥ पूषाचेद्वासुमनसा रतिः प्रीतिर्धृतिस्तथा ॥ ऋद्धिः सौम्या मरीचिश्च तथैव ह्यंशुमालिनी ॥ ७५ ॥ शशिनी चांगिरा छाया तथा संपूर्णमंडला ॥ तुष्टिस्तथामृताख्या च डाकिनी साथ लोकपा ॥ ७६ ॥ बटुकेभास्वरूपा च दुर्गा क्षेत्रेशरूपिणी ॥ कामराजस्वरूपा च तथा मन्मथरूपिणी ॥ ॥ ७७ ॥ कंदर्प्परूपिणी चैव तथा मकरकेतना ॥ मनोभवस्वरूपा च भारती वर्णरूपिणी ॥ ७८ ॥ मदना मोहिनी लीला जंभिनी चोद्यमा शुभा ॥ ह्लादिनी द्राविणी प्रीती रती रक्ता मनोरमा ॥७९॥ सर्वोन्मादा सर्वमुखा ह्यभंगा चामितोद्यमा ॥ अनल्पाव्यक्तविभवा विविधाक्षोभविग्रहा ॥८०॥

रागशक्तिर्द्वेषशक्तिस्तथा शब्दादिरूपिणी ॥ नित्या निरंजना क्लिन्ना क्लेदिनी मदनातुरा ॥ ८१ ॥ मदद्रवा द्राविणी च द्रविणी चेति कीर्तिता ॥ मदा
विला मंगला च मन्मथानी मनस्विनी ॥८२ ॥ मोहा मोदा मानमयी माया मंदा मितावती ॥ विजया विमला चैव शुभा विश्वा तथैव च ॥ ८३ ॥
विभूतिर्विनता चैव विविधा विनता क्रमात् ॥ कमला कामिनी चैव किराता कीर्तिरूपिणी॥८४॥कुट्टिनी च समुद्दिष्टा तथैव कुलसुंदरी ॥ कल्याणी
कालकोला च डाकिनी शाकिनी तथा ॥ ८५ ॥ लाकिनी काकिनी चैव राकिनी काकिनी तथा ॥ इच्छाज्ञाना क्रियाख्या चाप्यायुधाष्टक
धारिणी ॥ ८६ ॥ कपर्दिनी समुद्दिष्टा तथैव कुलसुंदरी ॥ ज्वालिनी विस्फुलिंगा च मंगला सुमनोहरा ॥ ८७ ॥ कनका किनवा विद्या विविधा
च प्रकीर्तिता ॥ मेषा वृषाह्वया चैव मिथुना कर्कटा तथा ॥८८॥ सिंहा कन्या तुला कीटा चापा च मकरा तथा ॥ कुम्भा मीना च सारा च सर्व
भक्षा तथैव च ॥ ८९ ॥ विश्वात्मा विविधोद्भूतचित्ररूपा च कीर्तिता ॥ निःसपत्ना निरातंका याचनाचिंत्यवैभवा ॥ ९० ॥ रक्ता चैव ततः प्रोक्ता
विद्याप्राप्तिस्वरूपिणी ॥ हृल्लेखा क्लेदिनी क्लिन्ना क्षोभिणी मदनातुरा ॥९१॥ निरंजना रागवती तथैव मदनावती ॥ मेखला द्राविणी वेगवती चैव
प्रकीर्तिता ॥९२॥ कमला कामिनी कल्पा कला च कलिताद्भुता ॥ किराता च तथा काला कदना कौशिका तथा ॥९३॥ कंबुवादनिका चैव कातरा
कपटा तथा ॥ कीर्तिश्चापि कुमारी च कुंकुमा परिकीर्तिता ॥ ९४ ॥ भञ्जिनी वेगिनी नागा चपला पेशला सती ॥ रतिः श्रद्धा भोगलोला मदोन्मत्ता मन
स्विनी ॥९५॥ विह्वला कर्षिणी लोला तथा मदनमालिनी ॥ विनोदा कौतुका पुण्या पुराणा परिकीर्तिता ॥ ९६ ॥ वागीशी वरदा विश्वा विभवा
विघ्नकारिणी ॥ बीजविघ्नहरा विद्या सुमुखी सुंदरी तथा ॥ ९७ ॥ सारा च सुमना चैव तथा प्रोक्ता सरस्वती ॥ समया सर्वगा विद्धा शिवा वाणी
च कीर्तिता ॥ ९८ ॥ दूरसिद्धा तथा प्रोक्ताथो विग्रहवती मता ॥ नादा मनोन्मनी प्राणप्रतिष्ठारुणवैभवा ॥ ९९ ॥ प्राणापाना समाना च व्यानो
दाना च कीर्तिता ॥नागा कूर्मा च कृकला देवदत्ता धनञ्जया ॥ १०० ॥ फट्कारी किंकराराध्या जया च विजया तथा ॥ हुंकारी खेचरी चंड.
छेदिनी क्षपिणी तथा ॥ १०१ ॥ स्त्रींहुंकारी क्षेमकारी चतुरक्षररूपिणी ॥ श्रीविद्यामतवर्णांगी काली याम्या नृपार्णका ॥ १०२ ॥ भाषा सरस्वती
वाणी संस्कृता प्राकृता परा ॥ बहुरूपा चित्तरूपा रम्यानंदा च कौतुका ॥ १०३ ॥ त्रयाख्या परमात्माख्याप्यमेयविभवा तथा ॥ वाक्स्वरूपा
बिंदुसर्गरूपा विश्वात्मिका तथा ॥ १०४ ॥तथा त्रैपुरकंदाख्या ज्ञात्रादित्रिविधात्मिका ॥ आयुर्लक्ष्मीकीर्तिभोगसौंदर्यारोग्यदायिका ॥ १०५ ॥
ऐहिकामुष्मिकज्ञानमयी च परिकीर्तिता ॥ जीवाख्या विजयाख्या च तथैव विश्वविन्मयी॥१०६॥हृदादिविद्या रूपादिभानुरूपा जगद्वपुः ॥ विश्वमो

दनिका चैव त्रिपुरामृतसंज्ञिका ॥ १०७ ॥ सर्वाण्यायनरूपा च मोहिनी क्षोभणी तथा ॥ क्लेदिनी च समाख्याता तथैव च महोदया ॥ १०८ ॥ संप
त्करी हलक्षार्णा सीमामातृतनू रतिः॥ प्रीतिर्मनोभवा वापि प्रोक्ता वाराधिपा तथा ॥१०९॥ त्रिकूटा चापि षट्कूटा पंचकूटा विशुद्धगा ॥ अनाहत
गता चैव मणिपूरकसंस्थिता ॥११० ॥ स्वाधिष्ठानसमासीनाधारस्थाज्ञासमास्थिता ॥ षट्त्रिंशत्कूटरूपा च पंचाशन्मिथुनात्मिका ॥ १११ ॥
पादुकादिकसिद्धीशा तथा विजयदायिनी ॥ कामरूपप्रदा वेतालरूपा च पिशाचिका ॥ ११२ ॥ विचित्रा विभ्रमा हंसी भीषणी जनरंजिका॥
विशाला मदना तुष्टा कालकंठी महाभया ॥ ११३ ॥ माहेंद्री शंखिनी चैंद्री मंगला वटवासिनी ॥ मेखला सकला लक्ष्मीर्मालिनी
विश्वनायिका ॥ ११४ ॥ सुलोचना सुशोभा च कामदा च विलासिनी ॥ कामेश्वरी नंदिनी च स्वर्णरेखा मनोहरा ॥ ११५ ॥ प्रमोदा रागिणी
सिद्धा पद्मिनी च रतिप्रिया ॥ कल्याणदा कलादक्षा ततश्च सुरसुन्दरी ॥ ११६ ॥ विभ्रमा वाहका वीरा विकला कोरका कविः ॥ सिंहनादा महा
नादा सुग्रीवा मर्कटा शठा ॥ ११७ ॥ बिडालाक्षा बिडालास्या कुमारी खेचरी भवा ॥ मयूरा मंगला भीमा द्विपवक्त्रा खरानना ॥ ११८ ॥
मातंगी च निशाचारा वृषग्राहा वृकानना ॥सैरिभास्या गजमुखा पशुवक्त्रा मृगानना ॥ ११९ ॥ क्षोभका मणिभद्रा च क्रीडका सिंहचक्रका ॥
महोदरा स्थूलशिखा विकृतास्या वरानना ॥ १२०॥ चपला कुक्कुटास्या च पाविनी मदनालसा॥मनोहरा दीर्घजंघा स्थूलदन्ता दशानना॥१२१॥
सुमुखा पंडिता क्रुद्धा वराहास्या सटामुखा ॥ कपटा कौतुका काला किंकरा कितवा खला ॥१२२॥ भक्षका भयदा सिद्धा सर्वगा च प्रकीर्तिता॥
जया च विजया दुर्गा भद्रा भद्रकरी तथा ॥ १२३ ॥ अम्बिका वामदेवी च महामायास्वरूपिणी ॥ विदारिका विश्वमयी विश्वा विश्वविभं
जिता ॥ १२४ ॥ वीरा विक्षोभिणी विद्या विनोदा बीजविग्रहा ॥ वीतशोका विषग्रीवा विपुला विजयप्रदा॥१२५॥ विभवा विविधा विप्रा तथैव
परिकीर्तिता ॥ मनोहरा मंगला च मदोत्सिक्ता मनस्विनी ॥ १२६ ॥ मानिनी मधुरा माया मोहिनी च तथा स्मृता ॥ भद्रा भवानी भव्या च
विशालाक्षी शुचिस्मिता ॥ १२७ ॥ ककुभा कमला कल्पा कलाथो पूरणी तथा ॥ नित्या चाप्यमृता चैव जीविता च तथा दया ॥ १२८ ॥
अशोका ह्यमला पूर्णा पूर्णा भाग्योद्यता तथा ॥ विवेका विभवा विश्वा वितता च प्रकीर्तिता ॥ १२९ ॥ कामिनी खेचरी गर्वा पुराणा
परमेश्वरी ॥ गौरी शिवा ह्यमेया च विमला विजया परा ॥१३०॥ पवित्रा पद्मिनी विद्या विश्वेशी शिववल्लभा॥ अशेषरूपा ह्यानंदांबुजाक्षी चाप्य
निंदिता ॥१३१॥ वरदा वाक्यदा वाणी विविधा वेदविग्रहा ॥ विद्या वागीश्वरी सत्या संयता च सरस्वती ॥ १३२ ॥निर्मलानन्दरूपा च ह्यमृता

मानदा तथा ॥ पूषा चैव तथा पुष्टिस्तुष्टिश्चापि रतिर्धृतिः ॥ १३३ ॥ शशिनी चंद्रिका कांतिर्ज्योत्स्ना श्रीः प्रीतिरंगदा॥ पूर्णा पूर्णामृता कामदायिनीन्दुकलात्मिका॥१३४ ॥तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः ॥ सुषुम्णा भोगदा विश्वा बाधिनी धारिणी क्षमा॥१३५ ॥धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिंगिनी ॥ सुश्रीः स्वरूपा कपिला हव्यकव्यवहा तथा ॥ १३६ ॥ घस्मरा विश्वकवला लोलाक्षी लोलजिह्विका ॥ सर्वभक्षा सहस्राक्षी निःसंगा च गतिप्रिया ॥ १३७ ॥ अचिंत्याचाप्रमेया च पूर्णरूपा दुरासदा॥ सर्वा संसिद्धिरूपा च पावनीत्येकरूपिणी ॥ १३८ ॥ तथा यामलवेधाख्या शाक्ते वेदस्वरूपिणी ॥ तथा शांभववेधा च भावनासिद्धिसूचिनी ॥१३९॥ वह्निरूपा तथा दस्रा ह्यमा विघ्ना भुजंगमा ॥ षण्मुखा रविरूपा च माता दुर्गा दिशा तथा ॥१४०॥ धनदा केशवा चापि यमी चैव हरा शशा ॥ अश्विनी च यमी वह्निरूपा धात्रीति कीर्तिता ॥ १४१ ॥ चंद्रा शिवादितिर्जीवा सर्पिणी पितृरूपिणी ॥ अर्यम्णा च भगा सूर्या त्वाष्ट्रिमारुतिसंज्ञिका ॥ १४२ ॥ इंद्राग्निरूपा मित्रा चापींद्राणी निर्ऋतिर्जला ॥ वैश्वदेवी हरितभूर्वासवी वरुणा जया ॥ १४३ ॥ अहिर्बुध्न्या पूषणी च तथा कारस्करामला ॥ उदुंबरा जंबुका च खदिरा कृष्णरूपिणी ॥ १४४ ॥ वंशा च पिप्पला नागा रोहिणा च पलाशका ॥ पक्षका च तथाम्बष्ठा बिल्वा चार्जुनरूपिणी ॥१४५ ॥ विकंकता च ककुभा सरला चापि सर्जिका ॥ वंजुला पनसार्का च शमी हलिप्रियाम्रका ॥ १४६ ॥ निम्बा मधूकसंज्ञा चाप्यश्वत्था च गजाह्वया ॥ नागिनी सार्पिणी चैव शुनी चापि बिडालिकी ॥ १४७ ॥ छागी मार्जारिका मूषी वृषभा माहिषी तथा ॥ शार्दूली सैरिभी व्याघ्री हरिणी च मृगी शुनी ॥१४८॥ कपिरूपा च गोघंटा वानरी च नराश्विनी॥नगा गौर्हस्तिनी चेति तथा षट्चक्रवासिनी॥ ॥ १४९ ॥ त्रिखंडा तीरपालाख्या भ्रामणी द्रविणी तथा ॥ सोमा सूर्या तिथिर्वारा योगार्क्षा करणात्मिका॥१५० ॥ यक्षिणी तारणा व्योमशब्दाद्या प्राणिनी च धीः ॥ क्रोधिनी स्तंभिनी चंडोच्चंडा ब्राह्म्यादिरूपिणी ॥ १५१ ॥ सिंहस्था व्याघ्रगा चैव गजाश्वगरुडस्थिता॥ भौमाप्या तैजसी वायुरूपिणी नाभसा तथा॥ १५२ ॥एकवक्त्रा चतुर्वक्त्रा नववक्त्रा कलानना ॥ पंचविंशतिवक्त्रा च षड्विंशद्वदना तथा ॥ १५३ ॥ ऊनपंचाशदास्या च चतुःषष्टि मुखा तथा ॥ एकाशीतिमुखा चैव शताननसमन्विता ॥ १५४ ॥ स्थूलरूपा सूक्ष्मरूपा तेजोविग्रहधारिणी ॥ वृणावृत्तिस्वरूपा च नाथावृत्तिस्वरूपिणी ॥ १५५ ॥ तत्त्वावृत्तिस्वरूपापि नित्यावृत्तिवपुर्द्धरा ॥ १५६ ॥ अंगावृत्तिस्वरूपा चाप्यायुधावृत्तिरूपिणी ॥ गुरुपंक्तिस्वरूपा च विद्यावृत्तितनुस्तथा ॥ १५७ ॥ ब्रह्माद्यावृत्तिरूपा च परा पश्यंतिका तथा ॥ मध्यमा वैखरी शीर्षकण्ठताल्वोष्ठदन्तगा॥ १५८॥

जिह्वामूलगता नासागतोरःस्थलगामिनी ॥ पदवाक्यस्वरूपा च वेदभाषास्वरूपिणी ॥ १५९ ॥ सेकाख्या वीक्षणाख्या चोपदेशाख्या
तथैव च ॥ व्याकुलाक्षरसंकेता गायत्री प्रणवादिका ॥ १६० ॥ जपहोमार्चनध्यानयंत्रतर्पणरूपिणी ॥ सिद्धसारस्वता मृत्युंजया च त्रिपुरा
तथा ॥ १६१ ॥ गारुडा चान्नपूर्णा चाप्यश्वारूढा नवात्मिका ॥ गौरी च देवी हृदया लक्षदा च मतंगिनी ॥ १६२ ॥ निष्कत्रयपदा चेष्टा
वादिनी च प्रकीर्तिता ॥राजलक्ष्मीर्महालक्ष्मीः सिद्धलक्ष्मीर्गवानना॥ १६३ ॥ इत्येवं ललितादेव्या दिव्यं नामसहस्रकम् ॥ सर्वार्थसिद्धिदं प्रोक्तं
चतुर्वर्गफलप्रदम् ॥ १६४ ॥ एतन्नित्यमुषःकाले यो जपेच्छुद्धमानसः ॥ स योगी ब्रह्मविज्ञानी शिवयोगी तथात्मवित् ॥ १६५ ॥ द्विरावृत्त्या
प्रजपतो ह्यायुरारोग्यसंपदः ॥ लोकानुरंजनं नारीनृपावर्जनकर्म च ॥ १६६ ॥ अपृथक्त्वेन सिद्ध्यंति साधकस्यास्य निश्चितम् ॥ त्रिरावृत्त्यास्य
वै पुंसो विश्वं भूयाद्वशेऽखिलम् ॥ १६७ ॥ चतुरावृत्तितश्चास्य समीहितमनारतम् ॥ फलत्येव प्रयोगार्हो लोकरक्षाकरो भवेत् ॥ १६८ ॥
पंचावृत्त्या नरा नार्यो नृपा देवाश्च जंतवः ॥ भजंत्येनं साधकं च देव्यामाहितचेतसः ॥१६९॥ षडावृत्त्या तन्मयः स्यात्साधकश्चास्य सिद्धयः॥
अचिरेणैव देवीनां प्रसादात्संभवंति च ॥ १७० ॥ सप्तावृत्त्यारिरोगादिकृत्यापस्मारनाशनम् ॥ अष्टावृत्त्या नरो भूपान्निग्रहानुग्रहक्षमः ॥ १७१ ॥
नवावृत्त्या मन्मथाभो विक्षोभयति भूतलम् ॥ दशावृत्त्या पठेन्नित्यं वाग्लक्ष्मीकांतिसिद्धये ॥ १७२ ॥ रुद्रावृत्त्याखिलर्द्धिश्च तदायत्तं जगद्भवेत् ॥
अर्कावृत्त्या सिद्धिभिः स्याद्दिग्भिर्मर्त्यो हरोपमः ॥१७३॥ विश्वावृत्त्या तु विजयी सर्वतः स्यात्सुखी नरः ॥ शक्रावृत्त्याखिलेष्टाप्तिः सर्वतो मंगलं
भवेत् ॥ १७४ ॥ तिथ्यावृत्त्याखिलानिष्टानयत्नादाप्नुयान्नरः ॥ षोडशावृत्तितो भूयान्नरः साक्षान्महेश्वरः ॥ १७५ ॥ विश्वं स्रष्टुं पालयितुं संहर्तु
च क्षमो भवेत्॥मंडलं मासमात्रं वा यो जपेद्यद्यदाशयः ॥ १७६ ॥ तत्तदेवाप्नुयात्सत्यं शिवस्य वचनं यथा ॥ इत्येतत्कथितं विप्र नित्यावृत्त्यर्चनाश्रितम्
॥ १७७॥ नाम्नां सहस्रं मनसोऽभीष्टसंपादनक्षमम् ॥ १७८ ॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे ललितास्तोत्रकवचसहस्रनामकथनं नामैकोननवतितमोऽध्यायः ॥ ८९ ॥ सनत्कुमार उवाच ॥ अथातो विप्र नित्यानां प्रयोगादिसमन्वितम् ॥ पटलं तेऽभिधास्यामि नित्याभ्यर्चनदीपकम् ॥१॥ ललितायास्त्रिभिर्वर्णैः सकलार्थोऽभिधीयते ॥ शेषेण देवीरूपेण तेन स्यादिदमीरितम्॥२॥अशेषतो जगत्कृत्स्नं
हृल्लेखात्मकमुच्यते॥तस्याश्चार्थस्तु कथितः सर्वतंत्रेषु गोपितः ॥३॥व्योम्ना प्रकाशमानत्वं ग्रसमानत्वमग्निना ॥ तयोर्विमर्श ईकारो बिंदुना तन्निफालनम्॥४॥
पिंडकर्तरि बीजाख्या मन्त्रा मालाभिधाः क्रमात्॥एकार्णवन्तो द्व्यर्णाश्च त्रिदिङ्मुखमुखार्णकाः॥५॥वृत्तिजार्णाह्निखेदंकैर्व्यत्यस्तक्रमयोगतः॥

तैर्भेदयोजनं कुर्यात्संदर्भाणामशेषतः ॥ ६ ॥ देव्यात्मकं समुदयं विश्रांतिं च शिवात्मकम् ॥ उभयात्मकमण्यात्मस्वरूपं तैश्च भावयेत् ॥ ७ ॥ काले
नान्यच्च दुःखार्त्तिवासनानाशनो ध्रुवम् ॥ पराहंतामयं सर्वस्वरूपं चात्मविग्रहम् ॥ ८ ॥ सदात्मकं स्फुरताख्यमशेषोपाधिवार्जितम् ॥ प्रकाशरूपमा
त्मत्वे वस्तु तद्भासते परम् ॥ ९ ॥ यत एवमतो लोके नास्त्यमंत्रं यदक्षरम्॥ यद्विद्येति समाख्यातं सर्वथा सर्वतः सदा ॥ १० ॥ वासरेषु तु तेष्वेवं
सर्वापत्तारकं भवेत् ॥ तद्विधानं च वक्ष्यामि सम्यगासवकल्पनम्॥ ११ ॥ गौडी पैष्टी तथा माध्वीत्येवं तत्त्रिविधं स्मृतम् ॥ गुडमुष्णोदके क्षिप्त्वा
समालोड्य विनिक्षिपेत् ॥ १२ ॥ घटे काचमये तस्मिन् धातकीसुमनोरजः ॥ खात्वा भूमौ संध्ययोस्तु करैः संक्षोभ्य भूयसा ॥ १३ ॥
मासमात्रे गते तस्मिन्निमग्ने रजसि द्रुतम् ॥ संशोध्य पूजयेत्तेन गौडी सा गुडयोगतः ॥१४॥एवं मधुसमायोगान्माध्वी पैष्टीं शृणु प्रिय ॥ अध्य
र्द्धद्विगुणे तोये श्रपयेत्तंदुलं शनैः ॥ १५ ॥ दिनत्रयोषिते तस्मिन्धात्र्यंकुररजः क्षिपेत् ॥ दिनमेकं धृते वाते निवाते स्थापयेत्ततः ॥ १६ ॥ उदके
र्लोलितं पश्चाद्गलितं पैष्टिकं मधु ॥ वृक्षजं फलजं चेति द्विविधं क्रियते मधु ॥ १७ ॥ तन्निर्माणं शृणुष्वाद्य यदास्वादान्मनोलयः ॥ मृद्वीकां
वाथ खर्जूरफलं पुष्पमथापि वा ॥ १८ ॥ मधूकस्यांभसि क्षिप्त्वा शृतमर्द्धावशेषितम् ॥ प्राक्सृतासवलेशेन मिलितं दिवसद्वयात् ॥ १९ ॥ गालितं
स्वादु पूजार्हं मनोलयकरं शुभम् ॥ वार्क्षं तु नालिकेरं स्यार्द्धितालस्याथ तालतः ॥ २० ॥ फलकांडात्स्नुतं दुग्धं नीतं सद्यो रसावहम् ॥ नालिके
रफलांतस्थसलिले शशिना युते ॥ २१ ॥ अर्द्धपूगफलोत्थं तु रसं संक्षिप्य तापयेत् ॥ आतपे सद्य एवैतदासवं देवताप्रियम् ॥ २२ ॥
आसवैरेभिरुदितैरर्घ्यं देव्यै निवेदयेत् ॥ देवैः कृत्वा ततः सद्यो दद्यात्तत्सिद्धये द्वयम् ॥ २३ ॥ साधको नियताहारः समाधिस्थः पिबेत्सदा
॥ न कदाचित्पिबेत्सिद्धो देव्यर्थमनिवेदितम् ॥ २४॥ पानं च तावत्कुर्वींत यावता स्यान्मनोलयः ॥ ततः करोति चेत्सद्यः पातकी भवति ध्रुवम्
॥ २५ ॥ देवतागुरुशिष्टान्यं पिबन्नासवमाशया ॥ पातकी राजदंड्यश्च रिक्थोपासक एव च ॥२६ ॥ साध्यसाधकयोरेतत्काम्य एव समीरि
तम् ॥ सिद्धस्य सर्वदा प्रोक्तं यतोऽसौ तन्मयो भवेत् ॥ २७॥ पूजयेत्प्रोक्तरूपस्तु प्रोक्तरूपाश्च ताः क्रमात् ॥ उपचारैरासवैश्च मत्स्यैर्मांसैस्तु संस्कृतैः
॥ २८ ॥ अथ काम्यार्चनं वक्ष्ये प्रयोगांश्चापि नारद ॥ येषामाचरणात्सिद्धिं साधको लभते ध्रुवम् ॥ २९॥ चैत्रे दमनकैरर्चेत्पूर्णायां मदनोत्स
वम् ॥ वैशाखे मासि पूर्णायां पूजयेद्धेमपुष्पकैः ॥३०॥ज्यैष्ठ्यां फलैर्यजेद्देवीं कदलीपनसाम्रजैः ॥आषाढ्यां चन्दनैरेलाजातीकंकोलकुंकुमैः॥३१॥
श्रावण्यामागमोक्तेन विधिनार्चेत्पवित्रकैः ॥ प्रौष्ठपद्यां गन्धपुष्पैर्यजेद्वा केतकीसुमैः ॥ ३२ ॥ आश्वयुज्यां कन्यकार्चा भूषावस्त्रधनादिभिः ॥ कार्ति

क्यां कुंकुमैश्चैव निशि दीपगणैरपि ॥ ३३ ॥ सचंद्रैर्मार्गशीर्ष्यां तु नालिकेरैरपूपकैः ॥पौष्यां सशर्करगुडैर्गवां दुग्धैः समर्चयेत्॥३४ ॥ स्वर्णरौप्यैः
पंकजैस्तु माघ्यां सौगन्धिकादिभिः ॥ फाल्गुन्यां विविधैर्द्रव्यैः फलैः पुष्पैः सुगंधिभिः ॥ ३५ ॥ पर्वताग्रे यजेद्देवीं पलाशकुसुमैर्निशि ॥
सिद्धद्रव्यैश्च सप्ताहात्खेचरीमेलनं भवेत् ॥३६॥ अरण्ये वटमूले वा कुंजे वा धरणीभृताम्॥कदम्बजातिपुष्पाभ्यां सिद्धद्रव्यैः शिवां यजेत् ॥ ३७ ॥
मासेन सिद्धा यक्षिण्यः प्रत्यक्षा वांछितप्रदाः ॥ केतकीकुसुमैः सिद्धाश्चेटका वारिधेस्तटे ॥३८॥आज्ञामभीष्टां कुर्वन्ति रणे मायां महाद्भुताम्॥
वसूनि मालां भूषां च दद्युरस्येहयानिशम् ॥ ३९ ॥ पीठमृक्षद्रुमैः कृत्वा तत्र देवीं यजेन्निशि ॥ शाल्मलैः कुसुमैः सिद्धद्रव्यैर्मासं तु निर्भयम्
॥ ४० ॥ श्मशानदेशे विप्रेंद्र सिद्ध्यंत्यस्य पिशाचकाः॥अश्मपातप्रहाराद्यैर्जीयादाभिर्द्विषश्चिरम्॥४१॥निर्जने विपिने रात्रौ मासमात्रं तु निर्भयः॥
यजेद्देवीं चक्रगतां सिद्धद्रव्यसमन्विताम् ॥ ४२॥ मालतीजातपुन्नागकेतकीमरुभिः क्रमात् ॥ तेन सिद्ध्यंति वेतालास्तानारुह्येच्छया चरेत् ॥४३ ॥
श्मशाने चंडिकागेहे निर्जने विपिनेऽपि वा ॥ मध्यरात्रे यजेद्देवीं कृष्णवस्त्रविभूषणैः ॥४४ ॥ कृष्णचक्रेऽतिकृष्णां तामतिक्रुद्धाशयो यजेत्॥साध्य
योनिं तदग्रे तु बलिं छिंदन्निवेदयेत् ॥ ४५ ॥ सिद्धद्रव्यसमेतं तु मासात्तद्भाललोचनात् ॥ जायन्ते भीषणाः कृत्यास्ताभ्यः सिद्धिं निवेदयेत्॥४६॥
विश्वसंहारसंतुष्टाः पुनरेत्य निजेच्छया ॥ देव्या ललाटनेत्रे स्युः प्रार्थिते तु तिरोहिताः ॥ ४७ ॥ रक्तभूषांबरालेपमालाभूषितविग्रहाः ॥ उद्याने
निर्जने देवीं चक्रे संचिंत्य पूजयेत् ॥ ४८ ॥ कह्लारचंपकाशोकपाटलाशतपत्रकैः ॥ सिद्धद्रव्यसमोपेतैर्मायाः सिद्ध्यंति मासतः ॥ ४९ ॥ यासां
प्रसादलाभेन कामरूपो भवेन्नरः ॥ याभिर्विश्वजयी विश्वचारी विश्वविनोदवान् ॥ ५० ॥ षडाधाराब्जमध्ये तु चक्रं संचिंत्य पूजयेत् ॥ चंद्रचं
दनकस्तूरीमृगनाभिमहोदयैः ॥ ५१ ॥ त्रिकालज्ञो भवेद्देवीं तेषु सम्यग्विचिंतयेत् ॥ पूर्णप्रतीतौ भव्यानि विकलेऽभव्यमीरितम् ॥ ५२ ॥ देवीं
चक्रेण सहितां स्मरेद्भक्तियुतो नरः ॥ विवेका विभवा विश्वा वितता च प्रकीर्तिता ॥ ५३ ॥ कामिनी खेचरी गर्वा पुराणा परमेश्वरी ॥ गौरी
शिवा ह्यमेया च विमला विजया परा ॥ ५४ ॥ पवित्रा पीडनी विद्या विश्वेशी शिववल्लभा ॥ अशेषरूपा स्वानंदांबुजाक्षी चाप्यनिंदिता ॥ ५५ ॥
वरदा वाक्यदा वाणी विविधा वेदविग्रहा॥ विद्या वागीश्वरी सत्या संयता च सरस्वती ॥५६॥निर्मलानन्दरूपा च ह्यमृता मानदा तथा॥पूषा चैव
तथा तुष्टिः पुष्टिश्चापि रतिर्धृतिः॥५७॥शशिनी चंद्रिका कांतिर्ज्योत्स्ना श्रीः प्रीतिरंगदा ॥ देवीनामानि चैतानि चुलुके सलिले स्मरन् ॥ ५८ ॥
मातृकासहितां विप्रां त्रिरावृत्त्यामृतात्मिकाम् ॥ ताडीं सारस्वतीं जिह्वां दीपाकारां स्मरन्पिबेत् ॥५९ ॥ अब्दाच्चतुर्विधं तस्य पांडित्यं भुवि जायते॥

एवं नित्यमुषःकाले यः कुर्याच्छुद्धमानसः ॥ ६० ॥ स योगी ब्रह्मविज्ञानी शिवयोगी तथात्मवित् ॥ अनुग्रहोक्तचक्रस्थां देवीं ताभिर्वृतां
स्मरेत्॥६१॥ चंपकेंदीवरैर्मासादारोग्यमुपजायते ॥ ज्वरभूतग्रहोन्मादशीतकाकामलाक्षिहृत् ॥ ६२ ॥ दंतकर्णज्वरशिरःशूलगुल्मादि कुक्षिजाः ॥
व्रणप्रमेहच्छर्द्यर्शोग्रहण्यामत्रिदोषजाः ॥ ६३ ॥ सर्वे तथा शमं यांति पूजया परमेश्वरी ॥ द्रव्यं चक्रस्य निर्माणे काश्मीरं समुदी
रितम् ॥ ६४ ॥ सिंदूरं गैरिकं लाक्षा दरदं चंदनद्वयम् ॥ बिलद्वारे लिखेत्र्यस्रं षोडशत्र्यस्रसंयुतम् ॥ ६५ ॥ दरदेनास्य मध्यस्थां पूजयेत्पर
मेश्वरीम् ॥ ताभिस्तच्छक्तिभिः साकं सिद्धद्रव्यैः सुगंधिभिः ॥ ६६ ॥ कुसुमैर्मासमात्रेण नागकन्यासमन्वितम् ॥ पातालादिषु लोकेषु रमयत्य
निशं चिरम् ॥ ६७ ॥ यक्षराक्षसगंधर्वसिद्धविद्याधरांगनाः ॥पिशाचा गुह्यका वीराः किन्नरा भुजगास्तथा ॥६८॥ सिद्ध्यंति पूजनात्तत्र तथा तत्प्रो
क्तकालतः ॥ किंशुकैर्भूषणावाप्तौ पाटलैर्गजसिद्धये ॥ ६९ ॥ रक्तोत्पलैरश्वसिद्धौ कुमुदैश्वरसिद्धये ॥ उत्पलैरुष्ट्रसंसिद्ध्यै तगरैः पशुसिद्धये ॥
॥ ७० ॥ जंबीरैर्महिषावाप्त्यै लकुचैरजसिद्धये ॥ दाडिमैर्निधिसंसिद्ध्यै मधुकैर्गानसिद्धये ॥ ७१ ॥ बकुलैरंगनासिद्ध्यै कह्लारैः पुत्रसिद्धये ॥
शतपत्रैर्जयावाप्त्यै केतकैर्वाहनाप्तये ॥ ७२ ॥ सौरभाढ्यैः प्रसूनैस्तु नित्यं सौभाग्यसिद्धये ॥ पूजयेन्मासमात्रं वा द्विगुणं त्रिगुणं तु वा ॥ ७३ ॥
यावत्फलावाप्तिकांक्षी शर्कराघृतपायसैः ॥ सचक्रपरिवारां तां देवीं सलिलमध्यगाम् ॥ ७४ ॥ तर्प्पयेत्कुसुमैः सार्घ्यैः सर्वोपद्रवशान्तये ॥ घृतैः
पूर्णायुषः सिद्ध्यै क्षौद्रैः सौभाग्यसिद्धये ॥ ७५ ॥ दुग्धैरारोग्यसंसिद्ध्यै त्रिभिरैश्वर्यसिद्धये ॥ नालिकेरोदकैः प्रीत्यै हिमतोयैर्नृपाप्तये ॥
सर्वार्थसिद्धय तीर्थैरभिषिंचेन्महेश्वरीम् ॥ ७६ ॥ पूगोद्याने यजेद्देवीं सिद्धद्रव्यैर्दिवानिशम् ॥ निवसंस्तत्र तत्पुष्पैर्जायते मन्मथोपमः ॥
॥ ७७ ॥ पूर्णासु नियतं देवीं कन्यकायां समर्चयन् ॥ कृत्याः परेरिता मंत्रा विमुखांस्तान् ग्रसंति वै ॥ ७८ ॥ लिंगत्रयमयीं देवीं चक्रस्था
भिश्च शक्तिभिः ॥ पूजयन्निष्टमखिलं लभतेऽत्र परत्र च ॥ ७९ ॥ शतमानकृतैः स्वर्णपुष्पैः सौरभ्यवासितैः ॥ पूजयन्मासमात्रेण प्राग्जन्माद्यैर्वि
मुच्यते ॥ ८०॥ तथा रत्नैश्च नवभिर्मासं तु यदि पूजयेत् ॥ विमुक्तसर्वपापौघैस्तां च पश्यति चक्षुषा॥८१॥ अंशुकैरर्चयेद्देवीं मासमात्रं सुगंधिभिः॥
मुच्यते पापकृत्यादिदुःखौघैरितरैरपि ॥ ८२ ॥ देवीरूपं स्वमात्मानं चक्रं शक्तीः समंततः ॥ भावयन्विषयैः पुष्पैः पूजयंस्तन्मयो भवेत् ॥८३॥
षोडशानां तु नित्यानां प्रत्येक तिथयः क्रमात् ॥ तत्तत्तिथौ तद्भजनं जपहोमादिकं चरेत् ॥ ८४ ॥ घृतं च शर्करा दुग्धमपूपं कदलीफलम् ॥
क्षौद्रं गुडं नालिकेरफलं लाजा तिलं दधि ॥ ८५ ॥ पृथुकं चणकं मुद्गपायसं च निवेदयेत् ॥ कामेश्वर्यादिशक्तीनां सर्वासामपि चोदितम् ॥

॥ ८६ ॥ आद्याया ललितायास्तु सर्वाण्येतानि सर्वदा ॥ निवेदयेच्च जुहुयाद्वह्नौ दद्यान्नृणामपि ॥ ८७ ॥ तत्तद्विद्याक्षरप्रोक्तमौषधं तत्प्र
माणतः ॥ संपिष्य गुटिकीकृत्य ताभिः सर्वं च साधयेत् ॥ ८८ ॥ रविवारेऽरुणांभोजैः कुमुदैः सोमवारके ॥ भौमे रक्तोत्पलैः सौम्ये
वारे तगरसंभवैः ॥ ८९ ॥ गुरुवारे सुकह्लारैः शुक्रवारे सितांबुजैः ॥ नीलोत्पलैर्मंदवारे पूजयेदिष्टमादरात् ॥ ९० ॥ निवेदयेत्क्रमात्तेषु
रविवारादिषु क्रमात् ॥ पायसं दुग्धकदलीनवनीतसिताघृतम् ॥ ९१ ॥ एवमिष्टं समाराध्य देवीं गंधादिभिर्यजेत् ॥ ग्रहपीडां विजित्याशु
सुखानि च समश्नुते ॥ ९२ ॥ अर्धरात्रे तु साध्यां स्त्रीं स्मरन्मदनवह्निना ॥ दह्यमानां हृतस्वांतां मस्तकस्थापितांजलिम् ॥ ९३ ॥
विकीर्णकेशीमालोललोचनामरुणारुणाम् ॥ वायुप्रेंखत्पताकास्थपदा पद्मकलेवराम् ॥ ९४ ॥ विवेकविधुरां मत्तां मानलज्जाभयातिगाम् ॥
चिंतयन्नर्चयेच्चक्रं मध्ये देवीं दिगंबराम् ॥ ९५ ॥ जपादाडिमबंधूककिंशुकाद्यैः समर्चयेत् ॥ अन्यैः सुगंधिशेफालीकुसुमाद्यैः समर्चयेत् ॥ ९६ ॥
त्रिसप्तरात्रादायाति प्रोक्तरूपा मदाकुला ॥ यावच्छरीरपातः स्याच्छापो वानपगास्य सा ॥ ९७ ॥पद्मैरक्तैस्त्रिमध्वक्तैर्होमाल्लक्ष्मीमवाप्नुयात् ॥
तथैव कैरवै रक्तैरंगनाः स्ववशं नयेत् ॥ ९८ ॥ समानरूपवत्सायाः शुक्लाया गोः पयःप्लुतैः ॥ मल्लिकामालतीजातीशतपत्रैर्हुतैर्भवेत्
॥ ९९ ॥ कीर्तिविद्याधनारोग्यसौभाग्यवित्तपादिकम् ॥ आरग्वधप्रसूनैस्तु क्षौद्राक्तैर्हवनाद्भवेत् ॥ १०० ॥ स्वर्णादिस्तंभनं शत्रोर्नृपादीनां
क्रुधोऽपि च ॥ आज्याक्तैः करवीरोत्थैः प्रसूनैररुणैर्हुतैः ॥ १०१ ॥ रक्तांबराणि वनिता भूपामात्यवशं तथा ॥ भूषावाहनवाणिज्यसिद्धयश्चास्य
वांछिताः ॥ १०२ ॥ लवणैः सर्षपैर्गौरैरितरैर्वाथ होमतः ॥ सतैलाक्तैर्निशामध्ये त्वानयेद्वांछितां वधूम् ॥ १०३ ॥ तैलाक्तैर्जुहुयात्कृष्ण
दरपुष्पैर्निशांतरे ॥ मासादरातेस्तस्यार्तिर्ज्वरेण भवति ध्रुवम् ॥ १०४ ॥ आरुष्करैर्घृताभ्यक्तैस्तद्बीजैर्निशि होमतः ॥ शत्रोर्दाहव्रणानि स्युर्दुःसा
ध्यानि चिकित्सकैः ॥१०५ ॥ तथा तत्तैलसंसिक्तैर्बीजैरंकोलकैरपि ॥ मरिचैः सर्षपाज्याक्तानशि होमानुसारतः ॥ १०६ ॥ वांछितां वनितां काम
ज्वरार्तामानयेद्द्रुतम् ॥ शालिभिश्चाज्यसंसिक्तैर्होमाच्छालीनवाप्नुयात् ॥१०७॥ मुद्गैर्मुद्गं घृतैराज्यं सिद्धैरित्थं हुतैर्भवेत् ॥ साध्यर्क्षवृक्षसंभूतां पिष्टपा
दरजःकृताम् ॥ १०८ ॥ राजीमरीचिलोणोत्थां पुत्तलीं जुहुयान्निशि॥प्रपदाभ्यां च जंघाभ्यां जानुभ्यामुरुयुग्मतः ॥ १०९ ॥ नाभेरधस्ताद्धृदया
द्भिन्नेनाकण्ठतस्तथा ॥ शिरसा च सुतीक्ष्णेन च्छित्वा शस्त्रेण वै क्रमात् ॥११०॥ एवं द्वादशधा होमान्नरनारीनराधिपाः॥ वश्या भवंति सप्ताहाज्ज्व
रार्त्तीश्चास्य वांछया ॥ १११ ॥ पिष्टेन गुडयुक्तेन मरिचैर्जीरकैर्युताम् ॥ कृत्वा पुत्तलिकां साध्यनामयुक्तामथो हृदि ॥ ११२॥ सनामहोमसंपातघृते

पाच्यतां पुनः ॥ स्पृशन्निजकराग्रेण सहस्रं प्रजपेन्मनुम् ॥ ११३ ॥अभ्यर्च्य तद् घृताभ्यक्तं भक्षयेत्तद्धिया जपन् ॥ नरनारीनृपास्तस्य वश्याः
स्युर्मरणावधि ॥ ११४ ॥ शक्त्यष्टगंधं संपिष्य कन्यया शिशिरे जले ॥ तेन वै तिलकं भाले धारयन्वशयेज्जगत् ॥ ११५ ॥ शालि
तंदुलमादाय प्रस्थं भांडे नवे क्षिपेत् ॥ समानवर्णवत्साया रक्ताया गोः पयस्तथा ॥ ११६ ॥ द्विगुणं तत्र निक्षिप्य श्रपयेत्संस्कृतेऽनले ॥ घृतेन
सिक्तं सिक्थं तु कृत्वा तत्ससितं करे ॥ ११७ ॥ विधाय विद्यामष्टोर्द्ध्वशतं जप्त्वा हुनेत्ततः ॥ एवं होमो महालक्ष्मीमावहेत्प्रतिपत्कृतः ॥ ११८ ॥
शुक्रवारेष्वपि तथा वर्षान्नृपसमो भवेत् ॥ पंचम्यां तु विशेषेण प्राग्वद्धोमं समाचरेत् ॥ ११९ ॥ तस्यां तिथौ त्रिमध्वक्तैर्मल्लिकाद्यैः सितैर्हु
नेत् ॥ अन्नाज्याभ्यां च नियतं हुत्वान्नाढ्यो भवेन्नरः ॥ १२० ॥ यद्यद्धि वांछितं वस्तु तत्तत्सर्वं तु सर्वदा ॥ घृतहोमादवाप्नोति तथैव तिलतं
दुलैः ॥ १२१ ॥ अरुणैः पंकजैर्होमं कुर्वंस्त्रिमधुराप्लुतैः ॥ मंडलाल्लभते लक्ष्मीं महतीं श्लाघ्यविग्रहाम् ॥ १२२ ॥ कह्लारैः क्षौद्रसंयुक्तैः पूर्णाद्यं
तद्दिनावधि ॥ जुहुयान्नित्यशो भक्त्या सहस्रं विकचैः शुभैः ॥ १२३ ॥ स तु कीर्तिं धनं पुत्रान्प्राप्नुयान्नात्र संशयः ॥ चंपकैः क्षौद्रसंसिक्तैः
सहस्रहवनाद्ध्रुवम् ॥ १२४ ॥ लभते स्वर्णनिष्काणां शतं मासेन नारद ॥ पाटलैर्घृतसंसिक्तैस्त्रिसहस्रं हुतैस्तथा ॥ १२५ ॥ दर्शादि
मासाल्लभते चित्राणि वसनानि च ॥ कर्पूरचंदनाद्यानि सुगन्धानि तु मासतः ॥ १२६ ॥ वस्तूनि लभते हृद्यैरन्यैर्भोगोपयोगिभिः ॥ शालिभिः
क्षीरसिक्ताभिः सप्तमीषु शतं हुतम् ॥ १२७ ॥ तेन शालिसमृद्धिः स्यान्मासैः षड्भिरसंशयम् ॥ तिलैर्हुतैस्तु दिवसैर्वर्षादारोग्यमाप्नुयात् ॥
॥ १२८ ॥ स्वजन्मर्क्षत्रिषु तथा दूर्वाभिर्ज्जुहुयान्नरः ॥ निरातंको महाभोगः शतं वर्षाणि जीवति ॥ १२९ ॥ गुडूचीतिलदूर्वाभिस्त्रिषु
जन्मसु वा हुनेत् ॥ तेनायुःश्रीयशोभोगपुण्यनिध्यादिमान्भवेत् ॥ १३० ॥ घृतपायसदुग्धैस्तु हुतैस्तेषु त्रिषु क्रमात् ॥ आयुरारो
ग्यविभवैर्नृपामात्यो भवेत्तथा ॥ १३१ ॥ सप्तम्यां कदलीहोमात्सौभाग्यं लभतेऽन्वहम् ॥ दूर्वात्रिकैस्तु प्रादेशमानैस्त्रिस्वादुसंयुतैः ॥
॥ १३२ ॥ जुहुयाद्दिनशो घोरे सन्निपातज्वरे तथा ॥ तद्दिनेषु जपेद्विद्यां नित्यशः सलिलं स्पृशन् ॥ १३३ ॥ सहस्रवारं तत्तोयैः स्नानं पानं समाच
रेत् ॥ पाकाद्यमपि तैरव कुर्याद्रोगविमुक्तये ॥ १३४ ॥ साध्यर्क्षवृक्षसंचूर्णं त्र्यूषणं सर्षपं तिलम् ॥ पिष्टं च साध्यपादोत्थरजसा च समन्वि
तम् ॥ १३५ ॥ कृत्वा पुत्तलिकां सम्यग्घृदये नामसंयुताम् ॥ प्राग्वच्छित्वायसैस्तीक्ष्णैः शस्त्रैः पुत्तलिकां हुनेत् ॥ १३६ ॥ एवं दिनैः सप्तभिस्तु
साध्यो वश्यो भवेद्दृढम् ॥ तथाविधां पुत्तलिकां कुंडमध्ये निखन्य च ॥ १३७ ॥ उपर्यग्निं निधायाथ विद्यया दिनशो हुनेत् ॥ त्रिसहस्रं त्रिय

मायां सर्षपैस्तद्रसाप्लुतैः ॥ १३८ ॥ शतयोजनदूरादप्यानयेद्वनितां बलात् ॥ वशयेद्वनितां होमात्कौशिकैर्मधुमिश्रितैः ॥ १३९ ॥ नालिकेरफलोपे
तैर्गुडैर्लक्ष्मीमवाप्नुयात् ॥ तथाज्यसिक्तैः कह्लारैः क्षीराक्तैररुणोत्पलैः ॥ १४० ॥ त्रिमध्वक्तैश्चंपकैश्च प्रसूनैर्बकुलोद्भवैः ॥ मधूकजैः प्रसूनैश्च हुतैः
कन्यामवाप्नुयात् ॥ १४१ ॥ पुन्नागजैर्हुतैर्वस्त्राण्याज्यैरिष्टमवाप्नुयात् ॥ माहिषैर्महिषीराजैरजान् गव्यैश्च गास्तथा ॥ १४२ ॥ अवाप्नोति हुतैराज्यैः
रत्नै रत्नं च साधकः ॥ शालिपिष्टमयीं कृत्वा पुत्तलीं ससितां ततः ॥ १४३ ॥ हृद्देशन्यस्तनामार्णां पचेत्तैलाज्ययोर्निशि ॥ तन्मनाश्च दिवारात्रौ
विद्याजप्तां तु भक्षयेत् ॥१४४॥ सप्तरात्रप्रयोगेण नरो नारी नृपोऽपि वा ॥ दासवद्वशमायाति चित्तप्राणादि चार्पयेत् ॥ १४५ ॥ हयारिपुष्पैररुणैः
सितैर्वा जुहुयात्तथा ॥ त्रिसप्तरात्रान्महतीमवाप्नोति श्रियन्नरः ॥ १४६ ॥ छागमांसैस्त्रिमध्वक्तैर्होमात्स्वर्णमवाप्नुयात् ॥ क्षीराक्तैः सस्यसंपन्नां
भुवमाप्नोति मंडलात् ॥ १४७ ॥ पद्माक्षैर्हवनाल्लक्ष्मीमवाप्नोति त्रिभिर्दिनैः ॥ बिल्वैर्दशांशं जुहुयान्मंत्राद्यैः साधने जपे ॥ १४८ ॥ एवं संसि
द्धमंत्रस्तु मंत्रितैश्चुलुकोदकैः ॥ फणिदष्टमृतानां तु मुखे संताड्य जीवयेत् ॥ १४९ ॥ तत्कर्णयोर्जपन्विद्यां यष्ट्या वा जपसिद्धया ॥ संताड्य
शीर्षं सहसा मृतमुत्थापयेदिति ॥ १५० ॥ कृत्वा योनिं कुंडमध्ये तत्राग्नौ विधिवद्धुनेत् ॥ तिलसर्षपगोधूमशालिधान्ययवैर्हुनेत् ॥ १५१ ॥ त्रिम
ध्वक्तैरेकशो वा समेतैर्वा समृद्धये ॥ बकुलैश्चंपकैरब्जैः कह्लारैररुणोत्पलैः ॥ १५२ ॥ कैरवैर्मल्लिकाकुंदमधूकैरिंदिराप्तये ॥ अशोकैः पाटलैर्बिल्वै
र्जातीविकंकतैः सितैः ॥ १५३ ॥ नवनीलोत्पलैरश्वरिपुजैः कर्णिकारजैः॥ होमाल्लक्ष्मीं च सौभाग्यं निधिमायुर्यशो लभेत्॥ १५४॥दूर्वां गुडूचीमश्वत्थं
वटमारग्वधं तथा ॥ सितार्कप्लक्षजं हुत्वा चिरान्मुच्येत रोगतः ॥ १५५ ॥ इक्षुजंबूनालिकेरमोचागुडसितायुतैः ॥ अचलां लभते लक्ष्मीं भोक्ता च
भवति ध्रुवम् ॥ १५६ ॥ सर्षपाज्यैर्हुते मृत्युः काष्ठाग्नौ वैरिमृत्यवे ॥ चतुरंगुलजैर्होमाच्चतुरंगबले रिपोः ॥ १५७ ॥ सप्ताहाद्रोगदुःखार्तिर्भवत्येव न
संशयः ॥ नित्यं नित्यार्चनं कुर्यात्तथा होमं घृतेन वै ॥ १५८ ॥ विद्याभिमंत्रितं तोयं पिबेत्प्रातस्तदाप्तये ॥ चंदनोशीरकर्पूरकस्तूरीरोचना
न्वितैः ॥ १५९ ॥ काश्मीरकालागुरुभिर्मृगस्वेदमयैरपि ॥ पूजयेच्च शिवामेतैर्गंधैः सर्वार्थसिद्धये ॥ १६० ॥ सर्वाभिरपि नित्याभिः प्रातर्मातृकया
समम् ॥ त्रिजप्ताभिः पिबेत्तोयं तथा वाक्सिद्धये शिवम्॥ १६१॥विदध्यात्साधनं प्राग्वद्वर्णलक्षं पयोव्रतः॥त्रिस्वादुसिक्तैररुणैरंबुजैर्हवनं चरेत्॥ १६२॥
जपतर्पणहोमार्चासेकसिद्धमनुर्नरः ॥ कुर्यादुक्तान्प्रयोगांश्च न चेत्तन्मनुदेवताः ॥ १६३॥ प्राणांस्तस्य ग्रसंत्येव कुपितास्तत्क्षणान्मुने॥अनया विद्यया
लोके यदसाध्यं न तत्क्वचित् ॥ १६४ ॥ अरण्यवटमूले च पर्वताग्रगुहासु च ॥ उद्यानमध्यकांतारे मातृपादपमूलतः ॥ १६५ ॥ सिंधुतीरे वने चैता

यक्षिणीः साधयेन्नरः ॥ कमलैः कैरवै रक्तैः सितैः सौगंधिकोत्पलैः ॥ १६६ ॥ सुगंधिशेफालिकया त्रिमध्वक्तैर्यथाविधि ॥ होमात्सप्तसु वारेषु
तन्मंडलत एव वै ॥ १६७ ॥ विजयं समवाप्नोति समरे द्वंद्वयुद्धके ॥ मल्लयुद्धे शस्त्रयुद्धे वादे द्यूताह्वयेऽपि च॥१६८॥ व्यवहारेषु सर्वत्र जयमाप्नोति
निश्चितम् ॥ चतुरंगुलजैः पुष्पैर्होमात्संस्तंभयेदरीन् ॥ १६९ ॥ तथैव कार्णिकारोत्थैः पुन्नागोत्थैर्नमेरुजैः ॥ चंपकैः केतकै राजवृक्षजैर्माधवोद्भवैः ॥
॥ १७० ॥ प्राग्वद्वारेषु जुहुयात्क्रमात्पुष्पैस्तु सप्तभिः ॥ प्रोक्तेषु स्तंभनं शत्रोर्भंगो वा भवति ध्रुवम् ॥ १७१ ॥ शत्रोर्नक्षत्रवृक्षाग्नौ तत्समिद्भिस्तु
होमतः ॥ सर्षपाज्यप्लुताभिस्ते प्रणमंत्येव पादयोः ॥ १७२ ॥ मृत्युकाष्ठानले मृत्युपत्रपुष्पफलैरपि ॥ समिद्भिर्जुहुयात्सम्यग्वारेशार्चनपूर्वकम् ॥
॥१७३॥अरातेश्चतुरंगं तु बलं रोगार्दितं भवेत् ॥ तेनास्य विजयो भूयान्निधनेनापि वा पुनः ॥१७४॥ अर्कवारेऽर्कजैरिध्मैः समिद्धेऽग्नौ तदुद्भवैः॥
पत्रैः पुष्पैःफलैः काण्डैर्मूलैश्चापि हुनेत्क्रमात् ॥ १७५ ॥ सवर्णारुणवत्साया घृतसिक्तैस्तु मण्डलात्॥अरातिदिङ्मुखो भूत्वा कुंडे त्र्यस्रे विधानतः
॥१७६ ॥ पलायते वा रोगार्तः प्रणमेद्वा भयान्वितः ॥ पलाशेध्मानले तस्य पंचांगैस्तद्घृताप्लुतैः॥१७७॥होमेन सोमवारे च भवेत्प्राग्वन्न संशयः॥
खादिरेध्मानले तस्य पंचांगैस्तद्घृताप्लुतैः॥१७८॥वारे भौमस्य हवनात्तदाप्नोति सुनिश्चितम् ॥अपामार्गस्य सौम्येऽह्नि पिप्पलस्य गुरोर्दिने॥१७९॥
उदुंबरस्य भृगुजे शम्या मांदेऽह्नि गोघृतैः ॥शुभ्रपीतसितश्यामवर्णाद्याः पूर्ववत्तथा ॥१८०॥ तत्फलं समवाप्नोति तत्समिद्दीपितेऽनले ॥ प्रतिपत्तिथि
मारभ्य पंचम्यंतं क्रमेण वै ॥१८१॥ शालीचणकमुद्गैश्च यवमाषैश्च होमतः॥माहिषाज्यप्लुतैस्ताभिस्तिथिभिः समवाप्नुयात्॥१८२॥षष्ठ्यादिसप्तम्यंतं
तु चाजाभवघृतैस्तथा ॥ प्रागुक्तैर्निस्तुषैर्होमात्प्रागुक्तफलमाप्नुयात् ॥ १८३॥ तदूर्द्ध्वं पंचके त्वेतैः समस्तैश्च तिलद्वयैः॥सितान्नैः पायसैः सिक्तैराविकैस्तु घृतैस्तथा ॥ १८४ ॥ हवनात्तदवाप्नोति यदादौ फलमीरितम् ॥ एवं नक्षत्रवृक्षोत्थवह्नौ तैस्तैर्मधुप्लुतैः ॥१८५॥ हवनादपि तत्प्राप्तिर्भवत्येव
न संशयः ॥ विद्यां संसाध्य पूर्वं तु पश्चादुक्तानशेषतः ॥ १८६ ॥ प्रयोगान्साधयेद्धीमान् मंगलायाः प्रसादतः ॥ संपूज्य देवतां विप्र
कुमारीं कन्यकां तु वा ॥ १८७ ॥ सशुभावयवां मुग्धां स्नातां धौतांबरां शुभाम् ॥ तथाविधं कुमारं वा संस्थाप्याभ्यर्च्य विद्यया ॥ १८८ ॥ स्पृष्ट
शीर्षो जपेद्विद्यां शतवारं तथार्चयेत् ॥ प्रसूनैररुणैः शुभ्रैः सौरभाढ्यैरथापि वा ॥ १८९ ॥ दद्याद्गुग्गुलधूपं च यावत्कर्मावसानकम् ॥ ततो
देव्या समाविष्टे तस्मिन्संपूज्य भक्तितः ॥ १९० ॥ ततस्तामुपचारैस्तैः प्रागुक्तैर्विधया व्रती॥प्रजपंस्तां ततः पृच्छेदभीष्टं कथयेच्च सा ॥ १९१ ॥ भूतं
भवद्भविष्यं च यदन्यन्मनसि स्थितम् ॥ जन्मांतराण्यतीतानि सर्वं सा पूजिता वदेत् ॥ १९२ ॥ ततस्तां प्राग्वदभ्यर्च्य स्वात्मन्युद्वास्य तां
जपेत्॥ सहस्रवारं स्थिरधीः पूर्णात्मा विचरेत्सुखी ॥१९३॥मधुरत्रयसंसिक्तैररुणैरंबुजैः श्रियम्॥प्राप्नोति मंडलं होमात्सितैस्तैश्च महद्यशः॥१९४॥

क्षौद्राक्तैरुत्पलै रक्तैर्हवनात्प्रोक्तकालतः ॥ सुवर्णं समवाप्नोति निधिं वा वसुधां तु वा ॥ १९५ ॥ क्षीराक्तैः कैरवैर्होमात्प्रोक्तं काममवाप्नु
यात् ॥ धान्यानि विविधान्याशु सुभगः स भवेन्नरः ॥ १९६ ॥ आज्याक्तैरुत्पलैर्होमाद्वांछितं समवाप्नुयात् ॥ तदक्तैरपि कह्लारैर्हवनाद्राजवल्लभः ॥
॥ १९७ ॥ पलाशपुष्पैस्त्रिस्वादुयुक्तैस्तत्कालहोमतः ॥ चतुर्विधं तु पांडित्यं भवत्येव न संशयः ॥ १९८ ॥ लाजैस्त्रिमधुरोपेतैस्तत्कालहवनेन
वै ॥ कन्यकां लभते पत्नीं समस्तगुणसंयुताम् ॥ १९९ ॥ नालिकेरफलक्षोदं ससितं सगुडं तु वा ॥ क्षौद्राक्तं जुहुयात्तद्वदयत्नाद्धनदोपमः ॥ २०० ॥
तथैवान्नाज्यहोमेन सतंदुलतिलैरपि ॥ प्रसूनैररुणैस्तद्वत्तथा बंधूकसंभवैः ॥ २०१ ॥ सितैः प्रसूनर्वाक्सिद्धिं हवनात्समवाप्नुयात् ॥ सितरक्तैस्तु
मिलितैरायुरारोग्यमाप्नुयात् ॥ २०२॥ दूर्वात्रिकैस्त्रिमध्वक्तैर्हवनात्तु जयेच्च तान् ॥ तथा गुडूच्या होमेन पायसेन तिलेन च ॥ २०३ ॥ श्रीखंडपंक
कर्पूरमिलितैः शतपत्रकैः ॥ ॥ हवनाच्छ्रियमाप्नोति यावदन्वयगा भवेत् ॥ २०४ ॥ कुंकुमं हिमतोयेन पिष्ट्वा कर्पूरसंयुतम् ॥ तत्पंक
मार्द्रितैर्होमात्कह्लारैर्विकचैः सुमैः ॥ २०५ ॥ राजकल्पः श्रिया भूयाज्जीवेद्वर्षशतं भुवि ॥ निःसपत्नो निरातंको निर्द्वंद्वो निर्मलाशयः ॥२०६ ॥
इक्षुकांडस्य शकलैर्हवनाद्वस्त्रमाप्नुयात् ॥ तथैव करवीरोत्थैः प्रसूनैररुणैः सितैः ॥ २०७ ॥ क्षौद्राक्तैः पाटलापुष्पैर्हवनाद्वशयेद्वधूः ॥ तथैव पंकजै
र्होमाद्रूपाजीवां वशं नयेत् ॥ २०८॥ सरूपवत्सासितगोक्षीराक्तसितहोमतः ॥ लभतेऽनुपमां लक्ष्मीमपि पापिष्ठचेतनः ॥ २०९ ॥ सौवीराक्तै
स्तु कार्पासबीजस्तत्कालहोमतः ॥ अर्द्धेन्दुकुंडे नियतं वशगा रिपवो मुने ॥ २१० ॥ अरिष्टपत्रैस्तद्वीजैस्तद्वह्नौ तैस्तथा हुतैः ॥ मृत्युबीजैर्निम्ब
तैलसिक्तैर्होमान्निहंति तान् ॥ २११ ॥ रोगार्तास्तुरगांस्तद्वत्पंचगव्यैर्हुतैर्ध्रुवम् ॥ अक्षबीजैस्तु तैलाक्तैर्होमः सर्वविनाशनः ॥ २१२ ॥ करंजबीजैः
संसिक्तैर्होमाद्वैरी पिशाचवान् ॥ तथैवाक्षतरूद्भूतपंचांगहवनादपि ॥ २१३ ॥ निंबतैलान्वितैरक्षद्रुमबीजैस्तु होमतः ॥ तद्दिने स्यादपस्मारी
वैरी भवति निश्चितम् ॥ २१४ ॥ अरातेर्जन्मनक्षत्रवृक्षेंधनगतेऽनले ॥ तद्योनिपिशितैस्तैश्च हवनान्मृत्युकृद्रिपोः ॥ २१५ ॥ पद्माक्षबीजैः सर्षप
तैलाक्तैर्हवनात्तथा ॥ जायंते वैरिणः कुष्ठरोगा देहविलोपकाः ॥ २१६ ॥ मारिचैः सर्षपैर्होमात्तैलाक्तैर्मध्यरात्रके ॥ दाहज्वरेण ग्रस्तः स्यादरा
तिस्तद्दिने ध्रुवम् ॥ २१७ ॥ एवं निग्रहहोमेषु स्वरक्षायै तथान्वहम् ॥ स्निग्धैः संप्राप्तसद्विद्यैर्जपहोमादि कारयेत् ॥ २१८ ॥ मृत्युंजयेन वा तत्त
त्प्रयोगस्थाभिरेव वा ॥ विद्याभिरन्यथासिद्धमंत्रमस्याशु नाशयेत् ॥ २१९ ॥ लक्षत्रयं कृते प्रोक्तं त्रेतायां द्विगुणं तथा ॥ द्वापरे त्रिगुणं प्रोक्तं कलौ
तत्तु चतुर्गुणम्॥ २२० ॥ दशांशं हवनं कार्यं तर्पणं तद्दशांशतः ॥ तद्दशांशं मार्जनं स्याद्दशांशं द्विजभोजनम् ॥ २२१ ॥ एवं क्रमेण सर्वासां

या या संख्या जपस्य सा ॥ कार्या सिद्ध्यै तु विद्यायास्ततः कुर्यात्प्रयोगकान् ॥ २२२ ॥ द्विगुणो हि जपः कार्यः कामेश्वर्या मुनीश्वर ॥
सिद्धे मंत्रे प्रयोगांस्तु विदधीत यथा तथा ॥ २२३ ॥ जपो लक्षं समाख्यातो होमादिस्तद्दशांशतः ॥ कर्तव्यो भगमालाया विद्यासिद्ध्यै
मुनीश्वर ॥ २२४ ॥ नित्यक्लिन्नाजपः प्रोक्तो लक्षं होमो दशांशतः ॥ कार्यः सिद्ध्यै तु विद्यायाः प्रयोगान्साधयेत्ततः ॥ २२५ ॥ ततो
मौनी पयोभक्षः प्रजपेन्नवलक्षकम्॥ भेरुंडामन्त्रमुक्तं तु शेषं कुर्यात्प्रयत्नतः ॥ २२६ ॥ लक्षत्रयं जपो वह्निवासिन्याः समुदीरितः ॥ अन्यत्सर्वं पुरा
वच्च कार्य्यं साधकसत्तमैः ॥२२७॥ महावज्रेश्वरीविद्याजपो लक्षत्रयो मतः ॥ हवनादि दशांशेन कार्यं प्रोक्तक्रमेण हि॥२२८॥अतंद्रितो जपेल्लक्षमितं
दूतीमनुं मुने ॥ तद्दशांशक्रमेणैव होमादिः प्रोक्तमार्गतः ॥ २२९ ॥ त्वरितां प्रजपेल्लक्षप्रमितां तद्दशांशतः ॥ कृत्वा होमादिकं सर्वं विद्यासिद्धिर्यै
मुनीश्वर ॥२३०॥ जपो लक्षं समाख्यातो होमादिस्तद्दशांशतः ॥ विद्यायाः कुलसुन्दर्याः कर्तव्यो द्विजसत्तम ॥ २३१ ॥ नित्यानित्याजपो विप्र
त्रिलक्षप्रमितो मतः ॥ होमादिस्तद्दशांशेन प्रोक्तः प्रोक्तविधानतः॥२३२॥त्रिपञ्चाशल्लक्षमुक्तो नियमेन मुनीश्वर ॥जपो नित्यपताकाया होमादिस्त
द्दशांशतः ॥२३३ ॥ विजयाया जपः प्रोक्तो लक्षमानेन नारद ॥ अन्यत्पूर्ववदाख्यातं विद्यासिद्ध्यै तु साधनम् ॥ २३४ ॥ दन्तलक्षप्रमाणेन
सर्वमंगलिकां जपेत्॥ तद्दशांशक्रमेणैव होमादि समुदीरितम्॥२३५॥अष्टलक्षं हविष्याशी ज्वालामालिनिकां जपेत्॥होमादिस्तद्दशांशेन प्रोक्तद्रव्यैः
समीरितः ॥ २३६ ॥ चित्राया भूपलक्षं तु जपो होमादिकस्ततः ॥ प्रोक्तेन विधिना कार्यो विद्यासिद्ध्यै मुनीश्वर ॥ २३७ ॥ एतत्संक्षेपतः प्रोक्तं
नित्यापटलमादितः ॥ ज्ञातव्यं सर्वमेवात्र यन्त्रसाधनपूर्वकम्॥२३८॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने तृतीयपादे नित्यापटलकथनं
नाम नवतितमोऽध्यायः ॥ ९० ॥ सनत्कुमार उवाच ॥ अथ वक्ष्ये महेशस्य मन्त्रं सर्वार्थसाधकम् ॥ यं समाराध्य मनुजो भुक्तिं मुक्तिं च विंदति
॥ १ ॥ हृदयं सबकः सूक्ष्मो लांतोऽनन्तान्वितो मरुत्॥पंचाक्षरो मनुः प्रोक्तस्ताराद्योऽयं षडक्षरः ॥२॥वामदेवो मुनिश्छन्दः पंक्तिरीशोऽस्य देवता॥
षड्भिर्वर्णैः षडङ्गानि कुर्यान्मंत्रेण देशिकः ॥ ३ ॥ मंत्रवर्णादिकान्न्यस्येन्मंत्रमूर्तौ यथाक्रमम् ॥ तर्जनीमध्ययोरंत्यानामिकांगुष्ठके पुनः ॥ ४ ॥
ताः स्युस्तत्पुरुषाघोरभववामेशसंज्ञिकाः ॥ वक्त्रहृत्पादगुह्येषु निजमूर्द्धनि ताः पुनः ॥ ५ ॥ प्राग्याम्यवारुणोदीच्यमध्यवक्त्रेषु पंचसु ॥ मन्त्रांगानि
न्यसेत्पश्चाज्जातियुक्तानि षट् क्रमात् ॥ ६ ॥ कुर्वीत गोलकन्यासं रक्षायै तदनन्तरम् ॥ हृदि वक्त्रेंऽसयोरूर्वोः कंठे नाभौ द्विपार्श्वयोः ॥ ७ ॥ पृष्ठे
हृदि तथा मूर्ध्नि वदने नेत्रयोर्नसोः ॥ दोःपत्संधिषु साग्रेषु विन्यसेत्तदनन्तरम् ॥८॥शिरोवदनहृत्कुक्षिसोरुपादद्वये पुनः ॥ हृदि वक्त्रांबुजे टंकमृगा

भयवरेष्वथ ॥ ९ ॥ वक्त्रांसहृत्सपादोरुजठरेषु क्रमान्न्यसेत् ॥ मूलमन्त्रस्य षड् वर्णान्यथावद्देशिकोत्तमः॥ १० ॥ मूर्ध्नि भालोदरांसेषु हृदये ताः
पुनर्न्यसेत् ॥ पश्चादनेन मन्त्रेण कुर्वीत व्यापकं सुधीः ॥११॥ नमोस्त्वनंतरूपाय ज्योतिर्लिंगामृतात्मने ॥ चतुर्मूर्तिवपुश्छायाभासितांगाय शंभवे
॥ १२॥एवं न्यस्तशरीरोऽसौ चिन्तयेत्पार्वतीपतिम् ॥ ध्यायेन्नित्यं महेशानं रौप्यपर्वतसन्निभम् ॥ १३ ॥ चारुचंद्रावतंसं च रत्नाकल्पोज्ज्वलांगकम्
॥ परश्वधवराभीतिमृगहस्तं शुभाननम् ॥ १४॥ पद्मासीनं समंतात्तु स्तुतं सुमनसां गणैः ॥ व्याघ्रकृत्तिं वसानं च विश्वाद्यं विश्वरूपकम् ॥१५॥
त्रिनेत्रं पंचवक्त्रं च सर्वभीतिहरं शिवम् ॥तत्त्वलक्षं जपेन्मंत्रं दीक्षितः शैववर्त्मना ॥१६॥ तावत्संख्यसहस्राणि जुहुयात्पायसैः शुभैः ॥ ततः सिद्धो
भवेन्मन्त्रः साधकाऽभीष्टसिद्धिदः ॥ १७ ॥ देवं संपूजयेत्पीठे वामादिनवशक्तिके ॥ वामा ज्येष्ठा तथा रौद्री काली कलपदादिका ॥ १८ ॥
विकारिण्याह्वया प्रोक्ता बलाद्या विकारिण्यथ ॥ बलप्रमथनी पश्चात्सर्वभूतदमन्यथ ॥ १९ ॥ मनोन्मनीति संप्रोक्ताः शैवपीठस्य शक्तयः॥
नमो भगवते पश्चात्सकलादि वदेत्ततः ॥ २० ॥ गुणात्मशक्तिभक्ताय ततोऽनंताय तत्परम् ॥ योगपीठात्मने भूयो नमस्तारादिको मनुः ॥
॥२१॥ अमुना मनुना दद्यादासनं गिरिजापतेः ॥ मूर्तिं मूलेन संकल्प्य तत्रावाह्य यजेच्छिवम् ॥ २२ ॥ कर्णिकायां यजेन्मूर्तीरीशमीशानदि
ग्गजम् ॥ शुद्धस्फटिकसंकाशं दिक्षु तत्पुरुषादिका ॥ २३ ॥ पीतांजनश्वेतरक्ताः प्रधानसदृशायुधाः ॥ चतुर्वक्त्रसमायुक्ता यथावत्ताः प्रपूजयेत् ॥
॥ २४ ॥ कोणेष्वर्चेन्निवृत्त्याद्यास्तेजोरूपाः कलाः क्रमात् ॥ अङ्गानि केसरस्थानि विघ्नेशान्पन्नगान्यजेत् ॥ २५ ॥ अनंतं सुखनामानं शिवोत्त
ममनंतरम् ॥ एकनेत्रमेकरुद्रं त्रिमूर्तिं तदनंतरम् ॥ २६ ॥ पश्चाच्छ्रीकंठनामानं शिखंडिनमिति क्रमात् ॥ रक्तपीतसितारक्तकृष्णरक्तांजनासितान्
॥ २७ ॥ किरीटार्पितबालेंदून्पद्मस्थान्भूषणान्वितान् ॥ त्रिनेत्रान्छूलवज्रास्त्रचापहस्तान्मनोरमान् ॥ २८ ॥ उत्तरादि यजेत्पश्चाद्रुद्रं चंडेश्वरं
पुनः ॥ ततो नंदिमहाकालौ गणेशं वृषभं पुनः ॥ २९ ॥ अथ भृंगिं रिटिं स्कंदमेतान्पद्मासनस्थितान्॥ स्वर्णतोयारुणश्याममुक्तेंदुसितपाटलान्
॥ ३० ॥ इंद्रादयस्ततः पूज्या वज्राद्यायुधसंयुताः ॥ इत्थं संपूजयेद्देवं सहस्रं नित्यशो जपेत् ॥ ३१ ॥ सर्वपापविनिर्मुक्तः प्राप्नुयाद्वांछितं
श्रियम् ॥ द्विसहस्रं जपन् रोगान्मुच्यते नात्र संशयः ॥ ३२ ॥ त्रिसहस्रं जपन्मंत्रं दीर्घमायुरवाप्नुयात् ॥सहस्रवृद्ध्या प्रजपन्सर्वकामानवाप्नुयात् ॥
॥ ३३ ॥ आज्यान्वितैस्तिलैः शुद्धैर्जुहुयाल्लक्षमादरात् ॥ उत्पातजनितान् क्लेशान्नाशयेन्नात्र संशयः ॥ ३४ ॥ शतलक्षं जपन्साक्षाच्छिवो भवति
मानवः ॥ षडक्षरः शक्तिरुद्धः कथितोऽष्टाक्षरो मनुः ॥ ३५ ॥ ऋषिश्छन्दः पुरा प्रोक्तो देवता स्यादुमापतिः ॥ अंगानि पूर्वमुक्तानि सौम्यमीशं विचिं

तयेत् ॥ ३६ ॥ बंधूकाभं त्रिनेत्रं च शशिखंडधरं विभुम् ॥ स्मेरास्यं स्वकरैः शूलं कपालं वरदाभये॥३७॥वहंतं चारुभूषाढ्यं वामोरुस्थाद्रिकन्यया॥
भुजेनाश्लिष्टदेहं तं चिंतयेन्मनसा हृदि ॥ ३८ ॥ मनुलक्षं जपेन्मंत्रं तत्सहस्रं यथाविधि ॥ जुहुयान्मधुरासिक्तैरारग्वधसमिद्वरैः ॥ ३९ ॥ प्राक्प्रोक्ते
पूजयेत्पीठे गंधपुष्पैरुमापतिम् ॥ अंगावृत्तैर्बहिः पूज्या हृल्लेखाद्या यथापुरा ॥ ४० ॥ मध्यप्राग्दक्षिणोदीच्यपश्चिमेषु विधानतः ॥ यजेत्पूर्वादिप
त्रेषु वृषभाद्याननुक्रमात् ॥ ४१ ॥ शूलटंकाक्षवलयकमंडलुलसत्करम् ॥ रक्ताकारं त्रिनयनं चंडेशमथ पूजयेत् ॥ ४२ ॥ चक्रशंखाभयाभीष्ट
करां मरकतप्रभाम् ॥ दुर्गां प्रपूजयेत्सौम्यां त्रिनेत्रां चारुभूषणाम् ॥ ४३ ॥ कल्पशाखांतरे धंटां दधानं द्वादशेक्षणम् ॥ बालार्काभं शिशुं कांतं
षण्मुखं पूजयेत्ततः ॥ ४४ ॥ नंदिनं च यजेत्सौम्यं ॥ रत्नभूषणमंडितम् परश्वधवराभीतिटंकिनं श्यामविग्रहम् ॥ ४५ ॥ पाशांकुशवराभीष्टधा
रिणं कुंकुमप्रभम् ॥ विघ्ननायकमभ्यर्चेच्चंद्रार्द्धकृतशेखरम् ॥ ४६ ॥ श्यामं रक्तोत्पलकरं वामांकन्यस्ततत्करम् ॥ द्विनेत्रं रक्तवस्त्राढ्यं सेनापति
मथार्चयेत् ॥ ४७ ॥ ततोऽष्टमातरः पूज्या ब्राह्म्याद्याः प्रोक्तलक्षणाः ॥ इंद्रादिकान्लोकपालान्स्वस्वदिक्षु समर्चयेत् ॥ ४८ ॥ वज्रादीनि तदस्त्राणि
तद्बहिः क्रमतोऽर्चयेत् ॥ एवं यो भजते मन्त्री देवं शंभुमुमापतिम् ॥ ४९ ॥ स भवेत्सर्वलोकानां सौभाग्यश्रेयसां पदम्॥ सांतसद्यांतसंयुक्तो बिन्दु
भूषितमस्तकः ॥ ५० ॥ प्रासादाख्यो मनुः प्रोक्तो भजतां सर्वसिद्धिदः ॥ षड्दीर्घयुक्तबीजेन षडंगविधिरीरितः ॥ ५१ ॥ षडर्णवत्तु मुन्याद्याः
प्रोक्ताश्चास्यापि नारद ॥ ईशानाद्या न्यसेन्मूर्तीरंगुष्ठादिषु देशिकः ॥५२॥ ईशानाख्यं तत्पुरुषमघोरं तदनंतरम् ॥ वामदेवाह्वयं सद्योजातबीजं क्रमा
द्विदुः॥५३॥उकाराद्यैः पञ्चह्रस्वौर्विलोमान्संयुतं च यत्॥तत्तदंगुलिभिर्भूयस्तत्तद्बीजादिकान्न्यसेत्॥५४॥शिरोवदनहृद्गुह्यपाददेशे यथाक्रमात्॥उर्द्धप्राग्द
क्षिणोदीच्यपश्चिमेषु मुखेषु च ॥ ५५ ॥ ततः प्रविन्यसेद्विद्वानष्टत्रिंशत्कलास्तनौ ॥ ईशानाद्या ऋचः सम्यगंगुलीषु यथाक्रमात ॥ ५६ ॥ अंगुष्ठा
दिकनिष्ठांतं न्यसेद्देशिकसत्तमः ॥ मूर्द्धास्यहृदयांभोजगुह्यपादे तु ताः पुनः ॥ ५७ ॥ वक्त्रे मूर्धादिषु न्यस्य भूयोऽङ्गानि प्रकल्पयेत् ॥
तारपंचकमुच्चार्य सर्वज्ञाय हृदीरितम् ॥ ५८ ॥ अमृते तेजो मालिनि तृप्तायेति पदं पुनः ॥ तदंते ब्रह्मशिरसे शिरोगं ज्वलितं ततः ॥ ५९ ॥
शिखि शिखाय परतोऽनादिबोधाय तच्छिखा ॥ वज्रिणे वज्रहस्ताय स्वतंत्राय तनुच्छदम् ॥६०॥सौं खौं हौमिति संभाष्य परतो तों गुह्यशक्तये ॥
नेत्रयुक्तं श्लीपशुं हुं फडंते नेत्रं शक्तये ॥ ६१ ॥ अस्त्रयुक्तं षडंगानि कुर्यादेवं समाहितः ॥ पूर्वदक्षिणपश्चात्प्राक्सौम्यमध्येषु पंचसु ॥ ६२ ॥ वक्त्रेषु
पंच विन्यस्येदीशानस्य कलाः क्रमात् ॥ ईशानः सर्वविद्यानां शशिनी प्रथमा कला ॥ ६३ ॥ ईश्वरः सर्वभूतानां मंगला तदनंतरम् ॥ ब्रह्माधि

पतिः शब्दांते ब्रह्मणोऽधिपतिः पुनः॥ ६४ ॥ ब्रह्मेष्टदा तृतीयास्याच्छिवो मे अस्तु तत्परा ॥ मरीचिः कथिता विप्र चतुर्थी च सदाशिवे ॥ ६५ ॥
अंशुमालिन्यथ परा प्रणवाद्या नमोन्विताः ॥ पूर्वपश्चिमयाम्योदग्वक्त्रेषु तदनंतरम् ॥ ६६ ॥ चतस्रो विन्यसेन्मंत्री पुरुषस्य कलाः क्रमात् ॥
आद्या तत्पुरुषायेति विद्महे शांतिरीरिता ॥ ६७ ॥ महादेवाय शब्दांते धीमहि स्यात्ततः परम् ॥ विद्या द्वितीया कथिता तन्नो रुद्रः पदं ततः
॥ ६८ ॥ प्रतिष्ठा कथिता पश्चात्तृतीया स्यात्प्रचोदयात् ॥ निवृत्तिस्तत्परा सर्वा प्रणवाद्या नमोन्विता ॥ ६९ ॥ हृदि चांसद्वये नाभिकुक्षौ
पृष्ठेऽथ वक्षसि ॥अथोरसि कला न्यस्येदष्टौ मंत्री यथाविधि ॥ ७० ॥ अघोरेभ्यस्तथा पूर्वमीरिता प्रथमा कला ॥ अथ घोरेभ्य इत्यंते मोहा
स्यात्तदनंतरम् ॥ ७१ ॥ अघोरांते क्षमा पश्चात्तृतीया परिकीर्तिता ॥ घोरतरेभ्यो निद्रा स्यात्सर्वेभ्यः सर्वतत्परा ॥ ७२ ॥ व्याधिस्तु पंचमी प्रोक्ता
शर्वेभ्यस्तदनंतरम् ॥ मृत्युर्निगदिता षष्ठी नमस्ते अस्तु तत्परम् ॥ ७३ ॥ क्षुधा स्यात्सप्तमी रुद्ररूपेभ्यः कथिता तृषा ॥ अष्टमी कथिता एता
ध्रुवाद्या नमसान्विताः ॥ ७४ ॥ गुह्ययुग्मोरुयुग्मेषु जानुजंघास्फिजोः पुनः ॥ कट्यां पार्श्वद्वये वामकला न्यस्येत्त्रयोदश ॥ ७५ ॥ प्रथमा वामदेवाय
नमोंते स्याद्रजा कला ॥ स्याज्ज्येष्ठाय नमो रक्षा द्वितीया परिकीर्तिता ॥ ७६ ॥ कलकामा पंचमी स्यात्ततो विकरणाय च ॥ नमः संयमनी षष्ठी
कथिता तदनन्तरम् ॥ ७७ ॥ बलक्रिया सप्तमीष्टा कला विकरणाय च॥नमो वृद्धिस्त्वष्टमी स्याद्बलांते च स्थिरा कला ॥ ७८ ॥ पश्चात्प्रमथ
नायांते नमो रात्रिरुदीरिता ॥ सर्वभूतदमनाय नमोंते भ्रामणी कला ॥ ७९ ॥ नमोंते मोहिनी प्रोक्ता मन्त्रज्ञैर्द्वादशी कला ॥ मनोन्मन्यै नमः
पश्चाज्ज्वरा प्रोक्ता त्रयोदशी ॥८० ॥ प्रणवाद्याश्चतुर्थ्यंता नमोंतास्तु प्रकीर्तिताः ॥ पाददोस्तननासासु मूर्ध्नि बाहुयुगे न्यसेत्॥८१॥ सद्योजातभवाः
सम्यगष्टौ मन्त्राः कलाः क्रमात् ॥ सद्योजातं प्रपद्यामि सिद्धिः स्यात्प्रथमा कला ॥ ८२ ॥ सद्योजाताय वै भूयो नमः स्याद् वृद्धिरीरिता ॥ भवे
द्युतिस्तृतीया स्यादभवे तदनन्तरम् ॥ ८३ ॥ लक्ष्मी चतुर्थी कथिता ततो नातिभवेपदम् ॥मेधा स्यात्पञ्चमी प्रोक्ता कलाभूयो भवस्व माम् ॥८४॥
प्राज्ञा समीरिता षष्ठी भवांते स्यात्प्रभा कला ॥ उद्भवाय नमः पश्चात्सुधा स्यादष्टमी कला ॥८५॥ प्रणवाद्याश्चतुर्थ्यंता कलाः सर्वा नमोन्विताः ॥
अष्टात्रिंशत्कलाः प्रोक्ताः पंच ब्रह्मपदादिकाः॥८६॥इति विन्यस्तदेहोऽसौ भवेद्गंगाधरः स्वयम् ॥ततः समाहितो भूत्वा ध्यायेदेवं सदाशिवम्॥८७॥
सितपीतासितश्वेतजपाभैः पंचभिर्मुखैः ॥ अक्षैर्युतं ग्लौमुकुटं कोटिपूर्णेंदुसंप्रभम् ॥ ८८ ॥ शूलं टंकं कृपाणं च वज्राग्न्यहिपतीन्करैः ॥ दधानं
भूषणोद्दीप्तं घण्टापाशवराभयान् ॥ ८९ ॥ एवं ध्यात्वा जपेन्मंत्रं पञ्चलक्षं मधुप्लुतैः ॥ प्रसूनैः करवीरोत्थैर्जुहुयात्तद्दशांशतः ॥ ९० ॥ पूर्वोदिते

यजेत्पीठे मूर्तिं मूलेन कल्पयेत् ॥ आवाह्य पूजयेत्तस्यां मूर्तावावरणैः सह ॥ ९१ ॥ शक्तिं डमरुकाभीतिवरान्संदधतं करैः ॥ ईशानं त्रीक्षणं शुभ्र
मैशान्यां दिशि पूजयेत् ॥ ९२ ॥ परश्वेणवराभीतीर्दधानं विद्युदुज्ज्वलम्॥चतुर्मुखं तत्पुरुषं त्रिनेत्रं पूर्वतोऽर्चयेत् ॥९३॥ अक्षस्रजं वेदपाशौ ऋषिं
डमरुकं ततः ।' खट्वांगं निशितं शूलं कपालं बिभ्रतं करैः ॥९४॥ अंजनाभं चतुर्वक्त्रं भीमदंतं भयावहम् ॥ अघोरं त्रीक्षणं याम्ये पूजयेन्मंत्रवित्तमः
॥ ९५ ॥ कुंकुमाभचतुर्वक्त्रं वामदेवं त्रिलोचनम् ॥ हरिणाक्षगुणाभीतिवरहस्तं चतुर्मुखम् ॥ ९६ ॥ बालेंदुशेखरोल्लासिमुकुटं पश्चिमे यजेत् ॥
कर्पूरेंदुनिभं सौम्यं सद्योजातं त्रिलोचनम् ॥ ९७ ॥ वराभयाक्षवलयकुठारान्दधतं करैः ॥ विलासिनं स्मेरवक्त्रं सौम्ये सम्यक्समर्चयेत् ॥ ९८ ॥
कोणेष्वर्चेन्निवृत्त्याद्यास्तेजोरूपाः कलाः क्रमात् ॥ विघ्नेश्वराननन्ताद्यान्पत्रेषु परितो यजेत् ॥९९॥उमादिकास्ततो बाह्ये शक्राद्यानायुधैः सह॥इति
संपूज्य देवेशं भक्त्या परमया युतः ॥ १०० ॥ प्रीणयेन्नृत्यगीताद्यैः स्तोत्रैर्मंत्री मनोहरैः ॥ तारो मायावियद्बिंदुमनुस्वरसमन्वितः ॥ १०१ ॥ पञ्चा
क्षरसमायुक्तो वसुवर्णो मनुर्मतः ॥ पंचाक्षरोक्तवत्कुर्यादंगन्यासादिकं बुधः ॥ १०२ ॥ सिंदूराभं लसद्रत्नमुकुटं चन्द्रमौलिनम् ॥ दिव्यभूषांगरागं
च नागयज्ञोपवीतिनम् ॥१०३ ॥ वामोरुस्थप्रियोरोजन्यस्तहस्तं च बिभ्रतम् ॥ वेदटंकेष्टमभयं ध्यायेत्सर्वेश्वरं शिवम् ॥ १०४ ॥ अष्टलक्षं जपेन्मंत्रं
तत्सहस्रं घृतान्वितैः ॥ पायसैर्जुहुयात्पीठे मूर्तिं संकल्प्य मूलतः ॥ १०५ ॥ अंगैरावरणं पूर्वमनंताद्यैरनन्तरम् ॥ उमादिभिः समुद्दिष्टं तृतीयं
लोकनायकैः ॥ १०६ ॥ चतुर्थं पंचमं तेषामायुधैः परिकीर्तितम् ॥ एवं प्रतिदिनं देवं पूजयेत्साधकोत्तमः ॥ १०७ ॥ पुत्रपौत्रादिगां लक्ष्मीं संप्राप्य
ह्यत्र मोदते ॥ तारः स्थिरा सकर्णेंदुर्भृगुः सर्गसमन्वितः ॥ १०८ ॥ अक्षरात्मा निगदितो मंत्रो मृत्युञ्जयात्मकः ॥ ऋषिः कहोलो देव्यादिगायत्री
छन्द ईरितम् ॥ १०९॥मृत्युञ्जयो महादेवो देवतास्य समीरितः॥भृगुणा दीर्घयुक्तेन षडंगानि समाचरेत्॥११०॥चंद्रार्कहुतभुङ्नेत्रं स्मितास्यं युग्मप
द्मगम्॥मुद्रापाशैणाक्षसूत्रलसत्पाणिं शशिप्रभम् ॥१११॥ भालेंदुविगलत्पीयूषप्लुतांगमलंकृतम् ॥ हाराद्यैर्निजकांत्या तु ध्यायेद्विश्वविमोहनम्॥ ११२॥
गुणलक्षं जपेन्मंत्रं तद्दशांशं हुनेत्सुधीः ॥ अमृताशकलैः शुद्धदुग्धाज्यसमभिप्लुतैः॥११३॥ शैवे संपूजयेत्पीठे मूर्तिं संकल्पमूलतः॥अंगावरणमाराध्य
पश्चाल्लोकेश्वरान्यजेत् ॥ ११४ ॥ तदस्त्राणि ततो बाह्ये पूजयेत्साधकोत्तमः ॥ जपपूजादिभिः सिद्धे मंत्रेऽस्मिन्मुनिसत्तम ॥ ११५ ॥ कुर्यात्प्रयोगा
न्कल्पोक्तानभीष्टफलसिद्धये ॥ दुग्धसिक्तैः सुधाखंडैर्हुत्वा प्रत्यहमादरात् ॥ ११६ ॥ सहस्रमांसपर्यंतं लभेदायुर्धनं सुतान् ॥ सुधावटतितान्पूर्वां
पयः सर्पिः पयो हविः ॥ ११७ ॥ सप्त द्रव्याणि वारेषु क्रमाद्दशशतं हुनेत् ॥ सप्ताधिकान् द्विजान्नित्यं भोजयेन्मधुरान्वितम् ॥ ११८ ॥ ऋत्वि

भ्यो दक्षिणां दद्यादरुणां गां पयस्विनीम् ॥ गुरुं संप्रीणयेत्पश्चाद्धनाद्यैर्देवताधिया ॥११९ ॥ अनेन विधिना साध्यः कृत्याद्रोहज्वरादिभिः ॥
विमुक्तः सुचिरं जीवेच्छरदां शतमञ्जसा ॥ १२० ॥ अभिचारे ज्वरे स्तंभघोरोन्मादे शिरोगदे॥असाध्यरोगे क्ष्वेडार्तौ मोहे दाहे महाभये॥१२१॥
होमोऽयं शांतिदः प्रोक्तः सर्वाभयप्रदायकः ॥ द्रव्यैरेतैः प्रजुहुयात्रिजन्मसु यथाविधि ॥ १२२ ॥ भोजयेन्मधुरैर्भोज्यैर्ब्राह्मणान्वेदपारगान् ॥ दीर्घ
मायुरवाप्नोति वांछितां विंदति श्रियम् ॥१२३॥ एकादशाहुतीर्नित्यं दूर्वाभिर्जुहुयाद् बुधः॥ अपमृत्युजिदेव स्यादायुरारोग्यवर्द्धनम् ॥१२४॥ त्रिज
न्मसु सुधावल्लीकाश्मीरीबकुलोद्भवैः ॥ समिद्वरैः कृतो होमः सर्वमृत्युगदापहः ॥ १२५ ॥ सिद्धार्थैर्विहितो होमो महाज्वरविनाशनः ॥ अपामार्ग
समिद्धोमः सर्वामयनिषूदनः ॥ १२६ ॥ दक्षिणामूर्तये पूर्वं तुभ्यं पदमनंतरम् ॥ वटमूलपदस्यांते प्रवदेच्च निवासिने ॥ १२७ ॥ ध्यानैकनिरतां
गाय पश्चाद् ब्रूयान्नमः पदम्॥ रुद्राय शंभवे तारशक्तिरुद्धोऽयमीरितः ॥ १२८ ॥ षट्त्रिंशदक्षरो मंत्रः सर्वकामफलप्रदः ॥ मुनिः शुकः समुद्दिष्ट
श्छंदोऽनुष्टुप्प्रकीर्तितम् ॥ १२९ ॥ देवता दक्षिणामूर्तिर्नाम्ना शंभुरुदीरितः ॥ तारशक्तियुतैः पूर्वं ह्रीमाद्यंतैश्च मंत्रजैः ॥ १३० ॥ षट्षष्ठाष्टेषु
वह्न्यर्णैर्हृदयाद्यंगकल्पनम् ॥ मूर्ध्नि भाले दृशोः श्रोत्रे गंडयुग्मे सनासिके ॥ १३१ ॥ आस्यदोःसंधिषु गले स्तनहृन्नाभिमंडले ॥ कट्यां गुह्ये
पुनः पादसंधिष्ववर्णान्न्यसेन्मनोः ॥ १३२ ॥ व्यापकं तारशक्तिभ्यां कुर्याद्देहे ततः परम् ॥ हिमाचलतटे रम्ये सिद्धकिन्नरसेविते ॥१३३॥ विविध
द्रुमशाखाभिः सर्वतो वारितातपे ॥सुपुष्पितैर्लताजालैराश्लिष्टकुसुमद्रुमे॥ १३४॥ शिलाविवरनिर्गच्छन्निर्झरानिलशीतले॥गायद्देवांगनासंघे नृत्यद्बर्हि
कदम्बके ॥ १३५॥ कूजत्कोकिलसंघेन मुखरीकृतदिङ्मुखे ॥ परस्परविनिर्मुक्तमात्सर्यमृगसेविते ॥ १३६ ॥ जलजैः स्थलजैः पुष्पैरामोदिभिरलं
कृते॥ आद्यैः शुकाद्यैर्मुनिभिरजस्रसुखसेविते ॥ १३७ ॥ पुरंदरमुखैर्देवैः सांगनाद्यैर्विलोकिते ॥ वटवृक्षं महोच्छ्रायं पद्मरागफलोज्ज्वलम् ॥१३८॥
गारुत्मतमयैः पत्रैर्निबिडैरुपशोभितम् ॥ नवरत्नमयाकल्पैर्लंबमानैरलंकृतम् ॥ १३९ ॥ संसारतापविच्छेदकुशलच्छायमद्भुतम्॥तस्य मूले सुसंक्लृ
प्तरत्नसिंहासने शुभे ॥ १४० ॥ आसीनमसिताकल्पं शरच्चंद्रनिभाननम् ॥ कैलासाद्रिनिभं त्र्यक्षं चंद्रांकितकपर्दकम् ॥ १४१ ॥ नासाग्रालोकनपरं
वीरासनसमास्थितम् ॥ भद्रपीठके कुरंगाढ्यजानुस्थकरपल्लवम् ॥ १४२ ॥ कक्षाबद्धभुजंगं च सुप्रसन्नं हरं स्मरेत् ॥ अयुतद्वयसंयुक्तगुणलक्षं
जपेन्मनुम् ॥ १४३ ॥ तद्दशांशं तिलैः शुद्धैर्जुहुयात्क्षीरसंयुतैः ॥ पंचाक्षरोदिते पीठे तद्विधानेन पूजयेत् १४४ ॥ भिक्षाहारो जपेन्मासं मनु
मेनं जितेंद्रियः ॥ नित्यं सहस्रमष्टार्द्धं परां विंदति वाक्छ्रियम् ॥ १४५ ॥ त्रिवारं जप्तमेतेन पयस्तु मनुना पिबेत् ॥ दक्षिणामूर्तिसंध्यानाच्छा

त्र्व्याख्यानकृद्भवेत् ॥ १४६ ॥ प्रणवो हृदयं पश्चाद्वदेद्भगवतेपदम् ॥ ङेयुतं दक्षिणामूर्तिं मह्यंमेधामुदीरयेत् ॥ १४७ ॥ प्रयच्छ ठद्वयांतोऽयं
द्वाविंशत्यक्षरो मनुः ॥ मुनिश्चतुर्मुखश्छंदो गायत्री देवतोदिता ॥ १४८ ॥ तारुद्धैः स्वरैर्दीर्घैः षड्भिरंगानि कल्पयेत् ॥ पदैर्मंत्रभवैर्वापि
ध्यानाद्यं पूर्ववन्मतम् ॥ १४९ ॥ लोहितोऽग्न्यासनः सद्यो बिंदुमान्प्रथमं ततः ॥ द्वितीयं वह्निबीजस्था दीर्घा शांतीन्दुभूषिता ॥ १५० ॥
तृतीया लांगलीशार्णमंत्रो बीजत्रयान्वितः ॥ नीलकंठात्मकः प्रोक्तो विषद्वयहरः परः ॥ १५१ ॥ हरद्वयं वह्निजाया हृदयं परिकीर्तितम् ॥
कपर्दिने पदयुगं शिरोमंत्र उदाहृतः ॥ १५२ ॥ नीलकंठाय ठद्वंद्वं शिखामंत्रोऽयमीरितः ॥ कालकूटपदस्यांते विषभक्षणङेयुतम् ॥ १५३ ॥
॥ १५३ ॥ हुं फट् कवचमुद्दिष्टं नीलकंठिन इत्यतः ॥ स्वाहांतमस्त्रमेतानि पंचागानि, मनोर्विदुः ॥ १५४॥मूर्ध्नि कंठे हृदंभोजे क्रमाद्बीजत्रयं
न्यसेत् ॥ बालार्कायुतवर्चस्कं जटाजूटेंदुशोभितम् ॥ १५५॥ नागभूषं जपवटीं शूलं ब्रह्मकपालकम् ॥ खट्वांगं दधतं दोर्भिस्त्रिनेत्रं चिंतयेद्धरम्
॥ १५६ ॥ लक्षत्रयं जपेन्मंत्रं तद्दशांशं ससर्पिषा ॥ हविषा जुहुयात्सम्यक्संस्कृते हव्यवाहने ॥१५७ ॥शैवं पीठे यजेद्देवं नीलकंठं समाहितः ॥मृत्यु
जयविधानेन विपद्वयविनाशनम् ॥ १५८ ॥ अग्निः संवर्तकादित्यरानिलौ षष्टिर्बिंदुमान् ॥ चिंतामणिरिति ख्यातं बीजं सर्वसमृद्धिदम् ॥
॥ १५९ ॥ कश्यपो मुनिराख्यातश्छंदोऽनुष्टुबुदाहृतम् ॥ अर्द्धनारीश्वरः प्रोक्तो देवता जगतां पतिः ॥ १६० ॥ रेफादिव्यंजनैः षड्भिः कुर्यादंगानि
षट् क्रमात् ॥ त्रिनेत्रं नीलमणिभं शूलपाशं कपालकम् ॥ १६१ ॥ रक्तोत्पलं च हस्ताब्जैर्दधतं चारुभूषणम् ॥ बालेंदुबद्धमुकुटमर्द्धनारी
श्वरं स्मरेत् ॥ १६२ ॥ एकलक्षं जपेन्मंत्रं त्रिशतं मधुराप्लुतैः ॥ तिलैर्हुनेद्यजेत्पीठे शैवेंगावरणैः सह ॥ १६३ ॥ वृषाद्यैर्मातृभिः पश्चाल्लोकपालै
स्तदायुधैः ॥ प्रासादाद्यं जपेन्मंत्रमयुतं रोगशांतये ॥ १६४ ॥ स्वाहावृत्तमिदं बीजं विगलत्परमामृतम् ॥ चन्द्रबिंबस्थितं मूर्ध्नि ध्यातं क्ष्वेडगदा
पहम् ॥ १६५ ॥ प्रतिलोमस्वराढ्या च बीजं वह्निगृहे स्थितम् ॥ रेफादिव्यंजनोल्लासिषट्कोणाभिवृतं बहिः ॥ १६६ ॥ भूतार्तस्य स्मृतं मूर्ध्नि भूत
माशु विनाशयेत् ॥ पीडितांगे स्मृतं तत्तत्पीडां शमयति ध्रुवम्॥ १६७ ॥ प्रणवो हृदयं पश्चान् ङेंतः पशुपतिः पुनः ॥ तारो नमो भूतपदं ततोऽधि
पतये ध्रुवम् ॥१६८॥ नमोरुद्राय युगलं खड्गरावण शब्दतः ॥ विहरद्वितयं पश्चान्नरीनृत्ययुगं पृथक् ॥ १६९॥ श्मशानभस्माचितांते शरण्याय ततः
परम् ॥ घंटाकपालमालादिधरायेति पदं पुनः ॥ १७० ॥ व्याघ्रचर्मपदस्यांते परिधानाय तत्परम् ॥ शशांककृतशब्दांते शेखराय ततःपरम्
॥ १७१ ॥ कृष्णसर्पपदात्पश्चाद्वदेद्यज्ञोपवीतिने ॥ वलयुग्मं चलायुग्ममनिवर्तकपालिने ॥ १७२ ॥ हनुयुग्मं ततो भूतांस्त्रासयद्वितयं पुनः ॥

भूयो मंडलमध्ये स्यात्कटयुग्मं ततः परम् ॥ १७३ ॥ रुद्रांकुशेन शमय प्रवेशययुगं ततः ॥ आवेशययुगं पश्चाच्चंडासिपदमीरयेत् ॥ १७४ ॥
धाराधिपतिरुद्रोऽयं ज्ञापयत्यग्निसुंदरी ॥ खड्गरावणमंत्रोऽयं सप्तत्यूर्द्ध्वशताक्षरः॥ १७५॥ भूताधिपतये स्वाहा पूजामन्त्रोऽयमीरितः॥ सिद्धमंत्रोऽयमु
दितो जपादेव प्रसिद्ध्यति ॥१७६॥ अयुतद्वितयात्पश्चाद्भूतादिग्रहणे क्षमः॥ माया स्फुरद्वयं भूयः प्रस्फुरद्वितयं पुनः ॥ १७७ ॥ घातयद्वितयं वर्म
फडंतः समुदीरितः ॥ एकपंचाशदर्णोऽयमघोरास्त्रं महामनुः ॥१७८॥अघोरोऽस्य मुनिः प्रोक्तस्त्रिवृच्छंद उदाहृतम् ॥ अघोररुद्रः संदिष्टो देवता
मन्त्रनायकः ॥ १७९ ॥ हृदयं पंचभिः प्रोक्तं शिरः षड्भिरुदाहृतम्॥ शिखा दशभिराख्याता नवभिः कवचं मतम् ॥ १८० ॥ वसुवर्णैः स्मृतं नेत्रं
दशार्णैरस्त्रमीरितम् ॥ मूर्ध्नि नेत्रास्यकंठेषु हृन्नाभ्यामूरुषु क्रमात् ॥ १८१ ॥ जानुजंघापदद्वंद्वे रुद्रभिन्नाक्षरैर्न्यसेत् ॥ पञ्चषट्काष्टवेदांगद्विब्धि
रसलोचनैः ॥ १८२ ॥ श्यामं त्रिनेत्रं सर्पाढ्यं रक्तवस्त्रांगरागकम् ॥ नानाशस्त्रधरं ध्यायेदघोराख्यं सदाशिवम् ॥ १८३ ॥ भूतवेतालकादीनां
क्षमोऽयं निग्रहे मनुः ॥ तारो वांतो धरासंस्थो वामनेत्रेंदुभूषितः ॥ १८४ ॥ पाशी बकः कर्णनेत्रवर्मास्त्रांतः षडक्षरः ॥ मनुः पाशुपतास्त्राख्यो
ग्रहक्षुद्रनिवारणः ॥ १८५ ॥ षड्भिर्वर्णैः षडंगानि हुंफडंतैः सजातिभिः ॥ मध्याह्नार्कप्रभं भीमं त्र्यक्षं पन्नगभूषणम् ॥ १८६ ॥ नानाशस्त्रं चतुर्वक्त्रं
स्मरेत्पशुपतिं हरम् ॥ वर्णलक्षं जपेन्मन्त्रं जुहुयात्तद्दशांशतः ॥१८७॥ गव्येन सर्पिषा मन्त्री संस्कृते हव्यवाहने ॥ शैवे पीठे यजेदंगमातृलोकेश्व
रायुधैः ॥ १८८ ॥ अनेन मन्त्रितं तोयं भूतग्रस्तमुखे क्षिपेत् ॥ सद्यः स मुंचति क्रंदान्महामंत्रप्रभावतः ॥ १८९ ॥ अनेन मन्त्रितान्बाणान्विसृजे
द्युधि यो नरः ॥ जयेत्क्षणेन निखिलाञ्छत्रून्पार्थ इवापरः ॥ १९० ॥ वर्णान्तिमो बिन्दुयुतः क्षेत्रपालाय हृन्मनुः ॥ १९१ ॥ ताराद्यो वसुवर्णोऽयं
क्षेत्रपालस्य कीर्तितः ॥ षड्दीर्घयुक्तबीजेन षडंगं न्यस्य चिन्तयेत् ॥ १९२॥ नीलाचलाभं दिग्वस्त्रं सर्पभूषं त्रिलोचनम् ॥ पिंगोर्ध्वकेशान्दधतं
कपालं च गदां स्मरेत् ॥ १९३ ॥ लक्षमेकं जपेन्मन्त्रं जुहुयात्तद्दशांशतः ॥ चरुणा घृतसिक्तेन ततः क्षेत्रे समर्चयेत् ॥ १९४॥ धर्मादिकल्पिते
पीठे सांगावरणमादरात् ॥ तस्मै सपरिवाराय बलिमेतेन निर्हरेत् ॥ १९५ ॥ पूर्वमेहिद्वयं पश्चाद्विद्विषं पुरुषं द्वयम् ॥ भञ्जयद्वितयं भूयो नर्तय
द्वितयं पुनः ॥ १९६ ॥ ततो विघ्नपदद्वन्द्वं महाभैरव तत्परम् ॥ क्षेत्रपालबलिं गृह्णद्वयं पावकसुन्दरी ॥१९७॥ बलिमन्त्रोऽयमाख्यातः सर्वकामफल
प्रदः ॥ सोपदेशं बृहत्पिण्डे कृत्वा रात्रिषु साधकः ॥ १९८ ॥ स्मृत्वा यथोक्तं क्षेत्रेशं तस्य हस्ते बलिं हरेत्॥ बलिनानेन सन्तुष्टः क्षेत्रपालः प्रय
च्छति॥१९९॥ कांतिं मेधां बलारोग्यं तेजः पुष्टिं यशः श्रियम्॥ उद्धरेद्बटुकं ङेंतमापदुद्धारणं तथा ॥२००॥ कुरुद्वयं ततः पश्चाद्बटुकं ङेंतमुच्चरेत् ॥

शक्तिरुद्धो ध्रुवादिश्च द्वाविंशत्यक्षरो मनुः ॥२०१॥ द्विचतुःसप्तवेदाब्धिचंद्रार्णैरंगकं मनोः॥बालं स्फटिकसंकाशं तल्लोललसिताननम्॥२०२॥दिव्या
कल्पैः प्रदीप्तांगं त्र्यक्षं दंडत्रिशूलिनम्॥ सुप्रसन्नं स्मरेद्भक्त्या भक्तानामभयंकरम्॥२०३॥वर्णलक्षं जपेन्मन्त्रं हविष्याशी जितेंद्रियः॥तद्दशांशं प्रजुहुयां
त्तिलैर्मधुरसंयुतैः॥२०४॥धर्मादिकल्पिते पीठे पंकजे चातिशोभने॥षट्कोणांतस्त्रिकोणस्थव्योमपंकजसंयुते॥२०५॥बटुकं पूजयेद्देवं सांगावरणकं क्रमात्॥
शत्रुपक्षस्य रुधिरं पिशितं च दिनेदिने ॥ भक्षयस्व गणैः सार्द्धं सारमेयसमन्वितः ॥ १०६॥बलिमन्त्रोऽयमाख्यातः शत्रुनाम्ना विदर्भितः ॥ अनेन
बलिना हृष्टो बटुकः परसैन्यकम् ॥ २०७ ॥ छित्वा गणेभ्यो विभजेदामिषं क्रुद्धमानसः ॥ अङ्कुशो वह्निशिखरो लांतदांत इतीरितः ॥ २०८ ॥
फडन्तश्चण्डमन्त्रोऽयं त्रिवर्णात्मा समीरितः ॥ अस्य त्रितो मुनिः प्रोक्तश्छन्दोऽनुष्टुबुदाहृतम् ॥२०९॥चंडेशो देवता प्रोक्ता वक्ष्यतेंऽगप्रकल्पनम् ॥
हृदयं दीप्तफट् प्रोक्तं ज्वलफट् शिर ईरितम् ॥ २१० ॥ शिखाज्वालिनि फट् प्रोक्ता वहफट् कवचं मतम् ॥ हलफट् नेत्रमाख्यातं सर्वज्वालिनि
फट् परम् ॥ २११ ॥ विन्यस्यैवं षडंगानि ततो देवं विचिंतयेत् ॥ चंडेश्वरं रक्ततनुं त्र्यक्षं रक्तांबरावृतम् ॥ २१२ ॥ दधतं च त्रिशूलाक्षमालाटं
ककमंडलून् ॥ वर्णलक्षं जपेन्मन्त्रं होमं कुर्याद्दशांशतः ॥ २१३ ॥ मधुरत्रयसंयुक्तैर्विशुद्धैस्तिलतंडुलैः ॥ पंचाक्षरोदिते पीठे मूर्तिं मूलेन कल्पयेत्
॥ २१४ ॥ कूर्मेशो बिंदुसंयुक्तस्ततश्चंडेश्वराय च ॥ हृदयं मनुराख्यातश्चंडेशस्य प्रपूजने ॥ २१५ ॥ अंगैर्मातृभिराशेशैर्वज्राद्यैरावृतिर्भवेत् ॥ शैवमं
त्रेषु निष्णातश्चण्डेश्वरमनुं जपेत् ॥ २१६ ॥ सर्वान्कामानवाप्नोति परत्रेह च नंदति ॥ शृणु नारद वक्ष्यामि दिव्यं माहेश्वरं स्तवम् ॥२१७॥यस्य
पाठेन पूजायां सिद्ध्यंति मनवोऽखिलाः ॥२१८॥ धराम्ब्वग्निमरुद्व्योममखेशेंद्वर्कमूर्तये ॥ सर्वभूतान्तरस्थाय शंकराय नमोनमः ॥ २१९ ॥ श्रुत्यं
तकृतवासाय श्रुतये श्रुतिजन्मने ॥ अतींद्रियाय महसे शाश्वताय नमोनमः ॥ २२० ॥ स्थूलसूक्ष्मविभागाभ्यामनिर्देश्याय शंभवे ॥
भवाय भवसंभूतदुःखहन्त्रे नमोनमः॥२२१॥तर्कमार्गातिदूराय तपसां फलदायिने॥चतुर्वर्गवदान्याय सर्वज्ञाय नमोनमः॥२२२॥आदिमध्यांतशून्याय
निरस्ताशेषभीतये॥योगिध्येयाय महते निर्गुणाय नमोनमः॥२२३॥विश्वात्मने विविक्ताय विलसच्चंद्रमौलये॥कंदर्प्पदर्प्पनाशाय कालहंत्रे नमोनमः
॥ २२४ ॥ विषाशनाय विहरद्वृषस्कंधमुपेयुषे ॥ सरिद्दामसमाबद्धकपर्दाय नमोनमः ॥ २२५ ॥ शुद्धाय शुद्धभावाय शुद्धानामंतरात्मने ॥
पुरांतकाय पूर्णाय पुण्यनाम्ने नमोनमः ॥ २२६ ॥ भक्ताय निजभक्तानां भुक्तिमुक्तिप्रदायिने ॥विवाससे निवासाय विश्वेषां पतये नमः॥ २२७ ॥
त्रिमूर्तिमूलभूताय त्रिनेत्राय त्रिशूलिने ॥ त्रिधाम्ने धामरूपाय जन्मदाय नमोनमः ॥ २२८॥ देवासुरशिरोरत्नकिरीटारुणितांघ्रये ॥ कांताय

निजकांतायै दत्तार्द्धाय नमोनमः ॥ २२९ ॥ एतत्स्तोत्रं महेशस्य प्रोक्तं सर्वाघनाशनम् ॥ शिवसान्निध्यदं विप्र सर्वतंत्रप्रकाशकम् ॥ २३० ॥
एतत्ते सुमहत्तन्त्रं सर्वदेवप्रकाशकम् ॥ लोकाभिलाषसंपूर्तिक्रियासाधनसंगतम् ॥ २३१ ॥ ये तु सामान्यतः प्रोक्तास्तंत्रेऽस्मिन्मनवो द्विज ॥ ते तु
लोकोपकाराय ज्ञातव्याः सिद्धिदायकाः ॥ २३२ ॥ विशेषतो वैष्णवा ये मंत्राः सर्वोत्तमोत्तमाः ॥ त एव साधनीयाः स्युश्चतुर्वर्गफलाप्तये ॥
॥ २३३ ॥ राममन्त्राः कृष्णमन्त्राः सांगा रासेशिमन्त्रकाः ॥ शाक्ताः सौराश्च गाणेशाः शैवाः प्रोक्ताः शुभावहाः ॥ २३४ ॥ तेषु स्वात्मप्रका
शाय भजेन्मुक्तिफलप्रदान् ॥ एतत्ते सर्वमाख्यातं यत्त्वयाभ्यर्थितं मुने ॥ देवताराधनं भक्त्या किं भूयः श्रोतुमिच्छसि ॥ २३५ ॥ इति श्री
बृहन्नार० पूर्वभागे बृहदु० तृतीयपादे महेशमन्त्रकथनं नामैकनवतितमोऽध्यायः॥९१॥ इति तृतीयः पादः॥सूत उवाच॥ एतच्छ्रुत्वा नारदस्तु कुमा
रस्य वचो मुदा ॥ पुनरप्याह सुप्रीतो जिज्ञासुः श्रेय उत्तमम् ॥ १ ॥ नारद उवाच ॥ साधु साधु महाभाग सर्वलोकोपकारकम् ॥ महातंत्रं त्वया
प्रोक्तं सर्वतंत्रोत्तमोत्तमम् ॥ २ ॥ अधुना श्रोतुमिच्छामि पुराणाख्यानमुत्तमम् ॥ यस्मिन्यस्मिन्पुराणे तु यद्यदाख्यानकं मुने ॥ तत्सर्वं
मे समाचक्ष्व सर्वज्ञस्त्वं यतो मतः ॥ ३ ॥ सूत उवाच ॥ तच्छ्रुत्वा वचनं विप्रा नारदस्य शुभावहम् ॥ पुराणाख्यानसंप्रश्नं कुमारः प्रत्युवाच ह ॥
॥ ४ ॥ सनत्कुमार उवाच ॥ पुराणाख्यानकं विप्र नानाकल्पसमुद्भवम् ॥ नानाकथासमायुक्तमद्भुतं बहुविस्तरम् ॥५ ॥ ऋषिः सनातनश्चायं
यथा वेद तथाऽपरः ॥ न वेद तस्मात्पृच्छ त्वं बहुकल्पविदां वरम् ॥ ६ ॥ श्रुत्वेत्थं नारदो वाक्यं कुमारस्य महात्मनः ॥
प्रणम्य विनयोपेतः सनातनमथाब्रवीत् ॥ ७ ॥ नारद उवाच ॥ ब्रह्मन्पुराणविच्छ्रेष्ठ ज्ञानविज्ञानतत्पर ॥ पुराणानां विभागं मे साकल्ये
नानुकीर्तय ॥ ८ ॥ यस्मिञ् श्रुते श्रुतं सर्वं ज्ञाते ज्ञातं कृते कृतम् ॥ ९ ॥ वर्णाश्रमाचारधर्मं साक्षात्कारमुपैष्यति ॥ कियंति च पुराणानि
कियत्संख्यानि मानतः ॥ १० ॥ किंकिमाख्यानयुक्तानि तद्वदस्व मम प्रभो ॥ चातुर्वर्ण्याश्रया नानाव्रतादीनां कथास्तथा ॥ ११ ॥
सृष्टिक्रमेण वंशानां कथाः सम्यक्प्रकाशय ॥ त्वत्तोऽधिको न चान्योऽस्ति पुराणाख्यानवित्प्रभो ॥ १२ ॥ तस्मादाख्याहि मह्यं त्वं सर्वसन्दे
हभंजनम् ॥ सूत उवाच ॥ ततः सनातनो विप्राः श्रुत्वा नारदभाषितम् ॥ १३ ॥ नारायणं क्षणं ध्यात्वा प्रोवाचाथ विदां वरः ॥ सनातन
उवाच ॥ साधु साधु मुनिश्रेष्ठ सर्वलोकोपकारिका ॥ १४ ॥ पुराणाख्यानविज्ञाने यज्जाता नैष्ठिकी मतिः ॥ तुभ्यं समभिधास्यामि यत्प्रोक्तं
ब्रह्मणा पुरा ॥ १५॥ मरीच्यादिकऋषिभ्यस्तु पुत्रस्नेहावृतात्मना ॥ एकदा ब्रह्मणः पुत्रो मरीचिर्नाम विश्रुतः ॥ १६ ॥ स्वाध्यायश्रुतसंपन्नो वेदवेदा

गपारगः ॥ उपसृत्य स्वपितरं ब्रह्माणं लोकभावनम् ॥ १७ ॥ प्रणम्य भक्त्या पप्रच्छ इदमेव मुनीश्वर ॥ पुराणाख्यानममलं यत्त्वं पृच्छसि मानद
॥ १८ ॥ मरीचिरुवाच ॥ भगवन्देवदेवेश लोकानां प्रभवाप्यय ॥ सर्वज्ञ सर्वकल्याण सर्वाध्यक्ष नमोऽस्तु ते ॥ १९ ॥ पुराणबीजमाख्यहि मह्यं
शुश्रूषवे पितः ॥ लक्षणं च प्रमाणं च वक्तारं पृच्छकं तथा ॥ २० ॥ ब्रह्मोवाच ॥ शृणु वत्स प्रवक्ष्यामि पुराणानां समुच्चयम् ॥ यस्मिन्ज्ञाते भवे
ज्ज्ञातं वाङ्मयं सचराचरम् ॥ २१ ॥ पुराणमेकमेवासीत्सर्वकल्पेषु मानद ॥ चतुर्वर्गस्य बीजं च शतकोटिप्रविस्तरम् ॥ २२ ॥ प्रवृत्तिः सर्वशा
स्त्राणां पुराणादभवत्ततः ॥ कालेनाग्रहणं दृष्ट्वा पुराणस्य महामतिः ॥ २३ ॥ हरिर्व्यासस्वरूपेण जायते च युगे युगे ॥ चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा
॥ २४ ॥ तदष्टादशधा कृत्वा भूर्लोके निर्दिशत्यपि ॥ अद्यापि देवलोके तु शतकोटिप्रविस्तरम् ॥ २५ ॥ अस्त्येव तस्य सारस्तु
चतुर्लक्षेण वर्ण्यते ॥ ब्राह्मं पाद्मं वैष्णवं च वायवीयं तथैव च ॥ २६ ॥ भागवतं नारदीयं मार्कंडेयं च कीर्तितम् ॥ आग्नेयं च
भविष्यं च ब्रह्मवैवर्त्तलिंगके ॥ २७ ॥ वाराहं च तथा स्कांदं वामनं कूर्मसंज्ञकम् ॥ मात्स्यं च गारुडं तद्वद्ब्रह्मांडाख्यमिति त्रिषट् ॥ २८ ॥
एकं कथानकं सूत्रं वक्तुः श्रोतुः समाह्वयम् ॥ प्रवक्ष्यामि समासेन निशामय समाहितः ॥ २९ ॥ ब्राह्मं पुराणं तत्रादौ सर्वलोक
हिताय वै ॥ व्यासेन वेदविदुषा समाख्यातं महात्मना ॥ ३० ॥ तद्वै सर्वपुराणाऽग्र्यं धर्मकामार्थमोक्षदम् ॥ नानाख्यानेतिहासाढ्यं दशसाह
समुच्यते ॥ ३१ ॥ देवानां च सुराणां च यत्रोत्पत्तिः प्रकीर्तिता ॥ प्रजापतीनां च तथा दक्षादीनां मुनीश्वर ॥ ३२ ॥ ततो लोकेश्वरस्यात्र सूर्यस्य
परमात्मनः ॥ वंशानुकीर्तनं पुण्यं महापातकनाशनम् ॥ ३३ ॥ यत्रावतारः कथितः परमानंदरूपिणः ॥ श्रीमतो रामचंद्रस्य चतुर्व्यूहावतारिणः ॥
॥ ३४ ॥ ततश्च सोमवंशस्य कीर्तनं यत्र वर्णितम् ॥ कृष्णस्य जगदीशस्य चरितं कल्मषापहम् ॥ ३५ ॥ द्वीपानां चैव सर्वेषां वर्षाणां
चाप्यशेषतः ॥ वर्णनं यत्र पातालस्वर्गाणां च प्रदृश्यते ॥ ३६ ॥ नरकाणां समाख्यानं सूर्यस्तुतिकथानकम् ॥ पार्वत्याश्च तथा जन्म विवाहश्च
निगद्यते ॥ ३७ ॥ दक्षाख्यानं ततः प्रोक्तमेकाम्रक्षेत्रवर्णनम् ॥ पूर्वभागोऽयमुदितः पुराणस्यास्य नारद ॥ ३८ ॥ अस्योत्तरे विभागे तु पुरु
षोत्तमवर्णनम् ॥ विस्तरेण समाख्यातं तीर्थयात्राविधानतः ॥ ३९ ॥ अत्रैव कृष्णचरितं विस्तरात्समुदीरितम् ॥ वर्णनं यमलोकस्य पितृश्राद्ध
विधिस्तथा ॥ ४० ॥ वर्णाश्रमाणां धर्माश्च कीर्तिता यत्र विस्तरात् ॥ विष्णुधर्मयुगाख्यानं प्रलयस्य च वर्णनम् ॥ ४१ ॥ योगानां च समा
ख्यानं सांख्यानां चापि वर्णनम् ॥ ब्रह्मवादसमुद्देशः पुराणस्य प्रशंसनम् ॥ ४२ ॥ एतद्ब्रह्मपुराणं तु भागद्वयसमन्वितम् ॥ वर्णितं सर्वपापघ्नं

सर्वसौख्यप्रदायकम् ॥ ४३ ॥ सूतशौनकसंवादं भुक्तिमुक्तिप्रदायकम् ॥ लिखित्वैतत्पुराणं यो वैशाख्यां हेमसंयुतम् ॥ ४४ ॥ जलधेनुयुतं चापि भक्त्या दद्याद्द्विजातये ॥ पौराणिकाय संपूज्य वस्त्रभोज्यविभूषणैः ॥ ४५ ॥ स वसेद्ब्रह्मणो लोके यावच्चंद्रार्कतारकम् ॥ यः पठेच्छृणुयाद्वापि ब्राह्मानुक्रमणीं द्विज ॥ ४६ ॥ सोऽपि सर्वपुराणस्य श्रोतुर्वक्तुः फलं लभेत् ॥ शृणोति यः पुराणं तु ब्राह्मं सर्वं जितेंद्रियः ॥ ४७ ॥ हविष्याशी च नियमात्स लभेद्ब्रह्मणः पदम् ॥ किमत्र बहुनोक्तेन यद्यदिच्छति मानवः ॥ तत्सर्वं लभते वत्स पुराणस्यास्य कीर्तनात् ॥ ४८ ॥ इति श्रीबृहन्ना० पूर्वभागे बृहदुपाख्याने चतुर्थपादे ब्राह्मपुराणेतिहासकथनं नाम द्विनवतितमोऽध्यायः ॥ ९२ ॥ ब्रह्मोवाच ॥ शृणु पुत्र प्रवक्ष्यामि पुराणं पद्मसंज्ञकम् ॥ महत्पुण्यप्रदं नृणां शृण्वतां पठतां मुदा ॥ १ ॥ यथा पंचेंद्रियः सर्वः शरीरीति निगद्यते ॥ तथेदं पंचभिः खंडैरुदितं पापनाशनम् ॥ २ ॥ पुलस्त्येन तु भीष्माय सृष्ट्यादिक्रमतो द्विज ॥ नानाख्यानेतिहासाद्यैर्यत्रोक्तो धर्मविस्तरः ॥ ३ ॥ पुष्करस्य च माहात्म्यं विस्तरेण प्रकीर्तितम् ॥ ब्रह्मयज्ञविधानं च वेदपाठादिलक्षणम् ॥ ४ ॥ दानानां कीर्तनं यत्र व्रतानां च पृथकपृथक् ॥ विवाहः शैलजायाश्च तारकाख्यानकं महत् ॥ ५ ॥ माहात्म्यं च गवादीनां कीर्तितं सर्वपुण्यदम् ॥ कालकेयादिदैत्यानां वधो यत्र पृथकपृथक् ॥ ६ ॥ ग्रहाणामर्चनं दानं यत्र प्रोक्तं द्विजोत्तम ॥ तत्सृष्टिखंडमुद्दिष्टं व्यासेन सुमहात्मना ॥ ७ ॥ पितृमात्रादिपूज्यत्वे शिवशर्मकथा पुरा ॥ सुव्रतस्य कथा पश्चाद्वृत्रस्य च वधस्तथा ॥ ८ ॥ पृथोर्वैनस्य चाख्यानं सुनीथायाः कथा तथा ॥ सुकलाख्यानकं चैव धर्माख्यानं ततः परम् ॥ ९ ॥ पितृशुश्रूषणाख्यानं नहुषस्य कथा ततः ॥ ययातिचरितं चैव गुरुतीर्थनिरूपणम् ॥ १० ॥ राज्ञा जैमिनिसंवादो बह्वाश्चर्य्यकथायुतः ॥ कथा ह्यशोकसुंदर्या हुंडदैत्यवधान्विता ॥ ११ ॥ कामोदाख्यानकं तत्र विहुंडवधसंयुतम् ॥ कुंजलस्य च संवादश्च्यवनेन महात्मना ॥ १२ ॥ सिद्धाख्यानं ततः प्रोक्तं खंडस्यास्य फलोहनम् ॥ सूतशौनकसंवादं भूमिखंडमिदं स्मृतम् ॥ १३ ॥ ब्रह्माण्डोत्पत्तिरुदिता यत्रार्षिभिश्च सौतिना ॥ सभूमिलोकसंस्थानं तीर्थाख्यानं ततः परम् ॥ १४ ॥ नर्मदोत्पत्तिकथनं तत्तीर्थानां कथाः पृथक् ॥ कुरुक्षेत्रादितीर्थानां कथा पुण्या प्रकीर्तिता ॥ १५ ॥ कालिंदीपुण्यकथनं काशीमाहात्म्यवर्णनम् ॥ गयायाश्चैव माहात्म्यं प्रयागस्य च पुण्यकम् ॥ १६ ॥ वर्णाश्रमानुरोधेन कर्मयोगनिरूपणम् ॥ व्यासजमिनिसंवादः पुण्यकर्मकथान्वितः ॥ १७ ॥ समुद्रमथनाख्यानं व्रताख्यानं ततः परम् ॥ ऊर्ज्जपंचाहमाहाम्यं स्तोत्रं सर्वापराधनुत् ॥ १८ ॥ एतत्स्वर्गाभिधं विप्र सर्वपातकनाशनम् ॥ रामाश्वमेधं प्रथमं रामराज्याभिषेचनम् ॥ १९ ॥ अगस्त्याद्यागमश्चैव पौलस्त्या

न्वयकीर्त्तनम् ॥ अश्वमेधोपदेशश्च हयचर्या ततः परम् ॥ २० ॥ नानाराजकथाः पुण्या जगन्नाथानुवर्णनम् ॥ वृन्दावनस्य माहात्म्यं सर्वपापप्र
णाशनम् ॥ २१ ॥ नित्यलीलानुकथनं यत्र कृष्णावतारिणः ॥ माधवस्नानमाहात्म्यं स्नानदानार्चने फलम् ॥ २२ ॥ धरावराहसंवादो यमब्राह्म
णयोः कथा ॥ संवादो राजदूतानां कृष्णस्तोत्रनिरूपणम् ॥ २३ ॥ शिवशंभुसमायोगो दधीचाख्यानकं ततः ॥ भस्ममाहात्म्यमतुलं शिवमाहात्म्य
मुत्तमम् ॥ २४ ॥ देवरातसुताख्यानं पुराणज्ञप्रशंसनम् ॥ गौतमाख्यानकं चैव शिवगीता ततः स्मृता ॥ २५ ॥ कल्पांतरे रामकथा भारद्वाजाश्रम
स्थिता ॥ पातालखंडमेतद्धि शृण्वतां पठतां सदा ॥ २६ ॥ सर्वपापप्रशमनं सर्वाभीष्टफलप्रदम् ॥ पर्वताख्यानकं पूर्वं गौर्यै प्रोक्तं शिवेन वै ॥२७॥
जालंधरकथा पश्चाच्छ्रीशैलाद्यनुकीर्तनम् ॥ सगरस्य कथा पुण्या ततः परमुदीरितम् ॥२८॥ गंगाप्रयागकाशीनां गयायाश्चाधिपुण्यकम् ॥ अन्नादि
दानमाहात्म्यं तन्महाद्वादशीव्रतम् ॥ २९ ॥ चतुर्विंशैकादशीनां माहात्म्यं पृथगीरितम् ॥ विष्णुधर्मसमाख्यानं विष्णुनामसहस्रकम् ॥ ३० ॥
कार्त्तिकव्रतमाहात्म्यं माघस्नानफलं ततः ॥ जम्बूद्वीपस्य तीर्थानां माहात्म्यं पापनाशनम् ॥ ३१ ॥ साभ्रमत्याश्च माहात्म्यं नृसिंहोत्पत्तिवर्णनम् ॥
देवशर्मादिकाख्यानं गीतामाहात्म्यवर्णनम् ॥३२॥ भक्त्याख्यानं च माहात्म्यं श्रीमद्भागवतस्य ह ॥ इन्द्रप्रस्थस्य माहात्म्यं बहुतीर्थकथान्वितम्
॥ ३३ ॥ मन्त्ररत्नाभिधानं च त्रिपाद्भूत्यनुवर्णनम् ॥ अवतारकथाः पुण्या मत्स्यादीनामतः परम् ॥ ३४ ॥ रामनामशतं दिव्यं तन्माहात्म्यं च
वाडव ॥ परीक्षणं च भृगुणा श्रीविष्णोर्वैभवस्य च ॥३५॥ इत्येतदुत्तरं खण्डं पंचमं सर्वपुण्यदम् ॥पंचखंडयुतं पाद्मं यः शृणोति नरोत्तमः ॥ ३६ ॥
स लभेद्वैष्णवं धाम भुक्त्वा भोगानिहेप्सितान् ॥ एतद्वै पंचपंचाशत्सहस्रं पद्मसंज्ञकम् ॥ ३७ ॥ पुराणं लेखयित्वा वै ज्येष्ठ्यां स्वर्णाब्जसंयुतम् ॥
यः प्रदद्यात्सुसत्कृत्य पुराणज्ञाय मानद ॥ ३८॥ स याति वैष्णवं धाम सर्वदेवनमस्कृतः ॥ पद्मानुक्रमणीमेतां यः पठेच्छृणुयात्तथा ॥३९॥ सोऽपि
पद्मपुराणस्य लभेच्छ्रवणजं फलम्॥४०॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे पद्मपुराणानुक्रमणिकावर्णनं नाम त्रिनवतितमोऽ
ध्यायः ॥ ९३ ॥श्रीब्रह्मोवाच ॥ शृणु वत्स प्रवक्ष्यामि पुराणं वैष्णवं महत् ॥ त्रयोविंशतिसाहस्रं सर्वपातकनाशनम् ॥ १ ॥ यत्रादिभागे निर्दिष्टाः
षडंशाः शक्तिजेन ह ॥ मैत्रेयायादिमे तत्र पुराणस्यावतारिकाम् ॥ २ ॥ आदिकारणसर्गश्च देवादीनां च संभवः ॥ समुद्रमथनाख्यानं दक्षादीनां
ततोऽन्वयः ॥ ३ ॥ ध्रुवस्य चरितं चैव पृथोश्चरितमेव च ॥ प्राचेतसं तथाख्यानं प्रह्लादस्य कथानकम् ॥ ४॥ पृथग्राज्याधिकाराख्या प्रथमोंऽश
इतीरितः ॥ प्रियव्रताऽन्वयाख्यानं द्वीपवर्षनिरूपणम् ॥५॥ पातालनरकाख्यानं सप्तस्वर्गनिरूपणम् ॥ सूर्यादिवारकथनं पृथग्लक्षणसंयुतम् ॥ ६ ॥

चरितं भरतस्याथ मुक्तिमार्गनिदर्शनम् ॥ निदाघऋभुसंवादो द्वितीयोंऽश उदाहृतः ॥ ७ ॥ मन्वन्तरसमाख्यानं वेदव्यासावतारकम् ॥ नरको
द्धारकं कर्म गदितं च ततः परम् ॥ ८ ॥ सगरस्यौर्वसंवादे सर्वधर्मनिरूपणम् ॥ श्राद्धकल्पं तथोद्दिष्टं वर्णाश्रमनिबन्धनम् ॥ ९ ॥
सदाचारश्च कथितो मायामोहकथा ततः ॥ तृतीयोंऽशोऽयमुदितः सर्वपापप्रणाशनः ॥१०॥ सूर्यवंशकथा पुण्या सोमवंशाऽनुकीर्तनम्॥चतुर्थेंऽशे
मुनिश्रेष्ठ नानाराजकथान्वितम् ॥ ११ ॥ कृष्णावतारसंप्रश्नो गोकुलीया कथा ततः ॥ पूतनादिवधो बाल्ये कौमारेऽघादिहिंसनम् ॥ १२॥कैशोरे
कंसहननं माथुरं चरितं तथा ॥ ततस्तु यौवने प्रोक्ता लीला द्वारवतीभवा ॥ १३ ॥ सर्वदैत्यवधो यत्र विवाहाश्च पृथग्विधाः ॥ यत्र स्थित्वा
जगन्नाथः कृष्णो योगेश्वरेश्वरः ॥ १४ ॥ भूभारहरणं चक्रे परेषां हननादिभिः ॥ अष्टावक्रीयमाख्यानं पंचमोंऽश इतीरितः ॥ १५ ॥ कलिजं
चरितं प्रोक्तं चातुर्विध्यं लयस्य च ॥ ब्रह्मज्ञानसमुद्देशः खांडिक्यस्य निरूपितः ॥ १६ ॥ केशिध्वजेन चेत्येष षष्ठोंऽशः परिकीर्तितः ॥ अतः परं
तु सूतेन शौनकादिभिरादरात् ॥ १७ ॥ पृष्टेन चोदिताः शश्वद्विष्णुधर्मोत्तराह्वयाः ॥ नानाधर्मकथाः पुण्या व्रतानि नियमा यमाः ॥ १८ ॥
धर्मशास्त्रं चार्थशास्त्रं वेदांतं ज्योतिषं तथा ॥ वंशाख्यानं प्रकरणात् स्तोत्राणि मनवस्तथा ॥ १९ ॥ नानाविद्यास्तथा प्रोक्ताः सर्वलोकोपका
रिकाः ॥ एतद्विष्णुपुराणं वै सर्वशास्त्रार्थसंग्रहम् ॥ २० ॥ वाराहकल्पवृत्तांतं व्यासेन कथितं त्विह ॥ यो नरः पठते भक्त्या यः शृणोति च सादरम्
॥ २१ ॥ तावुभौ विष्णुलोकं हि व्रजेतां भुक्तभोगकौ ॥ तल्लिखित्वा च यो दद्यादाषाढ्यां घृतधेनुना ॥ २२ ॥ सहितं विणुभक्ताय पुराणार्थविदे
द्विज ॥ स याति वैष्णवं धाम विमानेनार्कवर्चसा ॥ २३ ॥ यश्च विष्णुपुराणस्य समनुक्रमणीं द्विज ॥ कथयेच्छृणुयाद्वापि स पुराणफलं लभेत्
॥२४॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे विष्णुपुराणानुक्रमणीनिरूपणं नाम चतुर्नवतितमोऽध्यायः ॥ ९४ ॥ ब्रह्मोवाच॥
शृणु विप्र प्रवक्ष्यामि पुराणं वायवीयकम् ॥ यस्मिञ्च्छ्रुते लभेद्धाम रुद्रस्य परमात्मनः॥१॥चतुर्विंशतिसाहस्रं तत्पुराणं प्रकीर्तितम् ॥ श्वेतकल्पप्र
संगेन धर्मानत्राह मारुतः॥२॥तद्वायवीयमुदितं भागद्वयसमन्वितम् ॥ सर्गादिलक्षणं यत्र प्रोक्तं विप्र सविस्तरम्॥३॥मन्वंतरेषु वंशाश्च राज्ञां ये यत्र
कीर्तिताः ॥ गयासुरस्य हननं विस्तराद्यत्र कीर्तितम् ॥ ४ ॥ मासानां चैव माहात्म्यं माघस्योक्तं फलाधिकम् ॥ दानधर्मा राजधर्मा विस्तरेणोदिता
स्तथा ॥ ५ ॥ भूपातालककुब्व्योमचारिणां यत्र निर्णयः ॥ व्रतादीनां च पूर्वोऽयं विभागः समुदाहृतः ॥६ ॥ उत्तरे तस्य भागे तु नर्मदातीर्थवर्णनम्॥
शिवस्य संहितोक्ता वै विस्तरेण मुनीश्वर ॥७॥ यो देवः सर्वदेवानां दुर्विज्ञेयः सनातनः ॥स तु सर्वात्मना यस्यास्तीरे तिष्ठति संततम्॥८॥इदं ब्रह्म

हरिरिदं साक्षाच्चेदं परो हरः ॥ इदं ब्रह्म निराकारं कैवल्यं नर्मदाजलम् ॥ ९ ॥ ध्रुवं लोकहितार्थाय शिवेन स्वशरीरतः ॥ शक्तिः कापि सरिद्रूपा रेवेयमवतारिता ॥ १० ॥ ये वसंत्युत्तरे कूले रुद्रस्यानुचरा हि ते ॥ वसंति याम्यतीरे ये लोकं ते यांति वैष्णवम् ॥ ११ ॥ ॐकारेश्वरमारभ्य यावत्पश्चिमसागरः ॥ संगमाः पंच च त्रिंशन्नदीनां पापनाशनी ॥ १२ ॥ दशैकमुत्तरे तीरे त्रयोविंशतिर्दक्षिणे ॥ पंचत्रिंशत्तमः प्रोक्तो रेवासागरसंगमः ॥ १३ ॥संगमैः सहितान्येव रेवातीरद्वयेऽपि च ॥ चतुःशतानि तीर्थानि प्रसिद्धानि च संति हि॥ १४ ॥ षष्टितीर्थसहस्राणि षष्टिकोट्यो मुनीश्वर ॥ संति चान्यानि रेवायास्तीरयुग्मे पदेपदे ॥ १५ ॥ संहितेयं महापुण्या शिवस्य परमात्मनः ॥ नर्मदाचरितं यत्र वायुना परिकीर्तितम् ॥ १६ ॥ लिखित्वेदं पुराणं तु गुडधेनुसमन्वितम् ॥ श्रावण्यां यो ददेद्भक्त्या ब्राह्मणाय कुटुंबिने ॥ १७॥ रुद्रलोके वसेत्सोऽपि यावदिंद्राश्चतुर्दश ॥ यः श्रावयेद्वा शृणुयाद्वायवीयमिदं नरः ॥ १८ ॥ नियमेन हविष्याशी स रुद्रो नात्र संशयः ॥ यश्चानुक्रमणीमेतां शृणोति श्रावयेत्तथा ॥ १९ ॥ सोऽपि सर्वपुराणस्य फलं श्रवणजं लभेत् ॥ २० ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे वायुपुराणानुक्रमणीनिरूपणं नाम पञ्चनवतितमोऽध्यायः ॥ ९५ ॥ ब्रह्मोवाच ॥ मरीचे शृणु वक्ष्यामि वेदव्यासेन यत्कृतम् ॥ श्रीमद्भागवतं नाम पुराणं ब्रह्मसम्मितम् ॥ १ ॥ तदष्टादशसाहस्रं कीर्तितं पापनाशनम् ॥ सुरपादपरूपोऽयं स्कंधैर्द्वादशभिर्युतः ॥ २ ॥ भगवानेव विप्रेंद्र विश्वरूपी समीरितः ॥ तत्र तु प्रथमस्कंधे सूतर्षीणां समागमे ॥३ ॥ व्यासस्य चारितं पुण्यं पांडवानां तथैव च ॥ पारीक्षितमुपाख्यानमितीदं समुदाहृतम् ॥ ४ ॥ परीक्षिच्छुकसंवादे सृष्टिद्वयनिरूपणम् ॥ ब्रह्मनारदसंवादे देवताचारितामृतम् ॥ ५ ॥ पुराणलक्षणं चैव सृष्टिकारणसंभवः ॥ द्वितीयोऽयं समुदितः स्कंधो व्यासेन धीमता ॥ ६ ॥ चारितं विदुरस्याथ मैत्रेयेणास्य संगमः ॥ सृष्टिप्रकरणं पश्चाद्ब्रह्मणः परमात्मनः ॥ ७ ॥ कापिलं सांख्यमप्यत्र तृतीयोऽयमुदाहृतः ॥ सत्याश्चरितमादौ तु ध्रुवस्य चरितं ततः ॥ ८॥पृथोः पुण्यसमाख्यानं ततः प्राचीनबर्हिषम् ॥ इत्येष तुर्यो गदितो विसर्गे स्कंध उत्तमः ॥ ९ ॥ प्रियव्रतस्य चारितं तद्वंश्यानां च पुण्यदम् ॥ ब्रह्मांडांतर्गतानां च लोकानां वर्णनं ततः ॥ १० ॥ नरकस्थितिरित्येष संस्थाने पंचमो मतः॥ अजामिलस्य चारितं दक्षसृष्टिनिरूपणम् ॥ ११ ॥ वृत्राख्यानं ततः पश्चान्मरुतां जन्म पुण्यदम् ॥ षष्ठोऽयमुदितः स्कंधो व्यासेन परिपोषणे ॥ १२ ॥ प्रह्लादचारितं पुण्यं वर्णाश्रमनिरूपणम् ॥ सप्तमो गदितो वत्स वासनाकर्मकीर्तने ॥ १३ ॥ गजेंद्रमोक्षणाख्यानं मन्वंतरनिरूपणे ॥ समुद्रमथनं चैव बलिवैभवबंधनम् ॥ १४ ॥ मत्स्यावतारचरितमष्टमोऽयं प्रकीर्तितः ॥ सूर्यवंशसमाख्यानं सोमवंशनिरूपणम् ॥ १५॥

वंश्यानुचरिते प्रोक्तो नवमोऽयं महामते॥कृष्णस्य बालचरितं कौमारं च व्रजस्थितिः॥१६॥कैशोरं मथुरास्थानं यौवनं द्वारकास्थितिः ॥ भूभारहरणं
चात्र निरोधे दशमः स्मृतः ॥ १७ ॥ नारदेन तु संवादो वसुदेवस्य कीर्तितः ॥ यदोश्च दत्तात्रेयेण श्रीकृष्णेनोद्धवस्य च ॥ १८ ॥ यादवानां
मिथोंतश्च मुक्तावेकादशः स्मृतः ॥ भविष्यकलिनिर्देशो मोक्षो राज्ञः परीक्षितः ॥ १९ ॥ वेदशाखाप्रणयनं मार्कंडेयतपःक्रिया॥सौरी विभूतिरु
दिता सात्वती च ततः परम् ॥ २० ॥ पुराणसंख्याकथनमाश्रये द्वादशो ह्ययम् ॥ इत्येवं कथितं वत्स श्रीमद्भागवतं तव ॥ २१ ॥ वक्तुः श्रोतुश्चो
पदेष्टुरनुमोदितुरेव च ॥ साहाय्यकर्तुर्गदितं भक्तिभुक्तिविमुक्तिदम् ॥ २२ ॥ प्रौष्ठपद्यां पूर्णिमायां हेमसिंहसमन्वितम् ॥ देयं भागवतायेदं द्विजाय
प्रीतिपूर्वकम् ॥ २३ ॥ संपूज्य वस्त्रहेमाद्यैर्भगवद्भक्तिमिच्छता ॥ योऽप्यनुक्रमणीमेतां श्रावयेच्छृणुयात्तथा ॥ स पुराणश्रवणजं प्राप्नोति फल
मुत्तमम् ॥ २४॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे श्रीमद्भागवतानुक्रमणीनिरूपणं नाम षण्णवतितमोऽध्यायः ॥ ९६ ॥
श्रीब्रह्मोवाच ॥ शृणु विप्र प्रवक्ष्यामि पुराणं नारदीयकम् ॥ पचविंशतिसाहस्रं बृहत्कल्पकथाश्रयम् ॥ १ ॥ सूतशौनकसंवादः सृष्टिसंक्षेपवर्ण
नम् ॥ नानाधर्मकथाः पुण्याः प्रवृत्ते समुदाहृताः ॥ २ ॥ प्राग्भागे प्रथमे पादे सनकेन महात्मना ॥ द्वितीये मोक्षधर्माख्ये मोक्षोपायनिरूपणम् ॥
॥ ३ ॥ वेदांगानां च कथनं शुकोत्पत्तिश्च विस्तरात् ॥ सनंदनेन गदिता नारदाय महात्मने ॥ ४ ॥ महातंत्रे समुद्दिष्टं पशुपाशविमोक्षणम् ॥
मंत्राणां शोधनं दीक्षामंत्रोद्धारश्च पूजनम् ॥ ५ ॥ प्रयोगाः कवचं नामसहस्रं स्तोत्रमेव च ॥ गणेशसूर्यविष्णूनां शिवशक्त्योरनुक्रमात्॥६॥सनत्कु
मारमुनिना नारदाय तृतीयके ॥ पुराणलक्षणं चैव प्रमाणं दानमेव च ॥७॥ पृथक्पृथक् समुद्दिष्टं दानकालपुरःसरम् ॥ चैत्रादिसर्वमासेषु तिथीनांच
पृथक्पृथक् ॥ ८ ॥ प्रोक्तं प्रतिपदादीनां व्रतं सर्वाघनाशनम् ॥ सनातनेन मुनिना नारदाय चतुर्थके ॥ ९ ॥ पूर्वभागोऽयमुदितो बृहदाख्या
नसंज्ञितः ॥ अस्योत्तरे विभागे तु प्रश्न एकादशीव्रते ॥ १०॥ वसिष्ठनाथ संवादो मांधातुः परिकीर्तितः ॥ रुक्मांगदकथा पुण्यामोहिन्युत्पत्ति
कर्म च ॥ ११ ॥ वसुशापश्च मोहिन्यै पश्चादुद्धरणक्रिया ॥ गंगाकथा पुण्यतमा गयायात्रानुकीर्तनम् ॥ १२ ॥ काश्या माहात्म्यमतुलं पुरुषोत्तम
वर्णनम् ॥ यात्राविधानं क्षेत्रस्य बह्वाख्यानसमन्वितम् ॥ १३ ॥ प्रयागस्याथ माहात्म्यं कुरुक्षेत्रस्य तत्परम् ॥ हरिद्वारस्य चाख्यानं कामोदा
ख्यानकं तथा ॥ १४ ॥ बदरीतीर्थमाहात्म्यं कामाक्षायास्तथैव च ॥ प्रभासस्य च माहात्म्यं पुष्कराख्यानकं ततः ॥१५॥गौतमाख्यानकं
पश्चाद्वेदपादस्तवस्ततः ॥ गोकर्णक्षेत्रमाहात्म्यं लक्ष्मणाख्यानकं तथा ॥ १६ ॥ सेतुमाहात्म्यकथनं नर्मदातीर्थवर्णनम्॥ अवंत्याश्चैव माहात्म्यं

मथुरायास्ततः परम् ॥ १७॥ वृन्दावनस्य महिमा यशोर्ब्रह्मांतिके गतिः॥ मोहिनीचारितं पश्चादेवं वै नारदीयकम् ॥ १८॥ यः शृणोति नरो भक्त्या श्रावयेद्वा समाहितः ॥स याति ब्रह्मणो धाम नात्र कार्या विचारणा ॥ १९ ॥ यस्त्वेतदिषुपूर्णायां धेनूनां सप्तकान्वितम् ॥ प्रदद्याद्द्विजवर्याय स लभेन्मोक्षमेव च ॥ २० ॥ यश्चानुक्रमणीमेतां नारदीयस्य वर्णयेत् ॥ शृणुयाद्वैकचित्तेन सोऽपि स्वर्गगतिं लभेत् ॥२१॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे नारदीयपुराणानुक्रमणीकथनं नाम सप्तनवतितमोऽध्यायः ॥ ९७ ॥ श्रीब्रह्मोवाच ॥ अथ ते संप्रवक्ष्यामि मार्कंडेयाभिधं मुने ॥ पुराणं सुमहत्पुण्यं पठतां शृण्वतां सदा ॥ १ ॥ यत्राधिकृत्य शकुनीन्सर्वधर्मनिरूपणम् ॥ मार्कंडेयपुराणं तन्नवसाहस्रमीरितम् ॥ २ ॥ मार्कंडेयमुनेः प्रश्नो जैमिनेः प्राक्समीरितः ॥ पक्षिणां धर्मसंज्ञानां ततो जन्मनिरूपणम् ॥ ३ ॥ पूर्वजन्मकथा चैषां विक्रिया चा दिवस्पतेः ॥ तीर्थयात्रा बलस्याथ द्रौपदेयकथानकम् ॥ ४ ॥ हरिश्चंद्रकथा पुण्या युद्धमाडीबकाभिधम् ॥ पितापुत्रसमाख्यानं दत्तात्रेयकथ ततः ॥ ५ ॥ हैहयस्याथ चरितं महाख्यानसमन्वितम् ॥ मदालसाकथा प्रोक्ता ह्यलर्कचरितान्विता ॥ ६ ॥ सृष्टिसंकीर्तनं पुण्यं नवधा पारकीर्तितम् ॥ कल्पांतकालनिर्देशो यक्षसृष्टिनिरूपणम् ॥ ७ ॥ रुद्रादिसृष्टिरप्युक्ता द्वीपचर्यानुकीर्तनम् ॥ मनूनां च कथा नाना कीर्तिताः पापहारिकाः ॥ ८ ॥ तासु दुर्गाकथात्यंतं पुण्यदा चाष्टमेंऽतरे ॥ तत्पश्चात्प्रणवोत्पत्तिस्त्रयीतेजःसमुद्भवा ॥ ९ ॥ मार्तंडस्य च जन्माख्या तन्माहात्म्यसमन्विता ॥ वैवस्वतान्वयश्चापि वत्सप्रीश्चरितं ततः ॥ १० ॥ खनित्रस्य ततः प्रोक्ता कथा पुण्या महात्मनः ॥ अविक्षिच्चरितं चैव किमिच्छव्रतकीर्त्तनम् ॥ ११ ॥ नरिष्यंतस्य चरितं इक्ष्वाकुचरितं ततः ॥ नलस्य चरितं पश्चाद्रामचन्द्रस्य सत्कथा ॥ १२॥ कुशवंशसमाख्यानं सोमवंशानुकीर्त्तनम् ॥ पुरूरवःकथा पुण्या नहुषस्य कथाद्भुता॥ १३ ॥ ययातिचरितं पुण्यं यदुवंशानुकीर्त्तनम् ॥ श्रीकृष्णबालचरितं माथुरं चरितं ततः ॥ १४ ॥ द्वारकाचरितं चाथ कथा सर्वावतारजा॥ ततः सांख्यसमुद्देशः प्रपञ्चासत्त्वकीर्तनम् ॥१५॥ मार्कंडेयस्य चरितं पुराणश्रवणे फलम् ॥ यः शृणोति नरो भक्त्या पुराणमिदमादरात्॥ १६॥ मार्कंडेयाभिधं वत्स स लभेत्परमां गतिम्॥ यस्तु व्याकुरुते चैतच्छैवं स लभते पदम्॥ १७॥ तत्प्रयच्छेह्लिखित्वा यः सौवर्णकारिसंयुतम् ॥ कार्तिक्यां द्विजवर्याय स लभेद्ब्रह्मणः पदम् ॥१८॥ शृणोति श्रावयेद्वापि यश्चानुक्रमणीमिमाम् ॥ मार्कंडेयपुराणस्य स लभेद्वांछितं फलम् ॥१९॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे मार्कण्डेयपुराणानुक्रमणीनिरूपणं नामाष्टनवतितमोऽध्यायः ॥९८॥ श्रीब्रह्मोवाच ॥ अथातः संप्रवक्ष्यामि तवाग्नेयपुराणकम्॥ईशानकल्पवृत्तांतं वसिष्ठायानलोऽब्रवीत्॥ १॥ तत्पंचदशसाहस्रं नाना

चरितमद्भुतम्॥पठतां शृण्वतां चैव सर्वपापहरं नृणाम्॥२॥प्रश्नः पूर्वं पुराणस्य कथा सर्वांवतारजा॥सृष्टिप्रकरणं चाथ विष्णुपूजादिकं ततः॥३॥अग्निकार्यं ततः पश्चान्मंत्रमुद्रादिलक्षणम् ॥ सर्वदीक्षाविधानं च अभिषेकनिरूपणम् ॥ ४ ॥ लक्षणं मंडलादीनां कुशापामार्जनं ततः ॥ पवित्रारोपणविधिर्देवालयविधिस्ततः ॥ ५ ॥ शालग्रामादिपूजा च मूर्तिलक्ष्म पृथक्पृथक् ॥ न्यासादीनां विधानं च प्रतिष्ठापूर्तकं ततः ॥ ६ ॥ विनायकादिपूजा च नानादीक्षाविधिः परम् ॥ प्रतिष्ठा सर्वदेवानां ब्रह्मांडस्य निरूपणम् ॥ ७ ॥ गंगादितीर्थमाहात्म्यं द्वीपवर्षानुवर्णनम् ॥ ऊर्द्धाधोलोकरचना ज्योतिश्चक्रनिरूपणम् ॥ ८ ॥ ज्योतिषं च ततः प्रोक्त शास्त्रं युद्धजयार्णवम् ॥षट्कर्म च ततःप्रोक्तं मंत्रमंत्रौषधीगणः ॥ ९ ॥ कुब्जिकादिसमर्चत्वं षोढा न्यासविधिस्तथा ॥ कोटिहोमविधानं च मन्वंतरनिरूपणम् ॥ १० ॥ ब्रह्मचर्यादिधर्माश्च श्राद्धकल्पविधिस्ततः ॥ ग्रहयज्ञस्ततः प्रोक्तो वैदिकस्मार्तकर्म च ॥ ११ ॥ प्रायश्चित्तानुकथनं तिथीनां च व्रतादिकम् ॥ वारव्रतानुकथनं नक्षत्रव्रतकीर्तनम् ॥ १२ ॥ मासिकव्रतनिर्द्देशो दीपदानविधिस्तथा ॥ नवव्यूहार्चनं प्रोक्तं नरकाणां निरूपणम् ॥ १३॥ व्रतानां चापि दानानां निरूपणमिहोदितम्॥ नाडीचक्रसमुद्देशः संध्याविधिरुत्तमः ॥ १४ ॥ गायत्र्यर्थस्य निर्द्देशो लिंगस्तोत्रं ततः परम् ॥ राज्याभिषेकमन्त्रोक्तिर्द्धर्मकृत्यं च भूभुजाम् ॥ १५ ॥ स्वप्नाध्यायस्ततः प्रोक्तः शकुनादिनिरूपणम् ॥ मंडलादिकनिर्द्देशो रत्नदीक्षाविधिस्ततः ॥ १६ ॥ रामोक्तनीतिनिर्द्देशो रत्नानां लक्षणं ततः॥धनुर्विद्या ततः प्रोक्ता व्यवहारप्रदर्शनम् ॥ १७ ॥ देवासुरविमर्दाख्या ह्यायुर्वेदनिरूपणम्॥गजादीनां चिकित्सा च तेषां शांतिस्ततः परम् ॥१८॥ गोनरादिचिकित्सा च नानापूजास्ततः परम् ॥ शांतयश्चापि विविधाश्छन्दः शास्त्रमतः परम् ॥१९॥ साहित्यं च ततः पश्चादेकार्णादिसमाह्वयाः ॥ सिद्धशब्दानुशिष्टिश्च कोशः सर्गादिवर्गकः ॥ २० ॥ प्रलयानां लक्षणं च शारीरकनिरूपणम् ॥ वर्णनं नरकाणां च योगशास्त्रमतः परम् ॥ २१ ॥ ब्रह्मज्ञानं ततः पश्चात्पुराणश्रवणे फलम् ॥ एतदाग्नेयकं विप्र पुराणं परिकीर्तितम् ॥ २२ ॥ तल्लिखित्वा तु यो दद्यात्सुवर्णकमलान्वितम् ॥ तिलधेनुयुतं चापि मार्गशीर्ष्यां विधानतः ॥२३॥ पुराणार्थविदे सोऽथ स्वर्गलोके महीयते ॥ एषानुक्रमणी प्रोक्ता तवाग्नेयस्य मुक्तिदा॥२४॥शृण्वतां पठतां चैव नृणां चेह परत्र च॥२५॥इति श्रीबृहन्नारदीयपुराणेपूर्वभागे बृहदुपाख्याने चतुर्थपादेऽग्निपुराणानुक्रमणीनिरूपणं नामैकोनशततमोऽध्यायः॥९९॥

श्रीब्रह्मोवाच ॥ अथ ते संप्रवक्ष्यामि पुराणं सर्वसिद्धिदम् ॥ भविष्यं भवतः सर्वलोकाभीष्टप्रदायकम् ॥ १ ॥ यत्राहं सर्वदेवानामादिकर्ता समुद्भूतः ॥ सृष्ट्यर्थं तत्र संजातो मनुः स्वायंभुवः पुरा ॥ २ ॥ स मां प्रणम्य पप्रच्छ धर्मं सर्वार्थसाधकम् ॥ अहं तस्मै तदा प्रीतः प्रावोचं धर्मसं

हिताम् ॥ ३ ॥ पुराणानां यदा व्यासो व्यासं चक्रे महामतिः ॥ तदा तां संहितां सर्वां पंचधा व्यभजन्मुनिः ॥ ४ ॥ अघोरकल्पवृत्तांतं नानाश्चर्यकथान्वितम् ॥ तत्रादिमं स्मृतं पर्व ब्राह्मं यत्रास्त्युपक्रमः ॥ ५ ॥ सूतशौनकसंवादे पुराणप्रश्नसंक्रमः ॥ आदित्यचरितप्रायः सर्वाख्यानसमन्वितः ॥६॥ सृष्ट्यादिलक्षणोपेतः शास्त्रसर्वस्वरूपकः॥पुस्तलेखकलेखानां लक्षणं च ततः परम्॥७॥संस्काराणां च सर्वेषां लक्षणं चात्र कीर्तितम् ॥ पक्षस्यादितिथीनां च कल्पाः सप्त च कीर्तिताः ॥ ८॥ अष्टम्याद्याः शेषकल्पा वैष्णवे पर्वणि स्मृताः ॥ शैवे च कायतो भिन्नाः सौरे चांत्यकथान्वयः ॥ ९ ॥ प्रतिसर्गाह्वयं पश्चान्नानाख्यानसमन्वितम् ॥ पुराणस्योपसंहारसहितं पर्व पंचमम् ॥ १०॥ एषु पंचसु पूर्वस्मिन् ब्रह्मणो महिमाधिकाः ॥ धर्मे कामे च मोक्षे तु विष्णोश्चापि शिवस्य च॥११॥द्वितीये च तृतीये च सौरे वर्गचतुष्टये ॥ प्रतिसर्गाह्वयं त्वंत्यं प्रोक्तं सर्वकथान्वितम् ॥ १२॥ सभविष्यं विनिर्दिष्टं पर्व व्यासेन धीमता ॥ चतुर्दशसहस्रं तु पुराणं परिकीर्तितम् ॥१३॥ भविष्यं सर्वदेवानां साम्यं यत्र प्रकीर्तितम् ॥ गुणानां तारतम्येन समं ब्रह्मेति हि श्रुतिः ॥ १४॥ तं लिखित्वा तु यो दद्यात्पौष्यां विद्वान्विमत्सरः ॥ गुडधेनुयुतं हेमवस्त्रमाल्यविभूषणैः ॥ १५ ॥ वाचकं पुस्तकं चापि पूजयित्वा विधानतः॥गंधाद्यैर्भोज्यभक्ष्यैश्च कृत्वा नीराजनादिकम्॥१६॥यो वै जितेंद्रियो भूत्वा सोपवासः समाहितः॥ अथ वैकहविष्याशी कीर्तयेच्छृणुयादपि ॥ १७ ॥ स मुक्तः पातकैर्घोरैः प्रयाति ब्रह्मणः पदम् ॥ योऽप्यनुक्रमणीमेतां भविष्यस्य निरूपिताम् ॥ ॥ १८ ॥ पठेद्वा शृणुयाच्चैतां भुक्तिं मुक्तिं च विंदति ॥ १९ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे भविष्यपुराणानुक्रमणीनिरूपणं नाम शततमोऽध्यायः ॥ १०० ॥ श्रीब्रह्मोवाच ॥ शृणु वत्स प्रवक्ष्यामि पुराणं दशमं तव ॥ ब्रह्मवैवर्तकं नाम वेदमार्गानुदर्शकम् ॥ १ ॥ सावर्णिर्यत्र भगवान्साक्षाद्देवर्षये स्थितः ॥ नारदाय पुराणार्थं प्राह सर्वमलौकिकम् ॥२॥ धर्मार्थकाममोक्षाणां सारः प्रीतिर्हरौ हरे ॥ तयोरभेदसिद्ध्यर्थं ब्रह्मवैवर्तमुत्तमम् ॥३ ॥ रथंतरस्य कल्पस्य वृत्तांतं यन्मयोदितम् ॥शतकोटिपुराणे तत्संक्षिप्य प्राह वेदवित् ॥ ४ ॥ व्यासश्चतुर्धा संव्यस्य ब्रह्मवैवर्तसंज्ञिते ॥ अष्टादशसहस्रं तत्पुराणं परिकीर्तितम् ॥ ५ ॥ ब्रह्मप्रकृतिविघ्नेशकृष्णखंडसमन्वितम् ॥ तत्र सूतर्षिसंवादे पुराणोपक्रमस्ततः ॥६॥ सृष्टिप्रकरणं त्वाद्यं ततो नारदवेधसोः ॥ विवादः सुमहान्यत्र द्वयोरासीत्पराभवः ॥ ७ ॥ शिवलोकगतिः पश्चाज्ज्ञानलाभः शिवात्मने॥शिववाक्येन तत्पश्चान्मरीचेर्नारदस्य तु ॥ ८ ॥ गमनं चैव सावर्णेर्ज्ञानार्थं सिद्धसेविते ॥ आश्रमे सुमहापुण्ये त्रैलोक्याश्चर्यकारिणि ॥९॥ एतद्धि ब्रह्मखंडं हि श्रुतं पापविनाशनम् ॥ ततः सावर्णिसंवादो नारदस्य समीरितः ॥ १० ॥ कृष्णमाहात्म्यसंयुक्तो नानाख्यानकथोत्तरम् ॥ प्रकृतेरंशभूतानां कला

नां चापि वर्णितम् ॥ ११ ॥ माहात्म्यं पूजनाद्यं च विस्तरेण यथास्थितम् ॥ एतत्प्रकृतिखंडं हि श्रुतं भूतिविधायकम् ॥ १२ ॥ गणेशजन्म
संप्रश्नः सपुण्यकमहाव्रतम् ॥ पार्वत्याः कार्तिकेयेन सह विघ्नेशसंभवम् ॥ १३ ॥ चरितं कार्तवीर्यस्य जामदग्न्यस्य चाद्भुतम् ॥ विवादः सुमहानासी
ज्जामदग्न्यगणेशयोः ॥ १४ ॥ एतद्विघ्नेशखंडं हि सर्वविघ्नविनाशनम् ॥ श्रीकृष्णजन्मसंप्रश्नो जन्माख्यानं ततोऽद्भुतम् ॥ १५ ॥ गोकुले गमनं
पश्चात्पूतनादिवधाद्भुताः ॥ बाल्यकौमारजा लीला विविधास्तत्र वर्णिताः ॥ १६ ॥ रासक्रीडा च गोपीभिः शारदी समुदाहृता ॥ रहस्ये
राधया क्रीडा वर्णिता बहुविस्तरा ॥ १७ ॥ सहाक्रूरेण तत्पश्चान्मथुरागमनं हरेः ॥ कंसादीनां वधे वृत्ते कृष्णस्य द्विजसंस्कृतिः ॥ १८ ॥ काश्य
सांदीपनेः पश्चाद्विद्योपादानमद्भुतम् ॥ यवनस्य वधः पश्चाद्द्वारकागमनं हरेः ॥ १९ ॥ नरकादिवधस्तत्र कृष्णेन विहितोऽद्भुतः ॥ कृष्णखंडमिदं
विप्र नृणां संसारखंडनम् ॥ २० ॥ पठितं च श्रुतं ध्यातं पूजितं चाभिवंदितम् ॥ इत्येतद्ब्रह्मवैवर्तपुराणं चात्यलौकिकम् ॥ २१ ॥ व्यासोक्तं चादि
संभूतं पठञ्छृण्वन्विमुच्यते ॥ विज्ञानाज्ञानशमनाद्घोरात्संसारसागरात् ॥ २२ ॥ लिखित्वेदं च यो दद्यान्माघ्यां धेनुसमन्वितम् ॥ ब्रह्मलोकम
वाप्नोति स मुक्तोऽज्ञानबंधनात् ॥ २३ ॥ यश्चानुक्रमणीं चापि पठेद्वा शृणुयादपि ॥ सोऽपि कृष्णप्रसादेन लभते वांछितं फलम् ॥ २४ ॥ इति श्रीबृहन्ना
रदीयपुराणे पूर्वभागे बृहदुपाख्याने ब्रह्मवैवर्तपुराणानुक्रमणीनिरूपणं नामैकोत्तरशततमोऽध्यायः ॥ १०१ ॥ ब्रह्मोवाच ॥ शृणु पुत्र प्रवक्ष्यामि
पुराणं लिंगसंज्ञितम् ॥ पठतां शृण्वतां चैव भुक्तिमुक्तिप्रदायकम् ॥ १ ॥ यच्च लिंगाभिधं तिष्ठन्वह्निलिंगे हरोऽभ्यधात् ॥ मह्यं धर्मादिसिद्ध्यर्थ
मग्निकल्पकथाश्रयम् ॥ २ ॥ तदेव व्यासदेवेन भागद्वयसमन्वितम् ॥ पुराणं लिंगमुदितं बह्वाख्यानविचित्रितम् ॥ ३ ॥ तदेकादशसाहस्रं हरमा
हात्म्यसूचकम् ॥ परं सर्वपुराणानां सारभूतं जगत्त्रये ॥ ४ ॥ पुराणोपक्रमे प्रश्नः सृष्टिः संक्षेपतः पुरा ॥ योगाख्यानं ततः प्रोक्तं कल्पाख्यानं ततः
परम् ॥ ५ ॥ लिंगोद्भवस्तदंबा च कीर्तिता हि ततः परम् ॥ सनत्कुमारशैलादिसंवादश्चाथ पावनः ॥ ६ ॥ ततो दाधीचचरितं युगधर्मनिरूपणम् ॥ ततो भुवन
कोशाख्या सूर्यसोमान्वयस्ततः ॥ ७ ॥ ततश्च विस्तरात्सर्गस्त्रिपुराख्यानकं तथा ॥ लिंगप्रतिष्ठा च ततः पशुपाशविमोक्षणम् ॥ ८ ॥ शिवव्रतानि च तथा सदा
चारनिरूपणम् ॥ प्रायश्चितान्यरिष्टानि काशीश्रीशैलवर्णनम् ॥ ९ ॥ अंधकाख्यानकं पश्चाद्वाराहचरितं पुनः ॥ नृसिंहचरितं पश्चाज्जलंधरवधस्ततः ॥ १० ॥
शैवं सहस्रनामाथ दक्षयज्ञविनाशनम् ॥ कामस्य दहनं पश्चाद्गिरिजायाः करग्रहः ॥ ११ ॥ ततो विनायकाख्यानं नृपाख्यानं शिवस्य च ॥ उपम
न्युकथा चापि पूर्वभाग इतीरितः ॥ १२ ॥ विष्णुमाहात्म्यकथनमंबरीषकथा ततः ॥ सनत्कुमारनंदीशसंवादश्च पुनर्मुने ॥ १३ ॥ शिवमाहा

त्म्यसंयुक्तः स्नानयागादिकं ततः ॥ सूर्यपूजाविधिश्चैव शिवपूजा च मुक्तिदा ॥ १४ ॥ दानानि बहुधोक्तानि श्राद्धप्रकरणं ततः ॥ प्रतिष्ठातं
त्रसुदितं ततोऽघोरस्य कीर्तनम् ॥ १५ ॥ वज्रेश्वरी महाविद्या गायत्रीमहिमा ततः॥ त्र्यंबकस्य च माहात्म्यं पुराणश्रवणस्य च ॥ १६ ॥ एवं चोपरि
भागस्ते लैंगस्य कथितो मया ॥ व्यासेन हि निबद्धस्य रुद्रमाहात्म्यसूचितः ॥ १७ ॥ लिखित्वैतत्पुराणं तु तिलधेनुसमन्वितम् ॥ फाल्गुन्यां
पूर्णिमायां यो दद्याद्भक्त्या द्विजातये ॥ १८ ॥ स लभेच्छिवसायुज्यं जरामरणवार्जितम् ॥ यः पटेच्छृणुयाद्वापि लैंगं पापापहं नरः ॥ १९ ॥ स
भुक्तभोगो लोकेऽस्मिन्नंते शिवपुरं व्रजेत् ॥ लिंगानुक्रमणीमेतां पठेद्यः शृणुयात्तथा ॥ २० ॥ तावुभौ शिवभक्तौ तु लोकद्वितयभोगिनौ ॥ जायेतां
गिरिजाभर्तुः प्रसादान्नात्र संशयः ॥ २१ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे लिंगपुराणानुक्रमणीनिरूपणं नाम द्व्युत्त
रशततमोऽध्यायः ॥१०२॥ ब्रह्मोवाच ॥ शृणु वत्स प्रवक्ष्यामि वाराहं वै पुराणकम् ॥ भागद्वययुतं शश्वद्विष्णुमाहात्म्यसूचकम्॥ १ ॥ मानवस्य तु
कल्पस्य प्रसंगं मत्कृतं पुरा ॥निबबंध पुराणेऽस्मिश्चतुर्विंशसहस्रके ॥२॥व्यासो हि विदुषां श्रेष्ठः साक्षान्नारायणो भुवि ॥ तत्रादौ शुभसंवादः स्मृतो
भूमिवराहयोः ॥३॥अथादिकृतवृत्तांते रंभस्य चरितं ततः ॥ दुर्जयस्य च तत्पश्चाच्छ्राद्धकल्प उदीरितः ॥ ४ ॥ महातपस आख्यानं गौर्युत्पत्तिस्ततः
परा॥विनायकस्य नागानां सेनान्यादित्ययोरपि॥५॥गणानां च तथा देव्या धनदस्य वृषस्य च॥आख्यानं सत्यतपसो व्रताख्यानसमन्वितम्॥६ ॥
अगस्त्यगीता तत्पश्चाद्रुद्रगीता प्रकीर्तिता॥महिषासुरविध्वंसमाहात्म्यं च त्रिशक्तिजम् ॥७॥पर्वाध्यायस्ततः श्वेतोपाख्यानं गोप्रदानिकम्॥इत्यादि
कृतवृत्तांतं प्रथमे दर्शितं मया॥८॥भगवद्धर्मके पश्चाद्व्रततीर्थकथानकम्॥द्वात्रिंशदपराधानां प्रायश्चित्तं शरीरगम्॥९॥तीर्थानां चापि सर्वेषां माहात्म्यं
पृथगीरितम् ॥ मथुराया विशेषेण श्राद्धादीनां विधिस्ततः ॥१०॥ वर्णनं यमलोकस्य ऋषिपुत्रप्रसंगतः ॥ विपाकः कर्मणां चैव विष्णुव्रतनिरूपणम्
॥११॥गोकर्णस्य च माहात्म्यं कीर्तितं पापनाशनम् ॥ इत्येवं पूर्वभागोऽयं पुराणस्य निरूपितः॥१२॥ उत्तरे प्रविभागे तु पुलस्त्यकुरुराजयोः ॥
संवादे सर्वतीर्थानां माहात्म्यं विस्तरात्पृथक् ॥ १३॥ अशेषधर्माश्चाख्याताः पौष्करं पुण्यपर्व च ॥इत्येवं तव वाराहं प्रोक्तं पापविनाशनम् ॥१४ ॥
पठतां शृण्वतां चैव भगवद्भक्तिवर्धनम् ॥ कांचनं गरुड कृत्वा तिलधेनुसमन्वितम् ॥ १५ ॥ लिखित्वैतच्च यो दद्याच्चैत्र्यां विप्राय भक्तितः ॥ स
लभेद्वैष्णवं धाम देवर्षिगणवंदितः ॥ १६ ॥ यो वानुक्रमणीमेतां शृणोत्यपि पठत्यपि ॥ सोऽपि भक्तिं लभेद्विष्णौ संसारोच्छेदकारिणीम् ॥ १७ ॥
इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे वाराहपुराणानुक्रमणीवर्णनं नाम त्र्युत्तरशततमोऽध्यायः॥१०३॥ ब्रह्मोवाच॥ शृणु वत्स

प्रवक्ष्यामि पुराणं स्कन्दसंज्ञकम् ॥ यस्मिन्प्रतिपदं साक्षान्महादेवो व्यवस्थितः ॥ १ ॥ पुराणे शतकोटौ तु यच्छैवं वर्णितं मया ॥ लक्षं तस्यार्थ
जातस्य सारो व्यासेन कीर्तितः ॥ २ ॥ स्कन्दाह्वयस्तत्र खण्डाः सप्तैव परिकल्पिताः ॥ एकाशीतिसहस्रं तु स्कान्दं सर्वांघकृतंनम् ॥३ ॥ यः
शृणोति पठेद्वापि स तु साक्षाच्छिवः स्थितः ॥ यत्र माहेश्वरा धर्माः षण्मुखेन प्रकाशिताः ॥ ४ ॥कल्पे तत्पुरुषे वृत्ताः सर्वसिद्धिविधायकाः ॥तस्य
माहेश्वरश्चाथ खंडः पापप्रणाशनः ॥ ५ ॥ किंचिन्न्यूनार्कसाहस्रो बहुपुण्यो बृहत्कथः ॥ सुचरित्रशतैर्युक्तः स्कन्दमाहात्म्यसूचकः ॥ ६ ॥
यत्र केदारमाहात्म्ये पुराणोपक्रमः पुरा ॥ दक्षयज्ञकथा पश्चाच्छिवलिंगार्चने फलम् ॥ ७ ॥ समुद्रमथनाख्यानं देवेंद्रचरितं ततः ॥ पार्वत्याः समुपा
ख्यानं विवाहस्तदनंतरम् ॥ ८ ॥ कुमारोत्पत्तिकथनं ततस्तारकसंगरः ॥ ततः पाशुपताख्यानं चंडाख्यानसमन्वितम् ॥ ९ ॥ द्यूतप्रवर्तनाख्यानं
नारदेन समागमः ॥ ततः कुमारमाहात्म्ये पंचतीर्थकथानकम् ॥ १० ॥ धर्मवर्मनृपाख्यानं नदीसागरकीर्तनम् ॥ इंद्रद्युम्नकथा पश्चान्नाडीजंघ
कथान्वितम् ॥ ११ ॥ प्रादुर्भावस्ततो मह्याः कथा दमनकस्य च ॥ महीसागरसंयोगः कुमारेशकथा ततः ॥१२ ॥ ततस्तारकयुद्धं च नाना
ख्यानसमन्वितम् ॥ वधश्च तारकस्याथ पंचलिंगनिवेशनम् ॥ १३ ॥ द्वीपाख्यानं ततः पुण्यमूर्द्ध्वलोकव्यवस्थितिः॥ ब्रह्मांडस्थितिमानं च वर्करे
शकथानकम् ॥ १४ ॥ महाकालसमुद्भूतिः कथा चास्य महाद्भुता ॥ वासुदेवस्य माहात्म्यं कोटितीर्थं ततः परम् ॥ १५ ॥ नानातीर्थसमाख्यानं
गुप्तक्षेत्रे प्रकीर्तितम् ॥ पांडवानां कथा पुण्या महाविद्याप्रसाधनम् ॥ १६ ॥ तीर्थयात्रासमाप्तिश्च कौमारमिदमद्भुतम् ॥ अरुणाचलमाहात्म्यं सनक
ब्रह्मसंकथा ॥ १७ ॥ गौरीतपःसमाख्यानं तत्तत्तीर्थनिरूपणम् ॥ माहिषासुरमाख्यानं वधश्चास्य महाद्भुतः ॥ १८॥ द्रोणाचले शिवास्थानं नित्यदा
परिकीर्तितम् ॥ इत्येष कथितः स्कांदे खंडो माहेश्वरोऽद्भुतः ॥ १९ ॥ द्वितीयो वैष्णवः खंडस्तस्याख्यानानि मे शृणु ॥ प्रथमं भूमिवाराहसमा
ख्यानं प्रकीर्तितम् ॥ २० ॥ यत्र वेंकटकुध्रस्य माहात्म्यं पापनाशनम् ॥ कमलायाः कथा पुण्या श्रीनिवासस्थितिस्ततः ॥ २१ ॥ कुला
लाख्यानकं चात्र सुवर्णमुखरी कथा ॥ नानाख्यानसमायुक्ता भारद्वाजकथाद्भुता ॥ २२ ॥ मतंगांजनसंवादः कीर्तितः पापनाशनः ॥ पुरुषो
त्तममाहात्म्यं कीर्तितं चोत्कले ततः ॥ २३ ॥ मार्कंडेयसमाख्यानमंबरीषस्य भूपतेः ॥ इंद्रद्युम्नस्य चाख्यानं विद्यापतिकथा शुभा ॥ २४ ॥जैमिनेः
समुपाख्यानं नारदस्यापि वाडव ॥ नीलकंठसमाख्यानं नरसिंहोपवर्णनम् ॥ २५ ॥ अश्वमेधकथा राज्ञो ब्रह्मलोकगतिस्तथा ॥ रथयात्राविधिः
पश्चाज्जन्मस्थानविधिस्तथा ॥ २६ ॥ दक्षिणामूर्त्युपाख्यानं गुंडिवाख्यानकं ततः ॥ रथरक्षाविधानं च शयनोत्सवकीर्तनम् ॥२७॥ श्वेतोपाख्या

नमत्रोक्तं पृथूत्सवनिरूपणम् ॥ दोलोत्सवो भगवतो व्रतं सांवत्सराभिधम् ॥ २८ ॥ पूजा चाकामिका विष्णोरुद्दालकनियोगतः ॥ योगसाधनम
त्रोक्तं नानायोगनिरूपणम् ॥ २९ ॥ दशावतारकथनं स्नानादिपरिकीर्तनम् ॥ ततो बदरिकायाश्च माहात्म्यं पापनाशनम् ॥ ३० ॥ अग्न्यादितीर्थ
माहात्म्यं वैनतेयशिलाभवम् ॥ कारणं भगवद्वासे तीर्थं कापालमोचनम् ॥ ३१ ॥ पंचधाराभिधं तीर्थं मेरुसंस्थापनं तथा ॥ ततः कार्तिकमाहात्म्ये
माहात्म्यं मदनालसम् ॥३२॥धूम्रकेशसमाख्यानं दिनकृत्यानि कार्तिके ॥ पंचभीष्मव्रताख्यानं कीर्तितं भुक्तिमुक्तिदम्॥३३॥ततो मार्गस्य माहात्म्ये
विधानं स्नानजं तथा ॥ पुंड्रादिकीर्तनं चात्र मालाधारणपुण्यकम् ॥ ३४ ॥ पंचामृतस्नानपुण्यं घंटानादादिजं फलम् ॥ नानापुष्पार्चनफलं तुल
सीदलजं फलम् ॥ ३५ ॥ नैवेद्यस्य च माहात्म्यं हरिवासरकीर्तनम् ॥ अखंडैकादशीपुण्यं तथा जागरणस्य च ॥ ३६ ॥ यस्योत्सवविधानं च
नाममाहात्म्यकीर्तनम् ॥ ध्यानादिपुण्यकथनं माहात्म्यं मथुराभवम् ॥ ३७ ॥ मथुरातीर्थमाहात्म्यं पृथगुक्तं ततः परम् ॥ वनानां द्वादशानां च
माहात्म्यं कीर्तितं ततः ॥ ३८ ॥ श्रीमद्भागवतस्यात्र माहात्म्यं कीर्तितं परम् ॥ वज्रशांडिल्यसंवाद अंतर्लीलाप्रकाशकम् ॥ ३९ ॥ ततो माघस्य
माहात्म्यं स्नानदानजपोद्भवम् ॥ नानाख्यानसमायुक्तं दशाध्यायैर्निरूपितम् ॥ ४० ॥ ततो वैष्णवमाहात्म्ये शय्यादानादिजं फलम् ॥ जलदा
नादिविधयः कामाख्यानमतः परम् ॥ ४१ ॥ श्रुतदेवस्य चरितं व्याधोपाख्यानमद्भुतम् ॥ तथाक्षयतृतीयादेर्विशेषात्पुण्यकीर्तनम् ॥ ४२ ॥ तत
स्त्वयोध्यामाहात्म्ये चक्रब्रह्माह्वतीर्थके ॥ सुरापापविमोक्षाख्ये तथाधारसहस्रकम् ॥ ४३ ॥ स्वर्गद्वारं चंद्रहरिधर्महर्युपवर्णनम् ॥ स्वर्णवृष्टे
रुपाख्यानं तिलोदासरयूयुतिः ॥ ४४ ॥ सीताकुंडं गुप्तहरिसरयूघर्घरान्वयः ॥ गोप्रतारं च दुग्धोदं गुरुकुंडादिपञ्चकम् ॥ ४५ ॥ सोमार्का
दीनि तीर्थानि त्रयोदश ततः परम् ॥ गयाकूपस्य माहात्म्यं सर्वाघविनिवर्तकम् ॥ ४६ ॥ मांडव्याश्रमपूर्वाणि तीर्थानि तदनन्तरम् ॥ अजितादि
मानसादितीर्थानि गदितानि च ॥ ४७ ॥ इत्येष वैष्णवः खंडो द्वितीयः परिकीर्तितः ॥ अतः परं ब्रह्मखंडं मरीचे शृणु पुण्यदम् ॥ ४८ ॥ यत्र
वै सेतुमाहात्म्ये फलं स्नाने क्षणोद्भवम् ॥ गालवस्य तपश्चर्या राक्षसाख्यानकं ततः ॥४९॥ चक्रतीर्थादिमाहात्म्यं देवीपत्तनसंयुते॥ वेतालतीर्थमहिमा
पापनाशादिकीर्तनम् ॥ ५० ॥ मंगलादिकमाहात्म्यं ब्रह्मकुंडादिवर्णनम् ॥ हनुमत्कुंडमहिमागस्त्यतीर्थभवं फलम् ॥ ५१ ॥ रामतीर्थादिकथनं
लक्ष्मीतीर्थनिरूपणम् ॥ शंखादितीर्थमहिमा तथा साध्यामृतादिजः ॥ ५२ ॥ धनुष्कोट्यादिमाहात्म्यं क्षीरकुंडादिजं तथा ॥ गायत्र्यादिकतीर्थानां
माहात्म्यं चात्र कीर्तितम् ॥ ५३ ॥ रामनाथस्य महिमा तत्त्वज्ञानोपदेशनम् ॥ यात्राविधानकथनं सेतौ मुक्तिप्रदं नृणाम् ॥ ५४ ॥

धर्मारण्यस्य माहात्म्यं ततः परमुदीरितम् ॥ स्थाणुः स्कन्दाय भगवान्यत्र तत्त्वमुपादिशत् ॥ ५५ ॥ धर्मारण्यसुसंभूतिस्तत्पुण्यपरिकीर्त्तनम् ॥कर्म्म
सिद्धेः समाख्यानं ऋषिवंशनिरूपणम् ॥५६॥अप्सरस्तीर्थमुख्यानां माहात्म्यं यत्र कीर्तितम् ॥ वर्णानामाश्रमाणां च धर्मतत्त्वनिरूपणम् ॥ ५७ ॥
दिवः स्थानविभागश्च बकुलार्ककथा शुभा॥छत्रानन्दा तथा शांता श्रीमाता च मतंगिनी ॥५८॥ पुण्यदा च समाख्याता यत्र देव्यः समास्थिताः॥
इन्द्रेश्वरादिमाहात्म्यं द्वारकादिनिरूपणम् ॥ ५९ ॥ लोहासुरसमाख्यानं गंगाकूपनिरूपणम् ॥ श्रीरामचरितं चैव सत्यमंदिरवर्णनम्॥६०॥जीर्णोद्धा
रस्य कथनमासनप्रतिपादनम् ॥ जातिभेदप्रकथनं स्मृतिधर्मनिरूपणम् ॥ ६१ ॥ ततस्तु वैष्णवा धर्मा नानाख्यानैरुदीरिताः ॥ चातुर्मास्ये
ततः पुण्ये सर्वधमनिरूपणम् ॥६२॥ दानप्रशंसा तत्पश्चाद्व्रतस्य महिमा ततः ॥ तपसश्चैव पूजायाः सच्छिद्रकथनं ततः ॥६३॥ तद्वृत्तीनां भिदा
ख्यानं शालग्रामनिरूपणम् ॥ भारकस्य वधोपायो वृक्षाचामहिमा तथा ॥ ६४ ॥ विष्णोः शापश्च वृक्षत्वं पार्वत्यनुतपस्ततः ॥ हरस्य तांडवं
नृत्यं रामनामनिरूपणम् ॥ ६५ ॥ हरस्य लिंगपतनं कथा बैजवनस्य च ॥ पार्वतीजन्मचरितं तारकस्य वधोऽद्भुतः ॥ ६६ ॥ प्रणवैश्वर्यकथनं
तारकाचरितं पुनः ॥ दक्षयज्ञसमाप्तिश्च द्वादशाक्षरभूषणम् ॥ ६७ ॥ ज्ञानयोगसमाख्यानं महिमा द्वादशाक्षरेः ॥ श्रवणादिकपुण्यं च कीर्तितं
शर्मदं नृणाम् ॥ ६८ ॥ ततो ब्राह्मोत्तरे भागे शिवस्य महिमाद्भुतः ॥ पंचाक्षरस्य महिमा गोकर्णमहिमा ततः ॥ ६९ ॥ शिवरात्रेश्च महिमा प्रदोषव्र
तकीर्तनम् ॥ सोमवारव्रतं चापि सीमंतिन्याः कथानकम् ॥ ७० ॥ भद्रायूत्पत्तिकथनं सदाचारनिरूपणम् ॥ शिववर्मसमुद्देशो भद्रायूद्वाहवर्ण
नम् ॥ ७१ ॥ भद्रायुमहिमा चापि भस्ममाहात्म्यकीर्तनम् ॥ शबराख्यानकं चैव उमामाहेश्वरं व्रतम् ॥ ७२ ॥ रुद्राक्षस्य च माहात्यं रुद्रा
ध्यायस्य पुण्यकम् ॥ श्रवणादिकपुण्यं च ब्रह्मखंडोऽयमीरितः ॥ ७३ ॥ अतः परं चतुर्थं तु काशीखंडमनुत्तमम्॥विंध्यनारदयोर्यत्र संवादः परिकी
र्तितः ॥ ७४ ॥ सत्यलोकप्रभावश्चागस्त्यावासे सुरागमः ॥ पतिव्रताचरित्रं च तीर्थयात्रा प्रशंसनम् ॥७५॥ ततश्च सप्तपुर्याख्या संयमिन्या निरूप
णम् ॥ बुधस्य च तथेंद्राग्न्योर्लोकाप्तिः शिवशर्मणः ॥७६ ॥ अग्नेः समुद्भवश्चैव क्रव्याद्वरुणसंभवः ॥ गंधवत्यलकापुर्योरीश्वर्याश्च समुद्भवः॥७७॥
चंद्रार्कबुधलोकानां कुजेज्यार्कभुवां क्रमात्॥मम विष्णोर्ध्रुवस्यापि तपोलोकस्य वर्णनम् ॥७८॥ध्रुवलोककथा पुण्या सत्यलोकनिरीक्षणम् ॥ स्कंदा
गस्त्यसमालापो मणिकर्णीसमुद्भवः ॥ ७९ ॥ प्रभावश्चापि गंगाया गंगानामसहस्रकम् ॥ वाराणसीप्रशंसा च भैरवाविर्भवस्ततः ॥ ८० ॥
दंडपाणिज्ञानवाप्योरुद्भवः समनंतरम् ॥ ततः कलावत्याख्यानं सदाचारनिरूपणम् ॥ ८१ ॥ ब्रह्मचारिसमाख्यानं ततः स्त्रीलक्षणानि च ॥

कृत्याकृत्यविनिर्देशो ह्यविमुक्तेशवर्णनम् ॥८२॥ गृहस्थयोगिनो धर्माः कालज्ञानं ततः परम् ॥ दिवोदासकथा पुण्या काशिकावर्णनं ततः ॥८३॥ मायागणपतेश्चाथ भुवि प्रादुर्भवस्ततः ॥ विष्णुमायाप्रपंचोऽथ दिवोदासविमोक्षणम् ॥ ८४ ॥ ततः पंचनदोत्पत्तिर्बिंदुमाधवसंभवः ॥ ततो वैष्णवतीर्थाख्या शूलिनः काशिकागमः ॥ ८५ ॥ जैगीषव्येन संवादो ज्येष्ठेशाख्या महेशितुः ॥ क्षेत्राख्यानं कंदुकेशः व्याघ्रेश्वरसमुद्भवः॥ ८६ ॥ शैलेशरत्नेश्वरयोः कृत्तिवासस्य चोद्भवः ॥ देवतानामधिष्ठानं दुर्गासुरपराक्रमः ॥ ८७ ॥ दुर्गाया विजयश्चाथ ॐकारेशस्य वर्णनम् ॥ पुनरोंकारमाहात्म्य त्रिलोचनसमुद्भवः ॥ ८८ ॥ केदाराख्या च धर्मेश कथा विष्णुभुजोद्भवा ॥ वीरेश्वरसमाख्यानं गंगामाहात्म्यकीर्तनम् ॥ ८९ ॥ विश्वकर्मेशमहिमा दक्षयज्ञोद्भवस्तथा ॥ सतीशस्यामृतेशादेर्भुजस्तंभः पराशरे ॥ ९० ॥ क्षेत्रतीर्थकदंबश्च मुक्तिमडपसंकथा ॥ विश्वेशविभवश्चाथ ततो यात्रापरिक्रमः ॥ ९१ ॥ अतः परं त्ववंत्याख्यं शृणु खंड च पंचमम् ॥ महाकालवनाख्यानं ब्रह्मशीर्षच्छिदा ततः ॥ ९२ ॥ प्रायश्चित्तविधिश्चाग्नेरुत्पत्तिश्च सुरागमः ॥ देवदीक्षा शिवस्तोत्रं नानापातकनाशनम् ॥ ९३ ॥ कपोलमोचनाख्यानं महाकालवनस्थितिः ॥ तीर्थं कनखलेशस्य सर्वपापप्रणाशनम् ॥ ९४ ॥ कुंडमप्सरसंज्ञं च सरो रुद्रस्य पुण्यदम् ॥ कुडवेशं च विद्याध्रं मर्कटेश्वरतीर्थकम् ॥ ९५ ॥ स्वर्गद्वारचतुःसिंधुतीर्थं शंकरवापिका ॥ शंकरार्कं गन्धवतीतीर्थं पापप्रणाशनम् ॥ ९६ ॥ दशाश्वमेधिकानंशतीर्थे च हरिसिद्धिदम् ॥ पिशाचकादियात्रा च हनुमत्कवचेश्वरौ ॥ ९७ ॥ महाकालेशयात्रा च वल्मीकेश्वरतीर्थकम्॥ शुक्रे च पञ्चमे चाख्ये कुशस्थल्याः प्रदक्षिणाः ॥ ९८ ॥ अक्रूरसंज्ञकन्त्वेकपादं चंद्रार्कवैभवम् ॥ करभेशाख्यतीर्थं च लटुकेशादितीर्थकम् ॥ ९९ ॥ मार्कंडेशं यज्ञवापी सोमेशं नरकांतकम् ॥ केदारेश्वररामेशसौभाग्येशनरार्ककम् ॥ १०० ॥ केशवार्कं शक्तिभेदं स्वर्णसारसुखानि च ॥ ॐकारेशादितीर्थानि अंधकश्रुतिकीर्तनम् ॥ १०१॥ कालारण्ये लिंगसंख्या स्वर्णशृंगाभिधानकम् ॥ कुशस्थल्या अवंत्याश्चोज्जयिन्या अभिधानकम् ॥ १०२ ॥ पद्मावतीवै कुमुद्वत्यमरावतिनामकम् ॥ विशालाप्रतिकल्पाभिधानं च ज्वरशांतिकम् ॥ १०३ ॥ शिवानामादिकफलं नागोद्गीता शिवस्तुतिः ॥ हिरण्याक्षवधाख्यानं तीर्थं सुंदरकुंडकम् ॥ १०४ ॥ नीलगंगापुष्कराख्यं विंध्यवासनतीर्थकम् ॥ पुरुषोत्तमाभिधानं तु तत्तीर्थं चाघनाशनम् ॥ १०५ ॥ गोमती वामनं कुंडो विष्णोर्नामसहस्रकम्॥ वीरेश्वरसरः कालभैरवस्य च तीर्थकम् ॥ १०६ ॥ महिमा नागपंचम्या नृसिंहस्य जयंतिका ॥ कुटुम्बेश्वरयात्रा च देवसाधककीर्तनम् ॥ १०७॥कर्कराजाख्यतीर्थं च विघ्नेशादिसुरोहनम् ॥ रुद्रकुंडप्रभृतिषु बहुतीर्थनिरूपणम् ॥ १०८ ॥ यात्राष्टतीर्थजा पुण्या रेवामाहात्म्यमुच्यते ॥धर्मपुत्रस्य वैराग्यो

मार्कंडेयेन संगमः ॥ १०९ ॥ प्राग्रीयानुभवाख्यानममृतायारिकीर्त्तनम् ॥कल्पे कल्पे पृथङ् नाम नर्मदायाः प्रकीर्तितम् ॥ ११० ॥ स्तवमार्षं नार्मदं
च कालरात्रिकथा ततः ॥ महादेवस्तुतिः पश्चात्पृथक्कल्पकथाद्भुता ॥ १११ ॥ विशल्याख्यानकं पश्चाज्जालेश्वरकथा तथा ॥ गौरीव्रत
समाख्यानं त्रिपुरज्वालनं ततः ॥ ११२ ॥ देहपातविधानं च कावेरीसंगमस्ततः ॥ दारुतीर्थं ब्रह्मावर्तं यत्रेश्वरकथानकम् ॥ ११३ ॥ अग्नितीर्थं
रवितीर्थं मेघनादादिदारुकम् ॥ देवतीर्थं नर्मदेशं कपिलाख्यं करंजकम् ॥ ११४ ॥ कुंडलेशं पिप्पलादं विमलेशं च शूलभित् ॥ शचीहरणमाख्या
नमन्धकस्य वधस्ततः ॥ ११५ ॥ शूलभेदोद्भवो यत्र दानधर्माः पृथग्विधाः ॥ आख्यानं दीर्घतपस ऋष्यशृंगकथा ततः ॥ ११६ ॥ चित्रसेनकथा
पुण्या काशिराज्यस्य लक्षणम् ॥ ततो देवशिलाख्यानं शबरीतीर्थकान्वितम् ॥ ११७ ॥ व्याधाख्यानं ततः पुण्यं पुष्करिण्यर्कतीर्थकम् ॥ आग्ने
त्येश्वरतीर्थं च शक्रतीर्थं करोटिकम् ॥ ११८ ॥ कुमारेशमगस्त्येशमानंदेशं च मातृजम् ॥ लोकेशं धनदेशं च मंगलेशं च कामजम् ॥ ११९ ॥
नागेशं चापि गोपारं गौतमं शंखचूडकम् ॥ नारदेशं नंदिकेशं वरुणेश्वरतीर्थकम् ॥ १२० ॥ दधिस्कंदादितीर्थानि हनूमतेश्वरं ततः ॥ रामेश्वरादि
तीर्थानि सोमेशं पिंगलेश्वरम् ॥ १२१ ॥ ऋणमोक्षं कपिलेशं पूतिकेशं जलेशयम् ॥ चंडार्कं यमतीर्थं च काल्होडीशं वनादिके ॥१२२॥ नारायणं
च कोटीशं व्यासतीर्थं प्रभासकम् ॥ नागेशसंकर्षणकं प्रश्रयेश्वरतीर्थकम् ॥ १२३ ॥ ऐरंडीसंगमं पुण्यं सुवर्णशिलतीर्थकम् ॥ करंजं कामहं तीर्थं
भांडीरो रोहिणीभवम् ॥ १२४ ॥ चक्रतीर्थं धौतपापं स्कंदमांगिरसाह्वयम् ॥ कोटितीर्थमयोन्याख्यमंगाराख्यं त्रिलोचनम् ॥ १२५ ॥ इंद्रेशं कंबु
केशं च सोमेशं कोहनं शकम् ॥ नार्मदं चार्कमाग्नेयं भार्गवेश्वरमुत्तमम्॥१२६॥ब्राह्मं दैवं च मार्गेशमादिवाराहकेश्वरम् ॥ रामेशमथ सिद्धेशमाहल्यं
कंकटेश्वरम् ॥ १२७ ॥ शाक्रं सौम्यं च नादेशं तोयेशं रुक्मिणीभवम् ॥ योजनेशं वराहेशं द्वादशीशिवतीर्थकम् ॥ १२८ ॥ सिद्धेशं मंगलेशं च
लिंगवाराहतीर्थकम् ॥ कुण्डेशं श्वेतवाराहं गर्भावेशं रवीश्वरम् ॥ १२९ ॥ शुक्लादीनि च तीर्थानि हुंकारस्वामितीर्थकम् ॥ संगमेशं नहुषेशं
मोक्षणं पञ्चगोपकम् ॥ नागशावं च सिद्धेशं मार्कण्डाक्रूरतीर्थके॥ १३० ॥ कामोदशूलारोपाख्ये मांडव्यं गोपकेश्वरम्॥ कपिलेशं पिंगलेशं भूतेशं
गांगगौतमे॥ १३१॥आश्वमेधं भृगुकच्छं केदारेशं च पापनुत्॥कलकलेशं जालेशं शालग्रामं वराहकम्॥१३२॥चंद्रप्रभासमादित्यं श्रीपत्याख्यं च हंसकम्
मूलयस्थानं च शूलेशमुग्राख्यं चित्रदैवकम् ॥१३३॥ शिखीशं कोटितीर्थंच दशकन्यं सुवर्णकम्॥ऋणमोक्षं भारभूति पुंखां मुंडिं च डिंडिमम्॥१३४॥
आमलेशं कपालेशं शृंगेरंडीभवं ततः॥कोटितीर्थं लोटणेशं फलस्तुतिरतः परम्॥१३५॥ हमिजंगलमाहात्म्ये रोहिताश्वकथा ततः॥धुन्धुमारसमाख्यानं

वधोपायस्ततोऽस्य वै॥ १३६॥वधो धुंधोस्ततः पश्चात्ततश्चित्रवहोद्भवः॥महिमास्य ततश्चंडीशप्रभावो रतीश्वरः॥ १३७॥केदारेशो लक्षतीर्थं ततो विष्णुप
दीभवम्॥मुखारं च्यवनांधास्यं ब्रह्मणश्च सरस्ततः॥ १३८॥चक्राख्यं ललिताख्यानं तीर्थं च बहुगोमयम्॥रुद्रावर्तं च मार्कंडं तीर्थं पापप्रणाशनम्॥ १३९॥
श्रवणेशं शुद्धपटं देवांधुप्रेततीर्थकम् ॥ जिह्वोदतीर्थसंभूतिः शिवोद्भेदं फलस्तुतिः ॥ १४० ॥ एष खंडो ह्यवंत्याख्यः शृण्वतां पापनाशनः ॥ अतः परं
नागराख्यः खंडः षष्ठोऽभिधीयते॥ १४१॥ लिंगोत्पत्तिसमाख्यानं हरिश्चन्द्रकथा शुभा ॥विश्वामित्रस्य माहात्म्यं त्रिशंकुस्वर्गतिस्तथा॥ १४२॥ हाटके
श्वरमाहात्म्ये वृत्रासुरवधस्तथा ॥ नागबिलं शंखतीर्थमचलेश्वरवर्णनम् ॥ १४३ ॥ चमत्कारपुराख्यानं चमत्कारकरं परम् ॥ गयशीर्षं बालशाख्यं
वालमंडं मृगाह्वयम् ॥ १४४ ॥ विष्णुपादं च गोकर्णं युगरूपं समाश्रयः ॥ सिद्धेश्वरं नागसरः सप्तार्षेयं ह्यगस्त्यकम् ॥ १४५ ॥ भ्रूणगर्तं नलेशं
च भैष्मं वैदुरमर्ककम् ॥ शारमिष्ठं सोमनाथं च दौर्गमातर्जकेश्वरम् ॥ १४६ ॥ जामदग्न्यवधाख्यानं नैःक्षत्रियकथानकम् ॥ रामह्रदं नागपुरं
षड्लिंगं चैव यज्ञभूः ॥ १४७ ॥ मुण्डीरादित्रिकार्कं च सतीपरिणयाह्वयम् ॥ रुद्रशीर्षं च यागेशं वालखिल्यं च गारुडम् ॥ १४८ ॥ लक्ष्मीशापः सप्त
विंशसोमप्रासादमेव च ॥ अंबाबद्धं पांडुकाख्यमाग्नेयं ब्रह्मकुंडकम् ॥ १४९ ॥ गोमुखं लोहयष्ट्याख्यमजापालेश्वरी तथा ॥ शानैश्चरं राजवापी
रामेशो लक्ष्मणेश्वरः ॥ १५० ॥ कुशेशाख्यं लवेशाख्यं लिंगं सर्वोत्तमोत्तमम् ॥ अष्टषष्टिसमाख्यानं दमयंत्यास्त्रिजातकम् ॥ १५१॥ ततो वै रेवती
चात्र भक्तिकातीर्थसंभवः ॥ क्षेमंकरी च केदारं शुक्लतीर्थमुखारकम् ॥ १५२ ॥ सत्यसंधेश्वराख्यानं तथा कर्णोत्पलाकथा ॥ अटेश्वरं याज्ञवल्क्यं
गौर्यं गाणेशमेव च ॥ १५३ ॥ ततो वास्तुपदाऽख्यानमजागृहकथानकम् ॥ सौभाग्यांधुश्च शूलेशं धर्मराजकथानकम् ॥ १५४ ॥ मिष्टान्नदेश्व
राख्यानं गाणापत्यत्रयं ततः ॥ जाबालिचरितं चैव मकरेशकथा ततः ॥ १५५ ॥ कालेश्वर्यंधकाख्यानं कुंडमाप्सरसं तथा ॥ पुष्यादित्यं रौहिताश्वं
नागरोत्पत्तिकीर्त्तनम् ॥ १५६ ॥ भार्गवं चरितं चैव वैश्वामैत्रं ततः परम् ॥ सारस्वतं पैप्पलादं कंसारीशं च पैंडकम्॥ १५७ ॥ ब्रह्मणो यज्ञचरितं
सावित्र्याख्यानसंयुतम् ॥ रैवतं भार्तयज्ञाख्यं मुख्यतीर्थनिरीक्षणम् ॥ १५८ ॥ कौरवं हाटकेशाख्यं प्रभासं क्षेत्रकत्रयम् ॥ पौष्करं नैमिषं धार्ममरण्य
त्रितयं स्मृतम्॥ १५९॥वाराणसी द्वारकाख्यावन्त्याख्येति पुरीत्रयम् ॥ वृन्दावनं खांडवाख्यमद्वैकाख्यं वनत्रयम्॥ १६०॥कल्पः शालस्तथा नन्दि
ग्रामत्रयमनुत्तमम् ॥ असिशुक्लपितृसंज्ञं तीर्थत्रयमुदाहृतम् ॥ १६१ ॥ श्र्यर्बुदौ रैवतश्चैव पर्वतत्रयमुत्तमम्॥नदीनां त्रितयं गंगा नर्मदा च सरस्वती
॥ १६२ ॥ सार्द्धकोटित्रयफलमेकैकं चेषु कीर्त्तितम् ॥ कूपिका शंखतीर्थं चामरकं बालमण्डनम् ॥ १६३ ॥ हाटकेशक्षेत्रफलप्रदं प्रोक्तं चतुष्टयम् ॥

सांवादित्यं श्राद्धकल्पं यौधिष्ठिरमथांधकम् ॥ १६४ ॥ जलशायि चतुर्मासमशून्यशयनव्रतम् ॥ मंकणेशं शिवरात्रिस्तुलापुरुषदानकम् ॥ १६५ ॥
पृथ्वीदानं वानकेशं कपालमोचनेश्वरम् ॥ पापपिंड मासलैंगं युगमानादिकीर्तनम् ॥ १६६ ॥ निंवेशशाकंभर्याख्या रुद्रैकादशकीर्तनम् ॥ दानमा
हात्म्यकथनं द्वादशादित्यकीर्तनम् ॥ १६७ ॥ इत्येष नागरः खंडः प्रभासाख्योऽधुनोच्यते ॥ सोमेशो यत्र विश्वेशोऽर्कस्थलं पुण्यदं महत् ॥ १६८॥
सिद्धेश्वरादिकाख्यानं पृथगत्र प्रकीर्तितम् ॥ अग्नितीर्थं कपर्द्दिशं केदारेशं गतिप्रदम् ॥ १६९ ॥ भीमभैरवचण्डीशभास्करेन्दुकुजेश्वराः॥ बुधेज्यभृगु
सौरागुशिखीशा हरविग्रहाः ॥ १७० ॥ सिद्धेश्वराद्याः पंचान्ये रुद्रास्तत्र व्यवस्थिताः॥वरारोहा ह्यजा पाला मंगला ललितेश्वरी ॥१७१॥ लक्ष्मीशो
वाडवेशश्चोर्वीशः कामेश्वरस्तथा ॥ गौरीशवरुणेशाख्यं दुर्वासेशं गणेश्वरम् ॥१७२॥ कुमारेशं चंडकल्पं शकुलीश्वरसंज्ञकम् ॥ ततः प्रोक्तोऽथ कोटीशबा
लब्रह्मादिसत्कथा॥ १७३॥नरकेशसंवर्त्तेशनिधीश्वरकथा ततः॥बलभद्रेश्वरस्याथ गंगाया गणपस्य च॥ १७४॥जांबवत्याख्यसरितः पांडुकूपस्य सत्कथा॥
शतमेधलक्षमेधकोटिमेधकथा तथा ॥ १७५॥ दुर्वासार्कघटस्थानहिरण्यासंगमोत्कथा ॥ नगरार्कस्य कृष्णस्य संकर्षणसमुद्रयोः ॥ १७६ ॥ कुमार्याः
क्षेत्रपालस्य ब्रह्मेशस्य कथा पृथक्॥ पिंगलासंगमेशस्य शंकरार्कघटेशयोः ॥ १७७ ॥ ऋषितीर्थस्य नंदार्कत्रितकूपस्य कीर्तनम् ॥ ससोपानस्य
पर्णार्कन्यंकुमत्योः कथाद्भुता ॥ १७८ ॥ वाराहस्वामिवृत्तांतं छायालिंगाख्यगुल्फयोः ॥ कथा कनकनंदायाः कुंतीगंगेशयोस्तथा ॥१७९ ॥
चमसोद्भेदविदुरत्रिलोकेशकथा ततः ॥ मंकणेशत्रैपुरेशषंडतीर्थकथास्तथा ॥ १८० ॥ सूर्यप्राची त्रीक्षणयोरुमानाथकथा तथा ॥ भूद्वारशूलस्थल
योश्च्यवनार्केशयोस्तथा ॥ १८१ ॥ अजापालेशबालार्ककुबेरस्थलजा कथा ॥ ऋषितोया कथा पुण्या संगालेश्वरकीर्तनम् ॥ १८२ ॥ नार
दादित्यकथनं नारायणनिरूपणम् ॥ तप्तकुंडस्य माहात्म्यं मूलचंडीशवर्णनम् ॥ १८३ ॥ चतुर्वक्त्रगणाध्यक्षकलंबेश्वरयोः कथा ॥ गोपालस्वामिव
कुलस्वामिनोर्मरुतां कथा ॥ १८४ ॥ क्षेमार्कोन्नतविघ्नेशजलस्वामिकथा ततः ॥ कालमेघस्य रुक्मिण्या दुर्वासेश्वरभद्रयोः ॥ १८५ ॥ शंखावर्त
मोक्षतीर्थगोष्पदाच्युतसद्मनाम् ॥ जालेश्वरस्य हुंकारेश्वरचंडीशयोः कथा ॥ १८६ ॥ आशापुरस्थविघ्नेशकलाकुंडकथाद्भुता ॥ कपिलेशस्य च कथा
जरद्गवशिवस्य च ॥ १८७ ॥ नलकर्कोटेश्वरयोर्हाटकेश्वरजा कथा ॥ नारदेशयंत्रभूषादुर्गकूटगणेशजा ॥ १८८ ॥ सुपर्णैलाख्यभैरव्योर्भल्लतीर्थभवा
कथा ॥ कीर्तनं कर्दमालस्य गुप्तसोमेश्वस्य च ॥ १८९ ॥ बहुस्वर्णेशशृंगेशकोटीश्वरकथा ततः ॥ मार्कंडेश्वरकोटीशदामोदरगृहोत्कथा ॥ १९० ॥
स्वर्णरेखा ब्रह्मकुंडं कुंतीभीमेश्वरौ तथा ॥ मृगीकुंडं च सर्वस्वं क्षेत्रे वस्त्रापथे स्मृतम् ॥ १९१॥ दुर्गाभिल्लेशगंगेशरैवतानां कथाद्भुता ॥ततोऽर्बुदेश्वर

कथा अचलेश्वरकीर्तनम् ॥ १९२ ॥ नागतीर्थस्य च कथा वसिष्ठाश्रमवर्णनम् ॥ भद्रकर्णस्य माहात्म्यं त्रिनेत्रस्य ततः परम् ॥१९३॥ केदारस्य च
माहात्म्यं तीर्थागमनकीर्तनम् ॥ कोटीश्वररूपतीर्थहृषीकेशकथास्ततः ॥ १९४ ॥ सिद्धेशशुक्रेश्वरयोर्मणिकर्णीशकीर्तनम् ॥ पंगुतीर्थयमतीर्थवा
राहतीर्थवर्णनम् ॥ १९५ ॥ चंद्रप्रभासपिंडोदश्रीमाताशुक्लतीर्थजम् ॥ कात्यायन्याश्च माहात्म्यं ततः पिंडारकस्य च ॥ १९६ ॥ ततः कनखल
स्याथ चक्रमानुषतीर्थयोः ॥ कपिलाग्नितीर्थकथा तथा रक्तानुबंधजा ॥ १९७ ॥ गणेशपार्थेश्वरयोर्यात्रायामुज्ज्वलस्य च ॥ चंडीस्थाननागोद्भव
शिवकुंडमहेशजा ॥ १९८ ॥ कामेश्वरस्य मार्कंडेयोत्पत्तेश्च कथा ततः ॥ उद्दालकेशसिद्धेशगततीर्थकथा पृथक् ॥ १९९ ॥ श्रीदेवखातोत्पत्तिश्च
व्यासगौतमतीर्थयोः ॥ कुलसंतारमाहात्म्यं रामकोटयाहृतीर्थयोः ॥ २०० ॥ चंद्रोद्भेदेशानशृंगब्रह्मस्थानोद्भवोऽद्भुतम् ॥ त्रिपुष्कररुद्रहृदगुहेश्वर
कथा शुभा ॥ २०१ ॥ अविमुक्तस्य माहात्म्यमुमामाहेश्वरस्य च ॥ महौजसः प्रभावश्च जंबूतीर्थस्य वर्णनम् ॥२०२॥गंगाधरमिश्रकयोः कथा वाथ
फलस्तुतिः ॥ द्वारकायाश्च माहात्म्ये चंद्रशर्मकथानकम् ॥ २०३ ॥ जागराद्यर्चनाद्याख्या व्रतमेकादशीभवम् ॥ महाद्वादशिकाख्यानं प्रह्लादर्षि
समागमः ॥ २०४ ॥ दुर्वासस उपाख्यानं यात्रोपक्रमकीर्तनम्॥ गोमत्युत्पत्तिकथनं तस्यां स्नानादिजं फलम् ॥ २०५ ॥ चक्रतीर्थस्य माहात्म्यं
गोमत्युदधिसंगमः ॥ सनकादिह्रदाख्यानं नृगतीर्थकथा ततः ॥ २०६ ॥ गोप्रचारकथा पुण्या गोपीनां द्वारकागमः ॥ गोपीसरःसमाख्यानं
ब्रह्मतीर्थादिकीर्तनम् ॥ २०७ ॥ पंचनद्यागमाख्यानं नानाख्यानसमन्वितम् ॥ शिवलिंगगदातीर्थकृष्णपूजादिकीर्तनम् ॥ २०८ ॥ त्रिविक्रमस्य
मूर्ताख्या दुर्वासःकृष्णसंकथा॥कुशदैत्यवधोच्चारविशेषार्चनजं फलम् ॥२०९ ॥ गोमत्यां द्वारकायां च तीर्थागमनकीर्तनम् ॥ कृष्णमंदिरसंप्रेक्षा द्वार
वत्यभिषेचनम्॥२१०॥तत्रतीर्थावासकथा द्वारकापुण्यकीर्तनम्॥इत्येष सप्तमः प्रोक्तः खंडः प्राभासिको द्विजाः॥२११॥स्कांदे सर्वोत्तरकथे शिवमाहा
त्म्यवर्णने॥लिखित्वैतत्तु यो दद्याद्धेमशूलसमन्वितम्॥२१२॥माघ्यां सत्कृत्य विप्राय स शैवे मोदते पदे॥२१३॥इति श्रीबृहन्नारदीयपुराणे पूर्व०बृहदुपा
ख्याने चतुर्थपादे स्कंदपुराणानुक्रमणीवर्णनं नाम चतुरधिकशततमोऽध्यायः ॥ १०४ ॥ ब्रह्मोवाच ॥ शृणु वत्स प्रवक्ष्यामि पुराणं वामनाभिधम् ॥
त्रिविक्रमचरित्राढ्यं दशसाहस्रसंख्यकम् ॥ १ ॥ कूर्मकल्पसमाख्यानं वर्गत्रयकथानकम् ॥ भागद्वयसमायुक्तं वक्तृश्रोतृशुभावहम् ॥ २ ॥ पुराणप्रश्नः
प्रथमं ब्रह्मशीर्षच्छिदा ततः ॥ कपालमोचनाख्यानं दक्षयज्ञविहिंसनम् ॥ ३ ॥ हरस्य कालरूपाख्या कामस्य दहनं ततः ॥ प्रह्लादनारायणयोर्युद्धं
देवासुराहवः॥४॥सुकेश्यर्कसमाख्यानं ततो भुवनकोशकम्॥ततः काम्यव्रताख्यानं श्रीदुर्गाचरितं ततः ॥ ५ ॥ तपतीचरितं पश्चात्कुरुक्षेत्रस्य वर्णनम्
॥ सत्यामाहात्म्यमतुलं पार्वतीजन्मकीर्तनम् ॥६ ॥ तपस्तस्या विवाहश्च गौर्युपाख्यानकं ततः॥ ततः कौशिक्युपाख्यानं कुमारचरितं ततः ॥ ७॥

ततोऽन्धकवधाख्यानंसाध्योपाख्यानकंततः॥जाबालिचरितं पश्चादरजायाः कथाद्भुता॥८॥अंधकेश्वरयोर्युद्धं गणत्वं चांधकस्य च॥मरुतां जन्मकथनं बलेश्च चरितं ततः॥९॥ततस्तु लक्ष्म्याश्चरितं त्रैविक्रममतः परम्॥प्रह्लादतीर्थयात्रायां प्रोच्यंतेऽथ कथाः शुभाः॥१०॥ततश्च धुन्धुचरितं प्रेतोपाख्यानकं ततः ॥ नक्षत्रपुरुषाख्यानं श्रीदामचरितं ततः ॥ ११ ॥ त्रिविक्रमचरित्रांते ब्रह्मप्रोक्तः स्तवोत्तमः ॥ प्रह्लादबलिसंवादे सुतले हरिशंसनम् ॥ १२ ॥ इत्येष पूर्वभागोऽस्य पुराणस्य तवोदितः ॥ शृण्वतोऽस्योत्तरं भागं बृहद्वामनसंज्ञकम् ॥ १३ ॥ माहेश्वरी भागवती सौरी गाणेश्वरी तथा ॥ चतस्रः संहिताश्चात्र पृथक् साहस्रसंख्यया ॥ १४ ॥ माहेश्वर्यां तु कृष्णस्य तद्भक्तानां च कीर्तनम् ॥ भागवत्यां जगन्मातुरवतारकथाद्भुता ॥ १५ ॥ सौर्यां सूर्यस्य महिमा गदितः पापनाशनः ॥ गाणेश्वर्यां गणेशस्य चरितं च महेशितुः ॥१६॥ इत्येतद्वामनं नाम पुराणं सुविचित्रकम् ॥ पुलस्त्येन समाख्यातं नारदाय महात्मने ॥ १७ ॥ ततो नारदतः प्राप्तं व्यासेन सुमहात्मना ॥ व्यासात्तु लब्धवांश्चैतत् तच्छिष्यो रोमहर्षणः ॥ १८ ॥ स चाख्यास्यति विप्रेभ्यो नैमिषीयेभ्य एव च ॥ एवं परंपराप्राप्तं पुराणं वामनं शुभम् ॥ १९ ॥ ये पठंति च शृण्वंति तेऽपि यांति परां गतिम् ॥ लिखित्वैतत्पुराणं तु यः शरद्विषुवेऽर्पयेत् ॥ २० ॥ विप्राय वेदविदुषे घृतधेनुसमन्वितम् ॥ स समुद्धृत्य नरकान्नयेत्स्वर्गं पितॄन्स्वकान् ॥ २१ ॥ देहांते भुक्तभोगोऽसौ याति विष्णोः परं पदम् ॥ २२ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे वामनपुराणानुक्रमणीवर्णनं नाम पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥ ब्रह्मोवाच॥शृणु वत्स मरीचे त्वं पुराणं कूर्मसंज्ञकम् ॥ लक्ष्मीकल्पानुचरितं यत्र कूर्मवपुर्हरिः ॥ १ ॥ धर्मार्थकाममोक्षाणां माहात्म्यं च पृथक्पृथक् ॥ इंद्रद्युम्नप्रसंगेन प्राहर्षिभ्यो दयान्वितः ॥ २ ॥ तत्सप्तदशसाहस्रं सुचतुःसंहितं शुभम् ॥ यत्र ब्राह्माः पुरा प्रोक्ता धर्मा नानाविधा मुने ॥ ३ ॥ नानाकथाप्रसंगेन नृणां सद्गतिदायकाः ॥ तत्र पूर्वविभागे तु पुराणोपक्रमः पुरा ॥ ४ ॥ लक्ष्मींद्रद्युम्नसंवादः कूर्म्मर्षिगणसंकथा ॥ वर्णाश्रमाचारकथा जगदुत्पत्तिकीर्तनम् ॥ ५ ॥ कालसंख्या समासेन लयांते स्तवनं विभोः ॥ ततः संक्षेपतः सर्गः शांकरं चरितं तथा ॥ ६ ॥ सहस्रनाम पार्वत्या योगस्य च निरूपणम् ॥ भृगुवंशसमाख्यानं ततः स्वायम्भुवस्य च॥७॥देवादीनां समुत्पत्तिर्दक्षयज्ञाहतिस्ततः॥दक्षसृष्टिकथा पश्चात्कश्यपान्वयकीर्तनम्॥८॥आत्रेयवंशकथनं कृष्णस्य चरितं शुभम्॥ मार्तंडकृष्णसंवादो व्यासपाण्डवसंकथा ॥ ९ ॥ युगधर्मानुकथनं व्यासजैमिनिकीर्तनम् ॥ वाराणस्याश्च माहात्म्यं प्रयागस्य ततः परम् ॥ १० ॥ त्रैलोक्यवर्णनं चव वेदशाखानिरूपणम् ॥ उत्तरेऽस्या विभागे तु पुरा गीतेश्वरी ततः ॥ ११ ॥ व्यासगीता ततः प्रोक्ता नानाधर्मप्रबोधिनी ॥ नानाविधानां तीर्थानां माहात्म्यं च पृथक् ततः ॥ १२ ॥ प्रतिसर्गप्रकथनं ब्राह्मीयं संहिता स्मृता ॥ अतः परं भागवतीसंहितार्थं

निरूपणम् ॥ १३ ॥ कथिता यत्र वर्णानां पृथग्वृत्तिरुदाहृता ॥ पादेऽस्याः प्रथमे प्रोक्ता ब्राह्मणानां व्यवस्थितिः ॥ १४ ॥ सदा
चारात्मिका वत्स भोगसौख्यविवर्द्धनी ॥ द्वितीये क्षत्रियाणां तु वृत्तिः सम्यक्प्रकीर्तिता ॥ १५ ॥ यया त्वाश्रितया पापं विधूयेह व्रजेद्दिवम् ॥
तृतीये वैश्यजातीनां वृत्तिरुक्ता चतुर्विधा॥१६॥ यया चरितया सम्यग्लभते गतिमुत्तमाम्॥चतुर्थेऽस्यास्तथा पादे शूद्रवृत्तिरुदाहृता॥१७॥यया संतु
ष्यति श्रीशो नृणां श्रेयोविवर्द्धनः ॥ पंचमेऽस्यास्ततः पादे वृत्तिः संकरजोदिता ॥ १८ ॥ यया चरितयाप्नोति भाविनीं गतिमुत्तमाम् ॥ इत्येषा
पंचपद्युक्ता द्वितीया संहिता मुने ॥१९॥ तृतीयात्रोदिता सौरी नृणां कार्यविधायिनी ॥ षोढा षट्कर्मसिद्धिं बोधयन्ती च कामिनाम्॥२०॥ चतुर्थी
वैष्णवी नाम मोक्षदा परिकीर्तिता ॥ चतुष्पदी द्विजातीनां साक्षाद्ब्रह्मस्वरूपिणी ॥ २१ ॥ ताः क्रमात्षट्चतुर्द्वीषुसाहस्राः परिकीर्तिताः ॥ २२ ॥
एतत्कूर्मपुराणं तु चतुर्वर्गफलप्रदम् ॥ पठतां शृण्वतां नृणां सर्वोत्कृष्टगतिप्रदम् ॥२३ ॥ लिखित्वैतत्तु यो भक्त्या हेमकूर्मसमन्वितम् ॥ ब्राह्मणाया
यने दद्यात्स याति परमां गतिम्॥२४॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे कूर्मपुराणानुक्रमणीकथनं नाम षडुत्तरशततमोऽ
ध्यायः ॥ १०६ ॥ ब्रह्मोवाच ॥ अथ मात्स्यं पुराणं ते प्रवक्ष्ये द्विजसत्तम ॥ यत्रोक्तं सप्तकल्पानां वृत्तं संक्षिप्य भूतले ॥ १ ॥ व्यासेन वेदविदुषा
नारसिंहोपवर्णने ॥ उपक्रम्य तदुद्दिष्टं चतुर्दशसहस्रकम् ॥ २ ॥ मनुमत्स्यसुसंवादो ब्रह्मांडकथनं ततः ॥ ब्रह्मदेवासुरोत्पत्तिर्मारुतोत्पत्तिरेव च॥३॥
मदनद्वादशी तद्वल्लोकपालाभिपूजनम् ॥ मन्वन्तरसमुद्देशो वैश्यराज्याभिवर्णनम् ॥ ४ ॥ सूर्यवैवस्वतोत्पत्तिर्बुधसंगमनं तथा ॥ पितृवंशानुकथनं
श्राद्धकालस्तथैव च ॥ ५ ॥ पितृतीर्थप्रचारश्च सोमोत्पत्तिस्तथैव च ॥ कीर्तनं सोमवंशस्य ययातिचरितं तथा ॥ ६ ॥ कार्तवीर्यस्य चरितं
सृष्टवंशानुकीर्तनम् ॥ भृगुशापस्तथा विष्णोर्दशधा जन्मने क्षितौ ॥ ७ ॥ कीर्त्तनं पूरुवंशस्य वंशो हौताशनः परम् ॥ क्रियायोगस्ततः
पश्चात्पुराणपरिकीर्तनम् ॥ ८ ॥ व्रतं नक्षत्रपुरुषं मार्तण्डशयनं तथा ॥ कृष्णाष्टमीव्रतं तद्वद्रोहिणीचन्द्रसंज्ञितम् ॥ ९ ॥ तडागविधि
माहात्म्यं पादपोत्सर्ग एव च ॥ सौभाग्यशयनं तद्वदगस्त्यव्रतमेव च ॥ १० ॥ तथानन्ततृतीयाया रसकल्याणिनीव्रतम् ॥ तथैवानं
दकर्याश्च व्रतं सारस्वतं पुनः ॥ ११ ॥ उपरागाभिषेकश्च सप्तमीशयनं तथा ॥ भीमाख्या द्वादशी तद्वदनंगशयनं तथा ॥ १२ ॥ अशून्यशयनं
तद्वत्तथैवांगारकव्रतम् ॥ सप्तमीसप्तकं तद्वद्विशोकद्वादशीव्रतम् ॥ १३ ॥ मेरुप्रदानं दशधा ग्रहशांतिस्तथैव च ॥ ग्रहस्वरूपकथनं तथा
शिवचतुर्दशी ॥ १४ ॥ तथा सर्वफलत्यागः सूर्यवारव्रतं तथा ॥ संक्रांतिस्नपनं तद्वद्विभूतिद्वादशीव्रतम् ॥ १५ ॥ षष्टिव्रतानां माहात्म्यं
तथा स्नानविधिक्रमः ॥ प्रयागस्य तु माहात्म्यं द्वीपलोकानुवर्णनम् ॥ १६ ॥ तथांतरिक्षचारश्च ध्रुवमाहात्म्यमेव च ॥ भवनानि सुरें

द्राणां त्रिपुरोद्योतनं तथा ॥ १७ ॥ पितृप्रवरमाहात्म्यं मन्वंतरविनिर्णयः ॥ चतुर्युगस्य संभूतिर्युगधर्मनिरूपणम् ॥ १८ ॥ वज्रांगस्य तु संभूति
स्तारकोत्पत्तिरेव च ॥ तारकासुरमाहात्म्यं ब्रह्मदेवानुकीर्तनम् ॥ १९ ॥ पार्वतीसंभवस्तद्वत्तथा शिवतपोवनम् ॥ अनंगदेहदाहश्च रतिशोकस्तथैव
च ॥ २० ॥ गौरीतपोवनं तद्वच्छिवेनाथ प्रसादनम् ॥ पार्वतीऋषिसंवादस्तथैवोद्वाहमंगलम् ॥ २१ ॥ कुमारसंभवस्तद्वत्कुमारविजयस्तथा ॥
तारकस्य वधो घोरो नरसिंहोपवर्णनम् ॥ २२ ॥ पद्मोद्भवविसर्गस्तु तथैवांधकघातनम् ॥ वाराणस्यास्तु माहात्म्यं नर्मदायास्तथैव च ॥ २३ ॥
प्रवरानुक्रमस्तद्वत्पितृगाथानुकीर्तनम् ॥ तथोभयमुखीदानं दानं कृष्णाजिनस्य च ॥ २४ ॥ ततः सावित्र्युपाख्यानं राजधर्मास्तथैव च ॥ विविधो
त्पातकथनं ग्रहणांतस्तथैव च ॥ २५ ॥ यात्रानिमित्तकथनं स्वप्नमंगलकीर्तने ॥ वामनस्य तु माहात्म्यं वाराहस्य ततः परम् ॥ २६ ॥ समुद्रमथनं
तद्वत्कालकूटाभिशांतनम् ॥ देवासुरविमर्दश्च वास्तुविद्या तथैव च ॥ २७ ॥ प्रतिमालक्षणं तद्वद्देवतायतनं तथा ॥ प्रासादलक्षणं तद्वन्मंडपानां
च लक्षणम् ॥ २८ ॥ भविष्यराज्ञामुद्देशो महादानानुकीर्तनम् ॥ कल्पानुकीर्तनं तद्वत्पुराणेऽस्मिन्प्रकीर्तितम् ॥ २९ ॥ पवित्रमेतत्कल्याणमायुः
कीर्तिविवर्द्धनम् ॥ यः पठेच्छृणुयाद्वापि स याति भवनं हरेः ॥ ३० ॥ लिखित्वैतत्तु यो दद्याद्धेममत्स्यगवान्वितम् ॥ विप्रायाभ्यर्च्य विषुवे स
याति परमं पदम् ॥ ३१ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे मत्स्यपुराणानुक्रमणीकथनं नाम सप्तोत्तरशततमोऽध्यायः
॥ १०७ ॥ ॥ ब्रह्मोवाच ॥ मरीचे शृणु वक्ष्यामि पुराणं गारुडं शुभम् ॥ गरुडायाब्रवीत्पृष्टो भगवान्गरुडासनः ॥ १ ॥ एकोनविंशसाहस्रं
तार्क्ष्यकल्पकथान्वितम् ॥ पुराणोपक्रमप्रश्नः सर्गः संक्षेपतस्ततः ॥ २ ॥ सूर्यादिपूजनविधिर्दीक्षाविधिरतः परम् ॥ श्राद्धपूजा ततः पश्चान्नवव्यूहार्चनं
द्विज ॥ ३ ॥ पूजाविधानं च तथा वैष्णवं पंजरं ततः ॥ योगाध्यायस्ततो विष्णोर्नामसाहस्रकीर्तनम् ॥ ४ ॥ ध्यानं विष्णोस्ततः सूर्यपूजा
मृत्युंजयार्चनम् ॥ मालामंत्रः शिवार्चाथ गणपूजा ततः परम् ॥ ५ ॥ गोपालपूजा त्रैलोक्यमोहनश्रीधरार्चनम् ॥ विष्णवर्चा पंचतत्त्वार्चा
चक्रार्चा देवपूजनम् ॥ ॥ ६ ॥ न्यासादिसंध्योपास्तिश्च दुर्गार्चाथ सुरार्चनम् ॥ पूजा माहेश्वरी चातः पवित्रारोपणार्चनम् ॥ ७ ॥ मूर्तिध्यानं
वास्तुमानं प्रासादानां च लक्षणम् ॥ प्रतिष्ठा सर्वदेवानां पृथक्पूजा विधानतः ॥ ८ ॥ योगोऽष्टांगो दानधर्माः प्रायश्चित्तविधिक्रिया ॥
द्वीपेशनरकाख्यानं सूर्यव्यूहश्च ज्योतिषम् ॥ ९ ॥ सामुद्रिकं स्वरज्ञानं नवरत्नपरीक्षणम् ॥ माहात्म्यमथ तीर्थानां गयामाहात्म्यमुत्तमम्
॥ १० ॥ ततो मन्वंतराख्यानं पृथक्पृथग्विभागशः ॥ पित्राख्यानं वर्णधर्मा द्रव्यशुद्धिः समर्पणम् ॥ ११ ॥ श्राद्धं विनायकस्यार्चा ग्रहयज्ञस्तथा

श्रमाः ॥ जननाख्यं प्रेतशौचं नीतिशास्त्रं व्रतोक्तयः ॥ १२॥ सूर्यवंशः सोमवंशोऽवतारकथनं हरेः ॥ रामायणं हरेर्वंशो भारताख्यानकं ततः॥ १३॥
आयुर्वेदनिदानं प्राक् चिकित्सा द्रव्यजा गुणाः॥रोगघ्नं कवचं विष्णोर्गारुडं त्रैपुरो मनुः॥ १४॥प्रश्नचूडामणिश्चांतो हयायुर्वेदकीर्तनम्॥ओषधीनाम
कथनं ततो व्याकरणोहनम् ॥ १५ ॥ छंदःशास्त्रं सदाचारस्ततः स्नानविधिः स्मृतः ॥ तर्पणं वैश्वदेवं च संध्या पार्वणकर्म च ॥ १६ ॥नित्यश्राद्धं
सपिंडाख्यं धर्मसारोऽघनिष्कृतिः ॥ प्रतिसंक्रम उक्ताः स्म युगधर्माः कृतेः फलम्॥ १७॥योगशास्त्रं विष्णुभक्तिर्नमस्कृतिफलं हरेः॥माहात्म्यं वैष्णवं
चाथ नारसिंहस्तवोत्तमम् ॥ १८ ॥ ज्ञानामृतं गुहाष्टकं स्तोत्रं विष्णवर्चनाह्वयम् ॥वेदांतसांख्यसिद्धांतो ब्रह्मज्ञानं तथात्मकम्॥ १९॥गीतासारः फलो
त्कीर्तिः पूर्वखंडोऽयमीरितः ॥ अथास्यैवोत्तरे खंडे प्रेतकल्पः पुरोदितः ॥२० ॥ यत्र तार्क्ष्येण संपृष्टो भगवानाह वाडवाः॥धर्मप्रकटनं पूर्वं योगिनां
गतिकारणम् ॥ २१ ॥ दानादिकं फलं चापि प्रोक्तमन्त्रोर्द्ध्वदैहिकम्॥यमलोकस्थमार्गस्य वर्णनं च ततः परम्॥२२॥षोडशश्राद्धफलको वृत्तांतश्चात्र
वर्णितः ॥निष्कृतिर्यममार्गस्य धर्मराजस्य वैभवम्॥२३ ॥प्रेतपीडाविनिर्देशः प्रेतचिह्ननिरूपणम्॥प्रेतानां चरिताख्यानं कारणं प्रेततां प्रति॥ २४ ॥
प्रेतकृत्यविचारश्च सपिंडीकरणोक्तयः ॥ प्रेतत्वमोक्षणाख्यानं दानानि च विमुक्तये ॥ २५ ॥ आवश्यकोत्तमं दानं प्रेतसौख्यकरोहनम् ॥
शारीरकविनिर्देशो यमलोकस्य वर्णनम् ॥ २६ ॥ प्रेतत्वोद्धारकथनं कर्मकर्तृविनिर्णयः ॥ मृत्योः पूर्वक्रियाख्यानं पश्चात्कर्मनिरूपणम् ॥ २७ ॥
मध्यषोडशकश्राद्धं स्वर्गप्राप्तिक्रियोहनम् ॥ सूतकस्याथ संख्यानं नारायणबलिक्रिया ॥ २८ ॥ वृषोत्सर्गस्य माहात्म्यं निषिद्धपरिवर्जनम् ॥ अप
मृत्युक्रियोक्तिश्च विपाकः कर्मणां नृणाम् ॥ ॥२९॥ कृत्याकृत्यविचारश्च विष्णुध्यानविमुक्तये॥ स्वर्गतौ विहिताख्यानं स्वर्गसौख्यनिरूपणम्॥३०॥
भूर्लोकवर्णनं चैव सप्ताधोलोकवर्णनम् ॥ पंचोर्द्ध्वलोककथनं ब्रह्मांडस्थितिकीर्तनम् ॥ ३१॥ ब्रह्मांडानेकचरितं ब्रह्मजीवनिरूपणम् ॥ आत्यंतिकं
लयाख्यानं फलस्तुतिनिरूपणम् ॥ ३२ ॥ इत्येतद्गारुडं नाम पुराणं भुक्तिमुक्तिदम् ॥ कीर्तितं पापशमनं पठतां शृण्वतां नृणाम् ॥ ३३ ॥ लिखि
त्वैतत्पुराणं तु विषुवे यः प्रयच्छति ॥ सौवर्णहंसयुग्माढ्यं विप्राय स दिवं व्रजेत्॥३४॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे
गारुडानुक्रमणीवर्णनं नामाष्टोत्तरशततमोऽध्यायः॥१०८॥ ब्रह्मोवाच॥ शृणु वत्स प्रवक्ष्यामि ब्रह्मांडाख्यं पुरातनम्॥यच्च द्वादशसाहस्रमादिकल्पक
थायुतम् ॥ १ ॥ प्रक्रियाख्योऽनुषंगाख्य उपोद्घातस्तृतीयकः ॥ चतुर्थ उपसंहारः पादाश्चत्वार एव हि॥२ ॥ पूर्वपादद्वयं पूर्वो भागोऽत्र समुदाहृतः॥
तृतीयो मध्यमो भागश्चतुर्थस्तूत्तरो मतः ॥ ३ ॥ आदौ कृत्यसमुद्देशो नैमिषाख्यानकं ततः ॥ हिरण्यगर्भोत्पत्तिश्च लोककल्पनमेव च ॥ ४ ॥ एष

वै प्रथमः पादे द्वितीयं शृणु मानद ॥ कल्पमन्वन्तराख्यानं लोकज्ञानं ततः परम् ॥ ५ ॥ मानसीसृष्टिकथनं रुद्रप्रसववर्णनम् ॥ महादेवविभूतिश्च
ऋषिसर्गस्ततः परम् ॥ ६ ॥ अग्नीनां विजयश्चाथ कालसद्भाववर्णनम् ॥ प्रियव्रतान्वयोद्देशः पृथिव्यायामविस्तरः ॥ ७ ॥ वर्णनं भारतस्यास्य
ततोऽन्येषां निरूपणम् ॥जम्ब्वादिसप्तद्वीपाख्या ततोऽधोलोकवर्णनम् ॥ ८ ॥ उर्द्धलोकानुकथनं ग्रहचारस्ततः परम्॥ आदित्यव्यूहकथनं देवग्रहानु
कीर्तनम् ॥ ९ ॥ नीलकंठाह्वयाख्यानं महादेवस्य वैभवम् ॥ अमावास्यानुकथनं युगतत्त्वनिरूपणम्॥ १०॥यज्ञप्रवर्तनं चाथ युगयोरंत्ययोः कृतिः॥
युगप्रजालक्षणं च ऋषिप्रवरवर्णनम् ॥ ११ ॥ वेदानां व्यसनाख्यानं स्वायम्भुवनिरूपणम्॥ शेषमन्वंतराख्यानं पृथिवीदोहनं ततः ॥ १२ ॥ चाक्षु
षेऽद्यतने सर्गे द्वितीयोऽङ्घ्रिः पुरोदले ॥ अथोपोद्घातपादे तु सप्तर्षिपरिकीर्तनम्॥१३॥प्रजापत्यन्वयस्तस्माद्देवादीनां समुद्भवः॥ततो जयाभिलाषश्च
मरुदुत्पत्तिकीर्तनम् ॥ १४ ॥ काश्यपेयानुकथनं ऋषिवंशनिरूपणम् ॥ पितृकल्पानुकथनं श्राद्धकल्पस्ततः परम् ॥ १५ ॥ वैवस्वतसमुत्पत्तिः
सृष्टिस्तस्य ततः परम् ॥ मनुपुत्रान्वयश्चांतो गान्धर्वस्य निरूपणम् ॥ १६ ॥ इक्ष्वाकुवंशकथनं वंशोऽत्रेः सुमहात्मनः ॥ अमावसोरन्वयश्च
रजेश्चरितमद्भुतम् ॥ १७ ॥ ययातिचरितं चाथ यदुवंशनिरूपणम् ॥ कार्तवीर्यस्य चरितं जामदग्न्यं ततः परम् ॥१८॥ वृष्णिवंशानुकथनं सगर
स्याथ संभवः ॥ भार्गवस्यानुचरितं पितृकार्यवधाश्रयम् ॥ १९ ॥ सगरस्याथ चरितं भार्गवस्य कथा पुनः ॥ देवासुराहवकथा कृष्णाविर्भाववर्ण
नम् ॥२०॥ इंद्रस्य तु स्तवः पुण्यः शुक्रेण परिकीर्तितः ॥ विष्णुमाहात्म्यकथनं बलिवंशनिरूपणम्॥२१॥भविष्यराजचरितं संप्राप्तेऽथ कलौ युगे॥
समुपोद्घातपादोऽयं तृतीयो मध्यमे दले ॥ २२ ॥ चतुर्थमुपसंहारं वक्ष्ये खण्डे तथोत्तरे ॥ वैवस्वतांतराख्यानं विस्तरेण यथातथम् ॥२३॥ पूर्वमेव
समुद्दिष्टं संक्षेपादिह कथ्यते ॥ भविष्याणां मनूनां च चरितं हि ततः परम् ॥ २४ ॥ कल्पप्रलयनिर्देशः कालमानं ततः परम् ॥ लोकाश्चतुर्दश ततः
कथिताः प्रातलक्षणैः ॥ २५ ॥ वर्णनं नरकाणां च विकर्माचरणैस्ततः ॥ मनोमयपुराख्यानं लयः प्राकृतिकस्ततः ॥ २६ ॥ शैवस्याथ पुरस्यापि
वर्णनं च ततः परम् ॥ त्रिविधा गुणसंबंधाज्जंतूनां कीर्तिता गतिः ॥ २७ ॥ अनिर्देश्याप्रतर्क्यस्य ब्रह्मणः परमात्मनः ॥ अन्वयव्यतिरेकाभ्यां वर्णनं
हि ततः परम् ॥ २८ ॥ इत्येष उपसंहारपादो वृत्तः सहोत्तरः ॥ चतुष्पादं पुराणं ते ब्रह्माण्डं समुदाहृतम् ॥ २९ ॥ अष्टादशमनौपम्यं सारात्सारतरं
द्विज ॥ ब्रह्मांड यच्चतुर्लक्षं पुराणं येन पठ्यते ॥ ३० ॥ तदेतदस्य गदितमत्राष्टादशधा पृथक् ॥ पाराशर्येण मुनिना सर्वेषामपि मानद ॥३१॥वस्तुत
स्तूपदेष्टाथ मुनीनां भावितात्मनाम् ॥ मत्तः श्रुत्वा पुराणानि लोकेभ्यः प्रचकाशिरे ॥ ३२ ॥ मुनयो धर्मशीलास्ते दीनानुग्रहकारिणः ॥ मया

चेदं पुराणं तु वसिष्ठाय पुरोदितम् ॥ ३३ ॥ तेन शक्तिसुतायोक्तं जातूकर्ण्याय तेन च ॥ व्यासो लब्ध्वा ततश्चैतत्प्रभंजनमुखोद्गतम् ॥
॥३४॥ प्रमाणीकृत्य लोकेऽस्मिन्प्रावर्तयदनुत्तमम् ॥ य इदं कीर्तयेद्वत्स शृणोति च समाहितः॥३५॥स विधूयेह पापानि याति लोकमनामयम्॥
लिखित्वैतत्पुराणं तु स्वर्णसिंहासनस्थितम् ॥३६॥वस्त्रेणाच्छादितं यस्तु ब्राह्मणाय प्रयच्छति ॥ स याति ब्रह्मणो लोकं नात्र कार्या विचारणा ॥
॥ ३७ ॥ मरीचेऽष्टादशैतानि मया प्रोक्तानि यानि ते ॥ पुराणानि तु संक्षेपाच्छ्रोतव्यानि च विस्तरात् ॥ ३८ ॥ अष्टादश पुराणानि यः शृणोति
नरोत्तमः ॥ कथयेद्वा विधानेन नेह भूयः स जायते ॥ ३९ ॥ सूत्रमेतत्पुराणानां यन्मयोक्तं तवाधुना ॥ तन्नित्यं शीलनीयं हि पुराणफलमिच्छता
॥ ४० ॥ न दांभिकाय पापाय देवगुर्वनुसूयवे ॥ देयं कदापि साधूनां द्वेषिणे न शठाय च ॥ ४१ ॥ शांताय शमचित्ताय शुश्रूषाभिरताय च ॥
निर्मत्सराय शुचये देयं सद्वैष्णवाय च ॥ ४२ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे ब्रह्माण्डपुराणानुक्रमणीनिरूपणं नाम
नवोत्तरशततमोऽध्यायः ॥ १०९ ॥ नारद उवाच ॥ पुराणसूत्रमखिलं श्रुतं तव मुखाद्विभो ॥ मरीचये यथा प्रोक्तं ब्रह्मणा परमेष्ठिना ॥ १ ॥
अधुना तु महाभाग तिथीनां वै कथानकम् ॥ क्रमतो महामाख्याहि यथा स्याद्व्रतनिश्चयः ॥ २ ॥यस्मिन्मासे तु या पुण्या तिथिर्येन उपासिता ॥
यद्विधानं च पूजादेस्तत्सर्वं वद सांप्रतम् ॥ ३ ॥ सनातन उवाच ॥ शृणु नारद वक्ष्यामि तिथीनां ते व्रतं पृथक् ॥ तिथीशानुक्रमादेव सर्वसिद्धि
विधायकम् ॥ ४ ॥ चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि ॥ शुक्लपक्षे समग्रं वै तदा सूर्योदये सति॥५॥वत्सरादौ वसंतादौ बलिराज्ये तथैव च॥
पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैः ॥६॥ तत्र कार्या महाशांतिः सर्वकल्मषनाशिनी ॥ सर्वोत्पातप्रशमनी कलिदुष्कृतहारिणी ॥७॥ आयुःप्रदा
पुष्टिकरी धनसौभाग्यवर्द्धिनी ॥ मंगल्या च पवित्रा च लोकद्वयसुखावहा ॥ ८॥ तस्यामादौ तु संपूज्यो ब्रह्मा वह्निवपुर्धरः ॥ पाद्यार्घ्यपुष्पधूपैश्च
वस्त्रालंकारभोजनैः ॥ ९ ॥ होमैर्बल्युपहारैश्च तथा ब्राह्मणतर्पणैः ॥ ततः क्रमेण देवेभ्यः पूजा कार्या पृथक्पृथक् ॥ १० ॥ कृत्वोंकार
नमस्कारं कुशोदकतिलाक्षतैः ॥ सवस्त्रं सहिरण्यं च ततो दद्याद्द्विजातये ॥ ११ ॥ दक्षिणां वेदविदुषे व्रतसंपूर्तिहेतवे ॥ एवं पूजाविशेषेण
व्रतं स्यात्सौरिसंज्ञकम् ॥ १२ ॥ आरोग्यदं नृणां विप्र तस्मिन्नेव दिने मुने ॥ विद्याव्रतमपि प्रोक्तमस्यामेव तिथौ मुने ॥ १३ ॥ तिलकं
नाम च प्रोक्तं कृष्णेनाजातशत्रवे ॥ अथ ज्येष्ठे सिते पक्षे पक्षत्यां दिवसोदये ॥ १४॥देवोद्यानभवं हृद्यं करवीरं समर्चयेत् ॥ रक्ततन्तुपरीधानं
गंधधूपविलेपनैः ॥ १५ ॥ प्ररूढसप्तधान्यैश्च नारंगैर्बीजपूरकैः ॥ अभ्युक्ष्याक्षततोयेन मंत्रेणेत्थं क्षमापयेत्॥ १६ ॥करवीर वृषावास नमस्ते

भानुवल्लभ ॥ दंभोलिभृडदुर्गादिदेवानां सततं प्रिय ॥ १७ ॥ आक्रुष्णेनेति वेदोक्तमंत्रेणेत्थं क्षमापयेत् ॥ एवं भक्त्या समभ्यर्च्य दत्त्वा विप्राय
दक्षिणाम् ॥ १८ ॥ प्रदक्षिणं ततः कुर्यात्पश्चात्स्वभवनं व्रजेत् ॥ नभःशुक्ले प्रतिपदि लक्ष्मीवृद्धिप्रदायकम् ॥ १९ ॥ धर्मार्थकाममोक्षाणां निदानं
परमं व्रतम् ॥ सोमवारं समारभ्य सार्धमासत्रयं द्विज ॥ २० ॥ कार्तिकासितभूतायामुपोष्य व्रततत्परः ॥ पूर्णायां शिवमभ्यर्च्य सुवर्ण वंशसंयुतम् ॥ २१ ॥
वायनं सुमहत्पुण्यं देवताप्रीतिवर्धकम् ॥ दद्याद्विप्राय संकल्प्य धनवृद्ध्यै मुनीश्वर ॥ २२ ॥ भाद्रशुक्लप्रतिपदि व्रतं नाम्ना महत्तमम् ॥ व्रतं मौनाह्वयं केचि
त्प्राहुरत्र शिवोऽर्च्यते ॥ २३ ॥ नैवेद्यं तु पचेन्मौनी षोडशत्रिगुणानि च ॥ फलानि पिष्टपक्वानि दद्याद्विप्राय षोडश ॥ २४ ॥ देवाय षोडशान्यानि
भुज्यंते षोडशात्मना ॥ सौवर्णं शिवमभ्यर्च्य कुम्भोपरि विधानवित् ॥ २५ ॥ तत्सर्वं धेनुसहितमाचार्य्याय प्रदापयेत् ॥ इदं कृत्वा व्रतं विप्र देव
देवस्य शूलिनः ॥ २६ ॥ चतुर्दशाब्दं देहांतं भुक्तभोगः शिवं व्रजेत् ॥ आश्विने सितपक्षत्यां कृत्वाशोकव्रतं नरः ॥ २७ ॥ अशोको जायते विप्र
धनधान्यसमन्वितः ॥ अशोकपूजनं तत्र कार्यं नियमतत्परैः ॥ २८ ॥ व्रतांते द्वादशे वर्षे मूर्तिं चाशोकशाखिनः ॥ समर्प्य गुरवे भक्त्या
शिवलोके महीयते ॥ २९ ॥ अस्यामेव प्रतिपदि नवरात्रं समारभेत् ॥ पूर्वाह्णे पूजयेद्देवीं घटस्थापनपूर्वकम् ॥ ३० ॥ अंकुरारोपणं
कृत्वा यवैर्गोधूममिश्रितैः ॥ ततः प्रतिदिनं कुर्यादेकभुक्तमयाचितम् ॥ ३१ ॥ उपवासं यथाशक्ति पूजापाठजपादिकम् ॥ मार्कंण्डेय
पुराणोक्तं चरितत्रितयं द्विज ॥ ३२ ॥ पठनीयं नवदिनं भुक्तिमुक्ती अभीप्सता ॥ कुमारीपूजनं तत्र प्रशस्तं भोजनादिभिः ॥ ३३ ॥ इत्थं कृत्वा व्रतं
विप्र सर्वसिद्ध्यालयो नरः ॥ जायते भुवि दुर्गायाः प्रसादान्नात्र संशयः ॥ ३४ ॥ अथोर्जसितपक्षत्यां नवरात्रोदितं चरेत् ॥ विशेषादन्नकूटाख्यं
विष्णुप्रीतिविवर्धनम् ॥ ३५ ॥ सर्वपाकैः सर्वदोहैः सर्वैः सर्वार्थसिद्धये ॥ कर्तव्यमन्नकूटं तु गोवर्द्धनसमर्चने ॥ ३६ ॥ सायं गोभिः सह श्रीमद्गो
वर्द्धनधराधरम् ॥ समर्च्य दक्षिणीकृत्य भुक्तिमुक्ती समाप्नुयात् ॥ ३७ ॥ अथ मार्गसिताद्यायां धनव्रतमनुत्तमम् ॥ नक्तं विष्ण्वर्चनं होमैः सौवर्णीं
हुतभुक्तनुम् ॥ ३८ ॥ रक्तवस्त्रयुगाच्छन्नां द्विजाय प्रतिपादयेत् ॥ एवं कृत्वा धनैर्धान्यैः समृद्धो जायते भुवि ॥ ३९ ॥ वह्निना दग्धपापस्तु विष्णु
लोके महीयते ॥ पौषशुक्लप्रतिपदि भानुमभ्यर्च्य भक्तितः ॥ ४० ॥ एकभक्तव्रतो मर्त्यो भानुलोकमवाप्नुयात् ॥ माघशुक्लाद्यदिवसे वह्निं साक्षा
न्महेश्वरम् ॥ ४१ ॥ समभ्यर्च्य विधानेन समृद्धो जायते भुवि ॥ अथ फाल्गुनशुक्लादौ देवदेवं दिगंबरम् ॥ ४२ ॥ धूलिधूसरसर्वांगं जलैरुक्षेत्स
मंततः ॥ कर्मणा लौकिकेनापि संतुष्टो हि महेश्वरः ॥ ४३ ॥ स्वसायुज्यं प्रदिशति भक्त्या सम्यक्समार्चितः ॥ वैशाखे तु सिताद्यायां विष्णुं

विश्वविहारिणम् ॥ ४४ ॥ समभ्यर्च्य विधानेन विप्रान्संभोजयेद्व्रती॥एवं शुचिसिताद्यायां ब्रह्माणं जगतां गुरुम् ॥ ४५ ॥ विष्णुना सहितो ब्रह्मा सर्वलोकेश्वरेश्वरः॥ स्वसायुज्यं प्रदिशति सर्वसिद्धिमवाप्नुयात् ॥ ४६ ॥ आसु द्वादशमासानां प्रतिपत्सु द्विजोत्तम ॥ व्रतानि तुभ्यं प्रोक्तानि भुक्तिमुक्तिप्रदानि च ॥ ४७ ॥ व्रतेष्वेतेषु सर्वेषु ब्रह्मचर्यं विधीयते ॥ भोजने तु हविष्यान्नं सामान्यत उदाहृतम् ॥ ४८ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे द्वादशमासप्रतिपद्व्रतनिरूपणं नाम दशोत्तरशततमोऽध्यायः ॥ ११०॥

सनातन उवाच ॥ शृणु विप्र प्रवक्ष्यामि द्वितीयाया व्रतानि ते ॥ यानि कृत्वा नरो भक्त्या ब्रह्मलोके महीयते ॥ १ ॥ चैत्रशुक्लद्वितीयायां ब्रह्माणं च सशक्तिकम् ॥ हविष्यान्नेन गन्धाद्यैः स्तोष्य सर्वक्रतूद्भवम् ॥ २ ॥ फलं लब्ध्वाखिलान्कामानंते ब्रह्मपदं लभेत् ॥ अस्मिन्नेव दिने विप्र बालेंदुमुदितं परे॥ ३ ॥ समभ्यर्च्य निशारंभे भुक्तिमुक्तिफलं भवेत् ॥ अथ वास्मिन्दिने भक्त्या दस्रावभ्यर्च्य यत्नतः॥४॥सुवर्णरजते नेत्रे प्रदद्याच्च द्विजातये ॥ पूर्णयात्राव्रते ह्यस्मिन्दध्ना वापि घृतेन च ॥५॥ नेत्रव्रतं द्वादश वत्सरान्वै कृत्वा भवेद्भूमिपतिर्द्विजेंद्र॥ सुरूपरूपोऽरिगणप्रतापी धर्माभिरामो नृपवर्गमुख्यः ॥६॥ राधशुक्लद्वितीयायां ब्रह्माणं विष्णुरूपिणम् ॥ समर्च्य सप्तधान्याढ्यकुंभोपरि विधानतः ॥ ७ ॥ विष्णुलोकमवाप्नोति भुक्त्वा भोगान्मनोरमान् ॥ ज्येष्ठशुक्लद्वितीयायां भास्करं भुवनाधिपम् ॥ ८ ॥चतुवक्रस्वरूपं च समभ्यर्च्य विधानतः ॥ भोजयित्वा द्विजान् भक्त्या भास्करं लोकमाप्नुयात् ॥ ९ ॥ आषाढस्य सिते पक्षे द्वितीया पुण्यसंयुता ॥ तस्यां रथं समारोप्य रामं सह सुभद्रया ॥ १० ॥ द्विजादिभिर्व्रती सार्धं परिक्रम्य पुरादिकम् ॥ जलाशयांतिकं गत्वा कारयेच्च महोत्सवम् ॥ ११ ॥ तदन्ते देवभवने निवेश्य च यथाविधि ॥ ब्राह्मणान्भोजयेच्चैव व्रतस्यास्य प्रपूर्तये॥१२॥ नभःशुक्लद्वितीयायां विश्वकर्मा प्रजापतिः ॥ स्वपितीति तिथिः पुण्या ह्यशोकशयनाह्वया ॥१३॥ सशक्तिकं तु शय्यास्थं पूजयित्वा चतुर्मुखम् ॥ इममुच्चारयेन्मंत्रं प्रणम्य जगतां पतिम् ॥ १४ ॥ श्रीवत्सधारिङ्छ्रीकांत श्रीवास श्रीपते प्रभो ॥ गार्हस्थ्यं मा प्रणाशं मे यातु धर्मार्थकामद ॥१५॥ चंद्रार्द्धदानमन्त्रोक्तं सर्वसिद्धिविधायकम् ॥ भाद्रशुक्लद्वितीयायां शक्ररूपं जगद्विधिम् ॥१६॥ पूजयित्वा विधानेन सर्वक्रतुफलं लभेत् ॥ आश्विने मासि वै पुण्या द्वितीया शुक्लपक्षगा ॥ १७ ॥ दानं प्रदत्तमेतस्यामनंतफलमुच्यते ॥ ऊर्ज्जशुक्लद्वितीयायां यमो यमुनया पुरा १८ ॥ भोजितः स्वगृहे तेन द्वितीयैषा यमाह्वया ॥ पुष्टिप्रवर्द्धनं चात्र भगिन्या भोजनं गृहे ॥ १९ ॥ वस्त्रालंकारपूर्वं तु तस्यै देयमतः परम् ॥ २० ॥ यस्यां तिथौ यमुनया यमराजदेवः संभोजितो निजकरात्स्वसृसौहृदेन ॥ तस्यां स्वसुः करतलादिह यो भुनक्ति प्राप्नोति रत्नधनधान्यमनुत्तमं सः ॥ २१ ॥ मार्ग

शुक्लद्वितीयायां श्राद्धेन पितृपूजनम् ॥ आरोग्यं लभते चापि पुत्रपौत्रसमन्वयः ॥ २२ ॥ पौषशुक्लद्वितीयायां गोशृंगोदकमार्जनम् ॥ सर्वकामप्रदं
नृणामास्ते बालेंदुदर्शनम्॥ २३ ॥योऽर्घ्यदानेन बालेंदुं हविष्याशी जितेंद्रियः॥ पूजयेत्साज्यसुमनैर्धर्मकामार्थसिद्धये ॥ २४॥ माघशुक्लद्वितीयायां
भानुरूपं प्रजापतिम् ॥ समभ्यर्च्य यथान्यायं पूजयेद्रक्तपुष्पकैः ॥ २५ ॥ रक्तैर्गंधैस्तथा स्वर्णमूर्तिं निर्माय शक्तितः ॥ ततः पूर्णं ताम्रपात्रं गोधूमै
र्वापितण्डुलैः ॥ २६ ॥ समर्प्य देवे भक्त्यैव स मूर्तिं प्रददेद्द्विजे ॥ एवं कृते व्रते विप्र साक्षात्सूर्य इवोदितः ॥ २७ ॥ दुरासदो दुराधर्षो जायते भुवि
मानवः ॥ इह कामान्वरान्भुक्त्वा यात्यंते ब्रह्मणः पदम् ॥ २८ ॥ सर्वदेवस्तुतोऽभीक्ष्णं विमानवरमास्थितः ॥ अथ फाल्गुनशुक्लायां द्वितीयायां
द्विजोत्तमः ॥२९॥ पुष्पैः शिवं समभ्यर्च्य सुश्वेतैश्च सुगंधिभिः ॥ पुष्पैर्वितानकं कृत्वा पुष्पालंकरणैः शुभैः॥३०॥ नैवेद्यैर्विविधैर्धूपैर्दीपैर्नीराजना
दिभिः ॥ प्रसाद्य प्रणमेच्चैव साष्टांगं पतितो भुवि ॥ ३१ ॥ एवमभ्यर्च्य देवेशं मर्त्यो व्याधिविवर्जितः ॥ धनधान्यसमायुक्तो जीवेद्वर्षशतं ध्रुवम्
॥ ३२ ॥ यद्विधानं द्वितीयासु शुक्लपक्षगतासु वा ॥ प्रोक्तं तदेव कृष्णासु कर्त्तव्यं विधिकोविदैः ॥ ३३ ॥ वह्निरेव पृथङ्मास्सु नानारूपवपुर्द्धरः॥
पूज्यते हि द्वितीयासु ब्रह्मचर्य्यादि पूर्ववत् ॥३४॥ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे द्वादशमासद्वितीयाव्रतनिरूपणं ना
मैकादशाधिकशततमोऽध्यायः ॥ १११ ॥सनातन उवाच ॥ शृणु नारद वक्ष्यामि तृतीयाया व्रतानि ते ॥ यानि सम्यग्विधायाशु नारी सौभाग्य
माप्नुयात् ॥ १ ॥ चैत्रशुक्लतृतीयायां गौरीं कृत्वा सभर्तृकाम् ॥ सौवर्णीं राजतीं वापि ताम्रीं वा मृण्मयीं द्विज ॥२॥अभ्यर्च्य गन्धपुष्पाद्यैर्वस्त्रैराभ
रणैः शुभैः ॥ दूर्वाकांडैश्च विधिवत्सोपवासा तु कन्यका ॥ ३ ॥ वरार्थिनी च सौभाग्यपुत्रभर्त्रर्थिनी तथा ॥द्विजभार्या भर्तृमतीः कन्यका वा सुल
क्षणाः ॥ ४ ॥ सिंदूरांजनवस्त्राद्यैः प्रतोष्य प्रीतमानसा ॥ रात्रौ जागरणं कुर्याद्व्रतसंपूर्तिकाम्यया ॥ ५ ॥ ततस्तां प्रतिमां विप्र गुरवे प्रतिपादयेत्॥
धातुजां मृन्मयीं वा तु निक्षिपेच्च जलाशये ॥ ६ ॥ एवं द्वादशवर्षाणि कृत्वा गौरीव्रतं शुभम् ॥ धेनुद्वादशसंकल्पं दद्यादुत्सर्गसिद्धये ॥७॥
किमत्र बहुनोक्तेन गौरी सौभाग्यदायिनी॥ स्त्रीणां यथा तथा नान्या विद्यते भुवनत्रये ॥८॥ धनं पुत्रान्पतिं विद्यामाज्ञासिद्धिं यशः सुखम्॥लभते
सर्वमेवेष्ट गौरीमभ्यर्च्य भक्तितः ॥९॥ राधशुक्लतृतीया या साक्षया परिकीर्तिता ॥ तिथिस्त्रेतायुगाद्या सा कृतस्याक्षयकारिणी॥१० ॥ द्वे शुक्ले
द्वे तथा कृष्णे युगादी कवयो विदुः ॥ शुक्ले पूर्वाह्णिके ग्राह्ये कृष्णे चैव तपस्यथ ॥ ११ ॥ द्वापरं हि कलिर्भाद्रे प्रवृत्तानि युगानि वै ॥ तत्र राधतृ
तीयायां श्रीसमेतं जगद्गुरुम् ॥ १२ ॥ नारायणं समभ्यर्चेत्पुष्पधूपविलेपनैः ॥ यद्वा गंगांभसि स्नातो मुच्यते सर्वकिल्बिषैः ॥ १३ ॥ अक्षतैः पूज

येद्विष्णुं स्नायाद्प्यक्षतैर्नरः ॥ सक्तून्संभोजयेद्विप्रान्स्वयमभ्यवहरेच्च तान् ॥ १४ ॥ एवं कृतविधिर्विप्र नरो विष्णुपरायणः॥विष्णुलोकमवाप्नोति सर्वदेवनमस्कृतः ॥ १५ ॥ अथ ज्येष्ठतृतीया तु शुक्ला रंभेति नामतः॥तस्यां सभार्यं विधिवत्पूजयेद्ब्राह्मणोत्तमम् ॥ १६ ॥ गन्धपुष्पांशुकाद्यैस्तु नारी सौभाग्यकाम्यया ॥ रंभाव्रतमिदं विप्र विधिवत्समुपाश्रितम् ॥ १७ ॥ ददाति वित्तं पुत्रांश्च मतिं धर्मे शुभावहाम् ॥ अथाषाढतृतीयायां शुक्लायां शुक्लवाससा ॥ १८ ॥ केशवं तु सलक्ष्मीकं सस्त्रीके तु द्विजेऽर्चयेत् ॥ भोजनैः सुरभीदानैर्वस्त्रैश्चापि विभूषणैः ॥१९ ॥ प्रियैर्वाक्यैर्भृशं प्रीता नारी सौभाग्यवांछया ॥ समुपास्य व्रतं चैतद्धनधान्यसमन्विता ॥ २० ॥ देवदेवप्रसादेन विष्णुलोकमवाप्नुयात् ॥ नभःशुक्लतृतीयायां स्वर्णगौरीव्रतं चरेत् ॥ २१ ॥ उपचारैः षोडशभिर्भवानीमभिपूजयेत्॥ पुत्रान्देहि धनं देहि सौभाग्यं देहि सुव्रते॥२२॥अन्यांश्च सर्वकामान्मे देहि देहि नमोऽस्तु ते॥ एवं संप्रार्थ्य देवेशीं भवानीं भवसंयुताम् ॥ २३ ॥ व्रतसंपूर्तिकामा तु वायनं दापयेत्तथा ॥ एवं षोडशवर्षाणि कृत्वा नारी व्रतं शुभम् ॥ २४ ॥ उद्यापनं चरेद्भक्त्या वित्तशाठ्यविवर्जिता ॥ मंडपे मण्डले शुद्धे गणेशादिसुरार्चनम् ॥ २५ ॥ कृत्वा ताम्रमयं पात्रं कलशोपरि विन्यसेत् ॥ सौवर्णीं प्रतिमां तत्र भवान्याः प्रतिपूजयेत् ॥ २६ ॥ गंधपुष्पादिभिः सम्यक् ततो होमं समाचरेत् ॥ वेणुपात्रैः षोडशभिः पक्वान्न परिपूरितैः ॥ २७ ॥ समर्प्य देव्यै नैवेद्यं द्विजेष्वेतन्निवेदयेत् ॥ वायनं च ततः पश्चाद्द्यात्संबन्धिबन्धुषु ॥ २८ ॥ प्रतिमां गुरवे दत्त्वा द्विजेभ्यो दक्षिणां तथा ॥ पूर्णं लभेत्फलं नारी व्रताचरणतत्परा ॥ २९ ॥ भाद्रशुक्लतृतीयायां व्रतं वै हारितालकम् ॥ कुर्याद्भक्त्या विधानेन पाद्यार्घ्यार्चन पूर्वकम् ॥ ३० ॥ ततस्तु कांचने पात्रे राजते चापि ताम्रके ॥ वैणवे मृन्मये वापि विन्यस्यान्नं सदक्षिणम् ॥ ३१ ॥ सफलं च सवस्त्रं च द्विजाय प्रतिपादयेत् ॥ तदंते पारणं कुर्यादिष्टबन्धुजनैः सह ॥ ३२ ॥ एवं कृतव्रता नारी भुक्त्वा भोगान्मनोरमान् ॥ व्रतस्यास्य प्रभावेण गौरीसहचरी भवेत् ॥ ३३॥ सौभाग्यद्रव्यवस्त्राणि वंशपात्राणि षोडश ॥ दातव्यानि प्रयत्नेन ब्राह्मणेभ्यो यथाविधि ॥ ३४ ॥ अन्येभ्यो विप्रवर्येभ्यो दक्षिणां च प्रयत्नतः ॥ भूयसीं च ततो दद्याद्विप्रेभ्यो देवितुष्टये ॥ ३५ ॥ एवं या कुरुते नारी व्रतं सौभाग्यवर्द्धनम् ॥सा तु देवीप्रसादेन सौभाग्यं लभते ध्रुवम् ॥ ३६ ॥ यदा तृतीया भाद्रे तु हस्तर्क्षसहिता भवेत्॥ हस्तगौरीव्रतं नाम तदुद्दिष्टं हि शौरिणा ॥३७॥ तथा कोटीश्वरी नाम व्रतं प्रोक्तं पिनाकिना ॥ लक्षेश्वरी चैव तथा तद्विधानमुदीर्यते ॥ ३८ ॥ अस्यां व्रतं तु संग्राह्यं यावद्वर्षचतुष्टयम् ॥ उपवासेन कर्तव्यं वर्षे वर्षे तु नारद ॥ ३९ ॥ अखंडानां तंडुलानां तिलानां वा मुनीश्वर ॥ लक्षमेकं विशोध्याथ क्षिपेत्पयसि संस्कृते ॥ ४० ॥ तत्पक्वेन तु निर्माय देव्या मूर्तिं सुशोभनाम्॥प्रकरे

गंधपुष्पाणां पुष्पमालाविभूषिताम् ॥४१॥ संस्थाप्य पार्वतीं तत्र पूजयेद्भक्तिभावितः॥गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यविस्तरैः॥४२॥विविधैश्च फलैर्विप्र नमस्कृत्य क्षमापयेत् ॥ ततो विसर्जयेद्देवीं जलमध्येऽथ दक्षिणाम् ॥ ४३ ॥ दत्त्वा विधिज्ञविप्रेभ्यो भुञ्जीयाच्च परे दिने ॥ इति ते कथितं विप्र कोटिलक्षेश्वरीव्रतम् ॥ ४४ ॥ गौरीलोकं प्रयात्यंते व्रतस्यास्य प्रभावतः ॥ इषशुक्लतृतीयायां बृहद्गौरीव्रतं चरेत् ॥ ४५ ॥ पंचवर्षं विधानेन पूर्वोक्तेनैव नारद ॥आचार्यं पूजयेदंते विप्रानन्यान्धनादिभिः ॥४६ ॥ सुवासिनीः पंच पूज्या वस्त्रालंकारचन्दनैः ॥ कंचुकैश्चैव ताटंकैः कंठसूत्रैर्हरिप्रियाः ॥ ४७ ॥ वंशपात्राणि पंचैव सूत्रैः संवेष्टितानि च ॥ सिंदूरं जीरकं चैव सौभाग्यद्रव्यसंयुतम् ॥४८॥ गोधूमपिष्टजातं च नवापूपं फलादिकम् ॥ वायनानि च पंचैव ताभ्यो दद्याच्च भोजयेत् ॥४९॥ अर्घं दत्त्वा वायनानि पश्चाद्भुंजीत वाग्यता ॥ तत्फलं धारयेत्कंठे सर्वकामसमृद्धये ॥ ५० ॥ ततः प्रातः समुत्थाय सालंकारा सखीजनैः ॥ गीतवाद्ययुता नद्यां गौरीं तां तु विसर्जयेत्॥५१ ॥ आहूतासि मयाभद्रे पूजिता च यथा विधि ॥ मम सौभाग्यदानाय यथेष्टं गम्यतां त्वया ॥५२॥ एवं कृत्वा व्रतं भक्त्या द्विज देवीप्रसादतः ॥ भुक्त्वा भोगांस्तु देहांते गौरीलोकमवाप्नुयात् ॥ ५३ ॥ ऊर्जशुक्लतृतीयायां विष्णुगौरीव्रतं चरेत् ॥ पूजयित्वा जगद्वन्द्यामुपचारैः पृथग्विधैः॥५४॥ सुवासिनीं भोजयित्वा मङ्गलद्रव्यपूजिताम् ॥ विसर्जयेत्प्रणम्यैनां विष्णुगौरीप्रतुष्टये॥५५ ॥मार्गशुक्लतृतीयायां हरगौरीव्रतं शुभम् ॥ कृत्वा पूर्वविधानेन पूजयेज्जगदंबिकाम् ॥ ५६ ॥ एतद्व्रतप्रभावेण भुक्त्वा भोगान्मनोरमान् ॥ देवीलोकं समासाद्य मोदते च तया सह ॥ ५७ ॥ पौषशुक्लतृतीयायां ब्रह्मगौरीव्रतं चरेत् ॥ पूर्वोक्तेन विधानेन पूजितापि द्विजोत्तम ॥ ५८ ॥ ब्रह्मगौरीप्रसादेन मोदते तत्र संगता ॥ माघशुक्लतृतीयायां पूज्या सौभाग्यसुंदरी ॥५९ ॥पूर्वोक्तेन विधानेन नालिकेरार्घ्यदानतः ॥ प्रसन्ना दिशति स्वीयं लोकं तु व्रततोषिता ॥ ६० ॥ फाल्गुनस्य सिते पक्षे तृतीया कुलसौख्यदा ॥ पूजिता गन्धपुष्पाद्यैः सर्वमङ्गलदा भवेत् ॥ ६१ ॥ सर्वासु च तृतीयासु विधिः साधारणो मुने॥ देवीपूजा विप्रपूजा दानं होमो विसर्जनम् ॥ ६२ ॥ इत्येवं कथितानीह तृतीयाया व्रतानि ते ॥ भक्त्या कृतानि चेष्टांस्तु कामान्दद्युर्मनोगतान् ॥ ६३ ॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे द्वादशमासतृतीयाव्रतकथनं नाम द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥ सनातन उवाच ॥ शृणु विप्र प्रवक्ष्यामि चतुर्थ्यास्ते व्रतान्यहम् ॥ यानि कृत्वा नरा नार्योऽभीष्टान्कामानवाप्नुयुः ॥१॥ चैत्रमासचतुर्थ्यां तु वासुदेवस्वरूपिणम्॥ गणपं सम्यगभ्यर्च्य दत्त्वा कांचनदक्षिणाम् ॥ २ ॥ विप्राय विष्णुलोकं तु गच्छेद्देवनमस्कृतः ॥ वैशाखस्य चतुर्थ्यां तु प्रार्थ्य संकर्षणाह्वयम् ॥ ३ ॥ गृहस्थद्विजमुख्येभ्यः शंखं

दत्त्वा विधानवित् ॥ प्राप्य संकर्षणं लोकं मोदते बहुकल्पकम् ॥ ४ ॥ ज्येष्ठमासचतुर्थ्यां तु प्रार्च्य प्रद्युम्नरूपिणम् ॥ फलं मूलं च यूथेभ्यो
दत्त्वा स्वर्गं लभेन्नरः ॥ ५ ॥ आषाढस्य चतुर्थ्यां तु संप्रपूज्यानिरुद्धकम् ॥ यतिभ्योऽलाबुपात्राणि दत्त्वाभीष्टं लभेन्नरः ॥ ६ ॥ चतुर्मूर्तिव्रतान्येवं
कृत्वा द्वादशवत्सरम् ॥ उद्यापनं विधानेन कर्तव्यं फलमिच्छता ॥ ७ ॥ अन्यज्ज्येष्ठचतुर्थ्यां तु सतीव्रतमनुत्तमम् ॥ कृत्वा गणपतेर्मातुर्लोके
मोदेत तत्समम् ॥ ८ ॥ तथाऽऽषाढचतुर्थ्यां तु व्रतमन्यच्छुभावहम् ॥ रथंतराह्वकल्पस्य ह्यादिभूतं दिनं यतः ॥ ९ ॥ श्रद्धापूतेन मनसा
गणेशं विधिना नरः ॥ पूजयित्वा लभेच्चापि फलं देवादिदुर्गमम् ॥ १० ॥ श्रावणस्य चतुर्थ्यां तु जाते चंद्रोदये मुने ॥ ११ ॥ गणेशाय
प्रदद्याच्च ह्यर्घ्यं विधिविदांवरः ॥ लम्बोदरं चतुर्बाहुं त्रिनेत्रं रक्तवर्णकम् ॥ १२ ॥ नानारत्नविभूषाढ्यं प्रसन्नास्यं विचिंतयेत् ॥ आवाह
नादिभिः सर्वैरुपचारैः समर्चयेत् ॥ १३ ॥ नैवेद्यं मोदकं दद्याद्गणेशप्रीतिदायकम् ॥ एवं व्रतं विधायाथ भुक्त्वा मोदकमेव च ॥
॥ १४ ॥ सुखं स्वप्यान्निशायां तु भूमावेव कृतार्चनः ॥ व्रतस्यास्य प्रभावेण कामान्मनसि चिंतितान् ॥ १५॥ लब्ध्वा लोके परं चापि गणेशप
दमाप्नुयात् ॥ नानेन सदृशं चान्यद्व्रतमस्ति जगत्त्रये ॥ १६ ॥ तस्मात्कार्यं प्रयत्नेन सर्वान्कामानभीप्सता ॥ अथास्मिन्नेव दिवसे दूर्वागणपति
व्रतम् ॥ १७ ॥ केचिदिच्छंति देवर्षे तद्विधानं वदामि ते ॥ हैमं निर्माय गणपं ताम्रपात्रोपरि स्थितम् ॥ १८ ॥ वेष्टितं रक्तवस्त्रेण सर्वतोभद्रमंडले॥
पूजयेद्रक्तकुसुमैः पत्रिकाभिश्च पंचभिः ॥ १९ ॥ बिल्वपत्रमपामार्गं शमी दूर्वा हरिप्रिया ॥ आभिरन्यैश्च कुसुमैरभ्यर्च्य फलमोदकैः ॥ २० ॥
उपहारं प्रकल्प्याथ दद्यादर्घं समुद्यते ॥ ततः संप्रार्थ्य विघ्नेशमूर्तिं सोपस्करां मुने ॥ २१ ॥ आचार्याय विधिज्ञाय सत्कृत्य विनिवेदयेत् ॥ कृत्वैवं
पंच वर्षाणि समुपास्य यथाविधि ॥ २२ ॥भुक्त्वेह भोगानखिलान् लोकं गणपतेर्व्रजेत् ॥ अथ भाद्रचतुर्थ्यां तु बहुलाधेनुसंज्ञकम् ॥२३॥ पूजनी
योऽत्र यत्नेन स्रग्गंधयवसादिभिः ॥ ततः प्रदक्षिणीकृत्य शक्तश्चेद्दानमाचरेत्॥ २४ ॥ अशक्तः पुनरेतां तु नमस्कृत्य विसर्जयेत्॥ पंचाब्दं वा दशाब्दं
वा षोडशाब्दमथापि वा ॥ २५ ॥ व्रतं कृत्वा समुद्याप्य धेनुं दद्यात्पयस्विनीम् ॥ प्रभावेण व्रतस्यास्य भुक्त्वा भोगान्मनोरमान् ॥ २६ ॥ सत्कृतो
देवतावृंदैर्गोलोकं समवाप्नुयात् ॥ अथ शुक्लचतुर्थ्यां तु सिद्धवैनायकव्रतम् ॥ २७ ॥ आवाहनादिभिः सर्वैरुपचारैः समर्चनम् ॥ एकाग्रमानसो
भूत्वा ध्यायेत्सिद्धिविनायकम् ॥ २८ ॥ एकदंतं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ॥ पाशांकुशधरं देवं तप्तकांचनसन्निभम् ॥ २९ ॥ एकविंशति
पत्राणि चैकविंशतिनामभिः ॥ समर्पयेद्भक्तियुक्तस्तानि नामानि वै शृणु ॥ ३० ॥ सुमुखाय शमीपत्रं गणाधीशाय भृंगजम् ॥ उमापुत्राय

वैल्वं तु दूर्वां गजमुखाय च ॥ ३१ ॥ लंबोदराय बदरीं धत्तूरं हरसूनवे ॥ शूर्पकर्णाय तुलसीं वक्रतुंडाय शिबिजम् ॥ ३२ ॥ गुहाग्रजायापा
मार्गमेकदंताय बार्हतम् ॥ हेरम्बाय तु सिंदूरं चतुर्होत्रे च पत्रजम् ॥ ३३ ॥ सर्वेश्वरायागस्त्यस्य पत्रं प्रीतिविवर्द्धनम् ॥ दूर्वायुग्मं
ततो गृह्य गंधपुष्पाक्षतैर्युतम् ॥ ३४ ॥ पूजां निवेदयेद्भक्तियुक्तो मोदकपंचकम् ॥ आचमय्य नमस्कृत्य संप्रार्थ्य च विसर्ज्जयेत् ॥
॥ ३५ ॥ विनायकस्य प्रतिमां हैमीं सोपस्करां मुने ॥ निवेदयेच्च गुरवे द्विजेभ्यो दक्षिणां ददेत् ॥ ३६ ॥ एवं कृतार्चनो भक्त्या पंच वर्षाणि
नारद ॥ उपास्य लभते कामानैहिकामुष्मिकान् शुभान् ॥ ३७ ॥ अस्यां चतुर्थ्यां शशिनं न पश्येच्च कदाचन ॥ पश्यन् मिथ्याभिशाप तु लभते
नात्र संशयः ॥ अथ तद्दोषनाशाय मन्त्रं पौराणिकं पठेत् ॥ ३८ ॥ "सिंहः प्रसेनममधीत्सिंहो जांबवता हतः ॥ सुकुमारक मा रोदीस्तव ह्येष स्यमं
तकः" ॥ ३९ ॥ इषशुक्लचतुर्थ्यां तु कपर्दीशं विनायकम् ॥ ४० ॥ पौरुषेण तु सूक्तेन पूजयेदुपचारकैः ॥ अकारणान्मुष्टिगतांस्तंडुलान्सकपर्दिकान्
॥ ४१ ॥ विप्राय बटवे दद्याद्गंधपुष्पार्चिताय च ॥ तंडुला वैश्वदेवत्या हरदैवत्यमिश्रिताः ॥ ४२ ॥ कपर्दिगणनाथोऽसौ प्रीयतां तैः
समर्पितैः ॥ चतुर्थ्यां कार्तिके कृष्णे करकाख्यं व्रतं स्मृतम् ॥ ४३ ॥ स्त्रीणामेवाधिकारोऽत्र तद्विधानमुदीर्यते ॥ पूजयेच्च गणाधीशं स्नाता स्त्री
समलंकृता ॥ ४४ ॥ तदग्रे पूर्णपक्वान्नं विन्यसेत्करकान्दश ॥ समर्प्य देवदेवाय भक्त्या प्रयतमानसा ॥ ४५ ॥ देवो मे प्रीयतामेवमुच्चार्य्याथ
समर्पयेत् ॥ सुवासिनीभ्यो विप्रेभ्यो यथाकामं च सादरम् ॥ ४६ ॥ ततश्चंद्रोदये रात्रौ दत्त्वार्घं विधिपूर्वकम् ॥ भुञ्जीत मिष्टमन्नं च व्रतस्य परिपूर्तये
॥ ४७ ॥ यद्वा क्षीरेण करकं पूर्णं तोयेन वा मुने ॥ सपूगाक्षतरत्नाढ्यं द्विजाय प्रतिपादयेत् ॥ ४८ ॥ एतत्कृत्वा व्रतं नारी षोडशद्वादशाब्दकम् ॥
उपायनं विधायाथ व्रतमेतद्विसर्ज्जयेत् ॥ ४९ ॥ यावज्जीवं तु वा नार्या कार्य्यं सौभाग्यवांछया ॥ व्रतेनानेन सदृशं स्त्रीणां सौभाग्यदायकम् ॥
॥ ५० ॥ विद्यते भुवनेष्वन्यत्तस्मान्नित्यमिति स्थितिः ॥ ऊर्ज्जशुक्लचतुर्थ्यां तु नागव्रतमुदाहृतम् ॥ ५१ ॥ प्रातर्व्रतं तु संकल्प्य धेनुशृंगजलं शुचि ॥ पीत्वा
स्नात्वाथ मध्याह्ने शंखपालादिपन्नगान् ॥ ५२ ॥ शेषं चाह्वानपूर्वैस्तु पूजयेदुपचारकैः ॥ क्षीरेणाप्यायनं कुर्यादेतन्नागव्रतं स्मृतम् ॥ ५३ ॥ एवंकृते
तु विप्रेंद्र नृभिर्नागव्रते शुभे ॥ विषाणि नश्यंत्यचिरान्न दशंति च पन्नगाः ॥ ५४ ॥ मार्गशुक्लचतुर्थ्यां तु वर्षं यावन्मुनीश्वर ॥ क्षपयेदेकभक्तेन नक्तेनाथ
द्वितीयकम् ॥ ५५ ॥ अयाचितोपवासाभ्यां तृतीयकचतुर्थके ॥ एवं क्रमेण विधिवच्चत्वार्यब्दानि मानवः ॥ ५६ ॥ समाप्य च ततोऽस्यांते व्रतस्नातो
महाव्रती ॥ कारयेद्धेमघटितं भूगणेर्मूषकं रथम् ॥ ५७ ॥ अशक्तो वर्णकैरेव शुभ्रं चाब्जं सुपत्रकम् ॥ तस्योपरि घटं स्थाप्य ताम्रपात्रेण संयुतम् ॥

॥ ५८ ॥पूरयेत्तंडुलैः शुभ्रैस्तस्योपरि गणेश्वरम् ॥ न्यसेद्वस्त्रयुगाच्छन्नं गंधाद्यैः पूजयेच्च तम्॥५९॥ नैवेद्यं मोदकं कल्प्यं गणेशः प्रीयतामिति॥
जागरैर्गीतवाद्याद्यैः पुराणाख्यानकैश्चरेत् ॥ ६० ॥प्रभाते विमले स्नात्वा होमं कृत्वा विधानतः ॥ तिलव्रीहियवश्वेतसर्षपाज्यैः सखंडकैः
॥ ६१ ॥ गणो गणाधिपश्चैव कूष्मांडस्त्रिपुरांतकः ॥ लंबोदरैकदंतौ च रुक्मदंष्ट्रश्च विघ्नपः ॥ ६२ ॥ ब्रह्मा यमोऽथ वरुणः सोमसूर्यहुताशनाः ॥
गन्धमादी परमेष्ठीत्येवं षोडशनामभिः॥६३॥प्रणवाद्यैर्ङेंनमोंऽतैः प्रत्येकं दहने हुनेत्॥वक्रतुंडेति ङेंतेन वर्मांतेनाष्टयुक्छतम् ॥६४॥ ततो व्याहृतिभिः
शक्त्या हुत्वा पूर्णाहुतिं चरेत् ॥ दिक्पालान्पूजयित्वा च ब्राह्मणान्भोजयेत्ततः ॥ ६५ ॥ चतुर्विंशतिसंख्याकान् मोदकैः पायसैस्तथा ॥ सवत्सां गां
ततो दद्यादाचार्याय सदक्षिणाम् ॥ ६६ ॥ अन्येभ्योऽपि यथाशक्ति भूयसीं च ततो ददेत्॥प्रणम्य दक्षिणीकृत्य प्रविसृज्य द्विजोत्तमान् ॥ ६७ ॥
बन्धुभिः सह भुंजीत स्वयं च प्रीतमानसः ॥ एतद्व्रतं नरः कृत्वा भुक्त्वा भोगानिहोत्तमान् ॥६८॥सायुज्यं लभते विष्णोर्गणेशस्य प्रसादतः ॥केचि
द्दूरव्रतं नाम प्राहुरेतस्य नारद॥६९॥विधानमेतदेवापि फलं चापीह तत्समम्॥पौषमासचतुर्थ्यां तु विघ्नेशं प्रार्थ्य भक्तितः ॥७०॥ विप्रैकं भोजयेच्चैवं
मोदकैर्दक्षिणां ददेत् ॥ एवं कृते मुने भूयाद्व्रती संपत्तिभाजनम्॥७१॥माघकृष्णचतुर्थ्यां तु संकष्टव्रतमुच्यते ॥ तत्रोपवासं संकल्प्य व्रती नियमपूर्व
कम् ॥७२॥ चंद्रोदयमभिव्याप्य तिष्ठेत्प्रयतमानसः ॥ ततश्चंद्रोदये प्राप्ते मृन्मयं गणनायकम् ॥ ७३ ॥ विधाय विन्यसेत्पीठे सायुधं च सवाहनम्॥
उपचारैः षोडशभिः समभ्यर्च्य विधानतः॥७४॥मोदकं चापि नैवेद्यं सगुडं तिलकुट्टकम्॥ततोऽर्घ्यं ताम्रजे पात्रे रक्तचंदनमिश्रितम् ॥७५॥सकुशं च
सदूर्वं च पुष्पाक्षतसमन्वितम् ॥ सशमीपत्रदधि च कृत्वा चंद्राय दापयेत् ॥ ७६ ॥ गगनार्णवमाणिक्य चंद्र दाक्षायणीपते ॥गृहाणार्घ्यं मया दत्तं
गणेशप्रतिरूपक ॥ ७७ ॥ एवं दत्त्वा गणेशाय दिव्यार्घ्यं पापनाशनम् ॥ शक्त्या संभोज्य विप्राग्र्यान्स्वयं भुंजीत चाज्ञया ॥ ७८ ॥ एवं कृत्वा
व्रतं विप्र संकष्टाख्यं शुभावहम् ॥ समृद्धो धनधान्यैः स्यान्न च संकष्टमाप्नुयात् ॥ ७९ ॥ माघशुक्लचतुर्थ्यां तु गौरीव्रतमनुत्तमम् ॥ तस्यां तु
गौरी संपूज्या संयुक्ता योगिनीगणैः ॥ ८० ॥ नरैः स्त्रीभिर्विशेषेण कुंदपुष्पैः सकुंकुमैः ॥ रक्तसूत्रै रक्तपुष्पैस्तथैवालक्तकेन च ॥ ८१ ॥ धूपैर्दी
पैश्च बलिभिः सगुडेनार्द्रकेण च ॥ पयसा पायसेनापि लवणेन च पालकैः ॥ ८२ ॥ पूज्याश्चाविधवा नार्यस्तथा विप्राः सुशोभनाः॥ सौभाग्य
वृद्धये देयो भोक्तव्यं बंधुभिः सह ॥ ८३ ॥ इदं गौरीव्रतं विप्र सौभाग्यारोग्यवर्द्धनम् ॥ प्रतिवर्ष प्रकर्त्तव्यं नारीभिश्च नरैस्तथा ॥ ८४ ॥ ढुंढि
व्रतं परैः प्रोक्तं कैश्चित्कुंडव्रतं स्मृतम् ॥ ललिताव्रतमित्यन्यैः शांतिव्रतमथापरैः ॥ ८५ ॥ स्नानं दानं जपो होमः सर्वमस्यां कृतं मुने ॥ भवेत्सह

स्वगुणितं प्रसादादंतिनः सदा ॥ ८६ ॥ चतुर्थ्यां फाल्गुने मासि ढुंढिराजव्रतं शुभम् ॥ तिलपिष्टैर्द्विजान् भोज्य स्वयं चाश्नीत मानवः ॥ ८७ ॥
गणेशाराधनपरो दानहोमप्रपूजनैः॥तिलैरेव कृतैः सिद्धिं प्राप्नुयात्तत्प्रसादतः॥८८॥सौवर्णं गजवक्त्रं च कृत्वा संपूज्य यत्नतः॥द्विजाग्र्याय प्रदातव्यं
सर्वसंपत्समृद्धये ॥ ८९ ॥ यस्मिन्कस्मिन्भवेन्मासि चतुर्थी रविवारयुक् ॥ सांगारका वा विप्रेंद्र सा विशेषफलप्रदा ॥ ९० ॥ सर्वासु च चतुर्थीषु
शुक्लास्वप्यसितासु च ॥ विघ्नेश एव देवेशः संपूज्यो भक्तितत्परैः ॥ ९१ ॥इति श्रीबृहन्नारदीयपु० पूर्वभागे बृहदुपाख्याने चतुर्थपादे द्वादशमास
चतुर्थीव्रतनिरूपणं नाम त्रयोदशाधिकशततमोऽध्यायः ॥११३॥ सनातन उवाच ॥ शृणु विप्र प्रवक्ष्यामि पंचम्यास्ते व्रतान्यहम् ॥ यानि भक्त्या
समास्थाय सर्वान्कामानवाप्नुयात् ॥ १ ॥ प्रोक्ता मत्स्यजयंती तु पंचमी मधुशुक्लगा ॥ अस्यां मत्स्यावतारार्चा भक्तैः कार्या महोत्सवा ॥ २ ॥
श्रीपंचमीति चैषोक्ता तत्र कार्यं श्रियोऽर्चनम् ॥ गंधाद्यैरुपचारैस्तु नैवेद्यैः पायसादिभिः ॥ ३ ॥ यो लक्ष्मीं पूजयेच्चात्र तं वै लक्ष्मीर्न मुंचति ॥
पृथ्वीव्रतं तथा चांद्रं हयग्रीवव्रतं तथा ॥ ४ ॥ कार्यं तत्तद्विधानेन तत्तत्सिद्धिमभीप्सुभिः ॥ अथ वैशाखपंचम्यां शेषं चाभ्यर्च्य मानवः ॥ ५ ॥
सर्वैर्नागगणैर्युक्तमभीष्टं लभते फलम् ॥तथा ज्येष्ठस्य पंचम्यां पितॄनभ्यर्चयेत्सुधीः ॥ ६ ॥ सर्वकामफलावाप्तिर्भवेद्वै विप्रभोजनैः ॥ अथाषा
ढस्य पंचम्यां वायुं सर्वगतं मुने ॥ ७ ॥ ग्रामाद्बहिर्विनिर्गत्य धरोपस्थे समास्थितः ॥ ध्वजं च पंचवर्णं तु वंशदंडाग्रसंस्थितम् ॥ ८ ॥ समुच्छ्रितं
निदध्यात्तु कल्पिताब्जे तु मध्यतः ॥ ततस्तन्मूलदेशे तु दिक्षु सर्वासु नारद ॥ ९ ॥ लोकपालान्समभ्यर्च्य कुर्याद्वायुपरीक्षणम् ॥ प्रथमादिषु
यामेषु यो यो वायुः प्रवर्तते ॥ १० ॥ तस्मै तस्मै दिगीशाय पूजां सम्यक् प्रकल्पयेत् ॥ एवं स्थित्वा निराहारस्तत्र यामचतुष्टयम् ॥ ११ ॥सायमागत्य
गेहं स्वं भुक्त्वा स्वल्पं समाहितः ॥ लोकपालान्नमस्कृत्य स्वप्याद्भूमितले शुचौ॥ १२ ॥ यः स्वप्नो जायते तस्यां रात्रौ यामे चतुर्थके ॥ स एव भविता
नूनं स्वप्न इत्याह वै शिवः ॥ १३ ॥ अशुभे तु समुत्पन्ने शिवपूजापरायणः ॥सोपवासो नयेदष्टयामं तद्दिनमेव वा॥ १४ ॥ भोजयित्वा द्विजानष्टौ ततः
शुभफलं लभेत्॥व्रतमेतत्समुदितं शुभाशुभनिदर्शनम् ॥१५॥ नृणां सौभाग्यजनकमिह लोके परत्र च॥श्रावणे कृष्णपंचम्यां व्रतं ह्यन्नसमृद्धिदम् ॥
॥१६॥ चतुर्थ्यां दिनशेषे तु सर्वाण्यन्नानि नारद ॥पृथक् पात्रेषु संस्थाप्य जलैराप्लावयेत्सुधीः॥ १७ ॥ततो पात्रांतरे तत्तु निष्कास्यांबु निधापयेत् ॥
प्रातर्भानौ समुदिते पितॄंश्चैव तथा ऋषीन् ॥ १८ ॥ देवांश्चाभ्यर्च्य सुस्नातं कृत्वा नैवेद्यमग्रतः ॥ तदन्नं याचकेभ्यस्तु प्रयच्छेत्प्रीतमानसः ॥
॥ १९ ॥ सर्वं दिनं क्षिपेदेवं प्रदोषे तु शिवालये ॥ गत्वा संपूजयेद्देवं लिंगरूपिणमीश्वरम् ॥ २० ॥ गंधपुष्पादिभिः सम्यक्पूजयित्वा महेश्वरम् ॥

जपेत्पञ्चाक्षरीं विद्यां शतं चापि सहस्रकम् ॥ २१ ॥ जपं निवेद्य देवाय भवाय भवरूपिणे ॥ स्तुत्वा सर्वैर्वैदिकैश्च पौराणैश्चाप्यनाकुलः ॥ २२ ॥
प्रार्थयेद्देवमीशानं शश्वत्सर्वान्नसिद्धये ॥ शारदीयानि चान्नानि तथा वासंतिकान्यपि ॥ २३॥ यानि स्युस्तैः समृद्धोऽहं भूयां जन्मनि जन्मनि॥एवं
संप्रार्थ्य देवेशं गृहमागत्य वै स्वकम्॥ २४॥दत्वान्नं ब्राह्मणादिभ्यः पक्कं भुञ्जीत वाग्यतः ॥एतदन्नव्रतं विप्र विधिनाऽऽचरितं नृभिः ॥ २५ ॥सर्वा
न्नसंपज्जनकं परलोके गतिप्रदम् ॥ श्रावणे शुक्लपञ्चम्यां नृभिरास्तिक्यतत्परैः ॥ २६ ॥ द्वारस्योभयतो लेख्या गोमयेन विषोल्बणाः ॥ गंधाद्यैः
पूजयेत्तांश्च तथेंद्राणीमनंतरम् ॥ २७ ॥ संपूज्य स्वर्णरूप्यादिदध्यक्षतकुशांबुभिः ॥ गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यसंचयैः ॥ २८ ॥ ततः प्रद
क्षिणीकृत्य तद्द्रव्यं संप्रणम्य च ॥ संप्रार्थ्य भक्तिभावेन विप्राग्र्येषु समर्पयेत् ॥ २९ ॥ यदिदं स्वर्णरौप्यादि द्रव्यं वै विप्रसात्कृतम्॥तदनंतफलं
भूयान्मम जन्मनि जन्मनि ॥ ३० ॥ इत्येवं ददतो द्रव्यं भक्तिभावेन नारद ॥ प्रसन्नः स्याद्धनाध्यक्षः स्वर्णादिकसमृद्धिदः ॥ ३१ ॥ एत
द्व्रतं नरः कृत्वा विप्रान्संभोज्य भक्तितः ॥ पश्चात्स्वयं च भुञ्जीत दारापत्यसुहृद्वृतः ॥ ३२ ॥ भाद्रे तु कृष्णपंचम्यां नागान् क्षीरेण तर्पयेत् ॥
॥ ३३ ॥ यस्तस्याऽऽसप्तमं यावत्कुलं सर्पात्सुनिर्भयम् ॥ भाद्रस्य शुक्लपंचम्यां पूजयेदृषिसत्तमान् ॥ ३४ ॥ प्रातर्नद्यादिके स्नात्वा कृत्वा
नित्यमतंद्रितः ॥ गृहमागत्य यत्नेन वेदिकां कारयेन्मृदा ॥ ३५ ॥ गोमयेनोपलिप्याथ कृत्वा पुष्पोपशोभिताम् ॥ तत्रास्तीर्य कुशान्विप्र
ऋषीन्सप्त समर्चयेत् ॥ ३६ ॥ गन्धैश्च विविधैः पुष्पैर्धूपैर्दीपैः सुशोभनैः ॥ कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ॥३७॥ जमदग्निर्वसिष्ठश्च
सप्तैते ऋषयः स्मृताः ॥ एतेभ्योऽर्घ्य च विधिवत्कल्पयित्वा प्रदाय च ॥ ३८ ॥ नैवेद्यं विपचेद्धीमान्श्यामाकाद्यैरकृष्टकैः ॥ तन्निवेद्य विसृज्येमा
न्स्वयं चाद्यात्तदेव हि ॥ ३९ ॥ अनेन विधिना सप्त वर्षाणि प्रतिवत्सरम् ॥ कृत्वा व्रतांते वरयेदाचार्यान् सप्त वैदिकान् ॥ ४० ॥ प्रतिमाः सप्त
कुर्वीत सुवर्णेन स्वशक्तितः ॥ जटिलाः साक्षसूत्राश्च कमण्डलुसमन्विताः ॥ ४१ ॥ संस्थाप्य कलशेष्वेतांस्ताम्रेषु मृन्मयेषु वा ॥ स्नापयेद्विधि
वद्भक्त्या पृथक्पंचामृतैरपि ॥ ४२ ॥ उपचारैः षोडशभिस्ततः संपूज्य भक्तितः ॥ अर्घ्यं दत्वा ततो होमं तिलव्रीहियवादिभिः ॥ ४३ ॥
'सहस्तोमा'इति ऋचा नाममन्त्रैस्तु वा पृथक् ॥ पुण्यैर्मन्त्रैस्तथैवान्यैर्हुत्वा पूर्णाहुतिं चरेत् ॥ ४४ ॥ ततस्तु सप्त गा दद्याद्वस्त्रालंकारसं
युताः ॥ आचार्यं पूजयेच्चैव वस्त्रालंकारभूषणैः ॥ ४५ ॥ अनुज्ञया गुरोः पश्चान्मूर्तीर्विप्रेषु चार्पयेत् ॥ भोजयित्वा तु तान्भक्त्या प्रणिपत्य
विसर्जयेत् ॥ ४६ ॥ ततश्चेष्टैः सहासीनः स्वयं ब्राह्मणशेषितम् ॥ भुक्त्वा वै षड्रसोपेतं प्रमुद्यात्सह बंधुभिः ॥ ४७ ॥ एतत्कृत्वा व्रतं सांग

भोगान्भुक्त्वाथ वाञ्छितान् ॥ सप्तर्षीणां प्रसादेन विमानवरगो भवेत् ॥ ४८॥ आश्विने शुक्लपञ्चम्यामुपांगललिताव्रतम् ॥४९॥ तस्याः स्वर्णमयीं
मूर्तिं शक्त्या निर्माय नारद ॥ उपचारैः षोडशभिः पूजयेत्तां विधानतः ॥ ५० ॥पक्वान्नं फलसंयुक्त सघृतं दक्षिणान्वितम् ॥द्विजवर्याय दातव्यं व्रत
संपूर्तिहेतवे ॥५१॥ "सवाहना शक्तियुता वरदा पूजिता मया ॥ मातर्मामनुगृह्याथ गम्यतां निजमंदिरम्" ॥५२॥कार्तिके शुक्लपंचम्यां जयाव्रत
मनुत्तमम् ॥ कर्तव्यं पापनाशाय श्रद्धया द्विजसत्तम॥ ५३ ॥ पूजयित्वा जयां विप्र यथाविधि समाहितः ॥ उपचारैः षोडशभिस्ततः शुचिर
लंकृतः ॥ ५४ ॥ विप्रैकं भोजयेच्चापि तस्मै दत्वा च दक्षिणाम् ॥ विसर्जयेत्ततः पश्चात्स्वयं भुञ्जीत वाग्यतः ॥ ५५ ॥ यस्तु वै भक्तिसंयुक्तः
स्नानं कुर्य्याज्जयादिने ॥ नश्यन्ति तस्य पापानि सिंहाक्रांता मृगा यथा ॥ ५६ ॥ यदश्वमेधावभृथे फलं स्नानेन कीर्तितम् ॥तत्फलं प्राप्यते विप्र
स्नानेनापि जयादिने ॥५७॥ अपुत्रो लभते पुत्रं वंध्या गर्भ च विंदति ॥ रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बंधनात् ॥५८ ॥ मार्गशुक्ले च
पञ्चम्यां नागानिष्ट्वा विधानतः॥ नागेभ्यो ह्यभयं लब्ध्वा मोदते सह बांधवैः॥५९॥पौषेऽपि शुक्लपञ्चम्यां सम्पूज्य मधुसूदनम्॥लभते वाञ्छितान्का
मान्नात्र कार्या विचारणा॥६०॥पंचम्यां प्रतिमासे तु शुक्ले कृष्णे च नारद॥पितॄणां पूजनं शस्तं नागानां चापि सर्वथा॥६१॥इति श्रीबृहन्नारदीयपुराणे
पूर्वभागे बृहदुपाख्याने चतुर्थपादे द्वादशमासस्थपञ्चमीव्रतनिरूपणं नाम चतुर्दशाधिकशततमोऽध्यायः॥११४॥सनातन उवाच॥शृणु विप्र प्रवक्ष्यामि
षष्ठ्याश्चैव व्रतानि ते॥यानि सम्यग्विधायात्र लभेत्सर्वान्मनोरथान् ॥ १ ॥ चैत्रमासे शुक्लषष्ठ्यां कुमारव्रतमुत्तमम्॥तत्रेष्ट्वा षण्मुखं देवं नानापूजा
विधानतः॥२॥पुत्रं सर्वगुणोपेतं प्राप्नुयाच्चिरजीविनम्॥वैशाखशुक्लषष्ठ्यां च पूजयित्वा च कार्तिकम्॥३॥लभेत मातृजं सौख्यं नात्र कार्या विचारणा॥
ज्येष्ठमासे शुक्लषष्ठ्यां विधिनेष्ट्वा दिवाकरम्॥४॥लभते वांछितान्कामांस्तत्प्रसादान्न संशयः॥आषढशुक्लषष्ठ्यां वै स्कंदव्रतमनुत्तमम्॥५॥ उपोष्य
पूजयित्वैनं शिवोमाप्रियमात्मजम्॥लभतेऽभीप्सितान्कामान्पुत्रपौत्रादिसंततीः ॥ ६ ॥ श्रावणे शुक्लषष्ठ्यां तु शरजन्मानमर्चयेत् ॥ उपचारैः
षोडशभिर्भक्त्या परमयान्वितः ॥ ७ ॥ लभतेऽभीप्सितानर्थान्षण्मुखस्य प्रसादतः ॥ भाद्रमासे कृष्णषष्ठ्यां ललिताव्रतमुच्यते ॥ ८ ॥
प्रातः स्नात्वा विधानेन नारी शुक्लाम्बरावृता॥शुक्लमाल्यधरा वापि नद्याः संगमवालुकाम्॥९॥गृहीत्वा वंशपात्रे तु धृत्वा पिंडाकृतिं च ताम्॥पञ्चधा
ललितां तत्र ध्यायेद्वनविलासिनीम् ॥ १० ॥ पङ्कंज करवीरं च नेपालीं मालतीं तथा ॥ नीलोत्पलं केतकीं च संगृह्य तगरं तथा ॥ ११ ॥
एकैकाष्टशतं ग्राह्यमष्टाविंशतिरेव च ॥ अक्षताः कलिका गृह्य ताभिर्देवीं प्रपूजयेत् ॥१२॥ प्रार्थयेदग्रतः स्थित्वा देवीं तां गिरिशप्रियाम्॥गंगाद्वारे

कुशावर्त्ते विल्वके नीलपर्वते॥१३॥स्नात्वा कनखले देवि हारिं लब्धवती पतिम्॥ललिते सुभगे देवि सुखसौभाग्यदायिनि॥१४॥अनतं दहि सौभाग्ये
मह्यं तुभ्यं नमोऽनमः ॥मंत्रेणानेन कुसुमैश्चंपकस्य सुशोभनैः॥१५॥ अभ्यर्च्य विधिवत्तस्या नैवेद्यं पुरतो न्यसेत् ॥ त्रपुषैरपि कूष्माण्डैर्नालिकेरैः सुदा
डिमैः॥१६॥बीजपूरैः सुतुंडीरैः कारवल्लैः सचिर्भटैः ॥ फलैस्तत्कालसंभूतैः कृत्वा शोभां तदग्रतः॥१७॥ विरूढधान्यांकुरकैः सुदीपावलिभिस्तथा॥
साद्धैः सर्गणकैधूपः सौहालककरंजकैः ॥ १८ ॥ गुडपुष्पैः कर्णवेष्टैर्मोदकैरुपमोदकैः॥बहुप्रकारैर्नैवेद्यैर्यथाविभवसारतः ॥ १९ ॥ एवमभ्यर्च्य विधि
वद्रात्रौ जागरणोत्सवम् ॥ गीतवाद्यनटैर्नृत्यैः प्रोक्षणीयैरनेकधा ॥ २० ॥ सखीभिःसहिता साध्वी तां रात्रिं प्रसभं नयेत्॥ न च संमीलयेन्नेत्रे नारी
यामचतुष्टयम् ॥ २१ ॥ दुर्भगा दुष्कृता वंध्या नेत्रसमीलनाद्भवेत् ॥ एवं जागरणं कृत्वा सप्तम्यां सरितं नयेत् ॥ २२ ॥ गन्धपुष्पैस्तथाभ्यर्च्य
गीतवाद्यपुरःसरैः ॥ तच्च दद्याद्द्विजेन्द्राय नैवेद्यादि द्विजोत्तम ॥२३॥ स्नात्वा गृहं समागत्य हुत्वा वैश्वानरं ततः ॥ देवान्पितृन्मनुष्यांश्च पूजयित्वा
सुवासिनीः ॥ २४ ॥ कन्यकाश्चैव संभोज्य ब्राह्मणान्दश पंच च ॥ भक्ष्यभोज्यैर्बहुविधैर्दत्वा दानानि भूरिशः ॥ २५ ॥ ललिता मेऽस्तु सुप्रीता
इत्युक्त्वा तान्विसर्जयेत् ॥ यः कश्चिदाचरेदेतद्व्रतं सौभाग्यदं परम् ॥ २६ ॥ नरो वा यदि वा नारी तस्य पुण्यफलं शृणु ॥ यद्व्रतैश्च तपो
भिश्च दानैर्वा नियमैरपि ॥ २७ ॥ तदेतेनेह लभ्येत किं बहूक्तेन नारद ॥ मृतेरनंतरं प्राप्य शिवलोकं सनातनम् ॥ २८ ॥ मोदते ललितादेव्या
शैवे वै सखिवच्चिरम् ॥ नभस्ये मासि या शुक्ला षष्ठी सा चंदनाह्वया ॥ २९ ॥ तस्यां देवीं समभ्यर्च्य लभते तत्सलोकताम् ॥ रोहिणी
पातभौमैस्तु संयुता कपिला भवेत् ॥ ३० ॥ तस्यां रविं समभ्यर्च्य व्रती नियमतत्परः ॥ लभते वांछितान्कामान्भास्करस्य प्रसादतः ॥
॥ ३१ ॥ अन्नदानं जपो होमं पितृदेवार्षितर्पणम् ॥ सर्वमेवाक्षयं ज्ञेयं कृतं देवर्षिसत्तम ॥ ३२ ॥ कपिलां धेनुमभ्यर्च्य वस्त्रमाल्यानुले
पनैः ॥ प्रदद्याद्वेदविदुषे ह्यादशात्मप्रतुष्टये ॥ ३३ ॥ अथेषुशुक्लषष्ठ्यां तु पूज्या कात्यायनी द्विज ॥ गंधाद्यैर्मंगलद्रव्यैर्नैवेद्यैर्विविधैस्तथा ॥ ३४ ॥
ततः क्षमाप्य देवेशीं प्रणिपत्य विसर्जयेत् ॥ पूज्यात्र सैकती मूर्तिर्यद्वा द्विजसती मुदा ॥ ३५ ॥ वस्त्रालंकरणैर्भव्यैः कात्यायिन्याः प्रतुष्टये ॥ कन्या
वरं प्राप्नुयाच्च वांछितं पुत्रमंगना॥ ३६ ॥ कात्यायिनीप्रसादाद्वै नात्र कार्या विचारणा ॥ कार्तिके शुक्लषष्ठ्यां तु षण्मुखेन महात्मना ॥ ३७ ॥
देवसेना महाभागा लब्धा सर्वसुरार्पिता ॥ अतस्तस्यां सुरश्रेष्ठां देवसेनां च षण्मुखम् ॥ ३८ ॥ संपूज्य निखिलैरेव उपचारैर्मनोहरैः ॥ प्राप्नुया
दतुलां सिद्धिं मनोभीष्टां द्विजोत्तम ॥ अत्रैव वह्निपूजोक्ता तां च सम्यक्समाचरेत् ॥ त्रिविधद्रव्यहोमैश्च वह्निपूजापुरःसरम् ॥ ४० ॥ मार्ग
शीर्षे शुक्लषष्ठ्यां निहतस्तारकासुरः ॥ स्कंदेन सत्कृतिः प्राप्ता ब्रह्माद्यैः परिकल्पिता ॥ ४१ ॥ ततोऽस्यां पूजयेत्स्कंदं गंधपुष्पाक्षतैः फलैः ॥ वस्त्र

राभूषणश्चापि नैवेद्यैर्विविधैस्तथा ॥ ४२ ॥ रविवारेण संयुक्ता तथा शतभिषान्विता ॥ यदि चेत्सा समुद्दिष्टा चंपाह्वा मुनिसत्तम ॥ ४३ ॥ तस्यां विश्वेश्वरो देवो द्रष्टव्यः पापनाशनः ॥ पूजनीयो वेदनीयः स्मर्तव्यः सौख्यमिच्छता ॥४४॥ स्नानदानादिकं चात्र सर्वमक्षय्यमुच्यते ॥पौषमासे शुक्लषष्ठ्यां देवो दिनपतिर्द्विज॥४५॥ विष्णुरूपी जगत्त्राता प्रदुर्भूताः सनातनः ॥ ४६ ॥ स तस्मात्पूजनीयोऽस्यां द्रव्यैर्गंधपुरस्कृतैः ॥ नैवेद्यैर्वस्त्रभूषाद्यैः सर्वसौख्यमभीप्सुभिः ॥ ४७॥ माघमासे सिता षष्ठी वरुणाह्वा स्मृता तु सा॥ तस्यां वरुणमभ्यर्च्येद्विष्णुरूपं सनातनम्॥४८॥रक्तैर्गंधांशुकैः पुष्पैर्नैवेद्यैर्धूपदीपकैः ॥ एवमभ्यर्च्य विधिवद्यद्यच्चाभिलषेन्नरः॥४९॥तत्तच्च फलतो लब्ध्वा मोदते तत्प्रसादतः॥फाल्गुने शुक्लषष्ठ्यां तु देवं पशुपतिं द्विज॥५०॥मृन्मयं विधिना कृत्वा पूजयेदुपचारकैः॥संस्नाप्य शतरुद्रेण पृथक्पंचामृतैर्जलैः॥५१॥गन्धैरालिप्य सुश्वेतैरक्षतैः श्वेतपुष्पकैः ॥ बिल्वपत्रैश्च धत्तूरकुसुमैश्च फलैस्तथा ॥ ५२ ॥ सम्पूज्य नानानैवेद्यैर्नीराज्य विधिवत्ततः ॥ क्षमाप्य प्रणिपत्यैनं कैलासाय विसर्जयेत् ॥ ५३ ॥ एवं कृतशिवार्चस्तु नरः नार्यथवा मुने ॥ इह भुक्त्वा वरान्भोगानन्ते शिवगतिं लभेत् ॥ ५५ ॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे द्वादशमासस्थितषष्ठीव्रतनिरूपणं नाम पञ्चदशाधिकशततमोऽध्यायः ॥११५॥ सनातन उवाच ॥ शृणु नारद वक्ष्यामि सप्तम्यास्ते व्रतान्यहम् ॥ यानि कृत्वा नरो भक्त्या सूर्यसायुज्यमाप्नुयात् ॥ १ ॥ चैत्रे तु शुक्लसप्तम्यां बहिः स्नानं समाचरेत् ॥ स्थंडिले गोमयालिप्ते गौरमृत्तिकयास्तृते ॥ २ ॥ लिखित्वाष्टदलं पद्मं कार्णिकायां विभावम् ॥ विन्यसेत्पूर्वपत्रे तु देवौ द्वौ कृतधातुकौ ॥ ३ ॥ आग्नेयं च न्यसेत्पत्रे गंधर्वौ कृतकारकौ ॥ दक्षिणे च न्यसेत्पत्रे तथैव राक्षसद्वयम् ॥ ४ ॥ आकृतौ द्वौ न्यसेत्पत्रे नैर्ऋते मुनिसत्तम ॥ काद्रवेयौ महानागौ पश्चिमे कृतचारकौ ॥ ५ ॥ वायव्ये यातुधानौ द्वौ उत्तरे च ऋषिद्वयम् ॥ ऐशान्ये विन्यसेत्पत्रे ग्रहमेको द्विजोत्तम ॥ ६ ॥ तेषां संपूजनं कार्यं गंधमाल्यानुलेपनैः ॥ दीपैर्धूपैः सनैवेद्यैस्तांबूलक्रमुकादिभिः ॥ ७ ॥ एवं संपूज्य होमं तु घृतेनाष्टशतं चरेत् ॥ सूर्यस्याष्टाष्ट चान्येषां प्रदद्यादाहुतीः क्रमात् ॥ ८ ॥ नाममंत्रेण वेद्यां वा ततः पूर्णाहुतिं ददेत् ॥ दक्षिणा च ततो देया द्विजेभ्यः शक्तितो द्विज ॥ ९ ॥ एतत्कृत्वा विधानं तु सर्वसौख्यमवाप्नुयात् ॥ देहांते मण्डलं भानोर्भित्त्वा गच्छेत्परं पदम् ॥ १० ॥ वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी स्वयम् ॥ क्रोधात्पीता पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणात् ॥ ११ ॥तां तत्र पूजयेत्स्नात्वा प्रत्यूषे विमले जले ॥ गंधपुष्पाक्षताद्यैश्च सर्वैरेवोपचारकैः ॥ १२॥ ततो घटसहस्रं तु देयं गंगाव्रते त्विदम् ॥ भक्त्या कृतं सप्तकुलं नयेत्स्वर्गमसंशयः ॥१३ ॥ कमलव्रतमप्यत्र प्रोक्तं तद्विधिरुच्यते॥ तिलमात्रं तु सौवर्णं विधाय कमलं शुभम्॥ १४॥ वस्त्रयुग्मावृतं कृत्वा गंधधूपादिनार्चयेत् ॥ नमस्ते पद्महस्ताय नमस्ते विश्वधारिणे ॥ १५ ॥ दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते ॥ इति

संप्रार्थ्य देवेशं सूर्ये चास्तमुपागते॥१६॥ सोदकुंभं तु तत्पद्म कपिलां च द्विजेऽर्पयेत्॥ तद्दिने तूपवस्तव्यं भोक्तव्यं च परेऽहनि ॥१७ ॥ सभोज्य
ब्राह्मणान्भक्त्या व्रतसाकल्यमाप्नुयात् ॥ निंबव्रतं च तत्रैव तद्विधानं शृणुष्व मे ॥ १८ ॥ निंबपत्रैः स्मृता पूजा भास्करस्य द्विजोत्तम ॥
खखोल्कायेति मंत्रेण प्रणवाद्येन नारद ॥ १९ ॥ निंबपत्रं ततोऽश्नीयाच्छयेद्भूमौ च वाग्यतः ॥ द्विजान्परेऽह्नि संभोज्य स्वयं भुंजीत बंधुभिः॥२०॥
निंबपत्रव्रतं चैतत्कर्तृणां सर्वसौख्यदम् ॥ सप्तमी शर्कराख्यैषा प्रोक्ता तच्चापि मे शृणु ॥ २१ ॥ अमृतं पिबतो हस्तात्सूर्यस्यामृतबिंदवः ॥ निष्पे
तुर्भुवि चोत्पन्नाः शालिमुद्गयवेक्षवः ॥ २२ ॥ शर्करा च ततस्तस्मादिक्षुसारामृतोपमा ॥ इष्टा रवेरतः पुण्या शर्करा हव्यकव्ययोः ॥ २३ ॥ शर्करास
प्तमी चैव वाजिमेधफलप्रदा ॥ सर्वदुःखोपशमनी पुत्रसंततिवर्धिनी ॥ २४ ॥ अस्यांतु शर्करादानं शर्कराभोजनं तथा ॥ कर्तव्यं हि प्रयत्नेन व्रतमे
तद्रविप्रियम् ॥ २५ ॥ यः कुर्यात्परया भक्त्या स वै सद्गतिमाप्नुयात् ॥ ज्येष्ठे तु शुक्लसप्तम्यां जात इंद्रो रविः स्वयम् ॥२६॥ तं संपूज्य विधानेन
सोपवासो जितेंद्रियः ॥ स्वर्गतिं लभते विप्र देवेंद्रस्य प्रसादतः ॥२७॥ आषाढशुक्लसप्तम्यां विवस्वान्नाम भास्करः ॥ जातस्तं तत्र संप्रार्च्य गन्धपु
ष्पादिभिः पृथक् ॥ २८ ॥ लभते सूर्यसायुज्यं विप्रेंद्रात्र न संशयः ॥ श्रावणे शुक्लसप्तम्यामव्यंगाख्यं व्रतं शुभम् ॥ २९ ॥ कार्पासं तु चतुर्हस्तं
सार्द्धं वस्त्रं हि गोपतेः ॥ पूजांते प्रीतये देयं व्रतमेतच्छुभावहम् ॥ ३० ॥ यदि चेद्धस्तयुक्तेयं तदा स्यात्पापनाशिनी ॥ अस्यां दानं जपो होमः सर्वं
चाक्षय्यतां व्रजेत् ॥ ३१ ॥ भाद्रे तु शुक्लसप्तम्याममुक्ताभरणव्रतम् ॥ सोमस्य तु महेशस्य पूजनं चात्र कीर्तितम् ॥३२॥ गंगादिभिः षोडशभिरु
पचारैः समर्चनम् ॥ प्रार्थ्य प्रणम्य विसृजेत्सर्वकामसमृद्धये ॥ ३३ ॥ फलसप्तमिका चेयं तद्विधानमुदीर्यते ॥ नालिकेरं च वृंताकं नारंगं बीजपूर
कम् ॥३४॥ कूष्मांड बृहतीपूगमिति सप्त फलानि वै ॥ महादेवस्य पुरतो विन्यस्यापरदोरकम् ॥ ३५॥सप्ततन्तुकृतं सप्तग्रंथियुक्तं द्विजोत्तम ॥संपूज्य
परया भक्त्या धारयेद्वामके करे॥३६॥स्त्री नरो दक्षिणे चैव यावद्वर्षं समाप्यते॥संभोज्य विप्रान्सप्तैव पायसेन विसृज्य तान्॥३७॥स्वयं भुंजीत मति
मान् व्रतसंपूर्तिहेतवे॥फलानि तानि देयानि सप्तस्वपि द्विजेषु च॥३८॥एवं तु सप्त वर्षाणि कृत्वोपास्य यथाविधि॥ सायुज्यं लभते विप्र महादेवस्य
तद्व्रती ॥ ३९ ॥ आश्विने शुक्लपक्षे तु विज्ञेया शुभसप्तमी ॥ तस्यां कृतस्नानपूजो वाचयित्वा द्विजोत्तमान् ॥ ४०॥आरभ्य कपिलां गां च संपूज्य
प्रार्थयेत्ततः ॥ त्वामहं दद्मि कल्याणि प्रीयतामर्यमा स्वयम् ॥ ४१ ॥ पालय त्वं जगत्कृत्स्नं यतोऽसि धर्मसम्भवा ॥ इत्युक्त्वा वेदविदुषे दत्त्वा
कृत्वा च दक्षिणाम् ॥ ४२ ॥ नमस्कृत्य स्वयं विप्र विसृजेत्प्राशयेत्स्वयम् ॥ पचगव्यं व्रतं चेत्थं विधाय श्वो द्विजोत्तमान्॥४३॥भोजयित्वा स्वयं

चाद्यात्तदन्नं द्विजशेषितम्॥कृतं ह्येतद्व्रतं विप्र सुभाष्यं श्रद्धयान्वितः ॥४४॥ देवदेवप्रसादेन भुक्तिमुक्तिमवाप्नुयात्॥अथ कार्तिकशुक्लायां शाकाख्यं
सप्तमीव्रतम् ॥ ४५ ॥ तस्यां तु सप्तशाकानिसस्वर्णकमलानि च ॥ प्रदद्यात्सप्तविप्रेभ्यः शाकाहारस्ततः स्वयम् ॥ ४६ ॥ द्वितीयेऽह्नि द्विजा
न्भोज्य दत्वा तेभ्योऽन्नदक्षिणाम् ॥ विसृज्य बंधुभिः सार्द्धं स्वयं भुञ्जीत वाग्यतः ॥४७॥ मार्गस्य सितसप्तम्यां मित्रव्रतमुदाहृतम्॥यद्विष्णोर्दक्षिणं
नेत्रं तदेव कृतवानिह ॥ ४८ ॥ अदित्यां कश्यपाज्जज्ञे मित्रो नामा दिवाकरः ॥ अतोऽस्यां पूजनं तस्य यथोक्तविधिना द्विज ॥ ४९ ॥ कृत्वा
द्विजान्भोजयित्वा सप्तैव मधुरादिना ॥ सुवर्णदक्षिणां दत्वा विसृज्याश्नीत च स्वयम् ॥ ५० ॥ कृत्वैतद्विधिना लोकं सूर्य्यस्य व्रजति ध्रुवम्॥ द्विजो
ब्राह्मं तथा शूद्रः सत्कुले जन्म चाप्नुयात्॥५१॥पौषस्य शुक्लसप्तम्यां व्रतं चाभयसंज्ञितम्॥उपोष्य भानुं त्रिःसन्ध्यं समभ्यर्च्य धरास्थितः॥५२॥
क्षीरसिक्तान्नसंबद्धं मोदकं प्रस्थसंमितम् ॥ द्विजाय दत्वा भोज्यान्यान्सप्ताष्टभ्यश्च दक्षिणाम् ॥ ५३ ॥ पृथवी वा सुवर्णं वा विसृज्याश्नीत
च स्वयम् ॥ अभयाख्यं व्रतं त्वेतत्सर्वस्याभयदं स्मृतम् ॥ ५४॥ मार्तंडाख्यं व्रतं नाम कथयंति द्विजाः परे ॥ एकमेवेति च प्रोक्तमेकदैवतया
बुधैः ॥५५॥माघे तु कृष्णसप्तम्यां व्रतं सर्वाप्तिसंज्ञकम् ॥ समुपोष्य दिने तस्मिन्सम्पूज्यादित्यबिम्बकम्॥ ५६ ॥ सौवर्णं गंधपुष्पाद्यैः कृत्वा रात्रौ
च जागरम् ॥ परेऽह्नि विप्रान्सम्भोज्य पायसेन तु सप्त वै ॥५७॥ दक्षिणां नालिकेराणि तेभ्यो दत्वा गुरुं ततः॥सौवर्णं तु रवेर्बिम्बं युक्तं दक्षिणया
न्वया॥५८॥समर्प्य च भृशं प्रार्थ्य विसृज्याद्यात्स्वयं ततः॥एतत्सर्वाप्तिदं नाम संप्रोक्तं सार्वकामिकम्॥५९॥व्रतस्यास्य प्रभावेण द्वैतं सिध्येद्धि सर्वथा॥
माघस्य शुक्लसप्तम्यामचलाख्यं व्रतं स्मृतम् ॥ ६१ ॥ त्रिलोचनजयंतीयं सर्वपापहरा स्मृता ॥ रथाख्या सप्तमी चेयं चक्रवर्तित्वदायिनी ॥ ६१ ॥
अस्यां समर्च्य सवितुः प्रतिमां तु हैमीं हैमाश्वयुक्तरथगां तु ददेत्सहेभाम्॥यो भावभक्तिसहितः स गतो हि लोकं शम्भोः स मोदत इहापि च भुक्तभोगः
॥ ६२ ॥ भास्करी सप्तमी चेयं कोटिभास्वद्ग्रहोपमा ॥ अरुणोदयवेलायामस्यां स्नानं विधीयते ॥ ६३॥ अर्कस्य च बदर्यांश्च सप्त सप्त दलानि
वै ॥ निधाय शिरसि स्नायात्सप्तजन्माघशांतये ॥ ६४ ॥ पुत्रप्रदं व्रतं चात्र प्राहादित्यः स्वयं प्रभुः ॥ यो माघसितसप्तम्यां पूजयेन्मां विधानतः
॥६५ ॥ तस्याहं पुत्रतां यास्ये स्वांशेन भृशतोषितः ॥ तस्माज्जितेंद्रियो भूत्वा समुपोष्य दिवानिशम् ॥ ६६॥ पूजयेदपरे चाह्नि होमं कृत्वा द्विजां
स्ततः ॥ दध्योदनेन पयसा पायसेन च भोजयेत् ॥ ६७ ॥ अनेन विधिना यस्तु कुरुते पुत्रसप्तमीः ॥ लभते स तु सत्पुत्रं चिरायुषमनामयम् ॥
॥ ६८ ॥ तपस्यशुक्लसप्तम्यां व्रतमर्कपुटं चरेत् ॥ अर्कपत्रैर्यजेदर्कमर्कपत्राणि चाश्नुयात् ॥ ६९ ॥ अर्कनाम जपेच्छश्वदित्थं चार्कपुटव्रतम् ॥

धनदं पुत्रदं चैतत्सर्वपापप्रणाशनम् ॥ ७० ॥ त्रिवर्गदमिति प्राहुः केचिदेतद्व्रतं द्विज ॥ यज्ञव्रतं तथाप्यन्ये विधिवद्धोमकर्मणा ॥ ७१ ॥
सर्वासु सर्वमासेषु सप्तमीषु द्विजोत्तमः ॥ भास्कराराधनं प्रोक्तं सर्वकामिकमित्यलम् ॥ ७२ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने
चतुर्थपादे द्वादशमासस्थितसप्तमीव्रतनिरूपणं नाम षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥ सनातन उवाच ॥ शुक्लाष्टम्यां चैत्रमासे
भवान्याः प्रोच्यते जनिः ॥ प्रदक्षिणशतं कृत्वा कार्यो यात्रामहोत्सवः ॥ १ ॥ दर्शनं जगदम्बायाः सर्वानंदप्रदं नृणाम् ॥ अत्रैवाशो
ककलिकाप्राशनं समुदाहृतम् ॥ २ ॥ अशोककलिकाश्चाष्टौ ये पिबंति पुनर्वसौ ॥ चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः ॥ ३ ॥
महाष्टमीति च प्रोक्ता देव्याः पूजाविधानतः ॥ वैशाखस्य सिताष्टम्यां समुपोष्यात्र वारिणा ॥ ४ ॥ स्नात्वापराजितां देवीं मांसीबालकवारिभिः ॥
स्नापयित्वार्च्य गन्धाद्यैर्नैवेद्यं शर्करामयम् ॥ ५ ॥ कुमारीर्भोजयेच्चापि नवम्यां पारणाग्रतः ॥ ज्योतिर्मयविमानेन भ्राजमानो यथा रविः ॥ ६ ॥
लोकेषु विचरेद्विप्र देव्याश्चैव प्रसादतः॥ कृष्णाष्टम्यां ज्येष्ठमासे पूजयित्वा त्रिलोचनम् ॥७ ॥ शिवलोके वसेत्कल्पं सर्वदेवनमस्कृतः ॥ज्येष्ठशुक्ले
तथाष्टम्यां यो देवीं पूजयेन्नरः ॥ ८ ॥ स विमानेन चरति गन्धर्वाप्सरसां गणैः ॥ शुक्लाष्टम्यां तथाऽऽषाढे स्नात्वा चैव निशांबुना ॥ ९ ॥ तेनैव
स्नापयेद्देवीं पूजयेच्च विधानतः ॥ ततः शुद्धजलैः स्नाप्य विलिंपेत्सेंदुचंदनैः॥ १० ॥नैवेद्यं शर्करोपेतं दत्वाऽऽचमनमर्पयेत्॥भोजयित्वा ततो विप्रा
न्दत्वा स्वर्णं च दक्षिणाम् ॥ ११ ॥ विसृज्य च ततः पश्चात्स्वयं भुंजीत वाग्यतः ॥एतद्व्रतं नरः कृत्वा देवीलोकमवाप्नुयात् ॥ १२ ॥ नभःशुक्ले
तथाष्टम्यां देवीमिष्ट्वा विधानतः ॥ क्षीरेण स्नापयित्वा च मिष्टान्नं विनिवेदयेत् ॥ १३ ॥ ततो द्विजान् भोजयित्वा परेऽह्नि स्वयमप्युत ॥ भुक्त्वा
समापयेदेतद्व्रतं संततिवर्धनम् ॥ १४ ॥ नभोमासे सिताष्टम्यां दशाफलमिति व्रतम् ॥ उपवासं तु संकल्प्य स्नात्वा कृत्वा च नैत्यिकम् ॥ १५ ॥
तुलस्याः कृष्णवर्णाया दलैर्दशभिरर्चयेत् ॥ कृष्णं विष्णुं तथाऽनन्तं गोविन्दं गरुडध्वजम् ॥ १६ ॥ दामोदरं हृषीकेशं पद्मनाभं हरिं
प्रभुम् ॥ एतैश्च नामभिर्नित्यं कृष्णदेवं समर्चयेत् ॥ १७ ॥ नमस्कारं ततः कुर्यात्प्रदक्षिणसमन्वितम् ॥ एवं दशदिनं कुर्याद्व्रतानामुत्तमं
व्रतम् ॥ १८ ॥ आदौ मध्ये तथा चांते होमं कुर्याद्विधानतः ॥ कृष्णमंत्रेण जुहुयाच्चरुणाऽष्टोत्तरं शतम् ॥ १९ ॥ होमांते विधिना सम्य
गाचार्य्यं पूजयेत्सुधीः॥सौवर्णे ताम्रपात्रे वा मृन्मये वेणुपात्रके॥२०॥ तुलसीदलं सुवर्णेन कारयित्वा सुलक्षणम् ॥हैमीं च प्रतिमां कृत्वा पूजयित्वा
विधानतः ॥ २१ ॥ निधाय प्रतिमां पात्रे ह्याचार्याय निवेदयेत् ॥ दातव्या गौः सवत्सा च वस्त्रालंकारभूषिता ॥ २२ ॥ दशाहं कृष्णदेवाय

पूरिका दश चार्पयेत ॥ ताश्च दद्याद्विधिज्ञाय स्वयं वा भक्षयेद्व्रती ॥२३॥ शयनं च प्रदातव्यं यथाशक्ति द्विजोत्तम ॥ दशमेऽह्नि ततो मूर्तिं सद्रव्यां
गुरवेऽर्पयेत् ॥ २४ ॥ व्रतांते दशविप्रेभ्यः प्रत्येकं दश पूरिकाः ॥ दद्यादेवं दशाब्दं तु कृत्वा व्रतमनुत्तमम् ॥ २५ ॥ उपोष्य विधिना भूयात्सर्वका
मसमन्वितः ॥ अंते कृष्णस्य सायुज्यं लभते नात्र संशयः ॥ २६ ॥ कृष्णजन्माष्टमी चेयं स्मृता पापहरा नृणाम् ॥ केवलेनोपवासेन तस्मि
ञ्जन्मदिने हरेः ॥ २७ ॥ सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥ उपवासी तिलैः स्नातो नद्यादौ विमले जले ॥ २८ ॥ सुदेशे मंडपे कृते
मंडलं रचयेत्सुधीः ॥ तन्मध्ये कलशं स्थाप्य ताम्रजं वापि मृन्मयम् ॥ २९ ॥ तस्योपरि न्यसेत्पात्रं ताम्रं तस्योपरि स्थिताम् ॥ हैमीं वस्त्रयुगा
च्छन्नां कृष्णस्य प्रतिमां शुभाम् ॥३० ॥ पाद्याद्यैरुपचारैस्तु पूजयेत्स्निग्धमानसः ॥ देवकीं वसुदेवं च यशोदां नंदमेव च ॥ ३१ ॥ व्रजं गोपां
स्तथा गोपीर्गाश्च दिक्षु समर्चयेत् ॥ तत आरार्तिकं कृत्वा क्षमाप्यानम्य भक्तितः ॥ ३२ ॥ तिष्ठेत्तथैवार्द्धरात्रे पुनः संस्नापयेद्धरिम् ॥ पंचामृतैः
शुद्धजलैर्गंधाद्यैः पूजयेत्पुनः ॥ ३३ ॥ धान्याकं च यवानीं च शुंठीं खंडं च नारद ॥ साज्यं रौप्ये धृतं पात्रे नैवेद्यं विनिवेदयेत् ॥ ३४ ॥
पुनरारार्तिकं कृत्वा दशधा रूपधारिणम् ॥ विचिंतयन्मृगांकाय दद्यादर्घ्यं समुद्यते ॥ ३५ ॥ ततः क्षमाप्य देवेशं रात्रिखंडं नयेद्व्रती॥
पौराणिकैः स्तोत्रपाठैर्गीतवाद्यैरनेकधा ॥ ३६ ॥ ततः प्रभाते विप्राग्र्यान्भोजयेन्मधुरान्नकैः ॥ दत्वा च दक्षिणां तेभ्यो विसृजेत्तुष्टमानसः ॥ ३७ ॥
ततस्तां प्रतिमां विष्णोः स्वर्णधेनुधरान्विताम् ॥ गुरवे दक्षिणां दत्वा विसृज्याश्नीत च स्वयम् ॥ ३८ ॥ दारापत्यसुहृद्भृत्यैरेवं कृत्वा व्रतं नरः ॥
साक्षाद्गोलोकमाप्नोति विमानवरमास्थितः ॥ ३९ ॥ नैतेन सदृशं चान्यद्व्रतमस्ति जगत्त्रये ॥ कृतेन येन लभ्येत कोटचैकादशकं फलम् ॥ ४० ॥
शुक्लाष्टम्यां नभस्यस्य कुर्याद्राधाव्रतं नरः ॥ पूर्ववद्राधिकां हैमीं कलशस्थां प्रपूजयेत् ॥ ४१ ॥ मध्याह्ने पूजयित्वेनामेकभक्तं समाचरेत् ॥ शक्तो
भक्तश्चोपवासं परेऽह्नि विधिना ततः ॥ ४२ ॥ सुवासिनीर्भोजयित्वा गुरवे प्रतिमार्पणम् ॥ कृत्वा स्वयं च भुंजीत व्रतमेवं समापयेत् ॥ ४३ ॥
व्रतेनानेन विप्रर्षे कृतेन विधिना व्रती ॥ रहस्यं गोष्ठजं लब्ध्वा राधापरिकरे वसेत् ॥ ४४ ॥ दूर्वाष्टमीव्रतं चात्र कथितं तच्च मे शृणु ॥ शुचौ
देशे प्रजातायां दूर्वायां द्विजसत्तम ॥ ४५ ॥ स्थाप्य लिंगं ततो गंधैः पुष्पैर्धूपैश्च दीपकैः ॥ नैवेद्यैरर्चयेद्भक्त्या दध्यक्षतफलादिभिः ॥४६ ॥
अर्घ्यं प्रदद्यात्पूजांते मंत्राभ्यां सुसमाहितः ॥त्वं दूर्वेऽमृतजन्माऽसि सुरासुरनमस्कृते ॥ ४७ ॥सौभाग्यं संततिं देहि सर्वकार्यकरी भव ॥ यथा शाखा
प्रशाखाभिर्विस्तृताऽसि महीतले ॥ ४८ ॥ तथा विस्तृतसंतानं देहि मेऽप्यजरामरम् ॥ ततः प्रदक्षिणीकृत्य विप्रान्संभोज्य तत्र वै ॥ ४९ ॥ भुक्त्वा

स्वयं गृहं गच्छेद्दत्वा विप्रेषु दक्षिणाम् ॥फलानि च प्रशस्तानि मिष्टानि सुरभीणि च॥५०॥ एवं पुण्या पापहरा नृणां दूर्वाष्टमी द्विज ॥ चतुर्णामपि वर्णानां स्त्रीजनानां विशेषतः ॥५१॥ या न पूजयते दूर्वां नारी मोहाद्यथाविधि ॥ जन्मानि त्रीणि वैधव्यं लभते सा न संशयः ॥ ५२ ॥ यदा ज्येष्ठर्क्षसंयुक्ता भवेच्चैवाष्टमी द्विज॥ ज्येष्ठा नाम्नी तु सा ज्ञेया पूजिता पापनाशिनी॥५३॥ अथैनां तु समारभ्य व्रतं षोडशवासरम् ॥ महालक्ष्म्याः समुद्दिष्टं सर्वसंपद्विवर्धनम् ॥ ५४ ॥ करिष्येऽहं महालक्ष्मीव्रतं ते त्वत्परायणः ॥ तदविघ्नेन मे यातु समाप्तिं त्वत्प्रसादतः ॥ ५५ ॥ इत्युच्चार्य ततो बद्धा डोरक दक्षिणे करे ॥ षोडशग्रंथिसहितं गुणैः षोडशभिर्युतम् ॥ ५६ ॥ ततोऽन्वहं महालक्ष्मीं गंधाद्यैरर्चयेद्व्रती ॥ यावत्कृष्णाष्टमी तत्र चरेदुद्यापनं सुधीः ॥ ५७ ॥ वस्त्रमंडपिकां कृत्वा सर्वतोभद्रमंडले ॥ कलशं सुप्रतिष्ठाप्य दीपमुद्द्योतयेत्ततः ॥ ५८ ॥ उत्तार्य डोरकं बाहोः कुंभस्याधो निवेदयेत् ॥ चतस्रः प्रतिमाः कृत्वा सौवर्णीस्तत्स्वरूपिणीः ॥ ५९ ॥ स्नपनं कारयेत्तासां जलैः पञ्चामृतैस्तथा ॥ उपचारैः षोडशभिः पूजयित्वा विधानतः ॥ ६० ॥ जागरस्तत्र कर्तव्यो गीतवादित्रनिःस्वनैः ॥ ततो निशीथे संप्राप्तेऽभ्युदितेऽमृतदीधितौ ॥ ६१ ॥ दत्त्वार्घ्यं बंधनं द्रव्यैः श्रीखंडाद्यैर्विधानतः ॥ चन्द्रमण्डलसंस्थायै महालक्ष्यै प्रदापयेत् ॥ ६२ ॥ क्षीरोदार्णवसंभूत महालक्ष्मीसहोदर ॥ पीयूषधाम रोहिण्याः सहितोऽर्घ्यं गृहाण मे ॥ ६३ ॥ क्षीरोदार्णवसम्भूते कमले कमलालये ॥ विष्णुवक्षस्थलस्थे मे सर्वकामप्रदा भव ॥ ६४ ॥ एकनाथे जगन्नाथे जमदग्निप्रियेऽव्यये ॥ रेणुके त्राहि मां देवि राममातः शिवं कुरु ॥ ६५ ॥ मंत्रैरेतैर्महालक्ष्मीं प्रार्थ्य श्रोत्रिययोषितः ॥ सम्यक्संपूज्य ताः सम्यग्गंधयावककज्जलैः ॥ ६६ ॥ संभोज्य जुहुयादग्नौ बिल्वपद्मकपायसैः ॥ तदलाभे घृतैर्विप्र गृहेभ्यः समिधस्तिलान् ॥ ६७ ॥ मृत्युंजयाय च परं सर्वरोगप्रशांतये ॥ चंदनं तालपत्रं च पुष्पमालां तथाऽक्षतान् ॥ ६८ ॥ दूर्वां कौसुम्भसूत्रं च शुभं श्रीफलमेव वा ॥ भक्ष्याणि च नवे शूर्पे प्रतिद्रव्यं तु षोडश ॥ ६९ ॥ समाच्छाद्यान्यशूर्पेण व्रती दद्यात्समन्त्रकम् ॥ क्षीरोदार्णवसंभूता लक्ष्मीश्चन्द्रसहोदरा ॥ ७० ॥ व्रतेनानेन संतुष्टा भवताद्विष्णुवल्लभा ॥ चेतस्रः प्रतिमास्तास्तु श्रोत्रियेभ्यः समर्पयेत् ॥ ७१ ॥ ततस्तु चतुरो विप्रान् षोडशापि सुवासिनीः॥ मिष्टान्नेनाशयित्वा तु विसृजेत्ताः सदक्षिणाः॥ ७२॥ समाप्तिनियमः पश्चाद्भुञ्जीतेष्टैः समन्वितः ॥ एतद्व्रतं महालक्ष्म्याः कृत्वा विप्र विधानतः ॥ ७३ ॥ भुक्त्वेष्टानैहिकान् कामांल्लक्ष्मीलोके वसेच्चिरम् ॥ एषाऽशोकाष्टमी चोक्ता यस्यां पूर्णं रमाव्रतम् ॥७४॥ अत्राशोकस्य पूजा स्यादेकभक्तं तथा स्मृतम् ॥ कृत्वाऽशोकव्रतं नारी ह्यशोका शोकजन्मनि ॥७५ ॥ यत्र कुत्रापि

संजाता नात्र कार्या विचारणा ॥ आश्विने शुक्लपक्षे तु प्रोक्ता विप्र महाष्टमी ॥ ७६ ॥ तत्र दुर्गार्चनं प्रोक्तं सर्वैरप्युपचारकैः ॥ उपवासं चैकभक्तं
महाष्टम्यां विधाय तु ॥ ७७ ॥ सर्वतो विभवं प्राप्य मोदते देववच्चिरम् ॥ ऊर्जे कृष्णादिकेऽष्टम्यां करकाख्यं व्रतं स्मृतम् ॥ ७८ ॥ तत्रोमासहितः
शंभुः पूजनीयः प्रयत्नतः ॥ चंद्रोदयेऽर्घदानं च विधेयं व्रतिभिः सदा ॥ ७९ ॥ पुत्रं सर्वगुणोपेतमिच्छद्भिर्विविधं सुखम् ॥ गोपाष्टमीति संप्रोक्ता
कार्तिके धवले दले ॥ ८० ॥ तत्रकुर्याद्गवां पूजां गोग्रासं गोप्रदक्षिणाम् ॥ गवानुगमनं दानं वांछन्सर्वाश्च संपदः ॥ ८१ ॥ कृष्णाष्टम्यां मार्गशीर्षे
मिथुनं दर्भनिर्मितम्॥ अनघां चानघं तत्र बहुपुत्रसमन्वितम्॥८२॥स्थापयित्वा शुभे देशे गोमयेनोपलेपिते॥ पूजयेद्गन्धपुष्पाद्यैरुपचारैः पृथग्विधैः
॥ ८३ ॥संभोज्य द्विजदांपत्यं विसृजेल्लब्धदक्षिणम् ॥ व्रतमेतन्नरः कृत्वा नारी वा विधिपूर्वकम् ॥ ८४ ॥ पुत्रं सल्लक्षणोपेतं लभते नात्र संशयः ॥
॥ ८५ ॥ मार्गशीर्षसिताष्टम्यां कालभैरवसन्निधौ ॥ उपोष्य जागरं कृत्वा महापापैः प्रमुच्यते ॥ ८६ ॥ यत्किंचिदशुभं कर्म कृतं मानुषजन्मनि ॥
तत्सर्वं विलयं याति कालभैरवदर्शनात्॥८७॥अथ पौषसिताष्टम्यां श्राद्धमष्टकसंज्ञितम्॥पितॄणां तृप्तिदं वर्षं कुलसन्ततिवर्द्धनम्॥८८॥ शुक्लाष्टम्यां
तु पौषस्य शिवं सम्पूज्य भक्तितः ॥ भुक्तिमुक्तिमवाप्नोति भक्तिमेकां समाचरन् ॥८९॥कृष्णाष्टम्यां तु माघस्य भद्रकालीं समर्चयेत्॥ भक्तितो
वैरिवृन्दघ्नीं सर्वकामप्रदायिनीम् ॥९०॥ माघमासे सिताष्टम्यां भीष्मं संतर्पयद्द्विज ॥ संततिं त्वव्यवच्छिन्नामिच्छंश्चाप्यपराजयम् ॥९१॥ फाल्गुने
त्वसिताष्टम्यां भीमां देवीं समर्चयेत् ॥ तत्र व्रतपरो विप्र सर्वकामसमृद्धये ॥ ९२ ॥ शुक्लाष्टम्यां फाल्गुनस्य शिवं चापि शिवां द्विज ॥ गंधाद्यैः
सम्यगभ्यर्च्य सर्वसिद्धीश्वरो भवेत् ॥९३॥ फाल्गुनापरपक्षे तु शीतलामष्टमीदिने ॥ पूजयेत्सर्वपक्वान्नैः सप्तम्यां विधिवत्कृतैः ॥ ९४ ॥ शीतले त्वं
जगन्माता शीतले त्वं जगत्पिता ॥ शीतले त्वं जगद्धात्री शीतलायै नमोनमः॥९५॥ वन्देऽहं शीतलां देवीं रासभस्थां दिगंबराम् ॥ मार्जनी
कलशोपेतां विस्फोटकविनाशिनीम्॥ ९६ ॥ शीतले शीतले चेत्थं ये जपंति जले स्थिताः ॥ तेषां तु शीतला देवी स्याद्विस्फोटकशांतिदा ॥९७॥
इत्येवं शीतलामन्त्रैर्यः समर्चयते द्विज॥तस्य वर्षं भवेच्छांतिः शीतलायाः प्रसादतः॥९८॥सर्वमासोभये पक्षे विधिवच्चाष्टमीदिने॥ शिवां वापिशिवं प्रार्च्य
लभते वांछितं फलम्॥९९॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे द्वादशमासस्थिताष्टमीव्रतकथनं नाम सप्तदशाधिकशततमो
ऽध्यायः ॥११७॥ सनातन उवाच ॥अथ वक्ष्यामि विप्रेंद्र नवम्यास्ते व्रतानि वै ॥ यानि कृत्वा नरा लोके लभंते वांछितं फलम् ॥१॥चैत्रस्य शुक्ल
पक्षे तु श्रीरामनवमीव्रतम् ॥ तत्रोपवासं विधिवच्छक्तो भक्तः समाचरेत्॥ २ ॥अशक्तश्चैकभक्तं वै मध्याह्नोत्सवतः परम् ॥ विप्रान्संभोज्य मिष्टान्नै

रामप्रीतिं समाचरेत् ॥ ३ ॥ गोभूतिलहिरण्याद्यैर्वस्त्रालंकरणैस्तथा ॥ एवं यः कुरुते भक्त्या श्रीरामनवमीव्रतम् ॥ ४ ॥ विधूय चेहपापानि व्रजे
द्विष्णोः परं पदम् ॥ उक्तं मातृव्रतं चात्र भैरवेण समन्विताः ॥ ५ ॥ स्रग्गंधवस्त्रनैवेद्यैश्चतुःषष्टिस्तु योगिनीः ॥ अत्रैव भद्रकाली तु
योगिनीनां महाबला ॥ ६ ॥ ब्राह्मणश्रेष्ठ सर्वासामाधिपत्येऽभिषेचिता ॥ तस्मात्तां पूजयेच्चात्र सोपवासो जितेंद्रियः ॥ ७ ॥ राधे नवम्यां
दलयोश्चडिकां यस्तु पूजयेत् ॥ विधिना स विमानेन दैवतैः सह मोदते ॥ ८ ॥ ज्येष्ठशुक्लनवम्यां तु सोपवासो नरोत्तमः ॥ उमां संपूज्य
विधिवत्कुमारीभोंजयेद्विजान् ॥ ९ ॥ स्वभक्त्या दक्षिणां दत्वा शाल्यन्नं पयसाऽश्नुयात् ॥ उमाव्रतमिदं विप्र यः कुर्याद्विधिवन्नरः ॥१०॥ स भुक्त्वेह
वरान्भोगानंते स्वर्गगतिं लभेत् ॥ आषाढे मासि विप्रेंद्र यः कुर्यात्पक्षयोर्द्विज ॥ ११ ॥ नक्तं चैंद्रीं समभ्यर्च्यैदैरावतगतां सिताम् ॥ स भवेद्दे
वलोके तु भोगभाग्देवयानगः ॥ १२॥श्रावणे मासि विप्रेन्द्र यः कुर्यान्नक्तभोजनम् ॥ पक्षयोरुपवासं वा कौमारीं चंडिकां यजेत् ॥ १३ ॥ एवं
पापहरां गंधैः पुष्पैर्धूपैश्च दीपकैः ॥ नैवेद्यैर्विविधैश्चैव कुमारीभोजनैस्तथा ॥ १४ ॥ एवं यः कुरुते भक्त्या कौमारीव्रतमुत्तमम् ॥ स विमानेन
गच्छेद्दै देवीलोकं सनातनम् ॥ १५ ॥ भाद्रे तु नवमी शुक्ला नंदाह्वा परिकीर्तिता ॥ तस्यां यः पूजयेद्दुर्गां विधिवच्चोपचारकैः ॥ १६ ॥
सोऽश्वमेधफलं लब्ध्वा विष्णुलोके महीयते ॥ आश्विने शुक्लनवमी महापूर्वा प्रकीर्तिता ॥ १७ ॥ अपराह्णे शमीपूजा कार्याऽस्यां प्राग्दिशि
द्विज ॥ ततो निशायां प्राग्यामे खड्गं धनुरिषून्गदाम् ॥ १८ ॥ शूलं शक्तिं च परशुं छुरिकां चर्म खेटकम् ॥ छत्रं ध्वजं गजं चाश्वं गोवृषं
पुस्तकं तुलाम् ॥ १९ ॥दंडं पाशं चक्रशंखौ गंधाद्यैरुपचारकैः ॥ संपूज्य महिषं तत्र भद्रकाल्यै समालभेत्॥२० ॥ एवं बलिं विधायाथ भुक्त्वा पक्वान्न
मेव च॥द्विजेभ्यो दक्षिणां दत्वा व्रतं तत्र समापयेत् ॥२१॥एवं यः पूजयेद्दुर्गां नृणां दुर्गतिनाशिनीम्॥ इह भुक्त्वा वरान्भोगानंते स्वर्गतिमाप्नुयात्
॥२२॥कार्तिके शुक्लनवमी याऽक्षया सा प्रकीर्तिता ॥ तस्यामश्वत्थमूले वै तर्पणं सम्यगाचरेत् ॥२३॥देवानांच ऋषीणां च पितॄणां चापि नारद ॥
स्वशाखोक्तैस्तथा मंत्रैः सूर्यायार्घ्यं ततोऽर्पयेत् ॥ २४ ॥ ततो द्विजान्भोजयित्वा मिष्टान्नेन मुनीश्वर ॥ स्वयं भुक्त्वा च विहरेद्द्विजेभ्यो दत्तदक्षिणः
॥ २५ ॥ एवं यः कुरुते भक्त्या जपदानं द्विजार्चनम् ॥ होमं च सर्वमक्षय्यं भवेदिति विधेर्वचः ॥ २६ ॥ मार्गे तु शुक्लनवमी नंदिनी
परिकीर्तिता ॥ तस्यामुपोषितो यस्तु जगदंबां प्रपूजयेत् ॥ २७ ॥ गंधाद्यैः सोऽश्वमेधस्य फलभाङ्नात्र संशयः ॥ पौषे शुक्लनवम्यां तु महामायां
प्रपूजयेत् ॥ २८ ॥ एकभक्तपरो विप्र वाजपेयफलाप्तये ॥ माघमासे तु वा शुक्ला नवमी लोकपूजिता ॥ २९ ॥ महानंदेति सा प्रोक्ता सदानंदकरी

नृणाम् ॥ तस्यां स्नानं तथा दानं जपो होम उपोषणम् ॥ ३० ॥ सर्वमक्षयतां याति नात्र कार्या विचारणा ॥ फाल्गुनामलपक्षस्य नवमी या
द्विजोत्तम ॥ ३१ ॥ आनंदा सा महापुण्या सर्वपापहरा स्मृता ॥ सोपवासोऽर्चयेत्तत्र यस्त्वानंदां द्विजोत्तम ॥३२॥ स लभेद्वांछितान्कामान्सत्यं
सत्यं मयोदितम् ॥ ३३ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे द्वादशमासस्थितनवमीव्रतकथनं नामाष्टादशाधिकशततमो
ऽध्यायः ॥ ११८॥ सनातन उवाच ॥ अथ तेऽहं प्रवक्ष्यामि दशम्या वै व्रतानि च॥यानि कृत्वा नरो भक्त्या धर्मराजप्रियो भवेत् ॥ १॥चैत्रशुक्लद
शम्यां तु धर्मराजं प्रपूजयेत्॥तत्कालसंभवैः पुष्पैः फलैर्गंधादिभिस्तथा॥२ ॥सोपवासो वैकभक्तो भोजयित्वा द्विजोत्तमान्॥चतुर्दश ततस्तेभ्यः शक्त्या
दद्याच्च दक्षिणाम्॥३॥एवं यः कुरुते विप्र धर्मराजप्रपूजनम्॥स धर्मस्याज्ञयागच्छेद्देवैः साधर्म्यमच्युतः॥४॥दशम्यां माधवे शुक्ले विष्णुमभ्यर्च्य मानवः॥
गंधाद्यैरुपचारैश्च श्वेतपुष्पैः सुगंधिभिः ॥५ ॥ शतं प्रदक्षिणाः कृत्वा विप्रान्संभोज्य यत्नतः ॥ लभते वैष्णवं लोकं नात्र कार्या विचारणा॥ ६ ॥
ज्येष्ठे शुक्लदशम्यां तु जाह्नवी सरितां वरा ॥ समायाता धरां स्वर्गात्तस्मात्सा पुण्यदा स्मृता ॥ ७ ॥ ज्येष्ठः शुक्लदलं हस्तो बुधश्च
दशमी तिथिः ॥गरानन्दव्यतीपाताः कन्येंदुवृषभास्कराः ॥८॥ दशयोगः समाख्यातो महापुण्यतमो द्विज॥ हरते दश पापानि तस्माद्दशहरः स्मृतः
॥ ९ ॥ अस्यां यो जाह्नवीं प्राप्य स्नाति संप्रीतमानसः ॥ विधिना जाह्नवीतोये स याति हरिमन्दिरम् ॥ १० ॥ आषाढशुक्लदशमी पुण्या मन्वा
दिकैः स्मृता ॥ तस्यां स्नानं जपो दानं होमो वा स्वर्गतिप्रदाः ॥ ११ ॥ श्रावणे शुक्लदशमी सर्वाशापरिपूर्तिदा ॥ अस्यां शिवार्चनं शस्तं गन्धाद्यै
रुपचारकैः ॥ १२ ॥ तत्रोपवासो नक्तं वा द्विजानां भोजनं जपः ॥ हेम्नो दानं च धेन्वादेः सर्वपापप्रणाशनम् ॥ १३ ॥अथो नभस्यशुक्लायां दशम्यां
द्विजसत्तम ॥ व्रतं दशावताराख्यं तत्र स्नानं जलाशये ॥ १४ ॥ कृत्वा संध्यादिनियमं देवर्षिपितृतर्पणम् ॥ ततो दशावताराणि समभ्यर्चेत्स
माहितः ॥ १५ ॥ मत्स्यं कूर्मं वराहं च नरसिंहं त्रिविक्रमम् ॥ रामं रामं च कृष्णं च बौद्धं कल्किनमेव च॥१६॥ दशमूर्तीस्तु सौवर्णीः पूजयित्वा
विधानतः ॥ दशभ्यो विप्रवर्येभ्यो दद्यात्सत्कृत्य नारद ॥ १७ ॥ उपवासं चैकभक्तं कृत्वा संभोज्य वाडवान् ॥ विसृज्य पश्चाद्भुंजीत स्वयं स्वेष्टैः
समाहितः ॥ १८॥ भक्त्या कृत्वा व्रतं त्वेतद्भुक्त्वा भोगानिहोत्तमान् ॥विमानेन व्रजेदंते विष्णुलोकं सनातनम् ॥१९॥ आश्विने शुक्लदशमी विजया
सा प्रकीर्तिता ॥ चतुर्गोमयपिंडानि प्रातर्न्यस्य गृहांगणे ॥ २० ॥ चक्रवालस्वरूपेण तन्मध्ये रामलक्ष्मणौ ॥ तथा भरतशत्रुघ्नौ पूजयेच्चतुरोऽपि
हि ॥ २१ ॥ सपिधानासु पात्रीषु गोमयीषु चतसृषु ॥ क्लिन्नं धान्यं सरौप्यं तु धृत्वा धौतांशुकावृतम् ॥ २२ ॥ पितृमातृभ्रातृपुत्रजाया

भृत्यसमन्वितम् ॥ संपूज्य गन्धपुष्पाद्यैर्नैवेद्यैश्च विधानतः ॥ २३ ॥ नमस्कृत्याथ भुंजीत द्विजान्संभोज्य पूजितान् ॥ एवं कृत्वा विधानं
तु नरो वर्षं सुखान्वितः ॥ २४ ॥ धनधान्यसमृद्धश्च निश्चितं जायते द्विज ॥ अथापराह्णसमये नवम्यां संनिमंत्रिताम् ॥ २५ ॥ पूर्वं
दिक्षु शमीं विप्र गत्वा तन्मूलजां मृदम् ॥ गृहीत्वा स्वगृहं प्राप्य गीतवादित्रनिःस्वनैः ॥ २६ ॥ संपूज्य तां विधानेन सज्जीकृत्य
स्वकं बलम् ॥ निर्गत्य पूर्वद्वारेण ग्रामाद्बहिरनाकुलः ॥ २७ ॥ ततः शत्रुप्रतिकृतिं निर्मितां पत्रकादिभिः ॥ मनसा कल्पितां वापि स्वर्ण
पुंखशरेण वै ॥ २८ ॥ विध्येदिति भृशं प्रीतः प्राप्नुयात्स्वगृहं निशि ॥ एवं कृतविधिर्वापि गच्छेद्वा शत्रुनिग्रहे ॥ २९ ॥ एषैवं दशमी
विप्र विधिनाऽऽचरिता सदा ॥ धनं जयं सुतान् गाश्च गजाश्वं वाप्यजाविकम् ॥ ३० ॥ दद्यादिह शरीरांते स्वर्गतिं चापि नारद ॥ दशम्यां
कार्तिके शुक्ले सार्वभौमव्रतं चरेत् ॥३१॥ कृतोपवासो वैकाशी निशीथेऽपूपकादिभिः ॥ दशदिक्षु बलिं दद्याद् गृहाद्वापि पुराद्बहिः ॥ ३२ ॥
मंडलेऽष्टदले कृते गोविड्लिप्तधरातले ॥ मन्त्रैरेभिर्द्विजश्रेष्ठ गणेशादिकृतार्चनः ॥ ३३ ॥ यो मे पूर्वगतः पाप्मा पापकेनेह कर्मणा ॥ तमिंद्रो देवरा
जोऽद्य नाशयत्वखिलेष्टदः ॥ ३४ ॥ यो मे वह्निगतः पाप्मा पापकेनेह कर्मणा ॥ तेजोराजोऽथ वह्निस्तं नाशयत्वखिलेष्टदः ॥३५॥ यो मे दक्षगतः
पाप्मा पापकेनेह कर्मणा ॥ तं यमः प्रेतराजो वै नाशयत्वखिलेष्टदः ॥३६॥ यो मे नैर्ऋतिगः पाप्मा पापकेनेह कर्मणा ॥ रक्षोराजो नैर्ऋतिस्तं नाश
यत्वखिलेष्टदः॥३७॥यो मे पश्चिमगः पाप्मा पापकेनेहकर्मणा॥यादःपतिस्तं वरुणो नाशयत्वखिलेष्टदः ॥ ३८ ॥ यो मे वायुगतः पाप्मा पापकेनेह
कर्मणा ॥ वायुस्तं मरुतां राजो नाशयत्वखिलेष्टदः ॥३९॥ यो मे सौम्यगतः पाप्मा पापकेनेह कर्मणा ॥ सोमस्तमृक्षयक्षेशो नाशयत्वखिलेष्टदः ॥
॥ ४० ॥ यो म ईशगतः पाप्मा पापकेनेह कर्मणा ॥ ईशानो भूतनाथस्तं नाशयत्वखिलेष्टदः ॥ ४१ ॥ यो म ऊर्द्ध्वगतः पाप्मा पापकेनेह कर्मणा ॥
ब्रह्मा प्रजापतीशस्तं नाशयत्वखिलेष्टदः ॥४२॥ यो मेऽधःसंस्थितः पाप्मा पापकेनेह कर्मणा ॥ अनंतो नागराजस्तं नाशयत्वखिलेष्टदः ॥ ४३ ॥
इत्येवं दिक्षु दशसु बलिं दत्वा समाहितः ॥ क्षेत्रपालाय तद्बाह्ये क्षिपेद्बलिमतंद्रितः॥ ४४ ॥ एवं कृतविधिः शेषं निशायां निनयेत्सुधीः ॥ गीतैः
सुमंगलप्रायैः स्तवपाठैर्जपादिभिः ॥ ४५ ॥ प्रातः स्नात्वा समभ्यर्च्य लोकपालान् द्विजोत्तमान् ॥ द्वादशाभ्यर्च्य संभोज्य शक्तितो दक्षिणां
ददेत् ॥ ४६ ॥ इत्थं कृत्वा व्रतं विप्र भोगान्भुक्तैहिकाञ्छुभान् ॥ युगं स्वर्गसुखं भुक्त्वा सार्वभौमो नृपो भवेत् ॥४७ ॥मार्गशुक्लदशम्यां तु चरेदा
रोग्यकं व्रतम् ॥ गंधाद्यैरर्चयेद्विप्रान् दश तच्चरणोदकम् ॥ ४८ ॥ पीत्वाऽथ दक्षिणां दत्वा विसृजेदेकभोजनः ॥ एतत्कृत्वा व्रतं विप्र ह्यारोग्यं

प्राप्य भूतले ॥ ४९ ॥ धर्मराजप्रसादेन मोदते दिवि देववत् ॥ पौषे दशम्यां शुक्लायां विश्वेदेवान् समर्चयेत् ॥५० ॥ क्रतुं दक्षं वसून्सत्यं कालं
कामं मुनिं गुरुम् ॥ विप्र रामं च दशधा केशवस्तान्समास्थितः ॥ ५१ ॥ स्वापयित्वा दर्भमयानासनेषु च संस्थितान् ॥ गंधैर्धूपैस्तथा दीपै
र्नैवेद्यैश्चापि नारद ॥ ५२ ॥ प्रत्येकं दक्षिणां दत्वा प्रणिपत्य विसर्जयेत् ॥ दक्षिणां तां द्विजाग्र्येभ्यो गुरवे वा समर्पयेत् ॥ ५३ ॥ एवं कृतविधि
श्चैकभक्तो भोगी व्रती भवेत् ॥ लोकद्वयस्य विप्रर्षे नात्र कार्या विचारणा ॥ ५४ ॥ माघशुक्लदशम्यां तु सोपवासो जितेंद्रियः ॥ देवानंगिरसो
नाम दश सम्यक्समर्चयेत् ॥५५ ॥ कृत्वा स्वर्णमयान्विप्र गंधाद्यैरुपचारकैः ॥ आत्मा ह्यायुर्मनो दक्षो मदः प्राणस्तथैव च ॥ ५६ ॥ बर्हिष्मांश्च
गविष्ठश्च दत्तः सत्यश्च ते दश॥दश विप्रान्भोजयित्वा मधुरान्नेन नारद॥५७॥मूर्तीस्तेभ्यः प्रदद्यात्ताः स्वर्गलोकाप्तये क्रमात्॥अंत्यशुक्लदशम्यां तु
चतुर्दश यमान्यजेत्॥५८॥यमश्च धर्मराजश्च मृत्युश्चैवांतकस्तथा॥वैवस्वतश्च कालश्च सर्वभूतक्षयस्तथा॥५९॥औदुम्बरश्च दध्नश्च द्वौ नीलपरमेष्ठिनौ॥
वृकोदरश्चचित्रश्च चित्रगुप्तश्चतुर्दश॥६० ॥गन्धाद्यैरुपचारैश्च समभ्यर्च्यार्थतर्पयेत्॥तिलांबुमिश्रांजलिभिर्दर्भैः प्रत्येकशस्त्रिभिः॥६१॥ततश्च दद्यात्सूर्यार्घं
ताम्रपात्रेण नारद॥रक्तचंदनसंमिश्रतिलाक्षतयवांबुभिः॥६२॥एहि सूर्यसहस्रांशो तेजोराशे जगत्पते ॥गृहाणार्घ्यं मया दत्तं भक्त्या मामनुकंपय॥६३॥
इति मंत्रेण दत्वाऽर्घ्यं विप्रान्भोज्य चतुर्द्दश॥रौप्यां सुदक्षिणां दत्वा विसृज्याश्नीत च स्वयम्॥६४॥एवं कृतविधिर्विप्र धर्मराजप्रसादतः॥भुक्त्वा भोगांश्च
पुत्रार्थानैहिकान्देवदुर्लभान् ॥ ६५ ॥ विमानवरमास्थाय देहांते विष्णुलोकभाक् ॥ ६६ ॥ ॥ इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने
चतुर्थपादे द्वादशमासस्थितदशमीव्रतनिरूपणं नामैकोनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥ सनातन उवाच ॥ एकादश्यां तु दलयोर्निराहारः
समाहितः ॥ नानापुष्पैर्मुने कृत्वा विचित्रं मण्डपं शुभम् ॥ १ ॥ स्नात्वा सम्यग्विधानेन सोपवासो जितेंद्रियः ॥ संपूज्य विधिवद्विष्णुं श्रद्धया
सुसमाहितः ॥ २ ॥ उपचारैर्बहुविधैर्जपैर्होमैः प्रदक्षिणैः ॥ स्तोत्रपाठैर्बहुविधैर्गीतवाद्यैर्मनोहरैः ॥ ३ ॥ दंडवत्प्रणिपातैश्च जयशब्दैर्मनोहरैः ॥ रात्रौ
जागरणं कृत्वा याति विष्णोः परं पदम् ॥ ४ ॥ चैत्रस्य शुक्लैकादश्यां सोपवासो नरोत्तमः ॥ कृत्वा च नियमान्सर्वान्वक्ष्यमाणान्दिनत्रये ॥५॥
द्वादश्यामर्चयेद्भक्त्या वासुदेवं सनातनम् ॥ उपचारैः षोडशभिस्ततः संभोज्य बांधवान् ॥ ६ ॥ दत्वा च दक्षिणां तेभ्यो विसृज्याश्नीत च स्वयम्॥
इयं तु कामदा नाम सर्वपातकनाशिनी ॥ ७ ॥ भुक्तिमुक्तिप्रदा विप्र भक्त्या सम्यगुपोषिता ॥ वैशाखकृष्णैकादश्यां समुपोष्य विधानतः ॥ ८ ॥
वरूथिनीं परदिने पूजयेन्मधुसूदनम् ॥ स्वर्णान्नकन्याधेनूनां दानमत्र प्रशस्यते ॥ ९ ॥ वरूथिनीव्रतं कृत्वा नरो नियमतत्परः ॥ सर्वपाप

विनिर्मुक्तो वैष्णवं लभते पदम् ॥ १० ॥ वैशाखशुक्लैकादश्यां समुपोष्य च मोहिनीम् ॥ स्नात्वा परेऽह्नि संपूज्य गंधाद्यैः पुरुषोत्तमम् ॥ ११ ॥
संभोज्य विप्रान्मुच्येत पातकेभ्यो न संशयः॥ज्येष्ठस्य कृष्णकादश्यां समुपोष्य परां नृप ॥१२ ॥ द्वादश्यां नैत्यिकं कृत्वा समभ्यर्च्य त्रिविक्रमम्॥
ततो द्विजाग्र्यान्संभोज्य दत्वा तेभ्यश्च दक्षिणाम् ॥ १३ ॥ सर्वपापविनिर्मुक्तो विष्णुलोकं व्रजेन्नरः ॥ ज्येष्ठस्य शुक्लैकादश्यां निर्जलां
समुपोष्य तु ॥ १४ ॥ उदयादुदयं यावद्भास्करस्य द्विजोत्तम ॥ प्रभाते कृतनित्यस्तु द्वादश्यामुपचारकैः ॥ १५ ॥ हृषीकेशं समभ्यर्च्य विप्रान्
संभोज्य भक्तितः ॥ चतुर्विंशैकादशीनां फलं यत्तत्समाप्नुयात् ॥ १६॥ आषाढकृष्णैकादश्यां योगिनीं समुपोष्य वै ॥नारायणं समभ्यर्च्य द्वादश्यां
कृतनित्यकः ॥ १७ ॥ ततः संभोज्य विप्राग्र्यान्दत्वा तेभ्यश्च दक्षिणाम् ॥ सर्वदानफलं प्राप्य मोदते विष्णुमन्दिरे॥१८॥ आषाढशुक्लैकादश्यां
यद्विधानं शृणुष्व तत् ॥ उपोष्य तस्मिन् दिवसे विधिवन्मंडपे शुभे ॥ १९ ॥ स्थापयेत्प्रतिमां विष्णोः शंखचक्रगदांबुजैः ॥ लसच्चतुर्भुजामग्र्यां
कांचनीं वाथ राजतीम् ॥ २० ॥ पीतांबरधरां शुभ्रे पर्य्यंके स्वास्तृते द्विज ॥ ततः पंचामृतैः स्नाप्य मन्त्रैः शुद्धजलेन च॥ २१ ॥पौरुषेणैव सूक्तेन
ह्युपचारान् प्रकल्पयेत् ॥ नीराजनांतान्पाद्यादींस्ततः संप्रार्थयेद्धरिम् ॥ २२ ॥ सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदम् ॥ विबुद्धे त्वयि बुद्धं च
जगत्सर्वं चराचरम् ॥ २३ ॥ इति संप्रार्थ्य देवाग्रे चातुर्मास्यप्रचोदितान् ॥ नियमांस्तु यथाशक्ति गृह्णीयाद्भक्तिमान्नरः॥२४॥ ततः प्रभाते द्वादश्यां
समर्चेच्छेषशायिनम् ॥ उपचारैः षोडशभिस्ततः संभोज्य वाडवान् ॥ २५ ॥ प्रतोष्य दक्षिणाभिश्च स्वयं भुञ्जीत वाग्यतः ॥ ततःप्रभृति विप्रेंद्र
गन्धाद्यैः प्रत्यहं यजेत् ॥ २६ ॥ कृत्वैवं विधिना विप्र देवस्य शयनीव्रतम् ॥ भुक्तिमुक्तियुतो मर्त्यो भवेद्विष्णोः प्रसादतः ॥ २७ ॥ श्रावणे
कृष्णपक्षे तु एकादश्यां द्विजोत्तम ॥ कामिकां समुपोष्यैव नियमेन नरोत्तम ॥ २८॥ द्वादश्यां कृतनित्यस्तु श्रीधरं पूजयेद्धरिम्॥ उपचारैः षोडश
भिस्ततः संभोज्य वै द्विजान्॥२९॥दत्वा च दक्षिणां तेभ्यो विसृज्याश्नीत बांधवैः॥एवं यः कुरुते विप्र कामिकाव्रतमुत्तमम्॥३०॥स सर्वकामाँल्लब्ध्वेह
याति विष्णोः परं पदम्॥ एकादश्यां नभःशुक्ले पवित्रां समुपोष्य वै॥३१॥द्वादश्यां नियतो भूत्वा पूजयेच्च जनार्दनम्॥ उपचारैः षोडशभिस्ततः
संभोज्य वाडवान् ॥ ३२ ॥ दत्वा च दक्षिणां तेभ्यः पुत्रं प्राप्येह सद्गुणम् ॥ याति विष्णोः पदं साक्षात्सर्वदेवनमस्कृतः ॥३३॥ नभस्यकृष्णैका
दश्यामजाख्यां समुपोष्य वै ॥ अर्चेदुपेंद्रं द्वादश्यामुपचारैः पृथग्विधैः ॥ ३४ ॥ विप्रान्संभोज्य मिष्टान्नैर्विसृजेत्प्राप्तदक्षिणान् ॥एवं कृतव्रतो विप्र
भक्त्याऽजायाः समाहितः ॥ ३५ ॥ भुक्त्वेह भोगानखिलान्यात्यंते वैष्णवं क्षयम् ॥ नभस्यशुक्लैकादश्यां पद्माख्यां समुपोष्य वै॥३६॥ कृत्वा

नित्यार्चनं तत्र कटिदानमथाचरेत् ॥पूर्वं संस्थापितायास्तु प्रतिमाया द्विजोत्तम॥३७ ॥ समुत्सवविधानेन नीत्वा तां सलिलाशये ॥ कृतांबुस्पर्शनां
तत्र संप्रपूज्य विधानतः ॥ ३८ ॥ आनीय मण्डपे तस्मिन् वामपार्श्वेन शाययेत् ॥ ततः प्रभाते द्वादश्यां गन्धाद्यैरर्च्य वामनम् ॥ ३९ ॥ संभोज्य
वाडवान्दत्वा दक्षिणां च विसर्जयेत् ॥ एवं यः कुरुते विप्र पद्मात्रतमनुत्तमम् ॥ ४० ॥ भुक्तिं प्राप्येह मुक्तिं तु लभतेंऽते प्रपंचतः ॥ इषस्य कृष्णैका
दश्यामिंदिरां समुपोष्य वै ॥ ४१ ॥ शालग्रामशिलाग्रे तु मध्याह्ने श्राद्धमाचरेत् ॥ विष्णोः प्रीतिकरं विप्र ततः प्रातर्हरेर्दिने ॥ ४२ ॥पद्मनाभं सम
भ्यर्च्य भूदेवान्भोजयेत्सुधीः ॥ विसृज्य दक्षिणां दत्वा तांस्ततोऽश्नीत च स्वयम् ॥ ४३ ॥ एवं कृतव्रतो मर्त्यो भुक्त्वा भोगानिहेप्सितान्॥ पितॄणां
कोटिमुद्धृत्य यात्यंते वैष्णवं गृहम् ॥ ४४ ॥ एकादश्यामिषे शुक्ले विप्र पाशांकुशाह्वयाम् ॥ उपोष्य विधिवद्विष्णोर्दिने विष्णुं समर्चयेत् ॥४५॥
ततः संभोज्य विप्राग्र्यान्दत्वा तेभ्यश्च दक्षिणाम् ॥ भक्त्या प्रणम्य विसृजेदश्नीयाच्च स्वयं ततः॥ ४६ ॥ एवं यः कुरुते भक्त्या नरः पाशांकुशाव्र
तम् ॥ स भुक्त्वेह वरान्भोगान्याति विष्णोः सलोकताम् ॥ ४७ ॥ कार्तिके कृष्णपक्षे तु एकादश्यां द्विजोत्तम॥ रमामुपोष्य विधिवद्द्वादश्यां प्रातर
र्चयेत् ॥ ४८ ॥ केशवं केशिहंतारं देवदेवं सनातनम् ॥ भोजयेच्च ततो विप्रान्विसृजेल्लब्धदक्षिणान्॥४९ ॥ एवं कृतव्रतो विप्र भोगान्भुक्त्वेह वांछि
तान् ॥ व्योमयानेन सांनिध्यं लभते च रमापतेः ॥५० ॥ ऊर्जस्य शुक्लैकादश्यां समुपोष्य प्रबोधिनीम् ॥केशवं बोधयेद्रात्रौ सुप्तं गीतादिमंगलैः
॥ ५१ ॥ ऋग्यजुःसाममंत्रैश्च वाद्यैर्नानाविधैरपि ॥ द्राक्षेक्षुदाडिमैश्चान्यै रंभाशृंगाटकादिभिः ॥ ५२ ॥ समर्पणैस्ततो रात्र्यां व्यतीतायां परेऽहनि ॥
स्नात्वा नित्यक्रियां कृत्वा गदादामोदरं यजेत् ॥ ५३ ॥ उपचारैः षोडशभिः पौरुषेणापि सूक्ततः ॥ संभोज्य विप्रान्विसृजेद्दक्षिणाभिः प्रतोषि
तान् ॥ ५४ ॥ ततस्तां प्रतिमां हैमीं सधेनुं गुरवेऽर्पयेत् ॥ एवं यः कुरुते भक्त्या बोधिनीव्रतमादृतः॥ ५५॥ स भुक्त्वेह वरान्भोगान्वैष्णवं लभते
पदम् ॥मार्गस्य कृष्णैकादश्यामुत्पन्नां समुपोष्य वै ॥ ५६ ॥ द्वादश्यां कृष्णमभ्यर्चेद्गंधाद्यैरुपचारकैः ॥ ततः संभोज्य विप्राग्र्यान्दत्वा तेभ्यश्च
दक्षिणाम् ॥ ५७ ॥ विसृज्य पश्चाद्भुंजीत स्वयमिष्टैः समाहितः ॥ एवं यो भक्तिभावेन उत्पन्नाव्रतमाचरेत् ॥ ५८ ॥ स विमानं समारुह्य यात्यंते
वैष्णवं पदम् ॥ मार्गस्य शुक्लैकादश्यां मोक्षाख्यां समुपोष्य वै ॥ ५९ ॥ द्वादश्यां प्रातरभ्यर्च्य ह्यनंतं विश्वरूपकम् ॥ सर्वैरेवोपचारैस्तु विप्रान्सं
भोजयेद्द्विजः ॥ ६० ॥ विसृज्य दक्षिणां दत्वा स्वयं भुंजीत बांधवैः ॥ एवं कृत्वा व्रतं विप्र भुक्त्वा भोगानिहेप्सितान् ॥६१॥ दश पूर्वान्दश परान्स
मुद्धृत्य व्रजेद्धरिम् ॥ पौषस्य कृष्णैकादश्यां सफलां समुपोष्य वै ॥ द्वादश्यामच्युतं प्राच्र्य सर्वैरेवोपचारकैः ॥ ६२ ॥ संभोज्य विप्रान्

धुरैर्विसृजेल्लब्धदक्षिणान् ॥ एवं कृत्वा व्रतं विप्र सफलाया विधानतः ॥ ६३॥ भुक्त्वेह भोगानखिलान्यात्यंते वैष्णवं पदम् ॥ पौषस्य
शुक्लैकादश्यां पुत्रदां समुपोष्य वै ॥ ६४ ॥ द्वादश्यां चक्रिणं प्रार्चेदर्घाद्यैरुपचारकैः ॥ ततः संभोज्य विप्राग्र्यान्दत्वा तेभ्यस्तु दक्षि
णाम् ॥६५ ॥ विसृज्य स्वयमश्नीयाच्छेषान्नं स्वेष्टबांधवैः॥एवं कृतव्रतो विप्र भुक्त्वा भोगानिहेप्सितान् ॥६६॥ विमानवरमारुह्य यात्यंते हरिमंदिरम्॥
माघस्य कृष्णैकादश्यां षट्तिलां समुपोष्य वै ॥ ६७ ॥ स्नात्वा दत्वा तर्पयित्वा हुत्वा भुक्त्वा समर्च्य च ॥ तिलैरेव द्विजश्रेष्ठ
द्वादश्यां प्रातरेव हि ॥ ६८ ॥ वैकुंठं सम्यगभ्यर्च्य सर्वैरेवोपचारकैः ॥ द्विजान्संभोज्य विसृजेद्दत्वा तेभ्यश्च दक्षिणाम् ॥ ६९॥ एवं कृत्वा व्रतं विप्र
विधिना सुसमाहितः ॥ भुक्त्वेह वांछितान्भोगानंते विष्णुपदं लभेत् ॥ ७० ॥ माघस्य शुक्लैकादश्यां समुपोष्य जयाह्वयाम् ॥ प्रातर्हरि
दिनेऽभ्यर्चयेच्छ्रीपतिं पुरुषं द्विज ॥७१ ॥ भोजयित्वा दक्षिणां च दत्वा विप्रान्विसृज्य च ॥ स्वयं भुंजीत तच्छेषं प्रयतो निजबांधवैः ॥ ७२ ॥य एवं
कुरुते विप्र व्रतं केशवतोषणम् ॥ स भुक्त्वेह वरान्भोगानंते विष्णोः पदं व्रजेत् ॥ ७३ ॥ तपस्यकृष्णैकादश्यां विजयां समुपोष्य वै ॥
द्वादश्यां प्रातरभ्यर्च्य योगीशं गंधपूर्वकैः ॥ ७४ ॥ ततः संभोज्य भूदेवान्दक्षिणाभिः प्रतोष्य तान् ॥ विसृज्य बांधवैः सार्द्धं स्वय
मश्नीत वाग्यतः ॥७५॥ एवं कृतव्रतो मर्त्यो भुक्त्वा भोगानिहेप्सितान् ॥ देहांते वैष्णवं लोकं याति देवैः सुसत्कृतः ॥ ७६ ॥ फाल्गुनस्य
सिते पक्षे एकादश्यां द्विजोत्तम ॥ उपोष्यामलकीं भक्त्या द्वादश्यां प्रातरर्चयेत् ॥ ७७ ॥ पुंडरीकाक्षमखिलैरुपचारैस्ततो द्विजान् ॥
भोजयित्वा वरान्नेन दद्यात्तेभ्यस्तु दक्षिणाम् ॥ ७८ ॥ एवं कृत्वा विधानेनामलक्यां पूजनादिकम् ॥ सितैकादश्यां तपस्ये व्रजेद्विष्णोः परं
पदम् ॥ ७९ ॥ चैत्रस्य कृष्णैकादशीं पापमोचनिकां द्विज ॥ उपोष्य द्वादश्यां प्रातर्गोविंदं पूजयेत्तथा ॥ ८० ॥ उपचारैः षोडशभिर्द्विजान्संभो
ज्य दक्षिणाम् ॥ दत्वा तेभ्यो विसृज्याथ स्वयं भुंजीत बान्धवैः ॥ ८१ ॥ एवं यः कुरुते विप्र पापमोचनिकाव्रतम् ॥ स याति वैष्णवं
लोकं विमानेन तु भास्वता ॥ ८२ ॥ इत्थं कृष्णे तथा शुक्ले व्रतं चैकादशीभवम् ॥ मोक्षदं कीर्तितं विप्र नास्त्यस्मिन्संशयः क्वचित्
॥ ८३ ॥यतस्त्रिदिनसंसाध्यं कीर्तितं पापनाशनम् ॥ सर्वव्रतोत्तमं विप्र ततो ज्ञेयं महाफलम् ॥ ८४ ॥ त्यजेच्चत्वारि भुक्तानि नारदै
तद्दिनत्रये ॥ आद्यंतयोरेकमेकं मध्यमे द्वयमेव हि ॥ ८५ ॥ अथ ते नियमान्वच्मि व्रते ह्यस्मिन्दिनत्रये ॥ कांस्यं मांसं मसूरान्नं चणकान्को
द्रवांस्तथा ॥ ८६ ॥ शाकं मधु परान्नं च पुनर्भोजनमैथुने ॥ दशम्यां दश वस्तूनि वर्जयेद्वैष्णवः सदा ॥ ८७ ॥ द्यूतक्रीडां च निद्रां च तांबूलं

दतधावनम् ॥ परापवादं पैशुन्यं स्तेयं हिंसां तथा रतिम् ॥ ८८ ॥ कोपं ह्यनृतवाक्यं च एकादश्यां विवर्ज्जयेत् ॥ कांस्यं मांसं सुरां क्षौद्रं
तैलं विण्म्लेच्छभाषणम् ॥ ८९ ॥ व्यायामं च प्रवासं च पुनर्भोजनमैथुने ॥ अस्पृश्यस्पर्शमाशूरे द्वादश्यां द्वादश त्यजेत् ॥ ९० ॥ एवं नियमकृ
द्विप्र उपवासं समाचरेत् ॥ शक्तोऽशक्तस्तु मतिमानेकभुक्तं न नक्तकम् ॥९१॥ अयाचितं वापि चरेन्न त्यजेद्व्रतमीदृशम् ॥९२॥ इति श्रीबृहन्नारदीय
पुराणे पूर्वभागे बृहदुपाख्याने चतुर्थभागे द्वादशमासस्थितैकादशीव्रतकथनं नाम विंशत्यधिकशततमोऽध्यायः ॥ १२० ॥ सनातन उवाच ॥
अथ व्रतानि द्वादश्याः कथयामि तवानघ ॥ यानि कृत्वा नरो लोके विष्णोः प्रियतरो भवेत् ॥ १ ॥ चैत्रस्य शुक्लद्वादश्यां मदनव्रतमाचरेत् ॥
स्थापयेदव्रणं कुंभं सिततंदुलपूरितम् ॥ २ ॥ नानाफलयुतं तद्वदिक्षुदंडसमन्वितम् ॥ सितवस्त्रयुगच्छन्नं सितचंदनचर्च्चितम् ॥ ३ ॥ नाना
भक्ष्यसमोपेतं सहिरण्यं स्वशक्तितः ॥ ताम्रपात्रं गुडोपेतं तस्योपरि निवेशयेत् ॥ ४ ॥ तत्र संपूजयेद्देवं कामरूपिणमच्युतम् ॥ गंधा
द्यैरुपचारैस्तु सोपवासो परेऽहनि ॥ ५ ॥ पुनः प्रातः समभ्यर्च्य ब्राह्मणाय निवेदयेत् ॥ ब्राह्मणान्भोजयेच्चैव तेभ्यो दद्याच्च दक्षिणाम् ॥
॥ ६ ॥ वर्षमेवं व्रतं कृत्वा घृतधेनुसमन्विताम् ॥ शय्यां तु दद्याद्गुरवे सर्वोपस्करसंयुताम् ॥ ७ ॥ कांचनं कामदेवं च शुक्लां
गां च पयस्विनीम् ॥ वासोभिर्द्विजदांपत्यं पूजयित्वा समर्पयेत् ॥ ८ ॥ प्रीयतां कामरूपी मे हरिरित्येवमुच्चरन् ॥ यः कुर्याद्वि
धिनाऽनेन मदनद्वादशीव्रतम् ॥ ९ ॥ स सर्वपापनिर्मुक्तः प्राप्नोति हरिसाम्यताम् ॥ अस्यामेव समुद्दिष्टं भर्तृद्वादशिकाव्रतम् ॥ १० ॥
स्वास्तृतां तत्र शय्यां तु कृत्वात्र श्रीयुतं हरिम् ॥ संस्थाप्य मंडपं पुष्पैस्तदुपर्य्युपकल्पयेत् ॥ ११ ॥ ततः संपूज्य गंधाद्यैर्व्रती जागरणं निशि ॥
नृत्यवादित्रगीताद्यैस्ततः प्रातः परेऽहनि ॥ १२ ॥ सशय्यं श्रीहरिं हैमं द्विजाग्र्याय निवेदयेत् ॥ द्विजान्संभोज्य विसृजद्दक्षिणाभिः प्रतोषितान्
॥ १३ ॥एवं कृतव्रतस्यापि दांपत्यं जायते स्थिरम् ॥ सप्तजन्मसु भुंक्ते च भोगान् लोकद्वयेप्सितान् ॥ १४ ॥ वैशाखशुक्लद्वादश्यां सोपवासो जितें
द्रियः ॥ संपूज्य माधवं भक्त्या गंधाद्यैरुपचारकैः ॥ १५ ॥ पक्वान्नं तृप्तिजनकं मधुरं सोदकुंभकम् ॥ विप्राय दद्याद्विधिवन्माधवः प्रीयतामिति
॥ १६ ॥ द्वादश्यां ज्येष्ठशुक्लायां पूजयित्वा त्रिविक्रमम् ॥ गंधाद्यैर्मधुरान्नाढ्यं करक विनिवेदयेत् ॥ १७ ॥ व्रती द्विजाय तत्पश्चादेकभक्तं समाच
रेत्॥ व्रतेनानेन संतुष्टो देवदेवस्त्रिविक्रमः ॥ १८ ॥ ददाति विपुलान्भोगानंते मोक्षं च नारद ॥ आषाढशुक्लद्वादश्यां द्विजान्द्वादश भोजयेत् ॥
॥ १९ ॥ मधुरान्नेन तान्पूज्य पृथग्गंधादिकैः क्रमात् ॥ तेभ्यो वासांसि दंडांश्च ब्रह्मसूत्राणि मुद्रिकाः ॥ २० ॥ पात्राणि च ददेद्भक्त्या विष्णुर्मे

प्रीयतामिति ॥ द्वादश्यां तु नभःशुक्ले श्रीधरं पूजयेद्व्रती ॥ २१ ॥ गंधाद्यैस्तत्परो भक्त्या दधिभक्तैर्द्विजोत्तमान् ॥ संभोज्य दक्षिणां रौप्यां दत्वा
नत्वा विसर्ज्जयेत् ॥ २२ ॥ व्रतेनानेन देवेशः श्रीधरः प्रीयतामिति ॥ द्वादश्यां नभस्यशुक्ले व्रती संपूज्य वामनम् ॥ २३ ॥ तदग्रे भोजये
द्विप्रान्पायसैर्द्वादशैव च ॥ सौवर्णीं दक्षिणां दत्वा विष्णुप्रीतिकरो भवेत् ॥२४॥ द्वादश्यामिषशुक्लायां पद्मनाभं समर्चयेत् ॥ गंधाद्यैरुपचारैस्तु
तदग्रे भोजयेद्द्विजान् ॥ २५ ॥ मधुरान्नेन वस्त्राढ्यां सौवर्णीं दक्षिणां ददेत् ॥ व्रतेनैतेन संतुष्टः पद्मनाभो द्विजोत्तम ॥ २६ ॥ श्वेतद्वीप
गतिं दद्यादेहभोगांश्च वांछितान् ॥ कार्तिके कृष्णपक्षे तु गोवत्सद्वादशीव्रतम् ॥२७॥तत्र वत्सयुतां गां तु समालिख्य सुगंधिभिः ॥ चंदनाद्यैस्तथा
पुष्पमालाभिः प्रार्च्य ताम्रके ॥२८॥पात्रे पुष्पाक्षततिलैरर्घ्यं कृत्वा विधानतः ॥ प्रदद्यात्पादमूलेऽस्या मन्त्रेणानेन नारद॥२९॥क्षीरोदार्णवसंभूते
सुरासुरनमस्कृते ॥ सर्वदेवमये देवि सर्वदेवैरलंकृते ॥ ३० ॥ मातर्मातर्गवां मातर्गृहाणार्घ्यं नमोऽस्तु ते ॥ततो माषादिसंसिद्धान्वटकांश्च निवेद
येत् ॥ ३१॥ एवं पञ्च दशैकं वा यथाविभवमात्मनः ॥ सुरभि त्वं जगन्माता नित्यं विष्णुपदे स्थिता ॥ ३२ ॥ सर्वदेवमये ग्रासं मया दत्तमिमं
ग्रस ॥ सर्वदेवमये देवि सर्वदेवैरलंकृते ॥ ३३ ॥ मातर्ममाभिलषितं सफलं कुरु नंदिनी ॥ तद्दिने तैलपक्वं च स्थालीपक्वं द्विजोत्तम ॥
॥ ३४ ॥ गोक्षीरं गोघृतं चैव दधि तक्रं च वर्जयेत् ॥ द्वादश्यामूर्जशुक्लायां देवं दामोदरं द्विज ॥ ३५ ॥ समभ्यर्च्योपचारैस्तु गंधाद्यैः सुसमा
हितः ॥ तदग्रे भोजयेद्विप्रान्पक्वान्नेनार्कसंख्यकान् ॥ ३६ ॥ ततः कुंभानपांपूर्णान्वस्त्राच्छन्नान्समार्चितान् ॥ सपूगमोदकस्वर्णांस्तेभ्यः प्रीत्या
समर्पयेत् ॥ ३७ ॥ एवं कृते प्रियो विष्णोर्जायतेऽखिलभोगभुक् ॥ देहांते विष्णुसायुज्यं लभते नात्र संशयः ॥ ३८ ॥ नीराजनव्रतं चात्र
गदितं तन्निबोध मे ॥ सुप्तोत्थितं जगन्नाथमलंकृत्य निशागमे ॥ ३९॥ अलंकृतो नवं वह्निमुत्पाद्याभ्यर्च्य मन्त्रतः ॥ हुत्वा तत्र समुद्दीप्ते रौप्य
दीपिकया मुने ॥ ४० ॥ गंधपुष्पाद्यर्चितया जनैर्नीराजयेद्धरिम् ॥ तत्रैवानुगतां लक्ष्मीं ब्रह्माणीं चंडिकां तथा ॥ ४१॥ आदित्यं शंकरं गौरीं यक्ष
गणपतिं ग्रहान् ॥ मातॄः पितॄन्नगान्नागान्सर्वान्नीराजयेत्क्रमात् ॥ ४२॥ गवां नीराजनं कुर्यान्महिष्यादेश्च मंडलम् ॥ नमो जयेति शब्दैश्च घंटाशंखा
दिनिःस्वनैः ॥ ४३ ॥ सिंदूरालिप्तशृङ्गाणां चित्राङ्गाणां च वर्णकैः ॥ गवां कोलाहले वृत्ते नीराजनमहोत्सवे ॥ ४४ ॥ तुरगांल्लक्षणोपेतान्
गजांश्च मदविप्लुतान् ॥ राजचिह्नानि सर्वाणि च्छत्रादीनि च नारद ॥४५॥राजा पुरोधसा सार्धं मंत्रिभृत्यपुरःसरः ॥ पूजयित्वा यथान्यायं
नीराज्य स्वयमादरात् ॥४६॥ शंखतूर्यादिघोषैश्च नानारत्नविनिर्मिते ॥ सिंहासने नवे कृते तिष्ठेत्सम्यगलंकृतः ॥ ४७ ॥ ततः सुलक्षणैर्युक्ता

वेश्या वाथ कुलांगना ॥ शीर्षोपरि नरेंद्रस्य तया नीराजयेच्छनैः ॥ ४८ ॥ एवमेषा महाशांतिः कर्तव्या प्रतिवत्सरम् ॥ राज्ञा वित्तवतान्येन वर्ष
मारोग्यमिच्छता ॥ ४९ ॥ येषां राष्ट्रे पुरे ग्रामे क्रियते शांतिरुत्तमा ॥ नीराजनाभिधा विप्र तद्रोगा यांति संक्षयम् ॥५० ॥ द्वादश्यां मार्गशु
क्लायां साध्यव्रतमनुत्तमम् ॥ मनोभवस्तथा प्राणो नरो यातश्च वीर्यवान् ॥ ५१ ॥ चितिर्हयो नृपश्चैव हंसो नारायणस्तथा ॥ विभुश्चापि प्रभुश्चैव
साध्या द्वादश कीर्तिताः ॥ ५२ ॥ पूजयेद्गंधपुष्पाद्यैरेतांस्तंदुलकल्पितान् ॥ ततो द्विजाग्र्यान्संभोज्य द्वादशात्र सुदक्षिणाः ॥ ५३ ॥ दत्वा
तेभ्यस्तु विसृजेत्प्रीयान्नारयणस्त्विति ॥ एतस्यामेव विदितं द्वादशादित्यसंज्ञितम् ॥ ५४ ॥ व्रतं तत्रार्चयेद्धीमानादित्यान्द्वादशापि च ॥ धाता
मित्रोऽर्यमा पूषा शक्रोंऽशो वरुणो भगः ॥ ५५ ॥ त्वष्टा विवस्वान्सविता विष्णुर्द्वादश ईरिताः ॥ प्रतिमासं तु शुक्लायां द्वादश्यामर्च्य
यत्नतः ॥ ५६ ॥ वर्षं नयेद्व्रतांते तु प्रतिमा द्वादशापि च ॥ हैमीः संपूज्य विधिना भोजयित्वा द्विजोत्तमान्॥ ५७ ॥ मधुरान्नैः सुसत्कृत्य प्रत्येकं
चार्पयेद्व्रती ॥ एव व्रतं नरः कृत्वा द्वादशादित्यसंज्ञकम् ॥ ५८ ॥ सूर्यलोकं समासाद्य भुक्त्वा भोगांश्चिरं ततः ॥ जायते भुवि धर्मात्मा
मानुष्ये रोगवर्जितः ॥ ५९ ॥ ततो व्रतस्य पुण्येन पुनरेव लभेद्व्रतम् ॥ तत्पुण्येन रवेर्भित्त्वा मंडलं द्विजसत्तम ॥ ६० ॥ निरंजनं निरा
कारं निर्द्वंद्वं ब्रह्म चाप्नुयात् ॥ अत्रैवाखंडसंज्ञं च व्रतमुक्त द्विजोत्तम ॥ ६१ ॥ मूर्तिं निर्माय सौवर्णीं जनार्दनसमाह्वयाम् ॥ अभ्यर्च्य गन्ध
पुष्पाद्यैस्तदग्रे भोजयेद्द्विजान् ॥ ६२ ॥ द्वादश प्रतिमासं तु नक्ताशीः स्याज्जितेंद्रियः॥ततः समांते तां मूर्तिं समभ्यर्च्य विधानतः ॥६३॥गुरवे धेनु
सहितां दद्यात्संप्रार्थयेत्तथा ॥ शतजन्मसु यत्किंचिन्मयाखंडव्रतं कृतम् ॥ ६४ ॥ भगवंस्त्वत्प्रसादेन तदखंडमिहास्तु मे ॥ ततः संभोज्य
विप्राग्र्यान्सखंडाढ्यैस्तु पायसैः ॥ ६५ ॥ द्वादशैव हि सौवर्णीं दक्षिणां प्रददेन्नमेत् ॥ इति कृत्वा व्रतं विप्र प्रीणयित्वा जनार्दनम् ॥६६॥सौवर्णेन
विमानेन याति विष्णोः परं पदम्॥ पौषस्य कृष्णद्वादश्यां रूपव्रतमुदीरितम् ॥ ६७ ॥ दशम्यां विधिवत्स्नात्वा गृह्णीयाद्गोमयं व्रती ॥ श्वेताया
वैकवर्णाया अन्तरिक्षगतं द्विज ॥ ६८ ॥ अष्टोत्तरशतं तेन पिंडिकाः कल्प्य नारद ॥ शोषयेदातपे धृत्वा पात्रे ताम्रेऽथ मृन्मये ॥ ६९ ॥ एका
दश्यां सोपवासः समभ्यर्च्य विधानतः ॥ सौवर्णीं प्रतिमां विष्णोर्निशायां जागरं चरेत् ॥ ७० ॥सुमंगलैर्गीतवाद्यैः स्तोत्रपाठैर्जपादिभिः॥ततः
प्रभाते द्वादश्यां तिलपात्रोपरि स्थिताम् ॥ ७१ ॥ अंबुपूर्णे घटे न्यस्य पूजयेदुपचारकैः ॥ ततोऽग्निं नवमुत्पाद्य काष्ठसंघर्षणादिभिः ॥ ७२ ॥
तं समभ्यर्च्य विधिवदेकैकां पिंडिकां सुधीः ॥ होमयेत्सतिलाज्यां च द्वादशाक्षरविद्यया ॥ ७३॥ वैष्णव्याथ च पूर्णां च शतमष्टोत्तरं ततः ॥भोज
येत्पायसैर्विप्रान्प्रीत्या सुस्निग्धमानसः ॥ ७४॥ सहितां च घटेनैव प्रतिमां गुरवेऽर्पयेत् ॥ विप्रेभ्यो दक्षिणां शक्त्या दत्त्वा नत्वा विसर्जयेत् ॥नरो वा

यदि वा नारी व्रतं कृत्वैवमादरात् ॥ ७५ ॥ लभते रूपसौभाग्यं नात्र कार्या विचारणा ॥ सहस्ये शुक्लपक्षे तु सुजन्मद्वादशीव्रतम् ॥ ७६ ॥ तत्र
स्नात्वा विधानेन गृह्णीयाद्वार्षिकव्रतम् ॥ पीत्वा गोशृंगवार्यादौ तां च कृत्वा प्रदक्षिणम् ॥ ७७ ॥ प्रतिमासं ततः शुक्ले द्वादश्यां दानमाचरेत् ॥
घृतप्रस्थं तच्चतुष्कं क्रमाद्व्रीहेर्यवस्य च ॥ ७८॥ द्विरक्तिकं हेम तिलाढकार्द्धं पयसां घटम् ॥ रौप्यस्य माषमेकं च तृतिकृन्मिष्टपक्वकम् ॥७९॥ छत्रं
माषार्धहेम्नश्च प्रस्थं फाणितमुत्तमम् ॥ चंदनं पलिकं वस्त्रं पंचहस्तोन्मितं तनुम् ॥८०॥ एवं तु मासिकं दानं कृत्वा प्राश्य यथाक्रमम् ॥ गोमूत्रं जल
माज्यं वा पक्वा शाकं चतुर्विधम् ॥ ८१ ॥ दधियुक्तं च यावान्नं तिलाज्यं शर्करान्वितम् ॥ दर्भांबुक्षीरमुदितं प्राशनं प्रतिमासिकम् ॥ ८२ ॥ एवं कृत
व्रतो वर्षं सौवर्णीं प्रतिमां रवेः ॥ कृत्वा वै ताम्रपात्रस्थां न्यस्याभ्यर्च्य विधानतः ॥८३॥ गुरवे धेनुसहितां प्रत्यर्प्य प्रणमेत्पुरः ॥ विप्रान्द्वादश संभोज्य
तेभ्यो दद्याच्च दक्षिणाम् ॥८४॥ एवं कृतव्रतो विप्र जन्माप्नोत्युत्तमे कुले॥ निरोगो धनधान्याढ्यो भवेच्चाविकलेंद्रियः ॥८५॥ माघस्य शुक्लद्वादश्यां
शालग्रामशिलां द्विज ॥ अभ्यर्च्य विधिवद्भक्त्या सुवर्णं तन्मुखे न्यसेत् ॥८६ ॥ तां स्थाप्य रौप्यपात्रे तु सितवस्त्रयुगावृताम्॥ प्रदद्याद्वेदविदुषे तं हि
संभोजयेत्ततः ॥ ८७॥ पायसान्नेन खंडाज्यसहितेन हितेन च ॥ एवं कृत्वैकभक्तः सन्विष्णुचिंतनतत्परः ॥८८॥ वैष्णवं लभते धाम भुक्त्वा भोगा
निहेप्सितान् ॥ अंत्ये सितायां द्वादश्यां सौवर्णीं प्रतिमां हरेः ॥८९॥ अभ्यर्च्य गंधपुष्पाद्यैर्दद्याद्वेदविदे द्विज ॥ द्विषट्कसंख्यान्विप्रांश्च भोजयित्वा
च दक्षिणाम् ॥ ९० ॥ दत्वा विसर्जयेत्पश्चात्स्वयं भुंजीत बांधवैः ॥ त्रिस्पृशोन्मीलिनी पक्षवर्द्धिनी वंजुली तथा ॥ ९१॥ जया च विजया चैव
जयंती चापराजिता ॥ एता अष्टौ सदोपोष्या द्वादश्यः पापहारिकाः ॥ ९२ ॥ श्रीनारद उवाच ॥ कीदृशं लक्षणं ब्रह्मन्नेतासां किं फलं तथा ॥ तत्सर्वं
मे समाचक्ष्व याश्चान्याः पुण्यदायिकाः ॥ ९३ ॥ सूत उवाच ॥ इत्थं सनातनः पृष्टो नारदेन द्विजोत्तमः ॥ प्रशस्य भ्रातरं प्राह महाभागवतं मुनिः
॥ ९४ ॥ सनातन उवाच ॥ साधु पृष्टं त्वया भ्रातः साधूनां संशयच्छिदा ॥ वक्ष्ये महाद्वादशीनां लक्षणं च फलं पृथक् ॥ ९५ ॥ एकादशी
निवृत्ता चेत्सूर्यस्योदयतः पुरा ॥ तदा तु त्रिस्पृशा नाम द्वादशी सा महाफला ॥ ९६ ॥ अस्यामुपोष्य गोविन्दं यः पूजयति नारद॥ अश्वमेधसह
स्रस्य स फलं लभते ध्रुवम् ॥ ९७॥ यदारुणोदये विद्धा दशम्यैकादशी तिथिः ॥ तदा तां संपरित्यज्य द्वादशीं समुपोषयेत् ॥९८॥ तत्रेष्ट्वा वासुदे
वाख्यं सम्यक्पूजाविधानतः ॥ राजसूयसहस्रस्य फलमुन्मीलिते लभेत् ॥९९॥ यदोदये तु सवितुर्याम्या त्वेकादशीं स्पृशेत्॥ तदा वंजुलिकाख्यां
तु तां त्यक्त्वोपोषयेत्सदा ॥ १०० ॥ अस्यां संकर्षणं देवं गंधाद्यैरुपचारकैः ॥ पूजयेत्सततं भक्त्या सर्वस्याभयदं परम् ॥ १०१ ॥
एषा महाद्वादशी तु सर्वक्रतुफलप्रदा ॥ सर्वपापहरा प्रोक्ता सर्वसंपत्प्रदायिनी ॥ १०२ ॥ कुहूराके यदा वृद्धे स्यातां विप्र यदा

तदा ॥ पक्षवर्द्धनिका नाम द्वादशी सा महाफला ॥ १०३ ॥ तस्यां संपूजयेद्देवं प्रद्युम्नं जगतां पतिम् ॥ सर्वैश्वर्य्यप्रदं साक्षात्पुत्र
पौत्रविवर्धनम् ॥ १०४ ॥ यदा तु धवले पक्षे द्वादशी स्यान्मघान्विता ॥ तदा प्रोक्ता जया नाम सर्वशत्रुविनाशिनी ॥ १०५॥अस्यां संपूजयेद्देव
मनिरुद्धं रमापतिम् ॥ सर्वकामप्रदं नृणां सर्वसौभाग्यदायकम् ॥१०६ ॥श्रवणर्क्षयुता चेत्स्याद्द्वादशी धवले दले॥ तदा सा विजया नाम तस्यामर्चे
द्गदाधरम् ॥ १०७ ॥ सर्वसौख्यप्रदं शश्वत्सर्वभोगपरायणम् ॥ सर्वतीर्थफलं विप्र तां चोपोष्याप्नुयान्नरः ॥१०८॥यदा स्याच्च सिते पक्षे प्राजाप
त्यर्क्षसंयुता ॥ द्वादशी सा महापुण्या जयंती नामतः स्मृता ॥ १०९॥ यस्यां समर्चयेद्देवं वामनं सिद्धिदं नृणाम्॥ उपोषितैषा विप्रेंद्र सर्वव्रतफलप्रदा
॥ ११० ॥ सर्वदानफला चापि भुक्तिमुक्तिप्रदायिनी ॥ यदा तु स्यात्सिते पक्षे द्वादशी जीवभान्विता ॥ १११ ॥ तदापराजिता प्रोक्ता सर्वज्ञा
नप्रदायिनी ॥ अस्यां समर्चयेद्देवं नारायणमनामयम् ॥ ११२ ॥ संसारपाशविच्छित्तिकारकं ज्ञानसागरम्॥अस्यास्तूपोषणादेव मुक्तः स्याद्विप्र भो
जनः ॥ ११३ ॥ यदा त्वाषाढशुक्लायां द्वादश्यां मैत्रभं भवेत् ॥ तदा व्रतद्वयं कार्य्यं न दोषोऽत्रैकदैवतम् ॥ ११४ ॥ श्रवणर्क्षयुतायां च द्वादश्यां
भाद्रशुक्लके ॥ ऊर्ज्जे सितायां द्वादश्यामंत्यभे च व्रतद्वयम् ॥ ११५ ॥ एताभ्योऽन्यत्र विप्रेंद्र द्वादश्यामेकभुक्तकम्॥ निसर्गतः समुद्दिष्टं व्रतं पातक
नाशनम् ॥ ११६ ॥ एकादश्या व्रतं नित्यं द्वादश्याः सहितं यतः॥ नोद्यापनमिहोद्दिष्टं कर्त्तव्यं जीवितावधि ॥ ११७॥इति श्रीबृहन्नारदीयपुराणे
बृहदुपाख्याने पूर्वभागे चतुर्थपादे द्वादशमासस्य द्वादशीव्रतनिरूपणं नामैकविंशत्यधिकशततमोऽध्यायः ॥ १२१ ॥ सनातन उवाच ॥अथातः संप्र
वक्ष्यामि त्रयोदश्या व्रतानि ते ॥ यानि कृत्वा नरो भक्त्या सुभगो जायते भुवि ॥ १ ॥ मधौ शुक्लत्रयोदश्यां मदनं चन्दनात्मकम् ॥ कृत्वा
संपूज्य यत्नेन वीजयद्व्यजनेन च ॥ २॥ ततः संक्षुधितः कामः पुत्रपौत्रविवर्द्धनः ॥ अनंगपूजाप्यत्रोक्ता तां निबोध मुनीश्वर ॥ ३ ॥
सिन्दूररजनीरागैः फलकेऽनंगमालिखेत् ॥ रतिप्रीतियुतं श्लक्ष्णं पुष्पचापेषुधारिणम् ॥ ४ ॥ कामदेवं वसन्तं च वाजिवक्रं वृषध्वजम् ॥
मध्याह्ने पूजयेद्भक्त्या गंधस्रग्भूषणांशुकैः ॥ ५ ॥ भक्ष्यैर्नानाविधैश्चापि मन्त्रेणानेन नारद ॥ नमो माराय कामाय कामदेवस्य मूर्त्तये ॥
॥ ६ ॥ ब्रह्मविष्णुशिवेंद्राणां मनःक्षोभकराय वै ॥ ततस्तस्याग्रतो भक्त्या पूजयेदंगनापतिम् ॥ ७ ॥ वस्त्रमाल्यविभूषाद्यैः कामोऽयमिति चिंत
येत् ॥ संपूज्य द्विजदांपत्यं गंधवस्त्रविभूषणैः ॥ ८ ॥ एवं यः कुरुते विप्र वर्षे वर्षे महोत्सवम् ॥ वसंतसमये प्राप्ते हृष्टः पुष्टः सदैव सः
॥ ९ ॥ प्रतिमासं पूजयेद्वा यावद्वर्षं समाप्यते ॥ मदनं हृद्भवं कामं मन्मथं च रतिप्रियम् ॥ १०॥ अनंगं चैव कंदर्पं पूजयेन्मकरध्वजम् ॥ कुसु

मायुधसंज्ञं च ततः पश्चान्मनोभवम् ॥ ११ ॥ विषमेषुं तथा विप्र मालतीप्रियमित्यपि ॥ अजाया दानमप्युक्तं स्नात्वा नद्यां विधानतः ॥ १२॥
अजाः पयस्विनीर्दद्याद्दरिद्राय कुटुंबिने ॥ भूयस्त्वनेन दानेन स लोके नैव जायते ॥१३॥ यदीयं शनिना युक्ता सा महावारुणी स्मृता॥ गंगायां
यदि लभ्येत कोटिसूर्यग्रहाधिका ॥ १४ ॥ शुभयोगः शतर्क्षं च शनौ कामे मधौ सिते ॥ महामहेति विख्याता कुलकोटिविमुक्तिदा॥१५॥ राधशु
क्लत्रयोदश्यां कामदेवव्रतं स्मृतम् ॥ तत्र गंधादिभिः कामं पूजयेदुपवासवान् ॥ १६ ॥ प्रतिमासं ततः पश्चात्त्रयोदश्यां सिते दले॥ एवमेव व्रतं कार्यं
वर्षांते गामलंकृताम् ॥ १७॥ दद्याद्विप्राय सत्कृत्य व्रतसांगत्वसिद्धये ॥ ज्येष्ठशुक्लत्रयोदश्यां दौर्भाग्यशमनं व्रतम् ॥ १८ ॥ तत्र स्नात्वा नदी
तोये पूजयेच्छुचिदेशजम् ॥ श्वेतमंदारमर्कं वा करवीरं च रक्तकम् ॥ १९ ॥ निरीक्ष्य गगने सूर्यं प्रार्थयेन्मंत्रतस्तदा ॥ मंदारकरवीरार्का भवंतो
भास्करांशजाः ॥२० ॥ पूजिता मम दौर्भाग्यं नाशयंतु नमोऽस्तु वः ॥ इत्थं योऽर्चयते भक्त्या वर्षे वर्षे द्रुमत्रयम् ॥२१॥ नश्यते तस्य दौर्भाग्यं
नात्र कार्या विचारणा॥शुचिशुक्लत्रयोदश्यामेकभक्तं समाचरेत्॥२२॥पूजयित्वा जगन्नाथावुमामाहेश्वरी तनूः॥हैम्यौ रौप्यौ च मृन्मय्यौ यथाशक्त्या
विधाय च ॥ २३ ॥ सिंहोक्षस्थे देवगृहे गोष्ठे ब्राह्मणवेश्मनि ॥ स्थापयित्वा प्रतिष्ठाप्य देवमंत्रेण नारद ॥ २४ ॥ ततः पंचदिनं पूजा चैक
भक्तं व्रतं तथा ॥ तृतीयदिवसे प्रातः स्नात्वा संपूज्य तौ पुनः ॥ २५ ॥ समर्पणीयौ विप्राय वेदवेदांगशालिने ॥ वर्षे वर्षे ततः पश्चाद्विधेयं
वर्षपंचकम् ॥ २६ ॥ तदंते धेनुयुग्मेन सहितौ तौ प्रदापयेत्॥इत्थं नरो वा नारी वा कृत्वा व्रतमिदं शुभम्॥२७॥नैव दांपत्यविच्छेदं लभते सप्तज
न्मसु ॥ नभःशुक्लत्रयोदश्यां रतिकामव्रतं शुभम् ॥ २८॥ वैधव्यवारणं स्त्रीणां तथा संतानवर्धनम् ॥ कृतोपवासा कन्यैव नारी वा द्विजस
त्तम ॥ २९ ॥ ताम्रे वा मृन्मये वापि सौवर्णे राजते तथा ॥ रतिकामौ प्रविन्यस्य गंधाद्यैः सम्यगर्चयेत् ॥ ३० ॥ ततस्तु द्विजदांपत्यं चतु
र्दश्यां निमंत्र्य च ॥ सत्कृत्य भोज्य प्रतिमे दद्यात्ताभ्यां सदक्षिणे ॥ ३१ ॥ एवं चतुर्दशाब्दं च कृत्वा व्रतमनुत्तमम् ॥ धेनुयुग्मान्विते देये
व्रतसंपूर्तिहेतवे ॥ ३२ ॥ भाद्रशुक्लत्रयोदश्यां गोत्रिरात्रव्रतं स्मृतम् ॥ लक्ष्मीनारायणं कृत्वा सौवर्णं वापि राजतम् ॥ ३३ ॥ पंचामृतेन
संस्नाप्य मण्डलेऽष्टदले शुभे ॥ पीठे विन्यस्य वस्त्राढ्यं गंधाद्यैः परिपूजयेत् ॥ ३४ ॥ आरार्तिकं ततः कृत्वा दद्यात्साम्रोदकं घटम् ॥
एवं दिनत्रयं कृत्वा व्रतांते मासमर्च्य च ॥ ३५ ॥ सम्यगर्थं च संपाद्य दद्यान्मंत्रेण नारद ॥ पंच गावः समुत्पन्ना मथ्यमाने महोदधौ ॥
॥ ३६ ॥ तासां मध्ये तु या नंदा तस्यै धेन्वै नमो नमः ॥ प्रदक्षिणीकृत्य ततो दद्याद्विप्राय मंत्रतः ॥ ३७॥ गावो ममाग्रतः सन्तु

गावो मे संतु पृष्ठतः ॥ गावो मे पार्श्वतः संतु गवां मध्ये वसाम्यहम् ॥ ३८ ॥ ततश्च द्विजदांपत्यं सम्यगभ्यर्च्य भोजयेत् ॥ लक्ष्मीनारा
यणं तस्मै सत्कृत्य प्रतिपादयेत ॥ ३९ ॥ अश्वमेधसहस्राणि राजसूयशतानि च ॥ कृत्वा यत्फलमाप्नोति गोत्रिरात्रव्रताच्च तत् ॥ ४० ॥
इषे शुक्लत्रयोदश्यां त्रिरात्राशोककव्रतम् ॥ हैमं ह्यशोकं निर्माय पूजयित्वा विधानतः ॥ ४१ ॥ उपवासपरा नारी नित्यं कुर्यात्प्रदक्षिणाः ॥
अष्टोत्तरशतं विप्र मंत्रेणानेन सादरम् ॥ ४२ ॥ हरेण निर्मितः पूर्वं त्वमशोक कृपालुना ॥ लोकोपकारकरणस्तत्प्रसीद शिवप्रिय ॥ ४३ ॥
ततस्तृतीये दिवसे वृक्षे तस्मिन्वृषध्वजम् ॥ समभ्यर्च्य विधानेन द्विजं संभोज्य दापयेत् ॥ ४४ ॥ एवं कृतव्रता नारी वैधव्यं नाप्नुया
त्क्वचित् ॥ पुत्रपौत्रादि सहिता भर्तुश्च स्यात्सुवल्लभा ॥ ४५ ॥ ऊर्ज्जकृष्णत्रयोदश्यामेकभक्तः समाहितः ॥ प्रदोषे तैलदीपं तु प्रज्वाल्याभ्यर्च्य
यत्नतः ॥४६॥ गृहद्वारे बहिर्दद्याद्यमो मे प्रीयतामिति ॥ एवं कृते तु विप्रेंद्र यमपीडा न जायते ॥४७॥ ऊर्ज्जशुक्लत्रयोदश्यामेकभोजी द्विजोत्तम॥
पुनः स्नात्वा प्रदोषे तु वाग्यतः सुसमाहितः ॥ ४८ ॥ प्रदीपानां सहस्रेण शतेनाप्यथवा द्विज ॥ प्रदीपयेच्छिवं वापि द्वात्रिंशद्दीपमा
लया ॥ ४९ ॥ घृतेन दीपयेद्दीपान्गंधाद्यैः पूजयेच्छिवम् ॥ फलैर्नानाविधैश्चैव नैवेद्यैरपि नारद ॥ ५० ॥ ततः स्तुवीत देवेशं शिवं नाम्नां
शतेन च ॥ तानि नामानि कीर्त्यंते सर्वाभीष्टप्रदानि वै ॥ ५१ ॥ नमो रुद्राय भीमाय नीलकंठाय वेधसे ॥ कपर्द्दिने सुरेशाय व्योमकेशाय
वै नमः ॥ ५२ ॥ वृषध्वजाय सोमाय सोमनाथाय वै नमः ॥ दिगंबराय भृंगाय उमाकांताय वर्द्धिने ॥ ५३ ॥ तपोमयाय व्याप्ताय शिपि
विष्टाय वै नमः ॥ व्यालप्रियाय व्यालाय व्यालानां पतये नमः ॥ ५४ ॥ महीधराय व्योमाय पशूनां पतये नमः ॥ ५६ ॥ त्रिपुरघ्नाय सिंहाय
शार्दूलायार्षभाय च ॥ ५५ ॥ मिताय मितनाथाय सिद्धाय परमेष्ठिने ॥ वेदगीताय गुप्ताय वेदगुह्याय वै नमः ॥ ५६ ॥ दीर्घाय दीर्घ
रूपाय दीर्घार्थाय महीयसे ॥ नमो जगत्प्रतिष्ठाय व्योमरूपाय वै नमः ॥ ५७ ॥ कल्याणाय विशिष्टाय शिष्टाय परमात्मने ॥ गजकृत्ति
धरायाथ अंधकासुरभेदिने ॥ ५८ ॥ नीललोहितशुक्लाय चडमुंडप्रियाय च ॥ भक्तिप्रियाय देवाय यज्ञांतायाव्ययाय च ॥ ५९ ॥ महेशाय
नमस्तुभ्यं महादेवहराय च ॥ त्रिनेत्राय त्रिवेदाय वेदांगाय नमो नमः ॥ ६० ॥ अर्थायार्थस्वरूपाय परमाथाय वै नमः ॥ विश्वरूपाय विश्वाय
विश्वनाथाय वै नमः ॥ ६१ ॥ शंकराय च कालाय कालावयवरूपिणे ॥ अरूपाय विरूपाय सूक्ष्मसूक्ष्माय वै नमः ॥ ६२ ॥ श्मशानवासिने
तुभ्यं नमस्ते कृत्तिवाससे ॥ शशांकशेखरायाथ रुद्रभूमिश्रिताय च ॥ ६३ ॥ दुर्गाय दुर्गपाराय दुर्गावयवसाक्षिणे ॥ लिंगरूपाय लिंगाय लिंगान,

पतये नमः ॥ ६४ ॥ नमः प्रभावरूपाय प्रभावार्थाय वै नमः ॥ ६५ ॥ नमोनमः कारणकारणाय ते मृत्युंजयायात्मभवस्वरूपिणे ॥ त्रियंबकाय
शितिकंठभार्गिणे गौरीयुजे मंगलहेतवे नमः ॥ ६६ ॥ नाम्नां शतमिदं विप्र पिनाकिगुणकीर्तनम् ॥ पठित्वा दक्षिणीकृत्य प्रायान्निजनिकेतनम् ॥
॥ ६७ ॥ एवं कृत्वा व्रतं विप्र महादेवप्रसादतः ॥ भुक्त्वेह भोगानखिलानंते शिवपदं लभेत् ॥ ६८ ॥ मार्गशुक्लत्रयोदश्यां योऽनंगं विधिना
यजेत् ॥ त्रिकालमेककालं वा शिवसंगमसंभवम् ॥ ६९ ॥ गन्धाद्यैरुपचारैस्तु पूजयित्वा विधानतः ॥ घटे मंगलपट्टे वा भोजयेद्द्विजदंपती
॥ ७० ॥ ततश्च दक्षिणां दत्वा स्वयमेकाशनं चरेत् ॥ एवं कृते तु विधिवद्व्रती सौभाग्यभाजनः ॥ जायते भुवि विप्रेन्द्र महादेवप्रसादतः॥७१॥
पौषशुक्लत्रयोदश्यां समभ्यर्च्याच्युतं हरिम् ॥घृतपात्रं द्विजेन्द्राय प्रदद्यात्सर्वसिद्धये ॥ ७२॥ माघशुक्लत्रयोदश्यां समारभ्य दिनत्रयम्॥माघस्नानव्रतं
विप्र नानाकामफलावहम् ॥ ७३ ॥ प्रयागे माघमासे तु त्र्यहं स्नातस्य यत्फलम् ॥ नाश्वमेधसहस्रेण तत्फलं लभते भुवि॥ ७४॥ तत्र स्नानं जपो
होमो दानं चानंत्यमश्नुते ॥ फाल्गुने तु सिते पक्षे त्रयोदश्यामुपोषितः ॥ ७५ ॥ नमस्कृत्य जगन्नाथं प्रारंभे धनदव्रतम् ॥ महाराजं यक्षपतिं
गंधाद्यैरुपचारकैः ॥ ७६ ॥ लिखितं वर्णकैः पट्टे पूजयेद्भक्तिभावतः ॥ एवं शुक्लत्रयोदश्यां प्रतिमासं द्विजोत्तम ॥७७॥संपूजयेत्सोपवासश्चैकभुक्तो
भवेन्नरः॥ततो व्रतांते तु पुनः सौवर्णं धननायकम्॥७८॥विधाय निधिभिः सार्द्धं सौवर्णाभिर्द्विजोत्तम॥उपचारैः षोडशभिः स्नानैः पंचामृतादिभिः
॥७९ ॥ नैवेद्यैर्विविधैर्भक्त्या पूजयेत्तु समाहितः ॥ ततो धेनुमलंकृत्य वस्त्रस्रग्गंधभूषणैः ॥ ८० ॥ सवत्सां दापयेद्विप्र सम्यग्वेदविदे शुभाम् ॥
संभोज्य विप्रान्मिष्टान्नैर्द्वादशाथ त्रयोदश ॥ ८१ ॥ गुरुं समर्च्य वस्त्राद्यैः प्रतिमां तां निवेदयेत्॥द्विजेभ्यो दक्षिणां शक्त्या दत्वा नत्वा विसृज्य च
॥ ८२ ॥ स्वयं भुंजीत मतिमानिष्टैः सह समाहितः॥ एवं कृते व्रते विप्र निर्धनः प्राप्य वैभवम् ॥ ८३ ॥ मोदते भुवि विख्यातो राजराज इवापरः
॥ ८४ ॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने द्वादशमासस्थितत्रयोदशीव्रतकथनं नाम द्वाविंशदधिकशततमोऽध्यायः॥ १२२॥ सनातन
उवाच॥शृणु नारद वक्ष्यामि चतुर्दश्या व्रतानि ते ॥ यानि कृत्वा नरो लोके सर्वान्कामानवाप्नुयात्॥ १॥ चैत्रशुक्लचतुर्दश्यां कुंकुमागरुचन्दनैः ॥
गन्धाद्यैर्वस्त्रमणिभिः कार्यार्चा महती शिवे ॥ २॥ वितानध्वजछत्राणि दत्वा पूज्याश्च मातरः ॥ एवं कृत्वार्चनं विप्र सोपवासोऽथवैकभुक् ॥३ ॥
अश्वमेधाधिकं पुण्यं लभते मानवो भुवि ॥ अत्रैव दमनार्चां च कारयेद्गंधपुष्पकैः ॥ ४ ॥ समर्पयेत्सुपूर्णायां शिवाय शिवरूपिणे ॥ राधकृष्णच
तुर्दश्यां सोपवासो निशागमे ॥ ५ ॥ लिंगमभ्यर्चयेच्चैवं स्नात्वा धौतांबरः सुधीः ॥ गंधाद्यैरुपचारैश्च बिल्वपत्रैश्च सर्वतः ॥ ६ ॥ दत्वा
मंत्रं द्विजाग्र्याय भुंजीत च परेऽहनि ॥ एवमेव तु कृष्णासु सर्वासु द्विजसत्तम ॥ ७ ॥ शिवव्रतं प्रकर्तव्यं धनसंतानमिच्छता ॥ राधशुक्लत्र

तुर्दश्यां श्रीनृसिंहव्रतं चरेत् ॥ ८ ॥ उपवासविधानेन शक्तोऽशक्तस्तथैकभुक् ॥ निशागमे तु संपूज्य नृसिंहं दैत्यसूदनम् ॥ ९ ॥ उपचारैः
पोडशभिः स्नानैः पंचामृतादिभिः ॥ ततः क्षमापयेद्देवं मन्त्रेणानेन नारद ॥ १० ॥ तप्तहाटककेशांत ज्वलत्पावकलोचन ॥ वज्राधिकनखस्पर्श
दिव्यसिंह नमोऽस्तु त ॥ ११ ॥ इति संप्रार्थ्य देवेशं व्रती स्यात्स्थंडिलेशयः ॥ जितेंद्रियो जितक्रोधः सर्वभोगविवर्ज्जितः ॥ १२ ॥
एवं यः कुरुते विप्र विधिवद्व्रतमुत्तमम् ॥ वर्षे वर्षे स लभते भुक्तभोगो हरेः पदम् ॥ १३ ॥ ॐकारेश्वरयात्रा च कार्यात्रैव मुनीश्वर ॥
दुर्लभं वार्चनं तत्र दर्शनं पापनाशनम् ॥ १४॥ किमत्र बहुनोक्तेन पूजाध्यानजपेक्षणम् ॥यद्भवेत्तत्समुद्दिष्टं ज्ञानमोक्षप्रदं नृणाम्॥१५॥अत्र लिंगव्रतं
चापि कर्त्तव्यं पापनाशनम् ॥ पंचामृतैस्तु संस्नाप्य लिंगमालिप्य कुंकुमैः ॥ १६ ॥ नैवेद्यैश्च फलैर्धूपैर्दीपैर्वस्त्रविभूषणैः ॥ एवं यः पूजयेत्पैष्टं लिंगं
सर्वार्थसिद्धिदम् ॥ १७ ॥ भुक्तिं मुक्तिं स लभते महादेवप्रसादतः ॥ ज्येष्ठशुक्लचतुर्दश्यां दिवा पंचतपा निशः ॥१८॥सुखे ददेद्धेमधेनुं रुद्रव्रतमिदं
स्मृतम् ॥ शुचिशुक्लचतुर्दश्यां शिवं संपूज्य मानवः ॥ १९ ॥ देशकालोद्भवैः पुष्पैः सर्वसंपदमाप्नुयात् ॥नभःशुक्लचतुर्दश्यां पवित्रारोपणं मतम्॥
॥२० ॥ तत्स्वशाखोक्तविधिना कर्तव्यं द्विजसत्तम ॥ शताभिमंत्रितं कृत्वा ततो देव्यै निवेदयेत् ॥२१॥ पवित्रारोपणं कृत्वा नरो नार्यथवा यदि ॥
महादेव्याः प्रसादेन भुक्तिं मुक्तिमवाप्नुयात ॥ २२ ॥ भाद्रशुक्लचतुर्दश्यामनन्तव्रतमुत्तमम् ॥ कर्त्तव्यमेकभुक्तं हि गोधूमप्रस्थपिष्टकम् ॥ २३ ॥
विपाच्य शर्कराज्याक्तमनंताय निवेदयेत् ॥ गन्धाद्यैः प्राक् समभ्यर्च्य कार्पासं पट्टजं तु वा ॥ २४ ॥ चतुर्दशग्रंथियुतं सूत्रं कृत्वा सुशोभनम् ॥
ततः पुराणमुत्तार्य सूत्रं क्षिप्त्वा जलाशये ॥ २५ ॥ निबध्नीयान्नवं नारी वामे दक्षे पुमान्भुजे ॥ विपाच्य पिष्टपक्वं तत्प्रदद्याद्दक्षिणान्वितम् ॥ २६॥
स्वयं च तन्मितं चाद्यादेवं कुर्याद्व्रतोत्तमम् ॥ द्विसप्तवर्षपर्यंतं तत उद्यापयेत्सुधीः ॥ २७ ॥ मंडलं सर्वतोभद्रं धान्यवर्णैः प्रकल्प्य च॥सुशोभने न्यसेत्तत्र
कलशं ताम्रजं मुने ॥ २८॥ तस्योपरि न्यसेद्धैमीमनंतप्रतिमां शुभाम् ॥ पीतपट्टांशुकाच्छन्नां तत्र तां विधिना यजेत् ॥२९ ॥ गणेशं मातृकाः
खेटाँल्लोकपांश्च यजेत्पृथक् ॥ ततो होमं हविष्येण कृत्वा पूर्णाहुतिं चरेत् ॥ ३० ॥ शय्यां सोपस्करां धेनुं प्रतिमां च द्विजोत्तम ॥ प्रदद्याद्गुरवे
भक्त्या द्विजानन्यांश्चतुर्दश ॥ ३१ ॥ संभोज्य मिष्टपक्वान्नैर्दक्षिणाभिः प्रतोषयेत् ॥ एवं यः कुरुतेऽनंतव्रतं प्रत्यक्षमादरात् ॥ ३२ ॥
सोऽप्यनंतप्रसादेन जायते भुक्तिमुक्तिभाक् ॥ कदलीव्रतमप्यत्र तद्विधानं च मे शृणु ॥ ३३ ॥ नरो वा यदि वा नारी रंभामुपवनस्थिताम् ॥
स्नात्वा संपूजयद्गंधपुष्पधान्यांकुरादिभिः ॥ ३४ ॥ दधिदूर्वाक्षतैर्दीपैर्वस्त्रपक्वान्नसंचयैः ॥ एवं संपूज्य मंत्रेण ततः संप्रार्थयेद्व्रती ॥ ३५ ॥ अप्सरो

मरकन्याभिर्नागकन्याभिरार्चिते ॥ शरीरारोग्यलावण्यं देहि देवि नमोऽस्तु ते॥३६ ॥ इति संप्रार्थ्य कन्यास्तु चतस्रो वा सुवासिनीः ॥ संभोज्यांशुकसिंदूरकज्जलालक्तचर्चिताः ॥ ३७ ॥ नमस्कृत्य निजं गेहं समाप्य नियमं व्रजेत् ॥ एवं कृते व्रते विप्र लब्ध्वा सौभाग्यमुत्तमम् ॥ ३८ ॥ इह लोके विमानेन स्वर्गलोके व्रजेत्परम् ॥ इषकृष्णचतुर्दश्यां विषशस्त्रांबुवह्निभिः ॥ ३९ ॥ सर्पश्वापदवज्राद्यैर्हतानां ब्रह्मघातिनाम् ॥ चतुर्दश्यां क्रियाश्राद्धमेकोद्दिष्टविधानतः ॥ ४० ॥ कर्तव्यं विप्रवर्गं च भोजयेन्मिष्टपक्ककैः ॥ तर्पणं च गवां ग्रासं बलिं चैव श्वकाकयोः ॥ ४१ ॥ कृत्वाचम्य स्वयं पश्चाद्भुंजीयाद्बंधुभिः सह ॥ एवं यः कुरुते विप्र श्राद्धं संपन्नदक्षिणम् ॥ ४२ ॥ स उद्धृत्य पितॄन्गच्छेद्देवलोकं सनातनम् ॥ इषशुक्लचतुर्दश्यां धर्मराजं द्विजोत्तम ॥ ४३ ॥ गंधाद्यैः सम्यगभ्यर्च्य सौवर्णं भोज्य वाडवम् ॥ दद्यात्तस्मै धर्मराजस्त्रायते भुवि नारद ॥ ४४ ॥ एवं यः कुरुते धर्मप्रतिमादानमुत्तमम् ॥ स भुक्त्वेह वरान्भोगान्दिवं धर्माज्ञया व्रजेत् ॥ ४५ ॥ऊर्ज्जकृष्णचतुर्दश्यां तैलाभ्यंगं विधूदये ॥ कृत्वा स्नात्वार्चयेद्धर्मं नरकादभयं लभेत् ॥ ४६ ॥ प्रदोषे तैलदीपांस्तु दीपयेद्यमतुष्टये ॥ चतुष्पथे गृहाद्बाह्यप्रदेशे वा समाहितः ॥ ४७ ॥ वत्सरे हेमलंब्याख्ये मासि श्रीमति कार्तिके ॥ शुक्लपक्षे चतुर्दश्यामरुणाभ्युदयं प्रति ॥ ४८ ॥ स्नात्वा विश्वेश्वरो देवो देवैः सह मुनीश्वर ॥ मणिकर्णिकतीर्थे च त्रिपुंड्रं भस्मना दधत् ॥ ४९ ॥ स्वात्मानं स्वयमभ्यर्च्य चक्रे पाशुपतव्रतम् ॥ ततस्तत्र महापूजां लिंगे गन्धादिभिश्चरेत् ॥ ५० ॥ द्रोणपुष्पैर्बिल्वदलैरर्कपुष्पैश्च केतकैः ॥ पुष्पैः फलैर्मिष्टपक्कैर्नैवेद्यैर्विविधैरपि ॥ ५१ ॥ एवं कृत्वैकभुक्तं तु व्रतं विश्वेशतोषणम् ॥ लभते वांछितान्कामानिहामुत्र च नारद ॥ ५२ ॥ ब्रह्मकूर्चव्रतं चात्र कर्तव्यमृद्धिमिच्छता ॥ सोपवासः पञ्चगव्यं पिबेद्रात्रौ जितेंद्रियः ॥ ५३ ॥ कपिलायास्तु गोमूत्रं कृष्णाया गोमयं तथा ॥ श्वेतायाः क्षीरमुदितं रक्तायाश्च तथा दधि ॥ ५४ ॥ गृहीत्वा कर्बुरायाश्च घृतमेकत्र मेलयेत् ॥ कुशांबुना ततः प्रातः स्नात्वा सन्तर्प्य देवताः ॥ ५५ ॥ ब्राह्मणांस्तोषयित्वा च भुञ्जीयाद्वाग्यतः स्वयम् ॥ ब्रह्मकूर्चव्रतं ह्येतत्सर्वपातकनाशनम् ॥ ५६ ॥ यच्च बाल्ये कृतं पापं कौमारे वार्द्धकेऽपि यत् ॥ब्रह्मकूर्चोपवासेन तत्क्षणादेव नश्यति ॥ ५७ ॥पाषाणव्रतमप्यत्र प्रोक्तं तच्छृणु नारद॥ सोपवासो दिवा नक्तं पाषाणाकारपिष्टकम् ॥ ५८ ॥ प्राच्र्य गन्धादिभिर्गौरीं घृतपक्कमुपाहरेत् ॥ व्रतमेतच्चारित्वा तु यथोक्तं द्विजसत्तम ॥५९ ॥ ऐश्वर्यसौख्यसौभाग्यरूपाणि प्राप्नुयान्नरः ॥ मार्गशुक्लचतुर्दश्यामेकभुक्तः पुरोदितम् ॥ ६० ॥ निराहारो वृषं स्वर्णं प्राच्र्य दद्याद्द्विजातये ॥ परेऽह्नि प्रातरुत्थाय स्नात्वा सोमं महेश्वरम् ॥ ६१ ॥ पूजयेत्कमलैः पुष्पैर्गंधमाल्यानुलेपनैः ॥ द्विजान्सम्भोज्य मिष्टान्नैस्तोषयेद्दक्षिणादिभिः ॥

॥ ६२ ॥ एतच्छिवव्रतं विप्र भुक्तिमुक्तिप्रदायकम् ॥ कर्तॄणामुपदेष्टॄणां साह्यानामनुमोदिनाम् ॥ ६३ ॥ पौषशुक्लचतुर्दश्यां विरूपाक्षव्रतं
स्मृतम् ॥ कपर्दीश्वरसांनिध्यं प्राप्स्याम्यत्र विचिंत्य च ॥ ६४ ॥ स्नात्वागाधजले विप्र विरूपाक्षं शिवं यजेत् ॥ गंधमाल्यनमस्कारधूप
दीपान्नसंपदा ॥ ६५ ॥ तत्स्थं द्विजातये दत्त्वा मोदते दिवि देववत् ॥ माघकृष्णचतुर्द्दश्यां यमतर्पणमीरितम् ॥ ६६ ॥ अनर्काभ्यु
दिते काले स्नात्वा संतर्पयेद्यमम् ॥ द्विसप्तनामभिः प्रोक्तैः सर्वपापविमुक्तये ॥ ६७ ॥ तिलदर्भांबुभिः कार्यं तर्प्पणं द्विजभोजनम् ॥
कृशरान्नं स्वयं चापि तदेवाश्नीत वाग्यतः ॥ ६८ ॥ अंत्यकृष्णचतुर्दश्यां शिवरात्रिव्रतं द्विज ॥ निर्जलं समुपोष्यात्र दिवानक्तं प्रपूजयेत्
॥६९॥ स्वयंभुवादिकं लिंगं पार्थिवं वा समाहितः ॥ गंधाद्यैरुपचारैश्च सांबुबिल्वदलादिभिः ॥ ७० ॥ धूपैर्दीपैश्च नैवेद्यैः स्तोत्रपाठैर्जपादिभिः॥
ततः परेऽह्नि संपूज्य पुनरेवोपचारकैः ॥ ७१॥ संभोज्य विप्रान्मिष्टान्नैर्विसृजेल्लब्धदक्षिणान् ॥ एवं कृत्वा व्रतं मर्त्यो महादेवप्रसादतः ॥७२॥अम
र्त्यभोगान् लभते दैवतैः सुसभाजितः ॥ अंत्यशुक्लचतुर्दश्यां दुर्गां संपूज्य भक्तितः ॥ ७३ ॥ गन्धाद्यैरुपचारैस्तु विप्रान्संभोजयेत्ततः॥एवं कृत्वा
व्रतं विप्र दुर्गायाश्चैकभोजनः ॥ ७४ ॥ लभते वांछितान्कामानिहामुत्र च नारद॥ चैत्रकृष्णचतुर्दश्यामुपवासं विधाय च ॥ ७५ ॥ केदारोदकपानेन
वाजिमेधफलं भवेत् ॥ उद्यापने तु सर्वासां सामान्यो विधिरुच्यते ॥ ७६ ॥ कुंभाश्चतुर्दशैवात्र सपूगाक्षतमोदकाः ॥ सदक्षिणांशुकास्ताम्रा
मृन्मयाश्चाव्रणा नवाः ॥ ७७ ॥ तावंतो वशदंडाश्च पवित्राण्यासनानि च॥पात्राणि यज्ञसूत्राणि तावंत्येव हि कल्पयेत् ॥ ७८ ॥ शेषं प्रागुक्तवत्कु
र्याद्वित्तशाठ्यविवर्जितः ॥ ७९ ॥ इतिश्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थभागे द्वादशमासस्थितचतुर्दशीव्रतवर्णनं नाम त्रयो
विंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥ सनातन उवाच ॥ अथ नारद वक्ष्यामि शृणु पूर्णाव्रतानि ते ॥ यानि कृत्वा नरो नारी
प्राप्नुयात्सुखसंततिम् ॥ १ ॥ चैत्रपूर्णा तु विप्रेंद्र मन्वादिः समुदाहृता ॥ अस्यां सान्नोदकं कुंभं प्रदद्यात्सोमतुष्टये ॥ २ ॥वैशाख्यामपि
पूर्णायां दानं सर्वस्य सर्वदम् ॥ यद्यद्द्रव्यं ददेद्विप्रे तत्तदाप्नोति निश्चितम् ॥ ३ ॥ धर्मराजव्रतं चात्र कथितं तन्निशामय ॥ शृतान्नमुदकुंभं च
वैशाख्यां वै द्विजोत्तमे ॥ ४ ॥ दद्याद्गोदानफलदं धर्मराजस्य तुष्टये ॥ अत्र कृष्णाजिनं दद्यात्सखुरं च सशृङ्गकम् ॥५ ॥ तिलैः सह
समाच्छाद्य वस्त्रैर्हेम्ना द्विजातये ॥ यस्तु कृष्णाजिनं दद्यात्सत्कृत्य विधिपूर्वकम् ॥ ६ ॥ सर्वशास्त्रविदे सप्तद्वीपभूमिप्रदः स वै ॥ मोदते विष्णु
लोके हि यावच्चन्द्रार्कतारकम् ॥ ७ ॥ कुंभान्स्वच्छजलैः पूर्णान्हिरण्येन समन्वितान् ॥ यः प्रदद्याद्द्विजाग्र्येभ्यः स न शोचति कर्हिचित् ॥ ८ ॥

अथ ज्येष्ठस्य पूर्णायां वटसावित्रिकं व्रतम् ॥ सोपवासा वटं सिंचेत्सलिलैरमृतोपमैः ॥ ९ ॥ सूत्रेण वेष्टयेच्चैव सशताष्टप्रदक्षिणम् ॥ ततः
संप्रार्थयेद्देवीं सावित्रीं सुपतिव्रताम् ॥ १० ॥ जगत्पूज्ये जगन्मातः सावित्रि पतिदैवते ॥ पत्या सहावियोगं मे वटस्थे कुरु ते नमः ॥
॥ ११ ॥ इति संप्रार्थ्य या नारी भोजयित्वा परेऽहनि ॥ सुवासिनीः स्वयं भुंज्यात्सा स्यात्सौभाग्यभागिनी ॥ १२ ॥ आषाढस्य तु पूर्णायां
गोपद्मव्रतमुच्यते ॥ चतुर्भुजं महाकायं जांबूनदसमप्रभम् ॥ १३ ॥ शंखचक्रगदापद्मरमागरुडशोभितम् ॥ सेवितं मुनिभिर्देवैर्यक्षगंधर्वकिन्नरैः ॥
॥ १४ ॥ एवंविधं हरिं तत्र स्नात्वा पूजां समाचरेत् ॥ पौरुषेणैव सूक्तेन गंधाद्यैरुपचारकैः ॥ १५ ॥ आचार्यं वस्त्रभूषाद्यैस्तोषयेत्स्निग्धमा
नसः ॥ भोजयेन्मिष्टपक्वान्नैर्द्विजानन्यांश्च शक्तितः ॥ १६ ॥ एवं कृत्वा व्रतं विप्र प्रसादात्कमलापतेः ॥ ऐहिकामुष्मिकान्कामांल्लभते नात्र
संशयः ॥ १७ ॥ कोकिलाव्रतमप्यत्र प्रोक्तं तद्विधिरुच्यते ॥ पूर्णिमायां समारभ्य व्रतं स्नायाद्बहिर्जले ॥ १८ ॥ पूर्णांतं श्रावणे मासि गौरीरूपां
च कोकिलाम् ॥ स्वर्णपक्षां रत्ननेत्रां प्रवालमुखपंकजाम् ॥ १९ ॥ कस्तूरीवर्णसंयुक्तामुत्पन्नां नंदने वने ॥ चूतचंपकवृक्षस्थां कलगी
तनिनादिनीम् ॥ २० ॥ चिंतयेत्पार्वतीं देवीं कोकिलारूपधारिणीम् ॥ गंधाद्यैः प्रत्यहं प्रार्चेल्लिखितां वर्णकैः पटे ॥ २१ ॥ ततो व्रतांते हैमीं वा
तिलपिष्टमयीं द्विज ॥ दद्याद्विप्राय मंत्रेण भक्त्या सस्वर्णदक्षिणाम् ॥ २२ ॥ देवीं चैत्ररथोत्पन्ने कोकिले हरवल्लभे ॥ संपूज्य दत्ता विप्राय सर्व
सौख्यकरी भव ॥ २३ ॥ द्विजं सुवासिनीस्त्रिंशदेकां वा भोजयेत्ततः ॥ वस्त्रादिदक्षिणां शक्त्या दत्वा नत्वा विसर्जयेत् ॥ २४ ॥ एवं या कुरुते
नारी कोकिलाव्रतमुत्तमम् ॥ सा लभेत्सुखसौभाग्यं सप्तजन्मसु नारद ॥ २५ ॥ अथ श्रावणपूर्णायां वेदोपाकरणं स्मृतम् ॥ यजुर्भिस्तत्र कर्तव्यं
देवर्षिपितृतर्पणम् ॥ २६ ॥ ऋषीणां पूजनं चापि स्वशाखोक्तविधानतः ॥ बह्वृचैस्तु चतुर्दश्यां सामगैर्भाद्रगे करे ॥ २७ ॥ रक्षाविधानं च तथा
कर्तव्यं विधिपूर्वकम् ॥ २८ ॥ सिद्धार्थाक्षतराजिकाश्च विधृता रक्तांशुकांशे सिताः कौसुंभेन च तंतुनाथ सलिलैः प्रक्षाल्य कांस्ये धृताः ॥ गंधाद्यैरभि
पूज्य देवनिकरान्संप्रार्थ्य विष्ण्वादिकान्बध्नीयाद्द्विजहस्ततः प्रमुदितो नत्वा प्रकोष्ठे स्वके ॥ २९ ॥ ततस्तु दक्षिणां दत्वा द्विजेभ्योऽध्यायमाचरेत् ॥
विसृज्य च ऋषीन्सप्त धारयेद्ब्रह्मसूत्रकम् ॥ ३० ॥ रंजितं कुंकुमाद्यैश्च नवीनं निर्मितं स्वयम् ॥ शक्त्या संभोज्य विप्राग्र्यानेकभुक्तं समाचरेत्
॥ ३१ ॥ कृते ह्यस्मिन्व्रते विप्र वार्षिकं कर्म वैदिकम् ॥ विस्मृतं विधिहीनं च न कृतं सुकृतं भवेत् ॥ ३२ ॥ प्रौष्ठपद्यां पौर्णमास्यामुमामा
हेश्वरव्रतम् ॥ एकभुक्तश्च यस्तां तु शिवं संपूज्य यत्नतः ॥ ३३ ॥ कृतांजलिः प्रार्थयेच्छ्वः करिष्ये च व्रतं प्रभो ॥ एवं विज्ञाप्य देवं

तु गृह्णीयाद्व्रतमुत्तमम् ॥ ३४ ॥ रात्रौ देवांतिके सुप्त्वा उत्थायापरयामके ॥ कृतमैत्रादिनित्यस्तु भस्मरुद्राक्षधृक् ततः ॥ ३५ ॥
पूजयेच्छंकरं सम्यगुपचारैः पृथग्विधैः ॥ बिल्वपत्रैः सुगंधाढ्यैर्नैवेद्यैर्धूपदीपकैः ॥ ३६ ॥ ततश्चोपवसेद्विद्वानाप्रदोषं विधूदये ॥ पुनः संपूज्य तत्रैव
रात्रौ जागरणं चरेत् ॥३७॥ एवं पंचदशाब्दांतं कृत्वा व्रतमतंद्रितः ॥ वर्षे वर्षे तदुत्सर्गे विदध्याद्विधिपूर्वकम् ॥३८॥ उमायाश्च महेशस्य सौवर्णी
प्रतिमाद्वयम् ॥ हैमा रौप्या मृन्मयाश्च घटाः पंचदशोत्तमाः ॥ ३९ ॥ तत्रैकस्मिन्घटे स्थाप्यं सवस्त्रं प्रतिमाद्वयम् ॥ पंचामृतेन संस्नाप्य जलैः
शुद्धैस्ततोऽर्चयेत् ॥ ४० ॥ उपचारैः षोडशभिस्ततः पंचदश द्विजान् ॥ भोजयेच्चैव मिष्टान्नैर्दद्यात्तेभ्यश्च दक्षिणाम् ॥ ४१ ॥ कुंभमेकैकमीशस्य
मूर्त्याढ्यं गुरवेऽर्पयेत् ॥ एवं कृत्वा व्रतं चैव उमामाहेश्वराभिधम् ॥४२॥ जायते भुवि विख्यातो निधानं सर्वसंपदाम् ॥ अथास्मिन्नेव दिवसे शक्र
व्रतमपि स्मृतम् ॥ ४३॥ प्रातः स्नात्वा विधानेन संपूज्य सुरनायकम् ॥ गंधाद्यैरुपचारैस्तु नैवेद्यानां च राशिभिः ॥ ४४ ॥ ततो निमंत्रितान्विप्रा
न्संभोज्य विधिवद्द्विज ॥ समागतांस्तथैवान्यान्दीनानाथांश्च भोजयेत् ॥ ४५ ॥ एतच्छक्रव्रतं विप्र कर्तव्यं प्रतिवार्षिकम्॥ राज्ञा वा धनिनान्येन
धान्यनिष्पत्तिमिच्छता ॥४६॥ आश्विने मासि पूर्णायां व्रतं कोजागराभिधम्॥तेन स्नात्वा विधानेन सोपवासो जितेंद्रियः ॥४७॥ लक्ष्मीमभ्यर्च्य
सौवर्णी घटे संस्थाप्य ताम्रजे ॥ मृन्मये वा सवस्त्रांतामुपचारैः पृथग्विधम् ॥ ४८ ॥ ततः सायंतने कालेऽभ्युदिते तारकाधिपे ॥ हैमान्रौप्यान्मृन्म
यान्वा घृतपूर्णान्प्रदीपयेत् ॥ ४९ ॥ लक्षं तदर्धमयुतं सहस्रं शतमेव वा ॥ घृतशर्करसंमिश्रं विपाच्य बहु पायसम् ॥ ५० ॥ बहुपात्रेषु
संस्थाप्य कौमुद्यां शीतदीधितेः ॥ याममात्रे गते रात्र्या लक्ष्म्यै तद्विनिवेदयेत् ॥ ५१ ॥ ततः संभोजयेत्तेन विप्रान्भक्त्या ततश्च तैः ॥ सहैव जागरं
कुर्य्यान्नृत्यगीतसुमंगलैः ॥ ५२ ॥ ततोऽरुणोदये स्नात्वा तां मूर्तिं गुरवेऽर्पयेत् ॥ अस्यां रात्रौ महालक्ष्मीर्वराभयकरांबुजा॥५३ ॥ निशीथे चरते
लोके को जागर्ति धरातले ॥ तस्मै वित्तं प्रयच्छामि जाग्रते पूजकाय मे ॥ ५४ ॥ वर्षे वर्षे कृतं चैतद्व्रतं लक्ष्मीप्रतोषणम् ॥ समृद्धिमैहिकीं दद्या
द्देहान्ते पारलौकिकीम् ॥५५ ॥ कार्तिक्यां पूर्णिमायां तु कुर्यात्कार्तिकदर्शनम् ॥ विप्रत्वलब्धये भूयः सर्वशत्रुजयाय च ॥ ५६॥ अत्रैव दीपदानेन
विधेयस्त्रिपुरोत्सवः ॥ निशामुखे द्विजश्रेष्ठ सर्वजीवसुखावहः ॥ ५७ ॥ कीटाः पतंगा मशकाश्च वृक्षा जले स्थले ये विचरंति जीवाः ॥ दृष्ट्वा प्रदीपा
न्नहि तेऽपि जन्मिनः पुनश्च मुक्तिं हि लभंत एव च ॥ ५८ ॥ अत्र चन्द्रोदये विप्र संपूज्याः कृत्तिकाश्च षट्॥ ५९ ॥ कार्तिकेयस्तथा खड्गी वरुणश्च
हुताशनः ॥ गन्धपुष्पैस्तथा धूपदीपैर्नैवेद्यविस्तरैः ॥ ६० ॥ परमान्नैः फलैः शाकैर्वह्निब्राह्मणतर्पणैः ॥ एवं देवान्समभ्यर्च्य दीपो देयो गृहाद्ब

हिः ॥६१॥दीपोपांते तथा गर्तश्चतुरस्रो मनोहरः ॥ चतुर्द्दशांगुलः कार्यः सेच्यश्चंदनवारिणा ॥ ६२ ॥ गवां क्षीरेण संपूर्य हैमं तत्र विनिक्षिपेत् ॥
मुक्तानेत्रसमायुक्तं मत्स्यं सर्वांगशोभनम् ॥ ६३ ॥ महामत्स्याय च नम इति मंत्रं समुच्चरन् ॥ गन्धाद्यैस्तत्र संपूज्य द्विजाय प्रतिपादयेत् ॥६४॥
क्षीरसागरदानं ते मयोक्तं द्विजसत्तम॥दानस्यास्य प्रभावेण मोदते हरिसन्निधौ॥६५॥अत्र कृत्वा वृषोत्सर्गं व्रतं नक्तं च नारद॥रुद्रलोकमवाप्नोति नात्र
कार्या विचारणा॥६६॥मार्गशीर्ष्यां पूर्णिमायां स्वर्णाढ्यं लवणाढकम्॥देयं विप्राय शांताय सर्वकामसमृद्धये॥६७॥ इदं जगत्पुरा लक्ष्म्या त्यक्तमासीत्ततो
हरिः ॥ पुरंदरश्च सोमश्च तथा तिष्यो बृहस्पतिः ॥६८॥पंचैते पुष्ययुक्तायां पौर्णमास्यां जगद्बलात्॥अलंकृतं पुनश्चक्रुः सौभाग्योत्सवकेलिभिः॥६९॥
तस्मान्नरः पुष्ययोगे सर्वसौभाग्यवृद्धये ॥ गौरसर्षपकल्केन समालभ्य स्वकां तनुम् ॥७०॥ स्नायात्सर्वौषधिजलैर्धारयेच्च नवांशुके ॥ दृष्ट्वा च मंगलं
द्रव्यं स्पृष्ट्वा नत्वा ततोऽर्चयेत् ॥ ७१ ॥ हरिशक्रेंदुपुष्येज्यान्गंधाद्यैरुपचारकैः ॥ विधाय होमं विप्रांश्च तर्पयेत्पायसाशनैः ॥ ७२ ॥ एतत्कृत्वा
व्रतं विप्र रमाप्रीतिविवर्द्धनम् ॥ अलक्ष्मीनाशनं चैव मोदतेह परत्र च ॥ ७३ ॥ पौर्णमास्यां ततो माघ्यां तिलकार्पासकंबलम् ॥ रत्नानि कंचुको
ष्णीषपादत्राणानि वा धनम् ॥७४॥ दत्वा प्रमोदते स्वर्गे दानं वित्तानुसारतः ॥यस्त्वत्र शंकरं देवं पूजयेद्विधिपूर्वकम् ॥७५॥सोऽश्वमेधफलं प्राप्य
विष्णुलोके महीयते ॥ फाल्गुने पूर्णिमायां तु होलिकापूजनं मतम् ॥ ७६ ॥ संचयं सर्वकाष्ठानामुपलानां च कारयेत् ॥ तत्राग्निं विधिवद्धुत्वा
रक्षोघ्नैर्मंत्रविस्तरैः॥७७॥"असृक्पाभयसंत्रस्तैः कृता त्वं होलि बालिशैः ॥ अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भव"॥७८॥ इति मंत्रेण सन्दीप्य
काष्ठादिक्षेपणैस्ततः ॥ परिक्रम्योत्सवः कार्य्यो गीतवादित्रनिःस्वनैः ॥७९॥ होलिका राक्षसी चेयं प्रह्लादभयदायिनी ॥ ततस्तां प्रदहंत्येवं काष्ठा
द्यैर्गीतमंगलैः ॥ ८० ॥ संवत्सरस्य दाहोऽयं कामदाहो मतांतरे ॥ इति जानीहि विप्रेंद्र लोके स्थितिरनेकधा ॥८१॥ पक्षांते द्वे पृथग्दैवे ततोऽमा
व्रतमुच्यते ॥ पृथक्छृणुष्व मे विप्र पितॄणामतिवल्लभम् ॥ ८२ ॥ चैत्रवैशाखयोस्तत्र दर्शे पितृसमर्चनम् ॥ पार्वणेन विधानेन श्राद्धं वित्तानुसारतः
॥ ८३ ॥ द्विजानां भोजनं दानं गवादीनां विशेषतः ॥ सर्वमासेष्वमायां वै बहुपुण्यप्रदं यतः ॥ ८४ ॥ ज्येष्ठामायां व्रतं प्रोक्तं सावि
त्र्याः कस्य नारद ॥ विधानं ज्येष्ठपूर्णावदिहापि परिकीर्तितम् ॥ ८५ ॥ शुचौ नभसि भाद्रे च मासे पूर्णांतिके द्विज ॥ पितृश्राद्धं दान
होमसुरार्चानंत्यमश्नुते ॥ ८६ ॥ भाद्रदर्शेऽपराह्णे तु तिलक्षेत्रसमुद्भवान् ॥ विरिंचिमनुनामंत्र्य हुंफट् छिन्नान्कुशान् द्विज ॥ ८७॥ सर्वदा सर्वका
र्येषु योजयेदेकदाऽपरान् ॥ इषामायां विशेषेण पितॄणां श्राद्धतर्पणम् ॥ ८८ ॥ विधेयं जाह्नवीतोये मुक्तिदं च गयास्थले॥ऊर्ज्जामायां दीपदानं देवा

गारगृहेषु च ॥ ८९ ॥ नद्यारामतडागेषु चैत्यगोष्ठापणेषु च ॥ समर्चनं तथा लक्ष्म्याः स्वर्णरौप्ये कृताकृते ॥ ९० ॥ द्यूतं च वर्षफलदं जये चापि
पराजये ॥ गवां पूजात्र विहिता शृंगाद्यंगानुरंजनैः ॥ ९१ ॥ यवसान्नादिदानैश्च नमस्कारप्रदक्षिणैः ॥ मार्गेऽपि पितृपूजा स्याच्छ्राद्धैर्ब्राह्मणभोजनैः ॥
॥९२॥ब्रह्मचर्यादिनियमैर्जपहोमार्चनादिभिः ॥ पौषे माघे च विप्रेन्द्र पितृश्राद्धं फलाधिकम् ॥९३॥अमायां कर्णपातार्कयुक्तायां तु गयाधिकम् ॥
फाल्गुने केवलं श्राद्धं द्विजानां भोजनं तथा ॥ ९४ ॥ दानादि सर्वफलदं दर्शे सोमेऽधिकं फलम् ॥ इत्थं संक्षेपतः प्रोक्तं तिथिकृत्यं मुने तव
॥९५॥ सर्वत्रापि विशेषोऽस्ति स पुराणांतरे स्थितः ॥९६॥इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे द्वादशमासस्थितपौर्णमास्य
मावास्याव्रतकथनं नाम चतुर्विंशत्यधिकशततमोऽध्यायः ॥ १२४॥सूत उवाच॥इत्येवमुक्ता मुनिना हि पृष्टास्ते वै कुमाराः किल नारदेन॥संपूजिताः
शास्त्रविदां वरिष्ठाः कृताह्निका जग्मुरुमेशलोकम् ॥ १ ॥ तत्रेशमभ्यर्कनिभैर्मुनींद्रैः श्रीवामदेवादिभिरर्चितांघ्रिम् ॥ सुरासुरेन्द्रैरभिवंद्यमुग्रं
नत्वाज्ञया तस्य निषेदुरुर्व्याम् ॥ २ ॥ श्रुत्वाथ तत्राखिलशास्त्रसारं शिवागमं ते पशुपाशमोक्षणम् ॥ जग्मुस्ततो ज्ञानघनस्वरूपा नत्वा
पुरारिं स्वपितुर्निकाशम् ॥ ३ ॥ तत्पादपद्मे प्रणतिं विधाय पित्रापि सत्कृत्य सभाजितास्ते ॥ लब्ध्वाशिषोऽद्यापि चरन्ति शश्वल्लोकेषु
तीर्थानि च तीर्थभूताः ॥ ४ ॥ जग्मुस्ततो वै बदरीवनान्ते सुरेन्द्रवर्गैरुपसेव्यमानम् ॥ दध्युश्चिरं विष्णुपदाब्जमव्ययं ध्यायन्ति यद्यतयो वीत
रागाः ॥ ५ ॥ नारदोऽपि ततो विप्रा कुमारेभ्यः समीहितम्॥ लब्ध्वा ज्ञानं सविज्ञानं भृशं प्रीतमना ह्यभूत्॥६॥स तस्मात्स्वर्णदीतीरादागत्य पितु
रन्तिके ॥ प्रणम्य सत्कृतः पित्रा ब्रह्मणा निषसाद च ॥ ७ ॥ कुमारेभ्यः श्रुतं यच्च ज्ञानं विज्ञानसंयुतम् ॥ वर्णयामास तत्त्वेन सोऽपि श्रुत्वा मुमोद
च ॥ ८ ॥ अथ प्रणम्य शिरसा लब्धाशीर्मुनिसत्तमः ॥ आजगाम च कैलासं मुनिसिद्धनिषेवितम् ॥ ९ ॥ नानाश्चर्यमयं शश्वत्सर्वर्त्तुकुसुमद्रुमैः॥
मंदारैः पारिजातैश्च चंपकाशोकवंजुलैः ॥ १० ॥ अन्यैश्च विविधैर्वृक्षैर्नानापक्षिगणावृतैः ॥ वातोद्धूतशिखैः पांथानाह्वयद्भिरिवावृतम् ॥ ११ ॥ नाना
मृगगणाकीर्णं सिद्धकिन्नरसंकुलम् ॥ सरोभिः स्वच्छसलिलैर्लसत्कांचनपंकजैः ॥ १२ ॥ शोभितं सारसैर्हंसैश्चक्राह्वाद्यैर्निनादितम् ॥ स्वर्द्धुनीपातनि
र्घुष्टं क्रीडद्भिश्चाप्सरोगणैः ॥ १३ ॥ सलिलेऽलकनंदायाः कुचकुंकुमपिंगले ॥ आमोदमुदितैर्नागैः सलिलैः पुष्करोद्धृतैः॥ १४॥ स्नापयद्भिः करे
णूश्च कलभांश्च समाकुले ॥ अथ श्वेताभ्रसदृशे शृंगे तस्य च भूभृतः ॥ १५ ॥ वटं कालाभ्रसदृशं ददर्श शतयोजनम् ॥ तस्याधस्तात्समासीनं
योगिमण्डलमध्यगम् ॥ १६ ॥ कपर्दिनं विरूपाक्ष व्याघ्रचर्मांबरावृतम् ॥ भूतिभूषितसर्वांगं नागभूषणभूषितम् ॥ १७ ॥ रुद्राक्षमालया शश्वच्छोभितं

चंद्रशेखरम् ॥ तं दृष्ट्वा नारदो विप्रा भक्तिनम्रात्मकंधरः ॥ १८ ॥ननाम शिरसा तस्य पादयोर्जगदीशितुः ॥ततः प्रसन्नमनसा स्तुत्वा वाग्भिर्वृषध्व
जम्॥१९॥निषसादाज्ञया स्थाणोः सत्कृतो योगिभिस्तदा॥अथापृच्छच्च कुशलं नारदं जगतां गुरुः॥२०॥स च प्राह प्रसादेन भवतः सर्वमस्ति मे॥सर्वेषां
योगिवर्याणां शृण्वतां तत्र वाडवाः॥२१॥पप्रच्छ शांभवं ज्ञानं पशुपाशविमोक्षणम्॥स शिवः सादरं तस्य भक्त्या संतुष्टमानसः॥२२॥योगमष्टांगसंयुक्तं
प्राह प्रणतवत्सलः॥ स लब्ध्वा शांभवं ज्ञानं शंकराल्लोकशंकरात् ॥२३॥ सुप्रसन्नमना नत्वा ययौ नारायणांतिकम् ॥ तत्रापि नारदोऽभीक्ष्णं गतागतप
रायणः ॥२४॥ सेवितं योगिभिः सिद्धैर्नारायणमतोषयत् ॥ एतद्वः कीर्तितं विप्रा नारदीयं महन्मया॥२५॥ उपाख्यानं वेदसमं सर्वशास्त्रनिदर्शनम् ॥
चतुष्पादसमायुक्तं शृण्वतां ज्ञानवर्द्धनम् ॥२६॥ य एतत्कीर्तयेद्विप्रा नारदीयं शिवालये ॥ समाजे द्विजमुख्यानां तथा केशवमंदिरे ॥२७॥ मथुरायां
प्रयागे च पुरुषोत्तमसन्निधौ ॥ सेतौ काञ्च्यां कुशस्थल्यां गंगाद्वारे कुशस्थले ॥ २८ ॥ पुष्करेषु नदीतीरे यत्र कुत्रापि भक्तिमान् ॥ स लभेत्सर्वय
ज्ञानां तीर्थानां च फलं महत् ॥२९॥ दानानां चापि सर्वेषां तपसां वाप्यशेषतः ॥ उपवासपरो वापि हविष्याशी जितेंद्रियः ॥३०॥ श्रोता चैव तथा
वक्ता नारायणपरायणः ॥ शिवभक्तिरतो वापि शृण्वन् सिद्धिमवाप्नुयात् ॥ ३१ ॥ अस्मिन्नशेषपुण्यानां सिद्धीनां च समुद्भवः॥ कथितः सर्वपापघ्नः
पठतां शृण्वतां सदा ॥३२॥ कलिदोषहरं पुंसां सर्वसंपत्तिवर्द्धनम् ॥, सर्वेषामीप्सितं चेदं सर्वज्ञानप्रकाशकम् ॥३३॥ शैवानां वैष्णवानां च शाक्ताना
सूर्यसेविनाम् ॥ तथैव गाणपत्यानां वर्णाश्रमवतां द्विजाः ॥३४ ॥ तपसां च व्रतानां च फलानां संप्रकाशकम् ॥ मंत्राणां चैव यंत्राणां वेदांगानां
विभागशः॥३५॥ तथागमानां सांख्यानां वेदानां चैव संग्रहम् ॥ य एतत्पठते भक्त्या शृणुयाद्वा समाहितः॥३६॥ स लभेद्वांछितान्कामान्देवादिष्वपि
दुर्लभान् ॥ श्रुत्वेदं नारदीयं तु पुराणं वेदसंमितम्॥३७॥वाचकं पूजयेद्भक्त्या धनरत्नांशुकादिभिः॥ भूमिदानैर्गवां दानै रत्नदानैश्च संततम् ॥ ३८ ॥
हस्त्यश्वरथदानैश्च प्रीणयेत्सततं गुरुम् ॥ यस्तु व्याकुरुते विप्राः पुराणं धर्मसंग्रहम् ॥ ३९ ॥ चतुर्वर्गप्रदं नृणां कोऽन्यस्तत्सदृशो गुरुः ॥ कायेन
मनसा वाचा धनाद्यैरपि संततम् ॥४०॥ प्रियं समाचरेत्तस्य गुरोर्द्धर्मोपदेशिनः॥श्रुत्वा पुराणं विधिवद्धोमं कृत्वा सुरार्चनम्॥४१॥ब्राह्मणान्भोजये
त्पश्चाच्छतं मिष्टान्नपायसैः ॥ दक्षिणां प्रदद्देच्छक्त्या भक्त्या प्रीयेत माधवः ॥४२॥ यथा श्रेष्ठा नदी गंगा पुष्करं च सरो यथा ॥ काशी पुरी नगो
मेरुर्देवो नारायणो हरिः ॥ ४३ ॥ कृतं युगं सामवेदो धेनुर्विप्रोऽन्नमंबु च ॥ मार्गो मृगेंद्रः पुरुषोऽश्वत्थः प्रह्लाद आननम् ॥ ४४ ॥ उच्चैःश्रवा वसंतश्च
जपः शेषोऽर्यमा धनुः ॥ पावको विष्णुरिंद्रश्च कपिलो वाक्पतिः कविः ॥४५ ॥ अर्जुनो हनुमान्दर्भश्चित्त चित्ररथोंऽबुजम् ॥ उर्वशी कांचनं यद्वच्छे

द्राश्चैते स्वजातिषु ॥ ४६ ॥ तथैव नारदीयं तु पुराणेषु प्रकीर्तितम् ॥ शांतिरस्तु शिवं चास्तु सर्वेषां वो द्विजोत्तमाः ॥ ४७ ॥ गमिष्यामि गुरोः पार्श्वं व्यासस्यामिततेजसः ॥ इत्युक्ताभ्यर्चितः सूतः शौनकाद्यैर्महात्मभिः ॥ ४८ ॥ आज्ञप्तश्च पुनः सर्वैर्दर्शनार्थं गुरोर्ययौ ॥ तेऽपि सर्वे द्विजश्रेष्ठाः शौनकाद्याः समाहिताः ॥ श्रुतं सम्यगनुष्ठाय तत्र तस्थुश्च सत्रिणः॥४९॥कलिकल्मषविषनाशनं हरिं यो जपपूजनविधिभेषजोपसेवी॥स तु निर्विषमनसा समेत्य यागं लभते सततमभीप्सितं हि लोकम् ॥ ५० ॥ इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने चतुर्थपादे पुराणमहिमावर्णनं नाम पंचविंशोत्तरशततमोऽध्यायः ॥ १२५ ॥

॥ समाप्तोऽयं बृहन्नारदीयपुराणस्य पूर्वभागः ॥ श्रीराधामदनमोहनो जयति तराम् ॥

खेमराज श्रीकृष्णदास, "श्रीवेंकटेश्वर" स्टीम्-यन्त्रालय-मुंबई.

श्रीगणेशाय नमः ॥ श्रीकृष्णाय नमः ॥ पांतु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः ॥ त्रैलोक्यमंडपस्तंभाश्चत्वारो हरिबाहवः ॥ १ ॥ सुरा
सुरशिरोरत्ननिघृष्टमणिरंजितम् ॥ हरिपादांबुजद्वंद्वमभीष्टप्रदमस्तु नः ॥ २ ॥ मांधातोवाच ॥ पापेंधनस्य घोरस्य शुष्कार्द्रस्य द्विजोत्तम ॥ को
वह्निर्दहते तस्य तद्भवान्वक्तुमर्हति ॥ ३ ॥ नाज्ञातं त्रिषु लोकेषु चतुर्मुखसमुद्भव ॥ विद्यते तव विप्रेंद्र त्रिविधस्य सुनिश्चितम् ॥ ४ ॥ अज्ञातं
पातकं शुष्कं ज्ञातं चार्द्रमुदाहृतम् ॥ भाव्यं वाप्यथवातीतं वर्तमानं वदस्व नः ॥ ५ ॥ वह्निना केन तद्भस्म भवेदेतन्मतं मम ॥ वसिष्ठ उवाच ॥
श्रूयतां नृपशार्दूल वह्निना येन तद्भवेत् ॥ ६ ॥ भस्म शुष्कं तथार्द्रं च पापमस्य ह्यशेषतः ॥ ७ ॥ अवाप्य वासरं विष्णोर्यो नरः संयतेंद्रियः ॥
उपवासपरो भूत्वा पूजयेन्मधुसूदनम् ॥ ८ ॥ स धात्रीस्नानसहितो रात्रौ जागरणान्वितः ॥ विशोधयति पापानि कितवो हि यथा धनम् ॥ ९ ॥
एकादशीसमाख्येन वह्निना पातकेंधनम् ॥ भस्मतां याति राजेंद्र अपि जन्मशतोद्भवम् ॥ १० ॥ नेदृशं पावनं किंचिन्नराणां भूप विद्यते ॥
यादृशं पद्मनाभस्य दिनं पातकहानिदम् ॥ ११ ॥ तावत्पापानि देहेऽस्मिंस्तिष्ठंति मनुजाधिप ॥ यावन्नोपवसेज्जंतुः पद्मनाभदिनं शुभम् ॥ १२ ॥
अश्वमेधसहस्राणि राजसूयशतानि च ॥ एकादश्युपवासस्य कलां नार्हंति षोडशीम् ॥ १३ ॥ एकादशेंद्रियैः पापं यत्कृतं भवति प्रभो ॥ एकादश्यु
पवासेन तत्सर्वं विलयं व्रजेत् ॥ १४ ॥ एकादशीसमं किंचित्पापनाशं न विद्यते ॥ व्याजेनापि कृता राजन्न दर्शयति भास्करिम् ॥ १५ ॥ स्वर्गमो
क्षप्रदा ह्येषा राज्यपुत्रप्रदायिनी ॥ सुकलत्रप्रदा ह्येषा शरीरारोग्यदायिनी ॥ १६ ॥ न गंगा न गया भूप न काशी न च पुष्करम् ॥ न चापि कौरवं
क्षेत्रं न रेवा न च देविका ॥ १७ ॥ यमुना चंद्रभागा च पुण्या भूप हरेर्दिनात् ॥ अनायासेन राजेंद्र प्राप्यते हरिमंदिरम् ॥ १८ ॥ रात्रौ जागरणं
कृत्वा समुपोष्य हरेर्दिनम् ॥ सर्वपापविनिर्मुक्तो विष्णुलोके व्रजेन्नरः ॥ १९ ॥ दशैव मातृके पक्षे दश राजेंद्र पैतृके ॥ भार्याया दश पक्षे च
पुरुषानुद्धरेत्तथा ॥ २० ॥ आत्मानमपि राजेंद्र स नयेद्वैष्णवं पुरम् ॥ चिंतामणिसमा ह्येषा अथवापि निधेः समा ॥ २१ ॥ संकल्पपादप
प्रख्या वेदवाक्योपमाथवा ॥ द्वादशीं ये प्रपन्ना हि नरा नरवरोत्तम ॥ २२ ॥ ते द्वंद्वबाहवो जाता नागारिकृतवाहनाः ॥ स्रग्विणः पीतवस्त्राश्च
प्रयांति हरिमंदिरम् ॥ २३ ॥ एष प्रभावो हि मया द्वादश्याः परिकीर्तितः ॥ पापेंधनस्य घोरस्य पावकाख्यो महीपते ॥ २४ ॥
हरेर्दिनं सदोपोष्यं नरैर्धर्मपरायणैः ॥ इच्छद्भिर्विपुलान्योगान्पुत्रपौत्रादिकाँस्तथा ॥ २५ ॥ हरिदिनमिह मर्त्यो यः करोत्यादरेण नरवर
स तु कुक्षिं मातुराप्नोति नैव ॥ बहुवृजिनसमेतोऽकामतः कामतो वा व्रजति पदमनंतं लोकनाथस्य विष्णोः ॥ २६ ॥ इति श्रीबृहन्नारदी

यपुराणोत्तरभागे द्वादशीमाहात्म्यवर्णनं नाम प्रथमोऽध्यायः ॥ १ ॥ वसिष्ठ उवाच ॥ इममेवार्थमुद्दिश्य नैमिषारण्यवासिनः ॥ पप्रच्छुर्मु
नयः सूतं व्यासशिष्यं महामतिम् ॥ १ ॥ स तु पृष्टो महाभाग एकादश्याः सुविस्तरम् ॥ माहात्म्यं कथयामास उपवासविधिं तथा
॥ २ ॥ तद्वाक्यं सूतपुत्रस्य श्रुत्वा द्विजवरोत्तमाः ॥माहात्म्यं चक्रिणश्चापि सर्वपापौघशांतिदम् ॥ ३ ॥ पुनः पप्रच्छुरमलं सूतं पौराणिकं नृप ॥
अष्टादश पुराणानि भवान् जानाति मानद ॥ ४ ॥ कानीनस्य प्रसादेन :महाभारतमप्युत ॥ तन्नास्ति यन्न वेत्सि त्वं पुराणेषु स्मृतिष्वपि ॥
॥ ५ ॥ चरिते रघुनाथस्य शतकोटिप्रविस्तरे ॥ अस्माकं संशयः कश्चिद्धृदये संप्रवर्तते ॥ ६ ॥ तं भवानर्हति च्छेत्तुं याथार्थ्येन सुविस्तरात् ॥
तिथेः प्रांतमुपोष्यं स्यादाहोस्विन्मूलमेव च ॥ ७ ॥ दैवे पैत्र्ये समाख्याहि नावेद्यं विद्यते तव ॥ सौतिरुवाच ॥ तिथेः प्रांतं सुराणां हि उपोष्यं
प्रीतिवर्द्धनम् ॥ ८ ॥ मूलं तिथेः पितॄणां तु कालज्ञैः प्रियमीरितम् ॥ अतः प्रांतमुपोष्यं हि तिथेर्दशफलेप्सुभिः ॥९ ॥ मूलं हि पितृतृप्त्यर्थं विज्ञेयं
धर्मकांक्षिभिः ॥ पूर्वविद्धा न कर्तव्या द्वितीया चाष्टमी तथा ॥ १० ॥ षष्ठी चैकादशी भूप धर्मकामार्थलिप्सुभिः ॥ पूर्वविद्धा द्विजश्रेष्ठाः कर्तव्या
सप्तमी सदा ॥ ११ ॥ दर्शश्च पौर्णमासश्च पितुः सांवत्सरं दिनम् ॥ पूर्वविद्धानिमांस्त्यक्त्वा नरकं प्रतिपद्यते ॥ १२ ॥ हानिं च संततेर्भूप
दौर्भाग्यं समवाप्नुयात् ॥ एतच्छ्रुतं मया विप्राः कृष्णद्वैपायनात्पुरा ॥ १३ ॥ आदित्योदयवेलायां या तोकापि तिथिर्भवेत् ॥ पूर्वविद्धा तु मंतव्या
प्रभूता नोदयं विना ॥ १४ ॥ पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता ॥ पित्र्येऽस्तमनवेलायां स्पर्शे पूर्णा निगद्यते ॥ १५ ॥ न तत्रोदयिनी
ग्राह्या दैवस्योदयिकी तिथिः ॥ प्रत्यहं शोधयेत्प्राज्ञस्तिथिं दैवज्ञचिंतकात् ॥१६॥ तिथिप्रमाणं विप्रेंद्राः क्षपाकरदिवाकरौ॥चंद्रार्कचारविज्ञानात्कालं
कालविदो विदुः ॥ १७॥ पूर्वायाः संगदोषेण न योग्यास्ताः प्रपूजने॥ वर्जयन्ति नरास्तज्ज्ञा यामांश्च चतुरो द्विजाः ॥१८॥ अत ऊर्द्ध्वं प्रवक्ष्यामि
स्नानपूजाविधिक्रमम् ॥ न दिवा शुद्धिमाप्नोति तदा रात्रौ विधीयते ॥ १९ ॥ दिनकार्यमशेषं हि कर्तव्यं शर्वरीमुखे ॥ विधिरेष मया ख्यातो नरा
णामुपवासिनाम् ॥ २० ॥ अल्पायामथ विप्रेंद्रा द्वादश्यामरुणोदये ॥ स्नानार्चनक्रिया कार्य्या दानहोमादिसंयुता ॥२१॥ त्रयोदश्यां हि शुद्धायां
पारणे पृथिवीफलम् ॥ शतयज्ञाधिकं वापि नरः प्राप्नोत्यसंशयम् ॥ २२ ॥ एतस्मात्कारणाद्विप्राः प्रत्यूषे स्नानमाचरेत् ॥ पितृतर्पणसंयुक्तं न दृष्ट्वा
द्वादशीदिनम् ॥ २३ ॥ महाहानिकरा ह्येषा द्वादशी लंघिता नृभिः ॥ करोति धर्महरणमस्नातेव सरस्वती ॥ २४॥ क्षये वाप्यथवा वृद्धौ संप्राप्ते
वा दिनोदये ॥ उपोष्या द्वादशी पुण्या पूर्वविद्धां विवर्जयेत् ॥ २५ ॥ब्राह्मण उवाच ॥यदा च प्राप्यते सूत द्वादश्यां पूर्वसंभवा॥ तदोपवासो हि

कथं कर्तव्यो मानवैर्वद ॥ २६ ॥उपवासदिनं विद्धं यदा भवति पूर्वया ॥ द्वितीयेऽह्नि यदा न स्यात्स्वल्पाप्येकादशी तिथिः ॥ २७॥ तत्रोपवासो
विहितः कथं तद्वद सूतज ॥ सौतिरुवाच ॥ यदा न प्राप्यते विप्रा द्वादश्यां पूर्वसम्भवम् ॥२८॥ रविचन्द्रार्कजाहं तु तदोपोष्यं परं दिनम्॥ बह्वा
गमविरोधेषु ब्राह्मणेषु विवादिषु॥२९॥उपोष्या द्वादशी पुण्या त्रयोदश्यां तु पारणम्॥एकादश्यां तु विद्धायां संप्राप्ते श्रवणे तथा॥३०॥उपोष्या द्वादशी
पुण्या पक्षयोरुभयोरपि ॥एष वो निर्णयः प्रोक्तो मया शास्त्रविनिर्णयात्॥३१॥किमन्यच्छ्रोतुकामा हि तद्भवंतो ब्रुवंतु मे॥ऋषय ऊचुः॥युगादीनां वद
विधिं सौते सम्यग्यथातथम् ॥३२॥ रविसंक्रातिकादीनां नावेद्यं विद्यते तव॥सौतिरुवाच ॥ द्वे शुक्ले द्वे तथा कृष्णे युगाद्याः कवयो विदुः॥३३॥
शुक्ले पूर्वाह्णिके ग्राह्ये कृष्णे ग्राह्येऽपराह्णिके ॥ अयनं दिनभागाढ्यं संक्रमः षोडशः पलः ॥ ३४ ॥ पूर्वे तु दक्षिणे भागे व्यतीते चोत्तरो मतः ॥
मध्यकाले तु विषुवे त्वक्षया परिकीर्तिता ॥३५॥ ज्ञात्वा विप्रास्तिथिं सम्यक्सांवत्सरसमीरिताम् ॥ कर्तव्यो ह्युपवासस्तु अन्यथा नरकं व्रजेत् ॥
॥ ३६ ॥ पूर्वविद्धां प्रकुर्वाणो नरो धर्मं निकृंतति ॥ संततेस्तु विनाशाय संपदां हरणाय च ॥ ३७॥ पलवेधेऽपि विप्रेंद्रा दशम्या वर्जयेच्छिवाम्॥
सुराया बिंदुना स्पृष्टं यथा गंगाजलं त्यजेत् ॥ ३८ ॥ श्वहतं पंचगव्यं च दशम्या दूषितां त्यजेत् ॥ एकादशीं द्विजश्रेष्ठाः पक्षयोरुभयोरपि ॥
॥ ३९ ॥ पूर्वविद्धा पुरा दत्ता सा तिथिर्यदुमौलिना ॥ दानवेभ्यो द्विजश्रेष्ठाः प्रीणनार्थं महात्मनाम् ॥४०॥ अकाले यद्धनं दत्तमपात्रेभ्यो द्विजो
त्तमाः ॥ संक्रुद्धैरपि यद्दत्तं यद्दत्तं चाप्यसत्कृतम् ॥ ४१ ॥ पूर्वविद्धतिथौ दत्तं तद्दत्तमसुरेष्वथ ॥ यदुच्छिष्टेन दत्तं तु यद्दत्तं पतितेष्वपि ॥ ४२ ॥
स्त्रीजितेषु च यद्दत्तं यद्दत्तं जलवार्जितम् ॥ पुनः कीर्तनसंयुक्तं तद्दत्तमसुरेषु वै ॥ ४३॥ तस्माद्विप्रा न कर्त्तव्या विद्धाप्येकादशी तिथिः ॥ यथा हंति
पुरा पुण्यं श्राद्धं च वृषलीपतिः॥४४॥दत्तं जप्तं हुतं स्नातं तथा पूजा कृता हरेः॥तिथौ विद्धे क्षयं याति तमः सूर्योदये यथा॥४५॥जीर्णं पतिं यौवन
गर्विता यथा त्यजंति नार्यो झषकेतुनार्दिताः॥तथा हि वेधं विबुधास्त्यजंति तिथ्यंतरं धर्मविवृद्धये सदा॥४६॥इति श्रीबृहन्नारदीयपुराणोत्तरभागे तिथि
विचारो नाम द्वितीयोऽध्यायः॥२॥ऋषय ऊचुः॥विस्तरेण समाख्याहि विष्णोराराधनक्रियाम्॥यया तोषं समायाति प्रददाति समीहितम् ॥१॥ लक्ष्मी
भर्ता जगन्नाथो ह्यशेषाघौघनाशनः॥कर्मणा केन सप्रीतो भवेद्यः सचराचरः॥२॥सौतिरुवाच॥भक्तिग्राह्यो हृषीकेशो न धनैर्द्धरणीधर॥भक्त्या संपूजितो
विष्णुः प्रददाति मनोरथम् ॥३॥ तस्माद्विप्राः सदा भक्तिः कर्त्तव्या चक्रपाणिनः॥जनेनापि जगन्नाथः पूजितः क्लेशहा भवेत्॥४॥परितोषं व्रजत्याशु
तृपितस्तु जलैर्यथा ॥ अत्रापि श्रूयते विप्रा आख्यानं पापनाशनम्॥५॥रुक्मांगदस्य संवादमृषिणा गौतमेन हि॥आसीद्रुक्मांगदो राजा सार्वभौमः

क्षमान्वितः ॥ ६ ॥ क्षीरशायिप्रियो भक्तो हरिवासरतत्परः ॥ नान्यं पश्यति देवेशात्पद्मनाभान्महीपतिः ॥ ७ ॥ पटहं वारणे धृत्वा वादयेद्धरि
वासरे ॥ अष्टवर्षाधिको यस्तु पञ्चाशीत्यूनवर्षकः ॥ ८ ॥ भुनक्ति मानवो ह्यद्य विष्णोरहनि मंदधीः ॥ स मे दंड्यश्च वध्यश्च निर्वास्यो नगराद्बहिः
॥ ९ ॥ पिता च यदि वा भ्राता पुत्रो भार्या सुहृन्मम ॥ पद्मनाभदिने भोक्ता निग्राह्यो दस्युवद्भवेत् ॥ १० ॥ ददध्वं विप्रमुख्येभ्यो मज्जध्वं जाह्न
वीजले ॥ ममेद वचनं श्रुत्वा राज्यं भुंजीत मामकम् ॥११॥ वासरे वासरे विष्णोः शुक्लपक्षे महीपतिः ॥ अशुक्ले तु विशेषेण पटहे हेमसंपुटे॥१२॥
एवं प्रघुष्टे भूपेन सर्वभूमौ द्विजोत्तमाः ॥ गच्छाद्भिः संकुलो मार्गः कृतो लोकैर्हरेर्द्विजाः॥१३ ॥ ये केचिन्निधनं यांति भूपालविषये नराः ॥ ज्ञाना
त्प्रमादतो वापि ते यांति हरिमन्दिरम् ॥ १४ ॥ अवश्यं वैष्णवो लोकः प्राप्यते मानवैर्द्विजाः ॥ व्याजेनापि प्रकुर्वाणैर्द्वादशीं पापना
शिनीम् ॥ १५ ॥सोऽश्नाति पार्थिवं पापं योऽश्नाति हरिवासरे ॥ स प्राप्नोति धराधर्मं यो नाश्नाति हरेर्दिने ॥ १६ ॥ ब्राह्मणो नैव हंतव्य
इत्येषा वैदिकी स्मृतिः ॥ एकादश्यां न भोक्तव्यं पक्षयोरुभयोरपि ॥ १७ ॥ वैलक्ष्यमगमद्राजा रविसूनुर्द्विजोत्तमाः ॥ लेख्यकर्मणि विश्रांत
श्चित्रगुप्तोऽभवत्तदा ॥ १८ ॥ संमार्जितानि लेख्यानि पूर्वकर्मोद्भवानि च ॥ गच्छंति वैष्णवं लोकं स्वधर्मैर्मानवाः क्षणात् ॥ १९ ॥ शून्या
स्तु निरयाः सर्वे पापप्राणिविवर्जिताः ॥ भग्नो याम्योऽभवन्मार्गो द्वादशादित्यतापितः॥ २० ॥ सर्वे हि गरुडारूढा जना यांति हरेः पदम् ॥ देवा
नामपि ये लोकास्ते शून्या ह्यभवँस्तथा ॥ २१ ॥ उत्सन्नाः पितृदेवेज्यास्तीर्थदानादिसत्क्रियाः ॥ मुक्त्वैकां द्वादशीं मर्त्या नान्यं जानंति ते व्रतम्
॥ २२ ॥शून्ये त्रिविष्टपे जाते शून्ये च नरके तथा ॥ नारदो धर्मराजानं गत्वा चेदमुवाच ह ॥ २३ ॥ नारद उवाच ॥ नाक्रंदः श्रूयते राजन् प्रांगणे
नरकेष्वथ ॥ न चापि क्रियते लेख्यं किंचिद्दुष्कृतकर्मणाम् ॥ २४॥ चित्रगुप्तो मुनिरिव स्थितोऽयं मौनसंयुतः ॥ कारणं किं न चायांति पापिनो
येन ते गृहम् ॥ २५ ॥ मायादंभसमाक्रांता दुष्टकर्मरतास्तथा ॥ एवमुक्ते तु वचने नारदेन महात्मना ॥ २६ ॥ प्राह वैवस्वतो राजा किंचिद्दैन्यसम
न्वितः ॥ यम उवाच ॥ योऽयं नारद भूपालः पृथिव्यां सांप्रतं स्थितः ॥ २७ ॥ स हि भक्तो हृषीकेशे पुराणपुरुषोत्तमे ॥ प्रबोधयति राजेंद्रः स
जनं पटहेन हि ॥ २८ ॥ न भोक्तव्यं न भोक्तव्यं संप्राप्ते हरिवासरे॥ ये केचिद्भुञ्जते मर्त्यास्ते मे दंडेषु यांति हि ॥ २९ ॥ तद्भयाद्धि जनाः सर्वे
द्वादशीं समुपासते ॥ व्याजेनापि मुनिश्रेष्ठ द्वादश्यां समुपोषिताः ॥३० ॥ प्रयांति वैष्णवं लोकं दाहप्रलयवर्जितम् ॥ द्वादशीसेवनाल्लोकाः प्रयांति
हरिमंदिरम् ॥ ३१ ॥ तेन राज्ञा द्विजश्रेष्ठ मार्गा लुप्ता ममाधुना ॥ कृता हि नरकाः शून्या लोकाश्चापि दिवौकसाम् ॥ ३२ ॥ विश्रांतं लेखकै

लेख्यं लिखितं मार्जितं जनैः ॥ एकादश्युपवासस्य माहात्म्येन द्विजोत्तम ॥३३ ॥ ब्रह्महत्यादिपापानि अभुक्त्वैव जना द्विज ॥ समुपोष्य दिनं
विष्णोः प्रयांति हरिमंदिरम्॥ ३४ ॥ सोऽहं काष्ठमृगेणैव तुल्यो जातो महामुने ॥ नेत्रहीनः कर्णहीनः संध्याहीनो द्विजो यथा ॥ ३५ ॥ स्त्रीजितो
वा पुमान्यद्वत्षंढो वा प्रमदापतिः ॥ त्यक्तकामस्त्वहं ब्रह्मंल्लोकपालत्वमीदृशम् ॥ ३६ ॥ यास्यामि ब्रह्मलोके वै दुःखं ज्ञापयितुं स्वकम् ॥
निर्व्यापारो नियोगी तु नियोगे यस्तु तिष्ठति ॥ ३७॥ स्वामिवित्तं समश्नाति स याति नरकं ध्रुवम् ॥ सौतिरुवाच॥ एवमुक्त्वा यमो विप्रा नारदेन
समन्वितः ॥ ३८ ॥ ययौ विरंचिसदनं चित्रगुप्तेन चान्वितः ॥ स ददर्श समासीनं मूर्तामूर्तजनावृतम् ॥३९॥ वेदाश्रयं जगद्बीजं सर्वेषां प्रपिताम
हम् ॥ स्वभवं भूतनिलयमोंकाराख्यमकल्मषम् ॥ ४० ॥ शुचिं शुचिपदं हंसं ब्रह्माणं दर्भलांछनम् ॥ उपास्यमानं विविधैर्लोकपालैर्दिगीश्वरैः
॥ ४१ ॥ इतिहासपुराणैश्च वेदैर्विग्रहसंस्थितैः ॥ मूर्तिमद्भिः समुद्रैश्च नदीभिश्च सरोवरैः ॥ ४२ ॥ देहधृग्भिस्तथा वृक्षैरश्वत्थाद्यैर्विशेषतः ॥ वापी
कूपतडागाद्यैर्मूर्तिमद्भिश्च पर्वतैः ॥ ४३ ॥ अहोरात्रैस्तथा पक्षैर्मासैः संवत्सरैर्द्विजाः ॥ कलाकाष्ठानिमेषैश्च ऋतुभिश्चायनैर्युगैः ॥ ४४ ॥
मन्वंतरैस्तथा कल्पैर्निमेषैरुन्मिषैरपि ॥ ऋक्षैर्योगैश्च करणैः पौर्णमासेंदुसंक्षयैः ॥ ४५ ॥ सुखैर्दुःखैस्तथा द्वंद्वैर्लाभालाभैर्जयाजयैः ॥ सत्यानृतैश्च
देवेशो वेष्टितो धर्मपावकः ॥ ४६ ॥ कर्मविद्भिश्च पुरुषैरनुरूपैरुपास्यते ॥ सत्त्वेन रजसा चैव तमसा च पितामहः ॥ ४७ ॥ शांतमूढातिघो
रैश्च विकारैः प्राकृतैर्विभुः ॥ वायुना श्लेष्मपित्ताभ्यां मूर्तैरतंकनामभिः ॥ ४८ ॥ आनंदेन च विश्वात्मा परधर्मं समाश्रितः ॥ अनुक्तैरपि
भूतैश्च संवृतो लोककृत्स्वयम् ॥ ४९ ॥ दुरुक्तैः कटुवाक्याद्यैर्मूर्तिमद्भिरुपास्यते ॥ तेषां मध्येऽविशत्सौरिः सव्रीडेव वधूर्यथा ॥ ५० ॥विलोकय
न्नधोभागं नम्रवक्त्रो व्यदर्शयत् ॥ ते प्रविष्टं यमं दृष्ट्वा सकायस्थं सनारदम् ॥ ५१॥ विस्मिताक्षा मिथः प्रोचुः किमयं भास्करिरस्त्विह॥
संप्राप्तो हि लोककरं द्रष्टुं देवं पितामहम् ॥ ५२ ॥ निर्व्यापारः क्षणं नास्ति योऽयं व्यग्रो रवेः सुतः ॥ सोऽयमभ्यागतः कस्मात्कच्चित्क्षेमं
दिवौकसाम् ॥ ५३ ॥ आश्चर्यातिशयं मन्ये यन्मार्जितपटस्त्वयम् ॥ लेखकः समनुप्राप्तो दैन्येन महतान्वितः ॥ ५४ ॥ न केनचित्पटो ह्यस्य
मार्जितोऽभूच्च धर्मिणा ॥ यन्न दृष्टं श्रुतं वापि तदिहैव प्रदृश्यते ॥ ५५॥ एवमुच्चरतां तेषां भूतानां कृतशासनः ॥ निपपाताग्रतो विप्रा ब्रह्मणो रवि
नन्दनः ॥ ५६ ॥ मूलच्छिन्नो यथा शाखी त्राहि त्राहीति संरुदन् ॥ पारिभूतोऽस्मि देवेश यन्मार्जितपटः कृतः ॥५७॥त्वया नाथेन विधुरं पश्यामि
कमलासन ॥एवं ब्रुवन्स निश्चेष्टो बभूव द्विजसत्तमाः ॥ ५८ ॥ ततो हलहलाशब्दः सभायां समवर्तत ॥ योऽयं रोदयते लोकान्सर्वान्स्थावरज

गमान् ॥५९॥ सोऽयं रोदिति दुःखार्तः कस्माद्वैवस्वतो यमः॥ अथवा सत्यगाथेयं लौकिकी प्रतिभाति नः ॥ ६०॥ जनसन्तापकर्ता यः सोऽचिरे
णोपतण्यते ॥ नहि दुष्कृतकर्मा हि नरः प्राप्नोति शोभनम् ॥६१॥ ततो निवारयामास वायुस्तेषां वचस्तदा ॥ लोकानां समचित्तानां मतं ज्ञात्वा
हि वेधसः ॥६२॥ निवार्य शंकां मार्तंडिं शनैरुत्थापयन् विभुः ॥ भुजाभ्यां साधुपीनाभ्यां लोकमूर्तिरुदारधीः ॥ ६३ ॥ विह्वलं तं पलायंतमा
सने संन्यवेशयत् ॥ सकायस्थमुवाचेदं व्योममूर्तिं रवेः सुतम् ॥ ६४ ॥ केन त्वमभिभूतोऽसि केन स्थानाद्विवासितः ॥ केनापमार्जितो देवपटो
लोकपटस्तव ॥६५॥ ब्रूहि सर्वमशेषेण कुशकेतुर्वदत्वयम् ॥ यः प्रभुस्तात सर्वेषां स ते कर्ता समुन्नतिम् ॥ अपनेष्यति मार्तंडे दुःखं हृदयसंस्थितम्
॥ ६६ ॥ स एवमुक्तस्तु प्रभंजनेन दिनेशसूनुस्तमथो बभाषे ॥ विलोक्य वक्त्रं कुशकेतुसूनोः सगद्गदं मंदमुदीरयन्वचः ॥ ६७ ॥ इति
श्रीबृहन्नारदीयपुराणोत्तरे भागे यमस्य ब्रह्मलोकगमनं नाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ यम उवाच ॥ शृणु मे वचनं नाथ पितामह पितामह॥
मरणादधिकं देव यत्प्रतापस्य खंडनम् ॥ १ ॥ निस्पृहो नाचरेद्यस्तु नियोगं पद्मसंभव ॥ अन्धकूपे निपतति स चाशु नरके ध्रुवम्
॥ २ ॥ नियोगी न नियोगं यः करोति कमलासन ॥ प्रभोर्वित्तं समश्नाति स भवेत्काष्ठकीटकः ॥ ३ ॥ योऽश्नाति लोभाद्वित्तानि प्रजाभ्यो
वा महीपतेः ॥ नियोगी नरकं याति यावत्कल्पशतत्रयम् ॥ ४ ॥ आत्मकार्यपरो यस्तु स्वामिनं च विलुंपति ॥ भवेद्वेश्मनि मंदात्मा
आखुः कल्पशतत्रयम् ॥ ५ ॥ नियोगी यस्तु वै भूत्वा आत्मवेश्मनि भोक्ष्यति ॥ भृत्यान्वै कर्मकरणे राज्ञो मार्जारतां व्रजेत् ॥६॥ सोऽहं देव
तवादेशात् प्रजा धर्मेण शासयन् ॥ पुण्येन पुण्यकर्तारं पापं पापेन कर्मणा ॥७॥ सम्यग्विचार्य मुनिभिर्धर्मशास्त्रादिभिर्विभो ॥ कल्पादौ
वर्तमानस्य यावद्यावद्दिनं तव ॥ ८ ॥ सोऽहं त्वदीयेन विभो नियोगेनैव शक्नुयाम् ॥ कर्तुं रुक्मांगदेनाद्य पराभूतो हि भूभुजा ॥९॥ भयाद्यस्य
जगन्नाथ पृथिवी सागरांबरा ॥ न भुंक्ते वासरे विष्णोः सर्वपापप्रणाशने ॥ १० ॥ विहाय सर्वधर्मांस्तु विहाय पितृपूजनम् ॥ विहाय देवपूजां
च तीर्थस्नानादिसत्क्रियाम् ॥ ११ ॥ योगसांख्यावुभौ त्यक्त्वा ज्ञानं ज्ञेयं च मानद ॥ त्यक्त्वा स्वाध्यायहोमांश्च कृत्वा पापानि भूरिशः ॥ १२ ॥
प्रयांति वैष्णवं लोकमुपोष्य हरिवासरम् ॥ मनुजाः पितृभिः सार्द्धं तथैव च पितामहैः ॥ १३ ॥ तेषामपीह पितरः पितॄणां पितरस्तथा ॥ तथा
मातामहा यांति मातुर्ये जनकादयः ॥ १४ ॥ तेषामपि जनेतारो जनितॄणां हि पूर्वजाः ॥ एतद्दुःखं पुनर्देव मम मर्मविभेदनम् ॥ १५ ॥प्रियायाः
पितरो यांति मार्जयित्वा लिपिं मम ॥ पितॄणां बीजतो यस्माद्धात्र्या कुक्षौ धृतो यतः ॥१६ ॥यदेकः कुरुते कर्म तदेकेनैव भुज्यते ॥ततोऽन्यस्य

कृतं ब्रह्मन्बीजं धात्रीसमुद्भवम् ॥१७॥ तारयेत्स उभौ पक्षौ यत्पिंडो यस्य विग्रहः॥न भार्याया भवेद्बीजं न भार्या कुक्षिधारिणी॥१८॥कथं तस्या
जगन्नाथ पक्षो याति परं पदम् ॥ जामातुः पुण्यमाहात्म्यात्तेन मे शिरसो रुजा॥१९॥ न मे प्रयोजनं देव नियोगेनेदृशेन वै ॥ एकादश्युपवासी यः
स मां त्यक्त्वा व्रजेद्धरिम् ॥ २० ॥ कुलत्रयं समुद्धृत्य आत्मना सह पद्मज ॥ त्यक्त्वा तु मामकं मार्गं प्रयाति हरिमंदिरम् ॥२१॥ न यज्ञैस्तादृशैर्देव
गतिं प्राप्नोति मानवः॥न तीर्थैर्नापि दानैर्वा न व्रतैर्विष्णुवर्जितैः॥२२॥न जले पावके वापि मृतः प्राप्नोति तां गतिम्॥योगेन संप्रणष्टो वा भृगुपातेन
वा विधे॥२३॥तादृशीं न गतिं याति यादृशीं वैष्णवव्रती॥गतिं मतिमतां श्रेष्ठ सत्यमेतदुदीरितम्॥२४॥हरेर्दिने धातृफलांगलिप्तो विमुक्तवांछारसभोजनो
नरः ॥ प्रयाति लोके धरणीधरस्य विदुष्टकर्मापि मनुष्यजन्मा ॥ २५ ॥ सोऽहं निराशो भुवि हीनकर्मा तवागतः पादसरोजयुग्मम् ॥ विज्ञप्ति
मात्राभयदातिकालं कुरुष्व सर्गस्थितिनाशहेतोः ॥ २६ ॥ मास्युस्तदा पापकृतो विहीना यन्मामकैर्भूतगणैर्मनुष्याः ॥ नियंत्रिताः शृंखल
रज्जुबंधनैः समीपगा मे वशगा भवेयुः ॥ २७ ॥ भग्नस्तु मार्गो रवितापयुक्तो यद्विष्णुसंघैरतितीव्रहस्तैः ॥ विमुच्य कुंभीं सकलो जनौघः
प्रयाति तद्धाम परात्परस्य ॥ २८ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे यमवाक्यं नाम चतुर्थोऽध्यायः ॥ ४ ॥ यम उवाच ॥ घृष्टतां समनुप्राप्तः
पन्था देवस्य चक्रिणः ॥अच्छिद्रैर्गम्यमानैश्च नरैस्त्रिभुवनार्चित ॥ १॥ अप्रमाणमहं मन्ये लोकं विष्णोर्जगत्पते ॥ यो न पूर्यति लोकौघैः सर्व
सत्वसरोरुहैः ॥ २ ॥ माधवावसथेनैव समस्तेन पितामह ॥ स्वकर्मस्था विकर्मस्थाः शुचयोऽशुचयोऽपि वा ॥ ३ ॥ उपोष्य वासरं विष्णोर्लोकं
यांति नृपाज्ञया ॥ सोऽस्माकं हि महान् शत्रुर्भवतां च विशेषतः ॥४॥ निग्राह्यो जगतांनाथ भवेन्नास्त्यत्र संशयः ॥ तेन वर्षसहस्रेण शासितं क्षिति
मंडलम् ॥ ५ ॥ अप्रमेयो जनो नीतो वैष्णवं हरिवल्लभम्॥आरोपयित्वा गरुडे कृत्वा रूपं चतुर्भुजम्॥६॥पीतवस्त्रसुसंवीतं स्रग्विणं चारुलेपनम्॥
यदि स्थास्यति देवेश माधव्यां माधवप्रियः॥७॥समस्तं नेष्यते लोकं विष्णोः पदमनामयम्॥एष दंडः पटो ह्येष तव पद्भ्यां विसर्जितः॥८॥लोक
पालत्वमतुलं मार्जित तेन भूभुजा ॥ रुक्मांगदेन देवेश धन्या सा स धृतो यया ॥ ९ ॥ सर्वदुःखविनाशाय मातृजातो गुणाधिकः॥ किमपत्येन
जातेन मातुः क्लेशकरेण हि ॥ १० ॥ यो न तापयते शत्रून् ज्येष्ठ मासि यथा रविः ॥ वृथाशूला हि जननी जाता देव कुपुत्रिणी ॥ ११ ॥यस्य
न स्फुरते कीर्तिर्घनस्थेव शतह्रदा ॥ यः पितुर्नोद्धरेत्पक्षं विद्यया वा बलेन वा॥१२॥ मातुर्जठरजो रोगः स प्रसूतो धरातले ॥ धर्मे चार्थे च कामे च
प्रतीपो यो भवेत्सुतः ॥ १३ ॥ मातृहा प्रोच्यते सद्भिर्वृथा तस्यैव जीवितम् ॥ एका हि वीरसूरेव विरंचे नात्र संशयः ॥ १४ ॥ यया रुक्मांगदो

जातो मह्लिपेमाँज्जनाय वै ॥ नेदं व्यवस्थितं देव क्षितौ केनापि भूभुजा॥१५॥पुराणेऽपि जनन्नाथ न श्रुतं पटमार्जनम्॥सोऽहं न जीवामि कदाचि
दीश दृष्ट्वा क्षितीशं हरिसेवने स्थितम्॥प्रवादमानं पटहं सुघोरं प्रलोपमानं मम,वेश्ममार्गम्॥१६॥इति श्रीबृहन्नारदीयपुराणोत्तरभागे यमविलापनं नाम
पंचमोऽध्यायः ॥ ५ ॥ ब्रह्मोवाच ॥ किमाश्चर्यं त्वया दृष्टं कथं वा खिद्यते भवान् ॥ सद्गुणेषु च संतापः स तापो मरणांतिकः ॥ १ ॥ यस्यो
च्चारणमात्रेण प्राप्यते परमं पदम् ॥ तमुपोष्य कथं सौरे न गच्छति नरस्त्विति ॥२॥ एको हि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः॥
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय॥ ३ ॥ कुरुक्षेत्रेण किं तस्य किं काश्या विरजेन वा ॥ जिह्वाग्रे वर्तते यस्य हरिरित्यक्षरद्वयम्
॥ ४ ॥ ब्राह्मणः श्वपचीं गच्छन् विशेषेण रजस्वलाम् ॥ अन्नमश्नन्सुरापक्कं मरणे यो हरिं स्मरेत्॥५ ॥ अभक्ष्यागम्ययोर्जातं विहाय पापसंचयम् ॥
स याति विष्णुसायुज्यं विमुक्तो भवबंधनैः ॥ ६ ॥ यन्नामोच्चारणान्मोक्षः कथं न तदुपोषणे ॥ यस्मिन्संगीयते सोऽपि चिंत्यते पुरुषोत्तमः ॥ ७ ॥
लीलया चोच्चरेद्देवं शृणुयाच्च जनार्दनम् ॥ गंगांभःपूतपुण्यत्वे स नरः समतां व्रजेत् ॥८॥अस्माकं जगतांनाथो जन्मदः पुरुषोत्तमः ॥ कथं शासति
दुर्मेधास्तस्य वासरसेविनम् ॥ ९ ॥ यस्त्वं न चूर्णितस्तैस्तु यस्त्वं बद्धो न तैर्दृढम् ॥ तदस्माकं कृतं मानं मे तत्त्वं नावबुध्यसे ॥ १० ॥ यो
नियोगी न जानाति नृपभक्तान्वरान् क्षितौ ॥ कृत्स्नायासेन संयुक्तः स तैर्निग्राह्यते पुनः ॥११॥ राजेष्टा न नियोक्तव्याः सापराधा नियोगिना ॥
स्वामिप्रसादात्सिद्धास्ते विनिन्युर्वै नियोगिनम् ॥ १२ ॥ एवं हि पापकर्तारः प्रणता ये जनार्दने॥ कथं संयमिता तेषां बाल्याद्भास्करनंदन॥१३॥
शैवैर्भास्करभक्तैर्वा मद्भक्तैर्वा दिवाकरे॥करोमि तव साहाय्यं हरिभक्तैर्न भास्करे॥ १४ ॥सर्वेषामेव देवानामादिस्तु पुरुषोत्तमः॥१५॥मधुसूदनभक्तानां
निग्रहो नोपपद्यते ॥ व्याजेनापि कृता यैस्तु द्वादशी पक्षयोर्द्वयोः ॥ १६ ॥ तैः कृते अवमाने तु तव नाहं सहायवान् ॥ १७ ॥ कृते सहाये तव
सूर्यसूनो भवेदनीतिर्मम देहघातिनी ॥ विपर्ययो ब्रह्मपदात्सुपुण्यात्कृतेव मार्गे सह विष्णुभक्तैः ॥१८॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे ब्रह्मवाक्यं
नाम षष्ठोऽध्यायः ॥ ६ ॥ यम उवाच ॥ प्राप्तं तात मया सार्द्धं वेदांघ्रिनमने हितम्॥ नाहं गच्छामि योगांतं पुनरेव जगत्पते॥१॥प्रशासति महीं भूपे
हाटकांगदसंज्ञके ॥ तमेकं देवताश्रेष्ठं संप्राप्ते हरिवासरे ॥२॥ यदि चालयसे धैर्यात्ततोऽहं तव किंकरः॥ स मे शत्रुर्महान्देव तेन लुप्तः पटो मम ॥३॥
तमेकं भोजयित्वा तु कार्ष्णेऽहनि महीपतिम्॥कृतकृत्यो भविष्यामि गयापिंडप्रदो यथा॥४॥अद्य प्रभृति देवेशो यैर्नरैः संस्मृतो हरिः॥उपोषितः स्तुतो

वापि न नियम्या मया हि ते ॥५॥ हरिरिति सहसा ये संगृणंतिच्छलेन जननिजठरमार्गात्ते विमुक्ता हि मर्त्याः ॥ मम पटविलिपिं ते नो विशंति
प्रवीणा दिविचरवरसंघैस्ते नमस्या भवन्ति॥सौतिरुवाच ॥६॥वैवस्वतस्य कार्येण तत्सम्मानचिकीर्षया॥चिंतयामास देवेशो विरिंचिः कुशलांछनः
॥७॥चिंतयित्वा क्षणं देवः सर्वभूतैश्च भूषितः॥भूतत्रासनमात्रं तु रूपं स जगृहे विभुः॥८॥तस्मिन्नुत्पादयामास प्रमदां लोकमोहिनीम्॥सर्वयोषिद्वरा देवी
मनसा निर्मिता बभौ॥९॥सा बभूवाग्रतस्तस्य सर्वालंकारभूषिता॥ दृष्ट्वा पितामहस्तां तु रूपद्रविणसंयुताम्॥ १०॥प्राहेमान् पश्यतो ह्येतां स्वकान्वै काम
मोहितान्॥प्रत्यवायभयाद्ब्रह्मा चक्षुषी संन्यमीलयत्॥ ११॥सरागेणेह मनसा सरागेणेह चक्षुषा॥चिंतयेद्वीक्षयेद्वापि जननीं वा सुतामपि॥१२॥वधूं वा
भ्रातृजायां वा गुरोभार्यां नृपस्त्रियम् ॥स याति नरकं घोरं संचिंत्य श्वपचीमपि ॥ १३ ॥ दृष्ट्वा हि प्रमदा ह्येता यः क्षोभं व्रजते नरः॥तस्य जन्मकृतं
पुण्यं वृथा भवति नान्यथा ॥ १४॥ प्रसंगे दशसाहस्रं पुण्यमायाति संक्षयम्॥पुण्यस्य संक्षयात्पापी पाषाणाखुर्भवेद्ध्रुवम्॥ १५ ॥ तस्मान्न चिंतये
त्प्राज्ञो ह्येता रागेण चक्षुषा ॥जनन्या अपि पादौ तु नादेयौ द्वादशाब्दिकैः ॥१६॥सुतैस्त्वभ्यंगकरणे पुनर्यौवनसंस्थितैः ॥ षष्टचतीतां सुतोऽभ्यंगे
नियुञ्जीत विचक्षणः ॥ १७ ॥ वृद्धो वापि युवा वापि न पादौ धावयेद्वधूम्॥ उभयोः पतनं प्रोक्तं रौरवेऽङ्गारसंचये॥१८॥ या वधूर्दर्शयेदंगं विवृतं
श्वशुरस्य हि ॥ पाणिपादाहता राजन् क्रिमिभक्ष्या भवेत्तु सा ॥ वधूहस्तेन यः पापः पादशौचं करोति हि ॥ १९ ॥ स्नानं वाप्यथवाभ्यंगं
तस्याप्येवंविधा गतिः ॥ सूचीमुखैः कृष्णवक्रैर्भुज्यते कल्पसंस्थितिम् ॥ २० ॥ तस्मान्न वीक्षयेन्नारीं सुतां वापि वधूं नरः ॥ साभिलाषेण
मनसा तत्क्षणात्पतते नरः ॥ २१ ॥ एवं संचिंतयित्वा च सूक्ष्मां दृष्टिं चकार ह ॥ यदिदं वर्तुलं वक्रं सोन्नतं दृश्यते शुभम् ॥ २२ ॥
अस्थिपंजरमेतद्धि चर्ममांसावृतं त्विति ॥ वसा मेदोऽथ नयने सोज्वले स्त्रीषु संस्थिते ॥ २३ ॥ अत्युच्छ्रितमिदं मांसं स्तनयोः समव
स्थितम् ॥ निम्नांशतां दर्शयति त्रिवली जठरस्थिता ॥ २४ ॥ पुनरेवाधिकं क्षिप्तं मांसं जघनवर्त्मनि ॥ मूत्रद्वारमिदं गुह्यं यत्र मुग्धं जगत्त्रयम् ॥
॥ २५ ॥ अपानवायुना जुष्टं सदैव प्रतिकुत्सितम् ॥ भस्त्रावर्गाधिकं क्षिप्तं मांसं जघनवर्त्मनि ॥ २६ ॥ कृतं यद्वद्द्विधा काष्ठं तद्वज्जंघा
द्विधा ध्रुवम् ॥ शुक्रास्थिपूरितं मांसैः कथं सुन्दरतां व्रजेत् ॥ २७ ॥ मांसमेदोवसासारे किं सारं देहिनां वद ॥ विष्ठामूत्रमलैः पुष्टे को देहे
रज्यते नरः ॥ २८ ॥एवं विचार्य बहुधा विरिंचिर्ज्ञानचक्षुषा ॥ धैर्यं कृत्वा च नारीं तामुवाच गजगामिनीम् ॥ २९ ॥ यथाहि मनसा

सृष्टा मया त्वं वरवर्णिनी ॥ तथा भूतासि चार्वंगि मानसोन्मादकारिणी ॥ ३० ॥ तमुवाच तदा सा तु प्रणम्य चतुराननम् ॥ पश्य मूर्च्छान्वितं
नाथ जगत्स्थावरजंगमम् ॥ ३१ ॥ मोहितं मम रूपेण सयोगि यदकल्मषम्॥ स नास्ति त्रिषु लोकेषु यः पुमान्मम दर्शनात् ॥ ३२ ॥ भवंत
मादितः कृत्वा न क्षोभं याति पद्मज ॥ आत्मस्तुतिर्न कर्तव्या केनचिच्छुभमिच्छता ॥ ३३ ॥ स्तवनान्नरकं याति विशुद्धोऽपि च मानवः ॥
तथापि स्तवनं ब्रह्मन् कर्तव्यं कार्यहेतुना ॥ ३४ ॥ साहं सृष्टा त्वया ब्रह्मन् कस्यचित्क्षोभणाय वै ॥ तमादिश जगन्नाथ क्षोभयिष्ये न संशयः ॥
॥३५॥मां दृष्ट्वापि क्षितौ देव भूधरश्चापि मुह्यति॥किं पुनश्चेतनोपेतः श्वासोच्छ्वासी नरस्त्वति॥३६॥तथा चोक्तं पुराणेषु नारीवीक्षणवर्णनम् ॥उन्माद
करणं नृणां दुश्चरव्रतनाशनम् ॥३७॥सन्मार्गे तावदास्ते प्रभवति पुरुषस्तावदेवेंद्रियाणां लज्जां तावद्विधत्ते विनयमपि समालंबते तावदेव ॥ भ्रूचापा
क्षेपयुक्ताः श्रवणपथगता नीलपक्ष्माण एते यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतंति ॥ ३८॥ धिक्तस्य मूढमनसः कुकवेः कवित्वं यः
स्त्रीमुखं च शशिनं च समीकरोति ॥ भ्रूक्षेपविस्मितकटाक्षनिरीक्षितानि कोपप्रसादहसितानि कुतः शशांके ॥ ३९ ॥ पीतं हि मद्यं मनुजेन नाथ
करोति मोहं सुविचक्षणस्य ॥ स्मृता च दृष्टा युवती नरेण विमोहयेदेव सुराधिका हि ॥४०॥ मोहनार्थं त्वया सृष्टा नराणां प्रपितामह॥तमादिश
जगन्नाथ त्रैलोक्यं मोहयाम्यहम् ॥४१॥ ब्रह्मोवाच ॥ सत्यमुक्तं त्वया देवि नासाध्यं भुवनत्रये ॥ नागनासोरु सुभगे मत्तमातंगगामिनि ॥ ४२ ॥
या त्वं दूषयसे चेतो ममापि वरवर्णिनि ॥ तन्मया सुगृहीतं तु कृतं ज्ञानांकुशेन हि ॥ ४३ ॥ सा त्वं कथं न लोकानां चेतांस्यपहरिष्यसि ॥सत्यमे
तद्विशालाक्षि तव रूपं विमोहनम् ॥ ४४ ॥ सामरं हि जगत्सर्वं निश्चेष्टमपि लक्षये ॥ यन्निमित्तं मया सृष्टा तत्साधय वरानने ॥ ४५ ॥ वैदिशे
नगरे राजा नाम्ना रुक्मांगदः क्षितौ ॥ यस्य सन्ध्यावली भार्या तव रूपोपमा शुभे॥४६ ॥यस्यां धर्मांगदो जातो पितुरत्यधिकः सुतः॥दशनागायु
तबलः प्रतापेन रविर्यथा ॥ ४७ ॥ यः क्षांत्या धरया तुल्यो गांभीर्ये सागरोपमः ॥ तेजसा वह्निवद्दीप्तः क्रोधे वैवस्वतोपमः ॥ ४८॥ त्यागे वैरोचनि
र्यद्वद्गतौ हि पवनोपमः ॥ सौम्यत्वे शशितुल्यस्तु रूपवान् मन्मथो यथा ॥ ४९ ॥ जीवभार्गवयोस्तुल्यो यो नीतौ राजनन्दनः ॥ पित्रा भुक्तं सम
स्तैकं जंबूद्वीपं वरानने ॥ ५० ॥ धर्मांगदेन द्वीपानि संजितान्यपराण्यपि ॥ पित्रोस्तु व्रीडया येन न ज्ञातं प्रमदासुखम् ॥ ५१॥ स्वयं प्राप्ताः परि
त्यक्ता येन भार्याः सहस्रशः ॥ यो न वाक्याद्विचलते सहैव हि पितुर्गृहे ॥ ५२ ॥ यस्य वै त्रीणि सुभगे मातॄणां चारुहासिनि ॥ शतानि कनका
भासे त्वविशेषेण पश्यति ॥ ५३ ॥ तस्य धर्मप्रधानस्य पुत्ररत्नांचितस्य च ॥ समीपं गच्छ चार्वंगि मंदरे पर्वतोत्तमे ॥ ५४ ॥ तत्र वत्स्यति

राजा वै तुरगेणातिवाहितः ॥ तव गीतेन चार्वंगि मोहितोऽश्वं विहाय च ॥ ५५ ॥आधिरुह्य गिरेः पृष्ठं स संगं यास्यति त्वया ॥ तत्र देवि त्वया वाच्यं मिलित्वा भूभुजा त्विह ॥ ५६ ॥ अहं भार्या भविष्यामि तव राजन्न संशयः ॥ यद्ब्रवीमि ह्यहं नाथ तत्कार्यं हि त्वया ध्रुवम्॥ ५७ ॥ मोहितस्तव रूपेण तथैव प्रतिपद्यते ॥ यतस्तं शपथैर्धृत्वा दक्षिणेन करेण वै ॥ ५८ ॥ वाच्यः कतिपयैः सुभ्रु दिनैरपगतैस्त्विति ॥ सुरते तव चार्वंगि यदा मुग्धो हि लक्ष्यते ॥ ५९ ॥ ॥ तदा प्रहस्य राज्ञो वै स्मारणीयं पुरा वचः ॥ यस्त्वया शपथो राजन्कृतो मद्वाक्यपालने ॥ ६० ॥ तत्पालय महीपाल मन्येऽहं समयस्त्विति ॥ एवमुक्ते त्वया मुग्धो राजा वै सत्यगौरवात् ॥६१ ॥ पालयामि न संदेहो ब्रूहि किं ते ददाम्यहम्॥ एवमुक्ते तु वचने त्वया वाच्यो वरानने ॥ ६२ ॥ रुक्मांगदो महीपालो धर्मांगदपिता शुभे ॥ नोपवासस्त्वया कार्यो जातु वै हरिवासरे ॥६३ ॥ सुरतसंसकारी मे ह्युपवासो भवेत्प्रिय ॥ सुमुग्धां यौवनोपेतां स्वभार्यां यो न सेवते ॥ ६४ ॥ पर्वापेक्षी दुराचारः स याति नरकं ध्रुवम् ॥ त्रिरात्रमपविद्धाहं त्वया भूप उपोषणात् ॥ ६५ ॥ नाहं निमेषमप्येकं स्थातुं शक्ता त्वया विना ॥ श्राद्धकाले तु संप्राप्ते उपाविष्टैर्द्विजैः किल ॥ ६६ ॥ याचते संगमं भार्या यदि भोग्या तदैव सा॥एवं संबोध्यमानोऽपि यदा राजा वचस्तव॥६७॥न करिष्यति चार्वंगि तदा वाच्यं परं वचः॥यदि न त्यजसे राजन्नुपवासं हरेर्दिने॥६८॥स्वहस्तेन शिरश्च्छत्वा स्वपुत्रस्य वरासिना॥धर्मांगदस्य राजद्र ममोत्संगे क्षिप स्वयम्॥६९॥यद्येतन्मत्प्रियं त्वं हि न करोषि महीपते॥धर्मक्षीणो भवान् गंता नरके नात्र संशयः॥७०॥श्रुत्वा त्वदीयं वचनं वरांगने न हिंस्यते प्राणसमं च पुत्रम्॥संगृह्य वाक्यं वसुधामराणां सम्भोक्ष्यते माधववासरेऽसौ ॥ ७१ ॥ ततो जनो यास्यति पूर्ववच्च यमांतिकं किंकरपाशबद्धः ॥ लिपिप्रमाणं नरकाधिवासी भविष्यते साधु कृतं त्वया हि ॥ ७२ ॥ अथ यदि निहंति तनयं राजा सत्येन संयुतः श्रीमान् ॥ निःशेषामरपूज्यं व्रजति पदं पद्मनाभस्य॥७३॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीं प्रति ब्रह्मवाक्यं नाम सप्तमोऽध्यायः ॥ ७ ॥ सौतिरुवाच ॥ सा श्रुत्वा ब्रह्मणो वाक्यं नारी कमललोचना ॥ उवाच नाम मे देहि येन गच्छामि मंदिरम् ॥१॥ पित्रा नाम प्रकर्तव्यमपत्यानां जगत्पते ॥ नाम पापहरं प्रोक्तं तत्कुरुष्व कुशध्वज ॥ २॥ ब्रह्मोवाच ॥ यस्मादिदं जगत्सर्वं त्वया सुंदरि मोहितम् ॥ मोहिनी नाम ते देवि सगुणं हि भविष्यति ॥३॥ दशावस्थागतः सम्यग् दर्शनात्ते भविष्यति ॥ यदि प्राप्नोति वै सुभ्रु त्वत्संपर्कं सुखावहम् ॥४ ॥ एवमुक्ता वरारोहा प्रणम्य कमलासनम् ॥ वीक्ष्यमाणामरैर्मार्गे प्रतस्थे मंदराचलम्॥५॥ तृतीयेन मुहूर्तेन संप्राप्ता गिरिमस्तकम्॥यस्य संवेष्टने नागो वासुकिर्नहि पूर्यते॥६॥यो धृतो हरिणा पूर्वं मथितो देवदानवैः॥ षड्लक्षयोजनः सिंधुर्यस्यासौ गह्वरो भवेत्॥७॥

कूर्मदेहेन संपृक्तो यो न भिन्नो गिरिर्महान् ॥ पतता येन राजेंद्र सिंधोर्गुह्यं प्रदर्शितम् ॥ ८ ॥ गतं ब्रह्मांडमार्गेण पयो यस्माद्गिरेर्द्विजाः ॥ कूर्मास्थि
घर्षता येन पावको जनितो महान् ॥९॥यस्मिन्स वसते देवः सह भूतैर्दिगंबरः ॥ न देवैर्दानवैर्वापि दृष्टो यो हि द्विजोत्तमाः॥ १०॥दशवर्षसहस्राख्ये
काले महति गच्छति॥केयूरघर्षणे येन कृतं देवस्य चक्रिणः॥११॥रत्नानां मंदिरं ह्येष बहुधातुसमन्वितः ॥ १२ ॥ क्रीडाविहारोऽपि दिवौकसां यस्त
पस्विनां यस्तपसोऽपि हेतुः॥सुरांगनानां रतिवर्द्धनो यो रत्नौषधीनां प्रभवो गिरिर्महान् ॥१३॥दशैकसाहस्रमितश्च मूले तत्संख्यया विस्तरतां गतोऽ
सौ ॥ दैर्घ्येण तावंति हि योजनानि त्रैलोक्ययष्टीव समुच्छ्रितोऽसौ ॥ १४ ॥ सकांचनै रत्नमयैश्च शृंगैः प्रकाशयन्भूमितलं वियच्च॥यस्मिन्गतः कश्य
पनंदनो वै विरश्मितामेति विनष्टतेजाः ॥ १५ ॥ कांचनाकारभूतांगं संप्राप्ता कांचनप्रभा ॥ सूर्यतेजोनिहंतारं मंदरं तेजसा स्वयम् ॥ १६ ॥ कुर्वती
नृपकामार्थमुपविष्टा शिलातले ॥ नीलकांतिमये दिव्ये सप्तयोजनविस्तृते ॥ १७ ॥ तस्यां शिलायां राजेंद्र लिंगं तिष्ठति कौलिशम् ॥ दशहस्त
प्रमाणं हि विस्तरादूर्द्धसंख्यया ॥ १८ ॥ वृषलिंगेति विख्यातं प्रासादाभ्रसमं परम् ॥ तस्मिन्बाला द्विजश्रेष्ठाश्चक्रे संगीतमुत्तमम् ॥१९॥ तन्त्रीता
लसमायुक्त क्लमहानिकरं परम् ॥ समीपवर्तिनी तस्य भूत्वा लिंगस्य भामिनी ॥२०॥ मूर्च्छनातालसहितं गांधारध्वनिसंयुतम् ॥ तस्मिन्प्रवृत्ते राजेंद्र
गीते मन्मथवर्द्धने ॥२१ ॥ बभूव स्थावराणां हि स्पृहा तस्मिन्मुनीश्वराः ॥ न च दैवं न चादैवं गीतं तादृग्बभूव ह ॥ २२ ॥ मोहिनीमुखनिर्गीतं
गीतं सत्वविमोहनम् ॥ २३ ॥ श्रुत्वैव गीतं हि दिगम्बरस्तु तेनैव रूपेण वरांगनायाः ॥ कामातुरो भोक्तुमनाश्चचाल तां मोहिनीं पार्वतिदृष्टिल
ज्जः ॥२४॥इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीचरिते मंदरवर्णनं नामाऽष्टमोऽध्यायः॥८॥सौतिरुवाच॥रुक्मांगदस्तु राजेंद्रो भुक्त्वा भोगांस्तु
मानुषान् ॥ संपूज्य बहुशो देवं पीतांबरधरं हरम् ॥ १ ॥दत्वा मूर्ध्नि पदं विप्राः शत्रूणां रणशालिनाम् ॥ कृत्वा शून्यं यमपथं जित्वा वैवस्वतं यमम्
॥ २ ॥ वैकुण्ठस्य तु पंथानं संपूर्णं मानवैः कृतम् ॥ आहूय तनयं काले धर्मांगदमभाषत ॥ ३ ॥ एतां वसुमतीं पुत्र वसुपूर्णां समंततः ॥ परि
पालय वीर्येण स्वधर्मे कृतनिश्चयः ॥ ४ ॥ पुत्रे समर्थे जाते यो राज्यं न प्रतिपादयेत् ॥ तस्य धर्मस्तथा कीर्तिर्विनश्यति न संशयः ॥ ५ ॥
समर्थेन च पुत्रेण यो न याति पिता सुखम् ॥ अवश्यं पातकी सोऽपि विज्ञेयो भुवनत्रये ॥ ६ ॥ पितुर्भारक्षमः पुत्रो भारं नोद्वहते तु यः ॥
मातुरुच्चारवज्जातो द्विजिह्वो विषवर्जितः ॥ ७ ॥ स पुत्रो योऽधिकख्यातः पितुर्भवति भूतले ॥ प्रकाशयति सर्वत्र स्वकरैरिव भास्करः ॥ ८ ॥
पुत्रापनयजैर्दुःखै रात्रौ जागर्ति यत्पिता ॥ स पुत्रो नरकं याति यावदाभूतसंप्लवम् ॥ ९ ॥पितुर्वचनमादृत्य सर्वं यः कुरुते गृहे ॥ स याति देव

सायुज्यं स्तूयमानो दिवि स्थितैः ॥ १० ॥ सोऽहं प्रजाकृते पुत्र आसक्तः कर्मभिः क्षितौ ॥ न भुक्तं नैव सुप्तं तु स्वेच्छया पालने स्थितः ॥ ११ ॥
असमर्थे त्वयि सुत न प्राप्तं हि मया सुखम् ॥ विष्णुवासरभोक्तॄणां निग्रहे कृतबुद्धिना ॥ १२ ॥ केचिच्छैवे स्थिता मार्गे सौरे केचिद्व्यवस्थिताः ॥
विरिंचिमार्गगाश्चान्ये पार्वत्याश्च स्थिताः परे ॥ १३॥ सायं च प्रातरासीना अग्निहोत्रे व्यवस्थिताः ॥बालो युवा वा वृद्धो वा गुर्विणी वा कुमारिका॥
॥१४॥ सरोगो विकलो वापि न शक्नोति ह्युपोषितुम् ॥ इत्येवं जल्पितं यैस्तु तान्निरस्य समंततः॥१५॥ वचोभिस्तु पुराणोक्तैर्वासरैर्बहुभिस्त्वहम् ॥
संबोधयित्वा बहुशः प्रजानां सुखहेतवे ॥ १६ ॥ निगृह्य तान्हरिदिने निराहारान्करोमि च ॥ शास्त्रदृष्ट्या तु विदुषो मूर्खान्दंडनपूर्वकम्॥१७॥शास
यित्वा कृताः सर्वे निराहारा हरेर्दिने॥तेन मे न सुखं किंचिदवलीढं धरातले॥१८॥कच्चिन्न दुःखेन जनान्योजयेत्किल पुत्रक ॥ स्वेभ्यो वापि परेभ्यो
वा यो रक्षेच्च प्रजा नृपः ॥ १९ ॥ तस्यामी ह्यक्षया लोकाः पुराणेषु प्रकीर्तिताः ॥ सोऽहं प्रजाकृते सौम्य संस्थितो नात्मनः क्वचित् ॥ २० ॥
सौख्यमिच्छाम्यहं भोक्तुं मृगयादिसमुद्भवम् ॥ न पानद्यूतजं पुत्र कामयेऽहं कदाचन ॥ २१॥ एषु सक्तोऽचिरात्पुत्र विनाशं याति पार्थिवः ॥त्वत्प्र
सादादहं पुत्र मृगयाव्याजतोऽधुना॥ २२॥ गिरीन्वनानि सरितः सरांसि विविधानि च ॥ भोक्तुकामः प्रियान्कामांस्त्वयि भारं निवेश्य च ॥ २३ ॥
एतत्सर्वं समाख्यातं यत्स्थितं हृदये मम ॥ कृते तव महाकीर्तिरकृते नरकस्थितिः ॥ २४॥ धर्मांगद उवाच ॥ सर्वमेतत्करिष्यामि भुंक्ष्व भोगान्म
नोऽनुगान् ॥गुर्वीं राज्यधुरं तात त्वदीयामुद्धराम्यहम् ॥ २५ ॥ नहि मेऽन्यः स्मृतो धर्मस्त्वद्वाक्यकरणं विना ॥ पितुर्वाक्यमकुर्वाणः कुर्वन्धर्मा
नधो व्रजेत् ॥ २६ ॥ तस्मात्करिष्ये वचनं त्वदीयं प्रांजलिः स्थितः ॥ एवमुक्ते तु वचने राजा हृष्टो बभूव ह ॥ २७ ॥ गंतुकामो मृगान्भूयो
लब्ध्वा ज्ञात्वा वनं ततः ॥ धर्मांगदोऽपि हृष्टात्मा प्रजा आहूय चाब्रवीत् ॥२८ ॥ पित्रा नियुक्तो भवतां पालनाय हिताय च ॥ पितुर्वाक्यं मया
कार्यं सर्वथा धर्ममिच्छता ॥ २९ ॥ नान्यो हि धर्मः पुत्रस्य पितुर्वाक्यं विना प्रजाः ॥ मयि दंडधरे शास्ता न यमो भवति क्वचित् ॥ ३० ॥
एवं ज्ञात्वा तु युष्माभिः स्मर्तव्यो गरुडध्वजः ॥ ब्रह्मार्पणप्रयोगेण यजनीयो जनार्दनः ॥ ३१ ॥ ममत्वं परित्यज्य स्वजातिविहितेन च ॥
येन वो ह्यक्षया लोका भवेयुर्नात्र संशयः ॥ ३२ ॥ पितृमार्गाधिको ह्येष भवतां दर्शितः प्रजाः ॥ ब्रह्मार्पणक्रियायुक्ता भवंतु ज्ञानकोविदाः ॥
॥ ३३ ॥ न भोक्तव्यं हरिदिने पैत्रो मार्गस्तु शाश्वतः ॥ विशेषो हि मयाख्यातो भवतां ब्रह्मसंस्थितिः ॥ ३४ ॥ प्रयोक्तव्या च तत्त्वज्ञैः पुनरावृत्ति
दुर्लभा ॥ यदुपोष्यं हरिदिनं तदवश्यमिति स्थितिः ॥ ३५ ॥ अनुनीय प्रजाः सर्वाः समाश्वास्य पुनः पुनः ॥ न दिवा न च शर्वर्यां शेते धर्मां

गदः सदा ॥ ३६ ॥ सर्वत्र भ्रमते शौर्यात्कुर्वन्निष्कंटकां क्षितिम् ॥ पटहो रटते नित्यं मृगारिरिपुमस्तके ॥ ३७ ॥ अभुक्त्वा द्वादशीं लोका ममत्वेन
विवर्जिताः ॥ त्रिविधेषु च कार्येषु देवेशश्चिंत्यतां हरिः॥३८॥ हव्यकव्यवहो देवः स एव पुरुषोत्तमः ॥ सूर्ये यो हि कृशाकाशे विसर्गे जगतां पतिः॥३९॥
स्मर्त्तव्यो मनुजैः सर्वैर्धर्मकामार्थकामुकैः ॥स्वजातिविहितोऽप्येवं सन्मार्गे चैव माधवः ॥ ४० ॥स एव भोक्ता भोक्तव्यः स एव पुरुषोत्तमः॥विनियो
गस्तु तस्यैव सर्वकर्मसु युज्यते ॥ ४१ ॥ एवं रटंति विप्रेंद्राः पटहे मेघनिःस्वने ॥ एवं धर्ममवाप्याथ पिता धर्मांगदस्य हि ॥ ४२ ॥ ज्ञात्वा
पुत्रं क्रियोपेतमात्मनो ह्यधिकं द्विजाः ॥ उवाच भार्यां संहृष्टः स्थितां लक्ष्मीमिवापराम् ॥ ४३ ॥ संध्यावलि ह्यहं धन्यस्त्वं चापि वरवर्णिनी ॥
उभयोर्जनितः पुत्रः शशांकधवलः क्षितौ ॥४४॥कर्णाभ्यां श्रूयते मोक्षो न दृष्टः केनचित्क्वचित्॥सोऽस्माभिरधिकं प्राप्तो मोक्षः सत्पुत्रसंभवः ॥४५॥
पुत्रे विनयसंपन्ने वृत्तशौर्यसमन्विते ॥ प्रतापिनि वरारोहे पितुर्मोक्षो गृहे ध्रुवम् ॥ ४६ ॥ आनंदं ब्रह्मणो रूपं शतानंदः सुतेन यः ॥ पिता भवति
चार्वंगि सत्कर्मकरणैः शुभैः ॥ ४७ ॥ नैतत्साम्यं भवेद्देवि लोके स्थावरजंगमे ॥ सत्पुत्रः पितुरादाय भारमुद्वहते तु यः ॥ ४८ ॥सोऽहं गमिष्यामि
वनाय हृष्टो विहारशीलो मृगहिंसनाय ॥ स्वेच्छाचरश्चाथ विशालनेत्रे विमुक्तपापो जनरक्षणाय ॥ ४९ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे रुक्मांग
दधर्मांगदसंवादो नाम नवमोऽध्यायः ॥९॥ वसिष्ठ उवाच ॥ ततः प्राह विशालाक्षी भर्तुर्वाक्यं निशम्य सा ॥ सत्यमुक्तं त्वया राजन्पुत्रसौख्यात्परं
सुखम् ॥१॥ न भवेदिह राजेंद्र मुनीनां भाषितं यथा ॥ तुल्यं भवति लोकेऽस्मिन् विष्ण्वाख्यस्य परस्य हि॥२॥पुत्रे भारस्त्वया न्यस्तः सप्तद्वीपसमु
द्भवः ॥ मार्गीं हिंसां परित्यज्य यज्ञैरिष्ट्वा जनार्दनम् ॥ ३ ॥ भोगस्पृहां परित्यज्य सेवस्व सुरनिम्नगाम् ॥एतन्न्याय्यं भवति भो न न्याय्यो
मृगनिग्रहः ॥ ४ ॥ हृदये नखपातो हि वृद्धाया भूपते यथा ॥ तथा विषयसेवा हि पितॄणां पुत्रिणां विदुः ॥ ५ ॥ गृहे वापि हृषीकेशं पूज
यस्व महीपते ॥ निर्दोषमृगयूथानां न युक्तं सूदनं तव ॥ ६ ॥ अहिंसा परमो धर्मः पुराणे परिकीर्तितः ॥हिंसया वर्तमानस्य व्यर्थो धर्म्मो
भवेदिति ॥ कुर्वन्नपि वृथा धर्मान्यो हिंसामनुवतते ॥ ७ ॥ परैरुपहतां भूप नोपभुंजंति साधवः ॥ षड्विधं नृप ते प्रोक्तं विद्वद्भिर्जीवघात
नम् ॥ ८ ॥ अनुमोदयिता पूर्वं द्वितीयो घातकः स्मृतः ॥विश्वासकस्तृतीयोऽपि चतुर्थो भक्षकस्तथा ॥ पंचमः पाचकः प्रोक्तः षष्ठो भूपात्र विग्रही॥
हिंसया संयुतं धर्ममधर्मं च विदुर्बुधाः ॥ ९ ॥ न पापं कुरुते भूप पुत्रे भारं निवेश्य वै ॥ धर्मं समाश्रयन्सम्यक्संजातपलितः पिता ॥ १० ॥ परि
त्यज्य इमं भावं मृगहिंसासमुद्भवम् ॥ मृगशीला हि राजानो विनष्टाः शतशो नृप॥११॥तस्मादुष्टं हि तन्मन्ये यदत्र मृगपातनम् ॥ दया वरा मृगे

राज्ञां धार्मिणामपि दृश्यते ॥ १२ ॥ निवारितो मया हि त्वं हितबुद्ध्या पुनः पुनः ॥ एवं ब्रुवाणां तां भार्यां नृपो वचनमब्रवीत् ॥१३॥ नहि
हिंसे मृगान्देवि मृगव्याजेन कानने ॥ पर्य्यटिष्ये धनुष्पाणिः कुर्वन्कंटकशोधनम् ॥ १४॥ जनमध्ये सुतो मेऽस्तु काननेऽहं वरानने॥श्वापदेभ्यश्च
दस्युभ्यः प्रजा रक्ष्या महीभृता॥१५॥आत्मनावाथ पुत्रेण गोपनीयाःप्रजा शुभे॥प्रजा अरक्षन्नृपतिः सधर्म्मोऽपि व्रजत्यधः॥१६॥सोऽहं रक्षणसुहि
श्यगमिष्यामि वनं प्रिये ॥ विमुक्तभावोऽहमिति मेरुशृंगे रविर्यथा ॥ १७ ॥एवमुद्दिश्य तां राजा आरुरोह हयोत्तमम्॥ दोषापतिसमप्रख्यं निर्दोषं
क्षितिभूषणम् ॥१८॥ देववाहसमं रूपे प्रभंजनसमं जवे ॥ धरामाहत्य भूपालो दत्वा तं दक्षिणं करम् ॥१९॥ सहस्रकोटिदातारं कामिनीकुचपीड
नम् ॥ अशोकपल्लवाकारं वज्रांकुशविरोहणम् ॥ २० ॥ संप्रतस्थे महीपालश्चालयानो महीतलम् ॥साधयानो ययौ देशान्काननं स नृपोत्तमः॥२१॥
वाजिवेगेन निर्द्धूता वारणाः स्यंदना हयाः ॥ पदातयो निपेतुस्ते मूर्च्छिताः क्षितिमण्डले॥२२॥स राजा सहसा प्राप्तो मुनीनामाश्रमं परम् ॥ योज
नानां समुत्तीर्य शतमष्टोतरं नृप॥ २३ ॥ प्रविवेशाश्रमं रम्यं कदलीखण्डमण्डितम् ॥ अशोकबकुलोपेतं पुन्नागसरलावृतम ॥ २४ ॥ मातुलिंगैः
कपित्थैश्च खर्जूरैः पनसादिभिः ॥ नारिकेलैस्तथा तालैः केतकैः सिंदुवारकैः ॥ २५ ॥ चन्दनैः सतमालैश्च सालैः पिप्पलचंपकैः ॥क्रमुकैर्दाडिमै
श्चैव धात्रीवृक्षैः सहस्रशः ॥ २६ ॥ निम्बवृक्षैश्च बहुशस्तथाम्रैर्लोध्रपादपैः ॥ परिपक्वफलैर्नम्रैः खगारूढैः समावृतम् ॥ २७ ॥ हृद्येन वायुना युक्तं
पुष्पगन्धावृतेन हि ॥ पश्यमानो मुनिं राजा ददर्श हुतभुक्प्रभम् ॥ २८ ॥ वामदेवं द्विजवरं बहुशिष्यसमावृतम् ॥ अवरुह्य हयाद्दृष्ट्वा प्रणनाम च
सादरम् ॥ २९ ॥ तेनापि मुनिना राजा ह्यर्घाद्यैरभिपूजितः ॥ उपविश्यासने कौशे प्राह संहृष्टया गिरा ॥ ३० ॥ अद्य मे पातकं क्षीणं संप्राप्तं
कर्मणः फलम् ॥ दृष्ट्वा तव पदांभोजं सम्यग्ध्यानपरस्य च ॥३१॥ तच्छ्रुत्वा वचनं तस्य रुक्मांगदमहीपतेः ॥ संपृष्ट्वा कुशलं प्राह वामदेवो मुदा
न्वितः ॥ ३२ ॥ राजंस्त्वयातिपुण्येन विष्णुभक्तेन वीक्षितः ॥ ममाश्रमो महाभाग पुण्यो जातो धरातले ॥३३॥ कस्तेऽन्यस्तुल्यतामेति पार्थिवो
धरणीतले ॥ येन वैवस्वतो मार्गो भग्नो निर्जित्य वै यमम् ॥ ३४ ॥ प्रापितः सकलो लोको वैकुंठं पदमव्ययम् ॥ उपोषयित्वा नृपते
द्वादशीं पापनाशिनीम् ॥ ३५ ॥ चतुर्भिः शोभनोपायैः प्रजाः संयम्य भूतले। स्वकर्मस्था विकर्मस्था नीता मधुभिदः पदम्॥३६॥सोऽस्माकं द्रष्टु
कामानां संप्राप्तो दर्शनं नृप ॥ श्वपचोऽपि महीपाल विष्णुभक्तो द्विजाधिकः ॥ ३७ ॥ विष्णुभक्तिविहीनस्तु द्विजोऽपि श्वपचाधिकः ॥ दुर्लभा
भूप राजानो विष्णुभक्ता महीतले ॥ ३८ ॥ नावैष्णवो भवेद्राजा क्षितिलक्ष्मीप्रसाधकः ॥ यो न राजा हरेर्भक्तो देवेष्वन्येषु भक्ति

मान् ॥ ३९ ॥ यथा जारे पतिं त्यक्त्वा रता स्त्री स तथा नृपः ॥ एवं व्यतिक्रमस्तस्य नृपतेर्भवति ध्रुवम् ॥ ४० ॥ धर्मस्यार्थस्य
कामस्य प्रज्ञायाश्च गतेरपि ॥ तत्त्वया न्यायविहितं कृतं विष्णोः प्रपूजनम् ॥ ४१ ॥ तेन धन्योऽसि नृपते वयं धन्यास्तवेक्ष
णात् ॥ इत्येवं भाषमाणं तु वामदेवं नृपोत्तमः ॥ ४२॥ उवाचावनतो भूत्वा प्रकृत्या विनयान्वितः ॥ क्षामये त्वा द्विजश्रेष्ठ नाहमेतादृशो विभो
॥ ४३ ॥ त्वत्पादपांसुना तुल्यो नाहं विप्र भवामि हि ॥न विप्रेभ्योऽधिका देवा भवंतीह कदाचन॥ ४४ ॥ परितुष्टैर्द्विजैर्भक्तिर्जन्तोर्भवति माधवे॥
द्वेष्यो भवति तै रुष्टैः सत्यमेतन्मयेरितम् ॥ ४५ ॥ तमाह वामदेवस्तु ब्रूहि किं ते ददाम्यहम् ॥ नादेयं विद्यते राजन्गृहायातस्य तेऽधुना॥४६॥
अभीष्टं हि महीपाल यो ददाति महीतले ॥ पटहं वासरे विष्णोः प्रजाभोजनवारणम् ॥ ४७ ॥ तमाह नृपतिर्विप्रं कृतांजलिपुटस्तदा ॥
प्राप्तमेव मया सर्वं त्वदंघ्रियुगलेक्षणात् ॥ ४८ ॥ ममैकः संशयो ब्रह्मन् वर्तते बहुकालतः ॥ तं पृच्छामि द्विजाग्र्यं त्वां सर्वसंदेहभञ्जनम्
॥४९॥ त्रैलोक्यसुन्दरी भार्या मम केन सुकर्मणा ॥ या विलोकयते दृष्ट्या मां सदा मन्मथाधिकम् ॥५०॥यत्र यत्र पदं दवी ददाति वरवर्णिनी॥
तत्र तत्र निधानानि प्रकाशयति मेदिनी ॥ ५१ ॥ यस्याश्चांगं जराहीनं वलीपलितवर्जितम् ॥ सदा भाति मुनिश्रेष्ठ शारदेंदुप्रभा यथा॥५२॥
विनाग्निनापि सा विप्र साधयत्येव षड्रसम् ॥ अन्नं पचति यत्स्वल्पं तस्मिन्भुञ्जंति कोटयः ॥ ५३ ॥ पतिव्रता दानशीला सर्वभूतसुखावहा ॥
नावज्ञा क्रियते ब्रह्मन् वाक्येनापि प्रसुतया ॥ ५४ ॥ यस्यां जातस्तु तनयो ममाज्ञायां स्थितः सदा ॥ अहमेव धरापृष्ठे पुत्री द्विजवरोत्तम
॥ ५५ ॥ यस्य पुत्रः पितुर्भक्तो ह्यधिको गुणसंचयैः ॥ एकद्वीपपतिश्चाहं विदितो धरणीतले ॥ ५६ ॥ पुत्रो ममाधिको जातः सप्तद्वीपप्रपा
लकः॥ मदर्थे येन विप्रेंद्र समानीता नृपात्मजा ॥ ५७ ॥ विद्युल्लेखेति विख्याता रणे जित्वा महीभुजः ॥ अथ तेनाधिपतिना रूपद्रविणशालिना
॥ ५८ ॥ षण्मासेन रणे जित्वा कृत्वा सर्वान्निरायुधान् ॥यो गत्वा प्रमदाराज्यं जित्वा ताः प्रमदा रणे ॥ ५९ ॥ आजहार शुभास्तासां मध्यादष्टौ
वरांगनाः ॥ प्रददौ मयि ताः सर्वाः प्रणम्य च पुनः पुनः॥६० ॥ यानि वासांसि दिव्यानि यानि रत्नानि भूतले ॥ तानि मे प्रददौ पुत्रो जनन्या
तूपवर्णितः ॥ ६१ ॥ एकाह्ना पृथिवीं सर्वामतीत्य बहुयोजनाम् ॥ पुनरायाति शर्वर्यां मत्पादाभ्यंगकारणात् ॥ ६२ ॥ निशीथेंऽगानि संवाह्य
द्वारि तिष्ठति दंशितः ॥ प्रबोधयन्प्रेष्यजनान्निद्रया संकुलेंद्रियान् ॥ ६३ ॥ तथायं मे मुनिश्रेष्ठ देहो रोगविवर्जितः ॥ अप्रमेयं मम सुखं वशगा
हि प्रिया गृहे ॥ ६४ ॥ वाजिनो वारणाश्चैव धनधान्यमनंतकम् ॥ वर्तते हि जनः सर्वो ममाज्ञापालकः क्षितौ ॥ ६५ ॥ केन कर्मप्रभावेण ममेदं

सांप्रतं सुखम् ॥ इह जन्मकृतं वापि परजन्मकृतं तथा ॥ ६६ ॥ मम पुण्यं वद ब्रह्मन् विचार्य स्वमनीषया ॥ ६७ ॥ देहे न रोगो वशगा
प्रिया च गृहे विभूतिर्नृहरौ च भक्तिः ॥ विद्वत्सु पूजा द्विजदानशक्तिर्मन्येऽहमेतत्सुकृतप्रसूतम् ॥ ६८ ॥इति श्रीबृहन्नारदीयपुराणोत्तरभागे रुक्मांगद
वामदेवसंवादो नाम दशमोऽध्यायः ॥ १० ॥ वसिष्ठ उवाच ॥ तच्छ्रुत्वा नृपतेर्वाक्यं महाज्ञानी मुनीश्वरः ॥ चिंतयित्वा क्षणं ज्ञात्वा कारणं तमु
वाच ह ॥१॥ वामदेव उवाच ॥ पुरा त्वमवनीपाल शूद्रजातिसमुद्भवः ॥ दारिद्र्येण पराभूतो दुष्टया भार्यया तथा ॥ २ ॥ परसेवनया चैव
वेतनेन भुजिक्रिया ॥ निवसन्दुःखसंततो बहुवर्षाणि पार्थिव ॥ ३ ॥ कदाचिद्द्विजसंसर्गात्तीर्थयात्रां गतो भवान् ॥ततः सर्वाणि तीर्थानि परिक्रम्य
महीपते ॥ ४ ॥ द्विजसेवापरो जातो मथुरां पुण्यरूपिणीम् ॥ तत्र स्नातं त्वया विप्रसंगेन यमुनाजले ॥ ५ ॥ विश्रांतिसंज्ञके तीर्थे सर्वतीर्थोत्तमो
त्तमे ॥ मंदिरे च वराहस्य कथ्यमानां कथां नृप ॥ ६ ॥ पुराणोक्तां च शुश्राव अशून्यशयनव्रतम् ॥ चतुर्भिः पारणैर्यस्य निष्पत्तिस्तु विधीयते॥
॥ ७ ॥ येन चीर्णेन देवेशो जीमूताभः प्रसीदति ॥ लक्ष्मीभर्ता जगन्नाथो निःशेषाघौघनाशनः ॥ ८ ॥ तत्कृतं भवता राजन्पुनरभ्येत्य मंदिरम् ॥
अशून्यशयनं पुण्यं गृहे वृद्धिकरं परम् ॥९॥ अकृत्वेदं महाराज व्रतं पातकनाशनम् ॥ गार्हस्थ्यमनुतिष्ठेत वंध्यावन्निष्फलो भवेत् ॥ सुखमीदृग्विधं
लोके दुर्लभं प्रतिभाति मे॥१०॥श्रावणस्य तु मासस्य द्वितीयायां महीपते ॥ ग्राह्यमेतद्व्रतं पुण्यं जन्ममृत्युजरापहम् ॥ ११ ॥ लक्ष्मीयुक्तो जगन्नाथः
पूजनीयोऽत्र पार्थिव ॥ फलैः पुष्पैस्तथा धूपैश्चारुरक्तानुलेपनैः॥ शय्यादानैर्वस्त्रदानैस्तथा ब्राह्मणभोजनैः॥१२॥ तत्त्वया सर्वमेतद्धि कृतं राजन्सुदुस्त
रम् ॥ तस्यैव कर्मणः पुष्टिरशून्यस्य महीपते ॥ इमानेवाग्रतः पुण्यास्त्वयोक्तान्विस्तराच्छृणु ॥ १३ ॥ नाप्रसन्ने जगन्नाथे भवेयुरिति निश्चितम् ॥
पूर्वजन्मनि देवेशस्त्वयाशून्येन पूजितः॥१४॥ इह जन्मनि राजेंद्र द्वादश्यार्चयसे हरिम् ॥अवश्यं प्राप्स्यसे राजन् विष्णोः सायुज्यतां ध्रुवम्॥१५॥
एष प्रश्नो मया राजन्व्याख्यातस्ते सुमंगलः ॥ संपदां प्रभवोपेतो ज्ञातेरुत्कर्षणार्थकः॥ १६॥ किमन्यत्ते महीपाल ददामीह करोमि च ॥ अवश्यं
सर्वयोग्योऽसि भक्तोऽसि त्वं जनार्दने ॥१७॥ राजोवाच ॥ उत्सुकोऽहं द्विजश्रेष्ठ मंदरं पर्वतं प्रति॥तत्राश्चर्याण्यनेकानि द्रष्टुकामस्तवाज्ञया॥ १८ ॥
लघुर्भूत्वा गुरुं त्यक्त्वा पुत्रोपरि द्विजोत्तम ॥ राज्यशासनजं भारं दुर्वहं यच्च भूमिपैः॥१९॥ सोऽहं स्वेच्छाचरो यातो मत्कृत्यं तनयश्चरेत्॥तच्छ्रुत्वा
वचनं राज्ञो वामदेवोऽब्रवीदिदम् ॥ २० ॥ एतद्धि परमं कृत्यं पुत्रस्य नृपपुंगव ॥ यत्क्लेशात्पितरं प्रेम्णा विमोचयति सर्वदा ॥ २१ ॥
पितुर्वचनकारी च मनोवाक्कायशक्तितः ॥ तस्य भागीरथीस्नानमहन्यहनि जायते ॥ २२ ॥ निरस्य पितृवाक्यं तु व्रजेत्स्नातुं सुरा

पगाम् ॥ नो शुद्धिस्तस्य पुत्रस्य इतीत्थं वैदिकी श्रुतिः ॥ २३ ॥ स त्वं गच्छ यथाकामं कृतकृत्योऽसि भूपते ॥ हरिप्रसादात्ते
जातो वंशे पुत्रः स पुण्यकृत् ॥ २४ ॥ एवमुक्ते तु मुनिना समारुह्य तुरंगमम् ॥ ययौ शीघ्रगतिः श्रीमान्सदागतिरिव स्वयम्
॥ २५ ॥ वीक्ष्यमाणो गिरीन्सर्वान्वनानि सरितस्तथा ॥ सर्वाश्चर्याणि राजेंद्रः सरांस्युपवनानि च ॥ २६ ॥ सोऽचिरेणैव कालेन संप्राप्तो
मंदराचलम् ॥ भ्रामयित्वा गिरिं श्वेतं गंधमादनमेव च ॥ २७ ॥ अतीत्य च महामेरुं दृष्ट्वा चैवोत्तरान्कुरून् ॥ शतसूर्यप्रतीकाशं सर्वतः कांचना
वृतम् ॥ २८ ॥ संघृष्टं हरिबाहुभ्यां स्रवंतं कांचनं रसम् ॥ तद्भूभागं नगाकीर्णं बहुधातुविभूषितम् ॥ २९ ॥ बहुनिर्झरसंयुक्तं बहुकंदरभूषितम् ॥
निम्नगायुतसंपूर्णं धौतं गंगाजलैः शुभैः ॥ ३० ॥ विश्वस्तैर्युवतीवृन्दैः कांताशर्मोपसेविभिः ॥ घटप्रमाणैर्नृपते परिपक्वैः सुगंधिभिः ॥ ३१॥फलैर्युव
तिसंभूतैः कुचैरिव विभूषितम् ॥ द्विरेफध्वनिसंयुक्तं कोकिलस्वरनादितम् ॥ ३२ ॥ अनेकसत्त्वविरुतैः समंतान्नादितं गिरिम् ॥ संपश्यमानो नृप
तिर्विवेश स महागिरिम् ॥ ३३ ॥ आरोढुकामस्तु कुतूहलात्तमन्वेषयन्केन पथा प्ररोहम् ॥ स वीक्षते यावदसौ समंतात्तावत्समस्तं द्रुमपक्षिसंघम् ॥
॥३४॥ विसर्पमाणं ध्वनिना गृहीतं विमोहिनीवक्रसमुद्भवेन ॥ उपप्लवंतं तरसा महीपस्तेनैव सार्द्धं स जगाम तूर्णम् ॥ ३५॥ तस्याऽपि कर्णे ध्वनि
राविवेश विमोहिनीवक्रसमुद्भवो यः ॥ विमोहितो येन विमुच्य घाहं त्रिविक्रमेणेव विलंघ्यमानम् ॥ ३६ ॥ मार्गं गिरेर्मोहिनिगीतमुग्धं
क्षणेन राजा सहसा ददर्श ॥ गिरौ स्थितां तप्तसुवर्णभासं कामस्य यष्टीमिव निर्मितां च ॥ ३७ ॥ शक्रस्य लिंगं गगने प्रसक्तं
संपूजयंतीमिव लोकसूत्यै ॥ क्षमास्वरूपामिव वै रसाया गिरेः सुताया इव रूपराशिम् ॥ ३८ ॥ सिंधोस्तु वेलामिव रूपयुक्तां
तस्यास्तनुं वै रतिमंदिराख्याम् ॥ विकर्षमाणां सहसा त्रिनेत्रं लिंगाश्रयं देवविनोदनार्थम् ॥ ३९ ॥ तत्पुण्यकर्तुर्मनसाभिलाषां व्यव
स्थितो मोहिनिरूपदर्शी ॥ विमोहितोऽसौ निपपात राजा विमोहिनीकामशरेण विद्धः ॥ ४० ॥ ज्वरेण तीव्रेण गृहीतदेहः समीपमस्याः
स ससर्प शीघ्रम्॥विसर्पिणं भूमिपतिं सुनेत्रा विलोकयामास कटाक्षदृष्ट्या ॥ ४१ ॥ विमुच्य वीणां विरराम गीतात्प्राप्तं च कार्यं सहसैव मेने ॥
विधूनयंती मृगपक्षिसंघान्सुवाससा गंडभुजौ निवार्य ॥ ४२ ॥ शिलीमुखान् श्वाससुगंधमुग्धान् जगाम देवी नृपतेः समीपम् ॥ त्यक्त्वा हरं
पूज्यतमं सुलिंगं गत्वा तु पार्श्वं तमुदारचेष्टा ॥ ४३ ॥ विमोहिनी नीरजपत्रनेत्रा उवाच वाक्यं मधुरं मनोज्ञम् ॥रुक्मांगदं कामशराभितप्तमुत्तिष्ठ
राजन्वशगा तवाहम् ॥४४ ॥किं मूर्च्छया देहमिमं क्षिणोषि यस्त्वं धराभारमिमं महांतम् ॥ तृणीकृतं भूप समुद्वहेथा यन्मामकं रूपमवेक्ष्य हारि ॥

॥ ४५॥ किं मुह्यसे दुर्बलगौरिवेह पंके निमग्ना सुदृढो भव त्वम् ॥ धीरोऽसि वीरोऽसि विडंबयेथाः किमर्थमात्मानमुदारचेष्टम् ॥ ४६ ॥ यद्यस्ति
वांछा तव भूपतीश ममानुकूले सुरतेऽतिहृद्ये॥ प्रदाय दानं च सुधर्मयुक्तं भुंक्ष्व स्वदासीमिव मां रतिज्ञाम् ॥ ४७ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरे
भागे मोहिनीदर्शनं नाम एकादशोऽध्यायः ॥ ११ ॥ वसिष्ठ उवाच ॥ व्याहृते शोभने वाक्ये मोहिन्या नृपतिस्तदा ॥ उन्मील्य नेत्रे
राजेंद्र शतपत्रनिभे तथा ॥ १ ॥ सगद्गदमुवाचेदं मुग्धो मोहिनिदर्शनात् ॥ मया बाले सुबहुशः पूर्णचंद्रनिभाननाः ॥ २ ॥ दृष्टास्तथानुभूताश्च
नेदृग्दृष्टं वपुः क्वचित् ॥ यादृशं त्वं धारयसे रूपं लोकविमोहनम् ॥ ३ ॥ सोऽहं दर्शनमात्रेण त्वदीयेन वरानने ॥ मनोभवशरैर्विद्धः
पतितः सहसा क्षितौ ॥ अजल्पितवचो देवि मोहितस्तत्र तेजसा ॥ ४ ॥ कुरु प्रसादं करभोरु मह्यं दास्यामि सर्वं तव चित्तसंस्थम् ॥ नादे
यमस्तीह जगत्त्रयेऽपि तवानुरागेण निबद्धचेतसः ॥ ५ ॥ इमां धरां भूधरभूषितांगीं समुद्रवस्त्रां शशिसूर्यनेत्राम् ॥ घनस्तनीं व्योमसुबद्धदेहां
निष्कानना सुंदरि वामशीलाम् ॥ ६ ॥ पातालगुह्यां बहुवृक्षरोम्णीं सताधरां सुभ्रु तवास्मि दाता ॥ सकोशबद्धां गजवाजिपूर्णां समन्त्रिहृद्यां
नगरैः समेताम् ॥ ७ ॥आत्मानमपि दास्यामि तव चार्वंगि संगमे ॥ किं पुनर्द्धनरत्नादि प्रसीद मम मोहिनि ॥८॥ नृपस्य वचनं श्रुत्वा मोहिनी
मधुराक्षरम् ॥ समुवाच स्मितं कृत्वा तमुत्थाप्य नृपं तदा ॥ ९ ॥ न धरां भूधरोपेतां वरये वसुधाधिप ॥ यद्वदिष्याम्यहं काले तत्कार्यमविशंकया
॥ १० ॥ भजिष्यामि न संदेहः कुरुष्व समयं मम ॥ राजोवाच ॥ येन संतुष्यसे देवि समयं तं करोम्यहम् ॥ ११ ॥दशावस्थां गतो देहो मम
त्वत्संगमं विना ॥ १२ ॥ मोहिन्युवाच ॥ दीयतां दक्षिणो हस्तो बहुधर्मकरस्तव ॥ येन मे प्रत्ययो राजन् वचने तावके भवेत् ॥ १३ ॥ राजा त्वं
धर्मशीलोऽसि सत्यकीर्तिर्जगत्त्रये ॥ न वक्तास्यनृतं काले मार्गोऽयं लौकिकः कृतः ॥१४॥ एवं ब्रुवाणां राजेंद्रो मोहिनीं हृच्छयातुरः ॥ अब्रवीन्नृप
तिस्तां तु सुप्रसन्नमना नृप ॥ १५॥ जन्मप्रभृति वामोरु नानृतं भाषितं मया॥ स्वैरेष्वपि विहारेषु कदापि वरवर्णिनि ॥ १६॥अथवा व्याहृतैर्वाक्यैः
किमेभिः प्रत्ययाक्षरैः ॥ दत्तो ह्येष मया हस्तो दक्षिणः पुण्यलांछनः ॥१७ ॥ यन्मया सुकृतं किंचित्कृतमाजन्म सुन्दरि ॥ तत्सर्वं तव वामोरु
यदि कुर्यान्न ते वचः॥१८॥अन्तरे ह्येष दत्तो मे धर्मो भार्या भवांगने॥तव रूपेण मे क्षोभः सहसा प्रत्युपस्थितः॥१९॥ऋतध्वजसुतश्चाहं नाम्ना रुक्मां
गदो नृपः॥इक्ष्वाकुवंशसंभूतः सुतो धर्मांगदो मम॥२०॥मृगव्याजेन गहनं प्रविष्टश्चारुलोचने॥ततो दृष्टो वने ह्यो वामदेवाश्रमो मया॥२१॥मुनिना
जल्पितं तत्र किंचित्तेन विसर्जितः॥आरुह्य वाहनश्रेष्ठं मन्दरं द्रष्टुमागतः॥२२॥भ्रममाणो गिरिवरं कुतूहलमनास्तदा॥प्राप्तं मच्छ्रवणे गीतं तव वक्त्रवि

निर्गतम् ॥२३॥ तेन गीतेन चाकृष्टस्त्वत्समीपमुपागतः ॥ दृष्टेः पथमनुप्राप्ता मम त्वं चारुलोचने॥२४॥ ततोऽहं मूर्च्छितो देवि विसंज्ञः पतितः क्षितौ ॥ सांप्रतं चेतनायुक्तस्तव वाक्यामृतेन हि ॥ २५ ॥ पुनर्जातमिवात्मानं मन्येऽहं लोकमोहिनि ॥ प्रत्युत्तरप्रदानेन प्रसादं कर्त्तुमर्हसि॥२६॥ नृपेणैव समुद्दिष्टा मोहिन्याहोत्तरं वचः॥अहं ब्रह्मभवा राजंस्त्वदर्थं समुपागता॥२७॥श्रुत्वा कीर्तिं स्मरोपेता मंदरं कनकाचलम्॥परित्यज्य सुरान्सर्वान्विश्वंभरपुरोगमान् ॥ २८॥ समाहितमनास्त्वत्र तपस्यानिरता स्थिता ॥ संपूजयंती देवेशं गीतदानेन शंकरम् ॥२९॥ गीतदानमहं मन्ये सुराणामतिवल्लभम्॥सर्वदानाधिकं भूप ह्यनंतगतिदायकम्॥३०॥ येन तुष्टः पशुपतिः सद्यः प्रत्युपकारकः ॥ ईप्सितोऽयं मया प्राप्तो भवानवनिपालकः ॥ ३१ ॥ अभिप्रीतोऽसि मे राजन्नभिप्रीता ह्यहं तव ॥ ३२ ॥ तमेव मुक्त्वा द्विजराजवक्त्रा करं गृहीत्वा नृपतेस्तु वेगात्॥उत्थापयामास धराशयानमिंद्रस्य यष्टीमिव मोहिनी सा ॥३३॥इति श्रीबृहन्नारदीयपुराणोत्तरभागे समयकरण नाम द्वादशोऽध्यायः॥ १२॥वसिष्ठ उवाच॥उत्थापयित्वा राजानं मोहिनी वाक्यमब्रवीत् ॥ मा शंकां कुरु राजेंद्र कुमारीं विद्धयकल्मषाम्॥१॥उद्वहस्व महीपाल गृह्योक्तविधिना हि माम्॥ अनूढा कन्यका राजन् यदि गर्भं बिभर्ति हि ॥२॥ प्रसूयति दिशाकीर्तिं सर्ववर्णविगर्हितम् ॥ चांडालयोनयस्तिस्रः पुराणे कवयो विदुः ॥ ३ ॥ कुमारीसंभवा त्वेका सगोत्रापि द्वितीयका ॥ ब्राह्मण्यां शूद्रजनिता तृतीया नृपपुंगव ॥ ४ ॥ एतस्मात्कारणाद्राजन् कुमारीं मां समुद्वह ॥ ततस्तां चपलापांगीं नृपो रुक्माङ्गदो गिरौ॥५॥ उद्वाह्य विधिना युक्तस्तस्थौ राजा हसन्निव॥राजोवाच ॥न तथा त्रिदिवप्राप्तिः प्रीणयेन्मां वरानने ॥ ६॥ तव प्राप्तिर्यथा देवि मन्दरेऽस्मिन्सुखाय वै ॥ मन्ये पुरंदरादेवि ह्यात्मानमधिकं क्षितौ ॥७॥ त्रैलोक्यसुन्दरीं प्राप्य भार्यां त्वां चारुलोचने ॥ तस्माद्यदनुकूलं ते तत्करोमि प्रशाधि माम् ॥८॥ इहैव रमसे बाले अथवा मंदिरे मम ॥ मलये मेरुशिखरे वने वा नन्दने वद ॥ ९ ॥ तच्छ्रुत्वा नृपतेर्वाक्यं मोहिनी मधुरं नृप ॥ उवाचानुशयं राजन्वचनं प्रीतिवर्द्धनम् ॥ १० ॥ सपत्नीनां कटाक्षाणां क्षतानि नगरे मम ॥ भविष्यंति महीपाल कथं गच्छामि ते पुरम् ॥ ११ ॥ मास्म सीमंतिनी काचिद्भवेद्धि क्षितिमण्डले ॥ यस्याः सपत्नीप्रभवं दुःखमामरणं भवेत् ॥ १२ ॥ साहं लब्धा महीपाल मनसा वशगा तव ॥ ज्ञात्वा सपत्नीप्रभवं दुःखं भर्ता कृतो मया ॥ १३ ॥ वत्स्यामि पर्वतश्रेष्ठे बह्वाश्चर्यसमन्विते ॥ न त्वं वससि राजेंद्र संध्यावल्या विना क्वचित् ॥१४॥ तस्यास्त्वं विरहे दुःखी सपुत्राया भविष्यसि ॥ दुःखेन भवतो राजन्भूरि दुःखं भवेन्मम ॥१५॥ यत्रैव भवतः सौख्यं तत्राहमपि संस्थिता ॥ यत्र त्वं रंस्यसे राजंस्तत्र मे मंदरो गिरिः ॥१६ ॥ भर्तृस्थाने हि वस्तव्यमृद्धिहीनेऽपि भार्यया ॥ स

मेरुः कांचनमयः सन्निधाने प्रचक्षते ॥ १७ ॥ मनोरथो नाम मेरुर्यत्र त्वं रमसे विभो ॥ भर्तृस्थानं परित्यज्य स्वपितुर्वापि वर्जितम् ॥ १८॥ पितृस्थानाश्रयरता नारी तमसि मज्जति ॥ सर्वधर्मविहीनापि नारी भवति सूकरी ॥ १९॥ एवं जानाम्यहं दोषं कथं वत्स्यामि मंदरे ॥ गमिष्यामि त्वया सार्द्धमीशस्त्वं सुखदुःखयोः ॥ २० ॥ मोहिन्यास्तद्वचः श्रुत्वा राजा संहृष्टमानसः ॥ परिष्वज्य वरारोहामिदं वचनमब्रवीत् ॥ २१ ॥ भार्याणां मम सर्वासामुपरिष्टाद्भविष्यसि ॥ मा शंङ्कां कुरु वामोरु यतो दुःखं भविष्यति ॥ २२ ॥ जीवितादधिका सुभ्रु भविष्यसि गृहे मम ॥ एहि गच्छाव तन्वंगि सुखाय नगरं प्रति ॥ २३ ॥ भुंक्ष्व भोगान्मया सार्द्धं तत्रस्था स्वेच्छया प्रिये ॥ २४ ॥ सा त्वेवमुक्ता शशिगौरवक्त्रा रुक्मांगदेनात्मविनाशनाय ॥ संप्रस्थिता नूपुरघोषयुक्ता विकर्षयन्ती गिरिजातशोभाम् ॥ २५॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीसंमोहनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ वसिष्ठ उवाच ॥ संप्रस्थितावुभौ राजन्गिरिशीर्षाद्धरातलम् ॥ पश्यमानौ बहून्भावान्गिरिजातान्मनोहरान् ॥ १ ॥ केचिद्विद्रुमसंकाशाः केचिद्रजतसन्निभाः ॥ केचिन्नीलसमप्रख्याः केचित्कांचनसत्विषः ॥ २ ॥ केचित्स्फाटिकवर्णाभा हरितालनिभाः परे ॥ अन्योन्यश्लेषतां प्राप्तौ सकलैः स्थावरैरिव ॥ ३ ॥ संप्राप्य वसुधां भूपो ह्यपश्यद्वाजिनां वरम् ॥ खन्यमानं खुरेणोर्वीं कुलिशाभवेगिना ॥ ४ ॥ तस्य दारयतः पृथ्वीं सुतीक्ष्णेन खुरेण हि॥ गृहगोधाभवत्तस्मिन् भूभागांतर्गता किल ॥ ५ ॥ निर्गच्छमाना नृपते खुरेण विदलीकृता ॥ विदीर्यमाणां नृपतिरपश्यत्स दयापरः ॥ ६ ॥ अभ्यधावत वेगेन हा हतेति प्रियां वदन् ॥ ततः स वृक्षपत्रेण कोमलेन महीपतिः ॥ ७ ॥ उत्सार्य तां खुरादाशु प्राक्षिपत्तृणशाद्वले ॥ ततस्तु मोहिनीं प्राह प्रेक्ष्य मूर्च्छांगतां हि ताम् ॥ ८ ॥ शीघ्रमाहर चार्वंगि जलं जलजलोचने ॥ येन मूर्च्छागतां सिंचे गृहगोधां विमर्दिताम् ॥ ९ ॥ सा भर्तुर्वचनाच्छीघ्रमानयच्छीतलं जलम् ॥ तेनाभ्यषिंचन्नृपतिर्गृहगोधां विमूर्च्छिताम् ॥ १० ॥ अवाप चेतनां राजन् शीतलाज्जलसेचनात् ॥ अभिघातेषु सर्वेषु शस्तं वारिप्रसेचनम् ॥ ११ ॥ अथवा छिन्नवस्त्रेण सहसा बंधनं हितम् ॥ संप्राप्तचेतना भूप गोधा वचनमब्रवीत् ॥ १२ ॥ राजानमग्रतो वीक्ष्य वेदनार्ता शनैः शनैः ॥ रुक्मांगद महाबाहो निबोध मय चेष्टितम् ॥ १६ ॥शाकले नगरे रम्ये भार्याहं ह्यग्रजन्मनः ॥ रूपयौवनसंपन्ना तस्य नातिप्रिया विभो ॥ १४ ॥ सदा विद्वेषसंयुक्तो मयि निष्ठुरजल्पकः ॥ नान्यस्य कस्यचिद्द्वष्टा स तु मे नृपते पतिः॥१५॥ ततोऽहं क्रोधसंयुक्ता वशीकरणलंभनात् अपृच्छं प्रमदा राजन्यास्त्यक्ताः पतिभिः किल ॥ १६ ॥ ताभिरुक्ता ह्यहं भूप वश्यो भर्ता भविष्यति ॥ अस्माकं प्रत्ययो जातो भर्तृत्यागावमान

नात् ॥ १७ ॥ प्रव्रज्याभेषजैर्वश्या जाता हि पतयस्तु नः ॥ त्वं पृच्छ तां वरारोहे दास्यते भेषजं शुभम्॥१८॥न विकल्पस्त्वया कार्यो भविता
दासवत्पतिः॥ततोऽहं त्वरितं गत्वा तासां वाक्येन भूपते॥१९ ॥प्रासादः कथितस्तस्याः पृच्छंत्या मम मानवैः॥शतस्तंभसमायुक्तः कांतिमत्सुधया
युतः ॥ २० ॥ प्रविश्य तं सुतेजस्कामपश्यं ब्रह्मचारिणीम् ॥ प्रावृतां दीर्घवस्त्रेण सन्ध्यारागसवर्णिनीम् ॥२१॥ दीर्घाभिः सा जटाभिस्तु संवृता
दीप्तिसंयुता ॥ परिचारकैस्तु संयुक्ता वीज्यमाना शनैः शनैः ॥ २२॥ अक्षसूत्रकरा सा तु जपन्ती भगमालिनी ॥ सर्ववश्यकरं मन्त्रं क्षोभकं प्रत्य
यावहम् ॥ २३ ॥ ततोऽहं प्रणता भूत्वा पद्भ्यां न्यस्यांगुलीयकम् ॥ मृदुकांचनसंभूतं अतिरिक्तप्रभान्वितम् ॥ २४ ॥ तते हृष्टाऽभवद्दृष्ट्वा पदस्थं
चांगुलीयकम् ॥ अपृष्टया तया ज्ञातं मम भर्तुर्विमाननम् ॥२५ ॥ तयोक्ताहं ततो भूप तापस्या प्रणता स्थिता॥चूर्णो रक्षान्वितो ह्येष सर्वभूतवशा
नुगः ॥ २६ ॥ त्वया भर्तरि संयोज्यो रक्ष्यं ग्रीवाशयांकुरम् ॥ भविष्यति पतिर्वश्यो नान्यां यास्यति सुन्दरीम् ॥ २७ ॥ चूर्णरक्षां गृहीत्वाहं प्राप्ता
भर्तृगृहं पुनः ॥ प्रदोषे पयसा युक्तश्चूर्णो भर्तरि योजितः ॥ २८ ॥ ग्रीवायां हि कृता रक्षा न विचारो मया कृतः ॥ यदा स पीतचूर्णस्तु भर्ता नृप
वरोत्तम॥२९॥ तदहः क्षयरोगोऽभूत्पतिः क्षीणो दिने दिने॥गुह्ये तु क्रिमयो जाताः क्षतदुष्टव्रणोद्भवाः॥३०॥दिनैः कतिपयैर्जातैर्दीपवद्भविदर्शनात्॥
हततेजास्तथा भर्त्ता मामुवाचाकुलेन्द्रियः ॥ ३१ ॥ क्रंदमानो दिवा रात्रौ दासोऽस्मि तव शोभने ॥ त्राहि मां शरणं प्राप्तं न गच्छेयं परस्त्रियम् ॥
॥ ३२ ॥ तत्तस्य रुदितं श्रुत्वा भयभीता महीपते ॥ तस्यां निवेदितं सर्वं कथं भर्ता भवेत्सुखी॥३३॥तयापि भेषजं दत्तं द्वितीयं दाहशांतये॥दत्ते तु
भेषजे तस्मिन्सुस्थोऽभूत्तत्क्षणात्पतिः ॥३४॥ पूर्वचूर्णोद्भवो दाहः शांतस्तेनौषधेन ह ॥ ततः प्रभृति मे भर्ता वश्योऽभूद्वचने स्थितः॥३५॥कालेन
पञ्चतां प्राप्ता गता नरकयातनाम् ॥ ताम्रभ्राष्ट्रे ह्यहं दग्धा युगानि दश पञ्च च ॥ ३६ ॥ सूक्ष्माणि तिलमात्राणि कृत्वा खण्डान्यनेकशः ॥ किंचि
त्पातकशेषेण धरायामवतारिता ॥ ३७ ॥ गृहगोधामयं रूपं कृतं भास्करजेन मे ॥ साहमत्र स्थिता भूप वर्षाणामयुतं पुरा ॥ ३८ ॥ यान्यापि
युवतिर्भूप भर्तुर्वश्यं समाचरेत् ॥ वृथाधर्मा दुराचारा दह्यते ताम्रभ्राष्ट्रके ॥ ३९॥ भर्ता नाथो गतिर्भर्ता दैवतं गुरुरेव च ॥ तस्य वश्यं चरेद्या तु
सा कथं सुखमाप्नुयात् ॥ ४० ॥ तिर्यग्योनिशतं याति क्रिमिकुष्ठसमन्विता ॥ तस्माद्भूपाल कर्तव्यं स्त्रीभिर्भर्तृवचः सदा ॥ ४१ ॥ साहं यास्ये
पुनर्योनिं कुत्सितां पातकान्विताम् ॥ यदि नोद्धरसे राजन्नद्य मां शरणागताम् ॥ ४२ ॥ सुकृतस्य प्रदानेन विजयाजनितेन हि ॥ या त्वया संगमे
पुण्ये कृता श्रवणद्वादशी ॥ ४३ ॥ सरय्वाश्चैव गंगायाः पापनाशविधायके ॥ प्रेतनिर्यातनी पुण्या मानसेप्सितदायिनी ॥ ४४ ॥

यस्यां गृहेऽपि भूपाल संस्मृतो मनुजैर्हरिः ॥ सर्वतीर्थफलावाप्तिं कुरुते नात्र संशयः ॥ ४५ ॥ दत्तं जप्तं हुतं यच्च कृतं देवार्चनादिकम् ॥ सर्वं तदक्षयं भूप यत्कृतं विजयादिने ॥ ४६ ॥ एवंविधं फलं यस्यास्तद्देहि सुकृतं मम ॥ द्वादश्यामुपवासेन त्रयोदश्यां तु पारणे ॥ ४७ ॥ द्वादशाब्दोपवासस्य फलं प्राप्नोत्युपोषणे ॥ दयां कृत्वा महीपाल धर्ममूर्तिर्भवान् क्षितौ ॥ ४८ ॥ वैवस्वतपथध्वंसी परित्राहि सुदुःखिताम् ॥ गृहगोधावचः श्रुत्वा मोहिनी वाक्यमब्रवीत् ॥ ४९ ॥ स्वकृतं तु जनोऽश्नाति सुखदुःखात्मकं विभो ॥ तस्मात्किमनया कार्यं पापया भर्तृदुष्टया ॥ ५० ॥ यया भर्ता वशं नीतो रक्षाचूर्णादिभिर्नृप ॥ साधुभ्यो यत्कृतं राजन्यशःस्वर्गकरं भवेत् ॥ ५१ ॥ उभयोर्भ्रंशतामेति पापेभ्यो यत्कृतं भवेत् ॥ शर्करामिश्रितं क्षीरं काद्रवेये नियोजितम् ॥ ५२ ॥ विषवृद्धिं करोत्येव तद्वत्पापकृतं भवेत् ॥ परित्यजेमां त्वं पापां गच्छावो नगराय वै ॥ ५३ ॥ जन्मव्यापारसक्तानामात्मसौख्यं विनश्यति ॥ रुक्मांगद उवाच ॥ ब्रह्मात्मजे कथं वाक्यमीदृशं व्याहृतं त्वया ॥ न साधूनामिदं वृत्तं भवतीति वरानने ॥ ५४ ॥ आत्मसौख्यकराः पापा भवंति परतापिनः ॥ विप्रपन्ना वरारोहे परोपकरणाय वै ॥ ५५ ॥ शशी सूर्योऽथ पर्जन्यो मेदिनी हुतभुग्जलम् ॥ चंदनं पादपाः संतः परोपकरणाय वै ॥ ५६ ॥ श्रूयते किल राजासीद्धरिश्चंद्रो वरानने ॥ चांडालमंदिरावासी भार्यातनयविक्रयी ॥ ५७ ॥ असत्यवचनाद्भीतो दुःखाद्दुःखतरं गतः ॥ तस्य सत्येन संतुष्टा देवाः शक्रपुरोगमाः ॥ ५८ ॥ वरेण छंदयांचक्रुर्हरिश्चंद्रं महीपतिम् ॥ तेन सत्यवता चोक्ता देवा ब्रह्मपुरोगमाः ॥ यदि तुष्टा हि विबुधा वरं मे दातुमर्हथ ॥ ५९ ॥ एषा हि नगरी सर्वा सद्रुमा ससरीसृपा ॥ सबालवृद्धतरुणा सनारी सचतुष्पदा ॥ ६० ॥ प्रयातु कृतपापापि स्वर्गतिं नगरी मम ॥ अयोध्यापातकं गृह्य गंताहं नरकं ध्रुवम् ॥ ६१ ॥ एकाकी नहि गच्छामि परित्यज्य जनं क्षितौ ॥ स्वर्गं विबुधशार्दूलाः सत्यमेतन्मयेरितम् ॥ ६२ ॥ तस्य तां स्थिरतां ज्ञात्वा सह तेनैव सा पुरी ॥ जगाम स्वर्गलोकं च इंद्रादीनामनुज्ञया ॥ ६३ ॥ सोऽपि स्वर्गे स्थितो राजा स्वपुरेण समन्वितः ॥ कामगेन विमानेन पूज्यमानोऽमरैरपि ॥ ६४ ॥ अस्थिदानं कृतं देवि कृपया हि दधीचिना ॥ देवानामुपकारार्थं श्रुत्वा दैत्यैः पराजितान् ॥ ६५ ॥ कपोतार्थं स्वमांसानि शिबिना भूभुजा पुरा ॥ प्रदत्तानि वरारोहे श्येनाय क्षुधिताय वै ॥ ६६ ॥ जीमूतवाहनो राजा पुरासीत्क्षितिमंडले ॥ तेनापि जीवितं दत्तं पन्नगाय वरानने ॥ ६७ ॥ तस्माद्दयालुना देवि भवितव्यं महीभुजा ॥ शुचावमेध्येऽपि शुभे समं वर्षति वारिदः ॥ ६८ ॥ चांडालपतितौ चंद्रो ह्लादयेच्च निजैः करैः ॥ तस्मादिमां वरारोहे गृह

गोधां सुदुःखिताम् ॥ ६९ ॥ उद्धरिष्ये निजैः पुण्यैर्दौहित्रैर्नाहुषो यथा ॥ विमोहिनीं तिरस्कृत्य गृहगोधामुवाच ह ॥ ७०॥ दत्तं दत्तं मया पुण्यं
विजयासंभवं तव ॥ गच्छ विष्णुगताँल्लोकान्विधूताशेषकल्मषा ॥ ७१ ॥ तद्वाक्यात्सहसा भूप दिव्याभरणभूषिता ॥ विमुच्य देहं तज्जीर्णं
गृहगोधासमुद्भवम् ॥ ७२ ॥ जगामामंत्र्य तं भूपं द्योतयंती दिशो दश ॥ सीमंतमिव कुर्वाणा वैष्णवं पदमद्भुतम् ॥ ७३ ॥ यद्योगिगम्यं हुतभुक्प्र
काशं वरं वरेण्यं परमात्मभूतम् ॥ तस्मादियं चैव शिखिप्रदीपा जगत्प्रकाशाय नृपप्रसूता ॥ ७४ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे गोधावि
मुक्तिर्नाम चतुर्दशोऽध्यायः ॥ १४ ॥ वसिष्ठ उवाच ॥ विमोच्य पातकाद्राजा गृहगोधां हसन्निव ॥ उवाच मोहिनीं हृष्टः शीघ्रमारुह्यतां हयः
॥ १ ॥ योजनायुतगामी च क्षणात्कृष्णहयो यथा ॥ तदाकर्ण्य वचो राज्ञो मोहिनी मदलालसा ॥ २ ॥ आरुरोह समं भर्त्रा तं हयं वातवेगि
नम् ॥ उवाच च वचो भूपं भर्तारं चारुहासिनी ॥३॥ प्रचोदयेममर्वाणं स्वपुराय महीपते ॥ पुत्रवक्त्रं स्पृहा द्रष्टुं लंपटा तव वर्तते॥४॥तवाधीना नृप
श्रेष्ठ गम्यतां यत्र ते मनः ॥ मोहिन्या वचनं श्रुत्वा तत्प्रस्थे नगरं प्रति ॥ ५ ॥ पश्यमानः सुसंहृष्टः पादपान्पर्वतान्नदीः॥वनानि सुविचित्राणि मृगा
न्बहुविधानपि ॥ ६ ॥ ग्रामान्दुर्गांस्तथा देशान्नगराणि शुभानि च ॥सरांसि च विचित्राणि भूभागान्सुमनोहरान् ॥ ७ ॥अचिरेणाश्रमं दृष्ट्वा वाम
देवस्य भूपते ॥ आकाशस्थो महीपालो नमस्कृत्य त्वरान्वितः ॥ ८ ॥ पुनरेव ययौ राजा वायुवेगेन वाजिना ॥ पश्यमानो बहून्देशान्धनधान्य
समन्वितान् ॥ ९ ॥ आससाद पुरं राजा वैदिशं स्ववशं च तत्॥तमायांतं नृपं श्रुत्वा चारैर्द्धर्मांगदः सुतः ॥१०॥पितरं हर्षसंयुक्तो भूपालान्वाक्यम
ब्रवीत् ॥ एष प्रकाशमायाति उदीची दिङ् नृपोत्तमाः ॥११॥मत्पितुर्वाजिनाक्रांता तत्तेजःपरिरंजिता॥तस्माद्गच्छामहे सर्वे संमुखं ह्यवनीपतेः॥१२॥
पितुरागतमात्रस्य संमुखं न सुतो व्रजेत् ॥स याति नरकं घोरं यावदिंद्राश्चतुर्दश॥१३॥ संमुखं व्रजमानस्य पुत्रस्य पितरं प्रति ॥ पदे पदे यज्ञफलं
प्रोचुः पौराणिका द्विजाः ॥ १४ ॥ उत्तिष्ठध्वं व्रजाम्येष भवद्भिः परिवारितः ॥ अभिवादयितुं प्रेम्णा एष मे देवदेवता ॥ १५ ॥ तथेत्युक्तैस्तु तैः
सर्वैर्भूमिपालैर्नृपात्मजः॥जगाम संमुखं पद्भ्यां क्रोशमात्रं पितुस्तदा ॥१६॥ ततो राजसहस्रेण मूर्तिमानिव मन्मथः ॥ स गत्वा दूरमध्वानमाससाद
नृपं पथि ॥ १७ ॥संप्राप्य पितरं स्नेहाज्जगाम धरणीं तदा ॥ शिरसा राजभिः सार्द्धं प्रणाममकरोत्तदा ॥ १८ ॥ प्रेम्णा समागतं प्रेक्ष्य तं पतन्तं
नृपैः सह ॥ अवरुह्य हयाद्राजा समुत्थाप्य सुतं विभो ॥१९ ॥ भुजाभ्यां साधु पीनाभ्यां पर्यष्वजत भूपतिः ॥ मूर्ध्नि चैवमुपाघ्राय उवाच तनयं
तदा ॥ २० ॥ कच्चित्पासि प्रजाः सर्वाः कच्चिद्दण्डयसे रिपून् ॥ न्यायागतेन वित्तेन कोशं पुत्र बिभर्षि च ॥ २१ ॥ कच्चिद्द्विप्रेष्वत्यधिका वृत्तिर्दत्ता

नपायिनी ॥ कच्चित्ते कांतशीलत्वं कच्चिद्वक्ता न निष्ठुरम् ॥ २२ ॥ कच्चिद्गावो न दुह्यन्ते पुत्र चांडलवेश्मनि ॥ कच्चिद्वचनकर्तारस्तनयाश्च पितुः
सदा॥२३॥कच्चिद्वधूः श्वश्रुवाक्ये वर्तते भर्तरि क्वचित्॥कच्चिद्विवादान्विप्रैस्तु समं नेक्षस आत्मज॥२४॥कच्चिद्गावो न रुध्यंते विषये विविधैस्तृणैः॥
तुलामानानि सर्वाणि ह्यन्नादीनां सदेक्षसे ॥ २५ ॥ कुटुंबिनं करैः पुत्र नात्यर्थमभिद्रूयसे ॥ कच्चिन्न द्यूतपानादि वर्तते विषये तव ॥ २६ ॥
कच्चिद्भिन्नरसैर्लोका भिन्नवाक्यैः पुरे तव॥न दानैर्जीर्णवस्त्रैश्च नोपजीवंति मानवाः॥२७॥कच्चिद्दृष्ट्वा स्वयं पुत्र हस्त्यश्वं परिरक्षसि॥कच्चिच्च मातरः
सर्वा ह्यविशेषेण पश्यसि ॥ २८ ॥ कच्चिन्न वासरे विष्णोर्नरा भुंजंति पुत्रक ॥ शशिनि क्षीणतां प्राप्ते कच्चिच्छ्राद्धपरो नरः ॥ २९ ॥
कच्चिच्चापररात्रेषु सदा निद्रां विमुंचसि ॥ निद्रा मूलमधर्मस्य निद्रा पापविवर्द्धिनी ॥ ३० ॥ निद्रा दारिद्र्यजननी निद्रा श्रेयोविनाशिनी ॥ नहि
निद्रान्वितो राजा चिरं शास्ति वसुंधराम्॥३१॥ पुंश्चलीव सदा भर्तुर्लोकद्वयविनाशिनी ॥एवमुच्चरमाणं तं तनयो वाक्यमब्रवीत्॥३२ ॥ धर्मांगदो
महीपालं प्रणम्य च पुनः पुनः ॥ सर्वमेतत्कृतं तात पुनः कर्तास्मि ते वचः ॥ ३३॥ पितुर्वचनकर्तारः पुत्रा धन्या जगत्त्रये ॥ किं ततः पातकं
राजन्यो न कुर्यात्पितुर्वचः ॥३४॥ पितृवाक्यमनादृत्य व्रजेत्स्नातुं त्रिमार्गगाम् ॥ न तत्तीर्थफलं भुंक्ते यो न कुर्यात्पितुर्वचः ॥ ३५ ॥ त्वदधीनं
शरीरं मे त्वदधीनं हि जीवितम् ॥ त्वदधीनो हि मे धर्मस्त्वं च मे दैवतं परम् ॥३६॥ त्रैलोक्यस्यापि दानेन न शुद्ध्येत ऋणात्सुतः ॥किं पुनर्देह
वित्ताभ्यां क्लेशदानादिभिर्विभो ॥ ३७ ॥एवं ब्रुवाणं तनयं बहुभूपालसंवृतम् ॥ रुक्मांगदः परिष्वज्य पुनराह सुतं वचः॥सत्यमेतत्त्वया पुत्र व्याहृतं
धर्मवेदिना ॥३८॥पितुरभ्यधिकं किंचिद्दैवतं न सुतस्य हि॥देवाः पराङ्मुखास्तस्य पितरं योऽवमन्यते॥३९॥सोऽहं मूर्ध्ना त्वया पुत्र धृतस्तत्क्षितिर
क्षणात्॥जित्वा द्वीपवतीं पृथ्वीं बहुभूपालसंवृताम् ॥४०॥ एतत्सौख्यं परं लोके एतत्स्वर्गपदं ध्रुवम् ॥ पितुरभ्यधिकः पुत्रो यद्भवेत्क्षितिमंडले॥४१॥
सोऽहं पुत्र कृतार्थस्तु कृतः सद्गुणवर्त्मना॥ त्वया साधयता भूपान्यथा हरिदिनं शुभम् ॥ ४२॥तत्पितुर्वचनं श्रुत्वा पुत्रो धर्मांगदोऽब्रवीत् ॥क्व गतस्तु
भवांस्तात निवेश्य मयि संपदः॥४३॥कस्मिन्स्थाने त्वियं प्राप्ता सूर्यायुतसमप्रभा॥ मन्ये निर्वेदमापन्न इमां सृष्ट्वा प्रजापतिः ॥४४ ॥ नैतद्रूपा महीपाल
नारी त्रैलोक्यमध्यतः ॥मन्ये भूधरजातेयमथवा सागरोद्भवा ॥४५ ॥ माया वा मयदैत्यस्य प्रमदारूपसंस्थिता ॥अहो सुनिपुणो धाता येनेयं निर्मिता
विभो ॥बालाग्रशतभागो हि व्यलीको नोपपद्यते॥४६॥ इयं हि योग्या कनकावदाता गृहाय तुभ्यं जगतीपतीश ॥ एवंविधा मे जननी यदि स्यात्को
ऽन्योऽस्ति मत्तः सुकृती मनुष्यः॥४७॥इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीचरिते पितापुत्रसंवादो नाम पञ्चदशोऽध्यायः॥ १५॥ वसिष्ठ उवाच ॥

धर्मांगदवचः श्रुत्वा हृष्टो रुक्मांगदोऽब्रवीत् ॥ सत्यं ते जननी पुत्र संप्राप्ता मंदरे मया ॥ १ ॥ वेदाश्रयसुता बाला मदर्थं कृतनिश्चया ॥ कुर्वंती
दारुणं पुत्र तपो देवगिरौ पुरा ॥२॥ इतः पंचदशादह्नो हयगामी गतो ह्यहम् ॥ मंदरे पर्वतश्रेष्ठे बहुधातुसमन्विते॥३ ॥ तस्य मूर्द्धनि बालेयं तोषयंती
महेश्वरम् ॥ स्थिता गानपरा दृष्टा मया तत्र सुदर्शना॥४॥ततोऽहं मूर्च्छया युक्तः पतितो धरणीतले ॥ अनंगबाणसंविद्धो व्याधविद्धो यथा
मृगः ॥५॥ततोऽहमनया देव्या चालितश्चारुनेत्रया॥ वृतश्चैवापि भर्तृत्वे किंचित्प्रार्थनया सह॥६॥ मया चापि प्रतिज्ञातं स्वदक्षिणकरान्वितम्॥सेयं
भार्या विशालाक्षी कृता भूधरमस्तके॥७॥अवरुह्य धरापृष्ठे समारुह्य तुरंगमम्॥दिनत्रयेण त्वरितः संप्राप्तस्तव सन्निधौ॥८॥पश्यमानो गिरीन्देशान्सरांसि
सरितस्तथा॥इयं हि जननी पुत्र तव प्रीतिविवर्द्धिनी॥९॥अभिवादय चार्वंगीं त्वं निजामिव मातरम्॥तत्पितुर्वचनं श्रुत्वा हयसंस्थामरिंदमः॥१०॥
शिरसा धरणीं गत्वा इदं वचनमब्रवीत्॥प्रसीद देवि मातस्त्वं भृत्यो दासः सुतस्तव॥११॥ नमस्करोमि जननीं बहुभूपालसंयुतः ॥ तं पुत्रमवनीं प्राप्तं
मोहिनी प्रेक्ष्य भूपते॥१२॥भर्तुर्दाक्षिण्ययोगाच्च अवतीर्य तुरंगमात्॥अवागूहत बाहुभ्यामुत्थाप्य पतितं सुतम्॥१३॥परिष्वक्तस्तदा मात्रा पुनरेवाभ्यनंदयत्
॥ ततस्तां सुमनोज्ञैस्तु चारुवस्त्रैश्च भूषणैः ॥ १४ ॥ भूषयित्वा समारोप्य पुनरेव हयोत्तमम् ॥ स्वपृष्ठे चरणं कृत्वा तस्या राजीवलोचनः
॥ १५ ॥ तेनैव विधिना भूप पितरं चान्वरोहयत्॥ भूपालैः संवृतो गच्छन्पद्भ्यां धर्मांगदः सुतः ॥ १६ ॥ प्रहर्षपुलको ह्यासीज्जननीं प्रेक्ष्य मोहिनीम्
॥ स्तूयमानः स्वयं चापि मेघगंभीरया गिरा ॥ १७ ॥ धन्यः स तनयो लोके मातरो यस्य भूरिशः ॥ नवा नवतरा भार्याः पितुरिष्टा मनोहराः
॥ १८ ॥ यस्यैका जननी लोके पिता तस्यैव दुःखभाक्॥पितुर्दुःखेन किं सौख्यं पुत्रस्य हृदि वर्तते ॥ १९ ॥ एकस्या वंदने मातुः पृथिवी
फलमश्नुते ॥ मातॄणां वंदने मह्यं महत्पुण्यं भविष्यति॥२०॥ तस्मादभ्यधिकं पुण्यं भविष्यति दिने दिने॥एवमुच्चरमाणोऽसौ राजभिः परिवारितः
॥ २१ ॥ प्रविष्टो नगरं रम्यं वैदिशं ऋद्धिसंयुतम् ॥ हयस्थः प्रययौ राजा मोहिन्या सह तत्क्षणात् ॥ २२ ॥ ततो गृहवरं प्राप्य पूज्यमानो
जनैर्नृपः ॥ अवरुह्य हयात्तस्मान्मोहिनीं वाक्यमब्रवीत् ॥ २३ ॥ धर्मांगदस्य पुत्रस्य गृहे गच्छ मनोहरे ॥ एष ते गुरुशुश्रूषां करिष्यति यथा
गुणम् ॥ २४ ॥ न सखी नैव दासी ते शुश्रूषामाचरेदिति ॥ सा चैवमुक्ता पत्या तु प्रस्थिता सुतमन्दिरम् ॥२५॥ धर्मांगदेन सा दृष्टा गच्छंती
मन्दिराय वै ॥ आत्मनो भर्तृवाक्येन परित्यज्य महीपतीन् ॥ २६ ॥ तिष्ठध्वं पितुरादेशादिमां शुश्रूषये ह्यहम् ॥ स एवमुक्त्वा गत्वा तु
बाहुभ्यां परिगृह्य वै ॥ क्रमे पञ्चदशे प्राप्ते पर्यंके त्ववरोपयत् ॥२७॥ कांचने पट्टसूत्रेण रचिते कोमले दृढे ॥ मृद्वास्तरणसंयुक्ते मणिरत्नविभूषिते॥

॥ २८ ॥ रत्नदीपैश्च बहुशः खचिते सूर्यसप्रभे ॥ ततः पादोदकं चक्रे मोहिन्या धर्मभूषणः ॥ २९ ॥ सन्ध्यावल्या गुरुत्वेन ह्यपश्यत्तां नृपात्मजः॥
नैवमस्याभवद्दुष्टं मनस्तां मोहिनीं प्रति ॥ ३० ॥ सुकुमारोऽपि तन्वंगीं पीनोरुजघनस्तनीम् ॥ मेने वर्षायुतसमामात्मानं च त्रिवत्सरम्
॥ ३१ ॥ प्रक्षाल्य चरणौ तस्यास्तज्जलं शिरसि न्यधात् ॥ उवाचावनतो भूत्वा सुकृती मातरस्म्यहम् ॥ ३२ ॥ इत्युक्त्वा नरनारीभिः स्वयं च
श्रमनाशनम् ॥ चकार सर्वभोगैस्तां युयोज च मुदान्वितः ॥ ३३ ॥ क्षीरोदमथने जाते कुण्डले चामृतस्रवे ॥ ये लब्धे दानवाञ्जित्वा पाताले धर्म
मूर्त्तिना ॥ ३४ ॥ मोहिन्या कर्णयोश्चक्रे स्वयमेव वृषांगदः॥ अष्टोत्तरसहस्रैश्च धात्रीफलनिभैः शुभैः ॥ ३५ ॥ मौक्तिकै रचितैः शुभ्रैर्हारो देव्याः
कृतो हृदि ॥ निष्कं पलशतं स्वर्णं कुलिशायुतभूषितम् ॥ ३६ ॥ हारं लघूत्तरं चक्रे मातुर्नृपसुतस्तदा ॥ वलया वज्रखचिता द्विरष्टौ करयोर्द्वयोः
॥ ३७ ॥ एकैके निष्ककोटीभिर्मूल्यविद्भिर्नरैः कृताः ॥ केयूरनूपुरौ तस्या अनर्घौ स नृपात्मजः ॥ ३८ ॥ प्रददौ पितुरिष्टाया भूषणार्थं रवि
प्रभौ ॥ कटिसूत्रं तु शर्वाण्या यदासीत्पावकप्रभम् ॥ ३९ ॥ तद्भ्रष्टं भयभीतायाः संग्रामे तारकामये ॥ कालनेमौ स्थिते राज्ये पतितं मूलपाचने
॥ ४० ॥ तद्गृहीतं तु दैत्येन मयेन लोकमायिना ॥ तं हत्वा मलये दैत्यं दैत्यकोटिसमावृतम् ॥ ४१ ॥ संवत्सररणे घोरे पितुर्वचनकारणात् ॥
अवाप कटिसूत्रं तु दैत्यराजप्रियास्थितम् ॥ ४२॥ तद्ददौ पितुरिष्टायाः सानन्दपुलको नृपः ॥ हिरण्यकशिपोः पूर्वं या भार्या लोकसुन्दरी॥४३॥
तस्याः सीमंतकश्चासीत्सौदामिनिसमप्रभः ॥ सा प्रविष्टा समं पत्या यदा पावकमंगला ॥ ४४ ॥ समुद्रे क्षिप्य सीमन्तं दुःखेन महतान्विता॥
सागरस्तत्तु संगृह्य रत्नश्रेष्ठयुगं किल ॥ ४५ ॥ ददौ धर्मांगदायाथ तस्य वीर्येण तोषितः ॥ जनन्याः प्रददौ हृष्टः सूर्यकोटिसमप्रभम् ॥ ४६ ॥
अग्निशौचे शुभे वस्त्रे कंचुके सुमनोहरे ॥ सहस्रकोटिमूल्ये ते मोहिन्याः संन्यवेदयत्॥४७ ॥ देवमाल्यं सुगंधाढ्यं तथा देवविलेपनम् ॥ सर्वदेवगुरोः
पूर्वं सिद्धहस्तात्सुदुर्लभम् ॥ ४८ ॥ धर्मांगदेन वीरेण द्वीपानां विजये तथा ॥ लब्धं तत् प्रददौ देव्या मोहिन्याः कामवर्द्धनम् ॥ ४९ ॥
संभूष्य परया भक्त्या पश्चात्षड्रसभोजनम् ॥ आनीतं मातृहस्तेन भोजयामास भूमिप ॥ ५० ॥ पुरस्तादेव जननीं वाक्यैः संबोध्य
भूरिशः ॥ मया त्वया च कर्तव्यं राज्ञो वाक्यं न संशयः ॥ ५१ ॥ या इष्टा नृपतेर्देवि सास्माकं हि गरीयसी ॥ इष्टा या भूपतेर्भर्तु
स्तस्या या दुष्टमाचरेत् ॥ ५२ ॥ सा पत्नी नरकं याति यावदिंद्राश्चतुर्दश ॥ सापत्नभावं या कुर्याद्भर्तृस्नेहेष्टया सह ॥ ५३ ॥ तस्याः
स्नेहवियोगार्थं तप्यते ताम्रभ्राष्ट्रके ॥ यथा सुखं भवेद्भर्तुस्तथा कार्यं हि भार्यया ॥ ५४ ॥ अनुकूलं हितं तस्या इष्टाया भर्तुराचरेत् ॥ यथा

भर्ता तथा तां हि पश्येत वरवर्णिनि ॥ ५५ ॥ हीनायाश्चापि शुश्रूषां कृत्वा याति त्रिविष्टपम् ॥ पश्चात्स्थाने भवेत्सापि मनसा याभवत्प्रिये
॥ ५६ ॥ सर्वान्भोगानवाप्नोति भर्तुरिष्टं प्रगृह्य हि ॥ इर्ष्याभावपरित्यागात्सर्वेश्वरपदं लभेत् ॥५७॥ सपत्नी या सपत्न्यास्तु शुश्रूषां कुरुते सदा ॥
भर्तुरिष्टां संनिरीक्ष्य तस्या लोकोऽक्षयो भवेत् ॥५८॥ भर्तुरिष्टा पुरा वेश्या ह्यभवत्सा कुलेषु वै॥ शूद्रजातेः सुदुष्टस्य परित्यक्तक्रियस्य तु॥ ५९ ॥
आचरद्वेश्यया सार्द्धं सा भार्या पतिरंजिनी ॥ प्रक्षालनं द्वयोः पादौ द्वयोरुच्छिष्टभोजिनी ॥६० ॥उभयोरप्यधः शेते उभयोर्वै हितं रता॥ वेश्यया
वार्यमाणापि सदाचारपथे स्थिता ॥ ६१ ॥ एवं शुश्रूषयंत्या हि भर्तारं वेश्यया सह ॥ जगाम सुमहान्कालो वर्तंत्या दुःखसागरे ॥ ६२ ॥ अप
रस्मिन्दिने भर्ता माहिषं मूलकान्वितम् ॥ अभक्षयत निष्पावं दुर्मेधास्तैलमिश्रितम् ॥ ६३ ॥ तदपथ्यभुजस्तस्य अवमन्य पतिव्रताम् ॥ अभव
दारुणो रोगो गुदे तस्य भगंदरः ॥६४॥ संदह्यमानोऽतितरां दिवा रात्रौ स भूरिशः॥तस्य गेहे स्थितं वित्तं समादाय जगाम सा॥६५॥वेश्यान्यस्मै
ददौ प्रीत्या यूने कामपरायणा ॥ ततः स दीनवदनो व्रीडया च समन्वितः ॥ ६६ ॥ उवाच प्ररुदन्भार्यां शूद्रो व्याकुलचेतनः ॥ परिपालय मां
देवि वेश्यासक्तं सुनिष्ठुरम्॥६७॥न मयोपकृतं किंचित्तव सुंदरि पापिना ॥रमते वेश्यया सार्द्धं बहूनब्दान्सुमध्यमे॥६८॥ यो भार्यां प्रणतां पापो
नानुमन्येत गर्वितः॥सोऽशुभानि समाप्नोति जन्मानि दश पंच च॥६९॥दिवाकीर्तिगृहे तस्माद्योनिं प्राप्स्यामि गर्हिताम्॥तवापमानतो देवि मनो न
कलुषीकृतम् ॥ ७० ॥इति भर्तृवचः श्रुत्वा भार्या भर्तारमब्रवीत् ॥ पुराकृतानि पापानि दुःखानि प्रभवंति हि ॥तानि संक्षमते विद्वान् स विज्ञेयो
नृणां वरः ॥ ७१ ॥ तन्मया पापया पापं कृतं वै पूर्वजन्मनि॥ तद्भजंत्या न मे दुःखं न विषादः कथंचन॥७२॥ एवमुक्त्वा समाश्वास्य भर्तारम
नुशास्य च ॥ आनीतं जनकाद्वित्तं बंधुभ्यो वरवर्णिनी ॥७३॥ क्षीरोदनिलयावासं मन्यते स्म सती पतिम्॥दिवा दिवा त्रिर्यत्नेन रात्रौ गुह्यविशोध
नम् ॥ ७४॥ रजनीकरवृक्षोत्थं गृह्य निर्यासमंजसा ॥ नखेन पातयेद्भर्तुः क्रिमीन्कुष्ठाच्छनैः शनैः ॥ ७५ ॥ मयूरपुच्छसंयुक्तं पवनं चाकरोत्तदा ॥
न देवि रात्रौ स्वपिति न दिवा च वरानना ॥७६॥ भर्तृदुःखेन संतप्ता अपश्यज्ज्वलितं जगत् ॥ यद्यस्ति वसुधा देवी पितरो देवतास्तथा ॥ ७७ ॥
कुर्वंतु रोगहीनं मे भर्तारं गतकल्मषम् ॥ चंडिकायै प्रदास्यामि रक्तं मांससमुद्भवम् ॥ ७८ ॥ नृच्छागमहिषोपेतं भर्तुरारोग्यहेतवे ॥ सादरं कारयि
ष्यामि उपवासान्दशैव तु ॥ ७९ ॥ शरीरं स्थापयिष्येऽहं सूक्ष्मकंटकसंस्तरे ॥ नोपभोक्ष्यामि मधुरं नोपभोक्ष्यामि वै घृतम् ॥ ८० ॥ बाह्या
भ्यंगविहीनाहं संस्थास्ये दिनसंचयम् ॥ जीवतां रोगहीनो हि भर्ता मे शरदां शतम् ॥ ८१ ॥ एवं प्रव्याहरंती सा वासरे वासरे गते ॥
अथ कालेन चाल्पेन त्रिदोषोऽस्य व्यजायत ॥ ८२ ॥ त्रिकटुं प्रददौ भर्तुर्यत्नेन महता तदा ॥ शीतार्तः कंपमानोऽसौ पत्न्यंगुलिमखंड

यत् ॥ ८३ ॥ उभयोर्दंतयोः श्लेषः सहसा समपद्यत ॥ तत्खंडमंगुलेर्वक्रे स्थितं नृपतिवल्लभे ॥ ८४ ॥ अथ विक्रीय वलयं क्रीत्वा काष्ठानि
भूरिशः ॥ चितां सार्पिर्युतां चक्रे मध्ये धृत्वा पतिं तदा ॥ ८५ ॥ अवरुह्य च बाहुभ्यां पादेनाकृष्य पावकम् ॥ मुखे मुखं समाधाय हृदये हृदयं
तथा ॥ ८६ ॥ जघने जघनं देवि आत्मनः संनिवेश्य वै ॥ दाहयामास कल्याणी भर्तुर्देहं रुजान्वितम् ॥ ८७ ॥ आत्मना सह चार्वंगी
ज्वलिते जातवेदसि ॥ ८८ ॥ विमुच्य देहं सहसा जगाम पतिं समादाय च देवलोकम् ॥ विशोधयित्वा बहुपापसंघान्स्वकर्मणा दुष्कर
साधनेन ॥ ८९ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे पतिव्रतोपाख्यानं नाम षोडशोऽध्यायः ॥ १६ ॥ पुत्र उवाच ॥ तस्मादीर्ष्यां परित्यज्य
मोहिनीमनुभोजय ॥ न मातरीदृशो धर्मो लोकेषु त्रिषु लभ्यते ॥ १ ॥ स्वहस्तेन प्रियां भर्तुर्भार्यां या तु प्रभोजयेत् ॥ सपत्नीं तु सपत्नी हि
किंचिदन्नं ददाति च ॥ २ ॥ तदनंतं भवेद्देवि मातरित्याह नाभिजः ॥ कुरु वाक्यं मयोक्तं हि स्वामिनि त्वं प्रसीद मे ॥ ३ ॥ तातस्य
सौख्यं कर्तव्यमावाभ्यां वरवर्णिनि ॥ भवेत्पापक्षयः सम्यक् स्वर्गप्राप्तिस्तथाक्षया ॥ ४ ॥ पुत्रस्य वचनं श्रुत्वा देवी संध्यावली तदा ॥ अभि
मंत्र्य परिष्वज्य तनयं सा पुनः पुनः ॥ ५॥ मूर्ध्नि चैनमुपाघ्राय वचनं चेदमब्रवीत् ॥ करिष्ये वचनं पुत्र त्वदीयं धर्मसंयुतम् ॥ ६ ॥ इर्ष्यां मानं
परित्यज्य भोजयिष्यामि मोहिनीम् ॥ शतपुत्रा ह्यहं पुत्र त्वयैकेन सुतेन हि ॥ ७ ॥ नियमैर्बहुभिर्जातो देहक्लेशकरैर्भवान् ॥ व्रतराजेन चीर्णेन
प्राप्तस्त्वमचिरात्सुतः ॥ ८ ॥ नहीदृशं व्रतं लोके फलदायि प्रदृश्यते ॥ सद्यः प्रत्ययकारीदं महापातकनाशनम् ॥ ९ ॥ किं जातैर्बहुभिः पुत्रैः
शोकसंतापकारकैः ॥ वरमेकः कुलालंबी यत्र विश्रमते कुलम् ॥ १० ॥ त्रैलोक्यादुपरिष्ठाहं त्वां प्राप्य जठरे स्थितम् ॥ धन्यानि तानि शूलानि
यैर्जातस्त्वं सुतोऽनघ ॥ ११ ॥ सप्तद्वीपपतिः शूरः पितुर्वचनकारकः ॥ आह्लादयति यस्तातं जननीं वापि पुत्रकः ॥ १२ ॥ तं पुत्रं
कवयः प्राहुर्वाचाख्यमपरं सुतम् ॥ एवमुक्त्वा तु वचनं देवी संध्यावली तदा ॥१३॥ वीक्षां चक्रेऽथ भांडानि षड्रसस्य तु हेतवे ॥ तस्या
वीक्षणमात्रेण परिपूर्णानि भूपते ॥ १४ ॥ षड्रसस्य सुखोष्णस्य मोहिनीभोजनेच्छया ॥ अमृतस्वादुकल्पस्य जनस्य तु महीपते ॥ १५ ॥
ततो दर्वीं समादाय कांचनीं रत्नसंयुताम् ॥ परिवेषयदव्यग्रा मोहिन्याश्चारुहासिनी ॥ १६ ॥ कांचने भाजने श्लक्ष्णे मानभोजनवेष्टिते ॥ शनैः
शनैश्च बुभुजे इष्टमन्नं सुसंस्कृतम् ॥१७॥ उपविश्यासने देवी शातकौंभमये शुभे ॥ वीज्यमाना वरारोहा व्यजनेन सुगीतिना ॥ १८ ॥ धर्मांगदगृही
तेन शिखिपुच्छभवेन तु ॥ सा भुक्त्वा ब्रह्मतनया तदन्नममृतोपमम् ॥ १९ ॥ चतुर्गुणेन शीतेन कृत्वा शौचमथात्मनः ॥ जगृहे पुत्रदत्तं तु तांबूलं

तत्सुगंधिमत् ॥ २० ॥ वरचंदनयुक्तेन हस्तेन वरवर्णिनी ॥ ततः प्रहस्य शनकैः प्राह संध्यावलीं नृप॥२१॥जननी किं तु देवि त्वं वृषांगदनृपस्य
तु ॥ न मया हि परिज्ञाता श्रमस्वेदितया शुभे ॥ २२ ॥ वदत्येवं ब्रह्मसुता यावत्संध्यावलीं नप ॥ तावत्प्रणम्य नृपतेः पुत्रो वचनमब्रवीत्
॥ २३ ॥ उदरे ह्यनया देव्या धृतः संवत्सरत्रयम् ॥ तव भर्तुः प्रसादेन वृद्धिं संप्राप्तवानहम् ॥ २४ ॥ संत्यनेकानि मातॄणां शतानि मम
सुंदरि ॥अस्याः पीतं पयो भूरि कुचयोः स्नेहसंप्लुतम् ॥ २५॥अनया सा रुजा तीव्रा विधृता प्रायशो जरा ॥ इयं मां जनयित्वैव जाता शिथिलवं
घना ॥ २६ ॥ तन्नास्ति त्रिषु लोकेषु यद्दत्वा चानृणो भवेत्॥ मातुः पुत्रस्य चार्वंगि सत्यमेतन्मयेरितम् ॥ २७ ॥ सोऽहं धन्यतरो लोके नास्ति
मत्तोऽधिकः पुमान् ॥ उत्संगे वर्तयिष्यामि मातृसंघस्य नित्यशः ॥२८॥नोत्संगे चेज्जनन्या हि तनयो विशति क्वचित् ॥ मातृसौख्यं न जानाति
कुमारी भर्तृजं यथा ॥ २९ ॥ मातुरुत्संगमारूढः पुत्रो दर्पान्वितो भवेत् ॥ हारमुत्तमदेहस्थं हस्तेनाहर्तुमिच्छति ॥ ३० ॥ पाल्यमानो जनन्या
हि पितृहीनोऽपि दर्पितः ॥ समीहते जगद्धर्तुं सवीर्यं मातृजं पयः ॥३१ ॥ एतज्जठरसंसर्गी भवत्युत्संगशंकितः ॥ अस्याश्चैवापराणां च विशेषो
यदि मे न चेत् ॥ ३२ ॥ तेन सत्येन मे तातो जीवताच्छरदां शतम् ॥ एवं ब्रुवाणे तनये मोहिनी विस्मयं गता ॥ ३३ ॥ कथमस्य प्रहर्तव्यं
मया निर्घृणशीलया ॥ विनीतस्य ह्यपापस्य औचित्यं पापिनो गृहे ॥ ३४ ॥ पितुः शुश्रूषणं यस्य न तस्य सदृशं क्षितौ ॥ एवं गुणाधिक
स्याहं कर्तुं कर्म जुगुप्सितम् ॥ ३५ ॥ पुत्रस्य धर्मशीलस्य भूत्वा तु जननी क्षितौ ॥ एवं विमृश्य बहुधा मोहिनी लोकसुंदरी ॥ ३६ ॥ उवाच
तनयं बाला शीघ्रमानय मे पतिम् ॥ न शक्नोमि विना तेन मुहूर्तमपि वर्तितुम् ॥ ३७ ॥ ततः स त्वरितं गत्वा प्रणम्य पितरं नृप ॥ कनिष्ठा
जननी तात शीघ्रं त्वां द्रष्टुमिच्छति ॥ ३८ ॥ प्रसादः क्रियतां तस्याः पूज्यतां ब्रह्मणः सुता ॥ पुत्रवाक्येन नृपतिस्तत्क्षणाद्गंतुमुद्यतः ॥ ३९ ॥
प्रहृष्टवदनो भूत्वा संध्यावल्या निवेशनम् ॥ संप्रविश्य गृहे राजा ददर्श शयनस्थिताम् ॥४० ॥ मोहिनीं मोहसंयुक्तां तप्तकांचनसप्रभाम् ॥ उपास्य
मानां प्रियया संध्यावल्या शनैः शनैः ॥४१॥ पुत्रवाक्यात्परित्यज्य क्रोधं सापत्न्यजं तथा ॥ दृष्ट्वा रुक्मांगदं प्राप्तं शयने मोह्य सुंदरी ॥ ४२ ॥
प्रहृष्टवदना प्राह राजानं भूरिदक्षिणम् ॥ इहोपविश्यतां कांत पर्यंके मृदुतूलके ॥ ४३ ॥ सर्वं निरीक्षितं भूप राज्यतन्त्रं त्वया चिरम् ॥ अद्यापि
नहि ते वांछा राज्ये परिनिवर्तते ॥४४॥ मन्ये दुष्कृतिनं भूप त्वामत्र धरणीतले ॥ यः समर्थं सुतं ज्ञात्वा स्वयं पश्येन्नृपश्रियम् ॥ ४५ ॥ तस्मा
त्त्वत्तोऽधिको नास्ति दुःखी लोकेषु कश्चन ॥ सुपुत्राणां पितॄणां हि सुखं याति क्षणं नृप ॥ ४६ ॥दुःखेन पापभोक्तॄणां विषयासक्तचेतसाम् ॥ सर्वा

श्च प्रकृती राजंस्तवेष्टाः पूर्णपुण्यजाः ॥ ४७ ॥ धर्मांगदे पालयाने कथं त्वं वीक्षसेऽधुना ॥ परित्यज्य प्रियासौख्यं कीनाश इव दुर्बलः ॥४८ ॥
यदि पालयसे राज्यं मया किं ते प्रयोजनम्॥निष्प्रयोजनमानीता क्षीरसागरमस्तकात्॥४९॥विड्भोज्या हि भविष्यामि पक्षिणामामिषं यथा ॥ यो
भार्यां यौवनोपेतां न सेवेदिह दुर्मतिः ॥५०॥ कृत्याचरणसक्तस्तु कुतस्तस्य भवेत्प्रिया ॥ असेविता व्रजेद्भार्या अदत्तं हि धनं व्रजेत्॥५१॥अर
क्षितं व्रजेद्राज्यं अनभ्यस्तं श्रुतं व्रजेत् ॥ नालसैः प्राप्यते विद्या न भार्या व्रतसंस्थितैः ॥ ५२ ॥ नानुष्ठानं विना लक्ष्मीर्नाभक्तैः प्राप्यते यशः ॥
नोद्यमी सुखमाप्नोति नाभार्यः संततिं लभेत् ॥ ५३ ॥ नाशुचिर्द्धर्ममाप्नोति न विप्रोऽप्रियवाग्धनम्॥अपृच्छन्नैव जानाति अगच्छन्न क्वचिद्व्रजेत्
॥ ५४ ॥ अशिष्यो न क्रियां वेत्ति न भयं वेत्तिं जागरी ॥ कस्माद्भूपाल मां त्यक्त्वा धर्मांगदगृहे शुभे ॥ ५५ ॥ वीक्ष्यसे राज्यपदवीं समर्थे
तनये विभो ॥ ५६ ॥ एवं ब्रुवाणां तनयां विधेस्तु रतिप्रियां चारुविशालनेत्राम् ॥ व्रीडान्वितः पुत्रसमीपवर्ती प्रोवाच वाक्यं नृपतिः प्रियां
ताम् ॥५७॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीचरिते मोहिनीवचनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ राजोवाच ॥ नाधिकारो मया
भीरु कृतो नृपपरिग्रहे ॥ श्रमातुरस्य निद्रा मे प्रवृत्ता सुखदायिनी ॥ १ ॥ धर्मांगदं समाभाष्य मोहिनीं नय मंदिरम् ॥ पूजयस्व यथान्या
यमेषा पत्नी प्रिया मम ॥ २ ॥ निजं कमलपत्राक्ष सर्वरत्नविभूषितम् ॥ निर्वातवातसंयुक्तं सर्वर्तुसुखदायकम् ॥ ३ ॥ एवमादिश्य तनयमहं
निद्रामुपागतः ॥ शयनं प्राप्य कष्टात्ते अभाग्यो हि धनं यथा ॥ ४ ॥ विबुद्धमात्रः सहसा त्वत्समीपमुपागतः ॥ यद्ब्रवीषि वचो देवि
तत्करोमि न संशयः ॥ ५ ॥ मोहिन्युवाच ॥ परिसांत्वय राजेंद्र इमान्दारान्सुदुःखितान् ॥ ममोद्वाहेन निर्विण्णान्निराशान्काम
भोगयोः ॥ ६ ॥ ज्येष्ठानां रूपयुक्तानां कलत्राणां विशांपते ॥ मूर्ध्न कीलं कनिष्ठाख्यं यो हि राजन्निखानयेत् ॥ ७ ॥ न सद्गतिर्भवेत्तस्य
न च सा विंदते परम् ॥ पतिव्रताश्रुदग्धायाः का शांतिर्मे भविष्यति ॥ ८ ॥ जनितारं हि मे भस्म कुर्य्युर्देव्यः पतिव्रताः ॥ किं पुनः
प्राकृतं भूप त्वादृशं मादृशीं तथा ॥ ९ ॥ संध्यावलीसमा नारी त्रैलोक्ये नास्ति भूमिप॥तव स्नेहनिबद्धांगी संभोजयति षड्रसैः ॥१० ॥प्रियाणि
चाटुवाक्यानि वदती तव गौरवात् ॥ एवंविधा हि शतशो नार्यः संति गृहे तव ॥ ११॥ यासां न पादरजसा तुल्याहं भूपते क्वचित् ॥ मोहिनी
वचनं श्रुत्वा व्रीडितो ह्यभवन्नृपः ॥१२ ॥ सपुत्रायाः समीपे तु ज्येष्ठाया नृपतिस्तदा ॥ इंगितज्ञः सुतो ज्ञात्वा दशावस्थागतं नृपम् ॥१३ ॥पितरं
कामसंतप्तं मोहिन्यर्थे विमोहितम् ॥ मातॄः सर्वाः समाहूय संध्यावलिपुरोगमाः ॥ १४॥ कृतांजलिपुटो भूत्वा एवमाह प्रियं वचः ॥ विमोहिनी मे

जननी नवोढा ब्रह्मणः सुता ॥१५॥सा च प्रार्थयते देव्यो राजानं रहसिस्थितम् ॥ आत्मना सह खेलार्थं तन्मोदध्वं सुहर्षिताः ॥ १६ ॥ मातर
ऊचुः ॥कोऽनुमोदयते पुत्र सर्पभक्षणमात्मनः ॥ को हि दीपयते वह्निं स्वदेहे देहिनां वर ॥ १७ ॥ को भक्षयेद्विषं घोरं कश्छिद्यादात्मनः शिरः ॥
कस्तरेत्सागरं बद्ध्वा ग्रीवायां दारुणां शिलाम् ॥ १८ ॥ को गच्छेद्दीपिवदनं कः केशान्सुहरेर्हरेत् ॥ को निषीदति धारायां खड्गस्या
काशभासिनः ॥ १९ ॥ कानुमोदयते भर्त्रा सपत्न्याः क्रीडनं किल ॥ सर्वस्यापि प्रदानेन नैतन्मनसि वर्तते ॥ २० ॥ वरं हि
छेदनं मूर्ध्नस्तत्क्षणात्तु वरासिना ॥ का दृष्ट्या दयितं कांतं निरीक्षेदन्ययाहृतम् ॥ २१ ॥ का सा सीमंतिनी लोके भवेदेतादृशी क्वचित्॥
आत्मप्राणसमं कांतमन्यस्त्रीकुचपीडनम् ॥ २२ ॥ संश्रुत्य सहते या तु किं पुनः स्वेन चक्षुषा ॥ सर्वेषामेव दुःखानां दुःखमेतदनन्त
कम् ॥ २३ ॥ यद्भर्तान्यांगनासक्तो दृश्यते स्वेन चक्षुषा ॥ वरं सर्वा मृताः पुत्र युगपन्मातरस्तव ॥ २४ ॥ न तु मोहिनिसंयुक्तो
दृश्योऽयं नृपतिः पतिः ॥ धर्मांगद उवाच ॥ यदि मे न पितुः सौख्यं करिष्यथ शुभाननाः ॥ २५ ॥ विषमालोड्य पास्यामि युष्मत्सौख्यं
मृते मयि ॥ कर्मणा मनसा वाचा या पितुर्दुःखमाचरेत् ॥ २६ ॥ सा मे शत्रुर्वधार्हास्ति यदि संध्यावली भवेत् ॥ सर्वासां साधिका देवी मोहिनी
जनकप्रिया ॥ २७ ॥ क्रीडार्थमागता बाला मन्दराचलमन्दिरात् ॥ तत्पुत्रवचनं श्रुत्वा वेपमाना हि मातरः ॥ २८ ॥ ऊचुः सगद्गदां वाचं
हितार्थं तनयस्य हि ॥ अवश्यं तव वाक्यं हि कर्तव्यं न्यायसंयुतम् ॥ २९ ॥ किं तु दानप्रदो भूत्वा मोहिनीं यातु ते पिता ॥ यो भार्यामुद्वहे
द्भर्ता द्वितीयामपरामपि ॥ ३० ॥ ज्येष्ठायै द्विगुणं तस्या दद्याच्चैवान्यथा ऋणी ॥ अनुज्ञाप्य यदा भर्ता ज्येष्ठामन्यां समुद्वहेत् ॥ ३१ ॥ तदा
ज्येष्ठाभिलषितं देयमाहुः पुराविदः ॥ ज्येष्ठया सहितः कुर्यादिष्टापूर्तं नरोत्तमः ॥३२॥ एष धर्मोऽन्यथाऽन्यायो जायते धर्मसंक्षयः ॥ श्रुत्वा तु
मातृवचनं प्रहृष्टेनान्तरात्मना ॥३३॥एकैकस्यै ददौ साग्रां कोटिं कोटिं सुतस्तदा॥ सहस्रं नगराणां च ग्रामाणां प्रददौ तथा॥३४॥चतुरश्वतरीभिश्च
पृथग्युक्ता नृपात्मजः ॥ एकैकस्य ददावष्टौ रथान्कांचनमालिनः ॥ ३५ ॥ वाससामयुतं प्रादाद्येषां मूल्यं शताधिकम् ॥ शुद्धस्य मेरुजातस्य
अक्षयस्य नृपात्मजः ॥ ३६ ॥ कांचनस्य ददौ लक्षमेकैकं प्रतिमातरम् ॥ दासानां च शतं साग्रं दासीनां च नृपात्मजः ॥३७॥ धेनूनां घटदोग्ध्री
णामेकैकस्यै तथायुतम् ॥ युगंधराणां भद्राणां शतानि दश वै पृथक् ॥ ३८ ॥ दशप्रकारं नृपते धान्यं च प्रददौ सुतः ॥ वाटीनां तु सहस्राणां
शतं प्रादाद्धसन्निव ॥ ३९ ॥ कुंभायुतं सर्पिषस्तु तैलस्य च पृथग्ददौ ॥ अजाविकमसंख्यातमेकैकस्यै न्यवेदयत् ॥ ४० ॥ सहस्रेण

सहस्रेण सुवर्णस्य व्यभूषयत् ॥ आखंडलास्त्रयुक्तस्य भूषणस्य सुभक्तिमान् ॥ ४१ ॥ धात्रीप्रमाणैर्हारैश्च मौक्तिकैर्दीप्तिसंयुतैः ॥ प्रददौ
संहतान्कृत्वा वलयान्पंच सप्त च ॥ ४२ ॥ पंचाशच्च शते द्वे तु मौक्तिकानि महीपते ॥ संध्यावल्यां स्थितानीह शीतांशुप्रतिमानि च
॥ ४३ ॥ एकैकस्यै ददौ पुत्रो हारयुग्मं मनोहरम् ॥ कुंकुमं चंदनं भूरि कर्पूरं प्रस्थसंख्यया ॥ ४४ ॥ कस्तूरिकां तथा ताभ्यो
भूयसीं प्रददौ सुतः ॥ मातॄणामविशेषेण पितुः सुखमभीप्सयन् ॥ ४५ ॥ भाजनानि विचित्राणि जलपात्राण्यनेकशः ॥ घृतक्षीरस्य पात्राणि
पेयस्य विविधस्य च ॥ ४६ ॥ चतुर्दशशतं प्रादात्सहस्रेण समन्वितम् ॥ स्थालीनां कांचनीनां हि सकुंभानां नृपात्मजः ॥ ४७ ॥
एकैकस्यै ददौ भूप शतानि त्रीणि पंच च ॥ करेणूनां सवेगानां मांसविक्रांतकंधराम् ॥ ४८ ॥ विंशतिं विंशतिं प्रादादुष्ट्रीणां च शतं शतम् ॥
शिबिकानां सवेषाणां पुंसां पीवरगामिनाम् ॥ ४९ ॥ प्रददौ दश सप्ताश्वान्मातॄणां सुखयायिनः ॥ एवं दत्वा बहुधनं बह्वीभ्यो नृपनंदनः
॥ ५० ॥ धन्यो धनपतिप्रख्यश्चक्रे तासां प्रदक्षिणाः ॥ कृतांजलिपुटो भूत्वा इदं वचनमब्रवीत् ॥ ५१ ॥ ममोपरोधात्प्रणतस्य मूर्ध्ना
पतिं समुद्दिश्य यथा भवत्यः ॥ ब्रुवंतु सर्वाः पितरं ममाद्य स्वैरेण संभुंक्ष्व नरेश मोहिनीम् ॥ ५२ ॥ न चास्मदीया भवता किलेर्ष्या स्वल्पापि
कार्या मनसि प्रतीता ॥ विमोहिनीं ब्रह्मसुतां सुशीलां रमस्व सौख्येन रहः शतानि ॥ ५३ ॥ तत्पुत्रवाक्यं हि निशम्य सर्वाः संहृष्टलोम्न्यो
नृपनाथमूचुः ॥ स्वभ्रूदुहित्रा सुचिरं रमस्व विदेहपुत्र्येव रघुप्रवीरः ॥ ५४ ॥ न शल्यभूता कुशकेतुपुत्री त्वत्संगमाद्विद्धि
न संशयोऽत्र ॥ पुत्रौजसा दुःखविमुक्तभावात्समीरितं वाक्यमिदं प्रतीहि ॥ ५५ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मातृसन्मानं नाम अष्टा
दशोऽध्यायः ॥ १८ ॥ वसिष्ठ उवाच ॥ सोऽनुज्ञातो महीपालः प्रियाभिः प्रियकामुकः ॥ प्रहर्षमतुलं लेभे धर्मांगदमुवाच ह ॥ १ ॥ एतां
द्वीपवतीं पृथ्वीं परिपालय पुत्रक ॥ कृत्वा दुष्टवधं त्वादावप्रमत्तः सदोद्यतः ॥ २ ॥ सदावसरसंयुक्तः सदाचारनिरीक्षकः ॥ सदा चेतनसंयुक्तः सदा
वाणिज्यवल्लभः ॥ ३ ॥ सदा भ्रमणशीलश्च सदा दानरतिर्भव ॥ सदा कौटिल्यहीनश्च सदाचाररतः सदा ॥ ४ ॥ अपरं शृणु मे पुत्र यत्कर्त्तव्यं
त्वयाधुना ॥ अविश्वासस्तु सर्वत्र भूमिपानां प्रशस्यते ॥ ५ ॥ कोषस्य च परिज्ञानं जनानां जनवल्लभ ॥ रसवद्द्रव्यमाकर्षैः पुष्पेभ्य इव षट्पदः ॥६॥
त्वया पुत्रेण संप्राप्तं पुनरेवेह यौवनम् ॥ ७ ॥ इमामपूर्वां वररूपमोहिनीं संप्राप्य भार्यां द्विजराजवक्त्राम् ॥ सुखेन संयोज्य च तेऽद्य भारं सप्तोदधिद्वी
पभवं प्ररंस्ये ॥ ८ ॥ क्रीडाकरस्तात मनुष्यलोके समर्थपुत्रे सुरताभिकामी ॥ भवेत्पिता चेद्वलिभिश्च युक्तो जीर्णद्विजः श्वेतशिरोरुहश्च ॥ ९ ॥ जीर्णो

ऽप्यजीर्णस्तव सौख्यवृद्धो वांछे इमां लोकवरां वरार्हाम् ॥ संत्यज्य देवान्क्षम हेतुमागतामनंगबाणाभिहतां सुनेत्राम् ॥ १०॥ कामं रमिष्ये द्रुतकां
चनाभां ह्येकांतशीलः परिपूर्णचेताः॥ भूत्वा तु गुप्तो वननिर्झरेषु रम्येषु दिव्येषु नदीतटेषु॥११॥इयं पुरंध्री मम जीविताधिका सुखेन धार्या त्रिदिवैक
नारी ॥ अस्यास्तु हेतोर्विबुधा विमूढा यथा रमायै धरणीशसंघाः ॥१२॥ तद्वाक्यमाकर्ण्य पितुः सुबुद्धिः प्रणम्य भक्त्या जननीसमेतम् ॥ नृपो
त्तमं तं नृपनन्दनोऽसौ दिदेश भोगार्थमनेकवित्तम् ॥१३॥आज्ञाविधेयांस्तु पितुर्नियोज्य दासांश्च दासीश्च हिरण्यकंठीः ॥ मत्स्यध्वजात्तस्य सुखाय
पुत्रस्ततो महीरक्षणमाचचार॥१४॥नृपैस्तुतो धर्मविभूषणोऽसौ समावृतो द्वीपवतीं समग्राम्॥तस्येत्थमुर्वीं चरतश्च भूप न पापबुद्धिं कुरुते जनौघः॥१५॥
न चापि वृक्षः फलपुष्पहीनो न क्षेत्रमासीद्यवशालिहीनम् ॥ स्रवंति गावो घटपूरदुग्धं घृताधिकं शर्करवत्सुमिष्टम्॥१६॥क्षीरं सुपेयं सकलार्तिनाशनं
पापापहं पुष्टिविवर्धनं च॥जनो न कश्चिद्विभवस्य गोप्ता भर्तुर्हि भार्या न कटूक्तिवादिनी॥१७॥पुत्रो विनीतः पितृशासने रतो वधूः स्थिता हस्तपुटे
च श्वश्रोः॥द्विजोपदेशे हि जनो व्यवस्थितो वेदोक्तधर्माचरणाद्द्विजोत्तमाः॥१८॥न भुंजते माधववासरे जना न यांति शोषं भुवि निम्नगास्तु॥संभुज्य
माना नहि यांति संपदः संभोगयुक्तैरपि मानवैः क्षयम् ॥१९॥ विवृद्धिमायांति जलैरिवोर्द्ध्वं दूर्वातृणं शाद्वलतामुपैति॥कृती च लोको ह्यभवत्समस्तो
धर्मांगदे पालनसंप्रवृत्ते ॥२०॥ भुक्त्वा तु सौख्यानि च यांति मानवा हरेः पदं तद्दिनसेवनेन॥द्वाराणि सध्वान्तनिशासु भूप गुप्तानि कुर्वंति न दस्यु
भीताः ॥२१॥ न चापि गोपेषु ददंति वृत्तिं स्वेच्छाचरा मंदिरमाव्रजंति ॥ क्षीरं क्षरंत्यो घटवत्सुभूरिशो वत्सप्रियाः शांतिकराश्च गावः ॥२२॥अकृ
ष्टपच्या धरणी समस्ता प्ररूढसस्या किल लांगलं विना ॥ मातुः पयोभिः शिशवः सुपुष्टा भर्तुः प्रयोगैः प्रमदाः सुपुष्टाः ॥२३॥नृपैः सुगुप्तास्तु
जनाः सुपुष्टाः सत्याभियुक्तो हि वृषः सुपुष्टः ॥ एवंविधे धर्मरतिप्रधाने जने प्रवृत्ते हरिभक्तियुक्ते ॥ संरक्ष्यमाणे हि नृपात्मजेन जगाम कालः सुखहे
तुभूतः ॥२४ ॥ निरामयो भूतिसमन्वितश्च सभूरिवर्षोत्सवकारकश्च ॥ पृथ्वीपतिश्चातिविमोहितश्च विमोहिनीचेष्टितसौख्ययुक्तः ॥ २५॥ दिनं न
जानाति न चापि रात्रिं मासं च पक्षं च स वत्सरं च ॥ अतीव मुग्धः सुरतेन तस्या विरंचिपुत्र्याः शुभचेष्टितायाः ॥ २६ ॥ विमोहिनीसंगमने
नृपस्य बभूव शक्तिस्त्वधिका मनोजे॥यथा यथा सेवत एव भूपस्तथा तथा वृद्धिमियर्ति वीर्यम् ॥ पक्षेषु शुक्लेष्विव शीतभानुर्न क्षीयते संततसेवनेन
॥ २७ ॥ वृंदारकः पीतसुधारसो यथा संस्पृश्य संस्पृश्य पुनर्नवोऽसौ ॥ पिबंस्तु पानं सुमनोहरं हि शृण्वंस्तु गीतं सुपदप्रयुक्तम् ॥२८॥ पश्यंश्च
रूपं स नितंबिनीनां स्पृशन्स्पृशन्मोहिनिवक्त्रचंद्रम् ॥ विमर्दमानस्तु करेण तुंगौ सुखेन पीनौ पिशितोपरूढौ ॥२९ ॥ घनस्तनौ कांचनकुंभतुल्यौ

प्रच्छादितौ हारविभूषणेन ॥ वलित्रयं नातिविवर्द्धमानं मनोहरं लोमशराजिशोभम् ॥ ३० ॥स्तनस्य रूपं परितो विलोक्य दध्रे वरांग्याः शुभलो
चनायाः॥नहीदृशं चारुतरं नितांतं नितंबिनीनां मनसोऽभिरामम्॥३१॥यादृग्विधं मोहिनिमोहनार्थं विनिर्मितं यद्विधिना स्वरूपम्॥मृगेंद्रशत्रोःकर
सन्निकाशे जंघे विलोमे द्रुतकांचनाभे ॥ ३२ ॥ शशांककांतिर्द्दशनस्य पंक्तिर्निगूढगुल्फे जनमोहनार्थम् ॥ आपादशीर्षं किल तत्स्वरूपं संपश्य
तच्चारुविशालनेत्र्याः ॥ ३३ ॥ मेने सुराणामधिकं हि राजा कृतार्थमात्मानमतीव हर्षात्॥ अहो सुतन्वी विपुलेक्षणेयं याचिष्यते यच्च तदेव देयम्
॥ ३४ ॥ अस्यास्तु रम्ये सुरते शुभाया दास्यामि चांते निजवित्तजातम् ॥ सुदुर्लभं देयमदेयमन्यैर्दास्यामि चास्या यदि वाप्यदेयम् ॥ ३५ ॥
यद्यप्यदेयं मम जीवितं हि याचिष्यते चेद्यदि हेमवर्णा॥ दास्यामि चेदं न विचारयिष्ये पुत्रं विना नास्ति नदेयमस्याः ॥३६॥इति श्रीबृहन्नारदीय
पुराणोत्तरभागे मोहिनीप्रणयवर्णनं नामैकोनविंशोऽध्यायः ॥ १९ ॥ वसिष्ठ उवाच ॥ एवं सुरतमूढस्य राज्ञो रुक्मांगदस्य च॥त्रीणि पंच च वर्षाणि
व्यतीतानि सुखेन वै॥१॥ संप्राप्ते नवमे वर्षे पुत्रो धर्मांगदो बली ॥ जित्वा विद्याधरान्पंच मलये पर्वतोत्तमे ॥२ ॥ आजहार मणीन्पंच सर्वकामप्र
दान् शुभान् ॥ एकं कांचनदातारं कोटिकोटिगुणं शुभम् ॥ ३ ॥ द्वितीयं वस्त्रभूषादिलक्षकोटिप्रदं तथा ॥ तृतीयममृतस्रावि पुनर्यौवनकार
कम् ॥ ४ ॥ सभागृहप्रकर्तारं चतुर्थं चान्नसाधकम् ॥ पंचमं व्योमगतिदं त्रैलोक्यपरिसर्पणम् ॥ ५ ॥ तान्मणीन्गृह्य मनसा विद्याधरसम
न्वितः ॥ स्त्रीभिर्विद्याधराणां च साश्रुनेत्राभिरावृतः ॥ ६॥ ववंदे चरणौ मातुः पितू रुक्मांगदस्य च ॥ मणीन्पंच समर्प्याथ पादयोः प्राह संनतः
॥ ७ ॥ इमे जिता मया तात पञ्च विद्याधरा रणे ॥ मलये भूधरश्रेष्ठे वैष्णवास्त्रेण भूपते ॥ ८ ॥ इमे ते भृत्यतां प्राप्ताः सस्त्रीका नृपसत्तम ॥
मणीन्प्रयच्छ मोहिन्यै भुजभूषणहेतवे ॥ ९ ॥ सर्वकामप्रदा ह्येते पुनर्यौवनकारिणः ॥ जीर्णदंताः पुनर्बाला भवंति मणिधारणात् ॥ १० ॥
वस्त्रहर्म्यसुवर्णानां स्वर्गतेरमृतस्य च ॥ दातारो मासयुद्धेन साधितास्तव तेजसा ॥ ११ ॥ साधितानि मया कृच्छ्रात्सप्तद्वीपानि भूपते ॥ करदानि
समस्तानि कृतानि तव तेजसा ॥१२ ॥ समुद्रे च प्रविष्टस्य गतः संवत्सरो मम ॥ जिता भोगवती तात मया नागसमावृता ॥१३॥आहृता नागक
न्याश्च मया चायुतसंख्यकाः ॥ तत्रापि हाररत्नानि सुबहून्याहृतानि च ॥१४॥ पुनश्चाहं गतस्तात दानवानां पुरं महत् ॥ तान्निर्जित्य च कन्यानां
सुरूपाणां सुवर्चसाम् ॥१५ ॥ आहृतानि मया त्रीणि सहस्राणि च पंच च ॥ दशकोट्यस्तु रत्नानां दीपकर्म निशागमे॥१६ ॥ कुर्वतां ते महीपाल
आनीतास्तव मंदिरे ॥ ततोऽहं वारुणं लोकं रसातलतलस्थितम् ॥ १७॥ गतो वीर्यबलोत्सिक्तस्त्वदंघ्रियुगसेवकः ॥ तत्रोक्तो वरुणो देवः स्थीयतां

सत्पितुर्वंशे॥१८॥ रुक्मांगदस्य नृपतेर्यदि जीवितुमिच्छसि॥कुपितो मम वाक्येन वरुणो योद्धुमागतः॥१९॥तेन संवत्सरं युद्धं घोरं जातं रसातले॥
जितो नारायणास्त्रेण मया स जलनायकः ॥ २० ॥ न हतः प्रमदावाक्यैस्तस्य जीवितरक्षणे ॥ निर्जितेनायुतं दत्तं वाजिनां वातरंहसाम् ॥२१ ॥
एकतः श्यामकर्णानां शुभ्राणां चंद्रवर्चसाम् ॥ तृणतोयविहीना ये जीवंति बहुशः समाः ॥ २२ ॥ एकां कन्यां सुरूपां मे पुरस्कृत्य स्वलंकृताम् ॥
भार्यार्थे वरुणः प्रादात्साप्यानीता मया शुभा ॥ २३ ॥ कुमारी तु समानीता बहुवित्तसमन्विता ॥ तन्नास्ति त्रिषु लोकेषु स्थानं तात सुदुर्गमम्
॥२४ ॥ यन्मया न जितं ह्यस्ति तवांघ्रिपरिसेवनात् ॥ तदुत्तिष्ठ परीक्षस्व त्वत्प्रसादार्जितां श्रियम् ॥२५॥ अहं च संपदः सर्वास्त्वदधीना विशां
पते ॥ यः पुत्रस्तात वदति मया लक्ष्मीः समर्जिता ॥ २६ ॥ न देया भूमिदेवेभ्यः सोऽपि वै नरकं व्रजेत् ॥ आत्मसंभावनं तात न कर्तव्यं सुतेन
हि ॥ २७ ॥ कुठारदात्रसदृशः पुत्रः संपत्समुच्चये ॥ पितुः शौर्येण पुत्रस्य वर्द्धते धनसंचयः ॥ २८ ॥ तैजसं दात्रमादाय लुनाति तृणसंच
यान् ॥ वायुना पूरितं वस्त्रं तारयेन्नौगतं जले ॥ २९॥ यथा दारुमयी योषा चेष्टते कुहकेच्छया॥तथाहि पितृवीर्येण पुत्रास्तेजोबलान्विताः॥३० ॥
तस्मादियं माधवदेववल्लभा विलोकयस्वाद्य मयोपनीता ॥ आत्मेच्छया यच्छतु रक्षताद्वा स्वसंपदो मातृसमूहवर्याः ॥३१॥ इति श्रीबृहन्नारदीयपुरा
णोत्तरभागे धर्मांगददिग्विजयो नाम विंशोऽध्यायः॥२० ॥मांधातोवाच॥ पुत्रस्य वचनं श्रुत्वा किं चकार महीपतिः॥ सा चापि मोहिनी ब्रह्मन्प्रिया
राज्ञो विधेः सुता ॥ १ ॥ आश्चर्यरूपं कथितमाख्यानं तु सुधोपमम् ॥ विशेषतस्त्वया पुण्यं सर्वसंदेहभंजनम् ॥ २ ॥ वसिष्ठ उवाच ॥
तत्पुत्रवचनं श्रुत्वा प्रहृष्टो नृपपुंगवः ॥ उदतिष्ठत्प्रियायुक्तस्ताः श्रियश्चावलोकयत् ॥ ३ ॥ क्षणं हर्षान्वितो भूप राजा विष्णुपरायणः ॥
नागकन्यास्तु ताः सर्वा वारुणीसहिता मुदा ॥ ४ ॥ प्रददौ तनये प्रेम्णा भार्यार्थं धर्मभूषणे ॥ शेषं दानवनारीभिर्बहुरत्नसमन्वितम् ॥ ५ ॥
मोहिन्यै प्रददौ राजा कामबाणप्रपीडितः ॥ संविभज्य पिता वित्तं धर्मांगदसमाहृतम् ॥ ६ ॥ पुरोहितमुवाचेदं काले चाहूय भूपतिः ॥ सर्वासां
मत्सुतो ब्रह्मन्पाणीन्गृह्णातु धर्मतः ॥ ७ ॥ कुमारीणां कुमारोऽयं मद्वाक्ये संस्थितः सदा ॥ वैवाह्यलग्ने नक्षत्रे मुहूर्ते सर्वकामदे ॥ ८ ॥
वाचयित्वा द्विजान्स्वस्ति गोस्वर्णांबरतोषितान् ॥ विवाहं कुरु पुत्रस्य मम धर्मांगदस्य वै ॥ ९ ॥ यः पुत्रस्य पितोद्वाहं न करोतीह मंदधीः ॥
स मज्जेन्नरके घोरे ह्यप्रतिष्ठे युगायुतम् ॥ १०॥ तस्माच्चोद्वाहयेत्पुत्रं पिता धर्मसमन्वितः ॥ आत्मा संस्थापितस्तेन येन संस्थापितः सुतः ॥११॥
सर्वक्रतुफलं तस्य पुत्रोद्वाहे कृते भवेत् ॥ पुत्रस्य गुणयुक्तस्य निर्गुणस्यापि भूसुर ॥ १२ ॥ पित्रा कारयितव्यो हि विवाहो धर्ममिच्छता ॥ यो न

दारैश्च वित्तैश्च पुत्रान्संयोजयेत्पिता ॥ १३ ॥ न पुमान्स तु विज्ञेय इहामुत्र विगर्हितः ॥ तस्माद्वृत्तियुताः कार्याः पुत्रा दारैः समन्विताः ॥ १४ ॥
यथा रमन्ते ते तुष्टाः सुखं पुत्राः सुमानिताः ॥ तच्छ्रुत्वा वचनं राज्ञो द्विजस्तस्य पुरोहितः ॥ १५ ॥ धर्मांगदविवाहार्थमुद्यतो हर्षसंयुतः ॥ स
युवानिच्छमानोऽपि स्त्रीसौख्यं लज्जया सुतः ॥ १६ ॥ स्वीचकार पितुर्वाक्याद्दारसंग्रहणं तदा ॥ वरुणात्मजया सार्द्धं नागकन्या मनोहराः ॥१७ ॥
उपयेमे महाबाहू रूपेणाप्रतिमा भुवि ॥ उद्वाहयित्वा सर्वास्ता विधिदृष्टेन कर्मणा ॥ १८ ॥ वसुगोरत्नदानानि विप्रेभ्यः प्रददौ मुदा ॥ कृतदारो
ववंदेऽथ पादान्मातुः पितुर्मुदा ॥ १९ ॥ ततः संध्यावलीदेवीमाह धर्मांगदः सुतः ॥ पितुर्वाक्येन मे देवि संजातो दारसंग्रहः ॥ २० ॥ एतन्मे नास्ति
मनसि यत्पित्रोद्वाहितो ह्यहम्॥अव्ययं पितरं विज्ञं देवि शुश्रूषये ह्यहम्॥२१॥दिव्यैर्भोगैर्न मे किंचित्स्वर्गेणापि प्रयोजनम्॥कार्या मे पितृशुश्रूषा तव चैव
दिवानिशम् ॥२२॥ संध्यावल्युवाच ॥ चिरं जीव सुखं पुत्र भुंक्ष्व भोगान्मनोऽनुगान्॥पितुःप्रसादाद्दीर्घायुर्मनो नंदय मे सुत॥२३॥त्वया सुपुत्रिणी
पुत्र जाता गुणवता क्षितौ ॥ सपत्नीनां च सर्वासां हृदये संस्थिता ह्यहम् ॥२४ ॥ एवमुक्त्वा परिष्वज्य मूर्द्धन्याघ्राय चासकृत् ॥ व्यसर्जयत्ततः पुत्रं
राज्यतंत्रावलोकने ॥ २५ ॥ विसर्जितस्तदा मात्रा मातॄरन्याः प्रणम्य च॥ राज्यतंत्रं तदखिलं चक्रे पितृवचःस्थितः॥२६॥दुष्टनिग्रहणं चक्रे शिष्टानां
परिपालनम् ॥ अटनं सर्वदेशेषु वीक्षणं सर्वकर्मणाम् ॥ २७ ॥ चक्रे सर्वत्र कार्याणां मासि मासि निरीक्षणम् ॥ हस्त्यश्वपोषणं चक्रे चारचक्रेक्षणं
तथा ॥ २८॥ वादसंवीक्षणं चक्रे तुलामानं दिने दिने॥गृहे गृहे नराणां च चक्रे संरक्षणं नृपः ॥ २९ ॥स्तनंधयी क्वचिद्बालः स्तनहीनो न रोदिति ॥
श्वश्रूर्वध्वा न कुत्रापि प्ररोदित्यवमानिता ॥३० ॥ क्वचित्समर्थस्तनयः पितरं नहि याचते ॥ न वर्णसंकरो राज्ये केषांचिदभवत्पुनः ॥ ३१ ॥ न
गूढविभवो लोको धर्मे वदति दूषणम् ॥ न कंचुकविहीना तु भवेन्नारी सभर्तृका ॥३२॥ गृहान्निष्क्रमणं स्त्रीणां मास्तु राज्ये मदीयके॥मा सकेशा
हि विधवा मास्त्वकेशा सभर्तृका ॥ ३३ ॥मा व्रतीह सदाक्रोशी मारण्या नगराश्रयाः ॥ सामान्यवृत्त्यदाता मे राज्येऽवसतु निर्घृणः॥३४॥गोपालो
नगराकांक्षी निर्गुणस्तूपदेशकः॥ऋत्विग्वा शास्त्रहीनश्च मा मे राज्ये वसेदिह ॥ ३५ ॥ यो हि निष्पादयेन्नीलीं नीलीरंगातिसेचकः ॥ निर्वास्यौ
तावुभौ पापौ यो वै मद्यं करोति च॥३६॥वृथा मांसं हि योऽश्नाति पृष्ठमांसप्रियो हि यः ॥ तस्य वासो न मे राज्ये स्वकलत्रं त्यजेच्च यः ॥३७॥
विष्णुं परित्यज्य वरं सुराणां संपूजयेद्योऽन्यतमं हि देवम्॥गच्छेत्सगर्भां युवतीं प्रसूतां दंड्यश्च वध्यश्च स चास्मदीयैः॥३८॥इति श्रीबृहन्नारदीयपुराणोत्तरभागे
शिक्षानिरूपणं नामैकविंशोऽध्यायः ॥ २१ ॥ वसिष्ठ उवाच ॥ एवं धर्मांगदो राज्यं चकार वसुधातले ॥ पितुर्नियोगाद्राजेंद्र

पालयन् हरिवासरम् ॥ १ ॥ न बभूव जनः कश्चिद्यो न धर्मे व्यवस्थितः ॥ नासुखी नाप्रजः कश्चिन्न वा कुष्ठी महीपते ॥ २ ॥ हृष्टपुष्ट
जने तस्मिन् क्ष्मा चैव निधिदायिनी ॥ घटदोग्ध्रीषु नृपते तृप्तवत्सासु धेनुषु ॥ ३ ॥ पुटके पुटके क्षौद्रं द्रोणमात्रं द्रुमे द्रुमे ॥ प्रहृष्टायां तु मेदिन्यां
सर्वधान्यसमुद्भवः ॥ ४ ॥ कृतस्य स्पर्द्धिनि युगे त्रेतान्ते द्वापरे युगे ॥ व्यतीते जलदापाये निर्मले चांबरे गृहे ॥५ ॥ सुगंधिशालिपक्वाढ्ये कुंभोद्भ
वविलोकिते ॥ मध्यप्रवाहयुक्तासु निम्नगासु समंततः ॥ ६ ॥ तीरोत्थैः काशपुष्पैश्च शुक्लकेशैरिवांगना ॥ चन्द्रांशुधवले लोके नातितीव्रे दिवा
करे ॥ ७ ॥ तस्मिन्मनुष्यबहुलैर्जलस्नानविचित्रितैः ॥ यत्रोत्सुकैः प्रयातैस्तु भूमिपालैः समंततः॥ ८ ॥प्रबोधसमये विष्णोराश्विनांते जगद्गुरोः ॥
मोहिनी रमयामास तत्काले हृच्छयार्दिता ॥ ९ ॥ राजानं विविधैः सौख्यैः सर्वभावेन सुंदरी ॥ वनेषु गिरिशृंगेषु नदीनां संगमेषु च ॥ १० ॥
पद्मिनी कुसुमाढ्येषु सरःसु विविधेषु च ॥ मलये मन्दरे विंध्ये महेंद्रे विबुधालये ॥ ११ ॥ सह्ये प्रालेयसंज्ञे च दिगंबरगिरौ शुभे ॥ अन्येषु चैव
राजानं स्वर्गस्थानादिकेषु च ॥ १२ ॥ रमयायास राजेंद्र दिव्यरूपा दिने दिने ॥ राजापि मोहिनीं प्राप्य सर्वं कृत्यं परित्यजन् ॥ १३ ॥ त्यक्तं
न वासरं विष्णोर्जन्ममृत्युनिकृंतनम् ॥ व्रतं नोपेक्षते तत्तु अतिमुग्धोऽपि पार्थिवः ॥ १४ ॥ क्रीडां त्यजति भूपालो दशम्यादिदिनत्रये ॥ एवं
प्रक्रीडतस्तस्य पूर्णे संवत्सरे गते ॥ १५॥ काले कालविदां श्रेष्ठः संप्राप्तः कार्तिकः शुभः ॥निद्राछेदकरो विष्णोः स मासः पुण्यदायकः॥ १६॥यस्मि
न्कृतं हि सुकृतं वैष्णवैर्मनुजैर्नृप ॥ अक्षयं हि भवेत्सर्वं विष्णुलोकप्रदायकम् ॥ १७॥ न कार्तिकसमो मासो न कृतेन समं युगम्॥न धर्मस्तु दया
तुल्यो न ज्योतिश्चक्षुषा समम्॥१८॥न वेदेन समं शास्त्रं न तीर्थं गंगया समम्॥न भूम्या सदृशं दानं न सुखं भार्यया समम्॥१९॥न कृष्या तु समं
वित्तं न लाभः सुरभीसमः ॥ न तपोऽनशनादन्यन्न दमेन समं शिवम् ॥ २०॥ तृप्तिर्न रसनातुल्या न समोऽन्यो द्विजेन च॥ न धर्मेण समं मित्रं
न सत्येन समं यशः ॥ २१ ॥ नारोग्यसममैश्वर्य न देवः केशवात्परः ॥ न कार्तिकसमं लोके पावनं कवयो विदुः ॥ २२ ॥ कार्तिकः प्रवरो मासो
विष्णोश्चापि प्रियः सदा ॥ अव्रतो हि क्षिपेद्यस्तु मासं दामोदरप्रियम् ॥ २३ ॥ तिर्यग्योनिमवाप्नोति सर्वधर्मबहिष्कृतः ॥ २४ ॥ मांधातोवाच ॥
संप्राप्य कार्तिके मासे राजा रुक्मांगदो मुने ॥ मोहिनीं मोहसंयुक्तां कथं स बुभुजे वद ॥ २५ ॥ विष्णुभक्तः श्रुतिपरः प्रवरः स महीक्षिताम् ॥
तस्मिन्पुण्यतमे मासे किं चकार नृपोत्तमः ॥२६॥ वसिष्ठ उवाच ॥ संप्राप्तं कार्तिकं दृष्ट्वा प्रबोधकरणं हरेः ॥ अतिप्रमुग्धो राजेंद्रो मोहिनीं वाक्य
मब्रवीत् ॥ २७ ॥ रतं देवि त्वया सार्द्धं मया संवत्सरान्बहून् ॥ तवापमानभीतेन नोक्तं किञ्चिदपि क्वचित् ॥ २८ ॥ सांप्रतं वक्तुकामोऽहं तन्नि

बोध शुभानने ॥ त्वय्यासक्तस्य मे देवि बहवः कार्तिका गताः ॥२९॥ न व्रती कार्तिके जातो मुक्त्वैकं हरिवासरम् ॥ सोऽहं कार्तिकमिच्छामि व्रते न पर्य्युपासितुम् ॥३०॥ अव्रतेन गतो येषां कार्तिको मर्त्यधर्मिणाम् ॥ इष्टापूर्तौ वृथा तेषां धर्मो द्रुहिणसंभवे ॥ ३१ ॥ मांसाशिनोऽपि भूपाला अत्यर्थं मृगयारताः ॥ ते मांसं कार्तिके त्यक्त्वा गता विष्ण्वालयं शुभे ॥ ३२ ॥ प्रवृत्तानां हि भक्ष्याणां कार्तिके नियमे कृते ॥ अवश्यं विष्णुरूपत्वं प्राप्यते साधकेन हि ॥ ३३ ॥ तिष्ठंतु बहुवित्तानि दानानि वरवर्णिनि ॥ हृदयायासकर्तॄणि दीपदानाद्दिवं व्रजेत् ॥ ३४ ॥ तस्याप्यभावात्सुभगे परदीपप्रबोधनम् ॥ कर्तव्यं भक्तिभावेन सर्वदानाधिकं च तत्॥३५॥एकतः सर्वदानानि दीपदानं हि चैकतः॥ कार्तिकेन समं प्रोक्तं दीपदानात्प्रबोधनम् ॥३६॥ कर्तव्यं भक्तिभावेन सर्वदानाधिकं स्मृतम् ॥ कार्तिकीं च तिथिं कृत्वा विष्णोर्नाभिसरोरुहे॥३७॥आजन्मकृतपापात्तु मुच्यते नात्र संशयः ॥ व्रतोपवासनियमैः कार्तिको यस्य गच्छति ॥ ३८ ॥ देवो वैमानिको भूत्वा स याति परमां गतिम् ॥ तस्मान्मोहिनि मोहं त्वं परित्यज्य ममोपरि ॥ ३९ ॥ आज्ञां विधेहि तत्कालं करिष्ये कार्त्तिकव्रतम् ॥ तव वक्षोजपूजाया विरतो नीरजेक्षणे ॥ ४० ॥ अहं व्रतधरश्चैव भविष्ये हरिपूजने ॥ मोहिन्युवाच ॥ विस्तरेण समाख्याहि माहात्म्यं कार्तिकस्य च ॥४१॥सर्वपुण्याकरः प्रोक्तो मासोऽयं राजसत्तम॥ विशेषात्कुत्र कथितस्तदादिश महामते ॥४२॥ श्रुत्वा कार्त्तिकमाहात्म्यं करिष्येऽहं यथेप्सितम् ॥४३॥ रुक्मांगद उवाच ॥ माहात्म्यमभिधास्यामि मासस्यास्य वरानने ॥ येन भक्तिर्भवित्री ते प्रकर्तुं हरिपूजनम् ॥४४॥ कार्त्तिके कृच्छ्रसेवी यः प्राजापत्यचरोऽपि वा॥एकांतरोपवासी वा त्रिरात्रोपोषितोऽपि वा ॥४५॥ यद्वा दशाहं पक्षं वा मासं वा वरवर्णिनि ॥ क्षपयित्वा नरो याति स विष्णोः परमं पदम् ॥४६॥ एकभक्तेन नक्तेन तथैवायाचितेन च ॥ अस्मिन् नरैर्धरा चैव प्राप्यते द्वीपमालिनी ॥ ४७ ॥ विशेषात्पुष्करे तीर्थे द्वारावत्यां च शौकरे ॥ मासोऽयं भक्तिदः प्रोक्तो व्रतदानार्चनादिभिः ॥ ४८ ॥ तस्मिन्हरिदिनं पुण्यं तथा वै भीष्मपंचकम् ॥ प्रबोधिनीं नरः कृत्वा जागरेण समन्विताम् ॥ ४९ ॥न मातुर्जठरे तिष्ठेदपि पापान्वितो नरः ॥ तस्मिन्दिने वरारोहे मंडलं यस्तु पश्यति ॥ ५० ॥ विना सांख्येन योगेन स याति परमं पदम् ॥ कार्तिके मंडलं दृष्ट्वा शौकरेः सूकरं शुभे ॥ ५१ ॥ दृष्ट्वा कोकवराहं वा न भूयस्तनयो भवेत् ॥ त्रिविधस्यापि पापस्य दृष्ट्वा मुक्तिर्भवेन्नृणाम् ॥ ५२ ॥ मंडलं चपलापांगि श्रीधरं कुब्जके तथा ॥ कार्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु ॥ ५३ ॥ कार्तिके वर्जयेन्मांसं कार्तिके वर्जयेत्स्त्रियः ॥ निष्पावान्कार्तिके देवि संत्य

---

१ विष्णोर्नाभिसरोरुहे-पुष्कराख्ये तीर्थे कार्त्तिकीं तिथिं कार्तिकशुक्लपौर्णिमां कृत्वा उपोष्य आजन्मकृतपापान्मुच्यते इति संबंधः ।

जेद्विष्णुतत्परः ॥ ५४ ॥ संवत्सरकृतात्पापाद्वहिर्भवति तत्क्षणात् ॥ प्राप्नोति राजकीं योनिं सकृद्भक्षणसंभवात् ॥ ५५ ॥ कार्तिके शौकरं मांसं
यस्तु भुञ्जीत दुर्मतिः ॥ षष्टिवर्षसहस्राणि रौरवे परिपच्यते ॥ ५६ ॥ तन्मुक्तो जायते पापी विष्ठाशी ग्राम्यसूकरः ॥ मात्स्यं मांसं न भुञ्जीत न
कौर्मं नापि हारिणम् ॥५७॥ चाण्डालो जायते देवि कार्तिके मांसभक्षणात् ॥ कार्तिकः सर्वपापघ्नः किञ्चिद्व्रतधरस्य हि ॥५८॥ कार्तिके तु कृता
दीक्षा नृणां जन्मनिकृंतनी ॥ तस्मात्सर्वप्रयत्नेन दीक्षां कुर्वीत कार्तिके ॥ ५९ ॥ अदीक्षितस्य वामोरु कृतं सर्वं निरर्थकम् ॥ पशुयोनिमवाप्नोति
दीक्षया रहितो नरः ॥ ६० ॥ न गृहे कार्तिकं कुर्याद्विशेषेण तु कार्तिकीम् ॥ तीर्थे हि कार्तिकीं कुर्वन्नरो याति हरेः पदम् ॥ ६१ ॥ कार्तिके शुक्ल
पक्षस्य कृत्वा ह्येकादशीं नरः ॥ प्रातर्दत्वा शुभान्कुंभान्प्रयाति हरिमंदिरम् ॥ ६२ ॥ संवत्सरव्रतानां हि समाप्तिः कार्तिकं स्मृता ॥ विवाहा यत्र
दृश्यंते विष्णोर्नाभिसरोरुहे ॥ ६३ ॥ दिनानि तत्र चत्वारि यथैकं वरवार्णिनि ॥ विनोत्तरायणे कालं लग्नशुद्धिं विनापि च ॥ ६४ ॥ दृश्यन्ते
यत्र सम्बन्धाः पुत्रपौत्रविवर्द्धनाः ॥ तस्मान्मोहिनि कर्तास्मि कार्तिके व्रतसेवनम् ॥६५॥ अशेषपापनाशाय तव प्रीतिविवृद्धये ॥ मोहिन्युवाच ॥
अहो माहात्म्यमतुलं कार्तिकस्य त्वयेरितम् ॥ ६६ ॥ चातुर्मास्यव्रतानां हि विधिमुद्यापनं वद ॥ पूर्णता येन भवति व्रतानां पृथिवीपते ॥ ६७ ॥
अवैकल्यं भवेच्चैव व्रतं पुण्यफलस्य तु॥राजोवाच॥नक्तव्रती षड्रसेन ब्राह्मणं भोजयेत्प्रिये ॥६८॥अयाचिते त्वनड्वाहं सहिरण्यं प्रदापयेत्॥अमांसाशी
भवेद्यस्तु गां प्रदद्यात्सदक्षिणाम्॥६९॥धात्रीस्नाने नरो दद्याद्दधिपायसमेव च॥ फलानां नियमे सुभ्रु फलदानं समाचरेत्॥७०॥ तैलत्यागे घृतं दद्या
द्घृतत्यागे पयस्तथा ॥ धान्यानां नियमे शालींस्तत्तद्धान्यमथापि वा ॥ ७१ ॥ दद्याद्भूशयने शय्यां तूलिकागंडकान्विताम् ॥ पत्रभोजी नरो
दद्याद्भाजनं घृतसंयुतम् ॥ ७२ ॥ मौने घंटां तिलान्वापि सहिरण्यान्प्रदापयेत् ॥ दंपत्योर्भोजनं कार्यमुभयोः शयनान्वितम् ॥ ७३ ॥ संभोगं
दक्षिणोपेतं व्रतस्य परिपूर्तये ॥ प्रातःस्नाने हयं दद्यान्निःस्नेहे घृतसक्तुकान् ॥ ७४ ॥ नखराणां च केशानां धारणे दर्पणं ददेत् ॥ उपानहौ प्रदद्यात्तु
पादत्राणविवर्जने ॥७५॥लवणस्य तु संत्यागे दातव्या सुरभिस्तथा॥ आमिषस्य परित्यागे सवत्सां कपिलां ददेत् ॥ ७६ ॥ नित्यं दीपप्रदो
यस्तु व्रतेऽभीष्टे सुरालये ॥ स कांचनं तथा ताम्रं सघृतं दीपकं प्रिये ॥७७॥ प्रदद्याद्वाससा छत्रं वैष्णवे व्रतपूर्तये॥एकांतरोपवासी तु क्षौमवस्त्रं प्रदा
पयेत् ॥ ७८ ॥ त्रिरात्रे कांचनोपेतां दद्याच्छय्यां स्वलंकृताम् ॥ षड्रात्राद्युपवासेषु शिबिकां छत्रसंयुताम् ॥ ७९ ॥ सवाहपुरुषं पीनमनड्वाहमथार्प

---

१ पुष्करक्षेत्रे ।

येत् ॥ अजाविकं त्वेकभक्ते फलाहारे सुवर्णकम् ॥ ८० ॥ शाकाहारे फलं दद्यात्सौवर्णं घृतसंयुतम् ॥ रसानां चैव सर्वेषां त्यागेऽनुक्तस्य वापि च ॥ ८१ ॥ दातव्यं राजतं पात्रं सौवर्णं वापि शक्तितः ॥ यथोक्तस्याप्रदाने तु यथोक्ताकरणेऽपि वा ॥ ८२ ॥ विप्रवाक्यं चरेत्सुभ्रु विष्णुस्मरणपूर्वकम् ॥ वृथा विप्रवचो यस्तु मन्यते मनुजः शुभे ॥ ८३ ॥ दक्षिणां नैव दद्याद्वा स याति नरकेध्रुवम् ॥ व्रतवैकल्यमासाद्य कुष्ठी चांधः प्रजायते ॥ ८४ ॥ धरामराणां वचने व्यवस्थिता दिवौकसस्तीर्थगणा मखाश्च ॥ को लंघयेत्सुभ्रु वचो हि तेषां श्रेयोभिकामो मनुजस्तु विद्वान् ॥ ८५ ॥ इदं मया धर्मरहस्ययुक्तं विरंचये श्रीपतिना यथोक्तम् ॥ प्रकाशितं तुभ्यमनन्यवाच्यं फलप्रदं माधवतुष्टिहेतुम् ॥ ८६ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे कार्तिकमाहात्म्यं नाम द्वाविंशोऽध्यायः ॥ २२ ॥ मोहिन्युवाच ॥ वाक्यमुक्तं त्वया साधु कार्तिके यदुपोषणम् ॥ व्रतादिकरणं राज्ञां नोक्तं क्वापि निदर्शने ॥ १ ॥ मुक्त्वैकं ब्राह्मणं लोके नोक्तं शूद्रविशोरपि ॥ दानं हि पालनं युद्धं तृतीयं भूभुजां स्मृतम् ॥ २ ॥ न व्रतं हि त्वया कार्यं यदि मामिच्छसि प्रियाम् ॥ मुहूर्तमपि राजेंद्र न शक्नोमि त्वया विना ॥ ३ ॥ स्थातुं कमलगर्भाभ किं पुनर्माससंख्यया ॥ यत्रोपवासकरणं मन्यसे वसुधाधिप ॥ ४ ॥ तत्र वै भोजनं देयं विप्राणां च महात्मनाम् ॥ अथवा ज्येष्ठपत्नी या सा करोतु व्रतादिकम् ॥ एवमुक्ते तु वचने मोहिन्या रुक्मभूषणः ॥ ५ ॥ आजुहाव प्रियां भार्यां नाम्ना संध्यावलिं शुभाम् ॥ आहूता तत्क्षणात्प्राप्ता राजानं भूरिदक्षिणम् ॥ ६ ॥ आसीनं शयने दिव्ये मोहिनीबाहुसंवृतम् ॥ संघृष्टं हि कुचाग्रेण स्वर्णकुंभनिभेन हि ॥ ७ ॥ शयने वामनेत्रायाः सकामाया महीपते ॥ कृतांजलिपुटा भूत्वा भर्तुर्नमितकन्धरा ॥ ८ ॥ संध्यावली प्राह नृपं किमाहूता करोम्यहम् ॥ तव वाक्ये स्थिता कांत दुःसापत्न्यविवर्जिता ॥ ९ ॥ यथा यथा हि रमसे मोहिन्या सह भूपते ॥ तथा तथा मम प्रीतिर्वर्द्धते नात्र संशयः ॥ १० ॥ भर्तुः सौख्येन या नारी दुःखयुक्ता प्रजायते ॥ सा तु श्येनी भवेद्राजंस्त्रीणि वर्षाणि पञ्च च ॥ ११ ॥ आज्ञां मे देहि राजेंद्र मा व्रीडां कामिकां कुरु ॥ १२ ॥ रुक्मांगद उवाच ॥ जानामि तव शीलं तु कुलं जानामि भामिनि ॥ तव वाक्येन हि चिरं मोहिनी रमिता मया ॥ १३ ॥ रममाणस्य सुचिरं बहवः कार्तिका गताः ॥ प्रियासौख्येन मुग्धस्य न गतो हरिवासरः ॥ १४ ॥ सोऽहं तृप्तिमनुप्राप्तः कामभोगात्पुनः पुनः ॥ ज्ञातोऽयं कार्तिको मासः सर्वपापक्षयंकरः ॥ १५ ॥ कर्तुकामो व्रतं देवि कार्तिकाख्यं सुपुण्यदम् ॥ इयं वारयते मां च व्रताद्ब्रह्मसुता शुभे ॥ १६ ॥ अस्या न विप्रियं कार्यं सर्वथा वरवर्णिनि ॥ मामकं व्रतमाधत्स्व कृच्छ्राख्यं कायशोषकम् ॥ १७ ॥ सा चैवमुक्ता नवहेमवर्णा भर्त्रा तदा पीनपयोधरांगी ॥ उवाच वाक्यं द्विजराजवक्त्रा

व्रतं चारिष्ये तव तुष्टिहेतोः ॥ १८ ॥ येनैव कीर्तिस्तु यशो भवेच्च तथैव सौख्यं तव कीर्तियुक्तम् ॥ करोमि सौम्यं नरदेवनाथ क्षिपामि देहं ज्वलने
त्वदर्थम् ॥ १९ ॥ अकार्यमेतन्नहि भूमिपाल वाक्येन ते हन्मि सुतं स्वकीयम् ॥ किंत्वेवमेतद्व्रतकर्म भूयः करोमि सौम्यं नरदेवनाथ ॥ २० ॥
इत्येवमुक्त्वा रविपुत्रशत्रुं प्रणम्य तं चारुविशालनेत्रा ॥ व्रतं चकाराथ तदा हि देवी ह्यशेषपापौघविनाशनाय॥२१॥व्रते प्रवृत्ते वरकृच्छ्रसंज्ञे प्रिया
कृते हर्षमवाप राजा ॥ उवाच वाक्यं कुशकेतुपुत्रीं कृतं वचः सुभ्रु समीहितं ते ॥ २२ ॥ रमस्व कामं मयि सन्निविष्टसंपूर्णवांछा करभोरु हृष्टा ॥
विमुक्तकार्यस्तव सुभ्रु हेतोर्नान्यास्ति नारी मम सौख्यहेतुः॥ २३ ॥ सा त्वेवमुक्ता निजनायकेन प्रहर्षमभ्येत्य जगाद भूपम् ॥ ज्ञात्वा भवंतं
बहुकामयुक्तं त्रिविष्टपान्नाथ समागताहम्॥ २४ ॥ त्यक्त्वामरान्दैत्यगणांश्च सर्वान्गंधर्वयक्षोरगराक्षसांश्च॥ संदृश्यमानान्मम नाथ हेतोः स्नेहान्विताहं
तव मंदराद्रौ॥२५॥एतत्कामफलं लोके यद्द्वयोरेकचित्तता॥ अन्यचेतःकृतः कामः शवयोरिव संगमः ॥ २६ ॥ सफलं हि वपुर्मेऽद्य सफलं रूपमेव
हि ॥त्वया कामवता कांत दुर्लभं यज्जगत्त्रये॥२७ ॥ प्रोन्नताभ्यां कुचाभ्यां हि कामिनो हृदयं यदि ॥ संश्लिष्टं नहि शीर्येत मन्ये वज्रसमं दृढम् ॥
तदेव चामृतं लोके यत्पुरंध्र्यधरासवम् ॥ २८ ॥ कुचाभ्यां हृदि लीनाभ्यां मुखेन परिपीयते ॥ एवमुक्त्वा परिष्वज्य राजानं रहसि स्थितम्॥ २९॥
रमयामास तन्वंगी वात्स्यायनविधानतः ॥ तस्यैवं रममाणस्य मोहिन्या सहितस्य हि ॥ ३० ॥ रुक्मांगदस्य कर्णाभ्यां पटहध्वनिरागतः ॥
मत्तेभकुंभसंस्थस्तु धर्मांगदनिदेशतः॥३१ ॥ प्रातर्हरिदिनं लोकास्तिष्ठध्वं त्वेकभोजनाः॥अक्षारलवणाः सर्वे हविष्यान्ननिषेविणः॥३२॥अवनीतल्प
शयनाः प्रियासंगविवर्जिताः ॥ स्मरध्वं देवदेवेशं पुराणं पुरुषोत्तमम् ॥ ३३ ॥ सकृद्भोजनसंयुक्ता उपवासं करिष्यथ॥ अकृतश्राद्धनिचया अप्राप्ताः
पिंडमेव च ॥ ३४ ॥ गयामगतपुत्राश्च गच्छध्वं श्रीहरेः पदम् ॥ एषा कार्तिकशुक्ला वै हरेर्निद्राव्यपोहिनी ॥३५ ॥ प्रातरेकादशी प्राप्ता मा कृथा
भोजनं क्वचित्॥ ब्रह्महत्यादिपापानि कामकारकृतानि च ॥ ३६ ॥ तानि यास्यंति सर्वाणि उपोष्येमां प्रबोधिनीम् ॥ प्रबोधयेद्धर्म्मपरान्यायाचार
समन्वितान् ॥ ३७ ॥ हरेः प्रबोधमाधत्ते तेनैषा बोधिनी स्मृता ॥ सकृच्चोपोषितां चेमां निद्राच्छेदकरीं हरेः ॥३८॥ तनयो न भवेन्मर्त्यो न गर्भे
जायते पुनः॥कुरुध्वं चक्रिणः पूजामात्मवित्तेन मानवाः ॥३९॥ वस्त्रैः पुष्पैर्धूपदीपैर्वरचंदनकुंकुमैः॥ सुहृद्यैश्च फलैर्गंधैर्यजध्वं श्रीहरेः पदम्॥ ४० ॥
यो न कुर्याद्वचो मेऽद्य धर्म्यं विष्णुगतिप्रदम्॥ स मे दंडयश्च वध्यश्च निर्वास्यो विषयाद्ध्रुवम्॥४१॥एवंविधे वाद्यमाने पटहे मेघनिःस्वने ॥ हस्ता
दमुंच तांबूलं सकर्पूरं नृपोत्तमः॥ ४२ ॥ मोहिनीकुचयोर्लग्नं हृदयं स विकृष्य वै ॥ उदतिष्ठन्महीपालः शय्यायां रतिवर्द्धनः ॥ ४३ ॥ मोहिनीं

मोहकामार्तां सांत्वयन् श्लक्ष्णया गिरा ॥ देवि प्रातर्हरिदिनं भविष्यत्यघनाशनम् ॥ ४४ ॥ संयतोऽहं भविष्यामि क्षम्यतां क्षम्यतामिति ॥ तवा
ज्ञया मया कृच्छ्रं सन्ध्यावल्या तु कारितम् ॥ ४५ ॥ इयमेकादशी कार्या प्रबोधकरणी मया ॥ अशेषपापबंधस्य छेदनी गतिदायिनी ॥ ४६ ॥
त्रयाणामपि लोकानां महोत्सवविधायिनी ॥ तस्माद्भविष्यं भोक्ष्येऽहं नियतो मत्तगामिनी ॥ ४७ ॥ मया सह विशालाक्षि त्वं चापि तमधोक्षजम्॥
आराधय हृषीकेशमुपवासपरायणा॥ येन यास्यसि निर्वाणं दाहप्रलयवर्जितम्॥ ४८॥ मोहिन्युवाच॥ साधूक्तं हि त्वया राजन्पूजनं चक्रपाणिनः ॥
जन्ममृत्युजराच्छेदि करिष्येऽहं तवाज्ञया ॥ ४९ ॥ प्रतिज्ञा या त्वया पूर्वं कृता मंदरमस्तके ॥ करप्रदानसहिता भवता सुकृतांकिता ॥ ५० ॥
तस्यास्तु समयः प्राप्तो दीयतां स हि मे त्वया ॥ जन्मप्रभृति यत्पुण्यं त्वया यत्नेन संचितम् ॥ ५१ ॥ तत्सर्वं नश्यति क्षिप्रं न ददासि वरं यदि॥
रुक्मांगद उवाच ॥एहि चार्वंगि कर्त्तास्मि यत्ते मनसि वर्तते ॥५२ ॥नादेयं विद्यते किंचित्तुभ्यं मे जीवितावधि ॥किं पुनर्ग्रामवित्तादि धरायुक्तं
च भामिनि ॥५३ ॥ मोहिन्युवाच ॥ नाथ कांत विभो राजन् जीवितेश रतिप्रिय ॥ नोपोष्यं वासरं विष्णोर्भोक्तव्या यद्यहं प्रिया ॥ ५४ ॥
न च तेऽहं प्रिया राजन् मुहूर्तमपि कामये ॥ त्वत्संयोगं विना भूता भविष्यामि वरं विना ॥ ५५ ॥ तस्मान्मां यदि वांछेथा भोक्तुं
सत्यपरायण ॥ तदा त्यजोपवासं हि भुज्यतां हरिवासरे ॥ ५६ ॥ एष एव वरो देयो यो मया प्रार्थितः पुरा ॥ न चेद्दास्यसि राजेंद्र भूत्वानृतवचा
भवान् ॥ ५७ ॥ यास्यते नरके घोरे यावदाभूतसंप्लवम् ॥ राजोवाच ॥ मैवं त्वं वद कल्याणि नेदं त्वय्युपपद्यते ॥ ५८ ॥ विधेश्च तनया भूत्वा
धर्मविघ्नं करोषि किम् ॥ जन्मप्रभृत्यहं नैव भुक्तवान्हरिवासरे ॥ ५९ ॥ स चाद्याहं कथं भोक्ता संजातपलितः शुभे ॥ यौवनातीतमर्त्यस्य
क्षीणेंद्रियबलस्य च ॥ ६० ॥ स्वर्णदीसेवनं युक्तमथवा हरिपूजनम् ॥ न कृतं यन्मया बाल्ये यौवने न कृतं च यत् ॥ ६१ ॥ तदहं क्षीणवीर्योऽद्य
कथं कुर्यां जुगुप्सितम्॥प्रसीद चपलापांगि प्रसीद वरवर्णिनि ॥ ६२ ॥ मा कुरुष्व व्रते भंगं दाताहं राज्यसंपदाम्॥अथवा नेच्छसि त्वं तत्करो
म्यन्यत्सुलोचने ॥ ६३ ॥ आरोपयित्वा शिबिकां विमानप्रतिमां शुभाम् ॥ यत्रेच्छसि नयिष्यामि पादचारी कलत्रयुक् ॥ ६४ ॥ यदि तच्चापि
नेच्छेस्त्वं विमानं हि कृतं मया ॥ तर्हि स्वर्णमयौ स्तंभौ कृत्वा विद्रुमभूषितौ ॥ ६५ ॥ मुक्ताफलमयीं दोलां करिष्ये त्वत्कृते प्रिये ॥ तत्र त्वां
दोलयिष्यामि बहून्मासानहर्निशम् ॥ ६६ ॥ व्रतभंगं वरारोहे मा कुरुष्व मम प्रिये ॥ वरं श्वपचमांसं हि श्वमांसं वा वरानने ॥ ६७ ॥
आत्मनो वा नरैर्भुक्तं यैर्भुक्तं हरिवासरे ॥ त्रैलोक्यघातिनः पापं मैथुने शशिनः क्षये ॥ ६८ ॥ नरस्य संचरेत्पापं मृतायां क्षौरकर्मणि ॥ भोजने

वासरे विष्णोस्तैले षष्ठ्यां व्यवस्थिते ॥ ६९ ॥ लवणे तु तृतीयायां सप्तम्यां पिशिते शुभे ॥ आज्येषु पौर्णमास्यां वै सुरायां रविसंक्रमे
॥ ७० ॥ गोचारस्य प्रलोपे च कूटसाक्ष्यप्रदायके ॥ निक्षेपहारके वापि कुमारीविघ्नकारके ॥ ७१ ॥ विश्वस्तघातके चापि मृतवत्साप्रदोग्धरि ॥
ददामीति द्विजाग्र्याय प्रतिश्रुत्य न दातरि ॥ ७२ ॥ मणिकूटे तुलाकूटे कन्यानृतगवानृते ॥ यत्पातकं तदन्ने हि संस्थितं हरिवासरे ॥ ७३ ॥
तद्विद्वांश्चारुनयने कथं भोक्ष्यामि पातकम् ॥ मोहिन्युवाच ॥ एकभुक्तेन नक्तेन तथैवायाचितेन च ॥ ७४ ॥ उपवासेन राजेंद्र द्वादशीं न
हि लंघयेत् ॥ गुर्विणीनां गृहस्थानां क्षीणानां रोगिणां तथा ॥ ७५ ॥ शिशूनां वलिगात्राणां न युक्तं समुपोषणम् ॥ यज्ञभोगोद्यतानां च संग्रामक्षि
तिसेविनाम् ॥७६॥ पतिव्रतानां राजेंद्र न युक्तं समुपोषणम् ॥ एतन्मे गौतमः प्राह स्थिताया मंदराचले ॥७७॥ नाव्रतेन दिनं विष्णोर्नेयं मनुजसत्तम ॥
ते गृहस्था द्विजा ज्ञेया येषामग्निपरिग्रहः ॥ ७८ ॥ राजानस्ते तु विज्ञेया ये प्रजापालने स्थिताः ॥ गुर्विणी ह्यष्टमासीया शिशवश्चाष्टवत्सराः ॥७९॥
अतिलंघनिनः क्षीणा वलिगात्रास्तु वार्द्धकाः ॥ ये विवाहादिमांगल्यकर्मव्यग्रा महोत्सवाः ॥ ८० ॥ निवृत्ताश्च प्रवृत्तेभ्यो यज्ञानां चोद्यता हि ते ॥
त्रिविधेन पुराणेन भर्त्तुर्या स्त्री हिते रता ॥ ८१ ॥ पतिव्रता तु सा ज्ञेया योनिसंरक्षणा तथा ॥ किमन्यैर्बहुभिर्भूप वाक्यालापकृतैर्मया ॥ ८२ ॥
भोजने तु कृते प्रीतिरेकादश्यां त्वया मम ॥ न प्रीतिर्यदि मे छित्वा शिरः स्वं हि प्रयच्छसि ॥ ८३ ॥ न करिष्यसि चेद्राजन् भोजनं हरिवासरे ॥
तदा ह्यसत्यवचसो देहं न स्पर्शयामि ते ॥ ८४ ॥ वर्णानामाश्रमाणां हि सत्यं राजेंद्र पूज्यते ॥ विशेषाद्भूमिपालानां त्वद्विधानां महीपते ॥ ८५ ॥
सत्येन सूर्यस्तपति शशी सत्येन राजते ॥ सत्ये स्थिता क्षितिर्भूप सत्यं धारयते जगत् ॥ ८६ ॥ सत्येन वायुर्वहति सत्येन ज्वलते शिखी ॥ सत्या
धारमिदं सर्वं जगत्स्थावरजंगमम् ॥ ८७ ॥ न सत्याच्चलते सिंधुर्न विंध्यो वर्द्धते नृप ॥ न गर्भं युवती धत्ते वेलातीतं कदाचन ॥ ८८ ॥ सत्ये
स्थिता हि तरवः फलपुष्पप्रदर्शिनः ॥ दिव्यादिसाधनं नृणां सत्याधारं महीपते ॥ ८९ ॥ अश्वमेधसहस्रेभ्यः सत्यमेव विशिष्यते ॥ मदिरापा
नतुल्येन कर्मणा लिप्यसेऽनृतात् ॥ ९० ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे रुक्मांगदसँलापो नाम त्रयोविंशोऽध्यायः ॥ २३ ॥ राजोवाच ॥
यत्त्वया व्याहृतं वाक्यं ममेदं गौतमेरितम् ॥ मंदरे पर्वतश्रेष्ठे हरिवासरभोजनम् ॥ १ ॥ अमतेन पुराणानां व्याहृतं यद्द्विजन्मना ॥ क्षुद्रशास्त्रो
पदेशेन लोलुपेन वरानने ॥ २ ॥ पुराणे निर्णयो ह्येष विद्वद्भिः समुदाहृतः ॥ न शंखेन पिबेत्तोयं न हन्यात्कूर्मसूकरौ ॥ ३ ॥ एकादश्यां
न भोक्तव्यं पक्षयोरुभयोरपि ॥ अगम्यागमने देवि अभक्ष्यस्य च भक्षणे ॥ ४ ॥ अकार्यकरणे जंतोर्गोसहस्रवधः स्मृतः ॥ जानन्नपि

कथं देवि भोक्ष्येऽहं हरिवासरे ॥ ५ ॥ पुरोडाशोऽपि वामोरु संप्राप्ते हरिवासरे ॥ अभक्ष्येण समः प्रोक्तः किं पुनश्चाशनक्रिया ॥६॥ अनुकूलं नृणां प्रोक्तं क्षीणानां वरवर्णिनि ॥ मूलं फलं पयस्तोयमुपभोज्यं मुनीश्वरैः ॥ ७ ॥ नत्वत्र भोजनं कैश्चिदेकादश्यां प्रदर्शितम् ॥ ज्वरिणां लंघनं शस्तं धार्मिकाणामुपोषणम् ॥ ८ ॥ शुभं गतिप्रदं प्रोक्तं संप्राप्ते हरिवासरे ॥ ज्वरमध्ये कृतं पथ्यं निधनाय प्रकल्पते ॥ ९ ॥ वैष्णवे तु दिने भुक्तं नरकायैव केवलम् ॥ माग्रहं कुरु वामोरु व्रतभंगो भवेन्मम ॥ १० ॥ यदन्यद्रोचते तुभ्यं तत्कर्तास्मि न संशयः ॥ मोहिन्युवाच ॥ न चान्यद्रोचते राजन्विना वै भोजनं तव ॥ ११॥ जीवितस्यापि दानेन न मे किंचित्प्रयोजनम् ॥ न च वेदेषु दृष्टोऽयमुपवासो हरेर्दिने ॥ १२ ॥ अग्निमन्तो न विप्रा हि मन्यंते समुपोषणम्॥ वेदबाह्य कथं धर्मं भवांश्चरितुमिच्छति॥ १३ ॥ वचो निशम्य मोहिन्या राजा वेदविदां वरः॥ उवाच मानसे क्रुद्धः प्रहसन्निव भूपते॥ १४॥शृणु मोहिनि मद्वाक्यं वेदोऽयं बहुधा स्थितः॥ यज्ञकर्मक्रिया वेदः स्मृतिर्वेदो गृहाश्रमे॥ १५॥स्मृतिर्वेदः क्रिया वेदः पुराणेषु प्रतिष्ठितः ॥ पुराणपुरुषाज्जातं यथेदं जगदद्भुतम् ॥ १६॥ तथेदं वाङ्मयं जातं पुराणेभ्यो न संशयः ॥ वेदार्थादधिकं मन्ये पुराणार्थं वरानने ॥ १७ ॥ वेदाः प्रतिष्ठिताः सर्वे पुराणेष्वेव सर्वदा ॥ बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ॥ १८ ॥ न वेदे ग्रहसंचारो न शुद्धिः कालबोधिनी ॥ तिथिवृद्धिक्षयो वापि पर्वग्रहविनिर्णयः ॥१९॥ इतिहासपुराणैस्तु निश्चयोऽयं कृतः पुरा ॥यन्न दृष्टं हि वेदेषु तत्सर्वं लक्ष्यते स्मृतौ ॥ २० ॥ उभयोर्यन्न दृष्टं हि तत्पुराणैः प्रगीयते ॥ प्रायश्चित्तं तु हत्यायामातुरस्यौषधं प्रिये ॥ २१ ॥ न चापि पापशुद्धिः स्यादात्मनश्च परस्य वा ॥ यद्वेदैर्गीयते सुभ्रु उपांगैर्यत्प्रगीयते ॥ २२ ॥ पुराणैः स्मृतिभिश्चैव वेद एव निगद्यते ॥ रटंतीह पुराणानि भूयो भूयो वरानने ॥ २३ ॥ न भोक्तव्यं न भोक्तव्यं संप्राप्ते हरिवासरे॥ पुराणमन्यथा मत्वा तिर्यग्योनिमवाप्नुयात्॥२४॥संस्नातोऽपि सुदांतोऽपि न गतिं प्राप्नुयादिति॥पितरं को न वंदेत मातरं को न पूजयेत् ॥ २५॥ को न गच्छेत्सरिच्छ्रेष्ठां को भुंक्ते हरिवासरे॥को हि दूषयते वेदं ब्राह्मणं को निपातयेत् ॥२६ ॥ को गच्छेत्परदारान् हि को भुंक्ते हरिवासरे ॥ २७॥ नहीदृशं पापमिहास्ति जंतोर्विमूढचित्तस्य दिने हरेः प्रिये ॥ यद्भोजनेनात्मनिपातकारिणा यमस्य खातेषु चिरं सुलोचने ॥ २८ ॥ मोहिन्युवाच ॥ शीघ्रमानय विप्रांस्त्वं घूर्णिके वेदपारगान् ॥ येषां वाक्येन युक्तोऽयं राजा कुर्याद्धि भोजनम् ॥ २९ ॥ सा तद्वाक्यमुपाकर्ण्य ब्राह्मणान्वेदशालिनः॥गौतमादीन्समाहूय मोहिनीपार्श्वमानयत् ॥ ३०॥ तान्विप्रानागतान्दृष्ट्वा वेदवेदांगपारगान् ॥ मोहिनीसहिता राज्ञा ववंदे कार्यतत्परा ॥ ३१ ॥ उपविष्टास्तु ते सर्वे शातकौंभमयेषु च ॥ आसनेषु महीपाल ज्वलदग्निसमप्रभाः ॥ ३२ ॥ तेषां मध्ये

वयोवृद्धो गौतमो वाक्यमब्रवीत् ॥ वयं समागता देवि नानाशास्त्रविशारदाः ॥ २३ ॥ सर्वसंदेहहर्तारो यदर्थं ते समाहुताः ॥तच्छ्रुत्वा वचनं तेषां
मोहिनी ब्रह्मणः सुता ॥ ३४ ॥ सर्वासाध्यकृतं कर्तुं प्रवृत्तांस्तानुवाच ह ॥ मोहिन्युवाच ॥ संदेहस्तु जडो ह्येष स्वल्पो वा स्वमतिर्यथा
॥३५॥ सोऽयं वदति राजा वै नाहं भोक्ष्ये हरेर्दिने ॥ अन्नाधारमिदं सर्वं जगत्स्थावरजंगमम् ॥ ३६ ॥ मृता ह्यपि तथान्नेन प्रीयन्ते
पितरो दिवि ॥ कर्कंधुमात्रं प्रहुतं पुरोडाशं हि देवताः ॥ ३७ ॥ कामयंति द्विजश्रेष्ठास्ततोऽन्नं ह्यमृतं परम् ॥ पिपीलिकापि क्षुधिता मुखेनादाय
तण्डुलम् ॥ ३८ ॥ बिलं व्रजति दुःखेन कस्यान्नं नहि रोचते ॥ अयं खादति नान्नाद्यं संप्राप्ते हरिवासरे ॥ ३९ ॥ निजधर्मं परित्यज्य परधर्मे
व्यवस्थितः ॥ विधवानां यतीनां च युज्यते व्रतसेवनम् ॥ ४० ॥ परधर्मरतो यः स्यात्स्वधर्मविमुखो नरः ॥ सोंऽधे तमसि मज्जेत यावदिंद्राश्च
तुर्दश ॥ ४१ ॥ उपवासादिकरणं भूभुजां नोदितं क्वचित् ॥ प्रजासंरक्षणं त्यक्त्वा चतुर्वर्गफलप्रदम् ॥ ४२ ॥ नारीणां भर्तृशुश्रूषा पुत्राणां
पितृसेवनम् ॥ शूद्राणां द्विजसेवा च लोकरक्षा महीभृताम् ॥ ४३ ॥ स्वकं कर्म परित्यज्य योऽन्यत्र कुरुते श्रमम् ॥ अज्ञानाद्वा
प्रमादाद्वा पतितः स न संशयः ॥ ४४ ॥ सोऽयमद्य महीपालो यतिधर्म्मे व्यवस्थितः ॥ सुबुद्ध्याचारशीलश्च वेदोक्तं त्यजति द्विजाः ॥ ४५ ॥
स्वेच्छाचारा तु या नारी योऽविनीतः सुतो द्विजाः ॥ एकांतशीलो नृपतिर्भृत्यः कर्मविवर्जितः ॥४६॥सर्वे ते नरकं यांति ह्यप्रतिष्ठश्च यो द्विजाः ॥
अयं हि नियमोपेतो हरिपूजनतत्परः ॥ ४७ ॥ आक्रन्दे वर्त्तमाने तु न यद्येष प्रधावति ॥ व्यपोह्य हरिपूजां वै ब्रह्महत्यां तु विंदति ॥ ४८ ॥
क्षीणदेहे हरिदिने कथं संयमयिष्यति ॥ अन्नात्प्रभवति प्राणः प्राणाद्देहविचेष्टनम् ॥ ४९ ॥ चेष्टया रिपुनाशश्च तद्धीनः परिभूयते ॥ एवं ज्ञात्वा
मया राजा बोध्यमानो न बुद्ध्यति ॥ ५० ॥ एतदेव व्रतं राज्ञो यत्प्रजापालनं चरेत् ॥ न व्रतं किंचिदस्त्यन्यन्नृपस्य द्विजसत्तमाः॥५१ ॥ किं देव
कार्येण नराधिपस्य कृत्वा हि मन्युं विषयस्थितानाम् ॥ तद्देवकार्यं स च यज्ञहोमो यद्रक्तपातो न भवेत् स्वराष्ट्रे ॥ ५२ ॥ इति श्रीबृहन्नारदीयपुरा
णोत्तरभागे मोहिनीप्रश्नो नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ वसिष्ठ उवाच ॥ तद्वाक्यं ब्राह्मणाः श्रुत्वा मोहिन्या समुदीरितम्॥तथ्यमित्येवमुक्त्वा तु
राजानं वाक्यमब्रुवन् ॥ १ ॥ ब्राह्मणा ऊचुः ॥ यस्त्वया नृपते पुण्यः कृतोऽयं शपथः किल॥ एकादश्यां न भोक्तव्यं पक्षयोरुभयोरपि॥२॥ न कृतः
शास्त्रदृष्ट्या तु स्वबुद्ध्यैव प्रकल्पितः ॥ साग्नीनां प्राशनं प्रोक्तमुभयोः संध्ययोः किल ॥३॥ होमोच्छिष्टप्रभोक्तारस्त्रयो वर्णाः प्रकीर्तिताः ॥विशेषाद्भू
मिपालानां कथं युक्तमुपोषणम् ॥४॥ सर्वदोद्यतशस्त्राणां दुष्टसंयमिनां विभो॥ शास्त्रतोऽशास्त्रतो वापि यस्त्वया शपथः कृतः॥५॥परिपूर्णो भवत्वद्य

वाक्येन हि द्विजन्मनाम् ॥ व्रतभंगो न तेऽस्तीह भुक्ष्वं विप्रसमन्वितः॥६॥ परितापो न ते कार्यो विप्रवाक्यं महत्तरम् ॥योऽन्यथा मन्यते वाक्यं विप्राणां नृपसत्तम ॥७॥ स याति राक्षसीं योनिं जन्मानि दश पञ्च च॥ तच्छ्रुत्वा वचनं रौद्रं राजा कोपसमन्वितः ॥ ८ ॥ उवाच स्फुरमाणौष्ठस्तान्विप्रान्श्लक्ष्णया गिरा॥सर्वेषामेव भूतानां भवंतो मार्गदर्शिनः॥९॥यतीनां विधवानां च श्लोकोऽयं पठ्यते द्विजाः॥विमार्गगामिनां चैतन्मतं न सात्वतां क्वचित्॥ १०॥यद्भवद्भिः समुद्दिष्टं राज्ञां नोपोषणं स्मृतम्॥तत्र वाक्यानि शृणुत वैष्णवाचारलक्षणे॥ ११॥न शंखेन पिबेत्तोयं न हन्यात्कूर्मसूकरौ॥एकादश्यां न भोक्तव्यं पक्षयोरुभयोरपि॥ १२॥न पातव्यं हि मद्यं तु न हन्तव्यो द्विजः क्वचित्॥क्रीडेन्नाक्षैस्तु धर्मज्ञो नाश्नीयाद्धरिवासरे॥ १३॥अभक्ष्यभक्षणं पापं परदाराभिमर्शनम् ॥एकादश्यां भोजनं च पतनस्यैव कारणम्॥ १४॥अकार्यकरणं कृत्वा किं जीवेच्छरदां शतम्॥को हि संचेष्टमानस्तु भुनक्ति हरिवासरे॥ १५॥चतुष्पदेभ्योऽपि जनैर्नान्नं देयं हरेर्दिने॥उत्तराशास्थितैर्विप्रैर्विष्णुधर्मपरायणैः॥ १६॥सोऽहं कथं करोम्यद्य अभक्ष्यस्य तु भक्षणम् ॥ नोपक्षीणशरीरोऽहं नामयावी द्विजोत्तमाः॥ १७ ॥स कथं हि व्रतं त्यक्षे विमार्गस्थद्विजोक्तितः॥धर्मभूषणसंज्ञेन रक्ष्यमाणे धरातले ॥१८॥ न च रक्षाविहीनोऽहं शत्रुः कोऽपि न मेऽस्ति च॥एवं ज्ञात्वा द्विजश्रेष्ठा वैष्णवव्रतशालिनः॥ १९॥भवद्भिर्नोचितं वक्तुं प्रतिकूलं व्रतापहम्॥असंपरीक्ष्य ये दद्युः प्रायश्चित्तं द्विजातयः ॥ २० ॥ तेषामेव हि तत्पापं स्मृतिवैकल्यसम्भवम् ॥ देवो वा दानवो वापि गन्धर्वो राक्षसोऽपि वा ॥ २१ ॥ सिद्धो वा ब्राह्मणो वापि पितास्माकं स्वयं वदेत् ॥ हरिर्वापि हरो वापि मोहिनीजनकोऽपि वा ॥ २२ ॥ दिनकृल्लोकपालो वा नो भोक्ष्ये हरिवासरे ॥ यो हि रुक्मांगदो राजा विख्यातो भूतले द्विजाः ॥ २३ ॥ सत्यप्रतिज्ञां विफलां न कदाचित्करोति हि ॥ द्युपतेः क्षीयते तेजो हिमवान्परिवर्त्तते ॥ २४ ॥ जलधिः शोषमायाति पावकश्चोष्णतां त्यजेत् ॥ तथापि न त्यजे विप्रा व्रतमेकादशीदिने ॥ २५ ॥ प्रसिद्धिरेषा भुवनत्रयेऽपि आरट्यते मे पटहेन विप्राः ॥ ग्रामेषु देशेषु परेषु वापि ये भुञ्जते रुक्मविभूषणस्य ॥ २६ ॥ दण्ड्याश्च वध्याश्च सपुत्रकास्ते न चापि वासो विषये हि तेषाम् ॥ हरेर्दिने सर्वमखप्रधाने पापापहे धर्मविवर्द्धने च ॥ २७ ॥ मोक्षप्रदे जन्मनिकृंतनाख्ये तेजोनिधौ सर्वजनप्ररूढे ॥ एवंविधे प्रोद्गत एव शब्दे यद्यस्मि भोक्ता वृजिनस्य कर्त्ता ॥ २८ ॥ अमेध्यलिप्तः पटहो भवेत्तदा संछादितो नीलमयेन वाससा ॥ उत्पाद्य कीर्तिं स्वयमेव जंतुर्निकृंतति प्राणभयाच्च पापात् ॥ २९ ॥ यस्तस्य वासो निरये युगानां षष्टिर्भवेद्वा क्रिमिदंशसंज्ञे ॥ वृथा हि सूता मम सा जानित्री भवेन्निराशा द्विजपितृदेवाः ॥ ३० ॥ वैवस्वतो हर्षमुपाश्रयेच्च सलेखको मे व्रतभंग एव ॥ किं

तेन जातेन दुरात्मना हि ददाति हर्षं रिपुसुंदरीणाम् ॥३१॥ कुकर्मणा पापरतिः कुजातिः सर्वस्य नाशी त्वशुचिस्स मूढः॥न मन्यते वेदपुराणशा
स्त्रानंते पुरीं याति दिनेशसूनोः ॥ ३२ ॥ कृत्वैव वांतिं पुनरत्ति तां यस्तद्वत्प्रतिज्ञाव्रतभङ्गकारी ॥ वेदा न शास्त्रं न च तत्पुराणं न चापि सन्तः
स्मृतयो न च स्युः ॥ ३३ ॥ ये माधवस्य प्रियकृत्ययोग्ये वदंति शुद्धेऽह्नि भुजिक्रियां तु ॥ श्राद्धेन तेनापि न चास्ति तृप्तिः पितुश्च चीर्णेन
हरेर्दिने तु ॥ ३४ ॥ व्रतेन यद्विष्णुपदप्रदेन साकं क्षयाहेन वदंतु मूढाः ॥३५॥ एतच्छ्रुत्वा तु तद्वाक्यं मोहिनी ज्वलितांतरा ॥ कोपसंरक्तनयना
भर्तारं पर्यभाषत ॥ ३६ ॥ करोषि चेन्न मे वाक्यं धर्मबाह्यो भविष्यसि ॥ धर्मबाह्यो हि पुरुषः पांशुना तुल्यतां व्रजेत् ॥ ३७ ॥ पांशुना पूर्यते
गर्तः स गर्तखनको भवेत् ॥ त्वया ममार्पितः पाणिर्वराय पृथिवीपते ॥ ३८ ॥ तामुल्लंघ्य प्रतिज्ञां स्वां पालयिष्यसि नो यदि ॥ कृतकृत्या
तदा यास्ये प्राप्तो धर्मो मया तव ॥ ३९ ॥ न चाहं ते प्रिया भार्या न च त्वं मे पतिर्नृप ॥ उपधानं करिष्यामि स्वकं बाहुं न ते युधि
॥ ४० ॥ धिक् त्वां धर्मक्षयकरं स्ववचोलोपकारकम् ॥ म्लेच्छेष्वपि न दृश्येत त्वादृशो धर्मलोपकः ॥ ४१ ॥ सत्याच्चलितमद्य त्वां परित्यक्ष्ये
सुपापिनम् ॥ एवमुक्त्वा वरारोहा ह्युदतिष्ठत्त्वरान्विता ॥ ४२ ॥ यथा सती हरं त्यक्त्वा दिव्याभरणभूषिता॥प्रस्थिता सा तदा तन्वी भूसुरैश्च सम
न्विता ॥ ४३ ॥ वरं मद्यस्य संस्पर्शो नास्य संगो नृपस्य वै ॥ वरं नीलांबरस्पर्शो नास्य धर्मच्युतस्य हि ॥४४॥ एवं हि मोहिनी रुष्टा प्रलपंती
तदा भृशम् ॥ गौतमादिसमायुक्ता निर्जगाम गृहाद्बहिः ॥ ४५ ॥ हा तात हा जगन्नाथ सृष्टिस्थित्त्यंतकारक ॥ इत्येव शब्दं क्रोशंती ब्रह्मणो
मानसोद्भवा ॥ ४६ ॥ एतस्मिन्नेव काले तु वाजिराजं समास्थितः ॥ अटित्वा सकलामुर्वीं संप्राप्तो धर्मभूषणः ॥ ४७ ॥ संमुखोऽभूज्जनन्यास्तु
त्वरायुक्तो विमत्सरः ॥कर्णाभ्यां तस्य शब्दोऽसौ विश्रुतः पितृवत्सलः॥४८॥मोहिनीवक्त्रसंभूतो विप्रवाक्योपबृंहितः॥ धर्मांगदो धर्ममूर्तिः रुक्मा
गदसुतस्तदा ॥ ४९ ॥ अवरुह्य हयात्तूर्णं ययौ तातपदांतिके ॥पुनरुत्थाय विप्रेन्द्रान्ननाम विहितांजलिः ॥ ५० ॥ ततः शीघ्रगतिं दृष्ट्वा मोहिनीं
रुष्टमानसाम् ॥ आलक्ष्य तरसा मातः प्राह राजन् कृतांजलिः ॥ ५१ ॥ केनावमानिता देवि कथं रुष्टा पितुः प्रिये ॥ एतैर्द्विजेंद्रैः सहिता
क त्वं संप्रस्थिताधुना॥५२॥धर्मांगदवचः श्रुत्वा मोहिनी वाक्यमब्रवीत्॥पिता तवानृती पुत्र करो येन वृथा कृतः॥५३॥ यः कर्त्ता सुकृतं भूरि
रक्ताशोकाकृतिः स्थितः ॥ ध्वजांकुशांकितः श्रीमान्दक्षिणः कनकांगदः॥५४॥ रुक्मांगदेन ते पित्रा न चाहं वस्तुमुत्सहे॥५५॥ धर्मांगद उवाच ॥
यद्ब्रवीषि वचो देवि तत्कर्त्ताहं न संशयः ॥ मा कोपं कुरु मातस्त्वं निवर्त्तस्व पितुः प्रिये॥५६॥ मोहिन्युवाच ॥ अनेन समयेनाहं त्वत्पित्रा

मंदराचले ॥ कृता भार्या शिवः साक्ष्ये स्थितो यत्र सुराधिपः ॥ ५७ ॥ समयात्स च्युतः सम्यक्पिता ते रुक्मभूषणः ॥ न प्रयच्छति मे
देयं तस्य वृद्धिं विचिंतये ॥ ५८ ॥ न याचे कांचनं धान्यं हस्त्यश्वं ग्रामवाससी ॥ येन तस्य भवेद्धानिर्न याचे तन्नृपात्मज ॥ ५९ ॥ येनासौ
प्रीणयेद्देहं स्वकीयं देहिनां वर ॥ तन्मया प्रार्थितं पुत्र स मोहान्न प्रयच्छति ॥ ६० ॥ तस्यैव चोपकाराय शरीरस्य नृपात्मज ॥
याचितः सुखहेतोस्तु मया नृपतिसत्तमः ॥ ६१ ॥ स्थितः सोऽद्यानृते घोरे सुरापानसमे विभुः ॥ ६२ ॥ सत्यच्युतं निष्ठुरवाक्यभाषिणं
विमुक्तधर्मं त्वनृतं शठं च ॥ परित्यजेयं जनकं तवाधमं नैव स्थितिर्मे भविता हि तेन ॥ ६३ ॥ तच्छ्रुत्वा मोहिनीवाक्यं पुत्रो धर्मांगदो
ऽब्रवीत् ॥ मयि जीवति तातो मे न भवेदनृती क्वचित् ॥ ६४॥ निवर्तस्व वरारोहे करिष्येऽहं तवेप्सितम् ॥ पित्रा मे नानृतं देवि पूर्वमुक्तं कदाचन
॥ ६५ ॥ स कथं मयि जाते तु वदिष्यति महीपतिः ॥ यस्य सत्ये स्थिता लोकाः सदेवासुरमानुषाः ॥ ६६ ॥ वैवस्वतगृहं येन कृतं शून्यं
हि पापिभिः ॥ विजृंभते यस्य कीर्तिर्व्याप्त ब्रह्मांडमंडलम् ॥ ६७ ॥ स कथं जायते भूपो मिथ्यावचनसंस्थितः ॥ अश्रुतं भूपतेर्वाक्यं परोक्षे
श्रद्दधे कथम् ॥ ६८ ॥ ममोपरि दयां कृत्वा निवर्तस्व शुभानने ॥ एतद्धर्मांगदेनोक्तं वाक्यमाकर्ण्य मोहिनी ॥ ६९ ॥ न्यवर्तत महीपाल
पुत्रस्कंधावलंबिनी ॥ यत्र रुक्मांगदः शेते मृतकल्पो रविप्रभः ॥ ७० ॥ तस्मिन्निवेशयामास शयने कांचनान्विते ॥ दीपरत्नैः सुप्रकाशे विद्रुमैः
श्चित्रिते वरे ॥ ७१ ॥ आखंडलास्त्रमणिभिः कृतपादे सुकोमले ॥ दीर्घविस्तारसंयुक्ते ह्यनौपम्ये मनोहरे ॥ ७२ ॥ ततः कृतांजलिः प्राह
पितरं श्लक्ष्णया गिरा ॥ तातैषा जननी मेऽद्य त्वां वदत्यनृती त्विति ॥ ७३ ॥ कस्मात्त्वमनृती भूप भविष्यसि महीतले ॥ सकोशरत्ननिचये
गजाश्वरथसंयुते ॥ ७४ ॥ राज्ये प्रशास्यमाने तु सप्तोदधिसमन्विते ॥ प्रदेहि सकलं ह्यस्यै यत्त्वया श्रावितं विभो ॥ ७५ ॥ मयि चापधरे तात
को व्यलीकं चरेत्तव ॥ देहि शक्रपदं देव्यै जितं विद्धि पुरंदरम् ॥ ७६ ॥ वैरिंच्यं दुर्लभं यच्च योगिगम्यं निरंजनम् ॥ तच्चाप्यहं प्रदास्यामि तपसा
तोष्य पद्मजम् ॥ ७७ ॥ समीहते यज्जननी मदीया रसातले वापि धरातले वा ॥ त्रिविष्टपे वापि परे पदे वा दास्यामि जित्वा नरदेवदानवान्
॥ ७८ ॥ [1]अहं हि दासस्तव भूप यस्माद्विक्रीयतां मामथवा तृणाय ॥ हस्ते हि पापस्य दिवाप्रकीर्तेर्वर्तस्यामि तत्कर्मकरः सुभुक्तः ॥ ७९ ॥
यद्दुष्करं भूमिपते त्रिलोक्यां नादेयमस्तीह तदिष्टभावात् ॥ तच्चापि राजेंद्र ददस्व देव्यै मज्जीवितं मज्जननीभवं वा ॥ ८० ॥ तेनैव

---

१ अहं हि दासस्तव भूप यस्माद्विक्रीय मां वा जननीं मदीयाम् ॥ कुरुष्व तुष्टिं कुशकेतुपुत्र्या यथानृतो नो नरदेव लोके ॥ इत्यपि पाठान्तरम् ।

सद्यो नृपनाथ लोके सत्कीर्तियुक्तो भव सर्वदैव॥ विराजयित्वा स्वगुणैर्नृपौघान्करैरिवात्मप्रभवैः खशोभैः ॥ ८१ ॥ कीर्तिप्रभंगे वृजिनं भविष्यति
प्रजावधे यन्मनुराह सत्यम्॥ संमार्जयित्वा विमलं यशः स्वं कथं सुखी स्यां नृपते ततः क्षमः ॥ ८२ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीचरिते
पञ्चविंशोऽध्यायः ॥ २५ ॥ राजोवाच ॥ कीर्तिर्नश्यतु मे पुत्र ह्यनृती वा भवाम्यहम् ॥ गतो वा नरकं घोरं कथं भोक्ष्ये हरेर्दिने ॥ १ ॥ब्रह्मणो
निलयं यातु देवीयं मोहिनी सुत ॥ भूयो भूयो वदति मां दुर्मेधाश्च सुबालिशा ॥ २ ॥ नापरं कामये राज्यं वसुधां वसु किंचन ॥ भुक्त्वैकं वासरे
विष्णोर्भोजनं पापनाशने ॥ ३ ॥ यद्यहं कुत्सितां योनिं व्रजेयं क्रिमिसंज्ञिताम्॥तथापि नैव कर्ताहं भोजनं हरिवासरे ॥ ४ ॥ एषा गुरुतरा भूत्वा
लोकानां शिक्षयान्विता ॥ दुंदुभी कुर्वती नादं सा कथं वितथा भवेत् ॥ ५॥ अभक्ष्यभक्षणं कृत्वा अगम्यागमनं तथा ॥अपेयं चैव पीत्वा तु किं
जीवेच्छरदः शतम् ॥ ६ ॥ असत्यं वापि कृत्वाहं त्यक्तराज्यनयः क्षितौ॥धिक्कृतोऽपि जनैः सर्वैर्न भोक्ष्ये हरिवासरे ॥ ७ ॥ वियोगे चपलापांग्या
यदि चेन्मरणं मम ॥ तच्चापि वरमेवात्र न भोक्ष्ये हरिवासरे ॥ ८ ॥ कथं हर्षमहं कर्ता मार्तंडतनयस्य वै ॥ व्रजद्भिर्मनुजैर्मार्गे निरयस्यातिदुःखितैः
॥ ९ ॥ यास्तु शून्याः कृतास्तात मया नरकपंक्तयः ॥ जनैः पूर्णा भविष्यंति मयि भुक्ते तु ताः सुत ॥ १० ॥ मास्म सीमन्तिनी पुत्र कुक्षौ संधारयेत्सुतम्॥
समर्थो यस्तु शत्रूणां हर्षं संजनयेद्भुवि॥ ११॥भोजनं वासरे विष्णोरेतदेव हि याचते॥तन्न दास्यामि मोहिन्या याचितोऽपि सुरासुरैः॥ १२॥
पिबेद्विषं विशेद्वह्निं निपतेत्पर्वताग्रतः ॥ आकाशभासा स्वशिरश्छिद्यादेव वरासिना ॥ १३ ॥ न भोक्ष्यते हरिदिने राजा रुक्मांगदः क्षितौ ॥ रुक्मांगदेति
मन्नाम प्रसिद्धं भुवनत्रये ॥ १४ ॥ एकादश्युपवासेन तन्मया संचितं यशः ॥ स कथं भोजनं कृत्वा नाशये स्वकृतं यशः ॥ १५ ॥
म्रियते यदि वा गच्छति निपतति नश्येच्च खंडशो वापि ॥ विरमति तदपि न चेतो मामकमिति मोहिनीहेतोः ॥ १६ ॥ परित्यजाम्येष निजं हि
जीवितं लोकैः समेतः सहदारभृत्यैः ॥न त्वेव कुर्यां मधुसूदनस्य दिने सुपुण्येऽन्ननिषेवणं हि ॥ १७॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीचरिते
षड्विंशोऽध्यायः ॥ २६ ॥ वसिष्ठ उवाच ॥ तत्पितुर्वचनं श्रुत्वा पुत्रो धर्मांगदस्तदा ॥ आहूय जननीं शीघ्रं नाम्ना संध्यावलीं शुभाम्॥ १॥ सूर्यायुत
समप्रख्यां तेजसा रुचिरस्तनाम् ॥ पालयंतीं धरां सर्वां पादविन्यासविक्रमैः ॥ २ ॥ पुत्रस्य वचनात्प्राप्ता तत्क्षणं नृपसन्निधौ ॥ श्राविता मोहिनी
वाक्यं पितुर्वाक्यं तथैव च ॥ ३ ॥ उभयोः संविदं कृत्वा परिसांत्वय्य मोहिनीम् ॥ भोजनाय स्थितामेनां नृपस्य हरिवासरे ॥ ४॥ यथा नो च्यवते
सत्याद्यथा भुंक्ते न मे पिता ॥ तथा विधीयतामेवं कुशलं चोभयोर्भवेत् ॥ ५ ॥ तत्पुत्रवचनं श्रुत्वा देवी संध्यावली नृप ॥ मोहिनीं श्लक्ष्णया

वाचा प्राह ब्रह्मसुतां तदा ॥६॥ माग्रहं कुरु वामोरु कथंचिदपि भूपतिः ॥ नास्वादयति पापान्न संप्राप्ते हरिवासरे ॥ ७ ॥ अनुवर्तय राजानं
गुरुरेष सनातनः ॥ सदा भवति या नारी भर्तुर्वचनकारिणी ॥ ८ ॥ तस्याः स्युरक्षया लोकाः सावित्र्यास्तु यथामलाः ॥ यद्यनेन पुरा
देवि तव दत्तः करो गिरौ ॥ ९ ॥ कामार्तेन विमूढेन तन्न योग्यं विचिंतितम् ॥ यद्देयं तद्ददात्येष ह्यदेयं प्रार्थयस्व मा ॥ १० ॥ विपत्ति
रपि भद्रैव सन्मार्गे संस्थितस्य तु ॥ न भुक्तं येन सुभगे शैशवेऽपि हरेर्दिने ॥११॥ स कथं भोक्ष्यते पुण्ये माधवस्य दिनेऽधुना ॥ कामं वरय वामोरु
वरमन्यं सुदुर्लभम् ॥ १२ ॥ तं ददात्येव भूपालो निवृत्ता भव भोजने ॥ मन्यसे यदि मां देवि धर्मांगदविरोहिणीम् ॥ १३ ॥ अस्मज्जीवि
तसंयुक्तं राज्यं वरय सुव्रते ॥ सप्तद्वीपसमेतं हि ससारिद्वनपर्वतम् ॥ १४ ॥ कनिष्ठाया वरिष्ठाहं करिष्ये पादवंदनम् ॥ भर्तुरर्थे विशालाक्षि
प्रसीद तनुमध्यमे ॥ १५ ॥ वाचा शपथदोषैस्तु संनिरुध्य पतिं हि या ॥ अकार्यं कारयेत्पापा सा नारी निरये वसेत् ॥ १६ ॥ सा च्युता नर
काद्घोरात्सप्तजन्मानि पंच च ॥सूकरीं योनिमाप्नोति चांडालीं च ततः परम् ॥ १७ ॥एवं ज्ञात्वा मया देवि विक्रियां पापसंभवाम् ॥ निवारि
तासि वामोरु सखीभावेन सुंदरि ॥ १८ ॥ विपक्षस्यापि सद्बुद्धिर्दातव्या धर्ममिच्छता ॥ किं पुनः सखिसंस्थायास्तव पद्मनिभानने ॥१९॥ संध्या
वलीवचः श्रुत्वा मोहिनी मोहकारिणी ॥ उवाच कनकाभां तां भर्तुर्ज्येष्ठां प्रियां तदा ॥ २० ॥ माननीयासि मे सुभ्रु करोमि वचनं तव॥विद्वद्भिर्मु
निभिर्य्यत्तु गीयते नारदादिभिः ॥ २१ ॥ यदि तन्नाचरेद्राजा भोजनं हरिवासरे ॥ क्रियतामपरं देवि मरणादधिकं तव ॥ २२ ॥ ममापि दुःखदं
ह्येतद्दैवाज्जल्पाम्यहं शुभे ॥कस्येष्टमात्महननं कस्येष्टं विषभक्षणम् ॥ २३ ॥ पतनं वा गिरेर्मूर्ध्नः क्रीडा वापि बिलेशयैः ॥ व्याघ्रसिंहाभिगमनं
समुद्रतरणं तथा ॥ २४ ॥ दुरुक्तानृतवाक्यं वा परदाराभिमर्शनम् ॥ अपथ्यभक्षणं लोके तथाभक्ष्यस्य भक्षणम् ॥ २५ ॥ मृगाटनमथाक्षैर्वा
क्रीडनं साहसं तथा ॥ छेदनं तृणकाष्ठानां लोष्टानामवमर्दनम् ॥ २६ ॥ हिंसनं सूक्ष्मदेवानां जलपावकखेलनम् ॥ दैवाविष्टो वरारोहे नरः
सर्वं करोति वै ॥ २७ ॥ त्रिवर्गविच्युतं घोरं यशोदेहहरं क्षितौ ॥ नरकार्हो नरो देवि करोत्यशुभकर्म तत् ॥ २८ ॥ साहं पापा दुराचारा
वक्तुकामा सुनिर्घृणम् ॥ यादृशेन हि भावेन योनौ शुक्रं समुत्सृजेत् ॥ २९ ॥ तादृशेन हि भावेन संतानं संभवेदिति ॥ साहं विवादभावेन
राज्ञो रुक्मांगदस्य हि ॥ ३० ॥ जाता जलजजातेन स्त्रीरूपा वरवर्णिनी ॥ दुष्टभावा तथा जाता कर्त्री दुष्टं नृपस्य तु ॥ ३१ ॥ न लग्नं न ग्रहा
देवि न होरा पुण्यदर्शिनी ॥ तत्कालभावना ग्राह्या तद्भावो जायते सुतः ॥ ३२ ॥ तेन भावेन जातस्य दाक्षिण्यं नोपपद्यते ॥ न च व्रीडा न च

स्नेहो न धर्मो देवि विद्यते ॥ ३३ ॥ जानन्नपि यथायुक्तस्तं भावमनुवर्तते ॥ ३४ ॥ वक्ष्ये वचः प्राणहरं तवाधुना भर्तुः सलोकस्य वधूजनस्य ॥
धर्मापहं वाच्यकरं ममापि कर्तुं न शक्यं मनसापि भीरु ॥ ३५ ॥ करोषि वाक्यं यदि मामकं हि भवेच्च कीर्तिर्महतीह लोके॥ भर्तुर्यशः स्यात्रिदिवे
गतिस्ते पुत्रे प्रशंसा मम धिग्विवादः ॥ ३६ ॥ वसिष्ठ उवाच ॥ मोहिनीवचनं श्रुत्वा देवी संध्यावली विभो ॥ धैर्यमालंब्य तां तन्वीं ब्रूहि ब्रूही
त्यचोदयत् ॥ ३७ ॥ कीदृशं वदसे वाक्यं येन दुःखं भवेन्मम ॥ भर्तुर्मे सत्यकरणे न दुःखं जायते क्वचित् ॥ आत्मनो निधने वापि पुत्रस्य
निधनेऽपि वा ॥ भर्तुरर्थे प्रकुर्वत्या राज्यनाशे न मे व्यथा ॥ ३८ ॥ यस्या दुःखी भवेद्भर्ता भार्या या वरवर्णिनी ॥ समृद्धायाः सपापायास्तस्याः
प्रोक्ता ह्यधोगतिः ॥ ३९ ॥ सा याति नरकं पापा पूयाख्यं युगसप्ततिम् ॥ततश्छुछुन्दरी स्याच्च सप्त जन्मानि भारते ॥ ४० ॥ ततः काकी ततः
श्याली गोधा गोत्वेन शुद्ध्यति॥ भर्तुरर्थे तु या वित्तं विद्यमानं न यच्छति॥४१॥ जीवितं वा वरारोहे विष्ठायां सा भवेत्क्रिमिः ॥क्रिमियोनिविनि
र्मुक्ता काष्ठीला जायते शुभे ॥४२ ॥ मम कौमारभावे तु मत्पितुः काष्ठपाटकः ॥ अग्निप्रज्वालनाथ हि काष्ठं पाटयते चिरम् ॥ ४३॥ सखीभिः
सहिता चाहं क्रीडासंसक्तमानसा ॥ काष्ठं पाटयतस्तस्य समीपमगमं तदा ॥ ४४ ॥ तत्र दृष्टा मया सुभ्रु काष्ठीला दारुनिर्गता ॥ नव
नीतनिभं देहं बिभ्राणा चांजनत्विषम् ॥ ४५ ॥ कनिष्ठिकांगुलिसमा स्थौल्ये ह्यंगुलिमानिका॥ तां दृष्ट्वा पतितां भूमौ हंतुं ध्वांक्षः समागतः ॥४६॥
यावद्गृह्णाति वक्रेण काष्ठीलां क्षुधितः स तु ॥ तावन्निवारितः सद्यो मया लोष्टेन तत्क्षणात् ॥ ४७ ॥ सा मुक्ता ताडितेनेत्थं वायसेन वरानने ॥
सक्षता तुंडसंस्पृष्टा न च शक्ता पलायितुम् ॥ ४८ ॥ ततः सा वेपमाना तु प्राणत्यागमुपागमत् ॥ सिक्ता किंचिज्जलेनैव ततः स्वास्थ्यमुपा
गता ॥ ४९ ॥ ततः सा मानुषीवाचा मामाह वरवर्णिनी ॥ संध्यावलीति संबोध्य सखीमध्यसमास्थिताम् ॥ ५० ॥ सुमंतुनाम्नो हि मुनेः सर्व
ज्ञस्य सुताऽभवम् ॥ पूर्वजन्मनि पत्नी च कौंडिन्यस्य शुभानने ॥ ५१ ॥ न्यवसं कान्यकुब्जे तु सुसमृद्धा सुदर्पिता॥जनन्या बंधुवर्गस्य पितुरिष्ट
तमा ह्यहम् ॥ ५२ ॥ पित्रा दत्ता ततश्चाहं कौंडिन्याय महात्मने ॥ कुलीनाय सरूपाय स्त्रीसंगरहिताय च ॥५३॥ शयनीयादिकं दत्तं यौतुकं जन
केन मे ॥ श्वशुरेणापि मे दत्तं सुवर्णस्यायुतं पुरा ॥ ५४ ॥ पितृश्वशुरवित्ताभ्यां परिपूर्णाभवं तदा ॥ गोमहिष्यादिसंयुक्ता धनधान्यसमन्विता
॥ ५५ ॥ इष्टा श्वशुरयोश्चाहं सौशील्येन जनस्य च ॥ कालेन पंचतां प्राप्तः श्वशुरो वेदतत्त्ववित् ॥ ५६ ॥ तं मृतं पतिमादाय श्वश्रूरग्निं
विवेश सा ॥ ततो भर्ताञ्जलिं दत्वा पित्रोः श्राद्धमथाकरोत् ॥ ५७॥ गते मासद्वये देवि भर्ता मे राजमंदिरम् ॥ गतः कौतुकभावेनहृच्छयेन

प्रपीडितः ॥ ५८ ॥ तत्र वेश्याः सुरूपाढ्या यौवनेन समन्विताः ॥ प्रविशंत्यो नृपगृहे दृष्टास्तेन द्विजन्मना ॥ ५९ ॥ तासां मध्यात्तु द्वे गृह्य
वित्तदानेन भूरिणा ॥स्वगृहे धारयामास क्रीडार्थं दुर्मतिः पतिः ॥ ६० ॥ताभ्यां वित्तमशेषं तु क्षयं नीतं निषेवणात् ॥ वर्षत्रये गते देवि निस्वो जातः
पतिर्मम ॥ ६१ ॥ ततो मां प्रार्थयामास देहि मेऽङ्गविभूषणम् ॥ तन्मया नहि दत्तं तु भर्त्रे व्यसनिने तदा ॥ ६२ ॥ सुभगे सर्वमादाय गताहं मंदिरं
पितुः ॥ ततः पितृगृहे वित्तं भृत्यादिकमशेषतः ॥६३॥विक्रीय दत्तं वेश्याभ्यां तच्चापि क्षयमागतम्॥क्षेत्रधान्यादिकं यच्च सभांडं सपरिच्छदम्॥६४॥
स्वल्पमूल्येन विक्रीय गतो नदनदीपतिम् ॥नावमारुह्य मे भर्ता विवेशांतर्महोदधेः ॥६५ ॥ स गतो दूरमध्वानं पश्यमानोऽद्भुतानि च ॥ शुभे
समुद्रजातानि जीवचेष्टांकितानि च ॥ ६६ ॥ प्रभंजनवशं प्राप्ता सा नौका शतयोजनम् ॥ गता विशीर्णतां तत्र मृतास्ते नावमाश्रिताः ॥ ६७ ॥
मत्पतिर्दैवयोगेन दीघ काष्ठं समाश्रितः ॥ वायुना नीयमानोऽसौ प्राचीनेन स्वकर्मणा ॥ ६८ ॥ आससादाचलं देवि रत्नशृंगविभूषितम्॥ बहुनि
र्झरणोपेतं बहुपक्षिसमन्वितम् ॥६९॥ बहुवृक्षैः समाकीर्णं नानापुष्पफलोपगैः ॥ उल्लिखंतं हि शिखरैः खमध्यं स्वात्मनस्त्रिभिः ॥ ७० ॥ तं दृष्ट्वा
पर्वतं दिव्यं त्यक्त्वा नौकाष्ठमद्भुतम् ॥ आरुरोह मुदायुक्तो वित्ताकांक्षी सुलोचने ॥ ७१ ॥ विशश्राम मुहूर्तं तु क्षुत्पिपासासमन्वितः ॥ तत उत्थाय
भक्ष्यार्थं वृक्षांस्तत्र व्यलोकयत् ॥ ७२ ॥ सुपक्वास्तत्र मृद्वीका दृष्ट्वा भुक्त्वा मुदान्वितः ॥ शांतिं प्राप्तस्ततोऽपश्यत्सालमेकं सुनिर्मलम् ॥ ७३ ॥
घनच्छायं मेघनिभं पंचाशत्पुरुषोच्छ्रयम् ॥ तस्याधस्तात्स सुष्वाप स्वोत्तरीयं प्रसार्य च ॥७४ ॥ मोहिन्या निद्रया चैव संप्रघूर्णितलोचनः ॥
तावत्सुप्तोऽतिखिन्नोऽसौ यावत्सूर्योऽस्ततां गतः॥७५॥सूर्येऽस्तं समनुप्राप्ते समायाते निशामुखे॥अभ्यगाद्राक्षसो घोरो गर्जमानो यथा घनः॥७६॥
अंकेनादाय तन्वंगीं सीतामिव दशाननः ॥ शुभां काशीपतेः पुत्रीं नाम्ना रत्नावलीं शुभाम् ॥ ७७ ॥ अधौतपादां सुश्रोणीं सौम्यदिक्छीर्षशा
यिनीम् ॥ पतिकामा कुमारी सा नाविंदत्सदृशं पतिम् ॥ ७८ ॥ सर्वयोषिद्वरा बाला रुदती निद्रयाकुला ॥ पिता तस्याः प्रदाने तु चिंताविष्टो ह्यह
र्निशम् ॥ ७९ ॥ दीपच्छायाश्रिते तन्वि शयने सा व्यवस्थिता ॥ अटमानेन पापेन दृष्टा सा रूपशालिनी ॥ ८० ॥ दीपरत्नैः सुखचिते
धारयंती च कंकणे ॥ उभयोर्दश रत्नानि निष्के च दशपंच च ॥८१ ॥ सीमंते सप्त रत्नानि केयूरेऽष्टौ च पंच च ॥ एवं रत्नाचितां बालां शात
कुम्भसमप्रभाम्॥८२॥जहार राजभवनात्तां तदा चारुहासिनीम् ॥ वायुमार्गं समाश्रित्य क्षणात्प्राप्तः स्वमालयम् ॥८३ ॥तं पर्वतं स यत्रास्ते पतिर्मे
शालमाश्रितः॥तत्र तस्य गुहां दृष्ट्वा सुवर्णसदृशप्रभाम्॥८४॥तद्वयस्यासहा तत्र प्रविवेशास्य पश्यतः॥अनेकैर्मणिविन्यासैः संयुक्तां चित्रमंदिराम्॥८५॥

नानाद्रव्यसमाकीर्णां शयनासनसंयुताम् ॥ भोजनैः पानपात्रैश्च भक्ष्यभोज्यैरनेकधा ॥ ८६ ॥ प्रविश्य तत्र शय्यायां मुमोचोत्पललोच
नाम् ॥ रुदतीमतिसंत्रस्तां पीनश्रोणिपयोधराम् ॥ ८७ ॥ तस्यास्तु रुदितं श्रुत्वा तस्य भार्या हि राक्षसी ॥ आजगाम त्वरायुक्ता
यत्रासौ राक्षसः स्थितः ॥ ८८ ॥ तां दृष्ट्वा चारुसर्वांगीं तप्तकांचनसप्रभाम् ॥ पप्रच्छ निजभर्तारं क्रुद्धा निर्भर्त्सती सती ॥ ८९ ॥ किमर्थमा
हृता चेयं जीवंत्यां मयि निर्घृण ॥ अन्यां समीहसे भार्यां नाहं भार्या भवामि ते ॥ ९० ॥ एवं ब्रुवाणां तां भर्ता राक्षसीमसितेक्षणाम् ॥
उवाच राक्षसो हर्षात्स्वां प्रियां चारुलोचनाम् ॥ ९१ ॥ त्वदर्थमाहृतं भक्ष्यं मया काश्याः शुभानने ॥ दैवोपपादितं द्वारि द्वितीयं मम तिष्ठति
॥ ९२ ॥ शालवृक्षाश्रितः शेते विप्रश्चैको वरानने ॥ तमानय त्वरायुक्ता येनाहं भक्ष्यमाचरे ॥ ९३ ॥ राक्षसस्य वचः श्रुत्वा कुमारी साब्र
वीदिदम् ॥ मिथ्या राक्षसि भर्ता ते भाषते त्वद्भयादयम् ॥ ९४ ॥ ज्ञात्वा त्वां जरयोपेतां विरूपामतिजिह्मगाम् ॥ सुप्तां पितृगृहे रात्रौ मां
समासाद्य कामतः ॥ ९५ ॥ अनूढां रुदतीं भद्रे भार्यार्थं समुपानयत् ॥ इतीरितमुपाकर्ण्य वचनं राजकन्यया ॥ ९६ ॥ क्रोधयुक्तातिमात्रं वै
बभूव क्षिपती वचः ॥ तस्याश्च रूपमालोक्य सत्यमेवावधारयत् ॥ ९७ ॥ चिंतयामास चाप्येवं भार्यार्थे ह्याहृतेति च ॥ अवश्यं मूर्ध्नि कीलं
मे रोपयिष्यति राक्षसः ॥ ९८ ॥ मास्म सीमंतिनी काचिद्भवेत्सा भुवनत्रये ॥ या सापत्न्येन दुःखेन पीड्यमाना हि जीवति ॥ ९९ ॥ सर्वेषा
मेव दुःखानां महच्चेदं न संशयः ॥ सामान्यद्रव्यभोगादि निष्ठा चैवापरा भवेत् ॥ १०० ॥ एवं सा बहु संचिंत्य भर्तारं वाक्यमब्रवीत् ॥ मदीया
मम भक्ष्यार्थं त्वयानीता सुलोचना ॥ १०१ ॥ तं विप्रमानयिष्यामि भक्ष्यार्थं तव सुव्रत ॥ ततः स राक्षसः प्राह गच्छगच्छेति सत्वरम् ॥ १०२ ॥
सृक्किणी स्रवतेऽत्यर्थं तस्य भक्षणकाम्यया ॥ ततः सा राक्षसी घोरा श्रुत्वा पतिसमीरितम् ॥ १०३ ॥ निर्जगाम दुरंताशा ददर्श द्विजसत्तमम् ॥
रूपयौवनसंयुक्तं विद्यारत्नविभूषितम् ॥ १०४ ॥ तं दृष्ट्वा मायया भूत्वा सुंदरी षोडशाब्दिका ॥ हृच्छयेन समाविद्धा तदंतिकमुपागमत् ॥ १०५ ॥
अब्रवीत्सा पृथुश्रोणी तं विप्रं प्रीतिसंयुता ॥ कस्त्वं कस्मादिहायतः किमर्थमिह तिष्ठसि ॥ १०६ ॥ पृच्छामि पतिकामाहं राक्षसी हृच्छयातुरा ॥ स्वभर्त्राहं
परित्यक्ता त्वां पतिं कर्तुमागता ॥ १०७ ॥ तच्छुत्वा वचनं तस्या भर्ता मे भयसंयुतः ॥ उवाच वचनं प्राज्ञो धैर्यमालंब्य तां शुभे ॥ १०८ ॥
रक्षोमानुषसंयोगः कथं राक्षसि संभवेत् ॥ मानुषास्तु स्मृता भक्ष्या राक्षसानां न संशयः ॥ १०९ ॥ तच्छुत्वा वचनं सा तु पुनस्तं प्राह सादरम् ॥
असंभाव्यं च जगति संभवेद्दैवयोगतः ॥ ११० ॥ पुराणे श्रूयते ह्येतद्भविष्यं भारते स्थितम् ॥ हिडंबा राक्षसी विप्र भीमभार्या भवि

ष्यति ॥ ११२ ॥ मानुषोत्पादितः पुत्रो भविष्यति घटोत्कचः ॥ अवध्यः सर्वशस्त्राणां शक्त्या मृत्युमवाप्स्यति ॥११२॥ तस्माद्विषादं मा विप्र
कुरु त्वं दैवयोगतः ॥ भार्या तवाहं संजाता देव हि बलवत्तरम् ॥ ११३ ॥ मर्त्यलोकं गते शक्रे वैरोचनिनिरीक्षणे ॥ तदंतरं समासाद्य
भर्ता मे घोरराक्षसः ॥ ११४ ॥ तद्गृहाच्छक्तिमहरद्दीप्तामग्निशिखामिव ॥ सेयं समाश्रिता चात्र शालवृक्षे तु वासवी ॥ ११५ ॥ अहत्वैकं द्विजश्रेष्ठ
न गच्छति पुरंदरम् ॥ यद्वधाय प्रक्षिपेत्तां सोऽमरोऽपि विनश्यति ॥११६॥ साहमारुह्य शालाग्रं शक्तिमानीय भास्वराम् ॥ त्वत्करे संप्रदास्यामि
भर्तुर्निधनकाम्यया ॥ ११७ ॥ यदि त्वमनया शक्त्या न हिंससि निशाचरम् ॥ खादयिष्यति दुर्मेधास्त्वां च मां च न संशयः ॥ ११८ ॥ तव
शत्रुर्महानेष ममापि च परंतप ॥ येनाहृता कुमारीह भार्यार्थं मंदबुद्धिना॥११९॥ सपत्नभावो जनितो मम भर्त्रा दुरात्मना ॥ व्यापादितेऽस्मि
न्नुभयोः क्रीडनं संभविष्यति ॥ १२० ॥ यद्यन्यथा वदेर्वाक्यं त्वामहं रतिवर्द्धन ॥ तदात्मकृतपुण्यस्य न भवेयं हि भागिनी ॥ १२१ ॥ या
गतिर्ब्रह्महत्यायां कुत्सिता प्राप्यते नरैः ॥ तां गतिं हि प्रपद्येऽहं यद्येतदनृतं भवेत्॥ १२२ ॥ मद्यं हि पिबतो ब्रह्मन् ब्राह्मणस्य दुरात्मनः ॥ या
गतिर्विहिता घोरा तां गतिं प्राप्नुयाम्यहम् ॥ १२३ ॥ गुरुदारप्रसक्तस्य जंतोः पापनिषेविणः ॥ या गतिस्तां द्विजश्रेष्ठ मिथ्या प्रोच्य समाप्नुयाम्
॥ १२४ ॥ स्वर्णन्यासापहरणे मेदिनीहरणे च या ॥आत्मनो हनने या हि विहिता मुनिभिर्द्विज ॥ १२५ ॥ गतिस्तामनुगच्छामि यद्येतदनृतं
वदे ॥ पंचम्यां च तथाष्टम्यां यत्पापं मांसभक्षणे ॥ १२६ ॥ स्त्रीसंगमे तरुच्छेदे यत्पापं शशिनः क्षये ॥ यदुच्छिष्टे घृतं भोक्तुर्मैथुनेन दिवा
च यत् ॥ १२७ ॥ वैश्वदेवमकर्तुश्च गृहिणो हि द्विजस्य यत् ॥ भिक्षामदातुर्भिक्षुभ्यो विधवाया द्विभोजनात ॥ १२८॥ तैलं भोक्तुश्च संक्रांतौ
गोभिस्तीर्थं च गच्छतः ॥ तथा मृदमनुद्धृत्य स्नातुः परजलाशये ॥ १२९॥ निषिद्धवृक्षजनितं दंतकाष्ठं च खादतः ॥ ग्रामसेवयतो बद्धा पाखंड
पथगामिनः ॥ १३० ॥ पितृदेवार्चनं कर्तुः काष्ठग्रावस्थितस्य यत् ॥ गोहीनां महिषीं धर्तुर्भिन्नकांस्ये च भुंजतः ॥ १३१ ॥ अधौतभिन्नपार
क्यवस्त्रसंवीतकर्मिणः ॥ नग्नस्त्रीप्रेक्षणं कर्तुरभक्ष्यस्य च भोजिनः ॥ १३२ ॥ कथायां श्रीहरेर्विघ्नं कर्तुर्यत्पातकं द्विज ॥ तेन पापेन लिप्येऽहं यदि
वच्मि तवानृतम् ॥ १३३ ॥ उक्तान्येतानि पापानि यान्युक्तान्यपि द्विज ॥ सर्वेषां भागिनी चाहं यद्येतदनृतं वदे ॥ १३४ ॥ एवं संबो
धितो देवि भर्ता मे पापया तया ॥ तथेति निश्चयं चक्रे भवितव्येन मोहितः ॥ १३५ ॥ निर्द्रव्यो व्यसनासक्तो मद्वाक्यकलुषीकृतः ॥ उवाच
राक्षसीं वाक्यं सर्वसिद्धिप्रदायकम् ॥ १३६ ॥ शीघ्रमानय तां शक्तिं करोमि वचनं तव ॥ सर्वमेतत्प्रदेयं हि त्वया मे राक्षसे हते ॥ १३७ ॥

द्रव्याशया प्रविष्टोऽहं सागरं तिमिसंकुलम् ॥ तच्छुत्वा राक्षसी शक्तिं समानीय नगस्थिताम् ॥१३८॥ ददौ मद्भर्तृसिद्ध्यर्थं विमुंचंतीं महार्चिषम् ॥
एतस्मिन्नेव काले तु राक्षसः काममोहितः ॥ १३९ ॥ गमनायोद्यतः कन्यां सा भीता वाक्यमब्रवीत् ॥ कुमारीसेवने रक्षो महापापं
विधीयते ॥ १४० ॥ छलेनाहं हृता काश्याः सुप्ता पितृगृहात्त्वया ॥ तव दोषो न चेहास्ति भवितव्यं ममेदृशम् ॥१४१॥ गुहामध्यगतायास्तुको मे
त्राता भविष्यति ॥ विधियोगाद्भवेद्भर्ता विधियोगाद्भवेत्प्रिया ॥ १४२ ॥भवेद्विधिवशाद्विद्या गृहं सौख्यं धनं कुलम्॥ विधिना प्रेर्यमाणस्तु
जनः सर्वत्र गच्छति ॥ १४३ ॥ अवश्यं भविता भर्ता त्वमेव रजनीचर ॥ विधिना विहिते मार्गे किं करिष्यति पंडितः ॥ १४४ ॥ तस्मादानय
त विप्रं शालवृक्षाश्रितं त्विह ॥ घृतं जलं कुशानग्निं विवाहं विधिना कुरु ॥ १४५ ॥ विनापि दर्भतोयाग्नीन्यथोक्तविधिमंतरा ॥ ब्राह्मणस्यैव
वाक्येन विवाहः सफलो भवेत् ॥ १४६ ॥ न हतो यदि विप्रस्तु भार्यया तव राक्षस ॥ वृत्ते होमस्य कार्ये तु तं भवान् भक्षयिष्यति ॥ १४७ ॥
एवमुक्ते तु वचने तया वै राजकन्यया ॥ विश्वस्तमानसो दर्पान्निर्जगाम स राक्षसः ॥१४८॥सत्वरं हृच्छयाविष्टस्तमानेतुं बहिः स्थितः ॥१४९॥
तस्य निर्गच्छतो देवि क्षुतमासीत्स्वयं किल ॥ सव्यं चाप्यस्फुरन्नेत्रं स्ववस्त्रं स्खलितं तथा ॥ १५० ॥अनादृत्य तु तत्सर्वं निर्गतोऽसौ दरीमुखात्॥
बिभ्राणां मानुषं रूपं स्वामपश्यन्नितंबिनीम् ॥ १५१॥ घटयंतीं तु संबंधं भार्याभर्तृसमुद्भवम् ॥ परित्यजामि त्वां पापं राक्षसं क्रूरकर्मिणम्॥ १५२ ॥
मानुषीप्रमदासक्तं मच्छरीरस्य दूषकम्॥ तच्छ्रुत्वा दारुणं वाक्यं भार्यया समुदीरितम् ॥ ईर्ष्याकोपसमायुक्तस्त्वभ्यधावन्निशाचरः ॥१५३॥ उत्क्षिप्य
बाहू प्रविदार्य वक्रं संप्रस्थितो भक्षयितुं स चोभौ ॥ कालेन वेगात्पवनो यथैव समुच्चरन्वाक्यमनर्थयुक्तम् ॥१५४॥इति श्रीबृहन्नारदीयपुराणोत्तर
भागे मोहिनीचारिते काष्ठीलोपाख्यानं नाम सप्तविंशोऽध्यायः ॥ २७ ॥ काष्ठीलोवाच ॥ राक्षसं धावमानं तु कालांतकयमोपमम् ॥ दृष्ट्वा सा राक्षसी
प्राह भर्तारं मम शंकिता ॥ १ ॥ प्रक्षिपस्वानलप्रख्यां शक्तिं हेमविभूषिताम् ॥ ममायं पंचतां यातु दिगंबरारिपुप्रिय ॥ २ ॥ तस्या वाक्या
न्मम पतिः पौरुषे तु व्यवस्थितः ॥ मुमोच विपुलां शक्तिं रक्षोवक्षस्थलं प्रति ॥ ३ ॥ ज्वलंती ज्वलनप्रख्या द्योतयंती दिशो दश॥ दिव्यांशुतीक्ष्ण
वक्रांता किंकिणीशतनादिता ॥ ४ ॥ रक्तचंदनलिप्तांगी रक्तवस्त्रोपशोभिता ॥ हृदि तस्य निपत्यासौ शक्तिर्विप्रकरच्युता ॥ ५॥ कृत्वा भस्मावशेषं
तु राक्षसं गगनं ययौ॥पातयित्वा स्वभर्तारं विप्रहस्तेन राक्षसी ॥ ६ ॥ कृतकृत्यमिवात्मानं मेने हृष्टतनूरुहा ॥ अथोवाच द्विजं हृष्टा राक्षसी
शुभलोचनम् ॥७॥ एहि कांत गुहां रम्यां प्रविश त्वं यदृच्छया॥ भुंक्ष्व भोगान्मया सार्द्धं ये दिव्या ये च मानुषाः॥८॥ तथेति प्राणनाथो मे प्राह

हृष्टवपुस्तदा ॥ ततः सादाय मे कांतं स्वां प्रविष्टा गुहां मुदा ॥९॥ असंवीक्ष्यैव तद्भस्म भर्तृदेहसमुद्भवम् ॥ कुचाभ्यामुन्नताभ्यां सा मद्भर्तारमपी
डयत् ॥ १० ॥ दर्शयामास तां तन्वीं कुमारीं शयने स्थिताम्॥इयं तेनासितापांगी बिम्बोष्ठी कांचनप्रभा॥११॥भार्यार्थे समुपानीता वाराणस्या
द्विजोत्तम ॥ यस्याः सीमां न लंघंति पातकानि ह्यशेषतः ॥ १२ ॥ शक्तिक्षेत्रं च तां प्राहुः पुण्यं पापक्षयंकरम् ॥ या गृहं त्रिपुरारेश्च
पञ्चगव्यूतिसंस्थिता ॥ १३ ॥ यस्यां मृताः पुनर्मर्त्या गर्भवासं विशंति न ॥ स त्वमस्या गृहं पित्र्यं पुनर्नय सुलोचनाम् ॥ १४ ॥
इमानि तव रत्नानि शयनान्यासनानि च ॥ मया सह समस्तानि विक्रीणीहि निजेच्छया ॥ १५ ॥ त्वदर्थे राक्षसो घोरो मया ब्रह्म
न्निषूदितः ॥ मुग्धया तव रूपेण प्रेषितो यमसादनम् ॥ १६ ॥ तस्मान्ममोपरि विभो कृत्वा विश्वासमात्मना ॥ भजस्व मां विशालाक्ष भक्तां वै
कामरूपिणीम् ॥१७ ॥ एतच्छ्रुत्वा तु वचनं भर्ता मे चारुलोचने॥ राक्षस्याः कामतप्तायाः कुमार्याः सन्निधौ शुभे ॥ १८ ॥ उवाच राक्षसीं तां तु
सशंको मधुरं वचः ॥ सुभगे नीतिशास्त्रेषु विश्वस्तव्या न योषितः॥१९॥कौमारं या पतिं हन्ति सा कथं मां न हिंसति ॥ मत्तो रूपाधिकं मत्वा
परं पुरुषलंपटा॥२०॥सोऽहं विश्वासभावेन विश्वस्तस्ते वरानने ॥२१॥अद्य वाथ परेद्युर्वा पक्षे मासेऽथ वत्सरे ॥ व्यापादय यथेच्छं वा त्वां प्रपन्नो
ऽस्मि भामिनि ॥२२॥ एवमेव त्वया कार्यं नाद्य चोपकृतं तव ॥ आत्मा ते सर्वथा देयः प्रतीकारस्य हेतवे ॥२३॥ मदर्थे निहतो भर्ता त्वया
निःशंकया यतः॥ ततोऽहं नोत्तरं वच्मि परं किंचित्सुलोचने॥२४॥तच्छ्रुत्वा वचनं तस्य मद्भर्तुः साब्रवीदिदम् ॥ विश्वस्तहिंसनं ब्रह्मन् ब्रह्महत्या
समं भवेत्॥२५॥यद्येवं राक्षसीं क्रूरां मन्यसे पतिघातिनीम्॥पतिं तथापि गर्हेयं विश्वस्तं घातयें कथम्॥२६॥सूक्ष्मा हि धर्मस्य गतिर्न ज्ञायेत कथं
चन॥केनापि कुत्रचिद्देवदैत्यराक्षसकादिना ॥केचिन्मनुष्याः पटवो धर्मसूक्ष्मत्वचिंतने ॥२७॥ येऽनित्येन शरीरेण नैष्कर्म्यं साधयंत्युत ॥ श्रूयते
च पुराणेषु किंचिदत्र निगद्यते ॥ २८ ॥ धर्मस्यैवानुकूल्येन विष्णुना प्रभविष्णुना ॥ दशावतारग्रहणे दुःखं प्राप्तमनेकधा ॥ २९ ॥ क्व सीतार्थं
श्रीनिवासो रामो लक्ष्मणसंयुतः ॥ विलापं कुरुते नागपाशबन्धादिकर्मसु ॥३० ॥ क्व देवदेवो वसुदेवसूनुर्विज्ञानरूपो निखलप्रपंची ॥ हा कष्टमि
त्यस्त्रदृगादिचेष्टः पार्थोग्रसेनादिकभृत्यकृत्यः॥३१॥ ईशस्य कृत्यं द्विज दुर्विभाव्यं धर्मानुकूल्येन समास्थितस्य ॥ व्यासः स्वयं वेदविभागकर्त्ता
पाराशरिस्तत्त्वदृगिज्यमूर्तिः ॥कन्यात्वविध्वंसकवीर्यजन्मा कानीनसंज्ञोऽनुजदारगामी॥३२॥परिवेत्ता च दिधिषूः शन्तनुः स्वःसारित्पतिः॥ दिधिषू
तनयः साक्षाद्वसुः क्लीवादमृत्युभाक् ॥ ३३ ॥ ये गोलकसुताः कुण्डाः पांडवाः समयोनिगाः ॥ तेषां संकीर्तनं पुण्यं पवित्रं पापनाशनम् ॥ ३४ ॥

यं ध्यायंति स्मरंत्यद्धा योगमूर्तिः सनातनः ॥ ३५ ॥ विष्णुर्वेश्यासमासक्तः प्रह्लादाद्युपदेशकृत्॥श्रीनृसिंहोऽसुरध्वंसी देवदेवाधिदैवतम् ॥ ३६ ॥
संसारवासनाध्वंसी देवदेवाधिदैवतम्॥संसारवासनाध्वंसी स्वर्णाक्षभवनस्थितिः ॥ ३७ ॥ जामदग्न्यः स्वयं सिद्धस्तपसा दग्धकिल्बिषः ॥ ईश्वरः
क्षत्रसंहारभ्रूणहत्यादिकर्मकृत्॥३८॥स्वयमेवर्षभो योगी लोकशिक्षापरो द्विजः॥लोकग्लानिकरो जातः कुर्वन्धर्मानुरोधतः ॥ ३९ ॥ नारदो नारदो
भूयो भूयो भूयोऽपि नारदः॥नारायणपरो नारो नरो नरहितोऽमरः॥४० ॥गौतमो गौतमो विप्र गोपचेष्टापरायणः॥वेदबाह्यार्थसंयुक्तशास्त्री वेदोपकार
कृत ॥४१॥ वसिष्ठश्चोर्वशीजातोऽगस्त्योऽपि स्वयमीश्वरौ॥येन लोकोपकारार्थं वासिष्ठं शास्त्रमुत्तमम्॥४२॥ कृतं यस्मिन्पुराणानि वेदाः साम्यत्व
मागताः ॥ यः स्वयं रामचन्द्रस्य गुरुः सर्वेश्वरस्य च ॥ ४३ ॥ स कथं गाधिजाशप्तस्तिर्यग्योनिमुपागमत् ॥ यो दमित्वा विभुर्विंध्यं
वातापिं सागरं स्थितः ॥ ४४ ॥ स कथं मृतकादाता दुष्करं समुपासते ॥ यो विधिः कर्मसाक्ष्यादिवन्द्यो मान्यः पितामहः ॥ ४५ ॥ मोहि
नीमोहितो देहमुत्ससर्ज कथं स च ॥ यः शिवः शिवदः साक्षात्प्रकृतीशः परात्परः ॥४६ ॥ स कथं देवपत्नीगः श्मशानाशुभचेष्टितः ॥तस्माद्द्विज
सदाचारो निषेव्यो विधिना विधिः ॥ ४७॥ तमहंभावनायुक्तो नो हेयाद्यो विदां वरः ॥ स शांतिमाप्नुयादग्र्यां धर्म्यामुभयसंस्थिताम् ॥४८॥
आपवर्ग्यः स्मृतो धर्मो धनं धर्मैकसाधनम् ॥ तन्मया साधितो धर्मः सर्वोत्तमधनात्मना॥ ४९ ॥ शृणु विप्रात्र धर्मस्य गतिं सूक्ष्मां वदाम्यहम्॥
यदा समागतो भर्ता मम कन्यां समाहरन् ॥५०॥ त्वां पश्यन् निजकर्मस्थं कोऽपि दोषो न तस्य वै ॥ मया पृष्टः कथं नाम कन्येयं समुपाहृता
॥५१॥तदा तेन मृषा वाक्यमुक्तं मद्रक्षणार्थकम्॥तन्निशम्याह मां बद्धा स्वयं चास्थानिदर्शनात्॥५२॥ये वदंति च दांपत्ये भार्या मोक्षविरोधिनी॥
न ते तत्त्वदृशो ज्ञेया न सा भार्या विरोधिनी॥५३॥ भार्या समुद्धरेत्पापात्पतंतं निरये पतिम् ॥ सा भार्यान्या कर्मवल्लीरूपा संसारदायिनी॥५४॥
पापं किमत्र तन्मत्तः सम्यक्छृणु स्वयं वर ॥ अलीकं नैव वक्तव्यं प्राणैः कंठगतैरपि ॥५५॥ सत्यमेवाचरेत्सत्ये साक्षाद्धर्मे व्यवस्थितः॥सत्ये समा
स्थितो ब्रह्मा सत्ये सन्तः समास्थिताः॥५६॥सत्ये समास्थितं विश्वं सर्वदा सचराचरम्॥ सत्यं ब्रूयादिति वचो वेदांतेषु प्रगीयते॥५७॥सत्यं ब्रह्म
स्वरूपं हि तत्सत्यमभिधीमहि ॥ सत्यं तु सर्वदा विप्र मंगलं मंगलप्रदम् ॥ ५८ ॥ असत्यमात्मक्षयदं सद्यः प्रत्ययकारकम् ॥ स्त्रीषु सत्यं न
वक्तव्यं तत्रापि शृणु कारणम् ॥५९॥ निधिं स्त्रियै न कथयेदित्यादौ दोषवारणम् ॥ उक्तं तद्धर्मजनकं धर्मसूक्ष्मत्वदर्शकम्॥६०॥कुशा द्विजा जलं
वह्निर्वेदा भूकालदिक्सुराः ॥ साक्ष्ये यत्र विवाहेषु दांपत्यं तदुदीरितम्॥६१॥ समंगीकरणं कर्म विवाहे तु विधीयते॥ स्त्रीपुंसोर्द्विजसंस्कारे निर्दिष्टं

गुरुशिष्ययोः ॥ ६२ ॥ तस्मात्परस्परं ज्ञेयौ गुरुशिष्यौ वधूवरौ॥नानयोरणुमात्रोऽपि भेदो बोध्यो विजानता ॥६३॥ तत्तत्कर्मानुरूपत्वात्प्राधान्यस्त्रीनियोज्ययोः ॥ क्वचिद्व्यत्ययदोषश्चेद्दैवमेवात्र कारणम् ॥ ६४ ॥ दैवाधीनं जगत्सर्वं सदेवासुरमानुषम् ॥ दैवं तत्पूर्वजन्मानि संचिताः कर्मवासनाः ॥ ६५ ॥ प्राप्तं निषेवन्नन्योन्यं वर्तते कामकारकम् ॥ शुभं वाप्यशुभं विप्र तं तु शांतं विदुर्बुधाः॥ ६६ ॥ शांतः सत्यसमाचारो जंतुलोकप्रतारकः ॥ एवमादि विदित्वा तु नायं भर्ता निपातितः ॥ ६७ ॥ कन्यात्वध्वंसकात्पापात्पूतो मदुपकारतः ॥ गतिं प्रयातः कृतिनां त्वद्धस्तविनिपातितः ॥ ६८ ॥ मया तूपकृतं पत्ये जानंत्या धर्मसूक्ष्मताम् ॥ त्वत्प्राणरक्षणे धर्मो ममाभूद्द्विजसत्तम ॥ ६९ ॥ तेन धर्मेण किं प्राप्तमिति सम्यङ् निबोध मे ॥ राक्षसीं योनिमापन्ना राक्षसस्य प्रिया ह्यहम् ॥७०॥ कामरूपा ब्राह्मणी तु संजाता धर्मकारणात् ॥ धर्मकामदुघा धेनुः संतोषो नंदनं वनम् ॥७१॥ विद्या मोक्षकरी प्रोक्ता तृष्णा वैतरणी नदी ॥ वैतरण्यां पतन्भर्ता मयोद्धृत इहाभवत् ॥ ७२ ॥ अस्याश्चोपकृतं विप्र वर्णोत्तमनिवेशनात् ॥ इयं त्वसंगिनी भार्या भविष्यति पितुर्गृहे ॥७३॥ अहं तवास्याश्च सदा रक्षिका धर्मबोधिनी॥मत्संगमात्पूर्वमेव या भार्या विप्र तेऽभवत् ॥७४॥ इयं त्वत्संगिनी भार्या भविष्यति वरानना ॥ सापि तिर्यग्गतिं प्राप्य मुच्यते मदनुग्रहात् ॥७५॥ अहं पुराभवेऽभूवं रमणी लोकसुन्दरी॥ कंदलीति च विख्याता तनयौर्वमुनेर्द्विज ॥ ७६ ॥ तपःप्रभावात्संजाता यमला मिथुनंधरा ॥ पुरुषो मे सहभवो दमितो धर्मकारणात् ॥ ७७ ॥ तेनैवौर्वेण शिप्ताहं दत्ता दुर्वाससे भवम् ॥ तं पतिं प्राप्य विप्रेंद्र प्राक्कर्मवशगा ह्यहम् ॥७८॥कलहाभिरता पत्या शप्ता भस्मत्वमागता॥ किंचित्पापवशेषेण राक्षसीं योनिमागता॥७९॥तत्र योनौ मया लब्धो भर्तायं राक्षसाधिपः॥गोभिलो नाम तेजस्वी स त्वया विनिपातितः॥८०॥ शापोऽस्य पूर्ववयसिवभूव द्विजसत्तम॥कस्याश्चिद्राजकन्यायाः स्त्रियाऽऽरब्धा मृतिस्तव॥८१॥अहं तु राक्षसीभावरहिता पूर्वकर्मणः॥शुभस्य बलमापन्ना जाता तव सहायिनी॥ ८२ ॥ दुःखिताहं कृता भर्त्रा कुमार्याहरणात्पुरा ॥ भार्याथ पापिना ब्रह्मंस्तेन व्यापादितो मया ॥८३॥ विश्वस्तो हि यतस्त्वं वै मम सर्वेण चेतसा ॥ ततस्त्वां गोपयिष्यामि सर्वभावेन कामुक ॥ ॥ ८४ ॥ एष ते शपथः सत्यः पंचभूतोपसाक्षिकः ॥ कृत्स्नस्य पुरुषस्येह सन्निधौ व्याहृतो मया ॥ ८५ ॥ न करोषि द्विजश्रेष्ठ संविदं ह्यन्यथा क्वचित् ॥ मद्वाक्ये भवता स्थेयं सर्वकृत्येषु मानद ॥ ८६ ॥ एतच्छ्रुत्वा तु वचनं राक्षस्या परिभाषितम् ॥ प्रतिपेदे वचः सर्वं यत्कृतं हि तया तदा ॥८७॥ ततः सा राक्षसी सर्वं संप्रगृह्य गुहाधनम् ॥ करेणुरूपिणी भूत्वा पृष्ठे कृत्वा पतिं मम ॥ ८८ ॥ तया सह विशालाक्ष्या रत्नावल्या मुदान्विता ॥ ययावाकाशमार्गेण काशीमभि सुलोचने ॥ ८९ ॥ इति श्रीबृहन्नारदी

यपुराणोत्तरभागे मोहिनीचरिते काष्ठीलोपाख्यानं नामाष्टाविंशोऽध्यायः ॥ २८ ॥ काष्ठीलोवाच ॥ एवं सा राक्षसी सुभ्रु हस्तिनीरूपधारिणी ॥
त्रिभिर्मुहूर्तैः संप्राप्ता काशीं विश्वेशमंदिरम् ॥ १ ॥ उवाच तां पुरीं प्राप्य भर्तारमसितेक्षणा ॥ इयं पापतरोः कांत कुठारा परिकीर्तिता ॥ २ ॥
षडूर्मिकांचनस्यैषा कांत प्रोक्ता दुरोदरी ॥ कर्मबीजोपशमनी सर्वेषां गतिदायिका ॥ ३ ॥ आद्यं हि वैष्णवं स्थानं पुराणाः संप्रचक्षते ॥
नावैष्णवे स्थले मुक्तिः सर्वस्य तु कदाचन ॥ ४ ॥ माधवस्य पुरी चेयं पूर्वमासीद्द्विजोत्तम ॥ मुक्तिदा सर्वजंतूनां सर्वपापप्रणाशिनी ॥५ ॥ एकदा
शंकरो देवो द्रष्टुं प्रागात्पितामहम् ॥ सर्वलोकैककर्तारं भ्राजमानं स्वतेजसा ॥ ६ ॥ गत्वा तत्र महादेवो ब्रह्माणं जगतां गुरुम् ॥ नमस्कृत्य स्थितो
ह्यग्रे वेदपाठं निशामयन् ॥७ ॥ चतुर्भिरद्भुतैर्वक्त्रैश्चतुरो निगमान्मुदा ॥ उद्गिरंतं जगन्नाथं दृष्ट्वा प्रीतोऽभवत्तदा ॥ ८ ॥ अथ तत्पंचमं
वक्त्रं ब्रह्मणो भूतनायकः ॥ प्रगल्भं तमुपालक्ष्य क्षणाज्जातः समत्सरः ॥ ९॥ स क्रोधजन्मा विप्रेंद्र तस्य प्रागल्भ्यमक्षमन् ॥ चकर्त तन्नखाग्रेण
स्वस्थं वक्त्रं त्रिलोचनः ॥ १० ॥ तच्छिन्नं ब्रह्मणः शीर्षं संलग्नं करपल्लवे ॥ वामे निर्धूतमनिशं न निवृत्तं द्विजोत्तम ॥ ११ ॥ ब्रह्मा तु दुःखितो
भूत्वा तस्थौ स्थाणुं व्यलोकयन् ॥ रुद्रोऽपि लज्जितो भूत्वा निर्जगाम त्वरान्वितः ॥ १२ ॥ बहुधा यतमानोऽपि तच्छिरः क्षेप्तुमातुरः ॥ न शशाक
परित्यक्तुं तदद्भुतमभून्महत् ॥ १३ ॥ चिंतया व्याकुलो भूत्वा सस्मार गरुडध्वजम् ॥ तेन संस्मृतमात्रस्तु शीघ्रमाविरभूच्च सः ॥ १४ ॥ तं
दृष्ट्वा देवदेवेशं विष्णुं सर्वगतं द्विज ॥ ननाम शिरसा नम्रो निष्प्रभो वृषभध्वजः ॥ १५ ॥ तं तथातुरमालक्ष्य भीतं ब्रह्मद्रुहं हरिः ॥ समाश्वास्या
ब्रवीद्वाक्यं तत्तोषपरिकारकम् ॥ १६ ॥ शंभो त्वया कृतं पापं यच्छिन्नं ब्रह्मणः शिरः ॥ तत्फलं भुंक्ष्व सर्वज्ञ कियत्कालं कृतं स्वयम् ॥ १७ ॥
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥ नाभुक्तं क्षीयते कर्म ह्यपि जन्मशतैः प्रिय ॥ १८ ॥ किं करोमि क्व गच्छामि त्वां दृष्ट्वा दुःखितं
हरम् ॥ प्राणा विकलतां यांति मम त्वद्दुःखदर्शनात् ॥ १९ ॥ यानि कानि च पापानि महांति महतां गते ॥ न तानि ब्रह्महत्यायाः समानीति
मतिर्मम ॥ २० ॥ यस्त्वं सर्वस्य लोकस्य गुरुर्धर्मोपदेशकः ॥ ब्रह्महत्याभिभूतस्तु क्षणं स्थातुं न च क्षमः ॥ २१ ॥ एषा घोरतरा
हत्या मीनगंध्या जरातुरा ॥ लेलिहाना सुरेशान ग्रहीतुं त्वानुधावति ॥ २२ ॥ तस्मान्नैकत्र भवता स्थेयं द्वादशवत्सरम् ॥ अट
नीयं हितार्थाय पापनाशाभिकाम्यया ॥ २३ ॥ अटित्वा द्वादशाब्दानि तीर्थेषु सकलेषु च ॥ प्रक्षालयन्करं वामं भिक्षां गृह्णन्कपालके ॥ २४ ॥
शुद्धिं यास्यसि देवेश पापादस्मात्सुदारुणात् ॥ इत्युक्तो विष्णुना विप्र स्थाणुः सर्वगतोऽभवत्॥२५॥कपालमोचनार्थं हि पाणिं प्रक्षालयन् जले॥

वर्षत्रयं भ्रमित्वा तु प्राप्तो बदरिकाश्रमम् ॥ २६ ॥ भिक्षार्थं देवदेवस्य धर्मपुत्रस्य मानद ॥ द्वारस्थो देहि भिक्षां मे विष्णो इत्यवदन्मुहुः ॥ २७ ॥
ततो नारायणो देवो दृष्ट्वा द्वारि स्थितं हरम् ॥ गृहाण भिक्षामित्युक्त्वा प्रददौ दक्षिणं करम् ॥ २८ ॥ ततो हरो हरिं दृष्ट्वा भिक्षां दातुं समुद्यतम् ॥
प्राहरद्दक्षिणं पाणिं त्रिशूलेन द्विजोत्तम ॥ २९ ॥ तत्त्रिशूलक्षताद्धारास्तिस्रो लोकभयंकराः ॥ प्रस्थद्वादशहस्ताश्च निर्गताश्चित्रवर्णिकाः ॥ ३० ॥
एका क्षतजधारा तु कपाले न्यपतत्तदा ॥ द्वितीया तन्मुखे प्राप्ता पयस्याथ तृतीयका ॥३१॥ जलधारा शिवं प्राप्ता हरस्य हेतुरग्रतः ॥ ता धारास्त्रीणि
वर्षाणि संसेव्य विधिवद्धरः ॥३२॥ किंचित्प्रीतो ययौ क्षेत्रं कुरोः पुण्यकरं द्विज॥तत्र गत्वा हरः स्थाणुर्भूतस्तत्र पपात च ॥३३॥ ब्रह्महृदे त्रिवर्षाणि
मग्नो ब्रह्महृदांबुनि ॥ वर्षत्रये गते तत्र क्षताद्धांगो विनिःसृतः ॥ ३४ ॥ चिरं तुष्टाव देवेशं विष्णुं सर्वगुहाशयम् ॥ ततस्तुष्टो जगन्नाथो वरं तस्मै
ददौ तु सः ॥३५ ॥ गच्छ काशीमितो भ्रांत्वा तीर्थानि बहुशो हर ॥ ततो हरिं नमस्कृत्य परीत्य बहुधा तथा ॥३६॥क्रमात्तीर्थाटनं कुर्वन्नविमुक्त
पुरीं गतः॥अविमुक्तस्य सीमायां प्राविशद्वीक्ष्य धूर्जटिः॥३७॥नापश्यत्तामनुप्राप्तां ब्रह्महत्यां बहिः स्थिताम्॥ततोऽसौ वैष्णवं ज्ञात्वा क्षेत्रं दुरितनाश
नम्॥तुष्टाव प्रयतो भूत्वा माधवं वंद्यमीश्वरम्॥३८॥जय जय जगदीश नाथ विष्णो जगदानंदनिधान वेदवेद्य॥ मधुमथन नृसिंह पीतवासो गरुडाधि
ष्ठित माधवादिदेव॥३९॥व्रजरमण रमेश राधिकेश त्रिदशेशाखिलकामपूर कृष्ण॥ सुरवरकरुणार्णवार्तिनाशिन्नलिनाक्षाधिपते विभो परेश॥४०॥यदुकु
लतिलकाब्धिवास शौरे कुधरोद्धारविधानदक्ष धन्विन् ॥ कलिकलुषहरांघ्रिपद्मयुग्म गृणदात्मप्रद कूर्म कश्यपोत्थ॥४१ ॥ कुकुपतिवनपावकाखि
लेज्यास्तपकालासितवस्त्र बुद्ध कल्किन् ॥ भवभयहर भक्तवश्य गोप प्रणतोद्धारक पुण्यकीर्तिनाम ॥४२ ॥ धरणिभरहरासुरारिपूज्य प्रकृतीशेश जग
न्निवास राम॥ गुणगणविलसच्चराचरेश त्रिगुणातीत सनातनाग्रपूज्य॥ निजजनपरिरक्षितान्तकारे कमलाङ्घ्रे कमनीय पद्मनाभ॥कमलकर कुशेशया
धिवास प्रियकामोन्मथन त्र्यधीशवंद्य ॥ ४३ ॥ अघहर रघुनाथ यादवेश प्रियभूदेव परात्परामरेज्य ॥ हलधर दुरितापह प्रगम्य त्रिगुणव्याप्त जग
त्रिकालदक्ष ॥४४॥ दनुजकुलविनाशनैककर्मन्नघारूढफणीश कंसकाल ॥ रविशशिनयन प्रगल्भचेष्ट प्रधुतध्वांत नवांबुदाभ मेश ॥ ४५ ॥ मख
मखधर मातृबद्धदामन्नवनीतप्रिय बल्लवीगणेश ॥ अघबकवृषकेशिपूतनांत त्रिशिरोवालिदशास्यभेदकारिन् ॥ ४६ ॥ नरकमुरविनाश बाणदोः
कृत्त्रिपुरारीज्य सुदाममित्र सेव्य॥भवतरणिवहित्रपादपद्म प्रकटैश्वर्य पुराण पूर्णबाहो॥४७॥बहुजनिसुकृताप्य मंगलार्ह श्रुतिवेद्य श्रुतिधाम शांतशुद्ध ॥
तव वरद वरेण्यमंघ्रियुग्मं शरणं प्राप्तमघार्दितं प्रपाहि॥४८॥नहि मम गतिदं पुराणपुंसोऽन्यदिति प्रार्थनया प्रसीदऽमेद्य॥४९ ॥इति स्तुतो जगन्नाथो

भक्त्या देवेन शंभुना ॥ आविर्बभूव सहसा माधवो भक्तवत्सलः ॥ ५० ॥ तं दृष्ट्वा दंडवद्भूमौ निपपात हरो हरिम् ॥ पुन
रुत्थाय विप्रेंद्र ननाम विधृतांजलिः ॥ ५१ ॥ तमुवाच हृषीकेशः प्रणतं भूतनायकम् ॥ वरं वृणु प्रदास्येऽहं संतुष्टः स्तोत्रतस्तव ॥ ५२ ॥
तच्छ्रुत्वा भगवद्वाक्यं भूतेशो ब्रह्महत्यया ॥ पीडितात्मा जगादेदं भुक्तिमुक्तिप्रदं हरिम् ॥ ५३ ॥ इच्छामि वसितुं क्षेत्रे तव चक्रगदाधर ॥
त्वत्क्षेत्रसीमाबाह्यस्था ब्रह्महत्या यदीक्ष्यते ॥ ५४ ॥ क्षेत्रदानेन कारुण्यं कुरु मे गरुडध्वज ॥ मम निर्गमने ब्रह्महत्या मां पुनरेष्यति ॥ ५५ ॥
त्वत्क्षेत्रे संस्थितोऽहं तु पूजां प्राप्स्ये जगत्त्रये ॥ इत्युक्त्वा ह्यभवत्तूष्णीं देवदेवं वृषध्वजः ॥ ५६ ॥ तथेति प्रतिपेदे च क्षीरसागरजाप्रियः ॥
ततः प्रभृति विप्रेंद्र शैवं क्षेत्रं निगद्यते ॥ ५७ ॥ क्षेत्रं तु केशवस्येदं पुराणं कवयो विदुः ॥ कृपया संपरीतस्य माधवस्य द्विजोत्तम ॥ ५८ ॥
नेत्राभ्यां निर्गतं वारि तेन बिंदुसरोऽभवत् ॥ माधवस्याज्ञया तत्र सस्नौ देवो वृषध्वजः ॥ ५९ ॥ स्नातमात्रे हरे तत्तु कपालं पाणितोऽपतत् ॥
कपालमोचनं नाम तत्तीर्थं ख्यातिमागतम् ॥ ६० ॥ बिंदुमाधवनामासौ दत्वा स्वं धाम शूलिने ॥ भक्तिभावेन शंभुस्तु निबद्धस्तत्र संस्थितः
॥ ६१ ॥ यं तु ब्रह्मादयो देवाः स्वःस्थाः पश्यति सर्वदा ॥ सूर्यायुतसमप्रख्य दिगंबरनिषेवितम् ॥ ६२ ॥ विघ्नानि शूलिना कांत कृतान्यस्य
निषेवणे ॥ यैर्विघ्नैरभिभूतास्तु स्तुत्वा विष्णुं शिवार्चकाः ॥ ६३ ॥ सर्वे लोकाः स्थिता ह्यत्र शिवः काशीति चिंतकाः ॥ शिवस्य चिंतनाद्विप्र शैवाः
सर्वे निराकुलाः ॥ ६४ ॥ प्रयांति शिवलोकं वै जरामृत्युविवर्जितम् ॥ बहुपुण्ययुताः संतो निवसंत्यत्र नीरुजः ॥ ६५ ॥ यज्ञशिष्टाशिनः काशीकांत
ऋद्धिसमन्विताः ॥ नात्र स्नानं प्रशंसंति न जपं न सुरार्चनम् ॥ ६६ ॥ नापि दानं द्विजश्रेष्ठ मुक्त्वैकं देहपातनम् ॥ मृत्युं प्राप्य नरः कामं कृतकृत्यो
भवेद्ध्रुवम् ॥ ६७ ॥ सेयमासादिता विप्र पुरी प्रासादसंकुला ॥ भोगिनामपि मोक्षाय किं पुनर्व्रतधारिणाम् ॥ ६८ ॥ निक्षिप्यतामियं बाला काशीशस्येह
मंदिरे ॥ वियोजिता तु या पूर्वं तेन दुष्टेन रक्षसा ॥ ६९ ॥ आत्मनः सुरतार्थाय कुमारी नियमान्विता ॥ एष प्रभावोऽपि हितः क्षेत्रस्यास्य द्विजोत्तम ॥
॥ ७० ॥ विनश्यंतीह कर्माणि शुभान्यप्यशुभानि च ॥ भूतभव्यभविष्याणि ज्ञानाज्ञानकृतानि च ॥ ७१ ॥ एषा पुरी कर्मविनाशनाय कृष्णेन
पूर्वं हि विनिर्मिताभूत् ॥ यस्यां मृता दुःखमनंतमुग्रं भुंजंति मर्त्या यमयातनां नो ॥ ७२ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीचरिते
काष्ठीलोपाख्याने राक्षसीचरिते काशीवर्णनं नाम एकोनत्रिंशोऽध्यायः ॥ २९ ॥ काष्ठीलोवाच ॥ भार्यायास्तद्वचः श्रुत्वा राक्षस्या धर्मसंमितम् ॥
पृष्ठात्करेणुरूपिण्याः सकन्योऽवातरद्द्विजः ॥ १ ॥ अवतीर्णे द्विजे साभूत्सुरूपा प्रमदा पुनः ॥ क्षपाचरी क्षपानाथवक्त्रा पीनोन्नतस्तनी ॥ २ ॥

सा कुमारी ततः प्राप्य नगरं स्वपितुः शुभम् ॥ बाह्यरक्षास्थित प्राप्तं पुरपालमुवाच ह ॥ ३ ॥ गच्छ त्वं नृपतेः पार्श्वं पितुर्मम पुराधिप ॥
ब्रूहि मां समनुप्राप्तां रत्नशालां पुरा हृताम् ॥ ४ ॥ रत्नावलिं रत्नभूतां सुद्युम्नस्य महीक्षितुः ॥ तल्पस्था रक्षसा रात्रौ स्वपुरस्था हृता
द्विज ॥ ५ ॥ पुनः सा समनुप्राप्ता जीवमानाऽक्षता पितः ॥ समाश्वसिहि शोकं त्वं मा कृथा मत्कृते क्वचित् ॥ ६ ॥ अविप्लुतास्मि राजेंद्र गांगा
आप इवामलाः ॥ तव कीर्तिकरी तद्वन्मातुः सौशील्यसूचिका ॥ ७ ॥ तत्कुमारीवचः श्रुत्वा पुरपालस्त्वरान्वितः ॥ अबाहुरिति विख्यातः
प्रातः सुद्युम्नसन्निधौ ॥ ८ ॥ कृतप्रणामः संपृष्टः प्राह राजानमादरात् ॥ राजन्नुपागता नष्टा दुहिता तव मानद ॥ ९ ॥ रत्नावलीति विख्याता
सस्त्रीकद्विजसंयुता ॥ पुरबाह्ये स्थिता दृष्टा मया ज्ञाता न चाभवत् ॥ १० ॥ तयाहं प्रेरितः प्रागां त्वां विज्ञापयितुं प्रभो ॥ अविप्लुताहं
वदति मां जानातु समागताम्॥ ११॥ पितरं मम सत्कृत्यै नात्र कार्या विचारणा ॥ तदद्भुतं वचः श्रुत्वा पुरपालस्य तत्क्षणात् ॥१२ ॥ सामात्यः
सकलत्रस्तु सद्विजो निर्ययौ नृपः ॥ स तु गत्वा पुराद्बाह्ये गंगातीरे व्यवस्थिताम् ॥ १३ ॥ अपश्यद्भास्कराकारां सस्त्रीकद्विजसंयुताम् ॥ सहजे
नैव वेषेण भूषितां भूषणप्रियाम् ॥ १४ ॥ अम्लानकुसुमप्रख्यां तप्तकांचनसुप्रभाम् ॥ दूराद्दृष्ट्वांतिकं गत्वा पर्यष्वजत भूपतिः ॥ १५ ॥ पितरं
सापि संहृष्टा समाश्लिष्य ननाम ह ॥ ततश्च मात्रा संगम्य हृष्टया हर्षितांतरा ॥ १६ ॥ प्राह वाक्यं विशालाक्षी संबोध्य पितरं नृपम् ॥ सुप्ताहं
रत्नशालायां सखीभिः परिवारिता ॥ १७ ॥ उदक्कृत्वा शिरस्ताताधौतांघ्रिर्मंचकोपरि ॥ चिंतयन्ती भर्तृयोगं निशीथे रक्षसा हृता ॥ १८ ॥ स
मां गृहीत्वा स्वपुरं प्रागादर्णवगे गिरौ ॥ नानारत्नमये तत्र गुहायां स्थापिता ह्यहम् ॥ १९ ॥ स तत्रोद्वहनोपायचिंतयांतर्व्यवस्थितः ॥ तस्य भार्या
त्वियं सुभ्रूर्या तिष्ठति सुमध्यमा ॥ २० ॥ बिभ्रती मानुषं रूपं राक्षसी राक्षसप्रिया ॥ अनया बुद्धियोगेन शक्त्या शक्रस्य भूपते ॥ २१ ॥
घातितो विप्रहस्तेन क्रूरकर्मा पतिः स्वकः ॥ पुरैव मम तं शैलं प्राप्तो देवेन भूसुरः ॥ २२ ॥ इयं तु राक्षसी दृष्ट्वा पतिं स्वं धर्मदूषकम् ॥ विप्रेण
संविदं कृत्वा दांपत्ये निजकर्मणा ॥ २३ ॥ रूपेणाप्यस्य संमुग्धा घातयामास राक्षसम् ॥ एवं कृत्वा पतिं विप्रं हस्तिनीरूपधारिणी ॥२४॥ गृहीत्वा
वास्तुकं वित्तं पृष्ठमारोप्य मामपि ॥ समायातात्र भूपाल मामत्तु तव मंदिरम् ॥ २५ ॥ अनया रक्षिता राजन् राक्षस्याराक्षसात्ततः ॥ तस्मा
दिमां पूजयस्व सत्कृत्याग्रजसंयुताम् ॥ २६ ॥ अस्या एवानुमत्या मां देह्यस्मै ब्राह्मणाय हि ॥ अनेनैकासनगता जाता भर्ता स मे भवत् ॥ २७ ॥
येनैकासनगा नारी भवेद्भर्ता स एव हि ॥ नान्य इत्थं पुराणेषु श्रूयते ह्यागमेष्वपि ॥ २८ ॥ अस्याः पृष्ठे निविष्टाहं प्रीत्या सह द्विजन्मना ॥ धर्मत

स्तेन मद्भर्ता भवेदेषा मतिर्मम ॥ २९ ॥ तस्मादिमां सांत्वयित्वा शास्त्रागमविधानतः ॥ देहि विप्राय मां तात पतिमन्यं वृणे न
च ॥ ३० ॥ तच्छुत्वा दुहितुर्वाक्यं सुद्युम्नो भूपतिस्तदा ॥ सांत्वयामास तन्वंगीं राक्षसीं प्रश्रयानतः ॥ ३१ ॥ सुतैषा धर्मभीता
मे त्वामेव शरणं गता ॥ यदर्थं निहतः कांतस्त्वया पूर्वतरः सति ॥ ३२ ॥ त्वदधीना ततो भद्रे जातेयं मत्सुता किल ॥
इममिच्छति भर्तारं योऽयं भर्ता कृतस्त्वया ॥ ३३ ॥ मया प्रणामदानाभ्यां याचिता त्वं निशाचरि ॥ अनुमोदय साहाय्ये सुतां मम सुलोचने
॥ ३४ ॥ त्वद्वाक्याद्भवतु प्रेष्या मत्सुता ब्राह्मणस्य तु ॥ सापत्नभावं त्यक्त्वा तु सुतां मे परिपालय ॥ ३५ ॥ सुताया मम भार्याया मद्बलस्य
जनस्य च ॥ पुरस्य विषयस्यापि स्वामिनी त्वं न संशयः ॥ ३६ ॥ तव वाक्ये स्थिता ह्येषा सदैवापि भविष्यति ॥ एतच्छुत्वा तु वचनं
सुद्युम्नस्य निशाचरी ॥ ३७ ॥ अन्वमोदत शुद्धेन चेतसा सहचारिणी ॥ उवाच च धरापालं प्रदानाय कृतोद्यमम् ॥ ३८ ॥ यदर्थं प्रणतस्त्वं मां
सद्भावेन नृपोत्तम ॥ तस्माद्द्वितीया भार्येयं भवत्वस्य द्विजन्मनः ॥ ३९ ॥ अहं च भवता पूज्या कृत्वार्चां देवमंदिरे ॥ सर्वैश्च नागरैः सार्द्धं फाल्गुने
धवले दले ॥ ४० ॥ सप्ताहमुत्सवः कार्यो ह्यष्टम्या आचतुर्दशीम् ॥ नटनर्तकयुक्तेन गीतवाद्येन भूरिणा ॥ ४१ ॥ मैरेयमांसरक्तादिबलिभिश्चापि
पूजया ॥ एवं प्रकुर्वते तुभ्यं सदा क्षेमकरी ह्यहम् ॥ ४२ ॥ भवेयं नृपशार्दूल स्वं वचः प्रतिपालय ॥ तच्छुत्वा वचनं तस्याः सुद्युम्नो नृपतिस्तदा
॥ ४३ ॥ अंगीचकार तत्सर्वं यदुक्तं प्रीतया तया ॥ प्रतिपन्ने तु वचसि राज्ञा तुष्टा तु राक्षसी ॥ ४४ ॥ उवाच ब्राह्मणं प्रेम्णा कुरु भार्यामिमामपि
॥ राजकन्यां द्विजश्रेष्ठ गृह्योक्तविधिना शुभाम् ॥ ४५ ॥ ईर्ष्यां त्यक्त्वा विशालाक्ष्या भवाम्येषा सहोदरी ॥ राक्षस्या वचनेनेह परिणीय
नृपात्मजाम् ॥ ४६ ॥ बहुवित्तयुतां विप्रो महोदयपुरं ययौ ॥ आरुह्य करिणीरूपां राक्षसीं क्षणमात्रतः ॥ ४७ ॥ ततो मया श्रुतं देवि भर्ता ते
समुपागतः ॥ धनरत्नसमायुक्तो भार्याद्वयसमन्वितः ॥ ४८ ॥ ततोऽहं बंधुवर्गेण पितृभ्यां च सखीगणैः ॥ बहुशो भर्त्सिता रूक्षैर्वचनैर्मर्मभे
दिभिः ॥ ४९ ॥ कथं यास्यसि भर्तारं धनलुब्धे श्रिया वृतम् ॥ यस्त्वया निर्द्धनः पूर्वं परित्यक्तः सुदीनवत् ॥ ५० ॥ चंचलानीह वित्तानि
पित्र्याणि किल योषिताम् ॥ कांतार्जितानि सुभगे स्थिराणीति निगद्यते ॥ ५१ ॥ परुषैर्वचनैर्यस्तु क्षिप्तस्तद्भाषणं कथम् ॥ भविष्यति
प्रवेशोऽपि दुष्करस्तस्य वेश्मनि ॥ ५२ ॥ गताया अपि ते तत्र शयनं पतिना सह ॥ भविष्यति दुराचारे सुखदं न कदाचन ॥ ५३ ॥
लोकापवादाद्यदि चेद्ग्रहीष्यति पतिस्तव ॥ त्वां स्नेहहीनचित्तस्तु न कदाचिन्मिलिष्यति ॥ ५४ ॥ नेदृशं दुःखदं किंचिद्यादृशं दूरचित्तयोः ॥ दंप

त्योर्मिलनं लोके वैकल्यकरणं महत् ॥५५ ॥ एवं बहुविधा वाचः शृण्वाना बंधुभाषिताः ॥ अधोमुख्यस्रुपूर्णाक्षी बभूवाहं सुदुःखिता ॥ ५६ ॥
चेतसाचिंतयं चाहं पूर्वलोभेन मुह्यती ॥ न दत्तं कंकणं पाणेर्न दत्तं कटिसूत्रकम् ॥ ५७ ॥ न चापि नूपुरे दत्ते येन तुष्टिं व्रजेत्पतिः ॥
धनजीवितयोः स्वामी भर्ता लोकेषु गीयते ॥५८ ॥ तन्मयापहृतं वित्तं भवित्री का गतिर्मम ॥ कथं यास्यामि तद्वेश्म कथं संभाषये :पुनः
॥ ५९ ॥ यो मया दुष्टया त्यक्तः स प्रत्येति कथं हि माम् ॥ एवं विचिंतये यावद्धृदयेन विदूयता ॥ ६० ॥ वेष्टिता बंधुवर्गेण तावद्दोला
समागता ॥ छत्रेण शशिवर्णेन शोभमाना सुकोमला ॥ ६१ ॥ आस्तृता रांकवैः पीनैः पुरुषैर्विधृतांसकैः ॥ ते समागत्य पुरुषाः प्रोचुर्मामसकृ
च्छुभे ॥६२ ॥आकारितासि पत्या ते व्रज शीघ्रं मुदान्विता ॥ धनरत्नयुतो भर्ता सद्भिभार्यः समागतः ॥ ६३ ॥ प्रविष्टमात्रेण गृहे त्वामानेतुं
वरानने ॥ प्रेषिताः सत्वरं पत्या संस्थितां पितृवेश्मनि ॥ ६४ ॥ ततोऽहं व्रीडिता देवि भर्तुस्तद्वीक्ष्य चेष्टितम् ॥ नैवोत्तरमदां तेभ्यः किंचिन्मौनं
समास्थिता ॥ ६५ ॥ ततोऽहं बंधुवर्गेण भूयोभूयः प्रबोधिता ॥ आहूता स्वामिना गच्छ सम्मानेन तदंतिकम् ॥ ६६ ॥ स्वामिनाकारिता पत्नी या न
याति तदंतिकम्॥सा तु ध्वांक्षी भवेत्पुत्रि जन्मानि दश पंच च॥६७॥एवमुक्त्वा समाश्वास्य मां गृहीत्वा त्वरान्विताः॥दोलामारोप्य गच्छेति प्रोचुःस्निग्धा
मुहुर्मुहुः ॥ ६८ ॥ ततस्ते पुरुषा दोलां निधायांसेषु सत्वरम् ॥ जग्मुर्महोदयपुरं यत्र तिष्ठति मे पतिः ॥ ६९ ॥ दृष्टं मया गृहं तस्य सर्वतः
कांचनावृतम् ॥ आसनीयैश्च भोज्यैश्च धनैर्वस्त्रैर्युतं ततः ॥ ७० ॥ अथ सा राक्षसी देवी सा चापि नृपनंदिनी ॥ प्रीत्या च भक्त्या कुरुतां प्रणतिं
मम सुन्दरि ॥ ७१ ॥ ततस्ताभ्यामहं प्रेम्णा यथार्हमभिपूजिता ॥ भर्तृवाक्येन संप्रीता स्नात्वाभुंजं तथादृता ॥७२ ॥ ततोऽस्तसमयात्पश्चाद्भर्ता
चाहूय सत्वरम् ॥ परिष्वज्य चिरं दोर्भ्यां पर्यंके संन्यवेशयत् ॥ ७३॥ ततो निशाचरीं राजपुत्रीं चाहूय सोऽब्रवीत् ॥ भक्त्या युवाभ्यां कर्तव्यम
स्याश्चरणसेवनम् ॥ ७४ ॥ इयं प्राक्कालिकी भार्या ज्येष्ठा च युवयोर्ध्रुवम् ॥ पत्युर्वाक्यात्ततस्ताभ्यां गृहीतौ चरणौ मम॥७५॥ सापत्नभावजामी
र्ष्यां परित्यज्य सुलोचने ॥ ततः प्रेष्यान्समाहूय भर्ता मे वाक्यमब्रवीत् ॥ ७६ ॥ यत्किंचिद्रक्षसः पार्श्वान्मया प्राप्तं पुरा वसु ॥ सुतासुद्धहतो
राज्ञो यच्च लब्धं मयाखिलम् ॥ ७७ ॥तत्सर्वं भक्तिभावेन समानयत मा चिरम् ॥ इयं हि स्वामिनी प्राप्ता तस्य वित्तस्य किंकराः ॥७८ ॥ तद्वाक्या
त्सहसा प्रेष्यैः समानीतं धनं शुभे ॥ भर्ता समर्पयामास प्रीत्या युक्तोऽखिलं तदा ॥ ७९ ॥ सत्कृत्य भूषणैर्वस्त्रैरव्यलीकेन चेतसा ॥ उभयोस्तत्र
पश्यंत्यो राक्षसीराजकन्ययोः ॥ ८० ॥ पर्यंकस्थां परिष्वज्य मां चुचुंबाधरे शुभे ॥ तद्दृष्ट्वा चाद्भुतं भर्तुर्देहवित्तसमर्पणम् ॥ ८१ ॥ उल्लासकरण

वाक्यं करेण कुचपीडनम् ॥ छिन्ना गौरिव खड्गेन गताः प्राणा ममाभवन् ॥ ८२ ॥ ततोऽहं यमनिर्दिष्टां प्राप्ता नरकयातनाम् ॥तामतीत्य सुदुः
खार्ता काष्ठीला चाभवं शुभे॥८३॥यास्यामि पुनरेवाहं तिर्यग्योनिं सहस्रशः ॥ या भर्तुर्नापयेद्वित्तं जीवितं च शुभानने॥८४॥सापीदृशीमवस्था
वै यास्यत्येव न संशयः॥ एवं ज्ञात्वानिशं रक्षेत्पत्युर्वित्तं च जीवितम्॥८५॥पतिर्माता पिता वित्तं जीवितं च गुरुर्गतिः ॥ ८६ ॥ प्रयाति नारी
वहुभिः सुपुण्यैः सहैव भर्त्रा स्वशरीरदाहात्॥ विष्णोः पदं वित्तशरीरलुब्धा प्रयाति यामीं च कुयोनिपीडाम्॥८७॥इति श्रीबृहन्नारदीयपुराणोत्तर
भागे मोहिनीचरिते काष्ठीलाचरितं नाम त्रिंशत्तमोऽध्यायः॥३०॥वसिष्ठ उवाच ॥ तच्छ्रुत्वा वचनं तस्याः काष्ठीलायाः शुचिस्मिते ॥सन्ध्यावली
नाम भृशं तामुवाच ह सादरम् ॥१॥ त्यद्वाक्याद्विस्मयो जातः काष्ठीले सांप्रतं मम ॥ कथं दृष्टा मया त्वं च यास्यंती कुत्सितां गतिम् ॥ २ ॥
कर्मणा केन ते मुक्तिर्भवेत्कुत्सितयोनितः॥ तन्मे वद विशालांगे त्वां दृष्ट्वा दुःखिता ह्यहम् ॥३ ॥ मांसपिंडोपमं श्लक्ष्णं नवनीतोपमं शुभे ॥ शरीरं
तव संवीक्ष्य दया मे जायते हृदि ॥ ४ ॥ काष्ठीलोवाच ॥ पृथिवीं दास्यसे सुभ्रु सकलामपि मत्कृते ॥ तथापि नैव मुच्येयं सद्यः कुत्सितयोनितः
॥ ५ ॥ येन पुण्येन सुभगे मुच्येयं कर्मबन्धनात् ॥ तन्निर्दिशामि सुमहद्भुतिदं त्वं निशामय ॥ ६ ॥ यश्चायं माघमासस्तु सर्वमासोत्तमः स्मृतः॥
यस्मिन् क्रोशति पापानि ब्रह्महत्यादिकानि च ॥७॥ दुर्लभो माघमासो वै दुर्लभं जन्म मानुषम्॥ दुर्लभं चोषसि स्नानं दुर्लभं कृष्णसेवनम्॥८॥
दुर्लभो वासरो विष्णोर्विधिना समुपोषितः ॥ देवैस्तेजः परिक्षिप्तं माघमासे स्वकं जले ॥९ ॥ तस्माज्जलं माघमासे पावनं हि विशेषतः ॥ नेदृशी
संगरे शूरैर्गतिः प्राप्येत सौख्यदा ॥ १० ॥ यादृशी प्लवने प्रातः प्राप्यते नियमस्थितैः ॥ सरित्तडागवापीषु स्नाने सत्तममीरितम् ॥११॥ कूपभांड
जलैर्मध्यं जघन्यं वह्नितापितैः ॥ न सौख्यैर्लभ्यते पुण्यं दुःखैरेवाप्यते तु तत् ॥१२॥ धर्म्मसेवार्थकं स्नानं नांगनैर्मल्यहेतुकम् ॥ होमार्थं सेवनं वह्ने
र्न च शीतादिहानये ॥१३॥ यावन्नोदयते सूर्यस्तावत्स्नानं विधीयते ॥आच्छादिते घनैर्व्योम्नि ह्युद्गमिष्यन्तमर्थयेत् ॥ १४ ॥ अभावे सरिदादीनां
नवकुंभस्थितं जलम् ॥ वायुना ताडितं रात्रौ स्नाने गंगासमं विदुः ॥१५॥ माघस्नायी वरारोहे दुर्गतिं नैव पश्यति ॥ तन्नास्ति पातकं यत्तु माघ
स्नानं न शोधयेत् ॥ १६ ॥ अग्निप्रवेशादधिकं माघोषस्येव मज्जनम् ॥ जीवता भुज्यते दुःखं मृतेन बहुलं सुखम् ॥ १७ ॥ एतस्मात्कारणाद्भद्रे
माघस्नानं विशिष्यते ॥ अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः ॥ १८॥मेघपुष्पोपपन्नेन सहान्नेन सुमध्यमे ॥ यावकैश्चैव होतव्या गव्य
सर्पिःसमन्वितैः ॥ १९ ॥ माघ्यां स्नानसमाप्तौ तु दद्याद्विप्राय षड्रसम्॥ सूर्यो मे प्रीयतां देवो विष्णुमूर्तिर्निरञ्जनः॥२० ॥ वासांसि द्विजयुग्माय स

सप्तान्नानि चार्पयेत् ॥ त्रिंशच्च मोदका देयास्तिलान्नाः शर्करामयाः॥२१॥भागास्त्रयस्तिलानां तु चतुर्थः शर्करांशकः॥तांबूलादीनि भोग्यानि भक्त्या दद्याद्विधानवित् ॥ २२ ॥ स्रोतोमुखः सरिति चान्यत्र भास्करसंमुखः ॥स्नायादावाह्य तीर्थानि गंगादीन्य कर्मण्डलात् ॥ २३॥ यदनेकजनुर्जन्यं यज्ज्ञानाज्ञानतः कृतम् ॥ त्वत्तेजसा हतं चास्तु तत्तु पापं सहस्रधा ॥ २४ ॥दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते ॥ परिपूर्णं कुरुष्वेदं माघस्नानं ममाच्युत ॥ २५ ॥ तीर्थस्नायी वरारोहे माघस्नायी फलाल्पकः ॥ तीर्थस्नानादियात्स्वर्गं माघस्नानात्परं पदम् ॥ २६ ॥ माघस्य धवले पक्षे भवेदेकादशी तु या ॥ रविवारेण संयुक्ता महापातकनाशिनी ॥२७॥ विनापि ऋक्षसंयोगं सा शुक्लैकादशी नृणाम् ॥ विनिर्दहति पापानि कुनृपो विषयं यथा॥२८॥कुपुत्रस्तु कुलं यद्वत्कुभार्या च पतिं यथा॥ अधर्मस्तु यथा धर्मं कुमंत्री नृपतिं यथा॥२९॥अज्ञानं च यथा ज्ञानं कुशौचं शुचितां यथा॥यथा हंत्यनृतं सत्यं वादस्संवादमेव च॥३०॥उष्णं हिममनर्थोऽर्थं पापं कीर्तिं स्मयस्तपः॥यथा रसा महारोगाञ्छ्राद्धं संकेत एव च॥३१॥तथा दुरितसंघं तु द्वादशी हंति साधिता ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ ३२ ॥ महान्ति पातकान्येतान्याशु हन्ति हरेर्दिनम् ॥ समवेतानि चैतानि न शामयति पुष्करम् ॥ ३३ ॥ न चापि नैमिषारण्यं न क्षेत्रं कुरुसंज्ञितम् ॥ प्रभासो न गया देवि न रेवा न सरस्वती ॥३४ ॥ न गंगा यमुना चैव प्रयागो न च देविका ॥ न सरांसि नदाश्चान्ये होमदानतपांसि च ॥ ३५ ॥ न चान्यत्सुकृतं सुभ्रु पुराणे पठ्यते स्फुटम् ॥ पापसंघविनाशाय शुक्लैकं हरिवासरम् ॥ ॥ ३६ ॥ उपोषणात्सकृद्देवि विनश्यंत्यघराशयः ॥ एकतः पृथिवीदानमेकतो हरिवासरम् ॥ ३७ ॥ न समं ब्रह्मणा प्रोक्तमधिकं हरिवासरम् ॥ तस्मिन्वराहवपुषं कृत्वा देवं तु हाटकम् ॥ ३८ ॥ घटोपरि नवे पात्रे धृत्वा ताम्रमये शुभे ॥ सर्वबीजान्विते चैव सितवस्त्रावगुंठिते ॥ ३९ ॥ सहिरण्ये सुदीपाढ्ये कृतपुष्पावतंसके ॥ विधिना पूजयित्वा च कुर्याज्जागरणं व्रती ॥४० ॥ प्रातर्विप्राय दद्याच्च वैष्णवाय कुटुंबिने ॥ तत्कुंभक्रोडसंयुक्तं सनैवेद्यपरिच्छदम् ॥४१ ॥ पश्चाच्च पारणं कुर्याद्द्विजान्भोज्य सुहृद्वृतः ॥ एवं कृते वरारोहे न भूयो जायते क्वचित् ॥ ४२ ॥ बहुजन्मार्ज्जितं पापं ज्ञानाज्ञानकृतं च यत् ॥ तत्सर्वं नाशमायाति तमः सूर्योदये यथा ॥ ४३॥ यथाशास्त्रं मया तुभ्यं वर्णिता द्वादशी शुभे॥या सा कृता त्वया पूर्वमासीद्देव्यन्यजन्मनि॥४४॥यस्यास्तवातुला पुष्टिर्वर्तते वर्तयिष्यति ॥ भर्त्तुस्तव च पुत्रस्य सर्वदा सुखदायिनी॥४५॥तस्यास्त्वया तुरीयांशो देयश्चेन्मह्यमादरात्॥तदा प्रीता गमिष्यामि तद्विष्णोः परमं पदम्॥४६॥वित्ताहुतिजं पापं यद्भूतं मम सुंदरि॥तस्य पावनहेतुं च तुरीयांशं प्रयच्छ मे॥४७॥जीवितेनापि वित्तेन भर्तारं वंचयेत्तु या॥कृमियोनिशतं गत्वा पुल्कसी जायते तु सा॥४८॥सुरतं याचमानाय

पत्ये वित्तं च मानिनि॥या न यच्छति दुर्बुद्धिः काष्ठीला जायते ध्रुवम्॥ ४९॥तत्पातकविशुद्ध्यर्थं देहि मे द्वादशीभवम् ॥ तुरीयांशमितं पुण्यं यद्यस्ति मयि ते घृणा॥५०॥एतच्छ्रुत्वा वचस्तस्याः काष्ठीलायाः सुलोचने॥पुण्यं दत्तवती तस्यै पाणौ वारि प्रगृह्य च॥५१॥यत्कृतं हि मया पूर्वमेकादश्यामुपोषणम्॥तत्तुरीयांशपुण्येन काष्ठीलेयं विमुच्यताम्॥५२॥पूर्वजन्मकृतात्पापात्सत्यं सत्यं मयोदितम्॥एवमुक्ते तु वचने मया विद्युत्समप्रभा॥५३॥ दृष्टा दिव्यविमानस्था गच्छंती वैष्णवं पदम् ॥ पतिर्हि दैवतं लोके वंचनीयो न भार्यया ॥५४॥ देहेन चापि वित्तेन यदीच्छेच्छोभनां गतिम्॥सा त्वं ब्रूहि प्रदास्यामि भर्तुरर्थे तवेप्सितम् ॥ ५५ ॥ वित्तं देहं तथा पुत्रं यच्चान्यद्वा वरानने ॥ किमन्यद्दैवतं लोके स्त्रीणामेकं पतिं विना॥५६॥ तस्यार्थे वा त्यजेद्वित्तं जीवितं वा सुलोचने ॥ कल्पकोटिशतं साग्रं विष्णुलोके महीयते ॥ ५७ ॥ अग्न्यादिसाक्ष्ये वृतमीक्ष्य निष्ठुरा युक्तं सुघोरैर्व्यसनैर्द्विजात्मजा॥पतिं ददौ नैव च याचिता धनं तेनैव पापेन बभूव कीटा ॥५८॥ एतन्मया दुष्टमनंगयष्टि कौमारभावे पितृवेश्मवासे॥ ज्ञात्वा हितं तथ्यमिदं स्वभर्तुर्ददामि सर्वं च गृहाण सुभ्रु ॥ ५९ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीचरिते काष्ठीलोपाख्याने माघमाहात्म्यं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥ वसिष्ठ उवाच ॥संध्यावलीवचः श्रुत्वा मोहिनी दुहिता विधेः ॥ उवाच तत्परा स्वीये कार्ये मोहकरंडिका ॥ १ ॥ यद्येवं त्वं विजानासि धर्माधर्मगतिं शुभे ॥ भर्तुरर्थे प्रदात्री च धनजीवितयोरपि ॥२॥तदाहं याचये वित्तं जीवितादधिकं शुभे॥देहि पुत्रशिरो मह्यं यदिष्टं हृदयाधिकम् ॥ ३ ॥ यदि नो भोजनं कुर्यात्संप्राप्ते हरिवासरे ॥ तदा स्वहस्ते संगृह्य खड्गं राजा पतिस्तव ॥ ४ ॥ धर्मांगदशिरश्चारु चंद्रबिंबोपमं शुभम् ॥ अजातश्मश्रुकं चैव कुंडलाभ्यां विभूषितम् ॥ ५ ॥ छित्वा शीघ्रं पातयतु ममोत्संगे सुलोचने ॥ एतद्वा कुरु तद्भद्रे यदान्नं न भुनक्ति च ॥ ६ ॥ दिने माधवदेवस्य पापसंघविनाशने ॥ तच्छ्रुत्वा वचनं तस्या मोहिन्याः कटुकाक्षरम् ॥ ७ ॥ प्रचकंपे क्षणं देवी शीतार्ता कदली यथा ॥ संध्यावली ततो धैर्यमास्थाय वरवार्णिनी ॥ ८ ॥ उवाच मोहिनीं वाक्यं सुमुखी प्रहसंत्यपि ॥ श्रूयंते हि पुराणेषु गाथाः सुभ्रु समीरिताः ॥ ९ ॥ द्वादशीं प्रति संबद्धाः स्वर्गमोक्षप्रदायिकाः ॥ धनं त्यजेत्त्यजेद्दाराञ्जीवितं च गृहं त्यजेत् ॥ १० ॥ त्यजेद्देशं तथा भूपं स्वर्गं मित्रं गुरुं त्यजेत् ॥त्यजेत्तीर्थं त्यजेद्धर्मं त्यजेदत्यंतसुप्रियम् ॥ ११ ॥ त्यजेद्योगं त्यजेद्दानं ज्ञानं पुण्यक्रिया त्यजेत् ॥ तपस्त्यजेत्त्यजेद्विद्यां सिद्धिं मोक्षं त्यजेच्छुभे ॥ १२ ॥ न त्यजेद्द्वादशीं पुण्यां पक्षयोरुभयोरपि ॥ इह संबंधिनः सर्वे पुत्रभ्रातृसुहृत्प्रियाः ॥ १३॥ ऐहिकामुष्मिके देवि साधनी द्वादशी स्मृता ॥ द्वादश्यास्तु प्रभावेण सर्वं क्षेमं भविष्यति ॥ १४ ॥ दापये तव तुष्ट्यर्थं धर्मांगदशिरः शुभे ॥

विश्वासं कुरु मे वाक्ये सुखिनी भव शोभने ॥ १९ ॥ इहार्थे श्रूयते भद्रे इतिहासः पुरातनः॥ कथयिष्यामि ते भद्रे सावधाना शृणुष्व मे॥१६॥ आसीद्विरोचनः पूर्वं दैत्यो धर्मपरायणः ॥ तस्य भार्या विशालाक्षी द्विजपूजनतत्परा ॥ १७ ॥ नित्यमेकमृषिं प्रातः पूजयित्वा यथाविधि ॥ पादोदकं तस्य सुभ्रु भक्त्या पिबति हृष्टधीः ॥ १८ ॥ प्राह्लादिशंकिता देवा आसन्पूर्वं मृते सति ॥ हिरण्यकशिपौ राज्यं शासति ह्युग्रतेजसि ॥१९ ॥ प्राह्लादौ ह्लादसंयुक्ते चेरुर्व्यग्रा महीतले ॥ एकदा शक्रमुख्यास्ते देवाः समंत्र्य वाक्पतिम् ॥ २० ॥ प्रोचुः किं कार्यमधुनास्माभिः शत्रु प्रतापितैः ॥ तच्छ्रुत्वा वचनं तेषां देवानां गुरुरब्रवीत् ॥ २१ ॥ विष्णुर्विज्ञापनीयोऽद्य दुःखं प्राप्तैः सुरव्रजैः ॥ तच्छ्रुत्वा भाषितं तस्य गुरोरमिततेजसः ॥ २२ ॥ विरोचनप्राणहत्यै जग्मुर्वैकुंठमंतिके ॥ तत्र गत्वा सुरश्रेष्ठ वैकुंठं तुष्टुवुः स्तवैः ॥ २३॥ देवा ऊचुः॥ नमो देवाधिदेवाय विष्णवेऽमिततेजसे ॥ भक्तविघ्नविनाशाय वैकुण्ठाय नमो नमः ॥ २४॥ हरयेऽद्भुतसिंहाय वामनाय महात्मने ॥ क्रोडरूपाय मत्स्याय प्रलयाब्धिनिवासिने ॥ २५ ॥ कूर्माय मन्दरधृते भार्गवायाब्धिशायिने ॥ रामायाखिलनाथाय विश्वेशाय च साक्षिणे ॥ २६ ॥ दत्तात्रेयाय शुद्धाय कपिलायार्तिहारिणे ॥ यज्ञाय धृतधर्माय सनकादिस्वरूपिणे ॥ २७ ॥ ध्रुवस्य वरदात्रे च पृथवे भूरिकर्मणे ॥ ऋषभाय विशुद्धाय हयशीर्षभृतात्मने ॥ २८ ॥ हंसायागमरूपायामृतकुम्भविधारिणे ॥ कृष्णाय वासुदेवाय संकर्षणवपुर्धृते ॥ २९ ॥ प्रद्युम्नायानिरुद्धाय ब्रह्मणे शंकराय च ॥ कुमाराय गणेशाय नन्दिने भृंगिणे नमः ॥३० ॥ गन्धमादनवासाय नरनारायणाय च ॥ जगन्नाथाय नाथाय नमो रामेश्वराय च ॥३१॥ द्वारकावासिने चैव तुलसीवनवासिने ॥ नमः कमलनाभाय नमस्ते पंकजांघ्रये ॥३२॥ नमः कमलहस्ताय कमलाक्षाय ते नमः ॥ कमलाप्रतिपालाय केशवाय नमो नमः ॥ ३३ ॥ नमो भास्कररूपाय शशिरूपधराय च ॥ लोकपालस्वरूपाय प्रजापतिवपुर्धृते ॥ ३४ ॥ भूतग्रामस्वरूपाय जीवरूपाय तेजसे ॥ जयाय जयिने नेत्रे नियमाय क्रियात्मने ॥३५ ॥ निर्गुणाय निरीहाय नीतिज्ञायाक्रियात्मने ॥ बुद्धाय कल्किरूपाय क्षेत्रज्ञायाक्षराय च ॥३६॥गोविंदाय जगद्भर्त्रेऽनन्तायाद्याय शार्ङ्गिणे ॥ शंखिने गदिने चैव नमश्चक्रधराय च ॥३७॥खड्गिने शूलिने चैव सर्वशस्त्रास्त्रघातिने॥शरण्याय वरेण्याय पराय परमात्मने॥३८ ॥ हृषीकेशाय विश्वाय विश्वरूपाय ते नमः॥कालनाभाय कालाय शशिसूर्य्यदृशे नमः॥पूर्णाय परिसेव्याय परात्परतराय च ॥३९॥ जगत्कर्त्रे जगद्भर्त्रे जगद्धात्रेऽतकाय च॥मोहिने क्षोभिणे कामरूपिणेऽजाय सूरिणे॥४०॥भगवंस्तव संप्राप्ताः शरणं दैत्यतापिताः॥तद्विधत्स्वाखिलाधार स्था हि सुखिनो वयम्॥४१॥ पुत्रमित्रकलत्रादिसंयुता विहरामहे ॥ तच्छ्रुत्वा स्तवनं तेषां वैकुंठः प्रीतमानसः ॥ ४२ ॥ प्रददौ दर्शनं तेषां दैत्यसं

संतापितात्मनाम् ॥ ते दृष्ट्वा देवदेवेशं वैकुंठं स्निग्धमानसम् ॥ ४३ ॥ विरोचनवधायाशु प्रार्थयामासुरादरात् ॥ तच्छ्रुत्वा शक्रमुख्यानां कार्यं कार्यविदां वरः ॥ ४४ ॥ समाश्वास्य सुरान्प्रीत्या विससर्ज मुदान्वितान् ॥ गतेषु देववर्गेषु सर्वोपायविदांवरः ॥ ४५ ॥ वृद्धब्राह्मणरूपेण विरोचनगृहं ययौ ॥ द्विजपूजनकाले तु संप्राप्तः कार्यसाधकः ॥ ४६ ॥ तं तु दृष्ट्वा विशालाक्षी ब्राह्मणं हृष्टमानसा ॥ अपूर्वं भक्तिभावेन ददौ सत्कृत्य चासनम् ॥ ४७ ॥ सोऽनंगीकृत्य तद्दत्तमासनं प्राह तां शुभे ॥ नाहं समाददे देवि त्वद्दत्तं परमासनम् ॥ ४८ ॥ शृणु मे कार्यमतुलं यदर्थमहमागतः ॥ यन्मे मनोगतं कार्यं तद्विज्ञाय च मानिनि ॥ ४९ ॥ योंऽगीकरोति तत्पूजां ग्रहीष्यामि वरानने ॥ तच्छ्रुत्वा वृद्धविप्रस्य वाक्यं वाक्यविशारदा ॥ ५० ॥ मायया मोहिता विष्णोः स्त्रीत्वाद्बाहातिहर्षिता ॥ विशालाक्ष्युवाच ॥ यत्ते मनोगतं विप्र तद्दास्यामि गृहाण मे ॥ ५१ ॥ आसनं पादसलिलं देहि मे वांछितार्थदम् ॥ इत्युक्तः स द्विजः प्राह न प्रत्येमि स्त्रिया वचः ॥ ५२ ॥ तव भर्ता यदि वदेत्तदा मे प्रत्ययो भवेत् ॥ तदाकर्ण्य द्विजेनोक्तं विरोचनगृहेश्वरी ॥ ५३ ॥ पतिमाकारयामास तत्रैव द्विजसन्निधौ ॥ स प्राप्तो दूतवाक्येन प्राह्लादिर्हृष्टमानसः ॥ ५४ ॥ अंतःपुरं यत्र भार्या विशालाक्षी समास्थिता ॥ तमागतं समालोक्य पतिं धर्मपरायणा ॥ ५५ ॥ उत्थाय नत्वा विप्राग्र्यमासनं पुनरर्पयत् ॥ यदा तु जगृहे नैव दत्तमासनमादरात् ॥ ५६ ॥ राजानं कथयामास दैत्यानां पतिमात्मनः ॥ तद्वृत्तांतमुपाज्ञाय दैत्यराट् स विरोचनः ॥ ५७ ॥ भार्यास्नेहेन मुग्धात्मा तत्तदांगीचकार ह ॥ अंगीकृते तु दैत्येन तद्विज्ञाय च मानसम् ॥ ५८ ॥ उवाच ब्राह्मणो हृष्टः स्वमायुर्मम कल्पय ॥ ततस्तु दंपती तत्र मुग्धौ स्वकृतया शुचा ॥ ५९ ॥ मुहूर्तं ध्यानमास्थाय करौ बद्धोचतुर्द्विजम् ॥ गृहाण जीवितं विप्र देहि पादोदकं मम ॥ ६० ॥ त्वयोक्तं वचनं सत्यं कुर्वः प्रीतिमवाप्नुहि ॥ ततस्तु विप्रः प्रोतात्मा तदंगीकृत्य चासनम् ॥ ६१ ॥ पादोदकं ददौ तस्यै भक्त्या प्रीतो जनार्दनः ॥ प्रक्षाल्य पादौ विप्रस्य विशालाक्षी मुदान्विता॥६२॥पत्या सह दधौ मूर्ध्नि अपः पादावनेजनीः ॥ततस्तु सहसा मुक्तु दंपती दिव्यरूपिणौ ॥ ६३ ॥ विमानवरमारुह्य जग्मतुर्वैष्णवं पदम्॥ततः प्रसन्नो भगवान् देवशल्यं विमोच्य सः ॥ ६४ ॥ ययौ वैकुंठभवनं सर्वैर्देवगणैः स्तुतः ॥ एवं मयापि दातव्यं तव देवि प्रतिश्रुतम् ॥ ६५ ॥ न सत्याच्चालये देवि पतिं रुक्मांगदाभिधम् ॥ सत्यमेव मनुष्याणां गतिदं परिकीर्तितम् ॥ ६६ ॥ सत्याच्च्युतं मनुष्यं हि श्वपाकादधमं विदुः ॥ ६७ ॥ इत्येवमुक्त्वा कनकावदाता सा मोहिनीं पंकजजन्मजाताम् ॥ जग्राह भर्तुश्चरणौ सुताम्रौ रक्तांगुली पाणियुगेन सुभ्रूः ॥६८॥इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीचरिते

संध्यावलीकथनं नाम द्वात्रिंशत्तमोऽध्यायः ॥ ३२ ॥ वसिष्ठ उवाच ॥ संध्यावली ततः पादौ भर्तुः संगृह्य भूपते ॥ उवाच वचनं देवी धर्मां
गदविनाशनम् ॥ १ ॥ बहुधाप्यनुशिष्टेयं मया भूप यथा त्वया ॥ मोहिन्या मोहरूपाया नान्यत्संरोचतेऽधुना ॥२ ॥ भोजनं वासरे विष्णोर्वधं
वा तनयस्य वै ॥ धर्मत्यागाद्वरं नाथ पुत्रस्य विनिपातनम् ॥ ३ ॥ यादृशी हि जनन्यास्तु पीडा भवति भूपते ॥ पुत्रस्योत्पादने तीव्रा
तादृशी न भवेत्पितुः ॥ ४ ॥ गर्भसंधारणे राजन् खेदः स्नेहोऽधिको यथा॥मातुर्भवति भूपाल तथा नहि भवेत्पितुः ॥ ५ ॥ बीजनिर्वापकः प्रोक्तः
पिता राजेंद्र भूतले ॥ जननी धारिणी क्लिष्टा वर्द्धने पालनेऽधिका ॥ ६ ॥ पितुः शतगुणः स्नेहो मातुः पुत्रे प्रवर्तते ॥ स्नेहाधिक्यं तु संप्रेक्ष्य
मातरं महतीं विदुः ॥ ७ ॥ साहं जाता गतस्नेहा परलोकजिगीषया ॥ पुत्रस्य नृपशार्दूल सत्यवाक्यस्य पालनात्॥८॥ व्यापादय सुतं भूप स्नेहं
त्यक्त्वा सुदूरतः ॥ मा सत्यलंघनं कार्षीः शापितोऽसि मयात्मना ॥ ९ ॥निकषेषु हृषीकेशो भविष्यति फलप्रदः ॥ यस्मिंश्चीर्णे रुजा देहे नाल्पापि
नृप जायते ॥ १० ॥ अधर्मान्मानवोऽवश्यं स्वर्गभ्रष्टो न संशयः ॥ प्राणानादाय पुत्रं वा सर्वस्वं वा महीपते ॥ ११ ॥ यश्चानुवर्तते दैवं स
पुमान् गीयते महान् ॥ ता आपदोऽपि भूपाल धन्या याः सत्यकारिकाः ॥ १२ ॥ सत्यसंरक्षणार्थत्वान्नृणां स्युर्मोक्षदायिकाः ॥ कीर्तिसंस्तरणा
र्थाय कर्तव्यं मनुजैः सदा ॥ १३ ॥ कर्म भूपाल शास्त्रोक्तं स्नेहद्वेषविवर्जितम् ॥ तदलं परितापेन सत्यं पालय भूपते ॥ १४ ॥ सत्यस्य पालना
द्राजन्विष्णुदेहेन युज्यते ॥ देवैरुत्पादिता ह्येषा निकषा ते विमोहिनी ॥ १५ ॥ मन्ये भूपाल सा पत्न्या कृता तां त्वं न बुध्यसे ॥ पुत्रव्य
पादनाद्देवा भविष्यंति ह्यवाङ्मुखाः ॥ १६ ॥ तेषां दत्वा पदं मूर्ध्नि यास्यसे परमं पदम् ॥ विष्णोरुद्वहतां भक्तिं देवताः परिपंथिनः
॥ १७ ॥ भविष्यत्यंधता लोके तदेव प्रकटीकृतम् ॥ विरुद्धा विबुधा भूप सेश्वरास्तव चेष्टितैः ॥ १८ ॥ मोक्षमार्गप्रभेत्तारस्तव निश्चया
लोपकाः ॥ स त्वं भूप दृढो भूत्वा घातयस्व सुतं प्रियम् ॥ १९ ॥ मोहिन्याः कुरु वाक्यं तु आत्मनः सत्यपालनात् ॥ २० ॥ लुप्तेऽपि वाक्ये
भविता नृपेश पापं समं ब्रह्मवधेन घोरम् ॥ गंतासि लोके शमनस्य भूप यशःप्रणाशो भविता धरायाम् ॥ २१ ॥ वसिष्ठ उवाच ॥ भार्याया
वचनं श्रुत्वा राजा रुक्मांगदस्तदा ॥ संध्यावलीमुवाचेदं मोहिन्याः सन्निधौ नृप ॥ २२ ॥ पुत्रहत्या महाहत्या ब्रह्महत्याधिका प्रिये ॥ घातयित्वा
सुतं लोके का गतिर्मे भविष्यति ॥ २३ ॥ क्व गतो मंदरं शैलं क्व प्राप्ता मोहिनी मया ॥ धर्मांगदविनाशाय देवि कालप्रिया त्वियम् ॥ २४ ॥
धर्मज्ञं विनयोपेतं प्रजारंजनकारकम् ॥ अग्रजं च सुतं हत्वा का गतिर्मे भविष्यति ॥२५॥कुपुत्रस्यापि हननाद्देवि दुःखं भवेत्पितुः ॥ २६ ॥ किं

पुनर्द्धर्मशीलस्य गुरुसेवाविधायिनः ॥ जम्बूद्वीपमिदं भुक्तं मया तु वरवर्णिनि ॥ २७ ॥ द्वीपानि सप्त भुक्तानि तनयेन तवाधुना ॥ विष्णोरंशो वरा
रोहे पितुरप्यधिको भवेत् ॥ २८ ॥ पुराणेषु वरारोहे कविभिः परिकीर्तितः ॥ योऽयमत्यधिकः पुत्रो धर्मांगद इति क्षितौ ॥ २९ ॥ मम वंशस्य
चार्वंगि किं पुनर्मम मानदः ॥ अहो दुःखमनुप्राप्तं पुत्रादप्यधिकं मया ॥३०॥ पुनरेव वरारोहे ब्रूहि त्वं वचनैः शुभैः ॥ मोहिनीं मोहसंप्राप्तां मम
दुःखप्रदायिनीम् ॥ ३१ ॥ एवमुक्त्वा तु नृपतिः प्रियां सन्ध्यावलीं तदा ॥ समीपमागत्य नृपो मोहिनीमिदमब्रवीत् ॥ ३२ ॥ न भोक्ष्ये वासरे
विष्णोर्न हिंस्ये तनयं शुभे ॥ आत्मानं दारयिष्यामि देवीं सन्ध्यावलीं तथा ॥३३॥ अन्यद्वा दारुणं कर्म करोमि तव शासनात् ॥ दुष्टाग्रहमिमं
सुभ्रु परित्यज सुतं प्रति ॥ ३४ ॥ किं फलं भविता तुभ्यं हत्वा धर्मांगदं सुतम् ॥ भोजयित्वा दिने विष्णोः को लाभो भविता वद ॥ ३५ ॥
दासोऽस्मि तव भृत्योऽस्मि वशगोऽस्मि वरानने ॥ अन्यं याचस्व सुभगे वरं त्वां शरणं गतः ॥ ३६ ॥ रक्ताशोकसमानाभ्यां तव चार्वंगि
सर्वशः ॥ अन्यत्प्रयोजनं किंचित्कर्त्ताऽस्मि वशगस्तव ॥ ३७ ॥ प्रसादं कुरु मे देवि पुत्रभिक्षां प्रयच्छ मे ॥ दुर्लभो गुणवान्पुत्रो दुर्लभो
हरिवासरः ॥ ३८ ॥ दुर्लभं जाह्नवीतोयं दुर्लभा जननी क्षितौ ॥ दुर्लभं हि कुले जन्म दुर्लभा वंशजा प्रिया ॥ ३९ ॥ दुर्लभं कांचनं
दानं दुर्लभं हरिपूजनम् ॥ दुर्लभा वैष्णवी दीक्षा दुर्लभः स्मृतिसंग्रहः ॥ ४० ॥ दुर्लभः शौकरे वासो दुर्लभं हरिचिन्तनम् ॥ दुर्लभो जागरो
विष्णोर्दुर्लभा ह्यात्मसत्क्रिया ॥ ४१ ॥ दुर्लभा पुत्रसंप्राप्तिर्दुर्लभं पौष्करं जलम् ॥ दुर्लभः शिष्टसंसर्गो दुर्लभा भक्तिरुच्यते ॥ ४२ ॥ दुर्लभं
कपिलादानं दुर्लभं नीलमोक्षणम् ॥ कृतं श्राद्धं त्रयोदश्यां दुर्लभं वरवर्णिनि ॥ ४३ ॥ दुर्लभा वसुधा चीर्णं व्रतं पातकनाशनम् ॥ धेनुस्तिलमयी
सुभ्रु दुर्लभा विप्रगामिनी ॥ ४४ ॥ धात्रीस्नानं वरारोहे दुर्लभो हरिवासरः ॥ दुर्लभं पर्वकाले तु स्नानं शीतलवारिणा ॥ ४५ ॥ माघमासे विशे
षेण प्रत्यूषसमये शुभे ॥ यथाशास्त्रोदितं कर्म तद्देवि भुवि दुर्लभम् ॥ ४६ ॥ दुर्लभं कुशलं पथ्यं दुर्लभं चौषधं तथा ॥ व्याधेर्विघातकरणं दुर्लभं
शास्त्रमार्गतः ॥ ४७ ॥ दुर्लभं स्मरणं विष्णोर्मरणे वरवर्णिनि ॥ एवं वचो वरारोहे कुरु मे धर्मरक्षकम् ॥ ४८ ॥ किं वधेनैव चार्वंगि प्रसादं कर्तु
मर्हसि ॥ सेविता विषयाः सम्यक्कृतं राज्यमकंटकम् ॥ ४९ ॥ मया मूर्ध्नि पदं दत्तं देवगोविप्ररक्षिणाम् ॥ अदृष्टविषयं पुत्रं नाहं हिंस्ये कदाचन
॥ ५० ॥ स्वहस्तेनेह चार्वंगि किं नु पापमतः परम् ॥ मोहिन्युवाच ॥ धर्मांगदो न मे शत्रुर्नाहं हन्मि सुतं तव ॥ ५१ ॥ पूर्वमेव मया प्रोक्तं भुंक्ष्व
त्वं हरिवासरे ॥ वसुधां स्वेच्छया राजंस्त्वं शाधि बहुवत्सरम् ॥ ५२ ॥ नाहं व्यापादये पुत्रमर्थसिद्धिस्तु भोजने ॥ मम भूमिपते कार्यं न पुत्रनिधने

तव ॥५३॥ यदि पुत्रः प्रियो राजन्भुज्यतां हरिवासरे ॥ किं विलापैर्महीपाल एतैर्द्धर्मबहिष्कृतैः ॥५४॥ सत्यं संरक्ष यत्नेन कुरुष्व वचनं मम ॥ एवं
ब्रुवाणां तां राजन्मोहिनीं तनुमध्यमाम्॥५५॥धर्मांगदः प्रत्युवाच दृष्ट्वा नत्वाग्रतः स्थितः॥एतदेव गृहाण त्वं मा शंकां कुरु भामिनि ॥५६॥ गृहीत्वा
निर्मलं खड्गं विन्यस्य नृपतेः पुरः ॥ आत्मानं च प्रत्युवाच सत्यधर्मव्यवस्थितः॥५७॥न विलंबः पितः कार्यस्त्वया मम निपातने॥ मन्मातुर्वचनं
सत्यं कुरु भूप प्रतिश्रुतम्॥५८॥आत्मा रक्ष्यो धनैर्दारैरथवापि निजात्मजैः॥अपत्यं धर्मकामार्थं श्रेयस्कामस्य भूपतेः॥५९॥त्वदर्थे मरणं मह्यमक्षय्य
गतिदायकम् ॥ तवापि निर्मला लोकाः स्ववाक्यपरिपालनात् ॥ ६० ॥ परित्यज्य परं दुःखं पुत्रव्यापादनोद्भवम् ॥ देहत्यागे ममारंभो नरदेहे
भविष्यति ॥ ६१ ॥ सर्वामयविनिर्मुक्ते शतक्रतुसमे विभो ॥ पितुरर्थे हता ये तु मातुरर्थे हतास्तथा ॥ ६२ ॥ गवार्थे ब्राह्मणार्थे वा प्रमदार्थे मही
पते ॥ भूम्यर्थे पार्थिवार्थे वा देवतार्थे तथैव च ॥ ६३ ॥ बालार्थे विकलार्थे च यांति लोकान्सुभास्वरान् ॥ तदलं परितापेन जहि मां त्वं
वरासिना ॥ ६४ ॥ सत्यं पालय राजेंद्र मा भुंक्ष्व हरिवासरे ॥ धर्मार्थे तनयं हन्याद्भार्यां वापि महीपते ॥ ६५ ॥ श्रूयते वेदवाक्येषु पुत्रं हन्या
न्मखस्थितः ॥ अश्वमेधे मखवरे न दोषो जायते नृप ॥ ६६ ॥ यद्ब्रवीति महीपाल मोहिनी जननी मम ॥ तत्त्वया ह्यविचारेण कर्त्तव्यं वचनं
ध्रुवम् ॥ ६७ ॥ प्रसीद राजेंद्र कुरुष्व वाक्यं मयेरितं चात्मवधाय सत्यम् ॥ विमोचयेथा नृपते सुघोराद्वाक्यानृतान्मोहिनिहस्तयोगात् ॥ ६८ ॥
वधेन ते भूमिपते सुतस्य यशः प्रकाशं गमयिष्यते च ॥ यशःप्रकाशाद्भविता हि कीर्तिस्तथाक्षया तात न संशयोऽत्र ॥ ६९ ॥ इति श्रीबृहन्नारदीय
पुराणोत्तरभागे मोहिनीचरिते धर्मांगदोक्तिर्नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ वसिष्ठ उवाच॥तत्पुत्रवचनं श्रुत्वा राजा रुक्मांगदस्तदा ॥ संध्यावली
मुखं प्रेक्ष्य प्रहृष्टकमलोपमम् ॥ १ ॥ मोहिनीवचनं शृण्वन्भुंक्ष्व मा हन देहजम् ॥ मा भुंक्ष्व तनयं हिंस चेत्याग्रहसमन्वितम् ॥ २ ॥
एतस्मिन्नेव काले तु भगवान्कमलेक्षणः ॥ अंतर्द्धानगतस्तस्थौ व्योम्नि धैर्यावलोककः ॥३॥ त्रयाणां नृपशार्दूल मेघश्यामो निरञ्जनः ॥ धर्मांगदस्य
वीरस्य तस्य रुक्मांगदस्य तु ॥ ४ ॥ संध्यावल्या समेतस्य वीक्षन्संस्थो जनार्दनः ॥ वचने भुंक्ष्व भुंक्ष्वेति मोहिन्या व्याहृते तदा ॥ ५ ॥
जग्राह विमलं खड्गं हंतुं धर्मांगदं सुतम् ॥ सुप्रहर्षेण मनसा प्रणम्य गरुडध्वजम् ॥ तं दृष्ट्वा खड्गहस्तं तु पितरं धर्म्मभूषणः ॥ ६ ॥
प्रणम्य मातापितरौ देवं चक्रधरं तथा ॥ वदनं प्रेक्ष्य चादीनं जनन्या नृपपुंगवः ॥ ७ ॥ वृषांगदेन तु तदा स्वग्रीवोर्वीतले कृता ॥ कंबुग्रीवां समानां
तु सुवर्णाभां सुकोमलाम् ॥ ८ ॥ बहुरेखामथ स्थूलां खड्गमार्गे न्यदर्शयत् ॥ पितृभक्त्या युतेनैव मातृभक्त्याधिकेन वै ॥ ९ ॥ ग्रीवाप्रदाने तनयस्य

भूप हर्षाकुले चारुसुधांशुवक्त्रे ॥ गृहीतखड्गे जगदीशनाथे चचाल पृथ्वी सनगा समग्रा ॥ १० ॥ सिंधुः प्रवृद्धश्च बभूव सद्यो निमज्जनार्थं भुवनत्रयस्य ॥ निपेतुरुल्काः शतशो धरायां निर्घातयुक्ताः सतडित्खमध्यात् ॥ ११ ॥ विवर्णरूपा च बभूव मोहिनी न देवकार्यं हि कृतं मयेति ॥ निरर्थकं जन्म ममाधुनाभूत्कृतं तु दैवेन जगद्विधायिना ॥ १२ ॥ विमोहनं रूपमिदं विडंबनं यद्भूमिपालेन न भुक्तमन्नम् ॥ हरेर्दिने पापभयापहे तु तृणैः समाहं भविता त्रिविष्टपे ॥ १३ ॥ सत्वाधिको यास्यति मोक्षमार्गं गंतास्मि पापा नरकं सुदारुणम् ॥ १४ ॥ समुद्यते तदा खड्गे नृपेण नृपपुंगव ॥ मोहिनी मोहसंयुक्ता पपात धरणीतले ॥ १५ ॥ राजापि तेन खड्गेन भ्राजमानः समुद्यतः ॥ ग्रीवायाश्छेदनार्थाय नृपांगदसुतस्य तु ॥ १६ ॥ सकुंडलं चारु शशिप्रकाशं भ्राजिष्णु वक्त्रं तनयस्य भूपः ॥ प्रचिच्छिदे यावदतीव हर्षाद्धैर्यान्वितो रुक्मविभूषणोऽसौ ॥ १७॥ तावद्गृहीतः स्वकरेण भूपः क्षीराब्धिकन्यापतिना महीपः ॥ तुष्टोऽस्मि तुष्टोऽस्मि न संशयोऽत्र गच्छस्व लोकं मम लोकनाथ ॥१८॥ प्रियान्वितश्चात्मजसंयुतश्च कीर्तिं समाधाय महीतले तु ॥ त्रैलोक्यपूज्यां विमलां च शुक्लां कृत्वा पदं मूर्ध्नि यमस्य भूप ॥ १९ ॥ प्रयाहि वासं मम देहसंज्ञं स चक्रिणो भूमिपतिः करेण ॥ संस्पृष्टमात्रो विरजा बभूव प्रियासमेतस्तनयेन युक्तः ॥ २० ॥ उपेत्य वेगेन जगाम देहं देवस्य दिव्यं स नृपो महात्मा ॥ विहाय लक्ष्मीमवनीप्रसूतां विहाय दासीःसुधनं स कोशम् ॥ २१ ॥ विहाय नागांस्तुरगान्रथांश्च स्वदारवर्गं स्वजनादिकांश्च ॥ जगाम देहं मधुसूदनस्य ततोऽबरात्पुष्पचयः पपात ॥ २२ ॥ संहृष्टसिद्धैः सुरलोकपालैः संताडिता दुंदुभयो विनेदुः ॥ राजन् जगुर्गीतमतीव रम्यं देवांगनाः संननृतुर्मुदान्विताः ॥ २३ ॥ गन्धर्वकन्या नृपकर्मतुष्टास्तदद्भुतं प्रेक्ष्य दिनेशसूनुः ॥ हरेस्तनौ भूमिपतिं प्रविष्टं सदारपुत्रं स्वलिपिं प्रमार्ज्य॥२४॥लोकांश्च सर्वान्नृपदिष्टमार्गे कृत्वा कृतज्ञान्हार्रलोकमार्गान्॥भीतः पुनः प्राप्य पितामहांतिकं प्रोवाच देवं चतुराननं रुदन् ॥ २५ ॥ नाहं नियोगी भविता हि देव आज्ञाविहीनः सुरलोकनाथ ॥ विधेहि चान्यत्प्रकरोमि तात निदेशनं मास्तु मदीय दण्डम् ॥२६ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीचरिते सुतवधोद्यतस्य रुक्मांगदस्य भगवद्दर्शनं नाम चतुस्त्रिंशत्तमोऽध्यायः॥३४॥

यम उवाच ॥ विबुधेश जगन्नाथ चराचरगुरो प्रभो॥मोहिनी निष्फला जाता वंध्या स्त्री जनने यथा॥ १॥रुक्मांगदप्रणीतेन मार्गेण कुशलांछन ॥ लोकः प्रयाति वैकुंण्ठं न मां कश्चित्प्रपद्यते ॥ २ ॥ गतेऽपि भूमिनाथेशे देहं देवस्य चक्रिणः ॥ तथापि सर्वभूतानां न बुद्धिः परिवर्तते ॥ ३ ॥ उपोष्य वासरं विष्णोराकुमारात्तु मानवाः ॥ प्रयांति परमं लोकं लुप्तपापाः पितामह ॥ ४ ॥ पुत्री ते व्रीडिता देवी मोहिनी मोहमागता ॥ नायाति तव

सामीप्यं न भुंक्ते लोकगर्हिता ॥ ५ ॥ निर्व्यापारस्त्वहं जातः किं करोमि प्रशाधि माम् ॥रविपुत्रवचः श्रुत्वा प्रोवाच कमलासनः ॥ ६ ॥ गच्छामः सहिताः सर्वे मोहिनीं प्रतिबोधितुम् ॥ मोहिन्यां प्रतिबुद्धायां करिष्यामो दिवाकरे ॥ ७ ॥ तव कार्यं न संदेहः संभ्रमस्त्यज्यतामयम् ॥ ततो देवगणाः सर्वे शतक्रतुपुरोगमाः ॥ ८ ॥ ब्रह्मणा सहिताः पृथ्वीं विमानैः सूर्यसप्रभैः ॥ समायाता महीपाल नारीं तां प्रतिबोधितुम् ॥ ९ ॥ ते विमानैः समंतात्तु परिवार्य शुभाननाम् ॥ तेजोहीनां निरानंदां शुष्कतोयां नदीमिव ॥ १० ॥ शशिहीनां निशां भूप ऋत्विग्घीनां क्रियामिव॥ पराजितो यथा मर्त्यः प्रम्लानकुसुमं यथा ॥ ११ ॥ निवृत्तोत्सववेदीव विद्रुमं धवलं यथा ॥ गतशालिस्तु केदारो निष्प्र यथा ॥ १२ ॥ मंड वा गतोद्वा यथा सरः ॥ मंथानं नवनीते वा उद्धृते धरणीपते ॥ १३ ॥ असंस्कृता यथा वाणी मर्दिता च यथा चमूम् ॥ हतनाथां तु युवतीं धान्यहीनां प्रजां यथा ॥१४॥ मंत्रहीनविधिं युद्धं धर्मं च दयया विना ॥ पृथ्वीं भूपालहीना वा मंत्रही यथा नृप ॥ १५ ॥ धनधान्यविहीनं वा गृहं नृपवरोत्तम ॥ जलहीनं यथा कुंभं पंकस्थं गोपतिं यथा॥१६॥ गृहस्थं भार्यया हीनं राष्ट्रभ्रष्टं च भूपतिम्॥भग्नक्रियं यथा वैद्यं भग्नशाखं यथा द्रुमम् ॥ १७ ॥ तेजोहीनं यथागारं निर्जलं वा घनं यथा ॥ विधूम इव सप्तार्चिर्विरश्मिरिव भास्करः ॥ १८ ॥ मतिभ्रष्टो यथा मर्त्यः पर्वसंगी यथा नरः ॥ अतृप्तः कांतया कांतः पन्नगश्च विषोज्झितः॥ १९ ॥ लूनपक्षो यथा पक्षी वृत्तिहीनो यथा द्विजः ॥ शिरोभ्रष्टा यथा माला पर्वतो धातुवर्जितः ॥ २० ॥ प्रभ्रष्टलिपि शास्त्रं वा ऋग्यजुर्विस्वरं यथा ॥ स्वरहीनं यथा साम पद्महीनं यथा सरः ॥ २१ ॥ यथा मार्गं तृणै रुद्धं पद्मं पत्रविवर्जितम् ॥ ज्ञानं ममत्वसंयुक्तं पुमांसं प्रकृतिं विना ॥ २२ ॥ सांख्यानि तत्त्वहीनानि धर्मं दंभान्वितं यथा ॥ तेजोहीनां तथापश्यन् मोहिनीं ते दिवौकसः ॥ २३ ॥ ध्यायमानां निरुत्साहां दृश्यमानां जनैः प्रभो ॥ आक्रोशवचनैः क्रूरैः पुत्रहत्यासमन्विताम् ॥ २४ ॥ दुःशीलां धर्मसंत्यक्तां तद्वाक्यपारिमोपिताम् ॥ स्ववाक्यपालनां चंडामूचुर्देवाः समागताः ॥२५॥ मां शोकं कुरु वामोरु पौरुषं हि त्वया कृतम्॥नहि माधवभक्तानां विद्यते मानखण्डनम्॥२६॥सा त्वं हरिणशावाक्षि देवकार्यार्थमागता॥तन्न सिद्धं वरारोहे स प्रयातोऽधुनाभवम्॥२७॥विघ्नविध्वंसिनी पूर्वं कृता रुक्मांगदेन हि॥एकादशी महापुण्या मोहिनी माधवे सिते ॥२८॥संवत्सरं विशालाक्षि कृच्छ्रपादप्रपूजिता॥तस्यैवाघ्युषिरतुला यत्सत्याच्चलितो न हि ॥ २९ ॥ विघ्नराज्ञी तु वै नारी लोकेषु परिगीयते ॥ कर्मणा मनसा वाचा पुत्रव्यापादने मतिम्॥३०॥ कृत्वा चोद्धृत्य खड्गं च त्यक्त्वा स्नेहं सुदूरतः ॥ तादृशं निकंपं प्रेक्ष्य भगवान्मधुसूदनः ॥ ३१ ॥हनिष्यति प्रियं पुत्रं न भुङ्क्ते हरिवासरे॥पुत्रस्य च प्रियायाश्च भावं

प्रेक्ष्य नृपस्य च ॥ ३२ ॥ विष्णुना परितुष्टेन नीताः स्वभवने त्रयः ॥ सदेहाः क्षीणकर्माणोह्यंगारोऽग्निरिवाहितः ॥ ३३ ॥ फलं कर्मणि चारब्धे
यदि देवी न सिद्ध्यति ॥ सर्वयत्नेन सुभगे दोषः कोऽत्र तवाधुना ॥ ३४ ॥ एतस्माद्वरदाः सर्वे संप्राप्ता विबुधाः शुभे ॥ सिद्धौ वाप्यथ
वासिद्धौ कर्मकृत्स्याद्वृथा न हि ॥ ३५ ॥ भर्तव्यो भृत्यवर्गश्च भूभुजा धर्ममिच्छता ॥ सद्भावे घटमानस्य यदि कर्म न सिद्ध्यति ॥३६॥ देयं
वेतनमात्रं तु न च तुष्टिफलं भवेत् ॥ यो न तस्मै प्रयच्छेत जीवनं जीवनाय वै ॥३७॥ गोवधं समवाप्नोति स नरो नात्र संशयः ॥ तस्माद्देयं वरा
रोहे अभीष्टं वरसुन्दरि ॥ ३८ ॥ सद्भावेन कृते सम्यग्विघ्नं कार्यं दिवौकसाम् ॥किं न कुर्वंति विबुधास्त्वया सह वरानने ॥ ३९ ॥द्वादश्यास्ते
जसा भग्ना यामाहुर्विघ्ननाशिनीम् ॥ विबुधैरेवमुक्ता तु मोहिनी लोकमोहिनी॥ ४० ॥ उवाच सा निरानन्दा पतिहीनातिदुःखिता ॥ धिगिदं
जीवितं मह्यं येन कार्यं न साधितम् ॥ ४१ ॥ न कृतो जनसंबाधो यममार्गोऽमराधिपाः ॥न तु लुप्तं हरिदिनं न भुक्तं हरिवासरे ॥४२॥ भूभुजा
तेन वीरेण कृतः पुत्रवधो मुदा॥गतो मूर्ध्नि पदं दत्वा मम रुक्माङ्गदो हरिम्॥४३॥अप्रमेयगुणं विष्णुं निर्मलं निर्मलाश्रयम्॥हंसं शुचिपदं व्योम प्रणवं
बीजमव्ययम्॥४४॥निराकारं निराभासं निष्प्रपंचं निरंजनम्॥शून्यं वियत्स्वरूपं च ध्येय ध्यानविवर्जितम्॥४५॥अस्ति नास्तीति यं प्राहुर्नःदूरे नापि
चान्तिके॥परं धाम मनोग्राह्यं पुरुषाख्यं जगन्मयम्॥४६॥हृत्पंकजसमासीनं तेजोरूपंसनातनम्॥तस्मिँल्लयमनुप्राप्ते किं नु मे जीविते फलम्॥४७॥
असाधिते तु यः कार्ये नरो गृह्णाति वेतनम् ॥ स्वामिनं तु परित्यज्य प्रयाति नरकं ध्रुवम् ॥ ४८॥ न साधयंति ये कार्यं स्वामिनां तु दिवौकसः॥
भृत्या वेतनभोक्तारो जायंते भूतले हयाः ॥ ४९ ॥ असाधिनीयं कार्यस्य भर्तृपुत्रविनाशिनी ॥ कथं वरं तु गृह्णामि भवतां नाकवासिनाम् ॥५०॥
देवा ऊचुः॥ब्रूहि मोहिनि दास्यामि यत्ते हृदि समीहितम् ॥ अनृणास्तु भविष्यामः कृत्वा चोपकृतिं तव॥५१॥परिश्रमः कृतो देवि त्वया राजप्र
योजने ॥ तस्य त्वं फलभाग्देवि तादृशार्थे कृतस्य तु ॥ ५२ ॥ एवमुच्चरमाणानां देवतानां महीपते ॥ नृपतेराजगामाथ पुरोधाः पावकप्रभः॥५३॥
उषितो जलमध्ये तु प्राणायामरतो मुनिः ॥ द्वादशाब्दे ततः पूर्णे निर्गतो जलमध्यतः ॥ ५४ ॥ निर्गतेन श्रुतं तेन मोहिनीचेष्टितं नृप॥ सक्रोधो
मुनिशार्दूलो देववृंदमुपागतः ॥ ५५ ॥ उवाच विबुधान्सर्वान्मोहिनीवरदायिनः ॥ धिगिमां धिग्देवसंघं कर्म धिक्पापसंज्ञितम् ॥ ५६ ॥ भवतां
भावनाशाय पुरुषार्थे प्ररोहकम् ॥ भवंतो यच्च दातारो मोहिन्या वांछितं वरम् ॥ ५७ ॥ हत्यायुता भर्तृसुतोपघातिनी विहीनवृत्तिश्च नराशिरूपा॥
नास्या हि लोके भवतीह शुद्धिः समिद्धवह्नौ पतनेऽपि देवाः॥५८॥“हत्यायुतं भर्तृवधो निरर्थकमेतत्समं विप्रवरैः पुराकृतम्॥ न चापि चास्या भव

तीह शुद्धिः समिद्धवह्नौ पतनेऽपि देवाः'' ॥ विमोहयित्वा वचनैः सुधामयैरुक्माङ्गदं धर्मविभूषणं च ॥ प्रियायुतं मोक्षपदं निहत्य चकार भूमिं
नृपवर्जितां च ॥५९॥ न चापि वासो नरकेषु देवा अस्याः स्थितिः क्व त्रिदिवेऽल्पबुद्धेः॥न चापि राज्ञो निकटे च देवा नाप्येतु विष्णोः पदमव्ययं
यत् ॥ ६० ॥ न लोकवादेन विदूषिताया लोकेषु कुत्रापि भवेच्च वासः ॥ धिग्जीवनं कर्म्मविगर्हिताया देवाः सदा पापसमारतायाः ॥ ६१ ॥ पतिं
हत्वा सुतं हत्वा सपत्नीं जननीसमाम्॥हत्वा धरां समस्तां वा कां गतिं यास्यते सुराः॥६२॥इयं पापतरा देवा धर्मविध्वंसिनी हरेः॥सर्वदाप्यनया
प्रोक्तं भुज्यतां हरिवासरे ॥ ६३ ॥ प्राणसंवर्द्धनार्थाय तेषामेवाप्यधोगतिः ॥ भुज्यतां वासरे विष्णोर्हन्यतां गौर्द्विजान्विता ॥ ६४ ॥ अपेयं पीयता
मुक्ता कथं वासं लभेद्दिवि ॥ एतदज्ञानिनां प्रोक्तं ज्ञानिनां तु न निर्णयः ॥६५॥ अज्ञानाद्व्याहृते वाक्ये भुज्यतां हरिवासरे ॥ तस्यापि शुद्धिर्गदिता
प्राणायामशतेन हि ॥ ६६ ॥ अथवाप्युपवासेन एकादश्या दिवौकसः ॥ ऋक्षेण संयुतायास्तु ज्येष्ठकुंडाप्लुवेन वा ॥ ६७ ॥ शौकरस्पर्शना
द्वापि नरो देवार्चनेन वा ॥ व्याहृते कथितं विप्रैः सेयमद्य सुनिष्ठुरा ॥ ६८ ॥ भोजने पापनिरता दिने विष्णोर्दुरासदे ॥ भर्तुर्वाक्यं व्यपोह्यैव
घातयित्वा सुतं प्रियम् ॥ ६९ ॥ वाक्यज्ञं वाक्यनिरतं मातॄणां तु हिते रतम् ॥ विष्णुधर्मप्रलोप्त्रीयं बहुपापसमन्विता ॥ ७० ॥ नैषा स्पृश्यास्ति
देवेशाः कथमस्या वरप्रदाः ॥ भवंतो न्याययुक्तेषु धर्मयुक्तेषु तत्पराः ॥ ७१ ॥ पालनं पापयुक्तस्य न कुर्वंति दिवौकसः ॥ धर्माधाराः स्मृता
देवा धर्मो वेदेसमास्थितः ॥ ७२ ॥ वेदैः शुश्रूषणं भर्तुः स्त्रीणां धर्मः प्रकीर्तितः ॥ यद्ब्रवीति पतिः किंचित्तत्कार्यमविशंकया ॥७३॥ शुक्लं शुक्ल
मिति ब्रूयात्कृष्णं कृष्णेति चामराः ॥ शुश्रूषा सा हि विज्ञेया न शुश्रूषा हि सेवनम्॥ ७४॥ भर्तुराज्ञा हता देवा आत्माज्ञास्थापनेच्छया ॥ तस्मा
त्पापा न संदेहो मोहिनी सर्वयोषिताम्॥सत्यस्य साधनार्थाय शपथैर्यन्त्रितो नृपः॥७५॥उवाच विविधं वाक्यं सा नैच्छत्पुत्रघातिनी॥तेन मोक्षं गतो
राजा पापमस्यां विसृज्य ज ॥७६॥ सेयं पापशरीरा हि हत्यायुतसमन्विता ॥७७ ॥ दातारं सर्वदानानां ब्रह्मण्यं हरिदैवतम् ॥ प्रजारंजनशीलं च
हरिवासरसेविनम् ॥ ७८ ॥परदारेषु निःस्नेहं विषये विगतस्पृहम्॥परार्थत्यक्तकामं च सदा मखनिषेविणम् ॥ ७९ ॥ सदैव दुष्टदमने वर्तमानं धरा
तले ॥ व्यसनैः सप्तभिर्घोरैरनाक्रांतं महीपतिम्॥८०॥संनिरस्य दुराचारा वरयोग्या कथं भवेत्॥योऽस्याः पक्षे तु वर्तेत देवो वा दानवोऽपि वा॥८१॥
तं चापि भस्मसात्कुर्यां क्षणेन सुरसत्तमाः ॥ मोहिन्या रक्षणे यस्तु प्रयत्नं कुरुते सुराः ॥ ८२ ॥ तस्य तज्जायते पापं यन्मोहिन्यां व्यवस्थितम्
॥ ८३ ॥ स एवमुक्त्वा नृपते द्विजेंद्रः संगृह्य पाणौ सलिलं च तीव्रम् ॥ क्रोधेन संवीक्ष्य विधिप्रसूतां चिक्षेप तन्मूर्ध्न्यनलप्रकाशम् ॥८४॥ निक्षि

तमात्रे सलिले महीप सद्यः प्रजज्वाल च तच्छरीरम् ॥ संपश्यतां नाकनिवासिनां तु तृण्या यथा वह्निशिखावलीढा ॥ ८५. ॥ कोपं विभो संहर
संहरेति यावद्गिरः खे मरुतां बभूवुः ॥ तावत्स वह्निर्द्विजवाक्यसृष्टो भस्मावशेषां प्रमदां चकार ॥८६ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनी
चरिते शापप्राप्तिर्नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ वसिष्ठ उवाच ॥ मोहिनी मोहमुत्सृज्य गता विबुधमंदिरम् ॥ भर्त्सिता देवदूतेन स्थितिस्तेऽत्र
न पापिनी ॥ १ ॥ पापशीले सुदुर्मेधे भर्तृनिंदापरायणे ॥ हरिवासरलोपिन्यां वासस्ते न त्रिविष्टपे॥२॥ धर्मतो विमुखानां च नरके वास इष्यते॥
एवमुक्त्वा तु तां वायुः क्रूरं वचनमद्भुतम् ॥ ३ ॥ ताडयित्वा च दंडेन प्रेरयामास यातनाम् ॥ एवं संताडिता राजन् देवदूतेन मोहिनी
॥ ४ ॥ ब्रह्मदंडपराभूता संप्राप्ता नरकं नृप ॥ तत्र धर्माज्ञया सा तु दूतैः संताडिता चिरम् ॥५॥ सर्वेषु क्रमशो गत्वा नरकेषु निपातिता ॥ पापे
धर्मांगदः पुत्रो घातितः पतिपाणिना ॥ ६ ॥ त्वया यतस्ततो भुंक्ष्व कृतकर्मफलं त्विह ॥ प्रजाहितं स्थिरप्रज्ञं महेंद्रवरुणोपमम् ॥ ७ ॥
सप्तद्वीपाधिपं पुत्रं हत्वेहक्फलभोगिनी ॥ प्राकृतस्यापि पुत्रस्य हिंसायां ब्रह्महा भवेत् ॥ ८ ॥ किं पुनर्द्धर्मयुक्तस्य पापे धर्मांगदस्य च ॥
एवं निर्भत्सिता दूतैर्यमस्य नृपसत्तम ॥ ९ ॥ बुभुजे यातनाः सर्वाः क्रमशः शमनोदिताः ॥ ब्रह्मदंडहतायास्तु देहस्पर्शेन यातनाः ॥ १० ॥
ज्वलितांगा बभूवुस्ता धारणाय न तु क्षमाः ॥ ततस्ते नरका राजन् धर्मराजमुपागताः ॥ ११ ॥ प्रोचुः प्रांजलयो भीतास्तदंगस्पर्शपीडिताः ॥
देवदेव जगन्नाथ धर्मराज दयां कुरु ॥ १२॥ इमां निःसारयाशु त्वं यातनाभ्यः सुखाय नः ॥ यस्याः स्पर्शनतो नाथ भस्मभूताः क्षणादहो ॥१३॥
भविष्यामस्ततस्त्वेनां नरकेभ्यो विवासय ॥ तच्छ्रुत्वा वचनं तेषां धर्मराजोऽतिविस्मितः ॥१४ ॥ दूतान्स्वान्प्रत्युवाचेयं निःसार्या मम मंदिरात् ॥
यो ब्रह्मदंडनिर्दग्धः पुमान् स्त्री वा च तस्करः ॥ १५ ॥ तस्य पापस्य संस्पर्शं नेच्छति यातना मम ॥ तस्मादिमां महापापां भर्तुर्वचनलोपिनीम्
॥ १६ ॥ पुत्रघ्नीं धर्महंत्रीं च ब्रह्मदंडहतामपि ॥ निःसारयत मे वापि देहो ज्वलति दर्शनात् ॥ १७ ॥ इत्युक्तास्ते तदा दूता धर्मराजेन भूपते ॥
प्रहरंतोऽस्त्रशस्त्रैश्च बहिश्चक्रुर्यमक्षयात् ॥ १८ ॥ ततः सा दुःखिता राजन् मोहिनी मोहसंयुता ॥ पातालं प्रययौ तत्र पातालस्थैर्निवारिता ॥१९॥
ततस्तु व्रीडितात्यर्थं मोहिनी ब्रह्मणः सुता ॥ जनकस्यांतिकं गत्वा दुःखं स्वं संन्यवेदयत् ॥ २० ॥ तात तन्नास्ति मे स्थानं त्रैलोक्ये सचरा
चरे ॥ यत्र यत्र तु गच्छामि तत्र तत्र क्षिपंति माम् ॥२१ ॥ अहं निर्वासिता लोकैर्घातयित्वायुधैर्दृढम्॥ भवदाज्ञां समादाय गता रुक्मविभूषणम्
॥ २२ ॥ मया व्यवसितं चेदं सर्वलोकविगर्हितम् ॥ क्लेशयित्वा तु भर्तारं पुत्रं हत्वा वरासिना ॥ २३ ॥ संध्यावलीं क्षोभयित्वा पितः प्राप्ता दशा

मिमाम् ॥ न गतिर्विद्यते देव पापाया मम सांप्रतम् ॥ २४ ॥ विशेषाद्द्विजशापेन जाताहं दुःखभागिनी ॥ विप्रवाक्यहतानां च दग्धानां चित्रभा
नुना ॥२५॥ दिवाकीर्तिहतानां च भक्षितानां मृगादिभिः॥शतह्रदाविपन्नानां मुक्तिदा स्वर्णदी पितः ॥२६ ॥यदि त्वं त्रिदशैः सार्द्धं विप्रं तं शापदायि
नम् ॥ प्रसादयसि मत्प्रीत्या तर्हि मे विहिता गतिः ॥ २७ ॥ तां तथावादिनीं राजन् ब्रह्मा लोकपितामहः ॥ शिवेंद्रधर्मसूर्याग्निदेवेशैर्मुनिभिर्युतः ॥२८॥
मोहिनीमग्रतः कृत्वा जगाम द्विजसन्निधौ ॥तत्र गत्वा महीपाल ब्रह्मा देवादिभिर्वृतः ॥ २९ ॥ महता गौरवेणापि नमश्चक्रे स्वयं विधिः ॥ भूप
रुद्रादिदेवैस्तु पूज्यो मान्यः पितामहः ॥३०॥ मोहिनीप्रीतये मुग्धः स्वयं चक्रे नमस्क्रियाम् ॥ कार्ये महति संप्राप्ते ह्यसाध्ये भुवनत्रये ॥ ३१ ॥
न दूषितं भवेद्भूप यविष्ठस्याभिवादनम् ॥ स द्विजो वेदवेदांगपारगस्तपसि स्थितः ॥ ३२ ॥ संप्रेक्ष्य लोककर्तारं देवैः सह समागतम् ॥ समु
त्थाय नमश्चक्रे ब्रह्माणं तान्मुनीन्सुरान् ॥ ३३ ॥ वासयामास भक्त्या च स्तुतिं चक्रेऽब्जजन्मनः ॥ ततः प्रसन्नो भगवान् लोककर्त्ता जगद्गुरुः
॥ ३४ ॥ ते द्विजं प्रार्थयामासुर्मोहिन्यर्थे नृपार्चितम् ॥ तात विप्र सदाचार परलोकोपकारक ॥ ३५ ॥ कृपां कुरु कृपासिंधो मोहिनीगतिदो
भव ॥ मया संप्रेषिता ब्रह्मन् रुक्मांगदविमोहने ॥ ३६ ॥ सुता मे यमलोकं तु शून्यं दृष्ट्वा च मानद ॥ वैकुंठं संकुलं प्रेक्ष्य लोकैः सर्वैर्नि
राकुलैः ॥ ३७ ॥ मनसोत्पादिता देवी देवानां हितकारिणी ॥ निशामय धरादेव यद्ब्रवीमि तवाग्रतः ॥ ३८ ॥ गतिं धर्मस्यातिसूक्ष्मां लोक
कल्याणकारिणीम् ॥ अनया निकषाश्यांग्या परीक्ष्य स्वर्णभूषणः ॥ ३९ ॥ सदारः ससुतो ब्रह्मन्प्रापितो हरिमंदिरम् ॥ राज्ञाऽप्रहतया भक्त्या हरि
वासरपालनात् ॥ ४० ॥ कृतं शून्यं यमस्थानं लिपिमार्जनकर्मणा ॥ देवापकारो विप्रर्षे न क्षमो बाहुजन्मना ॥ ४१ ॥ भूसुराणां विशेषेण यातास्ते
तत्सहायकाः ॥ ४२ ॥ न प्राप्यते साङ्ख्यविदा तु यच्च नाष्टांगयोगेन तु भक्तिगम्यम् ॥ तत्प्रापितं भूसुर भूपभर्तुर्निजस्य पुत्रस्य तथा सपत्न्याः
॥ ४३॥ यत्पुण्यशीलस्य नृपस्य भूपशिरोमणेराचरितं प्रतीपम् ॥तत्पापवेगेन बभूव विद्रुता भस्मावशेषा तव शापदग्धा॥४४॥ देवार्थमेषा भववर्द्ध
नार्थं नृपोपकाराय च संप्रवृत्ता ॥ न स्वार्थकामा लभतेऽवमानं कथं द्विजातोऽपकृतिं क्षमस्व ॥ ४५ ॥ दयां कुरुष्व प्रशमं भजस्व पिष्टस्य
पेषो नहि नीतियुक्तः॥शापप्रदानेननिपातितेयं कुरु प्रसादं गतिदो भवत्वम् ॥ यस्मिन्कृते ब्राह्मण मोहिनीयं बुद्धिं त्यजेत्क्रूरतरां त्वयीज्ये
॥ ४६ ॥ स एवमुक्तः कमलासनेन विमृश्य बुद्ध्या विससर्ज कोपम् ॥ उवाच देवं त्रिदशाधिनाथं विमोहिनीदेहकृतं द्विजेंद्रः ॥ ४७ ॥ बहु
पापयुता देव मोहिनी तनया तव ॥ न लोकेषु स्थितिस्तस्मात्प्राणिभिः संकुलेषु च ॥ ४८ ॥ मया विमृश्य सुचिरं मोहिन्यर्थे विचिंतितम् ॥

तद्दास्यामि तव प्रीत्या त्वं हि पूज्यतरो मम ॥ ४९ ॥यथा तव वचः सत्यं मम चापि सुरेश्वर ॥ देवकार्यं च भविता मोहिनीकृतत्यमेव च ॥५०॥
यन्नाक्रांतं हि भूतौघैस्तत्स्थाने मोहिनीस्थितिः ॥ जंगमाजंगमैर्भूमिर्व्याप्ता द्वीपवती सदा ॥ ५१ ॥ तलानि चापि दैत्याद्यैराकाशः पक्षिपूर्वकैः ॥
नाकः सुकृतिभिर्जीवैर्नरकाः पापकर्मभिः ॥ ५२ ॥ झषाद्यैः सागरा व्याप्ता नैष्वस्पृश्यास्थितिस्ततः ॥ ततो ब्रह्मा सुरैः सर्वैः संमंत्र्य नृपसत्तम
॥ ५३ ॥ उवाच मोहिनीं देवीं नास्ति स्थानं तव क्वचित् ॥ तच्छुत्वा मोहिनी वाक्यं पितुराज्ञाविधायिनी ॥ ५४ ॥ उवाच प्रणता सर्वान्
हरिवासरनाशिनी ॥ पुरोधसा समेतानो देवानां लोकसाक्षिणाम् ॥ ५५ ॥ भवतां त्रिदशश्रेष्ठा एष बद्धो मयांजलिः ॥ प्रणिपातशतेनापि
प्रसन्नेन हृदा सुराः ॥ ५६ ॥ दातव्यं याचितं मह्यं सर्वेषां प्रीतिकारकम् ॥ एकादश्याः प्रभावेण सर्वेषां पापिनां गतिः ॥५७॥ साध्यते तां
सुरश्रेष्ठा वर्धितुं मे प्रयोजनम् ॥ पतिः सपत्नी पुत्रश्च मया वैकुंठगाः कृताः ॥ ५८ ॥ भूर्लोके विधवाद्याहं वर्तामि भवतां कृते ॥ यथा हरि
दिनं दुष्टं जायते मम मानदाः ॥ ५९ ॥ एतत्प्रयाचे ददत स्वार्थार्थं तद्धि नान्यथा ॥ ६० ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीचरिते
षट्त्रिंशत्तमोऽध्यायः ॥ ३६ ॥ मोहिन्युवाच ॥ एकादशीसमं देवाः पावनं नापरं भवेत् ॥ यया पूता महापापा गच्छंति हरिमंदिरम् ॥ १ ॥
तत्समीपे मम स्थानं युक्तं भाति विचार्यताम् ॥ देवा ऊचुः ॥ वेधो निशीथे देवानामुपकाराय मोहिनी ॥ २ ॥ सूर्योदये सुराणां च हरिणा परिक
ल्पितः ॥ पारणं च त्रयोदश्यामुपवासविनाशनम्॥३॥ महाद्वादशिका ह्यष्टौ याः स्मृता वैष्णवागमे ॥ तास्तु ह्येकादशीभिन्ना उपोष्यंते च वैष्णवैः
॥ ४ ॥ एकादशीव्रतं भिन्नं वैष्णवानां महात्मनाम् ॥ नित्यं पक्षद्वये प्रोक्तं विधिना त्रिदिनात्मके ॥ ५ ॥ सायं प्रातस्त्यजेद्भुक्तिं क्रमात्पूर्वापर
ह्नयोः ॥ एकादशी यदा भिन्ना उपोष्या हि परेऽहनि ॥ द्वादश्यां हि व्रतं कार्यं निरंबु समुपोषणम् ॥६॥ लंघने त्वसमर्थानां जलं शाकं फलं पयः॥
नैवेद्यं वा हरेः प्रोक्तं स्वाहारात्पादसंमितम् ॥७॥ स्मार्ताः सूर्योदये विद्धां त्यजंत्येकादशीं सति ॥ निष्कामा मध्यरात्रे च विद्धां मुंचन्ति याम्यया
॥ ८ ॥ सर्वेष्वपि तु लोकेषु विदिता दशमी तिथिः ॥ यमस्य तस्याः प्रांते तु स्थितिः कार्या त्वयानघे ॥ ९ ॥ एतेन देवकार्यं च सिद्धं
भवति शोभने ॥ सूर्येन्दुचारा तिथ्यास्तु दशम्याः प्रांतगामिनी ॥ १० ॥ भुवि तीर्थानि चैव त्वं स्वाघनाशाय संचर ॥ अरुणोदयमारभ्य याव
त्सूर्योदयो भवेत् ॥ ११ ॥तदंतस्त्वं व्रते प्राप्ता लभस्वैकादशीफलम् ॥ यः कश्चित्कुरुते विद्धं त्वया ह्येकादशीव्रतम् ॥ १२ ॥ स तूपकारकस्तुभ्यं
भविष्यति सुरप्रिये ॥ मुहूर्तद्वयमात्रं तु ज्ञेयं चात्रारुणोदयम् ॥१३॥मुहूर्ताः पंचदश च स्मृता रात्रेर्दिनस्य च ॥ ज्ञेयास्ते ह्रस्वदीर्घत्वे त्रैराशिक

विधानतः ॥ १४ ॥ त्रयोदशान्मुहूर्तात्तु रात्रेरूर्द्धं समागता ॥ लब्ध्वोपवासिनां पुण्यं स्वस्था भव शुचिस्मिते ॥१५ ॥ यमसंस्थापनार्थाय वैकुण्ठ ध्वंसनाय च ॥ पाखण्डानां विवृद्धयर्थं पापसंचयनाय च ॥ १६ ॥ दत्तं ते मोहिनि स्थानं प्रत्यूषसमयांकितम् ॥ १७ ॥ विद्धं त्वयैकादशिकाव्रतं ये कुर्वंति कर्तार इह प्रयत्नात् ॥ तेषां भवेद्यत्सुकृतं शुभे फलं भुंक्ष्व प्रसन्ना भव भूसुरे त्वम् ॥ १८ ॥ एवं प्रदिष्टा कमलासनाद्यैः सा मोहिनी हृष्टतरा बभूव ॥ मेने कृतार्थं निजजीवितं च स्वपापतीर्थाभिनिषेवणेन ॥ १९ ॥ संसाधितं कार्यमिदं सुराणां भस्मावशेषं हि गतेऽपि देहे ॥ चैतन्यमात्रे पवनात्मकेऽस्मिन् संमार्जितो भूपकृतस्तु पंथाः ॥ २० ॥ नीतं मया चात्मकृतं हि वाक्यं प्रहृष्टया वै यदुदाहृतं हि ॥ एवं विमृश्य क्षितिपालदेवान्प्रणम्य हृष्टा च पुरोधसं स्वम् ॥ २१॥ प्रांते स्थिता सूर्यविहीनसंज्ञे काले दशम्या जनमोहनाय ॥ कृच्छ्रांतरूपा च दिनं च भुंक्ते प्रकृष्टरूपा नरकाय नृणाम् ॥ २२ ॥ प्रांतस्थितां तां रविजो निरीक्ष्य प्रहृष्टवक्त्रो वचनं जगाद ॥ त्वया प्रतिष्ठा मम चारुनेत्रे कृतात्र लोके पुनरेव सम्यक् ॥ विभेदितो रुक्मविभूषणस्य मत्तेभसंस्थः पटहः सुघोषः ॥ २३ ॥ दृष्टे कार्ये जनः सर्वः प्रत्ययं कुरुते त्विति ॥ २४ ॥ सूर्योदय स्पृशा ह्येषा दशमी गर्हिता सदा ॥ अस्पृष्टमुदयं नृणां मोहनाय भविष्यति ॥ २५ ॥ विहाय तां यत्प्रिययोगभुक्ति पादस्थिता सापि ह्यदृश्य रूपा ॥ सत्यं हि ते नाम विशालनेत्रे यन्मोहिनीत्येव जनो ब्रवीति ॥ २६ ॥ विमोहयित्वा हि जनं समस्तं पटे मदीये लिखितं करोषि ॥ इत्येव मुक्त्वा तनयो विवस्वतः प्रणम्य तां ब्रह्मसुतां प्रहृष्टः॥ २७ ॥ जगाम देवैः सह नाकलोकं करे गृहीत्वा लिपिलेखितारम् ॥ गतेषु देवेषु विमोहिनी सा ब्रह्माणमासाद्य सुरासुरेशम् ॥ २८ ॥ विज्ञापयामास पितः पुरोधा ममायमत्युग्रतरश्च कोपात् ॥ दग्धं शरीरं मम लोकनाथ पुनः प्रपत्स्येऽथ तथा कुरुष्व॥२९॥विमोहितं चैव जगन्मयेदं प्रांते समास्थाय यमस्य तिथ्याः॥जितो हि राज्ञा शमनः पुराद्य कृतो जयी तात तव प्रभावात्॥ ३०॥ तव कृत्यमिदं तात यत्पुनर्देहधारिणी ॥भूयामहं जगन्नाथ ब्राह्मणं सांत्वयस्व भोः ॥ ३१ ॥ तच्छ्रुत्वा मोहिनीवाक्यं ब्रह्मा लोकविधानकृत्॥ब्राह्मणं सांत्वयामास पुनरेव सुताकृते ॥ ३२ ॥ वसो तात निबोधेदं यद्ब्रवीमि हितावहम् ॥ तव चास्या महाभाग सर्वलोकहिताय च ॥ ३३ ॥ त्वयेयं मोहिनी कोपात्कृता भस्मावशेषिता ॥ पुनः शरीरं याचेत तदाज्ञां देहि मानद ॥ ३४ ॥ मत्पुत्री तव याज्येयं दुर्गतिं तात गच्छति ॥ त्वया मया च संपाल्या कृतकार्या तपस्विनी ॥ ३५ ॥यदि त्वं शुद्धभावेन मां ज्ञापयसि मानद ॥ तातोऽहमस्या भूयोऽपि देहमुत्पादयाम्यहम् ॥३६ ॥ किंतु विष्णुदिनस्यैषा वैरिणी पापकारिणी ॥ यथा शुद्ध्येत विप्रेंद्र तथैवाशु विधीयताम् ॥३७॥ तच्छ्रुत्वा वचनं तस्य ब्रह्मणः स पुरोहितः ॥ याज्याया

देहयोगार्थमादिदेश मुदान्वितः ॥ ३८ ॥ विप्रवाक्यं समाकर्ण्य ब्रह्मा लोकपितामहः ॥ कमंडलुजलेनौक्षन्मोहिन्या देहभस्म तत् ॥३९॥समुक्षिते
ब्रह्मणा लोककर्त्रा सा मोहिनी देहयुता बभूव ॥ प्रणम्य तातं च वसोः पुरोधसो जग्राह पादौ विनयेन नत्वा ॥ ४० ॥ ततो वसुर्याजक एव राज्ञो
मुदान्वितो याज्यनितंबिनीं ताम् ॥ विमोहिनीं स्वामिसुतोज्झितां च जगाद वाक्यं विदुतामवीराम् ॥४१॥ वसुरुवाच ॥ क्रोधस्त्यक्तो मया देवि
ब्रह्मणो वचनादथ ॥ गतिं ते कारयिष्यामि तीर्थस्नानादिकर्मणा ॥ ४२ ॥ इत्युक्त्वा मोहिनीं विप्रो ब्रह्माणं जगतां पतिम् ॥ विससर्ज नमस्कृत्य
मोहिनीपितरं मुदा ॥ ४३ ॥ मोहिन्या वसुना चैव प्रीत्या ब्रह्मा विसर्जितः ॥ जगाम लोकं तमसः परमव्यक्तवर्त्मना ॥ ४४ ॥
स वसुर्ब्राह्मणश्रेष्ठो रुक्मांगदपुरोहितः ॥ मोहिनीं समनुग्राह्यां मत्वा हृदि विचारयन् ॥ ४५ ॥ मुहूर्त्तं ध्यानमापन्नो बुबुधे कारणं गतेः ॥ ४६ ॥
इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीचरिते सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ वसिष्ठ उवाच ॥ स वसुर्नृपशार्दूल मोहिनीं याज्यकामिनीम् ॥
उवाच श्लक्ष्णया वाचा सर्वलोकहिते रतः ॥ १ ॥ वसुरुवाच ॥ शृणु मोहिनि वक्ष्यामि तीर्थानां लक्षणं पृथक् ॥ येन विज्ञातमात्रेण पापिनां गति
रुत्तमा ॥ २ ॥ सर्वेषामपि तीर्थानां श्रेष्ठा गंगा धरातले ॥ न तस्या सदृशं किंचिद्विद्यते पापनाशनम् ॥ ३ ॥ तच्छ्रुत्वा वचनं तस्य वसोः
स्वस्य पुरोधसः ॥ प्रणता मोहिनी प्राह गंगास्नानकृतादरा ॥ ४ ॥ मोहिन्युवाच ॥ भगवन्वाडवश्रेष्ठ गंगामाहात्म्यमुत्तमम् ॥ सर्वेषां च पुरा
णानां संमतं वद सांप्रतम् ॥ ५ ॥ श्रुत्वा माहात्म्यमतुलं गंगायाः पापनाशनम् ॥ पश्चात्पापविनाशिन्यां स्नातुं यास्ये त्वया सह ॥ ६ ॥
तच्छ्रुत्वा मोहिनीवाक्यं वसुः सर्वपुराणवित् ॥ माहात्म्यं कथयामास गंगायाः पापनाशनम् ॥ ७ ॥ वसुरुवाच ॥ ते देशास्ते जनपदास्ते शैला
स्तेऽपि चाश्रमाः॥ येषां भागीरथी पुण्या समीपे वर्तते सदा ॥ ८ ॥ तपसा ब्रह्मचर्येण यज्ञैस्त्यागेन वा पुनः ॥ तां गतिं न लभेज्जंतुर्गंगां
संसेव्य यां लभेत् ॥ ९॥ पूर्वे वयसि पापानि कृत्वा कर्माणि ये नराः ॥ शेषे गंगां निषेवंते तेऽपि यांति परां गतिम् ॥ १० ॥ तिष्ठेद्युगसहस्रं तु
पादेनैकेन यः पुमान् ॥ मासमेकं तु गंगायां स्नातस्तुल्यफलावुभौ ॥ ११ ॥ तिष्ठेतार्वाक्छिरा यस्तु युगानामयुतं पुमान् ॥ तिष्ठेद्यथेष्टं यश्चापि
गंगायां स विशिष्यते ॥ १२ ॥ भूतानामिह सर्वेषां दुःखोपहतचेतसाम् ॥ गतिमन्वेषमाणानां न गंगासदृशी गतिः ॥ १३ ॥ प्रकृष्टैः पातकै
र्घोरैः पापिनः पुरुषाधमान् ॥ प्रसह्य तारयेद्गंगा गच्छतो निरयेऽशुचौ ॥ १४ ॥ ते समानास्तु मुनिभिर्नूनं देवैः सवासवैः ॥ येऽभिगच्छंति सततं
गंगामभिमतां सुरैः ॥ १५ ॥ अंधाञ्जडान्द्रव्यहीनांश्च गंगा संपावयेद्बृहती विश्वरूपा ॥ देवैः सेंद्रैर्मुनिभिर्मानवैश्च निषेविता सर्वकालं

समृद्ध्यै ॥ १६ ॥ पक्षादौ कृष्णपक्षे तु भूमौ संनिहिता भवेत् ॥ यावत्पुण्या ह्यमावास्या दिनानि दश मोहिनि ॥ १७ ॥ शुक्लप्रतिपदादेश्च
दिनानि दश संख्यया ॥ पाताले सन्निधानं तु कुरुते स्वयमेव हि ॥ १८ ॥ आरभ्य शुक्लैकादश्या दिनानि दश यानि तु ॥ पंचम्यं
तानि सा स्वर्गे भवेत्सन्निहिता सदा ॥ १९ ॥ कृते तु सर्वतीर्थानि त्रेतायां पुष्करं परम् ॥ द्वापरे तु कुरुक्षेत्रं कलौ गंगा विशिष्यते ॥ २० ॥
कलौ तु सर्वतीर्थानि स्वं स्वं वीर्यं स्वभावतः॥गंगायां प्रतिमुंचंति सा तु देवी न कुत्रचित् ॥२१॥गंगांभःकणदिग्धस्य वायोः संस्पर्शनादपि ॥
पापशीला अपि नराः परां गतिमवाप्नुयुः ॥ २२ ॥ योऽसौ सर्वगतो विष्णुश्चित्स्वरूपी जनार्दनः ॥ स एव द्रवरूपेण गंगांभो नात्र संशयः ॥ २३॥
ब्रह्महा गुरुहा गोघ्नः स्तेयी च गुरुतल्पगः ॥गंगांभसा च पूयंते नात्र कार्या विचारणा ॥ २४ ॥ क्षेत्रस्थमृद्धृतं वापि शीतमुष्णमथापि वा ॥ गांगेयं
तु हरेत्तोयं पापमामरणांतिकम् ॥ २५ ॥ वर्ज्यं पर्युषितं तोयं वर्ज्यं पर्युषितं दलम् ॥ न वर्ज्यं जाह्नवीतोयं न वर्ज्यं तुलसीदलम्
॥ २६ ॥ मेरोः सुवर्णस्य च सर्वरत्नैः संख्योपलानामुदकस्य वापि ॥ गंगाजलानां न तु शक्तिरस्ति वक्तुं गुणाख्यापरिमाणमत्र
॥ २७ ॥ तीर्थयात्राविधिं कृत्स्नमकुर्वाणोऽपि यो नरः ॥ गंगातोयस्य माहात्म्यात्सोऽप्यत्र फलभाग्भवेत् ॥ २८ ॥ चिंतामणिगुणाश्चापि
गंगायास्तोयबिंदवः ॥ विशिष्टा यत्प्रयच्छंति भक्तेभ्यो वांछितं फलम् ॥ २९ ॥ गंडूषमात्रतो भक्त्या सकृद्गंगांभसा नरः ॥ कामधेनु
स्तनोद्भूतान्भुंक्ते दिव्यरसान्दिवि ॥ ३० ॥ शालग्रामशिलायां यस्तु गंगाजलं क्षिपेत् ॥ अपहृत्य तमस्तीव्रं भाति सूर्यो यथोदये
॥ ३१ ॥ मनोवाक्कायजैर्ग्रस्तः पापैर्बहुविधैरपि ॥ वीक्ष्य गंगां भवेत्पूतः पुरुषो नात्र संशयः ॥ ३२ ॥ गंगातोयाभिषिक्तां तु भिक्षामश्नाति यः
सदा ॥ सर्पवत्कंचुकं मुक्त्वा पापहीनो भवेत्स वै ॥ ३३ ॥ हिमवद्विंध्यसदृशा राशयः पापकर्मणाम् ॥ गंगांभसा विनश्यंति विष्णुभक्त्या
यथापदः ॥ ३४ ॥ प्रवेशमात्रे गंगायां स्नानार्थं भक्तितो नृणाम् ॥ ब्रह्महत्यादिपापानि हाहेत्युक्त्वा प्रयांत्यलम् ॥ ३५ ॥ गंगातीरे वसेन्नित्यं
गंगातोयं पिबेत्सदा ॥ यः पुमान्स विमुच्येत पातकैः पूर्वसंचितैः ॥ ३६ ॥ यो वै गंगां समाश्रित्य नित्यं तिष्ठति निर्भयः ॥ स एव देवैर्मर्त्यै
श्च पूजनीयो महर्षिभिः ॥ ३७ ॥ किमष्टांगेन योगेन किं तपोभिः किमध्वरैः ॥ वास एव हि गंगायां सर्वतोऽपि विशिष्यते ॥ ३८ ॥ किं यज्ञैर्बहु
भिर्जाप्यैः किं तपोभिर्धनार्पणैः ॥ स्वर्गमोक्षप्रदा गंगा सुखसेव्या यतः स्थिता ॥३९ ॥ यज्ञैर्यमैश्च नियमैर्दानैः संन्यासतोऽपि वा ॥ न तत्फलमवा
प्नोति गंगां सेव्य यदाप्नुयात् ॥ ४० ॥ प्रभासे गोसहस्रेण राहुग्रस्ते दिवाकरे ॥ यत्फलं लभते मर्त्यो गंगायां तद्दिनेन वै ॥ ४१ ॥ अन्योपायांश्च

यस्त्यक्त्वा मोक्षकामः सुनिश्चितः ॥ गंगातीरे सुखं तिष्ठेत्स वै मोक्षस्य भाजनम् ॥ ४२ ॥ वाराणस्यां विशेषेण गंगा सद्यस्तु मोक्षदा ॥ प्रतिमासं
चतुर्दश्यामष्टम्यां चैव सर्वदा ॥ ४३ ॥ गंगातीरे निवासश्च यावज्जीवं च सिद्धिदः ॥ कृच्छ्राणि सर्वदा कृत्वा यत्फलं सुखमश्नुते ॥ ४४ ॥
सदा चांद्रायणं चैव तल्लभेज्जाह्नवीतटे ॥ गंगासेवापरस्येह दिवसार्द्धेन यत्फलम् ॥ ४५ ॥ न तच्छक्यं ब्रह्मसुते प्राप्तुं क्रतुशतैरपि ॥
सर्वयज्ञतपोदानयोगस्वाध्यायकर्मभिः ॥ ४६ ॥ यत्फलं तल्लभेद्भक्त्या गंगातीरनिवासतः ॥ यत्पुण्यं सत्यवचनैर्नैष्ठिकब्रह्मचारिणाम्
॥ ४७॥ यदग्निहोत्रिणां पुण्यं तत्तु गंगानिवासतः ॥ समातृपितृदाराणां कुलकोटिमनंतकम् ॥ ४८ ॥ गंगाभक्तिस्तारयते संसारार्णवतो ध्रुवम् ॥
संतोषः परमैश्वर्यं तत्त्वज्ञानं सुखात्मनाम् ॥ ४९ ॥ विनयाचारसंपत्तिर्गंगाभक्तस्य जायते ॥ कृतकृत्यो भवेन्मर्त्यो गंगां प्राप्यैव
केवलम् ॥ ५० ॥ तद्भक्तस्तत्परश्च स्यान्मृतो वापि न संशयः ॥ भक्त्या तज्जलसंस्पर्शी तज्जलं पिबते च यः ॥ ५१ ॥ अनायासेन हि नरो मोक्षो
पायं स विंदति ॥ दीक्षितः सर्वयज्ञेषु सोमपानं दिने दिने ॥ ५२॥ सर्वाणि येषां गंगायास्तोयैः कृत्यानि सर्वदा ॥ देहं त्यक्त्वा नरास्ते तु मोदंते
शिवसन्निधौ ॥ ५३ ॥ देवाः सोमार्कसंस्थानि यथा शक्रादयो मुखैः ॥ अमृतान्युपभुंजंति तथा गंगाजलं नराः ॥ ५४ ॥ कन्यादानैश्च विधिव
द्भूमिदानैश्च भक्तितः ॥ अन्नदानैश्च गोदानैः स्वर्णदानादिभिस्तथा ॥ ५५ ॥ रथाश्वगजदानैश्च यत्पुण्यं परिकीर्तितम् ॥ ततः शतगुणं पुण्यं
गंगांभश्चुलुकाशनात् ॥ ५६ ॥ चांद्रायणसहस्राणां यत्फलं परिकीर्तितम् ॥ ततोऽधिकफलं गंगातोयपानादवाप्यते ॥ ५७ ॥ गंडूषमात्रपाने
तु अश्वमेधफलं लभेत् ॥ स्वच्छंदं यः पिबेदंभस्तस्य मुक्तिः करे स्थिता ॥ ५८ ॥ त्रिभिः सारस्वतं तोयं सप्तभिस्त्वथ यामुनम् ॥ नार्मदं
दशभिर्मासैर्गांगं वर्षेण जीर्यति ॥ ५९ ॥ शास्त्रेणाकृततोयानां मृतानां क्वापि देहिनाम् ॥ तदुत्तरफलावाप्तिर्गंगायामस्थियोगतः ॥ ६० ॥
चांद्रायणसहस्रं तु यश्चरेत्कायशोधनम् ॥ यः पिबेत्तु यथेष्टं हि गंगाम्भः स विशिष्यते ॥ ६१ ॥ गंगां पश्यति यः स्तौति स्नाति भक्त्या
पिबेज्जलम् ॥ स स्वर्गं ज्ञानममलं योगं मोक्षं च विंदति ॥ ६२ ॥ यस्तु सूर्य्यांशुनिष्टप्तं गांगेयं पिबते जलम् ॥ गोमूत्रयावकाहाराद्गांगपानं
विशिष्यते ॥ ६३ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीवसुसंवादे गंगामाहात्म्यवर्णनं नामाष्टत्रिंशत्तमोऽध्यायः ॥ ३८ ॥ वसुरुवाच ॥
शृणु मोहिनि वक्ष्यामि गंगाया दर्शने फलम् ॥ यदुक्तं हि पुराणेषु मुनिभिस्तत्त्वदर्शिभिः ॥ १ ॥ भवंति निर्विषाः सर्पा यथा तार्क्ष्यस्य दश
नात् ॥ गंगासंदर्शनात्तद्वत्सर्वपापैः प्रमुच्यते ॥ २ ॥ सप्तावरान् सप्तपरान् पितॄंस्तेभ्यश्च ये परे ॥ पुमांस्तारयते गंगां वीक्ष्य स्पृष्ट्वावगाह्य

च ॥ ३ ॥ दर्शनात्स्पर्शनात्पानात्तथा गंगेति कीर्तनात् ॥ पुमान्पुनाति पुरुषाञ्छतशोऽथ सहस्रशः ॥ ४ ॥ ज्ञानमैश्वर्यमतुलं प्रतिष्ठायुर्य
शस्तथा ॥ शुभानामाश्रमाणां च गंगादर्शनजं फलम् ॥ ५ ॥ सर्वेन्द्रियाणां चांचल्यं व्यसनानि च पातकम् ॥निर्घृणत्वं च नश्यंति गंगादर्शन
मात्रतः ॥ ६ ॥ परहिंसां च कौटिल्यं परदोषाद्यवेक्षणम्॥दांभिकत्वं नृणां गंगादर्शनादेव नश्यति ॥ ७ ॥मुहुर्मुहुस्तथा पश्येत्स्पृशेद्वापि मुहुर्मुहुः॥
भक्त्या यदिच्छति नरः शाश्वतं पदमव्ययम् ॥ ८ ॥ वापीकूपतडागादिप्रपासत्रादिभिस्तथा ॥ अन्यत्र यद्भवेत्पुण्यं तद्गंगादर्शनाद्भवेत् ॥ ९ ॥
यत्फलं जायते पुंसां दर्शने परमात्मनः ॥ तद्भवेदेव गंगाया दर्शनाद्भक्तिभावतः ॥ १० ॥ नैमिषे च कुरुक्षेत्रे नर्मदायां च पुष्करे ॥ स्नानात्संस्पर्शना
सेव्य यत्फलं लभते नरः ॥ ११ ॥ तद्गंगादर्शनादेव कलौ प्राहुर्महर्षयः ॥अथ ते स्मरणस्यापि गंगाया भूपभामिनि ॥ १२ ॥ प्रवक्ष्यामि फलं
यत्तु पुराणेषु प्रकीर्तितम् ॥ अशुभैः कर्मभिर्युक्तान्मज्जमानान्भवार्णवे ॥ १३ ॥ पततो नरके गङ्गा स्मृता दूरात्समुद्धरेत् ॥ योजनानां सहस्रेषु
गंगां स्मरति यो नरः ॥१४ ॥ अपि दुष्कृतकर्मा हि लभते परमां गतिम् ॥ स्मरणादेव गंगायाः पापसंघातपंजरम् ॥ १५ ॥ भेदं सहस्रधा याति
गिरिर्वज्रहतो यथा ॥ गच्छंस्तिष्ठन्स्वपन्ध्यायञ्जाग्रद्भुंजन् हसन् रुदन् ॥१६॥यः स्मरेत्सततं गंगां स च मुच्येत बंधनात्॥ सहस्रयोजनस्थाश्च गंगां
भक्त्या स्मरंति ये ॥ १७ ॥ गंगागंगेति चाक्रुश्य मुच्यंते तेऽपि पातकात् ॥ ये च स्मरंति वै गंगां गंगाभक्तिपराश्च ये ॥१८॥ तेऽप्यशेषैर्महापापैर्मु
च्यंते नात्र संशयः ॥ भवनानि विचित्राणि विचित्राभरणाःस्त्रियः ॥ १९ ॥ आरोग्यं वित्तसंपत्तिर्गंगास्मरणजं फलम् ॥ मनसा संस्मरेद्यस्तु गंगां
दूरस्थितो नरः ॥ २० ॥ चांद्रायणसहस्रस्य स फलं लभते ध्रुवम् ॥ गङ्गा गङ्गा जपन्नाम योजनानां शते स्थितः ॥ २१ ॥ मुच्यते सर्वपापेभ्यो
विष्णुलोकं च गच्छति ॥ कीर्तनान्मुच्यते पापाद्दर्शनान्मंगलं लभेत् ॥ २२ ॥ अवगाह्य तथा पीत्वा पुनात्यासप्तमं कुलम् ॥ सप्तावरान्परान्सप्त
सप्ताथ परतः परान् ॥ २३ ॥ गंगा तारयते पुंसां प्रसंगेनापि कीर्तिता ॥ अश्रद्धयापि गंगाया यस्तु नामानुकीर्तनम् ॥ २४ ॥ करोति पुण्य
वाहिन्याः सोऽपि स्वर्गस्य भाजनम् ॥ सर्वावस्थां गतो वापि सर्वधर्मविवर्जितः ॥२५ ॥ गंगायाः कीर्तनेनैव शुभां गतिमवाप्नुयात्॥ ब्रह्महा गुरुहा
गोघ्नः स्पृष्टो वा सर्वपातकैः ॥ २६ ॥ गंगातोयं नरः स्पृष्ट्वा मुच्यते सर्वपातकैः ॥ कदा द्रक्ष्यामि तां गंगां कदा स्नानं लभे ह्यहम्॥२७॥इति पुंसा
भिलषिता कुलानां तारयेच्छतम्॥अथ स्नानफलं देवि गंगायाः प्रवदामि ते॥२८॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥स्नातस्य गंगासलिले
सद्यः पापं प्रणश्यति ॥ २९ ॥ अपूर्वपुण्यप्राप्तिश्च सद्यो मोहिनि जायते ॥ स्नातानां शुचिभिस्तोयैर्गांगेयैः प्रयतात्मनाम् ॥ ३० ॥ व्युष्टिर्भवति

या पुंसां न सा क्रतुशतैरपि ॥ अपहत्य तमस्तीव्रं यथा भात्युदये रविः ॥३१ ॥ तथापहत्य पाप्मानं भाति गंगाजलोक्षितः॥ एकेनैवापि विधिना
स्नानेन नृपसुन्दरि ॥ ३२ ॥ अश्वमेधफलं मर्त्यो गंगायां लभते ध्रुवम् ॥ अनेकजन्मसंभूतं पुंसः पापं प्रणश्यति ॥ ३३ ॥ स्नानमात्रेण गंगायाः
सद्यः स्यात्पुण्यभाजनम् ॥ अन्यस्थानकृतं पापं गंगातीरे विनश्यति ॥३४॥ गंगातीरे कृतं पापं गङ्गास्नानेन नश्यति ॥ रात्रौ दिवा च संध्यायां
गंगायां तु प्रयत्नतः ॥ ३५ ॥ स्नात्वाश्वमेधजं पुण्यं गृहेऽप्युद्धृततज्जलैः ॥ सर्वतीर्थेषु यत्पुण्यं सर्वेष्वायतनेषु च ॥ ३६ ॥ तत्फलं
लभते मर्त्यो गङ्गास्नानान्न संशयः ॥ महापातकसंयुक्तो युक्तो वा सर्वपातकैः ॥ ३७ ॥ गङ्गास्नानेन विधिवन्मुच्यते सर्वपातकैः ॥ गङ्गा
स्नानात्परं स्नानं न भूतं न भविष्यति ॥ ३८ ॥ विशेषतः कलियुगे पापं हरति जाह्नवी ॥ निहत्य कामजान्दोषान्कायवाक्चित्तसंभवान्
॥ ३९ ॥ गङ्गास्नानेन भक्त्या तु मोदते दिवि देववत् ॥ वर्षं स्नाति च गंगायां यो नरो भक्तिसंयुतः ॥ ४० ॥ तस्य स्याद्वैष्णवे लोके स्थितिः
कल्पं न संशयः ॥ आमृत्युं स्नाति गंगायां यो नरो नित्यमेव च ॥ ४१॥ समस्तपापनिर्मुक्तः समस्तकुलसंयुतः ॥ समस्तभोगसंयुक्तो विष्णुलोके
महीयते ॥ ४२ ॥ परार्द्धद्वितयं यावन्नात्र कार्या विचारणा ॥ गंगायां स्नाति यो मर्त्यो नैरंतर्येण नित्यदा ॥४३ ॥ जीवन्मुक्तः स चात्रैव मृतो
विष्णुपदं व्रजेत्॥प्रातःस्नानाद्दशगुणं पुण्यं मध्यंदिने स्मृतम्॥४४॥ सायंकाले शतगुणमनन्तं शिवसन्निधौ ॥ कपिलाकोटिदानाद्धि गंगास्नानं
विशिष्यते ॥ ४५ ॥ कुरुक्षेत्रसमा गंगा यत्र तत्रावगाहिता ॥ हरिद्वारे प्रयागे च सिंधुसंगे फलाधिका ॥ ४६ ॥ ये मदीयांशुसंतप्ते जले ते स्नांति
जाह्नवि ॥ ते भित्वा मंडलं यांति मोक्षं चेति रवेर्वचः ॥ ४७ ॥ यो गृहे स्वे स्थितोऽपि त्वां स्नाने संकीर्तयिष्यति॥ सोऽपि यास्यति नाकं वै
इत्याह वरुणश्च ताम्॥४८॥इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीचरिते गंगास्नानमाहात्म्यं नामैकोनचत्वारिंशोऽध्यायः ॥३९॥ वसुरुवाच ॥
अथ कालविशेषे तु गंगास्नानस्य ते फलम् ॥ कीर्तयिष्यामि वामोरु सावधाना निशामय ॥१ ॥ नैरंतर्येण गंगायां माघे स्नाति च यो नरः॥स
शक्रलोके सुचिरं कालं तिष्ठेत्सगोत्रजः ॥ २ ॥ ततो ब्रह्मपुरं याति कल्पकोटिशतायुतैः ॥ नैरंतर्येण विधिवद्गङ्गायां स्नाति यो नरः ॥३ ॥ षण्मास
मेककालाशी सकृदेवोत्तरायणे ॥ सोऽपि विष्णुपदं याति कुलानां शतमुद्धरन् ॥ ४ ॥ संक्रांतिषु तु सर्वासु स्नात्वा गङ्गाजले नरः ॥ विमानेनार्क
वर्णेन स व्रजेद्विष्णुमंदिरम् ॥ ५ ॥ विषुवेऽयनसंक्रांतौ विशेषात्फलमीरितम् ॥ तपःसमं कार्तिकेऽपि गङ्गास्नाने फलं विदुः ॥६॥ मेषप्रवेशार्ककाले
कार्तिक्यां वापि मोहिनि ॥ माघस्नानाधिकं प्राहुः कमलासनपूर्वकाः ॥ ७ ॥ संवत्सरस्नानजन्यं फलमक्षयके तिथौ ॥ कार्तिके वापि वैशाखे इति

प्राह पिता तव ॥ ८ ॥ मन्वादौ च युगादौ यत्प्रोक्तं गंगाजले फलम् ॥ स्नानेन याज्यवनिते त्रिमास्यापि च तत्फलम् ॥ ९ ॥ द्वादश्यां श्रवणर्क्षे च
अष्टम्यां पुष्ययोगतः ॥ आर्द्रायां च चतुर्दश्यां गंगास्नानं सुदुर्लभम् ॥१० ॥ पूर्णिमा माधवे पुण्या तथा कार्तिकमाघयोः ॥ अमावस्यास्तथैतेषां
गंगास्नाने सुदुर्लभाः ॥ ११ ॥ कृष्णाष्टम्यां सहस्रं तु शतं स्यात्सर्वपर्वसु ॥ अमायां च तथाष्टम्यां माघासितदले सति ॥ १२ ॥ अर्धोदयं तदा पर्व
किंचिन्न्यूनं महोदयः ॥ महोदये शतगुणं लक्षमर्द्धोदये स्मृतम् ॥ १३ ॥ स्नानं गंगाजले देवि ग्रहणाच्चन्द्रसूर्ययोः ॥ मासत्रयस्नानफलं फाल्गुनाषाढ
मासयोः ॥ १४ ॥जन्मर्क्षे तु कृते स्नाने गंगायां भक्तिभावतः ॥ जन्मप्रभृति पापं वै संचितं हि विनश्यति ॥१५॥ चतुर्दश्यां माघकृष्णे व्यतीपातश्च
दुर्लभः ॥ कृष्णाष्टम्यां विशेषेण वैधृतिर्जाह्नवीजले ॥ १६ ॥ माघं सकलमेवापि नरो यो विधिपूर्वकम् ॥ अरुणोदयके स्नायी स तु जातिस्मरो
भवेत् ॥ १७ ॥ सर्वशास्त्रार्थविज्ञानी नीरोगश्च भवेद्ध्रुवम् ॥ संक्रांत्यां पक्षयोरंते ग्रहणे चंद्रसूर्ययोः ॥ १८ ॥ गंगास्नातो नरः कामाद्ब्रह्मणः सदनं लभेत् ॥
इंदोर्लक्षगुणं प्रोक्तं रवेर्दशगुणं ततः ॥१९॥ गंगातीरे तु संप्राप्ता इंदोः कोटी रवेर्दश॥वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी॥गंगायां यदि लभ्येत
सूर्यग्रहशतैः समा॥२०॥ ज्येष्ठे मासि क्षितिसुतदिने शुक्लपक्षे दशम्यां हस्ते शैलादवतरदसौ जाह्नवी मर्त्यलोकम्॥पापान्यस्यां हरति हि तिथौ सा दशैषा
यगंगा पुण्यं दद्यादपि शतगुणं वाजिमेधक्रतोश्च॥२१॥महापातकसंघानि यानि पापानि संति मे॥गोविंदद्वादशीं प्राप्य तानि मे हन जाह्नवि॥२२॥
मघासंज्ञेन ऋक्षेण चंद्रः संपूर्णमंडलः ॥ गुरुणा याति संयोगं तन्महत्वं तिथेः स्मृतम् ॥ २३ ॥ गंगायां यदि लभ्येत सूर्यग्रहशतैः समा ॥ अथ
देशविशेषेण स्नानस्य फलमुच्यते ॥ २४ ॥ कुरुक्षेत्राद्दशगुणा यत्र तत्रावगाहिता ॥ कुरुक्षेत्राच्छतगुणा यत्र विंध्येन संयुता ॥ २५ ॥ विंध्या
च्छतगुणा प्रोक्ता काशीपुर्यां तु जाह्नवी ॥ सर्वत्र दुर्लभा गंगा त्रिषु स्थानेषु चाधिका ॥ २६ ॥ गंगाद्वारे प्रयागे च गंगासागरसंगमे ॥ एषु
स्नाता दिवं यांति ये मृतास्तेऽपुनर्भवाः ॥ २७ ॥ गंगाद्वारे कुशावर्ते स्नाने पुण्यफलं शृणु ॥ सप्तानां राजसूयानां फलं स्यादश्वमेधयोः ॥ २८ ॥
उषित्वा तत्र मासार्द्धं षण्णां विश्वजितां फलम् ॥ दशायुतानां तु गवां दानपुण्यं विदुर्बुधाः ॥ २९ ॥ सरोत्तमेऽथ गोविंदं रुद्रं कनखले स्थितम् ॥
स्नात्वा वाप्येषु गंगायां पुण्यमक्षयमाप्नुयात् ॥ ३० ॥ तीर्थं च सौकरं नाम महापुण्यं शुभे शृणु ॥ यस्मिन्नाविरभूत्पूर्वं वाराहाकृतिरच्युतः ॥ ३१ ॥
शतस्याग्निचितां पुण्यं ज्योतिष्टोमद्वयस्य च ॥ अग्निष्टोमसहस्रस्य फलमाप्नोति मानवः ॥ ३२ ॥ तत्रैव ब्रह्मणस्तीर्थे ज्योतिष्टोमायुतस्य च ॥
अश्वमेधत्रयस्यापि स्नातः पुण्यं लभेन्नरः ॥ ३३ ॥ कुब्जाख्यं तीर्थमनघं यत्र च व्याधयोऽखिलाः ॥ नश्यंति सर्वजन्मोत्थं पातकं चापि मोहिनि

॥ ३४ ॥ अत्रान्यत्कापिलं तीर्थं यत्र स्नातो नरः शुभे ॥ कपिलाष्टायुतस्यापि दानतुल्यफलं लभेत् ॥ ३५ ॥
गंगाद्वारे कुशावर्ते बिल्वके नीलपर्वते ॥ तीर्थे कनखले स्नात्वा धूतपापो व्रजेद्दिवम् ॥ ३६ ॥ पवित्रार्थं ततस्तीर्थं सर्वतीर्थोत्तमोत्तमम् ॥ द्वयो
र्विश्वजितोस्तत्र स्नानात्पुण्यं लभेन्नरः ॥ ३७ ॥ वेणीराज्यं ततस्तीर्थं सरयूर्यत्र गंगया ॥ सुपुण्यया महापुण्या स्वसा स्वस्रेव संगता ॥ ३८ ॥ हरे
र्दक्षिणपादाब्जक्षालनादमरापगा ॥ वामपादोद्भवा वापि सरयूर्मानसप्रसूः ॥ ३९ ॥ तीर्थे तत्रार्चयन् रुद्र विष्णु विष्णुत्वमाप्नुयात्॥ पञ्चाश्वमेधफलदं
स्नानं तत्र प्रकीर्तितम् ॥ ४० ॥ ततस्तु गांडवं तीर्थं गंडकी यत्र संगता ॥ गोसहस्रस्य दानं च तत्र स्नानं समं द्वयम् ॥ ४१ ॥ रामतीर्थं ततः
पुण्यं वैकुंठं यत्र सन्निधौ ॥ सोमतीर्थं ततः पुण्यं यत्रासौ नकुलो मुनिः ॥४२॥समभ्यर्च्य शिवं ध्यायन्गणतां तु समाययौ ॥ चंपकाख्यं पुण्यतीर्थं
यद्गंगोत्तरवाहिनी ॥ ४३ ॥ मणिकर्णिकया तुल्यं महापातकनाशनम् ॥ कलशाख्यं ततस्तीर्थं कलशादुत्थितो मुनिः ॥ ४४ ॥ अगस्त्यः पूजय
न्यत्र रुद्रं मुनिवरोऽभवत् ॥ सोमद्वीपं महापुण्यं तीर्थं वाराणसीसमम् ॥ ४५ ॥ सोमो यत्रार्चयन्नीशं रुद्रेण शिरसा धृतः ॥ विश्वामित्रस्य
भगिनी गंगया यत्र संगता ॥ ४६ ॥ तत्राप्लुतो नरो भूयाद्वासवस्य प्रियोऽतिथिः ॥ जह्नुह्रदे महातीर्थे स्नातो मर्त्यो हि मोहिनि ॥ ४७ ॥
एकविंशतिकुल्यानां तारको भवति ध्रुवम् ॥ तस्माददितितीर्थं च यत्रावापादितिर्हरिम् ॥ ४८ ॥ कश्यपात्तत्र सुभगे स्नानमाहुर्महोदयम् ॥
शिलोच्चयं महातीर्थं यत्र तप्त्वा तपः प्रजाः ॥ ४९ ॥ तृणादिभिः सह स्वर्गं यांति तीर्थगणाश्रयात् ॥ इंद्राणीनामतीर्थं स्याद्यत्रेंद्राणी तु वास
वम् ॥ ५० ॥ तपस्तप्त्वा पतिं लेभे सेव्यमेतत्प्रयागवत् ॥ पुण्यदं स्नातकं तीर्थं विश्वामित्रस्तपश्चरन् ॥ ५१ ॥ यत्र ब्रह्मर्षितां लेभे क्षत्त्रियस्तीर्था
सेवया ॥ प्रद्युम्नतीर्थं तपसा ख्यातं यत्र स्मरो हरेः ॥ ५२ ॥ प्रद्युम्ननामा पुत्रोऽभूत्परं तत्र महोदयम् ॥ ततो दक्षप्रयागं तु गंगातो यमुनागत
॥ ५३ ॥ स्नात्वा तत्राक्षयं पुण्यं प्रयाग इव लभ्यते ॥५४॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीवसुसंवादे गंगामाहात्म्ये स्थलविशेषस्नानफल
कथनं नाम चत्वारिंशत्तमोऽध्यायः ॥४०॥ वसुरुवाच ॥अथावगाहनादीनां कर्मणां फलमुच्यते ॥ सावधाना शृणुष्व त्वं ब्रह्मपुत्रि नृपप्रिये ॥ १ ॥
यैः पुण्यवाहिनी गंगा सकृद्भक्त्यावगाहिता ॥ तेषां कुलानां लक्षं तु भवात्तारयते शिवा ॥ २ ॥ सामान्यस्थानतो देवि तत्र संध्या ह्युपासिता॥पुण्यं
लक्षगुणं कर्तुं समर्था द्विजपावनी ॥ ३ ॥ दत्ताः पितृभ्यो यत्रापस्तनयैः श्रद्धयान्वितैः ॥ अक्षयां तु प्रकुर्वंति तृप्तिं मोहिनि दुर्लभाम् ॥ ४ ॥
यावंतश्च तिला मर्त्यैर्गृहीताः पितृकर्मणि ॥ तावद्वर्षसहस्राणि पितरः स्वर्गवासिनः ॥ ५ ॥ पितृलोकेषु ये केचित्सर्वेषां पितरः स्थिताः ॥ तर्प्यं

माणाः परां तृप्तिं यांति गंगाजलैः शुभैः ॥ ६ ॥ य इच्छेत्सफलं जन्म संततिं वा शुभानने ॥ स पितॄंस्तर्पयेद्गंगामभिगम्य सुरांस्तथा ॥ ७ ॥
ये मृता दुर्गता मर्त्यास्तर्पितास्तत्कुलोद्भवैः ॥ कुशैस्तिलैर्गांगजलैस्ते प्रयांति हरेः पदम् ॥ ८ ॥ स्वर्गसंस्थाश्च ये केचित्पितरः पुण्यशीलिनः ॥
ते तर्पिता गांगजलैर्मोक्षं यांति विधेर्वचः ॥ ९ ॥ मासं तर्पणमात्रेण पिंडसंपातनेन च ॥ गंगायां पितरः सर्वे सुप्रीताः सूर्यवर्चसः ॥ १० ॥ अप्सरो
गणसंयुक्तान्हेमरत्नविभूषितान् ॥ मुक्ताजालपरिच्छन्नान्वेणुवीणानिनादितान् ॥ ११ ॥ भेरीशंखमृदंगादिनिर्घोषान्स्रग्विभूषितान् ॥ गन्धर्वदेह
रुचिरान्दिव्यभोगसमन्वितान् ॥ १२ ॥ आरुह्य तु विमानाग्र्यान्ब्रह्मलोकं प्रयांति हि ॥ गंगायां तु नरः स्नात्वा यो नित्यं लिंगमर्चयेत् ॥ १३ ॥
एकेन जन्मना मोक्षं परमाप्नोति स ध्रुवम् ॥ अग्निहोत्राणि वेदाश्च यज्ञाश्च बहुदक्षिणाः ॥ १४ ॥ गंगायां लिंगपूजायाः कोट्यंशेनापि नो
समाः ॥ पितॄनुदिश्य वा देवान्गंगांभोभिः प्रसिंचयेत् ॥ १५ ॥ तृप्ताः स्युस्तस्य पितरो नरकस्थाश्च तत्क्षणात् ॥ मृत्कुंभात्ताम्रकुंभे
स्तु स्नानं दशगुणं स्मृतम् ॥ १६ ॥ रौप्यैः शतगुणं पुण्यं हैमैः कोटिगुणं स्मृतम् ॥ एवमर्घे च नैवेद्ये बलिपूजादिषु क्रमात् ॥ १७ ॥ पात्रां
तरविशेषेण फलं चैवोत्तरोत्तरम् ॥ विभवे सति यो मोहान्न कुर्याद्विधिविस्तरम् ॥ १८ ॥ न स तत्कर्मफलभाग्देवद्रोही प्रकीर्त्यते ॥
देवानां दर्शनं पुण्यं दर्शनात्स्पर्शनं वरम् ॥ १९ ॥ स्पर्शनादर्चनं श्रेष्ठं घृतस्नानमतः परम् ॥ प्राहुर्गंगाजलैः स्नानं घृतस्नानसमं बुधाः ॥ २० ॥
अर्घ्यं द्रव्यविशेषेण गंगातोयेन यः सकृत् ॥ मागधप्रस्थमात्रेण ताम्रपात्रस्थितेन च ॥ २१ ॥ देवताभ्यः प्रदद्यात्तु स्वकीयपितृभिः सह ॥
पुत्रपौत्रैश्च संयुक्तः स च वै स्वर्गमाप्नुयात् ॥ आपः क्षीरं कुशाग्राणि घृतं दधि तथा मधु ॥ २२ ॥ रक्तानि करवीराणि तथा वै रक्तचन्दनम् ॥
अष्टाङ्गैरेष युक्तोऽर्घो भानवे परिकीर्तितः ॥ २३ ॥ विष्णोः शिवस्य सूर्य्यस्य दुर्गाया ब्रह्मणस्तथा ॥ गंगातीरे प्रतिष्ठां तु यः करोति नरोत्तमः ॥ २४ ॥
तथैवायतनान्येषां कारयत्यपि शक्तितः ॥ अन्यतीर्थेषु करणात्कोटिकोटिगुणं भवेत् ॥ २५ ॥ गंगातीरसमुद्भूतमृदा लिंगानि शक्तितः ॥
सलक्षणानि कृत्वा तु प्रतिष्ठाप्य दिने दिने ॥ २६ ॥ मंत्रैश्च पत्रपुष्पाद्यैः पूजयित्वा च शक्तितः ॥ गंगायां निक्षिपेन्नित्यं तस्य पुण्यमनंतकम् ॥ २७ ॥
सर्वानंदप्रदायिन्यां गंगायां यो नरोत्तमः ॥ अष्टाक्षरं जपेद्भक्त्या मुक्तिस्तस्य करे स्थिता ॥ २८ ॥ नमो नारायणायेति प्रणवाद्यं नियम्य
च ॥ षण्मासं जपतः सर्वा ह्युपतिष्ठंति सिद्धयः ॥ २९ ॥ नमः शिवायेति मंत्रं सतारं विधिना तु यः ॥ चतुर्विंशतिलक्षं वै जपेत्साक्षात्स
शंकरः ॥ ३० ॥ पंचाक्षरी सिद्धविद्या शिव एव न संशयः ॥ अपवित्रः पवित्रो वा जपन्निष्पातको भवेत् ॥ ३१ ॥ पूजितायां तु गंगायां पूजिताः सर्व

देवताः ॥ तस्मात्सर्वप्रयत्नेन पूजयेदमरापगाम् ॥ ३२ ॥ चतुर्भुजां त्रिनेत्रां च सर्वावयवशोभिताम् ॥ रत्नकुंभासितांभोजवराभयकरां
शुभाम् ॥ ३३ ॥ श्वेतवस्त्रपरीधानां मुक्तामणिविभूषिताम् ॥ सुप्रसन्नां सुवदनां करुणार्द्रहृदंबुजाम् ॥ ३४ ॥ सुधाप्लावितभूपृष्ठां त्रैलोक्य
नमितां सदा ॥ ध्यात्वा जलमयीं गंगां पूजयन्पुण्यभाग्भवेत्॥३५॥मासार्द्धमपि यस्त्वेवं नैरंतर्येण पूजयेत् ॥ स एव देवसदृशो बहुकाले फलाधिकः
॥ ३६ ॥ वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी पुरा ॥ क्रोधात्पीता पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणात्॥३७॥तां तत्र पूजयेद्देवीं गंगां गगनमेखलाम् ॥
अक्षयायां तु वैशाखे कार्तिकेऽपि शुभानने ॥ ३८ ॥ रात्रौ जागरणं कृत्वा यवान्नैश्च तिलैस्तथा ॥ विष्णुं गंगां च शंभुं च पूजयेद्भक्ति
भावतः ॥ ३९ ॥ तथा सुगंधैः कुसुमैः कुंकुमागरुचंदनैः ॥ तुलसीबिल्वपत्राद्यैर्मातुलुंगफलादिभिः ॥ ४० ॥धूपैर्दीपैश्च नैवेद्यैर्यथा
विभवविस्तरैः ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ ४१ ॥ दिव्यं विमानमास्थाय विष्णुलोके महीयते ॥ ततो महीतलं प्राप्य
राजा भवति धार्मिकः ॥ ४२ ॥ भुक्त्वा विविधसौख्यानि रूपशीलगुणान्वितः ॥ देहांते ज्ञानवान्भूत्वा शिवसायुज्यमाप्नुयात् ॥ ४३ ॥
यज्ञो दानं तपो जप्यं श्राद्धं च सुरपूजनम् ॥ गंगायां तु कृतं सर्वं कोटिकोटिगुणं भवेत् ॥ ४४ ॥ यस्त्वक्षयतृतीयायां गंगातीरे ददाति वै ॥
घृतधेनुं विधानेन तस्य पुण्यफलं शृणु॥४५॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ सहस्रादित्यसंकाशः सर्वकामसमन्वितः॥४६॥ हेमरत्न
मये चित्रे विमाने हंसभूषिते ॥ स्वकीयपितृभिः सार्द्धं ब्रह्मलोके महीयते ॥ ४७ ॥ ततस्तु जायते विप्रो गंगातीरे धनान्वितः ॥ अंते तु
ब्रह्मविद्भूत्वा मोक्षमाप्नोत्यसंशयः ॥४८ ॥ तथैव गोप्रदानं च विधिना कुरुते तु यः॥ गोलोमसंख्यवर्षाणि स्वर्गलोके महीयते॥४९॥जायते च कुले
पश्चाद्धनधान्यसमाकुले॥ रत्नकांचनभूपूर्णे शीलविद्यायशोन्विते ॥५०॥ स भुक्त्वा विपुलान्भोगान्पुत्रपौत्रसमन्वितः ॥ मोक्षभागी भवेन्नूनं नात्र
कार्या विचारणा॥५१॥कपिला यदि दत्ता स्याद्विधिना वेदपारगे॥ नरकस्थान्पितॄन्सर्वान्स्वर्गं नयति वै तदा॥ ५२ ॥भूमिं निवर्तनमितां गंगातीरे
ददाति यः॥भूमिरेणुप्रमाणाब्दं ब्रह्मविष्णुशिवातिगः॥५३ ॥जायते च पुनर्भूमौ सप्तद्वीपपतिर्भवेत्॥भेरीशंखादिनिर्घोषैर्गीतवादित्रनिःस्वनैः ॥ ५४ ॥
स्तुतिभिर्मागधानां च सुतोऽसौ प्रतिबुध्यते ॥ सर्वसौख्यान्यवाप्येह सर्वधर्मपरायणः ॥ ५५ ॥ नरकस्थान्पितॄन्सर्वान्प्रापयित्वा दिवं तथा ॥
स्वर्गस्थितान्मोक्षयित्वा स्वयं ज्ञानी च मोहिनि ॥ ५६ ॥ अंते ज्ञानासिना छित्वा अविद्यां पंचपर्विकाम् ॥ परं वैराग्यमापन्नः परं ब्रह्माधि
गच्छति ॥५७॥ सप्तहस्तेन दंडेन त्रिंशद्दंडा निवर्तनम् ॥ त्रिभागहीनं गोचर्म मानमाह विधिः स्वयम्॥५८ ॥ ग्रामं गंगातटे यो वै ब्राह्मणेभ्यः प्रय

च्छति ॥ ब्रह्मविष्णुशिवप्रीत्यै दुर्गाया भास्करस्य च ॥ ५९ ॥ सर्वदानेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम् ॥ तपोव्रतेषु पुण्येषु यत्फलं परि
कीर्तितम् ॥६०॥सहस्रगुणितं तत्तु विज्ञेयं ग्रामदायिनः ॥ सूर्यकोटिप्रतीकाशे विमाने वैष्णवे पुरे ॥ ६१ ॥ क्रीडते शांकरे वापि स्तुतो देवा
दिभिर्मुदा ॥ भूमिरेण्वब्दसंख्याकं कालं स्थित्वा च तत्र सः ॥ ६२ ॥ अणिमादिगुणैर्युक्ते योगिनां जायते कुले ॥अक्षयायां तु यो
देवि स्वर्णं षोडशमासिकम् ॥ ६३ ॥ ददाति द्विजमुख्याय सोऽपि लोकेषु पूज्यते ॥ अन्नदानाद्विष्णुलोकं शैवं वै तिलदानतः ॥ ६४॥ ब्राह्मं
रत्नप्रदानेन गोहिरण्येन वासवम् ॥ गांधर्वं स्वर्णवासोभिः कीर्तिं कन्याप्रदानतः॥ ६५ ॥ विद्यया मुक्तिदं ज्ञानं प्राप्य यायान्निरंजनम् ॥गंगातीरे
नरो यस्तु नानावृक्षैः समन्वितम्॥६६॥आरामं कारयेद्भक्त्या गृहं चोपवनान्वितम् ॥ कदलीनारिकेरैश्च कपित्थाशोकचंपकैः ॥६७ ॥ पनसैर्बिल्ववृ
क्षैश्च कदंबाश्वत्थपाटलैः ॥आम्रैस्तालैर्नागरंगैर्वृक्षैरन्यैश्च संयुतम्॥६८॥जातीविजयसंयुक्तं तथा पाटलराजितम्॥निचितं कारयित्वैवमावासं पुष्पशोभि
तम्॥६९॥शिवाय विष्णवे वापि दुर्गायै भास्कराय च॥प्रयच्छति तथा भक्त्या सर्वार्थं परिकल्प्य च॥७०॥तस्य पुण्यफलं वक्ष्ये संक्षेपान्नतु विस्तरात्॥
यावंति तेषां वृक्षाणां पुष्पमूलफलानि च ॥ ७१ ॥ बीजानि च विचित्राणि तेषां मूलानि वै तथा॥ तावत्कल्पसहस्राणि तेषां लोकेषु संस्थितिः
॥ ७२ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीवसुसंवादे गङ्गामाहात्म्ये दानादिविधिवर्णनं नामैकचत्वारिंशत्तमोऽध्यायः ॥ ४१ ॥ मोहिन्यु
वाच ॥ धन्याहं कृतकृत्याहं सफलं जीवितं मम ॥ यच्छ्रुतं त्वन्मुखांभोजाद्गंगामाहात्म्यमुत्तमम् ॥ १ ॥अहो गङ्गासमं तीर्थं नास्ति किंचिद्धरा
तले ॥ यस्याः संदर्शनादीनामीदृशं पुण्यमीरितम् ॥२ ॥ गुडधेन्वादिधेनूनां विधानं च यथाक्रमम् ॥ तथा कथय विप्रेन्द्र भक्ताहं तव सर्वदा ॥३॥
वसिष्ठ उवाच ॥ तच्छ्रुत्वा मोहिनीवाक्यं वसुस्तस्याः पुरोहितः ॥ वेदागमानां तत्त्वज्ञः स्मयमान उवाच ह ॥ ४ ॥ वसुरुवाच ॥ शृणु मोहिनि
वक्ष्यामि यत्पृष्टं हि त्वया मम॥ गुडधेनुविधानं च यथा शास्त्रे प्रकीर्तितम् ॥ ५ ॥ कृष्णाजिनं चतुर्हस्तं प्राग्ग्रीवं विन्यसेद्भुवि ॥ गोमयेनोपलि
प्तायां कुशानास्तीर्य यत्नतः ॥ ६ ॥ प्राङ्मुखीं कल्पयेद्धेनुमुदक्पादां सवत्सकाम् ॥ उत्तमा गुडधेनुस्तु चतुर्भारैः प्रकीर्तिता ॥ ७ ॥ वत्सं भारेण
कुर्वीत भाराभ्यां मध्यमा स्मृता ॥ अर्द्धभारेण वत्सः स्यात्कनिष्ठा भारकेण तु ॥ ८ ॥ चतुर्थांशेन वत्सः स्याद् गृहवित्तानुसारतः ॥ प्रभुः
प्रथमकल्पस्य योऽनुकल्पेन वर्तयेत् ॥ ९ ॥ न सांपरायिकं तस्य दुर्मतेर्जायते फलम् ॥ धेनुवत्सौ घृतस्यैतौ सितश्लक्ष्णांबरावृतौ ॥ १० ॥ शुक्ति
कर्णाविक्षुपादौ शुद्धमुक्ताफलेक्षणौ ॥ सितसूत्रशिरालौ च सितकंबलकंबलौ ॥ ११ ॥ ताम्रगंडूकपृष्ठौ तौ सितचामरलोमकौ ॥ विद्रुमक्रमगो

पेतौ नवनीतस्तनान्वितौ ॥१२ ॥ कांस्यदोहाविंद्रनीलमणिकल्पिततारकौ ॥ सुवर्णशृंगाभरणौ शुद्धरौप्यखुरावुभौ ॥ १३ ॥ नानाफलसमायुक्तौ घ्राणगन्धकरंडकौ ॥ इत्येवं रचयित्वा तु धूपदीपैरथार्चयेत् ॥ १४ ॥ या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता ॥धेनुरूपेण सा देवी मम शांतिं प्रयच्छतु ॥ १५ ॥ देहस्था या च रुद्राणां शंकरस्य सदा प्रिया ॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ १६ ॥ विष्णोर्वक्षसि या लक्ष्मीः स्वाहारूपा विभावसोः ॥ चन्द्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रिये ॥१७॥ चतुर्मुखस्य या लक्ष्मीर्लक्ष्मीर्या धनदस्य च ॥लक्ष्मीर्या लोकपालानां सा धेनुर्वरदास्तु मे॥ १८॥ स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजा च या॥सर्वपापहरा धेनुः सा मे शांतिं प्रयच्छतु ॥ १९ ॥ एवमामंत्र्य तां धेनुं ब्राह्मणाय निवेदयेत् ॥विधानमेतद्धेनूनां सर्वासामिह पठ्यते॥ २० ॥ यास्तु पापविनाशिन्यः कीर्तिता दशधेनवः ॥ तासां स्वरूपं वक्ष्यामि शास्त्रोक्तं शृणु मोहिनि ॥ २१॥प्रथमा गुडधेनुः स्याद् घृतधेनुरथापरा ॥ तिलधेनुस्तृतीया च चतुर्थी जलसंज्ञिता ॥ २२ ॥ पञ्चमी क्षीरधेनुश्च षष्ठी मधुमयी स्मृता ॥ सप्तमी शर्कराधेनुर्दधिधेनुस्तथाष्टमी ॥ २३ ॥रत्नधेनुश्च नवमी दशमी तु स्वरूपतः ॥ कुंभाः स्युर्द्रवधेनूनां चेतरासां तु राशयः ॥ २४ ॥ सुवर्णधेनुमप्यत्र केचिदिच्छंति सूरयः ॥ नवनीतेन तैलेन तथा केऽपि महर्षयः ॥ २५ ॥एतदेव विधानं स्यादेत एव ह्युपस्कराः ॥ मन्त्रावाहनसंयुक्ताः सदा पर्वणि पर्वणि ॥ २६॥ यथाश्रद्धं प्रदातव्या भुक्तिमुक्तिफलप्रदाः ॥ अनेकयज्ञफलदाः सर्वपापहराः शुभाः ॥ २७ ॥ अयने विषुवे पुण्ये व्यतीपातेऽथवा पुनः ॥ युगादौ चैव मन्वादौ चोपरागादिपर्वसु ॥ २८ ॥ गुडधेन्वादयो देया भक्तिश्रद्धासमन्वितैः ॥ तीर्थेषु स्वगृहे वापि गंगातीरे विशेषतः ॥ २९ ॥ एवं दत्वा विधानेन धेनुं द्विजवराय च ॥ प्रदक्षिणीकृत्य विप्रं दक्षिणाभिः प्रतोष्य च ॥ ३० ॥ ऋत्विजः प्रीतिसंयुक्तो नमस्कृत्य विसर्जयेत् ॥ ततः संपूजयेद्गंगां विधिना सुसमाहितः ॥ ३१ ॥ अष्टमूर्तिधरां देवीं दिव्यरूपां निरीक्ष्य च ॥ शालितंदुलप्रस्थेन द्विप्रस्थपयसा तथा ॥ ३२ ॥ पायसं कारयित्वा च दत्वा मधु घृतं तथा॥ प्रत्येकं पलमात्रं च भक्तिभावेन संयुतः ॥ ३३ ॥ तत्पायसमपूपांश्च मोदका मंडलानि च ॥ तथा गुंजार्द्धमात्रं च सुवर्णं रूप्यमेव च ॥ ३४ ॥ चंदनागरुकर्पूरकुंकुमानि च गुग्गुलम् ॥ बिल्वपत्राणि दूर्वांश्च रोचना सितचंदनम् ॥ ३५ ॥ नीलोत्पलानि चान्यानि पुष्पाणि सुरभीणि च ॥ यथाशक्ति महाभक्त्या गंगायां चैव निक्षिपेत् ॥३६ ॥ मन्त्रेणानेन सुभगे पुराणोक्तेन चापि हि॥ॐगंगायै नारायण्यै शिवायै च नमो नमः॥३७ ॥एतदेव विधानं तु मासि मासि च मोहिनि ॥ पौर्णमास्याममायां वा कार्यं प्रातः समाहितैः ॥ ३८ ॥ वर्षं यस्तु नरो भक्त्या यथा

शत्त्यर्चयन्मुदा ॥ हविष्याशी मिताहारो ब्रह्मचर्यसमन्वितः॥३९॥दिने वापि तथा रात्रौ नियमेन च मोहिनि ॥ संवत्सरान्ते तस्यैषा गंगा दिव्य
वपुर्द्धरा ॥ ४० ॥दिव्यमाल्यांबरा चैव दिव्यरत्नविभूषिता॥प्रत्यक्षरूपा पुरतस्तिष्ठत्येव वरप्रदा ॥ ४१ ॥ एवं प्रत्यक्षरूपां तां गंगां दिव्यवपुर्द्धराम् ॥
दृष्ट्वा स्वचक्षुषा मर्त्यः कृतकृत्यो भवेच्छुभे ॥ ४२ ॥ यान्यान्कामयते मर्त्यः कामांस्तांस्तानवाप्नुयात् ॥ निष्कामस्तु लभेन्मोक्षं विप्रस्तेनैव
जन्मना ॥४३॥ एतद्विधानं च मयोदितं ते पृष्टं हि सर्वं गुडधेनुपूर्वम् ॥ गंगार्चनं मुक्तिकरं व्रतं च सांवत्सरं श्रीपतितुष्टिदं हि ॥ ४४ ॥
इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीवसुसंवादे गंगामाहात्म्ये गुडधेनुविधिकथनं नाम द्विचत्वारिंशत्तमोऽध्यायः ॥ ४२ ॥ वसिष्ठ उवाच ॥
वसोर्वचनमाकर्ण्य गङ्गामाहात्म्यसूचकम् ॥ पुनः पप्रच्छ राजेन्द्र तं विप्रं स्वपुरोहितम् ॥ १ ॥ मोहिन्युवाच ॥ श्रुतं विप्र मया
सर्वं गोदानादि शुभावहम् ॥ अधुना श्रोतुमिच्छामि गङ्गाव्रतमनुत्तमम् ॥ २ ॥ गङ्गादीनां पूजनं च स्थापनं तत्र वा द्विज ॥ किं
फलं वद सर्वज्ञ त्वामहं शरणं गता ॥ ३ ॥ अधुना गतिदाता त्वं वार्जितायाश्च बंधुभिः ॥ पत्या विरहिता चाहं पुत्रहीना विदांवर ॥ ४ ॥
त्वामेव शरणं प्राप्ता पितुर्वचनगौरवात् ॥ तद्भवान्प्रणताया मे गंगामाहात्म्यसंयुतम् ॥ देवताराधनं ब्रूहि यच्छ्रुत्वा मुच्यते ह्यघात् ॥ ५ ॥
वसिष्ठ उवाच ॥ तच्छ्रुत्वा मोहिनीवाक्यं वसुर्विप्रः प्रतापवान् ॥ सभाज्य मोहिनीं भूप प्राह वेदविदां वरः ॥ ६ ॥ वसुरुवाच ॥ साधु पृष्टं त्वया
देवि लोकानां हितकाम्यया ॥ ७ ॥ गंगामाहात्म्यमखिलं महापापप्रणाशनम् ॥ वृषध्वजेन कथितं शिवेन दयया पुरा ॥ ८ ॥ प्रीत्या देव्याभि
पृष्टेन गंगातीरनिवासिना ॥ देवैस्तु भुक्तं पूर्वाह्णे मध्याह्ने ऋषिभिस्तथा ॥ ९॥ अपराह्णे च पितृभिः शर्वर्यां गुह्यकादिभिः ॥सर्वा वेला अतिक्रम्य
नक्तभोजनमुत्तमम् ॥१० ॥ उपवासाद्वरं भैक्ष्यं भैक्ष्याद्वरमयाचितम् ॥ अंयाचिताद्वरं नक्तं तस्मान्नक्तं समाचरेत् ॥ ११ ॥ हविष्यभोजनं स्नानं
सत्यमाहारलाघवम् ॥ अग्निकार्य्यमधःशय्यां नक्ताशी षट् समाचरेत् ॥ १२ ॥ गंगातीरे माघमासे यः कुर्यान्नक्तभोजनम् ॥ शिवायतनपार्श्वे तु
कृशरं घृतसंयुतम् ॥ १३ ॥ नैवेद्यं च निवेद्यैव कृशरान्नं शिवस्य तु ॥ काष्ठमौनेन भुंजानो जिह्वालौल्यं विवर्जयेत्॥ १४ ॥ पलाशपत्रे भुञ्जानः शिवं
स्मृत्वा जितेंद्रियः॥ धर्मराजस्य देव्याश्च पृथक्पिंडं प्रकल्पयेत्॥ १५॥सोपवासश्चतुर्दश्यां भवेदुभयपक्षयोः ॥ पौर्णमास्यां तु गंधैश्च गंगायाः सलिलै
स्तथा ॥ १६॥ शिवं संस्नाप्य पयसा मध्वाज्यदधिभिः पृथक्॥तथैव हेमपुष्पं च लिंगमूर्ध्नि विनिक्षिपेत् ॥१७॥ ततो दद्यात्तु शक्त्यैवापूपञ्च घृत

पाचितम्॥तिलाढकं प्रगृह्याथ शिवलिंगोपरि क्षिपेत्॥ १८॥नीलोत्पलैश्च सर्वेशं पूजयेत्पंकजैरपि॥तदलाभे तु सौवर्णैः पंकजैः पूजयेद्धरम्॥ १९॥पायसं
चात्र मध्वक्तं घृतयुक्तं च गुग्गुलम् ॥ घृतदीपं तथा चैव चंदनाद्यैर्विलेपनम् ॥ २० ॥ दद्याद्भक्त्या महेशाय तथा पत्रफलानि च ॥ कृष्णगो
मिथुनं चैव सरूपं च निवेदयेत् ॥ २१ ॥ भोजयेद्ब्राह्मणानष्टौ मासांते तु सदक्षिणान् ॥ वर्जयेन्मधु मांसं च तं मासं ब्रह्मचर्यवान् ॥ २२ ॥ एवं
कृत्वा यथोद्दिष्टमेकवारमिदं व्रतम् ॥ यमैश्च नियमैर्युक्तः श्रद्धाभक्तिपरायणः ॥ २३ ॥ इह भोगानवाप्नोति प्रेत्य चानुत्तमां गतिम् ॥ इंद्र
नीलप्रतीकाशैर्विमानैः शिखिसंयुतैः ॥ २४ ॥ दिव्यरत्नमयैश्चैव दिव्यभोगसमन्वितैः ॥ गत्वा शिवपुरं रम्यं सर्वस्वकुलसंयुतः ॥ २५ ॥
सुहृद्भिर्विविधैश्चैव विविधानप्यभीप्सितान् ॥ भुक्त्वा भोगानशेषांश्च यावदाभूतसंप्लवम् ॥ २६ ॥ ततो भवति धर्मात्मा जंबूद्वीप
पतिस्तथा ॥ तत्र भुंक्ते समस्ताँश्च भोगान्विगतकल्मषः ॥ २७ ॥ सुरूपः सुभगश्चैव तथा विहितशासनः ॥ सर्वरोगविनिर्मुक्तः सो
ऽप्येतत्फलभाग्भवेत् ॥ २८ ॥ वैशाखे शुक्लपक्षे वा चतुर्दश्यां समाहितः ॥ शाल्यन्नं क्षीरसंयुक्तं यः कुर्यान्नक्तभोजनम् ॥ २९ ॥ शिवं संपूज्य
पुष्पाद्यैर्भोज्यं तु संनिवेद्य च ॥ काष्ठमौनेन भुंजानो वटकाष्ठेन वै तथा ॥३० ॥ मौनेन प्रयतो भूत्वा कुर्याद्वै दंतधावनम् ॥ शिवलिंगसमीपे तु
गंगातीरे निशि स्वपेत् ॥ ३१ ॥ पौर्णमास्यां प्रभाते तु गंगायां विधिना तथा ॥ स्नात्वोपवासं संकल्प्य कुर्य्याज्जागरणं निशि ॥ ३२ लिंगं
घृतेन संस्नाप्य पुष्पगंधादिभिस्तथा ॥ नैवेद्यधूपदीपैश्च संपूज्य वृषभं शुभम् ॥ ३३ ॥ सुश्वेतपुष्पवस्त्राद्यैर्हारिद्रैश्चंदनैस्तथा ॥ अलंकृत्य
विधानेन शिवाय विनिवेदयेत् ॥ ३४ ॥ ब्राह्मणांश्च यथाशक्ति पायसेन तु भोजयेत् ॥ एवं सकृच्च यो भक्त्या करोति श्रद्धयान्वितः ॥ ३५ ॥
लभते दैवपादोनयुगानां द्विसहस्रकम् ॥ तपः कृत्वा तु नियमाद्यत्पुण्यं तदसंशयम् ॥ ३६ ॥ हंसकुंदप्रभायुक्तैर्विमानैश्चन्द्रसन्निभैः ॥
सुश्वेतवृषयुक्तैश्च मुक्ताजालविभूषितैः ॥ ३७ ॥ स्वकीयपितृभिः सार्द्धं प्रयातीश्वरमंदिरम् ॥ नीलोत्पलसुगंधाभिः सुरूपाभिः समंततः
॥ ३८ ॥ कांताभिर्दिव्यरूपाभिर्भुक्त्वा भोगाननेकशः ॥ अनंतकालमैश्वर्ययुक्तो भूत्वा ततो भुवि ॥ ३९ ॥ जायते स महीपालः कीर्त्यैश्वर्यसम
न्वितः ॥ एकच्छत्रेण स महीं पालयत्याज्ञया सह॥४०॥अन्ते वैराग्यसंपन्नो गंगां स लभते पुनः॥स तया श्रद्धया युक्तो गंगायां मरणं लभेत्॥४१॥
तथा तत्र स्मृतिं लब्ध्वा मोक्षमाप्नोति स ध्रुवम् ॥ ज्येष्ठे मासि सिते पक्षे दशम्यां हस्तसंयुते ॥ ४२ ॥ गंगातीरे तु पुरुषो नारी वा भक्तिभावतः ॥

निशायां जागरं कृत्वा गंगां दशविधैस्ततः ॥४३ ॥ पुष्पैर्गंधैश्च नैवेद्यैः फलैश्च दशसंख्यया ॥ तथैव दीपैस्तांबूलैः पूजयेच्छ्रद्धयान्वितः ॥ ४४ ॥
स्नात्वा भक्त्या तु जाह्नव्यां दशकृत्वो विधानतः ॥ दशप्रसृति कृष्णांश्च तिलान्सर्पिश्च वै जले॥४५॥ सक्तुपिंडान्गुडपिंडान्दद्याच्च दशसंख्यया॥
ततो गंगातटे रम्ये हेम्ना रूप्येण वा तथा ॥ ४६ ॥ गंगायाः प्रतिमां कृत्वा वक्ष्यमाणस्वरूपिणीम् ॥ पद्मस्वस्तिकचिह्नस्य संस्थितस्य तथोपरि
॥ ४७ ॥वस्त्रस्रग्दामकंठस्य पूर्णकुंभस्य चोपरि ॥ संस्थाप्य पूजयेद्देवीं तदलाभे मृदादि वा ॥ ४८ ॥ अथ तत्राप्यशक्तश्चेल्लिखेत्पिष्टेन वै भुवि ॥
चतुर्भुजां सुनेत्रां च चन्द्रायुतसमप्रभाम् ॥ ४९ ॥ चामरैर्वीज्यमानां च श्वेतच्छत्रोपशोभिताम् ॥ सुप्रसन्नां च वरदां करुणार्द्रनिजांतराम् ॥ ५० ॥
सुधाप्लावितभूपृष्ठां देवादिभिरभिष्टुताम् ॥ दिव्यरत्नपरीतां च दिव्यमाल्यानुलेपनाम् ॥ ५१ ॥ ध्यात्वा जले यथाप्रोक्तां तत्रार्चायां तु पूजयेत् ॥
वक्ष्यमाणेन मंत्रेण कुर्यात्पूजां विशेषतः ॥ ५२ ॥ पंचामृतेन च स्नानमर्चायां तु विशिष्यते ॥ प्रतिमाग्रे स्थंडिले तु गोमयेनोपलेपयेत् ॥ ५३॥
नारायणं महेशं च ब्रह्माणं भास्करं तथा ॥ भगीरथं च नृपतिं हिमवंतं नगेश्वरम् ॥ ५४ ॥ गंधपुष्पादिभिश्चैव यथाशक्ति प्रपूजयेत् ॥ दशप्रस्थां
स्तिलान्दद्याद्दश विप्रेभ्य एव च ॥ ५५ ॥ दशप्रस्थान्यवान्दद्याद्दश गव्यैर्यथाहितान् ॥ मत्स्यकच्छपमंडूकमकरादिजलेचरान् ॥ ५६ ॥ कारि
तान्वै यथाशक्ति स्वर्णेन रजतेन वा ॥ तदलाभे पिष्टमयानभ्यर्च्य कुसुमादिभिः ॥ गंगायां प्रक्षिपेत्पूर्व्वं मंत्रेणैव तु मंत्रवित् ॥ ५७ ॥ रथयात्रादिने
तस्मिन्विभवे सति कारयेत् ॥रथारूढप्रतिकृतिं गंगायास्तूत्तरामुखाम् ॥ ५८ ॥ श्रमंत्या दर्शनं लोके दुर्लभं पापकर्मणाम् ॥ दुर्गाया रथयात्रास्ति
तथैवात्रापि कारयेत् ॥ ५९ ॥ एवं कृत्वा विधानेन वित्तशाठ्यविवर्जितः ॥ दशपापैर्वक्ष्यमाणैः सद्य एव विमुच्यते ॥ ६० ॥ अदत्तानामु
पादानं हिंसा चैवाविधानतः ॥ परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥ ६१ ॥ पारुष्यमनृतं वापि पैशुन्यं चापि सर्वशः ॥ असंबद्धप्रला
पश्च वाचिकं स्याच्चतुर्विधम् ॥ ६२ ॥ परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनम् ॥ वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम् ॥ ६३ ॥ एतै
र्दशविधैः पापैः कोटिजन्मसमुद्भवैः ॥ मुच्यते नात्र संदेहो ब्रह्मणो वचनं यथा ॥ ६४ ॥ दश त्रिंशच्च तान्पूर्वान्पितॄनेव तथापरान् ॥ उद्धर
त्येव संसारान्मंत्रेणानेन पूजिता ॥ ६५ ॥ " ॐ नमो दशहरायै नारायण्यै गंगायै नमः ॥ " इति मंत्रेण यो मर्त्यो दिने तस्मिन्दिवानिशम्
॥ ६६ ॥ जपेत्पंचसहस्राणि दशधर्मफलं लभेत् ॥ उद्धरेद्दश पूर्वाणि पराणि च भवार्णवात् ॥ ६७ ॥ वक्ष्यमाणमिदं स्तोत्रं विधिना

प्रतिगृह्य च ॥ गंगाग्रे तद्दिने जप्यं विष्णुपूजां प्रवर्तयेत् ॥ ६८ ॥ ॐ नमः शिवायै गंगायै शिवदायै नमोऽस्तु ते॥ नमोऽस्तु विष्णुरूपिण्यै गंगायै
ते नमो नमः ॥ ६९॥ सर्वदेवस्वरूपिण्यै नमो भेषजमूर्तये ॥ सर्वस्य सर्वव्याधीनां भिषक्श्रेष्ठ नमोऽस्तु ते ॥ ७० ॥ स्थाणुजंगमसंभूतविषहंत्रि
नमोऽस्तु ते ॥ संसारविषनाशिन्यै जीवनायै नमोनमः ॥ ७१॥ तापत्रितयहंत्र्यै च प्राणेश्वर्यै नमोनमः ॥ शांत्यै संतापहारिण्यै नमस्ते सर्वमूर्तये
॥ ७२ ॥ सर्वसंशुद्धिकारिण्यै नमः पापविमुक्तये ॥ भुक्तिमुक्तिप्रदायिन्यै भोगवत्यै नमोनमः ॥७३॥मंदाकिन्यै नमस्तेऽस्तु स्वर्गदायै नमोनमः॥
नमस्त्रैलोक्यमूर्तायै त्रिदशायै नमोनमः ॥ ७४ ॥ नमस्ते शुक्लसंस्थायै क्षेमवत्यै नमोनमः ॥ त्रिदशासनसंस्थायै तेजोवत्यै नमोऽस्तु ते ॥ ७५ ॥
मंदायै लिंगधारिण्यै नारायण्यै नमोनमः ॥ नमस्ते विश्वमित्रायै रेवत्यै ते नमोनमः ॥ ७६ ॥ बृहत्यै ते नमो नित्यं लोकधात्र्यै नमोनमः ॥
नमस्ते विश्वमुख्यायै नंदिन्यै ते नमोनमः ॥ ७७॥ पृथ्व्यै शिवामृतायै च विरजायै नमोनमः ॥ परावरगताद्यायै तारायै ते नमोनमः ॥ ७८ ॥
नमस्ते स्वर्गसंस्थायै अभिन्नायै नमोनमः ॥ शान्तायै ते प्रतिष्ठायै वरदायै नमोनमः ॥ ७९ ॥ उग्रायै सुखजल्पायै संजीविन्यै नमोनमः ॥
ब्रह्मगायै ब्रह्मदायै दुरितघ्न्यै नमोनमः ॥ ८० ॥ प्रणतार्तिप्रभंजिन्यै जगन्मात्रे नमोनमः ॥ विलुषायै दुर्गहंत्र्यै दक्षायै ते नमोनमः
॥ ८१ ॥ सर्वापत्प्रतिपक्षायै मंगलायै नमोनमः ॥ परापरे परे तुभ्य नमो मोक्षप्रदे सदा ॥ गंगा ममाग्रतो भूयाद्गंगा मे पार्श्वयोस्तथा
॥ ८२ ॥ गंगा मे सर्वतो भूयात्त्वयि गंगेऽस्तु मे स्थितिः ॥ आदौ त्वमंते मध्ये च सर्वा त्वं गांगते शिवे ॥ ८३ ॥ त्वमेव मूलप्रकृ
तिस्त्वं हि नारायणः प्रभुः ॥ गंगे त्वं परमात्मा च शिवस्तुभ्यं नमोनमः ॥ ८४ ॥ इतीदं पठति स्तोत्रं नित्यं भक्तिपरस्तु यः ॥
शृणोति श्रद्धया वापि कायवाचिकसंभवैः ॥ ८५ ॥ दशधा संस्थितैर्दोषैः सर्वैरेव प्रमुच्यते ॥ रोगी प्रमुच्यते रोगान्मुच्येतापन्न
आपदः ॥ ८६ ॥ द्विषद्भ्यो बंधनाच्चापि भयेभ्यश्च विमुच्यते ॥ सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते ॥ ८७ ॥ इदं स्तोत्रं गृहे
यस्य लिखितं परिपूज्यते ॥ नाग्निचौरभयं तत्र पापेभ्योऽपि भयं नहि ॥ ८८ ॥ तस्यां दशम्यामेतच्च स्तोत्रं गंगाजले स्थितः ॥ जपंस्तु
दशकृत्वश्च दरिद्रो वापि चाक्षमः ॥ ८९ ॥ सोऽपि तत्फलमाप्नोति गंगां संपूज्य भक्तितः ॥ पूर्वोक्तेन विधानेन फलं यत्परिकी
र्तितम् ॥९०॥ यथा गौरी तथा गंगा तस्माद्गौर्यास्तु पूजने॥विधिर्यो विहितः सम्यक्सोऽपि गंगाप्रपूजने॥९१॥यथा शिवस्तथा विष्णुर्यथा विष्णु

स्तथा ह्युमा ॥ उमा यथा तथा गंगा चात्र भेदो न विद्यते ॥ ९२ ॥ विष्णुरुद्रांतरं यश्च गंगागौर्यंतरं तथा ॥ लक्ष्मीगौर्यंतरं यश्च प्रब्रूते मूढधीस्तु
सः ॥ ९३ ॥ शुक्लपक्षे दिवा भूमौ गंगायामुत्तरायणे ॥ धन्या देहं विमुंचंति हृदयस्थे जनार्दने ॥ ९४ ॥ ये मुंचंति नराः प्राणान् गंगायां विधिनं
दिनि ॥ ते विष्णुलोकं गच्छंति स्तूयमाना दिविस्थितैः ॥ ९५॥ अर्द्धोदकेन जाह्नव्यां म्रियतेऽनशनेन यः॥स याति न पुनर्जन्म ब्रह्मसायुज्यमेति
च॥ ९६ ॥ या गतिर्योगयुक्तस्य सात्विकस्य मनीषिणः॥सा गतिस्त्यजतः प्राणान् गंगायां तु शरीरिणः॥९७॥अनशनं गृहीत्वा यो गंगातीरे मृतो
नरः॥सत्यमेव परं लोकमाप्नोति पितृभिः सह॥९८॥गंगायां मरणात्प्राणान्योःप्राज्ञस्त्यक्तुमिच्छति॥गतानि बहुजन्मानि यत्र यत्र मृतानि च॥९९॥
महाँश्चापि गतः कालो यत्र तत्रापि गच्छतः॥अत्रदूरे समीपे च सदृशं योजनद्वयम्॥१००॥गंगायां मरणेनेह नात्र कार्या विचारणा॥ज्ञानतोऽज्ञानतो
वापि कामतोऽकामतोऽपि वा ॥१०१॥गंगायां तु मृतो मर्त्यः स्वर्गं मोक्षं च विंदति॥प्राणेषूत्सृज्यमानेषु यो गंगां संस्मरेन्नरः॥१०२॥स्पृशेद्वा पाप
शीलोऽपि स वै याति परां गतिम् ॥१०३ ॥ गंगां गत्वा यैः शरीरं विसृष्टं प्राप्ता धीरास्ते तु देवैः समत्वम् ॥ तस्मात्सर्वान्प्रोह्य मुक्तिप्रदान्वै सेवे
द्गंगामा शरीरस्य पातम् ॥१०४ ॥ अंतरिक्षे क्षितौ तोये पापीयानपि यो मृतः ॥ ब्रह्मविष्णुशिवैः पूज्यं पदमक्षय्यमश्नुते ॥ १०५ ॥ यो धार्मि
ष्ठश्च सप्राणः प्रयतः शिष्टसंमतः ॥ चिंतयेन्मनसा गंगां स गतिं परमां लभेत् ॥ १०६ ॥ यत्र तत्र मृतो वापि मरणे समुपस्थिते ॥ भक्त्या
गंगां स्मरन्याति शैवं वा वैष्णवं पुरम् ॥ १०७ ॥ शंभोर्जटाकलापात्तु विनिष्क्रांतातिकर्कशात् ॥ प्लावयित्वा दिवं निन्ये या पापान्सगरात्म
जान् ॥ १०८ ॥ यावंत्यस्थीनि गंगायां तिष्ठंति पुरुषस्य वै ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ १०९ ॥ गगातोयें तु यस्यास्थि नीत्वा
प्रक्षिप्यते नरैः ॥ तत्कालमादितः कृत्वा स्वर्गलोके भवेत्स्थितिः ॥ ११० ॥ गंगातोये तु यस्यास्थि प्राप्यते शुभकर्मणः ॥ न तस्य पुनरावृत्ति
र्ब्रह्मलोकात्कथंचन ॥१११॥ दशाहाभ्यंतरे यस्य गंगातोयेऽस्थि संगतम् ॥ गंगायां मरणे यादृक्तादृक्फलमवाप्नुयात् ॥ ११२ ॥ स्नात्वा ततः
पञ्चगव्येन सिक्त्वा हिरण्यमध्वाज्यतिलैर्नियोज्य ॥ तदस्थिपिंडं पुटके निधाय पश्यन् दिशं प्रेतगणोपगूढाम् ॥ ११३ ॥ नमोऽस्तु धर्माय
वदन्प्रविश्य जलं स मे प्रीत इति क्षिपेच्च ॥ स्नात्वा ततस्तीर्थवटाक्षयं च दृष्ट्वा प्रदद्यादथ दक्षिणां तु ॥ ११४ ॥ एवं कृत्वा प्रेतपुरे स्थितस्य
स्वर्गे गतिः स्यात्तु महेंद्रतुल्या ॥ ११५ ॥ प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयम् ॥तत्र नारायणः स्वामी नान्यः स्वामी कदाचन ॥ ११६ ॥

न तत्र प्रतिगृह्णीयात्प्राणैः कंठगतैरपि ॥ भाद्रशुक्लचतुर्दश्यां यावदाक्रमते जलम् ॥ ११७ ॥ तावद्गर्भ विजानीयात्तद्दूरं तीरमुच्यते ॥
सार्द्धहस्तशतं यावद्गर्भस्तीरं ततः परम् ॥ ११८ ॥ इति केषां मतं देवि श्रुतिस्मृतिषु संमतम् ॥ तीराद्गव्यूतिमात्रं तु परितः क्षेत्रमुच्यते ॥ ११९ ॥
तीरं त्यक्त्वा वसेत्क्षेत्रे तीरे वासो न चेष्यते ॥ एकयोजनविस्तीर्णा क्षेत्रसीमा तटद्वयात् ॥ १२० ॥ गंगासीमां न लंघति पापान्यप्यखिलान्यपि ॥
तां तु दृष्ट्वा पलायंते यथा सिंहं वनौकसः ॥ १२१ ॥ यत्र गंगा महाभागे रामशंभुतपोवनम् ॥ सिद्धक्षेत्रं तु तज्ज्ञेयं समन्तात्तु त्रियोजनम् ॥ १२२ ॥
तीर्थे न प्रतिगृह्णीयात्पुण्येष्वायतनेषु च ॥ निमित्तेषु च सर्वेषु तन्निवृत्तो भवेन्नरः ॥ १२३ ॥ तीर्थे यः प्रतिगृह्णाति पुण्येष्वायतनेषु च ॥ निष्फलं
तस्य तत्तीर्थं यावत्तद्धनमुच्यते ॥ १२४ ॥ गंगाविक्रयणाद्देवि विष्णोर्विक्रयणं भवेत् ॥ जनार्दने तु विक्रीते विक्रीतं भुवनत्रयम् ॥ १२५ ॥ गंगा
तीरसमुद्भूतां मृदं मूर्ध्ना बिभर्ति यः ॥ बिभर्ति रूपं सोऽर्कस्य तमोनाशाय केवलम् ॥ १२६ ॥ गंगापुलिनजां धूलिमास्तीर्याथ निजान् पितॄन् ॥ प्रीणयन्यो
नरः पिंडान्दद्यात्तान् स्वर्नयेदपि ॥ १२७ ॥ इदं तेऽभिहितं भद्रे गंगामाहात्म्यमुत्तमम् ॥ पठन् शृण्वन्नरो ह्येति तद्विष्णोः परमं
पदम् ॥ १२८ ॥ नित्यं जप्यमिदं भक्त्या प्रयतैः श्रद्धयान्वितैः ॥ वैष्णवीं गतिमिच्छद्भिः शैवीं वा विधिनंदिनि ॥ १२९ ॥ इति श्रीबृहन्नार
दीयपुराणोत्तरभागे मोहिनीवसुसंवादे गंगामाहात्म्ये पूजादिकथनं नाम त्रिचत्वारिंशत्तमोऽध्यायः ॥ ४३ ॥ वसिष्ठ उवाच ॥ ततस्तु मोहिनी भूप
श्रुत्वा माहात्म्यमुत्तमम् ॥ गंगायाः पापनाशिन्याः पुनः प्राह पुरोहितम् ॥ १ ॥ मोहिन्युवाच ॥ त्वया चानुगृहीतास्मि भगवन्ननुकंपया ॥ यदुक्तं
पुण्यमाख्यानं गंगायाः पापशोधनम् ॥ २ ॥ गयातीर्थं तु विख्यातं कथं लोके द्विजोत्तम ॥ तदहं श्रोतुमिच्छामि कृपां कृत्वाधुना वद ॥ ३ ॥ वसुरुवाच ॥ पितृ
तीर्थं गयानाम सर्वतीर्थवरं स्मृतम् ॥ यत्रास्ते देवदेवेशः स्वयमेव पितामहः ॥ ४ ॥ यत्रैषा पितृभिर्गीता गाथा योगमभीप्सुभिः ॥ एष्टव्या बहवः पुत्रा यद्येको
ऽपि गयां व्रजेत् ॥ ५ ॥ यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥ सारात्सारतरं देवि गयामाहात्म्यमुत्तमम् ॥ ६ ॥ प्रवक्ष्यामि समासेन भुक्तिमुक्तिप्रदं
शृणु ॥ गयासुरोऽभवत्पूर्वं वीर्यवान्परमः स च ॥ ७ ॥ तपश्चक्रे महाघोरं सर्वभूतोपतापनम् ॥ तत्तपस्तापिता देवास्तद्वधार्थं हरिं गताः ॥ ८ ॥ शरणं
हरिरूचे तान्भवितव्यं शिवात्मभिः ॥ पातितस्य महान्देहे तथेत्यूचुः सुरा हरिम् ॥ ९ ॥ कदाचिच्छिवपूजार्थं क्षीराब्धेः कमलानि च ॥ आनीय निकटे
देशे शयनं चाकरोद्धरेः ॥ १० ॥ विष्णुमायाविमूढोऽसौ गदया विष्णुना हतः ॥ ततो गदाधरो विष्णुर्गयायां मुक्तिदः स्मृतः ॥ ११ ॥ तस्य देहे लिंग

रूपी स्थितः शुद्धः पितामहः ॥ विष्णुवाहार्थमर्यादां पुण्यक्षेत्रं भविष्यति ॥ १२ ॥ यज्ञं श्राद्धं पिंडदानं स्नानादि कुरुते नरः ॥ स स्वर्गं ब्रह्मलोकं
वा गच्छेन्न नरकं नरः ॥ १३ ॥ गयातीर्थं परं ज्ञात्वा योगं चक्रे पितामहः ॥ ब्राह्मणान्पूजयामास ऋषींश्च समुपागतान् ॥ १४ ॥ नदीं सरस्वतीं
सृष्ट्वा स्थितो व्याप्तदिगंतरः ॥ भक्ष्यभोज्यफलादींश्च कामधेनूस्तथासृजत् ॥ १५ ॥ पंचक्रोशं गयातीर्थं ब्राह्मणेभ्यो धनं ददौ ॥ धर्मयागे
तु लोभाद्वै प्रतिगृह्य धनादिकम् ॥ १६ ॥ स्थिता विप्रास्तदा शप्ता गयायां ब्रह्मणा ततः ॥ मा भूत्त्रिपुरुषी विद्या माभूत्त्रिपुरुषं धनम् ॥ १७ ॥
युष्माकं स्याद्धि विरसा नदी पाषाणपर्वतः॥स तैस्तु प्रार्थितो ब्रह्मा तीर्थानि कृतवान्प्रभुः॥ १८॥लोकाः पुण्या गयायां वै श्राद्धेन ब्रह्मलोकगाः॥युष्मा
न्ये पूजयिष्यंति तैरहं पूजितः सदा ॥ १९ ॥ ब्रह्मज्ञानं गयाश्राद्धं गोगृहे मरणं तथा ॥ वासः पुंसां कुरुक्षेत्रे मुक्तिरेषा चतुर्विधा ॥ २०॥ समुद्राः
सरितः सर्वे वापीकूपह्रदास्तथा ॥ स्नातुकामा गयातीर्थं देवि यांति न संशयः ॥ २१ ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ पापं
तत्संगजं सर्वं गयाश्राद्धाद्विनश्यति ॥ २२ ॥ असंस्कृता मृता ये च पशुभिः प्रहताश्च ये ॥ सर्पदष्टा गयाश्राद्धान्मुक्ताः स्वर्गं व्रजन्ति ते ॥ २३॥
गयायां पिंडदानेन यत्फलं लभते नरः ॥ न तच्छक्यं मया वक्तुं कल्पकोटिशतैरपि ॥ २४ ॥ अत्रैव श्रूयते देवि इतिहासः पुरातनः॥तं प्रवक्ष्यामि
सुभगे शृणुष्वैकाग्रमानसा ॥ २५ ॥ त्रेतायुगे वै नृपतिर्बभूव विशालनामा स पुरीं विशालाम् ॥ उवास धन्यो धृतिमानपुत्रः स्वयं विशालाधिपति
र्द्विजाग्र्यान् ॥२६॥ पप्रच्छ पुत्रार्थममित्रहंता तं ब्राह्मणाः प्रोचुरदीनसत्वाः ॥ राजन् पितॄंस्तर्पय पुत्रहेतोर्गत्वा गयायां विधिवत्तु पिंडैः ॥ २७ ॥
ध्रुवं ततस्ते भविता तु वीर सहस्रदाता सकलक्षितीशः ॥ इतीरितो विप्रगणैः स हृष्टो राजा विशालाधिपतिः प्रयत्नात् ॥ २८ ॥ समस्ततीर्थप्रवरां
द्विजेन गयामियात्तद्गतमानसः सन् ॥ आगत्य तीर्थप्रवरं सुतार्थी गयाशिरो यागपरः पितॄणाम् ॥ २९ ॥ पिंडप्रदानं विधिना प्रयच्छत्तावद्वियत्युत्त
ममूर्तियुक्तान् ॥ पश्यन् स पुंसः सितरक्तकृष्णानुवाच राजा किमिदं भवंतः ॥ ३० ॥ संमुह्यते शंसत सर्वमेतत्कुतूहलं मे मनसि प्रवृत्तम् ॥
॥ सित उवाच ॥ अहं सितस्ते जनकोऽस्मि राजन्नाम्ना च वर्णेन च कर्मणा च ॥ ३१ ॥ अयं च मे जनको रक्तवर्णो नृशंसकृद्ब्रह्महा पापकारी॥
अतः परं शृणु प्रपितामहश्च कृष्णो नाम्ना कर्मणा वर्णतश्च ॥ ३२ ॥ एतेन कृष्णेन हता पुरा वै जन्मन्यनेका ऋषयः पुराणाः ॥ एतौ स्मृतौ
द्वावपि पितृपुत्रौ अवीचिसंज्ञं नरकं प्रविष्टौ ॥ ३३ ॥ अतः परोऽयं जनकः परोऽस्य तत्कृष्णवक्त्रावपि दीर्घकालम् ॥ अहं च शुद्धेन निजेन

कर्मणा शक्रासनं प्राप्य सुदुर्लभं तत् ॥ ३४ ॥ त्वया पुनर्मंत्रविदा गयायां पिंडप्रदानेन बलादिमौ च ॥ मोक्षायितौ तीर्थवरप्रभावाद
वीचिसंज्ञं नरकं गतौ तौ ॥ ३५ ॥पितॄन् पितामहांश्चैव तथैव प्रपितामहान् ॥ प्रीणयामीति यत्तोयं त्वया दत्तमरिंदम ॥ ३६ ॥
तेनास्मद्युगपद्योगो जातो वाक्येन सत्तम ॥ तीर्थप्रभावाद्गच्छामः पितृलोकं न संशयः॥ ३७ ॥ तत्र पिंडप्रदानेन एतौ तव पितामहौ ॥
त्वद्गतावपि संसिद्धौ पापाद्विकृतलिंगकौ ॥ ३८ ॥ एतस्मात्कारणात्पुत्र अहमेतौ प्रगृह्य तु ॥ आगतोऽस्मि भवंतं वै द्रष्टुं यास्यामि
सांप्रतम् ॥ ३९ ॥ तीर्थप्रभावाद्यत्नेन ब्रह्मघ्नस्यापि वै पितुः ॥ गयायां पिंडदानेन कुर्यादुद्धरणं सुतः ॥ ४० ॥ इत्येवमुक्त्वा तु पिता
सितोऽस्य सार्द्धं च ताभ्यां हि पितामहाभ्याम् ॥ जगाम सद्यो हि सुतं विशालं संयोज्य चाशीर्भिरपि स्वलोकम् ॥ ४१ ॥ सकृद्गयाभिगमनं
सकृत्पिंडप्रपातनम् ॥ दुर्लभं किं पुनर्नित्यमस्मिन्नेव व्यवस्थितिः ॥ ४२ ॥क्रियते पतितानां तु गते संवत्सरे क्वचित् ॥ देशकालप्रमाणत्वाद्गया
कूपे स्वबंधुभिः॥ ४३ ॥ प्रेतराजोऽथ वणिजं कंचित्प्राह स्वमुक्तये ॥ गयातीर्थं तु दृष्ट्वा त्वं स्नात्वा शौचसमन्वितः ॥४४॥ मम नाम समुद्दिश्य
पिंडनिर्वपणं कुरु ॥ तत्र पिंडप्रदानेन प्रेतभावादहं सुखम् ॥ ४५ ॥ मुक्तस्तु सर्वदातॄणां प्राप्स्यामि शुभलोकताम् ॥ इत्येवमुक्त्वा वणिजं प्रेत
राजोऽनुगैः सह ॥ ४६ ॥ स्वनामानि यथान्यायं सम्यगाख्यातवान्ग्रहः ॥उपार्जयित्वा प्रययौ गयाशीर्षमनुत्तमम् ॥ ४७ ॥ पांशुनिर्वपण चक्रे
प्रेतानामनुपूर्वशः ॥ चकार वसुदानं च पितॄन्कृत्वा पुरःसरान् ॥ ४८ ॥ आत्मनोऽसौ महाबुद्धिर्विधिनापि तिलैर्विना ॥ पिंडनिर्वपणं चक्रे तथा
न्यानपि गोत्रजान् ॥ ४९ ॥ एवं दत्ते तु वै पिंडे वणिजा प्रेतभावतः ॥ विमुक्ता द्विजतां प्राप्य ब्रह्मलोकं ततो गताः ॥ ५० ॥ पायसं
खड्गमांसं च पुत्रैर्दत्तं पितृक्षयं ॥ कृष्णो लोहस्तथा छाग आनंत्याय प्रकल्पते ॥ ५१ ॥ गयायामक्षयं श्राद्धं जपहोमतपांसि च ॥
पितृक्षये हि तत्पुत्रैः कृतमानंत्यतां व्रजेत् ॥५२॥कांक्षंति पितरः पुत्रान्नरकस्य भयार्दिताः॥गयां यास्यति यः पुत्रः सोऽस्मान्संतारयिष्यति॥ ५३ ॥
गयायां धर्मपृष्ठे च सदसि ब्रह्मणस्तथा॥ गयाशीर्षेऽक्षयवटे पितॄणां दत्तमक्षयम्॥५४॥ब्रह्मारण्यं धर्मपृष्ठं धेनुकारण्यमेव च॥दृष्ट्वैतानि पितॄंश्चार्च्य
वंश्यान्विशतिमुद्धरेत् ॥ ५५ ॥ महाकल्पकृतं पापं गयां प्राप्य विनश्यति ॥ गवि गृध्रवटे चैव श्राद्धं दत्तं महाफलम् ॥ ५६ ॥ मतंगस्य
पदं तत्र दृश्यते सर्वमानुषैः ॥ ख्यापितं धर्मसर्वस्वं लोकस्यैव निदर्शनात् ॥ ५७ ॥ तत्पंकजवनं पुण्यं पुण्यवद्भिर्निषेवितम् ॥यस्मिन्पांडुर्विशत्येव

तीर्थं सर्वनिदर्शनम् ॥ ५८ ॥ तृतीयां तथा पादे निक्षीरायाश्च मण्डले ॥ महाह्रदे च कौशिक्यां दत्तं श्राद्धं महाफलम् ॥ ५९ ॥ मुण्डपृष्ठे पदं
न्यस्तं महादेवेन धीमता ॥ बहुवर्षशतं तप्तं तपस्तीर्थेषु दुष्करम् ॥ ६० ॥ अल्पेनाप्यत्र कालेन नरो धर्मपरायणः ॥ पाप्मानमुत्सृजत्याशु जीर्णां
त्वचमिवोरगः ॥ ६१ ॥ नाम्ना कनकनंदेति तीर्थं तत्रैव विश्रुतम् ॥ उदीच्यां मुण्डपृष्ठस्य ब्रह्मर्षिगणसेवितम् ॥ ६२ ॥ तत्र स्नात्वा दिवं
यांति स्वशरीरेण मानवाः ॥ दत्तं तत्र सदा श्राद्धमक्षयं समुदाहृतम् ॥ ६३ ॥ स्नात्वा दिनत्रयं तत्र निःक्षीरायां सुलोचने ॥ मानसे सरसि स्नात्वा
श्राद्धं तत्र समाचरेत् ॥ ६४ ॥ उत्तरं मानसं गत्वा सिद्धिं प्राप्नोत्यनुत्तमाम् ॥ यस्तत्र निर्वपेच्छ्राद्धं यथाशक्ति यथाबलम् ॥ ६५ ॥ कामा
न्संलभते दिव्यान्मोक्षोपायांश्च कृत्स्नशः ॥ ततो ब्रह्मसिरो गच्छेद्ब्रह्मावश्योपशोभितम् ॥ ६६ ॥ ब्रह्मलोकमवाप्नोति प्रभातामेव शर्वरीम् ॥
ब्रह्मणा तत्र सरसि यूपः पुण्यः प्रकल्पितः ॥ ६७ ॥ यूपं प्रदक्षिणीकृत्य वाजपेयफलं लभेत ॥ ततो गच्छेत्तु सुभगे धेनुकं लोकविश्रुतम्
॥ ६८ ॥ एकरात्रोषितो यत्र प्रयच्छेत्तिलधेनुकाम् ॥ सर्वपापविनिर्मुक्तः सोमलोकं व्रजेद्ध्रुवम् ॥ ६९ ॥ तत्र चिह्नं महाभागे अद्यापि
महदद्भुतम् ॥ कपिला सह वत्सेन पर्वते विचरत्युत ॥ ७० ॥ पदानि तत्र दृश्यंते सवत्सायाश्च मोहिनि ॥ सवत्सायाः प्रदृष्टेषु पदेषु
नरपुंगवैः ॥ ७१ ॥ यत्किंचिदशुभं कर्म तेषां तन्नश्यति क्षणात् ॥ ततो गृध्रवटं गच्छेत्स्थानं देवस्य धीमतः ॥ ७२ ॥ स्नायीत
भस्मना तत्र अभिगम्य वृषध्वजम् ॥ ब्राह्मणानां भवेद्देवि व्रतं द्वादशवार्षिकम् ॥ ७३ ॥ इतरेषां तु वर्णानां सर्वं पापं प्रणश्यति ॥ उद्यंतं च ततो
गच्छेत्पर्वतं गीतनादितम् ॥ ७४ ॥ सावित्र्यास्तु पदं यत्र दृश्यते पुण्यदं महत् ॥ तत्र संध्यामुपासीत ब्राह्मणः शंसितव्रतः ॥ ७५ ॥ उपासिता
भवेत्संध्या तेन द्वादशवार्षिकी ॥ योनिद्वारं च तत्रैव विद्यते विधिनंदिनि ॥ ७६ ॥ तत्राधिगम्य मुच्येत पुरुषो योनिसंकटात् ॥ शुक्लकृष्णावुभौ
पक्षौ गयायां यो वसेन्नृपः ॥ ७७ ॥ पुनात्यासप्तमं चैव कुलान्यत्र न संशयः ॥ ततो गच्छेच्च सुभगे धर्मपृष्ठं महाफलम् ॥ ७८ ॥ यत्र धर्मः स्थितः साक्षात्पितृलो
कस्य पालकः ॥ अभिगम्य ततस्तत्र वाजिमेधफलं लभेत् ॥ ७९ ॥ ततो गच्छेत मनुजो ब्रह्मणस्तीर्थमुत्तमम् ॥ तत्राधिगम्य ब्रह्माणं राजसूयफलं लभेत्
॥ ८० ॥ फल्गुतीर्थं च विख्यातं बहुमूलफलान्वितम् ॥ कौशिकी च नदी यत्र श्राद्धं तत्राक्षयं स्मृतम् ॥ ८१ ॥ ततो महीधरं गच्छेद्धर्मज्ञेनाभिरक्षितम् ॥
राजर्षिणा पुण्यकृता गयेनानुपभुज्यते ॥ ८२ ॥ सरो गयशिरो यत्र पुण्या चैव महानदी ॥ ऋषिजुष्टं महापुण्यं तीर्थं ब्रह्मसरोवरम् ॥ ८३ ॥ अगस्त्यो

भगवान्यत्र गतो वैवस्वतं प्रति ॥ उवास सततं यत्र धर्मराजः सनातनः ॥ ८४ ॥ सर्वासां सरितां यत्र समुद्भेदो हि दृश्यते ॥ यत्र संनिहितो
नित्यं महादेवः पिनाकधृक् ॥ ८५ ॥यत्राक्षयो वटो नाम वर्तते लोकविश्रुतः ॥ गयेन यजमानेन तत्रेष्टं क्रतुना पुरा ॥ ८६ ॥ आस्थिता तु सरि
च्छ्रेष्ठा गययज्ञेषु रक्षिता ॥ मुंडपृष्ठं गयां चैव रैवतं देवपर्वतम् ॥ ८७ तृतीयं क्रौंचपादं च दृष्ट्वा पापात्प्रमुच्यते ॥ शिवनद्यां शिवकरं गयायां
च गदाधरम् ॥ ८८ ॥ सर्वत्र परमात्मानं दृष्ट्वा मुच्येदघव्रजात् ॥ वाराणस्यां विशालाक्षी प्रयागे ललिता तथा ॥ ८९ ॥ गयायां मंगला नाम
कृतशौचे तु सैंहिका ॥ यद्ददाति गयास्थस्तत्सर्वमानंत्यमश्नुते ॥ ९० ॥ नंदति पितरस्तस्य सुप्रकृष्टेन कर्मणा ॥ यद्गयास्थो ददात्यन्नं पितरस्तेन
पुत्रिणः ॥ ९१ ॥इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीवसुसंवादे गयामाहात्म्यं नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४॥ वसुरुवाच॥शृणु मोहिनि
वक्ष्यामि पुण्यं प्रेतशिलाभवम् ॥ माहात्म्यं यत्र दत्वा तु पिंडान्पितॄन्समुद्धरेत् ॥१ ॥ आच्छादितशिलापादः प्रभासेनाद्रिणा ततः ॥ प्रभासो मुनि
भिस्तुष्टः शिलांगुष्ठानिर्गतः ॥२॥ अंगुष्ठस्थित ईशोऽपि प्रभासेशः प्रकीर्तितः ॥ शिलांगुष्ठैकदेशो यः सा च प्रेतशिला स्थिता ॥ ३ ॥ पिंड
दानाद्यतस्तस्मात्प्रेतत्वान्मुच्यते नरः ॥ महानदी प्रभासात्र्योः संगमे स्नानकृन्नरः ॥ ४ ॥ वामदेवः स्वयं भूयाद्रामतीर्थं ततः स्मृतम् ॥ प्रार्थितो
ऽथ महानद्यां रामस्नातोऽभवद्यदा ॥ ५॥रामतीर्थं त्वत्रजातं सर्वलोकसुपावनम् ॥ जन्मांतरसहस्रैस्तु यत्कृतं पातकं नरैः ॥ ६ ॥ तत्सर्वं विलयं
याति रामतीर्थाभिषेचनात् ॥ मंत्रेणानेन यः स्नात्वा श्राद्धं कुर्वीत मानवः ॥ ७ ॥ रामतीर्थे पिंडदस्तु विष्णुलोके महीयते ॥ “रामराम महाबाहो
देवानामभयंकर ॥ ८ ॥ त्वां नमस्ये तु देवेश मम नश्यतु पातकम्”॥ नमस्कृत्य प्रभासेशं भासमानं शिवं व्रजेत् ॥ ९ ॥ तं च शंभुं
नमस्कृत्य कुर्याद्याम्यबलिं ततः ॥ “आपस्त्वमसि देवेश ज्योतिषां पतिरेव च ॥ १० ॥ पापं नाशय मे शीघ्रं मनोवाक्कायकर्म्मजम्” ॥शिलाया
जघनं भूयः समाक्रांतं यमेन च ॥ ११ ॥ धर्मराजेनाद्रिरुक्तो न गच्छेति नगः स्मृतः ॥ यमराजधर्मराजौ निश्चलायेह संस्थितौ ॥ १२ ॥
ताभ्यां बलिमकृत्वा स्याद्गयाश्राद्धमपार्थकम् ॥ “श्वानौ द्वौ श्यामशबलौ वैवस्वतकुलोद्भवौ ॥ १३ ॥ ताभ्यां पिंडं प्रदास्यामि स्यातामेताव
हिंसकौ” ॥ तीर्थे प्रेतशिलादौ च चरुणा सघृतेन च॥ १४ ॥ पितॄनावाह्य तेभ्यश्च मंत्रैः पिंडांस्तु निर्वपेत् ॥ कृत्वा ध्यानं पितॄणां तु प्रयतः
प्रेतपर्वते ॥ १५ ॥ प्राचीनावीतिको भूयाद्दक्षिणाभिमुखः स्मरन् ॥“कव्यवालोऽनलः सोमो यमश्चैवार्यमा तथा ॥ १६ ॥अग्निष्वात्ता बर्हिषदः

सोमपाः पितृदेवताः ॥ आगच्छंतु महाभागा युष्माभी रक्षितास्त्विह ॥ १७ ॥ मदीयाः पितरो ये च कुले जाताः सनाभयः ॥
तेषां पिंडप्रदानार्थमागतोऽस्मि गयामिमाम् ॥ १८ ॥ ते सर्वे तृप्तिमायांतु श्राद्धेनानेन शाश्वतीम्" ॥ आचम्योक्ताथ पंचांगं प्राणानायम्य
यत्नतः ॥ १९ ॥ पुनरावृत्तिरहितब्रह्मलोकाप्तिहेतवे ॥ एवं संकल्प्य विधिवच्छ्राद्धं कुर्याद्यथाक्रमम् ॥ २० ॥ पितॄनावाह्य चाभ्यर्च्य मंत्रैः
पिंडप्रदो भवेत् ॥ प्रज्वाल्य पूर्वं तत्स्थानं पंचगव्यैः पृथक् पृथक् ॥ २१ ॥ दत्वा श्राद्धं सपिंडानां तेषां दक्षिणभागतः ॥ कुशैरास्तीर्य तेषां तु
सकृद्दत्वा तिलोदकम् ॥ २२ ॥ गृहीत्वांजलिना तेभ्यः पितृतीर्थेन यत्नतः ॥ सक्तुना मुष्टिमात्रेण दद्यादक्षय्यपिंडकम् ॥ २३ ॥ तिलाज्यदधिम
ध्वादि पिंडद्रव्येषु योजयेत् ॥ संबधिनस्तिलाद्यैश्च कुशेष्वावाहयेत्ततः ॥ २४ ॥ एतांस्तु मंत्रांस्त्रीञ्छ्राद्धे स्त्रीलिंगान्वै समुच्चरेत् ॥ पिंडान्दद्याद्यथा
पूर्वं पितॄनावाह्य पूर्ववत् ॥ २५ ॥ स्वगोत्रे वा विगोत्रे वा दंपत्योः पिंडपातने॥ अपृथङ्निष्फलं श्राद्धं पिंडं चोदकतर्पणम् ॥ २६ ॥ पिंडपात्रे
तिलान्दत्वा पूरयित्वा शुभोदकैः ॥ मंत्रेणानेन पिंडांस्तान्प्रदक्षिणकरं यथा ॥ २७ ॥ परिषिंचेत्त्रिधा सर्वान्प्रणिपत्य क्षमापयेत् ॥ पितॄन्विसृज्य
चाचम्य साक्षिणः श्रावयेत्सुरान्॥ २८ ॥ सर्वस्थानेषु चैवं स्यात्पिंडदानं तु मोहिनि ॥ गयायां पिंडदाने तु न च कालं विचिंतयेत् ॥ २९ ॥
अधिमासे जनिदिने ह्यस्ते च गुरुशुक्रयोः ॥ न त्यजेत्तु गयाश्राद्धं सिंहस्थे च बृहस्पतौ ॥ ३० ॥ दंडं प्रदर्शयेद्भिक्षुर्गयां गत्वा न पिंडदः ॥ न्यस्य
विष्णुपदे दंडं मुच्यते पितृभिः सह ॥ ३१ ॥ पायसेन गयायां च सक्तुना पिष्टकेन वा ॥ चरुणा तंदुलाद्यैर्वा पिंडदानं विधीयते ॥ ३२ ॥ गयां
दृष्ट्वा तु सुभगे महापापोऽपि पातकी ॥ पूतः कृत्याधिकारी च श्राद्धकृद्ब्रह्मलोकभाक् ॥ ३३ ॥ अश्वमेधसहस्राणां सहस्रं यः समाचरेत् ॥ नासौ
तत्फलमाप्नोति फल्गुतीर्थे यदाप्नुयात् ॥ ३४ ॥ गयां प्राप्यार्पयेत्पिंडान्पितॄणां चातिवल्लभान् ॥ विलंबो नैव कर्तव्यो नैव विघ्नं समाचरेत्॥ ३५॥
पिता पितामहश्चैव तथैव प्रपितामहः ॥ माता पितामही चैव तथैव प्रपितमही ॥ ३६ ॥ मातामहस्तत्पिता च प्रमातामहकादयः ॥ तेषां पिंडो
मया दत्तो ह्यक्षय्यमुपतिष्ठताम् ॥ ३७ ॥ अस्मत्कुले मृता ये च गतियषां न विद्यते ॥ तेषामुद्धरणार्थाय इमं पिण्डंददाम्यहम् ॥ ३८ ॥ बंधुवर्ग
कुले ये च गतिर्येषां न विद्यते ॥ तेषामुद्धरणार्थाय इमं पिंड ददाम्यहम् ॥३९॥ अजातदंता ये केचिद्ये च गर्भे प्रपीडिताः ॥ तेषामुद्धरणार्थाय
इमं पिंडं ददाम्यहम् ॥ ४० ॥अग्निदग्धाश्च ये केचिन्नाग्निदग्धास्तथा परे ॥ विद्युच्चौरहता ये च तेभ्यः पिंडं ददाम्यहम् ॥४१ ॥ दावदाहे मृता ये
च सिंहव्याघ्रहताश्च ये ॥ दंष्ट्रिभिः शृंगिभिर्वापि तेभ्यः पिंडं ददाम्यहम् ॥ ४२ ॥ उद्बंधनमृता ये च विषशस्त्रहताश्च ये॥ आत्मनो घातिनो ये

च तेभ्यः पिंडं ददाम्यहम्॥४३॥अरण्ये वर्त्मनि वने क्षुधया तृषया हताः ॥भूतप्रेतपिशाचैश्च तेभ्यः पिण्डं ददाम्यहम्॥४४॥रौरवे ये च तामिस्रे कालसूत्रे च ये स्थिताः॥तेषामुद्धरणार्थाय इमं पिंडं ददाम्यहम्॥४५॥अनेकयातनासंस्थाः प्रेतलोकं च ये गताः॥तेषामुद्धरणार्थाय इमं पिंडं ददाम्यहम् ॥ ४६॥ दुर्गतिं समनुप्राप्य अभिशापादिना हताः ॥ तेषामुद्धरणार्थाय इमं पिंडं ददाम्यहम् ॥४७॥ नरकेषु समस्तेषु यमदूतवशं गताः॥ तेषामुद्धरणार्थाय इमं पिंडं ददाम्यहम् ॥ ४८ ॥ पशुयोनिगता ये च पक्षिकीटसरीसृपाः ॥ अथवा वृक्षयोनिस्थास्तेभ्यः पिंडं ददाम्यहम् ॥ ४९ ॥ जात्यंतरसहस्रेषु ये भ्रमंति स्वकर्मणा ॥ मानुष्यं दुर्लभं येषां तेभ्यः पिंडं ददाम्यहम् ॥ ५० ॥ दिव्यंतरिक्षभूमिष्ठाः पितरो बांधवादयः ॥ असंस्कृतमृता ये च तेभ्यः पिंडं ददाम्यहम् ॥ ५१ ॥ ये केचित्प्रेतरूपेण वर्तंते पितरो मम ॥ ते सर्वे तृप्तिमायांतु पिंडेनानेन सर्वदा॥५२॥ये बांधवाबांधवा वा येऽन्यजन्मनि बांधवाः ॥ तेषां पिंडो मया दत्तो ह्यक्षय्यमुपतिष्ठताम् ॥ ५३ ॥ पितृवंशे मृता ये च मातृवंशे च ये मृताः ॥ गुरुश्वशुरबंधूनां ये चान्ये बांधवा मृताः ॥५४ ॥ ये मे कुले लुप्तपिंडाः पुत्रदारविवर्जिताः ॥ क्रियालोपगता ये च जात्यंधाः पंगवश्च ये ॥५५॥ विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम ॥तेषां पिंडो मया दत्तो ह्यक्षय्यमुपतिष्ठताम् ॥ ५६ ॥ आ ब्रह्मणो ये पितृवंशजाता मातुस्तथा वंशभवा मदीयाः ॥ कुलद्वये ये मम संगताश्च तेभ्यः स्वधा पिंडमहं ददामि ॥ ५७ ॥ साक्षिणः संतु मे देवा ब्रह्मेशानादयस्तथा ॥ मया गयां समासाद्य पितृणां निष्कृतिः कृता ॥ ५८ ॥ आगतोऽस्मि गयां देव पितृकार्ये गदाधर ॥ त्वमेव साक्षी भगवाननृणोऽहमृणत्रयात् ॥ ५९ ॥ अपरेऽह्नि शुचिर्भूत्वा गच्छेत्तु प्रेतपर्वतम् ॥ ब्रह्मकुंडे ततः स्नात्वा देवादींस्तर्पयेत्सुधीः ॥ ६० ॥ कृत्वाह्वानं पितॄणां तु प्रयतः प्रेतपर्वते ॥ पूर्ववच्चैव संकल्प्य ततः पिंडान्प्रदापयेत् ॥ ६१ ॥ स्वमंत्रैरथ संपूज्य परमाः पितृदेवताः ॥ यावंतस्तु तिलाः पुंभिर्गृहीताः पितृकर्मणि ॥ ६२ ॥ गच्छंति भीता असुरास्तावंतो गरुडाहिवत् ॥ पूर्ववत्सकलं कर्म कुर्यात्तत्रापि मोहिनि ॥ ६३ ॥ तिलमिश्रांस्तथा सक्तून्निःक्षिपेत्प्रेतपर्वते ॥ ये केचित्प्रेतरूपेण वर्तंते पितरो मम ॥ ६४ ॥ ते सर्वे तृप्तिमायांतु सक्तुभिस्तिलमिश्रितैः ॥ आब्रह्मस्तंबपर्यंतं यत्किंचित्सचराचरम् ॥ ६५ ॥ मया दत्तेन पिंडेन तृप्तिमायांतु सर्वशः ॥ आदौ तु पंचतीर्थेषु चोत्तरे मानसे विधिः ॥ ६६ ॥ आचम्य कुशहस्तेन शिरश्चाभ्युक्ष्य वारिणा ॥ उत्तरं मानसं गत्वा मंत्रेण स्नानमाचरेत् ॥ ६७ ॥ उत्तरे मानसे स्नानं करोम्यात्मविशुद्धये ॥ सूर्यलोकादिसंप्राप्तिसिद्धये पितृमुक्तये ॥ ६८ ॥ स्नात्वाथ तर्पणं कुर्याद्देवादीनां यथाविधि ॥ आब्रह्मस्तंबपर्यंतं देवर्षिपितृमानवाः ॥ ६९ ॥ तृप्यंतु पितरः सर्वे मातृमातामहादयः ॥ श्राद्धं सपिंडकं कुर्यात्स्वसूत्रोक्त

विधानतः ॥७०॥ अष्टकासु च वृद्धौ च गयायां च क्षयेऽहनि ॥ मातुः श्राद्धं पृथक्कुर्यादन्यत्र स्वामिना सह ॥ ७१ ॥"ॐ नमोऽस्तु भानवे भर्त्रे
सोमभौमज्ञरूपिणे ॥ जीवभार्गवशनैश्चरराहुकेतुस्वरूपिणे" ॥ ७२ ॥ सूर्यं नत्वार्चयित्वा च सूर्यलोकं नयेत्पितॄन् ॥ मानसं हि सरो ह्यत्र तस्मादु
त्तरमानसम् ॥ ७३ ॥ उत्तरान्मानसान्मौनी व्रजेद्दक्षिणमानसम् ॥ उदीचीतीर्थमित्युक्तं ततोदीच्यां विमुक्तिदम् ॥ ७४ ॥ उदीच्यां मुंडपृष्ठस्य
देवर्षिपितृतर्पणम् ॥ मध्ये कनखलं तीर्थं पितॄणां गतिदायकम् ॥ ७५ ॥ स्नातः कनकवद्भाति नरो याति पवित्रताम् ॥ अतः कनखलं लोके ख्यातं
तीर्थमनुत्तमम् ॥७६॥ तस्माद्दक्षिणभागे तु तीर्थं दक्षिणमानसम् ॥ दक्षिणे मानसे चैवं तीर्थत्रयमुदाहृतम् ॥ ७७ ॥ स्नात्वा तेषु विधानेन कुर्या
च्छ्राद्धं पृथक् पृथक्॥"दिवाकर करोमीह स्नानं दक्षिणमानसे ॥७८॥ब्रह्महत्यादिपापौघघातनाय विमुक्तये"॥अनेन स्नानपूजादि कुर्याच्छ्राद्धं सपिं
डकम् ॥ ७९ ॥"नमामि सूर्यं तृप्त्यर्थं पितॄणां तारणाय च ॥ पुत्रपौत्रधनैश्वर्यआयुरारोग्यवृद्धये"॥ ८०॥ दृष्ट्वा संपूज्य मौनार्कमिमं मंत्रमुदीरयेत॥
"कव्यवाडादयो ये च पितॄणां देवतास्तथा॥८१॥मदीयैः पितृभिः सार्द्धं तर्पिताः स्थ स्वधाभुजः"॥ फल्गुतीर्थं व्रजेत्तस्मात्सर्वतीर्थोत्तमोत्तमम्॥८२॥
मुक्तिर्भवति कर्तॄणां पितॄणां श्राद्धतः सदा ॥ ब्रह्मणा प्रार्थितो विष्णुः फल्गुको ह्यभवत्पुरा ॥ ८३॥दक्षिणाग्नौ कृतं नूनं तद्भवं फल्गुतीर्थकम् ॥
यस्मिन्फलति फल्ग्वां गौः कामधेनुर्जलं मही ॥ ८४ ॥ सृष्टेरंतर्गतं यस्मात्फल्गुतीर्थं न निष्फलम् ॥ तीर्थानि यानि सर्वाणि भवनेष्वखिलेषु च
॥८५॥ तानि स्नातुं समायांति फल्गुतीर्थं न संशयः ॥गंगा पादोदकं विष्णोः फल्गुश्चादिगदाधरः ॥८६॥ हिमं च द्रवरूपेण तस्माद्गंगाधिकं विदुः॥
अश्वमेधसहस्राणां फलं फल्गुजलाप्लवात् ॥८७॥"फल्गुतीर्थे विष्णुजले करोमि स्नानमद्य वै ॥ पितॄणां विष्णुलोकाय भुक्तिमुक्तिप्रसिद्धये"॥८८॥
फल्गुतीर्थे नरः स्नात्वा तर्पणं श्राद्धमाचरेत् ॥ सपिंडकं स्वसूत्रोक्तं नमेदथ पितामहम् ॥८९ ॥ "नमः शिवाय देवाय ईशानपुरुषाय च ॥ अघोर
वामदेवाय सद्योजाताय शंभवे"॥ ९० ॥ नत्वा पितामहं देवं मंत्रेणानेन पूजयेत् ॥ फल्गुतीर्थे नरः स्नात्वा दृष्ट्वा देवं गदाधरम् ॥ ९१॥आनम्य
पितृभिः सार्द्धं स्वं नयेद्वैष्णवं पदम् ॥"ॐ नमो वासुदेवाय नमः संकर्षणाय च ॥ ९२ ॥ प्रद्युम्नायानिरुद्धाय श्रीधराय च विष्णवे" ॥ पंचतीर्थ्यां
नरः स्नात्वा ब्रह्मलोके नयेत्पितॄन् ॥९३॥ अमृतैः पंचभिः स्नातं पुष्पवस्त्राद्यलंकृतम् ॥ न कुर्याद्यो गदापाणिं तस्य श्राद्धमपार्थकम् ॥ ९४ ॥ नाग
कूटाद्गृध्रकूटाद्विष्णोश्चोत्तरमानसात् ॥ एतद्गयाशिरः प्रोक्तं फल्गुतीर्थं तदुच्यते॥९५॥मुंडपृष्ठनगाधस्तात्फल्गुतीर्थमनुत्तमम् ॥ अत्र श्राद्धादिना सर्वे
पितरो मोक्षमाप्नुयुः ॥९६॥ शमीपत्रप्रमाणेन पिंड दद्याद्गयाशिरे॥यन्नाम्ना पातयेत्पिंडं तं नयेद्ब्रह्म शाश्वतम्॥९७॥अव्यक्तरूपी यो देवो मुंडपृष्ठाद्रि

रूपतः ॥ फल्गुतीर्थादिरूपेण नमस्यति गदाधरम् ॥ ९८ ॥ शिलापर्वतफल्ग्वादिरूपेणाव्यक्तमास्थितः ॥ गदाधरादि रूपेण व्यक्तमादिधरस्तथा ॥ ९९ ॥
धर्मारण्यं ततो गच्छेद्धर्मो यत्र व्यवस्थितः ॥ मतंगवाप्यां स्नात्वा तु तर्पणं श्राद्धमाचरेत् ॥ १०० ॥ गत्वा नत्वा मतंगेशमिमं मंत्रमुदीरयेत् ॥
"प्रमाणं देवताः शंभुर्लोकपालाश्च साक्षिणः॥ १०१ ॥मयागत्य मतंगेऽस्मिन्पितॄणां निष्कृतिः कृता"॥ पूर्वं तु ब्रह्मतीर्थे च कूपे श्राद्धादि कारयेत्
॥ १०२ ॥ तत्कूपयूपयोर्मध्ये कुर्वंस्तु त्रायते पितॄन् ॥धर्मं धर्मेश्वरं नत्वा महाबोधितरुं नमेत् ॥ १०३ ॥ द्वितीयदिवसे कृत्यं मया ते समुदाहृतम् ॥
स्नानतर्पणपिंडार्चानत्याद्यैः पितृसौख्यदम् ॥ १०४ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीवसुसंवादे गयामाहात्म्ये पिंडदानविधिर्नाम पञ्च
चत्वारिंशत्तमोऽध्यायः ॥ ४५ ॥ वसुरुवाच ॥ अथ ते संप्रवक्ष्यामि भुक्तिमुक्तिप्रदायकम् ॥ तृतीयदिवसे कृत्यं गयासंगफलप्रदम् ॥ १ ॥ स्नात्वा
तु ब्रह्मसरसि श्राद्धं कुर्यात्सपिंडकम् ॥ "स्नानं करोमि तीर्थेऽस्मिन्नृणत्रयविमुक्तये ॥ २ ॥ श्राद्धाय पिंडदानाय तर्पणायार्थसिद्धये"॥तत्कूपयूपयो
र्मध्ये कुर्वंस्तारयते पितॄन्॥ ३ ॥ स्नानं कृत्वोच्छ्रितो यूपो ब्रह्मणो यूप इत्युत ॥ कृत्वा ब्रह्मसरःश्राद्धं ब्रह्मलोकं नयेत्पितॄन् ॥ ४ ॥ गोप्रचार
समीपस्था आम्रा ब्रह्मप्रकल्पिताः ॥ तेषां सेचनमात्रेण पितरो मोक्षगामिनः ॥ ५ ॥ "आम्रं ब्रह्मसरोद्भूतं सर्वदेवमयं विभुम् ॥विष्णुरूपं प्रसिंचामि
पितॄणां चैव मुक्तये ॥ ६ ॥ एको मुनिः कुम्भकुशाग्रहस्त आम्रस्य मूले सलिलं ददाति ॥ आम्राश्च सिक्ताः पितरश्च तृप्ता एका क्रिया द्व्यर्थकरी
प्रसिद्धा" ॥ आचम्य मूले सलिलं ददानो नोपेक्षणीयो विबुधैर्मनुष्यः ॥ ७ ॥ यूपं प्रदक्षिणीकृत्य वाजपेयफलं लभेत् ॥ ब्रह्माणं च नमस्कृत्य
पितॄन् ब्रह्मपुरं नयेत् ॥ ८ ॥"ॐ नमो ब्रह्मणेऽजाय जगज्जन्मादिकारिणे ॥ भक्तानां च पितॄणां च तरकाय नमोनमः" ॥ ९ ॥ ततो यमबलिं
क्षिप्त्वा मन्त्रेणानेन संयतः ॥"यमराजधर्मराजौ निश्चलार्थौ इति स्थितौ॥ १० ॥ताभ्यां बलिं प्रयच्छामि पितॄणां मुक्तिहेतवे"॥ततः श्वानबलिं कृत्वा
पूर्वमन्त्रेण मोहिनि॥ ११ ॥ततः काकबलिं कुर्यान्मन्त्रेणानेन संयतः॥"ऐंद्रवारुणवायव्या याम्या वै नैऋतास्तथा॥ १२ ॥वायसाः प्रतिगृह्णन्तु भूमौ पिंडं
मयार्पितम्"॥ ततः स्नानं प्रकुर्वीत ब्रह्मतीर्थे कुशान्वितः॥ १३ ॥एवं तृतीयदिवसे समाप्य नियमं सुधीः ॥ नत्वा गदाधरं देवं ब्रह्मचर्यपरो भवेत्
॥ १४ ॥ फल्गुतीर्थे चतुर्थे च स्नानादिकमथाचरेत्॥ गयाशिरस्यथो श्राद्धं पदे कुर्यात्सपिंडकम् ॥ १५ ॥ साक्षाद्गयाशिरस्तत्र फल्गुतीर्थाश्रयं
कृतम् ॥ क्रौंचपादात्फल्गुतीर्थं यावत्साक्षाद्गयाशिरः ॥ १६ ॥ गयाशिरे नगाद्याश्च साक्षात्तत्फलगुतीर्थकम् ॥ मुखं गयासुरस्यैतत्स्नात्वा श्राद्धं समा
चरेत् ॥ १७ ॥ आद्यो गदाधरो देवो व्यक्ताव्यक्तार्थमास्थितः ॥विष्ण्वादिपदरूपेण पितॄणां मुक्तिहेतवे ॥ १८ ॥ तत्र विष्णुपदं दिव्यं दर्शनात्पा

पनाशनम् ॥ स्पर्शनात्पूजनाच्चापि पितॄणां मोक्षदायकम् ॥ १९॥ श्राद्धं सपिंडकं कृत्वा सहस्रकुलमात्मनः ॥ विष्णुलोकं समुद्धृत्य नयेद्विष्णुपदे
नरः ॥ २० ॥ श्राद्धं कृत्वा रुद्रपदे नयेत्कुलशतं नरः ॥ सहात्मना शिवपुरं तथा ब्रह्मपदे शुभे ॥ २१ ॥ दक्षिणाग्निपदे श्राद्धी
वाजपेयफलं लभेत् ॥ गार्हपत्यपदे श्राद्धी राजसूयफलं लभेत् ॥ २२ ॥ श्राद्धं कृत्वा चंद्रपदे वाजिमेधफलं लभेत् ॥ श्राद्धं कृत्वा सत्य
पदे ज्योतिष्टोमफलं लभेत् ॥ २३ ॥ आवसथ्यपदे श्राद्धी सोमलोकमवाप्नुयात् ॥ श्राद्धं कृत्वा चंद्रपदे शक्रलोकं नयेत्पितॄन् ॥२४॥
अन्येषां च पदे श्राद्धी पितॄन्ब्रह्मपदे नयेत् ॥ श्राद्धी सूर्यपदे यश्च पापिनोऽर्कपुरं नयेत् ॥ २५ ॥ कार्तिकेयपदे श्राद्धी शिवलोके नयेत्पितॄन् ॥
श्राद्धं कृत्वागस्त्यपदे ब्रह्मलोकं नयेत्पितॄन् ॥ २६ ॥ सर्वेषां काश्यपं श्रेष्ठं विष्णो रुद्रस्य वै पदम् ॥ ब्रह्मणश्च पदं तत्र सर्वश्रेष्ठमुदाहृतम् ॥ २७ ॥
प्रारंभे च समाप्तौ च तेषामन्यतमं स्मृतम् ॥ श्रेयस्करं भवेत्तत्र श्राद्धकर्तुश्च मोहिनि ॥ २८ ॥ कश्यपस्य पदे दिव्यो भारद्वाजो मुनिः पुरा ॥
श्राद्धं हि चोद्यतो दातुं पित्रादिभ्यश्च पिंडकम् ॥२९॥शुक्लकृष्णौ तदा हस्तौ पदमुद्भिद्य निष्कृतौ ॥ दृष्ट्वा हस्तद्वयं तत्र पितृसंशयमागतः ॥३०॥
ततः स्वमातरं शांतां भारद्वाजस्तु पृष्टवान् ॥ कश्यपस्य पदे कस्मिन्छुक्ले कृष्णे पदे पुनः ॥ ३१ ॥ पिंडो देयो मया मातर्जानासि पितरं वद ॥
तच्छ्रुत्वा वचनं तस्य भारद्वाजस्य धीमतः ॥ ३२ ॥ शांतोवाच प्रसन्नास्या पुत्रं श्राद्धप्रदायिनम् ॥ भारद्वाज महाप्राज्ञ पिंडं कृष्णाय देहि भोः
॥ ३३ ॥ भारद्वाजस्ततः पिंडं दातुं कृष्णाय चोद्यतः ॥श्वेतो हस्तोऽब्रवीत्पुत्र देहि पुत्रो ममौरसः॥ ३४॥ कृष्णोऽब्रवीत् क्षेत्रजस्त्वं ततो मे देहि पिंड
कम् ॥ शुक्लोऽब्रवीत्स्वैरिणीयं यतोऽतस्त्वं ममौरसः ॥३५ ॥ स्वैरिणीजो ददौ चादौ क्षेत्रिणे बीजिने ततः॥ ततो भक्त्या महाभागे दत्वा पिंडान्महा
मतिः ॥ ३६ ॥ कृतकृत्यं निजात्मानं मेने प्रत्यक्षभाषणात् ॥ भीष्मो विष्णुपदे श्राद्ध आहूय तु पितॄन्स्वकान् ॥ ३७ ॥ श्राद्धं कृत्वा विधानेन
पिंडदानाय चोद्यतः ॥ पितुर्विनिर्गतौ हस्तौ गयाशिरसि शंतनोः ॥ ३८ ॥ भीष्मः पिंडं ददौ भूमौ नाधिकारः करे यतः ॥ शंतनुः प्राह संतुष्टः
शास्त्रार्थे निश्चलो भवान् ॥ ३९ ॥ त्रिकालदर्शी भव च विष्णुश्चांते गतिस्तव ॥ स्वेच्छया मरणं चास्तु इत्युक्त्वा मुक्तिमागतः ॥ ४० ॥ रामो
रुद्रपदे रम्ये पिंडार्पणकृतोद्यमः ॥ पिता दशरथः स्वर्गात्प्रसार्य करमागतः ॥ ४१॥ नादात्पिंडं करे रामो ददौ रुद्रपदे ततः॥ शास्त्रार्थातिक्रमाद्भीतो
रामं दशरथोऽब्रवीत् ॥ ४२ ॥ तारितोऽहं त्वया पुत्र रुद्रलोको ह्यभून्मम ॥ पदे पिंडप्रदानेन हस्ते तु स्वर्गतिर्नहि ॥ ४३ ॥ त्वं च राज्यं चिरं
कृत्वा पालयित्वा निजाः प्रजाः ॥ यज्ञान्सदक्षिणान्कृत्वा विष्णुलोकं गमिष्यसि ॥४४॥ सहायोध्याजनैः सर्वैः कृमिकीटादिभिः सह ॥ इत्युक्त्वा स

नृपो रामं रुद्रलोकं परं ययौ ॥ ४५ ॥ कनकेशं च केदारं नारसिंहं च वामनम् ॥ रथमार्गे समभ्यर्च्य पितॄन्सर्वाश्च तारयेत् ॥४६ ॥ गयाशिरसि यः पिंडं येषां नाम्ना तु निर्वपेत् ॥ नरकस्था दिवं यांति स्वर्गस्था मोक्षगामिनः ॥ ४७ ॥ गयाशिरसि यः पिंडं शमीपत्रप्रमाणतः ॥ कंदमूलफलाद्यैर्वा दद्यात्स्वर्गं नयेत्पितॄन् ॥४८॥ पदानि यत्र दृश्यंते विष्ण्वादीनां तदग्रतः ॥ श्राद्धं कृत्वा पदे येषां तेषां लोकान्नयेत्पितॄन्॥ ४९ ॥ सर्वत्र मुंडपृष्ठाद्रिः पदैरेभिः स लक्षितः ॥ प्रयांति पितरस्तत्र पूजिता ब्रह्मणः पदम् ॥ ५० ॥ गयासुरस्य तु शिरो गदया यद्द्विधा कृतम् ॥ यतः प्रक्षालिता तीर्थे गदालोलस्तदा स्मृतः ॥५१॥ क्रौंचरूपेण हि मुनिर्मुंडपृष्ठे तपोऽकरोत् ॥ तस्य पादांकको यस्मात्क्रौंचपादः स्मृतस्ततः ॥ ५२ ॥ विष्ण्वादीनां पदान्यत्र लिंगरूपस्थितानि च ॥ देवादितर्पणं कृत्वा श्राद्धं रुद्रपदादितः ॥५३ ॥ चतुर्थदिवसे कृत्यमेतत्कृत्वा तु मोहिनि ॥ पुत्रः कर्माधिकारी स्याच्छ्राद्धकृद्ब्रह्मलोकभाक् ॥ ५४ ॥ शिलास्थितेषु तीर्थेषु स्नात्वा कृत्वाथ तर्पणम् ॥ श्राद्धं सपिंडकं येषां ब्रह्मलोकं प्रयांति ते ॥ ५५ ॥ स्थास्यंति च रमिष्यंति यावदाभूतसंप्लवम् ॥ देहं त्यक्त्वा शिलापृष्ठे स्वदेजांडजरायुजाः ॥ ५६ ॥ गच्छंति विष्णुसायुज्यं कुलैः सप्तशतैः सह ॥ ५७ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीवसुसंवादे गयामाहात्म्ये विष्ण्वादिपदे पिंडदानमाहात्म्यकथनं नाम षट्चत्वारिंशत्तमोऽध्यायः ॥ ४६ ॥

वसुरुवाच ॥ पंचमेऽह्नि गदालोले कृत्वा स्नानादि पूर्ववत् ॥ श्राद्धं सपिंडकं कुर्यात्ततोऽक्षयवटे नरः ॥१॥ तत्र श्राद्धादिकं कृत्वा पितॄन्ब्रह्मपुरं नयेत् ॥ ब्रह्मप्रकल्पितान् विप्रान्भोजयेत्पूजयेदथ ॥ २ ॥ कृतश्राद्धोऽक्षयवटे अनेनैव प्रयत्नतः ॥ दृष्ट्वा नत्वाथ संपूज्य वटेशं च समाहितः ॥ ३ ॥ पितॄन्नयेद्ब्रह्मपुरमक्षयं तु सनातनम् ॥“गदालोले महातीर्थे गदाप्रक्षालने वरे ॥ ४ ॥ स्नानं करोमि शुद्ध्यर्थमक्षय्याय स्वरातये ॥ एकांतरे वटस्याग्रे यः शेते योगनिद्रया ॥५॥ बालरूपधरस्तस्मै नमस्ते योगशायिने ॥संसारवृक्षशस्त्रायाशेषपापक्षयाय च ॥ ६ ॥ अक्षय्यब्रह्मदात्रे च नमोऽक्षय्यवटाय वै” ॥ “कलौ माहेश्वरा लोका येन तस्माद् गदाधरः ॥ ७ ॥ लिंगरूपोऽभवत्तं च वन्दे त्वां प्रपितामहम्” ॥ नत्वेत्पितॄन्रुद्रपदं नत्वा तं प्रपितामहम् ॥ ८ ॥ हेतिं हत्वासुरं तस्य शिरश्चैव द्विधा कृतम् ॥ गदया सा गदा यत्र क्षालिता प्रभुणाऽभवत् ॥ ९ ॥ गदालोलमिति ख्यातं तत्तीर्थप्रवरं ह्यभूत् ॥ हेती रक्षो ब्रह्मपुत्रस्तपस्तेपेऽद्भुतं महत् ॥ १० ॥ ब्रह्मादींस्तपसा तुष्टान्वरं वव्रे वरप्रदान् ॥ दैत्यादिभिश्च शस्त्राद्यैर्विविधैर्मनुजैरपि ॥ ११ ॥ कृष्णेशानादिचक्राद्यैरवध्यः स्यां महाबलः ॥ तथेत्युक्त्वांतर्हितास्ते हेतिर्देवानथाजयत् ॥ १२ ॥ इन्द्रत्वमकरोद्धेतिस्तदा ब्रह्महरादयः ॥ देवा हरिं प्रपन्नास्तमूचुर्हेतिं जहीति च ॥ १३ ॥ ऊचे हरिरवध्योऽयं हेतिर्देवाः सुरा

सुरैः ॥ ब्रह्मास्त्रं मे प्रयच्छध्वं हेतिं हन्यां हि येन तम् ॥ १४ ॥ इत्युक्तास्ते ततो देवा विष्णवे तां गदां ददुः ॥ उपेंद्र त्वं जही
त्येव हेतिं प्रोचुरजादयः ॥ १५ ॥ दधार तां गदामाजौ देवैरुक्तो गदाधरः ॥ गदया हेतिमाहत्य देवेभ्यस्त्रिदिवं ददौ ॥ १६ ॥
उपोषितोऽथ गायत्रीतीर्थे महानदीस्थिते ॥ गायत्र्या पुरतः स्नातस्ततः संध्यां समाचरेत् ॥ १७ ॥ श्राद्धं सपिंडकं कृत्वा नयेद्ब्राह्मणतां कुलम् ॥
तीर्थे समुद्यते स्नात्वा सावित्र्याः पुरतो नरः ॥ १८ ॥ संध्यामुपास्य मध्याह्ने नयेत्पितॄन्विधिक्षयम् ॥ प्राचीसरस्वतीस्नातः सरस्वत्यास्ततोऽग्रतः
॥ १९ ॥ संध्यामुपास्य सायाह्ने नयेत्सर्वज्ञतां कुलम् ॥ बहुजन्मकृतात्संध्यालोपपापाद्विशुद्ध्यति ॥ २० ॥ विशालायां लिलेहाने तीर्थे च भरता
श्रमे ॥ पदांकिते मुंडपृष्ठे गदाधरसमीपतः ॥२१॥ तीर्थं आकाशगंगायां गिरिकर्णमुखेषु च ॥ श्राद्धदः पिंडदो ब्रह्मलोकं पितृशतं नयेत् ॥ २२ ॥
स्नातो गोदावैतरण्यां त्रिःसप्तकुलमुद्धरेत् ॥ देवनद्यां गोप्रचारे तथा मानसके पदे ॥ २३ ॥ पुष्करिण्यां गदालोले तीर्थे चामरके तथा ॥ कोटितीर्थे
रुक्मकुंडे पिंडदः स्वर्नयेत्पितॄन् ॥ २४ ॥ मार्कंडेयेशकोटीशौ नत्वा स्यात्पितृतारकः ॥ तथा पांडुशिलायास्तु पुण्यदायाः सुलोचने ॥ २५ ॥
दृष्टिमात्रेण संपूतान्नरकस्थान्दिवं नयेत् ॥ इत्युक्त्वा प्रययौ पांडुः शाश्वतं पदमव्ययम् ॥२६॥ घृतकुल्या मधुकुल्या देविका च महानदी॥ शिलायां
संगता तत्र मधुस्रवा प्रकीर्तिता ॥२७॥ अयुतं ह्यश्वमेधानां स्नानेन लभते नरः ॥ तर्पयित्वा पितृगणं श्राद्धं कृत्वा सपिंडकम् ॥२८॥ सहस्रकुल
मुद्धृत्य नयेद्विष्णुपुरं नरः॥ उद्भिज्जाः स्वेदजा वापि ह्यंडजा ये जरायुजाः॥२९॥ मधुस्रवां समासाद्य मृता विष्णुपदं ययुः ॥ दशाश्वमेधिके हंसतीर्थे
श्राद्धाद्दिवं व्रजेत् ॥ ३० ॥ दशाश्वमेधहंसौ च नत्वा शिवपुरं व्रजेत् ॥ मतंगस्य पदे श्राद्धकर्ता ब्रह्मपुरे वसेत ॥ ३१ ॥ निर्मथ्याग्नीन्शमीगर्भे
विधिर्विष्ण्वादिभिः सह ॥ मंथोकुंडं हि तत्तीर्थं पितॄणां मुक्तिकारकम् ॥ ३२ ॥ तर्पणात्पिडदानाच्च स्नानकृन्मुक्तिमाप्नुयात ॥
पितॄन्स्वर्गं नयेन्नत्वा रामेशकरकेश्वरौ ॥ ३३ ॥ गयाकूपे पिंडदानादश्वमेधफलं लभेत् ॥ भस्मकूटे भस्मनाऽथ स्नानात्तारयते पितॄन्
॥ ३४ ॥ धौतपापोऽथ निःक्षीरासंगमे स्नानकृन्नरः ॥ श्राद्धी रामपुष्करिण्यां ब्रह्मलोकं नयेत्पितॄन् ॥ ३५ ॥ सुषुम्नायां महा
नद्यां त्रिःसप्तकुलमुद्धरेत् ॥ स्नातो नत्वा वसिष्ठेशं तस्य तीर्थेऽश्वमेधभाक् ॥ ३६ ॥ पिंडदो धेनुकारण्ये कामधेनुपदेषु च ॥ स्नातो नत्वा तु
तं देवं ब्रह्मलोकं नयेत्पितॄन् ॥३७॥ कर्दमाले गयानाभौ मुंडपृष्ठसमीपतः ॥ स्नात्वा श्राद्धी नयेत्स्वर्गं पितॄन्नत्वा च चंडिकाम् ॥ ३८ ॥ फल्गु
चंडीशनामानं संगमाधीशमर्च्य च ॥ गयागजो गयादित्यो गायत्री च गदाधरः ॥ ३९ ॥ गया गयाशिरश्चैव षड्गया मुक्तिदायिकाः ॥

गयायां तु वृषोत्सर्गात्त्रिः सप्तकुलमुद्धरेत् ॥ ४० ॥ यत्र तत्र स्थितो विप्रगदितो विजितेंद्रियः ॥ आद्य गदाधरं ध्यायन् श्राद्धपिंडानि कारयेत्
॥ ४१ ॥ कुलानां शतमुद्धृत्य ब्रह्मलोकं नयेद्ध्रुवम् ॥ ततो दध्योदनेनैव दत्वा नैवेद्यमुत्तमम् ॥४२॥जनार्दनाय देवाय समभ्यर्च्य यथाविधि ॥
दद्यान्निक्षिप्य पिंडांस्तु तच्छेषेणैव जीवति ॥ ४३ ॥ दैत्यस्य मुंडपृष्ठे तु यस्मात्सा संस्थिता शिला ॥ तस्माद्वै मुंडपृष्ठाद्रिः पितॄणां
ब्रह्मलोकदः ॥ ४४ ॥ रामे वनं गते शैलमारुह्य भरतः स्थितः ॥ पित्रे पिंडादिकं दत्वा रामेशं स्थाप्य तत्र च ॥ ४५ ॥
स्नात्वा नत्वा च रामेशं रामं सीतां समाहितः ॥ श्राद्धं पिंडप्रदानं च कृत्वा विष्णुपुरं व्रजेत् ॥ ४६ ॥ पितृभिः सह धर्मात्मा कुलानां च
शतैः सह ॥ शिलादक्षिणहस्ते च स्थापितः कुंडपृष्ठतः ॥ ४७ ॥ तत्र श्राद्धादिना सर्वान्पितॄन्ब्रह्मपुरं नयेत् ॥ कुंडेनाथ तपस्तप्तं
सीताद्रेर्दक्षिणे नगे ॥ ४८ ॥ मतंगस्य पदे पुण्ये पिंडदः स्वर्नयेत्पितॄन् ॥ वामहस्ते शिलायाश्च ह्यंतको विधृतो गिरिः ॥ ४९ ॥ उदयाद्रिरिहानीतो
ह्यगस्त्येन महात्मना ॥ स्थापितः पिंडदस्तत्र पितॄन्ब्रह्मपुरं नयेत् ॥ ५० ॥ कुंडमुद्यंतकं तत्र स्वात्मनस्तपसे कृतम् ॥ ब्रह्मा तत्र च सावित्री
कुमाराभ्यां स्थितस्त्विह ॥ ५१ ॥ हाहाहूहूप्रभृतयो गीतं वाद्यं प्रचक्रमुः ॥ स्नातोऽगस्त्ये च मध्याह्ने सावित्रीं समुपास्य च ॥५२ ॥ कोटिजन्म
भवेद्विप्रो धनाढ्यो वेदपारगः ॥ अगस्त्यस्य पदे स्नातः पिंडदः स्वर्नयेत्पितॄन् ॥५३॥ ब्रह्मयोनिं प्रविश्याथ निर्गच्छेद्यस्तु मानवः ॥ परं ब्रह्म स
यातीह विमुक्तो योनिसंकटात् ॥ ५४ ॥ नत्वा गयाकुमारं च ब्राह्मण्यं लभते नरः ॥ सोमकुंडाभिषेकाद्यैः सोमलोकं नयेत्पितॄन् ॥५५ ॥ बलिः
काकशिलायां तु काकेभ्यः क्षणमोक्षदः ॥ स्वर्गद्वारेश्वरं नत्वा स्वर्गाद्ब्रह्मपुरं नयेत् ॥५६ ॥ पिंडदो व्योमगंगायां निर्मलः स्वर्नयेत्पितॄन् ॥शिलाया
दक्षिणे हस्ते भस्मकूटमधारयत् ॥ ५७ ॥ धर्म्मोऽतस्तत्र च हरस्तन्नाम समकारयत् ॥ यत्रासौ भस्मकूटाद्रिर्भस्मनामा तु मोहिनि ॥ ५८ ॥ वटो
वटेश्वरस्तत्र स्थितश्च प्रपितामहः ॥ तदग्रे रुक्मिणीकुंडं पश्चिमे कपिला नदी ॥ ५९ ॥ कपिलेशो नदीतीरे उमासोमसमागमः ॥ कपिलायां
नरः स्नात्वा कपिलेशं नमेद्यजेत् ॥ ६० ॥ श्राद्धदः स्वर्गभागी स्यान्महेशीकुंड एव च ॥ गौरी च मंगला तत्र सर्वसौभाग्यदार्चिता
॥ ६१ ॥ जनार्दनो भस्मकूटे तस्य हस्ते तु पिंडदः ॥ मंत्रेण चात्मनोऽन्येषां सव्येनापि तिलैर्विना ॥ ६२ ॥ पिंडं
च दधिसंमिश्रं सर्वे ते विष्णुलोकगाः ॥ "एष पिंडो मया दत्तस्तवहस्ते जनार्दन ॥ ६३ ॥ गयाश्राद्धे त्वया देयो मह्यं पिण्डो मृते मयि ॥
तुभ्यं पिंडो मया दत्तो यमुद्दिश्य जनार्दन ॥ ६४ ॥ देहि देव गयाशीर्षे तस्मै तस्मै मृते ततः ॥ जनार्दन नमस्तुभ्यं नमस्ते पितृ

रूपिणे ॥ ६५ ॥ पितृपात्र नमस्तुभ्यं नमस्ते मुक्तिहेतवे ॥ गयायां पितृरूपेण स्वयमेव जनार्दनः ॥ ६६ ॥ तं दृष्ट्वा पुंडरीकाक्षं मुच्यते च ऋण
त्रयात् ॥ नमस्ते पुंडरीकाक्ष ऋणत्रयविमोचन ॥ ६७ ॥ लक्ष्मीकांत नमस्तेऽस्तु नमस्ते पितृमोक्षद” ॥ पुण्डरीकाक्षमभ्यर्च्य स्वर्गगः स्याज्जना
र्दनम् ॥ ६८॥ वामजानुं तु संपात्य नत्वा भूमिं जनार्दनम् ॥ श्राद्धं सपिंडकं कृत्वा भ्रातृभिर्विष्णुलोकभाक्॥ ६९ ॥ शिलाया वामपादे तु प्रेत
कूटो गिरिर्धृतः ॥धर्मराजेन पापाढ्यो गिरिः प्रेतशिलामयः ॥ ७० ॥ पादेन दूरे निक्षिप्तः शिलायाः पादभारतः ॥ प्रेता धानुष्करूपेण करग्रहण
कारकाः ॥ ७१ ॥ पृथक् स्थिताश्च बहवो विघ्नकारिण एव ते ॥ श्राद्धादिकारिणं नृणां तीर्थे पितृविमुक्तये ॥ ७२ ॥ गतः शिलाद्रिसंपर्कात्प्रेत
कूटः पवित्रताम्॥प्रेतकुंडं तु तत्रास्ते देवास्तत्र पदैः स्थिताः॥७३ ॥श्राद्धपिंडादिकृत्स्नातः प्रेतत्वान्मोचयेत्पितॄन्॥कीकटेषु गया पुण्या पुण्यं राज
गृहं वनम् ॥ ७४ ॥ च्यवनस्याश्रमः पुण्यो नदी पुण्या पुनःपुना ॥ वैकुंठो लोहदंडश्च गिरिकूटश्च शोणगः ॥७५ ॥ श्राद्धपिंडादिकृत्तत्र पितॄन्ब्र
ह्मपुरं नयेत् ॥ शिलादक्षिणपादे तु गृध्रकूटो गिरिर्धृतः ॥ ७६ ॥ धर्मराजेन स्वस्थैर्यकरणायाशु पावनः ॥ गृध्ररूपेण संसिद्धास्तपः
कृत्वा महर्षयः ॥ ७७ ॥ अतो गिरिर्गृध्रकूटस्तत्र गृध्रेश्वरः शिवः ॥ दृष्ट्वा गृध्रेश्वरं स्नात्वा याति शंभोः पुरं नरः ॥ ७८ ॥ तत्र गृध्रपुरं गत्वा
प्रातकालो दिवं व्रजेत् ॥ ऋणमोक्षं पापमोक्षं शिवं दृष्ट्वा शिवं व्रजेत् ॥ ७९ ॥ आदिपादेन गिरिणा समाक्रांतं शिलोदकम् ॥
तत्रास्ते गजरूपेण विघ्नेशो विघ्ननाशनः ॥ ८० ॥ तं दृष्ट्वा मुच्यते विघ्नैः पितॄञ्छिवपुरं नयेत् ॥ गायत्रीं च गयादित्यं स्नातो दृष्ट्वा
दिवं व्रजेत् ॥ ८१ ॥ ब्रह्माणं चादिपादस्थं दृष्ट्वा स्यात्पितृतारकः ॥ नाभौ च पिंडदो यस्तु पितॄन्ब्रह्मपुरं नयेत् ॥ ८२ ॥ शोभार्थे मुण्डपृष्ठस्य
अरविन्दवरं त्वभूत् ॥ मुंडपृष्ठारविंदे च दृष्ट्वा पापैर्विमुच्यते ॥ ८३ ॥ शृंगिभिर्दंष्ट्रिभिर्व्यालैर्विषवह्निस्त्रिया जलैः ॥ सुदूरात्परिहर्तव्यः
कुर्वन् क्रीडां मृतस्तु यः ॥ ८४ ॥ नागानां विप्रियं कुर्वन्हतश्चाप्यथ विद्युता ॥ निगृहीतः स्वयं राज्ञा चौर्यदोषेण च क्वचित् ॥ ८५ ॥ परदारा
ब्रमंतश्च द्वेषात्तत्पतिभिर्हताः ॥ असमानैश्च संकीर्णैश्चांडालाद्यैश्च विग्रहम् ॥ ८६ ॥ कृत्वा तैर्निहतास्तांश्च चांडालादीन्समाश्रिताः ॥ गवाग्नि
विषदाश्चैव पाखंडाः क्रूरबुद्धयः ॥ ८७ ॥ क्रोधात्प्रायं विषं वह्निं शस्त्रमुद्बंधनं जलम् ॥ गिरिवृक्षात्प्रपातं च ये कुर्वंति नराधमाः ॥ ८८ ॥ कुशिल्प
जीविनो ये च पञ्चसूनाधिकारिणः ॥मखे सभासु ये केचिद्धीनप्राया नपुंसकाः ॥ ८९ ॥ब्रह्मदंडहता ये तु ये चापि ब्राह्मणैर्हताः ॥ महापातकिनो ये
च पतितास्ते प्रकीर्तिताः ॥९०॥स्नानेन शुद्धिमायांति गयाकूपस्य भस्मना ॥ इति ते कथितं देवि गयामाहात्म्यमुत्तमम् ॥ ९१ ॥ सर्वपापप्रशमनं

पितॄणां मुक्तिदायकम् ॥यः शृणोति नरो भक्त्या श्राद्धे पर्वणि वान्वहम् ॥९२॥ श्रावयेद्वा वरारोहे सोऽपि स्याद्ब्रह्मलोकभाक्॥इदं स्वस्त्ययनं पुण्यं धन्यं स्वर्गतिदं नृणाम् ॥ ९३॥ यशस्यमपि चायुष्यं पुत्रपौत्रविवर्द्धनम् ॥ ९४ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीवसुसंवादे गयामाहात्म्यं नाम सप्तचत्वारिंशत्तमोऽध्यायः॥४७॥मांधातोवाच ॥ भगवन्सम्यगाख्यातं सर्वज्ञेन कृपालुना ॥ मोहिनीचरितं पुण्यं महापातकनाशनम् ॥१॥ पतिं पुत्रं सपत्नीं च या प्रसह्य भवार्णवात्॥मोचयामास धर्मस्य रक्षणे पितुराज्ञया॥२॥सा ब्रह्मपुत्री सर्वज्ञा सर्वलोकहिते रता॥पुरोधसं च संप्राप्ता शरणं प्रभुमात्मनः ॥३॥ श्रुत्वा गयाया माहात्म्य पितॄणां गतिदं परम् ॥ भूयः पप्रच्छ किं विप्रं वसुं वेदविदांवरम् ॥ ४ ॥ वसिष्ठ उवाच ॥ शृणु भूप प्रवक्ष्यामि यदपृच्छत्पुनर्वसुम् ॥ मोहिनी मोहमापन्ना तीर्थसेवनकामुका ॥ ५ ॥ मोहिन्युवाच ॥ साधु साधु द्विजश्रेष्ठ लोकोद्धरणतत्पर ॥ त्वया ह्यनुगृहीताहमधुना करुणात्मना ॥६॥ श्रुतं पुण्यं मया ब्रह्मन् गयामाहात्म्यमुत्तमम्॥गोप्यं पितॄणां गतिदं धर्माख्यानं सुखावहम् ॥७॥ अधुना वद विप्रेंद्र काशीमाहात्म्यमुत्तमम्॥मया पूर्वं श्रुतं ब्रह्मन् किंचित्संध्यावलीमुखात् ॥८॥तेन मे स्मृतिमापन्नं विस्तराद्वद सांप्रतम् ॥ वसिष्ठ उवाच ॥ तच्छ्रुत्वा मोहिनीवाक्यं वसुस्तस्याः पुरोहितः ॥ ९ ॥ वेदवेदांगतत्त्वज्ञः प्राह तां श्रूयतामिति॥वसुरुवाच॥ शुभा काशीपुरी धन्या धन्यो देवो महेश्वरः ॥१०॥ यः सेवतेऽनिशं काशीं मुक्तिदां वैष्णवीं पुरीम् ॥ याचयित्वा हरेः क्षेत्रं स्थितो देवः सनातनः ॥११॥ पूजयंस्तं हृषीकेशं पूज्यमानः सुरादिभिः॥१२॥ वाराणसी तु भुवनत्रयसारभूता रम्या नृणां सुगतिदा किल सेव्यमाना ॥ अत्रागता विविधदुष्कृतकारिणोऽपि पापक्षये विरजसः सुमनःप्रकाशाः ॥ १३ ॥ इदं गुह्यतमं क्षेत्रं सर्वप्राणिसुखावहम् ॥ मोक्षदं सर्वजंतूनां वैष्णवं शैवमेव च ॥ १४ ॥ ब्रह्मघ्नगोघ्नगुरुतल्पगमित्रध्रुक्चन्यासापहरकुशिदादिनिषिद्धवृत्तिः ॥ संसारभूतदृढपाशविमुक्तदेहो वाराणसीं शिवपुरीं समुपैति मर्त्यः ॥ १५ ॥ क्षेत्रं तथेदं सुरसिद्धजुष्टं संप्राप्य मर्त्यः सुकृतप्रभावात् ॥ ख्यातो भवेत्सर्वसुरासुराणां मृतश्च यायात्परमं पदं सः ॥ १६ ॥ क्षेत्रेऽस्मिन्निवसंति ये सुकृतिनो भक्ता हरौ वा हरे पश्यंतोऽन्वहमादरेण शुचयः संतः समाः शंभुना ॥ ते मर्त्या भयदुःखपापरहिताः संशुद्धकर्मक्रिया भित्वा संभवबंधजालगहनं विंदंति मोक्षं परम् ॥ १७ ॥ द्वियोजनमथार्द्धं च पूर्वपश्चिमतः स्थितम् ॥ अर्द्धयोजनविस्तीर्णं दक्षिणोत्तरतः स्मृतम् ॥ १८ ॥ वरणासिर्नदी यावदसिः शुष्कनदी शुभे ॥ एष क्षेत्रस्य विस्तारः प्रोक्तो देवेन शंभुना ॥ १९ ॥ अयनं तूत्तरं ज्ञेयं तिमिचंडेश्वरं ततः ॥दक्षिणं शंकुकर्णं तु ॐकारे तदनंतरम् ॥ २० ॥ पिंगला नाम यत्तीर्थं आग्नेयी सा प्रकीर्तिता ॥ शुष्का सरिच्च सा ज्ञेया लोलार्को यत्र तिष्ठति ॥ २१ ॥

इडानाम्नी तु या नाडी सा सौम्या संप्रकीर्तिता ॥ वरणा नाम सा ज्ञेया केशवो यत्र संस्थितः ॥ २२ ॥ आभ्सां मध्ये तु या नाडी सुषुम्ना
सा प्रकीर्तिता ॥ मत्स्योदरी च सा ज्ञेया विस्वरं तत्प्रकीर्तितम् ॥ २३ ॥ विमुक्तं न कदा यस्मान्मोक्ष्यते न कदाचन ॥ महाक्षेत्रमिदं तस्मादवि
मुक्तमिद स्मृतम् ॥ २४ ॥ प्रयागादपि तीर्थादेरधिकं दुस्तराच्छुभे ॥ अनायासेन वै यत्र मोक्षप्राप्तिः प्रजायते ॥२५ ॥ नानावर्णा विकर्णाश्च
चांडाला ये जुगुप्सिताः ॥ किल्बिषैः पूर्णदेहाश्च प्रकृष्टैः पातकैस्तथा ॥ २६ ॥ भेषजं परमं तेषामविमुक्तं विदुर्बुधाः ॥ दुष्टांधान् दीनकृप
णान्पापान्दुष्कृतकारिणः ॥ २७ ॥ हरोऽनुकंपया सर्वान्नयत्याशु परां गतिम् ॥ क्षेत्रमध्याद्यदा गंगा संगता सरितां पतिम् ॥ २८ ॥ ततः
प्रभृति सा पुण्या पुरी जाता शुभानने ॥ पुण्या चोदङ्मुखी गंगा प्राची चैव सरस्वती ॥ २९ ॥ तत्र मुक्तं कपालं तु शिवेन सुमहात्मना ॥
तस्मिंस्तीर्थे तु ये गत्वा पिंडदानेन वै पितॄन् ॥ ३० ॥ श्राद्धेषु प्रीणयिष्यति तेषां लोकास्तु भास्वराः ॥ ब्रह्महा योऽभिगच्छेत्तु अविमुक्तं
कदाचन ॥ ३१ ॥ तस्य क्षेत्रस्य माहात्म्याद्ब्रह्महत्या निवर्तते ॥ अविमुक्तं गता ये वै महापुण्यकृतो नराः ॥ ३२ ॥ अक्षय्या ह्यजराश्चैव
विदेहाश्च भवंति ते ॥ अज्ञानाज्ज्ञानतो वापि स्त्रिया वा पुरुषेण वा ॥ ३३ ॥ यत्किंचिदशुभं कर्म कृतं चैव कुबुद्धिना ॥ अविमुक्तं प्रविष्टस्य
तत्सर्वं भस्मसाद्भवेत् ॥ ३४ ॥ सदा यजति यज्ञेन सदा दानं प्रयच्छति ॥ सदा तपस्वी भवति ह्यविमुक्ते स्थितो नरः ॥ ३५ ॥ न सा गतिः
कुरुक्षेत्रे गंगाद्वारे न पुष्करे ॥ या गतिर्विहिता पुंसामविमुक्तनिवासिनाम् ॥ ३६ ॥ सर्वात्मना तपः सत्यं प्राणिनां नात्र संशयः ॥ अविमुक्ते
वसेद्यस्तु स तु साक्षान्महेश्वरः ॥ ३७ ॥ अविमुक्तं न सेवंते ये मूढास्तामसा नराः ॥ विण्मूत्ररजसां मध्ये ते वसंति पुनः पुनः ॥ ३८ ॥ अवि
मुक्ते स्थिता नित्यं पांशुभिर्वायुनेरितैः ॥ स्पृष्टा दुष्कृतकर्माणो यांति वै परमां गतिम् ॥ ३९ ॥ यस्तत्र निवसेन्मर्त्यः संयतात्मा समाहितः ॥
त्रैलोक्यमपि भुंजानो वायुभक्षसमः स्मृतः ॥ ४० ॥ तत्र मासं वसेद्यस्तु लब्धाहारो जितेंद्रियः ॥ सम्यक्तेन व्रतं चीर्णं महापाशुपतं भवेत् ॥ ४१ ॥
जन्ममृत्युभयं जित्वा स याति परमां गतिम् ॥ निःश्रेयसगतिं पुण्यां तथा :योगगतिं लभेत् ॥ ४२ ॥ नहि योगगतिर्लभ्या जन्मांतरशतैरपि ॥
प्राप्यते क्षेत्रमाहात्म्यात्प्रभावाच्छंकरस्य च ॥ ४३ ॥ एकाहारस्तु यस्तिष्ठेन्मासं तत्र शुभानने ॥ यावज्जीवकृतं पापं मासेनैकेन नश्यति ॥ ४४ ॥
आदेहपाताद्यो मर्त्योऽविमुक्तं नैव मुञ्चति ॥ब्रह्मचर्येण संयुक्तः स साक्षाच्छंकरो भवेत्॥४५॥ विघ्नैराहन्यमानोऽपि योऽविमुक्तं न च त्यजेत् ॥ स
मुंचति जरामृत्युं जन्म चैतच्च नश्वरम् ॥ ४६ ॥ आदेहपतनाद्ये तु सेवंते ह्यविमुक्तकम् ॥ ते मृता हंसयानेन दिव्यान् लोकान्प्रयांति हि ॥ ४७ ॥

विषयासक्तचित्तोऽपि त्यक्तभक्तिमतिर्नरः ॥ इह क्षेत्रे मृतः सोऽपि संसारं न पुनर्विशेत् ॥ ४८ ॥ स्वर्गापवर्गयोर्हेतुरेतत्तीर्थवरं भुवि ॥ यस्तत्र
पंचतां याति तस्य मुक्तिर्न संशयः ॥ ४९ ॥ जन्मांतरसहस्रेण योगी यत्पदमाप्नुयात् ॥ तदिहैव परं मोक्षं मरणादधिगच्छति ॥५० ॥ ब्राह्मणाः
क्षत्रिया वैश्याः शूद्रा वै वर्णसंकराः ॥ क्रिमयश्चैव ये म्लेच्छाः संकीर्णाः पापयोनयः ॥ ५१ ॥ कीटाः पिपीलिकाश्चैव ये चान्ये मृग
पक्षिणः ॥ कालेन निधनं प्राप्तास्तेऽपि देवेश्वराः स्मृताः ॥ ५२ ॥ चंद्रार्द्धमौलयः सर्वे ललाटाक्षा वृषध्वजाः ॥ प्राणांस्त्यजंति ये तत्र प्राणिन
स्तत्त्वतः शुभे ॥ ५३ ॥ रुद्रत्वं ते तु संप्राप्य मोदंते शिवसन्निधौ ॥ अकामो वा सकामो वा तिर्यग्योनिगतोऽपि वा ॥ ५४ ॥ अविमुक्ते त्यज
न्प्राणान्मुक्तिभाक्स्यान्न संशयः ॥ शिवभक्तिपरा नित्यं नान्यभक्ताश्च ये नराः ॥५५ ॥ तच्चित्तास्तद्गतप्राणा जीवन्मुक्ता न संशयः ॥ अग्निप्रवेशं
ये कुर्युरविमुक्ते विचारतः॥ ५६॥ कालाग्निरुद्रसायुज्यं ते प्रयान्ति च मोहिनि ॥ कुर्वन्त्यनशनं ये तु शिवभक्ताः सुनिश्चिताः ॥ ५७ ॥ न तेषां
पुनरावृत्तिः कल्पकोटिशतैरपि ॥ अविमुक्ते मृत्युकाले भूतानामीश्वरः स्वयम् ॥ ५८ ॥ कर्मभिः प्रेर्यमाणानां कर्णजाप्यं प्रयच्छति ॥ स्वयं रामेण
चाप्युक्तं शिवाय शिवकारिणे ॥ ५९॥ अतिप्रसन्नचित्तेन अविमुक्तनिवासिने ॥ मुमूर्षोर्दक्षिणे कर्णे यस्य कस्यापि वा स्वयम् ॥६०॥ उपदेक्ष्यसि
मन्मंत्रं स मुक्तो भविता शिव ॥ अंतकाले मनुष्याणां छिद्यमानेषु कर्मसु ॥ ६१ ॥ वायुना प्रेर्यमाणानां स्मृतिर्नैवोपजायते ॥येऽविमुक्ते स्थिता
रुद्रा भक्तप्रीतिप्रदायकाः ॥ ६२॥ कर्णजाप्यं प्रयच्छन्ति डिमिचंडेश्वरादयः ॥ नाविमुक्ते मृतः कश्चिन्नरकं याति किल्बिषी॥६३॥ ईश्वरानुगृहीता हि
सर्वे यांति परां गतिम् ॥ उद्देशमात्रात्कथिता अविमुक्तगुणास्तव ॥ ६४ ॥ समुद्रस्यैव रत्नानामविमुक्तस्य विस्तरः ॥ ज्ञानविज्ञाननिष्ठानां परमा
नन्दमिच्छताम् ॥ ६५ ॥ या मतिर्विहिता नूनं स्वर्नीते तु मृतस्य सा॥ प्राणानिह नरस्त्यक्त्वा न पुनर्जायते क्वचित् ॥६६॥ अनंता सा गतिस्तस्य
योगिनामेव या स्मृता ॥ योगपीठं श्मशानाख्यं यत्तीर्थं मणिकर्णिका ॥ ६७ ॥ तेषु मुक्तिः समुद्दिष्टा पतितानां स्वकर्मणा ॥ तत्रापि
सर्वतीर्थानामुत्तमा मणिकर्णिका ॥ ६८ ॥ यत्र नित्यं वरारोहे सान्निध्यं धूर्जटेः स्मृतम् ॥ दशानामश्वमेधानां यज्ञानां यत्फलं स्मृतम् ॥ ६९ ॥
तदवाप्नोति धर्मात्मा तत्र स्नात्वा वरानने ॥ स्वस्वमप्यत्र यो दद्याद्ब्राह्मणे वेदपारगे ॥ ७० ॥ शुभां गतिमवाप्नोति हुताश इव दीप्यते ॥ उप
वासं तु यः कृत्वा विप्रान्संतर्पयेन्नरः ॥ ७१ ॥ स सौत्रामणियज्ञस्य फलमाप्नोति निश्चितम् ॥ तत्र दीपप्रदानेन ज्ञानवत्स्फुरतींद्रियम् ॥ ७२ ॥
प्राप्नोति धूपदानेन स्थानं रुद्रनिषेवितम् ॥ वृषभं तरुणं सौम्यं चतुर्वत्सतरीयुतम्॥७३॥योंऽकयित्वा मोचयति स याति परमां गतिम् ॥ पितृभिः
सहितो मोक्षं गच्छत्येव न संशयः ॥ ७४ ॥ किमत्र बहुनोक्तेन धर्मादींस्तु प्रकुर्वतः ॥ यच्छिवं तु समुद्दिश्य तदनंतफलं भवेत् ॥७५ ॥ दशाश्व

मेधिकं पुण्यं पुष्पदाने प्रकीर्तितम् ॥ अग्निहोत्रफलं धूपे गन्धे भूदानजं फलम् ॥ ७६ ॥ मार्जने गोप्रदानस्य फलमत्र प्रकीर्तितम् ॥ अनुलेपे दश
गुणं माल्ये दशगुणं स्मृतम् ॥ ७७ ॥ गीते सहस्रगुणितं वाद्ये लक्षगुणं स्मृतम् ॥ अविमुक्ते महादेवमर्चयंति स्तुवंति वै ॥ ७८ ॥ सर्वपापविमुक्ता
स्ते स्वस्तिष्ठंत्यजरामराः ॥ अविमुक्तं समासाद्य लिंगमर्चयते नरः ॥ ७९ ॥ कल्पकोटिशतैश्चापि तस्य नास्ति पुनर्भवः ॥अजरो ह्यमरश्चैव
क्रीडेत्स भवसन्निधौ ॥ ८० ॥ ये तु ध्यानं समासाद्य मुक्तात्मानः समाहिताः ॥ संनियम्येंद्रियग्रामं जपंति शतरुद्रियम् ॥ ८१ ॥ अविमुक्ते
स्थिता नित्यं कृतार्थास्ते द्विजोत्तमाः ॥ एकाहमुपवासं यः करिष्यति यशस्विनि ॥ ८२ ॥ फलं वर्षशतस्येह लभते नात्र संशयः ॥ अतः परं
तु सायुज्यं गंगावरुणसंगमम् ॥ ८३ श्रवणद्वादशीयोगो बुधवारे यदा भवेत् ॥ तदा तस्मिन्नरः स्नात्वा संनिहत्याफलं लभेत् ॥ ८४ ॥ श्राद्धं
करोति यस्तत्र तस्मिन्काले शुभानने ॥ तारयित्वा पितॄन्सर्वान्विष्णुलोकं स गच्छति ॥ ८५ ॥ वरणास्योस्तु जाह्नव्याः संगमे लोकवि
श्रुते ॥ दत्वाश्वं च विधानेन स भूयोऽपि न जायते ॥ ८६ ॥ यस्तत्र संगमेशानमर्चयेद्भक्तिमान्नरः ॥ स साक्षाद्देवदेवेशो निग्रहानुग्रहे क्षमः
॥ ८७ ॥ देवेश्वरस्य पूर्वेण स्वयं तिष्ठति केशवः ॥ केशवस्य च पूर्वेण विश्रुतः संगमेश्वरः ॥ ८८॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनी
वसुसंवादे काशीमाहात्म्यं नामाष्टचत्वारिंशत्तमोऽध्यायः ॥ ४८ ॥ वसुरुवाच ॥ वायव्ये तु दिशो भागे तस्य पीठस्य सुंदरि ॥ लिंगं प्रस्थापितं
तत्र सगरेण चतुर्मुखम् ॥ १ ॥ सागराद्वायुकोणे तु भद्रदेहं सरः स्मृतम् ॥ गवां क्षीरेण संजातं सर्वपातकनाशनम् ॥ २ ॥ कपिलानां सहस्रस्य
सम्यग्दत्तस्य यत्फलं ॥ तत्फलम् लभते मर्त्यः स्नानमात्रेण मोहिनि ॥ ३ ॥ पूर्वाभाद्रपदायुक्ता पौर्णमासी यदा भवेत् ॥ तदा पुण्यतमः कालो
ह्यश्वमेधफलप्रदः ॥ ४ ॥ यत्र सा दृश्यते देवी विख्याता भीष्मचंडिका ॥ श्मशाने तां समभ्यर्च्य न नरो दुर्गतिं व्रजेत् ॥ ५ ॥ अंतकेश्वरपूर्वेण
दक्षे सर्वेश्वरस्य च ॥ मातलीश्वरसौम्ये तु कृत्तिवासेश्वरः स्मृतः ॥६ ॥ कृत्तिवासेश्वरं दृष्ट्वा तं संपूज्य परां गतिम् ॥ एकेन जन्मना देवि कृत्तिवासे
तु लभ्यते ॥ पूर्वजन्मकृतं पापं तपसापि न शुद्ध्यति ॥ ७॥तत्क्षणान्नश्यते पापं तस्य लिंगस्य दर्शनात् ॥ कृते तु त्र्यंबकं पूर्वं त्रेतायां कृत्तिवास
सम् ॥ ८ ॥महेश्वरं तु देवस्य द्वापरे नाम गीयते ॥ हस्तिपालेश्वरं नाम कलौ सिद्धैस्तु गीयते ॥ ९ ॥ कृत्तिवासेश्वरो देवो द्रष्टव्यश्च पुनः पुनः॥
यदीहेत्तारकं ज्ञानं शाश्वतं चामृतप्रदम् ॥ १० ॥ दर्शनाद्देवदेवस्य ब्रह्महापि प्रमुच्यते ॥ स्पर्शने पूजने चैव सर्वयज्ञफलं लभेत् ॥ ११ ॥ श्रद्धया
परया देवं येऽर्चयंति सनातनम् ॥ फाल्गुनस्य चतुर्दश्यां कृष्णपक्षे समाहिताः ॥ १२ ॥ पुष्पैः फलैस्तथा पत्रैर्भक्ष्यैरुच्चावचैस्तथा ॥ क्षीरेण मधुना

चैव तोयेन सह सर्पिषा ॥ १३ ॥ तर्पयंति परं लिंगमर्चयंति शुभं शिवम् ॥ डुंडुकारनमस्कारैर्नृत्यगीतैस्तथैव च ॥ १४ ॥ मुखवाद्यैरने
कैश्च स्तोत्रैर्मंत्रैस्तथैव च ॥ उपोष्य रजनीमेकां भक्त्या परमया हरम् ॥ १५ ॥ ते यांति परमं स्थानं पूजयित्वा च मोहिनि ॥ भूतायां चैत्रमासस्य
योऽर्चयेत्परमेश्वरम् ॥ १६ ॥ स च वित्तेश्वरं प्राप्य क्रीडते यक्षराडिव ॥ वैशाखस्य चतुर्दश्यां योऽर्चयेत्प्रयतः शिवम् ॥१७॥ वैशाखलोकमासाद्य
तस्यैवानुचरो भवेत् ॥ ज्येष्ठमासे चतुर्दश्यां योऽर्चयेच्छ्रद्धया हरम् ॥ १८ ॥ स्वर्गलोकमवाप्नोति यावदाभूतसंप्लवम्॥चतुर्दश्यां शुचौ भद्रे योऽर्चये
त्प्रयतः शिवम् ॥१९॥ सूर्यलोकं समासाद्य क्रीडते यावदीप्सितम् ॥ श्रावणस्य चतुर्दश्यां कामलिंगं समुत्थितम् ॥ २० ॥ ददाति वारुणं लोकं
क्रीडते चाप्सरोन्वितः ॥ मासि भाद्रपदे युक्तमर्चयित्वा तु शंकरम् ॥ २१ ॥ पुष्पैः फलैश्च विविधैरिंद्रस्यैति सलोकताम् ॥ पितृपक्षे चतुर्दश्यां
पूजयित्वा यथेश्वरम् ॥ २२ ॥ प्राप्नोति पितृलोकं तु क्रीडते पूजितश्च तैः ॥ प्रबोधमासे देवेशमर्चयित्वा महेश्वरम् ॥ २३ ॥ चंद्रलोकं समासाद्य
क्रीडते यावदीप्सितम् ॥ बहुले मार्गशीर्षस्य पूजयित्वा पिनाकिनम् ॥ २४ ॥ विष्णुलोकमवाप्नोति क्रीडते कालमक्षयम् ॥ अर्चयित्वा तथा
पौषे स्थाणुं हृष्टेन चेतसा ॥ २५ ॥ प्राप्नोति नैर्ऋतं स्थानं तेनैव सह मोदते ॥ माघे समर्चयित्वा वै पुष्पमूलफलैः शुभैः ॥ २६ ॥ प्राप्नोति
शिवलोकं तु त्यक्त्वा संसारसागरम् ॥ कृत्तिवासेश्वरं देवमर्चयेत्तु प्रयत्नतः ॥ २७ ॥ अविमुक्ते वसेच्चैव यदीच्छेच्छांकरं पदम् ॥ घंटा
कर्णो ह्रदस्तत्र व्यासेशस्य तु पश्चिमे ॥ २८ ॥ स्नानं कृत्वा ह्रदे तस्मिन्व्यासेशस्य च दर्शनात् ॥ यत्र तत्र मृतो देवि वारा
णस्यां मृतो भवेत् ॥ २९ ॥ दंडखाते नरः स्नात्वा तर्पयित्वा स्वकान्पितॄन् ॥ नरकस्थास्तु ये देवि पितृलोकं व्रजंति ते ॥ ३० ॥
पिशाचत्वं गता देवि ये नराः पापकर्मिणः ॥ तेषां पिंडप्रदानेन देहस्योद्धरणं स्मृतम् ॥ ३१ ॥ दर्शनात्तस्य खातस्य कृतकृत्यो
ऽभिजायते ॥ तत्रैव ललिता देवी वर्तते लोकशर्मदा ॥ ३२ ॥ ये च तां पूजयिष्यंति तस्मिन्स्थाने स्थिताः स्वयम् ॥ तेषां सा
विविधान्भोगान्संप्रदास्यति मानदे ॥ ३३ ॥ जागरं ये तु तस्याश्च पुरः कुर्वंति दीपकैः ॥ तेषां सा ह्यक्षयान् लोकान् वितरिष्यति मोहिनि
॥ ३४ ॥ आलयं ये प्रकुर्वंति भूमिं संमार्जयंति च ॥ तेषामष्टसहस्रस्य सुवर्णस्य फलं भवेत् ॥ ३५ ॥ तामुद्दिश्य तु यो देवि ब्राह्मणान्वेदपार
गान् ॥ भोजयिष्यति मिष्टान्नैस्तस्य पुण्यफलं शृणु ॥ ३६ ॥ दुर्गालोके वसेत्कल्पमिहैवागच्छते पुनः ॥ नरो वा यदि वा नारी सर्वभोग
समन्वितौ ॥ ३७ ॥ धनधान्यसमायुक्तौ जायेते महतां कुले ॥ सुभगौ दर्शनीयौ च रूपयौवनगर्वितौ ॥ ३८ ॥ भवेतामीदृशौ देवि सर्व

सौख्यस्य भाजनौ ॥ मानुष्यं दुर्लभं प्राप्य विद्युत्संपातचंचलम्॥ ३९ ॥ येन सा ललिता दृष्टा तस्य जन्मभयं कुतः ॥ पृथ्वीप्रदक्षिणां
कृत्वा यत्फलं लभते नरः ॥ ४० ॥ तत्फलं ललितायाश्च वाराणस्यां प्रदर्शनात् ॥ मासि मासि चतुर्थ्यां तु तस्मिन्काल उपोषितः ॥ ४१ ॥
अर्चयित्वा तु तां देवीं जागरं तत्र कारयेत् ॥ तस्यार्द्धिः सकला देवि त्रैलोक्यस्यापि पूजितम् ॥ ४२ ॥ नलकूबरकेशानं तं च संपूज्य मोहिनि ॥
सर्वसिद्धिप्रदातारं कृत्यकृत्यो नरो भवेत् ॥ ४३ ॥ तस्यैव दक्षिणे देवि मणिकर्णीति च श्रुतम् ॥ तस्य चाग्रे महत्तीर्थं सर्वपापप्रणाशनम् ॥ ४४ ॥
मणिकर्णीश्वरं देवं कुंडमध्ये व्यवस्थितम् ॥ दृष्ट्वा नत्वा समभ्यर्च्य न भूयो जठरे वसेत् ॥ ४५ ॥ तस्य दक्षिणपार्श्वे तु गंगायां स्थापितं
परम् ॥ गंगेश्वरं समभ्यर्च्य सुरलोकमवाप्नुयात् ॥ ४६ ॥ अन्यदायतनं वक्ष्ये वाराणस्यां सुमोहिनि ॥ यत्र वै देवदेवस्य रुचिरं स्थानमी
प्सितम् ॥ ४७ ॥ नीयमानं पुरा लिंगं सुभगे शशिमौलिनः ॥ राक्षसैरंतरिक्षस्थैर्व्रजमानैश्च सत्वरम् ॥ ४८ ॥ अस्मिन्देशे यदा प्राप्तं तदा
देवेन चिंतितम् ॥ अविमुक्तवियोगस्तु कथं मे न भवेदिति ॥ ४९ ॥ इममर्थं तु देवेशो यावच्चिंतयते शुभे ॥ तावत्कुक्कुटशब्दस्तु तस्मिन्स्थाने
बभूव ह ॥ ५० ॥ शब्दं श्रुत्वा तु तं देवि राक्षसास्त्रस्तचेतसः ॥ लिंगमुत्सृज्य तत्रैव प्रभातसमये गताः ॥ ५१ ॥ गतेषु राक्षसेष्वेवं लिंगं तत्रैव
संस्थितम् ॥ स्थानेऽतिरुचिरे शुभ्रे देवदेवः स्वयं प्रभुः॥ ५२ ॥ अविमुक्ते तत्र मध्ये अविमुक्ततरं स्मृतम् ॥५३॥ तदा विमुक्तेति सुरैर्हरस्य नाम
स्मृतं पुण्यतमाक्षराढ्यम्॥मोक्षप्रदं स्थावरजंगमानां ये प्राणिनः पञ्चतां यांति तत्र॥५४॥ कुक्कुटाश्चापि सुभगे तस्मिन्स्थाने स्थिताः सदा॥ अद्यापि
तत्र दृश्यंते पूज्यमानाः शुभात्मभिः ॥ ५५ ॥ अविमुक्तं सदा देवि यः श्रयेदीक्षया नरः ॥ न तस्य पुनरावृत्तिः कल्पकोटिशतैरपि ॥ ५६ ॥
देवस्य दक्षिणे भागे वापी तिष्ठति शोभना ॥ तस्यास्तथोदकं पीत्वा नावृत्तिः पुनरत्र च ॥ ५७ ॥ त्रीणि लिंगानि वर्तंते हृदये पुरुषस्य
तु ॥ तथा यैस्तज्जलं पीतं ते कृतार्थास्तु मानवाः ॥ ५८ ॥ तेषां तु तारकं ज्ञानमस्त्येवेति न संशयः ॥ वापीजले नरः स्नात्वा दृष्ट्वा दंडक
नामकम् ॥ ५९ ॥ अविमुक्तं ततो दृष्ट्वा कैवल्यं लभते क्षणात् ॥ तत्र संध्यामुपासित्वा ब्राह्मणः सकृदेव तु ॥ ६० ॥ पंचषष्टिसमाः संध्या तेन
चोपासिता भवेत् ॥ पुरीं वाराणसीं तां तु श्मशानं चाविमुक्तकम् ॥ ६१ ॥ अविमुक्तेश्वरं चैव दृष्ट्वा गणपतिर्भवेत् ॥ अविमुक्तेश्वरं लिंगं
तत्र दृष्ट्वैव मानवः ॥ ६२ ॥ सद्यः पापैस्तथा रोगैः पशुपाशैर्विमुच्यते ॥ अविमुक्तस्य चाग्रे तु लिंगं पश्चान्मुखं स्थितम् ॥ ६३ ॥ अविमुक्तं च
तं भद्रे नाम्ना वै लक्षणेश्वरम्॥तेन वै दृष्टमात्रेण ज्ञानवान् जायते नरः ॥ ६४ ॥ तस्य चोत्तरतो देवि लिंगं चैव चतुर्मुखम् ॥ चतुर्थेश्वरनामेदं

पापभीमोचनं परम् ॥ ६५ ॥ क्षेत्रं वाराणसीनाम मुक्तिदं प्राणिनां भुवि ॥ अविमुक्तेश्वरं तत्र जीवन्मुक्तं प्रकीर्तितम् ॥६६॥ यत्र तत्र स्थितस्यापि गाणपत्यं विधीयते ॥ प्राणांस्तु तत्र संत्यज्य मुक्तिमात्यंतिकीं व्रजेत् ॥ ६७ ॥ एतदभ्यंतरे क्षेत्रे प्रथमावरणं स्मृतम् ॥ तथा द्वितीयावरणे प्राच्यां तु मणिकार्णिका ॥ ६८ ॥ सप्तकोट्यस्तु लिंगानि तत्र स्थाने स्थितानि हि ॥ तेषां दर्शनमात्रेण यज्ञानां फलमाप्नुयात् ॥६९॥ एतानि सिद्धलिंगानि कूपाः पुण्यास्तस्था ह्रदाः ॥ वाप्यो नद्योऽथ कुंडानि तथा तेऽपि प्रकीर्तिताः ॥ ७०॥ एतेषु चैव यः स्नानं करिष्यति समाहितः ॥ लिंगानि स्पर्शयित्वा च संसारे न विशेत्पुनः ॥ ७१ ॥ पृथिव्यां यानि तीर्थानि ह्यंतरिक्षे च यानि तु ॥ तेषां मध्ये तु मुख्यानि कीर्तितानि मया हिते ॥ ७२ ॥ तीर्थयात्रा वरारोहे कथिता पापनाशिनी ॥ येन चैषा कृता दृष्टा सोऽपि वै मुक्तिभाग्भवेत् ॥ ७३ ॥ अविमुक्तं तु सुश्रोणि मध्यमावरणं शुभम् ॥ एतत्तु कंटकं नाम मृत्युकालेऽमृतप्रदम्॥ ७४ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीवसुसंवादे काशीमाहात्म्ये तीर्थयात्रावर्णनं नामैकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥ वसुरुवाच ॥ अतः परं प्रवक्ष्यामि यात्राकालं तु मोहिनि ॥ देवाद्यैस्तु कृता या तु यथायोग्यफलातिदा ॥ १ ॥ चैत्रमासे तु दिविजैर्यात्रेयं विहिता पुरा ॥ तत्रस्थैः कामकुंडे तु स्नानपूजनतत्परैः ॥ २ ॥ ज्येष्ठमासे तु वै सिद्धैः कृता यात्रा शुभानने ॥ रुद्रावासस्य कुंडे तु स्नानपूजापरायणैः ॥ ३ ॥ आषाढे चापि गंधर्वैर्यात्रेयं विहिता शुभैः ॥ प्रियादेव्यास्तु कुंडे वै स्नानपूजनकारकैः॥४॥ विद्याधरैस्तु यात्रेयं श्रावणे मासि मोहिनि ॥ लक्ष्मीकुंडस्थितैश्चीर्णा स्नानार्चनपरायणैः॥५॥ मार्कंडेयह्रदस्थैस्तु स्नानपूजनतत्परैः ॥ कृता यक्षैस्तु यात्रेयमिषमासे वरानने ॥ ६ ॥ पन्नगैश्चैव यात्रेयं मार्गमासे तु मोहिनि ॥ कोटितीर्थस्थितैश्चीर्णा स्नानपूजाविधायकैः ॥ ७ ॥ कपालमोचनस्थैस्तु गुह्यकैः शुभलोचने ॥ पौषे मासि कृता यात्रा स्नानध्यानार्चनान्वितैः ॥ ८ ॥ कालेश्वराख्यकुंडस्थैः फाल्गुने मासि शोभने ॥ पिशाचैस्तु कृता यात्रा स्नानपूजादितत्परैः ॥९ ॥ फाल्गुने तु शुभे मासे सिते या तु चतुर्दशी ॥ तेन सा प्रोच्यते देवि पिशाची नाम विश्रुता ॥१०॥ अथ ते संप्रवक्ष्यामि यात्राकृत्यं शुभानने ॥ कृतेन येन मनुजो यात्राफलमवाप्नुयात् ॥ ११ ॥ उदकुंभास्तु दातव्या मिष्टान्नेन समन्विताः ॥ फलपुष्पसमोपेता वस्त्रैः संछादिताः शुभाः ॥१२ ॥ चैत्रस्य शुक्लपक्षे तु तृतीया या महाफला ॥ तत्र गौरी तु द्रष्टव्या भक्तिभावेन मानवैः ॥ १३ ॥ स्नानं कृत्वा तु गंतव्यं गोप्रेक्षे तु वरानने ॥ स्वर्द्वारि कालिकादेवी अर्चितव्या प्रयत्नतः ॥ १४ ॥ अन्या चापि परा प्रोक्ता संवर्ता ललिता शुभा ॥ द्रष्टव्या चैव सा भक्त्या सर्वकामफलप्रदा ॥ १५ ॥ततस्तु भोजयेद्विप्राञ्छिवभक्ताञ्छुचिव्रतान् ॥ वासोभिर्दक्षिणाभिश्च पुष्कालभिर्यथा

हंतः ॥१६॥पंचगौरीः समुद्दिश्य रसान् गंधान्द्विजेऽर्पयेत्॥ उत्तमं श्रेय आप्नोति सौभाग्येन समन्वितः॥१७॥ विनायकान्प्रवक्ष्यामि क्षेत्रावासे तु
विघ्नदान् ॥यान्संपूज्य नरो देवि निर्विघ्नेन फलं लभेत्॥१८॥ढुण्ढिं तु प्रथमं दृष्ट्वा तथा किलविनायकम्॥देव्या विनायकं चैव गोप्रेक्षं हस्तिहस्ति
नम्॥१९॥विनायकं तथैवान्यं सिंदूर्यं नाम विश्रुतम्॥चतुर्थ्यां देवि द्रष्टव्या एवं चैव विनायकाः॥२०॥लड्डुकाश्च प्रदातव्या एतानुद्दिश्य वाडवे॥
एतेन चैव कृत्येन सिद्धिमाज्ञायते नरः॥२१॥अतः परं प्रवक्ष्यामि चंडिकाः क्षेत्ररक्षिकाः॥दक्षिणे रक्षते दुर्गा नैर्ऋते चांतरेश्वरी ॥२२॥ अंगारेशी
पश्चिमे तु वायव्ये भद्रकालिका॥उत्तरे भीमचंडा च महामत्ता तथैशके॥२३॥ऊर्द्ध्वकेशीसमायुक्ता शांकरी पूर्वतः स्मृता॥अधःकेशी तथाग्नेय्यां चित्रघंटा
च मध्यतः ॥ २४ ॥ एतास्तु चंडिकादेवीर्यो वै पश्यति मानवः ॥ तस्य तुष्टाश्च ताः सर्वाः क्षेत्रं रक्षंति तत्पराः ॥ २५ ॥ विघ्नं कुर्वंति सततं
पापिनां देवि सर्वदा ॥ तस्माद्देव्यः सदा पूज्या रक्षार्थं सविनायकाः ॥ २६ ॥ यदीच्छेत्परमां सिद्धिं संततिं विभवं सुखम् ॥ ततो भक्त्या गंध
पुष्पनैवेद्यादीन्समर्प्पयेत् ॥ २७ ॥ अन्यच्च ते प्रवक्ष्यामि तस्मिन्स्थाने सुलोचने॥ तिस्रो नद्यस्तु तत्रस्था वहंति च शुभोदकाः ॥ २८ ॥ तासां
दर्शनमात्रेण ब्रह्महत्या निवर्ततें ॥ एका तु तत्र त्रिस्रोता तथा मंदाकिनी परा ॥ २९ ॥ मत्स्योदरी तृतीया च एतास्तिस्रस्तु पुण्यदाः ॥ मंदाकिनी
तत्र पुण्या मध्यमेश्वरसंस्थिता ॥ ३० ॥ संस्थिता त्रिस्रोतिका च अविमुक्तेति पुण्यदा ॥ मत्स्योदरी तु ॐकारे पुण्यदा सर्वदैव हि ॥ ३१ ॥
तस्मिन्स्थाने यदा गंगा आगमिष्यति मोहिनी ॥ तदा पुण्यतमः कालो देवानामपि दुर्लभः ॥ ३२ ॥ वरणासिक्तसलिले जाह्नवीजल
विप्लुते ॥ तत्र नादेश्वरे पुण्ये स्नातः किमनुशोचति ॥ ३३ ॥ मत्स्योदरीसमायुक्ता यदा गंगा बभूव ह ॥ तस्मिन्काले शिवः स्नाना
त्कपालं मुक्तवान्छुभे ॥ ३४ ॥ कपालमोचनं नाम तत्रैव सुमहत्सरः ॥ पावनं सर्वसत्त्वानां पुण्यदं परिकीर्तितम् ॥ ३५ ॥ मत्स्योदरीजले
गंगा ॐकारेश्वरसन्निधौ ॥ तदा तस्मिञ्जले स्नात्वा दृष्ट्वा चोंकारमीश्वरम् ॥ ३६ ॥ शोकं जरां मृत्युबंधं ततो न स्पृशते नरः ॥ तस्मिन्स्नातः
शिवः साक्षादोंकारेश्वरसंज्ञितः ॥ ३७ ॥ एतद्रहस्यमाख्यातं तव स्नेहाद्वरानने ॥ अकारं चाप्युकारं च मकारं च प्रकीर्तितम् ॥ ३८ ॥ अकार
स्तत्र विज्ञेयो विष्णुलोकगतिप्रदः ॥ तस्य दक्षिणपार्श्वे तु उकारः परिकीर्तितः ॥ ३९ ॥ तत्र सिद्धिं परां प्राप्तो देवाचार्यो बृहस्पतिः
॥ ॐकारं तत्र विज्ञेयं ब्रह्मणः पदमव्ययम् ॥ ४० ॥ तयोस्तथोत्तरे भागे मकारं विष्णुसंज्ञितम् ॥ तस्मिँल्लिंगे तु संसिद्धः कपिलर्षिर्म
हामुनिः ॥ ४१ ॥ वाराणसीमभ्युपेत्य पंचायतनमुत्तमम् ॥ आराध्यमानो देवेशं भीष्मस्तत्र स्थितोऽभवत् ॥ ४२ ॥ तस्मिन्स्थाने तु

सुभगे स्वयमाविरभूच्छिवः ॥ गोप्रेक्षक इति ख्यातः संस्तुतः सर्वदैवतैः ॥ ४३ ॥ गोप्रेक्षेश्वरमागत्य दृष्ट्वाभ्यर्च्य च मानवः ॥ न दुर्गतिमवाप्नोति
कल्मषैश्च विमुच्यते ॥ ४४ ॥ वनस्था दह्यमानास्तु सुरभ्यो दाववह्निना ॥ भ्रमंत्योऽस्मिन्ह्रदेऽभ्येत्य शांतास्तोयं पपुस्तदा ॥ ४५ ॥ कपिला
ह्रद इत्येवं ततः प्रभृति कथ्यते ॥ तत्रापि स शिवः साक्षाद्वृषध्वज इति स्मृतः ॥ ४६ ॥ सान्निध्यं कृतवान्देवो दृश्यमानः सदा स्थितः ॥
कपिलाह्रदतीर्थेऽस्मिन्स्नात्वा संयतमानसः ॥ ४७ ॥ वृषध्वजं शिवं दृष्ट्वा सर्वयज्ञफलं लभेत् ॥ स्वर्लोकतां मृतस्तत्र पूजयित्वा
शिवो भवेत् ॥ ४८ ॥ लभते देहभेदेन गणत्वं चातिदुर्लभम् ॥ अस्मिन्नेव प्रदेशे तु गावो वै ब्रह्मणा स्वयम् ॥ ४९ ॥ शांत्यर्थं सर्व
लोकानां सर्वान्पावयितुं ध्रुवम् ॥ भद्रदोहं सरस्तत्र पुण्यं पापहरं शुभम् ॥ ५० ॥ तस्मिन्स्थाने नरः स्नातः साक्षाद्भार्गीश्वरो भवेत् ॥
शिवस्तत्र समानीय स्थापितः परमेष्ठिना ॥ ५१ ॥ ब्रह्मणश्चापि संगृह्य विष्णुना स्थापितः पुनः ॥ हिरण्यगर्भ इत्येवं नाम्ना तत्र स्थितः
शिवः ॥ ५२ ॥ पुनश्चापि ततो ब्रह्मा स्वर्लोकेश्वरसंज्ञकम् ॥ स्थापयामास वै लिंगं स्वर्लीलं कारणे क्वचित् ॥ ५३ ॥ दृष्ट्वा वै तं तु देवेशं
शिवलोके महीयते ॥ प्राणानिह पुनस्त्यक्त्वा न पुनर्जायते क्वचित् ॥ ५४ ॥ अनंता सा गतिस्तस्य योगिनामेव या स्मृता ॥ अस्मिन्नेव
महीदेशे दैत्यो दैवतकंटकः ॥ ५५ ॥ व्याघ्ररूपं समास्थाय निहतो दर्पितो बली ॥ व्याघ्रेश्वर इति ख्यातो नित्यं तत्र समास्थितः ॥ ५६ ॥
न पुनर्दुर्गतिं याति दृष्ट्वैनममरेश्वरम् ॥ हिमवत्स्थापितं लिंगं शैलेश्वरमिति स्थितम् ॥ ५७ ॥ दृष्ट्वैतन्मनुजो भद्रे न दुर्गतिमवाप्नुयात् ॥
उत्पलो विदलश्चैव यौ दैत्यौ ब्रह्मणो वरात् ॥ ५८ ॥ स्त्रीलौल्याद्दर्पितौ दृष्ट्वा पार्वत्या निहतावुभौ ॥ सारंगं कंतुकेनात्र तस्येदं चिह्नमास्थितम्
॥ ५९ ॥ दृष्ट्वैतन्मनुजो लिंगं ज्येष्ठस्थानं समाश्रितम् ॥ न शोचति पुनर्भद्रे सिद्धो जन्मनि जन्मनि ॥ ६० ॥ समंतात्तस्य दैवैस्तु लिंगानि
स्थापितानि च ॥ दृष्ट्वा च तानि वै मर्त्यो देहभेदे गणो भवेत् ॥ ६१ ॥ नदी वारायणसी चेयं पुण्या पापप्रणाशिनी ॥ क्षेत्रमेतदलंकृत्य जाह्नव्या
सह संगता ॥ ६२ ॥ स्थापितं संगमे चास्मिन्ब्रह्मणा लिंगमुत्तमम् ॥ संगमेश्वरमित्येव ख्यातं जगति दृश्यताम् ॥ ६३ ॥ संगमे देवनद्योश्च यः
स्नात्वा मनुजः शुभे ॥ अर्चयेत्संगमेशानं तस्य जन्मभयं कुतः ॥ ६४ ॥ स्थापितं लिंगमेतच्च शुक्रेण भृगुसूनुना ॥ नाम्ना शुक्रेश्वरं भद्रे
सर्वसिद्धामरार्चितम् ॥ ६५ ॥ दृष्ट्वैतन्मानवः सद्यो मुक्तः स्यात्सर्वकिल्बिषैः ॥ मृतश्च न पुनर्जन्म संसारे लभते नरः ॥ ६६ ॥ जंबुकोऽत्र
हतो दैत्यो महादेवेन मोहिनि ॥ तल्लिंगं तु नरो दृष्ट्वा सर्वान्कामानवाप्नुयात् ॥ ६७ ॥ देवैः शक्रपुरोगैश्च एतानि स्थापितानि हि ॥

जानीहि पुण्यलिंगानि सर्वकामप्रदानि च ॥ ६८ ॥ एवमेतानि सर्वाणि शिवलिंगानि मोहिनि ॥ कथितानि मया तुभ्यं क्षेत्रेऽस्मिन्न
विमुक्तके ॥ ६९ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीवसुसंवादे काशीमाहात्म्यं नाम पञ्चाशत्तमोऽध्यायः ॥ ५० ॥ वसुरुवाच ॥
अथान्यत्ते प्रवक्ष्यामि गंगामाहात्म्यमुत्तमम् ॥ वाराणसीस्थितं भद्रे भुक्तिमुक्तिफलप्रदम् ॥ १ ॥ अविमुक्ते कृतं यत्तु तदेवाक्षयतां व्रजेत् ॥
अविमुक्तगतः कश्चिन्नरकं नैति किल्बिषी ॥ २ ॥ अविमुक्तकृतं यत्तु पापं वज्रं भवेच्छुभे ॥ त्रैलोक्ये यानि तीर्थानि मोक्षदानि
च कृत्स्नशः ॥ ३ ॥ सेवंते सततं गंगां काश्यामुत्तरवाहिनीम् ॥ दशाश्वमेधे यः स्नात्वा दृष्ट्वा विश्वेश्वरं शिवम् ॥ ४ ॥ सद्यो निष्पातको भूत्वा मुच्यते
भवबंधनात् ॥ गंगा हि सर्वतः पुण्या ब्रह्महत्यापहारिणी ॥ ५ ॥ वाराणस्या विशेषेण यत्र चोत्तरवाहिनी ॥ वरणायास्तथास्याश्च जाह्नव्याः संगमे
नरः ॥ ६ ॥ स्नानमात्रेण सर्वेभ्यः पातकेभ्यः प्रमुच्यते ॥ काश्यामुत्तरवाहिन्यां गंगायां कार्तिके तथा ॥ ७ ॥ स्नात्वा माघे च मुच्यंते महापापा
दिपातकैः ॥ सर्वलोकेषु तीर्थानि यानि ख्यातानि तानि च ॥ ८ ॥ सर्वाण्येतानि सुभगे काश्यामायांति जाह्नवीम् ॥ नित्यं पर्वसु सर्वेषु पुण्यै
श्चायतनैः सह ॥ ९ ॥ उत्तराभिमुखीं गंगां काश्यामायांति चान्वहम् ॥ महापातकदोषादिदुष्टानां स्पर्शनोद्भवम् ॥ १० ॥ व्यपोहितुं स्वपापं च
जंतुपापविमुक्तये ॥ जन्मांतरशतेनापि सत्कर्मनिरतस्य च ॥ ११ ॥ अन्यत्र सुधिया भद्रे मोक्षो लभ्येत वा न वा ॥ एकेन जन्मना त्वत्र गंगायां
मरणेन च ॥ १२ ॥ मोक्षस्तु लभ्यते काश्यां नरेणावलितात्मना ॥ ख्यातो धर्मनदो नाम ह्रदस्तत्रैव सुंदरि ॥ १३ ॥ धर्म एव स्वरूपेण
महापातकनाशनः ॥ धूली च धूतपापा सा सर्वतीर्थमयी शुभा ॥ १४ ॥ हरेन्महापापसंघान्कूलजानिव पादपान् ॥ किरणा धूतपापा च पुण्यतोया
सरस्वती ॥ १५ ॥ गंगा च यमुना चैव पंच नद्यः प्रकीर्तिताः ॥ अतः पञ्चनदं नाम तीर्थं त्रैलोक्यविश्रुतम् ॥ १६ ॥ तत्राप्लुतो न गृह्णी
यादेहितां पांचभौतिकीम् ॥ अस्मिन्पंचनदीनां तु संगमेऽघौघभेदने ॥ १७ ॥ स्नानमात्रान्नरो याति भित्वा ब्रह्मांडमंडपम् ॥ प्रयागे
माघमासे तु सम्यक् स्नानस्य यत्फलम् ॥ १८ ॥ तत्फलं स्याद्दिनैकेन काश्यां पंचनदे ध्रुवम् ॥ स्नात्वा पंचनदे तीर्थे कृत्वा च
पितृतर्पणम् ॥ १९ ॥ विष्णुं माधवमभ्यर्च्य न भूयो जन्मभाग्भवेत् ॥ यावत्संख्यास्तिला दत्ताः पितृभ्यो जलतर्पणे ॥ २० ॥
पुण्ये पञ्चनदे तीर्थे तृप्तिः स्यात्तावदाब्दिकी ॥ श्रद्धया यैः कृतं श्राद्धं तीर्थे पञ्चनदे शुभे ॥ २१ ॥ तेषां पितामहा मुक्ता नानायोनिगता अपि ॥ यत्र
लोके पितृगणैर्गाथेयं परिगीयते ॥ २२ ॥ महिमानं पांचनदं दृष्ट्वा श्राद्धविधानतः ॥ अस्माकमपि वंश्योऽत्र कश्चिच्छ्राद्धं करिष्यति ॥ २३ ॥

काश्यां पञ्चनदं प्राप्य येन मुच्यामहे वयम् ॥ तत्र पञ्चनदे तीर्थे यत्किंचिद्दीयते वसु ॥ २४ ॥ कल्पक्षयेऽपि न भवेत्तस्य पुण्यस्य संक्षयः ॥वंध्यापि
वर्षपर्यंत स्नात्वा पञ्चनदे ह्रदे ॥ २५ ॥ समर्च्य मंगलां गौरीं पुत्रं जनयति ध्रुवम् ॥ जलैः पांचनदैः पुण्यैर्वाससा परिशोधितैः ॥ २६ ॥ महाफल
मवाप्नोति स्नापयित्वेह दिक्श्रुताम्॥ पञ्चामृतानां कलशैरष्टोत्तरशतोन्मितैः ॥२७॥ तुलितोऽधिकतां प्राप्तो बिंदुः पांचनदस्तु सः॥पंचकूर्चेन पीतेन
यात्र शुद्धिरुदाहृता ॥ २८ ॥ सा शुद्धिः श्रद्धया प्राश्य बिन्दुं पञ्चनदांभसाम् ॥ भवेदथ ह्रदस्नानाद्राजसूयाश्वमेधयोः॥ २९ ॥ यत्फलं तच्छतगुणं
स्मृतं पञ्चनदांबुना ॥ राजसूयाश्वमेधौ च भवेतां स्वर्गसाधने ॥ ३०॥ आब्रह्मपट्टिकाद्वंद्वान्मुक्तिः पञ्चनदांबुभिः ॥ स्वर्गनद्यभिषेकोऽपि न तथा
संमतः सताम् ॥३१॥अभिषेकः पांचनदो यथानन्यो वरप्रदः॥शतं समास्तपस्तप्त्वा कृते यत्प्राप्यते फलम्॥३२॥तत्कार्तिके पञ्चनदे सकृत्स्नानेन
लभ्यते ॥इष्टापूर्तेषु धर्मेषु यावज्जन्मकृतेषु यत् ॥ ३३ ॥अन्यत्र स्यात्फलं तस्याधिकं पञ्चनदांबुभिः॥न धूतपापसदृशं तीर्थं क्वापि महीतले॥३४॥
यदेकस्नानतो नश्येदघं जन्मत्रयार्जितम् ॥ कृते धर्मनदं नाम त्रेतायां धूतपातकम् ॥ ३५ ॥ द्वापरे बिंदुतीर्थं च कलौ पञ्चनदं स्मृतम् ॥
बिंदुतीर्थे नरो दत्वा कांचनं कृष्णलोन्मितम् ॥ ३६ ॥ न दरिद्रो भवेत्क्वापि न सुखेन वियुज्यते ॥ गोभूतिलहिरण्याश्ववासोऽन्नस्थानभूषणम्
॥३७॥ यत्किंचिद्बिंदुतीर्थेऽत्र दत्वाक्षयमवाप्नुयात् ॥ एकामप्याहुतिं कृत्वा समिद्धेऽग्नौ विधानतः ॥ ३८ ॥ पुण्ये धर्मनदीतीर्थे कोटिहोमफलं
लभेत् ॥ न पंचनदतीर्थस्य महिमानमनंतकम् ॥ ३९ ॥ कोऽपि वर्णयितुं शक्तश्चतुर्वर्गशुभौकसः ॥ इति ते कथितं भद्रे काशीमाहात्म्यमुत्तमम्
॥ ४० ॥सुखदं मोक्षदं नृणां महापातकनाशनम् ॥ ब्रह्मघ्नो मद्यपः स्वर्णस्तेयी च गुरुतल्पगः ॥ ४१ ॥ महापातकयुक्तोऽपि संयुक्तोऽप्युपपातकैः ॥
अविमुक्तस्य माहात्म्यश्रवणाच्छुद्धिमाप्नुयात् ॥ ४२ ॥ ब्राह्मणो वेदविद्वान्स्यात्क्षत्रियो विजयी रणे ॥ वैश्यो धनपतिः शूद्रो विष्णुभक्तसमा
गमी॥४३॥श्रवणादस्य सुभगे भूयात्पठनतोऽपि वा॥सर्वयज्ञेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ॥४४॥तत्सर्वं समवाप्नोति पठनाच्छ्रवणादपि॥विद्यार्थी
लभते विद्यां धनार्थी लभते धनम्॥४५॥भार्यार्थी लभते भार्यां सुतार्थी पुत्रमाप्नुयात् ॥ अविमुक्तस्य माहात्म्यं मया ते परिकीर्तितम् ॥ ४६ ॥विष्णु
भक्ताय दातव्यं शिवभक्तिरताय च॥ जगज्जननिभक्ताय सूर्यहेरंबसेविने॥४७॥गुरुशुश्रूषवे दत्वा तीर्थस्नानफलं लभेत्॥शठाय निंदकायापि गोविप्र
सुरविद्विषे ॥ गुरुद्रुहेऽसूयकाय दत्वा मृत्युमवाप्नुयात् ॥ ४८ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे वसुमोहिनीसंवादे काशीमाहात्म्ये एकपञ्चाश
त्तमोऽध्यायः ॥ ५१ ॥ मोहिन्युवाच ॥ धन्योऽसि विप्रवर्य त्वं कृपालुः सर्वदेहिषु ॥ यच्छ्रुतं ते मुखांभोजात्काशीमाहात्म्यमुत्तमम् ॥ १ ॥

अधुनाहं कृतार्थास्मि त्वया हि प्रतिबोधिता॥ कृपालुना निपतिताभ्युद्धृता भवसागरात्॥२॥अधुना श्रोतुमिच्छामि हरेः क्षेत्रस्य मानद॥ माहात्म्यं
यत्र गमनात्कृतार्थो जायते नरः ॥ ३ ॥ पुरुषोत्तमविष्णोस्तु क्षेत्रं मुक्तिविधायकम् ॥ श्रूयते हि पुराणेषु वर्णितं मुनिभिर्द्विजैः ॥ ४ ॥
तत्कथ्यतां महाभाग शिष्याहं यदि ते प्रिया ॥ साधवः सर्वलोकस्य सततोपकृतौ स्थिताः ॥ ५ ॥ वसुरुवाच ॥ शृणु देवि प्रवक्ष्यामि तुभ्यं
माहात्म्यमुत्तमम् ॥ पुरुषोत्तमनाम्नस्तु क्षेत्रस्य ब्रह्मणोदितम् ॥ ६ ॥ पृथिव्यां भारतं वर्षं कर्मभूमिरुदाहृता ॥ तत्रास्ते भारते वर्षे दक्षिणोदधि
तीरगः ॥ ७ ॥ उत्कलेति समाख्यातः स्वर्गमोक्षप्रदायकः ॥ समुद्रादुत्तरं तावद्यावद्विरजमंडलम् ॥८॥देशोऽसौ पुण्यशीलानां गुणैः सर्वैरलंकृतः ॥
सर्वतीर्थानि पुण्यानि पुण्यान्यायतनानि च ॥ ९॥ उत्कले तु विशालाक्षि वेदितव्यानि तानि तु॥समुद्रस्योत्तरे तीरे तस्मिन्देशेऽखिलोत्तमे॥१०॥
आस्ते गुह्यं परं क्षेत्रं मुक्तिदं पापनाशनम् ॥ सर्वत्र वालुकाकीर्णे पवित्रं धर्मकामदम् ॥ ११ ॥ दशयोजनविस्तीर्णं क्षेत्रं परमदुर्लभम् ॥ नक्षत्राणां
यथा सोमः सरसां सागरो यथा ॥१२॥ तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ वसूनां पावको यद्वद्रुद्राणां शंकरो यथा ॥ १३ ॥ तथा श्रेष्ठं
हि तीर्थानां सर्वेषां पुरुषोत्तमम् ॥ वर्णानां ब्राह्मणो यद्वद्वैनतेयश्च पक्षिणाम् ॥ १४ ॥ तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ सेनानीनां यथा
स्कंदः सिद्धानां कपिलो यथा ॥ १५ ॥ ऐरावतो गजेन्द्राणां महर्षीणां भृगुर्यथा॥ मेरुः शिखरिणां यद्वन्नगानां च हिमालयः ॥ १६ ॥ उच्चैःश्रवा
यथाश्वानां कवीनामुशना यथा ॥ मुनीनां च यथा व्यासः कुबेरो यक्षरक्षसाम् ॥ १७ ॥ इंद्रियाणां मनो यद्वद्भूतानामवनी यथा ॥ अश्वत्थः सर्व
वृक्षाणां पवनः पवतां यथा ॥ १८ ॥ अरुंधती यथा स्त्रीणां शस्त्राणां कुलिशं यथा॥अकारः सर्ववर्णानां गायत्री छंदसां यथा॥ १९ ॥ सर्वांगेभ्यो
यथा श्रेष्ठमुत्तमांगं विधातृजे ॥ यथा समस्तविद्यानां मोक्षविद्या परा स्मृता ॥ २० ॥ मनुष्याणां यथा राजा धेनूनां कामधुग्यथा ॥ सुवर्णं
सर्वधातूनां सर्पाणां वासुकिर्यथा ॥ २१ ॥ प्रह्लादः सर्वदैत्यानां रामः शस्त्रभृतां यथा ॥ झषाणां मकरो यद्वन्मृगाणां मृगराड् यथा ॥ २२ ॥
वरुणो यादसां यद्वद्यमः संयमिनां यथा ॥ क्षीरोदः सागराणां च देवर्षीणां च नारदः ॥ २३ ॥ पुरोधसां यथा जीवः कालः कलयतां यथा ॥
ग्रहाणां भास्करो यद्वन्मंत्राणां प्रणवो यथा ॥ २४ ॥ कृत्यानां धर्मकार्यं च तद्वच्छ्रीपुरुषोत्तमम् ॥ पुरुषाख्यं सकृद्दृष्ट्वा सागरांतः सकृन्मतः
॥ २५ ॥ ब्रह्मविद्यां सकृज्ज्ञात्वा गर्भवासो न विद्यते ॥ एवं सर्वगुणोपेतं क्षेत्रं परमदुर्लभम् ॥२६॥ आस्ते यत्र वरारोहे विख्यातं पुरुषोत्तमम् ॥
जगद्व्यापी स विश्वात्मा देवेशः पुरुषोत्तमः ॥ २७ ॥ जगद्योनिर्जगन्नाथस्तत्र सर्वं प्रतिष्ठितम् ॥ अजः शक्रश्च रुद्रश्च देवाश्चाग्निपुरोगमाः ॥ २८ ॥

निवसंति महाभागे तस्मिन्देशे सदैव हि ॥ गंधर्वाप्सरसः सिद्धाः पितरो देवमानुषाः ॥ २९ ॥ यक्षा विद्याधराश्चैव मुनयः शंसितव्रताः ॥ ऋषयो वालखिल्याद्याः कश्यपाद्याः प्रजेश्वराः॥३०॥ सुपर्णाः किन्नरा नागास्तथान्ये स्वर्गवासिनः॥ सांगा वेदाश्च चत्वारो शास्त्राणि विविधानि च॥३१॥ इतिहासपुराणानि यज्ञाश्च बहुदक्षिणाः ॥ नद्यश्च विविधाः पुण्यास्तीर्थान्यायतनानि च ॥ ३२ ॥ सागराश्च तथा शैलास्तस्मिन्देशे व्यवस्थिताः ॥ एवं पुण्यतमे देशे देवर्षिपितृसेविते ॥ ३३ ॥ सर्वोपभोगसहिते वासः कस्य न रोचते ॥ श्रेष्ठत्वं तस्य देवस्य किं चान्यदधिकं ततः ॥ ३४ ॥ आस्ते यत्र जगद्देवो मुक्तिदः पुरुषोत्तमः ॥धन्यास्ते विबुधप्रख्या ये वसंत्युत्कले नराः ॥३५ ॥ तीर्थराजजले स्नात्वा पश्यंति पुरुषोत्तमम्॥ स्वर्गे वसंति ते मर्त्या न तु ते राजसालये ॥ ३६ ॥ ये वसंत्युत्कले क्षेत्रे पुण्ये श्रीपुरुषोत्तमे ॥ सफलं जीवितं तेषामौत्कलानां सुमेधसाम् ॥ ३७ ॥ ये पश्यंति सुताम्रौष्ठप्रसन्नायतलोचनम् ॥ चारुभ्रूकेशमुकुटं चारुकर्णलतांचितम् ॥ ३८ ॥ चारुस्मितं चारुदंतं चारुकुंडलमंडितम् ॥ सुनासं सुकपोलं च सुललाटं सुलक्षणम् ॥ ३९ ॥ त्रैलोक्यानंदजननं कृष्णस्य मुखपंकजम् ॥ पुरा कृतयुगे देवि शक्रतुल्यपराक्रमः ॥ ४० ॥ बभूव नृपतिः श्रीमानिंद्रद्युम्न इति श्रुतः ॥ सत्यवादी शुचिर्दक्षः सर्वशस्त्रभृतां वरः ॥ ४१ ॥ रूपवान्सुभगः शूरो दाता भोक्ता प्रियंवदः ॥ यष्टा समस्तयज्ञानां ब्रह्मण्यः सत्यसंगरः ॥ ४२ ॥ धनुर्वेदे च वेदे च शास्त्रे च निपुणः कृती ॥ वल्लभो नरनारीणां पौर्णमास्यां यथा शशी ॥ ४३ आदित्य इव दुष्प्रेक्ष्यो मधुरश्चंद्रमा इव ॥ वैष्णवः सत्यसंपन्नो जितक्रोधो जितेंद्रियः ॥ ४४ ॥ अध्यात्मविद्यानिरतो युयुत्सुर्धर्मतत्परः ॥ एवं स पालयेत्पृथ्वीं राजा सर्वगुणाकरः ॥ ४५ ॥ तस्य बुद्धिः समुत्पन्ना विष्णोराराधनं प्रति ॥ कथमाराधयिष्यामि देवदेवं जनार्दनम् ॥ ४६॥कस्मिन्क्षेत्रेऽथवा तीर्थे नदीतीरे तथाश्रमे ॥एवं चिंतापरः सोऽथ निरीक्ष्य मनसा महीम् ॥ ४७ ॥ आलोक्य सर्वतीर्थानि यानि पापहराणि च ॥ तानि सर्वाणि संचिंत्य जगाम मनसा पुनः ॥ ४८ ॥ विख्यातं परमं क्षेत्रं मुक्तिदं पुरुषोत्तमम् ॥ स गत्वा नृपतिस्तत्र समृद्धबलवाहनः॥ ४९ ॥ अयजच्चाश्वमेधेन विधिवद्भूरिदक्षिणः ॥ कारयित्वा महोत्सेधं प्रासादं भूरिदक्षिणम् ॥ ५० ॥ तत्र संकर्षणं कृष्णं सुभद्रां स्थाप्य वीर्यवान् ॥ पंचतीर्थं च विधिवत्कृत्वा तत्र महीपतिः ॥५१ ॥ स्नानं दानं जपं होमं देवताप्रेक्षणं तथा ॥ भक्त्या चाराध्य विधिवत्प्रत्यहं पुरुषोत्तमम् ॥ प्रसादाद्देवदेवस्य ततो मोक्षमवाप्तवान् ॥ ५२ ॥ मोहिन्युवाच ॥ तस्मिन् क्षेत्रे वरे पुण्ये वैष्णवे पुरुषोत्तमे ॥ ५३ ॥ किं तत्र प्रतिमापूर्वं सुस्थिता वैष्णवी प्रभो ॥ येनासौ नृपतिस्तत्र गत्वा सबलवाहनः ॥ ५४ ॥ स्थापयामास कृष्णं च रामं भद्रां शुभप्रदाम् ॥ संशयो

ऽस्ति महांस्तत्र विस्मयश्च द्विजोत्तम ॥ ५५ ॥ श्रोतुमिच्छामि तत्सर्वं ब्रूहि तत्कारणं च यत् ॥ वसुरुवाच ॥ शृणुष्व पूर्ववृत्तांतं कथां पापप्रणशिनीम् ॥ ५६ ॥ प्रवक्ष्यामि समासेन श्रिया पृष्टं च यत्पुरा ॥ सुमेरोः कांचने शृंगे सर्वाश्चर्यसमन्विते ॥ ५७ ॥ तत्र स्थितं जगन्नाथं जगत्स्रष्टारमव्ययम् ॥ प्रणम्य शिरसा देवी लोकानां हितकाम्यया ॥ ५८ ॥ पप्रच्छेदं महाप्रश्नं भूमौ स्थानमनुत्तमम् ॥ श्रीरुवाच ॥ ब्रूहि त्वं सर्वलोकेश संशयं मे हृदि स्थितम् ॥ ५९ ॥ मर्त्यलोके महाश्चर्ये भूमौ कर्मसुदुर्लभे ॥ लोभमोहमहाग्राहे कामकोधमहार्णवे ॥ ६० ॥ येन मुच्येत आत्मेश दुर्गसंसारसागरात् ॥ त्वामृते नास्ति लोकेऽस्मिन्वक्ता संशयनिर्णये ॥ ६१ ॥ श्रुत्वैवं वचनं तस्या देवदेवो जनार्दनः ॥ प्रोवाच परया प्रीत्या परं सारामृतोपमम् ॥ सुखोपायं सुसाध्यं च निरायासं महाफलम् ॥ ६२ ॥ श्रीभगवानुवाच ॥ आस्ते तीर्थवरं देवि विख्यातं पुरुषोत्तमम् ॥ ६३ ॥ न तेन सदृशं किंचित्त्रिषु लोकेषु विद्यते ॥ कीर्तनाद्यस्य देवेशि मुच्यते सर्वपातकैः ॥ ६४ ॥ न विज्ञातो नरैः सर्वैर्न दैत्यैर्न च दानवैः ॥ मरीच्याद्यैर्मुनिवरैर्दर्शितोऽयं वरानने ॥ ६५ ॥ दक्षिणस्योदधेस्तीरे न्यग्रोधो यत्र तिष्ठति ॥ यस्तु कल्पे समुत्पन्ने महदुल्कानिबर्हणे ॥ ६६ ॥ विनाशं नैव चाभ्येति स्वयं तत्रैव संस्थितः ॥ दृष्टमात्रे वटे तस्मिञ्छायामाश्रित्य चासकृत् ॥ ६७ ॥ ब्रह्महत्या प्रमुच्येत पापेष्वन्येषु का कथा ॥ प्रदक्षिणं कृतं यैस्तु नमस्कारैस्तु जंतुभिः ॥ ६८ ॥ सर्वे विधूतपापास्ते गता वै केशवालयम् ॥ न्यग्रोधस्योत्तरे किंचिद्दक्षिणे केशवस्य तु ॥ ६९ ॥ प्रासादे तत्र तिष्ठेत्तु पदं धर्ममयं हि तत् ॥ प्रतिमां तत्र तां दृष्ट्वा स्वयं देवेन निर्मिताम् ॥ ७० ॥ अनायासेन वै यांति भवनं मे ततो नराः ॥ गच्छन्नेव तु तं दृष्ट्वा एकदा धर्मराट् स्वयम् ॥ ७१ ॥ मदंतिकमनुप्राप्य प्रणम्य शिरसाब्रवीत् ॥ नमस्ते भगवन्देव लोकनाथाय तेजसे ॥ ७२ ॥ क्षीरोदवासिनं देवं शेषभोगोरुशायिनम् ॥ वरं वरेण्यं वरदं कर्तारं ह्यक्षयं प्रभुम् ॥ ७३ ॥ विश्वेश्वरमजं विष्णुं सर्वज्ञमपराजितम् ॥ नीलोत्पलदलश्यामं पुंडरीकनिभेक्षणम् ॥ ७४ ॥ सर्वगं निर्गुणं शांतं जगद्धातारमव्ययम् ॥ सर्वलोकविधातारं लोकनाथं सुखावहम् ॥ ७५ ॥ पुराणपुरुषं वेद्यं व्यक्ताव्यक्तं सनातनम् ॥ पुरा पुराणं स्रष्टारं लोकतीर्थं जगद्गुरुम् ॥ ७६ ॥ श्रीवत्सवक्षसा युक्तं वनमालाविभूषितम् ॥ पीतवस्त्रं चतुर्बाहुं शंखचक्रगदाधरम् ॥ ७७ ॥ हारकेयूरसंयुक्तं मुकुटांगदधारिणम् ॥ सर्वलक्षणसंयुक्तं सर्वेन्द्रियविवर्जितम् ॥ ७८ ॥ कूटस्थमचलं सूक्ष्मं ज्योतीरूपं सनातनम् ॥ भावाभावविनिर्मुक्तं व्यापिनं प्रकृतेः परम् ॥ ७९ ॥ तं नमस्ये जगन्नाथमीश्वरं सुखदं प्रभुम् ॥ इत्येवं धर्मराजस्तु पुरा न्यग्रोधसन्निधौ ॥ ८० ॥ स्तुत्वा नानाविधैः स्तोत्रैः प्रणाममकरोत्तदा ॥ तं दृष्ट्वा च महाभागे प्रणतं प्राञ्जलिं स्थितम् ॥ ८१ ॥

स्तोत्रस्य कारणं देवि पृष्टवानहमन्तकम् ॥ वैवस्वत महाबाहो सर्वदेवमयो ह्यसि ॥ ८२ ॥ किमर्थं स्तुतवानित्थं संक्षेपाद्ब्रूहि तन्मम ॥ ८३ ॥
यम उवाच ॥ अस्मिन्नायतने पुण्ये विख्याते पुरुषोत्तमे ॥ इंद्रनीलमयी सृष्टा प्रतिमा सार्वकामिकी ॥ ८४ ॥ तां दृष्ट्वा पुंडरीकाक्ष भावे
नैकेन श्रद्धया ॥ श्वेताख्यं भुवनं यांति निष्कामाश्चैव मानवाः ॥ ८५ ॥ अतश्चैवं न शक्नोमि व्यापारमरिसूदन॥ प्रसीद त्वं महादेव संहर प्रतिमां
विभो ॥ ८६ ॥ श्रुत्वा वैवस्वतस्यैतद्वाक्यं तमहमुक्तवान् ॥ यमैतां गोपयिष्यामि सिकताभिः समंततः ॥ ८७ ॥ ततः सा प्रतिमा देवि
वल्लीभिर्गोपिता तथा ॥ यथा तत्र न पश्यंति मनुजाः स्वर्गकांक्षिणः ॥ ८८ ॥ प्रच्छाद्य वल्लिकैर्देवि जातरूपपरिच्छदैः ॥ यमं प्रस्थापयामास तां
पुरीं दक्षिणां दिशम् ॥ ८९ ॥ गुप्तायां प्रतिमायां तु इन्द्रनीलस्य वै तदा ॥ तस्मिन्क्षेत्रवरे पुण्ये विख्याते पुरुषोत्तमे ॥९०॥ यत्कृतं तत्र वृत्तान्ते
देवदेवो जनार्दनः॥तत्सर्वं कथयामास स तस्मै भगवान्पुरा॥९१॥ इंद्रद्युम्नस्य गमनं क्षेत्रसंदर्शनं तथा ॥ क्षेत्रस्य वर्णनं चैव व्युष्टिं तस्य च मोहिनि
॥ ९२ ॥ दर्शनं बलदेवस्य कृष्णस्य च विशेषतः ॥ सुभद्रायाश्च तत्रैव माहात्म्यं चैव सर्वशः ॥ ९३ ॥ दर्शनं नरसिंहस्य व्युष्टिसंकीर्तनं तथा ॥
अनंतवासुदेवस्य दर्शनं गुणकीर्तनम् ॥ ९४ ॥ श्वेतमाधवमाहात्म्यं स्वर्गद्वारस्य वर्णनम्॥उदधेर्दर्शनं चैव स्नानं तर्पणमेव च ॥ ९५ ॥ समुद्रस्नानमाहा
त्म्यमिंद्रद्युम्नस्य चापि वै ॥ पंचतीर्थफलं चैव महाज्यैष्ठ्यां तथैव च ॥ ९६ ॥ स्नानं कृष्णस्य हलिनः सर्वयात्राफलं तथा ॥ वर्णनं विष्णुलोकस्य
क्षेत्रस्य च पुनः स्वयम् ॥ पूर्वं कथितवांस्तथ्यं तस्यै स पुरुषोत्तमः ॥ ९७ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे वसुमोहिनीसंवादे पुरुषोत्तममा
हात्म्ये द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥मोहिन्युवाच ॥ ब्रूहि मे मुनिशार्दूल यत्पृच्छामि पुरातनम्॥ यथा ताः प्रतिमाः पूर्वमिंद्रद्युम्नेन निर्मिताः॥ १॥
केन चैव प्रकारेण तुष्टस्तस्मै स माधवः ॥ तत्सर्वं वद मे विप्र श्रोतुं कौतूहलं मम ॥ २ ॥ वसुरुवाच ॥ शृणुष्व चारुनयने पुराणं वेदसंमितम् ॥
कथयामि पुरावृत्तं प्रतिमानां च संभवम् ॥ ३ ॥ प्रवृत्ते च महायज्ञे प्रासादे चैव निर्मिते ॥ चिंता तस्य बभूवाथ प्रतिमार्थमहर्निशम् ॥ ४ ॥
केनोपायेन देवेशं सर्वलोकविभावनम् ॥ सर्गस्थित्यंतकर्त्तारं पश्यामि पुरुषोत्तमम् ॥ ५ ॥ चिंताविष्टो नरेन्द्रस्तु नैवं शेते दिवानिशम् ॥ न
भुंक्ते विविधान्भोगान्न च स्नानं प्रसाधनम् ॥ ६ ॥ शैलजा दारुजा वापि धातुजा वा महीतले ॥विष्णोर्योग्यास्तु प्रतिमाः सर्वलक्षणलक्षिताः॥७॥
एतैरेव त्रयाणां तु दयितं यत्सुरार्चितम् ॥ स्थापितं प्रीतिमभ्येति इति चिंतापरोऽभवत् ॥ ८ ॥ पंचरात्रविधानेन संपूज्य पुरुषोत्तमम् ॥ चिंता
विष्टो महीपालः संस्तोतुमुपचक्रमे ॥ ९॥ इंद्रद्युम्न उवाच ॥ वासुदेव नमस्तेऽस्तु नमस्ते मोक्षकारण ॥ त्राहि मां सर्वलोकेश जन्मसंसारसागरात्
॥ १० ॥ निर्मलांशुकसंकाश नमस्ते पुरुषोत्तम ॥ संकर्षण नमस्तेऽस्तु त्राहि मां धरणीधर ॥ ११ ॥ नमस्ते हेमगर्भाय नमस्ते मकरध्वज ॥

रतिकांत नमस्तुभ्यं त्राहि मां शंबरांतक ॥ १२ ॥ नमस्ते मेघसंकाश नमस्ते भक्तवत्सल ॥ अनिरुद्ध नमस्तेऽस्तु त्राहि मां वरदो भव ॥ १३ ॥ नमस्ते विबुधावास नमस्ते विबुधप्रिय ॥ नारायण नमस्तेऽस्तु त्राहि मां शरणागतम्॥ १४ ॥नमस्ते बलिनां श्रेष्ठ नमस्ते लांगलायुध ॥ नमस्ते विबुधश्रेष्ठ नमस्ते कमलोद्भव ॥ १५ ॥ चतुर्मुख जगद्धातस्त्राहि मां प्रपितामह ॥ नमस्ते नीलमेघाभ नमस्ते त्रिदशार्चित ॥ १६ ॥ त्राहि विष्णो जगन्नाथ मग्नं मां भवसागरे ॥ प्रलयानलसंकाश नमस्ते दितिजांतक ॥ १७ ॥ नरसिंह महावीर्य त्राहि मां दीप्तलोचन ॥ यथा रसातलाच्चोर्वी जले मग्नोद्धृता पुरा ॥१८॥तथा महावराह त्वं त्राहि मां दुःखसागरात्॥ तवाङ्गमूर्तयः कृष्ण वरदाः संस्तुता मया ॥१९ ॥ त्वं चेमे बलदेवाद्याः पृथग्रूपेण संस्थिताः ॥ अंगानि तव देवेश गरुडाद्यास्तथा प्रभो ॥ २० ॥ दिक्पालाः सायुधाश्चैव वासवाद्यास्तथाच्युत ॥ ये चान्ये तव देवेश भेदाः प्रोक्ता मनीषिभिः ॥ २१ ॥ तेऽपि सर्वे जगन्नाथ प्रसन्नायतलोचन ॥ ये वार्चिताः स्तुताः सर्वे तथा यूयं नमस्कृताः ॥ २२ ॥ प्रयच्छत वरं मह्यं धर्मकामार्थमोक्षदम् ॥ भेदास्ते कीर्तिता ये तु हरे संकर्षणादयः ॥ २३ ॥ तव पूजार्थसंबद्धास्ततस्त्वयि समाश्रिताः ॥ न भेदस्तव देवेश विद्यते परमार्थतः ॥ २४ ॥ विविधं तव यद्रूपं युक्तं तदुपचारतः ॥ अद्वैतं त्वां कथं द्वैतं वक्तुं शक्नोति मानवः ॥ २५ ॥ एकस्त्वं हि हरे व्यापी चित्स्वभावो निरंजनः ॥ परमं तव यद्रूपं भावाभावविवर्जितम् ॥ २६ ॥ निर्लेपं निर्मलं सूक्ष्मं कूटस्थमचलं ध्रुवम् ॥ सर्वोपाधिविनिर्मुक्तं सत्तामात्रं व्यवस्थितम् ॥ २७ ॥ तद्देवोऽपि न जानाति कथं जानाम्यहं प्रभो ॥ अपरं तव यद्रूपं पीतवस्त्रं चतुर्भुजम् ॥ २८ ॥ शंखचक्रगदापाणिं मुकुटांगदधारिणम् ॥ श्रीवत्सवक्षसा युक्तं वनमालाविभूषितम् ॥ २९ ॥ तदर्चयंति विबुधा ये चान्ये त्वत्समाश्रयाः ॥ देव सर्वसुरश्रेष्ठ भक्तानामभयप्रद ॥ ३० ॥ त्राहि मां चारुपद्माक्ष मग्नं विषयसागरे ॥ नान्यं पश्यामि लोकेश यस्याहं शरणं व्रजे ॥ ३१ ॥ त्वामृते कमलाकांत प्रसीद मधुसूदन ॥ जराव्याधिशतैर्युक्तो नानादुःखैर्निपीडितः ॥ ३२ ॥ हर्षशोकान्वितो मूढः कर्मपाशैः सुयंत्रितः ॥ पतितोऽहं महारौद्रे घोरे संसारसागरे ॥ ३३॥ विषयोदकदुष्पारे रागद्वेषसमाकुले ॥ इंद्रियावर्तगंभीरे तृष्णाशोकोर्मिसंकुले ॥३४॥ निराश्रये निरालम्बे निःसारेऽत्यंतचंचले ॥ मायया मोहितस्तत्र भ्रमामि सुचिरं प्रभो ॥ ३५ ॥ नानाजातिसहस्रेषु जायमानः पुनः पुनः ॥ मया जन्मान्यनेकानि सहस्राण्ययुतानि च ॥ ३६ ॥ विविधान्यनुभूतानि संसारेऽस्मिञ्जनार्दन ॥ वेदाः सांगा मयाधीताः शास्त्राणि विविधानि च ॥३७॥इतिहासपुराणानि तथा शिल्पान्यनेकशः ॥ असंतोषाश्च संतोषाः संचया बहवो व्ययाः ॥ ३८ ॥ मया प्राप्ता जगन्नाथ क्षयवृद्ध्युदये

तराः ॥ भार्यामित्रस्वबंधूनां वियोगाः संगमास्तथा ॥ ३९ ॥ पितरो विविधा दृष्टा मातरश्च तथा मया ॥ दुःखानि चानुभूतानि मया सौख्यान्यनेकशः ॥ ४०॥ प्राप्ताश्च बांधवाः स्वसृभ्रातरो ज्ञातयस्तथा ॥ मयोषितं तथा स्त्रीणां कोष्ठे विण्मूत्रपिच्छिले ॥४१॥ गर्भवासे महादुःखमनुभूतं तथा प्रभो॥दुःखानि यान्यनेकानि बाल्ये यौवनगर्विते॥४२॥वार्द्धक्ये च हृषीकेश तानि प्राप्तानि वै मया॥मरणे यानि दुःखानि गुप्तमार्गे यमालये॥४३॥ मया तान्यनुभूतानि नरके यातनाकुले ॥ क्रिमिकीटद्रुमाणां च हस्त्यश्वमृगपक्षिणाम् ॥ ४४ ॥ महिषाणां गवां चैव तथान्येषां वनौकसाम् ॥ द्विजातीनां च सर्वेषां शूद्राणां चैव योनिषु ॥ ४५ ॥ धनिनां क्षत्रियाणां च दरिद्राणां तपस्विनाम् ॥ नृपाणां नृपभृत्यानां तथान्येषां च देहिनाम्॥४६॥ गृहे तेषां समुत्पन्नो देव चाहं पुनः पुनः॥गतोऽस्मि दासतां नाथ भृत्यानां बहुशो नृणाम्॥४७॥दरिद्रत्वं चेश्वरत्वं स्वामित्वं च तथा गतः ॥ हता मया हतश्चान्यैर्हतं मे घातिता मया ॥ ४८ ॥ दत्तं मेऽन्यैरथान्येभ्यो मया दत्तमनेकशः ॥ पितृमातृसुहृद्वर्गकलत्राणां कृतेन च ॥ ४९ ॥ अहं हृष्टोऽसकृद्दैन्यैश्चाश्रुधौताननो गतः ॥ देवतिर्यङ्मनुष्येषु चरेषु स्थावरेषु च॥५० ॥न विद्यते च तत्स्थानं यत्राहं न गतः प्रभो ॥ कदा मे नरके वासः कदा स्वर्गे जगत्पते ॥ ५१ ॥ कदा मनुष्यलोकेषु कदा तिर्यग्गतेषु च ॥ जलयंत्रे तथा चक्रे कदाऽवटनिबंधने ॥ ५२ ॥ पातितोऽधस्तथोर्द्ध्वं च कदा मध्ये स्थितस्त्वहम्॥तथा चाहं सुरश्रेष्ठ कर्म्मवल्लीं समाश्रितः॥५३ ॥ एवं संसारचक्रेऽस्मिन्भैरवे लोमहर्षणे॥भ्रमामि सुचिरं कालं नांतं पश्यामि कर्हिचित् ॥ ५४ ॥ न जाने किं करोम्येष हरे व्याकुलितेंद्रियः ॥ शोकतृष्णाभिभूतश्च कांदिशीको विचेतनः॥५५ ॥ इदानीं त्वामहं देव विकलः शरणं गतः ॥ त्राहि मां दुःखितं कृष्ण मग्नं संसारसागरे ॥ ५६ ॥ कृपां कुरु जगन्नाथ भक्तोऽहं यदि मन्यसे ॥ त्वामृते नास्ति मे बंधुर्योऽसौ चिंतां करिष्यति ॥ ५७ ॥ देव त्वां नाथमासाद्य न भयं मेऽस्ति कुत्रचित् ॥ जीविते मरण चैव योगक्षेमे तथा प्रभो ॥ ५८ ॥ ये तु त्वां विधिवद्देव नार्चयंति नराधमाः ॥ सुगतिस्तु कथं तेषां भवेत्संसारबंधनात् ॥ ५९ ॥ किं तेषां कुलशीलेन विद्यया जीवितेन च ॥ येषां न जायते भक्तिर्जगद्धातरि केशवे ॥ ६० ॥ प्रकृतिं त्वासुरीं प्राप्य ये त्वां निंदंति मोहिताः । पतंति नरके घोरे जायमानाः पुनःपुनः ॥ ६१ ॥ न तेषां निष्कृतिस्तस्माद्विद्यते नरकार्णवात् ॥ ये दूषयंति दुर्वृत्तास्ते देव पुरुषाधमाः ॥ ६२ ॥ यत्र यत्र भवेज्जन्म मम कर्मनिबंधनात् ॥ तत्र तत्र हरे भक्तिस्त्वयि स्तादक्षता सदा ॥ ६३ ॥ आराध्य त्वां परं दैत्या नराश्चान्येऽपि संगताः ॥ अवापुः परमां सिद्धिं कस्त्वां देव न पूजयेत् ॥ ६४ ॥ न शक्नुवंति ब्रह्माद्याः स्तोतुं त्वां प्रकृतेः परम् ॥ यथा चाज्ञान

भावेन संस्तुतोऽसि मया प्रभो ॥ ६५ ॥तत्क्षमस्वापराधान्मे यदि तेऽस्ति दया मयि॥ कृतापराधेऽपि हरे क्षमां कुर्वंति साधवः ॥६६ ॥ तस्मात्प्रसीद देवेश भक्त्या त्वंह समाश्रितः ॥ स्तुतोऽसि यन्मया देव भक्तिभावेन चेतसा ॥ ६७ ॥सांगं भवतु तत्सर्वं वासुदेव नमोऽस्तु ते ॥ ६८ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे वसुमोहिनीसंवादे पुरुषोत्तममाहात्म्ये त्रिपञ्चाशत्तमोऽध्यायः॥ ५३ ॥ ॥ वसुरुवाच ॥ इत्थं स्तुतस्तदा तेन प्रसन्नो गरुडध्वजः ॥ ददौ तस्मै तु सुभगे सकलं मनसेप्सितम् ॥ १ ॥ यः संपूज्य जगन्नाथं प्रत्यहं स्तौति मानवः ॥ स्तोत्रेणानेन मतिमान्स मोक्ष लभते ध्रुवम् ॥ २ ॥ त्रिसंध्यं यो जपेद्विद्वानिमं स्तोत्रवरं शुचिः॥ धर्मं चार्थं च कामं च मोक्षं च लभते नरः ॥ ३ ॥ यः पठेच्छृणुयाद्वापि श्रावयेद्वा समाहितः ॥ स लोकं शाश्वतं विष्णोर्याति निर्द्धूतकल्मषः॥ ४ ॥ धन्यं पापहरं चेदं भुक्तिमुक्तिप्रदं शिवम् ॥ गुह्यं सुदुर्लभं पुण्यं न देयं यस्य कस्य चित् ॥ ५ ॥ न नास्तिकाय मूर्खाय न कृतघ्नाय मानिने ॥ न दुष्टमतये दद्यान्नाभक्ताय कदाचन ॥ ६ ॥ दातव्यं भक्तियुक्ताय गुणशीलान्विताय च ॥ विष्णुभक्ताय शांताय श्रद्धानुष्ठानशीलिने ॥ ७ ॥ इदं समस्ताघविनाशहेतु कारुण्यसंज्ञं सुखमोक्षदं च ॥ अशेषवांछाफलदं वरिष्ठं स्तोत्रं मयोक्तं पुरुषोत्तमस्य ॥ ८ ॥ ये तं सुसूक्ष्मं विमलाम्बराभं ध्यायंति नित्यं पुरुषं पुराणम् ॥ ते मुक्तिभाजः प्रविशंति विष्णुं मन्त्रैर्यथाज्यं हुतमध्वराग्नौ ॥ ९ ॥ एकः स देवो भवदुःखहंता परः परेषां न ततोऽस्ति चान्यः ॥ स्रष्टा स पाता सकलांतकर्ता विष्णुः समश्चाखिलसारभूतः॥ १० ॥ किं विद्यया किं सुगुणैश्च तेषां यज्ञैश्च दानैश्च तपोभिरुग्रैः॥ येषां न भक्तिर्भवतीह कृष्णे जगद्गुरौ मोक्षसुखप्रदे च ॥ ११ ॥ लोके स धन्यः स शुचिः स विद्वान्स एव वक्ता स च धर्मशीलः ॥ ज्ञाता स दाता स च सत्यवक्ता यस्यास्ति भक्तिः पुरुषोत्तमाख्ये ॥ १२॥ स्तुत्वैवं ब्रह्मतनयः प्रणम्य च सनातनम् ॥ वासुदेवं जगन्नाथं सर्वकामफलप्रदम् ॥ १३ ॥ चिंताविष्टो महीपालः कुशानास्तीर्य भूतले ॥ वस्त्रं च तन्मना भूत्वा सुष्वाप धरणीतले ॥ १४ ॥ कथं प्रत्यक्षमभ्येति देवदेवो जनार्दनः ॥ मम चिंताहरो देवः कदासाविति चिंतयन् ॥ १५ ॥ सुतस्य तस्य नृपतेर्वासुदेवो जगद्गुरुः ॥ आत्मानं दर्शयामास स्वप्ने तस्मै च चक्रधृक् ॥ १६ ॥ स ददर्श च तं स्वप्ने देवदेवं जगत्पतिम् ॥ शंखचक्रधरं शांतं गदापद्माग्रपाणिनम् ॥ १७ ॥ शार्ङ्गबाणासियुक्तं च ज्वलत्तेजोग्रमंडलम् ॥ युगांतादित्यवर्णाभं नीलवैडूर्यसन्निभम् ॥१८॥ सुपर्णपृष्ठमासीनं षोडशार्द्धभुजं विभुम्॥स चासौ प्राब्रवीद्वीक्ष्य साधु राजन्महामते॥ १९॥क्रतुनानेन दिव्येन तथा भक्त्या च श्रद्धया॥तुष्टोऽस्मि ते महीपाल वृथा किमनुशोचसि॥२०॥यदत्र प्रतिमा राजन्राजपूज्या सनातनी॥यथा तां प्राप्नुया भूप तदुपायं ब्रवीमि ते॥२१॥ गतायामद्य शर्वर्यां निर्मले भास्करोदये ॥ सागरस्य जलस्यांते नानाद्रुमविभूषिते ॥२२॥ जलं तथैव वेलायां दृश्यते यत्र वै महत् ॥

लवणस्योदधे राजंस्तरंगैः समभिप्लुतम् ॥ २३ ॥ कूलालंबी महावृक्षः स्थितः स्थलजलेषु च ॥ वेलाभिर्हन्यमानश्च न चासौ कंपते ध्रुवः
॥ २४ ॥ हस्तेन पर्शुमादाय ऊर्मेरंतस्ततो व्रज ॥ एकाकी विहरन्राजन्यं त्वं पश्यसि पादपम् ॥ २५ ॥ इदं चिह्नं समालोक्य च्छेदय
त्वमशंकितः ॥ शात्यमानं तु तं वृक्षं प्रांशुमद्भुतदर्शनम् ॥ २६ ॥ दृष्ट्वा तेनैव संचिंत्य तदा भूपाल दर्शनम् ॥ कुरु तत्प्रतिमां दिव्यां जहि
चिंतां विमोहिनीम् ॥ २७ ॥ एवमुक्त्वा महाभागो जगामादर्शनं हरिः ॥ स चापि स्वप्नमालक्ष्य परं विस्मयमागतः ॥ २८ ॥ तां निशां समुदीक्ष
न्स ततस्तद्गतमानसः ॥ व्याहरन्वैष्णवान्मन्त्रान्सूक्तं चैव तदात्मकम् ॥ २९ ॥ प्रभातायां रजन्यां तु तद्गतोऽनन्यमानसः ॥ स स्नात्वा सागरे
सम्यग्यथावद्विधिना ततः ॥ ३० ॥ दत्वा दानं तु विप्रेभ्यो ग्रामांश्च नगराणि च ॥ कृत्वा पौर्वाह्णिकं कर्म जगाम स नृपोत्तमः ॥ ३१ ॥
न रथो न पदातिश्च न गजो न च सारथिः ॥ एकाकी स महावेलां प्रविवेश महीपतिः ॥ ३२ ॥ तं ददर्श महावृक्षं तेजस्वंतं
महाद्रुमम् ॥ महांतकं महारोहं पुण्यं विफलमेव च ॥ ३३ ॥ महोत्सवं महाकायं प्रसुप्तं च जलांतिके ॥ सांद्रमांजिष्ठवर्णाभं नाम
जातिविवर्जितम् ॥ ३४ ॥ नरनाथस्तथा विष्णोर्द्रुमं दृष्ट्वा मुदान्वितः ॥ पर्शुना शातयामास शितेन च दृढेन च ॥ ३५ ॥
द्वैधीभूता मतिस्तत्र बभूवेंद्रसखस्य च ॥ निरीक्षमाणे काष्ठे तु बभूवाद्भुतदर्शनम् ॥ ३६ ॥ विश्वकर्मा च विष्णुश्च विप्ररूपधरावुभौ ॥
आजग्मतुर्महात्मानौ तथा तुल्याग्रजन्मनौ ॥ ३७ ॥ ज्वलमानौ सुतेजोभिर्दिव्यस्रग्गंधलेपनौ ॥ अथ तौ तं समासाद्य
नृपमिंद्रसखं तदा ॥ ३८ ॥ तावब्रूतां महाराज त्वं किमत्र करिष्यसि ॥ किमयं ते महाबाहो शातितश्च वनस्पतिः ॥ ३९ ॥ असहायो महा
दुर्गे निर्जने गहने वने ॥ महासिंधुतटे चैव शातितो वै महाद्रुमः ॥ ४० ॥ तयोः श्रुत्वा वचः सुभ्रु स तु राजा मुदान्वितः ॥ बभाषे वचना
न्याभ्यां मृदूनि मधुराणि च ॥ ४१ ॥ दृष्ट्वा तौ ब्राह्मणौ तत्र चंद्रसूर्याविवागतौ ॥ नमस्कृत्य जगन्नाथाववाङ्मुखमवस्थितः ॥ ४२ ॥ देव
देवमनाद्यंतममेयं जगतः पतिम् ॥ आराधितुं वै प्रतिमां करोमीति मतिर्मम ॥ ४३ ॥ अहं स देवदेवेन परमेण महात्मना ॥ स्वप्नाते च
समुद्दिष्टो भवद्भ्यां श्रावितो मया ॥ ४४ ॥ यज्ञस्तद्वचनं श्रुत्वा देवेंद्रप्रतिमस्य च ॥ प्रहस्य तस्मै विश्वेशस्तुष्टो वचनमब्रवीत् ॥ ४५ ॥ साधु
साधु महीपाल यदेतन्मन उत्तमम् ॥ संसारसागरे घोरे कदलीदलसन्निभे ॥ ४६ ॥ निःसारे दुःखबहुले कामक्रोधसमाकुले ॥ इंद्रियावर्ते
कलिले दुस्तरे लोमहर्षणे ॥ ४७ ॥ नानाव्याधिशतावर्ते चलबुद्बुदसन्निभे ॥ यतस्ते मतिरुत्पन्ना विष्णोराराधनाय वै ॥ ४८ ॥ धन्यस्त्वं
नृपशार्दूल गुणैः सर्वैरलंकृतः ॥ सप्रजा धरणी धन्या सशैलवनपत्तना ॥ ४९ ॥ सपुरग्रामनगरा चतुर्वर्णैरलंकृता ॥ यत्र त्वं नृपशार्दूल प्रजापाल

यिता प्रभुः ॥ ९० ॥ एह्येहि त्वं महाभाग द्रुमेऽस्मिन्सुखशीतले ॥ आवाभ्यां सह तिष्ठ त्वं कथाभिर्द्धर्मसंश्रितः ॥ ९१ ॥ अयं तव सहा
यार्थमागतः शिल्पिनां वरः ॥ विश्वकर्मसमः साक्षान्निपुणः सर्वकर्मसु ॥ ९२ ॥ मयोद्दिष्टां तु प्रतिमां करोत्येष तटं त्यज ॥ श्रुत्वैवं वचनं
तस्य तदा राजा द्विजन्मनः ॥ ९३॥ सागरस्य तटं त्यक्त्वा गत्वा तस्य समीपतः ॥ तस्थौ स नृपतिश्रेष्ठो वृक्षच्छायां सुशीतलाम् ॥ ९४ ॥
ततस्तस्मै स विश्वात्मा तदाकारां तदाकृतिम् ॥ शिल्पिमुख्याय विधिजे कुरुष्वेत्यभ्यभाषत ॥ ९५ ॥ कृष्णरूपं परं शांतं पद्मपत्रायतेक्षणम् ॥
श्रीवत्सकौस्तुभधरं शंखचक्रगदाधरम् ॥ ९६ ॥ गौरं गोक्षीरवर्णाभं द्वितीयं स्वस्तिकांकितम् ॥ लांगलास्त्रधरं देवमनंताख्यं महाबलम्
॥ ९७ ॥ देवदानवगंधर्वयक्षविद्याधरोरगैः ॥ न विज्ञातो हि तस्यांतस्तेनानंत इति स्मृतः ॥ ९८ ॥ भगिनीं वासुदेवस्य रुक्मवर्णां सुशोभ
नाम् ॥ तृतीयां वै सुभद्रां च सर्वलक्षणलक्षिताम् ॥ ९९ ॥ श्रुत्वैतद्वचनं तस्य विश्वकर्मा सुकर्मकृत् ॥ तत्क्षणात्कारयामास प्रतिमाः शुभ
लक्षणाः ॥ ६० ॥ कुण्डलाभ्यां विचित्राभ्यां कर्णाभ्यां सुविराजिताः ॥ चक्रलांगलविन्यासहताभ्यां भानुसंमताः ॥६१ ॥ प्रथमं शुक्लवर्णानां
शारदेंदुसमप्रभम् ॥सुरक्ताक्षं महाकायं फटाविकटमस्तकम् ॥ ६२ ॥ नीलांबरधरं चोग्रं बलमद्भुतकुंडलम् ॥ महाहलधरं दिव्यं महामुसल
धारिणम् ॥ ६३ ॥ द्वितीयं पुंडरीकाक्षं नीलजीमूतसन्निभम् ॥ अतसीपुष्पसंकाशं पद्मपत्रायतेक्षणम् ॥ ६४ ॥ श्रीवत्सवक्षसं भ्राजत्पीतवास
समच्युतम् ॥ चक्रकम्बुकरं दिव्यं सर्वपापहरं हरिम् ॥ ६५ ॥ तृतीयां स्वर्णवर्णाभां पद्मपत्रायतेक्षणाम् ॥ विचित्रवस्त्रसंछन्नां हारकेयूरभूषिताम्
॥ ६६ ॥ विचित्राभरणोपेतां रत्नमालावलंबिताम् ॥ पीनोन्नतकुचां रम्यां विश्वकर्मा विनिर्ममे ॥ ६७ ॥ स तुराजाद्भुतं दृष्ट्वा क्षणेनैकेन निर्मिताः ॥
दिव्यवस्त्रयुगाच्छन्ना नानारत्नैरलंकृताः ॥ ६८ ॥ सर्वलक्षणसंपन्नाः प्रतिमाः सुमनोहराः ॥ विस्मयं परमं गत्वा इदं वचनमब्रवीत् ॥ ६९ ॥
किं देवौ समनुप्राप्तौ द्विजरूपधरावुभौ ॥ द्वावप्यद्भुतकर्माणौ देववृत्तौ त्वमानुषौ ॥ ७० ॥ देवौ वा मानुषौ वापि यक्षविद्याधरौ वरौ ॥
किंवा ब्रह्महृषीकेशौ वसुरुद्रावुताश्विनौ ॥ ७१ ॥ न वेद्मि सत्यवद्भावौ मायारूपेण संस्थितो ॥ युवां गतोऽस्मि शरणमात्मानं वदतं
मम ॥ ७२॥ द्विज उवाच ॥ नाहं देवो न यक्षो वा न दैत्यो न च देवराट् ॥ न ब्रह्मा न च रुद्रोऽहं विद्धि मां पुरुषोत्तमम् ॥ ७३ ॥ आर्तिघ्नं सर्व
लोकानामनंतबलपौरुषम् ॥ अर्चनीयो हि भूतानामंतो यस्य न विद्यते ॥ ७४ ॥ पठ्यते सर्वशास्त्रेषु वेदांतेषु निगद्यते ॥ यदुक्तं ध्यान
गम्यं च वासुदेवेति योगिभिः ॥ ७५ ॥ अहमेव स्वयं ब्रह्मा अहं विष्णुः शिवो ह्यहम् ॥ इंद्रोऽहं देवराजश्च जगत्संयमनो यमः ॥ ७६ ॥
पृथिव्यादीनि भूतानि त्रेताग्निर्हुतभुग्यथा ॥ वरुणोऽपांपतिश्चाह धारित्री च महीधराः ॥ ७७ ॥ यत्किंचिद्वाङ्मयं लोके जगत्स्थावरजंगमम् ॥

विश्वरूपं च मां विद्धि मत्तोऽन्यन्नास्ति किचन ॥ ७८ ॥ प्रीतोऽहं ते नृपश्रेष्ठ वरं वरय सुव्रत ॥ यदिष्टं तत्प्रयच्छामि हृदि यत्ते
व्यवस्थितम् ॥ ७९ ॥ मद्दर्शनमपुण्यानां स्वप्नांतेऽपि न जायते ॥ त्वं पुनर्दृढभक्तित्वात्प्रत्यक्षं दृष्टवानसि ॥ ८० ॥ श्रुत्वैवं वासुदेवस्य
वचनं तस्य मोहिनि ॥ रोमांचिततनुर्भूत्वा इदं स्तोत्रं जगौ नृपः ॥ ८१ ॥ राजोवाच ॥ श्रियःकांत नमस्तेऽस्तु श्रीपते पीतवाससे ॥ श्रीद
श्रीश श्रीनिवास नमस्ते श्रीनिकेतन ॥ ८२ ॥ आद्यं पुरुषमीशानं सर्वेशं सर्वतोमुखम् ॥ निष्कलं परमं देवं प्रणतोऽस्मि सनातनम् ॥ ८३ ॥
शब्दातीतं गुणातीतं भावाभावविवर्जितम् ॥ निर्लेपं निर्गुणं सूक्ष्मं सर्वज्ञं सर्वभावनम् ॥ ८४ ॥ शंखचक्रधरं देवं गदामुसलधारिणम् ॥
नमस्ये वरदं देवं नीलोत्पलदलच्छविम् ॥ ८५ ॥ नागपर्यंकशयनं क्षीरोदार्णववासिनम् ॥ नमस्येऽहं हृषीकेशं सर्वपापहरं हरिम् ॥ ८६ ॥
पुनस्त्वां देवदेवेश नमस्ये वरदं विभुम् ॥ सर्वलोकेश्वरं विष्णुं मोक्षकारणमव्ययम् ॥ ८७ ॥ एवं स्तुत्वा तु तं देवं प्रणिपत्य कृतांजलिः ॥
उवाच प्रणतो भूत्वा निपत्य वसुधातले ॥ ८८ ॥ प्रीतोऽसि यदि मे नाथ वृणोमि वरमुत्तमम् ॥ देवाः सुराः सगंधर्वा यक्षरक्षोमहोरगाः
॥ ८९ ॥ सिद्धविद्याधराः साध्याः किन्नरा गुह्यकास्तथा ॥ ऋषयो ये महाभागा नानाशास्त्रविशारदाः ॥ ९० ॥: प्रव्रज्यायोगयुक्ताश्च
वेदतत्त्वानुचिंतकाः ॥ मोक्षमार्गविदो येऽन्ये ध्यायंति परमं परमं पदम् ॥ ९१ ॥ निर्मलं निर्गुणं शांतं यत्पश्यंति मनीषिणः ॥ तत्पदं गंतुमिच्छामि
प्रसादात्ते सुदुर्लभम् ॥ ९२ ॥ श्रीभगवानुवाच ॥ सर्वं भवतु भद्रं ते यथेष्टं सर्वमाप्नुहि ॥ भविष्यति यथाकामं मत्प्रसादान्न संशयः
॥ ९३ ॥ दश वर्षसहस्राणि तथा नव शतानि च ॥ अविच्छिन्नं महाराज्यं कुरु त्वं नृपसत्तम ॥ ९४ ॥ प्रपद्य परमं दिव्यं दुर्लभं यत्सुरासुरैः
॥ पूर्णं मनोरथं शांतं गुह्यमव्यक्तमव्ययम् ॥ ९५ ॥ परात्परतरं सूक्ष्मं निर्लेपं निर्गुणं ध्रुवम् ॥ चिंताशोकविनिर्मुक्तं क्रियाकारणवर्जितम्
॥ ९६ ॥ तदहं दर्शयिष्यामि विज्ञेयाख्यं परं पदम् ॥ संप्राप्य परमानंदं प्राप्स्यसे परमां गतिम् ॥ ९७ ॥ कीर्तिश्च तव राजेंद्र भवत्वत्र महीतले
॥ यावद्धरा नभो यावद्यावच्चंद्रार्कतारकाः ॥ ९८ ॥ यावत्समुद्राः सप्तैव यावन्मेर्वादिपर्वताः ॥ तिष्ठंति दिवि देवाश्च यावत्सर्वत्र चाव्ययाः
॥ ९९ ॥इंद्रद्युम्नसरो नाम तीर्थं यज्ञाज्यसंभवम् ॥यत्र स्नात्वा सकृल्लोकः शक्रलोकमवाप्स्यति ॥ १०० ॥ दापयिष्यति यः पिंडं तटेऽस्मिन्नंबुधेः
शुभे ॥ कुलैकविंशमुद्धृत्य शक्रलोकं गमिष्यति॥१०१॥ पूज्यमानोऽप्सरोभिश्च गंधर्वैर्गीतनिःस्वनैः॥विमानेन चरेत्तत्र यावदिंद्राश्चतुर्दश॥१०२॥
सरसो दक्षिणे भागे नैर्ऋत्यां तु समाश्रिते ॥ न्यग्रोधोऽस्ति द्रुमस्तत्र तत्समीपे तु मंडपः ॥१०३॥ केतकीवनसंछन्नो नानापादपसंकुलः ॥ आषा

ढस्य सिते पक्षे पंचम्यां पितृदैवते ॥ १०४ ॥ ऋक्षे नेष्यंति नस्तत्र नीत्वा सप्त दिनानि वै ॥ मंडपे स्थापयिष्यंति सुवेश्याभिः सुशोभनैः॥१०५॥
क्रीडाविशेषबहुलैर्नृत्यगीतमनोहरैः ॥ चामरैः स्वर्णदंडैश्च व्यजनै रत्नभूषणैः ॥ १०६ ॥ व्यंजयंत्यस्तदास्मभ्यं स्थास्यंति परमांगनाः ॥ ब्रह्मचारी
यतिश्चैव स्नातकाश्च द्विजोत्तमाः ॥ १०७ ॥ वानप्रस्था गृहस्थाश्च सिद्धाश्चान्ये च वै द्विजाः ॥ नानावर्णपदैः स्तोत्रैर्ऋग्यजुःसामनिःस्वनैः
॥ १०८ ॥ करिष्यंति स्तुतिं राजन्नामकेशवयोः पुनः ॥ ततः स्तुत्वा च दृष्ट्वा च संप्रणम्य च भक्तितः ॥ १०९ ॥ नरो वर्षायुतं दिव्यं
श्रीमद्धरिपुरे वसेत् ॥ पूज्यमानोऽप्सरोभिश्च गंधर्वैर्गीतनिःस्वनैः ॥ ११० ॥ हरेरनुचरस्तत्र क्रीडते केशवेन वै ॥ १११ ॥ विमानेनार्कवर्णेन
रत्नहारेण राजते ॥ सर्वे कामा महाभागे तिष्ठंति भवनोत्तमे ॥ ११२ ॥ तपःक्षयादिहागत्य मनुष्यो ब्राह्मणो भवेत् ॥ कोटीधनपतिः श्रीमांश्च
तुर्वेदो भवेद्ध्रुवम् ॥ ११३ ॥ एवं तस्मै वरं दत्त्वा कृत्वा च समयं हरिः ॥ जगामादर्शनं भद्रे सहितो विश्वकर्मणा॥ ११४॥स तु राजा तदा हृष्टो
रोमांचिततनूरुहः॥कृतकृत्यमिवात्मानं मेने संदर्शनाद्धरेः॥ ११५॥ततः कृष्णं च रामं च सुभद्रां च वरप्रदाम्॥रथैर्विमानसंकाशैर्मणिकांचनचित्रितैः
॥११६॥ संवाह्य तास्ततो राजा जयमंगलनिःस्वनैः॥ आनया मास मतिमान्सामात्यः सपुरोहितः ॥ ११७ ॥ नानावादित्रनिर्घोषैर्नानावेदस्वनैः
शुभैः ॥ संस्थाप्य च शुभे देशे पवित्रे सुमनोहरे ॥११८॥ ततः शुभे तिथौ स्वर्क्षे काले च शुभलक्षणे ॥ प्रतिष्ठां कारयामास सुमुहूर्ते द्विजैः सह
॥ ११९ ॥ यथोक्तेन विधानेन विधिदृष्टेन कर्मणा॥आचार्यानुमतेनैव सर्वं कृत्वा महीपतिः ॥१२०॥आचार्याय तदा दत्त्वा दक्षिणां विधिवत्प्रभुः॥
ऋत्विग्भ्यः सविधानेन तथान्येभ्यो धनं ददौ ॥१२१ ॥ कृत्वा प्रतिष्ठां विधिवत्प्रासादे भवनोत्तमे॥ स्थापयामास तान्सर्वान्विश्वकर्मविनिर्मितान्
॥१२२॥ततः संपूज्य विधिना नानापुष्पैः सुगंधिभिः ॥ सुवर्णमणिमुक्ताद्यैर्नानावस्त्रैः सुशोभनैः ॥१२३॥ ददौ द्विजेभ्यो विषयान्पुराणि नगराणि
च ॥ एवं बहुविधान्दत्त्वा राज्यं कृत्वा यथोचितम् ॥ १२४ ॥ इष्ट्वा च विविधैर्यज्ञैर्दत्त्वा दानान्यनेकशः ॥ कृतकृत्यस्ततो राजा त्यक्तसर्वपरिग्रहः॥
जगाम परमं स्थानं तद्विष्णोः परमं पदम् ॥१२५॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीवसुसंवादे श्रीपुरुषोत्तममाहात्म्ये चतुष्पंचाशत्तमो
ऽध्यायः ॥ ५४ ॥ मोहिन्युवाच ॥ कस्मिन्काले द्विजश्रेष्ठ गंतव्यं पुरुषोत्तमे ॥ विधिना केन कर्तव्या पंचतीर्थ्यपि मानद ॥ १ ॥
एकैकस्य च तीर्थस्य स्नाने दाने च यत्फलम् ॥ देवताप्रेक्षणे चैव ब्रूहि सर्वं पृथक् पृथक् ॥ २ ॥ वसुरुवाच ॥ निराहारः कुरुक्षेत्रे

पादेनैकेन यस्तपेत् ॥ जितेंद्रियो जितक्रोधः सप्तसंवत्सरायुतम् ॥ ३ ॥ दृष्ट्वा सकृज्ज्येष्ठशुक्लद्वादश्यां पुरुषोत्तमम्॥ कृतोपवासः प्राप्नोति
ततोऽधिकतरं फलम् ॥ ४ ॥ तस्माज्ज्येष्ठे तु सुभगे प्रयत्नेन सुसंयतैः ॥ स्वर्गलोकेप्सुभिर्मर्त्यैर्द्रष्टव्यः पुरुषोत्तमः ॥ ५ ॥ पंचतीर्थीं
च विधिवत्कृत्वा ज्येष्ठे नरोत्तमः ॥ द्वादश्यां शुक्लपक्षस्य पश्येत्तं पुरुषोत्तमम् ॥ ६ ॥ ये पश्यंत्यव्ययं देवं द्वादश्यां पुरुषोत्तमम् ॥ ते
विष्णुलोकमासाद्य न च्यवंते कदाचन ॥७ ॥ तस्माज्ज्येष्ठे प्रयत्नेन गंतव्यं विधिनंदिनि ॥ कृत्वा सम्यक्पंचतीर्थीं द्रष्टव्यः पुरुषोत्तमः ॥ ८ ॥
सुदूरस्थोऽपि प्रीतात्मा कीर्तयेत्पुरुषोत्तमम् ॥ अहन्यहनि शुद्धात्मा सोऽपि विष्णुपुरं व्रजेत् ॥ ९ ॥ यात्रां करोति कृष्णस्य श्रद्धया यः
समाहितः ॥ सर्वपापविनिर्मुक्तो विष्णुलोकं व्रजेन्नरः ॥ १० ॥ चक्रं दृष्ट्वा हरेर्दूरात्प्रासादोपरि संस्थितम् ॥ सहसा मुच्यते पापान्नरो
भक्त्या प्रणम्य तम् ॥ ११ ॥ पंचतीर्थीविधिं वक्ष्ये शृणु मोहिनि सांप्रतम् ॥ यस्यां कृतायां मनुजो माधवस्य प्रियो भवेत् ॥ १२ ॥
मार्कंडेयह्रदं गत्वा स्नात्वा चोदङ्मुखः शुचिः ॥ निमज्जेत्तत्र त्रीन्वारानिमं मंत्रमुदीरयेत् ॥ १३ ॥ “संसारसागरे मग्नं पापग्रस्तम
चेतनम् ॥ त्राहि मां भगनेत्रघ्न त्रिपुरारे नमोऽस्तु ते ॥ १४ ॥ नमः शिवाय शांताय सर्वपापहराय च ॥ स्नानं करोमि देवेश मम
नश्यतु पातकम्” ॥ १५ ॥ नाभिमात्रे जले स्थित्वा विधिवद्देवता ऋषीन् ॥ तिलोदकेन मतिमान्पितॄनन्यांश्च तर्पयेत ॥ १६ ॥ स्नात्वैवं
च तथाचम्य ततो गच्छेच्छिवालयम् ॥ प्रविश्य देवतागारं कृत्वा तं त्रिः प्रदक्षिणम् ॥ १७ ॥ मूलमंत्रेण संपूज्य मार्कंडेयेशमाद
रात् ॥ अघोरेण तु मंत्रेण प्रणिपत्य क्षमापयेत् ॥ १८ ॥ “त्रिलोचन नमस्तेऽस्तु नमस्ते शशिभूषण ॥ त्राहि मां पुंडरीकाक्ष महादेव
नमोऽस्तु ते” ॥ १९ ॥ मार्कण्डेयह्रदे त्वेवं स्नात्वा दृष्ट्वा च शंकरम् ॥ दशानामश्वमेधानां फलं प्राप्नोति मानवः ॥ २० ॥ पापैः
सर्वैर्विनिर्मुक्तः शिवलोकं स गच्छति ॥ तत्र भुक्त्वा वरान्भोगान्यावदाभूतसंप्लवम् ॥ २१ ॥ इह लोकं समासाद्य भवेद्विप्रो बहुश्रुतः ॥
शांकरं योगमासाद्य ततो मोक्षमवाप्नुयात् ॥ २२ ॥ कल्पवृक्षं ततो गत्वा कृत्वा तं त्रिः प्रदक्षिणम् ॥पूजयेत्परया भक्त्या मंत्रेणानेन तं वटम्
॥ २३ ॥ “ॐ नमोऽव्यक्तरूपाय महते नतपालिने ॥ महोदकोपविष्टाय न्यग्रोधाय नमोऽस्तु ते ॥ २४ ॥ अवसस्त्वं सदा कल्पे हरेश्चाय
तने वटे ॥ न्यग्रोध हर मे पापं कल्पवृक्ष नमोऽस्तु ते” ॥ २५ ॥ भक्त्या प्रदक्षिणं कृत्वा गत्वा कल्पवटं नरः ॥ सहसोज्झति पापौघं जीर्णां त्वच
मिवोरगः ॥ २६ ॥ छायां तस्य समाक्रम्य कल्पवृक्षस्य मोहिनि ॥ ब्रह्महत्यां नरो जह्यात्पापेष्वन्येषु का कथा ॥ २७ ॥ दृष्ट्वा कृष्णांगसंभूते

ब्रह्मतेजोमयं परम् ॥ न्यग्रोधाकृतिकं विष्णुं प्रणिपत्य च वैधसि ॥ २८ ॥ राजसूयाश्वमेधाभ्यां फलं प्राप्नोति चाधिकम् ॥ तथा कुलं समुद्धृत्य
विष्णुलोकं स गच्छति ॥ २९॥ वैनतेयं नमस्कृत्य कृष्णस्य पुरतः स्थितम् ॥ सर्वपापविनिर्मुक्तस्ततो विष्णुपुरं व्रजेत् ॥ ३० ॥ दृष्ट्वा वटं
वैनतेयं यः पश्येत्पुरुषोत्तमम् ॥ संकर्षणं सुभद्रां च स याति परमां गतिम् ॥ ३१ ॥ प्रविश्यायतनं विष्णोः कृत्वा तं त्रिः प्रदक्षिणम् ॥ संकर्षणं
सुभद्रां च भक्त्या पूज्य प्रसादयेत् ॥ ३२ ॥ नमस्ते हलधृङ्नाम्ने नमस्ते मुसलायुध ॥ नमस्ते रेवतीकांत नमस्ते भक्तवत्सल ॥ ३३ ॥
नमस्ते बलिनां श्रेष्ठ नमस्ते धरणीधर ॥ प्रलंबारे नमस्तेऽस्तु त्राहि मां कृष्णपूर्वज ॥ ३४ ॥ एवं प्रसाद्य चानंतमजेयं त्रिदशार्चितम् ॥
कैलासशिखराकारं चंद्रकांतवराननम् ॥ ३५ ॥ नीलवस्त्रधरं देवं फणाविकटमस्तकम् ॥महाबलं हलधरं कुंडलैकविभूषितम् ॥ ३६ ॥
रौहिणेयं नरो भक्त्या लभेदभिमतं फलम्॥सर्वपापैर्विनिर्मुक्तो विष्णुलोकं च गच्छति ॥ ३७ ॥ आभूतसंप्लवं यावद्भुक्त्वा तत्र स्वयं बुधः ॥ पुण्य
क्षयादिहागत्य प्रवरो योगिनां कुले ॥ ३८ ॥ ब्राह्मणप्रवरो भूत्वा सर्वशास्त्रार्थपारगः ॥ ज्ञानं तत्र समासाद्य मुक्तिं प्राप्नोति दुर्लभाम् ॥ ३९ ॥ एव
मभ्यर्च्य हलिनं ततः कृष्णं विचक्षणः ॥ द्वादशाक्षरमंत्रेण पूजयेत्सुसमाहितः ॥ ४० ॥ द्विषट्कवर्णमंत्रेण भक्त्या ये पुरुषोत्तमम् ॥ पूजयंति सदा
धीरास्ते मोक्षं प्राप्नुवन्ति वै ॥ ४१॥ न तां गतिं सुरा यांति योगिनो नैव सोमपाः ॥ यां गतिं यांति विधिजे द्वादशाक्षरतत्पराः ॥४२॥ तस्मात्तेनैव
मंत्रेण भक्त्या कृष्णं जगद्गुरुम् ॥ संपूज्य गंधपुष्पाद्यैः प्रणिपत्य प्रसादयेत् ॥ ४३ ॥जय कृष्ण जगन्नाथ जय सर्वाघनाशन ॥ जय चाणूरकेशिघ्न
जय कंसनिषूदन ॥ ४४ ॥ जय पद्मपलाशाक्ष जय चक्रगदाधर ॥ जय नीलांबुदश्याम जय सर्वसुखप्रद ॥ ४५ ॥ जय देव जगत्पूज्य जय
संसारनाशन ॥ जय लोकपते नाथ जय वांछाफलप्रद ॥ ४६ ॥ संसारसागरे घोरे निःसारे दुःखफेनिले ॥ क्रोधग्राहाकुले रौद्रे विषयोदकसं
प्लवे ॥ ४७ ॥ नानारोगोर्मिकलिले मोहावर्तसुदुस्तरे ॥ निमग्नोऽहं सुरश्रेष्ठ त्राहि मां पुरुषोत्तम ॥ ४८ ॥ एवं प्रसाद्य देवेशं वरदं भक्तवत्सलम् ॥
सर्वपापहरं देवं सर्वकामफलप्रदम्॥४९॥पीनांसं द्विभुजं कृष्णं पद्मपत्रायतेक्षणम्॥महोरस्कं महाबाहुं पीतवस्त्रं शुभाननम् ॥५० ॥ शंखचक्रगदापाणिं
मुकुटांगदभूषणम्॥सर्वलक्षणसंयुक्तं वनमालाविभूषितम् ॥ ५१ ॥ दृष्ट्वा नरोंऽजलिं कृत्वा दंडवत्प्रणिपत्य च ॥ अश्वमेधसहस्राणां फलं प्राप्नोति
मोहिनि ॥ ५२ ॥ यत्फलं सर्वतीर्थेषु स्नाने दाने प्रकीर्तितम् ॥ नरस्तत्फलमाप्नोति दृष्ट्वा कृष्णं प्रणम्य च ॥ ५३ ॥ यत्फलं सर्ववेदेषु सर्वयज्ञेषु
यत्फलम् ॥ तत्फलं समवाप्नोति नरः कृष्णं प्रणम्य च ॥ ५४ ॥ यत्फलं सर्वदानेषु व्रतेषु नियमेषु च ॥ नरस्तत्फलमाप्नोति दृष्ट्वा कृष्णं
प्रणम्य च ॥ ५५ ॥ यत्फलं ब्रह्मचर्येण सम्यक् चीर्णेन कीर्तितम् ॥ नरस्तत्फलमाप्नोति दृष्ट्वा कृष्णं प्रणम्य च ॥ ५६ ॥ गार्हस्थ्येन

यथोक्तेन यत्फलं समुदाहृतम् ॥ नरस्त्फल० ॥ ५७ ॥ यत्फलं वनवासेन वानप्रस्थस्य कीर्तितम् ॥ नरस्तत्फलमाप्नोति० ॥ ५८ ॥
संन्यासेन यथोक्तेन यत्फलं समुदाहृतम् ॥ नरस्तत्फलमाप्नोति० ॥ ५९ ॥ किं चात्र बहुनोक्तेन माहात्म्यं तस्य भामिनि ॥ दृष्ट्वा कृष्णं नरो
भक्त्या मोक्षं प्राप्नोति दुर्लभम् ॥ ६० ॥ पापैर्विमुक्तः शुद्धात्मा कल्पकोटिसमुद्भवैः ॥श्रिया परमया युक्तः सर्वैः समुदितो गुणैः ॥ ६१ ॥सर्वकाम
समृद्धेन विमानेन सुवर्चसा ॥ त्रिःसप्तकुलमुद्धृत्य नरो विष्णुपुरं व्रजेत् ॥ ६२ ॥ ततः कल्पशतं यावद्भुक्त्वा भोगान्मनोरमान् ॥ गंधर्वाप्स
रसैः सार्धं यथा विष्णुश्चतुर्भुजः ॥ ६३ ॥ च्युतस्तस्मादिहायातो विप्राणां प्रवरे कुले ॥ सर्वज्ञः सर्ववेदी च जायते गतमत्सरः॥६४॥ स्वधर्मनिरतः
शांतो दाता भूतहिते रतः ॥ आसाद्य वैष्णवं ज्ञानं ततो मुक्तिमवाप्नुयात् ॥ ६५ ॥ ततः संपूज्य मंत्रेण सुभद्रां भक्तवत्सलाम् ॥प्रसादयेच्च विधिज्ञ
प्रणिपत्य कृतांजलिः ॥ ६६॥“नमस्ते सर्वगे देवि नमस्ते शुभसौख्यदे ॥ त्राहि मां पद्मपत्राक्षि कात्यायनि नमोऽस्तु ते ” ॥६७॥ एवं प्रसाद्य तां
देवीं जगद्धात्रीं जगद्धिताम् ॥ बलदेवस्य भगिनीं सुभद्रां वरदां शिवाम् ॥ ६८ ॥ कामगेन विमानेन नरो विष्णुपुरं व्रजेत् ॥आभूतसंप्लवं यावत्क्री
डित्वा तत्र देववत् ॥ ६९ ॥ इह मानुषतां प्राप्तो ब्राह्मणो वेदविद्भवेत् ॥ प्राप्य योगं हरेस्तत्र मोक्षं च लभते ध्रुवम् ॥७०॥ निष्क्रम्य देवतागारा
त्कृतकृत्यो भवेन्नरः ॥ प्रणम्यायतने पश्चाद्व्रजेत्तत्र समाहितः ॥ ७१ ॥ इंद्रनीलमयो विष्णुर्यत्रास्ते वालुकावृतः ॥ अंतर्धानेऽपि तं
नत्वा ततो विष्णुपुरं व्रजेत् ॥ ७२ ॥ सर्वदेवमयो देवो हिरण्यकशिपुद्धरः ॥ यत्रास्ते नित्यदा देवि सिंहार्द्धकृतविग्रहः ॥ ७३ ॥
भक्त्या दृष्ट्वा तु तं देवं प्रणम्य नृहरिं शुभे ॥ मुच्यते पातकैर्मर्त्यः समस्तैर्नात्र संशयः ॥ ७४ ॥ नरसिंहस्य ये भक्ता भवंति भुवि मानवाः ॥
न तेषां दुष्कृतं किंचित्फलं च स्याद्यदीप्सितम् ॥ ७५ ॥ तस्मात्सर्वप्रयत्नेन नरसिंहं समाश्रयेत् ॥ धर्मार्थकाममोक्षाणां फलं यस्मात्प्रयच्छति
॥ ७६ ॥ तस्मात्तं ब्रह्मतनये भक्त्या संपूजयेत्सदा ॥ मृगराजं महावीर्यं सर्वकामफलप्रदम् ॥ ७७ ॥ ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रां
त्यजादयः ॥ संपूज्य तु सुरश्रेष्ठं भक्ताः सिंहवपुर्द्धरम् ॥ ७८ ॥ मुच्यंते चाशुभाद्दुःखाज्जन्मकोटिसमुद्भवात् ॥ संपूज्य तं सुरश्रेष्ठं प्राप्नुवंत्यभि
वांछितम् ॥ ७९ ॥ देवत्वममरेशत्वं धनेशत्वं च भामिनि ॥ यक्षविद्याधरत्वं च तथान्यच्च प्रयच्छति ॥ ८० ॥ शृणुष्व नरसिंहस्य प्रभावं
विधिनंदिनि ॥ अजितस्याप्रमेयस्य भुक्तिमुक्तिप्रदस्य च॥८१॥ कः शक्नोति गुणान्वक्तुं समस्तांस्तस्य सुव्रते॥सिंहार्द्धकृतदेहस्य प्रवक्ष्यामि समा
सतः ॥ ८२ ॥ याः काश्चित्सिद्धयश्चात्र श्रूयंते दैवमानुषाः ॥ प्रसादात्तस्य ताः सर्वाः सिद्ध्यंते नात्र संशयः ॥८३॥ स्वर्गे मर्त्ये च पाताले दिवि
तोये सुरे नगे॥प्रसादात्तस्य देवस्य भवत्यव्याहता गतिः॥८४॥असाध्यं तस्य देवस्य नास्त्यत्र सचराचरे ॥ नरसिंहस्य सुभगे सदा भक्तानुकंपिन

॥८५॥विधानं तस्य वक्ष्यामि भक्तानामुपकारकम्॥येन प्रसीदते चासौ सिंहार्द्धकृतविग्रहः॥८६॥यत्तत्वं तस्य देवस्य तदज्ञात सुरासुरैः॥शाकयावकमूलैस्तु
फलपिण्याकसक्तुभिः ॥ ८७ ॥पयोभक्ष्येण वा भद्रे वर्तते साधकेश्वरः॥कासकौपीनवासाश्च ध्यानयुक्तो जितेन्द्रियः॥८८॥अरण्ये विजने देशे
नदीसंगमपर्वते॥सिद्धक्षेत्रे चोषरे च नरसिंहाश्रमे तथा॥८९॥प्रतिष्ठाप्य स्वयं चापि पूजां कृत्वा विधानतः॥उपपातकवान्देवि महापातकवानपि॥९०॥
मुक्तो भवेत्पातकेभ्यः साधको नात्र संशयः ॥ कृत्वा प्रदक्षिणं तत्र नरसिंह प्रपूजयेत् ॥ ९१ ॥ गंधपुष्पादिभिर्धूपैः प्रणम्य शिरसा प्रभुम् ॥
कर्पूरचंदनाक्तानि जातीपुष्पाणि मस्तके ॥ ९२ ॥ प्रदद्यान्नरसिंहस्य ततः सिद्धिः प्रजायते ॥ भगवान्सर्वकार्येषु न क्वचित्प्रतिदूयते ॥ ९३ ॥
न शक्तास्तं समाक्रांतु ब्रह्मरुद्रादयः सुराः ॥ किं पुनर्दानवा लोके सिद्धगंधर्वमानुषाः ॥ ९४ ॥ विद्याधरा यक्षगणाः सकिन्नरमहोरगाः ॥ ते सर्वे
प्रलयं यांति दिव्या दिव्याग्नितेजसा ॥ ९५ ॥ सकृज्जप्त्वाग्निशिखया हन्यात्सर्वानुपद्रवान् ॥ त्रिर्जप्त्वा कवचं दिव्यं संरक्षेद्दैत्यदानवात् ॥ ९६ ॥
भूतात्पिशाचाद्रक्षोभ्यो ये चान्ये परिपंथिनः ॥ त्रिर्जप्तं कवचं दिव्यमभेद्यं च सुरासुरैः ॥ ९७ ॥ योजनद्वादशांतस्तु देवो रक्षति सर्वदा ॥ नरसिंहो
महाभागे महाबलपराक्रमः ॥ ९८ ॥ ततो गत्वा बिलद्वारमुपोष्य रजनीत्रयम् ॥ पलाशकाष्ठैः प्रज्वाल्य भगवज्जातवेदसम् ॥ ९९ ॥ पालाशसमिधं
तत्र जुहुयात्त्रिमधुप्लुताम् ॥ द्वेऽयुते कंजनयने शकटश्चैव साधकः ॥ १०० ॥ ततः कवल्लीविवरं प्रकटं जायते क्षणात् ॥ ततो विशेत्तु
निःशंकः कवल्लीविवरं बुधः ॥१०१॥गच्छतः शकटस्याथ तमो मोहश्च नश्यति ॥ राजमार्गस्तु विस्तीर्णो दृश्यते तत्र मोहिनि॥१०२॥ नरसिंहं
स्मरंस्तत्र पातालं विशते तदा ॥ गत्वा तत्र जपेच्छुद्धो नरसिंहं तमव्ययम् ॥ १०३ ॥ ततः स्त्रीणां सहस्राणि वीणाचामरकर्मणाम् ॥ निर्गच्छंति
पुराच्चैव स्वागतं ता वदंति च ॥ १०४ ॥ प्रवेशयंति तं हस्ते गृहीत्वा साधकेश्वरम् ॥ ततो रसायनं दिव्यं पाययंति सुलोचने ॥१०५॥ पीतमात्रे
दिव्यदेहो जायते सुमहाबलः॥क्रीडते दिव्यकन्याभिर्यावदाभूतसंप्लवम्॥१०६॥भिन्नदेहो वासुदेवं नीयते नात्र संशयः ॥ यदा न रोचयन्त्येतास्ततो
निर्गच्छते पुनः ॥ १०७ ॥ पट्टं शूलं च खड्गं च रोचनां च मणिं तथा ॥ रसं रसायनं चैव पादुकांजनमेव च ॥ १०८ ॥ कृष्णांजलिं
च सुभगे गुटिकां च मनःशिलाम् ॥ मुंडलां चाक्षसूत्रं च षष्ठीं संजीवनीं तथा ॥ १०९ ॥ सिद्धां विद्यां च शास्त्राणि गृहीत्वा साधकोत्तमः ॥ ज्वलद्वह्निस्फुलिंगोर्मिवेष्टितं
त्रिदशं हृदि॥११०॥सकृन्न्यस्तं दहेत्सर्वं वृजिनं जन्मकोटिजम् ॥ विषे न्यस्तं विषं हन्यात्कुष्ठं हन्यात्तनौ स्थितम्
॥ १११ ॥ सुदेहभ्रूणहत्यादि कृत्वा दिव्येन शुध्यति ॥ महाग्रहगृहीतेषु ज्वलमानं विचिंतयेत् ॥ ११२ ॥ रुदंति वै ततः शीघ्रं नश्येयुर्दारुणा ग्रहाः॥

बालानां कंठके बद्ध्वा रक्षा भवति नित्यशः ॥ ११३ ॥ गंडपिंडककृत्यानां नाशनं कुरुते ध्रुवम् ॥ व्याधिघाते समिद्भिश्च घृतं क्षीरेण होमयेत्
॥ ११४ ॥ त्रिसंध्यं मासमेकं तु सर्वरोगान्विनाशयेत् ॥ असाध्यं नास्य पश्यामि तत्वस्य सचराचरे ॥ ११५ ॥ यां यां कामयते सिद्धिं तां तां
प्राप्नोत्यपि ध्रुवम् ॥ अष्टोत्तरशतं त्वेकं पूजयित्वा मृगाधिपम् ॥ ११६ ॥ मृत्तिकां सप्त वर्ल्मीके श्मशाने च चतुष्पथे ॥ रक्तचंदनसंमिश्रां गवां
क्षीरेण लेपयेत् ॥ ११७ ॥ सिंहस्य प्रतिमां कृत्वा प्रमाणेन षडंगुलाम् ॥ भूर्जपत्रे विशेषेण लिखेद्रोचनया तथा ॥ ११८ ॥ नरसिंहस्य कंठे तु
बद्ध्वा चैव समंत्रवत् ॥ जपेत्संख्याविहीनं तु पूजयित्वा जलाशये ॥ ११९ ॥ यावन्मंत्रं तु जपति सप्ताहं संयतेन्द्रियः ॥ जलाकीर्णा मुहूर्तेन
जायते सर्वमेदिनी ॥ १२० ॥ अथवा शुद्धवृक्षाग्रे नरसिंहं तु पूजयेत् ॥ जप्त्वा चाष्टशतं तत्त्वं वर्षं तद्धिनिवारयेत् ॥ १२१ ॥ तमेव पिंजके
बद्ध्वा भ्रामयेत्साधकोत्तमः ॥ महावातो मुहूर्तेन आगच्छेन्नात्र संशयः ॥ १२२ ॥ पुनश्च वारयन्सिक्तां सप्तजप्तेन वारिणा ॥ अथ तां
प्रतिमां द्वारे निखनेद्यस्य साधकः ॥ १२३ ॥ गोत्रोत्सादो भवेत्तस्य उद्धृते चैव शांतिदः ॥ तस्माद्वै ब्रह्मतनये पूजयेद्भक्तितः सदा ॥ १२४ ॥
मृगराजं महावीर्यं सर्वकामफलप्रदम् ॥ दृष्ट्वा स्तुत्वा नमस्कृत्य संपूज्य नृहरिं शुभे ॥ १२५ ॥ प्राप्नुवंति नरा राज्यं स्वर्गं मोक्षं च दुर्लभम् ॥
नरसिंहं नरो दृष्ट्वा लभेदभिमतं फलम् ॥ १२६ ॥ विमुक्तः सर्वपापेभ्यो विष्णु लोकं च गच्छति ॥ सकृद्दृष्ट्वा तु तं देवं भक्त्या सिंहवपुर्द्धरम्
॥ १२७ ॥ मुच्यते पातकैः सर्वैः कायवाक्चित्तसंभवैः ॥ संग्रामे संकटे दुर्गे चौरव्याघ्रादिपीडिते ॥ १२८ ॥ कांतारे प्राणसंदेहे विषवह्निजलेषु
च ॥ राजादिभीषु संग्रामे ग्रहरोगादिपीडिते ॥ १२९ ॥ स्मृत्वा तं यो हि पुरुषः संकटैर्विप्रमुच्यते ॥ सूर्योदये यथा नाशं तमोऽभ्येति
महत्तरम् ॥ १३० ॥ तथा संदर्शने तस्य विनाशं यांत्युपद्रवाः ॥ गुटिकां जनपाताले पादलेपरसायनम् ॥ १३१ ॥ नरसिंहे प्रसन्ने तु
प्राप्नोत्यन्यांश्च वांछितान् ॥ यान्यान्कामानभिध्यायन्भजेत नृहरिं नरः ॥ १३२ ॥ तांस्तान्कामानवाप्नोति नरो नास्त्यत्र संशयः ॥ १३३ ॥
इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीवसुसंवादे पुरुषोत्तममाहात्म्ये पंचपंचाशत्तमोऽध्यायः ॥५५॥वसुरुवाच॥अन्यच्छृणु महाभागे तस्मिन्छ्रीपुरुषोत्तमे
॥ तीर्थव्रजं महत्पुण्यं दर्शनात्पापनाशनम् ॥ १ ॥ अनंताख्यं वासुदेवं दृष्ट्वा भक्त्या प्रणम्य च ॥ सर्वपापविनिर्मुक्तो नरो याति परं
पदम् ॥ २ ॥ श्वेतगंगां नरः स्नात्वा यः पश्येच्छ्वेतमाधवम् ॥ मत्स्याख्यं माधवं चैव श्वेतद्वीपं स गच्छति ॥ ३ ॥ तुषारप्रतिमं शुद्धं शंखचक्रगदाधरम्
॥ सर्वलक्षणसंयुक्तं पुंडरीकायतेक्षणम् ॥ ४ ॥ श्रीवत्सवक्षसा युक्तं सुप्रसन्नं चतुर्भुजम् ॥ वनमालावृतोरस्कं मुकुटांगदधारिणम् ॥

॥ ५ ॥ पीतवस्त्रं सुपीनांसं कुंडलाभ्यामलं कृतम् ॥ कुशाग्रेणापि राजेंद्र श्वेतगांगेयमेव च ॥ ६ ॥ स्पृष्ट्वा स्वर्गं गमिष्यंति विष्णुभक्ताः समाहिताः ॥ यस्त्विमां प्रतिमां पश्येन्माधवाख्यां शशिप्रभाम् ॥ ७ ॥ शंखगोक्षीरसंकाशामशेषाघविनाशिनीम् ॥ तां प्रणम्य सकृद्भक्त्या पुंडरीकनिभेक्षणाम् ॥ ८ ॥ विहाय सर्वकामान्वै विष्णुलोके महीयते ॥ मन्वंतराणि तत्रैव देवकन्याभिरावृतः ॥ ९ ॥ गीयमानश्च गंधर्वैः सिद्धविद्याधरार्चितः ॥ भुनक्ति विपुलान्भोगान्यथेष्टं दैवतैः सह ॥ १० ॥ च्युतस्तस्मादिहागत्य मानुष्ये ब्राह्मणो भवेत् ॥ वेदवेदांगविद्धीमान् भोगवांश्चिरजीवितः ॥ ११ ॥ गजाश्वरथयानाढ्यो धनधान्यवृतः शुचिः ॥ रूपवान्बहुभाग्यश्च पुत्रपौत्रसमन्वितः ॥ १२ ॥ पुरुषोत्तमं पुनः प्राप्य वटमूलेऽथ सागरे ॥ त्यक्त्वा देहं हरिं स्मृत्वा ततः शांतं पदं व्रजेत् ॥ १३ ॥ श्वेतमाधवमालोक्य समीपे मत्स्यमाधवम् ॥ एकार्णवे जले पूर्वं रूपं रोहितमास्थितः ॥ १४ ॥ वेदानां हरणार्थाय रसातलतले स्थितः ॥ चिंतयित्वा क्षितिं मत्स्यं तस्मिन्स्थाने व्यवस्थितम् ॥ १५ ॥ आधाय तरुणं रूपं माधवं मत्स्यमाधवम् ॥ प्रणम्य प्रयतो भूत्वा सर्वान्कष्टान्विमुंचति ॥ १६ ॥ प्रयाति परमं स्थानं यत्र देवो हरिः स्वयम् ॥ काले पुनरिहायातो राजा स्यात्पृथिवीतले ॥ १७ ॥ मत्स्यमाधवमासाद्य दुराधर्षो भवेन्नरः ॥ दाता भोक्ता भवेद्योद्धा वैष्णवः सत्यसंगरः ॥ १८ ॥ योगं प्राप्य हरेः पश्चात्ततो मोक्षमवाप्नुयात् ॥ मत्स्यमाधवमाहात्म्यं मया ते परिकीर्तितम् ॥ १९ ॥ यं दृष्ट्वा ब्रह्मतनये सर्वान्कामानवाप्नुयात् ॥ मार्जनं तत्र वक्ष्यामि मार्कंडेयह्रदे शुभे ॥ २० ॥ भक्त्या तु तन्मना भूत्वा पुराणं पुण्यमुक्तिदम् ॥ मार्कंडेयह्रदे स्नानं सर्वकालं प्रशस्यते ॥ २१ ॥ चतुर्दश्यां विशेषेण सर्वपापप्रणाशनम् ॥ तद्वत्स्नानं समुद्रस्य सर्वकालं प्रशस्यते ॥ २२ ॥ पौर्णमास्यां विशेषेण हयमेधफलं लभेत् ॥ पूर्णिमा ज्येष्ठमासस्य ज्येष्ठा ऋक्षं यदा भवेत् ॥ २३ ॥ तदा गच्छेद्विशेषेण तीर्थराजं परं शुभम् ॥ कायवाङ्मानसैः शुद्धसद्भावोऽनन्यमानसः ॥ २४ ॥ सर्वद्वंद्वविनिर्मुक्तो वीतरागो विमत्सरः ॥ कल्पवृक्षं वटं रम्यं यत्र साक्षाज्जनार्दनः ॥ २५ ॥ प्रदक्षिणं प्रकुर्वीत त्रीन्वारान्सुसमाहितः ॥ दृष्ट्वा नश्यति यत्पापं सप्तजन्मसमुद्भवम् ॥ २६ ॥ पुण्यं प्राप्नोति विपुलं गतिमिष्टां च मोहिनि ॥ तस्य नामानि वक्ष्यामि सप्रमाणं युगे युगे ॥ २७ ॥ वटं वटेश्वरं शांतं पुराणपुरुषं विदुः ॥ वटस्यैतानि नामानि कीर्तितानि कृतादिषु ॥ २८ ॥ योजनं पादहीनं च योजनार्द्धं तदर्द्धकम् ॥ प्रमाणं कल्पवृक्षस्य कृतादिषु यथाक्रमम् ॥ २९ ॥ पूर्वोक्तेन तु मंत्रेण नमस्कृत्त्वा च तं वटम् ॥ दक्षिणाभिमुखो गच्छेद्धन्वंतरशतत्रयम् ॥ ३० ॥ यत्रासौ दृश्यते चिह्नं स्वर्गद्वारं मनोरमम् ॥ सागरांतः समाकृष्टं काष्ठं सर्वगुणान्वितम् ॥ ३१ ॥ प्रणिपत्य ततस्तिष्ठेत्पारि

पूज्य ततः पुनः ॥ मुच्यते सर्वपापौघैस्तथा पापग्रहादिभिः ॥ ३२ ॥ उग्रसेनः पुरा दृष्ट्वा स्वर्गद्वारेण सागरम् ॥ गत्वाऽऽचम्य शुचिस्तत्र
ध्यात्वा नारायणं परम् ॥ ३३ ॥ न्यसेदष्टाक्षरं मंत्रं पश्चाद्धस्तशरीरयोः ॥ ॐ नमो नारायणायेति यं वदंति मनीषिणः ॥ ३४ ॥ किं कार्यं
वहुभिर्मंत्रैर्मनोविभवकारकैः ॥ नमोनारायणायेति मन्त्रः सर्वार्थसाधकः ॥३५॥ आपो नरस्य सूनुत्वान्नारा इति ह कीर्तिताः ॥ विष्णोस्तास्त्वालयं
पूर्वं तेन नारायणः स्मृतः ॥ ३६ ॥ नारायणपरा वेदा नारायणपरा द्विजाः ॥ नारायणपरं ज्ञानं नारायणपरा क्रिया ॥ ३७ ॥ नारायणपरो धर्मो
नारायणपरं तपः ॥ नारायणपरं दानं नारायणपरं व्रतम् ॥ ३८ ॥ नारायणपरा लोका नारायणपराः सुराः ॥ नारायणपरं नित्यं नारायणपरं
पदम् ॥ ३९ ॥ नारायणपरा पृथ्वी नारायणपरं जलम् ॥ नारायणपरो वह्निर्नारायणपरं नभः ॥ ४० ॥ नारायणपरो वायुर्नारायणपरं मनः ॥
अहंकारश्च बुद्धिश्च उभे नारायणात्मके ॥ ४१ ॥ भूतं भव्यं भविष्यच्च यत्किंचिज्जीवसंज्ञितम् ॥ स्थूलं सूक्ष्मं परं चैव सर्वं नारायणात्मकम्॥४२ ॥
नारायणात्परं किंचिन्नेह पश्यामि मोहिनि ॥ तेन व्याप्तमिदं सर्वं दृश्यादृश्यं चराचरम् ॥ ४३॥ आपो ह्यायतनं विष्णोः स चा सावम्भसांपतिः॥
तस्मादप्सु स इत्येवं नारायणमघापहम् ॥ ४४ ॥ स्नानकाले विशेषेण चोपस्थाय जले शुचिः ॥ स्मरेन्नारायणं ध्यायेद्धस्ते काये च विन्यसेत्
॥ ४५ ॥ ॐकारं वामकट्यां तु नाकारं दक्षिणे तथा ॥ राकारं नाभिदेशे तु यकारं वामबाहुके ॥ ४६ ॥ णाकारं दक्षिणे न्यस्य
यकारं मूर्ध्नि विन्यसेत् ॥ अधश्चोर्द्धं च हृदये पार्श्वतः पृष्ठतोऽग्रतः ॥ ४७ ॥ ध्यात्वा नारायणं पश्चादारभेत्कवचं बुधः ॥ पूर्वे मां
पातु गोविंदो दक्षिणे मधुसूदनः ॥ ४८ ॥ पश्चिमे श्रीधरो देवः केशवस्तु तथोत्तरे ॥ पातु विष्णुस्तथाग्नेये नैर्ऋते माधवोऽव्ययः ॥ ४९ ॥
वायव्ये तु हृषीकेशस्तथेशाने च वामनः ॥ भूतले पातु वाराहस्तथोर्द्धं च त्रिविक्रमः ॥ ५० ॥ कृत्वैवं कवचं पश्चादात्मानं चिंतयेत्ततः॥
अहं नारायणो देवः शंखचक्रगदाधरः ॥ ५१ ॥ एवं ध्यात्वा तदात्मानमिमं मन्त्रमुदीरयेत् ॥ “त्वमग्निर्द्विपदां नाथ रेतोधाः कामदीपनः
॥ ५२ ॥ प्रधानः सर्वभूतानां जीवानां प्रभुरव्ययः ॥ अमृतस्यारणिस्त्वं हि देवयोनिरपांपते ॥ ५३ ॥ वृजिनं हर मे सर्वं तीर्थराज नमोऽस्तु
ते”॥ एवमुच्चार्य विधिवत्ततः स्नानं समाचरेत् ॥ ५४ ॥अन्यथा ब्रह्मतनये स्नानं तत्र न शस्यते ॥ कृत्वा चाब्दैवतैर्मंत्रैरभिषेकं च मार्जनम्
॥ ५५ ॥ अन्तर्जले जपन्पश्चात्त्रिरावृत्त्याघमर्षणम् ॥ हयमेधो यथा देवि सर्वपापहरः क्रतुः ॥ ५६ ॥ तथाघमर्षणं चात्र सूक्तं सर्वाघमर्षणम् ॥
उत्तीर्य वाससी धौते निर्मले परिधाय च ॥५७॥ प्राणानायम्य चाचम्य संध्यां चोपास्य भास्करम्॥उपातिष्ठेत्ततश्चोर्द्धं क्षिप्त्वा पुष्पजलाञ्जलिम्

॥ ५८ ॥ उपस्थायोर्द्ध्वबाहुश्च तल्लिंगैर्भास्करं ततः॥गायत्रीं पावनीं देवीं जपेदष्टोत्तरं शतम्॥५९॥अन्यांश्च सौरमन्त्रान्हि जप्त्वा तिष्ठन्समाहितः॥
कृत्वा प्रदक्षिणं सूर्यं नमस्कृत्योपविश्य च॥६०॥ स्वाध्यायं प्राङ्मुखः कृत्वा तर्पयेद्देवमानवान्॥ऋषीन्पितॄन्हि स्वीयांश्च विधिवन्नामगोत्रवित्
॥ ६१ ॥ तोयेन तिलमिश्रेण विधिवत्सुसमाहितः ॥ श्राद्धे हवनकाले च पाणिनैकेन निर्वपेत् ॥ ६२ ॥ तर्पणे तूभयं कुर्यादेष एव विधिः
सदा ॥ अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु ॥ ६३ ॥ तृप्यतामिति सुव्यक्तं नामगोत्रेण वाग्यतः ॥ कायस्थैर्यैस्तिलैर्मोहात्करोति पितृतर्प
णम् ॥६४॥ तर्पितास्तेन पितरस्त्वङ्मांसरुधिरास्थिभिः॥जले स्थित्वा स्थले दत्तं स्थले स्थित्वा जलेऽर्पितम्॥६५॥नोपतिष्ठति तत्तोयं यद्भूम्यां न
प्रदीयते ॥ पितॄणामक्षयं स्थानं मही दत्ता विरंचिना ॥ ६६ ॥ तस्मात्तत्रैव दातव्यं पितॄणां प्रीतिमिच्छता ॥ भूमिस्तेन समुत्पन्ना भूम्यां
चैव तु संस्थितम् ॥ ६७ ॥ भूम्यां चैव लयं यांति भूमौ दद्यात्ततो जलम् ॥ आस्तीर्य च कुशान्साग्रानावाह्य स्वस्वमन्त्रतः ॥ प्राचीनाग्रेषु
वै देवान्याम्याग्रेषु तथा पितॄन् ॥ ६८ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीवसुसंवादे पुरुषोत्तममाहात्म्ये षट्पञ्चाशत्तमोऽध्यायः॥५६॥
वसुरुवाच ॥ देवान् ऋषीन्पितॄंश्चान्यान्संतर्प्याचम्य वाग्यतः ॥ हस्तमात्रं चतुष्कोणं चतुर्द्वारं सुशोभनम् ॥ १ ॥ पुरं विलिख्य विधिजे
तीरे तस्य महोदधेः ॥ मध्ये तत्र लिखेत्पद्ममष्टपत्रं सकर्णिकम् ॥ २ ॥ एवं मंडलमालिख्य पूजयेत्तत्र मोहिनि ॥ अष्टाक्षरविधानेन नारा
यणमजं विभुम् ॥ ३ ॥ अथ ते संप्रवक्ष्यामि कायशोधनमुत्तमम् ॥ क्षकारं हृदये चिंत्यं रक्तं रेफसमन्वितम् ॥ ४ ॥ ज्वलंतं त्रिशिखं चैव
दहंतं पापसंचयम् ॥ चंद्रमंडलमध्यस्थमेकारं मूर्ध्नि चिंतयेत् ॥ ५ ॥ शुक्लवर्णं प्रवर्षंतममृतं प्लावयन्महीम् ॥ एवं निर्द्धूतपापस्तु दिव्यदेहस्ततो
भवेत् ॥ ६ ॥ अष्टाक्षरं ततो मंत्रं न्यसेद्देहात्मनोर्बुधः ॥ वामपादं समारभ्य क्रमशश्चैव विन्यसेत् ॥ ७ ॥ पंचांगं वैष्णवं चैव चतुर्व्यूहं
तथैव च ॥ करशुद्धिं प्रकुर्वीत मूलमंत्रेण साधकः ॥ ८ ॥ एकैकं चैव वर्णं तु अंगुलीषु पृथक् पृथक् ॥ ॐकारं पृथिवी शुक्लं वामपादे तु विन्य
सेत् ॥ ९ ॥ नकारस्तु भुवः श्यामो दक्षिणे तु व्यवस्थितः ॥ मोकारं कालमेवाहुर्वामकट्यां निधापयेत् ॥ १० ॥ नाकारं पूर्वबीजं तु दक्षिणस्यां
व्यवस्थितम् ॥ राकारस्तेज इत्याहुर्नाभिदेशे व्यवस्थितः ॥ ११ ॥ वायव्योऽयं यकारस्तु वामस्कंधे समाश्रितः ॥ णाकारः सर्वदा ज्ञेयो
दक्षिणांसे व्यवस्थितः ॥ १२ ॥ यकारोऽयं शिरस्थश्च यत्र लोका व्यवस्थिताः ॥ ॐकारं हृदये न्यस्य विकारं वा शिरस्यथ ॥ १३ ॥ ष्णकारं
वै शिखायां तु वेकारं कवचे न्यसेत् ॥ नकारं नेत्रयोस्तु स्यान्मकारं चास्त्रमीरितम् ॥ १४ ॥ ललाटे वासुदेवस्तु शुक्लवर्णः समास्थितः ॥

रक्तः संकर्षणश्चैव मुखे वह्न्यर्कसन्निभः ॥ १५ ॥ प्रद्युम्नो हृदये पीतोऽनिरुद्धो मेहने स्थितः ॥ सर्वांगे सर्वशक्तिश्च चतुर्व्यूहार्चितो हरिः ॥ १६ ॥
ममाग्रेऽत्रस्थितो विष्णुः पृष्ठतश्चापि केशवः ॥ गोविंदो दक्षिणे पार्श्वे वामे तु मधुसुदनः ॥ १७ ॥ उपरिष्टात्तु वैंकुठो वाराहः पृथिवीतले ॥ अवां
तरदिशो यास्तु तासु सर्वासु माधवः ॥ १८ ॥ गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोऽपि वा ॥ नरसिंहकृता गुप्तिर्वासुदेवमयो ह्यहम् ॥ १९ ॥ एवं
विष्णुमयो भूत्वा ततः कर्म समारभेत् ॥ यथा देहे तथा देवे सर्वतत्वानि योजयेत् ॥ २० ॥ फकारांतं समुद्दिष्टं सर्वविघ्नहरं शुभम् ॥ तत्रार्कचंद्र
वह्नीनां मंडलानि विचिंतयेत् ॥२१ ॥ पद्ममध्ये न्यसेद्विष्णुं भुवनस्यांतरस्य तु ॥ ततो विचिंत्य हृदये प्रणवं ज्योतिरुत्तमम् ॥ २२ ॥ कर्णिकायां
समासीनं ज्योतीरूपं सनातनम् ॥ अष्टाक्षरं ततो मंत्रं न्यसेच्चैव यथाक्रमम् ॥ २३ ॥ तेन व्यस्तसमस्तेन पूजनं परमं स्मृतम् ॥ द्वादशाक्षरमंत्रेण
यजेद्देवं सनातनम् ॥ २४ ॥ ततोऽवधार्य हृदये कर्णिकायां बहिर्न्यसेत् ॥ चतुर्भुजं महासत्वं सूर्यकोटिसमप्रभम् ॥ २५ ॥ चिंतयित्वा महायोगं
ततश्चावाहयेत्क्रमात् ॥ मीनरूपावहश्चैव नरसिंहश्च वामनः ॥ २६ ॥ आयांतु देवा वरदा मम नारायणाग्रतः ॥ सुमेरुः पादपीठं ते पद्मकल्पित
मासनम् ॥ २७ ॥ सर्वतत्वहितार्थाय तिष्ठ त्वं मधुसूदन ॥ पाद्यं ते पादयोर्देव पद्मनाभ सनातन ॥२८॥ विष्णो कमलपत्राक्ष गृहाण मधुसूदन ॥
मधुपर्कं महादेव ब्रह्माद्यैः कल्पितं मया ॥ २९ ॥ निवेदितं च भक्त्यार्घं गृहाण पुरुषोत्तम ॥ मंदाकिन्यास्ततो वारि सर्वपापहरं शिवम् ॥ ३० ॥
गृहाणाचमनीयं त्वं मया भक्त्या निवेदितम् ॥ त्वमापः पृथिवी चैव ज्योतिस्त्वं वायुरेव च ॥ ३१ ॥ लोकसंधृतिमात्रेण वारिणा स्नापयाम्यहम् ॥
देवतंतुसमायुक्ते यज्ञवर्णसमन्विते ॥ ३२ ॥ स्वर्णवर्णप्रभे देवं वाससी प्रतिगृह्यताम् ॥ शरीरं च न जानामि चेष्टां च तव केशव ॥ ३२ ॥
मया निवेदितं गंधं प्रतिगृह्य विलिप्यताम् ॥ ऋग्यजुःसाममंत्रेण त्रिवृतं पद्मयोनिना ॥ ३४ ॥ सावित्रीग्रंथिसंयुक्तमुपवीतं तवार्प्यते ॥ दिव्यरत्न
समायुक्ता वह्निभानुसमप्रभाः ॥ ३५ ॥ गात्राणि शोभयिष्यंति अलंकारास्तु माधव ॥ सूर्याचंद्रमसोर्ज्योतिर्विद्युदग्न्योस्तथैव च ॥३६ ॥ त्वमेव
ज्योतिषां देव दीपोऽयं प्रतिगृह्यताम् ॥ वनस्पतिरसो दिव्यो गंधाढ्यः सुरभिश्च ते ॥ ३७ ॥ मया निवेदितो भक्त्या धूपोऽयं प्रतिगृह्यताम् ॥ अन्नं
चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् ॥ ३८ ॥ मया निवेदितं भक्त्या नैवेद्यं तव केशव ॥ पूर्वे दले वासुदेवं याम्ये संकर्षणं न्यसेत् ॥ ३९ ॥
प्रद्युम्नं पश्चिमे कुर्यादनिरुद्धं तथोत्तरे ॥ वाराहं च तथाग्नेये नरसिंहं च नैर्ऋते ॥४०॥ वायव्यां माधवं चैव तथैशाने त्रिविक्रमम् ॥ तथाष्टाक्षरदेवस्य
गरुडं परितो न्यसेत् ॥ ४१ ॥ वामपार्श्वे तथा चक्रं शंखं दक्षिणतो न्यसेत् ॥ तथा महागदां चैव न्यसेद्देवस्य दक्षिणे ॥ ४२ ॥ ततः शार्ङ्गं

धनुर्विंद्वान्यसेद्देवस्य वामतः ॥ दक्षिणे चेषुधी दिव्ये खड्गं वामे च विन्यसत् ॥ ४३ ॥ श्रियं दक्षिणतः स्थाप्य पुष्टिमुत्तरतो न्यसेत ॥ वनमालां
च पुरतस्ततः श्रीवत्सकौस्तुभौ ॥४४॥ विन्यसेद्धृदयादीनि पूर्वादिषु चतुर्ष्वपि॥ततोऽस्त्रं देवदेवस्य कोणे चैव तु विन्यसेत् ॥ ४५ ॥इंद्रमग्निं यमं
चैव निर्ऋतिं वरुणं तथा ॥ वायुं धनदमीशानमनंतं ब्रह्मणा सह ॥ ४६ ॥ पूजयेत्तान्स्वकैर्मंत्रैरधश्चोर्ध्वं तथैव च ॥ एवं संपूज्य देवेशं मंडलस्थं
जनार्दनम् ॥ ४७ ॥ लभेदभिमतान्कामान्नरो नास्त्यत्र संशयः ॥ अनेनैव विधानेन मंडलस्थं जनार्दनम् ॥ ४८ ॥ पूजितं यस्तु पश्येत्स
प्रविशेद्विष्णुमव्ययम् ॥ सकृदप्यर्चितो येन विधिनानेन केशवः ॥ ४९ ॥ जन्ममृत्युजरास्तीर्त्वा विष्णोः पदमवाप्नुयात् ॥ यः स्मरेत्सततं भक्त्या
नारायणमतंद्रितः ॥ ५० ॥ अन्वहं तस्य वासाय श्वेतद्वीपः प्रकीर्तितः ॥ ॐकारादिसमायुक्तं नमस्कारं तदीयकम् ॥ ५१ ॥ सनाम सर्वतत्त्वाना
मंत्र इत्यभिधीयते ॥ अनेनैन विधानेन गंधपुष्पं निवेदयेत् ॥ ५२ ॥ एकैकस्य प्रकुर्वीत यथोद्दिष्टं क्रमेण तु ॥ मुद्रास्ततो निबध्नीयाद्यथो
क्तिक्रमवेदितम् ॥ ५३ ॥ जपं चैव प्रकुर्वीत मूलमंत्रेण तत्ववित् ॥ अष्टाविंशतिमष्टौ वा शतमष्टोत्तरं तथा ॥ ५४ ॥ काम्येषु च यथोक्तं स्याद्य
थाशक्ति समाहितः ॥ पद्मं शंखं च श्रीवत्सं गदां गरुडमेव च ॥ ५५ ॥ चक्रं खड्गं च शार्ङ्गं च अष्टौ मुद्राः प्रकीर्तिताः ॥ गच्छ गच्छ परं स्थानं
पुराणपुरुषोत्तम ॥ ५६ ॥ यत्र ब्रह्मादयो देवा विंदंति परमं पदम् ॥ अर्चनं ये न जानंति हरेर्मंत्रैर्यथोदितम् ॥ ५७ ॥ ते त्वत्र मूलमंत्रेण पूजयं
त्यच्युतं शुभे ॥ ५८ ॥ इति श्रीबृहन्नारदीयपुराणे उत्तरभागे वसुमोहिनीसंवादे पुरुषोत्तममाहात्म्ये सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥ वसुरुवाच ॥
एवं संपूज्य विधिवद्भक्त्या तं पुरुषोत्तमम् ॥ प्रणम्य शिरसा पश्चात्सागरं च प्रसादयेत् ॥ १ ॥ “प्राणस्त्वं सर्वभूतानां विश्वस्मिन्सरितां पते ॥
तीर्थराज नमस्तेऽस्तु त्राहि मामच्युतप्रिय ॥ २ ॥ स्नात्वैवं सागरे सम्यक् तस्मिन् क्षेत्रवरे शुभे ॥ तीरे चाभ्यर्च्य विधिवन्नारायणमनामयम्
॥ ३ ॥ रामं कृष्णं सुभद्रां च प्रणिपत्य च सागरम् ॥ शतानामश्वमेधानां फलं प्राप्नोति मानवः ॥ ४ ॥ सर्वपापविनिर्मुक्तः सर्वदुःखविवर्जितः ॥
वृंदारकहरिः श्रीमान्रूपयौवनगर्वितः ॥ ५ ॥ विमानेनार्कवर्णेन दिव्यगंधर्वनादिना ॥ कुलैकविंशतिं धृत्वा विष्णुलोकं च गच्छति ॥ ६ ॥
भुक्त्वा तत्र वरान्भोगान्क्रीडित्वा च सुरैस्सह ॥ च्युतस्तस्मादिहायातो ब्राह्मणो ब्रह्मवित्तमः ॥ ७ ॥ यशस्वी मतिमाञ्छ्रीमान्सत्यवादी जित
द्रियः ॥ वेदशास्त्रार्थविद्विप्रो भवेत्पश्चात्तु वैष्णवः ॥८॥ योगं च वैष्णवं प्राप्य ततो मोक्षमवाप्नुयात् ॥ ग्रहोपरागे संक्रांत्यामयने विषुवे तथा ॥ ९॥
युगादिषु च मन्वादौ व्यतीपाते दिनक्षये ॥ आषाढ्यां चैव कार्तिक्यां माघ्यां वान्यशुभे तिथौ॥ १०॥ये त्वत्र दानं विप्रेभ्यः प्रयच्छंति सुमेधसः॥फलं

सहस्रगुणितमन्यतीर्थाल्लभंति ते॥११॥पितॄणां ये प्रयच्छंति पिंडं तत्र विधानतः॥ अक्षयां पितरस्तेषां तृप्तिं संप्राप्नुवंति वै॥ १२॥एवं स्नानफलं सम्यक्
सागरस्य मयेरितम्॥ दानस्य च फलं देवि पिंडदानस्य चैव हि ॥ १३ ॥ धर्मार्थमोक्षफलदमायुःकीर्तियशस्करम् ॥ भुक्तिमुक्तिप्रदं नृणां धन्यं
दुःस्वप्ननाशनम्॥१४॥सर्वपापहरं पुण्यं सर्वकामफलप्रदम् ॥ नास्तिकाय न वक्तव्यं शठाय कृपणाय च ॥ १५ ॥ तावद्गर्जंति तीर्थानि माहात्म्यैः
स्वैः पृथक् पृथक् ॥ यावन्न तीर्थराजस्य माहात्म्यं वर्ण्यते द्विजैः ॥१६ ॥ पुष्करादीनि तीर्थानि प्रयच्छंति स्वकं फलम् ॥ तीर्थराजः समुद्रस्तु
सर्वतीर्थफलप्रदः ॥ १७ ॥ भूतले यानि तीर्थानि सरितश्च सरांसि च ॥ विशंति सागरे तानि तेन वै श्रेष्ठतां गतः ॥ १८ ॥ राजा समस्ततीर्थानां
सागरः सरितां पतिः॥तस्मात्समस्ततीर्थेभ्यः श्रेष्ठोऽसौ सर्वकामदः ॥१९॥ तमो नाशं यथाभ्येति भास्करेऽभ्युदिते सति ॥ कोट्यो नवनवत्यस्तु
यत्र तीर्थानि संति वै ॥ २० ॥ तस्मात्स्नानं च दानं च होमं जप्यं सुरार्चनम् ॥ यत्किञ्चित्क्रियते तत्र तदक्षयमितीरितम् ॥ २१ ॥
मोहिन्युवाच ॥ सर्वेषु तु समुद्रेषु क्षारोऽयं सरितां पतिः ॥ कथं जातो गुरो ब्रूहि सर्वज्ञोऽसि यतो द्विज ॥ २२ ॥ वसुरुवाच ॥ शृणु वक्ष्यामि
सुभगे क्षारत्वं चास्य वारिधेः ॥ यथा प्राप्तः पुरासीच्च मात्रास्य जगतामपि ॥ २३ ॥ पुरा सृष्टिक्रमे जाताः समुद्राः सप्त मोहिनि ॥ राधिका
गर्भसंभूता दिव्यदेहाः पृथग्विधाः ॥ २४ ॥ एकदा राधिकानाथः कांतया सह संगतः ॥ आस्ते वृन्दावने साक्षाद्गोपगोपीगवांपतिः
॥ २५ ॥ रासमंडलमध्ये तु सुदीप्ते मणिमण्डपे ॥ सुस्निग्धया समायुक्तः शृंगारे कांतया तया ॥ २६ ॥ ते सप्त सागरा बालाः स्तन्यपान
कृतक्षणाः ॥ ततस्ते सर्वतो दृष्ट्वा मातरं तां जगत्प्रसूम् ॥ २७ ॥ क्षुधार्तांश्च रुदंतस्तु आसेदुर्मणिमंडपम् ॥ तत्र जग्मुस्तु ते सर्वे. स्तन्यपान
कृतेक्षणाः ॥ २८ ॥ सर्वे निवारिताश्चापि द्वारस्थैर्वल्लवीगणैः ॥ विविशुश्च भृशं क्रुद्धा बालकास्ते स्तनार्थिनः ॥ २९ ॥ उपेक्षिता गोपिकाभि
र्मातुरुत्संगवर्तिनः ॥ ततस्तु प्ररुदन्तो वै ते गत्वा मणिमंडपम् ॥ ३० ॥ उच्चैः प्रचुक्रुशुर्देवि मातः क्वासीतिवादिनः ॥ यदा नाह्वयते माता बालकां
स्तान्स्तनार्थिनः ॥ ३१ ॥ तदा कनिष्ठः सर्वेषां विवेशायं रतिस्थलम् ॥ तं दृष्ट्वा स्वसुतं राधा मुग्धं शृंगारभंगदम् ॥ ३२ ॥ शशाप क्षुभिता भद्रे
भूर्लोकं यात मा चिरम् ॥ यतः शृंगारभंगं तु मम कर्तुं समुद्यताः ॥ ३३ ॥ ततो यूयं भुवं गत्वा स्थास्यथैकाकिनः सुताः ॥ तच्छ्रुत्वा वचनं
मातुर्जगद्धात्र्या विरंचिजे ॥ ३४ ॥ अत्युच्चै रुरुदुः सर्वे वियोगभयकातराः ॥ ततः प्रसन्नो भगवाञ्छ्रीकृष्णः प्रणतार्तिहा ॥ ३५ ॥
मा भैष्ट पुत्रास्तिष्ठामि समीपे भवतामहम् ॥ द्रवरूपा भवंतस्तु पृथग्रूपचराः सदा ॥ ३६ ॥ वर्तध्वं क्षारतां यातु कनिष्ठोऽभ्यंतरे स्थितः ॥

एवमुक्ता जगन्नाथो बालकान्विससर्ज ह ॥ ३७ ॥ तेषां तु सांत्वनार्थाय समीपस्थः सदाभवत् ॥ यः प्रविष्टो रतिगृहं स क्षारोदो बभूव ह ॥ अन्ये तु द्रवरूपा वै क्षीरोदाद्याः पृथक् स्थिताः ॥ ३८ ॥ मोहिन्युवाच ॥ का राधा भवता प्रोक्ता गुरो लोकप्रसूः सती ॥ तस्यास्तत्वं समाख्याहि श्रोतुं कौतूहलं मम ॥३९॥पुराणेषु रहस्यं तु राधामाधववर्णनम् ॥ यतः सर्वं भवान्वेत्ति याथातथ्येन सुव्रत ॥ ४० ॥ वसिष्ठ उवाच ॥ तच्छ्रुत्वा मोहिनीवाक्यं भूपते स वसुर्महान् ॥ अतीव भक्तो गोविंदे निमग्नहृदयोऽभवत् ॥ ४१ ॥ पुलकांकितसर्वांगः प्रहृष्टहृदयो मुदा ॥ उवाच मोहमापन्नो मोहिनीं द्विजसत्तमः ॥ ४२ ॥ वसुरुवाच ॥ शृणु देवि प्रवक्ष्यामि रहस्यातिरहस्यकम् ॥ सुगोप्यं कृष्णचरितं ब्रह्मैकत्वविधायकम् ॥ ४३ ॥ प्रकृतेः पुरुषस्यापि नियंतारं विधेर्विधिम् ॥ संहर्तारं च संहर्तुर्भगवंतं नतोऽस्म्यहम् ॥ ४४ ॥ देवि सर्वेऽवतारास्तु ब्रह्मणः कृष्णरूपिणः ॥ अवतारी स्वयं कृष्णः सगुणो निर्गुणः स्वयम् ॥ ४५ ॥ स एव रामः कृष्णश्च वस्तुतो गुणतः पृथक् ॥ सर्वे प्राकृतिका लोका गोलोको निर्गुणः स्वयम् ॥ ४६ ॥ गावस्तेजोंऽशवो भद्रे वेदविद्भिर्निरूपिताः ॥ ब्रह्मविष्णुशिवाद्यास्तु प्राकृता गुणनिर्मिताः ॥ ४७ ॥ तत्तेजः सर्वदा देवि निर्गुणं गुणकृन्मतम् ॥ गुणास्तदंशवो भद्रे सर्वे व्याकृतरूपिणः ॥ ४८ ॥ व्याकृतोत्पादका ज्ञेया रजःसत्त्वतमोभिधाः ॥ अव्याकृतस्य पुंसो हि गुणा विज्ञापकाः शुभे ॥ ४९ ॥ देहभूताः स्मृतास्तस्य तच्छक्तिः प्रकृतिर्मता ॥ प्रधानप्रकृतिं प्राहुः कार्यकारणरूपिणीम् ॥ ५० ॥ साक्षिणं पुरुषं प्राहुर्निर्गुणं तु सनातनम् ॥ पुरुषो वीर्यमाधत्त प्रकृत्यां च ततो गुणाः ॥ ५१ ॥ सत्त्वाद्या ह्यभवंस्तेभ्यो महत्तत्वं समुद्गतम् ॥ पुरुषस्येच्छया तत्तु व्याकृतं समभूदहम् ॥ ५२ ॥ तत्त्रिधा समभूद्भद्रे द्रव्यज्ञानक्रियात्मकम् ॥ वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥ ५३ ॥ वैकारिकान्मनो जज्ञे देवा वैकारिका दश ॥ ५४ ॥ दिग्वातार्कप्रचेतोश्विवह्नींद्रोपेंद्रमित्रकाः॥तैजसानींद्रियाण्याहुर्ज्ञानकर्ममयानि च ॥ ५५ ॥ श्रोत्रत्वग्घ्राणदृग्जिह्वाविज्ञानेंद्रियरूपकाः ॥ कर्मेंद्रियाणि सुभगे वाग्दोर्मेंढ्रांघ्रिपायवः ॥ ५६ ॥ शब्दस्तु तामसाज्जज्ञे तस्मादाकाश एव च ॥ आकाशादभवत्स्पर्शस्तस्माद्वायुरभूत्सति ॥५७॥ वायोरभूत्ततो रूपं तस्मात्तेजो व्यजायत ॥तेजसस्तु रसस्तस्मादापः समभवन्सति॥५८॥अद्भ्यो गंधः समुत्पन्नो गंधात्क्षितिरजायत॥ चराचरस्य निष्ठा तु भूमावेव प्रदृश्यते॥५९॥ आकाशादिषु तत्वेषु एकद्वित्रिचतुर्गुणाः॥ भूमौ पंच गुणाः प्रोक्ता विशेषस्तु ततः क्षितेः॥६०॥कालमायांशलिंगेभ्य एतेभ्योंऽडमचेतनम्॥समभूच्चेतनं जातं दरेण विशता सति ॥ ६१॥ तस्मादंडाद्विराड् जज्ञे सोऽशयिष्ट जलांतरे ॥मुखादीन्यस्य जातानि विराजोऽवयवा अपि॥६२॥ वचनादेश्च

सिद्ध्यर्थं सलिलस्थस्य भामिनि ॥ तस्य नाभ्यामभूत्पद्मं सहस्रार्कोरुदीधितिः ॥ ६३ ॥ तस्मिन्स्वयंभूः समभूल्लोकानां प्रपितामहः ॥ तेन तप्त्वा
तपस्तीव्रं पुंसोऽनुज्ञामवाप्य च ॥६४॥ लोकाश्च लोकपालाश्च कल्पिता ब्रह्मणा सति ॥ कट्यादिभिरधः सप्त सप्तोर्द्ध्वं जघनादिभिः॥६५॥चतुर्दश
शिरोभिस्तु लोकैर्ब्रह्मांडमीरितम् ॥ तस्मिन्ससर्ज भूतानि स्थावराणि चराणि च ॥६६॥ ब्रह्मणो मनसो जाताश्चत्वारः सनकादयः ॥ देहाद्भावादयो
देवि यैरिदं वर्द्धितं जगत् ॥६७ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीवसुसंवादे पुरुषोत्तममाहात्म्ये ब्रह्माण्डोत्पत्तिवर्णनं नामाष्टपञ्चाशत्तमो
ऽध्यायः ॥ ५८ ॥ वसुरुवाच ॥ योऽसौ निरंजनो देवश्चित्स्वरूपी जनार्दनः ॥ ज्योतीरूपो महाभागे कृष्णस्तल्लक्षणं शृणु ॥ १ ॥ गोलोके स
विभुर्नित्यं ज्योतिरभ्यंतरे स्थितः ॥ एक एव परं ब्रह्म दृश्यादृश्यस्वरूपधृक् ॥ २ ॥ तस्मिँल्लोके तु गावो हि गोपा गोप्यश्च मोहिनि ॥ वृन्दावनं
पूर्वतश्च शतशृंगस्तथा सरित् ॥ ३ ॥ विरजा नाम वृक्षाश्च पक्षिणश्च पृथग्विधाः ॥ यावत्कालं तु प्रकृतिर्जागर्ति विधिनंदिनि ॥ ४ ॥
तावत्कालं तु गोलोके दृश्य एव विभुः स्थितः ॥ लये सुप्ता गवाद्यास्तु न जानंति विभुं परम् ॥ ५ ॥ ज्योतिःसमूहांतरतः कमनी
यवपुर्द्धरः ॥ किशोरो जलदश्यामः पीतकौशांबरावृतः ॥ ६ ॥ द्विभुजो मुरलीहस्तः किरीटादिविभूषितः ॥ आस्ते कैवल्यनाथस्तु
राधावक्षस्थलोज्ज्वलः ॥ ७ ॥ प्राणाधिकप्रियतमा सा राधाराधितो यया ॥ सुवर्णवर्णा देवी सा चिद्रूपा प्रकृतेः परा ॥ ८ ॥ तयोर्देहस्थयो
र्नास्ति भेदो नित्यस्वरूपयोः ॥ धावल्यदुग्धयोर्यद्वत्पृथिवीगंधयोर्यथा ॥ ९ ॥ तत्कारणं कारणानां निर्देष्टुं नैव शक्यते ॥ वेदानिर्वचनीयं
यत्तद्वक्तुं नैव शक्यते ॥ १० ॥ ज्योतिरंतरतः प्रोक्तं यद्रूपं श्यामसुंदरम् ॥ शिवेन दृष्टं तद्रूपं कदाचिद्ध्यानगोचरम् ॥ ११ ॥ ततः
प्रभृति जानंति गोलोकाख्यानमीप्सितम् ॥ नारदाद्या विधिसुते सनकाद्याश्च योगिनः ॥ १२ ॥ श्रुतं ध्यायंति तं सर्वे न तैर्दृष्टं कदाचन ॥
साक्षाद्द्रष्टुं तु तपते शिवोऽद्यापि सनातनः ॥ १३ ॥ नैव पश्यति तद्रूपं ध्यायति ध्यानगोचरम् ॥ कदाचित्क्रीडतोर्देवि राधामाधवयोर्वपुः ॥ १४ ॥
द्विधाभूतमभूत्तत्र वामांगं तु चतुर्भुजम् ॥ समानरूपावयवं समानांबरभूषणम् ॥ १५ ॥ तद्वद्राधास्वरूपं च द्विधारूपमभूत्सति ॥ ताभ्यां दृष्टं
तत्स्वरूपं साक्षात्तावपि तत्समौ ॥१६ ॥चतुर्भुजं तु यद्रूपं लक्ष्मीकांतं मनोहरम् ॥ तद्दृष्टं तु शिवाद्यैश्च भक्तवृन्दैरनेकशः ॥ १७ ॥ सकृत्तु ब्रह्मणा
दृष्टं देवि रूपं चतुर्भुजम् ॥ सृष्टिकार्यप्रमुग्धेन दर्शितं कृपया स्वयम् ॥ १८ ॥ लक्ष्म्या सनत्कुमाराय वर्णितं विधिनंदिनि ॥ विष्वक्सेनाय
तूद्दिष्टं स्वरूपं तत्त्वमूर्तये ॥१९॥ नारायणेन विधिजे ततो ध्यायंति सर्वशः ॥ धर्मपुत्रेण देवेशि नारदाय समीरितम् ॥ २० ॥ गोलोकवर्णनं सव

राधाकृष्णमयं तथा ॥ या तु राधा विधिसुते देवी देववरार्चिता ॥ २१ ॥ सा स्वयं शिवरूपाभूत्कौतुकेन वरानने ॥ तद्दृष्ट्वा सहसाश्चर्यं कृष्णो
योगेश्वरेश्वरः ॥ २२ ॥ मूलप्रकृतिरूपं तु दध्रे तत्समयोचितम् ॥ विपरीतं वपुर्धृत्वा वामदेवो मुदान्वितः ॥ २३ ॥ ध्यायेदहर्निशं देवं दुर्गारूप
धरं हरिम् ॥ या राधा सैव लक्ष्मीस्तु सावित्री च सरस्वती ॥ २४ ॥ गंगा च ब्रह्मतनये नैव भेदोऽस्ति वस्तुतः ॥ पंचधा सा स्थिता विद्या
कामधेनुस्वरूपिणी ॥२५॥ यः कृष्णो राधिकानाथः स लक्ष्मीशः प्रकीर्तितः ॥ स एव ब्रह्मरूपश्च धर्मो नारायणस्तथा ॥ २६ ॥ एवं तु पंचधा
रूपमास्थितो भगवानजः ॥ कार्यकारणरूपोऽसौ ध्यायंति जगतीतले ॥ २७ ॥ तेन वै प्रेमसंबद्धो विषयी यः शिवः स तु ॥ राधेशं राधिकारूपं
स्वयं सच्चित्सुखात्मकम् ॥ २८ ॥ देवतेजःसमुद्भूता मूलप्रकृतिरीश्वरी ॥ कृष्णरूपा महाभागे दैत्यसंहारकारिणी ॥ २९ ॥ सती दक्षसुता भूत्वा
विषयेशं शिवं श्रिता ॥ भर्तुर्विनिंदनं श्रुत्वा सती त्यक्त्वा कलेवरम् ॥ ३० ॥ जज्ञे हिमवतः क्षेत्रे मेनायां पुनरेव च ॥ ततस्तप्त्वा तपो भद्रे शिवं
प्राप शिवप्रदा ॥ ३१ ॥ वस्तुतः कृष्णराधासौ शिवमोहनतत्परा ॥ जगदंबास्वरूपा च यतो माया स्वयं विभुः ॥ ३२ ॥ अत एव ब्रह्मसुते स्कंदो
गणपतिस्तथा॥ स्वयं कृष्णो गणपतिः स्वयं स्कंदः शिवोऽभवत् ॥ ३३ ॥ शिवमेवं वदंत्येके राधारूपं समाश्रितम् ॥ कृष्णवक्षःस्थलस्थानं तयो
र्भेदो न लक्ष्यते ॥ ३४ ॥ कृष्णो वा मूलप्रकृतिः शिवो वा राधिका स्वयम् ॥ एकं वा मिथुनं वापि न केनापीति निश्चितम्॥३५॥अनिर्देश्यं
तु यद्वस्तु तन्निर्देष्टुं न च क्षमम् ॥ उपलक्षणमेतद्धि यन्निर्देशनमैश्वरम् ॥ ३६ ॥ शास्त्रं वेदाश्च सुभगे वर्णयंति यदीश्वरम् ॥ तत्सर्वं प्राकृतं विद्धि
निर्देष्टुं शक्यमेव च ॥ ३७ ॥ अनिर्देश्यं तु यद्देवि तन्नेतीति निषिध्यते ॥निषेधशेषः स विभुः कीर्तितः शरणागतैः ॥ ३८ ॥ शास्त्रं नियामकं भद्रे
सर्वेषां कर्मणां भवेत् ॥ कर्मी तु जीवः कथित ईश्वरांशो विभुः स्वयम् ॥ ३९ ॥ प्रकृतेस्तु परो नित्यो मायया मोहितः शुभे ॥ यस्तु साक्षी
स्वयं पूर्णः सहानुशयिता स्थितः ॥ ४० ॥ न वेत्ति तं चानुशयी वेदानुशयिनं स तु ॥ शंखचक्रगदापद्मैरलंकृतभुजद्वयाः ॥ ४१ ॥ प्रपन्नास्ते तु
विज्ञेयाः द्विविधा विधिनंदिनि ॥ आर्तदृप्तविभेदेन तत्रार्ता असहा मताः ॥ ४२ ॥ दृप्ता जन्मांतरसहा निर्भयाः सदसज्जनाः ॥ ये प्रपन्ना महा
लक्ष्म्यां सखिभावं समाश्रिताः ॥ ४३ ॥ तेषां मंत्रं प्रवक्ष्यामि प्रयांति विधिबोधितम् ॥ गोपीजनपदस्यांते वल्लभेति समुच्चरेत् ॥ ४४ ॥ चरण
ञ्छरणं पश्चात्प्रपद्ये पदमीरयेत् ॥ षोडशार्णो मंत्रराजः साक्षाल्लक्ष्म्या प्रकाशितः ॥ ४५ ॥ पूर्वं सनत्कुमाराय शंभवे तदनंतरम् ॥ सखिभावं समा
श्रित्य गोपिकावृंदमध्यगम् ॥ ४६ ॥ आत्मानं चिंतयेद्भद्रे राधामाधवसंज्ञकम् ॥ गुरुष्वीश्वरभावेन वर्तेत प्रणतः सदा ॥४७॥ वैष्णवेषु च सत्कृत्य

तथा समतयान्यतः ॥ दिवानिशं चिंतनं च स्वामिनोः प्रेमबंधनात् ॥ कुर्यात्पर्वस्वपि सदा यात्रापर्वमहोत्सवान् ॥ ४८ ॥
इति श्रीबृहन्नारदीयपुराणोत्तरभागे वसुमोहिनीसंवादे पुरुषोत्तममाहात्म्यं नाम एकोनषष्टितमोऽध्यायः ५९ ॥ वसुरुवाच ॥ ततो गच्छेद्वि
धिसुते तीर्थं यज्ञांगसंभवम् ॥ इंद्रद्युम्नसरो नाम यत्रास्ते पावनं शुभम् ॥ १ ॥ तत्र गत्वा शुचिर्विद्वानाचम्य मनसा हरिम् ॥ ध्यात्वोपस्थाय
च विभुं मंत्रमेनमुदीरयेत् ॥ २ ॥ "अश्वमेधांगसंभूत तीर्थ सर्वाघनाशन ॥ स्नानं त्वयि करोम्यद्य पापं हर नमोऽस्तु ते" ॥ ३ ॥ एवमुच्चार्य विधि
वत्स्नात्वा देवान् ऋषीन्पितॄन् ॥ तिलोदकेन वान्यांश्च संतर्प्याचम्य वाग्यतः ॥ ४ ॥ दत्वा पितॄणां पिंडांश्च संपूज्य पुरुषोत्तमम् ॥ दशाश्वमेधिकं
सम्यक्फलं प्राप्नोति मानवः ॥ ५ ॥ सप्तावरान्सप्त परान्वंशानुद्धृत्य देववत् ॥ कामगेन विमानेन विष्णुलोकं स गच्छति ॥ ६ ॥
भुक्त्वा तत्र वरान्भोगान्यावच्चंद्रार्कतारकम् ॥ च्युतस्तस्मादिहायातो मोक्षं च लभते ध्रुवम् ॥ ७ ॥ एवं कृत्वा पंचतीर्थीमेकादश्यामुपोषितः ॥
ज्येष्ठशुक्ले पंचदश्यां यः पश्येत्पुरुषोत्तमम् ॥ ८ ॥ स पूर्वोक्तफलं प्राप्य क्रीडित्वा चाच्युतालये ॥ प्रयाति परमं स्थानं यस्मान्नावर्तते पुनः
॥ ९ ॥ पृथिव्यां यानि तीर्थानि सरितश्च सरांसि च ॥ पुष्करिण्यस्तडागानि वाप्यः कूपास्तथा ह्रदाः ॥ १० ॥ नाना नद्यः समुद्राश्च सप्ताहं पुरुषो
त्तमे ॥ ज्येष्ठशुक्लदशम्यादि प्रत्यक्षं यांति सर्वदा ॥ ११ ॥ स्नानदानादिकं यस्माद्देवताप्रेक्षणे सति ॥ नृभिर्यत्क्रियते तत्र तत्सर्वं चाक्षयं भवेत्
॥ १२ ॥ ज्येष्ठमासे तु दशमी शुक्लपक्षस्य मोहिनि ॥ हरते दश पापानि तस्माद्दशहरा स्मृता ॥ १३ ॥ यस्तस्यां हलिनं कृष्णं पश्येद्भद्रां च
सुव्रतः ॥ सर्वपापविनिर्मुक्तो विष्णुलोकं व्रजेन्नरः ॥ १४ ॥ नरो दोलागतं दृष्ट्वा गोविंदं पुरुषोत्तमम् ॥ फाल्गुन्यां संयतो भूत्वा गोविंदस्य पुरं
व्रजेत् ॥ १५ ॥ विषुवे दिवसे प्राप्ते पंचतीर्थविधानतः ॥ दृष्ट्वा संकर्षणं कृष्णां सुभद्रां च सुलोचने ॥ १६ ॥ नरः समस्तयज्ञानां फलं प्राप्नोति
दुर्लभम् ॥ विमुक्तः सर्वपापेभ्यो विष्णुलोकं च गच्छति ॥ १७ ॥ यः पश्यति तृतीयायां कृष्णं चंदनरूषितम् ॥ वैशाखस्य सिते पक्षे स यात्यच्युत
मंदिरम् ॥ १८ ॥ यदा भवेन्महाज्यैष्ठी राशिनक्षत्रयोगतः ॥ प्रयत्नेन तदा मर्त्यैर्गंतव्यं पुरुषोत्तमम् ॥ १९ ॥ कृष्णं दृष्ट्वा महाज्यैष्ठ्यां रामं भद्रां
च मोहिनि ॥ नरो द्वादशयात्राणां फलं प्राप्नोति चाधिकम् ॥ २० ॥ प्रयागे च कुरुक्षेत्रे नैमिषे पुष्करे गये ॥ गंगाद्वारे च कुब्जाम्रगंगासागर
संगमे ॥ २१ ॥ कोकामुखे शूकरे च मथुरायां मरुस्थले ॥ शालग्रामे वायुतीर्थे मंदरं सिंधुसागरे ॥ २२ ॥ पिंडारके चित्रकूटे प्रभासे कनखले
तथा ॥ शंखोद्धारे द्वारकायां तथा बदरिकाश्रमे ॥ २३ ॥ लोहकूटे चाश्वतीर्थे सर्वपापप्रमोचने ॥ कर्दमाले कोटितीर्थे तथा चामरकंटके ॥ २४ ॥

लोलार्के जंबुमार्गे च सोमतीर्थे पृथूदके ॥ उत्पलावर्तके चैव पृथुतुंगे सकुब्जके ॥ २५ ॥ एकाम्रके च केदारे काश्यां वा विरजे सति ॥ कालंजरे
च गोकर्णे श्रीशैले गंधमादने ॥ २६ ॥ महेंद्रे मलये विंध्ये पारियात्रे हिमाह्वये ॥ सह्ये च शुक्तिमति च गोमंते चार्बुदे तथा ॥ २७ ॥ गंगायां
च महाभागे यत्पुण्यं यामुनेषु च ॥ सारस्वतेषु गोमत्यां ब्रह्मपुत्रेषु सप्तसु ॥ २८ ॥ गोदावरी भीमरथी तुंगभद्रा च नर्मदा॥तापी पयोष्णी
कावेरी शिप्रा चर्मण्वती तथा ॥ २९ ॥ वितस्ता चंद्रभागा च शतद्रुर्बाहुदा तथा ॥ ऋषिकुल्या मरुद्वृधा विपाशा च दृषद्वती ॥ ३० ॥ सरयूर्नाक
गंगा च गंडकी च महानदी ॥ कौशिकी करतोया च त्रिस्रोता मधुवाहिनी ॥ ३१॥ महानदी वैतरणी याश्चान्या नानुकीर्तिताः ॥ तास्सर्वा न समाः
प्रोक्ताः कृष्णसंदर्शनस्य च ॥ ३२ ॥ यत्फलं स्नानदानेन राहुग्रस्ते दिवाकरे ॥ तत्फलं कृष्णमालोक्य महाज्यैष्ठ्यां लभेन्नरः ॥ ३३ ॥ तस्मात्सर्व
प्रयत्नेन गंतव्यं पुरुषोत्तमम् ॥ महाज्यैष्ठ्यां विधिस्तुते सर्वकामफलेप्सुभिः ॥३४ ॥ दृष्ट्वा रामं महाज्यैष्ठ्यां कृष्णं चापि सुभद्रया ॥ विष्णुलोकं नरो
याति समुद्धृत्य कुलं शतम्॥३५॥भुक्त्वा तत्र वरान्भोगान्यावदाभूतसंप्लवम्॥पुण्यक्षयादिहागत्य चतुर्वेदी द्विजो भवेत्॥३६॥स्वधर्मनिरतः शांतः कृष्ण
भक्तो जितेंद्रियः॥वैष्णवं योगमास्थाय ततो मोक्षमवाप्नुयात्॥३७॥मासि ज्येष्ठ च संप्राप्ते नक्षत्रे चेंद्रदैवते॥पौर्णमास्यां तदा स्नानं प्रशस्तं सागरांभसि
॥३८॥सर्वतीर्थमयः कूपस्तदास्ते सजलः शुचिः॥तथा भोगवती तत्र प्रत्यक्षा भवति ध्रुवम्॥३९॥ तस्माज्ज्यैष्ठ्यां समुद्धृत्य हैमादिकलशैर्जलम् ॥
कृष्णरामाभिषेकार्थं सुभद्रायाश्च मोहिनि॥॥४०॥कृत्वा सुशोभनं मंचं पताकाभिरलंकृतम् ॥ सुदृढं सुखसंचारं वस्त्रैः पुष्पैरलंकृतम्॥४१॥विस्तीर्णं
धूपित धूपैः स्नानार्थं रामकृष्णयोः ॥ पीतवस्त्रपरिच्छन्नं मुक्ताहारावलंबितम्॥४२॥तत्र नानाविधैर्वाद्यैः कृष्णं नीलाम्बरं सति॥ मंचे संस्थाप्य भद्रां
च जयमंगलनिःस्वनैः॥४३॥ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च मोहिनि ॥अनेकशतसाहस्रैर्वृतं स्त्रीपुरुषैस्तथा ॥ ४४ ॥ गृहस्थाः स्नातकाश्चैव यतयो
ब्रह्मचारिणः ॥ स्नापयंति तदा कृष्णं मंचस्थं सहलायुधम्॥४५॥तथा समस्ततीर्थानि पूर्वोक्तानि च सुंदरि॥ मोदकैः पुष्पमिश्रैश्च स्नापयंति पृथक्
पृथक् ॥ ४६ ॥ पश्चात्पटहसंघोषैर्भेरीमुरजनिःस्वनैः ॥ काहलैस्तालशब्दैश्च मृदंगैर्झर्झरैस्तथा॥ ४७ ॥ अन्यैश्च विविधैर्वाद्यैर्घंटास्वनविमिश्रितैः॥
स्त्रीणां मंगलशब्दैश्च स्तुतिशब्दैर्मनोरमैः ॥ ४८ ॥ जयशब्दैस्तथा स्तोत्रैर्वीणावेणुनिनादितैः ॥ श्रूयते सुमहाञ्छब्दः सागरस्येव गर्जतः
॥ ४९ ॥ मुनीनां वेदघोषैश्च मंत्रघोषैस्तथापरैः ॥ नानास्तोत्ररवैः पुण्यैः सामगानोपबृंहितैः ॥ ५० ॥ श्यामावदातवेश्याभिः पीतरक्तांशु
कैस्तथा ॥ चामरै रत्नदंडैश्च वीज्येते रामकेशवौ ॥ ५१ ॥ यक्षविद्याधरैः सिद्धैर्देवगंधर्वचारणैः ॥ आदित्या वसवो रुद्राः साध्या विश्वे मरुद्गणाः॥

॥ ९२ ॥ लोकपालास्तथान्ये च स्तुवंति पुरुषोत्तमम् ॥ नमस्ते देवदेवेश पुराणपुरुषोत्तम ॥ ९३ ॥ सर्गस्थित्यंतकृद्देव लोकनाथ जगत्पते ॥
त्रैलोक्यशरणं देवं ब्रह्मण्यं मोक्षकारणम् ॥ ९४ ॥ तं नमस्यामहे भक्त्या सर्वकामफलप्रदम् ॥ स्तुत्वैवं विबुधाः कृष्णं रामं चैव महाबलम् ॥ ९५ ॥
सुभद्रां चापि विधिजे तदाकाशे व्यवस्थिताः ॥ गायंति देवगंधर्वा नृत्यंत्यप्सरसस्तथा ॥ ९६॥देवतूर्याणि वाद्यंते वाता वांति सुशीतलाः ॥ पुष्प
मिश्रं तदा मेघा वर्षंत्याकाशगोचराः ॥ ९७ ॥ जयशब्दं च कुर्वंति मुनयः सिद्धचारणाः ॥ शक्राद्या विबुधाः सर्वे ऋषयः पितरस्तथा ॥ ९८॥
प्रजानां पतयो नागा ये चान्ये स्वर्गवासिनः ॥ ततो मंगलसंभारैर्विधिमन्त्रपुरस्कृतम् ॥ ९९ ॥ आभिषेचनिकं द्रव्यं गृहीत्वा देवतागणाः ॥ इन्द्र
विष्णू महावीर्यौ सूर्याचंद्रमसौ तथा ॥ ६० ॥ धाता चैव विधाता च तथा चैवानिलानलौ ॥ पूषा भगोऽर्यमा त्वष्टा विवस्वानंशुमांस्तथा॥६१॥
रुद्राश्विसहितो धीमान्मित्रेण वरुणेन च ॥ रुद्रैर्वसुभिरादित्यैर्वालखिल्यैर्मरीचिजैः ॥ ६२ ॥ भृगुभिश्चांगिरोभिश्च सर्वविद्यासु निष्ठितैः ॥ पिता
महः पुलस्त्यश्च पुलहश्च महातपाः ॥ ६३ ॥ अंगिराः कश्यपोऽत्रिश्च मरीचिर्भृगुरेव च ॥ क्रतुर्हरः प्रचेताश्च मनुर्दक्षस्तथैव च ॥ ६४ ॥ ऋतवश्च
ग्रहाश्चैव ज्योतींषि च द्विजोत्तमाः ॥ मूर्तिमत्यश्च सरितो देवाश्चैव सनातनाः ॥ ६५ ॥ सुभद्राश्च ह्रदाश्चैव तीर्थानि विविधानि च ॥ पृथिवी
द्यौर्दिशश्चैव पादपाश्च द्विजोत्तमाः ॥ ६६ ॥ अदितिर्देवमाता च ह्रीः श्रीः स्वाहा सरस्वती ॥ उमा शची सिनीवाली तथा चानुमतिः कुहूः
॥ ६७ ॥ राका च धिषणा चैव पत्न्यश्चान्या दिवौकसाम् ॥ श्रेष्ठो गिरीणां हिमवान्नागराजश्च वामनः ॥ पारियात्रश्च विंध्यश्च मेरुश्चानेक
शृंगवान् ॥ ६८ ॥ ऐरावतः सानुचरः कलाः काष्ठास्तथैव च ॥ मासार्द्धमासा ऋतवस्तथा रात्र्यहनी समाः ॥ ६९ ॥ उच्चैःश्रवा हयश्रेष्ठो
नागराजश्च वामनः ॥ अरुणो गरुडश्चैव लताश्चौषधिभिः सह ॥ ७० ॥ धर्मश्च भगवान्देवः समागच्छंति सर्वतः ॥ कालो यमश्च मृत्युश्च
यमस्यानुचराश्च ये ॥ ७१ ॥ बहुलत्वाच्च नोक्ता ये विविधा देवतागणाः ॥ ते देवस्याभिषेकार्थं समायांति ततस्ततः ॥ ७२ ॥ दिव्यसंभारसंयुक्तैः
कलशैः कांचनैस्तथा ॥ सारस्वतीभिः पुण्याभिर्दिव्यतोयाभिरेव च ॥ ७३ ॥ तोयेनाकाशगंगायाः कृष्णं रामेण संगतम् ॥ सपुष्पैः कुंभसलिलैः
स्नापयंत्यंबरे स्थिताः॥७४॥ संचरंति विमानानि देवानामंबरे तथा॥उच्चावचानि दिव्यानि कामगानि स्थिराणि च ॥७५॥ दिव्यरत्नविचित्राणि
सेवितान्यप्सरोगणैः ॥ गीतैर्वाद्यैः पताकाभिः शोभितानि समंततः ॥ ७६ ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे वसुमोहिनीसंवादे पुरुषोत्तम
माहात्म्येऽभिषेको नाम षष्टितमोऽध्यायः ॥ ६० ॥ वसुरुवाच ॥ एवं तदा विधिसुते कृष्णं रामेण संगतम् ॥सुभद्रां च महाभागाः संस्तुवंति मुदा

न्विताः ॥१॥ देवा ऊचुः ॥ जय जय लोकपाल जय पद्मनाभ भूधरण॥जय जय चादिदेव बहुकारण॥२॥ जय जय वासुदेव जय सञ्चरण सत्करण ॥ जय जय दिव्यमीन जय त्रिदशवर ॥३॥ जय जय जलधिशयन जय जय योगेश जय वेदधर॥जय जय विश्वमूर्ते जय चक्रधर॥४॥जय जय भूतनाथ जय श्रीनिवास जय जय योगिवर ॥ जय जय सूर्यनेत्र जय देव वराह ॥५॥ जय जय कैटभारे जय जय वेदवर॥जयजय कूर्मरूप जय यज्ञवर ॥ ६॥ जय जय कमलनाभ जय शैलधर ॥ जय जय योगेश जय वेगधर॥७॥जय जय विश्वमूर्ते जय चक्रधर॥ जय जय भूतनाथ जय धरणीधर ॥ ८ ॥ जय जय शेषशायिञ्जय पीतवास ॥ जय सोमकान्त जय योगवास जय जय॥९॥दहनचक्र जय धर्मवास जय जय ॥ गुणनिधान जय श्रीनिवास जय जय॥१०॥गरुडासन जय सुखनिवास जय जय॥ जय जय धर्मकांत जय जय मतिनिवास ॥ ११ ॥ जय जय गहनगेहनिवास ॥ जय जय योगिगम्य जय मखनिवास ॥ १२॥जय जय वेदवेद्य जय शांतिकर ।।जय जय योगिचिंत्य जय पुष्टिकर ॥ १३ ॥ जय जय ज्ञानमूर्ते जय कमलाकर॥ जय जय भाववेद्य जय मुक्तिकर॥१४॥ जय विमलदेह जय जय सत्त्वनिलय॥जय जय गुणसमूह जय जय यज्ञकर॥१५॥ जय जय गुणविहीन जय जय मोक्षकर॥ जय जय भूहिरण्य जय जय कांतियुत ॥१६॥ जय लोकशरण जय जय लक्ष्मीपते ॥ जय पंकजाक्ष जय जय सृष्टिकर॥१७॥ जय योगयुत जयातसीकुसुमश्यामदेह॥जय जय समुद्राविष्टदेह जय लक्ष्मीपंकजभोगदेह॥१८॥जय जय भक्तिभावन लोकगेय॥जय लोककांत जय परमशांत ॥१९॥ जय जय परमसार जयचक्रधर॥ जय भोगियुत जय नीलांबर॥२०॥जय सांख्यनुत जय कलुषहर॥जय कृष्ण जगन्नाथ जय संकर्षणानुज॥२१॥जय जय पद्मपलाशाक्षजय वांछितफलप्रद॥जय मालावृतोरस्क जय चक्रगदाधर॥२२॥ जय पद्मालयाकांत जय विष्णो नमोऽस्तु ते॥एवं स्तुत्वा तदा देवाः शक्राद्या हृष्टमानसाः॥२३॥सिद्धचारणगंधर्वा ये चान्ये स्वर्गवासिनः ॥दृष्ट्वा स्तुत्वा नमस्कृत्य तद्गतेनान्तरात्मना॥ २४ ॥ कृष्णं रामं सुभद्रां च यांति स्वं स्वं निवेशनम् ॥ कपिलाशतदानेन यत्फलं पुष्करे स्मृतम्॥ २५ ॥ तत्फलं कृष्णमालोक्य मंचस्थं सहलायुधम्॥कन्याशतप्रदानेन यत्फलं समुदाहृतम्॥२६॥ तत्फलं कृष्णमालोक्य मंचस्थं लभते नरः ॥ शतनिष्कसुवर्णेन भूमिदानेन यत्फलम्॥२७॥तत्फलं चान्नदानेन सर्वातिथ्येन यत्फलम्॥वृषोत्सर्गेण विधिवद् ग्रीष्मे तोयप्रदानतः॥२८॥तिलधेनुप्रदानेन गजाश्वरथदानतः ॥ चांद्रायणेन चीर्णेन तथा मासोपवासतः ॥ २९ ॥ यत्फलं सर्वतीर्थेषु व्रतैर्दानैश्च यत्फलम् ॥ ससुभद्रौ रामकृष्णौ तल्लभेद्वीक्ष्य मंचगौ ॥ ३० ॥ तस्मान्नरोऽथवा नारी पश्येत्त पुरुषोत्तमम् ॥ स्नानशेषेण कृष्णस्य तोयेन यदि मोहिनि ॥ ३१ ॥ वंध्या मृतप्रजा वापि दुर्भगा ग्रहपीडिताः ॥ राक्षसाद्यैर्गृहीता वा तथा रोगैश्च संहताः ॥ ३२ ॥ सद्यस्ताः शुद्धिमायांति विधिना ह्यभिषेचिताः ॥ प्राप्नुवंतीप्सितान्कामान्या

न्यान्वांछति सुप्रभे ॥ ३३ ॥ पुण्यानि यानि तोयानि संत्यन्यानि धरातले ॥ तानि स्नातावशेषस्य कलां नार्हंति षोडशीम् ॥ ३४ ॥ तस्मा
त्स्नानावशेषेग जलेन जलशायिनः ॥ अभ्युक्षेत्सर्वगात्राणि सर्वकामप्रदेन च ॥३५ ॥स्नातं पश्यंति ये कृष्णं व्रजंतं दक्षिणामुखम्॥ ब्रह्महत्यादिभिः
पापैर्मुच्यंते ते न संशयः ॥ ३६ ॥ शास्त्रेषु यत्फलं प्रोक्तं त्रिः प्रदक्षिणया भुवः ॥ दृष्ट्वा नरो लभेत्कृष्णं तत्फलं दक्षिणामुखम् ॥ ३७ ॥ तीर्थ
यात्राफलं यत्तु पृथिव्यां समुदाहृतम् ॥ दृष्ट्वा यांतं लभेत्कृष्णं तत्फलं दक्षिणामुखम् ॥३८॥गंगाद्वारे च कुब्जाम्रे कुरुक्षेत्रेऽर्कपर्वणि ॥ पुष्करादिषु
चान्येषु यत्फलं स्नानतः स्मृतम् ॥ ३९ ॥यत्फलं दक्षिणास्यं तु कृष्णं यांतं निरीक्ष्य च ॥ अथ किं बहुनोक्तेन यत्फलं पुण्यकर्मणः ॥ ४० ॥
वेदशास्त्रपुराणेषु भारते संहितादिषु ॥ तत्फलं वीक्ष्य दक्षास्यौ सुभद्रौ बलकेशवौ ॥ ४१ ॥ गुंडिचामंडपं यांतं ये पश्यंति रथे स्थितम् ॥
सभद्रं सबलं कृष्णं ते यांति भवनं हरेः ॥ ४२ ॥ गुंडिचायानसमये फाल्गुन्यां विषुवे तथा॥ सकृद्यात्रां नरः कृत्वा विष्णुलोकं प्रगच्छति ॥ ४३॥
यावतीः कुरुते मर्त्यो यात्राः श्रीपुरुषोत्तमे ॥ तावत्कल्पं विष्णुलोके वसेदिति विनिश्चयः ॥ ४४ ॥ यात्रा द्वादश संपूर्णा यदा स्युर्विधिनंदिनि ॥
तदा प्रतिष्ठां कुर्वीत विधिना पापनाशिनि ॥४५॥ ज्येष्ठमासि सिते पक्षे ह्येकादश्यां समाहितः ॥ गत्वा जलाशयं पुण्यमाचम्य प्रयतः शुचिः
॥ ४६ ॥ आवाह्य सर्वतीर्थानि ध्यात्वा नारायणं तथा ॥ ततः स्नानं प्रकुर्वीत विधिबोधितवर्त्मना ॥ ४७ ॥ स्नात्वा सम्यक्ततो देवानृषींश्चापि
पितॄन्स्वकान् ॥ संतर्पयेत्तथान्यांश्च नामगोत्रोक्तिपूर्वकम् ॥ ४८ ॥ उत्तीर्य वाससी धौते निर्मले परिधाय च ॥ उपस्पृश्य विधानेन तथोप
स्थाय भास्करम् ॥ ४९॥ वेदमातरमावर्त्य पुण्यामष्टोत्तरं शतम्॥सौरमन्त्रांस्तथा चान्यांस्त्रिः परीत्य नमेद्रविम् ॥ ५० ॥ वेदोक्तं त्रिषु वर्णेषु स्नानं
जप्यमुदाहृतम् ॥ ५१ ॥ स्त्रीशूद्रयोर्वरारोहे वेदोक्तविधिवर्जितम् ॥ ततो व्रजेन्मंदिरस्थं भक्त्या श्रीपुरुषोत्तमम् ॥ ५२ ॥ प्रक्षाल्य हस्तौ पादौ च
उपस्पृश्य यथाविधि ॥घृतेन स्नापयेद्देवं क्षीरेण तदनंतरम् ॥ ५३॥ मधुगंधोदकेनापि तीर्थचंदनवारिणा ॥ ततो वस्त्रयुगं श्रेष्ठं भक्त्या तं
परिधापयेत् ॥ ५४ ॥ चंदनागुरुकर्पूरैः कुंकुमेन विलेपयेत् ॥ पूजयेत्परया भक्त्या पद्मैश्च पुरुषोत्तमम् ॥ ५५ ॥ संपूज्यैवं जगन्नाथं
भुक्तिमुक्तिप्रदं हरिम् ॥ धूपं चागुरुसंयुक्तं देहे देवस्य चाग्रतः ॥ ५६ ॥ गुग्गुलं च सुनिष्पूतं दहेद्घृतसमन्वितम् ॥ दीपं प्रज्वालये
द्भक्त्या यथाशक्ति घृतेन वै ॥ ५७ ॥ अन्यांश्च दीपकान्दद्याद्द्वादशैव समाहितः ॥ गोघृतेन तु देवेशि तिलतैलेन वा पुनः ॥ ५८ ॥ नैवेद्यं पायसा
पूपशष्कुलीवेष्टकानि च ॥ मोदकं फाणिकं चान्यत्फलानि च निवेदयेत् ॥ ५९ ॥ एवं पंचोपचारेण संपूज्य पुरुषोत्तमम् ॥ ॐ नमः

पुरुषोत्तमायेति जपेदष्टोत्तरं शतम् ॥ ६० ॥ ततः प्रसादयेद्देवं दंडवत्प्रणिपत्य च ॥ ततोऽर्चयेद्गुरुं भक्त्या पुष्पवस्त्रानुलेपनैः ॥ ६१ ॥ नानयोरंतरं
यस्माद्विद्यते विधिनंदिनि ॥ देवस्योपरि कुर्वीत मंडपं सुसमाहितः ॥ ६२ ॥ नानापुष्पैः सुविशदं विचित्रं मंडलं पुरः ॥ कृत्वावधारणं पश्चाज्जागरं
कारयेन्निशि ॥ ६३ ॥ कथां च वासुदेवस्य गीतिकां चापि कारयेत्॥ ध्यायन्पठन्स्तुवन्देवं प्रणयेद्रजनीं बुधः॥६४॥ ततः प्रभाते विमले द्वादश्यां
द्वादशैव तु ॥ निमंत्रयेद्व्रतस्नातान्ब्राह्मणान्वेदपारगान् ॥ ६५ ॥ इतिहासपुराणज्ञाञ्छ्रोत्रियान्संयतेंद्रियान् ॥ स्नात्वा सम्यग्विधानेन धौतवासा
जितेंद्रियः ॥ ६६ ॥ स्नापयेत्पूर्ववद्भक्त्या तत्रस्थं पुरुषोत्तमम्॥गंधैः पुष्पैः स्तूपहारैर्नैवेद्यैर्दीपकैस्तथा॥६७॥ उपचारैर्बहुविधैः प्रणिपातैः प्रदक्षिणैः॥
जाप्यस्तुतिनमस्कारैर्गीतवाद्यैर्मनोहरैः ॥ ६८ ॥ संपूज्यैवं जगन्नाथं ब्राह्मणान्पूजयेत्ततः ॥ द्वादशैव तु गास्तेभ्यो दत्त्वा कनकमेव च ॥ ६९ ॥
छत्रोपानद्युगं चार्प्य कांस्यपात्रं च भक्तितः ॥ ततस्तान्भोजयेद्विप्रान्भोज्यं पायसपूर्वकम् ॥ ७० ॥ पक्वान्नं भक्ष्यभोज्यं च सगुडं शर्करान्वितम्॥
ततो भुक्त्वा सुसंतृप्तान्ब्राह्मणान्सुस्थमानसान् ॥ ७१ ॥ द्वादशैवोदकुंभांश्च ग्राहयेत्तान्समोदकान् ॥ दक्षिणां च यथाशक्ति विष्णुतुल्यं विरिंचिजे
॥ ७२ ॥ सुवर्णवस्त्रगोधान्यैर्द्रव्यैश्चान्यैर्वरैर्बुधः ॥ संपूज्य तान्नमस्कृत्य इमं मंत्रमुदीरयेत् ॥ ७३ ॥ सर्वव्यापी जगन्नाथः शंखचक्रगदाधरः ॥
अनादिनिधनो देवः प्रीयतां पुरुषोत्तमः ॥ ७४॥ इत्युच्चार्य ततो विप्रांस्त्रिः परिक्रम्य सादरम् ॥ प्रणम्य शिरसा भक्त्या साचार्यांस्तान्विसर्जयेत्
॥ ७५ ॥ ततस्तान्ब्राह्मणान्भक्त्या चासीमांतमनुव्रजेत् ॥ अनुव्रज्य तु तान्विप्रान्नमस्कृत्य निवर्त्य च ॥७६॥ बांधवैः स्वजनैर्युक्तस्ततो भुंजीत
वाग्यतः ॥ एवं कृत्वा नरः सम्यङ् नारी वा लभते फलम्॥७७॥अश्वमेधसहस्रस्य राजसूयशतस्य च ॥ अतीतं शतमुद्धृत्य पुरुषाणां नरोत्तमः
॥ ७८ ॥ भविष्यच्च शतं देवि दिव्यरूपधरोऽव्ययः ॥ सर्वलक्षणसंपन्नः सर्वालंकारभूषितः ॥ ७९ ॥ सर्वकामसमृद्धात्मा गुणरूपवयोऽन्वितः ॥
स्तूयमानोऽथ गंधर्वैरप्सरोभिः समंततः ॥ ८० ॥ विमानेनार्कवर्णेन कामगेन स्थिरेण च ॥ पताकाध्वजयुक्तेन शतसूर्यप्रभेण च
॥ ८१ ॥ उद्योतयन्दिशः सर्वा आकाशे विगतक्लमः ॥ युवा महाबलो धीमान्विष्णुलोकं स गच्छति ॥ ८२ ॥ तत्र कल्पशतं
यावद्भुङ्क्ते भोगान्यथेप्सितान्॥ स्तुतो मुनिवरैर्देवि तिष्ठेच्च विगतज्वरः ॥ ८३ ॥ यथा देवो जगन्नाथः शंखचक्रगदाधरः ॥ तथाऽसौ मुदितो
देवि धृत्वा रूपं चतुर्भुजम् ॥ ८४ ॥ भुक्त्वा तत्र वरान्भोगान्क्रीडित्वा सुचिरं सति ॥ तदंते ब्रह्मसदनमायात्यखिलकामदम् ॥ ८५ ॥ सिद्धविद्याधरैश्चापि
शोभितं सुरकिन्नरैः ॥ कालं नवतिकल्पं तु तत्र भुक्त्वा सुखं नरः ॥ ८६ ॥ रुद्रलोकं समायाति सुखदं सेवितं सुरैः ॥ सिद्धविद्याधरै

यक्षैर्भूषितं दैत्यदानवैः ॥ ८७ ॥ अशीतिकल्पकालं तु तत्र भुक्त्वा सुखं नरः ॥ तदंते याति गोलोकं सर्वभोगसमन्वितम् ॥ ८८ ॥ सुरसि
द्धाप्सरोभिश्च शोभितं सुमनोहरम् ॥ तत्र सप्ततिकल्पं तु भुक्त्वा भोगानभीप्सितान् ॥ ८९ ॥ पश्चादायाति वै लोकं प्राजापत्यमनुत्तमम् ॥
षष्टिकल्पं सुखं तत्र भुक्त्वा नानाविधं मुदा ॥ ९० ॥ तदंते शक्रभवनं नानाश्चर्यं समाव्रजेत् ॥ आगत्य तत्र पंचाशत्कल्पं भुक्त्वा सुखं
नरः ॥ ९१॥ प्रपद्यतेऽमरगृहान्विमानैः समलङ्कृतान् ॥ चत्वारिंशत्कतल्पकालं भोगान्भुक्त्वा सुदुर्लभान्॥९२॥नाक्षत्रं लोकमायाति नानासौख्य
समन्वितम् ॥ तत्र भुक्त्वा वरान्भोगांस्त्रिंशत्कल्पं यथेप्सितान् ॥ ९३ ॥ तस्माद्गच्छति तं लोकं शशांकस्य विरिंचिजे ॥ यत्र तिष्ठति सोमोऽसौ सर्व
देवैरलंकृतः ॥९४॥ तत्र विंशतिकल्पं तु भुक्त्वा [illegible]ोगं सुदुर्लभम् ॥आदित्यस्य ततो लोकमायाति सुरपूजितम् ॥ ९५ ॥ तत्र भुक्त्वा शुभान्भोगन्दश
कल्पं सुनिर्वृतः ॥ तस्मादायाति भवनं गंधर्वाणां सुदुर्लभम् ॥ ९६ ॥ तत्र भोगान्समस्तांश्च कल्पमेकं यथासुखम् ॥ भुक्त्वा चायाति मेदिन्यां राजा
भवति धार्मिकः ॥ ९७ ॥ चक्रवर्ती महावीर्यो गुणैः सर्वैरलंकृतः ॥ कृत्वा राज्यं तु धर्मेण यज्ञैरिष्ट्वा सदक्षिणैः ॥९८॥तदंते योगिनां लोकं गत्वा
मोक्षप्रदं शिवम् ॥ तत्र भुक्त्वा वरान्भोगान्यावदाभूतसंप्लवम् ॥ ९९ ॥ तस्मात्पुनरिहायातो जायते योगिनां कुले ॥१०० ॥ प्रवरे वैष्णवे भद्रे दुर्लभे
साधुसंमते॥चतुर्वेदी विप्रवरो ब्रह्मयज्ञपरः सति॥१०१॥वैष्णवं योगमासाद्य कैवल्यं मोक्षमाप्नुयात्॥एवं यात्राफलं तुभ्यं प्रोक्तं श्रीपुरुषोत्तमे॥१०२॥
भुक्तिमुक्तिप्रदं नृणां किमन्यच्छ्रोतुमिच्छसि॥१०३॥इति श्रीबृहन्नारदीयपुराणोत्तरभागे मोहिनीवसुसंवादे पुरुषोत्तमक्षेत्रमाहात्म्ये पुरुषोत्तमक्षेत्रयात्रा
फलवर्णनं नामैकषष्टितमोऽध्यायः ॥ ६१ ॥ वसिष्ठ उवाच ॥ एतच्छ्रुत्वा तु भूपाल मोहिनी विधिनंदिनी ॥ पुरुषोत्तममाहात्म्यं भुक्तिमुक्तिप्रदाय
कम् ॥१॥ पुनः पप्रच्छ तं विप्रं वसुं स्वस्य पुरोहितम् ॥ मोहिन्युवाच ॥ श्रुतमत्यद्भुतं विप्र पुरुषोत्तमसंभवम् ॥२॥ माहात्म्यं चाधुना ब्रूहि प्रयाग
स्यापि सुव्रत॥तीर्थराजः प्रयागाख्यः श्रुतः पूर्वं मया गुरो॥३॥तन्माहात्म्यं समाख्याहि तीर्थयात्राविधानयुक्॥स मान्यानां विशेषाणां तीर्थानां गमने
द्विज॥४॥यत्कर्त्तव्यं च विधिना नृभिर्द्धर्मपरायणैः॥तच्छ्रुत्वा स द्विजो राजन्मोहिन्या भाषितं वचः ॥५॥ सामान्यविधिपूर्वं तत्प्रयागाख्यानमब्रवीत्॥
वसुरुवाच॥शृणु भद्रे प्रवक्ष्यामि तीर्थाभिगमने विधिम्॥६॥यं समाश्रित्य मनुजो यथोक्तं फलमाप्नुयात् ॥ तीर्थाभिगमनं पुण्यं यज्ञैरपि विशिष्यते
॥७॥अनुपोष्य त्रिरात्राणि तीर्थान्यप्यभिगम्य च॥ अदत्त्वा कांचनं गाश्च दारिद्रो जायते नरः ॥ ८ ॥ अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः॥न
तत्फलमवाप्नोति तीर्थाभिगमनेन यत् ॥ ९ ॥ अज्ञानेनापि यस्येह तीर्थाभिगमनं भवेत् ॥ सर्वकामसमृद्धः स स्वर्गलोके महीयते ॥ १० ॥

स्थानं च लभते नित्यं धनधान्यसमाकुलम् ॥ ऐश्वर्यज्ञानसंपूर्णः सदा भवति भोगवान् ॥ ११ ॥ तारिताः पितरस्तेन नरकात्प्रपितामहाः ॥
यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ॥ १२ ॥ विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥ प्रतिग्रहादपावृत्तः संतुष्टो येन केनचित् ॥ १३ ॥
अहंकारविमुक्तश्च स तीर्थफलमाप्नुयात् ॥ अकल्पको निरारम्भो लघ्वाहारो जितेंद्रियः ॥ १४ ॥ विमुक्तः सर्वसंगैस्तु स तीर्थफलभाग्भवेत् ॥
तीर्थान्यनुसरन्धीरः श्रद्दधानः समाहितः ॥ १५ ॥ कृतपापो विशुध्येत्तु किं पुनः शुद्धकर्मकृत् ॥ अश्रद्दधानः पापार्तो नास्तिकोऽच्छिन्नसंशयः
॥ १६ ॥ हेतुनिष्ठश्च पंचैते न तीर्थफलभागिनः ॥ नृणां पापकृतां तीर्थे पापस्य शमनं भवेत् ॥ १७ ॥ यथोक्तफलदं तीर्थं भवेच्छुद्धात्मनां
नृणाम् ॥ कामं क्रोधं च लोभं च यो जित्वा तीर्थमाविशेत् ॥ न तेन किञ्चिदप्राप्तं तीर्थाभिगमनाद्भवेत् ॥ तीर्थानि च यथोक्तेन विधिना
संचरंति ये ॥ सर्वद्वंद्वसहा धीरास्ते नराः स्वर्गगामिनः ॥ १८ ॥ गंगादितीर्थेषु वसंति मत्स्या देवालये पक्षिगणाश्च संति ॥ भावो
ज्झितास्ते न फलं लभंते तीर्थाच्च देवायतनाच्च मुख्यात् ॥ १९ ॥ भावं ततो हृत्कमले निधाय तीर्थानि सेवेत समाहितात्मा ॥
या तीर्थयात्रा कथिता मुनींद्रैः कृता प्रयुक्ता ह्यनुमोदिता च ॥ २० ॥ तां ब्रह्मचारी विधिवत्करोति सुसंयतो गुरुणा संनियुक्तः ॥
सर्वस्वनाशेऽप्यथ वालपक्षे स ब्राह्मणानग्रत एव कृत्वा ॥ २१ ॥ यज्ञाधिकारेऽप्यथवा निवृत्ते विप्रस्तु तीर्थानि परिभ्रमेच्च ॥ तीर्थे
ष्वलं यज्ञफलं हि यस्मात्प्रोक्तं मुनींद्रैरमलस्वभावैः ॥ २२ ॥ यस्येष्टियज्ञेष्वधिकारितास्ति वरं गृहं गृहधर्माश्च सर्वे ॥ एवं गृहस्थाश्रमसं
स्थितस्य तीर्थे गतिः पूर्वतरैर्निषिद्धा ॥ सर्वाणि तीर्थान्यपि चाग्निहोत्रतुल्यानि नैवेति वदंति केचित् ॥२३॥ यो यः कश्चित्तीर्थयात्रां तु गच्छे
त्सुसंयतः स च पूर्वं गृहेषु ॥ कृतावासः शुचिरप्रमत्तः संपूजयेद्भक्तिनम्रो गणेशम् ॥ २४ ॥ देवान्पितॄन्ब्राह्मणांश्चैव साधून्धीमान्विप्रो वित्तशक्त्या
प्रयत्नात् ॥ प्रत्यागतश्चापि पुनस्तथैव देवान्पितॄन्ब्राह्मणान्पूजयेच्च ॥ २५ ॥ एवं कुर्वतस्तस्य तीर्थाद्यदुक्तं फलं तत्स्यान्नात्र संदेहलेशः ॥ २६ ॥
गच्छन्देशान्तरं यस्तु श्राद्धं कुर्यात्स सर्पिषा ॥ यात्रार्थमिति तत्प्रोक्तं प्रवेशे च न संशयः ॥ २७ ॥ प्रयागे तीर्थयात्रायां पितृमातृवियोगतः ॥
कचानां वपनं कुर्याद् वृथा न विकचो भवेत् ॥ २८ ॥ उद्यतश्चेद्गयां गंतुं श्राद्धं कृत्वा विधानतः ॥ विधाय कार्पटीवेषं कृत्वा ग्रामप्रदक्षिणाम्॥२९॥
ततो ग्रामांतरं गत्वा श्राद्धशेषस्य भोजनम् ॥ ततः प्रतिदिनं गच्छेत्प्रतिग्रहविवर्जितः ॥ ३० ॥ पदेपदेऽश्वमेधस्य स्यात्फलं गच्छतो गयाम् ॥
वलीवर्दसमारूढस्तीर्थं यो याति सुव्रते ॥ ३१ ॥ नरके वसते घोरे गवां क्रोधो हि दारुणः ॥ सलिलं च न गृह्णंति पितरस्तस्य देहिनः ॥ ३२ ॥

ऐश्वर्याल्लोभमोहाद्वा गच्छेद्यानेन यो नरः ॥ निष्फलं तस्य तत्तीर्थं तस्माद्यानं विवर्जयेत्॥३३ ॥ गोयाने गोवधः प्रोक्तो हययाने तु निष्फलम्॥
नरयाने तदर्द्धं स्यात्पद्भ्यां तच्च चतुर्गुणम् ॥ ३४ ॥ वर्षातपादिके छत्री दंडी शर्करकंटके ॥ शरीरत्राणकामोऽसौ सोपानत्कः सदा व्रजेत् ॥३५ ॥
तीर्थं प्राप्यानुषंगेण स्नानं तीर्थे समाचरन् ॥ स्नानजं फलमाप्नोति तीर्थयात्राफलं न तु ॥ ३६ ॥ षोडशांशं स लभते यः परार्थेन गच्छति ॥
अर्द्धं तीर्थफलं तस्य यः प्रसंगेन गच्छति ॥ ३७ ॥ तीर्थेषु ब्राह्मणं नैव परीक्षेत कदाचन ॥ अन्नार्थिनमनुप्राप्तं भोज्यं तं मनुरब्रवीत् ॥ ३८ ॥
सक्तुभिः पिंडदानं च संयावैः पायसेन वा ॥ बदरामलकैर्वापि पिण्याकैर्वा सुलोचने ॥ ३९ ॥ श्राद्धं तु तत्र कर्तव्यमर्घ्यावाहनवर्जितम् ॥
श्वध्वांक्षगृध्रपापानां नैव दृष्टिहतं च यत् ॥ ४०॥ श्राद्धं तु तैर्थिकं प्रोक्तं पितॄणां तृप्तिकारकम् ॥ अकालेऽप्यथवा काले तीर्थश्राद्धं तथा नरैः ॥४१॥
प्राप्तैरेव सदा तत्र कर्तव्यं पितृतर्पणम्॥विलंबो नैव कर्तव्यो नैव विघ्नं समाचरेत् ॥ ४२ ॥ प्रतिकृतिं कुशमयीं तीर्थवारिणि मज्जयेत् ॥ यमुद्दिश्य
विशालाक्षि सोऽष्टमांशं फलं लभेत् ॥४३ ॥कुशोऽसि कुशपुत्रोऽसि ब्रह्मणा निर्मितः पुरा ॥ त्वयि स्नाते तु स स्नातो यस्येदं ग्रंथिबन्धनम् ॥ ४४॥
मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः ॥ वर्जयित्वा कुरुक्षेत्रं विशालां विरजां गयाम् ॥ ४५ ॥ भौमानामथ तीर्थानां पुण्यत्वे कारणं शृणु ॥
यथा शरीरस्योद्देशाः केचिन्मुख्यतमाः स्मृताः ॥ ४६ ॥ प्रभावादद्भुताद्भूमेः सलिलस्य च तेजसः ॥ परिग्रहान्मुनीनां च तीर्थानां पुण्यता
स्मृता ॥४७॥ गंगां संप्राप्य यो देवि मुंडनं नैव कारयेत् ॥ क्रिया तस्याक्रिया सर्वा तीर्थद्रोही भवेत्तथा ॥४८॥ गंगायां भास्करक्षेत्रे मुंडनं यो न कार
येत् ॥ स कोटिकुलसंयुक्त आकल्पं रौरवं व्रजेत् ॥ ४९ ॥ गंगां प्राप्य सरिच्छ्रेष्ठां कल्पांतपापसंचयाः ॥ केशानाश्रित्य तिष्ठंति तस्मात्तान्परिवर्ज
येत् ॥ ५० ॥ यावंति नखलोमानि गंगातोये पतंति वै ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ५१ ॥ प्रयागव्यतिरेके तु गंगायां मुंडनं न
हि ॥ योऽन्यथा कुरुते मोहात्स महारौरवं विशेत् ॥ ५२ ॥ स जीवत्पितृको यस्तु तीर्थं प्राप्य विधानवित् ॥ क्षौरं समाचरेन्नैव श्मश्रूणां वपनं
सति ॥ ५३ ॥ गयादावपि देवेशि श्मश्रूणां वपनं विना ॥ न क्षौरं मुनिभिः सर्वैर्निषिद्धं चेति कीर्तितम् ॥ ५४ ॥ सश्मश्रुकेशवपनं मुंडनं तद्विदु
र्बुधाः ॥ न क्षौरं मुंडनं सुभ्रु कीर्तितं वेदवेदिभिः॥ ५५॥ इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे वसुमोहिनीसंवादे प्रयागराजमाहात्म्ये
तीर्थविधिर्नाम द्विषष्टितमोऽध्यायः ॥६२॥ वसुरुवाच ॥ शृणु मोहिनि वक्ष्यामि माहात्म्यं वेदसंमतम् ॥ प्रयागस्य विधानेन स्नात्वा यत्र विशु
ध्यति ॥ १ ॥ कुरुक्षेत्रसमा गंगा यत्र तत्रावगाहिता ॥ तस्माद्दशगुणा प्रोक्ता यत्र विंध्येन संगता॥२॥तस्माच्छतगुणा प्रोक्ता काश्यामुत्तरवाहिनी ॥

काश्याः शतगुणा प्रोक्ता गंगा यत्रार्कजान्विता ॥ ३ ॥ सहस्रगुणिता सापि भवेत्पश्चिमवाहिनी ॥ सा देवि दर्शनादेव ब्रह्महत्यादिहारिणी ॥ ४ ॥
पश्चिमाभिमुखी गंगा कालिंद्या सह संगता ॥ हंति कल्पशतं पापं सा माघे देवि दुर्लभा ॥ ५ ॥ अमृतं कथ्यते भद्रे सा वेणी भुवि संगता ॥
यस्यां माघे मुहूर्तं तु देवानामपि दुर्लभम् ॥ ६ ॥ पृथिव्यां यानि तीर्थानि पुर्यः पुण्यास्तथा सति ॥ स्नातुमायांति ता वेण्यां माघे मकरभा
स्करे ॥ ७ ॥ ब्रह्मविष्णुमहादेवा रुद्रादित्यमरुद्गणाः ॥ गंधर्वा लोकपालाश्च यक्षकिन्नरगुह्यकाः ॥ ८ ॥ अणिमादिगुणोपेता ये चान्ये
तत्त्वदर्शिनः ॥ ब्रह्माणी पार्वती लक्ष्मीः शची मेधाऽदिती रतिः ॥ ९ ॥ सर्वास्ता देवपत्न्यश्च तथानागांगनाः शुभे ॥ घृताची मेनका
रंभाप्युर्वशी च तिलोत्तमा ॥ १० ॥ गणाश्चाप्सरसां सर्वे पितॄणां च गणास्तथा ॥ स्नातुमायांति ते सर्वे माघे वेण्यां विरंचिजे ॥ ११ ॥ कृते
युगे स्वरूपेण कलौ प्रच्छन्नरूपिणः ॥ सर्वतीर्थानि कृष्णानि पापिनां संगदोषतः ॥ १२ ॥ भवंति शुक्लवर्णानि प्रयागे माघमज्जनात् ॥ मकरस्थे
रवौ माघे गोविंदाच्युत माधव ॥ १३ ॥ स्नानेनानेन मे देव यथोक्तफलदो भव ॥ इमं मंत्रं समुच्चार्य स्नायान्मौनं समाश्रितः ॥ १४ ॥वासुदेवं
हरिं कृष्णं माधवं च स्मरेत्पुनः ॥ तत्तेन वारिणा स्नानं यद्गृहे क्रियते नरैः ॥ १५ ॥ षष्ट्यब्देन फलं तद्धि मकरस्थे दिवाकरे ॥ बहिः स्नानं
तु वाप्यादौ द्वाशाब्दफलं स्मृतम् ॥ १६ ॥ तडागे द्विगुणं तद्धि नद्यादौ तच्चतुर्गुणम् ॥ दशधा देवखाते च महानद्यां च तच्छतम् ॥ १७ ॥ चतु
र्गुणशतं तच्च महानद्योस्तु संगमे ॥ सहस्रगुणितं सर्वं तत्फलं मकरे रवौ ॥ १८ ॥ गंगायां स्नानमात्रेण प्रयागे तत्प्रकीर्तितम् ॥ गंगां ये चा
वगाहंति माघे मासि सुलोचने ॥ १९ ॥ चतुर्युगसहस्रं ते न पतंति सुरालयात् ॥ शतेन गुणितं माघे सहस्रं विधिनंदिनि ॥ २० ॥
निर्दिष्टमृषिभिः स्नानं गंगायमुनसंगमे ॥ पापौघैर्भुवि भारस्य दाहायेमं प्रजापतिः ॥ २१ ॥ प्रयागं विदधे देवि प्रजानां हितकाम्यया ॥
स्नानस्थानमिदं सम्यक् सितासितजलं किल॥२२॥पापरूपपशूनां हि ब्रह्मणा निर्मितं पुरा ॥ सितासिता तु या धारा सरस्वत्या विदर्भिता ॥
॥ २३ ॥ तं मार्गं ब्रह्मलोकस्य सृष्टिकर्त्ता ससर्ज वै ॥ ज्ञानदो मानसे माघो न तु मोक्षफलप्रदः ॥ २४ ॥ हिमवत्पृष्ठतीर्थेषु सर्वपापप्रणाशनः ॥
वेदविद्भिर्विनिर्दिष्ट इंद्रलोकप्रदो हि सः ॥ सर्वमासोत्तमो माघो मोक्षदो बदरीवने ॥ २५ ॥ पापहा दुःखहारी च सर्वकामफलप्रदः ॥ रुद्रलोक
प्रदो माघो नार्मदे परिकीर्तितः ॥ २६ ॥ सारस्वतौघविध्वंसी सर्वलोकसुखप्रदः ॥ विशालफलदो माघो विशालायां प्रकीर्तितः ॥ २७ ॥
पापेंधनदवाग्निश्च गर्भवासविनाशनः ॥ विष्णुलोकाय मोक्षाय जाह्नवः परिकीर्तितः ॥ २८ ॥ सरयूर्गंडकी सिंधुश्चंद्रभागा च कौशिकी ॥ तापी

गोदावरी भीमा पयोष्णी कृष्णवेणिका ॥ २९ ॥ कावेरी तुंगभद्रा च यास्तथान्याः समुद्रगाः ॥ तासु स्नायी नरो याति स्वर्गलोकं विक
ल्मपः ॥ ३० ॥ नैमिषे विष्णुसारूप्यं पुष्करे ब्रह्मणेऽतिकम् ॥ आखंडलस्य लोको हि कुरुक्षेत्रे च माघतः ॥ ३१ ॥ माघो देवह्रदे देवि योग
सिद्धिफलप्रदः ॥ प्रभासे मकरादित्ये स्नात्वा रुद्रगणो भवेत् ॥ ३२ ॥ देविकायां देवदेहो नरो भवति माघतः ॥ माघस्नानेन विधिजे गोमत्यां
न पुनर्भवः ॥ ३३ ॥ हेमकूटे महाकाले ॐकारे ह्यपरे तथा ॥ नीलकंठार्बुदे माघो रुद्रलोकप्रदो मतः ॥ ३४ ॥ सर्वासां सरितां देवि संपूरो
माकरे रवौ ॥ स्नानेन सर्वकामानां प्राप्त्यै ज्ञेयो विचक्षणैः ॥ ३५ ॥ माघस्तु प्राप्यते धन्यैः प्रयागे विधिनंदिनि ॥ अपुनर्भवदं तत्र सितासित
जलं यतः ॥ ३६ ॥ गायंति देवाः सततं दिविष्ठा माघः प्रयागे किल नो भविष्यति ॥ स्नाता नरा यत्र न गर्भवेदनां पश्यंति तिष्ठन्ति च विष्णु
सन्निधौ ॥ ३७ ॥ तीर्थैर्व्रतैर्दानतपोभिरध्वरैः सार्द्धं विधात्रा तुलया धृतं पुरा ॥ माघः प्रयागश्च तयोर्द्वयोरभून्माघो गरीयांश्चतुराननात्मजे ॥ ३८ ॥
वातांबुपर्णाशनदेहशोषणैस्तपोभिरुग्रैश्चिरकालसंचितैः ॥ योगैश्च संयांति नरास्तु यां गतिं स्नानात्प्रयागस्य हि यांति तां गतिम् ॥ ३९ ॥ स्नाता
हि ये माकरभास्करोदये तीर्थे प्रयागे सुरसिंधुसंगमे ॥ तेषां गृहद्वारमलंकरोति भृंगावली कुंजरकर्णताडिता ॥ ४० ॥ यो राजसूयाख्यसमाध्वरस्य
स्नानात्फलं संप्रददाति चाखिलम् ॥ पापानि सर्वाणि निहत्य लीलया नूनं प्रयागः स कथं न वर्ण्यते ॥ ४१ ॥ चतुर्वेदिषु यत्पुण्यं सत्यवादिषु
चैव हि ॥ स्नात एव तदाप्नोति गंगाकालिंदिसंगमे ॥ ४२ ॥ तत्राभिषेकं कुर्वीत संगमे शंसितव्रतः ॥ तुल्यं फलमवाप्नोति राजसूयाश्वमेधयोः
॥ ४३ ॥ पंचयोजनविस्तीर्णं प्रयागस्य तु मंडलम् ॥ प्रवेशादस्य भूमौ तु अश्वमेधः पदे पदे ॥ ४४ ॥ त्रीणि कुंडानि सुभगे तेषां मध्ये
तु जाह्नवी ॥ प्रयागस्य प्रवेशेन पापं नश्यति तत्क्षणात् ॥ ४५ ॥ मासमेकं नरः स्नात्वा प्रयागे नियतेंद्रियः ॥ मुच्यते सर्वपापेभ्यो यथा दृष्टं
स्वयंभुवा ॥ ४६ ॥ शुचिस्तु प्रयतो भूत्वाऽहिंसकः श्रद्धयान्वितः ॥ स्नात्वा मुच्येत पापेभ्यो गच्छेच्च परमं पदम् ॥ ४७ ॥ नैमिषं पुष्करं चैव
गोतीर्थं सिंधुसागरम् ॥ गया च धेनुकं चैव गंगासागरसंगमः ॥ ४८ ॥ एते चान्ये च बहवो ये च पुण्याः शिलोच्चयाः ॥ दश तीर्थसहस्राणि त्रिंश
त्कोट्यस्तथा पराः ॥ ४९ ॥ प्रयागे संस्थिता नित्यमेधमाना मनीषिणः ॥ त्रीणि यान्यग्निकुंडानि तेषां मध्ये तु जाह्नवी ॥ ५० ॥ प्रयागाद्धि विनि
ष्क्रांता सर्वतीर्थपुरस्कृता ॥ तपनस्य सुता देवी त्रिषु लोकेषु विश्रुता ॥ ५१ ॥ यमुना गंगया सार्द्धं संगता लोकपावनी ॥ गंगायमुनयोर्मध्ये पृथिव्यां
यत्परं स्मृतम् ॥ ५२ ॥ प्रयागस्य तु तीर्थस्य कलां नार्हति षोडशीम् ॥ तिस्रः कोट्योऽर्द्धकोटी च तीर्थानां वायुरब्रवीत् ॥ ५३ ॥ दिवि

भुव्यंतरिक्षे च जाह्नव्यां तानि संति च ॥ प्रयागं समधिष्ठाय कंबलाश्वतरावुभौ ॥ ५४ ॥ भोगवत्यथवा चैषा वेदी वेद्या प्रजापतेः ॥ तत्र
वेदाश्च यज्ञाश्च मूर्तिमंतः समास्थिताः ॥ ५५ ॥ प्रजापतिमुपासंते ऋषयश्च तपोधनाः ॥ यजंति क्रतुभिर्देवास्तथा चक्रधराः सति ॥ ५६ ॥
ततः पुण्यतमो नास्ति त्रिषु लोकेषु सुंदरि ॥ प्रभावात्सर्वतीर्थेभ्यः प्रभवत्यधिकस्तथा ॥ ५७ ॥ तत्र दृष्ट्वा तु तत्तीर्थं प्रयागं परमं पदम् ॥
मुच्यन्ते सर्वपापेभ्यः शशांक इव राहुणा ॥ ५८॥ ततो गत्वा प्रयागं तु सर्वदेवाभिरक्षितम् ॥ ब्रह्मचारी वसन्मासं पितॄन्देवांश्च तर्पयन् ॥ ५९ ॥
ईप्सिताँल्लभते कामान्यत्र तत्राभिसंगतः ॥ सितासिते तु यो मज्जेदपि पापशतावृतः ॥ ६० ॥ मकरस्थे रवौ माघे न स भूयस्तु गर्भगः ॥ दुर्जया
वैष्णवी माया देवैरपि सुदुस्त्यजा ॥ ६१ ॥ प्रयागे दह्यते सा तु माघे मासि विरंचिज ॥ तेषु तेषु च लोकेषु भुक्त्वा भोगाननेकशः ॥६२॥पश्चाच्चक्रिणि
लीयंते प्रयागे माघमज्जिनः ॥ उपस्पृशति यो माघे मकरार्के सितासिते ॥ ६३ ॥ तस्य पुण्यस्य संख्यां नो चित्रगुप्तोऽपि वेत्त्यलम् ॥ राजसूयसहस्रस्य
वाजपेयशतस्य च ॥ फलं सितासिते माघे स्नातानां भवति ध्रुवम् ॥ ६४ ॥ आकल्पजन्मभिः पापं संचितं मनुजैस्तु यत् ॥
तद्भवेद्भस्मसान्माघे स्नातानां तु सितासिते॥ ६५ ॥गंगायमुनयोश्चैव संगमो लोकविश्रुतः ॥ स एव कामिकं तीर्थं तत्र स्नानेन भक्तितः ॥ ६६ ॥
यस्य यस्य च यः कामस्तस्य तस्य भवेद्धि सः ॥ भोगकामस्य भोगाः स्युः स्याद्राज्यं राज्यकामिनः ॥ ६७ ॥ स्वर्गः स्यात्स्वर्गकामस्य मोक्षः
स्यान्मोक्षकामिनः ॥ कामप्रदानि तीर्थानि त्रैलोक्ये यानि कानि च ॥ ६८ ॥ तानि सर्वाणि सेवन्ते प्रयागं मकरे रवौ ॥ हरिद्वारे प्रयागे
च गंगासागरसंगमे ॥ ६९ ॥ स्नात्वैव ब्रह्मणो विष्णोः शिवस्य च पुरं व्रजेत् ॥ सितासिते तु यत्स्नानं माघमासे सुलोचने ॥ ७० ॥ न दत्ते
पुनरावृत्तिं कल्पकोटिशतैरपि ॥ सत्यवादी जितक्रोधो ह्यहिंसां परमां श्रितः ॥ ७१ ॥ धर्मानुसारी तत्त्वज्ञो गोब्राह्मणहिते रतः ॥ गंगायमुनयोर्मध्ये
स्नातो मुच्येत किल्बिषात्॥ ७२ ॥मनसा चिंतितान्कामांस्तत्र प्राप्नोति पुष्कलान् ॥ स्वर्णभारसहस्रेण कुरुक्षेत्रे रविग्रहे॥ ७३ ॥यत्फलं लभते माघे
वेण्यां तत्तु दिने दिने ॥ गवां शतसहस्रस्य सम्यग्दत्तस्य यत्फलम् ॥ ७४ ॥ प्रयागे माघमासे तु त्र्यहं स्नातस्य तत्फलम्॥ योगाभ्यासेन यत्पुण्यं
संवत्सरशतत्रये ॥ ७५ ॥ प्रयागे माघमासे तु त्र्यहं स्नानेन यत्फलम् ॥ नाश्वमेधसहस्रेण तत्फलं लभते सति ॥ ७६ ॥ त्र्यहस्नानफलं माघे
पुरा कांचनमालिनी ॥ राक्षसाय ददौ प्रीत्या तेन मुक्तः स पापकृत् ॥ ७७ ॥ त्र्यहात्पापक्षयो जातः सप्तविंशतिभिर्दिनैः ॥ स्नानेन
यदभूत्पुण्यं तेन देवत्वमागता ॥ ७८ ॥ रममाणा तु कैलासे गिरिजायाः प्रिया सखी ॥ जातिस्मरा तथा जाता प्रयागस्य प्रसादतः ॥ ७९ ॥
अवंतीविषये राजा वासराजोऽभवत्पुरा ॥ नर्मदातीर्थमासाद्य राजसूयं चकार सः ॥ ८० ॥ अश्वैः षोडशभिस्तत्र स्वर्णयूप

विराजितैः ॥ स्वर्णभूषणभूषाढ्यै रेजे सोऽपि यथाविधि ॥ ८१ ॥ प्रददौ धान्यराशिं च द्विजेभ्यः पर्वतोपमम् ॥ श्रद्धावान्देवताभक्तो गोप्र
दश्च सुवर्णदः ॥ ८२ ॥ ब्राह्मणो भद्रको नाम मूर्खो हीनकुलस्तथा ॥ कृषीवलोऽधमाचारः सर्वधर्मबहिष्कृतः ॥ ८३ ॥ सीरकर्मसमुद्विग्नो बंधुभिश्च
स वंचितः ॥ इतस्ततः परिक्रम्य निर्गतोऽदृष्टपीडितः ॥ ८४ ॥ दैवतो ज्ञानमाश्रित्य प्रयागं समुपागतः ॥ महामाघीं पुरस्कृत्य सस्नौ तत्र दिन
त्रयम् ॥ ८५ ॥ अनघः स्नानमात्रेण समभूत्स द्विजोत्तमः ॥ प्रयागाच्चलितस्तस्माद्ययौ यस्मात्समागतः ॥ ८६ ॥ स राजा सोऽपि वै विप्रो विमाना
वेकदा तदा ॥ तयोर्गतिः समा दृष्टा देवराजस्य सन्निधौ ॥ ८७ ॥ तेजो रूपं बलं स्त्रैणं देवयानं विभूषणम् ॥ माला च पारिजातस्य नृत्यं गीतं
समं तयोः ॥ ८८ ॥ इति दृष्ट्वा हि माहात्म्य क्षेत्रस्य कथमुच्यते ॥ माघः सितासिते भद्रे राजसूयसमो न च ॥ ८९ ॥ धनुर्विंशतिविस्तीर्णे सित
नीलांबुसंगमे ॥ माघादपुनरावृत्ती राजसूयात्पुनर्भवेत् ॥ ९० ॥ कंबलाश्वतरौ नागौ विपुले यमुनातटे ॥ तत्र स्नात्वा च पीत्वा च सर्वपापैः
प्रमुच्यते ॥ ९१ ॥ तत्र गत्वा च संस्थाने महादेवस्य धीमतः ॥ नरस्तारयते पुंसो दश पूर्वान्दशावरान् ॥९२॥ कूपं चैव तु तत्रास्ति प्रतिष्ठानेऽति
विश्रुतम् ॥ तत्र स्नात्वा पितॄन्देवान्संतर्प्य यतमानसः ॥ ९३ ॥ ब्रह्मचारी जितक्रोधस्त्रिरात्रं योऽत्र तिष्ठति ॥ सर्वपापविशुद्धात्मा सोऽश्वमेधफलं
लभेत् ॥९४॥ उत्तरेण प्रतिष्ठानाद्भागीरथ्याश्च पूर्वतः ॥ हंसप्रतपनं नाम तीर्थं लोकेषुविश्रुतम् ॥९५॥ अश्वमेधफलं तत्र स्नानमात्रेण लभ्यते ॥
यावच्चंद्रश्च सूर्यश्च तावत्स्वर्गे महीयते ॥ ९६ ॥ ततो भोगवतीं गत्वा वासुकेरुत्तरेण च ॥ दशाश्वमेधिकं नाम तत्तीर्थं परमं स्मृतम् ॥९७॥ तत्र
कृत्वाभिषेकं तु वाजिमेधफलं लभेत् ॥ धनाढ्यो रूपवान्दक्षो दाता भवति धार्मिकः ॥ ९८ ॥ चतुर्वेदिषु यत्पुण्यं सत्यवादिषु यत्फलम् ॥ अहिं
सायां तु यो धर्मो गमनात्तस्य तत्फलम् ॥ ९९ ॥ पायतेश्चोत्तरे कूले प्रयागस्य तु दक्षिणे ॥ ऋणमोचनक नाम तीर्थं तु परमं स्मृतम् ॥ १००॥
एकरात्रोषितः स्नात्वा ऋणैः सर्वैः प्रमुच्यते ॥ स्वर्गलोकमवाप्नोति ह्यमरश्च तथा भवेत् ॥ १०१ ॥ त्रिकालमेकस्नायी चाहारमुक्तिं य आचरेत्॥
विश्वासघातपापात्तु त्रिभिर्मासैः स शुद्ध्यति ॥ १०२ ॥ कीर्तनाल्लभते पुण्यं दृष्ट्वा भद्राणि पश्यति ॥ अवगाह्य च पीत्वा च
पुनात्यासप्तमं कुलम् ॥ १०३ ॥ मकरस्थे रवौ माघे न स्नात्यनुदिते रवौ ॥ कथं पापैः प्रमुच्येत कथं वा त्रिदिवं व्रजेत् ॥ १०४ ॥
प्रयागे वपनं कुर्याद्गंगायां पिंडपातनम् ॥ दानं दद्यात्कुरुक्षेत्रे वाराणस्यां तनुं त्यजेत् ॥ १०५ ॥ किं गयापिंडदानेन काश्यां वा मरणेन किम् ॥
किं कुरुक्षेत्रदानेन प्रयागे मुंडनं यदि॥१०६॥संवत्सरं द्विमासोनं पुनस्तीर्थं व्रजेद्यदि॥मुंडनं चोपवासं च ततो यत्नेन कारयेत्॥१०७॥प्रयागप्राप्तना

रीणां मुंडनं त्वेवमीरयेत् ॥सर्वान्केशान्समुद्धृत्य छेदयेदंगुलद्वयम्॥ १०८॥केशमूलान्युपाश्रित्य सर्वपापानि देहिनाम् ॥ तिष्ठंति तीर्थस्नानेन तस्मात्तान्यत्र वापयेत् ॥१०९॥ अमार्कपातश्रवणैर्युक्ता चेत्पौषमाघयोः॥अर्द्धोदयः स विज्ञेयः सूर्यपर्वशताधिकः ॥११०॥किंचिन्न्यूने तु विधिजे महोदय इति स्मृतः ॥ अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ॥ १११ ॥ प्रयागे यदि लभ्येत सहस्रार्कग्रहैः समा ॥ अयने कोटिपुण्यं स्याल्लक्षं तु विषुवे फलम् ॥ ११२ ॥षडशीत्यां सहस्रं तु तथा विष्णुपदीषु च ॥दानं प्रयागे कर्तव्यं यथाविभवविस्तरम् ॥ ११३ ॥ तेन तीर्थफलं चैव वर्धते विधिनंदिनि ॥ गंगायमुनयोर्मध्ये यस्तु गां वै प्रयच्छति ॥ ११४ ॥ सुवर्णं मणिमुक्तां वा यदि वान्यं प्रतिग्रहम् ॥ पाटलां कपिलां भद्रे यस्तु तत्र प्रयच्छति ॥११५ ॥ स्वर्णशृंगीं रौप्यखुरां चैलकंठीं पयस्विनीम् ॥ सवत्सां श्रोत्रियं साधुं ग्राहयित्वा यथाविधि ॥ ११६ ॥ शुक्लांबरधरं शांतं धर्मज्ञं वेदपारगम् ॥ सा च गौस्तस्य दातव्या गंगायमुनसंगमे ॥ ११७ ॥ वासांसि च महार्हाणि रत्नानि विविधानि च ॥ यावंतो रोमकूपाः स्युस्तस्या गोर्वत्सकस्य च ॥ ११८ ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ यत्रासौ लभते जन्म सा गौस्तत्राभिजायते ॥ ११९ ॥ न च पश्यंति नरकं दातारस्तेन कर्मणा ॥ उत्तरांश्च कुरून्प्राप्य मोदंते कालमक्षयम् ॥ १२० ॥ गवां शतसहस्रेभ्यो दद्यादेकां पयस्विनीम् ॥ पुत्रान्दारांस्तथा भृत्यान् गौरेका प्रतितारयेत् ॥ १२१ ॥ तस्मात्सर्वेषु दानेषु गोदानं तु विशिष्यते॥दुर्गमे विषमे घोरे महापातकसंक्रमे ॥ १२२ ॥ गौरेव रक्षां कुरुते तस्माद्देया द्विजोत्तमे ॥ तीर्थे न प्रतिगृह्णीयात्पुण्येष्वायतनेषु च ॥ १२३ ॥ निमित्तेषु च सर्वेषु ह्यप्रमत्तो भवेद्द्विजः ॥ स्वकार्ये पितृकार्ये वा देवताभ्यर्चनेऽपि वा ॥ १२४ ॥ विफलं तस्य तत्तीर्थं यावत्तद्धनमश्नुते ॥ गंगायमुनयोर्मध्ये यस्तु कन्यां प्रयच्छति ॥ १२५ ॥ न स पश्यति घोरं तु नरकं तेन कर्मणा ॥ उत्तरांस्तु कुरून् गत्वा मोदते कालमक्षयम् ॥ १२६ ॥ पुत्रान्दारांश्च लभते धार्मिकान्रूपसंयुतान् ॥ अधःशिरास्ततो धूममूर्द्ध्वबाहुः पिबेन्नरः ॥ १२७ ॥ शतं वर्षसहस्राणां स्वर्गलोके महीयते ॥ परिभ्रष्टस्ततः स्वर्गादग्निहोत्री भवेन्नरः ॥ १२८ ॥ भुक्त्वा तु विपुलान्भोगांस्तत्तीर्थं लभते पुनः ॥ आ प्रयागात्प्रतिष्ठानान्मत्पुरोवासुकेर्ह्रदात् ॥ १२९ ॥ कंबलाश्वतरौ नागौ नागाद्बहुमूलकात् ॥ एतत्प्रजापतेः क्षेत्रं त्रिषु लोकेषु विश्रुतम् ॥ १३० ॥ तत्र स्नात्वा दिवं यांति ये मृतास्तेऽपुनर्भवाः ॥ न वेदवचनाच्चैव न लोकवचनादपि॥ १३१॥मतिरुत्क्रमणीया हि प्रयागमरणं प्रति ॥ दशतीर्थसहस्राणि षष्टिकोट्यः

---

१ निग्रहजनकं दानमित्यर्थः ।

स्तथा पराः ॥ १३२ ॥ तत्रैव तेषां सान्निध्यं कीर्तितं विधिनंदिनि॥ या गतिर्योगयुक्तस्य सत्पथस्थस्य धीमतः ॥ १३३ ॥ सा गतिस्त्यजतः
प्राणान् गंगायमुनसंगमे ॥ बाधितो यदि वा दीनः क्रुद्धो वापि भवेन्नरः ॥ १३४॥ गंगायमुनमासाद्य यस्तु प्राणान्परित्यजेत् ॥ दीप्तकांचनव
र्णाभैर्विमानैः सूर्यकांतिभिः ॥ १३५ ॥ गंधर्वाप्सरसां मध्ये स्वर्गे मोदति मानवः ॥ ईप्सितॉंल्लभते कामान्वदंतीति मुनीश्वराः ॥ १३६ ॥ गीतवा
दित्रनिर्घोषैः प्रसुप्तः प्रतिबुध्यते ॥ यावन्न स्मरते जन्म तावत्स्वर्गे महीयते ॥ १३७ ॥ततः स्वर्गात्परिभ्रष्टः क्षीणकर्मात्र चागतः ॥ हिरण्यरत्नसं
पूर्णे समृद्धे जायते कुले ॥ १३८ ॥ तदेवसंस्मरंस्तत्र विष्णुलोकं स गच्छति ॥ वटमूलं समासाद्य यस्तु प्राणान्परित्यजेत् ॥
॥ १३९ ॥ सर्वलोकानतिक्रम्य रुद्रलोकं स गच्छति ॥ तत्र ते द्वादशादित्यास्तपंते रुद्रमाश्रिताः ॥ १४० ॥ निर्गच्छंति जगत्सर्वं वटमूले स
दह्यते ॥ हरिश्च भगवांस्तत्र प्रजापतिपुरस्कृतः ॥ १४१ ॥ आस्ते तत्र पुटे देवि पादांगुष्ठं धयञ्छिशुः ॥ उर्वशीपुलिने रम्ये विपुले हंसपां
डुरे ॥ १४२ ॥ परित्यजति यः प्राणाञ्छृणु तस्यापि यत्फलम् ॥ षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ॥१४३॥वसेत्स पितृभिः सार्द्धं स्वर्गलोके
विरिंचिजे ॥ उवशीं च यदा पश्येद्देवलोके सुलोचने ॥ १४४ ॥ पूज्यते सततं देवर्षिगंधर्वकिन्नरैः ॥ ततः स्वर्गात्परिभ्रष्टः क्षीणकर्मा त्विहा
गतः ॥ १४५ ॥ उर्वशीसदृशीनां तु कांतानां लभते शतम् ॥ मध्ये नारीसहस्राणां बहूनां च पतिर्भवेत् ॥ १४६ ॥ दशग्रामसहस्राणां भोक्ता
शास्ता च मोहिनि ॥ कांचीनूपुरशब्देन सुप्तोऽसौ प्रतिबुध्यते ॥ १४७ ॥भुक्त्वा तु विपुलान्भोगांस्तत्तीर्थं लभते पुनः ॥ शुक्लांबरधरो नित्यं नियतः
स जितेंद्रियः ॥ १४८ ॥ एककालं तु भुञ्जानो मासं योगपतिर्भवेत् ॥ सुवर्णालंकृतानां तु नारीणां लभते शतम् ॥ १४९ ॥ पृथिव्यामासमुद्रायां
महाभोगपतिर्भवेत् ॥ धनधान्यसमायुक्तो दाता भवति नित्यशः ॥ १५० ॥ स भुक्त्वा विपुलान्भोगांस्तत्तीर्थं स्मरते पुनः ॥ कोटितीर्थं समासाद्य
यस्तु प्राणान्परित्यजेत् ॥ १५१ ॥ कोटिवर्षसहस्रान्तं स्वर्गलोके महीयते ॥ ततः स्वर्गादिहागत्य क्षीणकर्मा नरोत्तमः ॥ १५२ ॥ सुवर्णमणिमु
क्ताढ्ये कुले जायेत रूपवान् ॥ अकामो वा सकामो वा गंगायां यो विपद्यते ॥ १५३॥ शक्रस्य लभते स्वर्गं नरकं तु न पश्यति ॥ हंससारसयुक्तेन
विमानेन स गच्छति ॥ १५४ ॥ अप्सरोगणसंकीर्णे सुप्तोऽसौ प्रतिबुध्यते ॥ ततः स्वर्गादिहायातः क्षीणकर्मा विरिंचिजे ॥ १५५ ॥ योगिनां
श्रीमतां चापि स्वेच्छया लभते जनिम् ॥ गङ्गायमुनयोर्मध्ये करीषाग्निं तु धारयेत् ॥ १५६ ॥ अहीनांगो ह्यरोगश्च पंचेंद्रियसमन्वितः ॥
यावंति लोमकूपानि तस्य गात्रे तु धीमतः ॥ १५७ ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ततः स्वर्गात्परिभ्रष्टो जंबूद्वीपपति

र्भवेत् ॥ १५८ ॥ भुक्त्वा तु विपुलान्भोगांस्तत्तीर्थं लभते पुनः ॥ यस्तु देहं निकृत्त्य स्वं शकुनिभ्यः प्रयच्छति ॥ १५९ ॥ स वर्षशतसाहस्रं सोमलोके महीयते ॥ ततस्तस्मादिहागत्य राजा भवति धार्मिकः ॥ १६० ॥ गुणवान्रूपसंपन्नो विद्यावान्प्रियवाक्छुचिः ॥ भुक्त्वा तु विपुलान्भोगांस्तत्तीर्थं पुनराव्रजेत् ॥ १६१ ॥ पंचयोजनविस्तीर्णे प्रयागस्य तु मंडले ॥ विपन्नो यत्र कुत्राप्यनाशकं व्रतमास्थितः ॥ १६२ ॥ व्यतीतान्पुरुषान्सप्त भाविनस्तु चतुर्दश ॥ नरस्तारयते सर्वानात्मानं च समुद्धरेत् ॥ १६३ ॥ अग्नितीर्थमिति ख्यातं दक्षिणे यमुनातटे ॥ पश्चिमे धर्मराजस्य तीर्थं तु नरकं स्मृतम् ॥ १६४ ॥ तत्र स्नात्वा दिवं यांति ये मृतास्तेऽपुनर्भवाः ॥ यमुनोत्तरकूले तु पापघ्नानि बहून्यपि ॥ १६५ ॥ तीर्थानि संति विधिजे सेवितानि मुनीश्वरैः ॥ तेषु स्नाता दिवं यांति ये मृतास्तेऽपुनर्भवाः ॥ १६६ ॥ गंगा च यमुना चैव उभे तुल्यफले स्मृते ॥ केवलं ज्येष्ठभावेन गंगा सर्वत्र पूज्यते ॥ १६७ ॥ यस्तु सर्वाणि रत्नानि ब्राह्मणेभ्यः प्रयच्छति ॥ तेन दत्तेन देवेशि योगो लभ्येत वा न वा ॥ १६८ ॥ प्रयागे तु मृतस्येदं सर्वं भवति नान्यथा ॥ देशस्थो यदि वारण्ये विदेशे यदि वा गृहे ॥ १६९ ॥ प्रयागं स्मरमाणोऽपि यस्तु प्राणान्परित्यजेत् ॥ ब्रह्मलोकमवाप्नोति मही यत्र हिरण्मयी ॥ १७० ॥ सर्वकामफला वृक्षास्तिष्ठंति ऋषयो गताः ॥ स्त्रीसहस्राकुले रम्ये मंदाकिन्यास्तटे शुभे ॥ १७१ ॥ क्रीड्यते सिद्धगंधर्वैः पूज्यते त्रिदशैस्तथा॥ततः पुनरिहायातो जंबूद्वीपपतिर्भवेत्॥ १७२ ॥ धर्मात्मा गुणसंपन्नस्तत्तीर्थं लभते पुनः ॥ एतत्ते सर्वमाख्यातं माहात्म्यं च प्रयागजम् ॥ १७३ ॥ सुखदं मोक्षदं सारं किमन्यच्छ्रोतुमिच्छसि ॥१७४॥इति श्रीबृहन्नारदीयपुराणोत्तरभागे बृहदुपाख्याने वसुमोहिनीसंवादे प्रयागमाहात्म्ये त्रिषष्टितमोऽध्यायः॥६३॥इति प्रयागमाहात्म्यं समाप्तम्॥अथ कुरुक्षेत्रमाहात्म्यंप्रारभ्यते॥ मोहिन्युवाच॥वसो कृपालो धर्मज्ञ त्वया बहुविदा मम॥तीर्थराजस्य माहात्म्यं प्रयागस्य निरूपितम्॥१॥यत्सर्वतीर्थमुख्येषु कुरुक्षेत्रं शुभावहम्॥ पावनं सर्वलोकानां तन्ममाचक्ष्व सांप्रतम् ॥२॥ वसुरुवाच॥ शृणु मोहिनि वक्ष्यामि कुरुक्षेत्रं सुपुण्यदम्॥ यत्र गत्वा नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ ३ ॥ तत्र तीर्थान्यनेकानि सेवितानि मुनीश्वरैः ॥ तान्यहं तेऽभिधास्यामि शृण्वतां मुक्तिदानि च ॥ ४ ॥ ब्रह्मज्ञानं गयाश्राद्धं गोग्रहे मरणं तथा ॥ वासः पुंसां कुरुक्षेत्रे मुक्तिरुक्ता चतुर्विधा ॥ ५॥ सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरम् ॥ तं देवसेवितं देशं ब्रह्मावर्तं प्रचक्षते ॥ ६ ॥ दूरस्थोऽपि कुरुक्षेत्रे गच्छामि च वसाम्यहम् ॥ एवं यः सतत ब्रूयात्सोऽपि पापैः प्रमुच्यते ॥७॥तत्र वै यो वसेद्धीरः सरस्वत्यास्तटे स्थितः॥ तस्य ज्ञानं ब्रह्ममयं भविष्यति न संशयः ॥ ८ ॥ देवता ऋषयः सिद्धाः सेवंते कुरुजांगलम् ॥ तस्य संसेवनाद्देवि ब्रह्म चात्मनि पश्यति ॥ ९ ॥

मोहिन्युवाच ॥ कुरुक्षेत्रं द्विजश्रेष्ठ सर्वतीर्थाधिकं कथम् ॥ तन्मे विस्तरतो ब्रूहि त्वामहं शरणं गता ॥ १० ॥ वसुरुवाच ॥ शृणु भद्रे प्रवक्ष्यामि
कुरुक्षेत्रं महाफलम् ॥ यथा जातं नृणां पापदहनं ब्रह्मणः प्रियम् ॥ ११ ॥ आद्यं ब्रह्मसरः पुण्यं तत्र स्थाने समुद्गतम् ॥ ततो रामह्रदो जातः कुरुक्षेत्रं
ततः परम् ॥ १२ ॥ सरः संनिहितं तच्च ब्रह्मणा निर्मितं पुरा ॥ अथैषा ब्रह्मणो वेदी दिशमंतरतः स्थिता ॥ १३ ॥ ब्रह्मणात्र तपस्तप्तं सृष्टिका
मेन मोहिनि ॥ स्थितिकामेन हरिणा तपस्तप्तं च चक्रिणा ॥ १४ ॥ सरःप्रवेशात्संप्राप्तं स्थाणुत्वं शंभुनापि च ॥ पितुर्वधाच्च तप्तेन पर्शुरामेण
भामिनि ॥ १५ ॥ अब्रह्मण्यक्षत्रवधाद्ये च रक्तह्रदाः कृताः ॥ तद्रक्तेन तु संतर्प्य कृतवांस्तत्र वै तपः ॥ १६ ॥ रामतीर्थं ततः ख्यातं संजातं
पापनाशनम् ॥ मार्कंडेयेन मुनिना संतप्तं परमं तपः ॥ १७ ॥ यत्र तत्र समायाता प्लक्षजाता सरस्वती॥ सा सभाज्य स्तुता तेन मुनिना
धार्मिकेण ह ॥ १८ ॥ सरः संनिहितं प्लाव्य पश्चिमां प्रस्थिता दिशम् ॥ कुरुणा तु ततः कृष्टं यावत्क्षेत्रं समंततः ॥ १९ ॥ पंचयोजनविस्तारं
दयासत्यक्षमोद्गमम् ॥ स्यमंतपंचकं तावत्कुरुक्षेत्रमुदाहृतम् ॥ २० ॥ अत्र स्नाता नरा देवि लभंते पुण्यमक्षयम् ॥ मृता विमानमारुह्य
ब्रह्मलोकं व्रजंति च ॥ २१ ॥ उपवासश्च दानं च होमो जप्यं सुरार्चनम् ॥ अक्षयत्वं प्रयांत्येव नात्र कार्या विचारणा ॥ २२ ॥ ब्रह्मवेद्यां
कुरुक्षेत्रे ये मृतास्तेऽपुनर्भवाः ॥ ग्रहनक्षत्रताराणां कालेन पतनाद्भयम्॥२३॥कुरुक्षेत्रे मृतानां तु न भूयः पतनं भवेत् ॥ देवर्षिसिद्धगंधर्वास्तत्सरःसेव
नोत्सुकाः ॥ २४ ॥ यत्र नित्यं स्थिता देवि रंतुकं नामतस्ततः ॥ तस्य क्षेत्रस्य रक्षार्थं विष्णुना स्थापिताः पुरा ॥ २५ ॥ यक्षः सुचंद्रः सूर्यश्च
वासुकिः शंबुकर्णकः ॥ विद्याधरः सुकेशी च राक्षसाः स्थापिताः शुभे ॥ २६ ॥ सभृत्यैस्तेऽष्टसाहस्रैर्धनुर्बाणधरैः सदा ॥ रक्षंति च कुरुक्षेत्रं वार
यंति च पापिनः ॥ २७ ॥ रंतुकं तु समासाद्य क्षामयित्वा पुनःपुनः ॥ ततः स्नात्वा सरस्वत्यां यक्षं दृष्ट्वा प्रणम्य च ॥ २८ ॥ पुष्पं धूपं च
नैवेद्यं कृत्वैतद्वाक्यमुच्चरेत् ॥ तव प्रसादाद्यक्षेन्द्र वनानि सरितस्तथा ॥ २९ ॥ भ्रमतो मम तीर्थानि मा विघ्नं जायतां नमः ॥ इति प्रसाद्य
यक्षेशं यात्रां सम्यक् समाचरेत् ॥ ३० ॥ वनानां चापि तीर्थानां सरितामपि मोहिनि ॥ यो नरः कुरुते यात्रां कुरुक्षेत्रस्य पुण्यदाम्
॥ ३१ ॥ न तस्य न्यूनता काचिदिह लोके परत्र च ॥ ३२ ॥ इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे वसुमोहिनीसंवादे
कुरुक्षेत्रमाहात्म्ये क्षेत्रप्रमाणादिनिरूपणं नाम चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥ मोहिन्युवाच ॥ वनानि कानि विप्रेंद्र तत्र संति शुभाव
हाः ॥ सरितश्च क्रमाद्यात्रां वद मे सर्वसिद्धिदाम् ॥ १ ॥ यानि तीर्थानि संत्यत्र कुरुक्षेत्रे सुपुण्यदे ॥ तानि सर्वाणि मे ब्रूहि गतिदस्त्वं गुरु

यैतः ॥ २ ॥ वसुरुवाच ॥ शृणु मोहिनि वक्ष्यामि कुरुक्षेत्रस्य पुण्यदम् ॥ यात्राविधानं यत्कृत्वा लभते गतिमुत्तमाम् ॥ ३ ॥ वनानि सप्त संतीह कुरुक्षेत्रस्य मध्यतः ॥ तेषां नामानि वक्ष्यामि पुण्यदानां नृणामिह ॥४ ॥ काम्यकं च वनं पुण्यं तथादितिवनं महत् ॥ व्यासस्य च वनं पुण्यं फलकीवनमेव च ॥ ५ ॥ तथा सूर्यवनं चात्र पुण्यं मधुवनं च वै ॥ सीतावनं तथा ख्यातं नृणां कल्मषनाशनम् ॥ ६ ॥ वनान्येतानि सप्तात्र तेषु तीर्थान्यनेकशः ॥ सरस्वती नदी पुण्या तथा वैतरणी नदी ॥ ७ ॥ गंगा मंदाकिनी पुण्या तथैवान्या मधुस्रवा ॥ दृषद्वती कौशिकी च पुण्या हैरण्वती नदी ॥ ८ ॥ वर्षकालवहाश्चैता वर्जयित्वा सरस्वतीम् ॥ एतासामुदकं पुण्यं स्पर्शे पाने समाप्लुतौ ॥ ९ ॥ रजस्वलात्वं नैतासां पुण्यक्षेत्रप्रभावतः ॥ रंतुकं तु पुरासाद्य द्वारपालं महाबलम् ॥ १० ॥ यक्षं समभिवाद्याथ तत्र यात्रां समारभेत् ॥ ततो गच्छेन्नरः पुण्यं भद्रेऽदितिवनं महत् ॥ ११ ॥ अदित्या यत्र पुत्रार्थं सम्यक् चीर्णं महत्तपः ॥ तत्र स्नात्वा समभ्यर्च्य देवमातरमंगना ॥ १२ ॥ सूते पुत्रं महाशूरं सर्वलक्षणसंयुतम् ॥ ततो गच्छेद्वरारोहे विष्णोः स्थानमनुत्तमम् ॥ १३ ॥ विमलं नाम विख्यातं यत्र सन्निहितो हरिः ॥ विमले तु नरः स्नात्वा दृष्ट्वा च विमलेश्वरम् ॥ १४ ॥ विमलः स लभेल्लोकं देवदेवस्य चक्रिणः ॥ हरिं च बलदेवं च दृष्ट्वैकासनमास्थितौ ॥ १५ ॥ मुच्यते किल्बिषात्सद्यो मोहिन्यत्र न संशयः ॥ ततः पारिप्लवं गच्छेत्तीर्थं लोकेषु विश्रुतम् ॥ १६ ॥ तत्र स्नात्वा च पीत्वा यो ब्राह्मणं वेदपारगम् ॥ संतोष्य दक्षिणाद्येन ब्राह्मयज्ञफलं लभेत् ॥ १७ ॥ यत्रास्ति संगमो भद्रे कौशिक्याः पापनाशनः ॥ तत्र स्नात्वा नरो भक्त्या प्राप्नोति प्रियसंगमम् ॥ १८ ॥ ततस्तु पृथिवीतीर्थमासाद्य क्षांतिमान्नरः ॥ स्नातो भक्त्या महाभागे प्राप्नोति गतिमुत्तमाम् ॥ १९ ॥ धरण्यामपराधा ये कृताः स्युः पुरुषेण वै ॥ तान्सर्वान्क्षमते देवी तत्र स्नातस्य देहिनः ॥२० ॥ ततो दक्षाश्रमे पुण्ये दृष्ट्वा दक्षेश्वरं शिवम् ॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ २१ ॥ ततः शालकिनीं गच्छेत्तत्र स्नात्वा समर्चयेत ॥ हरिं हरेण संयुक्तं वांछिताथस्य लब्धये ॥ २२ ॥ नागतीर्थं ततः प्राप्य स्नात्वा तत्र विधानवित् ॥ सार्पिश्चास्य दधि प्राश्य नागेभ्यो ह्यभयं लभेत् ॥ २३ ॥ ततः सायमुपावृत्य रंतुकं द्वारपालकम् ॥ एकरात्रोषितस्तत्र पूजयेत्तं परेऽहनि ॥ २४ ॥ गंधाद्यैरुपचारैस्तु ब्राह्मणं प्रार्च्य भोजयेत् ॥ ततः पंचनदं गच्छेत्तीर्थं त्रैलोक्यविश्रुतम् ॥ २५ ॥ पंच नादाः कृता यत्र हरेणासुरभीषणाः ॥ तेन पंचनदं नाम सर्वपातकनाशनम् ॥ २६ ॥ तत्र स्नानेन दानेन निर्भयो जायते नरः ॥ कोटितीर्थं ततो गच्छेद्यत्र रुद्रेण मोहिनि ॥ २७ ॥ कोटितीर्थान्युपाहृत्य स्थापितानि महात्मना ॥ तत्र तीर्थे नरः स्नात्वा दृष्ट्वा कोटीश्वरं हरम् ॥ २८ ॥ पंचयज्ञभवं पुण्यं तत्प्र

भृत्याप्नुयात्सदा ॥ तत्रैव वामनो देवः सर्वैर्देवैः प्रतिष्ठितः ॥ २९ ॥ तस्मात्तं तत्र संपूज्य अग्निष्टोमफलं लभेत् ॥ ततोऽश्वितीर्थमासाद्य श्रद्धावा
न्विजितेन्द्रियः ॥ ३० ॥ स्नात्वा तत्र यशस्वी च रूपवांश्च नरो भवेत् ॥ ततो वाराहतीर्थं च प्राप्य विष्णुप्रकल्पितम् ॥ ३१ ॥ आप्लुत्य श्रद्धया
तत्र नरः सद्गतिमाप्नुयात् ॥ ततो व्रजेत्सोमतीर्थं यत्र सोमो वरानने ॥ ३२ ॥ तपस्तप्त्वा ह्यरोगोऽभूत्तत्र स्नानं समाचरेत् ॥ दत्वा च तत्र गामेकां राज
सूयफलं लभेत् ॥ ३३ ॥ भूतेश्वरं च तत्रैव ज्वालामालेश्वरं तथा ॥ तांडलिंगं समभ्यर्च्य न भूयो भवमाप्नुयात् ॥ ३४ ॥ एकहंसे नरः स्नात्वा गो
सहस्रफलं लभेत्॥कृतशौचे नरः स्नात्वा पुंडरीकफलं लभेत्॥३५॥ततो मुंजवटं नाम प्राप्य देवस्य शूलिनः॥ समुष्य च निशामेकां प्राचर्येशं गणपो
भवेत्॥३६॥प्रसाद्य यक्षिणीं तत्र द्वारस्थामुपवासकृत् ॥ स्नात्वाभ्यर्च्याशयेद्विप्रान्महापातकशांतये॥३७॥प्रदक्षिणमुपावृत्य पुष्करं च ततो व्रजेत् ॥
तत्र स्नात्वा पितॄन्प्राचर्य कृतकृत्यो नरो भवेत्॥३८॥कन्यादानं च यस्तत्र कार्तिक्यां वै समाचरेत्॥प्रसन्ना देवतास्तस्य यच्छंत्यभिमतं फलम् ॥३९॥
कपिलश्च महायक्षो द्वारपालोऽत्र संस्थितः ॥ विघ्नं करोति पापानां सुकृतं च प्रयच्छति ॥ ४० ॥ पत्नी तस्य महाभागा नाम्नोलूखलमेखला ॥
आहत्य दुंदुभिं सा तु भ्रमते नित्यमेव हि ॥ ४१ ॥ वारयेत्पापिनः स्नानात्तथा सुकृतिनो नयेत् ॥ ततो रामह्रदं गच्छेत्स्नात्वा तत्र
विधानतः ॥ ४२ ॥ देवान्पितॄनृषीनिष्ट्वा भुक्तिं मुक्तिं च विंदति ॥ राममभ्यर्च्य सच्छ्रद्धः स्वर्णं दत्त्वा धनी भवेत् ॥ ४३ ॥ वंशमूलं समासाद्य
स्नात्वा स्वं वंशमुद्धरेत् ॥ कायशोधनके स्नात्वा शुद्धदेहो हरिं विशेत् ॥ ४४ ॥ लोकोद्धारं ततः प्राप्य स्नात्वाभ्यर्च्य जनार्दनम् ॥
प्राप्नोति शाश्वतं लोकं यत्र विष्णुः सनातनः ॥ ४५ ॥ श्रीतीर्थं च ततः प्राप्य शालग्राममनुत्तमम् ॥ स्नात्वाभ्यर्च्य हरिं नित्यं पश्यति
स्वांतिके स्थितम् ॥ ४६ ॥ कपिलाह्रदमासाद्य स्नात्वाभ्यर्च्य सुरान्पितॄन् ॥ सहस्रकपिलापुण्यं लभते नात्र संशयः ॥ ४७ ॥ कपिलं
तत्र विश्वेशं समभ्यर्च्य विधानतः॥देवैश्च सत्कृतो भद्रे साक्षाच्छिवपदं लभेत्॥४८॥सूर्यतीर्थे ततो भानुं सोपवासः समर्चयेत्॥अग्निष्टोमस्य यज्ञस्य
फलं लब्ध्वा व्रजेद्दिवम् ॥ ४९॥ पृथिवीविवरद्वारि स्थितो गणपतिः स्वयम्॥ तं दृष्ट्वाथ समभ्यर्च्य यज्ञस्य फलमाप्नुयात्॥५०॥ देव्यास्तीर्थे नरः
स्नात्वा लभते रूपमुत्तमम् ॥ ब्रह्मावर्ते नरः स्नात्वा ब्रह्मज्ञानमवाप्नुयात् ॥५१ ॥ सुतीर्थके नरः स्नात्वा देवर्षिपितृमानवान्॥समभ्यर्च्याश्वमेधस्य
यज्ञस्य फलमाप्नुयात्॥५२॥कामेश्वरस्य तीर्थे तु स्नात्वा श्रद्धासमन्वितः॥सर्वव्याधिविनिर्मुक्तो ब्रह्म प्राप्नोति शाश्वतम्॥५३॥ स्नातस्य मातृतीर्थे तु
श्रद्धयाभ्यर्चकस्य तु॥आसप्तमं कुलं देवि वर्द्धते श्रीरनुत्तमा॥५४॥ततः सीतावनं गच्छेत्तत्र तीर्थं महच्छुभे॥पुनातिदर्शनादेवपुरुषानेकविंशतिम्॥५५॥

केशान्प्रक्षिप्य वै तत्र पूतो भवति पापतः ॥ दशाश्वमेधिकं तत्र तीर्थं त्रैलोक्यविश्रुतम् ॥ ९६ ॥ दर्शनात्तस्य तीर्थस्य मुक्तो भवति
किल्बिषैः ॥ मानुषाह्वं ततस्तीर्थं प्राप्य स्नानं समाचरेत्॥९७॥यदीच्छेन्मानुषं जन्म पुनश्च विधिनंदिनि॥मानुषाच्च ततस्तीर्थात्क्रोशमात्रे महानदी
॥९८॥ आपगा नाम विख्याता तत्र स्नात्वा विधानतः॥ श्यामाकं पयसा सिद्धं भोजयद्द्विजसत्तमान्॥९९॥तस्य पापं क्षयं याति पितॄणां श्राद्धतो
गतिः ॥ नभस्ये मासि कृष्णे तु पितृपक्षे महालये ॥ ६० ॥ चतुर्दश्यां तु मध्याह्ने पिंडदो मुक्तिमाप्नुयात् ॥ ब्राह्मोदुंबरकं गच्छेद्ब्रह्मणः स्थानकं
ततः ॥ ६१ ॥ तत्र ब्रह्मर्षिकुंडेषु स्नातः सोमफलं लभेत् ॥ वृद्धकेदारके तीर्थे स्थाणुं दंडिसमन्वितम् ॥६२ ॥ समर्च्य यत्र चाप्नोति नरोंऽतर्द्धान
मिच्छया ॥ कलश्यां च ततो गच्छेद्यत्र देवी स्वयं स्थिता ॥ ६३ ॥ स्नात्वास्यामंबिकां प्रार्च्य तरेत्संसारसागरम्॥ सरके कृष्णभूतायां दृष्ट्वा देवं
महेश्वरम् ॥ ६४ ॥ शैवं पदमवाप्नोति नरः श्रद्धासमन्वितः ॥ तिस्रः कोट्यस्तु तीर्थानां सरके संति भामिनि ॥ ६५ ॥ रुद्रकोटिस्तथा कूपे
सरोमध्ये व्यवस्थिता ॥ तस्मिन्सरसि यः स्नात्वा रुद्रकोटिं स्मरेन्नरः ॥ ६६ ॥ पूजिता रुद्रकोटिस्तु तेन स्यान्नात्र संशयः ॥ ईडास्पदं
च तत्रैव तीर्थं पापप्रणाशनम् ॥ ६७ ॥ यस्मिन्मुक्तिमवाप्नोति दर्शनादेव मानवः ॥ तत्रस्थानर्चयित्वा च देवान्पितृगणानपि ॥ ६८ ॥
न दुर्गतिमवाप्नोति मनसा चिंतितं लभेत् ॥ केदारं च महातीर्थं सर्वकल्मषनाशनम् ॥ ६९ ॥ तत्र स्नात्वा च पुरुषः सर्वदानफलं
लभेत् ॥ अन्यजन्मेति विख्यातं सरकस्य तु पूर्वतः॥७०॥सरो महत्स्वच्छजलं देवौ हरिहरौ यतः ॥ विष्णुश्चतुर्भुजस्तत्र लिंगाकारः शिवः स्थितः
॥७१॥तत्र स्नात्वा च तौ दृष्ट्वा स्तुत्वा मोक्षं लभेन्नरः॥नागह्रदे ततो गत्वा स्नात्वा चैत्रे सितांतके॥७२॥श्राद्धदो मुक्तिमाप्नोति यमलोकं न पश्यति॥
ततस्त्रिविष्टपं गच्छेत्तीर्थं देवनिषेवितम्॥७३॥यत्र वैतरणी पुण्या नदी पापप्रमोचिनी॥ तत्र स्नात्वार्चयित्वा च शूलपाणिं वृषध्वजम् ॥७४॥ सर्वपाप
विशुद्धात्मा गच्छत्येव परां गतिम्॥ रसावर्ते नरः स्नात्वा सिद्धिमाप्नोत्यनुत्तमाम् ॥ ७५ ॥ चैत्रस्य सितभूतायां स्नानं कृत्वा विलेपके ॥पूजयित्वा
शिवं भक्त्या सर्वपापैः प्रमुच्यते ॥७६॥ ततो गच्छेन्नरो देवि फलकीवनमुत्तमम् ॥ यत्र देवाः सगंधर्वास्तप्यंते परमं तपः ॥ ७७ ॥ तत्र नद्यां
दृषद्वत्यां नरः स्नात्वा विधानतः ॥ देवान्पितॄंस्तर्पयित्वा ह्यग्निष्टोमातिरात्रभाक् ॥ ७८ ॥ दर्शे तथा विधुदिने तत्र श्राद्धं करोति यः ॥ गयाश्राद्ध
समं तत्र लभते फलमुत्तमम् ॥ ७९ ॥ श्राद्धे फलमरण्यस्य स्मरणं पितृतृप्तिदम् ॥ पाणिघाते ततस्तीर्थे पितॄन्संतर्प्य मानवः ॥ ८० ॥ राजसूय
फलं प्राप्य सांख्यं योगं च विंदति ॥ ततस्तु मिश्रके तीर्थे स्नात्वा मर्त्यो विधानतः ॥ ८१ ॥ सर्वतीर्थफलं प्राप्य लभते गतिमुत्तमाम् ॥ ततो
व्यासवने गत्वा स्नात्वा तीर्थे मनोजवे ॥ ८२ ॥ मनीषिणं विभुं दृष्ट्वा मनसा चिंतितं लभेत् ॥गत्वा मधुवनं चैव देव्यास्तीर्थे नरः शुचिः ॥८३॥

स्नात्वा देवानृषीनिष्ट्वा लभते सिद्धिमुत्तमाम्॥ कौशिकीसंगमे तीर्थे दृषद्वत्यां नरः प्लुतः ॥ ८४ ॥ नियतो नियताहारः सर्वपापैः प्रमुच्यते॥
ततो व्यासस्थलीं गच्छेद्यत्र व्यासेन धीमता ॥ ८५ ॥ पुत्रशोकाभिभूतेन देहत्यागो विनिश्चितः ॥ पुनरुत्थापितो देवैस्तत्र गत्वा न शोकभाक्
॥ ८६ ॥ किंदुशूकूपमासाद्य तिलप्रस्थं प्रदाप्य च ॥ गच्छेद्धि परमां सिद्धिं मृतो मुक्तिमवाप्नुयात्॥८७॥ आह्नं च मुदितं चैव द्वे तीर्थे भुवि विश्रुते ॥
तयोः स्नात्वा विशुद्धात्मा सूर्यलोकमवाप्नुयात् ॥ ८८ ॥ मृगमुच्यं ततो गत्वा गंगायां प्रणतः स्थितः ॥ अर्चयित्वा महादेवमश्वमेधफलं लभेत्
॥ ८९ ॥ कोटितीर्थं ततो गत्वा स्नात्वा कोटीश्वरं शिवम् ॥दृष्ट्वा स्तुत्वा श्रद्दधानः कोटियज्ञफलं लभेत् ॥ ९० ॥ ततो वामनकं गच्छेत्रिषु लोकेषु
विश्रुतम् ॥ यत्र वामनजन्माभूद्बलेर्यज्ञजिहीर्षया ॥ ९१ ॥ तत्र विष्णुपदे स्नात्वा पूजयित्वा च वामनम् ॥ सर्वपापविशुद्धात्मा विष्णुलोके
महीयते ॥ ९२ ॥ ज्येष्टाश्रमं च तत्रैव सर्वपातकनाशनम् ॥ ज्येष्ठस्य शुक्लैकादश्यां सोपवासः परेऽहनि ॥ ९३ ॥ स्नात्वा तत्र विधानेन श्रेष्ठत्वं
लभते नृषु ॥ श्राद्धं तत्र कृतं देवि पितॄणामतितुष्टिदम् ॥ ९४ ॥ तत्रैव कोटितीर्थं च त्रिषु लोकेषु विश्रुतम् ॥ तस्मिंस्तीर्थे नरः स्नात्वा
कोटियज्ञफलं लभेत् ॥ ९५ ॥ तत्र कोटीश्वरं नाम देवदेवं महेश्वरम् ॥ समभ्यर्च्य विधानेन गाणपत्यमवाप्नुयात् ॥ ९६ ॥ सूर्यतीर्थं च तत्रैव
स्नात्वात्र रविलोकभाक् ॥ कुलोत्तारणके तीर्थे गत्वा स्नानं समाचरन् ॥ ९७ ॥ उद्धृत्य स्वकुलं स्वर्गे कल्पांतं निवसेत्ततः ॥पवनस्य ह्रदे स्नात्वा
दृष्ट्वा देवं महेश्वरम् ॥९८॥ विमुक्तः सर्वपापेभ्यः शैवं पदमवाप्नुयात् ॥स्नात्वा च हनुमत्तीर्थे नरो मुक्तिमवाप्नुयात्॥८०॥ शालहोत्रस्य राजर्षेस्तीर्थे
स्नात्वाघवर्जितः ॥ श्रीकुंभाख्ये सरस्वत्यास्तीर्थे स्नात्वाथ यज्ञवाक् ॥ १०० ॥स्नातश्च नैमिषे कुंडे नैमिषस्नानपुण्यभाक् ॥ स्नात्वा वेदवतीतीर्थे
स्त्री सतीत्वमवाप्नुयात् ॥ १०१ ॥ ब्रह्मतीर्थे नरः स्नात्वा ब्राह्मण्यं लभते नरः ॥ ब्रह्मणः परमं स्थानं यत्र गत्वा न शोचति ॥ १०२ ॥ सोमतीर्थे
नरः स्नात्वा स्वर्गतिं समवाप्नुयात् ॥ सप्तसारस्वतं तीर्थं प्राप्य स्नात्वा च मुक्तिभाक् ॥ १०३ ॥ यत्र सप्त सरस्वत्यः सम्यगैक्यं समागताः ॥
सुप्रभा कांचनाक्षी च विशाला च मनोहरी ॥ १०४॥ सुनंदा च सुवेणुश्च सप्तमी विमलोदका॥तथैवौशनसे तीर्थे स्नात्वा मुच्येत पातकैः ॥१०५॥
कपाल मोचने स्नात्वा ब्रह्महापि विशुध्यति ॥ वैश्वामित्रे नरः स्नातो ब्राह्मण्यं समवाप्नुयात् ॥ १०६ ॥ ततः पृथूदके स्नात्वा मुच्यते भवबंधनात्॥
अवकीर्णे नरः स्नात्वा ब्रह्मचर्यफलं लभेत् ॥१०७॥ मधुस्रावेऽथप्रयातः स्नातो मुच्येत पातकैः॥ स्नात्वा तीर्थे च वासिष्ठे वासिष्ठं लोकमाप्नुयात्
॥ १०८॥ अरुणासंगमे स्नात्वा त्रिरात्रोपोषितो नरः ॥स्नात्वा मुक्तिमवाप्नोति नात्र कार्या विचारणा ॥१०९॥समुद्रास्तत्र चत्वारस्तेषु स्नातो नरः

शुभे॥गोसहस्रफलं लब्ध्वा स्वर्गलोके महीयते॥११०॥सोमतीथ च तत्रान्यत्तस्मिन्स्नात्वा च मोहिनि॥चैत्रे षष्ठ्यां च शुक्लायां श्राद्धं कृत्वोद्धरेत्पितॄन्
॥१११॥अथ पञ्चवटे स्नात्वा योगमूर्तिधरं शिवम् ॥ समभ्यर्च्य विधानेन दैवतैः सह मोदते ॥११२॥ कुरुतीर्थे ततः स्नातः सर्वसिद्धिमवाप्नुयात् ॥
स्वर्गद्वारे प्लुतो मर्त्यः स्वर्गलोके महीयते॥११३॥स्नातो ह्यनरके तीर्थे मुच्यते सर्वकिल्बिषैः ॥ ततो गच्छेन्नरो देवि काम्यकं वनमुत्तमम् ॥११४॥
यस्मिन्प्रविष्टमात्रस्तु मुच्यते सर्वसंचयैः ॥ अथादित्यवनं प्राप्य दर्शनादेव मुक्तिभाक् ॥ ११५ ॥ स्नानं रविदिने कृत्वा तत्र वांछितमाप्नुयात् ॥
यज्ञोपवीतिके स्नात्वा स्वधर्मफलभाग्भवेत् ॥ ११६ ॥ ततश्चतुःप्रवाहाख्ये तीर्थे स्नात्वा नरोत्तमः ॥ सर्वतीर्थफलं प्राप्य मोदते
दिवि देववत ॥ ११७ ॥ स्नातस्तीर्थे विहारे तु सर्वसौख्यमवाप्नुयात् ॥ दुर्गातीर्थे नरः स्नात्वा न दुर्गतिमवाप्नुयात्॥ ११८॥ ततः सरस्वतीकूपे
पितृतीर्थापराह्वये ॥ स्नात्वा संतर्प्य देवादींल्लभते गतिमुत्तमाम् ॥ ११९ ॥ स्नात्वा प्राचीसरस्वत्यां श्राद्धं कृत्वा विधानतः ॥ दुर्लभं
प्राप्नुयात्कामं देहांते स्वर्गतिं लभेत् ॥ १२० ॥ शुक्रतीर्थे नरः स्नात्वा श्राद्धदः प्रोद्धरेत्पितॄन् ॥ अष्टम्यां वा चतुर्दश्यां चैत्रे कृष्णे विशे
पतः ॥ १२१ ॥ सोपवासो ब्रह्मतीर्थे मुक्तिभाङ्नात्र संशयः ॥स्थाणुतीर्थे ततः स्नात्वा दृष्ट्वा स्थाणुवटं नरः॥१२२॥मुच्यते पातकैर्घोरैरितिप्राह पिता
महः ॥ दर्शनात्स्थाणुलिंगस्य यात्रा पूर्णा प्रजायते॥१२३॥कुरुक्षेत्रस्य देवेशि सत्यं सत्यं मयोदितम्॥कुरुक्षेत्रसमं तीर्थं न भूतं न भविष्यति॥१२४॥
तत्र द्वादश यात्रास्तु कृत्वा भूयो न जन्मभाक् ॥ पूर्तमिष्टं तपस्तप्तं हुतं दत्तं विधानतः॥ १२५ ॥ तत्र स्यादक्षयं सर्वमिति वेदविदो विदुः॥
मन्वादौ च युगादौ च ग्रहणे चंद्रसूर्ययोः ॥१२६॥ महापाते च संक्रांतौ पुण्ये चाप्यन्यवासरे ॥ स्नातस्तत्र कुरुक्षेत्रे फलानंत्यमवाप्नुयात्॥१२७॥
कलिजानां तु पापानां पावनाय महात्मनाम् ॥ब्रह्मणा कल्पितं तीर्थं कुरुक्षेत्रं सुखावहम् ॥ १२८ ॥ य इमां कीर्तयेत्पुण्यां कथां पापप्रणाशि
नीम्॥ शृणुयाद्वा नरो भक्त्या सोऽपि पापैः प्रमुच्यते ॥ १२९ ॥ यद्यद्ददाति यस्तत्र कुरुक्षेत्रे रविग्रहे॥ तत्तदेव सदाप्नोति नरो जन्मनि
जन्मनि ॥ १३० ॥ अथ किं वहुनोक्तेन विधिजे शृणु निश्चितम् ॥ सेवेतैव कुरुक्षेत्रं यदीच्छेद्भवमोक्षणम् ॥ १३१॥ एतदेव महत्पुण्यमेतदेव मह
त्तपः ॥ एतदेव महज्ज्ञानं यद्व्रजेत्स्थाणुतीर्थकम्॥१३२॥ कुरुक्षेत्रसमं तीर्थं नान्यद्भुवि शुभावहम् ॥ साचारो वाप्यनाचारो यत्र मुक्तिमवाप्नुयात्
॥१३२॥एतत्ते सर्वमाख्यातं यत्पृष्टोऽहं त्वयानघे ॥ कुरुक्षेत्रस्य माहात्म्यं सर्वपापनिकृंतनम्॥ १३४ ॥ पुण्यदं मोक्षदं चैव किमन्यच्छ्रोतुमिच्छसि
॥१३५॥इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे वसुमोहिनीसंवादे कुरुक्षेत्रमाहात्म्ये तीर्थयात्रावर्णनं नाम पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

॥ इति कुरुक्षेत्रमाहात्म्यं समाप्तम् ॥ ॥अथ गङ्गाद्वारमाहात्म्यं प्रारभ्यते ॥ ॥ मोहिन्युवाच ॥ कुरुक्षेत्रस्य माहात्म्यं श्रुतं पापापहं
महत् ॥ त्वत्तो द्विजवरश्रेष्ठ सर्वसिद्धिप्रदं नृणाम् ॥ १ ॥ गंगाद्वारेति यत्ख्यातं तीर्थं पुण्यावहं गुरो ॥ तत्समाख्याहि भद्रं ते श्रोतुं
वांछास्ति मे हृदि ॥ २ ॥ वसुरुवाच ॥ शृणु भद्रे प्रवक्ष्यामि माहात्म्यं पापनाशनम् ॥ गंगाद्वारस्य ते पुण्यं शृण्वतां पठतां
शुभम् ॥ ३ ॥ यत्र भूमिमनुप्राप्ता भगीरथरथानुगा ॥ श्रीगंगालकनंदाख्या नगान्भित्त्वा सहस्रशः ॥ ४ ॥ यत्रायजत यज्ञेशं पुरा दक्षः
प्रजापतिः ॥ तत्क्षेत्रं पुण्यदं नृणां सर्वपातकनाशनम् ॥ ५ ॥ यस्मिन्यज्ञे समाहूता देवा इंद्रपुरोगमाः ॥ स्वैः स्वैर्गणैः समायाता
यज्ञभागजिघृक्षया ॥ ६ ॥ तत्र देवर्षयः प्राप्तास्तथा ब्रह्मर्षयोऽमलाः ॥ शिष्यप्रशिष्यैः सहितास्तथा राजर्षयः शुभे ॥ ७ ॥ सर्वे
निमंत्रितास्तेन ब्रह्मपुत्रेण धीमता ॥ गंधर्वाप्सरसो यक्षाः सिद्धविद्याधरोरगाः ॥ ८ ॥ संप्राप्ता यज्ञसदनमृते शर्वं पिनाकिनम् ॥ ततस्तु
गच्छतां तेषां सप्रियाणां विमानिनाम् ॥ ९ ॥ दक्षयज्ञोत्सवं प्रीत्यान्योन्यं वर्णयतां सती ॥ श्रुत्वा सोत्का महादेवं प्रार्थयामास भामिनी ॥ १० ॥
तच्छ्रुत्वा भगवानाह न श्रेयो गमनं ततः ॥ अथ देवमनादृत्य भाविनोऽर्थस्य गौरवात् ॥ ११ ॥ जगामैकाकिनी भद्रे द्रष्टुं पितृमखोत्सवम् ॥
ततः सा तत्र संप्राप्ता न केनापि सभाजिता ॥ १२ ॥ प्राणांस्तत्याज तन्वंगी तज्जातं क्षेत्रमुत्तमम् ॥ तस्मिंस्तीर्थे तु ये स्नात्वा तर्पयंति सुरान्पि
तॄन् ॥ १३ ॥ ते स्युर्देव्याः प्रियतमा भोगमोक्षैकभागिनः ॥ येऽन्येऽपि तत्र स्वान्प्राणांस्त्यजंत्यनशनादिभिः ॥१४॥ तेऽपि साक्षाच्छिवं
प्राप्य नाप्नुवंति पुनर्जनिम् ॥ अथ तन्नारदाच्छ्रुत्वा भगवान्नीललोहितः ॥ १५॥ मरणं स्वप्रियायास्तु वीरभद्रं विनिर्ममे ॥ स सर्वैः प्रमथैर्युक्त
स्तं यज्ञं समनाशयत् ॥ १६ ॥पुनर्विधेः प्रार्थनया मीढ्वान्सद्यः प्रसादितः ॥ संदधे च पुनर्यज्ञं विकृतं प्रकृतिस्थितम् ॥ १७ ॥ तत
स्तत्तीर्थमतुलं सर्वपातकनाशनम् ॥ जातं यत्राप्लुतः सोमो मुक्तो यक्ष्मग्रहादभूत् ॥ १८ ॥ तत्र यो विधिवत्स्नात्वा यं यं कामं विचिंत
येत् ॥ तं तमाप्नोति विधिजे नात्र कार्या विचारणा ॥ १९ ॥ यत्र यज्ञेश्वरः साक्षाद्भगवान्विष्णुरव्ययः ॥ स्तुतो दक्षेण देवैश्च तत्तीर्थं हरिसंज्ञि
तम् ॥ २०॥ तत्र यो विधिवन्मर्त्यः स्नायाद्धरिपदे सति ॥ स विष्णोर्वल्लभो भूयाद्भुक्तिमुक्त्येकभाजनम् ॥ २१ ॥ अतः पूर्वदिशि क्षेत्रं त्रिगगं नाम
विश्रुतम् ॥ यत्र त्रिपथगा साक्षाद्दृश्यते सकलैर्जनैः॥ २२ ॥ तत्र स्नात्वाथ संतर्प्य देवर्षिपितृमानवान् ॥ सम्यक्छ्रद्धायुतो मर्त्यो मोदते दिवि देव
वत् ॥ २३ ॥ तत्र यस्त्यजति प्राणान्प्रवाहे पतितः सति ॥ स व्रजेद्वैष्णवं धाम देवैः सम्यक्सभाजितः ॥ २४ ॥ ततः कनखले तीर्थे दक्षिणीं
दिशमाश्रिते ॥ त्रिरात्रोपोषितः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥२५ ॥ अथ यस्तत्रगां दद्याद्ब्राह्मणे वेदपारगे ॥ स कदाचिन्न पश्येत्तु देवि वैतरणीं

यमम् ॥ २६ ॥ अत्र जप्तं हुतं तप्तं दत्तमानंत्यमश्नुते ॥ अत्रैव जह्नुतीर्थं च यत्र वै जह्नुना पुरा ॥ २७॥ राजर्षिणा निपीताभूद्गंडूषीकृत्य सा नदी ॥
प्रसादितेन सा तेन मुक्ता कर्णाद्विनिर्गता ॥ २८ ॥ तत्र स्नात्वा महाभागे यो नरः श्रद्धयान्वितः ॥ सोपवासः समभ्यर्चेद्ब्राह्मणं वेदपार
गम्॥२९॥भोजयेत्परमान्नेन स्वर्गे कल्पं वसेत्स तु ॥ अथ पश्चाद्दिशि गतं कोटितीर्थं सुमध्यमे॥३०॥ यत्र कोटिगुणं पुण्यं भवेत्कोटीशदर्शनात् ॥
ओष्यैकां रजनीं तत्र पुंडरीकमवाप्नुयात् ॥ ३१ ॥ तथैवोत्तरदिग्भागे सप्तगंगेति विश्रुतम् ॥ तीर्थं परमकं देवि सर्वपातकनाशनम् ॥ ३२ ॥
यत्राश्रमाश्च पुण्या वै सप्तर्षीणां महामते ॥ तेषु सर्वेषु तु पृथक् स्नात्वा संतर्प्य देवताः ॥ ३३ ॥ पितॄंश्च लभते मर्त्य ऋषिलोकं सनातनम्॥
भगीरथेन वै राज्ञा यदानीता सुरापगा॥३४॥तदा सा प्रीतये तेषां सप्तधारागताभवत् ॥ सप्तगंगं ततस्तीर्थं भुवि विख्यातिमागतम्॥३५॥स आवर्तं
ततः प्राप्य संतर्प्यामरपूर्वकान् ॥ स्नात्वा देवेंद्रभवने मोदते युगमेव च ॥ ३६ ॥ ततो भद्रे समासाद्य कपिलाह्रदमुत्तमम् ॥ धेनुं दत्त्वा द्विजा
ग्र्याय गोसहस्रफलं लभेत् ॥ ३७ ॥ अत्रैव नागराजस्य तीर्थं परमपावनम् ॥ अत्राभिषेकं यः कुर्यात्सोऽभयं सर्पतो लभेत् ॥३८॥ ततो ललितकं
प्राप्य शंतनोस्तीर्थमुत्तमम् ॥ स्नात्वा संतर्प्य विधिवत्सुरादीँल्लभते गतिम्॥३९ ॥ यत्र शंतनुना लब्धा गंगा मानुष्यमागता॥तत्रैव तत्यजे देहं वसू
न्सूत्वानुवत्सरम् ॥४०॥तद्देहो न्यपतत्तत्र तत्राभूद्वृक्षजन्म च॥तत्र यः स्नाति मनुजो भक्षयेदोषधीं च ताम्॥४१॥स न दुर्गतिमाप्नोति गंगादेवीप्रसा
दतः ॥ भीमस्थलं ततः प्राप्य यः स्नायात्सुकृती नरः ॥ ४२ ॥ भोगान्भुक्त्वेह देहांते स्वर्गतिं समवाप्नुयात् ॥ एतान्युद्देशतो देवि तीर्थानि गदि
तानि ते॥४३॥ अन्यानि वै महाभागे संति तत्र सहस्रशः॥योऽस्मिन्क्षेत्रे नरः स्नायात्कुंभगेज्येऽजगे रवौ॥४४॥स तु स्याद्वाक्पतिः साक्षात्प्रभाकर
इवापरः ॥ ॥ अथ याते प्रयागादिपुण्यतीर्थे पृथूके ॥ ४५ ॥ अथ यो वारुणे योगे महावारुणके तथा ॥ महामहावारुणे च स्नायात्तत्र
विधानतः ॥४६॥ संपूज्य ब्राह्मणान् भक्त्या स लभेद्ब्रह्मणः पदम्॥संक्रान्तौ वाप्यमायां वा व्यतीपाते युगादिके॥४७॥पुण्येऽहनि तथान्यद्वै यत्किं
चिद्दानमाचरेत् ॥ तत्तु कोटिगुणं भूयात्सत्यमेतन्मयोदितम् ॥ ४८ ॥ गंगाद्वारं स्मरेद्यो वै दूरसंस्थोऽपि मानवः ॥ सद्गतिं स समाप्नोति
स्मरन्नंते यथा हरिम् ॥ ४९ ॥ यं यं देवं हरिद्वारे पूजयेत्प्रयतो नरः ॥ स स देवः सुप्रसन्नः पूरयेत्तन्मनोरथान्॥५०॥एतदेव तपःस्थानमेतदेव जप
स्थलम् ॥ एतदेव हुतस्थानं यत्र गंगा भुवं गता ॥ ५१ ॥ यस्तत्र नियतो मर्त्यो गंगानामसहस्रकम् ॥ त्रिकालं पठति स्नात्वा सोऽक्षयां संततिं
लभेत्॥५२॥गंगाद्वारे पुराणं तु शृणुयाद्यश्च भक्तितः॥नियमेन महाभागे स याति पदमव्ययम्॥५३॥हरिद्वारस्य माहात्म्यं यः शृणोति नरोत्तमः ॥

पठेद्वा भक्तिसंयुक्तः सोऽपि स्नानफल लभेत्॥९४॥देवि तिष्ठति यद्गेहे माहात्म्यं लिखितंत्विदम्॥तद्गृहे सर्पचौराग्निग्रहराजभयं नहि॥९५॥वर्द्धंतेसंपदः
सर्वा विष्णुदेवप्रसादतः॥९६ ॥ इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे वसुमोहिनीसंवादे हरिद्वारमाहात्म्यं नाम षट्षष्टितमोऽध्यायः
॥६६॥इति गङ्गाद्वार (हरिद्वार) माहात्म्यं समाप्तम्॥अथ बदरीमाहात्म्यं प्रारभ्यते॥मोहिन्युवाच ॥अहो द्विजवराख्यातं गंगाद्वारसमुद्भवम् ॥माहा
त्म्यमधुना ब्रूहि बदर्याः पापनाशनम् ॥ १ ॥ वसुरुवाच ॥ शृणु भद्रे प्रवक्ष्यामि माहात्म्यं बदरीभवम् ॥ यच्छ्रुत्वा मुच्यते जंतुर्जन्मसंसारबंधनात्
॥ २ ॥ बदर्याख्यं हरेः क्षेत्रं सर्वपातकनाशनम् ॥ मुक्तिदं भवभीतानां कलिदोषहरं नृणाम् ॥ ३ ॥ यत्र नारायणो देवो नरश्च भगवानृषिः ॥ धर्मा
न्मूर्त्यां लब्धजनी ययतुर्गंधमादनम् ॥ ४ ॥ यत्रास्ति बदरीवृक्षो बहुगंधफलान्वितः ॥ तस्मिन्स्थाने महाभाग आकल्पादास्थितौ तपः ॥ ५ ॥
नारदाद्यैर्मुनिवरैः कलापग्रामवासिभिः ॥ सिद्धसंघैः परिवृतौ लोकानां स्थितये स्थितौ ॥ ६ ॥ यत्राग्नितीर्थं विख्यातं वर्तते सर्वसिद्धिदम् ॥
महापातकिनस्तत्र स्नात्वा शुध्यंति पातकात् ॥ ७ ॥ दुर्वर्णं हाटकं यद्वदग्नौ ध्मातं विशुध्यति ॥ तथाग्नितीर्थ आप्लुत्य देही पापैर्विमुच्यते
॥ ८ ॥ चांद्रायणसहस्रैस्तु कृच्छ्रैः कोटिभिरेव च ॥ यत्फलं लभते मर्त्यस्तत्स्नानाद्वह्नितीर्थतः ॥ ९ ॥ शिलाः पंचापि तत्तीर्थे संति
यन्मध्यतः स्थितम् ॥ अग्नितीर्थं विधिसुते दर्शनात्तदघापहम् ॥ १० ॥ नारदो यत्र भगवांस्तपस्तेपे सुदारुणम् ॥ सा शिला नारदी नाम
दर्शनादेव मुक्तिदा ॥ ११ ॥नित्यदा यत्र सान्निध्यं हरेरस्ति सुलोचने ॥ तत्र नारदकुंडं च यत्र स्नातो नरः शुचिः ॥ १२ ॥ भुक्तिं मुक्तिं
हरेर्भक्तिं यद्यद्वांछेत्तु तल्लभेत् ॥ एतस्यां यो नरो भक्त्या स्नानं दानं सुरार्चनम् ॥ १३ ॥ होमं जपं तथान्यद्वा यत्करोति तदक्षयम् ॥ वैनतेय
शिला चान्या तस्मिन् क्षेत्रे शुभावहा ॥ १४ ॥ यत्र तप्तं तपस्तीव्रं गरुडेन महात्मना ॥ त्रिंशद्वर्षसहस्राणि हरिदर्शनकाम्यया ॥ १५ ॥ ततः
प्रसन्नो भगवान्ददौ तस्मै वरं शुभे ॥ अजेयो दैत्यसंघानां नागानां च विभीषणः॥ १६॥ वाहनं भव मे वत्स प्रसन्नोऽहं तवोपरि ॥ त्वन्नाम्नेयं शिला
ख्यातिं गमिष्यति महीतले ॥ १७॥ दर्शनात्पुण्यदा नृणां यत्र तप्तं त्वया तपः ॥ अत्र मुख्यतमे गंगा तीर्थे मत्प्रीतिकाम्यया ॥ १८ ॥आविरस्तु
महाभाग पुण्यदा स्नानकारिणाम् ॥ पंचगंगे तु यः स्नात्वा देवादींस्तर्पयिष्यति ॥ १९ ॥ न तस्य पुनरावृत्तिर्ब्रह्मलोकात्सनातनात् ॥ एवं दत्वा
वरं विष्णुर्बभूवांतर्हितस्तदा ॥ २०॥गरुडोऽप्याज्ञया विष्णोर्वाहनत्वमुपागतः ॥ ततःप्रभृति तत्तीर्थं जातं पापविनाशनम् ॥ २१ ॥ पुण्यदं वै स्मरे
चापि वैनतेयगतिप्रदम् ॥ अथान्या तु शिला तत्र वाराहीति शुभावहा ॥ २२ ॥ यत्रोद्धृत्य महीं देवो हिरण्याक्षं निपात्य च ॥ शिलारूपेण

चाक्रम्य स्थितः पापविनाशनः ॥ २३ ॥ तत्र यो मनुजो गत्वा गंगांभस्यमले प्लुतः ॥ पूजयेत्तां शिलां भक्त्या स न दुर्गतिमाप्नुयात् ॥ २४ ॥
अथान्या नारसिंहाख्या शिला तत्र सुरेश्वरी ॥ हिरण्यकशिपुं हत्वा स्थितो यत्र बभूव ह ॥ २५ ॥ ततः सुरर्षिभिः सर्वैः क्रोधस्तस्य निवारितः ॥
प्रार्थितश्च विशालायां स्थातुं तत्र सदैव हि ॥२६॥ चतुर्भुजस्तथा तत्र शिलारूपमुपागतः ॥ जलक्रीडापरो नित्यं वर्तते तोयमध्यगः ॥ २७ ॥ तत्र
यः स्नाति मनुजो नृहरेः पूजयेच्छिलाम्॥स लभेद्वैष्णवं धाम पुनरावृत्तिदुर्लभम्॥२८॥पंचमीं तु शिलां देवि वह्निकुंडतटस्थिताम्॥नरनारायणाख्यां
च वक्ष्यामि शृणु सांप्रतम् ॥ २९ ॥ कृते युगे तु सर्वेषां नरनारायणो हरिः ॥ प्रत्यक्ष वसते तत्र भुक्तिमुक्तिप्रदायकः ॥ ३० ॥ त्रेतायां
मुनिभिर्देवैर्योगिभिर्दृश्यते शुभे॥नान्यैः समास्थितो योगं लोकस्थितिविधायकः॥३१॥ द्वापरे समनुप्राप्ते ज्ञानयोगेन दृश्यते॥नान्योपायेन केनापि
तिष्ये दर्शनतां गतः॥३२॥ततो ब्रह्मादयो देवा ऋषयश्च तपोधनाः॥स्तुत्वा वाग्भिर्विचित्राभिर्देवं प्रासादयन्हरिम्॥३३॥ ततोऽशरीरिणी वाणी प्राह
तान्विधिपूर्वकान्॥कलौ न दर्शनं यामि सर्वधर्मविवर्जिते॥३४॥यदि वो दर्शने श्रद्धा मंडपस्य सुरेश्वराः॥गृहीध्वं मामकीं मूर्तिं शैलीं नारदकुंडगाम् ॥
॥३५॥ततस्तां गिरमाकर्ण्य ब्रह्माद्या हृष्टमानसाः॥निष्कास्य शैलीं तां दिव्यां मूर्तिं नारदकुंडगाम्॥३६॥स्थापयामासुरभ्यर्च्य स्वं स्वं धाम ययुस्ततः॥
वैशाखे मासि ते देवा गच्छंति निजमंदिरम् ॥ ३७ ॥ कार्तिके तु समागत्य पुनरर्चां चरंति च ॥ ततो वैशाखमारभ्य मानवा हिमसंक्षयात्
॥ ३८ ॥ लभंते दर्शनं पुण्याः पापकर्मविवर्जिताः ॥ षण्मासं दैवतैः पूज्या षण्मासं मानवैस्तथा ॥ ३९ ॥ एवं व्यवस्थया मूर्तिस्तत्प्रभृत्यावि
रास सा ॥ यः शैलीं प्रतिमां विष्णोः पूजयेद्भक्तिभावतः ॥ ४० ॥ नैवेद्यं भक्षयेच्चापि स मुक्तिं लभते ध्रुवम् ॥ एताः पंच शिलाः पुण्या विशालायां
व्यवस्थिताः ॥ ४१ ॥ आसां मध्ये तु नैवेद्यं देवानां दुर्लभं हरेः ॥ किं पुनर्मानुषादीनां भक्षितं मोक्षसाधनम् ॥ ४२ ॥ बदर्यां विष्णुनैवेद्यं
सिक्थमात्रं च भक्षितम् ॥ शोधयेद्देहगं पापं दीप्ताग्निरिव कांचनम् ॥ ४३ ॥ कपालमोचनं ह्येतत्तीर्थं पापविशोधनम् ॥ यन्मध्ये तु शिलाः
पञ्च संति पापविमोचिकाः ॥ ४४ ॥ अथापरं महत्तीर्थमत्रैव शृणु मोहिनि ॥ यत्र स्नातो नरो भक्त्या वेदानां पारगो भवेत् ॥ ४५ ॥ सुप्तस्य
ब्रह्मणो वक्त्रान्निर्गतानसुरोऽहरत् ॥ वेदान्हयशिरा नाम देवादीनां भयावहः ॥ ४६ ॥ ततस्तु ब्रह्मणा विष्णुः प्रार्थितः प्रकटोऽभवत् ॥ मत्स्यरूपेण
तं हत्वा वेदान्प्रत्यर्पयद्विधेः ॥४७॥ तच्च तीर्थं महत्पुण्यं सर्वविद्याप्रकाशकम् ॥ तैमिंगिलं महाभागे दर्शनात्पापनाशनम् ॥ ४८ ॥ हयग्रीव
स्वरूपेण भगवान्विष्णुरव्ययः ॥ पुनश्च हत्वा मत्तौ द्वावसुरौ मधुकैटभौ ॥ ४९ ॥ वेदापहारिणौ भूयो वेदान्वै ब्रह्मणे ह्यदात् ॥ तत्तीर्थं सर्वपा

पञ्च स्नानमात्रेण वैधसि ॥ ९० ॥ मात्स्ये चापि हयग्रीवे वेदास्ते द्रवरूपिणः ॥ वर्तंते सर्वदा भद्रे तज्जलं पापनाशनम् ॥ ९१ ॥ तीर्थमिंद्रपदं तत्र विख्यातं वह्निकोणगम् ॥ तत्र स्नात्वा नरो देवि पदमैंद्रमवाप्नुयात् ॥ ९२ ॥ मानसोद्भेदकं चान्यत्तत्र तीर्थं मनोरमम्॥ भिनत्ति हृदयग्रंथिं छिनत्त्यखिलसंशयम् ॥ ९३ ॥ हरत्यंहश्च सकलं मानसोद्भेदकं ततः ॥ कामाकामाभिधं चान्यत्तीर्थं तत्र वरानने ॥९४॥ कामप्रदं कामवतामकामानां तु मोक्षदम् ॥ ततः पश्चिमतो भद्रे वसुधारेति तीर्थकम् ॥ ९५ ॥ तत्र स्नात्वा नरो भक्त्या लभते वांछितं फलम् ॥ अत्र पुण्यवतो यांति दृश्यते जलमध्यगम् ॥ ९६ ॥ यद्दृष्ट्वा न पुनर्जंतुर्गर्भवासं प्रपद्यते ॥ ततो नैर्ऋतिदिग्भागे पंच धाराः पतंत्यधः ॥ ९७ ॥ प्रभासपुष्करगयानैमिषारण्यसंज्ञकाः ॥तासु स्नात्वा पृथङ्मर्त्यस्तत्तत्तीर्थफलं लभेत् ॥ ९८ ॥ ततोऽन्यद्विमलं तीर्थं सोमकुंडापराह्वयम् ॥ यत्र तप्त्वा तपस्तीव्रं सोमः खेटाद्यधीश्वरः ॥ ९९ ॥ तत्र स्नात्वा नरो भद्रे गतदोषः प्रजायते ॥ तत्रान्यद्द्वादशादित्यं तीर्थं पापहरं परम् ॥६०॥ स्नात्वा यत्र नरो भूत्वा तेजसा भास्करोपमः ॥ चतुःस्रोतोऽपरं तत्र तीर्थं तत्राप्लुतो नरः ॥ ६१ ॥ धर्मार्थकाममोक्षांश्च लभते यं यमिच्छति ॥ अथ सप्तपदं नाम तीर्थं तत्र मनोहरम् ॥ ६२ ॥ दर्शनाद्यस्य तीर्थस्य पातकानि महांत्यपि ॥ नश्यंति नियतं तस्य किं पुनः स्नानतः सति ॥ ६३ ॥ त्रिषु लोकेषु कुंडस्य ब्रह्मविष्णुमहेश्वराः ॥ आस्थितास्तत्र मरणान्नरः सत्यपदं लभेत् ॥ ६४ ॥ नरनारायणावासे तीर्थमस्त्यपरं शुभे ॥ उर्वशीकुंडनामात्र स्नातो रूपमनोहरः ॥ ६५ ॥ नारायणप्रियोऽत्यर्थं भवेद्विश्ववशंकरः ॥ ततो दक्षिणदिग्भागे तीर्थमस्त्राभिधं परम् ॥ ६६ ॥ नरनारायणौ यत्र शस्त्रं न्यस्य तपःस्थितौ ॥ आयुधानि तु दिव्यानि शंखचक्रादिकानि च॥६७॥ मूर्तिमंति महाभागे दृश्यंते कृतिभिर्यतः ॥ तत्र स्नात्वा नरो भक्त्या न शत्रोर्भयमाप्नुयात् ॥ ६८॥ मेरुतीर्थं च तत्रास्ति यत्र दृष्ट्वा धनुर्द्धरम् ॥ स्नात्वा च लभते सोऽपि शुभे सर्वान्मनोरथान्॥६९॥ लोकपालाह्वयं नाम तत्रान्यत्तीर्थमुत्तमम्॥लोकपालैस्तपस्तप्तं यत्र तत्राप्लुतो नरः॥७०॥सर्वतीर्थाप्लुतिफलं लभते देवि मानवः॥दंडेनाहत्य हरिणा यतस्तीर्थं विनिर्मितम् ॥ ७१ ॥ दंडपुष्करिणीत्येतत्ततो लोकपसौख्यदम् ॥ भागीरथी यत्र योगं प्राप्ता ह्यलकनंदया॥७२ ॥ तत्तीर्थं सर्वत श्रेष्ठं पुण्ये बदरिकाश्रमे॥तत्र स्नात्वा पितॄन्देवान्संतर्प्याभ्यर्च्य भक्तितः॥७३॥लभते वैष्णवं धाम सर्वदेवनमस्कृतः॥ संगमाद्दक्षिणे भागे धर्मक्षेत्रं शुभानने ॥७४॥तत्क्षेत्रं पावनं मन्ये सर्वतीर्थोत्तमोत्तमम्॥तत्र स्नात्वा नरो भद्रे साध्यसन्निधिभाग्भवेत् ॥७५॥ उर्वशीसंगमं तीर्थं सर्वपापहरं नृणाम्॥कर्मोद्धरा

ह्वयं चान्यद्धरिभक्त्येकसाधनम् ॥७६॥ब्रह्मावर्ताह्वयं तीर्थं ब्रह्मलोकैककारणम्॥गंगाश्रितानि चैतानि तीर्थानि कथितानि ते॥७७॥ब्रह्मापि कात्स्न्र्यतो वक्तुं तत्रस्थानि न वै प्रभुः॥ य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ॥७८॥ सर्वपापविनिर्मुक्तः सोऽपि विष्णुपदं लभेत् ॥मासमात्रं नरो भक्त्या योऽत्र तिष्ठेद्धृतव्रतः॥७९॥स साक्षादेव पश्येत्तु नरनारायणं हरिम् ॥ यत्रैतल्लिखितं देवि माहात्म्यं बदरीभवम्॥८०॥नालपमृत्युर्भवेत्तत्र ह्याधिव्याध्यहिभीस्तथा ॥कल्याणानि सदा तत्र प्रसादात्संति वै हरेः ॥८१॥वर्द्धन्ते सम्पदस्सर्वास्तथा विष्णुप्रसादतः ॥८२॥इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे वसुमोहिनीसंवादे बदरिकाश्रममाहात्म्यं नाम सप्तषष्टितमोऽध्यायः॥६७॥इति बदरिकाश्रममाहात्म्यम्॥

अथ कामोदामाहात्म्यम्॥ मोहिन्युवाच ॥ कामोदायास्तु माहात्म्यं ब्रूहि मे द्विजसत्तम ॥ यच्छ्रुत्वाहं तव मुखात्प्रसन्ना स्यां कृतार्थवत्॥१॥वसुरुवाच॥ शृणु देवि प्रवक्ष्यामि कामोदाख्यानकं शुभम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥२॥ कामोदाख्यं पुरं देवि गंगातीरे व्यवस्थितम्॥ कामोदा यत्र वर्तते सार्द्धं देवैर्हरिप्रियाः ॥ ३ ॥ यदा सुरासुरैर्देवि मथितः क्षीरसागरः ॥ कामोदा सा तदोत्पन्ना कन्यारत्नचतुष्टये ॥ ४ ॥ कन्या रमाख्या प्रथमा द्वितीया वारुणी स्मृता ॥ कामोदाख्या तृतीया तु चतुर्थी तु वराभिधा ॥ ५ ॥ तत्र कन्यात्रयं प्राप्तं विष्णुना प्रभविष्णुना ॥ वारुणी त्वसुरैर्नीता विष्णुदेवाज्ञया सति ॥ ६ ॥ ततः प्रभृति लक्ष्मीस्तु विष्णोर्वक्षस्थले स्थिता ॥ बभूव विष्णुपत्नी सा सपत्नीरहिता शुभे ॥ ७ ॥ भविष्यकार्यं विज्ञाय देवा विष्णुसमाज्ञया ॥ कामोदाख्ये पुरे देवीं कामोदां पूजयंति हि ॥ ८ ॥ सा तत्र वर्ततें नित्यं विष्णुसंयोगकाम्यया ॥ भार्यात्वं भावतः प्राप्ता विष्णुध्यानपरायणा ॥ ९ ॥ स तत्र भावगम्यो वै विष्णुः सर्वगतो महान् ॥ अनयापि तया नित्यं वर्तते तत्समीपतः ॥ १० ॥ स देवैर्वासुरैर्देवि मुनिभिर्मानवैस्तथा ॥ अलक्ष्यदेहो विश्वात्मा वर्तते ध्यानगोचरः ॥११ ॥ ध्यानेनैव प्रपश्यंति देवाश्च मुनयो विभुम् ॥ कामोदा सा महाभागा यदा हसति मोहिनि ॥ १२ ॥ हर्षेण तु समाविष्टा तदाश्रूणि पतंति च ॥ आनंदाश्रूणि गंगायां पतितानि सुरेश्वरि ॥ १३ ॥ कामोदाख्यानि पद्मानि तानि तत्र भवंति च ॥ पीतानि च सुगंधीनि महामोदप्रदानि च ॥ १४ ॥ यस्तु भाग्यवशाल्लब्ध्वा तानि तैः पूजयेच्छिवम् ॥ स लभेद्वांछितान्कामानित्याज्ञा पारमेश्वरी ॥ १५ ॥ दुःखजानि तथाश्रूणि कदाचित्प्रपतंति हि ॥ तेभ्यश्च तानि पद्मानि विगंधीन्युद्भवंति च ॥ १६ ॥ तैस्तु यः पूजयेद्देवं शंकरं लोकशंकरम् ॥ स युज्येताखिलैर्दुःखैः पूर्वपापैर्विमोहितः ॥ १७ ॥ गंगाद्वारादुपरि च दशयोजनके स्थितम् ॥ कामोदं तत्र वर्षैकं यो जपेद्द्वादशाक्षरम् ॥ १८॥ वर्षांते चैत्रमासस्य द्वादश्यां विधिनंदिनि ॥

वासंतीं च श्रियं दृष्ट्वा सा हसेद्धर्षतः सदा ॥ १९ ॥ तानि पद्मानि स लभेन्नान्यदा कोऽपि कर्हिचित् ॥ तत्र यः स्नाति मनुजो विष्णुभक्ति
परायणः ॥ २० ॥ ध्यात्वा पुरं च कामोदं स भवेद्विष्णुवल्लभः ॥ देवतानां पितॄणां च वल्लभो नात्र संशयः ॥ २१ ॥ यो द्वादश समास्तत्र
तिष्ठेज्जपपरायणः ॥ स लभेद्दर्शनं साक्षात्कामोदायाः शुभानने ॥ २२ ॥ यं यं चिंतयते कामं तत्र तीर्थे नरः शुचिः ॥ स्नानमात्रेण लभते
तं तमैहिकमंगने ॥२३ ॥ एतद्धि परमं तीर्थं लभ्यं भाग्यवशाद्भवेत् ॥ हिमात्ययादगे भद्रे दुर्गमं विकटस्थलम् ॥ २४ ॥ एतत्ते सर्वमाख्यातं
कामोदाख्यानकं शुभम् ॥ यः शृणोति नरो भक्त्या सोऽपि पापैः प्रमुच्यते ॥२५ ॥ इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे वसुमोहिनी
संवादे कामोदाख्यानं नामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥ इति कामोदामाहात्म्यं समाप्तम् ॥ अथ सिद्धनाथचरित्रसहितं कामाक्षा
माहात्म्यं प्रारभ्यते ॥ मोहिन्युवाच ॥ श्रुतं कामोदकाख्यानं पापघ्नं पुण्यदं नृणाम् ॥ सांप्रतं श्रोतुमिच्छामि कामाक्षायाः फलं द्विज
॥ १ ॥ वसुरुवाच ॥ कामाक्षा परमा देवी पूर्वस्यां दिशि संस्थिता ॥ सागरानूपतटगा कलौ सिद्धिप्रदा नृणाम् ॥ २ ॥ यस्तत्र गत्वा कामाक्षां
संपूज्य नियताशनः ॥ तिष्ठेदेकां निशां भद्रे स पश्येत्तां दृढासनः ॥ ३ ॥ सा देवी भीमरूपेण याति संदर्शनं नृणाम् ॥ तां दृष्ट्वा न चलेद्यो वै
स सिद्धिं वांछितां लभेत् ॥ ४ ॥ यस्तु दृष्ट्वा सुरेशानीं कामाक्षां भीमरूपिणीम् ॥ आसनाच्चलितः सद्यः स विक्षिप्तो भवेद्ध्रुवम् ॥ ५ ॥ तत्रास्ते
पार्वतीपुत्रः सिद्धनाथो वरानने ॥ उग्रे तपसि लोकैः स प्रेक्ष्यते न कदाचन ॥ ६ ॥ कृतत्रेताद्वापरेषु प्रत्यक्ष दृश्यतेऽखिलैः ॥ कलावंतर्हितस्ति
ष्ठेद्यावत्पादः कलेर्व्रजेत् ॥ ७ ॥ कलेः पादे गते चैकस्मिन्घोरे च धरातले ॥ स वै प्रत्यक्षतां प्राप्य साधयेदखिलं जनम् ॥ ८ ॥मोहनाद्यैरुपा
यैस्तु म्लेच्छप्रायाञ्जनांस्तदा ॥ कृत्वा वशे महाभागे गमयेत्त्रिपदं कलेः ॥ ९ ॥ यस्तत्र गत्वा सिद्धेशं भक्तिभावसमन्वितः ॥ चिंतयेद्वर्षमात्रं
तु कामाक्षां नित्यदार्चयन् ॥ १० ॥ स लभेद्दर्शनं स्वप्ने दर्शनांते समाहितः ॥ सूचितां तेन सिद्धिं स लब्ध्वा सिद्धो भवेद्भुवि ॥ ११ ॥
विचरेत्सर्वलोकानां कामनाः पूरयञ्शुभे ॥ त्रिलोक्यां यानि वस्तूनि तानि संकर्षयेद्बलात् ॥ १२ ॥ स मत्स्यनाथः किल तत्र संस्थो विज्ञानपारं
गम एव भद्रे॥चचार लोकाभिमतं वितन्वंस्तपोऽतिघोरं न च याति दृष्टिम् ॥ १३ ॥ युगान्यनेकानि पुरा भ्रमित्वा लोकान्समग्रानहतेष्टगत्या॥
तपस्थितोऽद्यास्ति महानुभावो न कालवेगेन शुभेऽभिभूतः ॥ १४ ॥ गंडांतजातस्तु पुराभवेऽभूद्द्विजस्य कस्यापि सुतः सुभद्रे ॥ स जातमात्रः
किल पुष्कराख्ये द्वीपेऽस्य पित्रा ह्युदधौ विसृष्टः ॥१५॥ प्रक्षिप्तमात्रं किल तत्र बालं मत्स्योऽग्रसीत्कोऽपि विधेर्नियोगात्॥तत्र स्थितोऽनेकयुगानि

सोऽभूत्कालस्य गत्या ह्यजरामरांगः ॥१६॥ ततः कदाचित्प्रियया प्रदिष्टो महेश्वरः सार्द्धमगप्रसूत्या॥ तत्त्वोपदेशाय जगाम भद्रे स लोकलोकाचलमप्रमेयः ॥ १७ ॥ तत्सौम्यशृंगे मणिभिः प्रदीप्ते स्थित्वा क्षणार्द्धं हरिमग्नचेताः ॥ देवीमुमां संप्रतिबोध्य शक्त्या तालत्रयेणाप्यभिभूय सत्त्वान् ॥ १८ ॥ उवाच तत्त्वं सुरहस्यभूतं यद्द्वादशार्णार्थनिजस्वरूपम् ॥ ततस्तु सा शैलसुता महेशं मारांतक यावदभिप्रणम्य ॥ १९ ॥ अज्ञाय तत्त्वं समवस्थिताऽभूत्तावत्स मत्स्यस्तु महार्णवस्थः॥ द्रुतं समुत्प्लुत्य जगाम शृंगं यो विप्रबालो ह्युदरे स्थितोऽस्य स तत्त्वसिद्धोऽखिलबंधमुक्तः॥२०॥ निर्गम्य मत्स्योदरतः शुभास्ये नमः प्रचक्रे भवयोः पुरस्तात् ॥ विज्ञाततत्त्वोऽपि महेश्वरस्तं पप्रच्छ तद्गर्भगतेर्निदानम् ॥ २१ ॥ स वर्णयामास यथार्थमेव तयोः पुरः सर्वमपि प्रवृत्तम् ॥ आकर्ण्य तद्वृत्तमनुप्रसन्ना सोमा महेशानुमतिं च कृत्वा ॥ २२ ॥ तं कल्पयामास सुतं शुभांगे सोत्संग आस्थाप्य चुचुंब वक्त्रम् ॥ सुतो ममायं किल मत्स्यनाथो विज्ञाततत्त्वोऽखिलसिद्धनाथः ॥ २३ ॥ निजेच्छया संप्रति यातु लोकान्कीर्तिं वितन्वन्सुखमावयोश्च ॥ ततः प्रभृत्येष सुतोंऽबिकाया लोकान्समग्रान्प्रविहृत्य कामम् ॥ २४॥ तत्सिद्धपीठं समवाप्य तत्र तपस्युपादिष्ट इवा स्थितोऽस्ति ॥ तं सिद्धनाथं मनसा विचिंत्य नरो भवेत्सिद्धसमस्तकामः ॥ २५ ॥ संप्राप्य विद्यां निजवाक्यवाहे निमज्जयेत्पंडितवर्गजातम्॥ एतां कथां तस्य जगत्पवित्रां शृणोति यः कर्णपथप्रयाताम् ॥ २६ ॥ स चाभिकामं समवाप्य भूमौ स्वर्गं प्रयात्येव सुरार्चितांघ्रिः ॥ एतन्मया ते कथितं सुनेत्रे श्रीसिद्धनाथस्य चरित्रयुक्तम् ॥ कामाक्षमाहात्म्यमघघ्नमाद्यं भूयोऽपि किं ते प्रवदामि भद्रे ॥ २७ ॥ इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे वसुमोहिनीसंवादे सिद्धनाथचरित्रयुक्तं कामाक्षामाहात्म्यं नामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ इति सिद्धनाथचरित्रसहितं कामाक्षामाहात्म्यं समाप्तम् ॥ अथ प्रभासमाहात्म्यं प्रारभ्यते॥ मोहिन्युवाच॥ प्रभासस्य तु माहात्म्यं वद मे द्विजसत्तम ॥ यच्छ्रुत्वाहं प्रसन्नात्मा धन्या स्यां त्वत्प्रसादतः ॥ १ ॥ वसुरुवाच ॥ शृणु देवि प्रवक्ष्यामि प्रभासाख्यं सुपुण्यदम् ॥ तीर्थं पापहरं नृणां भुक्तिमुक्तिप्रदायकम् ॥ २ ॥ यस्मिन्नसंख्यतीर्थानि विद्यंते विधिनंदिनि ॥ सोमेशो यत्र विश्वेशो भगवान् गिरिजापतिः ॥ ३ ॥ स्नात्वा प्रभासके तीर्थे सोमनाथं प्रपूज्य च ॥ नरो मुक्तिमवाप्नोति सत्यमेतन्मयोदितम् ॥४॥ योजनानां दश द्वे च प्रभासपरिमंडलम् ॥ मध्येऽस्य पीठिका प्रोक्ता पंचयोजनविस्तृता ॥ ५ ॥ गोचर्ममात्रं तन्मध्ये तीर्थं कैलासतोऽधिकम् ॥ अर्कस्थलं तत्र पुण्यं तीर्थमन्यत्सुशोभनम् ॥ ६ ॥ सिद्धेश्वरा

---

(१) अत्र पद्ये चरणमेकमधिकं पुस्तकद्वयेऽपि ।

दिलिंगानि यत्र संति सहस्रशः ॥ तत्र स्नात्वा नरो भक्त्या संतर्प्य पितृदेवताः ॥ ७ ॥ लिंगानि पूजयित्वा च याति रुद्रसलोकताम् ॥
अग्नितीर्थं तथान्यच्च सागरस्य तटे स्थितम् ॥ ८ ॥ तत्र स्नात्वा नरो देवि वह्निलोकमवाप्नुयात् ॥ तत्र देवं कपर्दीशं सोपवासः प्रपूज्य
च ॥ ९ ॥ शिवलोकमवाप्नोति भुक्त्वा भोगानिहेप्सितान् ॥ केदारेशं ततो गत्वा समभ्यर्च्य विधानतः ॥ १० ॥ स्वर्गतिं समवाप्नोति
विमानेन सुरार्चितः ॥ भीमेशं भैरवेशं च चंडीशं भास्करेश्वरम् ॥ ११ ॥ अंगारेशं च गुर्वीशं सोमेशं भृगुजेश्वरम् ॥ शनिराहुशिखीशांश्च क्रमा
द्रच्छेच्चतुर्दश ॥ १२ ॥ भक्त्या पृथक् पृथक् तेषां पूजां कृत्वा विधानवित् ॥ शिवसालोक्यमाप्नोति निग्रहानुग्रहे क्षमः ॥ १२ ॥ सिद्धश्वरादिपंचा
न्यलिंगानि विधिनंदिनि ॥ समर्च्य लभते सिद्धिमैहिकामुष्मिकीं नरः ॥ १४ ॥ वरारोहाःमजापालं मंगलां ललितश्वरीम् ॥ संपूज्य क्रमतश्चैता
विपापो जायते नरः ॥ १५ ॥ लक्ष्मीश्वरं बाडवेशमर्घ्येशं कामकेश्वरम् ॥ समभ्यर्च्य नरो भक्त्या साक्षाल्लोकेशतां व्रजेत् ॥ १६ ॥
गौरीतपोवनं प्राप्य गौरीशवरुणेश्वरौ ॥ उषेश्वरं च संपूज्य नरः स्वर्गतिमाप्नुयात् ॥ १७ ॥ गणेशं च कुमारेशं स्वाककेशकुलेश्वरौ ॥
उत्तंकेशं च वह्नीशं गौतमं दैत्यसूदनम् ॥ १८ ॥ समभ्यर्च्य विधानेन न नरो दुर्गतिं व्रजेत् ॥ चक्रतीर्थं ततः प्राप्य तत्र स्नात्वा विधानतः
॥ १९ ॥ गौरीदेवीं समभ्यर्च्य नरोऽभिलषितं लभेत् ॥ संनिहत्याह्वयं तीर्थं प्राप्य तत्र वरानने ॥ २० ॥ स्नात्वा संतर्प्य देवादीन्सन्निहत्याफलं
लभेत् ॥ अथैकादश लिंगानि भूतेशादीनि योऽर्चयेत् ॥ २१ ॥ स लब्ध्वेह वरान्भोगानंते रुद्रपदं व्रजेत् ॥ आदिनारायणं देवं समभ्यर्च्य नरो
त्तमः ॥ २२ ॥ मोक्षभागी भवेद्देवि नात्र कार्या विचारणा ॥ ततश्चक्रधरं प्राप्य पूजयेद्यो विधानतः ॥ २३ ॥ स तु शत्रुं विनिर्जित्य भोगानुच्चाव
चाँल्लभेत् ॥ सांबादित्यं ततः प्राप्य स्नात्वा नियमपूर्वकम् ॥ २४ ॥नीरोगो धनधान्याढ्यो जायते मानवो भुवि ॥ ततस्तु मनुजः प्राप्य देवीं
कंटकशोधिनीम् ॥२५॥ महिषघ्नीं च संपूज्य निर्भयो जायते नरः ॥ कपालीशं च कोटीशं समभ्यर्च्य नरोत्तमः ॥२६॥ सुसौभाग्यो भवेदेवं मध्य
यात्रां समापयेत्॥बालब्रह्माभिधं पश्चात्प्राप्य मर्त्यो नरेश्वरि॥२७॥जायते भुक्तिमुक्तीशः सर्वदेवप्रपूजितः॥नरकेशं ततः प्राप्य संवर्तेशं निधीश्वरम्॥२८॥
बलभद्रेश्वरं प्रार्च्य जायते भुक्तिमुक्तिमान् ॥ गंगागणपतिं प्राप्य समभ्यर्च्य विधानतः ॥ २९ ॥ लभते वांछितान्कामानिह लोके परत्र च ॥
ततो जांबवतीं प्राप्य नदीं भक्त्या समाहितः ॥ ३० ॥ स्नात्वा सुरादीनभ्यर्च्य कृतकृत्यो भवेन्नरः ॥ पांडुकूपे ततः स्नात्वा पांडवेश्वरमर्चयेत्
॥ ३१ ॥ स नरः स्वर्गमायाति क्रीडते नंदनादिषु ॥ शतमेधं लक्षमेधं कोटिमेधमनुक्रमात ॥३२॥ लिंगत्रयं समभ्यर्च्य मोदते दिवि देववत् ॥ दुर्वा

सादित्यकं दृष्ट्वा संपूज्य च विधानतः ॥ ३३ ॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥ यादवस्थलमासाद्य वर्षेशं प्रार्च्य मानवः ॥ ३४ ॥
लभते वांछितां सिद्धिं देवराजेन सत्कृतः ॥ हिरण्यासंगमे स्नात्वा दद्याद्धेमरथं द्विजे ॥ ३५ ॥ शिवमुद्दिश्य यो भक्त्या स लोकानक्षयाँल्ल
भेत् ॥ नगरार्कं ततः प्रार्च्य सूर्यलोकमवाप्नुयात् ॥ ३६ ॥ नगरादित्यपार्श्वे तु बलकृष्णौ सुभद्रिकाम् ॥ दृष्ट्वा संपूज्य विधिना कृष्णसायुज्य
माप्नुयात् ॥ ३७ ॥ कुमारिकां ततः प्राप्य समभ्यर्च्य विधानतः ॥ लभते वांछितान्कामाञ्जयेच्छक्रं न संशयः ॥ ३८ ॥ क्षेत्रपालं ततोऽभ्यर्च्य सर्वा
न्कामानवाप्नुयात् ॥ ब्रह्मेश्वरं च संपूज्य सरस्वत्यास्तटे स्थितम् ॥ ३९ ॥ सर्वपापविनिर्मुक्तो ब्रह्मलोके महीयते ॥ पिंगलाख्यां नदीं प्राप्य
स्नात्वा तत्र सुरादिकान् ॥ ४० ॥ संतर्प्य श्राद्धकृन्मर्त्यो नेह भूयोऽभिजायते ॥ संगमेशं समभ्यर्च्य न नरो दुर्गतिं व्रजेत् ॥ ४१ ॥ संप्रार्च्य
शंकरादित्यं घटेशं च महेश्वरम् ॥ मानवः सकलान्कामान्प्राप्नुयान्नात्र संशयः ॥ ४२ ॥ ऋषितीर्थं ततः प्राप्य स्नात्वा नियतमानसः ॥ ऋषीं
स्तत्र समभ्यर्च्य सर्वतीर्थफलं लभेत् ॥ ४३ ॥ नंदादित्यं ततः प्रार्च्य मुच्यते सर्वरोगतः ॥ त्रितकूपं ततः प्राप्य स्नात्वा याति दिव नरः ॥ ४४ ॥
शशोपाने नरः स्नात्वा देवान्पश्यति मोहिनि॥वांछितांश्च लभेत्कामान्सत्यं सत्यं मयोदितम् ॥ ४५ ॥ पर्णादित्यं नरो दृष्ट्वा नीरोगो भोगवान्भवेत् ॥
ततो न्यंकुमतीं प्राप्य स्नात्वा तत्र विधानतः ॥ ४६ ॥ सिद्धेश्वरं समर्च्यात्र अणिमादिकसिद्धिभाक् ॥ वाराहस्वामिनं दृष्ट्वा मुच्यते भवसाग
रात् ॥ ४७ ॥ छायालिंगं समभ्यर्च्य मुच्यते सर्वपातकैः ॥ गुल्फं दृष्ट्वा नरोऽभ्यर्च्य चांद्रायणफलं लभेत् ॥ ४८ ॥ देवीं कनकनंदां च
समभ्यर्च्य नरः सति ॥ सर्वान्कामानवाप्नोति देहांते स्वर्गतिं लभेत् ॥ ४९ ॥ कुंतीश्वरं समभ्यर्च्य मुच्यते सर्वपातकैः ॥ गंगेश्वरं समभ्यर्च्य
गंगायां मनुजः प्लुतः ॥५० ॥ त्रिविधेभ्योऽपि पापेभ्यो मुच्यते नात्र संशयः ॥ चमसोद्भेदके स्नात्वा पिंडदान करोति यः ॥ ५१ ॥ गयाकोटि
गुणं पुण्यं स लभेन्नात्र संशयः ॥ ततस्तु विधिजे गत्वा विदुराश्रममुत्तमम् ॥ ५२ ॥ त्रिगं त्रिभुवनेशं च संपूज्यात्र सुखी भवेत् ॥ मंक
णेश्वरमभ्यर्च्य लभते सद्गतिं नरः ॥ ५३ ॥ त्रैपुरं च त्रिलिंगं तु प्रार्च्य पापैः प्रमुच्यते ॥ षंडतीर्थं ततः प्राप्य स्नात्वा स्वर्णप्रदो नरः ॥ ५४. ॥
सर्वपापविशुद्धात्मा शैवं पदमवाप्नुयात् ॥ सूर्यप्राच्यां नरः स्नात्वा विपाप्मा भोगवान्भवेत्॥५५॥त्रिलोचने नरः स्नात्वा रुद्रलोकमवाप्नुयात्॥
देविकायामुमानाथं समर्च्य मनुजोत्तमः ॥ ५६ ॥ लभते वांछितान्कामान्देहांते स्वर्गमाप्नुयात् ॥ भूद्वारं तु समभ्यर्च्य लभते वांछितं फलम्
॥ ५७ ॥ शूलस्थाने तु वाल्मीकिं नमस्कृत्य कविर्भवेत् ॥ च्यवनार्कं ततः प्रार्च्य सर्वकामसमृद्धिमान् ॥ ५८ ॥ च्यवनेशार्चनान्मर्त्यः शिव

स्यानुचरो भवेत् ॥ प्रजापालेशमभ्यर्च्य धनधान्यान्वितो भवेत् ॥ ५९ ॥ बालार्कपूजको मर्त्यो विद्यावान्धनवान् भवेत् ॥ कुबेरस्थानके
स्नात्वा निधिं प्राप्नोति निश्चितम् ॥ ६० ॥ ऋषितोयनदीं प्राप्य स्नात्वा तत्र नरः शुचिः ॥ दत्वा सुवर्णं विप्राय मुच्यते सर्वपातकैः
॥ ६१ ॥ संगालेश्वरमभ्यर्च्य रुद्रलोके महीयते ॥ नारदादित्यमभ्यर्च्य त्रिकालज्ञानवान्भवेत् ॥ ६२ ॥ ततो नारायणं प्रार्च्य मुक्तिभागी
नरो भवेत् ॥ तप्तकुंडोदके स्नात्वा मूलचंडीशमर्चयेत् ॥ ६३ ॥ सर्वपापविनिर्मुक्तो वांछितार्थं लभेन्नरः ॥ विनायकं
चतुर्वक्रमभ्यर्च्याप्नोति कामितम् ॥ ६४ ॥ कलंबेश्वरमभ्यर्च्य धनधान्यसमृद्धिमान् ॥ गोपालस्वामिपूजातो गोमान्वै धनवान्कविः
॥ ६५ ॥ बकुलस्वामिनोऽभ्यर्चा नृणां स्वर्गतिदायिनी ॥ संपूज्य मारुतां देवीं सर्वकामफलं लभेत् ॥ ६६ ॥ क्षेमादित्यार्चनान्मर्त्यः क्षेमी
सिद्धार्थसत्यभाक् ॥ उन्नताख्यं विघ्नराजं प्रार्च्य विघ्नैर्न हन्यते ॥ ६७ ॥ जलस्वामी कालमेघः पूजितौ सर्वसिद्धिदौ ॥ रुक्मिणी पूजिता देवी
वांछितार्थप्रदा नृणाम् ॥ ६८ ॥ दुर्वासेशं च पिंगेशं प्रार्च्य पापैर्विमुच्यते ॥ भद्रायाः संगमे स्नात्वा नरो भद्राणि पश्यति ॥ ६९ ॥ शंखावर्ते
नरः स्नात्वा सर्वसिद्धीश्वरो भवेत् ॥ मोक्षतीर्थे नरः स्नात्वा भवेन्मुक्तो भवार्णवात् ॥ ७० ॥ गोष्पदस्नानमात्रेण सर्वसौख्यमवाप्नुयात् ॥नारायणगृहे
गत्वा नरो भूयो न शोचति ॥ ७१ ॥ जालेश्वरार्चनात्पुंसां सिद्धयः स्युरभीप्सिताः ॥ स्नातो हुंकारकूपे तु गर्भवासं न चाप्नुयात् ॥ ७२ ॥
तथा चंडीशमभ्यर्च्य सर्वतीर्थफलं लभेत् ॥ विघ्नेशमाशापुरगं प्रार्च्य विघ्नं न चाप्नुयात् ॥ ७३ ॥ कलाकुंडाप्लुतो मर्त्यो मुक्तिभागी न संशयः ॥
कपिलेशं समभ्यर्च्य कपिलायूथमाप्नुयात् ॥ ७४ ॥ जरद्गवेश्वरं प्रार्च्य जरसा नाभिभूयते ॥ नलेश्वरार्चको भोगी कर्कोटेशार्चको
धनी ॥ ७५ ॥ हाटकेश्वरपूजातः पूर्यंते सर्वकामनाः ॥ नारदेशार्चको भक्तिं लभेद्विष्णौ च शंकरे ॥ ७६ ॥ स्वर्गार्हो जायतेऽभ्यर्च्य देवीं
मंत्रविभूषणाम् ॥ दुर्गकूटं गणपतिं पूजयित्वा सुखी भवेत् ॥ ७७ ॥ धनधान्ययुतो भूयात्पूजयन्कौरवेश्वरीम् ॥ सुपर्णेलां भैरवीं च पूजयित्वा
सुखी भवेत् ॥७८॥ भल्लतीर्थे नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥ कर्दमाले नरः स्नात्वा पातकैर्विप्रयुज्यते ॥ ७९ ॥ गुप्तसोमेश्वरं दृष्ट्वा न
भूयोऽर्हति शोचितुम् ॥ बहुस्वर्णेश्वरं दृष्ट्वा स्वर्गतिं समवाप्नुयात् ॥ ८० ॥ शृङ्गेश्वरार्चको मर्त्यो न दुःखैरभिभूयते ॥ तीर्थे नारायणे
स्नात्वा मुक्तिमाप्नोति मानवः ॥ ८१ ॥ मार्कंडेश्वरमभ्यर्च्य दीर्घायुर्जायते नरः ॥ तथा कोटीह्रदे स्नात्वाभ्यर्च्य कोटीश्वरं सुखी
॥ ८२ ॥ सिद्धस्थाने पुनः स्नात्वा तत्र लिंगानि पूजयेत् ॥ असंख्यातानि यो मर्त्यः स सिद्धो जायते भुवि ॥ ८३ ॥ दामोदरगृहं

दृष्ट्वा सुखमाप्नोत्यनुत्तमम् ॥ वस्त्रापथं प्रभासस्य नाभिस्थाने स्थितं शुभे ॥ ८४ ॥ तत्राभ्यर्च्य भवं साक्षाद्भवेद्भवसमः स्वयम् ॥
दामोदरे स्वर्णरेखा ब्रह्मकुंडं च रैवते ॥ ८५ ॥ कुंतीश उज्जयंते तु भीमेशश्च महाप्रभः ॥ मृगीकुंडं च सर्वस्वं क्षेत्रे वस्त्रापथे स्मृतम्
॥ ८६ ॥ एतेषु क्रमशः स्नात्वा देवानभ्यर्च्य यत्नतः ॥ पितॄन्संतर्प्य तोयेन सर्वतीर्थफलं लभेत् ॥ ८७ ॥ दुन्नाबिले नरः स्नात्वा भुक्तभोगो
दिवं व्रजेत् ॥ गंगेश्वरं ततोऽभ्यर्च्य गंगास्नानफलं लभेत् ८८ ॥ गिरौ रैवतके देवि सति तीर्थान्यनेकशः ॥ तेषु स्नात्वा नरो भक्त्या ब्रह्मवि
ष्णुमहेश्वरान् ॥ ८९ ॥ इंद्रादिलोकपान्प्रार्च्य भुक्तिं मुक्तिं च विंदति ॥ एतान्युद्देशतस्तीर्थान्युक्तानि तव सुंदरि ॥ ९० ॥ अवांतराण्यनंतानि
तानि वक्तुं न शक्यते ॥ एकैकस्यापि तीर्थस्य संति विस्तरतः कथाः ॥ ९१ ॥ अतः संक्षिप्य गदितं मया पुण्यं प्रभासजम् ॥ न प्रभाससमं
तीर्थं त्रिषु लोकेषु मोहिनि ॥९२॥ यत्र स्नातोऽपि मनुजः स्वर्गिणा स्पर्द्धते शुभे ॥ माहात्म्यं च प्रभासस्य लिखितं वर्तते गृहे ॥ ९३ ॥ यत्र तत्र
न भीतिः स्याद्भूतचौराहिशत्रुजा ॥ यः शृणोति नरो भक्त्या श्रावयेद्वा समाहितः॥९४॥प्रभासतीर्थमाहात्म्यं सोऽपि सद्गतिमाप्नुयात् ॥९५॥ इति
श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे वसुमोहिनीसंवादे प्रभासतीर्थमाहात्म्यं नाम सप्ततितमोऽध्यायः॥७०॥इति प्रभासक्षेत्रमाहात्म्यं समाप्तम्॥
अथ पुष्करमाहात्म्यं प्रारभ्यते॥मोहिन्युवाच॥श्रुतं प्रभासमाहात्म्यं द्विजश्रेष्ठातिपुण्यदम्॥अधुना श्रोतुमिच्छामि माहात्म्यं पुष्करोद्भवम् ॥ १ ॥यदाद्यं सर्व
तीर्थानां पवित्रं पापनाशनम्॥मत्पितुर्यज्ञसदनं तन्ममाख्याहि विस्तरात्॥२॥वसुरुवाच॥शृणु भद्रे प्रवक्ष्यामि नराणां कामदं सदा॥पुण्यं पुष्करमाहात्म्य
बहुतीर्थसमन्वितम् ॥ ३॥ विष्णुना सहिता देवा यत्रेन्द्राद्या व्यवस्थिताः ॥ गजवक्त्रः कुमारश्च रैवतश्च दिवाकरः ॥ ४ ॥ शिवदूती तथा
देवी क्षेत्रक्षेमंकरी सदा ॥ज्येष्ठे तु पुष्करारण्ये यस्तिष्ठति निरुद्यमी ॥ ५ ॥ अष्टांगयोगजं पुण्यं स लभेन्नात्र संशयः ॥ नातः परतरं किंचि
त्क्षेत्रमस्तीह भूतले ॥६॥ तस्मात्सर्वप्रयत्नेन सेव्यमेतन्नरोत्तमैः ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वा क्षेत्रवासिनः ॥ ७ ॥ सर्वात्मना ब्रह्मभक्ता
भूतानुग्रहकारिणः ॥ ते यांति ब्रह्मणो लोकं यत्र गच्छंति योगिनः ॥८॥यो नरः सर्वतीर्थेषु यत्फलं लभते प्लुतः॥तत्सर्वं स लभेन्मर्त्यो ज्येष्ठकुंडे
सकृत्प्लुतः ॥ ९ ॥ पुष्करारण्यमासाद्य यत्र प्राची सरस्वती ॥ मतिः स्मृतिर्दया प्रज्ञा मेधा बुद्धिसमाह्वया ॥१०॥तत्रस्थं तज्जलं येऽपि प्रपश्यंति
तटे स्थिताः ॥ तेऽप्यश्वमेधयज्ञस्य फलं प्राप्य व्रजंति कम् ॥ ११ ॥ त्रीणि शृंगाणि शुभ्राणि त्रीणि प्रस्रवणानि च ॥ ज्येष्ठमध्यकनिष्ठानि
त्रीणि तत्र सरांसि च ॥ १२ ॥ तत्रान्यत्सुमहत्तीर्थं नंदा नाम सरस्वती ॥ यत्र पश्चिमदिश्यास्ते सरसो योजने सति ॥ १३ ॥ तत्र स्नात्वा

विधानेन गां च दत्त्वा पयस्विनीम् ॥ विप्राय वेदविदुषे व्रजेद्ब्रह्मक्षय नरः ॥ १४ ॥ कोटितीर्थं तथात्रास्ति यत्रर्षिकोटिरागता ॥ तत्र स्नात्वा
द्विजान्प्राच्र्य मुच्यते सर्वपातकैः ॥ १५ ॥ अगस्त्याश्रममासाद्य स्नात्वा संपूज्य कुंभजम् ॥ दीर्घायुर्जायते भोगी देहांते स्वर्गतिं लभेत् ॥ १६ ॥
सप्तर्षीणां तथा प्राप्य तत्राश्रममनन्यधीः ॥ स्नात्वा संपूज्य भक्त्या ताँल्लभते तत्सलोकताम् ॥ १७ ॥ मनूनामाश्रमे स्नात्वा पूजामाप्नोति
सर्वतः ॥ गंगाविनिर्गमे स्नात्वा गंगास्नानफलं लभेत्॥ १८ ॥ ज्येष्ठे तु पुष्करे स्नात्वा गां च दत्त्वा द्विजातये॥भुक्त्वेह भोगानखिलान्ब्रह्मलोके
महीयते ॥ १९ ॥ मध्यमे पुष्करे स्नात्वा ब्राह्मणाय महीं ददत् ॥ विष्णुलोकमवाप्नोति विमानवरमास्थितः ॥ २० ॥ कनिष्ठे तु नरः
स्नात्वा दत्त्वा विप्राय कांचनम् ॥ सर्वान्कामानवाप्यांते रुद्रलोके महीयते ॥ २१ ॥ ततो विष्णुपदे स्नात्वा दत्त्वा किञ्चिद्द्विजातये ॥ लभते
सकलान्कामान् विष्णोश्चैव प्रसादतः ॥ २२ ॥ नागतीर्थे ततः स्नात्वा नागानभ्यर्च्य मानवाः ॥ दत्त्वा दानं द्विजातिभ्यो मोदते त्रिदिवे
युगम् ॥ २३ ॥ पिशाचतीर्थके स्नात्वा दत्त्वा विप्राय भोजनम् ॥ न कदाचित्पिशाचत्वं प्राप्नोति त्रिदिवं व्रजेत् ॥ २४ ॥ शिवदूतीह्रदे
स्नात्वा तत्र शंभुं समर्च्य च ॥ विप्रान्संभोज्य मिष्टान्नं स्वर्गलोके महीयते ॥ २५ ॥ आकाशपुष्करे स्नात्वा मंत्रयोगफलप्रदे ॥ नरो मुक्तिम
वाप्नोति सत्यं सत्यं तवोदितम् ॥ २६ ॥ आपोहिष्ठादिभिर्मंत्रैराकाशस्थं विचिंत्य तत् ॥ स्नायाद्यः पुष्करारण्ये स लभेच्छाश्वतं पदम् ॥ २७ ॥
आग्नेयं तु यदा ऋक्षं कार्तिक्यां भवति क्वचित् ॥ महती सा तिथिस्तत्र स्नानमाकाशपुष्करे ॥ २८ ॥ याम्यर्क्षयोगे कार्तिक्यां मध्यमे
स्नानकृन्नरः ॥ तत्फलं समवाप्नोति यन्नभःपुष्करोद्भवम् ॥ २९ ॥ प्राजापत्यर्क्षयुक्तायां कार्तिक्यां तु कनिष्ठके ॥ स्नातस्तत्फलमाप्नोति
यद्दिव्यत्पुष्करोद्भवम् ॥ ३० ॥ नंदा चार्के गुरौ सोमे याम्ये वह्नौ विधौ क्रमात् ॥ यदा नभःपुष्करोत्थं तदा स्यात्सकलं फलम्
॥ ३१ ॥ विशाखायां यदा भानुः कृत्तिकायां च चंद्रमाः ॥ तदा नभःपुष्कराख्ये योगे स्नातो दिवं व्रजेत् ॥ ३२ ॥ अंतरिक्षावती
र्णेऽस्मिंस्तीर्थे पैतामहे शुभे ॥ कुर्वंति ये नराः स्नानं तेषां लोका महोदयाः ॥ ३३ ॥ पंचस्रोतःसरस्वत्यां पुष्करारण्यके सति ॥
कृतानि मुनिभिः सिद्धैस्तीर्थान्यायतनानि च ॥३४॥ तेषु सर्वेषु विज्ञेया धर्महेतुः सरस्वती ॥ हाटकक्षितिगौरीणां दानं तेषु महाफलम् ॥ ३५ ॥
धान्यान्यपि तिलांश्चापि योऽत्र दद्याद्द्विजोत्तमे ॥ स नरो लभते भोगानिहामुत्र परां गतिम् ॥ ३६ ॥ संगे गंगासरस्वत्योर्यः स्नात्वा पूजये
द्द्विजान् ॥ स प्राप्नोति गतिं चाग्र्यां भुक्त्वा भोगानिहेप्सितान् ॥ ३७ ॥ अवियोगाभिधायां तु वाप्यां स्नात्वा नरः सति ॥ पिंड दत्त्वा विधानेन

पितॄन्नयति वै दिवम् ॥ ३८ ॥ तथा सौभाग्यकूपे तु स्नात्वा संतर्प्य पूर्वजान् ॥ सद्गतिं लभते मर्त्यो सौभाग्यं चातुलं भुवि ॥ ३९ ॥ मर्यादा पर्वतौ द्वौ तु स्नात्वा स्पृष्ट्वा समर्च्य च ॥ वांछिताँल्लभते लोकान्सांगयात्राफलं तथा ॥ ४० ॥ अजगंधं शिवं प्राप्य समभ्यर्च्य विधानतः ॥ लभते वांछितान्कामानिह लोके परत्र च ॥ ४१ ॥ सरसो दक्षिणे भागे सावित्रीं पर्वतोपरि ॥ संस्थितां यः समभ्यर्चेत्सोऽपि वेदस्य तत्त्ववित् ॥ ४२ ॥ वाराहस्य नृसिंहस्य ब्रह्मणश्च हरेस्तथा ॥ शिवस्य चापि सूर्यस्य सोमस्य च गुहस्य च ॥ ४३ ॥ पार्वत्या ज्वलनस्यापि तत्र तीर्थानि मोहिनि ॥ पृथक् तेषु महाभागे नरः स्नात्वा समाहितः ॥ ४४ ॥ दानं च दत्त्वा विप्रेभ्यो लभते गतिमुत्तमाम् ॥ पुष्करे दुर्लभं स्नानं पुष्करे दुर्लभं तपः ॥ ४५ ॥ पुष्करे दुर्लभं दानं पुष्करे दुर्लभा स्थितिः ॥ शतयोजनसंस्थोऽपि स्नानकाले तु यो नरः॥ ४६॥ पुष्करं चिंतयेद्भक्त्या स तत्स्नानफलं लभेत् ॥ मंकणाद्यास्तपःसिद्धाः सेवन्ते पुष्करं मुदा ॥४७ ॥यत्र तत्र गतो भाग्यात्कामितां सिद्धिमाप्नुयात् ॥ पुष्करेति च नामापि यनोक्तं विधिनंदिनि ॥ ४८ ॥ पुष्करस्नानजं पुण्यं लभेत्सोऽपि न संशयः ॥ यः शृणोति नरो भक्त्या माहात्म्यं पुष्करस्य च ॥ ४९ ॥ सोऽपि स्नानफलं प्राप्य मोदते दिवि देववत् ॥ ५० ॥ इति श्रीबृहन्नारदीयपुराणोत्तरभागे वसुमोहिनीसंवादे पुष्करमाहात्म्यं नामैकसप्ततितमोऽध्यायः ॥ ७१ ॥ इति पुष्करमाहात्म्यं समाप्तम्॥ अथ गौतमाश्रममाहात्म्यं प्रारभ्यते॥ मोहिन्युवाच॥श्रुतं पुष्करमाहात्म्यं वसो पापप्रणाशनम्॥गौतमाश्रममाहात्म्यमधुना कीर्तय प्रभो॥१॥वसुरुवाच॥शृणु देवि प्रवक्ष्यामि गौतमाश्रममुत्तमम्॥यत्र गत्वा नरो भक्त्या न भूयोऽर्हति यातनाः ॥ २ ॥ गौतमस्याश्रमं पुण्यं देवर्षिगणसेवितम् ॥ सर्वपापप्रशमनं सर्वोपद्रवशांतिदम् ॥ ३ ॥ सेवते द्वादशाब्दं यो भक्तिभावसमन्वितः ॥ स शैवं लभते धाम यत्र गत्वा न शोचति ॥ ४ ॥ मायादेवीसुतो यत्र तपस्युग्रे समास्थितः ॥ तत्र गोदावरी गंगा सर्वपातकनाशिनी ॥ ५ ॥ तपस्यतो मुनेस्तस्य द्वादशाब्दमवर्षणम् ॥बभूव घोरं विधिजे सर्वसत्त्वक्षयंकरम् ॥ ६ ॥ तस्मिन्नुग्रे तु दुर्भिक्षे क्षुत्क्षामा मुनयोऽखिलाः ॥ नानादेशेभ्य आयाता गौतमस्याश्रमं शुभे ॥ ७ ॥ चक्रुर्विज्ञापनं तस्य गौतमस्य तपस्यतः ॥ देहि नो भोजनं येन प्राणास्तिष्ठंति वर्ष्मसु ॥ ८ ॥ एवं विज्ञापितस्तैस्तु मुनिभिर्गौतमो मुनिः ॥ जातानुकंपस्तानाह विश्वस्तांस्तपसो बलात् ॥ ९ ॥ गौतम उवाच ॥ तिष्ठध्वं मुनयः सर्वे ममाश्रमसमीपतः ॥ भोजनं वः प्रदास्यामि यावद्दुर्भिक्षमाहतः ॥ १० ॥ विश्वास्यैवमृषीन्सर्वान्गौतमस्तपसो बलात्॥ दध्यौ प्रसन्नमनसा गंगां सर्वार्थसाधिनीम् ॥ ११ ॥ स्मृतमात्रा तु सा देवी तत्रोद्भूता धरातलात् ॥ तां तु दृष्ट्वा मुनिर्गंगां

संप्लावितधरातलाम् ॥१२ ॥ प्रातरुप्त्वा क्षितौ शालीन्पक्वान्मध्याह्नकेऽलुनात् ॥ शाल्यन्नेन ततस्तेन तानृषीन्समभोजयत् ॥ १३॥ ततस्ते मुनयः
प्रीता भुक्त्वान्नं तृप्तिमागताः ॥ निवासं चक्रिरे तत्र गौतमाश्रमके मुदा ॥ १४ ॥ एवं प्रतिदिनं भद्रे शालिभिः पक्वतां गतैः ॥ आतिथ्यं विदधे
तेषां भक्तिभावसमन्वितः ॥ १५ ॥ ततस्तस्य मुनींद्रस्य द्विजान्भोजयतोऽन्वहम् ॥ व्यतीयाय च दुर्भिक्षं द्वादशाब्दांतकालतः ॥ १६ ॥ ततस्ते
मुनयः सर्वे सुभिक्षे काल आगते ॥ विज्ञाप्य तं मुनिश्रेष्ठं जग्मुर्देशान्स्वकान्पुनः ॥ १७ ॥ एवंप्रभावः स मुनिर्गौतमस्तत्र मोहिनि ॥
तपस्तेपे बहुतिथं कालं नियमितेंद्रियः ॥ १८ ॥ ततस्तत्तपसा तुष्टो भगवानंबिकापतिः ॥ सगणो दर्शनं यातो वरं ब्रूहीत्युवाच ह ॥ १९ ॥
ततो मुनिवरो दृष्ट्वा देवदेवमुमापतिम् ॥ त्र्यंबकं स नमश्चक्रे निपत्य भुवि तत्पुरः ॥ २० ॥ तत उत्थाय सहसा कृतांजलिरुपस्थितः ॥
प्रोवाच देहि मे भक्तिं पादयोस्तव नित्यदा ॥ २१ ॥ ममाश्रमसमीपेऽत्र पर्वतोपरि शंकर ॥ त्वामेवं संस्थितं पश्याम्येष एव वरो मम ॥ २२ ॥
इत्युक्तः पार्वतीनाथो भक्तानां वांछितप्रदः ॥ तत्र दत्त्वा स्वसान्निध्यं सद्यः प्रीतं चकार तम् ॥ २३ ॥ तेन रूपेण तत्रैव न्यवसत्त्र्यंबकः
सति ॥ स गिरिस्त्र्यंबकाख्यस्तु ततः प्रभृति कीर्त्यते ॥ २४ ॥ ये तु गोदावरीं गंगां प्राप्य भक्तियुता नराः ॥ स्नानं कुर्वंति सुभगे ते स्यु
र्मुक्ता भवार्णवात् ॥ २५ ॥ स्नात्वा गोदावरीतोये त्र्यंबकं ये गिरिस्थितम् ॥ उपचारैः पूजयंति ते स्युः साक्षान्महेश्वराः ॥ २६ ॥ त्र्यंबकस्य
तु माहात्म्यं संक्षेपाद्वर्णितं मया ॥ ब्रह्मापि विस्तराद्वक्तुं तव तातः क्षमो नहि ॥ २७ ॥ ततो गोदावरी यावत्साक्षाद्दर्शनतां गता ॥
तावदप्याश्रमाः पुण्यास्तत्र संति ह्यनेकशः ॥ २८ ॥ तेषु स्नात्वा विधानेन संतर्प्य पितृदेवताः ॥ नरोऽभिलषितान्कामान्प्राप्नुयान्नात्र संशयः
॥ २९ ॥ प्रकाशा तु क्वचिद्भद्रे क्वचिद्गुप्ता ततः परम् ॥ प्लावयामास धरणीं पुण्या गोदावरी नदी ॥ ३० ॥ यत्र प्रकटतां याता नृणां भक्त्या
महेश्वरी ॥ तत्र तीर्थं महत्पुण्यं स्नानमात्रादघापहम् ॥ ३१ ॥ ततः पंचवटीं प्राप्य सा देवी नियतव्रता ॥ सुप्रकाशमनुप्राप्ता लोकानां
गतिदायिनी ॥ ३२ ॥ गोदावर्यां पञ्चवट्यां यः स्नायान्नियतव्रतः ॥ स नरः प्राप्नुयात्कामानभीष्टान्विधिनन्दिनि ॥३३॥ यदा त्रेतायुगे रामः पंच
वट्यामुपागतः॥सभार्यः सानुजस्तत्र वसन्पुण्यतरां व्यधात्॥३४॥इत्येतत्सर्वमाख्यातं गौतमाश्रमजं शुभे ॥ शृण्वतां पठतां पुण्यं पापघ्नं वांछितप्रदम्
॥३५॥इति श्रीबृहन्नारदीयपुराणोत्तरभागे बृहदुपाख्याने वसुमोहिनीसंवादे गौतमाश्रममाहात्म्ये गौतमतपश्चर्याप्रभाववर्णनं नाम द्वासप्ततितमोऽध्यायः
॥७२॥इति गौतमाश्रममाहात्म्यम् ॥अथ त्र्यंबकमाहात्म्यं प्रारभ्यते॥मोहिन्युवाच ॥ श्रुतं गुरो त्वया प्रोक्तं पुण्याख्यानं च गौतमम् ॥ त्र्यंबकस्य

च माहात्म्यं गोदापंचवटीभवम् ॥ १॥ अधुना श्रोतुमिच्छामि पुंडरीकपुरोद्भवम् ॥ यथा तत्र महादेवस्तांडवं नृत्यमाचरत् ॥ २ ॥ तथा वद महीदेव पुण्यात्पुण्यतरं मम ॥ वसुरुवाच ॥ भक्तवश्यो महादेवः सद्यो वरद एव च ॥ ३ ॥ प्राकट्यं याति भक्तानां करोति च तदिच्छया ॥ एकदा जैमिनिर्नाम्ना व्यासशिष्यो मुनीश्वरः ॥ ४ ॥ अग्निवेशादिभिः शिष्यैः सार्द्धं तीर्थान्यटन्नगात् ॥ पुंडरीकपुरं साक्षाद्देवराजपुरोपमम्॥५॥ सर्वतोऽलंकृतं श्रीमत्सर्वर्त्तुकुसुमद्रुमैः ॥ शोभितं शीतलच्छायैः शुभ्रवारिजलाशयैः॥ ६ ॥ नानावयःकुलाकीर्णैः सुरम्यैः कमलाकरैः॥ नारीभिरप्सरोभिश्च नृभिर्विद्याधरद्युभिः ॥ ७॥ विलसद्भवनैः शुभ्रैर्विमानमिव राजते ॥ दृष्ट्वा शोभां मुनिस्तस्य पुरस्य प्रीतिमान्भृशम् ॥ ८ ॥ बभूव च मनश्चक्रे स्नातुं तत्र सरोवरे ॥ स्निग्धच्छायैर्द्रुमैर्युक्ते नानापुष्पसुगंधिते ॥ ९ ॥ विश्रम्य तरुछायाढ्ये तटे तस्य क्षणं मुनिः ॥ स्नात्वा नित्याः क्रियाश्चक्रे देवर्षिपितृतर्पणम् ॥ १० ॥ निर्माय पार्थिवं लिंगं विविधैरुपचारकैः ॥ पूजयामास विधिवत्पाद्यार्घ्याद्यैरनाकुलः ॥ ११ ॥ गंधैर्धूपैस्तथा दीपैर्नैवेद्यैर्विविधैरपि ॥ पुष्पैः सुगंधिभिः प्रार्च्य स्थितो यावदभून्मुनिः ॥ १२ ॥ तावत्प्रसन्नो भगवान्साक्षात्कारमुपागतः ॥ तस्मिन्नेव च मृल्लिंगे नानारत्नप्रभोद्गमे ॥ १३ ॥ ततः स जैमिनिर्दृष्ट्वा साक्षाद्देवमुमापतिम् ॥ पपात दंडवद्भूमौ पुनरुत्थाय सांजलिः ॥ १४ ॥ प्राह प्रपन्नार्तिहरं हरार्द्धांगं हरिं विभुम् ॥ जैमिनिरुवाच ॥ धन्योऽस्मि कृतकृत्योऽस्मि देवदेव जगत्पते ॥ १५ ॥ यस्त्वं ब्रह्मादिभिर्ध्येयः साक्षान्मद्दृष्टिगोचरः ॥ ततः प्रसन्नः स विभुर्गिरीशोऽस्य निजं करम् ॥ १६ ॥ शिरस्याधायागदत्तं ब्रूहि पुत्र किमिच्छसि ॥ तच्छ्रुत्वा वचनं शंभोर्जैमिनिः प्रत्युवाच ह ॥ १७ ॥ देवं सांबं सविघ्नेशं सकुमारं विलोकये ॥ ततः सांबः सपुत्रोऽस्य शंकरो दर्शनं गतः ॥ १८ ॥ पुनः प्राह प्रसन्नात्मा ब्रूहि पुत्र किमिच्छसि ॥ अथास्य जैमिनिर्वीक्ष्य कृपालुत्वं जगद्गुरोः ॥ १९ ॥ स्मयन्नाह समीक्षे त्वां तांडवं नटनं गतम् ॥ अथ तद्वांछितं कर्तुं भगवानंबिकापतिः ॥ २० ॥ सस्मार प्रमथान्सर्वान्नानाक्रीडाविशारदान् ॥ स्मृतमात्रास्तु ते सर्वे नंदिभृंगिपुरोगमाः ॥ २१ ॥ समाजग्मुः प्रजल्पंतः कौतूहलसमन्विताः ॥ सविघ्नेशकुमारांब ते नमस्कृत्य वाग्यताः ॥ तस्थुः प्रांजलयो देवदेवस्याज्ञासमीक्षकाः ॥ ॥ २२ ॥ ततो हरो हरांज्ञया विधाय रूपमद्भुतं प्रनर्तुमुद्यतो बभौ विचित्रवेषभूषणः ॥ विलोलनागवल्लरीद्धकक्षईषदुत्सितानननो ललाटशोभितेन्दुलेख ऊर्ध्वदोर्ध्वजः ॥ २३ ॥ सुदृग्विलिप्तभस्मदेहरुग्र्जितेंदुचंद्रिको जटाकलापनिस्सरत्सुरापगार्द्रविग्रहः ॥ ललाटलोचनोज्ज्वल

---

(१) पार्वत्याज्ञया भक्ताज्ञया वा । मनोहारित्वस्योभयत्र तौल्यादिति भाति ।

त्कृशानुतप्तशीतगुः स्रवत्सुधानुजीवितैणभूपकृत्तिहुंकृतः ॥ २४ ॥ कुमारवाहकेकिचंचुकृष्टनागफुंकृतो गलत्सुधानुजीवदब्जयोनितुंडतुंकृतः ॥
फणिप्रभीतविघ्नराजवाहनाखुचुंकृतो मृगेंद्रनादभीषिताक्षतन्महोक्षभांकृतः ॥ २५ ॥ मुहुः पदांबुजप्रपातकंपितावनीतलः प्रकृष्टवाद्यहृष्टगात्ररोमश
जिकंटकः ॥ सुरासुरेन्द्रमौलिरत्नभासितांघ्रिपंकजो गणेशकार्तिकेयशैलपुत्रिवीक्षिताननः ॥ २६ ॥ प्रवृद्धहर्षभक्तवृन्दसम्यगुक्तसंजयः
प्रवृत्ततांडवैर्विभुर्बभौ दिशोऽवभासयन् ॥ २७ ॥ अथानंदार्णवे मग्नो दृष्ट्वा नृत्यं महेशितुः ॥ जैमिनिर्वेदपादेन स्तवेनास्तौत्समाहितः ॥ २८ ॥
विरिंचिविष्णुगिरिशप्रणतांघ्रिसरोरुहे ॥ जगत्सूते नमस्तुभ्यं देवि कांपिल्यवासिनि ॥ २९ ॥ विघ्नेशविधिमार्तंडचंद्रेंद्रोपेंद्रवंदित ॥ नमो
गणपते तुभ्यं ब्रह्मणां ब्रह्मणस्पते ॥ ३० ॥ उमाकोमलहस्ताब्जसंभावितललाटकम् ॥ हिरण्यकुंडलं वंदे कुमारं पुष्करस्रजम् ॥ ३१ ॥ शिवं
ब्रह्मादिदुर्दर्शं नरः कः स्तोतुमर्हति ॥ दर्शनात्ते स्तुतिर्मे सा चाभ्राद्वृष्टिरिवाजनि ॥ ३२ ॥ नमः शिवाय सांबाय नमः शर्वाय शंभवे ॥ नमो
नटाय रुद्राय सदसस्पतये नमः ॥ ३३ ॥ पादभिन्नाय लोकाय मौलिभिन्नांडभित्तये ॥ भुजभ्रांतदिगंताय भूतानां पतये नमः ॥ ३४ ॥
क्वणन्नूपुरयुग्माय विलसत्कृत्तिवाससे ॥ फणींद्रमेखलायास्तु पशूनां पतये नमः ॥ ३५ ॥ कालकालाय सोमाय योगिने शूलपाणये ॥ अस्थि
भूषाय शुद्धाय जगतां पतये नमः ॥ ३६ ॥ पात्रे सर्वस्य जगतो नेत्रे सर्वदिवौकसाम् ॥ गोत्राणां पतये तुभ्यं क्षेत्राणां पतये नमः ॥ ३७ ॥
शंकराय नमस्तुभ्यं मंगलाय नमोनमः ॥ धनानां पतये तुभ्यमन्नानां पतये नमः ॥ आत्माधिपतये तुभ्यं नमो मीढुष्टमाय च ॥ ३८ ॥
अष्टाङ्गायातिहृद्याय क्लिष्टभक्तेष्टदायिने ॥ इष्टिघ्नाय सुतुष्टाय पुष्टानां पतये नमः ॥ ३९ ॥ पंचभूताधिपतये कालाधिपतये नमः ॥
नम आत्माधिपतये दिशां च पतये नमः ॥ ४० विश्वकर्त्रे महेशाय विश्वभर्त्रे पिनाकिने ॥ विश्वहर्त्रेऽग्निनेत्राय विश्वरूपाय वै नमः ॥ ४१ ॥
ईशान ते तत्पुरुष नमो घोराय ते सदा ॥ वामदेव नमस्तेऽस्तु सद्योजाताय वै नमः ॥ ४२ ॥ भूतिभूषाय भक्तानां भीतिभंगप्रदायिने ॥ नमो
भवाय भर्गाय नमो रुद्राय मीढुषे॥४३॥सहस्रांबाय सांबाय सहस्राभीषवे नमः॥सहस्रबाहवे तुभ्यं सहस्राक्षाय मीढुषे ॥४४ ॥ सुकपोलाय सोमाय
सुललाटाय सुभ्रुवे ॥ सुदेहाय नमस्तुभ्यं सुमृडीकाय मीढुषे ॥ ४५ ॥ भवक्लेशनिमित्तोरुभयच्छेदकृते सदा ॥ नमस्तुभ्यमषाढाय सहमा
नाय मीढुषे ॥ ४६॥वंदेऽहं देवमानंदसंदोहं लास्यसुंदरम् ॥ समस्तजगतां नाथं सदसस्पतिमद्भुतम् ॥ ४७ ॥ सुजंघं सुंदरं क्षौमं रक्षोभूतक्षतिक्षमम्
॥ यक्षेशेष्टं नमामीशमक्षरं परमं प्रभुम् ॥ ४८ ॥ अर्द्धालकमवस्त्रार्द्धमस्थ्युत्पलदलस्रजम् ॥ अर्द्धपुंलक्षणं वंदे पुरुषं कृष्णपिंगलम् ॥ ४९ ॥ सकृ

त्प्रणतसंसारमहासागरतारकम् ॥ प्रणमामि तमीशानं जगतस्तस्थुषस्पतिम् ॥ ५० ॥ धातारं जगतामीशं दातारं सर्वसंपदाम् ॥ नेतारं
मरुतां वंदे जेतारमपराजितम् ॥ ५१ ॥ तं त्वामंतकनेतारं वंदे मंदाकिनीधरम् ॥ दधाति विदधद्यो मामिमानि त्रीणि विष्टपा ॥५२॥ सर्वज्ञं सर्वगं
सर्वं कविं वंदे तमीश्वरम् ॥ यतश्च यजुषा सार्द्धमृचः सामानि जज्ञिरे ॥ ५३ ॥ भवंतं सुदृशं वंदे भूतभव्यभवंति च ॥ त्यजंतीतरकर्माणि
यो विश्वाभि विपश्यति॥५४॥ हरं सुरनियंतारं हरंतमहमानतः ॥ यदाज्ञया जगत्सर्वं व्याप्य नारायणः स्थितः॥ ५५ ॥ तं नमामि महादेवं यन्नियो
गादिदं जगत् ॥ कल्पादौ भगवान्धाता यथापूर्वमकल्पयत् ॥ ५६ ॥ ईश्वरं तमहं देवं यस्य लिंगमहर्निशम् ॥ यजंते सह भार्याभिरिंद्रज्येष्ठा
मरुद्गणाः ॥५७॥ नमामि तमिमं रुद्रं यमभ्यर्च्य सकृत्पुरा ॥ अवापुः स्वं स्वमैश्वर्यं देवासः पूषरातयः ॥ ५८ ॥ तं वंदे देवमीशानं यं शिवं
हृदयांबुजे ॥ सततं यतयः शांताः संजानानाउपासते ॥ ५९ ॥ तदस्मै सततं कुर्मो नमः कमलकांतये ॥ उमाकुचपटोरस्क
या ते रुद्रशिवा तनूः ॥ ६० ॥ नमस्ते रुद्रभावाय नमस्ते रुद्रकेलये ॥ नमस्ते रुद्रशांत्यै च नमस्ते रुद्रमन्यवे ॥ ६१ ॥ वेदाश्वरथनिष्ठा
भ्यां पादाभ्यां त्रिपुरांतक ॥ बाणकार्मुकयुक्ताभ्यां बाहुभ्यामुत ते नमः ॥ ६२ ॥ नमस्ते वासुकिज्याय विष्किराय च शङ्कर ॥
महते मेरुरूपाय नमस्ते अस्तु धन्वने ॥६३॥ नमः परशवे तेऽस्तु शूलायातुलरोचिषे ॥ हयग्रीवात्मने तुभ्यमुतोत इषवे नमः ॥ ६४ ॥ सुरेतरवधू
हारहारीणि हर यानि ते ॥ अन्यान्यस्त्राण्यहं तूण इदं तेभ्योऽकरं नमः ॥ ६५ ॥ धराधरसुतालीलासरोजाहतबाहवे ॥ तस्मै तुभ्यमघोराय
नमो अस्मा श्रवस्य च ॥ ६६ ॥ रक्ष मामज्ञमक्षीणमशिक्षितमनन्यगम् ॥अनाथं दीनमापन्नं दरिद्रं नीललोहितम् ॥६७॥ दुर्मुखं दुष्क्रियं दुष्टं रक्ष
मामीश दुर्दशम् ॥आदृशा तमहं न त्वदन्यं विंदामि राधसे॥६८॥भवाख्येनाग्निना शंभो रागद्वेषमदार्चिषा॥ दयालो दह्यमानानामस्माकमविता
भव ॥ ६९ ॥ परदारं परावासं परवस्त्रं पराश्रयम् ॥ हर पाहि परान्नं मां पुरुणामन्पुरुष्टुत ॥ ७० ॥ लौकिकैर्यत्कृतं दुष्टैर्नावमानं सहामहे ॥ देवेश
तव दासेभ्यो भूरिदा भूरि देहि नः ॥७१॥ कुलोकानामयत्नानां गर्विणामीश पश्यताम् ॥ अस्मभ्यं क्षेत्रमायुश्च वसु स्पार्हं तदाभर ॥ ७२ ॥
याञ्चातो महतीं लज्जामस्मदीयां घृणानिधे ॥ त्वमेव वेत्सि नस्तूर्णमिदं स्तोतृभ्य आभर ॥ ७३ ॥ जाया माता पिता चान्ये मां द्विषंत्यमितं
कृशम् ॥ देहि मे महतीं विद्यां राया विश्वपुषा सह ॥ ७४ ॥ अदृष्टार्थेषु सर्वेषु दृष्टार्थेष्वपि कर्मसु॥मेरुधन्वन्नशक्तेभ्यो बलं धेहि तनूषु नः ॥७५॥
लब्धानिष्टसहस्रस्य नित्यमिष्टवियोगिनः ॥ हृद्रोगं मम देवेश हरिमाणं च नाशय ॥ ७६ ॥ ये ये रोगाः पिशाचा वा नरा देवाश्च मामिह॥ बाधंते

देवताः सर्वा निवाधस्व महानसि ॥ ७७ ॥ त्वमेव रक्षितास्माकमन्यः कश्चिन्न विद्यते ॥ तस्मात्स्वीकृत्य देवेश रक्षा णो ब्रह्मणस्पते ॥ ७८ ॥
त्वमेवोमापते माता त्वं पिता त्वं पितामहः॥ त्वमायुस्त्वं मतिस्त्वं श्रीरुत भ्रातोत नः सखा ॥ ७९ ॥ यतस्त्वमेव देवेश कर्ता सर्वस्य कर्मणः ॥
ततः क्षमस्व तत्सर्वं यन्मया दुष्कृतं कृतम् ॥ ८०॥ त्वत्समो न प्रभुत्वेन फल्गुत्वेन च मत्समः॥ ततो देव महादेव त्वमस्माकं तवस्मसि ॥ ८१॥
सुस्मितं भस्मगौरांगं तरुणादित्यविग्रहम् ॥ प्रसन्नवदनं सौम्यं गाये त्वा नमसा गिरा॥८२॥एष एव वरोऽस्माकं नृत्यंतं त्वां सभापतिम्॥लोकयं
तमुमाकांतं पश्येम शरदः शतम् ॥ ८३ ॥ अरोगिणो महाभाग विद्वांसश्च बहुश्रुताः ॥ भगवंस्त्वत्प्रसादेन जीवेम शरदः शतम् ॥ ८४ ॥
सदारा बंधुभिः सार्द्धं त्वदीयं ताण्डवामृतम् ॥ पिबंतः काममीशानं नंदाम शरंदः शतम् ॥ ८५ ॥ देवदेव महादेव त्वदीयांघ्रिसरोरुहम ॥
कामं मधुमयं पीत्वा मोदाम शरदः शतम् ॥ ८६ ॥ कीटा नागाः पिशाचा वा ये वा के वा भवेभवे ॥ तव दासा महादेव भवाम शरदः शतम्
॥ ८७ ॥ सभायामीश ते देव नृत्यवाद्यगलस्वनम ॥ श्रवणाभ्यां महादेव शृणुयाम शरदः शतम् ॥ ८८ ॥ स्मृतिमात्रेण संसारविनाशनक
राणि ते ॥ नामानि खलु दिव्यानि प्रब्रवाम शरदः शतम् ॥ ८९ ॥ इषुसंधानमात्रेण दग्धत्रिपुर धूर्जटे ॥ आधिभिर्व्याधिभिर्नित्यमजिताः
स्याम शरदः शतम् ॥ ९० ॥ चारुचामीकराभासं गौरीकुचपटोरसम् ॥ कदा नु लोकयिष्यामि युवानं विश्पतिं कविम् ॥ ९१ ॥
प्रमथेंद्रावृतं प्रीतवदनं प्रियवाससम् ॥ सेविष्येऽहं कदा सांबं सुभासं शुक्रशोचिषम् ॥९२ ॥ बह्वेनसं मामकृतपुण्यलेशं च दुर्मतिम् ॥स्वीकरिष्यति
किं न्वीशो नीलग्रीवो विलोहितः ॥ ९३ ॥ कालशूलानलासक्तं भीतं व्याकुलमानसम् ॥ कदा नु द्रक्ष्यतीशो मां तुविग्रीवो अनानतः ॥ ९४ ॥
गायका यूयमायात यदि रागादिलिप्सवः ॥ धनदस्य सखायं तमुपास्मै गायता नरः ॥ ९५ ॥ स्वस्त्यस्तु सखि ते जिह्वे विद्यादातुरुमापतेः ॥
स्तवमुच्चतरं ब्रूहि जयतामिव दुंदुभिः ।९६॥ चेतयाजन ? शान्तस्त्वं नेदं वेदाखिलं जगत्॥ अस्य तृप्त्याखिलं शभोर्गौरो न तृषितः पिब ॥९७ ॥
सुगंधिं च सुखस्पर्शं कामदं सोमभूषणम्॥गाढमालिंग मच्चित्तं योषा जारमिव प्रियम् ॥९८॥ महामयूखाय महाभुजाय महाशरीराय महाम्बराय॥
महाकिरीटाय महेश्वराय महो महीं सुष्टुतिमीरयामि ॥ ९९ ॥ यथाकथंचिद्रचिताभिरीषत्प्रसन्नतश्चारुभिरादरेण ॥ प्रपूजयामि स्तुतिभिर्महेशं
मषाढमुग्रं सहमानमाभिः ॥ १०० ॥नमः शिवाय त्रिपुरांतकाय जगत्त्रयेशाय दिगंबराय ॥ नमोऽस्तु मुख्याय हराय भूयो नमो जघन्याय
च बुध्नियाय ॥१०१ ॥ नमो विकाराय विकारिणे ते नमो भवायास्तु भवोद्भवाय ॥बहुप्रजात्यंतविचित्ररूप यतः प्रसूता जगतः प्रसूतिः॥१०२ ॥

तस्मै सुरेशोरुकिरीटनानारत्नावृताष्टापदविष्टराय ॥ भस्मांगरागाय नमः परस्मै यस्मात्परं नापरमस्ति किंचित् ॥ १०३ ॥ सर्पाधिराजौ
षधिनाथयुद्धक्षुभ्यज्जटामंडलगह्वराय ॥ तुभ्यं नमः सुंदरतांडवाय यस्मिन्निदं संचविचैति सर्वम् ॥ १०४ ॥ मुरारिनेत्रार्चितपादपद्ममुमांघ्रिलाक्षा
परिरक्तपाणिम् ॥ नमामि देवं वृषनीलकंठं हिरण्यदंतं शुचिवर्णमारात्॥ १०५ ॥ अनंतमव्यक्तमचिंत्यमेकं हरंतमाशांबरमंबरांगम् ॥ अजं पुराणं
प्रणमामि यूपमणोरणीयान्महतो महीयान्॥ १०६॥अतःस्थमात्मानमजं न दृष्ट्वा भ्रमंति मूढा गिरिगह्वरेषु॥पश्चादुदग्दक्षिणतः पुरस्तादधःस्विदासी३
दुपरि स्विदासी३त्॥ १०७॥इमं नमामीश्वरमिंदुमौले शिवं महानंदमशोकदुःखम्॥हृदंबुजे तिष्ठति यः परात्मा यतश्च सर्वाः प्रदिशो दिशश्च॥ १०८॥
रागादिकापथ्यसमुद्भवेन भ्रान्तं भवाख्येन महामयेन॥विलोक्य मां पालय चन्द्रमौले भिषक्तमं त्वा भिषजां शृणोमि॥ १०९॥दुःखांबुराशिं सुखलेश
हीनमस्पृष्टपुण्यं बहुपातकं माम् ॥ मृत्योः करस्थं भव रक्ष भीतं पश्चात्पुरस्तादधरादुदक्तात् ॥ ११० ॥ गिरींद्रजाचारुमुखावलोकसुशी
तया देव तवैव दृष्ट्या ॥ वयं दयापूरितयैव पूर्णमपो न नावा दुरिता तरेम॥ १११॥अपारसंसारसमुद्रमध्ये निमग्नमुत्क्रोशमनल्परागम् ॥ मामक्षमं
पाहि महेशजुष्टमोजिष्ठया दक्षिणयेव रातिम् ॥ ११२॥ स्मरन्पुरा संचितपातकानि खरं यमस्यापि मुखं यमारे ॥ बिभेमि मे देहि यथेष्टमायुर्यदि
क्षितायुर्यदि वा परेतः ॥ १३ ॥ सुगंधिभिः सुंदरभस्मगौरैरनंतभोगैर्मृदुलैरघोरैः ॥ इमं कदालिंगति मां पिनाकी स्थिरेभिरंगैः पुरुरूप उग्रः
॥ ११४ ॥ क्रोशंतमीशं पतितं भवाब्धौ नाकुस्थमंडूकमिवातिभीतम् ॥ कदा नु मां रक्षति देवदेवो हिरण्यरूपः स हिरण्यसंदृक् ॥ ११५ ॥
चारुस्मितं चंद्रकलावतंसं गौरीकटाक्षारुहयुग्मनेत्रम् ॥ आलोकयिष्यामि कदा नु सांबमादित्यवर्णं तमसः परस्तात् ॥ ११६ ॥ आगच्छतानादि
मुमुक्षवो ये यूयं शिवं चिंतयतांतरेऽब्जे ॥ध्यायंति मुक्त्यर्थममुं हि नित्यं वेदांतविज्ञानसुनिश्चितार्थाः ॥ ११७ ॥ आयात यूयं भवताधिपत्ये कामं
महेशं गिरिशं यजध्वम् ॥ एवं पुराभ्यर्च्य हिरण्यगर्भो भूतस्य जातः पतिरेक आसीत् ॥ ११८॥ एकायनं ते विपुलां श्रियं ते श्रीकंठमेनं सुकृता
नमंताम् ॥ श्रीमानयं श्रीपतिवंद्यपादः श्रीणामुदारो धरुणो रयीणाम् ॥ ११९ ॥ सुपुत्रकामा अपि ये मनुष्या युवानमेनं गिरिशं यजंताम् ॥
यतः स्वयंभूर्जगतो विधाता हिरण्यगर्भः समवर्तताग्रे ॥ १२० ॥ अलं किमुक्तैर्बहुभिः समीहितं समस्तमस्याश्रयणेन सिध्यति ॥
पुरैनमाश्रित्य हि कुंभसंभवो दिवा न नक्तं पलितो युवाजनि ॥१२१ ॥ अन्यत्परित्यज्य ममाक्षिभृंगाः सर्वं सदैनं शिवमाश्रयध्वम् ॥
आमोदवानेष मृदुः शिवाय स्वादुःष्किलायं मधुमाँ उतायम् ॥ १२२ ॥ भविष्यसि त्वं प्रतिमानहीनो विनिर्जिताशेषनरामरश्च ॥

नमश्च ते वाणि महेशमेनं स्तुहि श्रुतं गर्तसदं युवानम् ॥ १२३ ॥ यद्यन्मनश्चिंतयसि त्वमिष्टं तत्तद्भविष्यत्यखिलं ध्रुवं ते ॥ दुःखेन वृर्तिं
विषये कदाचिद्यक्ष्वामहे सौमनसाय रुद्रम् ॥ १२४ ॥ अज्ञानयोगादपचारकर्म यत्पूर्वमस्माभिरनुष्ठितं ते ॥ तदेव सोढ्वा सकलं दयालो पितेव
पुत्रान्प्रति नो जुषस्व ॥ १२५ ॥ संसाराख्यक्रुद्धसर्पेण तीव्रै रागद्वेषोन्मादलोभादिदंतैः ॥ दष्टं दृष्ट्वा मां दयालुः पिनाकी देवस्त्राता त्रायताम
प्रयुच्छन् ॥ १२६ ॥ इत्युक्त्वांते ये समाधेर्नमंते रुद्र त्वां ते यांति जन्माहिदष्टाः ॥ संतो नीलग्रीवसूत्रात्मनाहं तत्त्वा यामि ब्रह्मणा वंदमानः
॥ १२७ ॥ भवाधिभीषणज्वरेण पीडितान्महामयानशेषपातकालयानदूरकाललोचनान् ॥ अनाथनाथ ते करेण भेषजेन कालहा उदूषुणो
वसो महे मृशस्व शूर राधसे ॥ १२८ ॥ जयेम येन सर्वमेतदिष्टमष्टदिग्गणं भुवः स्थलं दिवः स्थलं नभःस्थलं च तद्धृतम् ॥ य एष सर्वदेव
दानवप्रभुः सभापतिः स नो ददातु तं रयिं पुरुं पिशंगसंदृशम् ॥ १२९ ॥ नमो भवाय ते हराय भूतिभासितोरसे नमो भवाभिभूति
भीतिसंगिने पिनाकिने ॥ नमः शिवाय विश्वपाय शाश्वताय हेलये न यस्य हन्यते सखा न जीयते कदाचन ॥ १३० ॥ सुरपतिपतये
नमोनमः प्रजापतिपतये नमोनमः ॥ क्षितिपतिपतये नमोनमोऽबिकापतय उमापतये नमो नमः ॥ १३१ ॥ विनायकं वंदनमस्तकाहतस्वना
घसंघृष्टकिरीटमस्तकम् ॥ नमामि नित्यं प्रणतार्तिनाशनं कविं कवीनामुपमश्रवस्तमम् ॥ १३२ ॥ देवा युद्धे यागे विप्राह्वेप्याह्वयं ?
द्वयं विंदति स्कंदम् ॥ वंदे सुब्रह्मण्यों सुब्रह्मण्यों सुब्रह्मण्योम् ॥ १३३ ॥ नमः शिवायै जगदंबिकायै शिवप्रियायै शिवविग्रहायै ॥ सद्यु
द्भूवाद्रिपतेः सुता या चतुष्कपर्दा युवतिः सुपेशाः ॥ १३४ ॥ हिरण्यवर्णां मणिनूपुरांघ्रिं प्रसन्नवक्त्रां शुकपद्महस्ताम् ॥ विशालनेत्रां प्रण
मामि गौरीं वचोविदं वाचमुदीरयंतीम् ॥ १३५ ॥ नमामि मेनातनयाममेयामिमामुमां कांतिमतीममेयाम् ॥ करोति या भूतिसितौ स्तनौ
द्वौ प्रियं सखायं परिषस्वजाना ॥ १३६ ॥ कांतामुमां कांतनिभांगकांतिं[2] भ्रांतामुपात्तानतहर्यजेंद्राम् ॥ नतोऽस्मि यास्ते गिरिशस्य पार्श्वे
विश्वानि देवी भुवनानि चष्टे ॥ १३७ ॥ वंदे गौरीं तुंगपीनस्तनीं तां चंद्राचूडां क्लिष्टसर्वांगरागाम् ॥ यैषा दुःखिप्राणिनामात्मकांतिं देवीं
देवीं राधसे चोदयंतीम् ॥ १३८ ॥ एनां वंदे दीनरक्षाविनोदां मेनाकन्यां मानदानंददात्रीम ॥ या विद्यानां मंगलानां च वाचामेषा नेत्री
राधसः सूनृतानाम् ॥ १३९ ॥ संसारतापोरुभयापहंत्री भवानि भोज्याभरणैकभोगे ॥ धियं वरां देहि शिवे निरर्गलां ययाति विश्वा

---

१ प्राह्वशाह्वयमितिक० पु० । २ कान्तनिजाङ्गकान्तीति पा० भाति । ३ आर्षप्रयोगोऽयम् ।

दुरिता तरेम ॥ १४० ॥ शिव कथं त्वत्समता क्व दीयते जगत्कृतिः केलिरयं शिवः पतिः ॥ हरिस्तु दासोऽनुचरीन्दिरा शची सरस्वती वा सुभगा
ददिर्वसु ॥ १४१ ॥ वसुरुवाच ॥ इत्यनेन स्तवेनेशं स्तुत्वेत्थं स महामुनिः ॥ स्नेहाश्रुपूर्णनयनः प्रणनाम सभापतिम् ॥ १४२॥ मुहुर्मुहुः पिबन्नीशं
तांडवामृतमंगलम्॥सर्वान्कामानवाप्यांते गाणपत्यमवाप ह॥ १४३॥इमं स्तवं जैमिनिना वचोदितं द्विजोत्तमो यः पठतीह भक्तितः॥तमिष्टवाक्सिद्धिमतिद्युतिश्रियः
परिष्वजंते जनयो यथा पतिम्॥१४४॥महीपतिर्यस्तु युयुत्सुरादरादमुं पठत्यस्य तथैव सादरात्॥प्रयांति शीघ्रं प्रमदांतकांतिकं भियं
दधाना हृदयेषु शत्रवः॥१४५॥त्रैवर्णिकेष्वन्यतमो य एनं नित्यं कदाचित्पठतीशभक्तितः॥कलेवरांते शिवपार्श्ववर्ती निरंजनः साम्यमुपैति दिव्यम्
॥ १४६ ॥ लभंते पठंतो मतिं बुद्धिकामा लभंते तथैव श्रियं पुष्टिकामाः ॥ लभन्ते हि धान्यं नरा धान्यकामा लभन्ते ह पुत्रान्नराः पुत्रकामाः
॥१४७॥ पादं वाप्यर्द्धपादं वा श्लोकं श्लोकार्द्धमेव वा ॥ यस्तु धारयते नित्यं शिवलोकं स गच्छति॥ १४८॥यत्र नृत्तं शिवश्चक्रे तांडवं तत्स्थलं
शुभे ॥ पुण्यात्पुण्यतरं तीर्थं तत्र स्नात्वा विमुच्यते ॥ १४९ ॥ यस्तत्र कुरुते श्राद्धं पितॄणां मनुजोत्तम ॥ पूर्वजान्स नयेत्स्वर्गं नात्र कार्या
विचारणा ॥ १५० ॥ गां सुवर्णं धरां शय्यां वस्त्रमातपवारणम् ॥ पानमन्नं द्विजे दद्यात्तत्र तत्सर्वमक्षयम् ॥ १५१ ॥ एतदाख्यानकं पुण्यं पुंडरीकपुरोद्भवम्
॥ शृणुयाच्छ्रावयेद्वापि सोऽपि रुद्रप्रियो भवेत् ॥ १५२ ॥इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे वसुमोहिनीसंवादे त्र्यम्बकेश्वरमाहात्म्ये
वेदपादस्तवो नाम त्रिसप्ततितमोऽध्यायः ॥ ७३॥ इति त्र्यम्बकेश्वरज्योतिर्लिंगमाहात्म्यं संपूर्णम् ॥ अथ गोकर्णमाहात्म्यमारभ्यते
॥ मोहिन्युवाच ॥ पुंडरीकपुराख्यानं त्वया प्रोक्तं श्रुतं गुरो ॥ गोकर्णस्याद्य तीर्थस्य माहात्म्यं मे समादिश ॥ १ ॥ वसुरुवाच ॥
शृणु मोहिनि वक्ष्यामि तीर्थं पुण्यप्रदं नृणाम् ॥ गोकर्णाख्यं हरक्षेत्रं सर्वपातकनाशनम् ॥२॥ पश्चिमस्थसमुद्रस्य तीरेऽस्ति वरवर्णिनि॥सार्द्धयोजनविस्तारं
दर्शनादपि मुक्तिदम् ॥ ३॥ सगरस्यात्मजैर्देवि खनिते भूतले क्रमात् ॥ सागरो वर्द्धितस्त्वारात्प्लावयामास मेदिनीम्॥४॥त्रिंशद्योजनविस्तारां
सतीर्थक्षेत्रकाननाम् ॥ ततस्तन्निलयाः सर्वे सदेवासुरमानवाः ॥ ५ ॥ तत्स्थानं संपरित्यज्य सह्यादिगिरिषु स्थिताः ॥ ततो
गुह्यं परं तीर्थं गोकर्णाख्यं समुद्रगम् ॥ ६ ॥ चिंतयंतो मुनिवरास्तदुद्धारे मतिं दधुः ॥ ततः संमंत्र्य ते सर्वे पर्वतोपत्यकास्थिताः ॥ ७ ॥
महेंद्राचलसंस्थानं पर्शुरामं दिदृक्षवः ॥ जग्मुर्मुनिवरा देवि गोकर्णोद्धारकांक्षया ॥ ८ ॥ समारुह्य तु तं शैलं ददृशुस्तस्य चाश्रमम् ॥

---

१ आर्षोऽयं प्रयोगः ।

प्रशांतक्रूरसत्वाढ्यं सर्वर्तुषु सुखावहम् ॥ ९ ॥ फलितैः पुष्पितैर्वृक्षैर्गहनं तत्तपोवनम् ॥ स्निग्धच्छायमनौपम्यं स्वामोदिसुखमारुतम्॥१० ॥ तं
तदाश्रममासाद्य ब्रह्मघोषनिनादितम् ॥विविशुर्हृष्टमनसो यथावृद्धपुरःसरम् ॥ ११ ॥ब्रह्मासने सुखासीनं मृदुकृष्णाजिनोत्तरे ॥ शिष्यैः परिवृतं
शांतं ददृशुस्तं तपोधनम् ॥ १२ ॥ कालाग्निमिव लोकांस्त्रीन्दग्ध्वा शांतं तपःस्थितम् ॥ ते समेत्य भृगुश्रेष्ठं विनयेन ववंदिरे॥ १३ ॥ ततस्तानाग
तान्दृष्ट्वा मुनीन्भृगुकुलोद्वहः ॥ अर्घ्यपाद्यादिभिः सम्यक्पूजयामास सादरम् ॥ १४ ॥ तानासीनान्कृतातिथ्यानुवाच भृगुनंदनः ॥ स्वागतं
वो महाभागा यदर्थमिह चागताः ॥ १५ ॥ तद्वदध्वं सुविश्वस्ताः करणीयं मयास्ति यत् ॥ ततोऽब्रुवन्मुनिश्रेष्ठा यदर्थं राममागताः ॥ १६ ॥
अवेह्यस्मान् भृगुश्रेष्ठ गोकर्णनिलयान्मुनीन् ॥ ॥ खनद्भिः सागरैर्भूमिं तस्मात्तीर्थाद्विवासितान् ॥१७ ॥ स त्वमात्मप्रभावेण क्षेत्रप्रवरमद्य नः ॥ दातु
मर्हसि विप्रेन्द्र समुत्सार्यार्णवोदकम् ॥ १८ ॥ तच्छ्रुत्वा वचनं तेषां न्यस्तशस्त्रो व्यचिंतयत्॥ ततो विचिंत्य भगवान्धर्म्यं साध्वभिरक्षणम् ॥१९॥
प्रगृह्य स्वधनुर्बाणान्संप्रतस्थे स तैः समम्॥सोऽवरुह्य महेंद्राद्रेर्दिशं दक्षिणपश्चिमाम्॥२०॥समुद्दिश्य ययौ शीघ्रं स स्वमुल्लंघ्य पर्वतम्॥संप्राप्तः सागरतटं
सार्द्धं गोकर्णवासिभिः॥२१॥मुहूर्त्तं तत्र विश्रम्य वरुणं यादसांपतिम्॥मेघगंभीरया वाचा प्रोवाच वदतां वरः॥२२ ॥रामोऽहं भार्गवः प्राप्तो मुनिभिः
सह कार्यवान्॥प्रचेतो दर्शनं देहि कार्यमात्यायिकं त्वया॥२३॥एवं रामसमाहूतो यादःपतिरहन्तया॥श्रुत्वापि तस्य तद्वाक्यं नायातो रामसन्निधौ
॥२४॥एवं पुनः पुनस्तेन समाहूतोऽपि नागतः ॥ यदा तदाभिसंक्रुद्धो धनुर्जग्राह भार्गवः॥२५॥तस्मिन्संधाय विशिखं वह्निदैवं तु भार्गवम् ॥अस्त्रं
संयोजयामास शोषणाय सरित्पतेः ॥ २६ ॥ तस्मिन्संयोजितेऽस्त्रे तु भार्गवेण महात्मना ॥ संक्षुब्धः सागरो भद्रे यादोगणसमाकुलः ॥२७॥
वरुणोऽस्त्राभिसंतप्तो रामस्य भयसम्प्लुतः ॥ स्वरूपेण समागत्य रामपादौ समग्रहीत् ॥२८॥ततोऽस्त्रं स विनिर्वर्त्य वरुणं प्राह सत्वरम् ॥गोकर्णो
दृश्यतां देव उत्सर्पय जलं किल॥२९॥ततो रामाज्ञया सोऽपि गोकर्णोदकमाहरत्॥रामोऽपि तं समभ्यर्च्य गोकर्णं नाम शंकरम्॥३०॥प्राप्तःपुनर्महेंद्राद्रौ
तस्थुस्तत्रैव ते द्विजाः ॥ यत्र सर्वे तपस्तप्त्वा मुनयः शंसितव्रताः ॥३१॥निर्वाणं परमं प्राप्ताः पुनरावृत्तिवर्जितम्॥तत्क्षेत्रस्य प्रभावेण प्रीत्या भूतगणैः
सह ॥३२ ॥ देव्या च सकलैर्देवैर्नित्यं वसति शंकरः ॥ एनांसि दर्शनात्तस्य गोकर्णस्य महेशितुः ॥ ३३ ॥ सद्यो वियुज्य गच्छन्ति प्रवाते शुष्क
पर्णवत्॥तत्क्षेत्रसेवनरतिर्नृणां जातु न जायते ॥ ३४ ॥ निर्बंधेन तु ये तत्र प्राणिनः स्थिरजंगमाः ॥ म्रियंते देवि सद्यस्ते स्वर्गं यांति सनातनम्
॥ ३५॥स्मृत्यापि सकलैः पापैर्यस्य मुच्येत मानवः॥तद्गोकर्णाभिधं क्षेत्रं सर्वतीर्थनिकेतनम्॥३६॥स्नात्वा क्षेत्रेषु सर्वेषु यजतश्च सदाशिवम्॥लभंते
यत्फलं मर्त्यास्तत्सर्वं तत्र दर्शनात् ॥ ३७ ॥ कामक्रोधादिभिर्हीना ये तत्र निवसंति वै ॥ अचिरेणैव कालेन ते सिद्धिं प्राप्नुवंति हि ॥ ३८ ॥ जप

होमरताः शांता नियता ब्रह्मचारिणः ॥ वसंति तस्मिन्ये ते हि सिद्धिं प्राप्स्यंत्यभीप्सिताम्॥३९॥दानहोमजपाद्यं च पितृदेवद्विजार्चनम्॥अन्यस्मा
त्कोटिगुणितं भवेत्तस्मिन्फलं सति ॥४०॥ इत्येतत्कथितं भद्रे गोकर्णक्षेत्रसंभवम् ॥माहात्म्यं सर्वपापघ्नं पठतां शृण्वतामपि ॥४१॥ इति श्रीबृहन्ना
रदीयपुराणेबृहदुपाख्याने उत्तरभागे वसुमोहिनीसंवादे गोकर्णमाहात्म्यं नाम चतुःसप्ततितमोऽध्यायः॥७४॥इति गोकर्णमाहात्म्यम्॥अथ लक्ष्मणाचल
माहात्म्यमारभ्यते॥मोहिन्युवाच॥श्रुतं गोकर्णमाहात्म्यं वसो पापविनाशनम्॥लक्ष्मणस्यापि माहात्म्यं वक्तुमर्हसि सांप्रतम्॥१॥वसुरुवाच॥शृणु देवि
प्रवक्ष्यामि माहात्म्यं लक्ष्मणस्य च॥ यं दृष्ट्वा मनुजो देवं मुच्यते सर्वपातकैः ॥२॥ चतुर्व्यूहावतारे यो देवः संकर्षणः स्वयम्॥ सर्वभूमंडलं ह्येतत्स
हस्रवदनः स्वराट्॥३॥एकस्मिञ्छिरसि न्यस्तं नावैत्तिसद्धार्थकोपमम्॥देवो नारायणः साक्षाद्रामो ब्रह्मादिवंदितः॥४॥प्रद्युम्नो भरतो भद्रे शत्रुघ्नो ह्यनि
रुद्धकः॥लक्ष्मणस्तु महाभागे स्वयं संकर्षणः शिवः॥५॥ब्रह्माद्यैः प्रार्थितः पूर्वं साक्षाद्देवो रमापतिः॥रामादिनामभिर्जज्ञे चतुर्द्धा दिग्ग्रथान्नृपात्॥६॥ततः
कालांतरे देवि विश्वामित्रो मुनीश्वरः॥यज्ञरक्षार्थमागत्य प्रार्थयद्रामलक्ष्मणौ॥७॥ततो राजा दशरथः प्राणेभ्योऽपि प्रियौ सुतौ॥मुनेः शापभयाद्भीतो ददौ
तौ रामलक्ष्मणौ ॥८॥ गत्वा यज्ञं मुनींद्रस्य गाधिपस्य ररक्षतुः ॥ सताडकं सुबाहुं तु हत्वा प्रक्षिप्य दूरतः॥९ ॥ मारीचं मानवास्त्रेण विश्वामित्रमतो
षयत् ॥ ततः प्रीतान्मुनिश्रेष्ठादस्त्रग्राममवाप्य च ॥ १० ॥ उवास स कियत्कालं सानुजस्तेन सत्कृतः ॥ वैदेहनगरं नीतो विश्वामित्रेण तत्परम्
॥११॥ततस्तु राजा जनको विश्वामित्रं सुसत्कृतम्॥पप्रच्छ बालकावेतौ कस्य क्षत्रकुलेशितुः॥१२॥ ततस्तस्मै मुनिवरो राज्ञो दशरथस्य तौ॥पुत्रौ
निवेदयामास भ्रातरौ रामलक्ष्मणौ॥१३॥ततो विदेहः सुप्रीतो दृष्ट्वा रामं च लक्ष्मणम्॥सीतोर्मिलाख्ययोः पुत्र्योश्चेतसाकल्पयत्पती॥ १४ ॥ त्रिका
लज्ञस्तु स मुनिर्ज्ञात्वा तस्य मनोगतम्॥मोदमानोऽथ जनकं प्राह दर्शय तद्धनुः॥१५॥सीतास्वयंवरे न्यस्तं न्यासभूतं महेशितुः॥राजा श्रुत्वा तु तद्वाक्यं
विश्वामित्रस्य सत्वरम्॥१६॥भृत्यत्रिशत्यानाय्यास्मै दर्शयामास सादरम्॥रामश्चंडीशचापं तद्वामदोष्णोद्धरन्क्षणात्॥१७॥सज्यं विकृष्य सहसा बभं
जेक्षुमिवेभराट् ॥ततोऽति मिथिलः प्रीतः स्वे कन्ये रामलक्ष्मणौ॥१८॥समभ्यर्च्यार्पयामास ताभ्यां ते विधिपूर्वकम्॥ज्ञात्वा मुनिवरादन्यौ राज्ञो
दशरथस्य तु ॥ १९ ॥ ताभ्यां सह तमाहूय भ्रातृकन्ये अदापयत् ॥ ततः स कृतदारैस्तु चतुर्भिस्तनयैः सह ॥ २० ॥समर्चितो विदेहेनायोध्यां
मुन्याज्ञया ययौ ॥ मार्गे भृगुपतेर्दर्पं शमयित्वा स राघवः ॥ २१ ॥ पितृभ्रातृयुतः श्रीमान्मुमुदे बहुवत्सरान् ॥ पंडितैस्तु वसिष्ठाद्यैर्बोधितोऽसौ
निजं महः ॥ २२ ॥ ब्रह्माख्यं बुबुधे रामो मानुषत्वं विडंबयन् ॥ ततो दशरथो राजा ज्ञातज्ञेयं निजं सुतम् ॥ २३ ॥ रामं समुद्यतो हृष्टो यौवरा

राज्येऽभिषेचितुम् ॥ यज्ज्ञात्वा कैकयी देवी राज्ञः प्रेष्ठा कनीयसी ॥ २४ ॥ सन्निवार्य हठात्तस्य पुत्रस्य तदरोचत ॥ ततो रामो मुदे तस्याः
पित्रानुमतो ययौ ॥ २५ ॥ सभार्यः स ससौमित्रिश्चित्रकूटं गिरिं शुभे॥ कियत्कालमुवासासौ तत्रैव मुनिवेषधृक् ॥२६॥ मातामहगृहात्तच्च
श्रुत्वाऽऽयातः पितुर्वधम् ॥ स विज्ञाय मृतं तातं हा रामेति विराविणम् ॥ २७ ॥ धिक्कृत्य कैकयीं यातो रामं स विनिवर्तितुम् ॥ ततः
स्वपादुके दत्वा भरतं विनिवर्त्य च ॥ २८ ॥ रामोऽत्रेश्चाप्यगस्त्यस्य सुतीक्ष्णस्याश्रमेष्वगात् ॥ तेषु द्वादश वर्षाणि गमयित्वा रघूद्वहः
॥ २९ ॥ भार्यानुजान्वितः श्रीमांस्ततः पंचवटीमगात् ॥ तत्रावसज्जनस्थाने त्रिशिरःखरदूषणान् ॥ ३० ॥ शूर्पणख्या विकृतया
प्रेरितान्स व्यनाशयत् ॥ ततो रक्षःसहस्रैश्च चतुर्दशभिरागतान् ॥ ३१ ॥ विचित्रवाजैर्नाराचैर्यमक्षयमनीनयत् ॥ यच्छ्रुत्वा रक्षसां
राजा मारीचं कांचनं मृगम् ॥ ३२ ॥ दर्शयित्वापवाह्यैतौ सीतां हत्वा जटायुषम् ॥ रुंधानं मार्गमाहत्य लंकायां समुपानयत्
॥ ३३ ॥ आगत्य तौ हृतां सीतां मार्गमाणौ समंततः ॥ दृष्ट्वा जटायुषं शांतं दग्ध्वा हत्वा कबंधकम् ॥ ३४ ॥ शबरीमनुकंप्याथ ऋष्य
मूकमुपागतौ ॥ ततस्तु हनुमद्वाक्यात्स्वसख्युः प्लवगेशितुः ॥ ३५ ॥ विद्विषं वालिनं हत्वा सुग्रीवमकरोन्नृपम् ॥ तदाज्ञप्तास्तु ते कीशाः सर्वतः
समुपागताः ॥ ३६ ॥ हनुमत्प्रमुखाः सीतां मार्गंतो दक्षिणोदधिम् ॥ प्राप्य संपातिवचनाल्लंकायां निश्चयं गताः ॥ ३७ ॥ ततस्तु
हनुमानेकः प्राप्य लंकां पुरीं कपिः ॥ समुद्रस्य परे पारेऽपश्यद्रामप्रियां सतीम् ॥ ३८ ॥ दत्त्वा रामांगुलीरत्नं विश्वासमुपपाद्य ताम् ॥
तयोः कुशलमाश्राव्य लब्ध्वा चूडामणिं ततः ॥ ३९ ॥ भङ्क्त्वा चाशोकवनिकां हत्वा चाक्षं ससैन्यकम् ॥ इंद्रजिद्बंधनात्प्राप्य संभाष्यापि
च रावणम् ॥४०॥ दग्ध्वा लंकां पुरीं कृत्स्नां पुनर्दृष्ट्वा तु मैथिलीम् ॥ लब्धाज्ञोऽर्णवमुलंघ्य रामायैनां न्यवेदयत्॥४१॥ श्रुत्वा रामोऽपि तां सीतां
राक्षसस्य निवासगाम् ॥ सार्द्धं स कपिसैन्येन संप्राप्तो मकरालयम्॥४२॥सागरानुमतेनासौ सेतुं बद्ध्वा महोदधौ ॥ अद्रिकूटैः परं तीरं प्राप्य सेनां
न्यवेशयत्॥४३॥ततोऽसौ रावणो भ्रात्रा बोधितोऽपि कनीयसा॥प्रदानं तत्र मैथिल्यास्तद्भर्त्रे न त्वरोचयत्॥४४॥पदा हतस्ततस्तेन रावणेनविभीषणः॥
संप्राप्तः शरणं रामं रामो लंकामुपारुणत् ॥ ४५ ॥ ततस्तु मंत्रिणोऽमात्याः पुत्रा भृत्याः प्रचोदिताः ॥ युद्धाय ते क्षयं नीतास्ताभ्यां संख्ये
कपीश्वरैः ॥ ४६ ॥ लक्ष्मणः शक्रजेतारं जघ्निवान्निशितैः शरैः ॥ रामोऽपि कुभश्रवणं रावणं चाप्यजीघनत् ॥ ४७ ॥ विभीषणेन तत्कृत्यं
कारयित्वा निजां प्रियाम् ॥ वह्नौ संशोध्य दत्वास्मै रामो रक्षोगणेशताम् ॥ ४८ ॥ लंकामायुश्च कल्पांतं ययौ चीर्णव्रतः पुरीम् ॥ पुष्पकेण
विमानेन ससुग्रीवविभीषणः ॥ ४९ ॥ नंदिग्रामस्थभरतं नीत्वायोध्यां समाविशत् ॥ मातॄः प्रणम्य ताः सर्वा भ्रातरस्ते पुरोधसा ॥ ५० ॥

वसिष्ठेनानुविज्ञाप्य रामं राज्येऽभ्यषेचयत् ॥ ततो रामोऽपि भगवान्प्रजाः शासन्निवौरसान् ॥ ५१ ॥ लोकापवादात्संत्रस्तः सीतां तत्याज धर्म
वित् ॥ सा तु संप्राप्य वाल्मीकेराश्रमं न्यवसत्सुखम् ॥ ५२ ॥ पुत्रौ च सुषुवे तत्र नाम्ना ख्यातौ कुशीलवौ ॥ वाल्मीकिस्तु तयोः कृत्वा यथा
समुदिताः क्रियाः ॥ ५३ ॥ रामायणं विरच्यैतावध्यापयदुदारधीः॥ तौ गायमानौ सत्रेषु मुनीनां ख्यातिमागतौ ॥ ५४ ॥ यज्ञे रामस्य संप्राप्तौ
वाजिमेधे प्रवर्तिते ॥ तत्र ताभ्यां तु तद्गीतं स्वचरित्रं प्रसन्नधीः ॥ ५५ ॥ मुनिमाकारयामास ससीतं तत्र संसदि ॥ सा तु रामाय तौ पुत्रौ
निवेद्य जगतीजनिः ॥ ५६ ॥ जगत्या विवरं भूयो विवेशासीत्तदद्भुतम् ॥ ततः परं ब्रह्मचर्यं यज्ञमेव त्रयोदश ॥ ५७ ॥ सहस्राब्दान्प्रकुर्वाणस्तस्थौ
भुवि रघूत्तमः ॥ततस्तु काले दुर्वासाः संप्राप्तो राघवं प्रति ॥ ५८॥ ब्रह्मणा प्रेषितो भद्रे वैकुंठगमनाय च ॥ स एकांतगतो रामं प्राह कोऽपीह
नाऽऽव्रजेत् ॥ ५९ ॥ आगतो वध्यतां यातु रामस्तत्प्रतिजज्ञिवान् ॥ स लक्ष्मणं समाहूय प्रोवाच रघुनंदनः ॥ ६० ॥ द्वारि तिष्ठात्र निर्विष्टो
वध्यतां मे प्रयास्यति ॥ स तथेति प्रतिज्ञाय रामस्याज्ञां समाचरन् ॥ ६१ ॥ प्रवेशनं न कस्यापि प्रददौ रामसन्निधौ ॥ एवमेकां
तगं रामं कालसंविदमास्थितम् ॥ ६२ ॥ ज्ञात्वाथ द्वारि दुर्वासा लक्ष्मणं समुपागमत् ॥ तमागतं तु संप्रेक्ष्य सौमित्रिः प्रणिपत्य
च ॥ ६३॥ मुहूर्तं पालयेत्याह मंत्रव्यग्रोऽस्ति राघवः ॥ दुर्वासास्तद्वचः श्रुत्वा कालस्यार्थविधायकः ॥ ६४ ॥ क्रुद्धः प्रोवाच
सौमित्रिं देहि मेऽन्तःप्रवेशनम् ॥ नो चेत्त्वां भस्मसात्सद्यः करिष्यामि विचारय ॥ ६५ ॥ वचो दुर्वाससः श्रुत्वा लक्ष्मणो जातसंभ्रमः ॥ मुने
र्भीतो विवेशांतर्विज्ञापयितुमग्रजम् ॥ ६६ ॥दृष्ट्वा तु लक्ष्मणं काल उत्थाय कृतमंत्रकः ॥ प्रतिज्ञां पालयेत्युक्ता ययौ रामविसर्जितः ॥ ६७ ॥ ततो
निष्क्रम्य भगवान्रामो धर्मभृतां वरः ॥ प्रतोष्य तं मुनिं प्रीतो दुर्वाससमभोजयत् ॥ ६८ ॥ भोजयित्वा प्रणम्यैनं विसृज्य प्राह लक्ष्मणम् ॥ भ्रात
र्लक्ष्मण संप्राप्तं संकटं धर्मकारणात् ॥ ६९॥ यत्त्वं मे वध्यतां प्राप्तो दैवं हि बलवत्तरम् ॥ मया त्यक्तस्ततो वीर यथेच्छं गच्छ सांप्रतम् ॥ ७० ॥
ततः प्रणम्य तं रामं सत्यधर्मे व्यवस्थितम् ॥ दक्षिणां दिशमाश्रित्य तपश्चक्रे नगोपरि ॥७१ ॥ ततो रामोऽपि भगवान्ब्रह्मप्रार्थनया पुनः॥ स्वधा
माविशदव्यग्रः ससाकेतः सकोशलः ॥७२॥गोप्रतारे सरय्वां ये रामं संचिंत्य संप्लुताः ॥ ते रामधाम विविशुर्दिव्यांगा योगिदुर्लभम् ॥ ७३ ॥
लक्ष्मणस्तु कियत्कालं तपोयोगबलान्वितः ॥ रामानुगमनेनैव स्वधामाविशदव्ययम् ॥ ७४ ॥ सान्निध्यं पर्वते तस्मिन्दत्त्वा सौमित्रिरन्वहम् ॥
चक्रे निजाधिकारं स ततस्तत्क्षेत्रमुत्तमम् ॥ ७५ ॥ ये पश्यंति नरा भक्त्या लक्ष्मणं लक्ष्मणाचले ॥ ते कृतार्था न संदेहो गच्छंति हरि

मंदिरम् ॥ ७६ ॥ तत्र दानं प्रशंसंति स्वर्णगोभूमिवाजिनाम् ॥ दत्तं तत्राक्षयं सर्वं हुतं जप्तं कृतं तथा ॥७७ ॥ बहुना किमिहोक्तेन दर्शनं तस्य
दुर्लभम् ॥ अगस्त्याज्ञांतरा देवि दृष्टे मुक्तिर्न संशयः॥७८॥एतद्रामचरित्रं तु लक्ष्मणाख्यानसंयुतम्॥ श्रावयेद्योऽपि शृणुयात्स्यातां तौ रामवल्लभौ
॥ ७९ ॥ ॥ इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे वसुमोहिनीसंवादे रामलक्ष्मणचरित्रसहितलक्ष्मणाचलमाहात्म्यं नाम पञ्चसप्तति
तमोऽध्यायः ॥ ७५ ॥ इति लक्ष्मणाचलमाहात्म्यम् ॥ अथ सेतुमाहात्यमारभ्यते ॥ मोहिन्युवाच ॥ साधु साधु द्विजश्रेष्ठ यन्मे रामायणं त्वया॥
श्रावितं सर्वपापघ्नं नृणां पुण्यविवर्द्धनम् ॥१॥ अधुना श्रोतुमिच्छामि सेतुमाहात्म्यमुत्तमम्॥वसुरुवाच॥शृणु देवि प्रवक्ष्यामि सेतुमाहात्म्यमुत्तमम्
॥ २ ॥ यं दृष्ट्वा मनुजो देवि मुच्यते भवसागरात् ॥ सेतोः संदर्शनं पुण्यं यत्र रामेश्वरो विभुः ॥ ३ ॥ दर्शनादेव मर्त्यानाममरत्वं
प्रयच्छति ॥ रामेश्वरं तु संपूज्य नरो नियतमानसः ॥४ ॥ सर्वाः समश्नुते भूतीर्नात्र कार्या विचारणा ॥चक्रतीर्थमिहान्यच्च वर्तते पापनाशनम् ॥५॥
स्नानं दानं जपो होमस्तत्रानंत्यं विगाहते ॥ तालतीर्थं तु संप्राप्य यः स्नायात्तत्र मानवः ॥ ६ ॥ स उत्तमां जनिं लब्ध्वा मोदते देववद्भुवि ॥
ततः संप्राप्य सुभगे तीर्थं पापविनाशनम् ॥ ७ ॥ स्नात्वा निर्धूतपापोऽसौ नरः स्वर्गे महीयते॥सीताकुंडे ततः प्राप्य स्नानं सम्यग्विधाय च ॥ ८॥
तर्पयित्वा पितॄन्देवान्सर्वान्कामानवाप्नुयात् ॥ मंगलं तीर्थमासाद्य स्नात्वा मुच्येत पातकात् ॥ ९ ॥ स्नात्वैवामृतवाप्यां तु मानवोऽमरतां लभेत् ॥
ब्रह्मकुंडे नरः स्नात्वा ब्रह्मलोकमवाप्नुयात् ॥१०॥ स्नात्वा लक्ष्मणतीर्थे वै नरो योगगतिं व्रजेत् ॥ जटातीर्थे नरः स्नात्वा नीरोगो जायते भुवि
॥११॥हनुमत्कुंडके स्नात्वा दुर्जयो जायतेऽरिभिः॥अगस्त्यतीर्थ आप्लुत्य पुत्रवान्धनवान्भवेत्॥ १२॥रामकुंडे प्लुतो मर्त्यो रामसालोक्यमाप्नुयात्॥
लक्ष्मीतीर्थाभिषेकेण लक्ष्मीवान्रूपवान्भवेत् ॥१३॥ अग्नितीर्थे नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥ स्नानेन शिवतीर्थे तु शिवलोकगतिर्भवेत्॥१४॥
शंखतीर्थे तु संस्नातो न नरो दुर्गतिं व्रजेत् ॥ यमुनादिषु तीर्थेषु नरः स्नात्वा दिवं व्रजेत् ॥ १५ ॥कोटितीर्थे तु संप्लुत्य सर्वतीर्थफलं लभेत् ॥
साध्यामृते प्लुतो याति नरः साध्यसलोकताम्॥१६॥सर्वतीर्थे नरः स्नात्वा लभेत्कामानभीप्सितान्॥धनुष्कोट्यां तु विधिवत्स्नातो मुच्येत बंधनात्
॥१७॥क्षीरकुंडाप्लुतो मर्त्यो भोगानुच्चावचाँल्लभेत् ॥कपितीर्थे नरः स्नात्वा न वियोनिं समालभेत्॥ १८ ॥ गायत्र्यां च सरस्वत्यां स्नातो मुच्येत
किल्बिषात् ॥ ऋणमोचनतीर्थादौ स्नात्वा मुक्तो भवेदृणात्॥१९॥इत्येतत्सेतुतीर्थानां माहात्म्यं गदितं शुभे॥ पठतां शृण्वतां चैव सर्वपातकनाशनम्

॥ २० ॥ इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे वसुमोहिनीसंवादे सेतुमाहात्म्यं नाम षट्सततितमोऽध्यायः ॥ ७६ ॥ मोहिन्युवाच[1]॥
श्रुतं मया द्विजश्रेष्ठ सेतुमाहात्म्यमुत्तमम् ॥ अधुना श्रोतुमिच्छामि नर्मदातीर्थसंग्रहम्॥ १॥वसुरुवाच ॥ शृणु मोहिनि वक्ष्यामि नर्मदोभयतीरगम्॥
चतुःशतं मुख्यतमं प्रोक्तं तीर्थकदंबकम्॥२॥ एकादशोत्तरे तीरे दक्षिणे च त्रिविंशतिः॥पंचत्रिंशत्तमः प्रोक्तो रेवासागरसंगमः॥३॥ॐकारतीर्थं परितो
नगादमरकंटकात् ॥ क्रोशद्वये सर्वदिक्षु सार्द्धकोटित्रयी स्थिता ॥४॥ कोटिरेका तु तीर्थानां कपिलासंगमे स्थिता ॥ अशोकवनिकायां च तीर्थलक्षं
प्रतिष्ठितम् ॥५॥शतमंगारगर्तायाः कुब्जाया[2] अयुतं तथा॥सहस्रं वायुसंगे तु सरस्वत्याः शतं स्थितम्॥६॥शतद्वयं शुक्लतीर्थे सहस्रं विष्णुतीर्थके॥
माहिष्मत्यां च साहस्रं शूलभेदेऽयुतं विदुः॥७॥ देवग्रामे सहस्रं चोलूके सप्तशती स्थिता॥तीर्थान्यष्टोत्तरशतं मणिनद्याश्च संगमे ॥ ८ ॥ वैद्यनाथे च
तावंति तावंत्येव घटेश्वरे ॥ सार्द्धलक्षं च तीर्थानां स्थितं रेवाब्धिसंगमे ॥९ ॥ अष्टाशीतिसहस्राणि व्यासे द्वीपशतानि च ॥ संगमे तु करंजाया[3]ः
स्थितमष्टोत्तरायुतम् ॥ १० ॥ एरंडीसंगमे तद्वत्तीर्थान्यष्टाधिकं शतम् ॥ धूतपापेऽष्टषष्टिश्च सार्द्धकोटिश्च कोकिले ॥ ११ ॥ सहस्रं रोमकेशे च
द्वादशार्के सहस्रकम् ॥ लक्षाष्टके सहस्रे द्वे शुक्लतीर्थे नरेश्वरि ॥ १२ ॥ संगमेषु तु सर्वेषु शतमष्टाधिकं विदुः ॥ कावेर्याः संगमे नंदे तीर्थपंचशती
स्थिता ॥ १३ ॥ भृगोः क्षेत्रे च तीर्थानां कोटिरेका व्यवस्थिता ॥ भारभूत्यां च तीर्थानां शतमष्टोत्तरं स्थितम् ॥ १४ ॥ अक्रूरेशे सार्द्धशतं
विमलेशे दशायुतम्॥ सा सार्द्धकोटिरित्येषा तीर्थसंज्ञा च नार्मदे ॥ १५ ॥ दशादित्यस्य नव च कपिलस्याष्ट वै विधोः ॥ नंदिनः कोटिसंज्ञानि
तथैवाष्ट शुभानने ॥ १६ ॥ नागाग्निसिद्धावर्तानि सप्तसंख्यानि मोहिनि ॥ केदारेन्द्रियवारीशनंदिदैवानि पंच वै ॥१७॥ यमेशा वैद्यनाथाश्च वाम
नांगारकेश्वराः ॥ सारस्वता मुनीशाश्च दारुकेशाश्च गौतमाः ॥ १८ ॥ चत्वार एव गदितास्त्रयो वै विमलेश्वराः ॥ सहस्रयज्ञभीष्मेशास्स्वर्ण
तीर्थानि चापि हि ॥ १९ ॥ धौतपापकरंजेशऋणमुक्तिगुहाह्वयम् ॥ दशाश्वमेधनंदाख्यं मन्मथेशाख्यभार्गवम् ॥ २० ॥ पराशरायोनिसंज्ञ
व्यासाख्यपितृनंदिकम् ॥ गोपेशमारुतेशाख्यं जंगलेशाख्यशुक्लकम् ॥ २१ ॥ अक्षरेशं पिप्पलेशं मांडव्यदीपकेश्वरम् ॥ उत्तरेशमशोकेशं
योधनेशं च रौहिणम् ॥ २२ ॥ लुकेशं च द्विसंख्याकं प्रत्येकं गदितं शुभे ॥ सैकोनविंशतिशतं तीर्थान्येकैकशः शुभे ॥ २३ ॥ स्तबकेषु च

---

१ आर्षत्वयसभावः । २ कुब्जायाः संगमे । इति ख० पा० । ३ करंजाया इति क० पा० । ४ पुरण्टीति ख० पा० ।

तीर्थानि द्विशतं च चतुर्दशम् ॥ शैवान्येतानि तीर्थानि वैष्णवानि द्विविंशतिः ॥२४॥ब्राह्माणि सर्वतीर्थानि शाक्तान्यष्टौ च विंशतिः ॥ तेषु सप्त
च मातॄणां त्रीणि ब्राह्म्याः शुभानने ॥ २५ ॥ वैष्णव्या द्वे तथा भद्रे रौद्री शेषेषु संस्थिता ॥तथैकं क्षेत्रपालस्य तीर्थमुक्तं शुभानने ॥ २६ ॥
अवांतराणि गुह्यानि प्रकटानि च मोहिनि ॥ सार्द्धत्रिकोटितीर्थानि गदितानीह वायुना ॥ २७ ॥ दिवि भुव्यंतरिक्षे च रेवायां तानि संति च ॥
यस्त्वेतेषु महाभागे यत्र कुत्रापि मानवः ॥ २८ ॥ स्नानं करोति शुद्धात्मा स लभेदुत्तमां गतिम् ॥ स्नानं दानं जपो होमो वेदाध्ययनमर्च
नम् ॥ २९ ॥ सर्वमक्षयतां याति नर्मदायास्तटे कृतम् ॥ त्र्यहात्सारस्वतं तोयं सप्ताहाद्यामुनं सति ॥ ३० ॥ गांगं सकृत्प्लवात्पुण्यं दर्शनादेव
नार्मदम् ॥ इत्येष कथितो देवि नर्मदातीर्थसंग्रहः ॥ ३१ ॥ स्मरतामपि मर्त्यानां महापातकशांतिदः ॥ य इमं शृणुयान्मर्त्यो नर्मदातीर्थसंग्र
हम् ॥ ३२ ॥ श्रावयेद्वा पठेद्भद्रे सोऽपि पापैः प्रमुच्यते ॥यद्गृहे लिखितं चैतन्माहात्म्यं नर्मदाभवम् ॥ ३३ ॥ विद्यतेऽभ्यर्चितं तत्र न मारी
नाग्निजं भयम् ॥ न राजचौरशत्रुभ्यो भयं रोगभयं न च ॥ ३४ ॥ तद्गृहं पूर्यते लक्ष्म्या धनैर्धान्यैर्निरंतरम् ॥ पुत्रपौत्रादिकानां च विवाहाद्यैः
सुमंगलम् ॥ ३५ ॥ इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे वसुमोहिनीसंवादे नर्मदातीर्थमाहात्म्यं नाम सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥
इति नर्मदातीर्थमाहात्म्यम् ॥ अथावन्तीमाहात्म्यमारभ्यते ॥ मोहिन्युवाच ॥ अत्यद्भुतमिदं विप्र माहात्म्यं नर्मदाभवम् ॥ श्रुतं त्वया निगदितं
नृणां पापविनाशनम् ॥ १ ॥ अधुना तु महाभाग ब्रूहि मेऽवंतिसंभवम् ॥ माहात्म्यं देववंद्यस्य महाकालस्य च प्रभो ॥ २ ॥ वसुरुवाच ॥ शृणु
भद्रे प्रवक्ष्यामि ह्यवंत्याः पुण्यदं नृणाम् ॥ माहात्म्यं सर्वपापघ्नं यथावत्परिकीर्तितम् ॥ ३ ॥ महाकालवनं पुण्यं तपःस्थानमनुत्तमम् ॥ यत्र देवो
महाकालः स्थितस्तपसि नित्यदा ॥ ४ ॥ महाकालवनात्क्षेत्रं नापरं विद्यते भुवि ॥ यत्र गत्वा नरो देवि स्पर्द्धते दैवतैः सह ॥ ५ ॥ कपाल
मोचनं नाम यत्र तीर्थं सुलोचने ॥ तत्र स्नात्वा नरो भक्त्या ब्रह्महापि विशुध्यति ॥ ६ ॥ तथा कलकलेशाख्यं देवमभ्यर्च्य मानवः ॥ विवादे
जयमाप्नोति कार्यसिद्धिं च संततम् ॥ ७ ॥ अत्रान्यदप्सरःकुंडं तीर्थं तत्राप्लुतो नरः ॥ सुभगो भोगवान्भूयात्साक्षात्कंदर्पसन्निभः ॥ ८ ॥ मर्हि
पाख्ये तथा कुंडे स्नातः शत्रूञ्जयेद्रणे ॥ स्नातस्तु रुद्रसरसि रुद्रलोके महीयते ॥ ९ ॥ कुण्डवेश्वरमासाद्य समभ्यर्च्य विधानतः ॥ व्यापारे लाभ
माप्नोति जायते च शिवप्रियः ॥ १० ॥ विद्याधराह्वये तीर्थे नरः स्नात्वा विशुध्यति ॥ मार्कण्डेश्वरमभ्यर्च्य दीर्घायुश्च धनी भवेत् ॥ ११ ॥संपूज्य
शीतलां देवीं नरः कालवने स्थिताम् ॥ विस्फोटकभयं नैव कदाचित्तस्य जायते ॥ १२ ॥ स्वर्गद्वारं समासाद्य स्नात्वाभ्यर्च्य सदाशिवम् ॥

नरो न दुर्गतिं याति स्वर्गलोके महीयते ॥ १३ ॥ राजस्थलं नरः प्राप्य ततः सामुद्रिके प्लुतः ॥ स्नानस्य सर्वतीर्थानां लभते फलमुत्तमम् ॥१४॥
शंकरस्य तथा वाप्यां स्नात्वा नियमवान्नरः ॥ प्राप्येह वाञ्छितान् भोगानन्ते रुद्रपुरं व्रजेत् ॥ १५ ॥ शंकरादित्यमभ्यर्च्य नरः स्याद्दुष्प्रधर्षणः ॥
स्नातस्तु नीलगंगायां देवीं गंधवतीं नरः ॥ १६ ॥ संपूज्य भक्तिभावेन सर्वपापैः प्रमुच्यते ॥ दशाश्वमेधिके स्नात्वा वाजिमेधफलं लभेत् ॥ १७॥
अथ मर्त्यः समासाद्य एकानंशां सुरेश्वरीम् ॥ संपूज्य गंधपुष्पाद्यैः सर्वान्कामानवाप्नुयात्॥१८॥हरसिद्धिं नरोऽभ्यर्च्य सर्वसिद्धीश्वरो भवेत्॥ पिशा
चकादिकान्मर्त्यः समभ्यर्च्य चतुर्दश ॥ १९ ॥ सर्वान्कामानवाप्नोति नात्र कार्या विचारणा ॥ हनुमत्केश्वरं प्रार्चेत्स्नात्वा रुद्रसरोवरे ॥ २०॥ यो
नरः श्रद्धया युक्तः स लभेत्संपदोऽखिलाः ॥ वाल्मीकेश्वरमभ्यर्च्य सर्वविद्यानिधिर्भवेत् ॥ २१ ॥ शुक्रेश्वरादिलिंगानि योऽर्चयेच्छ्रद्धया नरः ॥ स
स्यादखिलभोगाढ्यः सर्वरोगविवर्जितः ॥२२ ॥ पंचेशानं समभ्यर्च्य स्यान्नरः सर्वसिद्धिभाक् ॥ कुशस्थलीं परिक्रम्य वांछितं लभते फलम् ॥२३॥
अक्रूरेशं तु संपूज्य क्रूरेभ्योऽप्यभयं लभेत् ॥ मंदाकिन्यां समाप्लुत्य गंगास्नानफलं लभेत् ॥ २४ ॥ अंकपादं नरोऽभ्यर्च्य शिवस्यानुचरो भवेत् ॥
चन्द्रादित्यं प्रपूज्याथ भोगान्नानाविधाँल्लभेत ॥ २५ ॥ करभेश्वरमभ्यर्च्य यानसौख्यमवाप्नुयात ॥ लड्डुकप्रियविघ्नेशं समभ्यर्च्य सुखी भवेत्
॥ २६ ॥ कुसुमेशादिकान्प्रार्च्य सर्वान्भोगान्समश्नुते ॥ यज्ञवाप्यां नरः स्नात्वा मार्कंडेशं समर्च्य च ॥ २७ ॥ सर्वयज्ञफलं लब्ध्वा युगमेकं
वसेद्दिवि ॥ सोमवत्यां नरः स्नात्वाभ्यर्च्य सोमेश्वरं सति ॥ २८ ॥ वांछिताँल्लभते कामानिहामुत्र च मोहिनि ॥ यातनाकलने स्नात्वा
यातनां नैव पश्यति ॥ २९ ॥ नरकेशं समभ्यर्च्य स्वर्गलोकगतिं लभेत् ॥ केदारेशं ततः प्रार्च्य रामेश्वरमथापि वा ॥ ३० ॥ सौभाग्येशं
नरादित्यं लभते वाछितं फलम् ॥ केशवार्कं तु संपूज्य नरः स्यात्केशवप्रियः ॥ ३१ ॥ शक्तिभेदे ततः स्नात्वा मुच्यतेऽत्युग्रसंकटात् ॥ स्वर्ण
सुरब्रह्मवाप्यां स्नात्वाभ्यर्च्याभयेश्वरम् ॥ ३२ ॥ अगस्त्येशं च विधिज संपदामयनं भवेत् ॥ ॐकारेशादिलिंगानि यो नरः सम्यगर्चयेत्
॥३३॥ स लभेदखिलान्कामान्महेशस्य प्रसादतः ॥ महाकालवने देवि लिंगसंख्या न विद्यते॥३४॥यत्र तत्र स्थितं लिंगं संपूज्य स्याच्छिवप्रियः॥
तथा कनकशृंगाह्वा कुशस्थल्यप्यवंतिका॥३५॥तथा पद्मावती देवी कुमुद्वत्युज्जयिन्यपि॥प्रतिकल्पाभिधा भिन्ना विशालाख्याभगवती॥३६॥शिप्रायां
वै नरः स्नात्वा यो महेशं समर्चयेत् ॥ स लभेत्सकलान्कामान्देवयोस्तु प्रसादतः ॥३७॥ स्नात्वा तु गोमतीकुंडे स्वर्गतिं लभते नरः ॥ कुंडे तु

वामने स्नात्वा स्तौति नामसहस्रतः ॥ ३८ ॥ श्रीधरं सर्वदेवेशं यः स साक्षाद्धरिर्भुवि॥स्नात्वा वीरेशसरसि योऽर्चयेत्कालभैरवम् ॥३९॥ स सर्वाः
संपदो भुक्त्वा शिवलोकमवाप्नुयात् ॥ यः कुटुंबेश्वरं प्राप्य पूजयेदुपचारकैः ॥ ४० ॥ संप्राप्य विविधान्कामानंते स्वर्गगतिं लभेत् ॥ देव
प्रयागसरसि योऽर्चयेदेवमाधवम् ॥ ४१ ॥ स भक्तिं माधवे प्राप्य पदं विष्णोः समाप्नुयात् ॥ कर्कराजस्य तीर्थे तु स्नात्वा प्रयतमानसः ॥ ४२ ॥
सर्वरोगविनिर्मुक्तो धनी भोगी भवेत्सति ॥ अंतर्गृहस्य यात्रायां विघ्नेशं भैरवं ह्युमाम् ॥४३ ॥ रुद्रादित्यान्सुरानन्यान्योऽर्चयेच्छ्रद्धया नरः ॥
यथालब्धोपचाराद्यैः स भवेत्स्वर्गलोकभाक् ॥ ४४ ॥ रुद्रसरःप्रभृतिषु तीर्थान्यन्यानि भामिनि ॥ बहूनि तेषु चाभ्यर्च्य शंकरं स्यात्सुखी
नरः ॥ ४५ ॥ अष्टतीर्थ्यां नरः स्नात्वा सांगं यात्राफलं लभेत् ॥ कालारण्यस्य विधिजे सत्यं सत्यं मयोदितम् ॥ ४६ ॥ एतत्ते सर्वमाख्यातं
माहात्म्यं पापनाशनम्॥ अवंत्या यन्नरः श्रुत्वा सर्वपापैः प्रमुच्यते ॥ ४७ ॥ इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे वसुमोहिनीसंवादे
अवंतिकामाहात्म्यं नामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ इत्यवन्तीमाहात्म्यं संपूर्णम् ॥ अथ मथुरामाहात्म्यमारभ्यते ॥ मोहिन्युवाच ॥ श्रुतं
ह्यवंत्या माहात्म्यं वसो पापहरं नृणाम् ॥ अधुना श्रोतुमिच्छामि माहात्म्यं मथुराभवम् ॥ १ ॥ वसुरुवाच ॥ शृणु मोहिनि वक्ष्यामि मथुरायाः
शुभावहम् ॥ वैभवं यत्र भगवाञ्जातः पद्मभुवार्थितः ॥ २ ॥ आविर्भूय विभुस्तत्र संप्राप्तो नंदगोकुलम् ॥ तत्र स्थित्वाखिलाः क्रीडाश्चकार सह
गोपकैः ॥ ३ ॥ हत्वा च कंसप्रहितान्पूतनादीन्निशाचरान् ॥ विजहार स गोपीभिर्वनेषु द्वादशस्वपि ॥ ४ ॥ वनेषु यानि तीर्थानि संति यानि
च माथुरे ॥ तानि तेऽहं प्रवक्ष्यामि शृणु मोहिनि सांप्रतम् ॥ ५ ॥ आद्यं मधुवनं नाम स्नातो यत्र नरोत्तमः ॥ संतर्प्य देवर्षिपितॄन्विष्णुलोके
महीयते ॥ ६ ॥ अथ तालाह्वयं देवि द्वितीयं वनमुत्तमम् ॥ यत्र स्नातो नरो भक्त्या कृतकृत्यः प्रजायते ॥ ७ ॥ कुमुदाख्यं तृतीयं
तु यत्र स्नात्वा सुलोचने ॥ लभते वांछितान्कामानिहामुत्र च मोदते ॥ ८ ॥ ततः काम्यवनं नाम चतुर्थं परिकीर्तितम्॥
बहुतीर्थान्वितं यत्र गत्वा स्याद्विष्णुलोकभाक् ॥ ९ ॥ यत्तत्र विमलं कुंडं सर्वतीर्थोत्तमोत्तमम् ॥ तत्र स्नातो नरो भद्रे लभते वैष्णवं पदम् ॥१० ॥
पंचमं बहुलाख्यं तु वनं पापविनाशनम् ॥ यत्र स्नातस्तु मनुजः सर्वान्कामानवाप्नुयात् ॥ ११ ॥ अस्ति भद्रवनं नाम षष्ठं स्नातोऽत्र मानवः ॥
कृष्णदेवप्रसादेन सर्वभद्राणि पश्यति ॥ १२ ॥ खादिरं तु वन देवि सप्तमं यत्र मानवः ॥ स्नानमात्रेण लभते तद्विष्णोः परमं पदम् ॥ १३ ॥
महावनं चाष्टमं तु सदैव हरिवल्लभम् ॥ तद्दृष्ट्वा मनुजो भक्त्या शक्रलोके महीयते॥ १४ ॥ लोहजंघं तु नवमं वनं यत्राप्लुतो नरः ॥ महाविष्णु

प्रसादेन भुक्तिं मुक्तिं च विंदति॥१५ ॥ बिल्वारण्यं तु दशमं यत्र स्नातः सुमध्यमे॥ शैवं वा वैष्णवं वापि याति लोकं निजेच्छया ॥ १६॥ एकादशं तु भांडीरं योगिनामतिवल्लभम् ॥ यत्र स्नातो नरो भक्त्या सर्वपापैर्विमुच्यते ॥ १७ ॥ वृन्दावनं द्वादशं तु सर्वपापनिकृंतनम् ॥ यत्समं न धरापृष्ठे वनमस्त्यपरं सति ॥ १८ ॥ यत्र स्नातस्तु मनुजो देवर्षिपितृतर्पणम् ॥ कृत्वा ऋणत्रयान्मुक्तो विष्णुलोके महीयते ॥ १९ ॥ विंशति योजनानां तु माथुरं परिमंडलम्॥ यत्र कुत्राप्लुतस्तत्र विष्णुभक्तिमवाप्नुयात् ॥ २० ॥ तन्मध्ये मथुरा नाम पुरी सर्वोत्तमोत्तमा ॥ यस्या दर्शनमात्रेण भक्तिं विंदति माधवे ॥ २१ ॥ विश्रांतिसंज्ञकं यत्र तीर्थरत्नं नरेश्वरि ॥ तत्र स्नातो नरो भक्त्या वैष्णवं लभते पदम् ॥ २२ ॥ विश्रांतेर्निकटे दक्षे विमुक्तं तीर्थमुत्तमम् ॥ तत्र स्नातो नरो भक्त्या मुक्तिमाप्नोति निश्चितम् ॥ २३ ॥ ततोऽपि दक्षिणे भागे रामतीर्थं जनेश्वरि ॥ यत्र स्नातो नरोऽज्ञानबंधान्मुक्तो भवेद्ध्रुवम्॥ २४ ॥ संसारमोक्षणं तस्माद्दक्षिणे तीर्थमुत्तमम् ॥ तत्र स्नात्वा तु मनुजो विष्णुलोके महीयते ॥ २५ ॥ प्रयागाख्यं ततो दक्षे तीर्थं त्रिदशदुर्लभम् ॥ स्नातस्तत्र नरो देवि अग्निष्टोमफलं लभेत् ॥ २६ ॥ ततः कनखलं तीर्थं यत्र स्नातो नरः सति ॥ स्वर्गमासाद्य देहांते मोदते नंदनादिषु ॥ २७ ॥ तद्दक्षे तिन्दुकं तीर्थं यस्मिन्स्नातो नरोत्तमः ॥ राजसूयफलं प्राप्य मोदते दिवि देववत् ॥ २८ ॥ ततः परं पटुस्वामितीर्थं भास्करवल्लभम् ॥ स्नात्वा यत्र रविं दृष्ट्वा भुक्तभोगो दिवं व्रजेत् ॥ २९ ॥ तस्माद्दक्षिणतो भद्रे ध्रुवतीथमनुत्तमम् ॥ यत्र स्नातो ध्रुवं दृष्ट्वा लभते वैष्णवं पदम् ॥ ३० ॥ ध्रुवतीर्थात्ततो दक्षे तीर्थं सप्तर्षिसेवितम् ॥ तत्र स्नात्वा मुनीन्दृष्ट्वा ऋषिलोके प्रमोदते ॥ ३१ ॥ दक्षिणे ऋषितीर्थस्य मोक्षतीर्थमनुत्तमम् ॥ यत्र वै स्नानमात्रेण मुच्यते सर्वपापतः ॥ ३२ ॥ तद्दक्षे बोधिनीतीर्थं स्नात्वा यत्र तु मानवः ॥ दत्वा पिंडं पितृभ्यश्च नयेत्तांस्त्रिदशालयम् ॥ ३३ ॥ तद्दक्षे कोटितीर्थं वै यत्र स्नानेन मानवः ॥ सर्वपापविनिर्मुक्तो विष्णुलोकमवाप्नुयात् ॥ ३४ ॥विश्रांतेरुत्तरे भागे तीर्थमस्त्यसिकुंडकम्॥ यत्र स्नातो नरो देवि वैष्णवं लभते पदम् ॥३५ ॥ असिकुंडस्य सौम्ये तु नवतीर्थं सुलोचने ॥ यत्र वै स्नानतो मर्त्यः स्वर्गलोके महीयते ॥ ३६ ॥ तीर्थं संयमनं नाम तत उत्तरतः स्थितम् ॥ तत्र स्नानेन दानेन यमलोकं न पश्यति ॥ ३७ ॥ तदुत्तरे परं तीर्थं धारायतनसंज्ञकम् ॥ तत्र स्नात्वा तु मनुजः पितृभिः सह मोदते ॥ ३८ ॥ तदुत्तरे नागतीर्थं यत्र स्नानेन मोहिनि ॥ सर्पेभ्यो ह्यभयं लब्ध्वा स्वर्गे लोके महीयते ॥ ३९ ॥ तदुत्तरे ब्रह्मलोकं घंटाभरणकाह्वयम् ॥ स्नानात्पापापहं तीर्थं ब्रह्म

लोकगतिप्रदम् ॥ ४० ॥ अस्मात्सौम्ये परं तीर्थं सोमाख्यं यत्र संप्लुतः॥सोमलोकमवाप्नोति विपापो मनुजोत्तमः॥४१ ॥ स्नात्वा प्राचीसरस्वत्यां
तस्मादुत्तरतः शुभे ॥ यत्र वै स्नानमात्रेण नरो वागीश्वरो भवेत् ॥ ४२ ॥ तदुत्तरे चक्रतीर्थं यत्र स्नातस्तु मानवः॥ जित्वा शत्रुगणं स्वर्गे मोदते
युगसप्तकम् ॥ ४३ ॥ दशाश्वमेधिकं तीर्थं तस्मादुत्तरतः स्थितम् ॥ यत्र स्नानेन सुभगे वाजिमेधफलं लभेत् ॥ ४४ ॥ गोकर्णाख्यं शिवं तत्र
संपूज्य विधिवन्नरः ॥ सर्वान्कामानवाप्यांते शिवलोके महीयते ॥ ४५ ॥ विघ्नराजाह्वयं तीर्थं तस्मादुत्तरतः स्थितम् ॥ यत्र स्नात्वा ह्यविघ्नेन
सर्वकर्मफलं लभेत् ॥ ४६ ॥ तदुत्तरे ह्यनंताख्यं तीर्थं तत्राप्लुतो नरः ॥ चतुर्विंशतितीर्थानां माथुराणां फलं लभेत् ॥ ४७ ॥ मथुरायां महाभागे
साक्षाद्देवो हरिः स्थितः ॥ चतुर्व्यूहस्वरूपेण माथुराणां विमुक्तिदः ॥ ४८ ॥ एका वाराहमूर्तिश्च परा नारायणाह्वया ॥ वामनाख्या तृतीया च
चतुर्थी हलधारिणी ॥ ४९॥ चतुर्व्यूहधरं दृष्ट्वा समभ्यर्च्य विधानतः ॥ नरो मुक्तिमवाप्नोति नात्र कार्या विचारणा॥ ५० ॥ रंगेशं चापि भूतेशं
महाविद्यां च भैरवम्॥ दृष्ट्वा संपूज्य विधिवत्तीर्थयात्राफलं लभेत् ॥ ५१ ॥ चतुःसामुद्रिके कूपे कुब्जायाश्च गणेशितुः ॥ तथा कृष्णाख्यगंगायां
स्नात्वा मुच्येत पातकात् ॥ ५२ ॥ सर्वस्य माथुराख्यस्य मंडलस्य शुभानने ॥ आधिपत्ये स्थितो देवः केशवः क्लेशनाशनः ॥ ५३ ॥
अदृष्ट्वा केशवं भद्रे माथुरे पुण्यमंडले ॥ जनुर्निरर्थकं तस्य संसरेद्भवसागरे॥५४ ॥ अन्यान्यसंख्यतीर्थानि तत्र सन्ति शुभानने ॥ स्नात्वा तेष्वपि
दत्त्वा च किंचित्तत्र स्थिताय च ॥ ५५ ॥ नरो न दुर्गतिं याति सत्यं तुभ्यं मयोदितम् ॥मथुरायाश्च माहात्म्यं श्रावयेद्यः शृणोति च ॥ सोऽपि
भक्तिं हरौ लब्ध्वा सर्वान्कामानवाप्नुयात् ॥५६॥ इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे वसुमोहिनीसंवादे मथुरामाहात्म्यवर्णनं नामै
कोनाशीतितमोऽध्यायः॥७९॥ इति मथुरामाहात्म्यम् ॥ अथ वृन्दावनमाहात्म्यम्॥ मोहिन्युवाच॥ मथुरायास्तु माहात्म्यं वनानां चापि मानद ॥
श्रुतं वृन्दावनस्यापि रहस्यं किंचिदीरय ॥ १॥ वृंदारण्यं भुवो ब्रह्मन्कीर्तिरूपं रहोगतम् ॥ तच्छ्रोतुं मम वांछास्ति तन्निरूपय विस्तरात्॥ २ ॥ वसु
रुवाच ॥ शृणु देवि रहस्यं मे वृन्दारण्यसमुद्भवम् ॥ यन्न कस्मैचिदाख्यातं मया प्राप्य गुरूत्तमात् ॥ ३ ॥ गुरवे कथितं भद्रे नारदेन महात्मना ॥
वृन्दया नारदायोक्तं रहस्यं गोपिकापतेः ॥४॥ तत्तेऽहं संप्रवक्ष्यामि जगदुद्धारकारणम् ॥ एकदा नारदो लोकान्पर्यटन्भगवत्प्रियः ॥ ५ ॥ वृन्दा
रण्यं समासाद्य तस्थौ पुष्पसरस्तटे ॥ पश्चिमोत्तरतो देवि माथुरे मंडले स्थितम् ॥ ६ ॥ वृन्दारण्यं तुरीयांशं गोपिकेशरहःस्थलम् ॥ गोवर्द्धनो

यत्र गिरिः सखिस्थलसमीपतः ॥ ७॥वृन्दायास्तत्तपोऽरण्यं नंदिग्रामानुयामुनम् ॥तटे तु यामुने रम्ये रम्यं वृंदावनं सति ॥ ८॥ पुण्यं तत्रापि सुभगे
सुपुण्यं कौसुमं सरः ॥ वृंदायास्तु तटे रम्ये आश्रमोऽतिसुखावहः ॥ ९ ॥ नित्यं विश्रमते यत्र मध्याह्ने सखिभिर्हरिः ॥मुहूर्तं स तु विश्रम्य स्निग्ध
च्छायतरोस्तले ॥ १० ॥ शीतलं पुष्पसरसो वार्युपस्पृश्य नारदः ॥ कृत्वा माध्याह्निकं कर्म तस्थौ तत्र सरस्तटे ॥ ११ ॥ तत्र वृन्दाश्रमे रम्ये
गोप्यो गोपाश्च मोहिनि ॥ आयांति वर्गशो यांति नारदस्य विपश्यतः ॥ १२ ॥ अथैवं याममेकं तु तत्र स्थित्वा तु नारदः ॥ प्रहरार्द्धावशिष्टेऽह्नि
विवेशाश्रममद्भुतम् ॥ १३ ॥ यत्र वृन्दा स्थिता देवी कृष्णभक्तिपरायणा ॥ समागतानां सत्कारं विदधाना फलादिभिः॥ १४ ॥ तां दृष्ट्वा तापसीं
भद्रे नारदः साधुसम्मतः ॥ नमस्कृत्य विनम्रांगो निषसाद धरातले ॥ १५ ॥ ततः सा ध्यानयोगांते समुन्मील्य विलोचने ॥ आसनं संदि
देशाथोऽतिथये नारदाय वै ॥ १६ ॥ ततः स नारदस्तत्र सत्कृतो वृन्दयावसत् ॥.रहस्यं गोपिकेशस्य तस्या जिज्ञासुरादरात् ॥ १७ ॥ तया
कृतां सत्कृतिं तु स्वीकृत्य विधिनंदनः ॥ सुप्रसन्नांतरां वृन्दां ज्ञात्वा हार्दं व्यजिज्ञपत् ॥ १८ ॥ सा तु तद्वांछितं ज्ञात्वा ध्यानयोगेन भामिनि ॥
स्वसखीं माधवीं तत्र समाहूयाब्रवीदिदम् ॥ १९ ॥ माधवि प्रियमेतस्य नारदस्य महात्मनः ॥ संपादय यथा मह्यमाश्रमस्य सुपुण्यता ॥ २० ॥
स्वाश्रमं ह्यागतस्यैव यो न संपादयेत्प्रियम् ॥ निष्फलो ह्याश्रमस्तस्य फेरुराजगृहोपमः ॥ २१ ॥ अथ सा माधवी देवी नीत्वा नारदमाज्ञया ॥
स्वाधिष्ठात्र्यास्तु वृन्दायाः सरसस्तटमुत्तमम् ॥२२ ॥ पश्चिमोत्तरतस्तस्मिन्स्नातुं तं संदिदेश ह ॥ ततस्तदाज्ञया भद्रे नारदो देवदर्शनः ॥ २३ ॥
निममज्ज जले तस्मिन्ध्यायञ्छ्रीकृष्णसंगमम् ॥ निमज्जमाने सरसि नारदे मुनिसत्तमे ॥ २४ ॥ ययौ वृन्दांतिकं भद्रे संविधाय तदीप्सि
तम् ॥ अथासौ नारदस्तत्र सन्निमज्योद्गतस्तदा ॥ २५॥ ददर्श निजमात्मानं वनितारूपमद्भुतम् ॥ ततस्तु परितो वीक्ष्य नारदी सा शुचिस्मिता
॥ २६ ॥ पूर्वोत्तरायां तिष्ठंती आह्वयंती करेंगितैः ॥ ददर्श वनितां रम्यां भूषितां भूषणोत्तमैः ॥ २७ ॥ ततस्तया समाहूता नारदी
सा तदंतिकम् ॥ प्राप्ता विश्वासिता स्वस्था नीता चापि स्थलांतरम् ॥ २८ ॥ रत्नप्राकारखचिते भवने वनिताकुले ॥ प्रापय्य तां
निवृत्तासौ सापि ताभिः सुसत्कृता॥२९॥ विशाखादिसखीवृन्दैराश्वास्याऽऽलयैकया ततः ॥ प्रापिताभ्यंतरं देवि सापश्यद्गोपिकेश्वरम् ॥३०॥दूत्यां
तस्यां निवृत्तायां समाहूता प्रियेण सा ॥ नारदी प्रणिपत्येशं लज्जानम्रांतिकं ययौ ॥३१ ॥ रसिकेन समाश्लिष्य रमयित्वा विसर्जिता ॥ क्रमेणैव

तु संप्राप्ता सा पुनः कौसुमं सरः ॥ ३२ ॥ सा पुनस्तत्र माधव्या मज्जिता दक्षपश्चिमे ॥ पुंभावमभिसंप्राप्तो नारदो विस्मितोऽभवत् ॥ ३३ ॥
ततो वृन्दाज्ञया तत्र सरसः पूर्वदक्षिणे ॥ एकांतं तप आस्थाय तस्थौ तत्प्रेक्षणोत्सुकः ॥ ३४ ॥ एवं तपस्यतस्तस्य नारदस्य महात्मनः ॥ वृन्दया
प्रेषितैर्वृत्तिं निजां कल्पयतः फलैः ॥ ३५ ॥ एकदा नारदस्तत्र विचरन्नाश्रमांतरे ॥ शुश्राव सौभगं शब्दं कयाचित्समुदीरितम् ॥ ३६ ॥ तच्छ्रुत्वा
कौतुकाविष्टो नारदोऽध्यात्मदर्शनः ॥ विचिन्वन्वनमास्थाय न ददर्श च तत्पदम् ॥ ३७ ॥ततः स विस्मयाविष्टो वृंदां पप्रच्छ सादरम् ॥ सापि
तस्मै समाचख्यौ कुब्जावृत्तांतमादितः ॥ ३८ ॥ भूम्यंतरगृहस्थाना कुब्जा नारी वरा विभोः ॥ काममेकांतके स्वेशं समुपाचरति स्वयम् ॥ ३९ ॥
न तां कोऽपि मुनिश्रेष्ठ विजानाति मया विना ॥ ततः संक्षपतो वक्ष्ये यां दिदृक्षुस्तपोऽचरः ॥ ४० ॥ प्रातः प्रबोधितो मात्रा स्नात्वा भुक्तानुगा
न्वितः ॥ गोचारणाय विपिने वृन्दावन उपाविशत् ॥ ४१ ॥ सखिभिर्गोपकैः क्रीडां कुर्वन्संवारयंश्च गाः ॥ द्वित्रैः प्रियसखैरत्र ममाश्रम उपाव्रजत्
॥ ४२ ॥ मया प्रकल्पितैर्वत्सभवने सार्वकामिके ॥ फलमूलादिभिर्भक्ष्यैस्तर्पितः प्रिययाऽस्वपत् ॥ ४३ ॥ सुसख्या राधया तत्र सेव्यमानो
व्रजप्रियः ॥ सार्द्धयामं विहरति निकुंजेषु पृथक् पृथक् ॥ ४४ ॥ राधादिभिस्तत्र सुप्तो वीजितः शयनं गतः ॥ सार्द्धयामे स्वयं बुद्धो निजाः
संमान्य ताः प्रियाः ॥ ४५ ॥ गोपैर्गोभिर्वृतः सायं व्रजं याति प्रहर्षितः ॥ सख्यः सखिस्थलं प्राप्य प्रियां संचय राधिकाम् ॥ ४६ ॥
तया सह विशालाक्ष्यः स्वगेहान्यान्ति चान्वहम् ॥ एवं गतागतं कुर्वँल्लीलां नित्यमुपागतः ॥ ४७ ॥ मयैव दृश्यते वत्स नापि ब्रह्मभवादिभिः ॥
मयाप्यलक्षितं वत्स कुब्जासंकेतवैभवम् ॥ ४८ ॥ प्रीतप्रियोक्त्या जानामि सुगोप्यं प्रवदामि ते ॥ अंगरागार्पणात्पुण्यात्प्राप्ता संकेतमुत्तमम् ॥४९॥
सदा सा सेवनव्यग्रा सैकैकेनाप्यनेकधा ॥ शतकोटिमितान्येवं मिथुनानि वसंति हि ॥ ५० ॥ कुब्जाकृष्णानुरूपाणि नानाक्रीडापराणि च ॥ संभू
तान्याद्यमिथुनात्स्थावरं भावयंत्यपि ॥ ५१ ॥ गतागतविहीनानि नित्यं नवनवानि च ॥ तदगम्यं तृतीयस्य द्वितीयस्यैकतां गतम् ॥ ५२ ॥
रूपं विलक्षणं विप्र सृष्टिस्थितिलयैकलम् ॥एकैवाहं विजानामि श्रुतं श्रुत्वा त्वमप्यथ॥५३ ॥दग्धः षड्वर्णगो मंत्र इत्युक्तं समुपाचर ॥ श्रुत्वैतद्दुर्लभं
सोऽपि वृन्दोक्त्या नारदो मुनिः ॥ ५४ ॥ उभयं चिंतयन्प्राप्तो मुनिस्तत्रैव तत्परम् ॥ एतद्रहस्यं विधिज विषयं गुरुशिष्ययोः ॥ ५५ ॥ नैव
कोऽप्यपरो वेत्ति धर्मः सैवावयोरपि ॥ एक एव विजानाति वक्तुः श्रोतैकतः शुभे ॥ ५६ ॥ तदेकं तत्त्वमेवास्ति नेह नानास्ति किंचन ॥

गदितं ते महाभागे रहस्यं गोपिकेशितुः ॥ ५७ ॥ प्रकाशाचारितं चापि वक्ष्ये सम्यङ्निशामय ॥ यत्र संदर्शितं तत्त्वं त्वत्पित्रे विधिनं
दिनि ॥ ५८ ॥ तद्ब्रह्मकुंडमेतद्धि पुण्यं वृन्दावने वने ॥ तत्र यः स्नाति मनुजो मूलवेषं विभावयन् ॥ ५९ ॥ वैभवं पश्यते किंचिदेवं नित्यविहा
रिणः ॥ शक्रेण ज्ञाततत्त्वेन गोविन्दो यत्र चिंतितः॥६०॥ गोविंदकुंडं तद्भद्रे स्नात्वा तत्रापि तल्लभेत् ॥ एकानेकस्वरूपेण यत्र कुंजविहारिणा॥६१ ॥
बल्लवीभिः समारब्धो रासस्तदपि तद्विधम् ॥ यत्र नंदादयो गोपा ददृशुर्वैभवं विभोः ॥ ६२ ॥ तच्च तत्त्वप्रकाशाख्यं तीर्थं श्रीयमुनाजले ॥
दर्शितं यत्र गोपानां कालियस्य विमर्दनम् ॥ ६३ ॥ तच्च पुण्यं समाख्यातं तीर्थं पापापहं नृणाम् ॥दावाग्नेर्मोचिता यत्र सस्त्रीबालधनार्भकाः
॥ ६४ ॥ गोपाः कृष्णेन तत्पुण्यं तीर्थं स्नानादघापहम् ॥ यत्र केशी हतस्तेन लीलयैव हयाकृतिः ॥ ६५ ॥ तत्र स्नातस्तु मनुजो
लभते धाम वैष्णवम् ॥ यत्र दुष्टो वृषस्तेन हतस्तत्राभवच्छुचिः ॥ ६६ ॥ अरिष्टकुंडं विख्यातं स्नानमात्रेण मुक्तिदम् ॥ धेनुकोऽघो बको वत्सो
व्योमो लंबासुरोऽपि च ॥ ६७ ॥ हताः कृष्णेन लीलासु तत्र तीर्थानि यान्यपि ॥ तेषु स्नात्वा नरो भक्तः संतर्प्य पितृदेवताः ॥ ६८ ॥
लभते वांछितान्कामान् गोपालस्य प्रसादतः ॥ सुतं भुक्तं विचारितं श्रुतं दृष्टं विलक्षणम् ॥ ६९ ॥ कृतं यत्र च तत्क्षेत्रं स्नानात्स्वर्गगतिप्रदम् ॥
श्रुतः संचिंतितो दृष्टो नतः श्लिष्टः स्तुतोऽर्थितः ॥ ७० ॥ यत्र पुण्यनरैर्भद्रे तच्च तीर्थं गतिप्रदम् ॥ यत्र श्रीराधया भद्रे तपस्तप्तं सुदारुणम्
॥ ७१ ॥ तच्छ्रीकुंडं महत्पुण्यं स्नाने दाने जपादिके ॥ वत्सतीर्थं चंद्रसरस्तथैवाप्सरसां सरः ॥ ७२ ॥ रुद्रकुंडं कामकुंडं परमं मंदिरं
हरेः ॥ विशालालकनंदाढ्या नीपखण्डं मनोहरम्॥७३॥ विमलं धर्मकुंडं च भोजनस्थलमेव च ॥ बलस्थानं बृहत्सानुः संकेतस्थानकं हरेः
॥ ७४॥ नंदिग्रामः किशोर्याश्च कुंडं कोकिलकाननम्॥शेषशायिपयोऽब्धिश्च क्रीडादेशोऽक्षयो वटः॥७५॥रामकुंडं चीरचौर्यं भद्रभांडीरबिल्वकम् ॥
मानाह्वं च सरः पुण्यं पुलिनं भक्तभोजनम् ॥ ७६ ॥ अक्रूरं तार्क्ष्यगोविंदं बहुलारण्यकं शुभे ॥ एतद्वृंदावनं नाम समंतात्पंचयोजनम् ॥ ७७ ॥
सुपुण्यं पुण्यकृज्जुष्टं दर्शनादेव मुक्तिदम् ॥ यस्य संदर्शनं देवा वांछंति च सुदुर्लभम् ॥ ७८ ॥ लीलामाभ्यंतरीं द्रष्टुं तपसापि न च क्षमाः ॥ सर्वत्र
संगमुत्सृज्य यस्तु वृन्दावनं श्रयेत्॥७९॥ न तस्य दुर्लभं किंचित्त्रिषु लोकेषु भामिनि ॥ वृन्दावनेति नामापि यः समुच्चरति प्रिये ॥ ८० ॥
तस्यापि भक्तिर्भवति सततं नंदनंदने ॥ यत्र वृन्दावने पुण्ये नरनारीप्लवंगमाः ॥ ८१ ॥ कृमिकीटपतंगाद्याः खगा वृक्षा नगा मृगाः ॥

समुच्चरंति सततं राधाकृष्णेति मोहिनि ॥ ८२ ॥ कृष्णमायाभिभूतानां कामकश्मलचेतसाम् ॥ स्वप्नेऽपि दुर्लभं पुंसां मन्ये वृन्दावनेक्षणम् ॥८३ ॥
वृन्दारण्यं तु यैर्दृष्टं नरैः सुकृतिभिः शुभे ॥ तैः कृतं सफलं जन्म कृपापात्राणि ते हरेः ॥ ८४ ॥ किं पुनर्बहुनोक्तेन श्रुतेन विधिनंदिनि ॥ सेव्यं
वृन्दावनं पुण्यं भव्यं मुक्तिमभीप्सुभिः ॥ ८५ ॥ दृश्यं गम्यं च संसेव्यं ध्येयं वृन्दावनं सदा ॥ नास्ति लोके समं तस्य भुवि कीर्तिविवर्द्धनम्
॥ ८६ ॥ यत्र गोवर्द्धनो नाम द्विजः कल्पे पुरातने ॥ विरक्तः सर्वसंसारात्ततपवान्परमं तपः ॥ ८७ ॥ तद्गत्वा देवि देवेशो भगवान्विष्णुरव्ययः ॥
क्रीडास्थानं निजं प्राप्तो वरं दातुं द्विजन्मने ॥८८ ॥ तं दृष्ट्वा देवदेवेशं शंखचक्रगदाधरम् ॥ विलसत्कौस्तुभोरस्कं मकराकृतिकुंडलम् ॥ ८९ ॥
सुकिरीटं सुकटकं कलनूपुरभूषितम् ॥ वनमालानिवीतांगं श्रीवत्सांकितवक्षसम् ॥ ९० ॥ पीतकौशेयवसनं नवांबुदसमप्रभम् ॥ सुनाभिं सुंदरग्रीवं
सुकपोलं सुनासिकम् ॥९१ ॥ सुद्विजं सुस्मितं सुष्ठुजानूरुभुजमध्यकम् ॥ कृपार्णवं प्रमुदितं सुप्रसन्नमुखांबुजम् ॥ ९२ ॥ दृष्ट्वा स सहसोत्थाय
ननाम भुवि दंडवत् ॥ वरं ब्रूहीति निर्दिष्टो प्राह गोवर्द्धनो हरिम् ॥९३ ॥ पद्भ्यामाक्रम्य मत्पृष्ठे तिष्ठ चैष वरो मम ॥ तच्छ्रुत्वा भक्तवश्यो वै
विचिंत्य च पुनः पुनः ॥९४ ॥ तस्थौ तत्पृष्ठमाक्रम्य तदा भूयो द्विजोऽब्रवीत् ॥ नाहं त्वामुत्सहे देव निजपृष्ठे जगत्पते ॥९५॥ अवतारयितुं
तस्मादेवमेव स्थिरो भव ॥ ततः प्रभृति विश्वात्मा त्यक्त्वा गोवर्द्धनं द्विजम् ॥ ९६ ॥ गिरिरूपधरं याति नित्यं योगिवनं क्वचित् ॥ कृष्णा
वतारे भगवान् ज्ञात्वा गोवर्द्धनं द्विजम् ॥ ९७॥ संप्राप्तं निजसारूप्यं नंदाद्यैः समभोजयत् ॥ अन्नकूटेन दोहेन तर्पयित्वाचलं द्विजम् ॥ ९८॥
तद्विपरीतं समाज्ञाय नवमेघानपाययत् ॥ मित्रं स वासुदेवस्य संजातं तेन कर्मणा ॥ ९९॥ तं यो भक्त्या नरो देवि पूजयेदुपचारकैः ॥ प्रदक्षिणं
परिक्रामेन्न तस्य पुनरुद्भवः ॥ १०० ॥ गोवर्द्धनो गिरिः पुण्यो जातो हरिनिवासतः ॥ तं दृष्ट्वा दर्शनेनालमन्यपुण्याचलस्य च ॥ १०१ ॥
यामुनं पुलिनं रम्यं कृष्णविक्रीडनांचितम् ॥ त्वमेव ब्रूहि सुभगे क्वान्यत्र जगतीतले ॥ १०२ ॥ तस्मात्सर्वप्रयत्नेन त्यक्त्वा वननदीगिरीन्॥
सु पुण्यान्पुण्यदान्नृणां सेव्यं वृन्दावनं सदा ॥१०३॥ यमी पुण्या नदी यत्र पुण्यो गोवर्द्धनो गिरिः ॥ तत्किं वृन्दावनात्पुण्यमरण्यं भुवि विद्यते
॥ १०४ ॥ कलिकल्मषभीतानां विषयासक्तचेतसाम् ॥ नान्यं वृन्दावनात्सेव्यमस्ति लोकेष्वपि त्रिषु ॥ १०५ ॥ यस्मिन्नित्यं विचरति
हारिगोंपगोगोपिकाभिर्बर्हापीडी नटवरवपुः कर्णिकारावतंसी ॥ वंशीहंसीस्वनजितरवो वैजयंतीवृतांगो नंदस्यांगाद्भुतमणिगणो यश्च हंसोऽहमाख्यः

॥१०६॥यस्य ध्यानं नगजनियुतोऽहर्निशं वै गिरीशो भक्तिक्लिन्नो रहसि कुरुते ह्यर्द्धनारीश्वराख्यः ॥ गायत्रीं स्त्रीं हृदयकुहरे पद्मयोनिर्विधत्ते
नेत्रैरिन्द्रो दशशतमितैर्वीक्षते वै शचीं ताम्॥१०७॥अश्रोत्रेशो रहसि वनितां रक्षति स्वां रसज्ञो वंशीनादश्रवणजभिया कान्यवार्ता जनानाम्॥ छेदं
शोषं तदनु दहनं भेदनं प्राप्य यासीच्छ्रीगोपीशाधरजनिसुधां सादरं शीलयंती॥१०८॥याभिर्वृंदावनमनुगतो नंदसूनुः क्षपासु रेमे चंद्रांशुकलितसमुद्यो
तभद्रे निकुञ्जे॥तासां दिष्टं किमहमधुना वर्णये बल्लवीनां यासां साक्षाच्चरणजरजः श्रीशविध्याद्यलभ्यम्॥१०९॥यत्र प्राप्तास्तृणमृगखगा ये कृमिप्राणि
वृन्दा वृन्दारण्ये विधिहररमाभ्यर्हणीया भवंति॥तत्संप्राप्याद्वयपदरतो ब्रह्मभूयं गतःकौ प्रेमस्निग्धो विहरति सुखांभोधिकल्लोलमग्नः॥११०॥यत्र क्रूराः
सहजमसुभृद्व्रातजाता विसृज्य वैरं स्वैरं सुहृद इव तत्सौख्यमेवाश्रयंते ॥ तत्किं प्राप्य प्रभुमिव जनः संपरित्यज्य गच्छन्क्वाप्यन्यत्र प्रभवति सुखी
कृष्णमायाकरंडे॥१११॥वृन्दारण्यं तदखिलधरापुण्यरूपं श्रयन्मे स्वांतं ध्वांतं जगदिदमधः कृत्य वर्वर्ति शश्वत्॥गोपीनाथः प्रतिपदमपि प्रेमसं
क्लिन्नचेता नीचं वोच्चं न च गणयति प्रोद्धरत्येव भक्तान्॥११२॥गोपान् गोपीः खगमृगनगागोपगोभूरजांसि स्मृत्वा दृष्ट्वा प्रणमति जने प्रेमरज्ज्वा
निबद्धः॥दास्यं भक्ते कलयतितरां तत्किमन्यं व्रजेशात्सेव्यं देवं गणय विधिजेऽहं तु जानामि नैव॥११३॥ एतत्संक्षेपतः प्रोक्तं वृन्दारण्यसमुद्भवम्॥
माहात्म्यं विधिजे तुभ्यं वक्तव्यं नावशेषितम्॥११४॥संसारभीतैर्मनुजैरेतदेव सदानघैः॥ श्रोतव्यं कीर्तनीयं च स्मर्तव्यं ध्येयमेव च॥११५॥वृन्दा
रण्यस्य माहात्म्यं यः शृणोति नरः शुचिः॥ कीर्तयेद्वापि विधिजे सोऽपि विष्णुर्न संशयः ॥ इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे वसु
मोहिनीसंवादे श्रीवृन्दावनमाहात्म्यं नामाशीतितमोऽध्यायः ॥ ८०॥ वसुरुवाच ॥ यदेतत्कीर्तितं देवि तीर्थमाहात्म्यमुत्तमम् ॥तल्लभस्व महाभागे
चरित्वा तीर्थमंडलम् ॥ १ ॥ अहं ब्रह्माणमामंत्र्य पितरं ते नरेश्वरि ॥ वृन्दावनमुपागम्य चरिष्यामि मृगैः सह॥२ ॥ सूत उवाच ॥ इत्युक्त्वा
मोहिनीं विप्रा वसुस्तस्याः पुरोहितः ॥ सत्कृत्य पूजितोऽभीक्ष्णं ब्रह्मलोकं ययौ तथा ॥ ३ ॥ स गत्वा तत्र धातारं ब्रह्माणं जगतां
विधिम्॥ प्रणम्य मोहिनीवृत्तं तं कार्त्स्न्येन न्यवेदयत् ॥ ४ ॥ तच्छ्रुत्वा वचनं ब्रह्मा ब्राह्मणस्य वसोर्द्विजाः ॥ प्रसन्नः प्राह तं वत्स सुकृतं हि
त्वया कृतम् ॥ ५ ॥ या मया मोहिनी विप्र देवकार्यार्थमात्मजा ॥ नियुक्ताऽकृतकार्या सा त्वया शप्ता क्षयं गता ॥ ६ ॥ भूयो ममाज्ञया वत्स
त्वया संजीविताधुना ॥ नीता कृतार्थतां तस्मात्कोऽन्यस्त्वत्तोऽधिकः कृती॥ ७॥ यत्त्वया मह्यमाख्यातं मोहिनीवृत्तमुत्तमम्॥प्रसन्नस्तेन दास्यामि

ब्रूहि तुभ्यं वरं द्विज ॥८॥ इत्युक्तः स द्विजस्तेन ब्रह्मणा लोकभाविना ॥ प्रणम्य वव्रे स वरं वृन्दारण्यनिवासनम् ॥ ९ ॥ तच्छुत्वा जगतां धाता
स्मयमानचतुर्मुखः ॥ प्राह प्रपन्नार्तिहरस्तथास्त्विति मुनीश्वराः ॥ १० ॥ स प्रणम्य विधातारं वसुर्हृष्टमनास्ततः॥वृन्दावनमुपाव्रज्य तपश्चक्रे समाहितः
॥ ११ ॥ तपतस्तस्य तु वसोः संवत्सरगणा द्विजाः ॥व्यतीयुः पंचसाहस्रास्ततस्तुष्टो हरिः स्वयम्॥ १२ ॥ गोपैः प्रियसखैर्दिव्यैर्युतोऽभ्याह
द्विजोत्तमम्॥ब्रूहि किं वृणुषे विप्र तुष्टोऽहं तपसा तव॥१३॥ ततः स वसुरुत्थाय अष्टांगालिंगितावनिः॥ प्राह वृन्दावने देव वासमिच्छामि सर्वदा
॥ १४ ॥ अथ विष्णुर्द्विजश्रेष्ठा वरं तद्वांछितं ददौ ॥ तेनाभिवंदितो भूयो ह्यंतर्धानमुपागतः ॥ १५ ॥ स द्विजस्तत्प्रभृत्येवं स्वेच्छारूपधरः
स्थितः ॥ चिंतयन्सततं देवं वृन्दारण्यकुतूहलम्॥१६॥ कदाचिद्यमुनातीरे निविष्टस्तं विचिंतयन् ॥ ददर्श नारदं प्राप्तं वृन्दारण्यं विधेः सुतम्॥१७॥
स तं दृष्ट्वा नमस्कृत्य परमं गुरुमात्मनः ॥ प्रपच्छ विविधान्धर्मान् भगवद्भक्तिवर्द्धनान् ॥ १८ ॥ स तेनैवं सुसम्पृष्टो नारदोऽध्यात्मदर्शनः
॥ तस्मै प्रोवाच निखिलं भविष्यच्चरितं हरेः ॥ १९ ॥ एकदाहं गतो विप्र देवं कैलासवासिनम् ॥ द्रष्टुं प्रष्टुं भविष्यच्च वृंदावनरहस्यकम्
॥२०॥ ततः प्रणयम्य देवेशं ततः सिद्धैः समावृतम् ॥ महेशं स्वमहिव्याप्तसर्वब्रह्मांडगोलकम् ॥ २१ ॥ अपृच्छमीप्सितं भद्रं स मां प्राहस्मयन्हरः
॥ वैधात्र यत्त्वया पृष्टं हरेर्वृत्तमनागतम् ॥ २२ ॥ तत्ते ब्रवीमि यत्पूर्वं श्रुतं सुरभिवक्त्रतः ॥ एकदा सुरभिर्दृष्टा मया गोलोकमध्यगा
॥ २३ ॥ स्वसंतानसमायुक्ता सुप्रीता स्निग्धमानसा ॥ ततः पृष्टा भविष्यार्थे गवां माता पयस्विनी ॥ २४ ॥ मह्यं प्रोवाच देवर्षे भविष्यच्चरितं
हरेः ॥ सुखमास्तेऽधुना देवः कृष्णो राधासमन्वितः ॥२५॥ गोलोकेऽस्मिन्महेशान गोपगोपीसुखावहः ॥ स कदाचिद्धरालोके माथुरे मंडले
शिव ॥ २६ ॥ आविर्भूयाद्भुतां क्रीडां वृंदारण्ये करिष्यति ॥ वृषभानुसुता राधा श्रीदामानं हरेः प्रियम्॥ ॥ २७ ॥ सखायं विरजागेहद्वाःस्थं
क्रुद्धा शयिष्यति ॥ ततः सोऽपि महाभाग राधां प्रतिशपिष्यति ॥ २८ ॥ याहि त्वं मानुषं लोकं मिथः शापाद्धरां ततः ॥प्राप्स्यत्यथ हरिः पश्चाद्ब्रह्मणा
प्रार्थितः क्षितौ ॥ २९ ॥ भूभारहरणायैव वासुदेवो भविष्यति ॥ वसुदेवगृहे जन्म प्राप्य यादवनंदनः ॥ ३० ॥ कंसासुरभिया पश्चाद्व्रजं
नन्दस्य यास्यति ॥ तत्र यातो हरिः प्राप्तां पूतनां बालघातिनीम् ॥ ३१ ॥ वियोजयिष्यति प्राणैश्चक्रवातं च दानवम् ॥ वत्सासुरं महाकायं
हनिष्यति सुरार्द्दनम् ॥ ३२ ॥ दमित्वा कालियं नागं यम्या उच्चाटयिष्यति ॥ दुःसहं धेनुकं हत्वा बकं तद्वदघासुरम् ॥ ३३ ॥ दावं प्रदावं च

तथा प्रलंबं च हनिष्यति ॥ ब्रह्माणमिंद्रं वरुणं प्रमत्तौ धनदात्मजौ ॥ ३४ ॥ विमदान्स विधायेशो हनिष्यति वृषासुरम् ॥ शखचूडं केशिनं च
व्योमं हत्वा व्रजे वसन् ॥ ३५ ॥ एकादश समास्तत्र गोपीभिः क्रीडयिष्यति॥ ततश्च मथुरां प्राप्य रजकं संनिहत्य च ॥ ३६ ॥ कुब्जामृज्वीं
ततः कृत्वा धनुर्भंक्त्वा गजोत्तमम् ॥ हत्वा कुवलयापीडं मल्लांश्चाणूरकादिकान् ॥ ३७ ॥ कंसं स्वमातुलं कृष्णो हनिष्यति ततः परम् ॥ विमुच्य
पितरौ बद्धौ यवनेशं निहत्य च ॥ ३८ ॥ जरासंधभयात्कृष्णो द्वारकायां समुष्यति ॥ रुक्मिणीं सत्यभामां च सत्यां जाम्बवतीं तथा ॥ ३९ ॥
कैकेयीं लक्ष्मणां मित्रविंदां कालिंदिकां विभुः॥ दारान्षोडशसाहस्रान्भौमं हत्वोद्वहिष्यति॥४०॥पौंड्रकं शिशुपालं च दंतवक्रं विदूरथम्॥ शाल्वं
च हत्वा द्विविदं बल्वलं घातयिष्यति ॥ ४१ ॥ वज्रनाभं सुनाभं च सार्द्धं वै षट्पुरालयैः ॥ त्रिशरीरं ततो दैत्यं हनिष्यति वरोर्जितम् ॥ ४२ ॥
कौरवान्पांडवांश्चापि निमित्तमितरेतरम् ॥ कृत्वा हनिष्यति शिव भूभारहरणोत्सुकः ॥ ४३ ॥ यदून्यदुभिरन्योन्यं संहत्य स्वकुलं हरिः ॥
पुनरेतन्निजं धाम समेष्यति च सानुगः ॥ ४४ ॥एतत्तेऽभिहितं शंभो भविष्यच्चरितं हरेः ॥ गच्छ द्रक्ष्यसि तत्सर्वं जगतीतलगे हरौ॥४५॥तच्छ्रुत्वां
सुरभेर्वाक्यं भृशं प्रीतो विधातृज ॥ स्वस्थानं पुनरायातस्तुभ्यं चापि मयोदितम् ॥ ४६ ॥ त्वं च द्रक्ष्यसि कालेन चरितं गोकुलेशितुः ॥
तच्छ्रुत्वा शूलिनो वाक्यं वसुर्हृष्टतनूरुहः ॥ ४७ ॥ गायन्माद्यन् विभुं तंत्र्या रमयाम्यातुरं जगत् ॥ एतद्भविष्यत्कथितं मया तुभ्यं द्विजो
त्तम ॥ ४८ ॥ यथा तु गौतमस्तद्वदहं चापि हिते रतः॥ सूत उवाच ॥ इत्युक्त्वा नारदस्तस्मै वसवे स द्विजन्मने ॥ ४९ ॥ जगाम वीणा
रणयंश्चिन्तयन्यदुनंदनम् ॥ स वसुस्तद्वचः श्रुत्वा व्रजे सुप्रीतमानसः ॥ ५० ॥ उवास सर्वदा विप्राः कृष्णक्रीडेक्षणोत्सुकः ॥ ५१ ॥
इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे वसुमोहिनीसंवादे वसुचरित्रनिरूपणं नामैकाशीतितमोऽध्यायः॥८१॥ ऋषय ऊचुः॥सूत साधो
त्वयाख्यातं श्रीकृष्णचरितामृतम् ॥ श्रुंत कृतार्थास्तेन स्मो वयं भवदनुग्रहात् ॥ १ ॥ गते वसौ ब्रह्मलोकं मोहिनी विधिनंदिनी ॥ किं
चकार ततः पश्चात्तन्नो व्याख्यातुमर्हसि ॥२॥ सूत उवाच ॥ शृणुध्वमृषयः सर्वे मोहिन्याश्चरितं शुभम् ॥ यच्चकार वसोः पश्चात्तीर्थानां परिसेवनम्
॥ ३ ॥ यथानुशिष्टा वसुना मोहिनी सा विधेः सुता ॥ जगाम विधिना तीर्थयात्रार्थं स्वर्णदीतटम् ॥ ४ ॥ तत्र गत्वा समाप्लुत्य गंगादीनि
तु वैधसी ॥ चचार विधिवद्दृष्टा ब्राह्मणैः सह संगता ॥ ५ ॥ पुरोहितेन वसुना यस्य तीर्थस्य यो विधिः ॥ कथितस्तत्प्रकारेण सेवमाना

चचार ह ॥६॥ तेषु तीर्थेषु देवांश्च विष्णवादीन्पूजयंत्यथ ॥ समर्पयंती विप्रेभ्यो दानानि विविधानि च ॥ ७ ॥ गयायां विधिवद्भर्तुः पिंडदानं चकार ह ॥ काश्यां विश्वेश्वरं प्रार्च्य संप्राप्ता पुरुषोत्तमम् ॥ ८ ॥ तस्मिन् क्षेत्रे तु नैवेद्यं भुक्त्वा सा जगदीशितुः ॥ शुद्धदेहा ततः पश्चात्संप्राप्ता लक्ष्मणाचलम् ॥ ९ ॥ तं समभ्यर्च्य विधिवद्गत्वा सेतुं समर्च्य च ॥ रामेश्वरं महेंद्राद्रिं भार्गवं समवंदत ॥ १० ॥ गोकर्णं च शिवक्षेत्रं गत्वाभ्यर्च्य तमीश्वरम् ॥ प्रभासं प्रययौ विप्राः सार्द्धं तैर्द्विजसत्तमैः ॥ ११ ॥ स्नात्वा संतर्प्य देवादींस्तस्य यात्रां विधाय च ॥ द्वारकायां हरिं दृष्ट्वा कुरुक्षेत्रं जगाम सा ॥ १२ ॥ तत्रापि विधिवद्यात्रां संविधाय नरेश्वरी ॥ गंगाद्वारमुपेयाय तत्र सस्नौ विधानतः ॥ १३ ॥ ततस्तु दृष्ट्वा कामोदां नमस्कृत्य मुदान्विता ॥ बदर्याश्रममासाद्य नरनारायणावृषी ॥ १४ ॥ समभ्यर्च्याथ कामाक्षीं ययौ द्रष्टुं त्वरान्विता ॥ सिद्धनाथं नमस्कृत्य ततोऽयोध्यामुपागता ॥ १५ ॥ स्नात्वा सरय्वां विधिवत्प्रार्च्य सीतापतिं ततः ॥ मध्ययात्रामुपाश्रित्य ययावमरकंटकम् ॥ १६ ॥ महेशं तत्र संपूज्य प्रतिस्रोतस्तुनर्मदाम् ॥ संसेव्योंकारमीशानं दृष्ट्वा माहिष्मतीं ययौ ॥ १७ ॥ त्र्यंबकेशं ततः प्रार्च्य संप्राप्ता सा त्रिपुष्करम् ॥ पुष्करेषु विधानेन दत्वा दानान्यनेकशः ॥ १८ ॥ संप्राप्ता सा तु मथुरां सर्वतीर्थोत्तमोत्तमाम् ॥ विधायाभ्यंतरीं यात्रां योजनानां तु विंशतिम् ॥ १९ ॥ परिक्रम्य पुरीं पश्चाच्चतुर्व्यूहं ददर्श सा ॥ स्नात्वा विंशतितीर्थे तु समाप्याथ प्रदक्षिणाम् ॥ २० ॥ धेनूनामयुतं प्रादान्माथुरेभ्यो ह्यलंकृतम् ॥ संभोज्य तान्वरान्नेन भक्तिक्लिन्नेन चेतसा ॥ २१ ॥ नमस्कृत्य विसृज्यैतान्कालिंदीं समुपाविशत् ॥ ततः प्रविष्टा सा देवीं कालिंदीमघनाशिनीम् ॥ २२ ॥ नाद्यापि निर्गता भूयो यमतिथ्यंतमास्थिता ॥ स्मार्तान्सूर्योदयं प्राप्य श्रौतानप्यरुणोदयम् ॥ २३ ॥ निशीथं वैष्णवान्विप्राः प्राप्य दूषयते व्रतान् ॥ मोहिनीवेधरहितामुपोष्यैकादशीं नरः ॥ २४ ॥ द्वादश्यां विष्णुमभ्यर्च्य वैकुंठं यात्यसंशयम् ॥ मोहिनी विधिजा देवी विष्णुजैकादशी द्विजाः ॥ २५ ॥ विष्णुजास्पर्द्धया धात्रा मोहिनी सा विनिर्मिता ॥ रुक्मांगदस्तु राजर्षिर्विष्णुभक्तिपरायणः ॥ २६ ॥ न तु वारयितुं शक्ता सा तमेकादशीव्रतात् ॥ विष्णुलोकं गते तस्मिन्सभार्ये ससुते नृपे ॥ २७ ॥ स्पर्द्धत्यैकादशीं सिद्धिं यमान्ते मोहिनी स्थिता ॥ इत्येतदुक्तं विप्रेंद्रा मोहिनीचरितं मया ॥ २८ ॥ यदर्थं निर्मिता धात्रा तथा चात्र व्यवस्थिता ॥ नारदीयोत्तरं ह्येतत्प्रोक्तं वो भुक्तिमुक्तिदम् ॥ २९ ॥ अत्र सम्यग्घरेर्भक्तिः साध्यतेऽनुपदं नृणाम् ॥ नारदीयं पुराणं तु लक्षणैर्दशभिर्युतम् ॥ ३० ॥ यः शृणोति नरो भक्त्या स गच्छेद्वैष्णवं पदम् ॥ धर्मार्थकाममोक्षाणां चतुर्णां

कारणं परम् ॥ ३१ ॥ सर्वेषां च पुराणानामिद बीजं सनातनम् ॥ प्रवृत्तं च निवृत्तं च पुराणेऽस्मिन्द्विजोत्तमाः ॥ ३२ ॥ विस्तरादुदितं सर्वं
पाराशर्येण धीमता ॥ अलौकिकचरित्राढ्यं पुराणं नारदीयकम्॥३३॥ यस्मै कस्मै न दातव्यं मह्यं व्यासेन कीर्तितम् ॥ हित्वा स्वशिष्यान्पैलादी
न्मह्यं. नारदसंहिताम् ॥ ३४ ॥ यो व्याचक्रे नमस्तस्मै वेदव्यासाय विष्णवे ॥ पुराणसंहितामेतां नारदाय विपश्चिते ॥३५॥ सनकाद्या महाभागा
मुनयः प्रचकाशिरे ॥ हंसस्वरूपी भगवान्यदा तं ब्रह्म शाश्वतम् ॥ ३६ ॥ तदुपादिशदेतेभ्यो विज्ञानेन विजृंभितम् ॥ तदिदं भगवान्साक्षान्नारदो
ऽध्यात्मदर्शनः ॥ ३७ ॥ वेदव्यासाय मुनये रहस्यं निर्दिदेश ह ॥ मया प्रकाशितं ह्येतद्रहस्यं भुवि दुर्लभम् ॥ ३८ ॥ चतुर्वर्गप्रदं नृणां शृण्वतां
पठतां सदा ॥ विप्रो वेदनिधिर्भूयात्क्षत्रियो जयते महीम् ॥ ३९ ॥ वैश्यो धनसमृद्धः स्याच्छूद्रो मुच्येत दुःखतः ॥ पंचविंशतिसाहस्री
संहितेयं प्रकीर्तिता ॥ ४० ॥ पंचपादसमायुक्ता कृष्णद्वैपायनेन ह ॥ अस्यां वै श्रूयमाणायां सर्वसंदेहभंजनम् ॥ ४१ ॥ पुंसां सकामभक्तानां
निष्कामानां विमोक्षणम् ॥ पुण्यतीर्थं समासाद्य नैमिषं पुष्करं गयाम् ॥ ४२ ॥ मथुरां द्वारकां विप्रा नरनारायणाश्रमम् ॥ कुरुक्षेत्रं नर्मदां
च क्षेत्रं श्रीपुरुषोत्तमम् ॥ ४३ ॥ हविष्याशी धराशायी निःसंगो विजितेंद्रियः॥ पठित्वा संहितामेनां मुच्यते भवसागरात् ॥ ४४ ॥एकादशी
व्रतानां च सरितां जाह्नवी यथा ॥ वृंदावनमरण्यानां क्षेत्राणां कौरवं यथा ॥ ४५ ॥ यथा काशी पुरीणां च तीर्थानां मथुरा यथा॥
सरसां पुष्करं विप्राः पुराणानामिदं तथा ॥ ४६ ॥ गणेशभक्ताः सौराश्च वैष्णवाः शाक्तशांभवाः ॥ सर्वेऽधिकारिणो ह्यत्र सकामाश्चाप्यका
मकाः ॥४७ ॥ यं यं काममभिध्यायन्नरो नार्यथवादरात्॥ शृणोति श्रावयेद्वापि तं तं प्राप्नोति निश्चितम् ॥ ४८॥ रोगार्तो मुच्यते रोगाद्भयार्तो
निर्भयो भवेत् ॥ जयकामो जयेच्छत्रून्नारदीयानुशीलनात् ॥ ४९ ॥ सृष्ट्यादौ रजसा विश्वं मध्ये सत्त्वेन पाति यः ॥ तमसोंऽते ग्रसेदे
तत्तस्मै सर्वात्मने नमः ॥ ५० ॥ ऋषयो मनवः सिद्धा लोकपालाः प्रजेश्वराः ॥ ब्रह्माद्या रचिता येन तस्मै ब्रह्मात्मने नमः ॥ ५१ ॥ यतो
वाचो निवर्तंते न मनो यत्र संविशेत् ॥ तद्विद्यादात्मनो रूपं ह्यरूपस्य चिदात्मनः ॥ ५२ ॥ यस्य सत्यतया सत्यं जगदेतद्विकाशते ॥
विचित्ररूपं वंदे तं निर्गुणं तमसः परम् ॥ ५३॥ आदौ मध्ये चाप्यजनश्चांते चैकाक्षरो विभुः ॥ विभाति नानारूपेण तं वंदेऽहं निरं
जनम् ॥ ५४ ॥ निरंजनात्समुत्पन्नं जगदेतच्चराचरम् ॥ तिष्ठत्यप्येति वा यस्मिंस्तत्सत्यं ज्ञानमद्वयम् ॥ ५५ ॥ शिवं शैवा वदंत्येनं प्रधानं

सांख्यवेदिनः ॥ योगिनः पुरुषं विप्राः कर्म मीमांसका जनाः ॥ ५६ ॥ विभुं वैशेषिकाद्याश्च चिच्छक्तिं शक्तिचिंतकाः ॥ ब्रह्माद्वितीयं तद्वंदे
नानारूपक्रियास्पदम् ॥ ५७ ॥ भक्तिर्भगवतः पुंसां भगवद्रूपकारिणी ॥ तां लब्ध्वा चापरं लाभं को वांछति विना पशुम् ॥ ५८ ॥
भगवद्विमुखा ये तु नराः संसारिणो द्विजाः ॥ तेषां मुक्तिर्भवाटव्या नास्ति सत्संगमंतरा ॥ ५९ ॥ साधवः समुदाचाराः सर्वलोकहितावहाः
॥ दीनानुकंपिनो विप्राः प्रपन्नास्तारयंति हि ॥ ६० ॥ यूयं धन्यतमा लोके मुनयः साधुसंमताः ॥ यन्मुहुर्वासुदेवस्य कीर्तिं
पल्लवनूतनाम् ॥६१॥ धन्योऽस्म्यनुगृहीतोऽस्मि भवद्भिर्लोकमंगलम् ॥ यत्स्मारितो हरिः साक्षात्सर्वकारणकारणम्॥ ६२ ॥ ॐ॥ इति श्रीनारदीय
पुराणे बृहदुपाख्याने उत्तरभागे महापुराणे एतत्पुराणश्रवणादिफलनिरूपणं नाम द्व्यशीतितमोऽध्यायः॥८२॥समाप्तमिदं सप्तमं नारदीयं महापुराणम्॥

इदं श्रीनारदीय महापुराणं मुम्बय्यां क्षेमराज श्रीकृष्णदासश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर" स्टीम्-यन्त्रागारे मुद्रयित्वा प्रकाशितम् ।
संवत् १९८०, शके १८४५.

अत्रेयमभ्यर्थना ।

अस्माकं मुद्रणालये वेद-वेदान्त-धर्मशास्त्र-प्रयोग-योग-सांख्य-ज्योतिष-पुराणेतिहास-वैद्यक-मंत्र-स्तोत्र-कोश-काव्य-चम्पू-नाटकालंकार-संगीत-नीति-कथाग्रंथाः, बहवः स्त्रीणां चोपयुक्ता ग्रंथाः, बृहज्ज्योतिषार्णवनामा बहुविचित्रचित्रितोऽयमपूर्वग्रन्थः संस्कृतभाषया, हिन्दीमार्वाड्यन्यतरभाषाग्रन्थास्तत्तच्छास्त्राद्यर्थानुवादकाः, चित्राणि, पुस्तकमुद्रणोपयोगिन्यो यावत्यस्सामग्र्यः, स्वस्वलौकिकव्यवहारोपयोगिचित्रचित्रितालिखितपत्रवत्पुस्तकानि च मुद्रयित्वा प्रकाशन्ते सुलभेन मूल्येन विक्रयाय । येषां यत्राभिरुचिस्तत्तत्पुस्तकाद्युपलब्धये एवं नव्यतया स्वस्वपुस्तकानि सुमुद्रयिषुभिः सुलभयोग्यमौल्येन सीसकाक्षरैः स्वच्छोत्तमोत्तमपत्रेषु मुद्रिततत्पुस्तकानां स्वस्वसमयानुसारेणोपलब्धये च पत्रिकाद्वारा तैर्बोधनीयोऽस्मि ।

अधिकमस्मदीयसूचीपुस्तकानां भिन्नभिन्नविषयाणां प्रापणेन " श्रीवेङ्कटेश्वरसमाचार " पत्रिकाप्रापणद्वारा च ज्ञेयमिति शम् ॥

क्षेमराज-श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालयाध्यक्षः- मुंबई.

॥ * इति नारदीयमहापुराणं समाप्तम् * ॥

आ न्वोया को ४५ साल को ८ किरान चोक को १५ लाल को तिर्जा मोह रु २ण दिलियाको अमन्दारका दा [illegible] सितहे

मिति माघ वदि [illegible] रोज १ [illegible]

श्री हुँ ढी

गगनकुमारी